Nyāyāmṛtam of Śrī Vyāsatīrtha with Advaita Siddhi of Madhusudana Saraswatī and the Commentaries of Nyāyāmṛta-Taranginī of Vyāsa Rāmāchārya, Nyāyāmṛta Kaṇṭakoddhāra of Pandurangi Ānanda Bhaṭṭāraka, Nyāyāmṛta Prakāśa of Śrīnivāsa tīrtha. Edited by Prof. K. T. Pandurangi, Published by Dvaita Vedanta Studies and research Foundation.

Pages : 62 + 728

Price : Rs. 240/-

No. of Copies : 1000

First Edition : 1994

Copies can be had from

Dvaita Vedanta Studies and Research Foundation.

No. 88, R.R. Choultry, K.R. Road, Bangalore-560 004.

Typesetting by : **Vagārtha Printonics.** Bangalore. Ph: 604914.
Printed at : **Brindavan Printers & Publishers,** Bangalore - 4.

PREFACE

We are glad to publish Nyāyāmritam with Advaita Siddhi and three commentaries. Nyāyāmṛtam of Sri Vyāsa Tīrtha is a large work and so are its commentaries. Consequently, these have to be published in more than one volume. A small portion of this work with commentaries was edited and published by Mahāmahopādhyāya Ananta Krishna Shastry in the Calcutta University series in 1934. A reprint of this published in 1984 with assistance from the Government of India also contains only that small portion.

Both the modern Research Scholars and the Traditional Scholars feel the need for these works in their entirety. The Nyāyāmṛtam and advaita Siddhi set a new wave of Dvaita Advaita dailectics and every generation saw a new commentary on these works. The traditional scholars study them with the help of manuscripts and publications to the extent available, even if they cover only a portion of these works. They also conduct traditional type of debates on the issues raised in these works. However, a consolidated edition of these works with the critical apparatus of a detailed introduction, subject index, appendices, details of the other works, the names of authors consulted and the cross references to other sastras like Mīmāmsā and Vyākaraṇa has not been published so far. This is now undertaken here.

Śrī Vyāsathīrtha, the author of Nyāyāmṛtam flourished during 1460-1539 A.D. Madhusūdana Sarasvati, the author of Advaita Siddhi and the two early commentators viz., Vyāsa Rāmāchārya and Ānanda Bhaṭṭāraka were the younger contemporaries of Śrī Vyāsatīrtha. These were the pioneers of the Dvaita-Advaita Dialectics enshrined in these works. The debate on these issues continues even to-day. Some modern Research Scholars like K. Narain of Alahabad University and Dr. B. N. K. Sharma, the well known Dvaita Vedanta Scholar, are also probing into these with a modern perspective. This fresh initiative needs a critical edition of these works with research apparatus. Such an edition will enable more and more modern scholars both Indian and some foreign to conduct

research in the philosophical issues raised in these works. The issues discussed in these works are very vital issues of Vedānta Philosophy. In view of this the Dvaita Vedānta Foundation has chalked out a plan of publishing these works in three volumes. The full work containes three chapters and covers a hundred topics. This first volume contains thirty three topics and covers about half of the first chapter. The portion covered here is about twice the portion covered by Calcutta University Edition.

Prof K. T. Pandurangi has duly edited this volume with the help of three Scholars of Poornaprajna Vidyapeetha. It is a happy coincidence that one of the commentators, Śrī Ānanda Bhaṭṭārak is the ancestor of Prof Pandurangi. This commentary is edited with the help of a very old manuscript, given by Śrī Śrī Satyapramodatīrtha Swāmīji of Śrī Uttarādi Matha. The next two volumes are also under preparation. We thank Prof Pandurangi for editing this work with introduction and Critical apparatus. We also thank Vāgartha Printonics for type setting and Brindavan Printers for printing this volume neatly.

We hope that both traditional and modern scholars will be benefited by this publication.

N. NARASIMHARAU
CHAIRMAN
DVAITA VEDANTA FOUNDATION

INTRODUCTION

The Dialects of Dvita-Advaita before Nyāyāmṛta

The Vedānta works are generaly grouped as Adhikaraṇa Prasthāna, Vādaprasthāna and Prakaraṇas. Polemical works are called Vādaprasthāna. In Indian philosophical tradition, polemical literature started with the polemics between Buddhist logicians and Nyāya logicians. Then, it spread to Vedānta and the other systems of Indian Philosophy.

The Advaita Vedānta had to enter into polemics with Nyāya, Sāmkhya, and the Bhedābheda school of Vedānt of Bhaskar before the advent of Dvaita Vedānta. The major concepts of Advaita Vedānta viz the concept of **निर्गुण ब्रह्मन्, अविद्या, अध्यास, जगन्मिथ्यात्व, भेदमिथ्यात्व, सत्तात्रैविध्य, प्रमाणानां अविद्यावद्विषयत्व** etc were not acceptable to the other systems of Indian Philosophy. They challenged these concepts and initiated polemics on these issues. The concepts of **अध्यास, अविद्या, सत्तात्रैविध्य** etc., were modelled on Buddhist's metaphysics, Bubbhists epistemology and Buddhists logic. Therefore, the arguements advanced against Buddhist's positions were also advanced against the Advaita position. Therefore, Advaita thinkers had to fight a double battle viz one against the Buddhist logicians and the other against those who dubbed them as Buddhists. Within their own metaphysical framework also they had thought of three levels viz **पारमार्थिक, व्यावहारिक** and **प्रातिभासिक** within which an epistemology and an ontology had to be worked out. At the level of **व्यावहारिक** they had to keep the structure more or less same as the other systems with a string of ultimate cancelation of **व्यवहारिक** set up.

It was difficult to understand or appreciate this peculiar setup for the other systems like **न्याय, सांख्य, भेदाभेदवादिन्** and so on. They attacked the above Advaita concepts from their unitary concept of reality, their own epistemology and logic. To meet this challange the early Advaita

thinker like Padmapāda, Mandana, Suresvara, Prakaśātman and Ananda bodha take pains to explain the concepts of **अध्यास, अविद्या, मिथ्यात्व, सत्तात्रैविध्य** and so on. Their approach is explainatory and defensive. The real Advaita polemics was started by **श्रीहर्ष** and **चित्सुख** by their **खण्डनखण्डखाद्य** and **तत्त्वप्रदीपिका** respectively.

By the time of Sri Anandatīrtha alias Sri Madhvācharya the polemical issues of Advaita had crystallised and the time for the formulation of a strong counter position, that too within Vedānta tradition, was ripe. Since Vedānta formulates its doctrines on the basis of Śruti, the Vedānta polemics extends to Adhikarana Prasthāna also. Therefore, Sri Madhvāchārya takes up the above Advaita concepts for a review both in his works on Adhikaraṇa prasthāna and Vāda prasthāna also. In fact, the second chapter of Brahmasutra itself is Vādaprasthāna. We may particularly mention his **ब्रह्मसूत्रानुव्याख्यानम्, विष्णुतत्त्वविनिर्णयः, तत्त्वोद्योतः,** and **खण्डनत्रयम्** etc. He refutes the Advaita concepts of **अविद्या, अध्यास, जगन्मिथ्यात्व, सत्तात्रैविध्य** etc. He refutes the doctrines of **आत्मैक्य** and **निर्गुण ब्रह्मन्**. He presents the Dvaita doctrines of **गुणपूर्णब्रह्मन्, जगत्सत्यत्व, पञ्चभेद, प्रामाण्यस्वतस्त्व, साक्षी** and **विशेष**. He utilises both logic and Śruti to refute the Advaita position and establish Dvaita doctrines. The above works of Sri Madhvāchārya form the nucleus of Dvaita-Advaita dialectics. Though his remarks are brief these are rich with logical acumen, epistemogical evidence and the interpretational potentiality of Śruti texts.

He is followed by a great commentator on his works Sri Jayatīrtha alias Teekāchārya who has written exhaustive commentaries on the above works. In the context of Dvaita-Advaita dialectics, we have to particularly mention his following works:

i) **न्यायसुधा** ii) **तत्त्वप्रकाशिका** iii) **विष्णुतत्त्वनिर्णयटीका**
iv) **तत्त्वोद्योतटीका** and v) **खण्डनत्रयटीका.**

These are the commentaries on Sri Madhvāchārya's works. **न्यायसुधा** is a large commentary on **ब्रह्मसूत्रानुव्याख्यान,** and **तत्त्वप्रकाशिका** is a commentary on **ब्रह्मसूत्रभाष्य.** In addition to these commentaries he has a special treatise on Dvaita-Advaita dialectics viz. **वादावली** which reviews the syllogism proposed by early Advaita writers to establish the concept of Mithyatva. It particularly reviews chitsukha's work. Sri Jayatīrtha has reviewed all major concepts of Advaita in his **न्यायसुधा** in detail. However, the discussion of these is spread over this entire large work and one has to peruse different sections to get a consolidated picture. Therefore, he composed a separate treatise viz **वादावली** to especially refute the concept of Mithyatva and to refute the criticism of Bheda. The wellknown syllogism of Advaita **'विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरजतवत्'** is refuted in detail in this work. It is an expansion of **खण्डनत्रय** and a precurser to **न्यायामृत.**

In between **वादावली** and **न्यायामृत, षड्दर्शनीवल्लभ विष्णुदासाचार्य** has written a work i.e. **वादरत्नवली.** This is a more detailed work. It is arranged in five sections and discusses the concepts of Mithyātva, Ajñāna and Bheda in greater detail.

II

Consolidation of Dvaita-Advaita dialectics by Nyāyāmṛta

With this background of the development of Dvaita-Advaita dialectics the rise of **न्यायामृत** marks the Himalayan hight of the Dvaita-Advaita polemics. The first important task achieved by Nyāyāmṛta has been to bring together the scattered material on Advaita thought and put it in a systematic form. Right from Padmapāda to chitsukha different definitions of Mithyātva, Ajñāna, Adhyāsa etc were proposed. Different syllogisms were formulated and different **परिष्कार** s i.e. technical formulations were given. Though there were no differences in the basic nature of the major Advaita concepts, their presentations were made in different

formulas with new shades. This course was adopted to put these concepts to the others convincingly and also present them from diferent angles viz epistemological, logical and linguistic angles. This needed a consolidation of all this material and then proceeding to review. Nyāyāmṛta has done it with masterly skill. Fifty percent of the Nyāyāmṛta consists of the extracts from the early Advaita classics either verbetum or in closer words. This gives a clear picture of Advaita position on the respective issues.

The second achievement of Nyāyāmṛta is i) To press into sarvice the Purvamimānsā guidelines of interpretation and the priorities of evidences ii) To press into Sarvice the Nyāya method of detecting the fallacies in the arguements and the formulations of the definitions of concepts.

The third achievement of Nyāyāmṛta is i) To show the logical drawbacks of the Advaita concepts internally viz within the freamwork of Advaita metaphysics and epistemology ii) To show the drawbacks by the commanly accepted logical and epistemological guide lines.

Finally the presentation of the for and Against positions of each issue exhaustively, clearly, and with rich potentiality of answering any further enquiry or objection is the special feature of Nyāyāmṛtra.

The work is planned in four chapters and more than a hundred topics. A perusal of the topics gives a clear idea of the underlying plan and the total purpose. The first twelve topics of the first chapter examine the concept of Mithyatva and the next six topics examine the Driśyatva etc. four syllogistic arguments. In these two stages the concept of Mithyatva is refuted. Then, it becomes necessary to define sattva and justify the priority of Pratyakṣa that testifies the Sattva of **वियदादि प्रपञ्च**. This is covered under the next ten topics. Reverting to the question of the evidences for the concept of Mithyatva, **अनुमान बाध** and **आगम बाध** for Mithyatva are pointed out. The question whether

the असत् can be साधक is examined and असतः साधकत्व is rejected. The Advaitin's claim that the relation between the दृग् and दृश्य can be only अध्यास is rejected.

After refuting the concepts of Mithyatva on logical and epistemological grounds, the question whether Śruti supports Advaita and consquently जगन्मिथ्यात्व is warrented is examined. All important Sruti passages such as 'एकमेवाद्वितीयम्' 'नेह नानास्ति किञ्चन' 'न तु तद् द्वितीयमस्ति' 'वाचारम्भणं विकारो नामधेयम्' 'इदं सर्वं यदयमात्मा' etc that are supposed to support Advaita and are opposed to Dvaita are examined in detail and it is pointed out that none of these support Advaita and opposs Dvaita. The examination of each sruti is taken as a topic.

Then, the attention is turned to the other important doctrines of Advaita such as दृष्टि सृष्टिवाद, एकजीवाज्ञानकल्पितत्व, and अविद्या. While examining the concept of अविद्या all its aspects such as its आश्रय, प्रमाण, विषय, प्रतीति are examined and it is pointed out that none of these aspects could be rationally worked out. This is followed by the refutation of अहमर्थस्य अनात्मत्व, कर्तृत्वाध्यास, अनिर्वाच्यत्व, अद्वैत्यभिमत भ्रमस्वरूप.

All these topics discussed in the first chapter could be broadly grouped into three areas viz मिथ्यात्वनिरास, सत्यत्वस्थापन, and अद्वैत्यभितमदृष्टिसृष्टिवाद अविद्या अहमर्थस्य अनात्मत्वादि निरास. The Advaita thought in these areas is carefully collected from the early Advaita works in their own words and refuted. The consolidated and the clear presentation of the Advaita thought is as much useful as its refutation for the understanding of the Dvaita-Advaita polemics.

The second chapter discusses the अखण्डार्थ concept of Advaita and the concept of ब्रह्मन्. The different aspects of the concept of ब्रह्मन् such as उपादनत्व, निमित्तत्व, स्वप्रकाशत्व, अवाच्यत्व are discussed in detail and refuted. Then, the Dvaita concept of भेद is presented in detail. The five categories of भेद, the support of प्रत्यक्ष, अनुमान and श्रुति for भेद, the concept of

विशेष are explained. The import of 'तत्त्वमसि' etc श्रुति in favour of भेद is explained. The बिम्बप्रतिबिम्बैक्य is refuted. The refutation of the Advaita concept of ब्रह्मन् and the establishment of भेद are the two importants areas of the second chapter.

The third chapter discusses the श्रवण, मनन etc साधन and the fourth chapter discusses the अविद्यानिवृत्ति etc the matters connected with the liberation. The Advaita concepts of all these are reviewed.

From the above details of the topics discussed the plan and the purpose of न्यायामृत becomes very clear. The plan is to give consolidated presentation of Advaita thought and refute it in detail. The purpose is to convince the scholars and the seekers of the philosophical truth that Advaita thought needs re-thinking and need not be taken as final.

III

Advaita writers reaction to Nyāyāmṛta

This work evoked the a need of a revised presentation of the Advaita thought among the Advaita Scholars. Nyāyāmṛta was written by a karnatak saint scholar Sri Vyāsarāya. However, it echod in Bangal and Madhusudana Sarasvati responded to it by writing his Advaita siddhi.

Madhusudana Saraswati takes the issues discussed in Nyāyāmṛta in the same order in which these are presented in Nyāyāmṛta and clarifies Advaita position. Since Nyāyāmṛta quotes from the early Advaita works and refutes them, the Advaitasiddhi takes the same statements and clarifies them so as to meet the objections raised in Nyāyāmṛta. Therefore, Advaitasiddhi is not so much a refutation of Nyāyāmṛta but it is a clarificatory commentary on early Advaita statements. These clarifications are intended to answer the objections raised by Nyāyāmṛta. Most of these clarifications are of the nature of explaining Advaita metaphysical and epistemological position. These are also of the nature of explaining

the linguistic subtlities of the definitions and Pariṣkāras i.e. technical phrases evolved by the early Advaita writers. Whether these adequately answer the objections raised by Nyāyāmṛta or not these certainly give a deeper insight into Advaita thought. In a few cases these give an enlarged or modified shape to some of the Advaita concepts. In this respect he has been a model to the later Advaita writers and therefore, is called the founder of neo Advaita. In the summary of the Polemics of Nyāyāmṛta given later here the answers given by Advaitasiddhi to Nyāyāmṛtas objections are mentioned. These will substantiate our observations here. These will also give an idea of the style and the contents of his mastarly work.

IV

Rejoinder by the commentators of Nyāyāmṛta

Advaita siddhi's reviesed and the exhaustive presentation of the Advaita thought needed a further reappraisal of that thought. Three younger contemporaries of Vyāsarāya wrote three commentaries of Nyāyāmṛta and achieved this task. Vyāsa Rāmācharya's तरङ्गिणी has been the earliest of these three commentaries. The तरङ्गिणी' s style is quite interesting. The clarifications given in Advaitasiddhi against the objections raised in Nyāyāmṛta are verbetam quoted in तरङ्गिणी and it is pointed out that in spite of these clarifications the objections stand. This is done in two ways: i) The very clarification is not justified as per Advaita tenets and procedure ii) The clarification does not meet the objections raised. Most of the clarifications given in Advaita Siddhi are of the nature of a revised or enlarged versions of the statements of early Advaita writers. So long as the basic nature of the concepts and the issues remains the same no linguistic or logical manupalation helps to answer the objections. In most of the cases तरङ्गिणी explains that the answers given by the Advaita Siddhi were already anticipated by Nyāyāmṛta

and their untenability is already hinted in the Nyāyāmṛta statements. Thus, it is a commentary on Nyāyāmṛta in two ways: It is explainatory in bringing out the full import of Nyāyāmṛta Statements and dialectical in analysing the drawbacks of the Advaita Siddhi arguements. It is the largest commentary on Nyāyāmṛta.

Next to it is the commentary i.e. **कण्टकोद्धार** of **पाण्डुरङ्गि आनन्दभट्टारक** an ancestor of the present writer. He was an younger contemporary of Vyāsarāya and a contemporary of the author of **तरङ्गिणी**. This commentary is more dialectical than **तरङ्गिणी**. It pierces into the statements of Advaitasiddhi more deeply and shows logical fallacies on a wider scale. It also shows that the answers given by Advaitasiddhi reveal further weaknesses of Advaita positions and make room for fresh objections. Both **तरङ्गिणी** and **कण्टकोद्धार** quote **पूर्वमीमांसा न्याय** extensively and fully narrate the **पूर्वपक्ष** and **सिद्धान्त** of the concerned **अधिकरण** of **पूर्वमीमांसा**. They mostly draw this data from **शाबरभाष्य** and **कुमारिल'** s **वार्तिक** but not from later Mimānsā writers. They also state the diffences between śabara and kumārila.

The third commentary i.e. **न्यायामृतामोद** has been written by Sri **विजयीन्द्र तीर्थ** who studied under Vyāsarāya. His commentary is more simple and lucid. He does not quote the passages from Advaitasiddhi as done by **तरङ्गिणी** and **कण्टकोद्धार**. Since this commentary is separately published recently it is not included in this volume.

These three commentaries were written immediately after Advaita siddhi. After these commentaries were written **गौडब्रह्मानन्द** wrote two commentaries viz **गुरुचन्द्रिका** and **लघुचन्द्रिका** on Advaitasiddhi and further clarified Advaita position to meet the objections raised in **तरङ्गिणी**. He does not specifically touch the objections raised in **कण्टकोद्धार**.

His explainations were rejected and the objections stated in **न्यायामृत** and **तरङ्गिणी** were affirmed by **वनमालीमिश्र** in **न्यायामृतसौगन्ध्य** and **तरङ्गिणीसौरभ**. As the manuscripts of these were not available when we started editing

the present volume these are not included here. We hope to include these in the II and III volumes.

An attempt is made to further clarify the Advaita position by **विट्ठलोपाध्याय** in his commentary on Advaita Siddhi answering the points raised in **न्यायामृतसौगन्ध्य.**

A lucid and more explainatory commentary on **न्यायामृत** is written by Srinivāsatīrtha. This is very helpfull to understand the text of **न्यायामृत.** Srinivasatīrtha is a prolific writer on Dvaita Vedānta.

Three more cammentaries on **न्यायामृत** were written during the 18th and 19th centuries viz **रसकूलंकषा** by Kundalagiri Achārya **न्यायामृतमाधुरी** by Mannāri Krishnāchārya and **न्यायामृत कला** by Madvānāthayati of Srirangam. The last one is printed. We hope to publish these commentaries also in due course.

On the Advaita siddhi side Balabhadra's siddhi vyakhyā was the earliest commentary, the other two commentaries of **गौडब्रह्मानन्द** and **विट्ठलेश** are already mentioned. Thus a vast literature of Dvaita-Advaita polemics has grown over these seven centuries.

The life, works and dates of the above commentators are already discussed in the early editions of **न्यायामृत** and **अद्वैतसिद्धि** and in the works of Dr. Dasagupta and Dr. B.N.K.Sharma. Therefore, It is not proposed to go into the full details of the same here. We give only a brief resume of the life and works of the authers of the works included in this volume.

Śrī Vyāsatīrtha (1460-1539)

Vyāsatīrtha the author of Nyāyāmṛta has a high place in the field of Indian Philosophy, particularly in Dvaita Vedānta tradition. In a traditionally quoted verse of Pakṣadhara-Misra the well-knwon Navyanyāya scholar of Navadvīpa the high esteem in which Vyāsatīrtha was held by his contemporary scholar is ensrined. The verse reads as:

यदधीतं तदधीतं यदनधीनं तदप्यधीतम् ।
पक्षधरविपक्षो नावेक्षि विना नवीनव्यासेन ॥

His high place in Dvaita Vedānta tradition is indicated by another traditionally quoted verse:

श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक् स्मृतः ।
चिन्तामणिस्तु व्यासार्यो मुनित्रयमुदाहृतम् ॥

This great scholar was born in or about 1460 A.D. in a village Bannur in the Mysore District of Karnataka. He was ordained to sannyāsa by Brahmaṇyatīrtha when he was just about sixteen years of age. He went to Kānchi a centre of learning in those days and mastered the Nyāya, Vyākaraṇa and Mīmāmsa Śāstras. Then, he proceeded to Mulbagal another centre of learning, particularly, of Dvaita Vedānta, and studied Dvaita Vedānta under Lakṣmīnārāyaṇa Muni also known as Śrīpādarāja.

Saluva Narasimha the king of Candragiri near Tirupati was a disciple of Śrīpādarāja. He invited Śrī Vyāsatīrtha to his court and honoured him. later Saluva Narasimha became the king of the famous Vijayanagar empire and invited Śrī Vyāsatīrtha to stay at Vijayanagar. Since then, Śrī Vyāsatīrtha made Vijayanagar his head quarter. Saluva Narasimha's Succussor Krishna Devarāya developped great admiration for him and took his blessings and guidance in the welfare of the kingdom.

In a biographical poem on Vyāsatīrtha viz. **व्यासयोगिचरितम्** composed by **सोमनाथकवि** a detailed account of Śrī Vyāsatīrtha's life and works is given. Śrī Vyāsatīrtha composed his three great works: **न्यायामृतम्, तात्पर्यचन्द्रिका** and **तर्कताण्डवम्** during his stay at Vijayanagar. A detailed account of **न्यायामृत** is already given above. His **तात्पर्यचन्द्रिका** is a work of **अधिकरणप्रस्थान**। It is written as a commentary on **तत्त्वप्रकाशिका** of Jayatīrtha which is a commentary on the **ब्रह्मसूत्रभाष्य** of Śrī Madhvāchārya. However, it is more a **वादग्रन्थ** than a mere commentary. The Bhāṣyas of Śankara

and Rāmānuja, their commentaries viz., Bhāmati and Śrutaprakāśikā respectively are critically examined in this work. His third great work **तर्कताण्डव** is a criticism of **तत्त्वचिन्तामणि** of **गङ्गेश** the source book of **नव्यन्याय**। It also reviews the views of Bhātta and Prābhākara Mīmāmsa in respect of **प्रमाण, प्रामाण्य, पदार्थ, वाक्यार्थ** etc., ephistemological and the linguistic issues. It a work of a comparative study of these issues. His other works viz., **भेदोज्जीवन** and **मन्दारमञ्जरी** are also important works. The merit and the contents of all works of Śrī Vyāsatīrtha are fully dealt with in the history of Dvaita literature by Dr. B.N.K. Sharma in a masterly way, Dr. Dasagupta also has highlighted the contribution of Vyāsatīrtha to Dvaita- Advaita dialectics and the polemics of Indian Philosophy. Therefore, only a brief reference to the life and works of Śrī Vyāsatīrtha is made here.

Madhusūdanasarasvati (1540 – 1647 A.D.)

Madhusūdanasarasvati is a bright star on the horizen of advaita Vedanta. A traditionally quoted verse reveals his high place.

वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती ।
मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती ॥

The contribution of his great work Advaita siddhi to Dvaita–Advaita dialectics is already explained. He has a few other important advaita works to his credit. **सिद्धान्तबिन्दु** and **गूढार्थदीपिका** a commentary on Bhagavadgītā are important among these. Though he was a stonch Advaitin, he was equally a stonch follower of Bhaktimārga. His works **भक्तिरसायन** and **शाण्डिल्यसूत्राटीका** are the results of his interest in Bhakti marga. His famous verse:

वंशी विभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

is an evidence of his कृष्णभक्ति। Probably he was influenced by the चैतन्य movement that was swaying Bengal at that time.

Vyāsa Rāmachārya (1550 - 1620 A.D)

The author of तरङ्गिणी Vyāsa Rāmachārya mentions his native place as अम्बापुरी on the bank of the river Godāvari. This is identified with the Puntambe in Ahmadnagar District of Maharastra. His father was Viśvanātha Vyāsa and the elder brother was Nārāyaṇachārya Vyāsa, the author of Advaitakālānala. Vyāsa Rāmachārya studied under Śrī Raghuttamatīrtha the head of the Uttarādimatha at that time. Though he has written only one work he has made profound influence on Dvaita-Advaita dialects. The sailient features of his work i.e., Tarangini are already stated.

Pandurangi Ānanda bhattāraka (1530-1600 A.D)

The author of न्यायामृतकण्टकोद्धार also comes from Puntambe in Maharastra. He was an younger contemporary of Śrī Vyāsatīrtha, and a contemporary and a close associate Śrī Vādirājatīrtha of Udupi sode matha. Vādirāja charitāmṛta mentions an episode that Ānandabhatta engaged an Advaita scholar in a philosophical debate under the instructions from Śrī Vādirājatīrtha and won him.

अद्वैतपण्डितः कश्चित् वादार्थं पत्रमालिखित् ।
एतद्दिने स्थले तत्र वादो निश्चयतो भवेत् ॥
इति पत्रार्थमालोच्य वादिराट् तत्स्थलं गतः ।
पाण्डुरङ्गयन्वयोद्भूतमानन्दाख्यं द्विजोत्तमम् ।
न्ययूयुजत् तज्जयाय ददौ मन्त्राक्षतान् गुरुः ।
आनन्दभट्टः पश्चात् तमागतं वादिनं जयन् ।
तस्माद् वादपराभूतिपत्रं प्राप्य समागतः ।

The Advaita scholar refered to here was रङ्गोजिभट्ट। Philosophical debates with रङ्गोजिभट्ट were continued by Ānandabhatta's son Śrī Vidyādhīśa also. This fact is mentioned by कोण्डभट्ट at the close of his वैय्याकरणभूषणसार। Ānandabhatta also was a desciple of Śrī Raghuttamatīrtha. It is interesting to note that the authors of Tarangini and Kaṇṭakoddhāra belonged to the same place and studied under the same teacher. It is also reported that both of them went to Madhusūdanasarasvati together to personally discuss his views in Advaita siddhi and write a refutation. Kaṇṭakoddhāra makes remarks on some of the observations of Taraṅgiṇi and Āmoda of Śrī Vijayīndratīrtha. These do not indicate any differences on doctrinal grounds, these are the differences only in respect of the presentations of arguements. The three commentators were contemporaries and probably knew the presentations of each other in personal discussions, teaching classes, and the Assemblies of scholars. Therefore, these need not be taken as deliberate criticisms of each other. These only represent different ways of presentation.

Ānandabhattāraka was lucky to have two distinguished scholarly sons.

The elder of them became the Head of the Uttarādi matha with the Āśrama name as Śrī Vidyādhīśatīrtha. He wrote a commentory on न्यायसुधा on the first five Adhikaraṇas. His younger son Keśavabhattaraka and also known as Gururāja was a prolific writer. He continued the commentory on न्यायसुधा and wrote it on the entire work. He also wrote commentaries on तात्पर्यचन्द्रिका of Vyāsatīrtha, on Ṛgbhāṣyatīka and some text of Daśaprakaraṇas. These three members of the Pandurangi family viz. Ānandabhatta, Śrī Vidyādhīśatīrtha, and Keśavāchārya alias Gururāja have made Substantial contribution to Dvaita Vedanta. A biographical poem on Śrī Vidyādhīśa viz., विद्याधीशविजय gives a full account of the life and works of Ānandabhatta and Śrī Vidhyādhīśa and also mentions [illegible]. Some contemporary Advaita scholars such as ब्रह्मेन्द्रसरस्वती,

वादीन्द्र and रङ्गोजीभट्ट are also mentioned in this work. Shahaji the father of Sivaji and Nāganātha Datta Paṇḍita a subedar under Shahaji were the patrons of this scholarly family. The descendents of this family including the present writer have now settled in Karnataka. Two more Heads of the Uttarādimatha viz., Satyavijaya and Satyaprajña also belonged to this family.

The colophenes of all complete manuscripts of Kaṇṭakoddhāra mention Ānandabhatta alias Ānandāchārya the desciple of Śrī Raghuttamatīrtha as its author. The family geneology and the family tradition of Paṇḍurangi also testifies this fact. However, due to the confusion between the title Madhvādhva Kaṇṭakoddhāra and Nyāyāmṛta Kaṇṭakoddhāra the first editor of a portion of this work assigned it to Śrī Vijayīndratīrtha. This error has already been pointed out by Dr. B.N.K. Sharma.

Śrīnivāsatīrtha (1590-1640 A.D)

He is the author of न्यायामृतप्रकाश। He belongs to Bidarahalli a village in Dharwad Dist. of Karnataka. He was a nephew and a disciple of the famous scholar Yādavarya. He is one of the major commentator on the commentaries of Śrī Jayatīrtha. He has commented upon न्यायसुधा, तत्त्वप्रकाशिका, दशप्रकरणटीका, प्रमाणपद्धति, some of the उपनिषद्भाष्यs, भागवत and ऋग्भाष्य। Manuscripts of a few more of his works are yet to be traced. His works are known for lucidity and clarity. Among the टिप्पणीकारs his place is only next to Śrī Raghavendratīrtha. In fact he received the honour of the title Tīrtha from Śrī Rāghavendratīrtha himself.

As stated earlier full details of the life and works of Śrī Vyāsatīrtha and all the commentators on Nyāyāmṛta are given by Dr. B.N.K. Sharma. He also gives the estimates of these works in a scholarly way. Therefore, only a brief accounts is given here. Dr. Sharma's history of Dvaita literature may be consulted for full details. Now we proceed to give a brief summary of the Polemics of Nyāyāmṛta.

Before giving the summary, I would like to make one or two points clear. Firstly, Vedāntic technical terms are not translated in English. These are used in their sanskrit terms. It is nither correct nor fair to translate the terms Mithyātva as falsity, Dvaita as dualism, Avidya as nescience and so on. No equations of the philosophical terms in English and Sanskrit are carefully worked out. A loose use of these will distort the imports of these concepts. More over, it is more beneficial to the research scholars and advance students to be familiar with the sanskrit technical terms, than know through the loose translation.

Secondly sanskrit extracts are given in Devanagari only. For an Indian scholar it is easier to read these extracts in Devanari than in Roman. Western Indologists are also quite familiar with Devanagari. It is hoped the readers of the summary given bellow will not feel inconvenienced by this method. I take this opportunity also to mention that Prof. D. Pralhadachar, Vidwan Hayavadana Purāṇika and Vidwān Guruvenkatacharya have considerably helped me for preparing this edition by preparing the fair copy of Kaṇṭakoddhāra, proof reading, and perusing the summary of Nyāyāmṛta.

K. T. Pandurangi

20

POLEMICS OF NYĀYĀMṚTA

The concept of Mithyātva is very vital to Advaita since the doctrine of Advaita could be established only by pointing out the Mithyātva of Dvaita. This is made clear by Madhusūdhana Sarasvati in the very opening remark of Advaita Siddhi.

तत्र अद्वैतसिद्धेः द्वैतमिथ्यात्वपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रतिपादनीयम् (सि. ९)

Therefore, eminent Advaita writers have offered a number of definitions of Mithyātva and deduced a number of syllogistic arguments to prove Mithyātva.

The First Definition of Mithyātva

1) The Nyāyāmṛta collects five of these definitions and examines. The earliest of these definitions is the one proposed in Pañchapādikā viz., **सदसत्त्वानधिकरणत्वरूपानिर्वाच्यत्वं मिथ्यात्वम्।** While examining this definition Nyāyāmṛta explains it in three alternate ways and points out that none of them can stand logical scrutiny. We will notice one of these three explanations and consider Nyāyāmṛta criticism. According to this explanation **सत्त्वासत्त्वानधिकरणत्वम्** means possessing the two characteristics of **सत्त्वाभाव** and **असत्त्वाभाव.** On the very face of it, it is selfcontradictory. This is pointed out in Nyāyāmṛta. However, Advaita Siddhi understanding of the import of the terms Sattva and Asattva is such that both can be absent in a Mithyā object. By Sattva **त्रिकालाबाध्यत्व** is meant. It is only Brahman that is **त्रिकालाबाध्य.** A Mithyā object such as Śuktirajata has the absence of such Sattva. By Asat that which is never comprehended as 'is' with reference to any place at any time i.e., **क्वचिदपि उपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम्** is meant. For instance a hare's horn is never comprehended as 'is' with reference to any place at any time. There is a third category of objects such as Śuktirajata or Rajjusarpa which are neither **त्रिकालाबाध्य** like Brahman nor **क्वचिदपि उपाधौ सत्त्वेन अप्रतीयमान**

like शशविषाण. Such an object has both सत्त्वाभाव and असत्त्वाभाव as defined above. Therefore there is no contradiction in these two seemingly opposite attributes being present in the object like Śuktirajata. The objects that possess these two attributes simultaneously are Mithyā. Thus Advaita thinks of three categories viz., सत्, मिथ्या, and असत्

Advaita argues that just as the absence of गोत्व and अश्वत्व can be present in उष्ट्र the absence of Satva and Asatva can be in a Mithyā object. Hence, there is no contradiction in this definition of Mithyātva viz., सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयवत्त्वम् ।

In the above explanation of the concept of सत्, मिथ्या and असत् a distinction is made between Mithyā and Asat on the ground that a Mithyā object is apparant with reference to some place and time. For instance, Śuktirajata is apparent with reference to a Śukti at the time when some one mistakes it as Rajata while an Asat object i.e., Śaśaviṣāṇa is never apparent. It is an empty word without even an apparent presentation. This means that Śuktirajata has an epistemological existence while śaśaviṣāṇa lacks even that. Ontologically both are absent while epistemologically the Śuktirajata is apparent. Śuktirajata has प्रतिभास while śaśaviṣāṇa has not even प्रतिभास. Therefore, Śuktirajata is distinct from Śaśaviṣāṇa. Therefore, the objects like Śuktirajata are designated as Mithyā while objects like Śaśaviṣāṇa are designated as Asat. Brahman alone is Sat. The argument advanced to work out this concept of Mithyātva as distinct from Sat and Asat is सत् चेत् न बाध्येत and असत् चेत् न प्रतीयेत।

A Mithyā object like Śuktirajata is not Sat, because, it is sublated later as न इदं रजतम्. It is not Asat because it is apparently presented i.e., it is Pratītiviṣaya. The nature of these three viz., १. सत्, २. मिथ्या, and ३. असत् may be put as follows:

१. त्रिकालाबाध्यत्वं सत्त्वम्।

२. त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदपि उपाधौ सत्त्वेन प्रतीयमानत्वं मिथ्यात्वम्।

३. त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदपि उपाधौ प्रतीयमानत्वानधिकरणत्वमसत्त्वम्।

According to these definitions of **सत्, मिथ्या** and **असत्** the three being distinct from each other, the absence of both Satva and Asatva can be present in a Mithyā object.

This attempt of Advaita Siddhi to distinguish between Mithyā and Asat on the ground that the Mithyā is **प्रतीतिविषय** and Asat is **प्रतीति अविषय** fails when the very statement **'असत् चेत् न प्रतीयेत'** is examined.

> **असत् चेत् न प्रतीयेत इति वदता त्वया उक्ताप्रतीतिं प्रति प्रयोजकस्य प्रतीत्यनुपाधिकस्य सत्त्वविरोधिनः असत्त्वस्य वक्तव्यत्वात् असत्त्वाभावः सत्त्वेन प्रतीयमानत्वे पर्यवसन्नः** (तर. ५६)

Further, this statement does not make any sense since the **प्रयोज्य** and **प्रयोजक** are identical in this arguement. The expression **असत्** means **अप्रतीयमान** according to Advaita. Hence this statement means **अप्रतीयमानश्चेत् न प्रतीयेत.** This results in the identity of **प्रयोज्य** and **प्रयोजक** in this arguement. Thus this arguement fails to prove anything.

> **'असत् चेत् न प्रतीयेत' इति प्रयोज्यप्रयोजकभावो न स्यात्। अभेदात्।** (कण्ट. ६२)

Since Mithyātva cannot be distinguished from Asat on the grounds of **प्रतीतिविषयत्वाभाव** of **असत्,** the very idea of a category i.e., **मिथ्या** as distinct from **असत्** has to be given up consequently the effort to show the presence of both **सत्त्वाभाव** and **असत्त्वाभाव** in the so called third category viz., Mithyā category fails. Thus this first definition of Mithyātva is a failure.

The Second definition of Mithyātva

2) A second definition of Mithyātva is proposed by Vivaraṇakāra as **सर्वस्मिन् प्रतिपन्नोपाधौ त्रैकालिक निषेधप्रतियोगित्वम् (सि. ७२)** a Mithyā object is that which is totally absent with reference to the substratum where it is supposed to be present. For instance Rajata is supposed to be

present with reference to Śukti, but actually it is absent. It has been absent before it was observed and it will not be present in future. Thus, it is absent at all the three times viz., past, present and future. not only it is absent with reference to this Śukti but it is not present anywhere else. It only appears but does not exist. Therefore, it can be denied with reference to the the past, present and future and with reference to all substrata. This concept of Mithyātva is demonstrated with reference to Śuktirajata and is extended to the entire phenomenal world in Advaita.

Here three questions arise: i) What is the status of this Denial? Is it **तात्विक, व्यावहारिक** or **प्रातिभासिक**? ii) Is so called Mithyā object denied by its very **स्वरूप** or by Pāramārthika ākāra. (iii) Is the status of the so called Mithyā object is different from that of Asat, that is to say, is the criterion of Mithyātva not equally applicable to Asat?

In Advaita the ontological status of the objects is thought of at three levels viz., Pāramārthika i.e., Ultimately real (ii) Vyāvahārika i.e., existing at the empirical level only (iii) Prātibhāsika - merely appearing or apparent only. If the status of the denial of a so called Mithyā object is Pāramārthika i.e., ultimately real, then, there will emerge two ultimate real entities Brahman and Mithyā Prapañcha Niṣedha. i.e., **तात्त्विकत्वे अद्वैतहानिः।** If the status of the denial is Vyāvahārika, then, the denial also will be Mithyā but not real. A Mithyā denial cannot take away the real nature of that which is denied by it. **व्यावहारिकत्वे तस्य बाध्यत्वेन तात्त्विकसत्त्वाविरोधित्वात्।** Same is the fate of Prātibhāsika denial.

The Second question whether Mithyā object is denied by its very **स्वरूप** or by **पारमार्थिकाकार** also cannot be easily answered. It cannot be denied by its **स्वरूप** because, Mithyā objects i.e., **वियदादिप्रपञ्च** are claimed to be present during the time when these are observed. These continue until right knowledge is obtained. Therefore, these cannnot be denied by **स्वरूप** during their appearance.

it cannot also be said that these are denied by **पारमार्थिकाकार**. The **पारमार्थिकत्व** is defined as **अबाध्यत्व**. The Mithyātva is **बाध्यत्व**. Unless the concept of **बाध्यत्वरूपमिथ्यात्व** is known, the concept of **अबाध्यत्वरूपसत्त्यत्व** cannot be comprehended and vice-versa. Thus it results in **अन्योन्याश्रय**. Further the statement **नास्ति नासीत् न भविष्यति** shows that the denial made here is **स्वरूपेण निषेध** as per Advaitins understanding.

> **किञ्च निषेधप्रतियोगित्वं किं स्वरूपेण, किं वा पारमार्थिकत्वाकारेण। नाद्यः। तत्त्वज्ञाननाश्यस्य वियदादेः रूप्यादेश्च धीकाले विद्यमानेन सद्विलक्षणस्वरूपेण निषेधायोगात्। (न्या. ६७) नापि पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगित्वमित्यन्त्यः। अबाध्यत्वरूपपारमार्थिकत्वस्य बाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेन अन्योन्याश्रयात्। नासीत् रूप्यं नास्ति न भविष्यतीति 'नेह नानास्ति किञ्चन' इति च स्वरूपेणैव निषेधात्। (न्या. ६९)**

The third question viz., Is the status of Mithyā is distinct from that of Asat? is more important. A Mithyā entity is defined by Advaitins as that which is denied at all times with reference to all substrata. This is exactly the nature of Asat also. Just as the existence of Śuktirrūpya which is claimed to be Mithyā is denied at all times with reference to all substrata, the Śaśaviṣāṇa which is Asat is also denied. There is absolutely no difference between the nature of the two. Advaitins try to make a distinction between Mithyā and Asat on the ground that the Mithyā object is Pratītiviṣaya i.e., an object of knowledge, while the Asat is Pratīti aviṣaya i.e., not an object of knowledge. This distinction is not valid. The Asat also is an object of knowledge for the following reasons. i) Unless one has the knowledge of Asat one cannot have the knowledge of the distinction from it. ii) Cannot deny its knowledge. iii) Cannot employ the word Asat with reference to it. **असतः अप्रतीतौ १. असद्वैलक्षण्यज्ञानस्य, २. असत्प्रतीतिनिरासस्य, ३. असत्पदप्रयोगस्य च अयोगात्।** The Asat cannot also be defined as Nirupākhya i.e., without a name, and Nissvarūpa i.e. without its own intrinsic nature. The term Nirupākhya

itself can be its name. Nisvarupatva cannot be a distinguishing feature to distinguish it from Mithyā since Mithyā also is Nissvarūpa, since its Svarūpa is denied at all the three times as per its definition given by Advaitins. Therefore, either on the ground of Pratīti viṣayatva and Pratīti aviṣyatva or on the ground of Sasvarūpatva and Nissvarūpatva a distinction between Mithyā and Asat can be made. Just as the existence of the so called Mithyā object can be denied with reference to past, present and the future. The Asat is also denied. Therefore **त्रैकालिकनिषेधप्रतियोगित्व** is a common feature of Asat and the so called Mithyā. Hence the concept of Mithyā is not a distinct concept. It is another name for Asat. Consequently the second definition of Mithyā has turned out to be a definition of Asat only.

> **प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमपि अन्यत्र असत्त्वेन सम्मतस्य पटादेः सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वपर्यन्तमिति त्वन्मतम्। अन्यथा अन्यत्र तत्सत्त्वापातात्। तथा च कथं न अत्यन्तसत्त्वापत्तिः नहि शशशृङ्गादीनामपि इतोऽन्यदसत्वमस्ति।** (न्या. ६७)

Advaita Siddhi answers these three questions in its own way. To the question whether the denial is **तात्त्विक** or **व्यावहारिक** the Advaitasiddhi's answer is, there is no difficulty in taking it either way. The denial of **वियदादि प्रपञ्च** is identical with Brahman. Therefore, even if it is taken as real there will be no two real entities. Therefore, there is no **अद्वैत हानि.** The Second alternative viz., the denial is **व्यावहारिक** can also be maintained. In this case, no doubt, the denial itself will be **बाध्य** i.e., to be sublated. But this does not make the denied Mithyā object real. For instance the Dream objects denied in the dream do not become real. **स्वाप्नार्थस्य स्वाप्न निषेधेन बाधदर्शनात्।**

This defence of the nature of the denial does not stand scrutiny. The denial of the Mithyā object cannot be treated as real and identical with Brahman. If it is so treated, then along with **ब्रह्मस्फुरण** to give

rise to **प्रपञ्चभ्रम** there will be **प्रपञ्चनिषेधस्फुरण** also. Consequently for **प्रपञ्चभ्रम** itself becomes impossible. It cannot also be treated as **व्यावहारिक** for in that case this very denial becomes **व्यावहारिक** i.e., to be sublated and consequently it will not be capable of taking away the reality of the object denied. In other words it will be unable to establish the Mithyātva proposed by this definition.

Advaita Siddhi's reply to this point quoting the instance of the denial in the dream does not help. Advaita Siddhi states that when a dream object is sublated in the dream itself, the denied object does not become real simply because the dream denial is sublated. The sublation of the denial is not the ground to restore the reality of the denied object. **निषेधस्य बाध्यत्वं न पारमार्थिकसत्त्वाविरोधित्वे तन्त्रम्। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाधदर्शनात्।** Therefore, even if the denial is **व्यावहारिक** i.e., to be sublated, the denied object can be Mithyā. This argument is based on the assumption that both the denied and the denial in the dream are sublated later in the waking state. However, both the object experienced in the dream and its denial are not sublated. Simply because these are experienced in the dream these are not to be taken as unreal. When one is awake, he finds that only the object is sublated not its denial. Therefore, the denial in the dream is not a proper instance to prove that both the object and its denial are unreal. **स्वप्नदृष्टार्थाभावस्य जाग्रत्यबाधानुभवात् न तस्य बाध्यत्वम् । न हि स्वप्ने दृष्टत्वमात्रेण बाध्यत्वम् । आत्मादेरपि बाधापत्तेः ।**

For the second question, whether the denial of a Mithyā object is by **स्वरूप** or **पारमार्थिकत्वाकार** the Advaita Siddhi's answer is, it is by **स्वरूप.**

This is clear from the nature of the denial that follows:

शुक्तौ रजतभ्रमानन्तरं अधिष्ठान तत्त्वसाक्षात्कारे रूप्य नास्ति नासीदिति स्वरूपेणैव नेह नानेति श्रुत्याच प्रपञ्चस्य स्वरूपेणैव प्रतीतेः।

The consquence of this stand of Advaita Siddhi is already pointed out. This **स्वरूपेण निषेध** will result in **अत्यन्तासत्त्वापत्ति** of the so called Mithyā object.

This takes us again to the third question. Is the status of Mithyā object is distinct from that of Asat? Advaita Siddhi again attempts to distinguish the two on the ground that Mithyā objects appear with reference to their substratums while Asat objects like Śaśaviṣāṇa are not capable of even appearance.

> **सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वं यद्यपि तुच्छानिर्वाच्ययोः साधारणम्। तथापि क्वचिदपि उपाधौ सत्त्वेन प्रतीत्यनर्हत्वम् अत्यन्तासत्त्वम्। बाधात् पूर्वं शुक्तिरजतं प्रपञ्चश्च प्रतीयेते। एतदेव सदर्थकेन उपाधिपदेन सूचितम्।** (सि. ७२)

Advaitasiddhi claims that this distinction between Mithyā and Asat also distinguishes the Buddhist's position and Advaita position in respect of **वियदादिप्रपञ्च। 'शून्यवादिभिः सदधिष्ठानकभ्रमानङ्गीकारेण क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वरूपस्य अनङ्गीकारात्'।**

This distinction between Mithyā and Asat also cannot be maintained. The question here is, whether the so called **उपाधि** is **सत्** or not. If it is **सत्** then **ब्रह्मन्** also being **प्रतीत्यनर्ह** according to Advaitin will have to be treated as Asat. If the Upādhi is not Sat then, no distinction could be made between Asat and Mithyā on the ground that the Mithyā is Pratītiviṣaya and Asat is Pratīti aviṣaya. The Asat is also found to be Pratītiviṣaya by the reference by the word śaśaviṣāṇa, vandhyāputra etc.

> **क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वमत्यन्तासत्त्वमिति यदुक्तम्। अत्र उपाधेः सत्त्वं विवक्षितं न वा। नाद्यः, ब्रह्मणि अतिव्याप्तेः। न द्वितीयः। असति अव्याप्तेः। तस्यापि क्वचिदपि उपाधौ शब्दाभासादिना प्रतीयमानत्वात्।** (कण्ट. ८७)

The distinction made on the grounds that Mithyā is **सप्रतियोगिक,** and **असत्** is **निष्प्रतियोगिक** Mithyā is **सन्मात्रविलक्षण** etc., also do not hold good.

The third definition of Mithyātva

3) A third definition of Mithyātva is proposed as **ज्ञानत्वेन ज्ञाननिवर्त्यत्वम्** The śuktirajata that appears to an observer vanishes as soon as he gets the right knowledge. Similarly, the entire **वियदादिप्रपञ्च** also vanishes as soon as one gets the right knowledge of Ātmaikya.

Strictly speaking this definition does not apply to cases like Śuktirajata at all. When the observer who felt that he is observing a śuktirajata later realises that what is before him is only a Śukti but not Rajata his ignorance of Śuktirajata vanishes but not the very Śuktirajata that was not at all there to Vanish. The ignorance of Śuktirajata is not Mithyā. This position is neatly put in Nyāyāmṛta as under:

विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभूयते ।
किन्त्वधिष्ठानवत् सत्ये तदज्ञानेऽनुभूयते । (न्या. ९८)

Advaitasiddhi tries to find out a way out by which in addition to the vanishing of Śuktirajatajñāna, the so called Śuktirajata also vanishes by the right knowledge. The phrase **ज्ञाननिवर्त्यत्व** is explained as: **ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वम्। अवस्थितिश्च द्वेधा स्वरूपेण कारणात्मना च।**

In the instance of Sūtirajata as there is the cognition of Śuktirajata, its **अवस्थिति** has to be accepted during its appearance. This will vanish by the sublating knowledge. **शुक्तिरजतादेश्च अपरोक्षप्रतीत्यन्यथानुपपत्त्या प्रतिभासकाले अवस्थित्यङ्गीकारात् बाधकज्ञानं विना न तद्विरहः।** (सि. ९९)

He appears to suggest that along with the vanishing of erroneous knowledge its apparant content Śuktirajata also vanishes. This is exactly the characteristic of a Mithyā object.

He contrasts the position of Asat with this as follows:

शशविषाणादौ अवस्थितिसामान्यविरहेपि ज्ञानप्रयुक्तत्वाभावात् न अव्याप्तिः। (सि. ९९)

Though an Asat entity like śaśaviṣāṇa also has **अवस्थिति विरह** it is not due to the knowledge. This distinguishes the Mithyā from Asat.

It is in this contrasting of Asat and Mithyā that the weakness of this explanation can be discovered. Earlier it is agreed by Advaita Siddi that **रूप्यादेः स्वरूपेणैव निषेधः।** On this ground it is already stated that the so called Mithyā object is **अत्यन्तासत्**. Therefore, its vanishing is not due to the right knowledge. It is not at all there to be vanished. Therefore, just as the absence of Asat is not **ज्ञानप्रयुक्त** the absence of so called Mithyā is also not **ज्ञानप्रयुक्त.**

'रूप्यादेः स्वरूपेणैव निषेधः इति त्वत्पक्षे रूप्यादेरत्यन्तासत्त्वस्यापादितत्वेन रूप्याद्यभावोऽपि शशविषाणाद्यभाव इव ज्ञानाप्रयुक्तः (तर. १०१)
शुक्तिरूप्यस्यावस्थित्यभावेन तद्विरहस्य ज्ञानप्रयोज्यता न सम्भवति।
(कण्ट. १०२)

Thus, the definition **ज्ञानत्वेन ज्ञाननिवर्त्यत्वम्** suffers from inapplicability.

The fourth definition of Mithyātva

4) A fourth definition of Mithyātva is proposed as **स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं मिथ्यात्वम्।**

This definition also is self contradictory. Since the absence and the presence of an entity cannot be in one and the same place. However, Advaita Siddhi claims that such a position is possible. Just as the presence and the absence of an entity can be in time, it can also be in place. Naturally this claim has to be rejected.

यदुक्तं प्रतियोगितदत्यन्ताभावयोः काल इव देशेपि अविरोधः इति तन्न।
तथा सति भावाभावयोः विरोध एव उच्छिन्नकथः स्यात्। (तर. १०५)

Further, this definition will apply to Asat also. Even if it is elaborated as **स्वात्यन्ताभावाधिकरण एव सत्त्वेन प्रतीयमानत्वम्** it applies to Asat.

The stock arguement that there can be the absence and the presence of the entities of different levels of existance in the same place, also

does not hold good, because, such levels of existance are yet to be proved.

यदपि चोक्तं विषमसत्ताकयोः तयोः अविरोधः इति। तन्न। लाघवेन अत्यन्ताभावमात्रस्यैव प्रतियोगिसामानाधिकरण्यविरोधित्वात्। (तर. १०६)

The fifth definition of Mithyātva

5) A fifth definition is proposed as सद्विविक्तत्वं मिथ्यात्वम्। This definition is further elaborated by Advaita siddhi as: सत्त्वं प्रमाणसिद्धत्वं तद्विविक्तत्वं मिथ्यात्वम्। Even this much will not be sufficient since both Asat and Brahman will fulfill this definition. Therefore: सत्त्वेन प्रतीयमानत्वम् also has to be added.

सद्विविक्तत्वं वा मिथ्यात्वम् । सत्त्वं च प्रमाणसिद्धत्वम्। अत्रापि असति निर्धर्मके ब्रह्मणि च अतिव्याप्तिवारणाय सत्त्वेन प्रतीयमानत्वं विशेषणं देयम् (सि. १०७)

It is further stated that प्रमाणसिद्धत्व here is अबाध्यत्वव्याप्य. Only that has to be taken as प्रमाणसिद्ध which is अबाध्य i.e., not sublated. This cuts the very ground of this definition: ब्रह्मन् is अबाध्य but not प्रमाणसिद्ध. The वियदादिप्रपञ्च is प्रमाणसिद्ध but it is बाध्य. 'प्रमाणासिद्धस्यापि ब्रह्मणः अबाध्यत्वात्।। प्रमाणसिद्धस्यापि प्रपञ्चस्य बाध्यत्वाच्च (तर. १०७) The other clause सत्त्वप्रकारकप्रतीतिविषयत्व which is intended to exclude Brahman and Asat from the scope of Mithyā also does not help. These two are also सत्त्वप्रकारकप्रतीतिविषय. The श्रुति 'तत् सत्यम्' indicates that ब्रह्मन् is सत्त्वप्रकारकप्रतीतिविषय. The statement 'शशविषाणमस्ति' though made mistakenly indicates: 'सत्त्वप्रकारकप्रतीतिविषयत्व of असत्

After examining the five definitions of Mithyātva, Nyāyāmṛta raises the question of the status of Mithyātva itself. In the course of the discussion of the definitions, the status of the Mithyā objects viz., वियदादिप्रपञ्च and शुक्तिरजत were discussed. The status and the manner of the denial were discussed. Now the question regarding the status of the attribute Mithyātva stated to be present in Mithyā objects is raised.

Firstly, is it **अबाध्य** i.e., not to be sublated or **बाध्य** i.e., to be sublated? If it is Abādhya, then its status is same as that of Brahman. This means there are two real entities viz., Brahman and Mithyātva. This results in the abandoning of Advaita position. To avoid such a contingency, if it is considered as **बाध्य** i.e., to be sublated, then, the Mithyā would become real, since its Mithyātva characteristic is knocked off as soon as this characteristic is sublated.

मिथ्यात्वं यदबाध्यं स्यात् सदद्वैतमतक्षतिः ।
मिथ्यात्वं यदि बाध्यं स्यात् जगत्सत्यत्वमापतेत् ।। (न्या. १११)

It cannot be said that the Mithyātva that is stated as Abādhya is identical with Brahman and therefore, there is no **अद्वैतहानि**. The Mithyātva that is **प्रपञ्चोपाधिक** cannot be identical with **निरुपाधिकब्रह्मन्**। It cannot also be said that Mithyātva is identical with the Brahman that is without a second. In this case, the question whether the very fact of being without a second is Abādhya or Bādhya can be raised.

न च मिथ्यात्वं न ब्रह्ममात्रं किन्तु द्वितीयाभावोपलक्षितं ब्रह्मेति वाच्यम्। उपलक्षणे द्वितीयाभावे एव बाध्याबाध्यविकल्पात्। (न्या. ११०)

The contention that both **वियदादिप्रपञ्च** and its Mithyātva have the same order of Sattā and therefore there is no **अद्वैतहानि** is also not correct, because, if both the Mithyā object and its Mithyātva characteristic are Mithyā the very process of **भ्रान्ति** and **बाध** will collapse.

Further, it is your theory that Mithyātva of Prātibhāsika order is Vyāvahārika and that of Vyāvahārika order is Prātibhāsika.

न च मिथ्यात्वं प्रपञ्चसमसत्ताकम्। एवं च न अद्वैतहानिः इति वाच्यम्। मिथ्यात्वस्य प्रातिभासिके व्यावहारिकतया व्यावहारिके प्रातिभासिकतया दृष्टत्वेन तयोः तुल्यसमसत्ताकत्वायोगात्। (न्या. ११०)

II

Driśya etc the four arguements for Mithyātva.

After examining the concept of Mithyātva, Nyāyāmṛta takes up the examination of the four syllogistic arguements that are proposed for establishing Mithyātva. These are :

१. दृश्यत्वम्, २. जडत्वम्, ३. परिच्छिन्नत्वम्, ४. अंशित्वम्

Viz., Cognisability, non-sentiency, limitedness and having parts. These four characteristics are stated to be the characteristics of an entity that is not real since these indicate the conditional nature of the entity concerned. The real is that which is not limited or conditioned by the space, time and the presence of any other object. Brahman alone is such a real entity since it is not conditioned or limited in any way.

Nyāyāmṛta examines these four arguements in detail.

1) Let us first notice the examination of the concept of **दृश्यत्व**. It is explained in Six ways in Advaita. We will mention four alternatives that are more significant. These are:

१. वृत्तिव्याप्यत्वम्, २. फलव्याप्यत्वम्,
३. स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिः, ४. अस्वप्रकाशत्वम्

The first two of these bring out the fact of the object being conditioned by cognition and the second two bring out the fact of the absence of self luminacity. These two features bring out the limited or conditioned nature of such objects epistemologically. This militates against the reality of these. Such conditioning features are not found in respect of Brahman which alone is real. Brahman is neither **वृत्तिव्याप्य** nor **फलव्याप्य** in the routine way. It does not need **स्वातिरेकिसंवित्** for the cognition. It is **स्वप्रकाश** also. Thus, these characteristics contrast the other entities i.e., **वियदादिप्रपञ्च** from **ब्रह्मन्** and indicate that Brahman alone is real.

a) Now, let us examine this contention. In Advaita it is claimed that Brahman is cognised by the वृत्तिज्ञान generated by the knowledge of Vedantic passages like 'तत्त्वमसि' 'अहं ब्रह्मास्मि' etc., This means that Brahman is वेदान्तवाक्यजनितवृत्तिव्याप्य। Therefore वृत्तिव्याप्यत्वरूपदृश्यत्व is found in Brahman also. This is also confirmed by the statement: सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' This सर्वप्रत्ययवेद्यत्व is nothing but दृश्यत्व.

The second explanation of दृश्यत्व i.e., फलव्याप्यत्व is not able to cover the entire वियदादिप्रपञ्च as its characteristic. The नित्यातीन्द्रिय objects, अन्तःकरण, सुख, अतीत objects are not फलव्याप्य according to the procedure laid down for फलव्याप्यत्व in Advaita. Therefore दृश्यत्व in the sense of फलव्याप्यत्व cannot cover these. Further, शुक्तिरजत which is given as the example is also not फलव्याप्य. Therefore, this cannot be a contrasting feature between Brahman and the others.

The third explanation viz., स्वातिरेकिसंविदपेक्षानियतिः is as much applicable to Brahman as to the so called Mithyā objects, because, in respect of स्वप्रकाशत्वाद्वितीयत्वादिविशिष्टव्यवहार, स्वातिरेकिसंविदपेक्षा is found.

The fourth explanation अस्वप्रकाशत्व also does not hold good, since such अस्वप्रकाशत्व is found in अविद्यानिवृत्ति also.

The above points are neatly summarised in Nyāyāmṛta as under.

न धर्मादौ फलव्याप्तिर्वृत्तिव्याप्यत्वमात्मनि ।
अज्ञातत्वादिरूपेण चिद्वेद्यत्वं तु चित्यपि ॥
अन्यापेक्षाभिलापत्वमस्त्यौपनिषदात्मनि ।
त्वदुक्तास्वप्रसत्वं च रूप्ये नास्त्यस्ति चात्मनि ॥ (न्या. १३१)

b) The Advaitasiddhi claims that excepting फलव्याप्यत्व the other three explainations could be the contrasting features of वियदादिप्रपञ्च from Brahman and the term दृश्यत्व can be understood in any of these senses: फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्यापि पक्षस्य क्षोदक्षमत्वात् ।

The वृत्तिव्याप्यत्व pointed out in Nyāyāmṛta in respect of ब्रह्मन् applies only to उपहितब्रह्मन् but not शुद्धब्रह्मन्। The Statement: सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते also relates to उपहितब्रह्मन् only. In spite of शुद्धब्रह्मन् not being वृत्तिव्याप्य it can be ascertained, because, it is स्वप्रकाश। Even in the statement शुद्धं स्वप्रकाशम् the शुद्धब्रह्मन् is not शब्दजन्यवृत्तिविषय। The import of this statement has to be understood as: अशुद्धत्वम् अस्वप्रकाशत्वव्यापकम् The more simple solution for this problem is to explain the implication of दृश्यत्व as शब्दाजन्यवृत्तिविषयत्व This means that there is no harm even if ब्रह्मन् is शब्दजन्यवृत्तिविषय. 'वस्तुतस्तु शब्दाजन्यवृत्तिविषयत्वमेव दृश्यत्वम् । एवं च सति शुद्धस्य वेदान्तजन्यवृत्तिविषयत्वेऽपि न तत्र व्यभिचारः (सि. १३३)

The second explanation of दृश्यत्व viz. फलव्याप्यत्व is given up by Advaitasiddhi.

The third explanation of दृश्यत्व viz., स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिः is also justified by Advaitasiddhi. In the case of वियदादिप्रपञ्च there is always the need of विषयाभिव्यक्तचैतन्य or वृत्त्यभिव्यक्तचैतन्य for their cognition but in the case of Brahman there is no such need since स्फुरणरूपव्यवहार of Brahman is नित्यसिद्ध. Therefore, दृश्यत्व in this sense also contrasts वियदादिप्रपञ्च from ब्रह्मन्.

> 'स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिरूपं दृश्यत्वं हेतुः। संविच्छब्देन विषयाभिव्यक्तं वा वृत्त्यभिव्यक्तं वा शुद्धं वा चैतन्यमात्रमभिप्रेतम्। (सि. १३३)

The fourth explanation of दृश्यत्व i.e., अस्वप्रकाशत्व also holds good according to Advaitasiddhi. The term स्वप्रकाशत्व has to be understood in the sense of स्वापरोक्षे स्वातिरिक्तानपेक्षत्वम्। In other words अन्यानाधीनपरोक्षवत्त्वम्। The वियदादिप्रपञ्च is always अन्याधीनापरोक्ष while Brahman is not so. Therefore, in this sense also दृश्यत्व is a contrasting feature of वियदादिप्रपञ्च and ब्रह्मन्.

Advaita siddhi offers a few more explanations of the term दृश्यत्व and also a few more expansion of the implications. But the underlying arguements are the same.

c) The above claims of Advaita siddhi cannot be accepted. Firstly, the claim that शुद्धब्रह्मन् is not वृत्तिविषय but it is only उपहितब्रह्मन् that is वृत्तिविषय cannot stand, because, the latter part of the statement 'सर्वप्रत्ययवेद्ये च etc., viz' 'प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते' makes it clear that what is stated as वेद्य here is शुद्धब्रह्मन् only.

'न च विशिष्टं सर्वप्रत्ययवेद्यं न शुद्धमिति वाच्यम्। 'प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते इत्युत्तरार्धेन जगद्विलयाधिष्ठानत्वोक्त्या सर्वप्रत्ययवेद्यस्य शुद्धत्वात्। पूर्वार्धेपि 'व्यवस्थिते' इत्यनुगतत्त्वोक्त्या शुद्धस्यैव प्रतीतेः। (तर. १३७)

The simplified solution by explaining वृत्तिविषयत्व as शब्दाजन्यवृत्तिविषयत्व to exlude ब्रह्मन् also does not help to exclude him since Brahman is also चाक्षुषघटादिविषयकवृत्तिविषय. This is confirmed by the very statement: सर्वप्रत्ययवेद्य.

'चाक्षुषतादृशघटादिविषयकवृत्तिविषयत्वाद् ब्रह्मणः तत्र व्यभिचारस्य दुष्परिहरत्वात्। न च घटादिप्रत्ययेषु ब्रह्म न विषयः इति वाच्यम्। तथा सति 'सर्वप्रत्ययवेद्येचेति स्ववचनविरोधात्। (तर. १३७)

The defence of the third explanation of दृश्यत्व viz स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिः is also not valid. Brahman that is concealed by Avidyā during the Sansāra stage has to be cognised by वेदान्तवाक्यजन्य वृत्ति to get out of Avidyā. This means that स्वातिरिक्तसंविदपेक्षा is necessary for the cognition of Brahman also.

'आसंसारमज्ञानावृतस्य शुद्धस्य स्वव्यवहारे अनधिगतार्थबोधकवेदान्त जन्याज्ञाननिवर्तक वृत्त्यपेक्षानियमात्। (न्या. ३०)

Brahman by itself cannot get rid of Ajñāna as it is not the opposite of Ajñāna. If by mere sphurana of Brahman the Ajñāna was to go, then the vedānta passages would not be a Pramāna to provide the cognition of Brahman which is self revealed.

शुद्धस्याज्ञानाविरोधित्वात् न कदाचिदपि स्वाज्ञाननिवर्तकत्वम्। किञ्च आत्मव्यवहारः स्वतः स्फुरणादेव तर्हि वेदान्तानां प्रकाशमानार्थप्रकाशकत्वेन प्रामाण्यं न स्यात्। (तर. १४९)

It is argued that the वेदान्तवाक्यवृत्तिज्ञान only removes Ajñāna, so far as the knowledge of Brahman is concerned its sphurana is sufficient, no other knowledge is required. While in the case of the other objects the vrittijnana is required to cognise the very objects. Because, the other objects being जड, are not स्फुरणरूप। Hence दृश्यत्व is applicable only to घटादि and not to the ब्रह्मन्। But, the arguement does not hold good, because in case of घटादि also, when once the ajñāna is removed, no other cognition is required for its व्यवहार। Therefore, on this ground also no distinction can be made between the cognition of Brahman and the other objects.

> ननु आत्मव्यवहारे न वेदान्तजन्यसंविदपेक्षा किन्तु आत्माज्ञाननिवृत्तिमात्रे। आत्मव्यवहरस्तु स्वतः स्फुरणादेव अतो नात्मनि व्यभिचारः। घटादौ तु अस्फुरणरूपतया व्यवहारेपि स्वातिरिक्तसंविदपेक्षा अस्तीति न असिद्धिरिति शङ्कां निराकरोति। न घटादावपि। वृत्त्या अज्ञाने निवृत्ते व्यवहारार्थं संविदन्तरापेक्षा अनुभूयते। (तर. १४९)

Therefore, the third explanation of the term also cannot be the ground to contrast the वियदादिप्रपञ्च from Brahman.

Finally, the fourth explanation viz., अस्वप्रकाशत्वम् also does not serve the purpose. The terms स्वप्रकाशत्व is explained as अन्यानधीनापरोक्षत्वम्. Here the question is, whether such an अपरोक्षत्व is ब्रह्मातिरिक्त or ब्रह्मस्वरूप. If it is ब्रह्मातिरिक्त then it is अविद्याधीन and if it is ब्रह्मस्वरूप such अपरोक्षत्व is not found in वियदादिप्रपञ्च। Consequently the distinction of स्वप्रकाशत्व and अस्वप्रकाशत्व cannot be worked out on this basis.

From the above summary of the arguements for and against the concept of दृश्यत्व, the following points are clear.

1) An attemp is made here in Advaita to distinguish वियदादिप्रपञ्च from ब्रह्मन् on epistemological grounds. The वियदादिप्रपञ्च is दृश्य i.e., cognisable and has the process of the knower, known and knowledge arrangements within its fold.

Brahman is not दृश्य i.e., is not cognisable by an outside agency nor it has any knower, known, knowledge arrangements within its fold.

2) Out of the four explanations of दृश्यत्व proposed in Advaita the first two make the first point, the second two explanations make the second point.

3) Advaita makes the non-cognisability a criterion of Reality and the cognisability a criterion of non reality. In other words Advaita makes दृश्यत्व a criterion of Mithyātva and considers the वियदादिप्रपञ्च as Mithyā.

4) The Nyayamrita rejects the above contentions. The four explanations of दृश्यत्व given by Advaita are pointed out to be logically not sustainable nor helpful to support Advaita contention.

   i) It is pointed out in Nyayamrita that Brahman has to be considered as cognisable and cognisability is not a criterion of unreality.

   ii) The Svaprakasatva concept of Advaita is not tenable. Brahman is not outside the scheme of the knower, known and the knowledge. He is involved in the process of knowing as knower, known, knowledge as प्रमातृचैतन्य, प्रमाणचैतन्य and विषयचैतन्य, and he is दृश्य in the sense of वृत्तिव्याप्य।

It is interesting to note that in the course of the discussion of these epistemological issues, the Advaita concept of वृत्तिव्याप्यत्व, फलव्याप्यत्व, स्वप्रकाशत्व etc., are not questioned at the very outset. These are used in their sense and the untenability of the concept of दृश्यत्व is pointed out in the framework of their own epistemology. The maxim of परन्यायेन दूषणम् is considerably followed.

The arguement of जडत्व

After reviewing the concept दृश्यत्व, The concept and the term जडत्व i.e., non-sentiency is reviewed. This term could be explained in one of the four ways viz., i) अज्ञातृत्वम् ii) अज्ञानत्वम् iii) अस्वप्रकाशत्वम् iv) अनात्मत्वम् viz., Absence of knowership, absence of the status of knowledge, absence of self luminacity and the absence of the status of Atman. In other words, a Jada is that which is not knower, not knowledge, not self luminous and not Atman.

a) Nyāyāmṛta points out that none of the four explanations of this term works out in Advaita. The first i.e., अज्ञातृत्व does not hold good in the case of अहमर्थ i.e., अन्तःकरण which is जड but still is ज्ञाता according to Advaita. It is अन्तःकरण that is the knower according to Advaita. Further, शुद्धात्मन् which is not jada also has अज्ञातृत्व। Therefore, this definition suffers from both अव्याप्ति and अतिव्याप्ति.

The second explanation viz., अज्ञानत्वं जडत्वम् also does not hold good, because, वृत्तिज्ञान has ज्ञानत्व but still considered as jada. The untenability of the concept of अस्वप्रकाशत्व as conceived in Advaita is already pointed out. The explanation अनात्मत्वं जडत्वम् is also difficult to be sustained since the very concept of आत्मत्व cannot be properly explained in Advaita. The question whether आत्मन् is ज्ञानरूप is discussed in detail and pointed out that in Advaita it cannot be either सविषय or निर्विषय, स्वविषय or परविषय. It is also pointed out that आत्मन् cannot be described as अखण्डानन्दरूप प्रत्यक् etc., also. Thus the very concept of आत्मत्व cannot be properly explained in Advaita.

b) Advaita siddhi claims that अज्ञानत्व and अनात्मत्व can be the definitions of a jada. The examination of these claims is made in detail in न्यायामृत, तरङ्गिणी and कण्टकोद्धार। The result of this discussion is graphically summarised in the प्रकाश of श्रीनिवासतीर्थ as under.

ज्ञातृत्वादीनामात्मत्वे अज्ञातृत्वमनात्मत्वमस्वप्रकाशत्वं च अनात्मत्वमित्युक्तं स्यात्। तथाच आद्यस्य अहमर्थे असिद्धिः द्वितीयस्य वृत्तिज्ञाने तृतीयस्य फलव्याप्यत्वे सति अपरोक्षव्यवहारयोग्यत्वाभावरूपस्य घटादौ अविद्यादौ च असिद्धिः (प्र. १९५)

From the above discussions, the following points are clear.

An attempt is made by Advaita to define jada contrasting it from the knowledge and the knower. Normally there should be no difficulty in accepting this.

However, the Advaita defines the knowledge and the knower in such a way that these are also brought under जड and are treated on par with jada. It is only ब्रह्मन् that is ajada for them. But this ब्रह्मन् has neither knowership nor the knowledge in the normal sense of the term. These two features belong to अनात्मा side according to Advaita. Therefore, on these grounds वियदादिप्रपञ्च which is termed as jada and ब्रह्मन् which is claimed to be ajada cannot be contrasted and separate ontological status given to them as सत्य and मिथ्या

The arguement of परिच्छिन्नत्व

परिच्छिन्नत्व i.e., having limited nature is the next ground on the basis of which Mithyatva of वियदादिप्रपञ्च is proposed to be established. परिच्छिन्नत्व of an object can be stated in terms of space, time and the presence of another object. परिच्छिन्नत्वमपि देशतः कालतः वस्तुतो वा। The entire वियदादिप्रपञ्च cannot be claimed to be परिच्छिन्न and contrasted from Brahman on this ground. There are certain entities within वियदादिप्रपञ्च that are also अपरिच्छिन्न. For instance, the very देश and काल are अपरिच्छिन्न. The अविद्या of Advaitins is also अपरिच्छिन्न.

b) In Advaita to establish मिथ्यात्व on the ground of परिच्छिन्नत्व certain syllogisms are proposed. Some of these are:

i) विवादाध्यासिताः स्वानुगतप्रतिभासे वस्तुनि कल्पिताः विभक्तत्वात्

ii) विवादाध्यासितं सद्रूपे कल्पितं प्रत्येकं तदनुविद्धतया प्रतीयमानत्वात्। (न्या. १९८)

The idea behind these syllogisms is 'In all experiences Brahman is a continuing factor and the individual objects presented in these experiences are only projections since these are limited and many.

> सदर्थे ब्रह्मणि अनुगच्छति पटादिकं विभज्यते 'सन् घटः' 'सन् पटः' इति प्रतीतेः (न्या. १९८)

This line of arguement has two difficulties. Firstly, in our experiences when something is continuous and the others occure separetely as in **खण्डो गौः** and **मुण्डो गौः** the separately occuring attributes viz., **खण्डत्व** and **मुण्डत्व** are not projected on **गोत्व**. These attributes are as much real as **गोत्व**. Therefore, this syllogism does not serve its purpose. Secondly, in the experiences **'सन् घटः' 'सन् पटः'** the expression **सन्** does not represent Brahman. Brahman cannot be cognised by the eye. He cannot also comprehended until the removal of Ajñāna.

> 'रूपादिहीनमासंसारमज्ञानावृतं शब्दैकगम्यं ब्रह्म 'सन् घटः' 'सन् पटः' इत्यादिचाक्षुषज्ञाने न प्रतिभाति। (न्या. १९८).

Therefore, these syllagisms are not able to establish **मिथ्यात्व** on the ground of **वस्तुतः परिच्छिन्नत्व**.

Advaita Siddhi tries to answer the second difficulty by saying that **ब्रह्मन्** refered to in the experiences **'सन् घटः' 'सन् पटः'** etc. is not veiled by **मूलाज्ञान**. It is covered by **घटाद्यवच्छिन्नशक्त्यज्ञान**। This is removed when **अन्तःकरणवृत्ति** takes place. Therefore, there is no difficulty in Brahman being presented in the experience **'सन् घटः'**। Further, **ब्रह्मन्** is **सर्वेन्द्रियग्राह्य**। Therefore, he need not have colour for being presented in a perceptual experience like **'सन् घटः'**.

> 'सदात्मना ब्रह्मणो न मूलाज्ञानावृतत्वम्। किन्तु घटाद्यवच्छिन्नशक्त्यज्ञानेनैव। तथाच चक्षुरादिजन्यवृत्त्या तदावरणभङ्गे सति 'सन् घटः' इत्यत्र ब्रह्मणः स्फुरणे बाधकाभावात्। सर्वेन्द्रियग्राह्यं तु सद्रूपं ब्रह्म। नातो रूपादिहीनत्वेपि चाक्षुषत्वाद्यनुपपत्तिः। सत्तायाः परैरपि सर्वेन्द्रियग्राह्यत्वाभ्यपगमात्। (सि. २००)

c) These two contentions of Advaitasiddhi viz.,

i) सदात्मना ब्रह्मणो न मूलाज्ञानेनावृतत्वम् ।
ii) ब्रह्म सर्वेन्द्रियग्राह्यम् ।

are rejected by तरङ्गिणी. According to Advaita, Brahman is अखण्डरस। Its सदात्मकत्व and आनन्दात्मकत्व are no distinct features. Therefore if सदात्मकत्व is presented in the experience 'सन् घटः' आनन्दात्मकत्व also will have to be presented. This does not take place.

i) तव मते आनन्दात्मनो अखण्डरसत्वेन सदात्मनः आवरणापगमे आनन्दात्मनोऽप्यावरणापगमस्य आवश्यकतया सत्प्रकाशवत् आनन्दप्रकाशस्याप्यावश्यकत्वात् (तर. २०७)

ii) अत्यन्ताव्यक्तस्वभावस्य ब्रह्मणः चक्षुरादिसर्वेन्द्रियग्राह्यत्वे मानाभावात्

In this way, since the concept of परिच्छिन्नत्व also cannot be properly explained, it cannot be utilised to establish.मिथ्यात्व।

The arguement of अंशित्व

The fifth ground i.e., अंशित्वम् proposed for establishing मिथ्यात्व is stated in a syllogistic form as follows-

अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अंशित्वात् (न्या. २२१)

The idea behind this syllogism is that a product which is made of parts, is absent in its parts - the material cause, just as it is absent in the parts of another whole. In short, an अंशी has no existence and hence unreal. In the instance of a piece of cloth, the threads are अंश and cloth is अंशी, there is no whole spread over the parts. Nor such a whole of this piece of cloth is anywhere else. Therefore, it is Mithyā. Here, by 'threads' the उपादानकारण in general has to be understood तन्तुपदमुपादानपरम्. Therefore, the definition of मिथ्यात्व that is proposed here is: स्वोपादाननिष्ठात्यन्ताभावप्रतियोगित्वम् (सि.२२१)

This definition and the syllogism that proposes this suffer from many draw backs. Firstly, **इह तन्तुषु पटः इति प्रत्यक्षबाधितम्।**

A counter syllogism refuting this syllogism also can be propesed as:

अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न एतत्तन्त्वारब्धत्वात् (न्या. २१९)

Further, **अंशित्वं तन्तुरूपांशवत्त्वं तच्च आश्रयाश्रयिभावसम्बन्धेनैव नान्यथा। एवं च अन्यासमवेतत्वेन सिद्धस्य पटादेः अंशित्वम् एतत्तन्तुसमवेतत्वं विना न युक्तम्। एवंच अंशित्वरूपहेतोः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपसाध्येन विरोधः** (प्र. २३२)

Srinivasatirtha neatly summarises the drawbacks in this syllogism as follows: **अंशित्वहेतोः विरुद्धानैकान्तिकबाधसत्प्रतिपक्षोपाध्याभाससाम्यानि** (प्र. ३३२)

As stated in Srinivasatirtha's remarks, a number of **उपाधिऽ** for **दृश्यत्व** etc. are pointed out at the close of the discussion of these **हेतु**s. Some of these are:

1) **विपरीतप्रमाविषयत्व** 2) **दोषप्रयुक्तभानत्व** 3) **श्रुतितात्पर्याविषयत्व** 4) **प्रतिभासमात्रशरीरत्व.**

Advaita siddhi argues that since **श्रुतितात्पर्यविषयत्व** is confined to **ब्रह्मन्** only, there is no harm, if certain other items such as **धर्म** etc., that are included under **पक्ष** are not **श्रुतितात्पर्यविषय.** This contention is rejected by **तरङ्गिणी. 'तथासति धर्माद्यसिद्ध्यापत्त्या श्रुतिजन्यज्ञानविषयत्वस्य ब्रह्मभिन्नेऽप्यङ्गीकार्यत्वात्.**

आभाससाम्य is also pointed out by the following two syllogisms

i) **विमतं प्रातिभासिकं दृश्यत्वात् शुक्तिरूप्यवत्**
ii) **ब्रह्म मिथ्या व्यवहारविषयत्वात्, असद्विलक्षणत्वाद्वा शुक्तिरूप्यवत्।**

Advaita siddhi opposes these syllogisms on the ground that:

i) **जगतो व्यावहारिकसत्त्वबाधे व्यवहारानुपपत्तिः।**
ii) **ब्रह्मणो मिथ्यात्वे शून्यवादापत्तिः** (सि. २४५)

These **प्रतिकूलतर्क**s are countered by **कण्टकोद्धार** by pointing out similar **प्रतिकूलतर्क** for **मिथ्यात्वानुमान** also.

i) यदि जगद् मिथ्या स्यात् अर्थक्रियाकारि न स्यात्
ii) ब्रह्मव्यतिरिक्तस्य सर्वस्यापि मिथ्यात्वे ब्रह्मणो निर्विशेषत्वापत्त्या शून्यवादापत्तिः।

These arguments clearly bring out the respective positions of न्यायामृत and अद्वैततसिद्धि and reveal the basic difference in there metaphysical and epistemological positions.

Nyāyāmṛta has clearly brought out the untenability of the concept of Mithyātva, and the arguments proposed in support of this concept.

III

The definition of सत्त्व

After reviewing the concept of Mithyatva proposed by Advaita. Nyayāmrita takes up the issue of the concept of सत्त्व. This is necessary, because in Adviata सत्त्व is confined to Brahman only and defined to suit this restricted area. However, in the light of the rejection of the concept of Mithyatva, सत्त्व has to be defined so as to include वियदादिप्रपञ्च also in its scope. Therefore, this question is taken up. The import of the term सत्त्व could be explained in a number of ways such as असद्वैलक्षण्यम्, अर्थक्रियाकारित्वम्, प्रमाविषयत्वम्, and so on. Though these bring out the feature of सत्त्व to some extent, these are not logically perfect definitions. Therefore, Nyayamrita puts the ball back in the court of Advaitin only by saying:

यादृशं ब्रह्मणः सत्त्वं तादृशं स्यात् जगत्यपि

This phrase has to be carefully understood. The intention here is not to say that the nature of Brahman and Jagat is the same but to say that just as the सत्त्व of Brahman conveyed by Śruti enables one to know that Brahman is not Mithyā, the सत्त्व of the Jagat conveyed by the perception 'सन् घटः' enables one to know that the Jagat is not Mithyā.

तव आत्मनि यत् सत्त्वं तदेवेह मम इत्यस्य यः स्वभावः ब्रह्मणः स एव जगतः इति नार्थः। किन्तु यादृशेन सत्त्वेन मिथ्यात्वप्रतिपक्षेण सत्यशब्दावगतेन ब्रह्मणि मिथ्यात्वाभावसम्प्रतिपत्तिः तादृशेन 'सन् घटः' इति प्रत्यक्षसमधिगम्येन घटादिगतेन घटादेरपि मिथ्यात्वाभावसम्प्रत्ययः (तर. २५७)

This rules out Advaitasiddhi's misunderstanding of this remark that the सत्त्व of the nature of स्वप्रकाशाद्वितीयचैतन्य assigned to Brahman in Advaita is assigned to Jagat also in this statement. Such a concept of सत्त्व is not at all acceptable to Dvaita and the question of claiming such सत्त्व to Jagat also does not arise.

Nyayamrita defines सत्त्व as:

त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता।
सत्तोच्यतेऽध्यस्ततुच्छे तु तं प्रति प्रतियोगिनी॥

That which cannot be denied with reference to past, present and future, and in all places, is सत्. Only शुक्तिरजत and शशविषाण could be denied at all times and in all places. Therefore, these are असत्. वियदादिप्रपञ्च Consisting of नित्य and अनित्य objects cannot be denied at all times and in all places., since these are present at sometime or the other and in some place or the other.

A few other definitions of sattva such as:
'असद्विलक्षणत्वे सति अनारोपितत्वम्' अस्तित्वप्रकारकप्रमां प्रति कदाचित् साक्षाद्विषयत्वम् 'कालसम्बन्धित्वम्' etc. are also given.

In the above discussion the perception 'सन् घटः' is given as the evidence for सत्त्व. However, Advaitins take the position that the expression 'सत्' in that statement of the perception represents the Brahman that is अधिष्ठान. The घट has no other सत्त्व apart from the fact of Brahman being its अधिष्ठान. This is technically known as अधिष्ठानानुवेध. The sattva of the Ghata cannot be defined or understood in any other way.

इदं रूप्यमित्यत्र इदमितिवत् 'सन् घटः' इत्यत्रापि सन्नित्यधिष्ठानब्रह्मानुवेध एव

This is very lucidly explained by Srinivasatirtha as:

यथा इदं रूप्यमित्यत्र रूप्ये इदंताविरहात् अधिष्ठानभूतशुक्तिकायां इदंत्वेन गृह्यमाणायां तत्र आरोपितं रजतमपि इदमिति भ्रमे निर्दिश्यते। तथा सद्रूपे ब्रह्मणि घटादेः अध्यस्तत्वेन तद्वतमेव सत्त्वं घटादौ व्यवह्रियते। तथा च न घटादौ सत्त्वं प्रत्यक्षविषयः। (प्र. ३०८)

The contention of Advaita is rejected by pointing out that Brahman that is colourless cannot present itself in a visual perception.

चाक्षुषादिज्ञाने रूपादिहीनब्रह्मास्फुरणादित्युक्तत्वात्

The Advaita Siddhi's claim that just as the time that is colourless is the content of all perceptional experiences, Brahman also be the content, is rejected by pointing out that the two cases are different.

i) कालादेः नियमतः साक्ष्युपनतत्वेन तज्ज्ञानसम्भवेऽपि सद्रूपब्रह्मणः तथात्वाभावेन नियमतः चाक्षुषादिज्ञानविषयत्वानुपपत्तेः (कण्ट, २९७)

ii) न च रूपादिहीनस्यापि कालादिन्यायेन स्फुरणमस्तु इति वाच्यम्। इदानीं रूपमिति कालोल्लेखवत् ब्रह्मणः - तद्विषयत्वाभावात् (तर. २८१)

प्रत्यक्षस्य जात्या प्राबल्यम्

Here, the very fundamental question whether perception is not infallible authority at all is raised.

ननु कथं प्रत्यक्षमात्यन्तिकाबाध्यत्वग्राहि

This question boils down to two alternatives.

i) किं प्रत्यक्षमप्रमाणमेव ?

ii) उत वर्तमानमात्रग्राहित्वात् त्रिकालाबाधाक्षमम्।

The first position i.e., **अप्रामाण्य** of **प्रत्यक्ष** cannot be accepted, because, the **अप्रामाण्य** of **प्रत्यक्ष** does not depend upon **अनुमान** and **आगम**, hence

on the ground of the oposition to them, the validity of **प्रत्यक्ष** cannot be questioned. **प्रत्यक्ष** is superior to these. The inference that the fire is cool cannot negetive the **स्पार्शनप्रत्यक्ष** i.e. **वह्निः उष्णः**। The pratyaksha is superior by its very nature. **प्रत्यक्षस्य जात्यैव प्राबल्यम्**।

प्रत्यक्षस्य उपक्रमादिन्यायैः प्राबल्यम्

Nyayāmrita further states that by **उपक्रमादिन्याय** also Pratyaksha is superior. In this context the following Purvamimāmsā nyāyās are utilised.

१. **असञ्जातविरोधन्याय** (उपक्रमाधिकरणम्)
२. **शीघ्रगामिनः मन्थरगाम्यपेक्षया प्राबल्यम्**
(लिङ्गापेक्षया श्रुतिप्राबल्याधिकरणम्)
३. **विशेषविहितैः सामान्यविहितस्य बाधः**
(वर्त्महोमेन आहवनीयस्य बाधाधिकरणम्)
४. **निरवकाशेन सावकाशस्य गत्यन्तरकल्पनम्**
(अग्नीष्टोमे उपांशुत्वस्य प्राचीनपदार्थप्रयुक्तत्वाधिकरणम्)
५. **अल्पविषयापेक्षया बहुविषयस्य प्राबल्यम्**
(प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम्)

Quoting the above Purvamimāmsā rulings, Nyāyamrita points out that **सत्त्वप्रत्यक्ष** and **भेदप्रत्यक्ष** are superior to the so called **अद्वैतश्रुति** on the grounds :

i) The **प्रत्यक्ष** gives the knowledge of these before **अद्वैतश्रुति** could oppose it and therefore there is: **असञ्जातविरोध**। **उपक्रमाधिकरणन्यायेन उपसंहारादुपक्रमस्यैव अनुपसञ्जात विरोधित्वात्**

ii) The **प्रत्यक्ष** is **शीघ्रगामि** while **अद्वैतश्रुति** is **मन्थरगामिनी** therefore **सत्त्वप्रत्यक्ष** and **भेदप्रत्यक्ष** have a preference over **अद्वैतश्रुति**

iii) **'सन् घटः'** etc, **प्रत्यक्ष** are **विशेषविषय** while **अद्वैतश्रुति** conveys **अद्वैत**, if at all, in a general way: **प्रत्यक्षं हि विशिष्य घट सत्त्वग्राहि। श्रुतिस्तु सामान्येन द्वितीयनिषेधिका**

iv) 'सन् घटः' etc., प्रत्यक्ष is निरवकाश while अद्वैतश्रुति is सावाकश i.e., could be interpreted in a way other than the Advaita interpretation: वृत्त्यन्तरेण वा अनेकार्थत्वेन वा विषयान्तरपरत्वेन वा सावकाशायाः श्रुतेः निरवकाशेन अक्षेण संकोचः।

v) 'सन् घटः' etc. प्रत्यक्ष deal with many matters and therefore, these are बहुविषय while अद्वैतश्रुति deals with only one item and therefore it is अल्पविषय। 'द्वैतग्राहिप्रत्यक्षतदुपजीव्यनुमानकर्मकाण्ड सृष्ट्यादिवाक्यसगुणोपासनादिवाक्यरूपबहुप्रमाणाबाधाय अद्वैतवाक्यस्य प्रतीतार्थबाधः'

From the above, it is clear that सत्त्वप्रत्यक्षप्राबल्य is supported by उपक्रमादिन्याय।

b) The Purvamīmāmsā Nyāyas are acceptable to both Dvaita and Advaita as guidelines for the interpretation of Śruti. Therefore, अद्वैतसिद्धि does not dispute these Nyāyas but differs from Nyayāmrita in their application in the present context. Advaitasiddhi argues:

i) In the उपक्रमाधिकरण the उपक्रम is prefered to उपसंहार because, both of them are समबल and one has occured earlier. However, in the present case प्रत्यक्ष and आगम are not समबल. आगम is superior to प्रत्यक्ष. Therefore pratyaksha cannot be prefered simply on the ground that pratyaksha occures earlier.

'एकवाक्यस्थपरस्परसापेक्षपदत्वेन उभयोः साम्ये सति उपक्रमस्थवेदपदानुरोधेन उपसंहारस्थ ऋगादिपदानां मन्त्रमात्रवाचिनां वेदपरत्वे निर्णीतेऽपि न प्रकृते तन्न्यायः सम्भवति। उभयोः साम्याभावात्। गृहीतप्रमाणभावश्रुत्यपेक्षया भ्रमविलक्षणत्वेन अनिश्चितस्य प्रत्यक्षस्य न्यूनबलत्वात् (सि. २७९)

The contention made here that प्रत्यक्ष is दुर्बलप्रमाण, is not based on a valid ground. All प्रत्यक्ष cannot be considered as भ्रमविलक्षणत्वेन अनिश्चत। In the case of परीक्षितप्रामाण्य प्रत्यक्ष there is no room for such a doubt. This is pointed out in तरङ्गिणी as follows:

'सन् घटः' इति प्रत्यक्षस्य भ्रमविलक्षणत्वेन अनिश्चये बीजाभावात्। प्रत्युत फलपर्यन्तपरीक्षया प्रामाण्यस्यैव निश्चितत्वात्।

The advaitasiddhi contention that there is उभयोः साम्य in the case of उपक्रम and उपसंहार while there is no such साम्य in the case of pratyaksha and Śruti needs a little more analysis. कण्टकोद्धार analysis the same and points out that the two cases are similar.

अत्र श्रुतिप्रत्यक्षयोः उपक्रमोपसंहारसाम्यं किं परस्परसापेक्षत्वरूपं नास्ति उत निश्चितप्रामाण्यरूपं वा। नाद्यः। श्रुतिप्रत्यक्षयोः उपजीव्योपजीवकभावेन परस्परसापेक्षत्वात्। न द्वितीयः। जगत्प्रत्यक्षस्य बाधकाभावेन दोषजन्यत्वाभावनिश्चयेन प्रामाण्यनिश्चयस्यापि समानत्वात्। यत्र परस्परसापेक्षत्वे सति, निश्चितप्रामाण्यं तत्रैव उपक्रमाधिकरणन्यायावतारः। प्रकृते च तथात्वमस्तीति युक्तं न्यायोदाहरणम् (कण्ट. ३०१)

Here, it is pointed out that the two cases viz., उपक्रम-उपसंहार and प्रत्यक्ष-श्रुति are similar both in respect of परस्परसापेक्षत्व and निश्चितप्रमाण्य Therefore, उपक्रमाधिकरणन्याय i.e. असञ्जातविरोधन्याय is applicable in respect of prefering प्रत्यक्ष to श्रुति

ii) Advaitasiddhi claims that the श्रुतिलिङ्गाधिकरणन्याय i.e. शीघ्रगामि prevailing over मन्थरगामि also does not support the preference of pratyaksha, because, Sruti is necessarily परीक्षित प्रमाण while प्रत्यक्ष is not so. Therefore the अद्वैतश्रुति which is stated as मन्थरगामि can prevail over प्रत्यक्ष because श्रुति is प्रबल while प्रत्यक्ष is दुर्बल। परीक्षितस्य मन्थरगामिनोऽपि प्राबल्यात् This claim is rejected by तरङ्गिणी by pointing out that:
'सन् घटः' etc. प्रत्यक्ष are also परीक्षित. 'प्रत्यक्षेऽपि फलपर्यन्तं परीक्षायाः सद्भावात्।

iii) Advaita siddhi contests the preference of the प्रत्यक्ष 'सन् घटः' etc., on the ground that प्रत्यक्ष is विशेषविषयक and अद्वैतश्रुति is सामान्य विषयक, again insisting that the सामान्य विशेषन्याय operates only

when both are the cases of निश्चितप्रामाण्य. 'सामान्यविशेषन्यायस्य निश्चितप्रमाणभावोभयविषयत्वात् (सि. २८०). तरङ्गिणी again reminds अद्वैतसिद्धि not to labour under the impression that the प्रामाण्य of परीक्षितप्रत्यक्ष in any way inferior to that of श्रुतिप्रमाण. 'उत्सर्गतः प्राप्तस्वतःप्रामाण्यस्य प्रत्यक्षे निश्चयाभावे बीजाभावात्। फलपर्यन्तपरीक्षायाः सत्त्वाच्च। (तर. २८९)

iv) In respect of सावकाशत्व or निरवकाशत्व of अद्वैतश्रुति Advaitasiddhi claims that अद्वैतश्रुति is also निरवकाश while जगत्सत्यत्व may be treated as सावकाश, treating सत्त्व as व्यावहारिकसत्त्व.

Here, the question of सावकाशत्व or निरवकाशत्व of अद्वैतश्रुति has to be determined by तात्पयलिङ्ग i.e. उपक्रम etc. These तात्पर्यलिङ्ग s do not support Advaita interpretation and hence अद्वैतश्रुति s are सावकाश Further, Pratyaksha cannot be treated as सावकाश by assigning व्यावहारिकसत्यत्व, because व्यावहरिकसत्यत्व is nothing but बाध्यत्व and this will result in बाधितार्थविषयकत्व and ultimately अप्रामाण्य. Consequently, instead of reconciliation between प्रत्यक्ष and श्रुति it results in the rejection of प्रत्यक्ष. This is not the right way of working out the सावकाशत्व of a परीक्षितप्रमाण.

'तात्पर्यलिङ्गानां भेदे एव निरूप्यमाणत्वेन अद्वैतपरत्वे श्रुतेः निरवकाशत्वाभावात्। न च प्रत्यक्षस्यापि व्यावहारिकसत्त्वविषयत्वेन सावकाशत्वमिति वाच्यम्। व्यावहारिकसत्त्वविषयत्वे तस्य बाध्यत्वे बाधितार्थकत्वेन तस्य अप्रामाण्यापत्तेः (कण्ट. ३०५)

v) The preference for pratyaksha on the ground of बहुविषयया अल्पविषयबाधः is also contested by Advaitasiddhi advancing the arguement that the case of प्रत्यक्ष and श्रुति is not that of बहुविषय and अल्पविषय. but it is a case of बहुप्रमाण and अल्पप्रमाण Therefore, the Purvamimāmsā nyāya quoted here is not relevant. Further, it is found that in the instance of देहात्मैक्य the प्रत्यक्ष, अनुमान and शब्दाभास appear to support it, however, the श्रुति that conveys देहात्मभेद exclusively conveys this and hence it is prefered. Similarly, Advaita Śruti exclusively conveys Advaita and therefore, has to be prefered over प्रत्यक्ष which is claimed to be prefered on the ground of बहुप्रमाण.

i) 'दृष्टान्ते बहुविषयया बाधोऽत्र बहुभिरिति वैषम्यात्'
ii) देहात्मैक्ये प्रत्यक्षानुमानशब्दाभासादिसत्त्वेपि देहात्मभेदबोधकस्य, अनन्यपरत्वेन प्राबाल्यवदत्रापि अनन्यपरत्वेन अद्वैतश्रुतेः प्राबल्यात् (सि. २८०)

The above arguement of Advaitasiddhi does not stand scrutiny. It is not important whether **बहुविषयत्व** is stated or **बहुप्रमाण**. The ground for preference is **बहुत्व**.

i) 'बहुबाधप्रसङ्गस्य बाधबीजस्य सत्त्वेन बहुभिः अल्पबाधसम्भवात्' (तर. २९७)
ii) Kantakoddhar further clarifies that **बहुप्रमाणैः बहवो विषयाः यस्याः इत्यर्थोपपत्तेः**।

As regards the claim made that in the instance of **देहात्मैक्य, बहुप्रमाण**s are set aside by one **देहात्मभेदश्रुति**, similarly, many Pramāṇas favouring **सत्त्व** be set aside by one Advaita Śruti, a vital difference between the two cases is ignored by Advaitasiddhi viz., the many pramāṇa that are stated for **देहात्मैक्य** are all **प्रमाणाभास** while the many Pramāṇas quoted in favour of **जगत्सत्यत्व** and **भेद** are valid.

From the above brief narration of the application of Purvamimamsā nyāyas, it is clear that the five Nyāyas quoted in Nyāyāmrita do support the point that **'सन् घटः'** etc., Perceptions that comprehend **सत्व** are **प्रबल** compared with the so called Advaita Śrutis on the basis of which Mithyatva of Jagat is claimed.

प्रत्यक्षस्य उपजीव्यत्वेन प्राबल्यम्

Nyāyāmrita further points out that **प्रत्यक्ष** is not only prefered on the grounds of **उपक्रमादिन्याय** but also on the ground that it is **उपजीव्य** to the other **प्रमाण** s such as **अनुमान** and **शब्द**. This ground is convincingly explained in Nyāyāmrita as under.

किञ्च उपजीव्यत्वात् प्राबल्यमक्षस्य श्रुतेः स्मृतितः इव। अक्षेण अनुमितिकारणस्य पक्षहेतुव्याप्त्यादेः, शाब्दधीहेतोः शब्दस्वरूपस्य तद्धर्मस्य योग्यतादेः उपक्रमोपसंहारैक्यरूप्यादेः अनुमितिशाब्दधीस्वरूपतत्प्रामाण्यादेश्च ग्राह्यत्वात् (न्या. ३१२)

The nature of उपजीव्य is explained as: येन विना यस्य अनुत्थानं तत् तस्य उपजीव्यम्. As per this explanation, the pratyaksha इदं रजतम् may be claimed to be उपजीव्य to the negation 'न इदं रजतम्'. However, this much is not sufficient for an उपजीव्य to be superior. It must be परीक्षितत्वविशिष्ट उपजीव्यप्रमाण. 'इदं रजतम्' is not परीक्षितप्रत्यक्ष. Therefore, this Pratyaksha is not superior to the negation नेदं रजतम्. This disposes of वाचस्पतिमिश्रs remark that उपजीव्यविरोधेन श्रुत्यप्रामाण्ये इदं रूप्यमिति पूर्वधीविरोधात् नेदं रजतमिति धीः अप्रमा स्यात्. As stated above the perception 'इदं रजतम्' is not a परीक्षितप्रमाण i.e., not a valid perception.

Advaitasiddhi argues that परीक्षा establishes the अबाध्यत्व of that which is स्वसमानदेशकालीन. This means that परीक्षितप्रत्यक्ष can establish अबाध्यत्व only during व्यवहारदशा. Therefore, how can it prevent अद्वैतागम on the ground that it is उपजीव्य.

'परीक्षयापि स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते।
तथा च व्यवहारदशामात्राबाध्यत्वम्।

This arguement of Advaitasiddhi is rejected by Kantakoddhāra by a counter arguement that on this ground one can as well say that अद्वैतज्ञान also establishes बाध्यत्व of प्रपञ्च only during its presence and not permanently.

यदि च परीक्षा स्वकालावच्छेदेन अबाध्यत्वं व्यवस्थापयतीति न अत्यन्ताबाध्यत्वव्यवस्थापिका तर्हि अद्वैतज्ञानं स्वकालावच्छेदेनैव प्रपञ्चस्य बाध्यत्वं व्यवस्थापतीति अत्यन्तबाध्यत्वं न स्यात्। उपक्रमादिकमपि स्वकालावच्छेदेनैव तात्पर्यं व्यवस्थापयतीति आत्यन्तिकमद्वैते तात्पर्यं न स्यात् (कण्ट. ३२९)

In the light of this, उपजीव्यत्वेन प्राबल्य cannot be assailed by drawing a line that it is workable within व्यावहारिक limit.

प्रत्यक्षस्य अनुमानबाध्यत्वे बाधकम्

The contention of Advaita that प्रत्यक्ष could be set aside by अनुमान and शब्द is untenable on several other grounds. The untenability of anumāna

setting aside pratyaksha is pointed out by mentioning a number of Purvamimamsā instances. For instance, श्रुति states that औदुम्बरीं स्पृष्ट्वा उद्गायेत् but स्मृति states that औदुम्बरी सर्वा वेष्टयितव्या।

These two statements cannot be implimented since these are conflicting. Therefore, the Mīmāmsakas hold the Śruti that is on par with pratyaksha here is to be prefered to that of Smriti which can be प्रमाण only by infering मूलश्रुति and therefore is on par with लिङ्ग i.e., अनुमान. However, if Advaita contention is accepted that the inference can set aside perception, then, the Mīmāmsaka's conclusion will be up set. There are good many instances in Pūrvamimāmsā wherein स्मृति is not allowed to set aside श्रुति. None can say by the inference of the coolness of fire the perception that the fire is hot will be set aside.

प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्

The position that प्रत्यक्ष cannot be set aside by आगम, the आगम itself has to be suitably interpreted is accepted in Pūrvamimāmsā in more than one instance. 'यजमानः प्रस्तरः' is a standing example. The whole of तत्सिद्धिपेटिका establishes that गौणार्थ has to be adopted for श्रुति statements when there is a conflict with the प्रत्यक्ष. Advaitins themselves accept लक्षणा in the passage 'तत्त्वमसि', not only this, Advaita accepts लक्षणा in respect of all statements about Brahman since Brahman is अवाच्य The Sabara's statement 'न विधौ लक्षणा' is intended to convey that for obtaining मुख्यार्थ for अनुवाद no लक्षणा should be indulged in the विधिवाक्य. In the light of this, it may be safely concluded that आगम cannot set aside परीक्षितप्रत्यक्ष.

Advaita Siddhi again argues that परीक्षितप्रत्यक्षप्राबल्य applies only within व्यावहारिक limits. अद्वैतश्रुति is not interested in disproving व्यावहारिकप्रामाण्य, it is तात्त्विकप्रामाण्य of प्रत्यक्ष that is sublated by अद्वैतागम.

'प्रत्यक्षादेः परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च न अद्वैतागमेन बाध्यते। बाध्यते तु तात्त्विकं प्रामाण्यम् (सि. ३४९)

Further, the purpose of resorting to **लक्षणा** in **'तत्त्वमसि'** is not so much to avoid **प्रत्यक्षविरोध** but it is to bring out **अखण्डार्थरूपतात्पर्य** and also to avoid **अन्वयानुपपत्ति** between the imports of the **तत्** and **त्वम्**.

'प्रत्यक्षाविरोधाय तत् त्वंपदयोः लक्षणा नाश्रीयते। षड्विधतात्पर्यलिङ्गैः गतिसामान्येन च अखण्ड एव अवधार्यमाणस्य तात्पर्यस्यानुपपत्तेः जीवेशगतसर्वज्ञत्वकिञ्चिज्ञत्वादीनामन्वयानुपपत्तेश्च। तात्पर्यविषयीभताखण्डत्वनिर्वाहाय लक्षणाङ्गीकरणस्यैवोचितत्वात् (सि. ३४६)

Advaitasiddhi continues to argue that even by resorting to **लक्षणा** the **मुख्यार्थ** is not given up. The very idea of **मुख्यार्थत्व** needs to be properly understood.

'तात्पर्यविषयीभूतार्थबोधकत्वं मुख्यार्थत्वम्। न शक्यार्थमात्रबोधकत्वम्। अन्यार्थतात्पर्यकत्वाच्च अमुख्यार्थत्वम्। न लाक्षणिकत्वमात्रम्।

The driving point of this arguement is to say that the Śruti is not suitably interpreted by Lakshaṇā to avoid **प्रत्यक्षविरोध** but it is done so to bring out **अखण्डार्थरूपतात्पर्य.**

The above contentions of Advaita Siddhi are rejected by Tarangini and Kantakoddhāra.

i) The first contention that the **प्रामाण्य** of **परीक्षितप्रत्यक्ष** is **व्यावहारिक** while **आगम** rejects its **तात्त्विक प्रामाण्य** is rejected by **तरङ्गिणी** as follows:

परीक्षया प्रत्यक्षादिनामद्वैतागमसमानयोगक्षेम प्रामाण्यस्यैव प्राप्तेः विरोधस्य वज्रलेपत्वात् (तर. ३५३)

In other words making a distintion in respect of **प्रामाण्य** as **व्यावहारिक** and **तात्त्विक** is an artificial distinction. What confirms the **प्रमाण** is its **परीक्षित्व** but not **व्यावहारिकत्व** or **तात्त्विकत्व.** More over, this distinction is a creation of Avaita and not yet established.

ii) The second contention that the purpose of resorting to लक्षणा in 'तत् त्वमसि' etc. is not प्रत्यक्षविरोधपरिहार but अखण्डार्थतात्पर्यनिर्वाह is also not tenable.

Its untenability is clearly pointed out by Kantakoddhāra

अखण्डतात्पर्यानुपपत्त्या हि लक्षणा इत्युक्तं भवति। न च तद्युज्यते। अखण्डे तात्पर्यग्राहकप्रमाणाभावात्। न च उपक्रमादिमि तद्ग्रहः। उपक्रमादीनामन्यथा-व्याख्यास्यमानत्वेन तदसिद्धेः।

तथा च सर्वज्ञत्वकिञ्चिज्ञत्वादीनामन्वयानुपपत्त्या लक्षणा स्वीक्रियते इति वाच्यम्। अन्वयानुपपत्तेश्च प्रत्यक्ष एव पर्यवसानात् प्रत्यक्षविरोधेनैव लक्षणाङ्गीकारः (कण्ट. ३५७)

iii) The third contention that 'तात्पर्यविषयीभूतार्थबोधकत्वं मुख्यार्थत्वं न शक्यमात्रबोधकत्वम् also does not help, because, 'मानान्तारविरुद्धे वाक्यतात्पर्यस्यैव अनुपपत्तेः' (तर.३५५)

Since, all the three contention of Advaitasiddhi are rejected, it is clear that the so called अद्वैतागम cannot supersede. परीक्षित प्रत्यक्ष. Both Tarangini and Kantakoddhāra make very useful analyses of the concept of Mukhyārtha in this context and show that अमुख्यार्थत्व cannot be avoided in 'तत् त्वमसि' etc. in Advaita.

अपच्छेदन्यायवैषम्यम्

Nyāyāmrita rejects the claim of Vāchaspati miśra that the Pratyakṣa that occures earlier is superseded by Advaitāgama as per the Apachckeda nyāya. The Pratyakṣa is not considered merely on the ground that it occures earlier but it is considered as superior on the gound that it is upajivya.

यदुक्तं वाचस्पतिना पूर्वस्य प्रत्यक्षस्य परेण आगमेन अपच्छेदन्यायेन बाध इति तन्न। नहि अस्माभिः पूर्वत्र मात्रेण प्रत्यक्षबाधकता उक्ता किन्तु उपजीव्यत्वेन न च अपच्छेदे पूर्वमुपजीव्यम्।

The circumstances under which Apachchedanyāya is applicable are fully discussed in Tarangini and Kantakoddhāra and it is pointed out that this Nyāya is not applicable in the present case.

मिथ्यात्वानुमितेः अग्निशैत्यानुमितिसाम्यम्

Nyāyāmrita also points out that **मिथ्यात्वानुमान** canot set aside **सत्त्वप्रत्यक्ष** just as **अग्निशैत्यानुमान** cannot set wide **अग्न्यौष्ण्य प्रत्यक्ष.**

The claim of Khandanakhānda Khādya that Advaita Śruti is not afraid of Upajivya Pratyakṣa

> पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः ।
> विरोधादुपजीव्येन न बिभेति कदाचन ।

is rejected retorting that

> तात्त्विकादित्यतां यूपस्याश्रित्य शरणं श्रुतिः
> विराधादुपजीव्येन न बिभेति कदाचन। इति स्यात्।

प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वम्

Further, Pratyakṣa cannot be set aside by Anumāna and Āgama. It can be set aside only by a stronger Pratyakṣa.

> इदं रूप्यमिति प्रत्यक्षमपि नेदं रूप्यमिति सयुक्तिकबलवत्प्रत्यक्षेण बाध्यम्। न तु युक्त्यैव (न्या. ३९०)

In this connection a number of instances of defective Pratyakṣa are examined and it is pointed out that in all these cases the defective Pratyakṣa not set aside by Anumāna and **आगम.** **'पीतः शङ्खः'** **'नीलं नभः'** **'चन्द्र प्रादेशत्वप्रत्यक्ष'** are some of the instances that are examined.

प्रत्यक्षस्य भाविबाधकशङ्कापरिहारः

Then, an important question whether **भाविबाधकशङ्का** i.e. the possibility of Pratyakṣa being set aside later is examined in detail.

It is already stated that Pratyakṣa cannot be set aside by Anumāna and Āgama at any time. As a doubt is being raised against the certainity of Pratyakṣa itself, the question of a future Pratyakṣa setting aside an earlier Pratyakṣa cannot be entertained. Hence, the possibility of a परीक्षित Pratyakṣa being set aside by Anumāna, Āgama or a later Pratyakṣa does not arise.

नापि भाविबाधकशङ्कामात्रेण। उक्तरीत्या लिङ्गशब्दयोरबाधकत्वात् अक्षस्य अप्रमाणतया शङ्क्यमानत्वात्। सर्वविशेषाभावे सामान्यस्याप्यभावेन बाधकशङ्कायाः अनुदयात् (न्या. ४१४)

Further, for the sublation later दोषजन्यत्व of the प्रत्यक्ष concerned is the ground. The साक्षिप्रत्यक्ष is not दोषजन्य. On the other hand the अद्वैतज्ञान is due to श्रुति तात्पर्यभ्रम.

किञ्च दोषजन्यमेव बाध्यम्। न च साक्षिप्रत्यक्षं तज्जन्यम्। अद्वैतज्ञाने तु श्रुतितात्पर्यभ्रमो दोषः। (न्या.४१५)

प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वविवरणम्

Pratyakṣa is capable of comprehending कालत्रयाबाध्यत्व। The कालत्रयाबाध्यत्व does not need कालत्रयसत्त्व. It is कालत्रयासत्त्वाभावः that is needed. This requirement is satisfied by कदाचित् सत्त्व.

'नापि प्रत्यक्षं कालत्रयाबाध्यत्वाक्षमम्। तद्धि न कालत्रये सत्त्वम्। किन्तु कालत्रयवृत्ति यदसत्त्वं तदभावः। स च कदाचित् सत्त्वे गृहीतेऽपि गृहीत एव।

स्वकाले हि अस्तितां गृण्हन् साक्षात्कारः त्रिकालगम्।
प्रतिषेधं विरुन्धानो गृण्हात्येवाबाध्यताम् (न्या. ४४४)

IV
विश्वमिथ्यात्वस्य अनुमानबाधः

जगत्सत्वग्राहकप्रत्यक्ष cannot be set aside by Anumāna or Āgama but विश्वमिथ्यात्वानुमान can be set aside by counter Anumānas. Some of these are as under:

1) विमतं सत् अबाध्यत्वे सति असत्त्वानधिकरणत्वात्
2) विमतं सत् अनिषेध्यत्वेन प्रमां प्रति साक्षाद् विषयत्वात्
3) विमतं न सद्विलक्षणं असद्विलक्षणत्वात् आत्मवत्
4) विमतं न चैतन्याज्ञानकार्यं तस्मिन्नपरोक्षेऽपि अनिषेध्यत्वेन साक्षाद् भासमानत्वात्
5) विमतं न अध्यस्तं तत्तत्वसाक्षात्कारवत् प्रवृत्तिविषयत्वात् (न्या. ४५२, ४५५)

These syllogisms establish **जगत्सत्यत्व** and reject **जगन्मिथ्यात्व.**

Advaita Siddhi tries to explain away this **सत्यत्व** as **व्यावहारिक** as usual. However, the very **व्यावहारिक सत्ता** concept depends upon the establishment the concept of Mithya which is assailed here.

Advaitasiddhi proposes about twenty seven **विशेषानुमान** to establish Mithyatva which are usual technical syllgistic manupelations without any new points.

विश्वमिथ्यात्वस्य आगमबाधः

विश्वमिथ्यात्व is also rejected by Śruti. There are a number of Śruti statements that declare **विश्वसत्यत्व** and some Brahmasūtras also declare the same. Some of these are:

i) विश्वं सत्यं यच्चिकेत तन्न मोघम्।
ii) याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः
iii) नाभावः उपलब्धेः
iv) वैधर्म्याच्च न स्वप्नादिवत् (न्या. ५०७)

Advaitasiddhi tries to ignore this evidence on two accounts: i) These merely are **अनुवादक** ii) These declare only **व्यवहारिकसत्यत्व.** The Advaitasiddhi also tries to interpret these so as to not to support **विश्वसत्यत्व.** The first contention of Advaita Siddhi that **अनुवाद** is not a Pramāna is rejected. The second contention that these declare **व्यावहारिकसत्यत्व** is also rejected since the very concept of **व्यावहारिक सत्यत्व** is rejected more than once. Advaita Siddhi interpretation of these Śrutis is rejected by Tarangini and Kantakoddhāra and a full word by word interpretation in support **विश्वसत्यत्व** is presented.

असतः साधकत्वाभावः

The next two topics raise the question whether **असत्** can be **साधक**. For establishing Mithyatva Advaita resorts to Anumāna. This involves the process of **प्रतिज्ञा हेतु उदाहरण** and **साध्य, साधन, व्याप्ति** etc. whether the Mithyātva of these also is established by the syllogisms or not? If the Mithyātva of these is not established then, the idea that the entire **वियदादिप्रपञ्च** is Mithyā is given up. If these are Mithyā, these will not be able to establish Mithyatva of others proposed by the syllogisms.

> एतैरेव प्रयोगैः स्वप्रतिज्ञाहेतूदाहरणादिप्रापितानां साध्यसाधनव्याप्त्यादीनां मिथ्यात्वं न बोध्यते चेत् सर्वमिथ्यात्वासिद्धिः। बोध्यते चेत् परस्परव्याहतिः। बाध स्वरूपासिद्धिव्याप्यत्वासिद्धयादिकं च स्यात्। परमार्थसत्त्वस्यैव साधकत्वे तन्त्रत्वात् (न्या.५६६)
>
> साधकं चेदवश्यं च परमार्थास्तिता भवेत्।
> सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते॥

In this context a number of interesting instances that are quoted in Advaita to support **असतः साधकत्व** are mentionned and it is pointed out that none of these support **असतः साधकत्व**. Some of these are:

> असत्यमपि प्रतिबिम्बं बिम्बस्य, स्वप्नार्थः शुभाशुभयोः, स्फटिकं लोहित्यं च उपाधिसन्निधानस्य, शङ्काविषं मरणस्य साधकं दृष्टमिति चेन्न।
>
> प्रतिबिम्बस्वरूपस्य त्वन्मतेऽपि सत्यत्वात्, स्वाप्नस्य मन्मते सत्यत्वात् स्फटिकलोहित्यस्यापि प्रतिबिम्बत्वात्, शङ्काविषेऽपि शङ्कानिमित्तभयजन्या धातुव्याकुलतैव मरणहेतुः न विषम्। (न्या. ५८५)

Therefore, none of these instances support **असतः साधकत्व**.

दृग्दृश्यसम्बन्धानुपपत्तिभङ्गः

One of the main grounds stated by Advaitins to establish Mithyatva is **दृग्दृश्यसम्बान्यानुपपत्ति**. They claim that if **जगत्** is considered as **सत्य**, then, it will be difficult to explain the relation between the **दृक्** and **दृश्य**. i.e. **ज्ञान** and **ज्ञेय**.

'दृश्यस्य सत्यत्वे न तावत् ज्ञानं तदसम्बद्धं प्रकाशकम् अतिप्रसङ्गात्। नापि सम्बद्धम्। आत्मगुणस्य ज्ञानस्य ज्ञेयेन संयोगसमवाययोः अयोगात्। अन्यस्य सम्बन्धस्य अभावात्। विषयविषयिभावस्य च अद्विष्ठत्वेन असम्बन्धत्वात् दुर्निरूपत्वाच्च। (न्या. ६१९)

This arguement is advanced to drive to the point that the relation has to be only **आध्यासिक.**

Quoting the above contention of the Advaita, Nyāyāmrita answers it in two ways: i) If any known relation such as **संयोग** or **समवाय** is not suitable to be the relation between **ज्ञान** and **ज्ञेय** some other suitable relation may have to be thought of.

यत्तूक्तं ज्ञानज्ञेययोः न सम्बन्ध इति तन्न। गुणगुण्यादेः संयोगासम्भवे समवायवत् ज्ञानज्ञेययोरुभयासम्भवे अन्यस्य सम्भवात्।

'अभाववद् भूतलम्' 'ज्ञातो घटः' इत्यादिका परस्परासंयुक्तसमवेत विशेषणविशेष्यषयकविशिष्टधीः विशेषणविशेष्यतत्सम्बन्धविषयिका विशिष्टधीत्वात् दण्डीति विशिष्टधीवत् इत्यनुमानात् तत्सिद्धेः

प्रमितवस्त्वनुसारेण हि प्रक्रिया कल्प्या न तु स्वकल्पित प्रक्रियानुरोधेन प्रमितत्यागः। (न्या. ६२०)

The second answer is, in Advaita certain procedure is evolved in relating **ज्ञान** and **ज्ञेय.** On the same lines **ज्ञान** and **ज्ञेय** relation can be worked out without resorting to **आध्यासिक सम्बन्ध.**

सर्वस्यापि दृश्यस्य ब्रह्मात्मैकदृगध्यस्तत्वेऽपि कस्यचित् कदाचित् कंचित् प्रति प्रकाशाय त्वयापि तत्तत्सन्निकृष्टेन्द्रियजन्य तत्तदाकारवृत्तिद्वारक एव अनावृतदृक्सम्बन्धः स्वीकृतः तथा च सत्यत्वेपि तद्वारक एव सम्बन्धोऽस्तु किमाध्यासिकसम्बन्ध दुर्व्यसनेन। (न्या. ६२०)

The relation intended between **ज्ञान** and **ज्ञेय** is naturally **विषय-विषयि भाव.** The objection that **विषयत्व** cannot be defined is answered by pointing out that:

यादृशं विषयत्वं ते वृत्तिं प्रति चिदात्मनः।
तादृशं विषयत्वं मे दृश्यस्यापि दृशं प्रति। (न्या. ६२५)

In the light of the above a real **विषयविषयिभाव** can be the relation between **ज्ञान** and **ज्ञेय**. There is no need of resorting to **आध्यासिकसम्बन्ध** or the Mithyatva of **विषय**.

In the above summary of the Polemics of Nyāyāmṛta and Advaita Siddhi broadly the following three areas are covered: 1) The Advaita concept of Mithyātva is reviewed in detail. 2) The Dvaita concept of Satyatva is fully explained. 3) The role played by Pratyakṣa in comprehending Satva is fully explained.

From this study the following conclusions could be arrived at

i) The Advaita concept of Mithyātva cannot be established by the evidences of epistemology, logic or scripture.
ii) The Satyātva i.e., reality cannot be confined to Brahman alone. The Jagat is as much real as Brahman.
iii) The evidence of Pratyakṣa, Anumāna etc. be utilised taking into consideration their respectives areas of operation and the priorities on the ground **उपजीव्य-उपजीवक, सावकाश-निरवकाश** etc.,
iv) In the case of Śruti the Tātparyalingas such as **उपक्रम** etc., should be duly utilised.

It is proposed to add similar summaries of the Polemics to the second and third Volumes also and finaly add an epilogue containing a consolidated evaluation.

K.T. Pandurangi.

श्री व्यासतीर्थविरचितम्

न्यायामृतम्

अद्वैतसिद्ध्या तरङ्गिणी-कण्टकोद्धार-प्रकाशाख्य
व्याख्यानत्रयेण सहितम्

श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक् स्मृतः ।
चिन्तामणिस्तु व्यासार्यो मुनित्रयमुदीरितम् ॥

न्यायामृतम्

विषयानुक्रमणिका

1.	मङ्गलश्लोकाः	1
2.	विप्रतिपत्तिविचारः	8
3.	मिथ्यात्वे परोक्तानुमानानि	24
4.	मिथ्यात्वनिर्वचनम्	36
5.	दृश्यत्वस्वरूपविचारः	47
6.	मिथ्यात्वे परोक्तश्रुतिः	50
7.	प्रथममिथ्यात्वभङ्गः	52
8.	द्वितीय मिथ्यात्वभङ्गः	66
9.	तृतीयमिथ्यात्वभङ्गः	98
10.	चतुर्थमिथ्यात्वभङ्गः	104
11.	पञ्चममिथ्यात्वभङ्गः	106
12.	सामान्यतो मिथ्यात्वभङ्गः	109
13.	दृश्यत्वहेतुभङ्गः	126
14.	जडत्वहेतुभङ्गः	176
15.	परिच्छिन्नत्वहेतुभङ्गः	196
16.	अंशित्वादिहेतुभङ्गः	219
17.	दृश्यत्वादेः सोपाधिकत्वम्	235
18.	दृश्यत्वादेः आभास़साम्यम्	245
19.	सत्त्वनिरुक्तिः	248

20. प्रत्यक्षस्य जात्या उपक्रमादिन्यायैश्च प्राबल्यम् 276

21. प्रत्यक्षस्य उपजीव्यत्वेन प्राबल्यम् 312

22. प्रत्यक्षस्य अनुमानबाध्यत्वे बाधकम् 334

23. प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम् 344

24. अपच्छेदन्यायवैषम्यम् 364

25. मिथ्यात्वानुमितेः अग्निशैत्यानुमितिसाम्यम् 378

26. प्रत्यक्षस्य लिङ्गादिबाध्यत्वे बाधकोद्धारः 390

27. प्रत्यक्षस्य भाविबाधकशङ्काभङ्गः 414

28. प्रत्यक्षस्य पारमार्थिक सत्त्वग्राहित्वम् 444

29. विश्वमिथ्यात्वस्य अनुमानबाधः 452

30. विश्वमिथ्यात्वस्य आगमादिबाधः 507

31. असतः साधकत्वे बाधकविवरणम् 566

32. असतः साधकत्वाभावे बाधकोद्धारः 585

33. दृग्दृश्यसम्बन्धानुपपत्तिभङ्गः 616



श्रीवेदव्यासाय नमः

पदवाक्यप्रमाणपारावारपारीणसर्वतन्त्रस्वतन्त्र
श्रीव्यासतीर्थ-विरचितम्

न्यायामृतम्

प्रथमः परिच्छेदः

निखिलगुणनिकायं नित्यनिर्धूतहेयं
शुभतममतिमेयं शुद्धसौख्यास्पुपायम्।
सकलनिगमगेयं सर्वशब्दाभिधेयं
नवजलधरकायं नौमि लक्ष्मीसहायम्॥ १॥

विघ्नौघवारणं सत्याशेषविश्वस्य कारणम्।
करुणासिन्धुमानन्दतीर्थबन्धुं हरिं भजे॥ २॥

अभ्रमं भंगरहितमजडं विमलं सदा।
आनन्दतीर्थमतुलं भजे तापत्रयापहम्॥ ३॥

चित्रैः पदैश्च गम्भीरैर्वाक्यैर्मानैरखण्डितैः।
गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक्॥ ४॥

समुत्सार्य तमःस्तोमं सन्मार्गं संप्रकाश्य च।
सदा विष्णुपदासक्तं सेवे ब्रह्मण्यभास्करम्॥ ५॥

ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून्मम॥ ६॥

श्रीमध्वशास्त्रदुग्धाब्धिं धीमन्दरमहीभृता।
आमथ्योद्धियते न्यायामृतं विबुधतृप्तये॥ ७॥

विक्षिप्तसंग्रहात् क्वापि क्वाप्युक्तस्योपपादनात्।
अनुक्तकथनात् क्वापि सफलोऽयं श्रमो मम॥ ८॥

श्रीव्यासरामाचार्यविरचिता

न्यायामृततरङ्गिणी

श्रियस्सदानन्दगुणैर्भृतं भुजे भुजेऽप्यदोषं तदशेषशक्तिभिः।
विशेषवाणीमितमात्मनो मुदामुदारमीशं प्रियवल्लभं नुमः॥ १॥

साधु प्रसाधितगुणोपनिषत्सखीभिः सूत्रग्रहानुसृतकञ्चुकिवाचि दक्षा।
वंशाग्रगाऽपि जयवाक्कुचिनर्तकी यच्चित्तं जहार तमपारकृपं नमामि॥ २॥

ऋगुपनिषद्दुर्गाद् दूरयन् योऽरिवर्गानधिहरि विजयादिव्याप्त एवोदपादि।
स जयति यतिराजः सर्ग उच्चैर्विराजः परिधृतजयसंज्ञः सर्वविद्यास्वभिज्ञः॥ ३॥

शुकेन शान्त्यादिषु वाङ्मयेषु व्यासेन धैर्येऽम्बुधिनोपमेयम्।
मनोजजित्यां मनसां हि पत्या रघूत्तमाख्यं स्वगुरुं नमामि॥ ४॥

छन्दस्साङ्गमुरङ्गमङ्गलगवीजैमिन्युपज्ञं मतं
व्यासोदन्तमबूबुधच्च समधाद् यो विश्वनाथाभिधाम्।
धर्मं व्याकृत पूर्णधीकृतसदाचारस्मृतिव्याकृति
व्याजेन प्रणमामि तं पितरमुद्बोधाय शब्दार्थयोः॥ ५॥

पदादिविद्यां बहुविन्निषद्यामध्यैषि तत्त्वैषिवराद् यतोऽहम्।
नमामि तं व्यासकुलावतंसं नारायणाचार्यमथाग्रजं मे॥ ६॥

व्यासबिन्दुरसाचार्यकृतीषद्व्याकृतिच्छलात्।
रामो महत आनम्य श्रुतं सौवं शुशुत्सति॥ ७॥

उद्यद्व्यासमहोदधेर्यदुरुधीगम्भीरकुम्भीर्नयद्
भङ्गान् सत्प्रतिबिम्बमम्बुजदृशा पत्तीविचित्रीकृतम्।
स्वच्छन्दोत्थतरङ्गिणीद्विजमुखैर्न्यायामृतं व्याकृतं
सेवं सेवमिरासुरा इनसभे राजन्तु लेखा इव॥ ८॥

इह खलु सकलविद्वन्मणिचिन्तामणिः श्रीव्यासतीर्थबिन्दुः पुण्यप्रचयपूर्णवेदान्तश्रवणः श्रुतमर्थं मिमनिषया निबिभन्त्सुर्निबन्धगोचरपरीक्षकप्रवृत्त्यङ्गविषयादि वक्तुं विशिष्टविषयादिमद् ब्रह्ममीमांसया निबन्धं संबन्धयितुं चतुर्लक्षणीविवक्षितविशेषणचतुष्टयवत्त्वेनेष्टदेवतामभिष्टवीति निखिलगुणनिकायमित्यादिना।

चतुर्लक्षण्यां प्रथमलक्षणे समन्वयाख्येऽपर्यायानन्तानन्दादिशब्दानां महायोग-विद्वद्रूढिभ्यां भगवत्परत्वे तत्तच्छब्दप्रवृत्तिनिमित्तलाभात् निखिलगुणाश्रयत्वं भगवतः साधितम्। तद् आद्यविशेषणेन संगृहीतम्। द्वितीयेऽविरोधलक्षणे गुण-दोषयोः सहचारदर्शनाद् दोषशङ्कायां श्रुतीनां विरोधपरिहारात् निर्दोषत्वमाघोषितम्। तद् द्वितीयविशेषणेन संजग्राह। एवंविधः परमात्मा कथं ज्ञेय इत्यपेक्षायां वैराग्यादिसाधनसम्पन्नेनाधिकारिणा साक्षात्कर्तव्य इत्येतमर्थमभिदधत्तृतीयस्य साधनलक्षणस्यार्थं तृतीयविशेषणेन निर्दिदेश। ज्ञातः परमात्मा कं पुरुषार्थं दास्यति इत्यपेक्षायां स्वरूपानन्दमाविर्भावयतीति प्रतिपादयतश्चतुर्थस्य फललक्षणस्य चतुर्थविशेषणेनसंग्रहःकृतः। 'निखिलगुणनिकाये'त्यादिचतुर्विशेषणोपपादकत्वेन 'सकलनिगम गेयमि'त्यादिचतुर्विशेषणानि। तत्रेन्द्रादिपरतया प्रतीयमानानां वाक्यानां भगवद्विषयत्वेन निखिलगुणाश्रयत्वं भगवतः सिद्ध्यतीति 'सकलनिगमगेयमि'त्यनेनोपपादितम्। जगत्कारण विषयत्वेन प्रतीयमानानां प्रकृत्यादिशब्दानां भगवद्विषयत्वे भगवतः सर्वकर्तृत्वादिना निर्दोषत्वं सिद्ध्यतीति 'सर्वशब्दाभिधेयमि'त्यनेनोपपादितम्। वाक्यार्थपदार्थरूपत्वेन निगमगेयत्व-शब्दाभिधेयत्वयोर्भेदः। निराकारस्य ध्यानादि न संभवतीति शङ्कां निराकुर्वता 'नवजलधरकायमि'त्यनेन भगवतः शुभतममतिमेयत्वमुपपादितम्। लक्ष्म्याः सहायं लक्ष्मीसहायमित्यनेन सर्वपुरुषार्थप्रदत्वोपपादनं द्रष्टव्यम्। लक्ष्म्या "यं कामये तं तमि"ति स्वमहिमानमुक्त्वा "मम योनिरप्स्वे" ति स्वसहायस्य परमात्मनोऽभिधानात्। निकायशब्दस्तु चिनोतेर्घञि वृद्धौ चकारस्य ककारादेशे च "निवास-चिति-शरीरोपसमाधानेष्वादेश्च कः" इत्यनेन निवासार्थे साधितः॥१॥ स्वापेक्षितविघ्ननिवारणगुणत्वेन भगवन्तं सेवे" विघ्नौघेति॥२॥ तेः।

भाष्यकृतं सेवते– अभ्रममिति॥ अत्रा'नन्दतीर्थमि'त्यनेन जलाशयतीर्थरूपतायां ध्वनि र्यस्या प्रसिद्धगङ्गादितीर्थसाम्यप्रसक्तौ तद्वैषम्यमाह – अतुलमिति। अत्र भ्रमशब्देन प्रतीत

नञा निषिद्धयत इति प्रसिद्धतीर्थवैषम्यम्। तथा विपर्ययशून्यत्वं च ध्वन्यत इति ध्वनि-श्लेषयोरङ्गाङ्गिभावेन सङ्करः। 'भङ्ग' शब्देन तरङ्गाभिधानात् तद्राहित्योक्त्या प्रसिद्धतीर्थवैषम्यम्, तथा पराभवशून्यत्वं च ध्वन्यते। 'अजडमि'त्यनेन जलात्मता पर्युदस्यते इति तद्वैषम्यम्, तथा ल-डयोरभेदात्पूर्णज्ञानात्मता च ध्वन्यते। 'तापत्रयापहमि' त्येकतापनिवारकजलाशयाद् वैषम्यम्। यद्यपि– ''अपे क्लेश-तमसोः'' इत्यनेनापपूर्वाद्धन्तेः क्लेश-तमसोः कर्मणोरुपपदयोर्ड्प्रत्यय उक्तः। तथापि ''ब्रह्म-भ्रूणे'' त्यादिवदुपपदनियमस्यानाश्रितत्वात् ड्प्रत्ययोपपत्तिः। ''सूत्रारम्भस्त्वनाशीरर्थे'' इति काशिकायां वृत्तावेवोक्तम्॥ ३॥ जयतीर्थवाक्स्तुतिव्याजेन जयतीर्थं स्तौति। चित्रैरिति । चित्रैः पदैः। गंभीरैः वाक्यैः। अखंडितैः मानैः। पदानां चित्रत्वं नामान्वयबोधहेतुतावच्छेदकावच्छिन्न- पदार्थोपस्थिति जनकतावच्छेदकावच्छिन्नत्वम्। वाक्यानां गंभीरत्वं नाम समासादिवृत्तिमत्त्वम्। प्रतिमान पराहतिशून्यत्वं मानानामखंडितत्वम्। एतेन पदवाक्यप्रमाणनिर्णायकव्याकरणमीमांसान्याय विद्यावैदग्ध्यमुक्तम्। स्वस्य संन्यासगुरुं ब्रह्मण्यतीर्थं सेवतेसमुत्सार्येति। चशब्दोऽपिशब्दार्थः। सदा सर्वावस्थास्वपि। तदुक्तम् ''अत्यशक्ये तु निद्रादौ पुनरेव समभ्यसे'' दिति। तमस्स्तोमनिवृत्तिसन्मार्गप्रकाशनरूपप्रयोजननिर्वृत्त्यनंतरमपि विष्णुपदासक्तमित्युक्त्यास्वाभाविकं विष्णुपदैकसंश्रयत्वमुक्तम्। विद्योपदेष्टॄन् गुरून्नमति– ज्ञानेति। ज्ञानेत्यादिना विद्योपदेशहेतुत्वं व्यवस्थापितम्। ग्रंथाभिधानमाह– श्रीमध्वेति। स्वकृतस्य निबंधस्यावांतरप्रयोजनवत्तामाह– विक्षिप्तेति।

पाण्डुरङ्गि आनन्दभट्टारकविरचितः

न्यायामृतकण्टकोद्धारः

नरसिंहं हयग्रीवं वेदव्यासं गुरुं तथा।
नत्वा न्यायामृतव्याख्यां करिष्ये धीविशुद्धये॥

अत्र ग्रन्थकृदभीष्टकर्मणो निर्विघ्नपरिसमाप्त्यार्थं कृतं परदेवतास्तुतिनतिरूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थे निबध्नाति– निखिलेति अत्र परिच्छेदचतुष्टयात्मके ग्रन्थे ''अथातो ब्रह्मजिज्ञासे''– त्याद्याध्याय चतुष्टयात्मकशास्त्रप्रतिपाद्यानामनन्तगुणपूर्णत्वनिर्दोषत्वसाधनविषयत्वफलदातृत्वानां प्रतिपाद्यतया तत्तद्विशेषण वत्त्वेन हरिः स्तूयते। तत्राऽद्याध्यायार्थः– निखिलेति। अत्र निकाय इति निपूर्वकात् 'चित्र् चयने' इत्यस्माद्धातोः ''निवास-चिति-शरीरोपसमाधानेष्वादेश्च कः'' इति सूत्रेण घञि धातोरादेश्च ककारादेशो प्रयोगसाधुत्वं द्रष्टव्यम्। एवं सति निवासार्थे पाय्यसान्नाय्येति सूत्रेण निकाय्य इति निपातनान्निकाय इत्यनुपपन्नमित्यपास्तं भवति। द्वितीयाध्यायार्थः– नित्येति। नित्येति विशेषणं मुक्तव्यावृत्त्यर्थम्।

तृतीयाध्यायार्थः– शुभतमेति। मतेः शुभतमत्वं यथार्थत्वम्, स्वयोग्यतया पूर्णत्वं वा। चतुर्थाध्यायार्थः– शुद्धेति। सुखस्य शुद्धत्वं दुःखासम्भिन्नत्वं वाऽनन्तत्वं वा स्वयोग्यतया पूर्णत्वं वा। उपायत्वं च प्रदातृत्वम्। मत्युत्पादकमाह सकलेति। निगमशब्देन सदागमा गृह्यन्ते। आगमप्रतिपाद्यता लक्षणयेति शङ्कानिरासार्थमाह – सर्वेति। शब्दाः संस्कृतशब्दाः। निराकारत्वनिवृत्त्यर्थमाह– नवेति। ग्रन्थारम्भे वाग्व्यापारस्या पेक्षितत्वाद्वागभिमानित्वाच्च लक्ष्म्याः पार्थक्येन तद्वन्दने स्वातन्त्र्यप्रतीतिर्मा भूदिति भावेनाह–लक्ष्मीसहायम् इति। अत्र लक्ष्म्याः सहाय इति तत्पुरुषः।

एवं स्वेष्टोत्कृष्टदेवतां प्रणम्योत्तरग्रन्थोपक्षेपाय प्रारिप्सितविघ्ननिवर्तकत्वेन हरिं स्तौति। विघ्नौघेति। शास्त्रकर्तारं मध्वाचार्यं प्रणमति– अभ्रममिति। यद्यप्यत्र ''अपे क्लेश-तमसोरि''ति अपपूर्वाद्धन्तेः क्लेश-तमसोः कर्मणोरुपपदयोर्ड्प्रत्ययविधानात् प्रकृते तदभावात् 'तापत्रयापहमि'त्ययुक्तम्। तथापि ''अन्येष्वपि दृश्यते'' इत्यपिग्रहणात् सर्वोपाधिव्यभिचारार्थाद्धात्वन्तरादनुपपदादुपपदान्तरयुक्तादपि ड्प्रत्यय इत्यर्थलाभेन ड्प्रत्ययोपपत्तिः। अत एवोक्तं काशिकायाम्– ''अपिशब्दः सर्वोपाधिव्यभिचारार्थः'' इति। तेन धात्वन्तरादपि ड्प्रत्ययो भवतीत्यर्थः। अत्र भ्रमेत्यज्ञानोपलक्षकम्। तेनाज्ञानभ्रमरहितमित्यर्थः। 'भ्रमरहितमि'त्यनेन प्रमादराहित्यम्, 'अजडमित्यनेन करणापाटवराहित्यम्, 'विमलमित्यनेन विप्रलिप्साराहित्यम्। एवं चाज्ञान-भ्रम-विप्रलिप्सा-करणापाटवानामभावोक्त्या परमाप्तत्वं प्रसिद्धतीर्थवैलक्षण्योक्त्याऽतुलत्वं चोक्तं भवति। सदेति प्रत्येकमन्वयः। ''आनन्दतीर्थमित्यनेनानन्दप्रदं शास्त्रं यस्मादिति व्युत्पत्त्या शास्त्रकर्तृत्वमुक्तं भवति।

टीकाकर्तारं स्तौति – चित्रैरिति। अत्र पदानां चित्रत्वमबोधकत्वादिराहित्यम्। वाक्यानां गम्भीरत्वं गहनार्थकत्वम्। मानानामखण्डितत्वं प्रतिपक्षादिविधुरत्वम्।

आश्रमगुरुं प्रणमति – समुत्सार्येति। विद्यागुरून् प्रणमति – ज्ञानेति। करिष्यमाणग्रन्थमूलं दर्शयन् ग्रन्थनाम निर्दिशति– श्रीमध्वेति। स्वग्रन्थस्य साफल्यमाह– विक्षिप्तेति। न च अनुक्तकथनादित्ययुक्तम्, पूर्वाचार्यप्रणीतप्राचीनग्रन्थेषु कथितस्यैव सर्वस्यात्र कथनात्। अन्यथा तत्र तेषामज्ञानप्रतिपादनमनेन कृतं स्यात्। तथाच प्रमाणविरोध इति वाच्यम्। ज्ञानिनामप्युक्तिवैमुख्यदर्शनात्, ज्ञातस्य सर्वस्योक्तिनियमाभावात्, अस्मदादिष्वपि ज्ञातसर्वानुक्तेरनुभवसिद्धत्वाच्चानुक्तकथनादिति यथाश्रुतमेव साध्वित्येके। तन्न मनोरमम्। अत्रोक्तसर्वार्थस्य मूलकोशे तत्र तत्र दर्शनात्, स्वोक्तार्थे मूलकोशसम्मत्यादेः कथितत्वाच्च। किञ्चात्राचार्या नुक्तोऽर्थः कथ्यमानः किमवश्यवक्तव्यः ? किं वाऽवश्यावक्तव्यः ? नान्त्यः। ''आमथ्योद्धियते न्यायामृतम्'' इति स्वेनैव स्वग्रन्थस्यामृतत्वोक्त्याऽतिशयार्थप्रतिपादकत्वप्रतिपादनादवश्यावक्तव्यार्थवचने स्वोक्तिविरोधापत्तेः। नाद्यः। आचार्योक्तार्थस्य न्यूनत्वापत्त्या तस्याप्रेक्षावत्त्वापत्तेः। आलस्योपेक्षादिरहितस्याचार्यस्या वश्यवक्तव्यार्थानुक्तौ कारणाभावाच्च। तस्मादनुक्तत्वेन प्रतीयमानत्वमेवानुक्तशब्दार्थः।

श्रीनिवासतीर्थविरचितः

न्यायामृतप्रकाशः

वासवीहृदयानंदं वेदशास्त्र प्रणायकम्।
वेदव्यासंगुरूपास्यं वंदेऽभीष्टप्रदायकम्॥ १ ॥

श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम्।
श्रीव्यासं श्रीमदानंदतीर्थसंसेव्यमाभजे॥ २ ॥

हृत्तमोनाशकं शास्त्रप्रभया तत्वभासकम्।
नमामि श्रीमदानंदतीर्थाचार्यदिवाकरम्॥ ३ ॥

श्रुतिक्षीराब्धिमामथ्य बुद्धिमंदरभूभृता ।
प्राप्ता न्यायसुधा येन तं जयेंद्रमहं भजे॥ ४ ॥

ब्रह्मण्यतीर्थवार्ध्युत्थं व्यासतीर्थेंदुमाभजे।
तात्पर्यचंद्रिकायुक्तं सर्वतापापहं सताम्॥ ५ ॥

वेदव्यासाब्धिसंजातं सदा हरिपदाश्रयम्।
पदार्थकौमुदीयुक्तं वेदेशेंदुमहं भजे॥ ६ ॥

श्रीमन्न्यायसुधाया यैर्भविः सम्यक्प्रदर्शितः।
तान्वंदे यादवाचार्यान्सदा विद्यागुरूनहम्॥ ७ ॥

अथ तत्कृपया न्यायामृतस्येदं प्रकाशनम्।
क्रियते श्रीनिवासेन गुरुशिक्षानुसारतः ॥ ८ ॥

इह खलु व्यासतीर्थ श्रीमच्चरणः श्रुतमर्थं मिमनिषया निविभंत्सुः परीक्षकप्रवृत्त्यंगभूतमनुबंधचतुष्टयं वक्तुं विशिष्टविषयादिमद्ब्रह्ममीमांसया निबध्य संबंधयितुं चतुर्लक्षणीमीमांसाविवक्षितविशेषणचतुष्टयवत्त्वेनेष्ट देवतामभिष्टवीति। निखिलेत्यादिना॥ निखिलगुणपूर्णत्व नित्यनिर्धूतहेयत्वयोर्हेतुहेतुमद्भावः 'श्रियःपत्ये नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोप हतसकलावद्यतमस' इति टीकाकारोक्तरीत्यावगंतव्यः।

ननु निकायमिति कथं। निकाय्यनिलयालया इत्यमरकोशे ''पाय्यसान्नाय्य निकाय्य धाय्यामानहविर्निवाससामिधेनीषु'' इति सूत्रेच निकाय्यशब्दस्यैवनिलय वाचित्वोक्तेर्निकाय्यम् इति वक्तव्यत्वादिति चेत्। अत्राहुः। निपूर्वकान्निवासार्थकाच्चिनोतेर्धातुविशेषाद्ध्रञ्प्रत्ययेऽकारमात्रं विहायसर्वस्यापि लोपे च कारस्थस्य

इकारस्य एकाररूपे गुणे प्राप्ते अचोऽञ्णितीति ऐकाररूपवृद्धौ सत्यां तस्य चायादेशे चकारस्य ककारादेशेनिकायम् इति रूपस्य ''निवासचितिशरीरोपसमाधानेष्वादेश्चक'' इति सूत्रे निवासार्थे साधिततया निखिल गुणानां निवास आश्रय इत्यर्थो द्रष्टव्य इति। गुरुचरणास्तु। नायं निकायशब्दः कोशसूत्रोक्तरीत्या निवासार्थे रूढोऽभिप्रेतः। किंतु अव्ययानामनेकार्थत्वान्निखिलगुणा एव नितरां कायो यस्येत्यर्थस्याभि प्रेततया न कोपि क्षुद्रोपद्रव इत्याहुः॥

शुभतमेति॥ मतिशब्दस्य ध्यानार्थत्वे तस्याः शुभतमत्वं नाम वैराग्य भक्तिदाढर्योपकृतत्वं। तेन मेयं साक्षात्कर्तव्यं। अपरोक्षज्ञानार्थत्वे तु वैराग्यभक्तिध्यानजातत्वेन शुभतमत्वं तस्य मंतव्यं। तेन मेयं विषयीकर्तव्यं। यद्वा नित्यानित्यवस्तुविवेकवैराग्यशमदमादिसंपत्तिमुमुक्षारूपसाधनचतुष्टयसंपन्नत्वेन शुभतमा ये पुरुषास्तेषां मत्या मेयं श्रवणादिद्वाराऽपरोक्षज्ञानेन विषयीकरणीयमित्यर्थः। सौख्यस्य शुद्धत्वं नाम दुःखासंभिन्नत्वं मंतव्यं। अनेन विशेषण चतुष्टयेनाऽध्याय चतुष्टयार्थः संगृहीत इति ध्येयं। तथा च भगवतो विषयत्वाच्छुद्धसौख्यस्य परमप्रयोजनत्वान्मति शब्दोक्तापरोक्षज्ञानस्य चावांतरप्रयोजनत्वाच्छुभतमानांच अधिकारित्वाद्यथायोग्यं संबंधसद्भावात्प्रेक्षावतामत्र प्रवृत्तिरुचितेत्यपिसूचितं। गुणपूर्णत्वोपपादनायाह॥ सकलेति॥ वैदिकानां सर्वशब्दानां यौगिकत्वात्तदभिधेयत्वे सकलगुणपूर्णत्वमेव सिद्ध्यति। यथोक्तं ''अतोऽनंतगुणो विष्णुर्यच्छब्दायोगवृत्तय'' इति। ननु कासुचिच्छाखासु अन्यथाप्युच्यमानत्वान्नविष्णोर्निखिलनिगमगेयत्वंयुक्तमित्याशंकापरिहाराय सूत्रकृदुक्तं गति सामान्यं हृदि निधायाह॥ सर्वशब्देति॥ वैदिकप्रकृत्यादि सर्वशब्दाभिधेयमित्यर्थः। अतो नानयोर्विशेषणयोः पुनरुक्तिरितिभावः। यद्वा अधिकारिभेदेन वाक्यसमन्वयपदसमन्वयाभ्यां भगवानेव प्रतिपाद्य इति वाक्यान्वयाज्योतिरुपक्रमादित्यादि सूत्रोक्तप्रकारं हृदि निधायेदं विशेषणद्वयं। अतो न पुनरुक्तिरिति मंतव्यं। निराकारस्य ब्रह्मणोबुद्धावनारोहाच्छुभतममतिमेयत्वं यदुक्तं तदयुक्तमित्याशंकापरिहारायोक्तं नवजलधरकाय मितीत्याहुः। वस्तुतस्तु निखिलगुणनिकायमित्यनेनैव निराकारत्वशंकायाः परिहृतत्वात्स्वोपास्यदेवता स्वरूपकथनायैवेदं विशेषणमिति मंतव्यं। नवजलधरोवर्षाकालीनो मेघः तद्वद्विद्यमानः कायो यस्य तं नीलमेघश्यामं श्रीकृष्णमित्यर्थः। लक्ष्मीसहायमित्यत्र लक्ष्म्याः सहाय इति विग्रहो न तु लक्ष्मीरेव सहायो यस्येति। तथात्वे महि मातिशयाऽलाभात्। एवं च लक्ष्म्याःभगवान्सहाय इति वचनेन ग्रंथस्य वाङ्मनोव्यापार रूपत्वाल्लक्ष्म्याश्च वाङ्मनसदेवतात्वाद्यल्लक्ष्म्या वाङ्मनसदेवतात्वं तदपि तदधीनमिति प्रमेय सूचनेन भगवतो महामहिमा लभ्यत इति ध्येयं॥

स्वापेक्षितविघ्ननिवारणगुणवत्त्वेन भगवंतं सेवते। विघ्नौघेति॥ सत्याशेषेतिविशेषणमुत्तरग्रंथोपक्षे पाय भूमिकारचनरूपमिति ज्ञेयं॥ आदिगुरून्सेवते॥ अभ्रममिति॥ भ्रमरूपज्ञानरहितं। गंगादिसर्वतीर्थेषु भ्रमो नामाऽऽवर्तस्तिष्ठतीत्याशयः। भंगरहितं प्रतिवादिप्रयुक्तपराभवरहितं। अन्यत्र तु वसंतादिकाले प्रवाहविच्छेदरूपो भंगोस्तीत्यवसेयं। अजडं जाड्याख्यदोषरहितं। इतरत्र तु जलात्मकत्वात् जाड्यमस्तीति बोध्यं। विमलं विगतमलं। ''शमलं पापमुद्दिष्टं रागद्वेषादिकं तथा। अपराधश्च शमलं मलं च शमलं विदु'' रितिकर्मनिर्णय

वचनात् मलशब्दोक्तपापरहितमित्यर्थः। अपरत्र तु वर्षाकाले कल्मषतादिरूपं मलमस्तीत्यवसेयं। तापत्रयापहं स्मरणादिना आध्यात्मिकादितापत्रयवारकं। इतरत्र तु आधि–भौतिकाख्यबाह्य तापवारकत्वमेवेतिध्येयं। अत एवातुलं गंगादितीर्थासदृशं॥ जयतीर्थवाक्स्तुतिव्याजेन तान्स्तौति॥ चित्रैरिति॥ पदानां चित्रत्वं नामाऽऽकांक्षादियुक्तत्वं। वाक्यानां गं भीरत्वं नामास्पष्टार्थत्वं। मानानामखंडितत्वं नाम प्रतिप्रमाणराहित्यं द्रष्टव्यं। गुरोरानंदतीर्थस्य योगुरुभावस्तं। स्वसंन्यासगुरुं सेवते॥ समुत्सार्येति॥ भास्करपक्षे विष्णुपदमाकाशं। ''वियद्विष्णुपदंव्योमे'' त्यभिधानात्। स्वविद्यागुरून्प्रणमति॥ ज्ञानेति॥ स्वग्रंथनामाह॥ श्रीमध्वेति॥ प्रसिद्धाऽमृतपक्षे विबुधाःदेवाः। ग्रंथपक्षे विबुधाः पंडिताः। न्यायामृतोद्धरणस्य मूलकोशैरेव शिष्यैः कर्तुं शक्यत्वाद्व्यर्थोयं भवतां श्रम इत्यत आह॥ विक्षिप्तेति॥ अनुक्तेति॥ भगवत्पादटीकाकाराभ्यां कंठतोऽनुक्तमर्थादुक्तमिति व्याख्येयं। अन्यथातदुभयापेक्षया स्वस्य सार्वज्ञ्यापत्तिरितिध्येयं॥

२. विप्रतिपत्तिविचारः

ननु मिथ्यैव विश्वम्। तथा हि तत्र विप्रतिपत्तिः – ब्रह्मप्रमान्येन वा सप्रकारेण वा अबाध्यत्वे सति असद्विलक्षणत्वे सति ब्रह्मान्यत् प्रतिपन्नोपाधौ त्रैकालिक निषेधप्रतियोगि, न वा? पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगि न वा? अखण्डार्थनिष्ठवेदान्तजन्यनिष्प्रकारकब्रह्मप्रमाबाध्यमपि विश्वं ब्रह्मप्रमान्येन वा सप्रकारेण वा न बाध्यमिति नाश्रयासिद्धिः। एवमुत्तरत्रापि पूर्वोत्तरपक्षानुमानप्रतिज्ञे संकलय्य विप्रतिपत्तिरुह्या।

इदं च विप्रतिपत्तिप्रदर्शनं तार्किकरीत्यैव न तु वस्तुतः। तत्पक्षेऽपि विप्रतिपत्ति वाक्यस्य पक्षपरिग्रहैकफलकत्वात्। तस्य च कथाबाह्येन निग्रहानर्हेण लौकिक रीत्यनुसारिणा संस्कृतरूपेण वा, भाषारूपेण वा, 'मया प्रपञ्चमिथ्यात्वं साध्यत' इति वादिवाक्येन वा, 'त्वया प्रपञ्चमिथ्यात्वं साध्य'मिति मध्यस्थपरि कल्पितविषयस्वीकारेण वा सिद्धौ प्रतिज्ञाव्यतिरिक्तस्य उक्तकुसृष्टियुक्तस्य विप्रति पत्तिवाक्यस्य वैयर्थ्यात्। न च साध्योपस्थित्यर्थं तत्। प्रतिज्ञयैव तत्सिद्धेः। न च पक्षत्वप्रयोजकसंशयार्थं तत्। वादिप्रतिवादिनोः प्राश्निकानाञ्च निश्चयवत्त्वेन तदयोगात्। आहार्यसंशयस्य चातिप्रसंगित्वेन पक्षत्वाप्रयोजकत्वात्, विप्रतिपत्ति वाक्यानपेक्षत्वाच्च, संशयं विनापि सिषाधयिषाविरहसहकृतसाधकमानाभावरूपस्य पक्षत्वस्य संभवाच्च।

श्रीमधुसूदनसरस्वतीविरचिता

अद्वैतसिद्धिः

मायाकल्पितमातृतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः॥ १॥

श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानाम्।
स्पर्शेन निर्धूततमोरजोभ्यः पादोत्थितेभ्योऽस्तु नमो रजोभ्यः॥ २॥

बहुभिर्विहिता बुधैः परार्थं विजयन्तेऽमितविस्तृता निबन्धाः।
मम तु श्रम एष नूनमात्मंभरितां भावयितुं भविष्यतीह॥ ३॥

श्रद्धाधनेन मुनिना मधुसूदनेन संगृह्य शास्त्रनिचयं रचितातियत्नात्।
बोधाय वादिविजयाय च सत्वराणामद्वैतसिद्धिरियमस्तु मुदे बुधानाम्॥ ४॥

विप्रतिपत्तिविचारः

तत्राद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वाद् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम्। उपपादनं च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवतीति तदुभयं वादजल्पवितण्डानामन्यतमां कथामाश्रित्य सम्पादनीयम्। तत्र च विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वान्मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीया। यद्यपि विप्रतिपत्तिजन्यसंशयस्य न पक्षतासंपादकतयोपयोगः, सिषाधयिषाविरहसहकृतसाधकमानाभावरूपायास्तस्याः संशयाघटितत्वात्। अन्यथा श्रुत्या-ऽऽत्मनिश्चयवतोऽनुमित्सया तदनुमानं न स्यात्। वाद्यादीनां निश्चयवत्त्वेन संशयासंभवादाहार्यसंशयस्यातिप्रसंजकत्वाच्च। नापि विप्रतिपत्तेः स्वरूपत एव पक्षप्रतिपक्षपरिग्रहफलकतयोपयोगः। 'त्वयेदं साधनीयम्' 'अनेनेदं दूषणीयम्' इत्यादिमध्यस्थवाक्यादेव तल्लाभेन विप्रतिप्रत्तिवैयर्थ्यात्। तथापि विप्रतिपत्तिजन्यसंशयस्यानुमित्यनङ्गत्वेऽपि व्युदसनीयतया विचाराङ्गत्वमस्त्येव। तादृशसंशयं प्रति विप्रतिपत्तेः क्वचिन्निश्चयादिना प्रतिबन्धादजनकत्वेऽपि स्वरूपयोग्यत्वात्। वाद्यादीनां च निश्चयवत्त्वे नियमाभावात्।

'निश्चितौ हि वादं कुरुतः' इत्याभिमानिकनिश्चयाभिप्रायम्। परपक्षमालम्ब्याप्यहंकारिणो विपरीतनिश्चयवतो जल्पादौ प्रवृत्तिदर्शनात्। तस्मात् समयबन्धादिवत् स्वकर्तव्यनिर्वाहाय मध्यस्थेन विप्रतिपत्तिः प्रदर्शनीयैव।

तत्र मिथ्यात्वे विप्रतिपत्तिः– ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा? पारमार्थिकत्वाकारेणोक्त निषेधप्रतियोगि न वेति। अत्र च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात् पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतराबाध्यत्वं पक्षविशेषणम्। यदि पुनः पक्षतावच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्या तदैकदेशे साध्यसिद्धावपि सिद्धसाधनाभावात् तद्वारकं विशेषणमनुपादेयम्। इतरविशेषणद्वयं तु तुच्छे ब्रह्मणि च बाधवारणायादरणीयमेव। प्रत्येकं वा विप्रतिपत्तिः – वियन्मिथ्या न वा? पृथिवी मिथ्या न वेति। एवं वियदादेः प्रत्येकं पक्षत्वेऽपि न घटादौ सन्दिग्धानैकान्तिकता। पक्षसमत्वाद् घटादेः। तथा हि – पक्षे साध्याभावसन्देहस्यानुगुणत्वात् पक्षभिन्न एव तस्य दूषणत्वं वाच्यम्। अत एवोक्तं 'साध्याभावनिश्चयवति हेतुसन्देहे एव सन्दिग्धानैकान्तिकते'ति। पक्षत्वं तु साध्यसन्देहवत्त्वम्। साध्यगोचरसाधकमानाभाववत्त्वं वा। एतच्च घटादिसाधारणम्। अत एव तत्रापि सन्दिग्धानैकान्तिकत्वं न दोषः। पक्षसमत्वोक्तिस्तु प्रतिज्ञाविषयत्वाभावमात्रेण। न च तर्हि प्रतिज्ञाविषयत्वमेव पक्षत्वम्। स्वार्थानुमाने तदभावात्।

न्यायामृततरङ्गिणी

आचार्योपदेशपरिगृहीतार्थस्य न्यायतोऽवधारणरूपमननस्यावधार्यमाणार्थविपरीतनिरास-साध्यत्वात् परपक्षं प्रतिक्षेप्तुमुपक्षिपति - नन्विति। अत्र विशेषणसङ्गतेनैवकारेण 'शङ्खः पाण्डुर एवे'तिवद्विशेष्यतावच्छेदकावच्छिन्ने सर्वस्मिन् विशेषणसम्बन्धबोधनात् 'सत्याशेषविश्वस्य कारणमि'त्यनेन सूचितस्य स्वपक्षस्य विपरीतस्य निर्देशः कृतः। प्रतिवाद्यवधानाय परो 'मिथ्यैव विश्वमि'ति स्वपक्षस्य प्रामाणिकत्वं जानीहीत्याह – तथाहीति। ननु 'मिथ्यैव विश्वमि'ति परपक्षोपक्षेपो न सम्भवति, ब्रह्मादिषु बाधाद्यापत्तेः इत्याशङ्कामपनेतुं विवादाङ्गं विप्रतिपत्तिजन्यानं च संशयं वक्तुमाह – तत्रेति। प्रवर्त्स्यन्त्यां मिथ्यात्वकथायां विप्रतिपत्तिः पूर्वं मध्यस्थपरिदर्शिताऽस्तीति शेषः। तथाच विप्रतिपत्तौ पक्षत्वेन निर्दिष्टस्यैव विश्वशब्देन

ग्रहणात् न ब्रह्मादौ बाधादीति भावः। विप्रतिपत्तिस्वरूपमाह – ब्रह्मप्रमेत्यादिना। अत्र विश्वस्य धर्मित्वे ब्रह्मणि बाधासिद्धी स्याताम्। अतो ब्रह्मान्यदित्युक्तम्। ननु – पक्षतावच्छेदकैक्ये तन्न दूषणम्। समानप्रकारकविरहज्ञानस्यैव प्रतिबन्धकतया ब्रह्मत्वावच्छेदेन साध्यहेत्वभावनिश्चयेऽपि विश्वत्वावच्छेदेन तदनिश्चयादिति चेत्, न ; एवमपि तत्र तज्ज्ञानस्य भ्रमत्वेन तत्त्वनिर्णयाभावेन वादकथया निर्णयसिद्धये तदुपादानस्य सर्वसिद्धत्वात्। तुच्छे बाधासिद्धी मा भूताम्। इति असद्विलक्षणत्वे सतीति।

पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनमिति मते शुक्तिरूप्ये सिद्धसाधनवारणाय 'अबाध्यत्वे सती'ति विशेषणम्। यदि पुनः पक्षतावच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्या, तदैकदेशे साध्यसिद्धावपि सिद्धसाधनाभावात् तद्वारकविशेषणमनुपादेयम्। परमते वियदादेरपि बाध्यत्वात्पक्षालाभो मा भूत् इति 'ब्रह्मप्रमान्येनेत्यबाध्यत्वविशेषणम्। ननु ब्रह्मण्यारोपितस्य क्षणिकत्वादेरधिष्ठान ब्रह्मप्रमामात्रनिवर्त्यत्वात्तत्र सिद्धसाधनम्, शुक्तिज्ञानादेरपि ब्रह्मज्ञानत्वात् तद्वाध्यरजतादौ च सिद्धसाधनम्, 'शुद्धं ब्रह्म वृत्तिव्याप्यमपि ने'ति मते वियदादेरपि ब्रह्मप्रमान्यबाध्यत्वात् पक्षालाभश्चेत्यनुशयेन 'सप्रकारेणे'त्यबाध्यत्वविशेषणम्।

इदं च विप्रतिपत्तिस्वरूपं तार्किकादिरीत्यैवेत्यनुपदमेव वक्ष्यति। तेन स्वमते तुच्छस्यापि निषेधप्रतियोगित्वात् तत्र बाधाभावेन तद्वारणाय 'असद्विलक्षणत्वे सती'ति विशेषणमसङ्गतम्। शुक्तिरूप्यादेरसत्त्वेन 'असद्विलक्षणत्वे सती'त्यनेनैव तद्वारणात् तत्र सिद्धसाधनवारणायाद्यं विकल्पितं विशेषणद्वयं च व्यर्थमित्यादिदूषणमनवकाशं वेदितव्यम्।

सिंह-माणवकयोरिव 'मम शरीरमि'ति देहात्मनोः स्पष्टतरभेदावभासेन देहात्मैक्या रोपासम्भव इति मताश्रयणात् न देहात्मैक्ये सिद्धसाधनम्। नभोनैल्य-चन्द्रपरिमाणभ्रमयोः सप्रकारकबाधार्हत्वात् न तत्रापि सिद्धसाधनम्।

ननु – इयं विप्रतिपत्तिस्तार्किकादेर्मायावादिना वा? तत्त्ववादिनो मायावादिना वा? तदुभयेषां मायावादिना वा? नाद्यः ; तार्किकादिमत आपणस्थरूप्यातिरिक्तस्य शुक्तिरूप्यस्या भावेन तत्र सिद्धसाधनवारणार्थोपात्ताबाध्यत्वविशेषणानुपपत्तेः। न च आपणस्थरूप्य एव तन्मते सिद्धसाधनवारणाय तद्विशेषणमिति वाच्यम्। 'प्रतिपन्नोपाधावि'त्यत्र साध्ये 'सर्वस्मिन्नि'त्यस्य विशेषणस्यावश्यकतया रूप्ये सिद्धसाधनानवकाशात्। अन्यथा वियदादेरपि क्वचिदधिकरणे भ्रमसम्भवेन भ्रमप्रतिपन्नाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वस्य सत्त्वपक्षेऽपि

सम्भवेन सर्वत्रैव सिद्धसाधनापातात्। तार्किकमते शुक्तिरूप्यज्ञानस्यैव भ्रमत्वख्यापन रूपबाधविषयतया रजतस्याबाध्यतया तद्विशेषणेन तदवारणाच्च। मायावादिमते शुक्तिरूप्ये सिद्धसाधनसम्भवेऽपि साध्यनिर्देष्टारं स्वं प्रति स्वस्य सिद्धसाधनोद्भावनस्यासम्भवदुक्तिकत्वात्। नापि द्वितीयः। 'असद्विलक्षणत्वे सती'त्यनेनैव शुक्तिरूप्यव्यवच्छेदे तद्व्यावृत्त्यर्थं विशेषणान्तरोपादानवैयर्थ्यात्। अत एव न तृतीयः। पक्षद्वयोक्तदोषात् एकदाऽनेकैर्विवा-दायोगाच्चेति चेत्, अत्रोच्यते- तृतीयपक्षे दोषाभावात्। 'शुक्तिरूप्यं तात्कालिकमुत्पन्नं तत्रैव सदि'ति भास्करादिमते शुक्तिरूप्ये सिद्धसाधनवारणायाद्यं सत्यन्तं विशेषणम्। भास्करादिभिरपि भ्रम-प्रमाविभागाय रजतस्य घटादिवैलक्षण्यमङ्गीकृतमेव इति तन्मतेऽपि तस्य पक्षबहिर्भावस्यावश्यं वाच्यत्वात् तार्किकादिमते स्वमते च तदुपरक्ते साध्यसिद्धिः प्रयोजनम्। इति सर्वमतेऽपि सप्रयोजनं विशेषणम्। विशेषणत्वे प्रयोजनवत्त्वं तन्त्रम्, न तु विशेषणप्रयोजनस्य सर्वसिद्धत्वमपि। सत्यत्ववाद्यनेकमतानुसारिणः कुशलस्यैकस्य मिथ्यात्वादिना कथासम्भवादिति सर्वमनवद्यम्।

।प्रतिपन्नेति। अत्र त्रैकालिकनिषेधे'त्यनेनात्यन्ताभाव एव विवक्षितः। तथाचान्योन्या भावमादाय सिद्धसाधनम्, तद्धारणाय निषेधपदस्यात्यन्ताभावपरत्वे च 'त्रैकालिके'ति व्यर्थमिति शङ्कानवकाशः। 'प्रतिपन्ने'ति च घटादावत्यन्ताभावप्रतियोगित्वमिति मते घटादावेव सिद्धसाधनवारणाय। प्रतिपन्नत्वं च प्रतीतत्वमात्रम् ; अतः प्रमाप्रतिपन्नत्वं भ्रमप्रतिपन्नत्वं वाऽऽदाय न विरोध-सिद्धसाधने। यावत्त्वं च विवक्षितम्; अतो भ्रमप्रतिपन्नाधि करणनिष्ठात्यन्ताभावप्रतियोगित्वमादाय सत्त्वपक्षे न सिद्धसाधनम्। ननु स्वाधिकरणाभिमत यावन्निष्ठात्यन्ताभावप्रतियोगित्वमिति पर्यवसितेऽर्थे केवलान्वय्यत्यन्ताभावप्रतियोगिगगनादिषु सिद्धसाधनम्। यदधिकरणे यत् सत् तत् तन्निष्ठात्यन्ताभावप्रतियोगीति कृते विरोधः। कथञ्चिद्विरोधपरिहारेऽपि संयोगादिसम्बन्धेन घटाद्यधिकरणे समवायसम्बन्धेन घटाद्यत्यन्ता भावसत्त्वेन घटादौ सिद्धसाधनम्। येन सम्बन्धेन यद् यस्याधिकरणम् तेन सम्बन्धेन तत् तन्निष्ठात्यन्ताभावप्रतियोगीति विवक्षायामव्याप्यवृत्तिषु संयोगादिषु सिद्धसाधनमिति चेत्, मैवम्। यत्सम्बन्धावच्छेदकविशेषाभ्यां यत्र यस्य प्रतीतिर्भवितुमर्हति तत्सम्बन्धावच्छेदकविशेषाभ्यां तस्यैव तन्निष्ठात्यन्ताभावप्रतियोगित्वमिति विवक्षितम्। आकाशादेरपि संयोगादिसम्बन्धेनास्त्येव वृत्तिरिति नोक्तदोषः। यदि पुनर्घटादेर्नात्यन्ताभावप्रतियोगित्वम्, न वा स्वात्यन्ता भावसामानाधिकरण्यम् लाघवेन घटात्यन्ताभावत्वेनैव घटसामानाधिकरण्यविरोधित्वकल्पनात्, सम्बन्धविशेषप्रवेशे च गौरवात्, घटसम्बन्धाभावमात्रविषयतया चाभावप्रतीत्युपपत्तेः, आधाराधेय

भावस्य प्रत्यक्षसिद्धत्वेन घटस्यावृत्तित्वाशङ्कानुदयात्, एवं संयोगादेरपि नाव्याप्यवृत्तितेति पक्षः तदाऽत्यन्ताभावप्रतियोगित्वमेव विवक्षितम्।

ननु मूलग्रन्थेषु विप्रतिपत्तेः क्वाप्यदर्शनात् न तस्या आवश्यकत्वमित्यत आह – इदं चेति। तार्किकैः स्वग्रन्थेषु विप्रतिपत्तिः प्रदर्शिताऽस्तीति अत्रापि सा प्रदर्शिता न तु तस्या अवश्यं प्रदर्शनीयतया प्रदर्शनमित्यर्थः। ननु विप्रतिपत्तिरवश्यं प्रदर्शनीयैव; प्रयोजनवत्त्वात्। मूलग्रन्थेषु तदप्रदर्शनं तु शिष्यैरेव सोत्प्रेक्ष्यतामित्यभिप्रायेण भविष्यतीत्यत आह – तत्पक्षेऽपीति। यैरपि कथातः पूर्वं विप्रतिपत्तिर्मध्यस्थादिनाऽवश्यं प्रदर्शनीया प्रयोजनवत्त्वादित्यभिधीयते तैरपि तस्याः पक्षपरिग्रहरूपसाधनीयकोटिपरिग्रह एक एव प्रयोजनं वाच्यमित्यर्थः। ननु स्थापनीयकोटिरूपपक्षपरिग्रहार्थमेव तार्किकादीनामिव भवतामपि साऽवश्यं प्रदर्शनीयेत्यत आह – तस्य चेति। तस्य पक्षपरिग्रहस्य। वादिवाक्येन वा मध्यस्थकल्पितविषयस्वीकारेण वा सिद्धौ विप्रतिपत्तिवाक्यस्य वैयर्थ्यादित्यन्वयः। 'कथाबाह्येने' त्यादि वादिवाक्यविशेषणम्। तथाच पक्षपरिग्रहरूपप्रयोजनस्यान्यथासिद्धत्वात् तार्किकादिभिरपि विप्रतिपत्तिर्नावश्यं प्रदर्शनीयेति भावः। तार्किकमते विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहैकफलकत्वं वक्तुं प्रयोजनान्तरं निरस्यति – न चेति। विप्रतिपत्तिवाक्यस्य समयबन्धादिना व्यवहितत्वेन हेत्वभिधानप्रयोजकाकाङ्क्षाजनकसाध्योपस्थित्यहेतुत्वमित्यर्थः। ननु विप्रतिपत्तिवाक्यस्य साध्योप स्थित्यहेतुत्वे कथं साध्योपस्थितिः स्यात्? अत आह – प्रतिज्ञयैवेति। विप्रतिपत्तिवाक्यस्य समयबन्धादिना व्यवहितत्वेन तदुत्तरमवश्यं वक्तव्यया प्रतिज्ञयैव हेत्वभिधानप्रयोजका काङ्क्षाजनकसाध्योपस्थितिसम्भवादित्यर्थः। विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहैकफलकत्वं परिशेषयितुं तस्य संशयार्थत्वं निरस्यति – न चेति। तदिति। विप्रतिपत्तिवाक्यम्। वादि-प्रतिवादिनोरिति। तथाच विशेषादर्शनरूपहेत्वभावाद् विप्रतिपत्तिवाक्यस्य न वाद्यादिषु संशयाधायकत्वमित्यर्थः। ननु विशेषदर्शने सत्यपि विप्रतिपत्तिवाक्याद् वाद्यादीनामाहार्यसंशयो भविष्यति। तस्य विशेषदर्शनाप्रतिबध्यत्वात् इत्यत आह – आहार्येति। अनुमित्युत्तरकालमप्याहार्यसंशयस्य सत्त्वेन सिषाधयिषाविरहदशायामपि पक्षतापत्त्याऽतिप्रसङ्गेनेत्यर्थः। विप्रतिपत्तीति। तथाच व्यभिचारात् नाहार्यसंशयं प्रति विप्रतिपत्तिवाक्यस्य हेतुत्वमित्यर्थः। ननु – वाद्यादीनां विशेषदर्शनवत्त्वेन संशयासिद्धौ पक्षत्वासिद्ध्या कथं न्यायावतारः स्यादिति, अत आह – संशयं विनेति।

ननु विप्रतिपत्तिवाक्यस्य वाद्यादिषु संशयाजनकत्वेऽपि परिषदादिषु संशयजनकत्वमस्त्येव; तेषां विशेषदर्शनविरहात्। न च – अन्यदीयसंशयस्य पक्षत्वाप्रयोजकत्वेनानुमानाङ्गत्वं नेति

वाच्यम्। तस्यानुमानानङ्गत्वेऽपि व्युदसनीयतया विचाराङ्गत्वमस्त्येव। वाद्यादिषु संशयं प्रति विप्रतिपत्तेर्निश्चयादिना प्रतिबन्धाद जनकत्वेऽपि स्वरूपयोग्यत्वात्। वाद्यादीनां निश्चयवत्त्व नियमाभावात्। ''निश्चितौ हि वादं कुरुतः'' इत्याभिमानिकनिश्चयाभिप्रायम्। परपक्षमालम्ब्याप्यहङ्कारिणो विपरीतनिश्चयवतो जल्पादौ प्रवृत्तिदर्शनात् तस्मात् समयबन्धादिवत्स्वकर्तव्यनिर्वाहाय मध्यस्थेन विप्रतिपत्तिः प्रदर्शनीयैव इति। उच्यते-वाद्यादीनां निश्चयवत्त्वध्रौव्येण विप्रतिपत्तेः क्वचिदपि वाद्यादिनिष्ठसंशयानुपधायकत्वेन तादृशसंशयं प्रति तस्याः स्वरूपयोग्यत्वस्याप्यकल्पनात्। क्वचित् फलोपहितजातीयस्यैव स्वरूपयोग्यत्वात्। वाद्यादीनां निश्चयवत्त्वस्य कथातः पूर्वं समविद्यत्वज्ञापकपरीक्षादिना सिद्धत्वात्। अहङ्कारिणः परपक्षमालम्ब्य ख्यात्यार्थं जल्पादिप्रवृत्तिसम्भवाच्च। व्युदसनीयतया विचारङ्गस्यापि पारिषद्येषु संशयस्य विप्रतिपत्तिं विनाऽपि वादि-प्रतिवादिसन्नाहादिना कोट्युपस्थितौ विशेषादर्शने सति सम्भवेन विप्रतिपत्तिवाक्यस्यानावश्यकत्वादित्यभिप्रायः।

न्यायामृतकण्टकोद्धारः

'सत्याशेषविश्वस्ये'त्युक्तं विश्वसत्यत्वं समाधातुं प्रतिक्षिपति– नन्विति। न चात्रैवकारवैयर्थ्यम्। अत्र हि स्वपक्षसाधनं परपक्षदूषणं द्वयमपि कर्तव्यम्। तत्र मिथ्या न सत्यमित्यर्थलाभाय तस्योपात्तत्वात्। अथवा मिथ्येत्युक्ते यादृशतादृशमिथ्यात्वस्य मयाऽङ्गीकारात् सिद्धसाधनमित्याशङ्कानिरासायैवेत्युक्तम्। तेनायोगव्यवच्छेदवाचिनैवकारेण भवदङ्गीकृतसत्यत्वविरोधिमिथ्यात्वं साध्यत इति न सिद्धसाधनशङ्केत्युक्तं भवति। यद्वा एवकारो भिन्नक्रमः विश्वमित्यनेन सम्बद्धयते। स च कात्स्न्यमाह। जगदेव दुःखपङ्कमग्नमुद्दिधीर्षुरिति यथा। तेन कृत्स्नं जगन्मिथ्येत्यर्थः।

विवादप्रयोजकीभूतसंशयजननीं विप्रतिपत्तिं दर्शयति – ब्रह्मप्रमान्येनेति। अस्यार्थः – ब्रह्मप्रमाया अन्येन सप्रकारेण वाऽबाध्यत्वे सति असद्विलक्षणत्वे सति ब्रह्मान्यत् पक्षः। सर्वस्मिन् प्रतिपन्नोपाधौ यस्त्रैकालिकनिषेधः तत्प्रतियोगि न वेति साध्यम्। अत्र सर्वं पक्ष इत्युक्ते ब्रह्मण्यंशे बाधः। तत्र परेण मिथ्यात्वानङ्गीकारात्। न चायमेतत्संयोगी एतत्त्वादित्यत्रैव बाधितांशमपहायाबाधितांशे अनुमितिर्भविष्यतीति नांशबाधो दोषायेति वाच्यम्। तत्र पक्षतावच्छेदकसामानाधिकरण्येन क्वचिदंशे साध्यसिद्धेरुद्देश्यत्वेन तत्रानुमितावपि प्रकृते पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेन तत्प्रतिबन्धादंशबाधस्य दोषत्वात्। अन्यथा सर्वान्तर्गतयत्किञ्चिद्वयक्तौ साध्यस्य सिद्धत्वेन सिद्धसाधनापत्तेः। तथाचांशबाधवारणार्थं ब्रह्मान्यदिति।

नन्वत्र सगुणब्रह्मान्यत्वं निर्गुणब्रह्मान्यत्वं वा विवक्षितम्? नाद्यः। सगुणस्य मिथ्यात्वेन पक्षतया तद्व्यावर्तनानुपपत्तेः। निर्गुणस्यापि पक्षत्वादंशे बाधापत्तेश्च। न द्वितीयः। परमते निर्गुणस्य ब्रह्मणोऽसिद्ध-

तयाऽऽश्रयासिद्ध्यापत्तेरिति चेन्न। सदित्यादिपदतात्पर्यविषयीभूतान्यत्वस्य ब्रह्मान्यपदेन विवक्षणात्। तादृशस्य चोभयसंमतत्वात्। ब्रह्मान्यदित्युक्ते शशविषाणादेरपि पक्षत्वं स्यात्। तस्य च परेण मिथ्यात्वानंगीकारादंशबाधः। न च ब्रह्मान्यपदस्य ब्रह्मप्रतियोगिकान्योन्याभावार्थतयाऽन्योन्याभावस्य च धर्मिस्वरूपतया शशविषाणादेरसत्त्वेन तद्धर्मिकान्योन्याभावस्यैवासत्त्वेन तस्य पक्षत्वानापत्त्या नांशबाधापत्तिरिति वाच्यम्। ब्रह्मान्यशब्देन ब्रह्मलक्षणविरुद्धलक्षणत्वस्य विवक्षणात्। ब्रह्मलक्षणविरुद्धासत्त्वादेस्तत्र सत्त्वात्। न च धर्म्यसत्त्वे कथं धर्मसत्त्वमिति वाच्यम्। धर्मिसत्ताविरोधिधर्मस्य धर्म्यसत्त्वेऽपि सत्त्वोपपत्तेः। प्रकृते चात्यन्ताभावप्रतियोगित्वरूपासत्त्वस्य धर्मिसत्ताविरोधित्वात्। किंच घटः पटो नेतिवदसत् घटो नेत्यबाधितप्रतीत्याऽसद्धर्मिकान्योन्याभावस्याप्यवश्यमंगीकार्यत्वात्। नैयायिकमतेऽभावस्य प्रतियोगिविरोधित्वेऽपि अन्योन्याभावस्य तादात्म्यविरोधित्ववदन्यत्रान्योन्याभावस्य धर्मिस्वरूपत्वेऽपि असद्धर्मिकान्योन्याभावस्यासदात्मकत्वासम्भवे असत्त्वात्मकत्वस्य सम्भवेन दोषाभावात्। यथा चैतत्तथोपपादयिष्यति भङ्गान्ते। वस्तुतस्तु ब्रह्म अन्यद्यस्मादिति ब्रह्मान्यपदेन ब्रह्मनिष्ठान्योन्याभावप्रतियोगित्वोक्तेरसतोऽपि ब्रह्मनिष्ठान्योन्याभावप्रतियोगित्वेन ब्रह्मान्यत्वात् पक्षत्वापत्तिरेवेत्यवधेयम्। तथा च शशविषाणाद्यंशे बाधवारणायासद्विलक्षणत्वे सतीति।

नन्वत्रासच्छब्देन त्रैकालिकनिषेधप्रतियोग्युक्तौ मायिमते प्रपंचस्यापि तादृशासत्त्वसंभवेन तद्विलक्षणत्वाभावादाश्रयासिद्धिः। नापि निरुपाख्यत्वमसत्त्वम्। तद्धि प्रतीत्यविषयत्वं वा शब्दशक्त्यविषयत्वं वा निर्वक्तव्यम्। नोभयथाऽपि। तादृशासत्त्वस्य शशविषाणादावभावेन तस्यापि पक्षत्वापत्तौ उक्तदोषतादवस्थ्यादिति चेन्न। अर्थक्रियानर्हत्वस्यासच्छब्देनोक्तत्वात्। न च शुक्तिरजतस्यार्थक्रियानर्हत्वेन तद्विलक्षणत्वाभावान्न पक्षत्वमिति न सिद्धसाधनावकाश इति वाच्यम्। तस्यापि ध्वंसादिरूपासद्व्यावृत्तार्थक्रियाकारित्वांगीकारेणादोषात्। मायिमते क्वचित्साध्यसिद्धौ सिद्धसाधनमिति मतेन शुक्तिरजताद्यंशे सिद्धसाधनं माऽभूदित्यतोऽबाध्यत्वे सतीति। तेन पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् प्रकृते तदभावान्नांशतः सिद्धसाधनम्। अत एव पृथिवी इतरभिन्नेत्यत्र घटत्वावच्छेदेन जलादित्रयोदशप्रतियोगिकान्योन्याभावे सिद्धेऽपि पृथिवीत्वावच्छेदेन तदसिद्धेर्नांशतः सिद्धसाधनमिति न शंक्यम्। मायिमते प्रपंचस्य ब्रह्मप्रमाबाध्यत्वेनाश्रयासिद्धिर्मा भूदित्यतो ब्रह्मप्रमान्येनेति। तथा च तदन्येनाबाध्यत्वान्नाश्रायासिद्धिः। न च नञ्द्वयवैय्यर्थ्यं, ब्रह्मप्रमाबाध्यत्वे सतीत्येतावतैव सामंजस्यादिति वाच्यम्। तथासति परमते आश्रयासिद्ध्यापत्तेः। न च ब्रह्मप्रमेत्यत्र प्रमापदवैय्यर्थ्यं, ब्रह्मज्ञानान्येनेत्येतावता पूर्तेरिति वाच्यम्। सर्वज्ञानानां सत्ताविषयत्वेन ब्रह्मज्ञानत्वाद्बाधकज्ञानानां तदन्यत्वासिद्धेः।

ननु ब्रह्मप्रमेत्यत्र ब्रह्मविषयकसप्रकारकयथार्थज्ञानत्वं वा विवक्षितं, निष्प्रकारकज्ञानत्वं वा? नाद्यः। परेण सप्रकारकज्ञानमात्रस्यायर्थार्थत्वस्यांगीकारेण प्रमात्वासिद्धेः। न च प्रत्यक्षादीनां व्यावहारिकप्रमाणत्वेन तज्जन्यज्ञानानामपि व्यावहारिकं प्रमात्वमस्त्येवेति वाच्यम्। तथात्वे शुक्तिः सतीत्यादिज्ञानानामपि ब्रह्मप्रमात्वेन तद्बाध्यशुक्तिरजतादेः पक्षतापत्तावंशतः सिद्धसाधनस्य दुष्परिहरत्वापत्तेः। न द्वितीयः। तत्त्ववादिना निष्प्रकारकज्ञानानंगीकारेण तं प्रत्याश्रयासिद्धेः। नैयायिकैरपि ब्रह्मविषयकनिष्प्रकारकज्ञानानंगीकारेण

तन्मतेऽप्याश्रयासिद्धिरिति चेन्न। ब्रह्मविषयकभ्रमभिन्नज्ञानस्य ब्रह्मप्रमेत्यनेन विवक्षणात्। वेदान्तजन्यचरमान्तःकरणवृत्तेस्तादृशत्वेन दोषाभावात्। तस्माद् ब्रह्मविषयकभ्रमभिन्नज्ञानान्येनाबाध्यत्वे सति असद्विलक्षणत्वे सति ब्रह्मान्यत्वं पक्षतावच्छेदकमित्युक्तं भवति।

शुद्धं ब्रह्म वृत्तिव्याप्यं नेति मतसाधारणपक्षलाभायाह – सप्रकारेण वेति। अस्मिंश्च पक्षे ब्रह्माकारैव वृत्तिः, न तु तद्विषयाऽपीत्युभयमतसाधारण्यमित्याहुः।

यत्तु ब्रह्मण्यारोपितस्य क्षणिकत्वादेरधिष्ठानब्रह्मप्रमामात्रनिवर्त्यत्वेन सिद्धसाधनम्। शुक्तिज्ञानादेरपि ब्रह्मज्ञानत्वात् तद्बाध्यरजतादौ च सिद्धसाधनम्। 'शुद्धं ब्रह्म वृत्तिव्याप्यं ने'ति मते वियदादेरपि ब्रह्मप्रमाबाध्यत्वाभावेन पक्षालाभश्चेत्यनुशयत्रयात् 'सप्रकारेण वे'त्युक्तमिति व्याख्यानम्, तत्र नाद्योऽनुशयः। तथाहि – 'सप्रकारेण अबाध्यत्वे सती'त्युक्तावप्यधिष्ठानीभूतब्रह्मप्रमाबाध्यत्वात् क्षणिकत्वादेः सप्रकारेणाबाध्यत्वेन पूर्वोक्तसिद्धसाधनावकाशस्तदवस्थ एव। नापि द्वितीयः; ब्रह्मप्रमापदेन भ्रमभिन्नज्ञानस्य विवक्षितत्वेन मायिमते सप्रकारज्ञानमात्रस्य भ्रमत्वेन शुक्तिज्ञानस्यापि सप्रकारत्वेन भ्रमत्वाद् भ्रमभिन्नत्वाभावेन सिद्धसाधनानवकाशात्। नापि तृतीयः; यन्मते ब्रह्म वृत्तिव्याप्यम्, तन्मतेनैव विप्रतिपत्तेः प्रणीतत्वात्। अत एवानुमानबाधकथनावसरे मतभेदेन पक्षभेदं वक्ष्यति।

ननु एवमपि विकल्पितप्रथमसत्यन्तविशेषणवैयर्थ्यम्, प्रयोजनाभावादिति चेत्, अत्राहुः – वादिमते शुक्तिरूप्यांशे सिद्धसाधनवारणाय तत्त्ववादिमते च शुक्तिरूप्यस्यासत्त्वेन – 'असद्विलक्षणत्वे सतीत्यनेनैव सिद्धसाधानोद्धारसम्भवे तार्किकमते च तस्य घटादितुल्यत्वेन सिद्धसाधनानवकाशेऽप्युद्देश्यसिद्ध्यर्थं प्रथम सत्यन्तं सप्रयोजनम्। न च उभयमत एकं विशेषणप्रयोजनं नास्तीति वाच्यम्। विशेषणस्य सर्वसिद्धप्रयोजनवत्त्वस्यैव तन्त्रत्वेनोभयमत एकविशेषणप्रयोजनस्यातन्त्रत्वात् इति, तन्न। तत्रैव ह्युद्देश्यसिद्ध्यर्थं विशेषणमुपादीयते यद्विशेषणानुपादानेऽन्यतरमत आश्रयासिद्धिर्वाऽप्रयोजकत्वं वा सिद्धसाधनत्वादिकं वा समापतति। यथा 'जन्यकृतिजन्यभिन्नजन्यानि, समवेतानि, इत्यत्र न्यायमते जन्येतिविशेषणाभाव आश्रयासिद्धिर्भवतीति जन्येति विशेषणोपादानम्, यथा च तन्मत एव 'तद्वति तत्प्रकारकं ज्ञानं प्रमा' इत्यत्र 'तद्वती'ति विशेषणाभावे सिद्धसाधनता भवतीति 'तद्वती'ति विशेषणम्, तद्वत् प्रकृत एतद्विशेषणाभावे आश्रयासिद्ध्यादेरभावात्तदर्थं तद्विशेषणं व्यर्थम्। नच – अत्रापि वादिमतेऽशतः सिद्धसाधनतोद्धारः प्रयोजनमित्युक्तमिति वाच्यम्; सिद्धसाधनतायाः प्रतिवादिनैवोद्भाव्यत्वेन वादिना स्वं प्रति स्वेनैव तदुद्भावनस्य कर्तुमशक्यत्वात्। अन्यथा वादिमते सम्पूर्णसाध्यस्य सिद्धत्वेन तन्मते सम्पूर्णसिद्धसाधनतापत्तेः। किञ्च अयम्, एतत्संयोगी, एतत्त्वादित्यत्रैव बाधितांशमपहाया बाधितांशेऽप्यनुमित्यापत्तौ 'ब्रह्मान्यद्' इति विशेषणवैयर्थ्यं स्यात् इति तत्सार्थक्याय पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यताया अवश्यवक्तव्यत्वेनांशतः सिद्धसाधनत्वस्योद्भावयितुमशक्यत्वात्। न च – तत्त्ववादिना सत्यत्वे साध्यमाने मायिना स्वमतावलम्बनेन शुक्तिरजतादौ बाधः शङ्क्येत तद्वारणार्थं तद्विशेषणस्यावश्यकत्वमिति वाच्यम्; तं प्रत्यसत्त्वसाधनेनापि बाधपरिहारसंभवादिति। यच्च ग्रन्थस्य तत्त्वनिर्णिनीषुकथात्वेन गुरुशिष्यकथारूपे ग्रन्थे यदाऽनिर्वचनीयरजतादौ मिथ्यात्वं निश्चितवन्तं शिष्यं

प्रति गुरुणा 'ब्रह्मप्रमान्येने' त्यादिपक्षविशेषणमदत्त्वा 'सद्विलक्षणं ब्रह्मान्यदि'त्येव पक्षं निर्दिश्य मिथ्यात्वं साध्यते, तदा तदंशे शिष्योद्भावनीयसिद्धसाधनवारकत्वेन तस्यावैयर्थ्योपपत्तेरिति, तदप्यसत्; शिष्यो हि वादिमुखे स्थित्वा वा सिद्धसाधनतामुद्भावयति? उत प्रतिवादिमुखे? नाद्यः; सिद्धसाधनस्य प्रतिवादिनैवोद्भाव्यत्वेन वादिमुखे स्थितेन शिष्येण तदुद्भावनस्य कर्तुमशक्यत्वात्। अन्यथा वादिमुखे स्थित्वा सम्पूर्णसिद्धसाधनस्याप्युद्भावयितुं शक्यत्वेन तदुद्धारायापि प्रयासः क्रियेत। न द्वितीयः; प्रतिवादिमुखे स्थितस्यानिर्वचनीयरजतादौ मिथ्यात्वनिश्चयस्यैवायोगात्। न च प्रमारूपस्य निश्चयस्यायोगेऽपि भ्रमरूपो निश्चयः स्यादिति वाच्यम्; तथा सति भ्रमस्यैव परिहर्तव्यत्वेन विशेषणदानेन भ्रमदृढीकरणस्यात्यन्तायुक्तत्वादिति यत्किञ्चिदेतत्।

अत्र ब्रूमः– 'असद्विलक्षणत्वे सति ब्रह्मान्यदि' त्येव पक्षनिर्देशः। अन्यत्तु प्रतिकूलतर्कनिरासार्थम्। ब्रह्मान्यस्य सर्वस्य मिथ्यात्वे शुक्तिरजतादिवद् घटादिकमपि प्रातिभासिकत्वेन जलाहरणाद्यर्थक्रियाक्षमं न स्यादित्युक्ते, मिथ्यात्वाविशेषेऽपि 'ब्रह्मप्रमान्येन सप्रकारेण वाऽबाध्यत्वाद् घटादिकमर्थक्रियाकारि, शुक्तिरजतादिकं तद्बाध्यत्वान्नार्थक्रियाक्षममिति सर्वमवदातम्।

न च 'असद्विलक्षणत्वे सति ब्रह्मान्यदि' त्येव पक्षनिर्देशेऽबाध्यत्वस्य पक्षनिवेशाभावेनाश्रयासिद्धेरभावात् तन्निवृत्त्यर्थं 'ब्रह्मप्रमान्येने'त्याद्यग्रिमग्रन्थविरोध इति वाच्यम्; यथाश्रुताभिप्रायेण तथोक्तत्वात्। यद्वा आश्रये पक्षे प्रतिकूलतर्कपराहत्या प्राप्तसाध्यस्याभावरूपासिद्धिर्नेति व्याख्यानात् न विरोध इति।

साध्ये तु निषेधप्रतियोगीत्युक्ते घटादौ सिद्धसाधनता स्यात्। सर्वेषामन्योन्याभावरूपनिषेधप्रतियोगित्वात्, तदर्थमुक्तम् –त्रैकालिकेति॥ तथापि घटादीनां तन्त्वादिनिष्ठत्रैकालिकनिषेधप्रतियोगित्वेन पुनः सिद्धसाधनतेत्यतः प्रतिपन्नोपाधाविति। तावत्युक्ते भ्रान्तिप्रतिपन्नाधिकरणनिष्ठत्रैकालिकनिषेधप्रतियोगित्वेन पुनस्सिद्धसाधनतेत्यतः ''सर्वस्मिन्नि''ति प्रतिपन्नोपाधिविशेषणं विवक्षणीयम्। घटादीनां च स्वोपादान रूपाधिकरणनिष्ठत्रैकालिकनिषेधप्रतियोगित्वाभावेन सर्वस्मिन्निषेधप्रतियोगित्वाभावात् न सिद्धसाधनम्।

ननु– अन्यत्रासतः प्रतिपन्नोपाधावपि निषेधप्रतियोगित्वेऽत्यन्तासत्त्वापत्तिरित्यरुचेराह पारमार्थिकत्वा कारेणेति। यद्वा, ननु संयोगादौ साध्यस्य सिद्धत्वात् सिद्धसाधनं तदवस्थमेव। न च – तद्भिन्नस्य पक्षत्वात् नांशतः सिद्धसाधनमिति वाच्यम्। ब्रह्मान्यस्य सर्वस्य मिथ्यात्वविप्रतिपत्तौ एतादृशसाधनस्य प्रकृतानुपयुक्तत्वात्। न च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् उद्देश्यासिद्ध्या नांशतः सिद्धसाधनमिति वाच्यम्। तथापि संयोगादेरिव प्रकृतेऽप्युक्तनिषेधप्रतियोगित्वेऽप्य मिथ्यात्वोपपत्त्याऽर्था न्तरानिस्तारात्। न च यदवच्छेदेन यत् प्रतीतम् तदवच्छेदेन त्रैकालिकेत्यादि विवक्षितमिति वाच्यम्; तथापि समवायसम्बन्धेन प्रतीतस्य संयोगसम्बन्धेन तन्निष्ठत्रैकालिकनिषेधप्रतियोगित्वेनोक्तदोषतादवस्थ्यात्। न च यत्सम्बन्धपुरस्कारेण यत् प्रतीतम्, तत्सम्बन्धपुरस्कारेण तन्निष्ठेत्यादि विवक्षितमिति वाच्यम्; तथापि व्यधिकरणधर्ममवच्छेदकमादाय तन्निष्ठत्रैकालिकनिषेधप्रतियोगित्वसम्भवेनोक्तदोषतादवस्थ्यात्। न च – स्वनिष्ठासाधारणधर्मपुरस्कारेणेति विवक्षितमिति वाच्यम्; एवं हि यत् स्वनिष्ठासाधारणधर्मपुरस्कारेण

यत्सम्बन्धपुरस्कारेण यदवच्छेदेन यत्र सर्वत्र विद्यमानम्, तत्र तेन रूपेण तत्सम्बन्धपुरस्कारेण तन्निष्ठत्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमित्युक्तं भवति। एवमप्यपारमार्थिकत्वाकारेण घटादेरप्युक्त निषेधप्रतियोगित्वाङ्गीकारेण सिद्धसाधनं तदवस्थमेवेत्यरुचेराह – पारमार्थिकत्वाकारेणेति॥ ननु – येन सम्बन्धेन यदवच्छेदेन यत्र यदस्ति, तत्र सर्वत्र तस्य पारमार्थिकत्वाकारेणैव सत्त्वात् तेन रूपेण त्रैकालिकनिषेधप्रतियोगित्वं प्रतिवादिमतेऽप्रसिद्धमिति चेत्, न। येन सम्बन्धेन यत्र यत् प्रतीतम् इत्यर्थस्य विवक्षितत्वात्। तस्य च शुक्तिरूप्यादौ प्रसिद्धत्वात्। न च सर्वत्र यद्येन सम्बन्धेन प्रतीतं तन्निष्ठत्रैकालिकनिषेधप्रतियोगित्वं तेन रूपेणाप्रासिद्धमिति वाच्यम्; एवमपि तत्त्ववादिनं प्रति प्रसिद्ध्यपपत्तेः। तेन शुक्तिरूप्यादेस्तथाभावाङ्गीकारात्।

ननु तत्त्ववादिनं प्रत्यत्यन्ताभावप्रतियोगित्वमात्रं साध्यमस्तु, तेनासत एव तत्प्रतियोगित्वाङ्गीकारेण प्रपञ्चे तदनङ्गीकारात्। नच उद्देश्यसिद्ध्यर्थमेतानि विशेषणानीति वाच्यम्; एतादृशोद्देश्यत्वस्य सर्वत्र वक्तुं शक्यत्वेनातिप्रसङ्गात्, साध्ये उपरञ्जकविशेषणस्यासाम्प्रदायिकत्वाच्चेति चेत्, यथा तार्किकमतेऽत्यन्ताभाव प्रतियोगित्वं सत्त्वेऽप्युपपन्नम् तथा मन्मतेऽपि भविष्यतीत्यर्थान्तरनिरासकत्वेन तत्त्ववादिमते सार्थकत्वात्। यद्वा तार्किकस्यापि प्रतिवादित्वेन तन्मताभिप्रायेणैवैतादृशसाध्यकरणात् न कश्चिद् दोष इति सर्वं समञ्जसम्।

ननु बाध्यत्वरूपमिथ्यात्वमादायैव विप्रतिपत्तिप्रदर्शनमयुक्तम्; अग्रे पञ्चविधमिथ्यात्वस्य निरुच्यमानत्वेन तेन रूपेणापि प्रदर्शनस्य न्यायप्राप्तत्वात्। न च बाध्यत्वरूपमिथ्यात्वमादाय विप्रतिपत्तिप्रदर्शनमग्रे पञ्चधा निरुच्यमानमिथ्यात्वकोटिकविप्रतिपत्तिप्रदर्शनोपलक्षकमिति वाच्यम्; सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यत्व-ज्ञानत्वेन ज्ञाननिवर्त्यत्वादीनां निरुच्यमानानां मिथ्यात्वानामप्रसिद्धत्वेन कोटिप्रसिद्ध्यभावाद् विप्रतिपत्ति प्रदर्शनस्यैवायोगेनोपलक्षणपरत्वासम्भवात्। न च ज्ञानत्वेन ज्ञाननिवर्त्यत्वस्याज्ञाने प्रसिद्धिरस्तीति वाच्यम्; अज्ञानं हि ज्ञानप्रागभावरूपं वा भावरूपं वा? नाद्यः; ज्ञानस्य स्वप्रागभावनिवृत्तिरूपत्वेन निवर्तकत्वासम्भवात्। न द्वितीयः; ज्ञानत्वस्य परोक्षज्ञानेऽपि विद्यमानत्वेना ज्ञाननिवर्तकतावच्छेद कत्वासम्भवात्, परोक्षज्ञानस्य त्वयाऽज्ञाननिवर्तकत्वानङ्गीकारात्। तस्मात्कथम्? इति चेत्, मैवम्; विप्रतिपत्तेरनावश्यकत्वेन मिथ्यात्वनिर्वचनान्तरमादाय विप्रतिपत्तेरप्रदर्शनात्। न चैवम् बाध्यत्वमादायापि विप्रतिपत्तिप्रदर्शनं न कर्तव्यमिति वाच्यम्; शिष्यबुद्धिव्युत्पादनार्थत्वात्। तस्य चैकप्रकारप्रदर्शनेनापि सम्भवात्। बाध्यत्वस्य सम्यक्कोटिप्रसिद्धिसत्त्वात् एतदेवोपादाय विप्रतिपत्तिप्रदर्शनमिति। प्रथमविशेषणफलमाह – अखण्डार्थनिष्ठेति॥ उक्तप्रकारमन्यत्रातिदिशति – एवमिति। ननु मूलकोशे क्वापि विप्रतिपत्त्यप्रदर्शनात् तद्विरोध इत्यत आह – इदमिति॥ तथाच तार्किकस्याप्यत्र प्रतिवादित्वात् तेन च विप्रतित्तेरावश्यकत्वाभ्युपगमात् तद्रीत्यैव विप्रतिपत्तिप्रदर्शनम्, न तु तस्यावश्यकत्वादिति भावः। तार्किकरीत्या चैतद्विप्रतिपत्तिप्रदर्शनात् तेन चान्योन्याभावस्य धर्मिस्वरूपत्वानभ्युपगमाद् ब्रह्मान्यपदेन न तुच्छव्यावृत्तिरिति असद्विलक्षणत्वे सतीत्यावश्यकमेव। रजतस्याप्यत्यन्तासत्त्वानभ्युपगमात् शुक्तिरजतस्याप्यसद्विलक्षणतया तेन तदव्यावृत्तेः 'बाध्यत्वे सती' त्येतदपि सार्थकमेवेत्यप्याहुः। विप्रतिपत्तिवाक्यं हि पक्षपरिग्रहार्थं वा? साध्योपस्थित्यर्थं

वा? पक्षत्वप्रयोजकसंशयार्थं वा? आद्यमनुवदति – तत्पक्ष इति। अस्त्वेवम्, ततः को दोषः इत्यत आह। तस्य चेति। तस्य च सिद्धावित्यन्वयः। केन सिद्धिरित्यतो वादिवाक्येन मध्यस्थकल्पितविषयस्वीकारेण वेत्युक्तम्। वादिवाक्येन वादिप्रतिवादिवाक्येन। तस्य स्वरूपम् – मयेति। अत्र इतिशब्दः आवर्तनीयः। स तु आद्यर्थः। तथाच इत्यादिवादिवाक्येनेत्यर्थः। तथाच संस्कृतरूपेण भाषारूपेण वेति वाक्यविशेषणं युज्यते। एवमेव त्वयेत्यत्रापि योजनीयम्। वाद्यादिवाक्यस्य विप्रतिपत्तिवाक्यापेक्षया विशेषमाह – संस्कृतेत्यादि॥ अत्र लौकिकरीत्यनुसारिणा संस्कृतरूपेण भाषारूपेणेति सुलभत्वशीघ्रोपस्थित्यर्थम्। कुसृष्टिराहित्यार्थमाह – निग्रहानर्हेणेति॥ तदुपपादयति – कथाबाह्येनेति॥ विप्रतिपत्तिवाक्यस्याप्येवंभावो भविष्यतीत्यत आह – उक्तकुसृष्टीति। ननु विप्रतिपत्तिवाक्यस्य प्रतिज्ञारूपत्वाद् विप्रतिपत्तिवाक्यस्यानावश्यकत्वे प्रतिज्ञाया अप्रयोगः प्राप्नोतीत्यत आह – प्रतिज्ञाव्यतिरिक्तस्येति। न द्वितीय इत्याह – न चेति। तृतीयमाशङ्क्य निषेधति – न चेति। सन्दिग्धसाध्यधर्मतयैव पक्षत्वमित्यभिमानवतः शङ्क्येयमिति ध्येयम्। ननु निश्चितेऽप्याहार्यसंशयदर्शनात् तादृशः संशयो भविष्यतीत्यत आह – आहार्येति॥ अनुमित्यनन्तरमप्याहार्यसंशयसम्भवेन पक्षतापत्तावनुमितिः स्यादित्यतिप्रसङ्ग इत्यर्थः। विप्रतिपत्तिवाक्यस्य कोट्युपस्थापकतया संशयप्रयोजकत्वात् कोट्युपस्थितेस्साधारणधर्मादिनाऽपि सम्भवात् न विप्रतिपत्तिवाक्यस्यावश्यकतेत्याह – विप्रतिपत्तीति। संशयस्य पक्षत्वप्रयोजकत्वमभिप्रेत्येदमुक्तम्। वस्तुतस्तदपि नास्तीत्याह – संशयं विनाऽपीति।

अत्र कश्चित् – यद्यप्येवं विप्रतिपत्तिवाक्यजन्यसंशयस्यानुमित्यङ्गत्वं नास्ति; तथापि व्युदसनीयतया विचाराङ्गत्वमस्त्येव। तादृशसंशयं प्रति विप्रतिपत्तेः क्वचित् निश्चयादिप्रतिबन्धादजनकत्वेऽपि स्वरूपयोग्यत्वात्, वाद्यादीनां निश्चयवत्त्वनियमाभावात्। ''निश्चितौ हि वादं कुरुतः'' इत्याभिमानिकनिश्चयाभिप्रायम्। परपक्षमालम्व्याप्यहङ्कारिणो विपरीतनिश्चयवतो जल्पादौ प्रवृत्तिदर्शनात्। तस्मात्समयबन्धादिवत् स्वकर्तव्यनिर्वाहाय मध्यस्थेन विप्रतिपत्तिः प्रदर्शनीयैव – इति, तन्न। विप्रतिपत्तिजन्यसंशयस्य व्युदसनीयतया तज्जनकवाक्यस्य यद्यावश्यकता तदाऽज्ञान-विपर्ययोरपि व्युदसनीयतया तज्जनकवाक्यस्यापि विप्रतिपत्तिवाक्यवद् विचाराङ्गत्वापत्तेः; अन्यथैतस्यापि विचाराङ्गता न स्यात्। यच्चोक्तम् – विप्रतिपत्तेर्व्युदसनीयसंशयं प्रति प्रतिबन्धादिनाऽजनकत्वेऽपि स्वरूपयोग्यत्वादङ्गत्वमिति, तन्न; तादृशसंशयं प्रति साधारणधर्मादीनामपि स्वरूपयोग्यतया तत्प्रतिपादकवाक्यस्यापि विचाराङ्गता स्यात्।

यच्चोक्तं वाद्यादीनां निश्चयवत्त्वनियमो नास्ति; परपक्षपरिग्रहणेनापि विपरीतनिश्चयवतो जल्पादौ प्रवृत्तिदर्शनादिति, तदपि न। अत्र हि संशयविरोधिनिश्चयो विवक्षितः। स त्वन्वयनिश्चयो वा, व्यतिरेकनिश्चयो वा। तत्राभिमानिकप्रवृत्तिस्थले यद्यपि वाद्यादीनामन्वयनिश्चयो नास्ति; तथापि व्यतिरेकनिश्चयोऽस्त्येव। प्रवृत्तिस्त्वसद्दूषणासत्साधनावलम्बनेन कथाप्रवृत्तिवदुपपद्यते। एवं हि ''निश्चितौ हि वादं कुरुतः'' इति यथास्थिताभिप्रायम्। यच्चोक्तं समयबन्धादिवत् स्वकर्तव्यतया विप्रतिपत्तिवचनमावश्यकमिति, तन्न। समयबन्धादेः कथोपयुक्तत्ववदस्य तदुपयोगादर्शनात् स्वकर्तव्यत्वाभावात्। समयबन्धाभावे कथाऽव्यवस्थावत् विप्रतिपत्त्यभावे कथाऽव्यवस्थाभावत् इति। तस्माद् विप्रतिपत्तिर्नावश्यकीति साधूक्तम् – विप्रतिपत्तिप्रदर्शनं तार्किकरीत्यैवेति॥

न्यायामृतप्रकाशः

सत्याशेषविश्वस्य कारणमित्युपक्षिप्तं विश्वस्य सत्यत्वमसहमानो मायावादी प्रत्यवतिष्ठते॥ नन्विति॥ अत्रैवकारार्थश्चिंत्यते॥ विशेषणसंगतोऽयमेवकारः। तस्यचविशेष्यतावच्छेदके एव कारसमभिव्याहृतपदार्थतावच्छेदकव्याप्यत्वार्थकत्वस्य शंखः पांडुर एवेत्यादौ दर्शनेन विश्वत्वे मिथ्यात्वव्याप्यत्वलाभात् सर्वोपि शंखः पांडुर इति लाभवत्सर्वमपि विश्वं मिथ्येति प्राप्या सत्याशेषविश्वस्य कारणमिति यत्सत्याशेषविश्वस्य कारणत्वमुक्तं तदसदिति भावः। यद्वाविश्वमेवमिथ्येति विशेष्यसंगतोऽयमेवकारः। तस्य च विशेष्यतावच्छेदकानवच्छिन्ने विशेषणसंबंधव्युदासार्थत्वस्य पार्थ एव धनुर्धर इत्यादौ दर्शनेनाऽत्रविश्वत्वानाक्रांते ब्रह्मणि तुच्छे च मिथ्यात्वसंबंधव्यवच्छेदस्तदर्थः। तथा च विश्वमेवमिथ्यातत्कारणत्वं दूरोत्सारितमिति भावः। अथवा एवकारः कात्स्न्यर्थे। जगदेव दुःखपंकनिमग्नमितिवत्। तथा च मिथ्याशब्दैव शब्दाभ्यां सत्याशेषेत्युक्तविशेषणद्वयाक्षेपलाभ इत्याशयः। संप्रदायस्तु प्रमाणबाधाद्यशेषप्रतिज्ञादोषोद्धारार्थोऽत्र एवकारः। नचैतदलौकिकं। ''मिथ्यैव भेदो विमतो भेदत्वाच्चंद्रभेदवदि'' त्यनुव्याख्यानव्याख्यावसरे सुधायां साध्यावधारणेनाऽऽभासोद्धारं सूचयतीति टीकाकारैरुक्तत्वादिति ध्येयं।

इममेवैवकारार्थमेतादृशप्रतिज्ञया सिद्धे विश्वमिथ्यात्वे दूषणाभिधातृभिर्भवद्भिरतीव सावधानैर्भवितव्यमित्याशयेन विशदयति। तथाहीति। तथा यत्प्रतिज्ञातं विश्वमिथ्यात्वं तत् हि प्रमाणप्रसिद्धं न तु प्रमाणबाधादिदोषोपेतमित्यर्थः। पूर्वोत्तरपक्षपरिग्रहाभ्यां प्रवर्तनीयस्य विचारस्य संशयजन्यत्वाद्विचारांग संशयापरनाम्नीं विप्रतिपत्तिं दर्शयति॥ तत्रेति॥ प्रवर्तनीयायां मिथ्यात्वसत्यत्वकथायां। विप्रतिपत्तिःसंशयः। ननु कस्येयं विप्रतिपत्तिः। न तावद्वादिनः। तस्य मिथ्यात्वनिश्चयवत्त्वात्। नापि प्रतिवादिनः। तस्य सत्यत्वनिश्चयवत्त्वादिति चेत्सत्यं। न वादिप्रतिवादिनोरियं विप्रतिपत्तिः। किं तु तदुभयव्यतिरिक्तानां सभापत्यादीनामेव तत्वनिर्णयेप्सुसभापत्याद्यर्थिताभ्यामपि वादिप्रतिवादिभ्यां क्रियमाणायाः कथायास्तत्संशय निरासद्वारा तत्वनिर्णय फलकत्वाद्ग्रंथस्यापि वादप्रक्रियया प्रवर्तमानत्वात्। अतः कथातः पूर्वं वादिप्रतिवादिव्यतिरिक्तानां सभापत्यादीनां वादिप्रतिवादिप्रवर्तनीयविचारांगसंशयापरनाम्नी विप्रतिपत्तिरस्तीति व्याख्येयं। यथोक्तं। ''वा समितेःशुभेती'' तिसंप्रदायः। अन्ये तु नेयं विप्रतिपत्तिर्वादिनो नापि प्रतिवादिनः किं नामोभौ प्रति एकैकपक्षपरिग्रहाय विरुद्धार्थप्रतिपादकवाक्यद्वयरूपा विप्रतिपत्तिर्मध्यस्थप्रदर्शिताऽस्तीत्यर्थ इत्याहुः। ननु विप्रतिपत्तिमादौ प्रदर्श्य पश्चात्पूर्वपक्ष उत्थापनीयः। विषयो विशयश्चैव पूर्वपक्षस्तथोत्तर इति वचनात्। अतोऽत्र वैपरीत्यं कस्मादाचरितमिति चेदुच्यते। मिथ्यैवेत्यस्य न पूर्वपक्षप्रदर्शन एवतात्पर्यं किंनाम संशयस्य विरुद्धार्थप्रतिपादक पूर्वोत्तरपक्षप्रतिपादक वाक्यद्वयजन्यत्वे न विप्रतिपत्तिवाक्यद्वयाऽज्ञाने प्रदर्शयितुमशक्यत्वात् सत्याशेषेति सत्यत्वप्रतिपादकं मिथ्यैव विश्वमिति मिथ्यात्वप्रतिपादकं वाक्यं चादौ प्रदर्श्यानंतरं संशयापरनाम्नी- विप्रतिपत्तिःप्रदर्शितेत्यदोष इति।

विश्वं मिथ्येतिसामान्येन प्रतिज्ञातं। तथा च ब्रह्मादेरपि विश्वशब्देन ग्रहणे बाधाद्यापत्तेः धर्मिणं निर्धारयंस्तामेव विप्रतिपत्तिं विवृणोति॥ ब्रह्मप्रमान्येन वेत्यादिना॥ अत्र विद्वत्प्रमोदार्थं पदानां कृत्यं चिंत्यते। तथाहि। ब्रह्मान्यन्मिथ्येत्युक्ते तुच्छे बाधः स्यात्। अतः असद्विलक्षणत्वे सतीत्युक्तं। तावत्युक्ते

शुक्तिरूप्ये सिद्धसाधनता स्यात्। अतोऽबाध्यत्वे सतीत्युक्तं। नन्विदं विशेषणं व्यर्थम्। सिद्धसाधनताया वक्तुमशक्यत्वात्। असद्विलक्षणत्वे सति ब्रह्मान्यन्मिथ्येति वादिना प्रयुक्ते सति प्रतिवादिभिरस्माभिः सिद्धसाधनता वाच्या। नहि सा वक्तुं शक्या। अस्मन्मते शुक्तिरूप्यस्यासत्त्वेन पक्षतावच्छेदकानाक्रांतत्वादिति चेन्न। परार्थानुमाने वक्तुमशक्यत्वेपि यदा तवैवस्वार्थानुमितिः तदा त्वन्मते तस्यासद्विलक्षणत्वेन सिद्धसाधनताप्राप्त्या अबाध्यत्वविशेषणसार्थक्यात्। न च विशेषणप्रयोजनस्योभयवादिसिद्धत्वाभाव इति वाच्यं। विशेषणस्य सार्थक्ये प्रयोजनवत्त्वमेव तंत्रं न तूभयवादिसिद्धप्रयोजनवत्त्वं। गौरवात्। न चैतददृष्टचरमिति वाच्यं। निरीश्वरवादिनं मीमांसकं प्रतीश्वरसाधनाय तार्किकेण प्रयुज्यते ''जन्यकृत्यजन्यानि जन्यानि सकर्तृकाणी'' त्यादि। तत्र जन्यानि सकर्तृकाणीत्युक्ते घटादीनां कुलालादिकर्तृकतायाः सिद्धत्वेन सिद्धसाधनता स्यात्। अतः कृत्यजन्यानीत्युक्तं। तर्हि तार्किकमते सर्वस्यापीश्वरकृतिजन्यत्वेनाऽऽश्रयासिद्धौ प्राप्तायां जन्यत्वं कृतिविशेषणमुपात्तं। नहीदं संभवति। आद्यजन्यपदस्य तार्किकरीत्या कृत्यसद्भावेपि मीमांसकरीत्या तदभावात् तस्य निरीश्वरवादित्वेनाश्रयासिद्धेस्तेनोद्भावयितुम् अशक्यतयोभयसिद्धप्रयोजनाभावेन तद्वैयर्थ्यशंकायां विशेषणस्य सार्थक्ये प्रयोजनवत्त्वमेव तंत्रं न तु तस्योभयसिद्धत्वमपीति यथा तार्किकैः समाधीयते तथेहापीति।

अत्रेदं चिंत्यं। यदुक्तं स्वार्थानुमितिदशायां सिद्धसाधनतावारणाय विशेषणं सार्थकमिति तदयुक्तं। पक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धेरुद्देश्यत्वपक्षे सिद्धसाधनताऽभावः पृथिवी इतरभिन्नेत्यत्र दृष्टः यथाहि घटत्वावच्छेदेनेतरभेदसिद्धावपि पृथिवीत्वरूपपक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धेरभावेन सिद्धसाधनताया अभावात्। एवमिहापि शुक्तिरूप्यत्वावच्छेदेन मिथ्यात्वरूपसाध्यसिद्धावपि असद्विलक्षणत्वे सति ब्रह्मान्यत्वावच्छेदेन सर्वत्रवियदादौ मिथ्यात्वरूपसाध्यसिद्धयभावेन सिद्धसाधनताया अभावादबाध्यत्वविशेषणं व्यर्थमिति। केचित्तुपक्षतावच्छेदकावच्छिन्ने यत्र कुत्रचित्साध्यसिद्धेरुद्देश्यत्वपक्षे अंशे सिद्धसाधनतायाः संभवाद्विशेषणं सार्थकमित्याहुः। अत्र पृथिवी इतरभिन्नेत्यस्यापि दुष्टत्वापत्तेस्तदयुक्तं। अपरे तु असद्विलक्षणत्वे सति ब्रह्मान्यत्सत्यमिति प्रतिवादिना साधनीयं। तत्र मायिना शुक्तिरूप्ये बाध उद्भाव्येत तदर्थमबाध्यत्वे सतीत्युक्तमित्याहुः। ननु नात्रबाधः संभवति। तथाहि। यद्धर्मावच्छेदेन यस्मिन्धर्मिणि साध्यं साध्यते तद्धर्मावच्छेदेन तत्र तदभावज्ञानं बाधः। यथाऽग्नित्वावच्छेदेनाग्नावनुष्णत्वं साध्यते तद्धर्मावच्छेदेनैवाग्नावुष्णत्वज्ञानं चेद्बाधः। न तु अग्नित्वावच्छेदेनानुष्णत्वे साध्ये द्रव्यत्वावच्छेदेन यत्र कुत्र चिदुष्णत्वज्ञानं बाधः। समानप्रकारकविरहज्ञानस्यैव बाधत्वात्। एवं च पक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धेरुद्देशत्वेनाऽसद्विलक्षणत्वे सति ब्रह्मान्यत्वावच्छेदेन सर्वत्र प्रपंचे सत्यत्वस्यास्माभिः साध्यमानत्वाच्छुक्तिरूप्यत्वावच्छेदेन सत्यत्वाभावस्य सिद्धत्वमादाय बाधोत्तयोग इति चेन्न। त्वदुक्तं हि संपूर्णबाधलक्षणं। यदा हि पक्षतावच्छेदकावच्छिन्ने यत्र कुत्र चित्साध्यसिद्धेरुद्देश्यत्वं तदा पक्षतावच्छेदकावच्छिन्ने यत्र कुत्रचित्साध्याभावस्य सिद्धौ अंशे बाधः। तथाचासद्विलक्षणत्वे सति ब्रह्मान्यत्वावच्छेदेन यत्र कुत्रचित्सत्यत्वसिद्धेरुद्देश्यत्वं यदा तदाऽसद्विलक्षणत्वे सति ब्रह्मान्यत्वावच्छिन्ने यत्र कुत्र चिच्छुक्तिरूप्ये सत्यत्वाभावसिद्धयां बाधो मायिनोद्भाव्येतापि। तदर्थमबाध्यत्वविशेषणमिति न कोपि अंशेदोषः। अथाऽबाध्यत्वे सतीत्याद्युक्तौ मायिमते आश्रयासिद्धिः। तन्मते विश्वस्य बाध्यत्वेन पक्षालाभात्। अतो ब्रह्मप्रमान्येनेत्युक्तं। तथा च तन्मते जगतो ब्रह्मप्रमाबाध्यत्वेपि तदन्येनाबाध्यत्वसत्त्वान्नाश्रयासिद्धिरिति भावः। नन्वत्र नञ्द्वयं कस्मादुपात्तं ब्रह्मप्रमाबाध्यत्वे सतीत्येव

कस्मान्नोक्तमिति चेदुच्यते। तथात्वे तत्ववादिमते आश्रयासिद्धिः। तन्मते जगतः सत्यत्वेन ब्रह्मप्रमाबाध्यत्वाभावात्। अतो नञ्द्वयगर्भता। तथा चास्मन्मते सर्वथाऽबाध्यत्वेन विशेषणपर्यवसानं। तन्मते तु ब्रह्मज्ञानबाध्यत्वेनेति न कोपि दोष इति द्रष्टव्यं। नन्वत्रप्रमापदं किमर्थं ब्रह्मज्ञानान्यज्ञानाबाध्यत्वे सतीत्येव कस्मान्नोक्तमिति चेदुच्यते। ब्रह्मज्ञानान्यज्ञानाबाध्यत्वे सतीत्युक्तौ सर्वप्रत्ययवेद्येचेत्यादि वचनान्नेदं रूप्यमिति बाधकज्ञानस्यापि शुक्त्यवच्छिन्नचैतन्यविषयकत्वेन ब्रह्मज्ञानत्वात्तद्बाध्ये अत एव ब्रह्मज्ञानान्यज्ञानाबाध्ये शुक्तिरूप्ये मिथ्यात्वसिद्ध्या सिद्धसाधनता स्यात्तदर्थं प्रमापदं। वेदांतजन्यनिष्प्रकारकब्रह्मज्ञानस्यैव वस्तु गत्या प्रमात्वेन नेदं रूप्यमितिज्ञानस्य वस्तुगत्यातन्मतेऽप्रमात्वात्। ब्रह्मप्रमान्येनाबाध्यत्वस्य शुक्तिरूप्येऽभावेन धर्मिकोटावप्रवेशान्नसिद्धसाधनतेति ध्येयं। अत्र यद्यपि प्रमात्वं नाम न तद्वतितत्प्रकारकत्वं विवक्षितं। निर्विकल्पकाऽव्याप्तेः। ब्रह्मप्रमाया निष्प्रकारकत्वेन ब्रह्मत्ववति ब्रह्मत्वप्रकारकत्वाभावात्। तथापि विशेष्यावृत्त्यप्रकारकत्वं विवक्षितं सविकल्पकप्रमायां विशेष्यवृत्तिप्रकारकत्वमादाय निर्विकल्पकायां तु सर्वथा निष्प्रकारकत्वेन लक्षणपर्यवसानं। प्रकृते च वेदांतजन्यप्रमायाः निर्विकल्पकरूपतया सर्वथा निष्प्रकारकत्वेन ब्रह्मावृत्त्यप्रकारकत्वात् उक्तं प्रमालक्षणमस्तीति न कोपि दोष इति ध्येयं।

अथ ब्रह्मप्रमान्येनाबाध्यत्वे सतीत्याद्युक्तौ ब्रह्मण्यारोपितक्षणिकत्वे ब्रह्म स्थायीति प्रमाबाध्ये ब्रह्मप्रमान्येनेत्यादि विशेषणजातस्य सत्त्वेन धर्मित्वप्राप्तौ तत्र मिथ्यात्वसाधने सिद्धसाधनता स्यादित्यस्वरसादाह॥ सप्रकारेणवेति॥ तथाच न ब्रह्मण्यारोपितक्षणिकत्वस्य विप्रतिपत्तिधर्मिता। तस्य स्थायि ब्रह्मेति सप्रकारकप्रमाबाध्यत्वेन सप्रकारकेणाबाध्यत्वाभावादित्याहुः। तच्चिंत्यं। नेदमस्वरसोद्भावनं युक्तं। तथाहि। अत्र ब्रह्मप्रमाशब्देन निष्प्रकारकप्रमाया एव विवक्षितत्वेन ब्रह्म स्थायीति प्रमाया ब्रह्मप्रमात्वाभावेन ब्रह्मण्यारोपितक्षणिकत्वमादाय सिद्धसाधनताया वक्तुमशक्यत्वात्। किं च ब्रह्मप्रमेत्यत्र प्रमाशब्देनातत्वावेद कप्रमाविवक्षितोत तत्वावेदकप्रमा। नाद्यः। शुक्तिरूप्यस्यापि नेदं रजतमित्यतत्वावेदकप्रमाबाध्यत्वेना तत्वावेदकब्रह्मप्रमान्येनाबाध्यत्वादेः सत्त्वेन तस्य मिथ्यात्वसाधने पुनः सिद्धसाधनताया दुर्वारत्वापातात्। न द्वितीयः। तथात्वे ब्रह्मण्यारोपितक्षणिकत्वमादाय सिद्धसाधनताया वक्तुमशक्यत्वात्। ब्रह्म स्थायीति प्रमायाः तत्वावेदकत्वाभावेन ब्रह्मण्यारोपित क्षणिकत्वे तत्वावेदकप्रमान्येनाबाध्यत्वस्याभावेन तदादाय सिद्धसाधनताया अयोगेन सप्रकारकेण वेत्यस्यवैयर्थ्यापत्तेरिति। संप्रदायस्तु। ब्रह्मप्रमेत्यस्य हिब्रह्म विषयिणी प्रमेत्यर्थः। ब्रह्मवेदांतजन्यवृत्ति विषयंनेति मते ब्रह्मप्रमाया एवाभावेन तद्घटितविप्रतिपत्त्ययोग इत्यस्वरसादाह सप्रकार केण वेति यद्वक्ष्यति विश्वमिथ्यात्वस्याऽनुमान बाधकथनावसरे ''ब्रह्मवृत्तिव्याप्यमपि नेतिमतेन तु द्वितीयतृतीये'' इति। ननु च ब्रह्मान्यदित्यस्य यदि ब्रह्मप्रतियोगि कान्योन्याभाववत्त्वमर्थस्तर्ह्यसतोनिस्स्वरूपत्वेन ब्रह्मप्रतियोगिकान्योन्याभावस्य धर्मिस्वरूपभूतस्यासत्यसंभवेन तदाऽऽदाय बाधाऽप्रसक्तेरसद्विलक्षणत्वे सतीतिविशेषणवैयर्थ्यात्। यदि चान्योन्याभावस्य प्रतियोगितावच्छेदकात्यंता भावव्याप्यतया ब्रह्मत्वात्यंता भाववत्त्वमर्थस्तर्हि निर्धर्मके ब्रह्मण्यपि तस्य सत्त्वेन तत्र मिथ्यात्व साधने बाधापत्तेः। न च ब्रह्मणो निर्धर्मकत्वेन ब्रह्मत्वात्यंताभावाधिकरणत्वमपि नास्तीति वाच्यं। अभावरूपा धर्मा नाद्वैतं निघ्नंतीति मंडनमिश्रोक्तेरिति चेदुच्यते। द्वितीयपक्षांगीकारे दोषाभावात्। नचोक्तरीत्या बाध इति वाच्यं। मायिकब्रह्मत्वसद्भावेन तदत्यंताभावाधिकरणत्वाभावेन तस्य पक्षबहिर्भूतत्वेन तत्र बाधाप्रसक्तेः। अथवाऽऽद्य

एव पक्षोऽभिप्रेतः। नचोक्तदोषः। तस्याऽस्मन्मते धर्मिस्वरूपत्वेपि परमते तदभावेन तद्रीत्या बाधवारणाय विशेषणसार्थक्यादित्याहुः। वस्तुतस्तु ब्रह्मान्यत्वं नाम ब्रह्मविलक्षणत्वं वैलक्षण्यं च तद्विरुद्धधर्मयोगित्वं तच्चास्त्यसति निषेधबुद्धिविषयत्वादिरूपब्रह्मविरुद्ध धर्मसद्भावात्। अतस्तदादाय बाधपरिहारायासद्विलक्षणत्वे सतीत्युक्तमित्यवगंतव्यं। अथवा ब्रह्मान्यदित्यस्य ब्रह्म अन्यद यस्माद् इत्यर्थकरणेनाऽसतोपि प्राप्त्या। तत्र बाधपरिहारायासद्विलक्षणत्वे सतीति विशेषणस्य सार्थक्यात्। प्रतियोगित्वादिधर्माणां रूपादिवद्धर्मि सत्तासापेक्षत्वाभावादित्यालोचनीयं।

प्रतिपन्नोपाधाविति॥ यस्य यद् अधिष्ठानत्वेन प्रतिपन्नं तत्रेत्यर्थः। तुच्छेऽतिव्याप्तिवारणायेदं विशेषणं। तत्र प्रतिपन्नोपाधेरेवाभावादिति भावः। नन्वत्रनिषेधशब्दो यदि प्रागभावध्वंसान्योन्याभावपरस्तर्हि तत्प्रतियोगित्वस्य घटादिप्रपंचे सत्त्वेन सिद्धसाधनताप्रसंगः। प्रागभावविवक्षायामविद्यादावनादौ बाधापत्तिश्च। अतोत्यंताभावपर एव वाच्यः। तथाच त्रैकालिकपदं व्यर्थमिति चेत्। अत्रकेचित्। त्रैकालिकनिषेध शब्देनाखंडवृत्त्यात्यंताभाव एव विवक्षित इत्यदोष इत्याहुः। गुरुचरणास्तु। निषेधशब्दः संसर्गाभावपरः। तथाच त्रैकालिकसंसर्गाभावोत्यंताभाव एवेति न कोपि क्षुद्रोपद्रव इति निरूपयंति। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वे साध्येऽत्यंतासत्त्वप्राप्तिः। नचेष्टापत्तिः। असद्विलक्षणस्वरूपांगीकारात्तथाच बाध इत्यस्वरसादाह॥ पारमार्थिकत्वेति। असद्विलक्षणं व्यावहारिकं स्वरूपमनुपमृद्य पारमार्थिकत्वाकारेण नास्तीतिसाध्यत इति न दोष इति भावः। ब्रह्मप्रमान्येन वा सप्रकारेणवेत्यनयोर्विशेषणयोः कृत्यं दर्शयति॥ अखंडार्थेति॥ ब्रह्मप्रमाबाध्यमपीत्युक्त्या ब्रह्मप्रमान्येनाबाध्यत्वमुपपादितं। निष्प्रकारकब्रह्मप्रमेत्युक्त्या स प्रकारेणाबाध्यत्वमुपपादितं। वेदांतजन्यप्रमाया निष्प्रकारकत्वोपपादनायाखंडार्थनिष्ठेत्युक्तं। निर्विशेषार्थनिष्ठेत्यर्थः॥ विप्रतिपत्तिरूह्येति॥ अत्र विप्रतिपत्तिर्नाम संशयजनिका विरुद्धार्थप्रतिपादक वाक्य द्वयरूपैवविवक्षिता द्रष्टव्या।

ननु मूलकोशे आचार्यैः टीकाकारैर्वा कुत्रापि विप्रतिपत्तेरप्रदर्शितत्वात्तत्प्रदर्शने भवतामकौशलं स्यादिति चेत्। सत्यं। न प्रदर्शनीयैव विप्रतिपत्तिः। तर्हि भवद्भिः कस्मात्सा प्रदर्शितेति चेत्तत्राह। इदंचेति॥ वस्तुत इति॥ अत्यावश्यकतयेत्यर्थः। अंगीकृत्येदमुक्तं। वस्तुतस्तु तार्किकमतेपि न विप्रतिपत्तिप्रदर्शनस्यावश्यकता। कुत इति चेन्निष्प्रयोजनत्वादिति गूढाभि संधिराह॥ तत्पक्षेपीति॥ ननु तर्हि कथं निष्प्रयोजनत्वं। पक्षपरिग्रहस्यैव फलत्वादिति शंकायां तस्यान्यथासिद्धत्वेन विप्रतिपत्तिवाक्य सापेक्षत्वाभावादित्याशयमुद्घाटयति। तस्येत्यादिना। तस्य पक्षपरिग्रहस्य सिद्धावित्यन्वयः। लौकिकरीत्यनुसारिणा भाषारूपेण वादिवाक्येन मया प्रपंचमिथ्यात्वं साध्यत इति संस्कृतरूपेण वादिवाक्येनेत्यन्वयो द्रष्टव्यः। ननु यदि कर्णाटकमहाराष्ट्रद्राविडादिभाषारूपेण वादिवाक्येन पक्षपरिग्रहरूपफलसिद्धिः तदाऽपशब्दादिना निग्रहापत्तिः। तथा यदि मयाप्रपंचमिथ्यात्वं साध्यत इति संस्कृतरूपेण वादिवाक्येन तत्सिद्धिस्तर्हि प्रपंच शब्देन ब्रह्मशुक्तिरजत योरपि प्राप्त्या बाधसिद्धसाधनते स्यातामित्याशंकापरिहारायोक्तं॥ निग्रहानर्हेणेति॥ तत्कुत इत्यत उक्तं। कथाबाह्येनेति। समयबंधादितः पूर्वतनेत्यर्थः। कथायामेव निग्रह इति भावः। उक्तकुसृष्टिः ब्रह्मप्रमान्येनेत्यादि विशेषणं प्रक्षिप्य तत्प्रयोजनान्वेषणरूपा। ननु तार्किकमते

पक्षपरिग्रहरूपफलस्यान्यथासिद्धचा तदर्थं विप्रत्तिपत्तिवाक्यस्य वैयर्थ्येपि प्रयोजनांतरार्थं तत्सार्थकमिति चेत्तत्रविकल्पयामः। तत्प्रयोजनं साध्योपस्थितिर्वा पक्षत्वप्रयोजकसंशयोवा। तत्राद्यमाशंक्य निराकरोति। न च साध्येति। तत् विप्रतिपत्तिवाक्यं। हेत्वभिधानप्रयोजकाकांक्षाजनकत्वेन साध्योपस्थितेरावश्यकत्वादितिभावः। द्वितीयमाशंक्य निराचष्टे॥ न च पक्षत्वेति। पक्षतायाः संदेहघटितत्वादिति भावः। यथाहुः पदार्थविदः। ''संदिग्धसाध्यधर्मा धर्मीपक्ष'' इति। पक्षत्वप्रयोजकसंशयोपि नवाद्यादीनामित्याह॥ वादीति॥ तथाच निश्चायकप्रमाणरूप विशेषदर्शनसद्भावेन विशेषादर्शनाख्यहेत्वभावान्न विप्रतिपत्तिवाक्यस्य वाद्यादिसंशयाधायकत्वमिति भावः। ननु विशेषदर्शनसद्भावेन वाद्यादीनां स्वारसिकसंशयासंभवेप्याहार्य संशयाधायकत्वेन विप्रतिपत्तिवाक्यस्य पक्षत्वप्रयोजकत्वं संभवति। तस्य विशेषदर्शनाप्रतिबद्धत्वादित्यत आहः। आहार्येति॥ अतिप्रसंगेनेति॥ अनुमित्युत्तरकाले सिद्धिस्थले सिषाधयिषाविरहदशायामप्याहार्यसंशयसंभवेन पक्षत्वापत्त्यानुमित्यापत्तिरित्यतिप्रसंगेनेत्यर्थः। वैयात्यादिष्टापत्तौ चोदितायामाह॥ विप्रतिपत्तीति॥ आहार्यसंशयस्येत्येतदनुवर्तते। ननु वाद्यादीनां निश्चयवत्त्वेन विप्रतिपत्तिवाक्यस्य वाद्यादिषु स्वारसिकसंशयाधायकत्वं नास्तीत्युक्तमयुक्तं। तथात्वे कथायां वादिना प्रतिवादिनं प्रति प्रतिवादिना वादिनं प्रत्यनुमाने प्रयुक्ते अनुमितिरेव न स्यात्। संदेहघटितपक्षताया अनुमितिजनिकाया अभावादित्यत आह॥ संशयमिति॥ सिषाधयिषाविरहेति॥ ननु सर्वत्रानुमानरूपसाधकप्रमाणस्यैव सत्त्वेन तदभावादसंभव इति चेदुच्यते। साधकमानपदस्यानुमानातिरिक्तसाधकमान परत्वात्। तथाच सिषाधयिषाविरहसहकृतानुमानाति रिक्तसाधकमानरूपविशिष्टस्याभावः सर्वत्रानुगतः। तथाहि। सिद्धिस्थलेनुमानातिरिक्तप्रत्यक्षरूपसाधक मानरूपविशेष्यस्य सत्त्वेपि विशेषणाभावेन विशिष्टस्याऽभावोस्ति। महानसे वह्निमनुमिनुयामिति सिषाधयिषाह्यनुमानं तत्र प्रवर्तते। धूमानुमानस्थले विशेषणमस्ति। सिद्धिस्थल एवहि सिषाधयिषा न सर्वत्र। इच्छाया ज्ञानसाध्यत्वमेव न त्वनुमित्यादिरूपज्ञानस्येच्छासाध्यत्वं। सत्यां सामग्र्यामिच्छाभावेन ज्ञानानुदयाभावात्। अन्यथाऽनिच्छतोपि दुर्गंधज्ञानं न स्यात्। तस्मात्तत्रविशेषणसद्भावेपि विशेष्याभावा द्विशिष्टाभावः। एवमेव घनगर्जितस्थलेपि द्रष्टव्यं। यथोक्तमनुमानप्रकाशे रुचिदत्तोपाध्यायेन। ''साधकमानपदमनुमानातिरिक्तसाधकमानपरंवेति''।

३. मिथ्यात्वे परोक्तानुमानानि

प्रमाणं चात्रानुमानम्– 'विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात्, शुक्तिरूप्यवद्' – इत्यानन्दबोधोक्तेः। 'अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, पटत्वादंशित्वात् पटान्तरवद्' – इति तत्त्वप्रदीपोक्तेः। यद्यपि विमतिरपि नियतविषयत्वायावच्छेदकान्तरसापेक्षा, तथापि सावयवत्वसाधितेन कार्यत्वेन पृथिव्याः सकर्तृकत्वसाधनमिव स्वनियामकनियतया लक्ष्या विप्रतिपत्त्या पक्षतावच्छेदो न विरुद्धः।

यद्वा, पृथिवी सत्या मिथ्या वा, जलं सत्यं मिथ्या वेत्यननुगतधर्म्याश्रया अनुगता विप्रतिपत्तिः पक्षतावच्छेदिका। यद्यपि विमतिस्समयबन्धादिना व्यवहितत्वान्नानुमानकालेऽस्ति, तथापि सैवोपलक्षणतया तज्ज्ञानं वा विशेषणतया पक्षताऽवच्छेदकमस्तु। अत एव विमतमित्येव प्राचां प्रयोगः। न तु वियदादीत्येव पक्षनिर्देशः। अवच्छेदकाभावेऽसंकुचितेनादिशब्देन आत्मादेरपि ग्रहणप्रसंगात्। नापि प्रपंच इत्येव पक्षनिर्देशः। प्रपञ्चशब्देन वियदाद्यन्यतमतत्समुदायोक्तौ-वियदादिमिथ्यात्वासिद्धेः वियदादीनामेवोक्तावव्वच्छेदकाभावेनोक्तदोषात्। नापि वियदित्येव पक्षनिर्देशः, घटादिस्तु पक्षतुल्य इति वाच्यम्। पक्षादन्यत्र निश्चितसाध्याभाववति हेतुसंदेह इव निश्चितहेतुमति साध्यसंदेहेऽपि संदिग्धानैकान्त्यात्। प्रतिज्ञां प्रत्यविषये घटे स्वार्थानुमानानुगतस्य साधकबाधकप्रमाण विरहरूपपक्षत्वस्य सत्त्वेऽपि एवंविध पक्षनिर्देशस्य घटादिसाधारणविप्रतिपत्त्य नानुगुण्याच्च। विप्रतिपत्तौ तु न विमतिर्धर्मितावच्छेदिका, आत्माश्रयात् ।

नवीनास्तु – एतत्पटात्यन्ताभावः एतत्तन्तुनिष्ठः, एतत्पटानाद्यभावत्वाद्, एतत्पटान्योन्याभाववत्। एतत्तन्तुनाशजन्यस्य एतत्पटनाशस्य एतत्तन्त्ववृत्तित्वादना दीति विशेषणम्। विमतं वा ब्रह्मप्रमान्येनेत्यादि विप्रतिपत्तिवाक्योक्तविशेषणत्रयवत्त्वे सति अव्याप्यवृत्तित्वानधिकरणं वा स्वस॰ानाधिकरणात्यन्ताभावप्रतियोगि, अनात्मत्वात् संयोगवदिति। अत्र च पक्षधर्मतावलान्मिथ्यात्वसिद्धिः। विमतं नित्यद्रव्यान्यत्, केवलान्वय्यत्यन्ता- भावप्रतियोगि, पदार्थत्वात्, नित्यद्रव्यवत्। तार्किकमते नित्यद्रव्याणामवृत्तित्वेन तदत्यन्ताभावः केवलान्वयीति न दृष्टान्तः साध्यविकलः। अत एव नात्मनि व्यभिचारः। मिथ्यात्वसिद्धिस्तु पक्षधर्मताबलात्। आत्मत्वावच्छिन्नधर्मिताको भेदो न परमार्थसत्प्रतियोगिकः, अनात्ममात्रप्रति योगिकत्वात्, शुक्तिरूप्यप्रतियोगिक- भेदवदित्याहुः।

अद्वैतसिद्धिः

एवं विप्रतिपत्तौ प्राचां प्रयोगाः– विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात्, शुक्तिरूप्यवदिति। नावयवेष्वाग्रहः। अत्र स्वनियामकनियतया विप्रतिपत्त्या लघुभूतया

पक्षतावच्छेदो न विरुद्धः। समयबन्धादिना व्यवधानात्। तस्य अनुमानकालासत्त्वेऽपि उपलक्षणतया पक्षतावच्छेदकत्वम्।

यद्वा विप्रतिपत्तिविषयतावच्छेदकमेव पक्षतावच्छेदकम्। प्राचां प्रयोगेष्वपि विमतमिति पदं विप्रतिपत्तिविषयतावच्छेदकावच्छिन्नाभिप्रायेणेत्यदोषः।

न्यायामृततरङ्गिणी

एवं विप्रतिपत्तिवाक्यस्य प्रयोजनाभावेनानावश्यकत्वमभिधाय परपक्षमुत्थापयति – प्रमाणं चेति। ननु मिथ्यात्वेऽनुमानं प्रमाणमिति भवता कथमवगतमिति? अत आह – विमतमित्यादि। इत्यानन्दबोधोक्तेर्हेतोरवगतमित्यर्थः। एवमग्रेऽपि। ननु विप्रतिपत्तौ धर्मितेवानुमितौ पक्षताऽपि 'ब्रह्मप्रमान्येने'त्यादिनैवावच्छिद्यताम्, अत एवाग्रे प्रपञ्चसत्यत्वानुमानेषु तस्यैव पक्षतावच्छेदकत्वम् अभिहितम्। न च 'ब्रह्मप्रमान्येने' त्यस्य नानापदार्थघटितत्वेन गुरुत्वात् लघ्वी विमतिरेव पक्षतावच्छेदिकेति वाच्यम्। तस्या लघुत्वेऽपि तुच्छब्रह्मव्यावृत्ति वियदाद्यनुगतिरूपनियत विषयत्वायोक्तावच्छेदकसापेक्षत्वेनोक्तस्यैव पक्षतावच्छेदकत्वमुचितम्, न तु विमतेस्तद्ग्रहाधीनग्रहाया इत्याशङ्क्य निराकरोति – यद्यपीति। सत्यं विमतिरनुगतावच्छेदकसापेक्षेति। तथाप्यनुमाने लघ्व्या विमत्यैव पक्षतावच्छेद उचितः। प्रमाणोपन्यासेन लघुभूतस्यैवादरणीयत्वात्। सावयवत्वेन गुरुणा गृहीतस्य लघुनः कार्यत्वस्य हेतुत्ववदित्यर्थः। सत्यत्वानुमानेषु तस्य तत्त्वेनोपादानं तु शिष्यान् प्रति प्रयोगवैचित्र्योपपादनायेत्यदोषः। स्वनियामकेति। विप्रतिपत्त्यन्तर्गतेन 'ब्रह्मप्रमे' त्यादिना नियामकेनेत्यर्थः। विप्रतिपत्त्येति। विमत्येत्यर्थः।

यद्वेति। आत्मत्वेतरपृथिवीत्वाद्यभावत्वान्तचतुर्दशधर्मावच्छिन्नविशेष्यता कचतुर्दश-विप्रतिपत्तिप्रयुक्ता विमतिः पक्षतावच्छेदिकेत्यन्वयः। ननु अननुगतविप्रतिपत्तिप्रयुक्ताया विमतेरननुगतत्वात् कथं पक्षतावच्छेदकत्वम्? अत आह – अनुगतेति। अनेकविशेष्यतावच्छेदकावच्छिन्नापि तावत्स्वेका समूहालम्बनरूपा विमतिरनुगता वा तद्विषयत्वं वाऽनुगतं सम्भवति इति सैव पक्षतावच्छेदिकेत्यर्थः। अस्मिन् पक्षे विप्रतिपत्तौ धर्मितावच्छेदकमेवानुमानेऽपि पक्षतावच्छेदकमस्त्विति शङ्कैव नोदेति, विप्रतिपत्त्यवच्छेदका नामननुगतत्वात् इत्यभिप्रेत्योक्तम् – अननुगतधर्माश्रयेति। विप्रतिपत्तिरिति। विमतिरित्यर्थः। पृथिव्यादौ पृथिवीत्वादिप्रत्येकधर्मावच्छेदेन जातायामपि विप्रतिपत्तौ विमतत्वं तावत्स्वनुगतमस्ति इति लघुभूतं तदेव पक्षतावच्छेदकमिति भावः। यद्यपि विमतिरिति। पक्षतावच्छेदक

धर्मसामानाधिकरण्येन साध्यसिद्धिरूपानुमित्यनुरोधेनानुमितिकाले सत एव धर्मस्य पक्षतावच्छेदक त्वमुचितम्। विमतेः समयबन्ध-सभ्यानुविधेयसंवरणादिना व्यवहितत्वात् तद्घटितं विमतिविषयत्वमपि नानुमानकालेऽस्तीत्यर्थः।

सैवेति। विमतिविषयतेत्यर्थः। विमतेरनुमानकालेऽसत्त्वेऽपि 'पाकरक्तः श्यामः' इतिवद् विमतं मिथ्येत्यनुमितिरप्रत्यूहैव। ननु पक्षतावच्छेदकाभावे पक्षतावच्छेदकविशिष्टे हेतुज्ञानरूपपक्ष धर्मताज्ञानं न स्यादिति चेत् न। स्वरूपसत्पक्षतावद्धर्मताज्ञानस्यैव पक्षधर्मताज्ञानत्वात्। न च पक्षतावच्छेदकासत्त्वे पक्षतापि कथं वर्ततामिति वाच्यम्; "विषयजन्यं ज्ञानं प्रत्यक्षमि"ति लक्षणे विषयत्वेनाभिमते घटादौ स्वज्ञानात् पूर्वं ज्ञानविषयत्वाभावेऽपि विषयत्वेनावच्छेद्यायाः स्वज्ञानं प्रति जनकतायाः सत्त्वमिवोपपत्तेरिति भावः। ननु उत्सर्गतो विशेषणत्वावगाहित्वरूपप्रमाणस्वभावबाध एवात्र दोषः प्राप्नोति, अत एव 'रूपप्रागभावावच्छिन्नो घटो रूपवानि'त्यत्र बाध उक्तः, उपलक्षणत्वे तदसम्भवादित्यरुच्या पक्षतावच्छेदकस्य विशेषणत्वमेवाह – तज्ज्ञानं वेति। विमतिविषयत्वज्ञानं वेत्यर्थः। न्यायवाक्यप्रयोज्यपरामर्शपूर्वक्षणे विमतिज्ञानम्, तदुत्तरक्षणे च परामर्शः, तदुत्तरक्षणे त्वनुमितिरिति भावः। विमतेः पक्षतावच्छेदकत्वे उपष्टम्भकमाह – अत एवेति। "प्राचामि" त्यत्र पूज्यत्वं न विवक्षितम्; अतो "नाञ्चेः पूजायामि"ति नलोपनिषेधाभावः। विमतेः पक्षतावच्छेदकत्वसिद्ध्यर्थ मवच्छेदकान्तराणि परिसंचष्टे – न तु वियदादीत्येवेत्यादिना।

॥ पक्षादन्यत्रेति॥ एतच्च दार्ष्टान्तिके विशेषणम्, न तु दृष्टान्तेऽपि। निश्चितसाध्याभाववति हेतुसन्देहस्य सर्वत्रापि दोषत्वात्। यद्वा, दृष्टान्तेऽपि तद्विशेषणं व्याप्यत्वासिद्धीतर दोषान्तरासङ्कीर्णस्यानैकान्त्यस्य लक्ष्यत्वमभिप्रेत्य; पक्षे तु तस्य बाधसङ्करात्। ॥ निश्चितहेतुमतीति॥ तथाच वियन्मात्रस्य पक्षत्वे घटादौ सन्दिग्धानैकान्त्यं स्यादेवेत्यर्थः। ननु निश्चितहेतुमति सर्वत्र साध्यसन्देहो न दोषः अनुमानमात्रोच्छेदापत्तेः, किन्तु पक्षातिरिक्ते। घटादिस्तु न पक्षातिरिक्त इति न तत्र सन्दिग्धानैकान्त्यं दोषः। न च प्रतिज्ञाविषयत्वरूपं पक्षत्वं घटे नास्तीति स पक्षातिरिक्त इति वाच्यम्। प्रतिज्ञाविषयत्वं न पक्षत्वम्। स्वार्थेऽनुमाने शब्दप्रयोगरूपप्रतिज्ञाविरहेण पक्षत्वाभावापत्तेः। किन्तु साधक-बाधक प्रमाणाभाववत्त्वं पक्षत्वं स्वार्थानुमान-परार्थानुमानसाधारणम्। तच्च घटेऽप्यस्ति इति न स पक्षातिरिक्तः इति न घटे सन्दिग्धानैकान्त्यं दोषः इति वियदित्येव पक्षनिर्देशोऽस्त्वित्यत आह – प्रतिज्ञां प्रत्यविषय इति।

॥ एवं पक्षनिर्देशस्येति॥ यद्यपि वियन्मात्रस्य पक्षत्वेऽप्युक्तविधया घटे न सन्दिग्धानैकान्त्यम्। तथापि घटादिसाधारण्यामेकस्यामनेकस्यां वा विप्रतिपत्तौ सत्यां घटादिबहिर्भावेन वियन्मात्रपक्षनिर्देशस्यानाकाङ्क्षिताभिधानत्वेनाप्राप्तकालत्वादित्यर्थः। ननु अनुमाने पक्षतावच्छेदिका इव लध्वी विमतिरेव विप्रतिपत्तावपि धर्मितावच्छेदिकाऽस्तु, किं 'ब्रह्मप्रमान्येने' त्याद्युक्तकुसृष्टियुक्तधर्मितावच्छेदकाश्रयणेनेत्यत आह – विप्रतिपत्ताविति॥ विमतिः विप्रतिपन्नत्वम्। विप्रतिपत्तौ विमतेर्धर्मितावच्छेदकत्वे मिथ्या न वेत्यादिविप्रतिपन्नत्वं मिथ्या न वेत्यादि विप्रतिपत्तिः स्यात्, तथाचात्माश्रयः स्यात्। तस्माद् 'ब्रह्मप्रमान्येने'त्याद्यनुगतं वा पृथिवीत्वादिकमननुगतं वा विप्रतिपत्तौ धर्मितावच्छेदकमुपादातव्यमित्यर्थः।

तन्त्ववृत्तित्वादिति। तथाच तत्रैव व्यभिचारवारणायानादीति विशेषणमित्यर्थः। विमतमिति। स्वसमानाधिकरणेत्यादिसाध्यवत्त्व-तदभावाभ्यां विमतमित्यर्थः। संयोगादौ तूक्तरूपविमतेरभावात् न तत्र सिद्धसाधनम्। ननु विमतेर्धर्मितावच्छेदकमस्ति न वा? अन्त्येऽपर्यवसानम्, आद्येऽपि संयोगादिव्यावृत्तम् न वा? नाद्यः। तस्यानुक्तत्वात्, द्वितीये संयोगादेरपि पक्षत्वमवर्जनीयमेवेत्यनुशयेनाह – ब्रह्मप्रमेति। संयोगादौ सिद्धसाधनवारणाया व्याप्यवृत्तित्वानधिकरणमिति पक्षविशेषणम्। पक्षधर्मताबलादिति॥ अव्याप्यवृत्तित्वान धिकरणमिति पक्षविशेषणबलादव्याप्यवृत्तित्वेन पक्षे साध्योपसंहाराभावेन स्वसमानाधिकरण व्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं पक्षे सिद्ध्यतीत्यर्थः। नित्यद्रव्यान्यदिति पक्षविशेषणम्। वृत्तिमदित्यर्थः। एतच्च नित्यद्रव्येषु सिद्धसाधनवारणाय। संयोगादिभिन्नत्वमपि पक्षविशेषणम् तेन संयोगादिकमादाय न सिद्धसाधनम्।

ननु आत्मनोऽमिथ्यात्वात् तत्र व्यभिचार इत्यत आह – अत एवेति। आत्मनि साध्यसत्त्वात् न व्यभिचार इत्यर्थः। अत्यन्ताभावप्रतियोगित्वं मिथ्यात्वं पक्षतधर्मताबलात् सिद्ध्यतीत्याह – मिथ्यात्वसिद्धिस्त्विति। वृत्तिमत्त्वार्थकनित्यद्रव्यान्यत्वविशेषणादवृत्तित्वमादाय पक्षे साध्योपसंहाराभावे सति मिथ्यात्वसिद्धिर्भवतीत्यर्थः। आत्मत्वावच्छिन्नेति॥ शुक्तिरूप्यप्रतियोगिके आत्मानात्मधर्मिके भेदे सिद्धसाधनवारणाय आत्मत्वावच्छिन्नेति। अनात्ममात्रेति॥ आत्मानात्मप्रतियोगिके शुक्तिरूप्यधर्मिके भेदे व्यभिचारवारणाय – मात्रेति। अनात्ममात्रप्रतियोगिकसादृश्यादेः पक्षसमत्वात् न तत्र व्यभिचारः।

न्यायामृतकण्टकोद्धारः

विश्वमिथ्यात्वस्याप्रामाणिकत्वशङ्कापनोदाय प्रमाणमाह – प्रमाणं चेति। किं तदित्यतस्तदाह – विमतमिति। इदमनुमानं नोक्तविप्रतिपत्त्यनुसारि; तथात्वे हि विमतत्वस्य पक्षतावच्छेदकत्वोक्तेरो

मिथ्यात्वविकल्पोक्तेश्च विरुद्धत्वप्रसङ्गात्, विशिष्योक्तौ विकल्पासम्भवात्। किन्तु विमतं मिथ्या न वेति विप्रतिपत्तिमनुसृत्यैवेदम्। अत एव पूर्वोत्तरपक्षानुमानप्रतिज्ञे सङ्कलय्य विप्रतिपत्तिरूह्येति प्रागभिहितम्। न चैवमुक्तविप्रतिपत्तिप्रदर्शनानर्थक्यम्; विमतिस्वरूपलाभायैव तदुत्कीर्तनादिति ध्येयम्। अयं पट इति। अत्र पटमात्रस्य पक्षत्वे पटान्तरस्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वेनांशतः सिद्धसाधनवारणाय – अयमिति। अयमित्येवोक्तौ इदंशब्दस्य पुरोवर्तिवाचकतया एतत्तन्तुग्रहणे तेषां स्वनिष्ठात्यन्ताभावप्रतियोगित्वेन सिद्धसाधनवारणाय–पट इति। साध्य एतत्तन्तुपदम् एतत्पटोपादानपरम्। तेनैतत्पटोपादाननिष्ठा त्यन्ताभावप्रतियोगित्वस्य साध्यत्वे स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वं सिद्धं भवति। अन्यत् सर्वं विप्रतिपत्तिस्थल एवोक्तमिति नेह तन्यते।

ननु अत्र पक्षतावच्छेदकेन भवितव्यम्। न च विमतिरेव पक्षतावच्छेदिकेति वाच्यम्; ब्रह्मादीतरविशेष्यकत्वज्ञानात्तस्या अपि ब्रह्मादीतरविशेष्यकत्वज्ञानायावच्छेदकसापेक्षत्वादित्यत आह – यद्यपीति। तथाच विमतिरेवावच्छेदिकेति भावः। ननु विमतेः पक्षतावच्छेदकत्वं वदताऽपि तन्नियामकीभूत 'ब्रह्माप्रमान्येने'त्युक्तस्य विमतिविषयतावच्छेदकत्वं वक्तव्यमेव। तथाचावश्यकस्यावच्छेदकान्तरनिरपेक्षस्य तस्यैव पक्षतावच्छेदकत्वोपपत्तौ विमतेः पक्षतावच्छेदकत्वकथनमयुक्तमित्यत आह – लघ्व्येति। अत्र लघुत्वं शब्दतो ज्ञातव्यम्। तत्रैव दृष्टान्तः– सावयवत्वेति। सावयवत्वस्य समवायिकारणादिगर्भत्वेन गुरुत्वात् कार्यत्वस्य तदगर्भत्वेन लघुत्वादिति भावः।

नन्वेवम् गौरवेण तस्य पक्षतावच्छेदकत्वाभावे विमतिविषयतावच्छेदकत्वमपि न स्यात्; अन्यथा पक्षतावच्छेदकत्वेनापि किमपराद्धम्? इत्यरुचेराह – यद्वेति। तथाचास्मिन् पक्षे नोक्तं विमतिविषयतावच्छेदकम्, किन्तु पृथिवीत्वाद्यनेकान्येव विमतिविषयतावच्छेदकानि। न च तर्हि तेषामेव पक्षतावच्छेदकत्वमस्त्विति वाच्यम्; तेषामनेकत्वेनानुगतपक्षतावच्छेदकत्वायोगात्। समूहालम्बनसंशयविषयत्वरूपविमतेरेवानुगतत्वेन पक्षतावच्छेदकत्वौचित्यात्। न च एतादृशसंशयविषयत्वरूपविमतेरप्यतिप्रसक्तत्वे नावच्छेदकत्वमनुचितमिति वाच्यम्; सत्यत्व-मिथ्यात्वकोटिकसंशयविषयत्वस्यानतिप्रसक्तत्वात्। न च विशेषादर्शनवेलायां ब्रह्मण्यपि तादृशसंशयविषयत्वसम्भवादतिप्रसक्तिरिति वाच्यम्; अत्र वादि-प्रतिवादिभूतयोर्मायावादि- तत्त्ववादिनो स्सतोरेतादृशसंशयविषयत्वस्य ब्रह्मण्ययोगात्। आहार्यसंशयस्य चातिप्रसक्तत्वादसम्भवात्।

यत्तु ब्रह्मासत्प्रातिभासिकातिरिक्तसंशयविषयत्वमनतिप्रसक्तं विमतिविषयतावच्छेदकमिति, तत्तुच्छम्; तथा सति 'ब्रह्मप्रमान्येने' त्युक्तापेक्षयाप्यस्यैव गुरुत्वेन तस्यैव विमतिविषयतावच्छेदकत्वौचित्यात्। त्वदुक्तस्यैव विमतिविषयतावच्छेदकत्वे पृथिवीत्वादेस्तत्कथनविरोधश्च। वस्तुतस्तु अनेकेषां पृथिवीत्वादीनां विमतिविषयतावच्छेदकत्वे विमतेस्तावज्ज्ञानसाध्यत्वेन गौरवात्, 'ब्रह्मप्रमान्येने' त्याद्युक्तस्यैव विमतिविषयतावच्छेदकत्व एकज्ञानसाध्यत्वेन लाघवात् तस्यैवावच्छेदकत्वौचित्यात्। ब्रह्मेतरस्य सर्वस्यापि मिथ्यात्वे विप्रतिपत्तौ सत्याम् – पृथिवी सत्या, मिथ्या वेति पृथिवीत्वाद्यवच्छेदेन तदुपदर्शनस्यानौचित्याच्चेति पूर्वपक्ष एव साधीयानिति द्रष्टव्यम्।

न चैवमपि विमतेरर्थतो गुरुत्वात् शब्दतो गुर्वपि तदेव पक्षतावच्छेदकमस्त्विति वाच्यम्; तथा सति पक्षनिर्देशस्य तथैव कर्तव्यत्वापत्तेराश्रयासिद्ध्याद्यनेकदोषपरिहारस्यावश्यकत्वेन तदर्थं ''विमतं'' इति प्रयोगस्यावश्यकत्वेन विमतेरेव पक्षतावच्छेदकत्वमुक्तमिति ध्येयम्। अननुगतधर्म्याश्रयाऽननुगतविशेष्यकाऽनुगता समूहालम्बनरूपा विप्रतिपत्तिः विमतिः।

यद्यपीति। तथाच पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नसाध्यज्ञानरूपानुमितिर्न स्यादिति भावः। यद्यपि समयबन्धाद्युत्तरमपि विमतिसम्भवः। तथापि व्याप्तिज्ञानव्यवहितत्वं द्रष्टव्यम्। तज्ज्ञानम् विमतिविषयत्वेन ज्ञानम्। अत्र प्रपञ्चशब्देन वियदादिसमुदायोऽभिधीयते? वियदादिकमेव वा? आद्येऽपि समुदायः समुदायिभ्यो भिन्नोऽभिन्नो वा? नाद्य इत्याह –प्रपञ्चशब्देनेति। द्वितीय-तृतीयौ निराकरोति – वियदादीनामेवेति। घटादौ सन्दिग्धानैकान्त्यपरिहारार्थमाह – घटादिस्त्विति। पक्षादन्यत्रेति। प्रतिज्ञाविषयादन्यत्रेत्यर्थः। एतद् दार्ष्टान्तिकविशेषणम्। न चैवम् स्वार्थानुमानोच्छेदः; तत्र पक्षवचनरूपप्रतिज्ञाऽभावेन पक्षस्यैव प्रतिज्ञाविषयादन्यत्वेन सन्दिग्धानैकान्त्यादिति वाच्यम्; परार्थानुमान एव प्रतिज्ञाविषयादन्यत्र सन्दिग्धानैकान्त्यस्य दोषत्वेनोक्तत्वात्। दोषान्तरमाह – प्रतिज्ञां प्रतीति। घटादिसाधारणविप्रतिपत्तौ सत्यां 'वियदि'ति पक्षनिर्देशेऽर्थान्तरता स्यात्। अनाकाङ्क्षितार्थाभिधानं त्वर्थान्तरम्। साधारणविप्रतिपत्तौ सत्यां विशेषसाधनं ह्यनाकाङ्क्षितं भवति। न च – घटादीनामपक्षत्वेन न तत्साधारणपक्षनिर्देश इति वाच्यम्; स्वार्थपरार्थानुमानसाधारणस्य साधक-बाधकप्रमाणाभावरूपस्य पक्षत्वस्य घटादिसाधारणत्वेन तत्साधारणपक्षनिर्देशोपपत्तेः। न च प्रतिज्ञाविषयत्वमेव पक्षत्वम्; स्वार्थानुमानोच्छेदकत्वेन तस्यापक्षत्वात्, तथाचार्थान्तरतेति भावः।

यत्तु, ननु निश्चितहेतुमति सर्वत्र साध्यसन्देहो न दोषः; अनुमानमात्रोच्छेदापत्तेः, किन्तु पक्षातिरिक्ते। घटादिस्तु न पक्षातिरिक्तः, इति न तत्र सन्दिग्धानैकान्त्यम्। न च प्रतिज्ञाविषयत्वरूपं पक्षत्वं घटे नास्ति, इति स पक्षातिरिक्त एवेति वाच्यम्; प्रतिज्ञाविषयत्वरूपं न पक्षत्वम्। स्वार्थानुमाने शब्दप्रयोगरूपप्रतिज्ञाऽभावेन पक्षत्वाभावापत्तेः। किन्तु साधक-बाधकप्रमाणाभावरूपमेव पक्षत्वं स्वार्थ-परार्थानुमानसाधारणम्। तच्च घटेऽस्ति, इति न स पक्षातिरिक्तः इति न तत्र सन्दिग्धानैकान्त्यम्, इति वियदित्येव पक्षनिर्देशोऽस्तु इत्यरुचेराह – प्रतिज्ञां प्रत्यविषय इति। तन्न। 'घटादिस्तु पक्षतुल्यः' इत्यनेन पूर्वपक्षिणा सन्दिग्धानैकान्त्ये परिहृते पुनः ''पक्षादन्यत्रे'' त्यादिना सन्दिग्धानैकान्त्यदातुर्न हि ''पक्षादन्यत्रे''ति यथाश्रुतमभिप्रेतम्। तथा सति पक्षतुल्यत्वोक्त्या परोक्तसन्दिग्धानैकान्त्यपरिहारस्य निराकरणाभावेन तदर्थप्रवृत्तस्य प्रकृतग्रन्थस्यात्यन्तासङ्गतत्वापत्तेः। तस्मात् ''पक्षादन्यत्रे''त्येतत् प्रतिज्ञाविषयादन्यत्रेत्यवश्यं व्याकर्तव्यमेव। तथाच घटादौ सन्दिग्धानैकान्त्यं दुष्परिहरम् इति कथमत्रारुच्युद्भावनमिति न जानीमः। यच्च – पक्षसमस्य पक्षत्वाश्रयत्वात् पक्षत्वमेव। तथाच तत्र सन्दिग्धानैकान्त्योद्भावनमयुक्तमित्यस्वरसोद्भावनमिति। तन्न; ''पक्षादन्यत्रे''त्यस्य प्रतिज्ञाविषयादन्यत्रेति व्याख्यातत्वात्। घटस्य च तदन्यत्वेन सन्दिग्धानैकान्तिकत्वस्य दुष्परिहरत्वात्, अन्यथा क्षितिमात्रस्य पक्षत्वेऽङ्कुरादौ सन्दिग्धानैकान्त्यं नोद्भाव्येत।

ननु वियदित्येव पक्षनिर्देशोऽस्तु, न च सन्दिग्धानैकान्त्यम्; निश्चितसाध्याभाववति हेतुसन्देह एव सन्दिग्धानैकान्त्यात्। नच निश्चितसाध्याभाववति हेतुसन्देह इव निश्चितहेतुमति साध्यसन्देहेऽपि सन्दिग्धानैकान्त्यमेव, उभयथापि साध्याभाववद्वृत्तिमित्वसन्देहस्य दूषकताबीजस्य तुल्यत्वादिति वाच्यम्; तथा सति धूमानुमानेऽपि तथाविधसन्देहसम्भवेनानुमानमात्रोच्छेदप्रसङ्गात्। न च पक्षादन्यत्र तथाविधसन्देहो दोष इति वाच्यम्। ''पक्षादन्यत्रे''ति कोऽर्थः? न तावत्सन्दिग्धसाध्यवतोऽन्यत्रेति। तथा सति घटादेरपि सन्दिग्धसाध्यकत्वेन तदन्यत्वाभावात्। नापि प्रतिज्ञाविषयादन्यत्रेति। स्वार्थानुमानोच्छेदापत्तेः। तत्र पक्षवचनरूपप्रतिज्ञाया अभावात्। नापि सिषाधयिषाविरहसहकृतसिद्ध्यभाववतोऽन्यत्रेति। घटादौ तादृशपक्षतायाः सत्त्वेन तदन्यत्वाभावात्। न च एवं पक्षनिर्देशे घटादिसाधारणविप्रतिपत्त्यनानुगुण्यमिति वाच्यम्; विप्रतिपत्तेः कथाङ्गत्वेनापि स्वीकारसम्भवादिति चेत्, अत्राहुः – व्यभिचारसंशयः प्रतिबन्धक इति तावदविवादम्। सोऽपि पक्षीयः स्वारसिकश्चेद्प्रतिबन्धक इत्यप्यविवादम्। तथाच व्यभिचारसंशयस्य पक्षताघटकान्यव्यभिचारज्ञानत्वेनैव दोषत्वं वाच्यम्, न तु निश्चितसाध्याभाववति हेतुसंशयज्ञानत्वेन; गौरवात्। एवञ्च पक्षसमव्यभिचारसंशयस्य पक्षताघटकान्यत्वेन प्रतिबन्धकत्वं स्यादेवेति। तदयुक्तम्; पक्षताघटकान्यव्यभिचारज्ञानत्वेन व्यभिचारसंशयस्य प्रतिबन्धकत्वमित्येतत् किं संशयघटितपक्षत्वमादाय वोच्यते? सिद्ध्यभावरूपपक्षत्वमादाय वा? नाद्यः; संशयस्य विशेषणत्वोपलक्षणत्वाभ्यां संशयघटितपक्षताया निराकृतत्वेन तद्घटितपक्षत्वमादाय व्यभिचारसंशयस्य प्रतिबन्धकत्वासम्भवात्। न द्वितीयः, पक्षीयव्यभिचार संशयस्यापि पक्षताघटकान्यव्यभिचारज्ञानत्वेन प्रतिबन्धकत्वापत्तावनुमानमात्रोच्छेदापत्तेरिति। वस्तुतस्तु – वियदिति पक्षनिर्देशे घटादौ सन्दिग्धानैकान्त्यं दुष्परिहरमेव। यदत्रोक्तम् – निश्चितहेतुमति साध्यसन्देहस्य दोषत्वेऽनुमानमात्रोच्छेदः स्यादिति, तत्तुच्छम्; पक्षादन्यत्रेति विशेषितत्वात्। न चोक्तविकल्पावकाशः; पक्षादन्यत्रेत्यस्य प्रतिज्ञाविषयादन्यत्रेति व्याख्यानात्। न च एवं स्वार्थानुमानोच्छेदः स्यादित्युक्तमिति वाच्यम्; प्रतिज्ञाविषयादन्यत्रेति विशेषितस्य परार्थानुमान एव दोषत्वात्। नचैतन्नियामकशून्यमिति वाच्यम्; साध्यवत्त्वप्रकारकसंशयधर्मिमात्रसाधारणपक्षतानिर्वचननिर्बन्धस्यैव नियामकत्वात्। अत एव गङ्गेशचरणैः– ''सकर्तृकत्वसंशयधर्मिमात्रसाधारणमदृष्टाद्वारकमि''त्यादिना पक्षतावच्छेदकमुक्तम्। क्षितिमात्रस्य पक्षत्वेऽङ्कुरादौ सन्दिग्धानैकान्तिकता चोद्भाविता ।

ननु यथा विमतिर्लघुत्वादनुमाने पक्षतावच्छेदिका, तथा विमतावपि विमतिरेव धर्मितावच्छेदिकाऽस्त्वित्यत आह – विप्रतिपत्तौ त्विति। विमतावित्यर्थः। विमतौ हि विमत्यन्तरं धर्मितावच्छेदकम्? स्वयमेव वा? नाद्यः, अनवस्थितेः। न द्वितीय इत्याह – आत्माश्रयादिति। स्वस्य स्वावच्छेदकत्वे स्वज्ञानाधीनज्ञानत्वेनात्माश्रय इति भावः। वस्तुतस्तु – विमतौ विमतिरेवावच्छेदिका। नचोक्तविकल्पावकाशः; विमत्यन्तरस्यैवावच्छेदकत्वाङ्गीकारात्। नचानवस्थेति वाच्यम्; पूर्वपूर्वेषां विमतिविषयं ज्ञात्वोत्तरेषां विमतमिति प्रयोगोपपत्त्या पूर्वपूर्वेषां विमतेरेवोत्तरेषां विमतावच्छेदकत्वोपपत्तेः। एवं परम्परायाश्चानादित्वेन नानवस्थादोषः। अत एव मन्त्राधिकरणे – 'पूर्वपूर्वेषां मन्त्र इत्यभियुक्तप्रयोगं ज्ञात्वोत्तरेषां मन्त्र इति प्रयोगोपपत्तेर्नानवस्थेत्युक्तम्।

यत्तु – ''नन्वनुमाने पक्षतावच्छेदिका लघ्वी विमतिरेव विप्रतिपत्तावपि धर्मितावच्छेदिकाऽस्तु। किं 'ब्रह्मप्रमान्येने'त्युक्तकुसृष्टियुक्तधर्मितावच्छेदकाश्रयणेनेत्यत आह – विप्रतिपत्ताविति। समूहालम्बन

संशयविषयत्वरूपविमतेर्विप्रतिपत्तौ धर्मितावच्छेदकत्वं नेत्यर्थः। अनुगतावच्छेदकमन्तरेणैवाननुगता नियतविषया विमतिर्विप्रतिपत्तौ धर्मितावच्छेदिकोच्यते? आहोस्विद् अनुगतावच्छेदकेनानुगता नियतविषया सा तथोच्यते? आद्येऽसम्भवः; अनुगतावच्छेदकमन्तरेण तस्या नियतविषयत्वासंभवात्। द्वितीयेऽपि किमनुगतधर्मो 'ब्रह्मप्रमान्येनेत्याद्युक्तरूपं वा? विमतिरेव वा? नाद्यः; तदनादरात्। तदादरे वा स एव विप्रतिपत्तौ धर्मितावच्छेदकोऽस्तु। कृतं तद्ग्राहाधीनग्रहाया विमतेर्धर्मितावच्छेदकत्वकल्पनया। न द्वितीयः। आत्माश्रयादित्याह आत्माश्रयादितीति व्याख्यानम्, तदनादरणीयम्। विमतेरनुमानेऽपि पक्षतावच्छेदकत्वोक्ता वप्युक्तदोषसाम्यात्। तथाहि – अनुमाने ह्यनुगतावच्छेदकमन्तरेणैवाननुगता नियतविषया विमतिः पक्षतावच्छेदिकोच्यते? उतानुगतावच्छेदकेनानुगता नियतविषया सा तथोच्यते? आद्येऽसम्भवः; अनुगतावच्छेदकमन्तरेण तस्या नियतविषयत्वासम्भवात्। द्वितीयेऽपि किमनुगतधर्मो 'ब्रह्मप्रमान्येने'त्याद्युक्तरूपो वा? विमतिरेव वा? नाद्यः; उक्तरीत्याऽनवस्थाद्यभावेन विमतेरेव विमत्यवच्छेदकत्वोपपत्तौ 'ब्रह्मप्रमान्येने' त्यस्य विमत्यच्छेदकत्वकल्पनायां गौरवात्। न च विमतेरर्थगुरुत्वाच्छब्दतो गुर्वपि 'ब्रह्मप्रमान्येने' त्युक्तमेवावच्छेदकमस्त्विति – वाच्यम्; आश्रयासिद्ध्यादिपरिहारार्थं 'विमतमि'ति पक्षनिर्देशवत् प्रकृतेऽपि विमतेरेवाभावे कस्येदं धर्मितावच्छेदकं स्यात् इति स्वरूपाश्रयासिद्धिपरिहारार्थं विमतेरेव तद्धर्मितावच्छेदक त्वस्यावश्यकत्वात्। न द्वितीयः; आत्माश्रयात्। न चानुमाने लघुत्वाद् विमतेरेव पक्षतावच्छेदकत्वम्, न तूक्तस्येति – वाच्यम्; तर्हि तत एव विमतावपि धर्मितावच्छेदकत्वमस्तु; युक्तितौल्ये क्वचिदेव पक्षतावच्छेदत्वोररीकरणम्, क्वचित् नेत्यस्यान्याय्यत्वात्। किंच विप्रतिपत्ताविति विप्रतिपत्तिशब्दस्य विमतिपरत्वाङ्गीकारेणोक्तरीत्या सम्यग्व्याख्यानसंभवे विप्रतिपत्तिवाक्यपरत्वकल्पनया व्याख्यानस्यासङ्गतत्वात्। न च – अत्र सर्वत्र विप्रतिपत्तिशब्देन विमतिरेव गृह्यते। विमतौ विमतेरवच्छेदकत्वशङ्कायामुक्तरीत्या विप्रतिपत्ताविति ग्रन्थेन परिहार इति वाच्यम्; अनुमानेऽपि विमतेः पक्षतावच्छेदकत्वोक्ता वप्युक्तदूषणस्योद्भावयितुं सुकरत्वेनाप्यसङ्गतत्वादिति।

यच्च – विमतेरेवानुमाने लघुत्वेन पक्षतावच्छेदकतयाऽऽश्रयणीयत्वम्; आवश्यकत्वात्। विप्रतिपत्तावपि सैव धर्मितावच्छेदिकाऽस्तु। न तु 'ब्रह्मप्रमान्येने'त्यादिगुरुधर्मस्तदवच्छेदक इत्यत आह – विप्रतिपत्तौ त्विति। विमतिशब्देन विप्रतिपत्तिवाक्यग्रहणे आत्माश्रयः। तज्जन्यसंशयग्रहणे त्वन्योन्याश्रय इति व्याख्यानम्, तदप्यसत्। अनुमाने पक्षतावच्छेदकत्वेनोक्ताया विमतेर्विप्रतिपत्तावपि धर्मितावच्छेदकत्वमाशङ्क्य, विमतिशब्देन विप्रतिपत्तिवाक्यं वा तज्जन्यसंशयो वेति विकल्पस्यासङ्गतत्वात्। विप्रतिपत्तिशब्दस्य विप्रतिपत्तिवाक्यपरत्वस्य प्रक्रमासङ्गतत्वाच्च।

ननु प्रागभावध्वंसोऽपि तन्तुवृत्तिरेवेत्यनादिपदं व्यर्थम्। तस्य तन्मात्रव्यावर्तकत्वादित्यत आह – तन्तुनाशेति। विमतं वेति। विमतत्वं चात्र स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वतदप्रतियोगित्वाभ्याम्, न तु सत्यत्व - मिथ्यात्वाभ्याम्। तथाचात्र नाव्याप्यवृत्तिव्यवच्छेदकविशेषणान्तरापेक्षेति द्रष्टव्यम्। अत्रेति। अव्याप्यवृत्तित्वानधिकरणे स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं सिद्ध्यत् मिथ्यात्वमादायैव पर्यवस्यतीति भावः। विमतं नित्यद्रव्यान्यदिति। वैमत्यं चात्र मिथ्यात्व-सत्यत्वाभ्यामेव। तच्च

नित्यद्रव्यसाधारणमिति तद्व्यावृत्त्यर्थं नित्यद्रव्यान्यदिति विशेषणम्। तुच्छव्यावृत्त्यर्थम्– विमतमिति। संयोगस्यापि व्याप्यवृत्तितैवात्राभिमता। यद्वक्ष्यति – ''संयोग-तदभावयोरवच्छेदकभेदेन भिन्नाश्रितत्वस्यैवानुभवेन सत्त्वपक्षे सामानाधिकरण्यायोगात्–'' इति। अतो न तदन्यदिति विशेषणम्। मिथ्यात्वसिद्धिस्त्विति। न च – रूपान्तरेण सम्बन्धान्तरेण सत्त्वेऽपि रूपान्तरेण सम्बन्धान्तरेण केवलान्वय्यत्यन्ताभावप्रतियोगित्वस्य सत्त्वेऽप्युपपत्त्यार्थान्तरमिति वाच्यम्; येन सम्बन्धेन येन रूपेण यत् प्रतीतम्, तत्सम्बन्ध तद्रूरूपावच्छिन्नाभावस्य विवक्षितत्वात्। न चैवमप्रसिद्धिरिति वाच्यम्; अवृत्तिगगनादौ प्रसिद्धत्वात्। नच एवमपि मिथ्यात्वासिद्धिः, अवृत्तित्वेनैवोपपत्तेरिति वाच्यम्; वृत्तिमत्त्वस्य पक्षतावच्छेदकत्वात्। 'नित्यद्रव्यान्यदि'त्यनेन तस्यैव विवक्षणादिति भावः। आत्मत्वावच्छिन्नेति। अत्र भेदमात्रस्य पक्षत्व आत्मप्रतियोगिकस्य पक्षत्वापत्तावंशे बाधः; तदर्थम् – 'आत्मधर्मिक इति। तावत्युक्ते देवदत्तात्मा शुद्धचैतन्यं नेत्यस्याप्यात्मधर्मिकत्वेन पक्षत्वापत्तौ पुनरंशे बाधः। तदर्थम्– आत्मत्वावच्छिन्नेति। तस्य च देवदत्तात्मत्वावच्छिन्नत्वात् न दोषः। न चैवम्– 'आत्मा शुक्तिरूप्यं ने'त्यस्याप्यात्मत्वावच्छिन्नधर्मिताकत्वेन पक्षत्वापत्यांऽशतः सिद्धसाधनमिति वाच्यम्; अर्थक्रियासमर्थप्रतियोगिक इति पक्षविशेषणात्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरुद्देश्येति मते तस्यादोषत्वाद्वा। अत्र हेतौ मात्रपदाभावे 'पटः घटशुद्धचैतन्ये ने' ति भेदस्यानात्मप्रतियोगिकत्वेन साध्याभावेन च व्यभिचारः स्यात्, तदर्थम् – मात्रेति।

न्यायामृतप्रकाशः

एवं विप्रतिपत्तिवाक्यस्याफलत्वेनानावश्यकत्वमुपपाद्य परपक्षे प्रमाणमुत्थापयति॥ प्रकृतत्वानुसंधानार्थश्चशब्दः। तथाहीत्यत्रहीत्यनेनात्रविश्वमिथ्यात्वेयत्प्रतिज्ञातंप्रमाणंतच्चानुमानरूपमित्यर्थः। अनुमानं प्रमाणमिति कुतोवगतमित्यत आह॥ विमतमित्यादि॥ आनंदबोधोक्तेर्हेतोरत्रानुमानं प्रमाणमित्येतदवगम्यत इति योज्यं। एवं तत्वप्रदीपोक्तेरित्येतदपि व्याख्येयं। एतत्तंतुनिष्ठेति॥ एतत्पटस्येतरत्राभावः सिद्ध एवास्ति एतत्तंतुष्वप्य भावसाधने मिथ्यात्वमेव सिद्धचतीति भावः। ननु विमतमित्यत्र पक्षतावच्छेदिका विमतिर्नाम विरुद्धार्थप्रतिपादकं वाक्य द्वयं संशयरूपं ज्ञानंवेति वक्तव्यं। तयोश्च कथं प्रपंचनिष्ठपक्षतावच्छेदकत्वं। वाक्यस्य शब्दरूपत्वेन गगनमात्रनिष्ठतया पक्षतान्यून वृत्तित्वात्। संशय रूपज्ञानस्य च पक्षताशून्यात्मनिष्ठत्वेनाधिकवृत्तित्वादिति चेत्सत्यं। वाक्यद्वयस्यापि प्रपंचे प्रतिपाद्यप्रतिपादकभावसंबंधेन संशयरूपज्ञानस्य च विषयविषयिभावसंबंधेन सत्त्वसंभवेन दोषाभावात्। नन्वत्र न विमतिः पक्षतावच्छेदिका। तस्याः ब्रह्मतुच्छविषयकत्वरूपाति प्रसंगपरिहारायावच्छेदकसापेक्षत्वेन यदवच्छेदकमुच्यते ब्रह्मप्रमान्येनेत्यादिकं तस्यैव पक्षतावच्छेदकत्वमस्तु किं तज्ज्ञानाधीनज्ञानयाः विमतेः पक्षतावच्छेदकत्वोक्त्या व्यर्थत्वादित्याशंक्य शरीरलाघवादियमेव पक्षतावच्छेदिकेत्याह। यद्यपीत्यादिना॥ नियतविषयत्वाय ब्रह्मतुच्छाऽविशेष्यका वियदादिप्रपंच मात्रविशेष्यका विमतिरितिनियतविषयत्वायेत्यर्थः॥ अवच्छेदकेति। ब्रह्मप्रमान्येनेत्याद्यवच्छेदकेत्यर्थः। तथा च तस्यैव पक्षतावच्छेदकत्वमस्त्विति भावः। तथापि स्वनियामकनियतया विप्रतिपत्त्या विमत्या पक्षतावच्छेदो न विरुद्ध इत्यन्वयः॥ स्वनियामकेति॥ स्वस्याः विमतेः नियतविषयत्वे नियामकं यद्ब्रह्मप्रमान्येनेत्यादिकं

तन्नियतयाब्रह्मतुच्छाविषयकत्वेन नियतविषययेत्यर्थः। तत्र हेतुर्लभ्येति। स्वनियामकनियतस्यापि प्रयोगो दृष्ट इत्याशयेनोक्तं। स्वावयवत्वेति। व्याप्यव्याप्यस्य सुतरां व्याप्यत्वात्कार्यत्वव्याप्येन सावयवत्वेनैव सकर्तृकत्व साधनोपपत्तौ कार्यत्वरूपहेतूक्तिर्व्यर्थे त्याशंकायां गौरवात्सावयत्वमप्यप्रयुज्य लाघवात्तत्साधितं कार्यत्वमेव प्रयुज्यते तद्वदित्यर्थः।

ननु विमतेः शरीरलाघवेपि प्रतिपत्तिगौरवान्न पक्षतावच्छेदकत्वं। शब्दगौरवापेक्षया प्रतिपत्ति गौरवान्नपक्षतावच्छेदकत्वं। शब्दगौरवापेक्षया प्रतिपत्तिगौरवस्य ज्यायस्त्वादतो विप्रतिपत्तिधर्मितावच्छेदकमेवानुमाने पक्षतावच्छेदकमस्त्वित्यस्वरसादाह॥ यद्वेति॥ विप्रतिपत्तिर्विमतिरेवपक्ष तावच्छेददिका। नच विप्रतिपत्ति धर्मितावच्छेदकमेवात्रपक्षतावच्छेदकमस्त्वितिवाच्यं। स्यादिदं यदि ब्रह्मप्रमान्येनेत्यादि रूपेणादौ विप्रतिपत्तिमुक्त्वा विमतं मिथ्येति प्रयुज्येत। नचैवं। किं तु पृथिवीसत्या मिथ्यावेत्याद्यननुगतधर्म्याश्रियां विप्रतिपत्तिमादौ प्रदर्श्य पश्चाद्विमतं मिथ्येत्यादि प्रयुज्यते। तथा च विप्रतिपत्तौ यद्धर्मितावच्छेदकं पृथिवीत्वादिकं तस्याननुगतत्वान्नपक्षतावच्छेदकत्वं युक्तं। न च विमतेरप्यननुगतत्वान्न तस्या अपि पक्षतावच्छेदकत्वं युक्तमित्यत उक्तं॥ अनुगतेति॥ अननुगतानामपि विमतीनां विश्वधर्मिकसत्यत्वमिथ्यात्वकोटि कविमतित्वेनानुगतीकृतानां पक्षतावच्छेदकत्वसंभवात्। नचैवं विप्रतिपत्तिधर्मितावच्छेदकभूतानां पृथिवी त्वादीनामननुगतानामपि सत्यत्वमिथ्यात्वकोटिकविप्रतिपत्तिधर्मितावच्छेदकत्वेनानुगतानां पक्षतावच्छेदकत्वं युक्तमिति वाच्यं। सत्यत्वमिथ्यात्वकोटिकविमतित्वाऽपेक्षया सत्यत्वमिथ्यात्वकोटिकविप्रतिपत्तिधर्मितावच्छेद कत्वस्य चानुगमकस्य गुरुत्वात्। अतो लाघवाद्विमतिरेव पक्षतावच्छेदिकेति भावः।

ननु विमतेः पक्षतावच्छेदकत्वे पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात्पक्ष तावच्छेदकीभूतायाश्चविमतेः समयबंधादिना व्यवहितत्वेनानुमानकालेऽभावान्नानुमानेन तत्सामानाधिकरण्येन साध्यसिद्धिरूपोद्देश्यसिद्धिरित्याशंक्य समाधत्ते॥ यद्यपीत्यादिना॥ सैवेति॥ विमतिरेवेत्यर्थः। श्यामत्वोपलक्षितो रक्त इतिवद्विमतं विमतिविषयत्वोपलक्षितं मिथ्येत्येवं विमतेरुपलक्षणतया पक्षतावच्छेदकत्वं युक्तमित्यर्थः। पक्षांतरमाह॥ तज्ज्ञानं वेति॥ विमतिविषयत्वज्ञानं वेत्यर्थः। समयबंधाद्यनंतरं विमतिविषयत्वज्ञानं स्मृतिरूपं तदुत्तरक्षणे च परामर्शः। तदुत्तरक्षणेऽनुमितिरित्यंगीकारेण विमति विषयत्वज्ञानस्यैव विनश्यदवस्थस्यानुमान कालवृत्तित्वेनपक्षतावच्छेदकत्वं युक्तमितिभाव इत्याहुः। गुरुचरणास्तु। तज्ज्ञानं वेत्यस्यात्रास्माकं विमतिर्जाताऽभूदित्येवंरूपविमतिविषयत्वज्ञानमनुव्यवसायरूपमित्यर्थः। एवं रूपं च ज्ञानमस्मन्मते साक्षिरूपमिति तस्यानुमितिकाले जागरूकत्वाद्युक्तं विशेषणत्वमित्युपदिशंति।

विमतेरेव पक्षतावच्छेदकत्वे वृद्धसंमतिमाह॥ अत एवेति॥ विमतेरेव पक्षतावच्छेदकत्वसिद्धचर्थ मवच्छेदकांतराणि निराचष्टे॥ नत्वित्यादिना॥ अवच्छेदकाभाव इति॥ आदिपदग्राह्यतावच्छेदकाभाव इत्यर्थः। असंकुचितेनेति॥ ब्रह्मतुच्छसंग्रहाविरोधित्वादिति भावः। प्रपंचशब्दस्य विश्वविस्तारवाचित्वात्प्रपंचो विश्वविस्तारस्तत्समुदाय इति यावत्। सःपक्षीभूतो विश्वसमुदायः समुदायिनान्यः तत्स्वरूपो वेत्याशंक्याद्ये दोषमाह॥ प्रपंचशब्देनेति॥ वियदादिविश्वान्यो यस्तत्समुदाय इत्यर्थः॥ वियदादीति॥ समुदायस्यैव मिथ्यात्वं प्राप्तमितिभावः। समुदायस्य समुदाय्यनतिरिक्तत्वाद्वियदादिविश्वस्यैव पक्षत्वमिति द्वितीयपक्षेत्वाह॥

वियदादीनामेवेति॥ अवच्छेदकेति॥ आदिपदग्राह्यतावच्छेदकेत्यर्थः॥ उक्तदोषादिति॥ असंकुचितेना दिपदेनात्मादेरपि ग्रहणापातादित्युक्तदोषादित्यर्थः। ननु वियदित्येव पक्षनिर्देशः कर्तुं न शक्यते। तथात्वे घटादेः पक्षबहिर्भावेन तत्र दृश्यत्व सत्त्वेपि मिथ्यात्वाभावेन व्यभिचारापत्तेरित्यत आह॥ घटादिस्त्विति॥ न हि पक्षे पक्षतुल्ये वा व्यभिचार इत्याशयः। कुतो न वाच्यमिति चेदुच्यते। घटादेः पक्षतुल्यत्वेन निश्चितव्यभिचाराभावेपि संदिग्धानैकांत्यं स्यादेव। ननु संदिग्धानैकांत्यमपि कथं। निश्चितसाध्याभाववति हेतु संदेह रूपस्य तल्लक्षणस्याभावात्। घटादौ साध्याभावस्य संदिग्धत्वाद्धेतोर्निश्चितत्वादिति चेन्न। निश्चितसाध्याभाववति हेतुसंदेह इव निश्चितहेतुमति साध्यसंदेहेपि संदिग्धानैकांत्यात्। व्यभिचारोहि हेतुसत्त्वसाध्याभावरूपव्यंशः। तयोर्मध्ये एकस्य निश्चयेऽपरस्य संदेहे संदिग्धानैकांत्यं। घटादौ तु हेतोर्निश्चयात्साध्यस्य च संदिग्धत्वात्संदिग्धानैकांत्यमपरिहार्यमित्याह॥ निश्चितेति॥ नन्वस्य संदिग्धानैकांत्यलक्षणत्वे अनुमानमात्रोच्छेदः। सर्वानुमाने साध्यसंदेहस्यांगत्वादित्यत उक्तं॥ पक्षादन्यत्रेति॥ पक्षादन्यत्र निश्चितहेतुमति साध्यसंदेहेपीत्यन्वयः। पक्ष एव साध्यसंदेहस्यांगत्वं तदन्यत्र तु साध्यसिद्धिरेवांगं। तथा च घटे मिथ्यात्वसाधकस्य प्रमाणस्यैतदनुमानव्यतिरिक्तस्याभावान्मिथ्यात्व बाधकप्रमाणाभावाच्चास्ति पक्षत्वमितिपक्षादन्यत्वघटितसंदिग्धानैकांत्यलक्षणाभावान्न घटे व्यभिचारोस्तीतिवियदित्येव पक्षनिर्देशोस्त्वित्याशंक्य निराकरोति॥ प्रतिज्ञामिति॥ प्रतिज्ञाविषयत्वं पक्षत्वं। न चसाध्येऽतिव्याप्तिः। प्रतिज्ञाविशेष्यत्वमित्यर्थकरणात्॥ सत्त्वेपीति॥ तथाच न पक्षादन्यत्वमस्तीति न संदिग्धानैकांत्यमिति वियदित्येवास्तु पक्षनिर्देश इत्याशयः॥ एवं पक्षनिर्देशस्येति॥ वियदित्येव पक्षनिर्देशस्येत्यर्थः॥ घटादिसाधारणेति॥ ब्रह्मप्रमान्येनेत्यादिरूपेत्यर्थः। तथाच वियन्मात्रस्य पक्षत्वेपि उक्तविधया न घटे संदिग्धानैकांत्यं। तथापि घटादिसाधारणविप्रतिपत्त्यनुसारेणैव पक्षनिर्देशे कर्तव्ये तद्बहिर्भावेन वियन्मात्रस्यैव पक्षतया निर्देशस्या कौशलव्यंजकत्वादिति भावः। ननु विप्रतिपत्तिधर्मितावच्छेदकस्यैवानुमाने पक्षतावच्छेदकताया उक्तरीत्या संभवेपि अनुमाने या पक्षतावच्छेदिका लध्वी विमतिः सैव विप्रतिपत्तौ धर्मितावच्छेदिकास्तु। अतः किमुक्तकुसृष्टि युक्तब्रह्मप्रमान्येने त्यादिधर्मितावच्छेदकाश्रयणेनेत्यत आह। विप्रतिपत्तौत्विति। अनुगतावच्छेदकमंतरेण विमतेर्नियतविषयत्वा संभवादनुगतावच्छेदकाश्रयणेनेत्यत आह। विप्रतिपत्तौत्विति। अनुगतावच्छेदकमंतरेण विमतेर्नियतविषयत्वा संभवादनुगतावच्छेदकेनानुगतानियतविषया विमतिरेव विप्रतिपत्तौ धर्मितावच्छेदिकेति वक्तव्यं। तत्रानुगमको धर्मः किं प्रमान्येनेत्याद्युक्तरूपो वा विमतिरेव वा। नाद्यः। उक्तकुसृष्टियुक्तत्वेन तदनादरणात्। आदरेवास एव विप्रतिपत्तौ धर्मितावच्छेदकोस्तु कृतं तद्ग्रहाधीनग्रहया विमत्याधर्मितावच्छेदकत्वेन कल्पितया। तद्द्वितीयः। विमत्यानुगतीकृता विमतिर्धर्मितावच्छेदिकेत्युक्तौ स्वेनानुगतीकृतस्य स्वस्यैव धर्मितावच्छेदकत्वप्राप्या आत्माश्रयस्य स्पष्टत्वादिति भावेनाह॥ आत्माश्रयादिति॥

एतत्पटानाद्यभावत्वादिति॥ मृत्पिंडनिष्ठे घटध्वंसेव्यभिचारवारणायानादीति विशेषणं। मृत्पिंडनिष्ठ घटप्रागभाववारणाय पटेति। पटांतरप्रागभाववारणायैतदिति। एतत्पटान्योन्याभाववदिति॥ एतत्तंतुरेतत्पटो नेति प्रतीतेरितिभावः। ननु तर्हि एतत्पटाभावत्वादित्येवास्तु। न चैतत्पटध्वंसे व्यभिचार इति वाच्यं। एतत्पटध्वंसे साध्यस्यापि सत्त्वेन व्यभिचाराभावात्। अतोऽनादीति पदं व्यर्थमिति चेत्तत्राह॥ तंत्विति॥ समवायिकारणनाशजन्यकार्यनाशे उक्तहेतोः सत्त्वेपि साध्याभावाद्व्यभिचारः स्यात्। अतोऽनादीति

विशेषणमित्यर्थः। विमतं वा स्वसमानाधिकरणेत्यन्वयः। वक्ष्यमाणसाध्यवत्त्वतदभावाभ्यां विमतमित्यर्थः। प्रकारांतरेण पक्षं निर्दिशति। ब्रह्मेत्यादि॥ अव्याप्यवृत्तित्वमादायार्थां तरतापरिहाराया व्याप्यवृत्तित्वानधिकरणमित्युक्तं। इदं च पक्षद्वयेपि ज्ञेयं। ननु कथमनेन मिथ्यात्व सिद्धिरित्यत आह॥ अत्रचेति॥ अव्याप्यवृत्तित्वानधिकरणमिति पक्षविशेषण बलात् अव्याप्यवृत्तित्वेन पक्षे साध्योपसंहारायोगेन स्वसमानाधिकरणव्याप्यवृत्त्यत्यंताभावप्रतियोगित्वरूपं मिथ्यात्वमेव पक्षे सिद्ध्यतीत्यर्थः। अत्रोत्तरत्र च पक्षधर्मबलादित्येव पाठः। पक्षधर्मताबलादिति पाठे तु स्वार्थे तल्प्रत्ययो व्याख्येयः। विमतमित्येवोक्तौ नित्यद्रव्यात्यंताभावस्य केवलान्वयित्वेन सिद्धसाधनतापत्तेर्विमतमित्येतद्विवृणोति॥ नित्यद्रव्यान्यदिति॥ वृत्तिमदित्यर्थः। दृष्टांते साध्यवैकल्यं परिहरति॥ तार्किकमत इति॥ अवृत्तित्वेनेति॥ समवायेन संबधेन कुत्राप्य वृत्तित्वेनेत्यर्थः। आत्मनि व्यभिचारशंकामपाकरोति॥ अत एवेति॥ नित्यद्रव्याणामवृत्तित्वेन तदत्यंताभावस्य केवलान्वयित्वादेवेत्यर्थः। आत्मनोपि नित्यद्रव्यतयाऽवृत्तित्वेन तदत्यंताभावस्यापि केवला न्वयित्वेन साध्यस्यापि सत्त्वादित्यर्थः। ननु कथमनेन मिथ्यात्वसिद्धिः नित्यत्वेनापि साध्यपर्यवसानोप पत्तेरित्यत आह। मिथ्यात्वसिद्धिस्त्विति। वृत्तिमत्त्वार्थकनित्यद्रव्यान्यत्वेन पक्षविशेषणात् अवृत्तित्वमादाय पक्षे साध्योपसंहारायोगात्। स्वसमवायिकारणे वृत्तिमतामपि पदार्थानां अत्यंताभावस्य केवलान्वयित्वे साधिते सति स्वसमवायिकारणेपि तदत्यंताभावप्राप्त्या मिथ्यात्व सिद्धिरितिभावः।

आत्मत्वावच्छिन्नेति॥ आत्मत्वावच्छिन्नधर्मिताकात्मे भेदप्रतियोगिनः प्रपंचस्यापारमार्थिकत्वसिद्ध्या मिथ्यात्व सिद्धिरितिद्रष्टव्यं। आत्मानात्मानौ शुक्तिरूप्यं नेति प्रतीतेः शुक्तिरूप्यप्रतियोगिके आत्मानात्मधर्मिके भेदे सिद्धसाधनत्ववारणायात्मभेद इत्यनुक्त्वा आत्मत्वावच्छिन्नधर्मिताको भेद इत्युक्तं। आत्मत्वेन व्यावर्तिता या धर्मिता तत्कः तद्वानित्यर्थः। तस्मिंश्च भेदेनात्मत्वं धर्मितावच्छेदकमनात्मन्य भावेन न्यूनवृत्तित्वात् किंतु द्वित्वमेवेति भावः॥ अनात्ममात्रेति॥ शुक्तिरूप्यमात्मानात्मानौ नेति प्रतीतेः शुक्तिरूप्यधर्मिके आत्मानात्मप्रतियोगिके भेदे परमार्थसदात्म प्रतियोगिकत्वसद्भावेन साध्याभावाव्यभिचारवारणाय मात्रपदं॥ शुक्तिरूप्येति॥ तत्प्रतियोगिकात्मधर्मिकभेदवदित्यर्थः। अत्र सामान्यं पक्षः विशेषो दृष्टांत इत्यवधेयं।

४. मिथ्यात्वनिर्वचनम्

मिथ्यात्वं च यद्यपि नात्यन्तासत्त्वम्। अपसिद्धान्तात्। नाप्यनिर्वाच्यत्वम्, अप्रसिद्धेः। नापि सद्विविक्तत्वम्, सतोऽपि सदन्तरविविक्तत्वात्। नापि सत्त्वानधिकरणत्वम्, निर्धर्मके ब्रह्मण्यपि सत्त्वात्। न च निर्धर्मकत्वादेव तत्र सत्त्वानधिकरणत्वमपि नेति वाच्यम्। निर्धर्मकत्वरूपहेतोः सत्त्वानधि-करणत्वाभावरूपसाध्यस्य च भावाभावाभ्यां व्याघातेनाभावरूपधर्मनिषेधायोगात्। अन्यथाऽसत्त्वानधिकरणत्वस्यापि तत्राभावेन तद्व्यावृत्त्यर्थमनिर्वाच्यलक्षणे सत्त्वानधि करणत्वरूपविशेषणायोगात्। न च प्रमित्यविषयत्वं मिथ्यात्वम्, ब्रह्म तु

वेदान्तजन्यवृत्तिव्याप्यमिति वाच्यम्। शुक्तिरूप्यादेरपि व्यवसायद्वारा अनुव्यवसायं प्रति साक्षाच्च बाधकज्ञानं प्रति मिथ्यात्वनिषेध्यत्वेन विषयत्वात्। सत्त्वप्रकारकप्रमां प्रति साक्षादविषयत्वं चेद्, आवश्यकत्वात् सत्त्वाभाव एव मिथ्यात्वं स्यात्। नापि भ्रान्तिविषयत्वम्। ब्रह्मणोऽप्यधिष्ठानत्वेन तद्विषयत्वात्। भ्रान्तिमात्रविषयत्वस्य चोक्तरीत्या शुक्तिरूप्यादावप्यभावात्। अध्यस्ततया भ्रान्तिविषयत्वं चेद्, विशेष्यवैयर्थ्यात्। विशेषणमात्रस्य च निरुच्यमानमिथ्यात्वानतिरेकात्। नापि बाध्यत्वम्। तद्धि न तावदन्यथा विज्ञातस्य सम्यग्विज्ञातत्वम्। मिथ्यात्वक्षणिकत्वादिना विज्ञातस्य प्रपंचस्य सत्यत्वस्थायित्वादिना विज्ञातत्वेन सिद्धसाधनात्। नापि बाधकज्ञानविषयत्वम्, ब्रह्मण्यतिव्याप्तेः। नापि नास्ति नासीन्न भविष्यतीति बोध्यमानाभावप्रतियोगित्वेन तद्विषयत्वम्। मन्मते ह्यापणस्थरूप्यस्यैव तत्प्रति योगित्वात्। नापि ज्ञाननिवर्त्यत्वम्। उत्तरज्ञाननिवर्त्यपूर्वज्ञानादाविव सत्त्वेऽप्युपपत्तेः। नापि स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्। अव्याप्यवृत्तिसंयोगादेरिव सत्त्वेप्युपपत्तेः। नाप्यव्याप्यवृत्तित्वानाश्रय- स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्, आरोपितस्य संयोगस्यात्यन्ताभावस्तु अनारोपितस्य संयोगस्यात्यन्ताभावादन्य एव व्याप्यवृत्तिरिति वाच्यम्। शुक्तिरूप्यादौ तदभावादित्युक्तत्वाद्। नाप्यविद्या तत्कार्ययोरन्यतरत्वम्। अनादौ जीवब्रह्मविभागादावव्याप्तेः। परमतेऽज्ञानस्य तत्कार्य भ्रान्त्यादेश्च सत्यत्वेनार्थान्तरत्वाच्च। शुक्तिरूप्यादावनिर्वाच्याविद्याकार्यत्वस्य प्रतिवाद्यसंमतेश्च।

तथापि मिथ्याशब्दोऽनिर्वाच्यवचन इति पंचपादिकारीत्या सदसत्त्वानधिकरण त्वरूपानिर्वाच्यत्वं मिथ्यात्वम्। तत्प्रसिद्धिश्च ख्यातिवादे वक्ष्यते॥ १॥

यद्वा बाध्यत्वमनिर्वाच्यत्वम्। तच्च शुक्तिरूप्यादिरेव पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगीति मते प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्। उक्तं हि विवरणे– ''प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य'' इति। उक्तं च वार्तिके–

तत्त्वमस्यादिवाक्यार्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति॥ इति ।

प्रतिपन्नत्वं च न प्रमितत्वं, येन विरोधः। नापि भ्रान्तिप्रतिपन्नत्वम्, येन सिद्धसाधनम्। किन्तु प्रतीतत्वमात्रम्। सर्वस्मिंश्च प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं विवक्षितम्। सत्त्वपक्षे रजतत्वं प्रतिपन्नोपाधौ शुक्तौ निषिध्यमानमपि रजते न निषिध्यत इति न सिद्धसाधनम्॥ २॥

मतान्तरे तु बाध्यत्वं ज्ञानत्वेन ज्ञाननिवर्त्यत्वम्। उक्तं हि विवरणे– "अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः" इति। अनुमितिं प्रति मनसो मनस्त्वेन हेतुत्वेऽपीन्द्रियत्वेनाहेतुत्ववत् पूर्वज्ञानादिकं प्रति उत्तरस्य ज्ञानेच्छादेरुत्तरात्मविशेषगुणत्वेन निवर्तकत्वेऽपि ज्ञानत्वेनानिवर्तकत्वात्॥ ३॥

अथवा चित्सुखरीत्या स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्। संयोगतदत्यन्ताभावयोरवच्छेदकभेदेन भिन्नाश्रितत्वस्यैवानुभवेन सत्त्वपक्षे सामानाधिकरण्याभावात्। शुक्तिरूप्यादेरपि पारमार्थिकत्वाकारेण स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वाच्च। न चाधिकरणशब्देन तात्त्विकाधि- करणोक्तौ समवायिनि संयोगिनि वा तत्त्वतस्तदधिकरणे तदत्यन्ताभावायोगेनासम्भवः। अधिकरणत्वेन प्रतीतत्वमात्रोक्तौ चान्यथाख्यातिपक्षे रजतत्वादेः स्वाधिकरणत्वेन प्रतीतशुक्त्यादावत्यन्ताभावस्य सत्वात्सिद्धसाधनमिति वाच्यम्, स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वस्य विवक्षितत्वात्। तत्पक्षे च रजतत्वादिकं स्वात्यन्ताभावानधिकरणे रजतेऽपि भाति॥ ४॥

यद्वाऽऽनन्दबोधोक्तरीत्या सद्विविक्तत्वं मिथ्यात्वम्। तच्च सद्रूपत्वाभावः। ब्रह्म च सत्तारहितमपि सामान्यमिव सद्रूपम्॥ ५॥

न्यायामृततरङ्गिणी

मिथ्यात्वं चेति। यद्यपीत्यस्य व्यवहितेनाग्रेतनेन तथापीत्यनेन सम्बन्धः। अपसिद्धान्तादिति। मिथ्यात्ववादिभिरपि प्रपञ्चस्यासद्वैलक्षण्याङ्गीकारादित्यर्थः। अप्रसिद्धेरिति। सत्यत्ववादिना शुक्तिरूप्यादेरप्यनिर्वाच्यत्वानभ्युपगमात् तार्किकाभिमतान्यथाख्यातिपक्षे

रूप्यस्यापि सत्यत्वात्, सिद्धान्त्यभिमतान्यथाख्यातिपक्षे शुक्तेरेवात्यन्तासद्रूप्यात्मना भानाङ्गीकारेण रूप्यस्य सदसद्वैलक्षण्यरूपानिर्वाच्यत्वस्याप्रसिद्धेरित्यर्थः। सतोऽपीति। सद्विशेषभेदस्य सत्यपि सम्भवादित्यर्थः। निर्धर्मक इति। तथाच सत्त्वानधिकरणत्वेऽपि ब्रह्मवत् सदूपत्वेनाप्यमिथ्यात्वोपपत्तिरित्यर्थः। न चेति। सत्त्ववत् सत्त्वानधिकरणत्वमपि धर्मो ब्रह्मणि नास्तीत्यर्थः। निर्धर्मकत्वहेतोरिति। निर्धर्मकत्वरूपहेतोः पक्षे सत्त्वे निर्धर्मकत्वरूपधर्मस्य ब्रह्मणि सत्त्वेन तत्र निर्धर्मकत्वस्य व्याघातः। अथ निर्धर्मकत्वं हेतुः पक्षे नास्ति, तथापि ब्रह्मणो न निर्धर्मकत्वम्, सधर्मकत्वस्यैव प्राप्तेः। एवं सत्त्वानधिकरणत्वाभावरूपसाध्यस्य पक्षे सत्त्वे तादृशसाध्यरूपधर्मलाभेननिर्धर्मकत्वरूपहेतु व्याघातः। अथ सत्त्वानधिकरणत्वाभावरूपसाध्यं पक्षे नास्ति तथापि सत्त्वानधिकरणत्व रूपधर्मलाभेननिर्धर्मकत्वरूपहेतोस्तेन व्याघातः, सत्त्वानधिकरणत्वाभावरूपसाध्येन च व्याघात इत्यर्थः। अभावरूपेति। तथाच ब्रह्मणोऽपि सत्त्वानधिकरणत्वे नातिव्याप्त्यापत्त्या न तन्मिथ्यात्वलक्षणमित्यर्थः। ब्रह्मण्यभावरूपधर्मानङ्गीकारे बाधकमाह – अन्यथेति। अनिर्वाच्यलक्षण इति। सदसत्त्वानधिकरणत्वरूपानिर्वाच्यलक्षण इत्यर्थः। ननु अदृश्यत्वेन प्रमित्यविषये ब्रह्मण्यतिव्याप्तिरित्यत आह ब्रह्मत्विति। ब्रह्मणो वृत्तिव्याप्यत्वेऽपि चिदविषयत्वादृश्यत्वोपपत्तिरिति भावः। शुक्तिरूप्यादेरिति। प्रमित्यविषयत्वं वा साक्षात् प्रमित्यविषयत्वं वा मिथ्यात्वं शुक्तिरूप्यादौ नास्ति इति दृष्टान्तः साध्यविकल इत्यर्थः। आवश्यकत्वादिति। उपलक्षणमेतत्। स्वाभावसत्त्वप्रकारकप्रमारूपबाधकज्ञानं प्रति साक्षाद् विषये रूप्यादौ साध्यवैकल्यं च द्रष्टव्यम्। ब्रह्मणोऽपीति। तस्य जगद्भ्रमाधिष्ठानत्वेन परैरङ्गीकारादित्यर्थः। उक्तरीत्येति। अनुव्यवसायादिरूपप्रमाविषयत्वेनेत्यर्थः। विशेष्येति। अध्यस्तत्वमेव तल्लक्षणमस्त्वित्यर्थः। ननु तावदेव तल्लक्षणमस्त्वित्यत आह – विशेषणेति। अध्यस्तत्वस्य लक्ष्यत्वेन लक्षणत्वायोगादित्यर्थः। तद्धीति। बाध्यत्वम्। ब्रह्मणीति। क्षणिकत्वबाधकस्थायित्वज्ञानविषयतया प्रपञ्चस्य सिद्धसाधनदोषोऽपि बोध्यः। नापीति। 'नास्ती'त्यादिप्रकारत्रयेण बोध्यमानो यो निषेधः, कालत्रयसंसृष्ट इति यावत्, तत्प्रतियोगित्वमित्यर्थः। मन्मत इति। मिथ्यात्वं निर्वक्तुर्मायावादिनो मम मत आपणस्थरूप्यस्यैव तादृशनिषेधप्रतियोगित्वम्, न शुक्तिरूप्यस्य तस्य धीकाले शुक्त्यादौ सत्त्वेन तत्र तस्य तादृशनिषेधानङ्गीकारात्। तथाच शुक्तिरूप्यादौ साध्यवैकल्यमित्यर्थः। उपलक्षणमेतत्। बाध्यत्वेनानङ्गीकृते तुच्छे तदापत्तिश्च बोध्या। उत्तरेति। तथाच ज्ञानादौ पक्षैकदेशे सिद्धसाधनम्, घटादावर्थान्तरं चेति भावः। नापि स्वेति। बाध्यत्वस्याननुषङ्गाय पुनर्मिथ्यात्वोक्तिः। अव्याप्यवृत्तीति। तथाच पूर्ववत् सिद्धसाधनार्थान्तरते इति भावः। नाप्यव्याप्येति।

संयोगात्यन्ताभावस्यापि गुण-कर्मावच्छेदेन व्याप्यवृत्तित्वाधिकरणतया तत्प्रतियोगिनि संयोगादौ सिद्धसाधनतावारणायाव्याप्यवृत्तित्वानाश्रयेति निषेधद्वयान्तर्भावः। ननु आरोपितसंयोगस्यात्यन्ताभावोऽपि संयोगात्यन्ताभावत्वादव्याप्यवृत्तित्वाश्रय एव इति तदनाश्रयात्यन्ताभाव प्रतियोगित्वं मिथ्याभूत आरोपिते संयोगेऽव्याप्तमित्यत आह – आरोपितस्येति। शुक्तिरूप्यादाविति। 'नेदं रजतमि'ति निषेधं प्रत्यापणस्थरूप्यस्यैव प्रतियोगितया शुक्तिरूप्यादेः स्वसमानाधिकरणनिषेधायोगादित्यर्थः। नाप्यविद्येति। प्रत्येकाव्याप्तिवारणायान्यतरत्वान्तर्भावः। अनादाविति। तदुक्तं वार्तिके –

"जीव ईशो विशुद्धा चिद् भेदस्तस्यास्तयोर्द्वयोः।
अविद्या-तच्चितोर्योगः षडस्माकमनादयः॥" इति।

परमत इति। सत्यत्ववादिमते। अज्ञानस्य भ्रमप्रागभावरूपस्य तत्कार्यभ्रान्त्यादेश्च प्रागभावरूपाविद्या-तत्कार्यान्यतरत्वेऽपि सत्यतया तद्वद् घटादेरपि सत्यत्वेनाप्युक्तसाध्योपपत्त्याऽर्थान्तरत्वमित्यर्थः। भ्रमप्रागभावभ्रमादौ सिद्धसाधनतापि द्रष्टव्या। ननु अनिर्वाच्या विद्यातत्कार्यान्यतरत्वं लक्षणार्थः, अतो नोक्तदोष इत्यत आह – शुक्तिरूप्यादाविति। तथाचाप्रसिद्धिरित्यर्थः। तथापीति। एतस्य यद्यपीत्यनेन पूर्वेण सम्बन्धः। पूर्वोक्ताप्रसिद्धिं निराकरोति–तत्प्रसिद्धिश्चेति। सत्त्वम्, असत्त्वात्यन्ताभावसमानाधिकरणात्यन्ताभावप्रतियोगि, व्यतिरेकिधर्मत्वात् गोत्ववत्, प्रमेयत्वादेरप्यतयन्ताभावप्रतियोगित्वपक्षे धर्मत्वादित्येव हेतुः। न च घटावृत्तित्वमुपाधिः। घटत्वे साध्याव्याप्तेः। न च घटेतरवृत्तित्वरूपपक्षधर्मावच्छिन्न साध्यव्यापकं घटमात्रावृत्तित्वमुपाधिः पक्षेऽपि। सत्त्वादित्यादि वक्ष्यत इत्यर्थः।

ननु सत्त्वविशिष्टस्यासत्त्वस्याभावः सदसत्त्वानधिकरणत्वम्। तच्च विशेष्याभावात् सत्यत्वपक्षेऽपि सिद्धम्, अतः सिद्धसाधनम्, इत्यत आह – यद्वेति। तच्चेति। बाध्यत्वमित्यर्थः। तुच्छेऽतिव्याप्तिवारणाय प्रतिपन्नोपाधाविति विशेषणम्। तुच्छस्य प्रतीत्यभावेन न प्रतिपन्नोपाधिरित्यभिप्रायः। शुक्तिरूप्यादौ दृष्टान्ते साध्यवैकल्यपरिहाराय तस्यात्यन्ताभाव प्रतियोगित्वमुपपादयितुमुक्तं 'शुक्तिरूप्यादिरेवे'त्यादि 'मते' इत्यन्तम्। तत्त्वमस्यादीति। मात्रशब्देन ज्ञानस्याज्ञाननिवर्तकतायामितरनिरपेक्षत्वमुक्तम्। "नासीदि"त्यस्य नञो न निवृत्तिरर्थः, किंतु संसर्गाभावमात्रम्। तस्य च – 'आसीदि'त्यादिना कालत्रयसम्बन्धबोधनेन त्रैकालिकत्वसिद्धिः इति निरुक्तमिथ्यात्वे सम्मतत्वसिद्धिः।

ननु प्रतिपन्नोपाधिस्थले निषेधस्य ब्रह्मभिन्नस्य तात्त्विकत्वेऽद्वैतहानिः, व्यावहारिकत्वे विरोधः, प्रातिभासिकत्वे सिद्धसाधनमित्यतः पक्षान्तरमाह – मतान्तरे त्विति।

रूप्योपादानमज्ञानं स्वकार्येण वर्तमानेन विलीनेन वा सहाधिष्ठानसाक्षात्कारात् निवर्तते; तत्तद्भ्रमोपादानाज्ञानानां भेदाभ्युपगमात्, इति न दृष्टान्ते साध्यवैकल्यम्। 'मुद्गरपातानन्तरं घटो नास्ती'ति प्रतीतिवदधिष्ठानज्ञानानन्तरं 'शुक्त्यज्ञानं तद्गतञ्च रूप्यं नास्ती' ति प्रतीतेः सर्वसम्मतत्वादिति मत इदं लक्षणमुच्यत इत्यभिप्रेत्योक्तम् – मतान्तरे त्विति। प्रविलीनेनेति। मुद्गरपातानन्तरं घटस्य नात्यन्तिकी निवृत्तिः, किन्तु प्रविलयमात्रमित्यभ्युपगमादतीतघटादेरपि ज्ञानादेव निवृत्तिरित्यर्थः। उत्तरज्ञाननिवर्त्ये पूर्वज्ञानादौ सिद्धसाधनतां वारयति – अनुमितिं प्रतीति।

ननु ज्ञाननिवर्त्यत्वं ज्ञानजन्यनिवृत्तिप्रतियोगित्वम्। तच्च न रूप्येऽस्ति। शुक्तिज्ञानानन्तरं रूप्यं नास्तीति प्रतीतावपि रूप्यं निवृत्तमित्यप्रतीतेः, तथाच साध्यवैकल्यम् इत्यतः पक्षान्तरमाह – अथवेति। स्वसमानाधिकरणेति। स्वाधिकरणाधिकरणकेत्यर्थः। संयोगादौ सिद्धसाधनतां वियदादौ चार्थान्तरतां वारयति – संयोगेति। बाधात् नाव्याप्यवृत्तित्वसिद्धिरिति भावः। रूप्यादौ साध्यवैकल्यशङ्कां वारयति – शुक्तिरूप्यादेरिति। आविद्यकतया विद्यमानमपि रूप्यं पारमार्थिकत्वेन व्यधिकरणेन धर्मेण स्वसमानाधिकरणनिषेधप्रतियोगि इति न तत्र साध्यवैकल्यमित्यर्थः। स्वात्यन्ताभावाधिकरण एवेति। एतेन प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमित्यनेन पूर्वोक्तेनास्य पुनरुक्तिरपि परिहृता।

ननु एवमत्यन्तासत्त्वापत्तिः। न च अत्यन्तासतः प्रतीयमानत्वं नेति वाच्यम्; 'शशविषाणमि'त्यादिशब्दाभासादिना तस्यापि प्रतीतेरित्यतो लक्षणान्तरमाह – यद्वेति। सतोऽपि सदन्तरविविक्तत्वात् सिद्धसाधनमित्यत आह तच्चेति। निर्धर्मके ब्रह्मणि सद्रूपत्वरूपधर्माभावादतिव्याप्तिरित्यत आह ब्रह्म चेति।

न्यायामृतकण्टकोद्धारः

अपसिद्धान्तादित्युपलक्षणम्। आश्रयासिद्धेश्चेत्यपि द्रष्टव्यम्। अप्रसिद्धेरिति। निरुक्तिविरहस्य तन्निमित्तविरहस्य वा सदसद्विलक्षणत्वस्य वाऽनिर्वाच्यत्वस्योभयसिद्धभ्रान्तिविषयेऽद्याप्यसिद्धेरित्यर्थः। सतोऽपीति। तथाच सिद्धसाधनमिति भावः। निर्धर्मक इति। तथाचार्थान्तरमिति भावः। निर्धर्मकत्वरूपहेतोरिति। ननु भावपक्षे हेतु-साध्यरूपधर्मद्वयाङ्गीकारस्य निर्धर्मकत्वाङ्गीकारे व्याघातः सम्भवति। अभावपक्षे तु कथं व्याघातः? इति चेत्, न; असिद्धेन साधनस्य बाधितसाधनस्य च भावाभावयोरिव व्याहतत्वात्।

यद्वा – निर्धर्मकत्व-सत्त्वानधिकरणत्वयोरभावे सधर्मकत्व सत्त्वानधिकरणत्वरूपधर्मद्वयापत्त्या निर्धर्मकत्वाङ्गीकारे व्याघात इत्यर्थः। अन्ययेति। अभावरूपधर्मानङ्गीकार इत्यर्थः। शुक्तिरूप्यादेरिति। तथाच दृष्टान्ते साध्यवैकल्यमित्यर्थः। आवश्यकत्वात्सत्वाभाव एवेति। यत्किञ्चित्पुरुषीयतादृश प्रमाविषयत्वाभावस्य सत्त्वेऽपि सम्भवात् स्व-परसाधारणसकलतादृशप्रमाविषयत्वाभावो वाच्यः। स च सत्त्वाभावादेव ज्ञेय इत्यावश्यकतेत्यर्थः। एतच्चोपलक्षणम् – लघुत्वादित्यापि द्रष्टव्यम्। लक्षणदोषस्तु सत्त्वप्रकारकज्ञानस्य प्रमात्वाभावेन तत्प्रत्ययविषयत्वस्य ब्रह्मण्यपि सम्भवादतिव्याप्तिः, अनुमाने चार्थान्तरमिति बोध्यम्। उक्तरीत्येति। व्यवसायद्वाराऽनुव्यवसायं प्रति विषयत्वमित्याद्युक्तरीत्येत्यर्थः। नापि बाधकज्ञानविषयत्वमिति। न च पूर्वाभेद इति वाच्यम्; पूर्वं ह्यन्यथा विज्ञातस्य विद्यमानप्रकारादन्यप्रकारेण ज्ञातस्य सम्यग्ज्ञानं स्वासाधारणधर्मपुरस्कारेण वा आरोप्याभाववत्तया वा ज्ञानमिति सामान्यं विवक्षितम्। अत्र तु आरोप्याभाववत्तयैवेति भेदः।

यद्वा पूर्वं प्रमारूपमेव बाधकं ज्ञानं विवक्षितम्। अत्र तु भ्रम-प्रमासाधारणं ज्ञानमात्रमिति भेदः। अत एव पूर्वं 'सम्यगि'ति पदम्। अत्र तु 'ज्ञानमात्रमि'ति। यद्वा, पूर्वमधिष्ठानमात्रनिष्ठं तत्, इह त्वध्यस्तादिसाधारणमिति भेदः। 'बोध्यमाने'त्यभावस्य त्रैकालिकत्वसिद्ध्यर्थमुक्तम्, न तु लक्षणप्रवेशेनेति भावः। मन्मत इति। तथाच शुक्तिरूप्यस्य प्रातीतिकत्वेन त्रैकालिकनिषेधप्रतियोगित्वासम्भवात् तत्रातिव्याप्तिरिति भावः। ननु आरोपितसंयोगेऽव्याप्तिः; तस्याव्याप्यवृत्तित्वाश्रयस्वसमानाधिकरणात्यन्ता-भावप्रतियोगित्वादित्यत आह – आरोपितस्येति। तदत्यन्ताभावस्यानारोपितसंयोगात्यन्ताभावादन्यत्वेन व्याप्यवृत्तित्वात् न तत्राव्याप्तिरिति भावः। उक्तत्वादिति। आपणस्थरूप्यस्यैव त्रैकालिकनिषेधप्रतियोगित्वेन शुक्तिरूप्येऽव्याप्तिरित्यर्थः। तत्त्वमस्यादीति। 'नासीदि'ति नञः नासीत् नास्ति न भविष्यतीति सम्बन्धः।

अज्ञानस्येति। अज्ञाननिवृत्तिर्बाध इत्युक्ते घटाद्यज्ञाननिवृत्तिरपि बाधः स्यात्। तस्या अपि ज्ञानेन जायमानत्वादित्यत उक्तम् – स्वकार्येणेति। किं वार्तमानिकस्वकार्यसहिताज्ञानस्य निवृत्तिर्वा बाधः? उत प्रविलीनकार्यसहिताज्ञानस्य? नाद्यः; विपर्ययोत्पत्त्यनन्तरकालं मनसो विषयान्तरसञ्चारे समयान्तरे च शुक्तिलोचनसंप्रयोगाधीनाधिष्ठानज्ञानेनाज्ञाननिवृत्तौ वार्तमानिककार्यध्वंसाभावेनाव्याप्तेः। न द्वितीयः। वर्तमानसहिताज्ञाननिवृत्तौ तदभावात् इत्याशङ्क्य कार्याकारेण परिणताज्ञाननिवृत्तिर्बाध इत्यनुगतं लक्षणमुभयत्राप्यस्तीत्याह – वर्तमानेनेति। न च प्रविलीनस्य पुनः कथं निवृत्तिरिति वाच्यम्। न ह्येषां मते कार्यस्य सर्वथा नाशः। कार्याकारेण नष्टस्य कारणात्मना विद्यमानत्वात्, कार्यकारणयोरभेदात्। तथाच नष्टस्य पुनर्निवृत्तिः सम्भवतीति भावः। एकस्यैव रूपान्तरेण कारणत्वं रूपान्तरेण कार्यत्वं च क्वोपलब्धम्? अत्राह – अनुमितिमिति।

ननु ब्रह्मणः सत्तारहितत्वेन सद्रूपत्वाभावरूपमिथ्यात्वसत्त्वादतिव्याप्तिरित्यत आह – ब्रह्म चेति।

न्यायामृतप्रकाशः

मिथ्यात्वं पंचधा निर्वक्तुं संभावितप्रकारानाशंक्य स्वयमेव दूषयति॥ मिथ्यात्वं च यद्यपीति॥ यद्यपीत्यस्य व्यवहितेनाग्रेतनेन तथापीत्यनेन संबंधः॥ अपसिद्धांतादिति॥ मिथ्यात्ववादिभिरस्माभिः प्रपंच स्यासद्वैलक्षण्यांगीकारा दित्यर्थः॥ अप्रसिद्धेरिति॥ सत्यत्ववादिनानिर्वाच्यवस्त्वनंगीकारेण मयैतादृश मिथ्यात्वसाधनेऽप्रसिद्धविशेषणतां मां प्रतिदद्यादित्यर्थः। एवमेवोत्तरत्रापि द्रष्टव्यं॥ निर्धर्मकत्वरूपहेतोरिति॥ ब्रह्मसत्त्वानधिकरणं न भवति निर्धर्मकत्वादित्यत्र निर्धर्मकत्वरूपहेतोः पक्षे सत्त्वे निर्धर्मकत्वरूपधर्मस्यैव प्राप्त्या निर्धर्मकत्वहेतुना व्याघातः। निर्धर्मकत्वस्य पक्षेऽभावे सधर्मकत्वस्यैव प्राप्त्या निर्धर्मकत्व हेतुना व्याघातः। एवं सत्त्वानधिकरणत्वाभावरूपसाध्यस्य पक्षे सत्त्वे तादृशसाध्यरूपधर्मस्यैव लाभेन निर्धर्मकत्वहेतुना व्याघात एव। तादृशसाध्यरूपधर्माभावे सत्त्वानधिकरणत्व रूपधर्मस्यैव प्राप्त्यापुनर्निर्धर्मकत्वहेतुना व्याघात एवेत्यर्थः। अभावरूपेति॥ तथा च सत्त्वानधिकरणत्वरूपेऽभाव रूपधर्मे ब्रह्मण्यंगीकार्ये मिथ्यात्वलक्षणमतिव्याप्तम् इत्यर्थः। ब्रह्मण्यभावरूपधर्मानंगीकारे बाधकमाह॥ अन्यथेति॥ तत्र ब्रह्मणि। अनिर्वाच्यलक्षणे सदसत्त्वानधिकरणत्व रूपे मिथ्यात्वलक्षणे॥ ब्रह्म त्विति॥ तथा च वेदांतजन्यवृत्तेः प्रमितित्वान्नब्रह्मण्युक्तलक्षणस्याऽतिव्याप्तिरितिभावः। शुक्तिरूप्यादावसंभवीदं लक्षणमित्याह॥ शुक्तीति॥ अनुव्यवसायमिति॥ शुक्तिरूप्यज्ञानवानहमित्यनुव्यवसायं प्रतीत्यर्थः। ननु साक्षात्प्रमित्यविषयत्वं मिथ्यात्वं विवक्षितं। शुक्तिरूप्यादिकं तु व्यवसायद्वारैवानुव्यवसायरूपप्रमितिविषयः। न साक्षात्। अतो नासंभव इत्यत आह॥ साक्षाच्चेति॥ सत्त्वप्रकारकेति॥ बाधकज्ञानरूपप्रमां प्रति निषेध्यत्वेन साक्षाद्विषयत्वादसंभवपरिहाराय सत्त्वप्रकारकेत्युक्तं अनुव्यवसायरूपसत्त्वप्रकारकप्रमां प्रति व्यवसायद्वारा विषयत्वेनासंभवपरिहाराय साक्षादित्युक्तं। आवश्यकत्वादिति॥ (घटादीनां सत्वप्रकारकप्रमां प्रति साक्षाद्विषयत्वमस्ति रूप्यादौ नास्तीति तावत्सिद्धं। तत्र किं नियामकमिति पृष्टे घटादौ सत्वस्य विद्यमानत्वात्सत्त्वप्रकारकप्रमां प्रति साक्षाद्विषयत्वमस्ति। शुक्तिरूप्यादौ तदभावान्नास्तीत्युत्तरं वक्तव्यं। तथा च सत्त्वप्रकारकप्रमां प्रति साक्षादविषयतावच्छेदकतया सत्त्वाभावस्यावश्यकत्वात्सत्त्वाभाव एव मिथ्यात्वं स्यात्। तथा च निर्धर्मके ब्रह्मणि अतिव्याप्तिरित्यर्थ इति सांप्रदायिकोऽर्थ इति पाठांतरं क्वचिद् दृश्यते।) रूप्यादीनां सत्त्वप्रकारक प्रमां प्रति साक्षाद्विषयत्वं नास्तीत्यत्र किं नियामकमिति पृष्टे साक्षात्सत्वप्रकारकप्रमां प्रति विषयतावच्छेदकतया सत्त्वस्य घटादौ दृष्टत्वाच्छुक्तिरूप्यादौ च तदभावादिति सत्त्वाभावस्यावश्यकत्वं वाच्यं। तथाच सत्त्वप्रकारकप्रमां प्रति साक्षादविषयत्वप्रयोजकतया सत्त्वाभावस्याऽऽवश्यकत्वात्सत्त्वाभाव एव मिथ्यात्वं स्यात्। तथा च निर्धर्मके ब्रह्मण्यतिव्याप्तिरिति सांप्रदायिकोऽर्थः॥ भ्रांतिमात्रेति॥ ब्रह्म तु प्रमां प्रत्यपि विषय इति भावः॥ उक्तरीत्येति॥ व्यवसायद्वारानुव्यवसायं प्रतीत्याद्युक्तरीत्येत्यर्थः। तथा च भ्रांतिमात्रविषयत्वाभावादव्याप्तिरिति भावः। अस्तु तर्ह्यध्यस्तत्वमेव मिथ्यात्वमित्यत आह॥ विशेषणमात्रस्य चेति॥ साधकं कारणमिति यथा पर्यायः तद्वदित्यर्थः। तथाचाऽत्माश्रयप्रसंग इति ज्ञातव्यं॥ नापि बाधकज्ञानविषयत्वमिति॥ नन्वन्यथाविज्ञातस्य सम्यग्विज्ञानविषयत्वबाधकज्ञानविषयत्वयोः को भेद इति चेन्न। सम्यग्विज्ञानविषयत्वमित्यस्य सम्यग्विज्ञाननिवर्त्यत्वमित्यत्रतात्पर्यं। अत्र बाधकज्ञाननिवर्त्यत्वे तात्पर्यं। तत्र तु ज्ञान निवर्त्यत्वमात्रे।

अत एवोत्तरज्ञाननिवर्त्यत्वं पूर्वज्ञानस्य वक्ष्यति। न हि तत्पूर्वज्ञानबाधकमिति व्यवह्रियते। अतो न दोष इत्याहुः।

अन्ये तु ब्रह्मण्यतिव्याप्तिरूपं दूषणांतरं वक्तुं पूर्वोक्तमेवाशंक्य निराकरोति॥ नापीति॥ तथा च ब्रह्मण्यतिव्याप्तेरपि बाधकज्ञानविषयत्वं न लक्षणमित्यपिशब्दान्वयो द्रष्टव्य इत्याहुः॥ ब्रह्मणीति॥ अधिष्ठानत्वेन तस्यापि बाधकज्ञानविषयत्वादिति भावः।

निषेध्यत्वेन बाधकज्ञानविषयत्वं मिथ्यात्वमतो न ब्रह्मण्यतिव्याप्तिरित्यभिप्रेत्य निषेध्यत्वं विव्रियते॥ नास्तीत्यादिना॥ मन्मत इति॥ मिथ्यात्ववादिनो मम मते आपणस्थं रूप्यमेव नास्तीत्यादिनिषेधप्रतियोगि। न तु पुरतः प्रतीयमानं रूप्यं। तत्र प्रातिभासिकसत्त्वांगीकारेणैवंविधनिषेधायोगात्। एवंविधनिषेध प्रतियोगिचापणस्थं रूप्यमेव। आभासस्य प्रसक्त्याऽनाभासस्य निषेध इत्यंगीकारात्। तथा च शुक्तिरूप्येऽसंभव इति भावः। सत्त्वेऽपीति। यथा तत्र ज्ञाननिवर्त्यत्वसद्भावेपि न तत्प्रयुक्तो मिथ्यात्वव्यवहारस्तद्वदिति भावः। तथा चार्थांतरतेति हृदयं॥ स्वेति॥ प्रतियोगीत्यर्थः। मृत्पिंडे व्यावहारिको घटोस्ति पारमार्थिकस्तदत्यंताभावोप्यस्तीत्याशयः। स्वसमानाधिकरणात्यंताभावप्रतियोगित्वोपपादनायाव्याप्यवृत्तीत्युक्तं॥ सत्त्वे पीति॥ तथा च तत्प्रयुक्तोऽमिथ्यात्व व्यवहारो यथा नास्ति तद्वदित्यर्थः। अव्याप्यवृत्तित्वा नाश्रयेत्यत्यंताभावविशेषणं। अनेन संयोगादेरिवेत्युक्तार्थांतरानवकाश इति हृदयं। व्याप्यवृत्तित्वाश्रयेत्येवोक्तौ गुणकर्माद्यवच्छेदेन संयोगात्यंताभावस्यापि व्याप्यवृत्तित्वात्पुनः संयोगादिकमादायार्थांतरता स्यादतो नञ्द्वयगर्भत्वं। तथाचाधिकरणभेदेनाभावभेदाभावात्। अन्यथा प्रागभावध्वंसयोर्भेदो न स्यात्। तथाच गुणकर्माद्यवच्छेदेन व्याप्यवृत्तिरेव संयोगात्यंताभावो द्रव्येऽव्याप्यवृत्तिरपि भवतीत्यव्याप्यवृत्तित्वानाश्रयत्वाभावान्नार्थांतरतेति भावः। ननु द्रव्ये व्याप्यवृत्तित्वाल्लक्षणमसंभवीति चेन्न। सर्वथा लक्षणाभाव एवासंभवो वाच्यः। न हि स संभवति। विशेषसामान्ययोरुभयोरपि सामान्याभावप्रतियोगित्वेन विरोधित्वाद्यथाकथंचिल्लक्षणसत्त्वे तत्सामान्या भाव प्रतीतेरयोगात्। नन्वस्य लक्षणस्यारोपिते संयोगे मिथ्यात्वेन लक्ष्येऽव्याप्तिः। अनारोपित संयोगप्रतियोगिकात्यंताभाववदारोपितसंयोगप्रतियोगितात्यंताभावोऽप्य व्याप्यवृत्तिरेवेत्यव्याप्यवृत्तित्वानाश्रयत्वा भावादुभयोरप्यत्यंताभावयोरेकत्वात्प्रति योगिभेदेनाभावभेदाभावादिति मंदाशंकानिरासायाह॥ आरोपितस्येति॥ अन्यत्वमेवाह॥ व्याप्यवृत्तिरिति॥ प्रतियोगिभेदेनाभावभेदादारोपितसंयोगस्य कुत्राप्यभावात्तदत्यंताभावो व्याप्यवृत्तिरेवेत्युक्तलक्षणसद्भावाल्लक्ष्ये मिथ्याभूते आरोपिते संयोगे नाव्याप्तिरिति भावः॥ तदभावादिति॥ शुक्तिरूप्यस्य पुरतः प्रतीयमानत्वेन स्वसमानाधिकरणनिषेधायोगादापणस्थस्य रूप्यस्यैव तत्प्रतियोगित्वं आभासस्य प्रसक्त्यानाभासस्य निषेध इति पूर्वमुक्तत्वादव्याप्तिरिति भावः॥ अनादाविति॥ अविद्याकार्यत्वाभावोपपादनायेदं विशेषणं। ''जीव ईशो विशुद्धा चिन्ग्रेदस्तस्यास्तयोर्द्वयोः। अविद्या तच्चितोर्योगः षडस्माकमनादयः'' इति चनादिति भावः॥ परमत इति॥ मिथ्यात्वं निर्वक्तुं मायावादिनोऽपेक्षया यः परस्तत्त्ववादी तन्मत इत्यर्थः॥ सत्त्वेनेति॥ एतावंतं कालं शुक्त्यज्ञानमासीद्रजतज्ञानमासीदित्यनुभवेनाज्ञानादेः सत्यत्वावगमात्तत्कार्यत्वेपि मिथ्यात्वालाभादिति भावः। नन्वनिर्वाच्याविद्याकार्यत्वं मिथ्यात्वं साध्यते तच्च। न परेषां संमतमित्याशंक्य दृष्टांते साध्यवैकल्यमाह॥ शुक्तिरूप्यादाविति॥ ननु शुक्तिरूप्यस्यासत्त्वेन

निरुक्तानिर्वाच्यत्वस्य तत्राभावाद्दृष्टांते साध्यवैकल्यमिति चेत्तत्राह॥ तत्प्रसिद्धिश्चेति॥ वक्ष्यत इति॥ सत्त्वासत्त्वे एकधर्मिनिष्ठात्यंताभावप्रतियोगिनी धर्मत्वात् रूपरसवत्। सत्त्वं असत्त्वानधिकरणनिष्ठं, असत्त्वं वा सत्त्वानधिकरणनिष्ठं धर्मत्वाद्रूपरसवदिति सामान्यप्रसिद्धिर्वक्ष्यत इत्यर्थः।

तच्चेति॥ बाध्यत्वमित्यर्थः। ननु शुक्तिरूप्यस्य कथं त्रैकालिकनिषेधप्रतियोगित्वं? तस्य प्रातिभासिकत्वांगीकारेण निषेधप्रसक्तेरेवाभावात्। आपणस्थरूप्यस्यैव निषेध्यत्वादतोऽसंभव इत्यत आह॥ पारमार्थिकत्वाकारेणेति॥ असद्विलक्षणस्वरूपमंगीकृत्येत्यर्थः॥ अभावेति॥ त्रैकालिकनिषेधेत्यर्थः॥ मिथ्यात्वस्येति॥ शुक्तिरूप्येऽपि सत्त्वादिति शेषः॥ तत्त्वमस्यादीति॥ पूर्वार्धस्य प्रकृतासंगतत्वात् ज्ञाननिवर्त्यत्वरूपमिथ्यात्वपक्ष एवायं श्लोक उदाहर्तव्यो नात्रेति यद्यपि तथापि अविद्यातत्कार्ययोः कालत्रयवृत्त्यभावप्रतियोगित्वप्रतीत्या त्रैकालिकनिषेधप्रतियोगित्वरूपे मिथ्यात्वे संमतिर्भवतीति युक्तं तदुदाहरणमिति ध्येयं। ननु प्रतिपन्नोपाधावित्यादेः कोऽर्थः। प्रतियोग्याधारत्वेन प्रमिताधिकरण निष्ठात्यंताभावप्रतियोगित्वं वा? उत प्रतियोग्यधिकरणत्वेन भ्रांतिप्रतीताधिकरणनिष्ठात्यंताभावप्रतियोगित्वं वेति विकल्प्याद्यं पराचष्टे॥ प्रतिपन्नत्वं चेति॥ विरोध इति॥ प्रतियोग्याधारत्वेन प्रमितेऽधिकरणे प्रतियोगिनः त्रैकालिकनिषेधस्य विरुद्धत्वादिति भावः। द्वितीयमाशंक्य निराकरोति॥ नापीति॥ सिद्धसाधनमिति॥ प्रतियोग्याधारत्वेन भ्रांत्या प्रतीतेऽधिकरणे प्रतियोगिनस्त्रैकालिकनिषेधस्येष्टत्वेन सिद्धसाधनमित्यर्थः॥ प्रतीतत्वमात्रमिति॥ तथाच प्रतियोग्याधारत्वेन प्रतीयमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं विवक्षितमित्यर्थः। ननु तथापि सत्त्ववादिनां तार्किकादीनां मते सिद्धसाधनता। अत्र रजतत्वमिति संसर्गारोपे अत्ररजतत्वं नेति प्रतिषिध्यते। तत्र संसर्गमात्रमेवाऽसत्। रजतत्वं तु अन्यत्र सत्वात्सत्यमेव। तथाच प्रतियोगिभूतरजतत्वाधिकरणतया प्रतीत शुक्तिलक्षणाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं सत्यभूते रजतत्वें गीकृतमेवेति सिद्धसाधनतेत्याशंक्यऽविवक्षांतरमाह॥ सर्वस्मिंश्चेति॥ भ्रांत्या प्रमया वा प्रतिपन्ने सर्वस्मिन्नित्यर्थः। अत एव चशब्दः। तथाच प्रतियोग्याधारत्वेन भ्रांत्या प्रमया वा प्रतीताधिकरणनिष्ठात्यंताभावप्रतियोगित्वस्य विवक्षितत्वान्न सिद्धसाधनावकाश इत्याह॥ सत्त्वपक्ष इति॥ आरोपितस्यान्यत्र सत्त्वपक्षे। तथाचापणस्थरजतस्यापि रजतत्वाधारतया प्रमाप्रतिपन्नोपाधित्वेन तत्र रजतत्वप्रतिषेधस्य भवतामसंमतत्वेन भ्रांत्या प्रमया वा प्रतिपन्ने सर्वस्मिन्नप्युपाधौ निषेधप्रतियोगित्वस्यास्माद्विवक्षितस्य रजतत्वेऽनंगीकारेण न सिद्धसाधनमित्यर्थः। प्रकृते च भ्रांतिप्रतिपन्नोपाधौ पारमार्थिकत्वाकारेण निषेधप्रतियोगित्वं। प्रमाप्रतिपन्ने मृत्पिंडाद्युपाधावपि पारमार्थिकत्वाकारेण घटादिर्नास्त्येवेति लक्ष्ये लक्षणोपपादनं द्रष्टव्यं। विवादस्तु अनिर्वचनीयवादिनामस्माकं भूषणमेवेति हृदयं॥

ननु प्रतिपन्नोपाधिस्थस्त्रैकालिकनिषेधस्तावन्न तात्विकः। अद्वैतहानेः। निरुपाधिकेन सोपाधिकस्यैक्यायोगेन ब्रह्मात्मकत्वायोगाच्च। नापि व्यावहारिकः। तत्प्रतियोगिनो प्रातिभासिकस्य प्रपंचस्य पारमार्थिकत्वापातात्। नापि प्रातिभासिकः। तादृशनिषेधप्रतियोगित्वसाधनस्येष्टत्वेन सिद्धसाधनापत्तेः। किं च शुक्तिरूप्यमेव पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगीत्येकं मतं। शुक्तिरूप्यस्याविद्यकसत्त्वोपेतस्य न निषेधः, किंत्वापणस्थस्यैवाभासस्य प्रसक्त्याऽनाभासस्य प्रतिषेध इति मतांतरं। तत्रोक्तलक्षणाभावादसंभव इत्यस्वरसादाह॥

मतांतरेत्विति॥ अत्यंताभावगर्भलक्षणबाध्यत्वस्य शुक्तिरूप्ये असंभवादिति भावः॥ अज्ञानस्येत्यादिना अज्ञानस्य ज्ञानेन निवृत्तिर्बाध इत्युक्तेऽज्ञानकार्यस्य वियदादेर्बाध्यत्वं न सिद्ध्यति अत उक्तं। स्वकार्येणेत्यादि॥ तथाप्यतीतस्य बाधो न सिद्ध्येदित्यत उक्तं॥ प्रविलीनेनेति॥ ननु प्रविलीनस्य कथं ज्ञानेन निवृत्तिरिति चेदुच्यते। कार्यात्मना प्रविलीनत्वेपि तस्य कारणात्मना सत्त्वात्। अत एव कार्याकारेण वर्तमानेन कार्याकारेण प्रविलीनेन कारणात्मना विद्यमानेनेति व्याख्येयं। ज्ञानत्वेनेति विशेषणस्य कृत्यं दर्शयति॥ अनुमितिमित्यादिना॥ यदि ज्ञाननिवर्त्यत्वं बाध्यत्वमित्येवोच्येत तर्ह्युत्तरज्ञाननिवर्त्यपूर्वज्ञानादावतिव्याप्तिरतो ज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वं विवक्षितमित्याशयेन ज्ञानत्वेनेत्युक्तं। तथा च निवर्तकतावच्छेदकं ज्ञानत्वमभिप्रेतं। एवं च पूर्वज्ञाननिवर्तकतावच्छेदकं चोत्तरज्ञाने उत्तरात्मविशेषगुणत्वमेव न ज्ञानत्वं। कुत इति चेत्। जानातीच्छति प्रवर्तत इति क्रमसद्भावेन यदेच्छया पूर्वज्ञानं निवर्तते तत्र पूर्वज्ञाननिवर्तकतावच्छेदकं न ज्ञानत्वं। निवर्तकतान्यूनदेशवृत्तित्वात्। तथा उत्तरज्ञाननिवर्त्ये पूर्वज्ञानेपि सत्त्वेनाधिकवृत्तित्वाच्च। किंतूत्तरात्मविशेषगुणत्वमेव। तच्चेच्छासाधारणमितीदं प्रमेयं सूचयितुमिच्छादेरितीच्छाग्रहणं कृतमिति द्रष्टव्यं। इच्छादेरित्यादिपदेन भावनासंस्कार ग्रहणं। पूर्वज्ञानेनात्मनि भावनासंस्कारोत्पत्त्यनंतरं तन्निवर्तनादिति द्रष्टव्यं। तथाच ज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वम् इत्यर्थः। नन्वेकस्यैव ज्ञानस्य ज्ञानत्वेन न पूर्वज्ञाननिवृत्तिहेतुत्वं। किं तूत्तरात्मविशेषगुणत्वेनेत्येतदयुक्तं। एकस्यैव केनचिद्रूपेण हेतुतायाः केनचिद्रूपेणाहेतुतायाश्चादर्शनादित्यत उक्तं॥ अनुमितिं प्रतीति॥ हेतुत्वेऽपीति॥ तस्य सर्वोपलब्धिसाधनत्वादिति भावः॥ इंद्रियत्वेनेति॥ मनसो यद्यनुमितिं प्रतींद्रियत्वेन हेतुत्वं तर्ह्यनुमितेः प्रत्यक्षत्वप्राप्त्या साक्षात्कारत्वापत्तिः। यथाहुः। ''साक्षात्कारिणी च प्रमा सैवोच्यते। येंद्रियजे''ति ''इंद्रियत्वेनेंद्रियजन्यज्ञानं प्रत्यक्ष'' मिति मणिकृता प्रत्यक्षलक्षणस्योक्तत्वादिति भावः।

ननु ज्ञाननिवर्त्यत्वं नाम ज्ञानजन्यध्वंसप्रतियोगित्वं। तथा च शुक्तिज्ञानानंतरं रूप्यं नास्तीत्येव प्रतीत्या रूप्यं नष्टमित्यप्रतीतेः शुक्तिरूप्यादौ साध्यवैकल्यमित्यस्वरसादाह॥ अथवेति॥ स्वशब्देन प्रतियोगी। तथाच स्वसमानाधिकरणेत्यस्य प्रतियोग्यधिकरणाधिकरणकेत्यर्थो वर्णनीयः। तथाच न संयोगादिना सिद्धसाधनतेत्याह॥ संयोगेति॥ अवच्छेदकभेदेनेति॥ अग्रे वृक्षः कपिसंयोगी मूले नेति प्रतीतेरिति भावः॥ अयोगादिति॥ तथाच यदधिकरणे संयोगः तदधिकरणे न तदत्यंताभाव इति तदधिकरणाधिकरणकत्वरूपसामानाधिकरण्यायोगादित्यर्थः। अस्मत्पक्षे यदधिकरणे व्यावहारिकः संयोगः तदधिकरणे पारमार्थिकस्तदत्यंताभावोऽप्यस्तीति सत्त्वपक्ष इत्युक्तं। ननु तथाप्यापणस्थरूप्यस्यैव तथाभूतात्यंताभावप्रतियोगित्वेन शुक्तिरूप्ये तदभावात्साध्यवैकल्यमित्यत आह॥ शुक्तिरूप्यादेरिति॥ प्रातिभासिकत्वेन सदपि रूप्यं पारमार्थिकत्वरूपव्यधिकरणधर्मेण स्वाधिकरणाधिकरण कात्यंताभावप्रतियोगीति नोक्तदोष इति भावः। तात्विकेति॥ प्रतियोग्यधिकरणाधिकरणकात्यंताभावेत्यत्र तात्विकप्रतियोग्यधि करणविवक्षायामित्यर्थः॥ समवायिनीत्यादि॥ घटादेः समवायेन तत्त्वतोऽधिकरणं मृत्पिंडादि। संयोगेनाधिकरणं भूतलादि। समवायेन संयोगेन वा संबंधेन तत्वतो घटादिरूपप्रतियोग्यधिकरणे मृदादौ भूतलादौ च तदत्यंताभावायोगेन घटादौ लक्ष्ये लक्षणाभावादसंभव इति भावः॥ अधिकरणत्वेन प्रतीतीति॥ प्रतियोग्यधिकरणत्वेन यत्प्रतीतं तदधिकरणकात्यंताभावविवक्षायामित्यर्थः। तथा च प्रतियोग्यधिकरणत्वं

तात्विकं न विवक्षितमित्याशयः। मायिमते शुक्त्यादौ प्रातिभासिकरजतस्य सत्त्वान्न तत्र तदत्यंताभावो वक्तुं युक्तोऽत उक्तं॥ अन्यथाख्यातिपक्ष इति॥ शुक्तिरेवात्यंतासद्रजतात्मना प्रतीयत इत्यभिनवान्यथाख्यातिपक्षेन्यत्र विद्यमानमेवान्यत्र प्रतीयत इत्येवं रूपान्यथाख्यातिपक्षे चेत्यर्थः। स्वेति॥ प्रतियोगिभूतरजतत्वेत्यर्थः। संसर्गारोपाभिप्रायेणेदं॥ स्वेति॥ प्रतियोग्यधिकरणत्वेन प्रतीयमानाधिकरण कात्यंताभावेत्यस्य स्वात्यंताभावाधिकरण एव प्रतीयमानत्व मर्थतया विवक्षितमित्यर्थः। एतादृशमिथ्यात्वसाधने तत्त्ववादिना सिद्धसाधनता नाभिधातुं शक्येत्याह॥ तत्पक्षे चेति॥ अन्यथाख्यातिवादिनां पक्ष इत्यर्थः॥ रजतेऽपीति॥ आपणस्थरजतेऽपीत्यर्थः॥ तथा चैवंविवक्षाकरणेन ''प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम्'' इति लक्षणेन पुनरुक्तिरपि परिहृतेति द्रष्टव्यं।

नन्वेवमत्यंतासत्त्वापत्तिः। न चात्यंतासतः प्रतीयमानत्वमेव नेति वाच्यं। शशविषाणमिति शब्दाभासादिना तस्यापि प्रतीयमानत्वादित्यस्वरसादाह॥ यद्वेति॥ सतोऽपि सदंतरविविक्तत्वात्सिद्धसाधनमिति चेत्तत्राह॥ तच्चेति॥ सद्विविक्तं चेत्यर्थः। ननु तर्हि ब्रह्मण्यतिव्याप्तिः। तस्य सत्ताजातिशून्यत्वेन सद्रूपत्वाभावस्यैव सत्वादित्यत आह॥ ब्रह्माचेति॥ सद्रूपमित्यन्वयः। सत्ताजातिशून्यत्वं न सद्रूपत्वाभावसाधकं। सामान्ये व्यभिचारात्। अतः सत्ताजातिशून्यमपि सामान्यं स्वरूपसत्त्वेनैव यथा सदित्युच्यते एवं ब्रह्म सत्ताशून्यमपि स्वरूपसत्त्वेनैव सद्रूपमिति सद्रूपत्वाभावाभावान्नातिव्याप्तिरित्यर्थः।

५. दृश्यत्वस्वरूपविचारः

दृश्यत्वं च न्यायदीपावलीरीत्या दृग्विषयत्वम्। ननु यन्न मिथ्या न तद् दृश्यमिति व्यतिरेकस्याग्रहे सन्दिग्धानैकान्त्यम्। तद्ग्रहश्च न तावदसति, तत्र सद्विविक्तत्वरूपमिथ्यात्वस्य व्यतिरेकाभावात्। मिथ्यात्वान्तरव्यतिरेकसद्भावेऽपि तत्र साध्यव्यतिरेकग्रहार्थं तस्यापि ज्ञातव्यत्वेन व्यभिचारात्। ब्रह्मणि मिथ्यात्वव्यतिरेकग्रहे च ब्रह्मापि दृश्यमिति चेन्न। आकाशस्य स्वरूपेणापरिच्छेदेऽपि घटावच्छिनस्य परिच्छेदवद् ब्रह्मणः स्वरूपेणादृश्यत्वेपि व्यतिरेकावच्छिन्नस्य दृश्यत्वात्॥ १॥

यद्वा प्रमाणमालारीत्या स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिर्दृश्यत्वम्। तथा चात्मनो ज्ञानविषयत्वेऽपि नोक्तरूपं दृश्यत्वम्॥ २॥ अस्वप्रकाशत्वं वा दृश्यत्वम्। स्वप्रकाशत्वं च फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वम्। फलं च वृत्तिप्रति फलितचैतन्यम्। स्वप्रकाशत्वाभावश्च घटादौ विशेषणाभावेन धर्मादौ विशेष्याभावनेति विशिष्टाभावोऽनुगतः। अस्मिंश्च पक्षे जडत्वमसंविद्रूपत्वमित्यसंकरः।

न्यायामृततरङ्गिणी

साध्यं विविच्य हेतुं विविनक्ति – दृश्यत्वञ्चेति। दृग्विषयत्वमिति। ज्ञानविषयत्वमित्यर्थः। आत्मा च वृत्तिविषयोऽपि नेति भावः। अत एवाग्र आत्मनो ज्ञानविषयत्वमभ्युपेत्य पक्षान्तरं वक्ष्यति तथाचात्मनो ज्ञानविषयत्वेऽपीत्यादिना। नन्विति। मिथ्यात्वस्य व्यतिरेकिधर्मत्वेन किञ्चिदधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वे निश्चिते तदधिकरणे हेतुव्यतिरेकस्याग्रहे तत्र हेतुसंशयसम्भवात् सन्दिग्धानैकान्त्यमित्यर्थः। ब्रह्मापि दृश्यमिति। तथाच ब्रह्मणि व्यभिचार इति भावः। व्यतिरेकावच्छिन्नस्य दृश्यत्वादिति। शुद्धे ब्रह्मस्वरूपे साध्य-साधनयोर्व्यतिरेकोऽस्ति। मिथ्यात्व-दृश्यत्वव्यतिरेकावच्छिन्ने च दृश्यत्वमप्यस्ति, इति साध्य-साधनव्यतिरेकयोः सहचारग्रहो भवति। व्यतिरेकावच्छिन्नस्य दृश्यस्य मिथ्यात्वाद् व्यभिचारोऽपि नेति भावः। ननु अदृश्यस्य कथं दृश्यत्वम्? इत्यतः सदृष्टान्तमुपपादयितुमुक्तम् – आकाशस्येति। आकाशस्यापरिच्छेद-परिच्छेदाविव ब्रह्मणोऽप्यदृश्यत्वदृश्यत्वे उपपन्ने। स्वाभाविकत्वास्वाभाविकत्वाभ्यां च तद्वदेवाविरोध इति भावः॥१॥

ननु व्यतिरेकावच्छिन्नस्य विशिष्टस्य दृश्यत्वे विशिष्टानुगतविशेष्यस्य दृश्यत्वमवर्जनीयम्; विशिष्टज्ञानस्य विशेष्येऽपि संशयादिनिवर्तकत्वात्। अन्यथा 'दण्डी देवदत्तः' इति ज्ञानानन्तरं देवदत्ते कदाचित् संशयादिः स्यात्। तथाच व्यभिचार इत्यत आह – स्वव्यवहार इति। अद्वितीयत्वादिप्रकारक आत्मगोचरे व्यवहारे स्वातिरिक्तवृत्तिरूपसंविदपेक्षाऽस्ति इत्यात्मनि दृश्यत्वं मा प्रसाङ्क्षीत् इति नियतिग्रहणम्। अद्वितीयत्वादिरूप आत्मव्यवहारे तदपेक्षायामपि स्फुरणरूपे नित्यसिद्ध आत्मव्यवहारे तदभावात् तत्र नियमो नास्तीत्यर्थः। आत्मनो वृत्तिविषयत्वमपि नास्ति इति न्यायदीपावलीरीत्या दृश्यत्वं व्याख्यातम्। आनन्दबोधोक्तरीत्या तु शुद्धात्मनो वृत्तिविषयत्वेऽपि स्वव्यवहारेऽपि स्वातिरिक्तसंविदपेक्षानियतिरूपं दृश्यत्वं शुद्धात्मनि नास्तीत्याह – तथाचेति॥२॥

ननु आत्मनः स्फुरणव्यवहारे उपनायकप्रमाणापेक्षाया विरहेऽप्यद्वितीयत्वादिविशिष्टव्यवहारे विशेषणोपनायकप्रमाणापेक्षानियमोऽस्त्येव इति व्यभिचारस्तदवस्थ इत्यत आह – अस्वप्रकाशत्वं वेति। घटादाविति। घटादेः फलव्याप्यतया फलाव्याप्यत्वरूपं विशेषणं घटादौ नास्तीत्यर्थः। धर्मादौ त्विति। अपरोक्षव्यवहारयोग्यत्वं विशेष्यं धर्मादौ नास्तीत्यर्थः। ननु जडत्वं नाज्ञानत्वम् वृत्तिभागेऽसिद्ध्यापत्तेः, किन्त्वस्वप्रकाशत्वमेव वाच्यम्। तथाच दृश्यत्वजडत्वयोः पूर्वोक्तयोर्हेत्वोरभेदापत्तिरित्यत आह – अस्मिंश्चेति। असंविद्रूपत्वम् अचिद्रूपत्वम्। तच्च वृत्तिरूपे ज्ञानेऽस्तीति भावः॥३॥

न्यायामृतकण्टकोद्धारः

एवं साध्यं निरूप्य हेतुं निरूपयति – दृश्यत्वं चेति। व्यतिरेकस्याग्रह इति। व्यतिरेकव्याप्त्यनिश्चय इत्यर्थः। सन्दिग्धेति। साध्याभाववति हेतुर्भविष्यतीति शङ्कया सन्दिग्धानैकान्त्यमित्यर्थः। ब्रह्मणीति। तथाच व्यभिचार इति भावः। आकाशस्येति। शुद्धब्रह्मणि व्यतिरेकग्रहसम्भवः। न च व्यभिचारः; शुद्धस्य स्वरूपेणादृश्यत्वाद् हेत्वभावात्। न च तर्हि व्यतिरेकावच्छिन्ने व्यभिचार इति वाच्यम्। तदवच्छिन्नस्य दृश्यत्वेऽपि मिथ्यात्वरूपसाध्यस्यापि सत्त्वात् न तदवकाशः। एकस्यैव रूपान्तरेण वैरूप्ये दृष्टान्तमाह – आकाशस्येति। न च विशिष्टस्य दृश्यत्वे विशेष्यस्यापि दृश्यत्वात् शुद्धेऽपि न व्यतिरेकग्रहः सम्भवतीति वाच्यम्; अग्नीषोमयोर्देवतात्वेऽप्यग्नेरदेवतात्ववद् विशिष्टस्य दृश्यत्वेऽपि विशेष्यस्यादृश्यत्वात्।

।स्वव्यवहार इति। अत्र नियतिपदादान आत्मनोऽपि स्वप्रकाशत्वाद्वितीयत्वादिविशिष्टात्मव्यवहारे विशेषणोपनायकप्रमाणापेक्षाया विद्यमानत्वेन तत्र दृश्यत्ववृत्तावनैकान्त्यं स्यात्, तदर्थम् – नियतिरित्युक्तम्। विशिष्टात्मव्यवहारे स्वातिरेकिसंविदपेक्षाया विद्यमानत्वेऽप्यविशिष्टव्यवहारे तदनपेक्षणेन नियमाभावात् न व्यभिचार इति भावः।

न्यायामृतप्रकाशः

एवं साध्यं निरुच्य हेतुं निर्वक्ति॥ दृश्यत्वं चेति। न्यायदीपावली मायावादिग्रंथविशेषः। दृग्विषयत्वमिति॥ ज्ञानविषयत्वमित्यर्थः। दृश्यत्वहेतोर्ब्रह्मणि व्यभिचारं वक्तुं ब्रह्मणो दृश्यत्वमुपपादयितुमाह॥ नन्विति॥ दृश्यत्वहेतोरन्वयव्यतिरेकित्वादिति भावः। दृश्यत्वानुमानेऽव्यतिरेकव्याप्तिनिश्चयोऽस्ति न वा। नेति पक्षे आह॥ यत्र मिथ्येति॥ इति व्याप्तौ व्यतिरेकस्य व्यतिरेकव्याप्तेरग्रहे निश्चितसाध्याभाववति हेतुसंदेहरूपं संदिग्धानैकांत्यमित्यर्थः। आद्येआह॥ तद्ब्रह्मश्चेति॥ हेतुसाध्यव्यतिरेकनिश्चयश्चेत्यर्थः। नन्वसत्ये तादृशमिथ्यात्वसत्त्वेपि ज्ञाननिवर्त्यत्वादिरूपमिथ्यात्वांतरव्यतिरेकोऽस्तीति तत्र व्यतिरेक व्याप्तिग्रहः संभवतीति चेत्तत्राह॥ मिथ्यात्वांतरेति॥ तस्यापि ज्ञातव्यत्वेनेति॥ अभावज्ञाने अधिकरणज्ञानस्य कारणत्वादित्यर्थः॥ व्यभिचारादिति॥ यत्र दृश्यत्वं तत्र मिथ्यात्वं, यत्र मिथ्यात्वाभावः तत्र दृश्यत्वाभाव इत्यन्वयव्यतिरेकव्याप्योरसति व्यभिचार इत्यर्थः॥ ब्रह्मापीति। अन्यथा मिथ्यात्वव्यतिरेकग्रहासंभवादिति भावः। तथाच तत्र व्यभिचार इति हृदयं॥ घटावच्छिन्नस्येति॥ घटावच्छेदेनेत्यर्थः॥ व्यतिरेकावच्छिन्नस्येति॥ मिथ्यात्वव्यतिरेकावच्छेदेनेत्यर्थः॥ दृश्यत्वादिति॥ शुद्धस्य चेति शेषः। अयमर्थः। मिथ्यात्वव्यतिरेकग्रहः शुद्ध एव ब्रह्मण्यंगीक्रियते तर्हि तत्र दृश्यत्वहेतोर्व्यभिचार इति न वाच्यं। शुद्धस्य ब्रह्मणः स्वरूपेणादृश्यत्वांगीकारान्न व्यभिचारः। तस्यैव मिथ्यात्वव्यतिरेकावच्छेदेन दृश्यत्वोपपत्तेर्व्यतिरेकग्रहस्यापि संभवात्। न चैवं दृश्यत्वादृश्यत्वे विरुद्धे अदृश्यत्वमेव स्वाभाविकं, मिथ्यात्वव्यतिरेकावच्छेदप्रयुक्तं दृश्यत्वं त्वौपाधिकमस्वाभाविकमित्यंगीकारात्। स्वाभाविकमेव च दृश्यत्वं हेतुतया विवक्षितं। अतो न तत्र व्यभिचारप्रसक्तिः। स्वाभाविकत्वास्वाभाविकत्वाभ्यामविरोधे दृष्टांतः॥ आकाशस्येति॥ यथैकस्यैवाकाशस्य स्वरूपेणापरिच्छेदेऽपि

घटाद्य वच्छेदेन परिच्छेदे सत्यपि स्वाभाविकत्वास्वाभाविकत्वाभ्यां न विरोधस्तद्वदित्येवैतद्ग्रंथार्थः संप्रदायागतः। व्यतिरेकावच्छिन्नस्येत्यस्य व्यतिरेकावच्छेदेन शुद्धस्यैव दृश्यत्वादित्यव्याख्याने यथास्थितार्थांगीकारे व्यतिरेकावच्छिन्ने विशिष्टे मिथ्यात्वस्यापि सत्त्वेन व्यतिरेकव्याप्तिग्रहायोगः। शुद्धे च तद्ग्रहे तस्य दृश्यत्वावश्यंभावेन व्यभिचार इति ग्रंथोऽसंगत एव स्यादिति द्रष्टव्यं। एवमेव ''व्यतिरेकावच्छिन्नस्य स्यादेव दृश्यतेति चेदि''ति मिथ्यात्वानुमानखंडनटीकावाक्योपपादनमपि द्रष्टव्यं।

प्रमाणमालाऽपि मायावादिग्रंथविशेषः॥ स्वव्यवहार इति॥ स्फुरणरूपनित्यसिद्धात्मस्वरूपव्यवहारे स्वाख्य संविदपेक्षानियतेति व्यभिचार इत्यतः स्वातिरेकीत्युक्तं। कदाचित्तस्यैवाद्वितीयं ब्रह्मेत्याद्यद्वितीयत्वादिविशिष्टव्यवहारे विशेषणोपनायकैकमेवाद्वितीयमित्यादिवाक्यजन्यवृत्ति सापेक्षताऽस्तीति नियति ग्रहणं। तथाचाद्वितीयत्वादिव्यवहारे तदपेक्षायामपि स्फुरणरूपात्मव्यवहारे तदपेक्षाभावान्न नियतिरिति तत्र दृश्यत्वाभावान्न व्यभिचार इत्यर्थः। ज्ञानविषयत्वेपीत्युक्त्या व्यतिरेकग्रहोपपादनं। नोक्तरूपं दृश्यत्वमित्यनेनैतादृशस्य दृश्यत्वस्यैव हेतुतयाविवक्षितत्वान्न व्यभिचार इत्युक्तं भवति॥ फलेति॥ धर्मादावतिव्याप्तिवारणाय विशेष्यं। घटादौ तद्वारणाय विशेषणमिति द्रष्टव्यं॥ व्यवहारयोग्यत्वमिति॥ व्यवहारविषयत्वयोग्यत्वमित्यर्थः॥ वृत्तीति॥ अंतःकरणवृत्तीत्यर्थः। अत्र योग्यतापदं किमर्थमिति चेत्। उच्यते। यदुक्तं घटादौ विशेष्यसद्भावेऽपि विशेषणाभावेन विशिष्टाभाव इति तदयुक्तं। घटादिज्ञानानंतरं कदाचिन्मनसो विषयांतरसंचाररूपव्यासंगेन व्यवहारो न जातस्तत्रापरोक्षव्यवहारविषयत्वस्य फलोपधानस्याभावादुभयाभावप्रयुक्त एव विशिष्टाभावः किं न स्यादित्याशंकापरिहाराय योग्यत्वमित्युक्तं। सहकारिविरहप्रयुक्तकार्याभावो योग्यता वनस्थदंडादौ यथा दृष्टा तद्वदिहापि ज्ञानेन व्यवहारे जननीये व्यासंगाभावः सहकारीति तदभावाद्व्यवहारो न भवति। तत्सद्भावे तु भवत्येवेत्येवं व्यासंगदशायामपि अपरोक्षव्यवहारविषयत्वयोग्यत्वरूपविशेष्यसद्भावेन विशेषणाभावेनैव विशिष्टाभावो वक्तव्यो न तूभयाभावेनेति सूचयितुं योग्यत्वमित्युक्तमित्यवगंतव्यं॥ चैतन्यमिति॥ तथाच ब्रह्मणः प्रकाशरूपत्वेन प्रकाशरूपे प्रकाशांतरानुदयाच्चैतन्यरूपफलाव्याप्यत्वमस्ति स्फुरणरूपत्वेनापरोक्ष व्यवहारयोग्यत्वमप्यस्तीत्यवगंतव्यं। दृष्टांते शुक्तिरूप्ये चेदं दृश्यत्वमस्ति। प्रातिभासिकरूप्याकाराऽविद्यावृत्तिरेव नांतःकरणवृत्तिः। अतोंऽतःकरणवृत्तिप्रतिबिंबितचैतन्यरूपफलाव्याप्यत्वसत्त्वेपि अपरोक्षव्यवहारयोग्यत्वरूप विशेष्याभावाद्विशिष्टाभावोऽनुगतो द्रष्टव्यः। अपरोक्षव्यवहारायोग्येपि तत्र तद्व्यवहारस्तु अधिष्ठानभूतसाक्षिचैतन्यगतं यदापरोक्ष्यं तदध्यासाद्युक्तः। इदमिति व्यवहारायोग्येपि तस्मिन्नधिष्ठानगतेदंतारोपादिदमिति व्यवहारवदित्यग्रे स्पष्टं। ननु जडत्वमप्यस्वप्रकाशत्वमेव। तथा च दृश्यत्वजडत्वहेत्वोः सांकर्यमित्यत आह॥ अस्मिंश्च पक्ष इति॥ अस्वप्रकाशत्वं दृश्यत्वमिति पक्ष इत्यर्थः॥ असंविद्रूपत्वमिति॥ अचिद्रूपत्वमित्यर्थः। इदं च पक्षैकदेशे वृत्तिज्ञानेऽप्यस्तीति न भागासिद्धिरिति भावः। ज्ञानरूपत्वाभाव इति व्याख्यानं तु वृत्तिज्ञाने भागासिद्धिप्रसंगाच्चिंत्यं।

६. मिथ्यात्वे परोक्तश्रुतिः

श्रुतिश्चात्र प्रमाणम्। एकमेवाद्वितीयम्'' इत्यादौ अद्वितीयमित्यादि-शब्दैर्द्वतीयमात्रनिषेधात्। न च प्रत्यक्षबाधादनुमानममानं श्रुतिश्चामुख्यार्थेति युक्तम्।

प्रत्यक्षेण व्यावहारिकसत्त्वग्रहात्। अनुमानादिभिश्च पारमार्थिकसत्त्वनिषेधात्। न हि वर्तमानमात्रग्राहि प्रत्यक्षं त्रिकालाबाध्यत्वग्राहि। वह्निरनुष्ण इत्यत्र तु उष्णत्वस्य प्रत्यक्षसिद्धव्यावहारिकसत्त्वप्रतिषेधाद्बाधः। दृश्यते च नभोनैल्यचन्द्रप्रादेशत्वग्राहि-प्रत्यक्षयोरनुमानागमाभ्यां बाध इति।

न्यायामृततरङ्गिणी

श्रुतिश्चेति। "एकमेवाद्वितीयमि"त्यादिकेत्यर्थः। ननु ब्रह्माद्वितीयं चेत् प्रथमं तृतीयं वा स्यात्, बहुव्रीहिपक्षेऽपि सप्रथमं सतृतीयं वा स्यात्, तथाच नेष्टसिद्धिरित्यतः श्रुतिं व्याख्याति-एकमेवेति। अद्वितीयादिशब्दैः कण्ठतो द्वितीयनिषेधे द्वितीयनिरूपिततृतीयादेरपि निषेधोऽर्थतो भवति इति द्वितीयस्यात्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं श्रुत्या सिद्ध्यतीत्यर्थः। न चेति। 'सन् घटः' इत्यादिसत्त्वग्राहकप्रत्यक्षबाधादित्यर्थः। अमानम्। अग्न्यनौष्ण्यानुमानवदिति शेषः। अमुख्यार्था। "यजमानः प्रस्तरः" इत्यादिश्रुतिवदिति शेषः। न च आगमानुमानाभ्यामेव प्रत्यक्षं बाध्यतामिति वाच्यम्; प्रत्यक्षस्यागमाद्यगृहीतरेखोपरेखादिग्राहकत्वेन तदनिवर्तित दिङ्मोहादिभ्रमनिवर्तकत्वेन जात्या, शब्दे स्वरूपधर्म्यादिग्राहकत्वेनोपजीव्यतयाऽऽगमाद्यपेक्षया प्राबल्यादित्यर्थः। प्रत्यक्षस्य भिन्नविषयत्वात् न तेनागमादीनां विरोध इत्याह प्रत्यक्षेणेति। अनुमानादिभिरिति। प्रत्यक्षगृहीतव्यावहारिकसत्त्वानुपमर्देनैव प्रत्यक्षागृहीतपारमार्थिकसत्यत्वस्य निषेधादित्यर्थः। न च मिथ्यात्वश्रुतेरप्रसक्तप्रतिषेधतापातः। अर्थक्रियादिरूपानुमानाभासेन वा आरोपितपारमार्थिकसत्यत्वतात्पर्यकेण प्रत्यक्षगृहीतव्यावहारिकसत्यत्वानुवादकेन "विश्वं सत्यमि" त्याद्यागमेन वा पारमार्थिकसत्यत्वप्रसक्तेर्विषयदादिषु सम्भवादिति भावः। ननु मिथ्यात्वश्रुत्या निषिध्यमानमेव पारमार्थिकसत्त्वं प्रत्यक्षेण गृह्यते इति न प्रत्यक्षस्य भिन्नविषयतेत्यत आह– न हीति। अतीतानागतादिभिः सन्निकर्षाभावात् प्रत्यक्षस्य नोक्तरूपसत्यत्वग्राहकतेति भावः। ननु एवं भिन्नविषयतया प्रत्यक्षाविरोधोपपादने अग्न्यनौष्ण्यानुमानेऽपि न प्रत्यक्षविरोधः स्यात्, तथाच कालात्ययापदिष्टदोषोच्छेदः स्यादित्यत आह–वह्निरनुष्ण इत्यत्रेति। अतात्त्विकविश्वान्तर्गतजलादिस्वभावानौष्ण्येन समस्वभाव मनौष्ण्यमग्नावनुमीयते यदा तदैव प्रत्यक्षेण बाधः। अनीदृशं तु मिथ्यात्वस्यैव नामान्तरम् इति नाग्न्यनौष्ण्यानुमानेऽपि प्रत्यक्षबाध इत्यर्थः। ननु श्रुत्या प्रत्यक्षगृहीतव्यावहारिक सत्यत्वानुपमर्देन तदगृहीतपारमार्थिकसत्यत्वनिषेधे प्रत्यक्षगृहीतसत्यत्वस्य न मिथ्यात्वसिद्धिः न च – व्यावहारिकसत्यत्वेऽपि घटवत् पारमार्थिकसत्यत्वं निषिध्यते, इति तत्र तत्सिद्धिरिति

– वाच्यम्; व्यावहारिकसत्यत्वे यद् व्यावहारिकसत्यत्वम्, तत्रैवमपि व्यावहारिकसत्त्वानुपमर्देन तन्मिथ्यात्वासिद्धेः। तत्राप्युक्तन्यायेऽनवस्था, इति सत्यत्वग्राहिप्रत्यक्षप्राबल्येऽरुचिमभि सन्धायापौरुषे यत्वेनानाशङ्कितदोषतया श्रुतेः, तदनुगृहीतत्वाच्चानुमानस्य सम्भावितदोष-प्रत्यक्षापेक्षया प्राबल्यात् प्रत्यक्षगृहीतमपि सत्यत्वमनुमानागमाभ्यां निषिद्ध्यत इति वक्तुं प्रत्यक्षस्यागमादिबाध्यत्वं दृष्टमस्तीत्याह – दृश्यते चेति।

न्यायामृतकण्टकोद्धारः

ननु एवं 'वह्निरनुष्णः' इत्यत्रापि प्रत्यक्षबाधो न स्यादित्यत आह – वह्निरनुष्ण इत्यत्रेति। किञ्च नभोनैल्य-चन्द्रप्रादेशत्वप्रत्यक्षस्यानुमानागमाभ्यां बाधस्य दृष्टत्वाद् दुर्बलस्य प्रत्यक्षस्य नोक्तानुमानागम बाधकतेत्याह – दृश्यते चेति।

न्यायामृतप्रकाशः

प्रत्यक्षेति॥ जगत्सत्यताग्राहि सन्घट इत्यादिप्रत्यक्षेत्यर्थः॥ अमुख्यार्थेति॥ समाननिषेधादिपरेत्यर्थः। ननु प्रत्यक्षमपि त्रिकालाबाध्यत्व रूपपारमार्थिक सत्त्वमेव गृह्णातीति ग्राह्याभावावगाहित्वेन समानविषयकत्वाद्युक्तं बाधकत्वमित्यत आह॥ नहीति॥ वर्तमानमात्रग्राहि वर्तमानकालाबाध्यत्वग्राहि। नन्वेवं भिन्नविषयतयाऽनुमानस्य प्रत्यक्ष विरोधाभावोपपादने कालात्ययापदिष्टमात्रोच्छेदः। प्रत्यक्षेण व्यावहारिकौष्ण्यग्रहात् अनुमानेन पुनः पारमार्थिकौष्ण्य निषेधेन भिन्नविषयतायाः तत्रापि वक्तुं शक्यत्वादित्यत आह॥ वह्निरिति॥ उष्णत्वस्य प्रत्यक्ष सिद्धं यद्यावहारिकं सत्त्वं तस्यैववाह्निनिषेधेन भिन्नविषयतायाः तत्रापि वक्तुं शक्यत्वादित्यत आह॥ वह्निरिति॥ उष्णत्वस्य प्रत्यक्ष सिद्धं यद्यावहारिकं सत्त्वं तस्यैव वह्निरनुष्ण इत्यनुमानेन निषेधात्साक्षाद्ग्राह्याभावा व गाहित्वेन युक्तस्तत्र बाध्यबाधकभाव इति नबाधोच्छेद इति भावः। किंचापौरुषेयत्वे नानाशंकित दोषायाः एकमेवेत्यादिश्रुतेः तदनुगृहीतास्मदनुमानस्य च संभावितदोष प्रत्यक्षापेक्षयाप्राबल्यात्प्रत्यक्ष गृहीतमपि सत्यत्व मनुमानागमाभ्यामेव बाध्यत इत्याशयेन प्रत्यक्षस्याऽनुमानादि बाध्यत्वं दृष्टमित्याह॥ दृश्यतेचेति॥ नीलं नभ इति प्रत्यक्षं नभोनीलं विभुत्वादित्यनुमानेन बाध्यं दृष्टं। तथा प्रादेशमात्रपरिमितश्चंद्रमा इति प्रत्यक्षं ''अष्टाशीतिसहस्राणी'' त्याद्यागमबाध्यं दृष्टमिति प्रकृतेपि तथास्विति भावः॥

७ . प्रथममिथ्यात्वभङ्गः

उच्यते–मिथ्यात्वं हि त्वयैव पक्षान्तरनिषेधेन पंचधा निरुक्तम्। तत्राऽद्ये किं सत्त्वे सत्यसत्त्वरूपविशिष्टस्याभावोऽभिप्रेतः? किं वा सत्त्वात्यन्ताभावा सत्त्वात्यन्ताभाव रूपधर्मद्वयम्? यद्वा सत्त्वात्यन्ताभाववत्त्वे सति

असत्त्वात्यन्ताभाववत्त्वरूपं विशिष्टम्? नाद्यः। मन्मते सदेकस्वभावे जगति तस्य सिद्धत्वात्। न द्वितीयः। व्याहतेः। निर्धर्मकब्रह्मवत्सत्त्वराहित्येऽपि सद्रूपत्वेना मिथ्यात्वोपपत्त्याऽर्थान्तराच्च। पृथिवी इतर भिन्ना पृथिवीत्वादित्यत्र त्रयोदशान्योन्या भावानामिवात्रापि सत्त्वासत्त्वात्यन्ताभावयोः प्रत्येकं प्रसिद्धत्वेन कथंचिदप्रसिद्ध विशेषणत्वाभावेऽपि असत्त्वात्यन्ताभावांशे सिद्धसाधनाच्च। न हि सिद्धमसिद्धेन सहोच्चरित मसिद्धं भवति। पृथिवीतरभिन्नेत्यत्र तु जलाद्येकैकान्योन्याभावोऽपि न पृथिवीत्वोपहिते सिद्धः। दृष्टान्तस्य साध्यवैकल्याच्च। पृथिवीत्वहेतुस्तु केवलव्यतिरेकी। त्रयोदशान्योन्याभावरूपसाध्यस्य व्यतिरेकनिरूपणं तु भिन्नाश्रिता नामपि त्रयोदशान्योन्याभावानां समूहालम्बनैकज्ञानोपारूढत्वमात्रेण युक्तम्। अत एव न तृतीयः। व्याहतेरर्थान्तरात् (दृष्टान्ते) साध्यवैकल्याच्च।

किं च यथा अनित्ये वाङ्मनसे इत्यत्र पक्षतावच्छेदकनानात्वेनांशे सिद्धसाधनत्वेऽपि पृथिवीतरभिन्नेत्यत्र पक्षतावच्छेदकैक्यान्नांशे सिद्धसाधनं तथेहापि यद्यपि कथंचित् साध्यतावच्छेदकैक्यात् नांशे सिद्धसाधनत्वम्। नापि व्यर्थविशेष्यत्वम्। विमतम् उपादानापरोक्षज्ञप्तिचिकीर्षाकृतिमज्जन्यमित्यत्र कृतिग्रहणेनैवेश्वरसिद्धावपि चिकीर्षादेरिव, गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वाद् इत्यत्र तार्किकांगीकृतभिन्नत्वस्येव च व्यापकविशेषणानामुद्देश्यप्रतीत्यर्थत्वाद्। इह तु सद्विलक्षणत्वे सत्यसद्विलक्षणमिति प्रतीतेरुद्देश्यत्वात्। यदि चाभेदे सत्यपि घटः कलशः इति सामानाधिकरण्यादर्शनाद प्रयोजकत्वनिरासाय विशिष्टधीस्तत्रोद्देश्या, तर्हि तुच्छे सद्वैलक्षण्ये सत्यपि दृश्यत्वादर्शनादिहापि सोद्देश्येति समम्। तथाप्यप्रसिद्धविशेषणत्वम्। पृथिवी इतरभिन्नेत्यत्र त्वनेकधर्मसाधनपक्ष एव प्रत्येकप्रसिद्धया साध्यप्रसिद्धिरुक्ता। अन्यथा शशादीनां प्रत्येकं प्रसिद्धया शशशृंगोल्लिखितत्वस्यापि सा स्यात्।

अद्वैतसिद्धिः

ननु किमिदं मिथ्यात्वं साध्यते? न तावत् 'मिथ्याशब्दोऽनिर्वचनीयतावचनः' इति पञ्चपादिकावचनात् सदसत्त्वानधिकरणत्वरूपमनिर्वाच्यत्वम्। तद्धि किम् असत्त्वविशिष्ट

सत्त्वाभावः ? उत सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं धर्मद्वयम् ? आहोस्वित् सत्त्वात्यन्ताभाववत्त्वे सति असत्त्वात्यन्ताभावरूपं विशिष्टम् ? नाद्यः। सत्त्वमात्राधारे जगत्यसत्त्वविशिष्टसत्त्वानभ्युपगमात्। विशिष्टाभावसाधने सिद्धसाधनात्। न द्वितीयः। सत्त्वासत्त्वयोरेकाभावे अपरसत्त्वावश्यकत्वेन व्याघातात्। निर्धर्मकब्रह्मवत्सत्त्वराहित्येऽपि सद्रूपत्वेन अमिथ्यात्वोपपत्त्या अर्थान्तराच्च। शुक्तिरूप्ये अबाध्यत्वरूपसत्त्वव्यतिरेकस्य सत्त्वेन बाध्यत्वरूपासत्त्वस्य व्यतिरेकासिद्ध्या साध्यवैकल्याच्च। अत एव न तृतीयः। पूर्ववद् व्याघातात्, अर्थान्तरात्साध्यवैकल्याच्चेति चेत्, मैवम्। सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूप धर्मद्वयविवक्षायां दोषाभावात्। न च व्याहतिः। सा हि सत्त्वासत्त्वयोः परस्परविरहरूपतया वा ? परस्परविरहव्यापकतया वा ? परस्परविरहव्याप्यतया वा ? तत्र नाद्यः। तदनङ्गीकारात्। तथा ह्यत्र त्रिकालाबाध्यत्वरूपसत्त्वव्यतिरेको नासत्त्वम्। किं तु क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम्। तद्व्यतिरेकश्च साध्यत्वेन विवक्षितः। तथा च त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वरूपं साध्यं पर्यवसितम्। एवं च सति न शुक्तिरूप्ये साध्यवैकल्यमपि। बाध्यत्वरूपासत्त्वव्यतिरेकस्य साध्याप्रवेशात्। नापि व्याघातः, परस्परविरहरूपत्वाभावात्। अत एव न द्वितीयोऽपि। सत्त्वाभाववति शुक्तिरूप्ये विवक्षितासत्त्वव्यतिरेकस्य विद्यमानत्वेन व्यभिचारात्। नापि तृतीयः। तस्य व्याघाताप्रयोजकत्वात्। गोत्वाश्वत्वयोः परस्परविरहव्याप्यत्वेऽपि तदभावयोरुष्ट्रादावेकत्र सहोपलम्भाद्। यच्च निर्धर्मकस्य ब्रह्मणः सत्त्वराहित्येऽपि सद्रूपवत्प्रपंचस्य सद्रूपत्वेनामिथ्यात्वोपपत्त्या अर्थान्तरमुक्तम् तन्न। एकेनैव सर्वानुगतेन सर्वत्र सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रत्येकं प्रपंचस्य सत्स्वभावताकल्पने मानाभावात्। अनुगतव्यवहाराभावप्रसंगाच्च। सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यम्। तथा चोभयात्मकत्वेऽन्यतरात्मकत्वे वा तादृग्भेदासंभवेन ताभ्यामर्थान्तरानवकाशः।

न च असत्त्वव्यतिरेकांशस्यासद्भेदस्य च प्रपंचे सिद्धत्वेनांशतः सिद्धसाधनमिति वाच्यम्। 'गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्' इति भेदाभेदवादिप्रयोगे तार्किकाद्यङ्गीकृतस्य भिन्नत्वस्य सिद्धावपि उद्देश्यप्रतीत्यसिद्धेर्यथा न सिद्धसाधनम् तथा प्रकृतेऽपि मिलितप्रतीतेरुद्देश्यत्वान्न सिद्धसाधनम्। यथा तत्त्वाभेदे घटः कुम्भ इति सामानाधिकरण्यप्रतीतेरदर्शनेन मिलितसिद्धिरुद्देश्या तथा प्रकृतेऽपि सत्त्वरहिते तुच्छे दृश्यत्वादर्शनेन मिलितस्य तत्प्रयोजकतया मिलितसिद्धिरुद्देश्येति समानम्।

अत एव सत्त्वात्यन्ताभाववत्त्वे सत्यसत्त्वात्यन्ताभावरूपं विशिष्टं साध्यमित्यपि साधु। न च मिलितस्य विशिष्टस्य वा साध्यत्वे तस्य कुत्राप्यप्रसिद्ध्या अप्रसिद्धविशेषणत्वम्। प्रत्येकं प्रसिद्ध्या मिलितस्य विशिष्टस्य वा साधने शशशृंगयोः प्रत्येकं प्रसिद्ध्या शशीयशृंगसाधनमपि स्यादिति वाच्यम्। तथाविधप्रसिद्धेः शुक्तिरूप्य एवोक्तत्वात्। न च निर्धर्मकत्वाद् ब्रह्मणः सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वेन तत्रातिव्याप्तिः। सद्रूपत्वेन ब्रह्मणः तदत्यन्ताभावानधिकरणत्वात्। निर्धर्मकत्वेनैवाभावरूपधर्मानधिकरणत्वाच्चेति दिक्। इति सदसद्विलक्षणत्वरूपमिथ्यात्वविचारः॥ १॥

न्यायामृततरङ्गिणी

सिद्धान्ताभिधानं प्रतिजानीते – उच्यत इति। पञ्चधेति। सदसत्त्वानधिकरणत्वं वा? सर्वस्मिन् प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वा? ज्ञानत्वेन ज्ञाननिवर्त्यत्वं वा? स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं वा? सद्रूपत्वाभावो वा? इति पञ्चप्रकारैर्मिथ्यात्वं लक्षितमित्यर्थः। तत्राद्य इति। 'सदसत्त्वानधिकरणत्वमि'त्यत्र सच्छब्दः सत्त्वपरः। तत्र सत्त्वं किमसत्त्वविशेषणं वा? सत्त्वासत्त्वे प्रत्येकमनधिकरणत्वस्य विशेषणं वा? सच्छब्दात् परतोऽनधिकरणत्वशब्दरूपमध्यमपदलोपिसमासाश्रयणेन सत्त्वानधिकरणत्वस्य विशेषणं वाऽभिप्रेतमिति प्रश्नवाक्यार्थः। मन्मत इति। विशेष्याभावायत्तो विशिष्टाभावोऽस्तीत्यर्थः। व्याहतेरिति। सत्त्वाभावसाधनेऽसत्त्वस्य प्राप्त्या पुनरसत्त्वाभावसाधने व्याहतिरित्यर्थः।

ननु न व्याहतिः। सा हि तयोः परस्परविरहव्यापकतया वा? परस्परविरहव्याप्यतया वा? परस्परविरहरूपतया वा? नाद्यः। सत्त्वाभाववति शुक्तिरूप्ये बाध्यत्वरूपासत्त्वस्य विद्यमानत्वेऽपि क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वरूपासत्त्वव्यतिरेकस्य विद्यमानत्वेन व्यभिचारितया सत्त्वव्यतिरेकं प्रत्यसत्त्वस्य व्यापकत्वाभावात्। निर्धर्मके ब्रह्मण्युभयस्यापि व्यभिचाराच्च। न द्वितीयः, तस्य व्याघाताप्रयोजकत्वात्। गोत्वाश्वत्वयोः परस्परविरहव्याप्यत्वेऽपि तदभावयोरुष्ट्रादावेकत्र सहोपलम्भात्। न तृतीयः। सत्त्वासत्त्वयोः परस्परविरहरूपत्वानङ्गीकारात्। तथाहि – अत्र त्रिकालाबाध्यत्वरूपसत्त्वव्यतिरेको नासत्त्वम्, किन्तु क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम्। तद्व्यतिरेकश्च साध्यत्वेन विवक्षितः। तथाच त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वरूपं साध्यं पर्यवसितम्; तथाच न व्याहतिरिति चेत्, मैवम् ; 'असच्चेत् न प्रतीयेते'ति वदता त्वया उक्ताप्रतीतिं प्रति प्रयोजकस्य प्रतीत्यनुपाधिकस्य सत्त्वविरोधिनोऽसत्त्वस्य वक्तव्यत्वाद् असत्त्वाभावः

सत्त्वेन प्रतीयमानत्वे पर्यवसन्नः इति तत्साधनस्य व्यर्थत्वात्। न च असद्वैलक्षण्यसिद्ध्यर्थं तत्साधनमिति वाच्यम्। प्रतीयमानत्वस्यासत्साधारणत्वात्। ''तद्वैक आहुरसदेवेदमग्र आसीदि''त्यसतः सत्त्वेन प्रतीतेः श्रुत्याऽनूदितत्वात्। न च असत इव प्रतीतेरनुवादो न प्रतीतिसत्तामापादयतीति वाच्यम्। असतः सत्त्वेन प्रतीतिमत 'एक' इत्यसत्प्रतीतेः सत्त्वस्यैवोक्तेः। न च – ''तद्वैक आहुरि''ति श्रुत्या ''सदेव सौम्येदमग्र आसीदि''ति श्रुत्यर्थस्याभाव एव प्रतिपाद्यते निषेधायेति वाच्यम्। ''सदेव सोम्येदमि''ति श्रुत्यर्थाभावस्यासत्त्वेनासतः सत्त्वप्रतीत्यनिवारणात्।

अत्रेदमालोचनीयम्। सत्वासत्त्वयोः परस्परप्रागभावादिरूपतया परस्परविरहरूपत्वासम्भवेना त्यन्ताभावरूपतयैव परस्परविरहरूपता वाच्या। तत्रापि त्रिकालसर्वदेशीयनिषेधप्रतियोगि त्वादिरूपस्यासत्त्वस्याभावरूपतयाऽसत्त्वात्यन्ताभावः सत्त्वमिति वाच्यम्। तथा सति सिद्धान्तेऽत्यन्ताभावस्यासन्मात्रप्रतियोगिकत्वस्वीकारेणा- सत्त्वस्यात्यन्तासत्त्वापत्तिः। न च तार्किकादिमतेन तयोः परस्परविरहरूपत्वाभिधानमिति वाच्यम्। स्वमते व्याहत्युक्तेरसम्भवापत्तेः, सिद्धान्तेऽप्यसत्त्वाभाव एव सत्त्वमिति स्वीकाराच्च। यद्वक्ष्यति ''मया लाघवादा वश्यकत्वादसत्त्वाभाव एव सत्त्वमिति स्वीकारात्, 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति न्यायेनैकतरनिषेधस्यान्यतरविधिरूपत्वात् 'माता वन्ध्ये'तिवद् व्याघातः'' इति। ''मया त्रिकाल-सर्वदेशीयनिषेधाप्रतियोगित्वप्रतियोगित्वे सत्त्वासत्त्वे इति स्वीकारादि''ति च। ''सत्त्वासत्त्वे, एकधर्मिनिष्ठात्यन्ताभावप्रतियोगिनी न, परस्परात्यन्ताभावरूपत्वात् घटत्वा घटत्ववदि''ति च। ननु – घटादिसत्त्वं न शशशृङ्गादिगतासत्त्वस्यात्यन्ताभावरूपम्, येन तस्य तुच्छत्वं स्यात्। किन्तु घटादौ भ्रान्तिप्रतिपन्नासत्त्वस्येति चेत्, न; सत्त्वस्य यदसत्त्वं प्रत्यत्यन्ताभावरूपत्वम्, तत्प्रत्यसत्त्वस्यात्यन्ताभावरूपत्वानुपपत्तेः। निःस्वरूपत्वात्। घटादिगतसत्त्वस्य शशशृङ्गादिगतासत्त्वस्य च विरहयोरेकत्रोक्तौ बाधकाभावाच्च। तयोः परस्परविरहरूपत्वाभावस्य त्वयैवोक्तेः। अत्र ब्रूमः– समानसत्ताकयोः परस्परविरहयोः व्याप्यत्वे सति व्यापकत्वं परस्परविरहरूपत्वम्। तादृशयोरभावौ नैकत्र सम्भवतः घटादौ सत्त्वे सत्यपि शशशृङ्गादिगतासत्त्वस्यात्यन्ताभावो नेति व्यभिचारवारणाय समानसत्ताकेति विरहविशेषणम्। अभेदेऽपि व्याप्य व्यापकभावोऽस्त्येव। एवञ्च न शशशृङ्गादि गतासत्त्वस्यासत्त्वापत्तिरिति॥

निर्धर्मकेति॥ उभयाभावसाधनेऽपि ब्रह्मवत् सद्रूपत्वानुपमर्दादित्यर्थः। ननु – ''एकेनैव सर्वानुगतेन सर्वत्र सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रत्येकं प्रपञ्चस्य सत्स्वभावताकल्पने मानाभावात्,

अनुगतव्यवहाराभावप्रसङ्गाच्च, सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यम्। तथाचो भयात्मकत्वे, अन्यतरात्मकत्वे वा तादृग्भेदाभावेन ताभ्यामर्थान्तरानवकाश इति चेत्, मैवम्। रजतं विनाऽपि शुक्तौ रजतप्रतीतिव्यवहारादिदर्शनात् सत्पदार्थं विनापि सत्प्रतीत्यादेरुप पत्तावतिलाघवम् इति ब्रह्मापि सद्रूपं न सिद्धेयत्। प्रमितत्वाद् ब्रह्म सद्रूपमिति तु जगत्यपि तुल्यम्। एतेन अनेकसत्कल्पनरूपबाधकतर्कसहकृतसत्त्वाभावानुमानमेव सद्रूपत्वा भावेऽपि पर्यवस्यति इति न सद्रूपत्वेनार्थान्तरमिति निरस्तम्। तर्कस्य प्रमितसद्रूपत्वा नपवादकत्वात्। अन्यथा सत्त्वाभावानुमानस्य लाघवेन प्रातीतिकसत्त्वाभावेऽपि पर्यवसानेन जगत् शून्यमेव स्यादिति साधूक्तम् – "अर्थान्तराच्चे"ति। सदसदुभयान्योन्याभावस्य साध्यतायां तु व्याहति-साध्यवैकल्यादिर्दोषोऽस्त्येव। त्रयोदशेति। अभावमनन्तर्भाव्य त्रयोदशत्वं बोध्यम्। कथञ्चिदिति। अनुमितिविषयस्योभयाभावरूपस्य साध्यस्यैकस्मिन्नधिकरणे प्रसिद्ध्यभावेऽपि प्रत्येकाधिकरण उभयाभावप्रसिद्धिरस्तीत्यर्थः। असत्त्वात्यन्ताभावांश इति। यथा पक्षतावच्छेदकनानात्वे क्वचिदधिकरणे पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेर्जातत्वात् तत्पक्षांशे सिद्धसाधनम्, तथा साध्यतावच्छेदकनानात्वेऽपि सिद्धसाध्यांशे सिद्धसाधनमेव; साध्यतावच्छेदकावच्छिन्नस्य पक्षतावच्छेदकावच्छेदेन सिद्धिरूपस्य सिद्धसाधनबीजस्योभयत्रापि तुल्यत्वादित्यर्थः।

ननु – साध्यतावच्छेदकनानात्वेऽप्युभयाभावगोचरसमूहालम्बनरूपैकानुमित्युद्देशेन नांशतः सिद्धसाधनम्। असत्त्वात्यन्ताभावांशेऽप्युद्देश्यायाः समूहालम्बनरूपायाः सिद्धेरजातत्वात्। अनुमितिद्वयोद्देशे च सिद्धसाधनमेव नांशतः सिद्धसाधनम्। न चैवम् पक्षतावच्छेदक नानात्वेऽप्युक्तविधया नांशतः सिद्धसाधनमिति वाच्यम्; इष्टापत्तेरिति चेत्, सत्यम् ; समूहालम्बनानुमित्युद्देश्यत्व एव तस्या असत्त्वाभावांशे पक्षतावच्छेदकावच्छेदेन सिद्धं यत् साध्यतावच्छेदकावच्छिन्नसाध्यम्, तद्विषयकसिद्धिरूपत्वेन सिद्धसाधनत्वाभि धानमित्यदोषः।

ननु अपेक्षाबुद्धिविषयत्वादेर्व्यासज्यवृत्तिधर्मस्य साध्यतावच्छेदकतायां नांशतस्सिद्धसाधनम्, अत एवानुपदमेव वक्ष्यति 'साध्यतावच्छेदकैक्याद् नांशे सिद्धसाधनमितीति' चेत्, सत्यम्। तत्र व्याहत्यादिरेव दोषो बोध्यः। ननु साध्यकोटिनिविष्टस्यासत्त्वात्यन्ताभावस्य पक्षे सिद्धौ यदि सिद्धसाधनम्, तदा 'पृथिवी इतरभिन्ने'त्यत्र त्रयोदशान्योन्याभावानामपि 'घटो न जलादिरि'ति पृथिवीत्ववति प्रतीत्या घटादौ सिद्धेः सुतरां सिद्धसाधनं स्यादित्यत आह पृथिवीति॥ पृथिवीत्वोपहित इति। घटादिभिन्नपृथिवीत्वोपहित इत्यर्थः। यथाश्रुते त्रयोदशान्योन्याभावानां पृथिवीत्वसामानाधिकरण्यस्यापि घटादौ सिद्ध्या उक्तदोषतादवस्थ्यात्।

दृष्टान्तस्येति। असत्त्वाभावस्य साध्यतावच्छेदकावच्छिन्नस्य शुक्तिरूप्यादावभावादित्यर्थः। ननु बाध्यत्वरूपासत्त्वव्यतिरेकस्य तत्राभावेऽपि क्वचिदप्युपाधौ सत्त्वेन प्रतीयमानत्वानधिकरण त्वरूपासत्त्वव्यतिरेको रूप्यादावप्यस्त्येव। तस्य तत्त्वेन प्रतीयमानत्वात्। मैवम्। सत्त्वेन प्रतीयमानत्वरूपस्यासत्त्वव्यतिरेकस्य साधनं व्यर्थमित्युक्तत्वेन बाध्यत्वरूपासत्त्वव्यतिरेकस्यैव साधयितुमुचितत्वेन साध्यवैकल्यापरिहारात्। ननु अभावद्वयस्य साध्यतायां रूप्ये सत्त्वाभावस्य सत्त्वेऽपि असत्त्वाभावाभावेन यदि साध्यवैकल्यम्, तर्हि 'पृथिवी, इतरभिन्ने'त्यत्र जले तेजःप्रभृतिद्वादशभेदानां सत्त्वेऽपि जलभेदस्याभावेन साध्यवैकल्यम्। एवं तेजःप्रभृतिष्वपि स्वस्वेतरप्रतियोगिकद्वादशभेदसत्त्वेऽपि स्वस्वभेदाभावात् साध्यवैकल्यमेव स्यादित्याशङ्क्याह – पृथिवीत्वहेतुस्तु केवलव्यतिरेकीति। तथाच न तत्र दृष्टान्तापेक्षा इति न तत्प्रयुक्तसाध्य वैकल्यादिदोषावकाश इति भावः। ननु पृथिवीत्वहेतौ दृष्टान्तानपेक्षणे साध्यप्रसिद्ध्यभावेन साध्यव्यतिरेकनिरूपणं न स्यादित्यत आह– त्रयोदशेति। साध्यतावच्छेदकावच्छिन्नानां त्रयोदशान्योन्याभावानां स्वस्वाधिकरणे विद्यमानानां ज्ञाने सति साध्यव्यतिरेकनिरूपणं स्यादित्यर्थः। ननु एवमेकैकान्योन्याभावाधिकरणस्यापि साध्यतावच्छेदकावच्छिन्नसाध्याधि करणतया तद्व्यावृत्तस्य हेतोरसाधारण्यं स्यादित्याशङ्कापरिहारायोक्तम् समूहालम्बनैकज्ञानोपा रूढत्वमात्रेणेति। एकैकान्योन्याभावस्य न साध्यतावच्छेदकावच्छिन्नत्वम्; साध्यतावच्छेदकस्य समूहालम्बनैकज्ञानोपारूढत्वस्य व्यासज्यवृत्तेर्धर्मस्य प्रत्येकाभावेष्वपर्याप्तेः। तथाच प्रत्येकाभावाधिकरणस्य न सपक्षत्वम्, साध्यतावच्छेदकावच्छिन्नसाध्यरहितत्वात्। तदुक्तं ''तावदभावयोगी ह्यत्र सपक्षो भवति, न तु तदेकदेशकतिपयाभाववान्, साध्यतायास्तावति पर्याप्तेरि''ति। सत्त्वात्यन्ताभावादेस्तु प्रत्येकं साध्यतावच्छेदकावच्छिन्नत्वेऽपि नासाधारण्यम्; दृष्टान्तस्य सत्त्वादिति भावः। ननु 'अत एवे'त्यतिदिष्टा व्याहतिरनुपपन्ना; एकत्र विरुद्धोभयप्रतियोगिकात्यन्ताभावसाधने हि सा स्यात्। न चात्रोभयात्यन्ताभावौ साध्यावित्यत आह व्याहतेरिति। उभयात्यन्ताभावयोस्सामानाधिकरण्योक्तौ व्याहतिवद् उभयात्यन्ताभावयोः सामानाधिकरण्येन सम्बन्धेन विशेषण-विशेष्यभावोक्तावपि व्याहतिरित्यर्थः। किञ्चेति। यद्यपि नांशतः सिद्धसाधनम्, नापि व्यर्थविशेष्यत्वम् तथाप्यप्रसिद्धविशेषणत्वमित्यन्वयः। पक्षतावच्छेदकनानात्वेनेति। यद्यपि पक्षतावच्छेदकनानात्वेऽप्युक्तविधया नांशतः सिद्धसाधनम्; तथापि मतान्तरेणेदं बोध्यम्। पक्षतावच्छेदकैक्यादिति। पक्षतावच्छेदकैक्येंऽशतः सिद्धसाधनं न भवत्येव। तथाहि – पक्षतावच्छेदकधर्मसामानाधिकरण्येन साध्यसिद्धौ हि सिद्धसाधनमेव, नांशतस्सिद्धसाधनम्। तादृशसिद्धेरेवानुमानसाध्यत्वात्। तदसिद्धौ च तच्छङ्कैव नास्ति। न हि पक्षे साध्यसिद्धिमात्रेण तत्। किन्तु पक्षतावच्छेदकधर्मसामानाधिकरण्येन साध्यसिद्ध्या।

अन्यथा धूमवत्त्वेन पर्वते वह्निनिश्चयेऽपि सिद्धसाधनप्रसङ्गादित्यर्थः। साध्यतावच्छेदकैक्यादिति। साध्यतावच्छेदकावच्छिन्नसाध्यसिद्धेरभावादित्यर्थः। नापि व्यर्थविशेष्यत्वमिति। यथेश्वरानुमाने कृतिमज्जन्यमिति साध्यकरणमात्रेणापीश्वरसिद्धावपि चिकीर्षादेर्विशेषणस्य न वैयर्थ्यम्; व्यापकविशेषणानामुद्देश्यप्रतीत्यर्थत्वात्, यथा भेदाभेदवादिना तार्किकं प्रति प्रयुक्ते 'भिन्नाभिन्नमि'ति साध्ये भिन्नत्वविशेषणस्य तार्किकेणाङ्गीकृतत्वेऽपि न वैयर्थ्यम् ; तत्प्रतीतेरुद्देश्यत्वात्, तथेहापि 'सद्विलक्षणत्वे सत्यसद्विलक्षणत्वमि'ति प्रतीतेरुद्देश्यत्वात् न व्यर्थविशेष्यत्वमित्यर्थः। समानाधिकृतत्वादिति। 'शुक्लः पटः' इति सामानाधिकरण्य वत्त्वादित्यर्थः। व्यापकविशेषणानामिति। न च – व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यतया तत्र विशेषणं व्यर्थमिति वाच्यम्; विशिष्टाविशिष्टभेदेनैकस्मिन् व्याप्यतावच्छेदकद्वयप्रवेशाभावेन तद्बीजाभावादित्यर्थः। ननु ईश्वरानुमाने ज्ञानादिघटितं साध्यत्रयमेवाभिप्रेतम् इति न तद् दृष्टान्तः। भेदाभेदानुमाने त्वप्रयोजकत्वपरिहाराय भिन्नत्वविशेषणस्योद्देश्यतेत्याशङ्क्य, प्रकृतेऽपि तथेत्याह – यदि चेति। 'गुणादिकम् गुण्यादिनाऽभिन्नम्, समानाधिकृतत्वादित्येव कृते अभेदरूपसाध्यवत्यपि घट-कलशादावविद्यमानस्य समानाधिकृतत्वस्याभेदरूपसाध्यं प्रत्यप्रयोज कत्वं स्यात्। तदुक्तम् – ''तस्मिन् सत्यभवतस्तेन विनाऽपि भवतस्तदप्रयोजकत्वादि''ति। अतोऽप्रयोजकत्वमित्यर्थः। तर्हीति। सत्त्वाभावमात्रस्य साध्यत्वे सत्त्वाभाववति तुच्छेऽविद्यमानस्य दृश्यत्वस्याप्यप्रयोजकत्वं मा भूत् इति असत्त्वाभावोऽपि साध्यकोटौ निवेशितः इति न व्यर्थविशेष्यत्वमित्यर्थः। सममिति। तुच्छे दृश्यत्वाभाववति विशिष्टं साध्यमपि नास्ति इति नाप्रयोजकत्वमित्यर्थः। तथाप्यप्रसिद्धविशेषणत्वमिति। विशिष्टसाध्यस्य सति, असति च अप्रसिद्धत्वादित्यर्थः। न च शुक्तिरूप्य एवोभयाभावप्रसिद्धिरस्तीति वाच्यम्। तत्र सत्त्वेन प्रतीयमानत्वानधिकरणत्वरूपासत्त्वस्याभावे विद्यमानेऽपि बाध्यत्वरूपस्यासत्त्वस्य व्यतिरेको नास्तीति प्रागवोचाम। ननु यदि सत्त्वाभावविशेषितासत्त्वाभावरूपविशिष्टसाध्याप्रसिद्ध्या– ऽप्रसिद्धविशेषणत्वम्, तदा जलादिद्वादशान्योन्याभावविशेषितसमवायान्योन्याभावरूपविशिष्ट– साध्यस्याप्यप्रसिद्धत्वेन प्रत्येकान्योन्याभावानां प्रसिद्ध्या साध्यप्रसिद्ध्युपवर्णनं विरुद्धचेतेत्यत आह – पृथिवीति। 'पृथिवी इतरभिन्ने'त्यत्र जलादिद्वादशभेदविशेषितसमवायभेदरूपं विशिष्टं न साध्यम्, न वा त्रयोदशभेदानामैकाधिकरण्यं साध्यतावच्छेदकम्, येनाप्रसिद्धविशेषणत्वं स्यात्। किन्तु स्वस्वाधिकरणे विद्यमानानां त्रयोदशान्योन्याभावानामपेक्षा बुद्धिविषयत्वसमूहालम्बनैकज्ञानोपारूढत्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नसाध्यताकानां साध्यत्वम्। तथाच नाप्रसिद्धिः, न वाऽसाधारण्यमित्युक्तमिति भावः। ननु सत्त्वाभावासत्त्वाभावयोः विशेषण-विशेष्ययोः प्रसिद्ध्या तद् विशिष्टमपि प्रसिद्धमेव। विशिष्टस्य विशेषणविशेष्या

भ्यामनतिरेकात्, अन्यथा क्षणिकत्वापत्तेरित्यत आह – अन्यथेति। प्रत्येकप्रसिद्ध्या यदि विशिष्टप्रसिद्धिः, तदेत्यर्थः। विशिष्टं तु त्वन्मतेऽप्यतिरिक्तमेवेति भावः।

न्यायामृतकण्टकोद्धारः

सिद्धान्तयति – उच्यत इति। मन्मत इति। असत्त्वरूपविशेष्याभावापन्नस्य विशिष्टाभावस्य सिद्धत्वेन सिद्धसाधनमिति भावः। व्याहतेरिति। यदत्रोक्तम् – सत्त्वासत्त्वयोः परस्परप्रागभावादिरूपतया परस्परविरहरूपत्वासम्भवेनात्यन्ताभावरूपतयैव परस्परविरहरूपता वाच्या। तत्र च त्रिकालसर्वदेशीय निषेधप्रतियोगित्वादिरूपस्यासत्त्वस्य भावरूपतयाऽसत्त्वात्यन्ताभावः सत्त्वमिति वाच्यम्। तथा सति सिद्धान्तेऽत्यन्ताभावस्यासन्मात्रप्रतियोगिकत्वस्वीकारेणासत्त्वस्यात्यन्तासत्त्वापत्तिः। न च तार्किकादिमतेन तयोः परस्परविरहरूपत्वाभिधानमिति वाच्यम्; स्वमते व्याहत्युक्तरेसङ्गतत्वापत्तेः। सिद्धान्तेऽप्यसत्त्वाभाव एव सत्त्वमिति स्वीकाराच्च। यद्वक्ष्यति यथा लाघवादावश्यकत्वादसत्त्वाभाव एव सत्त्वमित्यादीति तत्तुच्छम्। सिद्धान्तेऽत्यन्ताभावस्यासन्मात्रप्रतियोगिकत्वस्वीकारेण सत्त्वस्यासत्त्वात्यन्ताभावरूपत्वेऽसत्त्व- स्यात्यन्तासत्त्वं स्यादित्यापादयतः कोऽभिप्रायः? क्वचिदत्यन्ताभावप्रतियोगिनः सर्वत्रात्यन्तासत्त्वं स्यादिति वा? उत यत्रात्यन्ताभावस्तत्रैव वा? नान्त्यः; इष्टापत्तेः। यत्र ह्यसत्त्वात्यन्ताभावः तदधिकरणसंसृष्टा सत्त्वस्यात्यन्तासत्त्वाङ्गीकारात्। नाद्यः। आपादकाभावात्। न हि क्वचिदत्यन्ताभावप्रतियोगित्वे सर्वत्रात्यन्तासत्त्वं सम्भवति। तथा सति अश्वनिष्ठनिषेधप्रतियोगिनो गोत्वस्य गव्यप्यत्यन्तासत्त्वापत्तेः। न चैवम् अत्यन्ताभावस्यासन्मात्रप्रतियोगिकत्वमिति सिद्धान्तो व्याकुप्यत इति वाच्यम्; न हि क्वचिदत्यन्ताभावप्रतियोगिनः सर्वत्रासत्त्वमिति सिद्धान्तेऽभ्युपगमः, येन विरोधः। किन्तु सत्संसृष्टासत्त्वस्यैव। अत एव शुक्तिसंसृष्टरजतत्वस्यात्यन्तासत्त्वेऽपि न तत्प्रधानीभूतरजतत्वस्यात्यन्तासत्त्वम्; तथाऽप्रतीतेः। यद्वा स्यादेतदसत्त्वस्यात्यन्तासत्त्वापादनं यद्यसत्त्वस्य तत्प्रतियोगित्वमभ्युपगच्छामः। न चैवम्, किन्त्वसत्त्वसंसर्गस्यैव। तथाच तत्संसर्गस्यात्यन्तासत्त्वेऽप्यसत्त्वस्य नात्यन्तासत्त्वापत्तिः। न चैवम् असत्त्वसंसर्गस्यात्यन्ताभावप्रतियोगित्वे असत्त्वस्यापि प्रतियोगिकोटौ निविष्टत्वेनात्यन्तासत्त्वं स्यादिति वाच्यम्। दण्डविशिष्टदेवदत्ताभावे दण्डस्य प्रतियोगितावच्छेदकत्वेनाप्रतियोगित्वबदसत्त्वस्य प्रतियोगितावच्छेदकत्वात् न प्रतियोगित्वमिति नात्यन्तासत्त्वापत्तिरिति। न चैवम् व्याहत्युद्भावनं न स्यात्। असत्त्वाभावस्यासत्त्वसंसर्गप्रतियोगिकत्वेन सत्त्वासत्त्वयोः परस्परविरहरूपत्वाभावादिति वाच्यम्; परस्परसंसर्गाभावव्याप्यतया 'सत्त्वसंसर्गाभावेऽसत्त्वसंसर्गापत्तिरसत्वसंसर्गाभावे सत्त्वसंसर्गापत्तिरि'ति व्याहत्युद्भावनस्य सम्भवात्। अत एव सिद्धान्ते 'घटो नास्ती'त्यत्र घटस्य प्रामाणिकत्वेनात्यन्ता भावप्रतियोगित्वासम्भवेऽपि घटसंसर्गस्य प्रतियोगित्वमास्थितम्। एवमेव मूलकोशोऽपि व्याख्यातव्य इति।

। कथञ्चिदप्रसिद्धेति। अभावद्वयस्यैकस्मिन्नधिकरणे प्रसिद्ध्यभावेऽपि भिन्नाश्रये प्रसिद्धत्वादित्याशयेन कथञ्चिदित्युक्तमिति भावः। असत्त्वात्यन्ताभावांश इति। ननु पक्षतावच्छेदकावच्छेदेनोद्देश्यसिद्धौ हि सिद्धसाधनता। एवं च प्रकृत उभयाभावगोचरसमूहालम्बनानुमितेरुद्देश्यत्वेन नांशतः सिद्धसाधनम्। उद्देश्यायाः

समूहालम्बनानुमितेरजातत्वात्। अनुमितिद्वयोद्देश्यत्वे च सिद्धसाधनमेव, नांशतः सिद्धसाधनम्। तथाचांशतः सिद्धसाधनोद्भावनमयुक्तम् इति, मैवम्; साध्यतावच्छेदकनानात्वेन साध्यतावच्छेदकावच्छिन्नस्यैकस्य साध्यस्य पक्षतावच्छेदकावच्छेदेन सिद्धौ सिद्धसाधनं स्यादेव। न च समूहालम्बनानुमितेरुद्देश्यत्वात् उद्देश्यासिद्धौ कथं सिद्धसाधनमिति वाच्यम्; प्रत्येकानुमितेरुद्देश्यत्वेन समूहालम्बनानुमितेरुद्देश्यत्वाभावात्। न च तथात्वे संपूर्णसिद्धसाधनस्यैव सम्भवेन कथमंशतः सिद्धसाधनाभिधानमिति वाच्यम्; साध्यद्वय एकसाध्यस्य सिद्धत्वाभिप्रायेण तथाऽभिधानात्।

अन्ये तु – समूहालम्बनानुमितेरुद्देश्यत्व एव तस्या असत्त्वात्यन्ताभावांशे पक्षतावच्छेदकावच्छेदेन सिद्धं यत् साध्यतावच्छेदकावच्छिन्नं साध्यम् तद्विषयसिद्धिरूपत्वेन सिद्धसाधनत्वाभिधानमित्यदोष इत्याहुः। तन्न; समूहालम्बनानुमितेरसत्त्वात्यन्ताभावांशे पक्षतावच्छेदकावच्छेदेन सिद्धं यत् साध्यतावच्छेदकावच्छिन्नं साध्यम् तद्विषयसिद्धिरूपत्वेऽप्युद्देश्यायाः समूहालम्बनरूपसाध्यसिद्धेरजातत्वेनांशतः सिद्धसाधनाभिधानासम्भवात्। अन्यथा पक्षतावच्छेदकनानात्वे समूहालम्बनरूपानुमितावुद्देश्यायामप्यंशतः सिद्धसाधनापत्तेः। तत्रापि समूहालम्बनरूपानुमितेः पक्षतावच्छेदकावच्छेदन सिद्धं यत् साध्यतावच्छेदकावच्छिन्नं साध्यम् तद्विषयसिद्धिरूपत्वात्। तस्माद् यत्किञ्चिदेतत्।

ननु इतरभेदानुमानेऽप्यंशतः सिद्धसाधनं स्यात्, अत आह – पृथिवीतरेति॥ ननु इतरभेदानुमानेऽपि दृष्टान्ते साध्यवैकल्यं स्यादित्यत आह – पृथिवीत्वहेतुरिति॥ साध्यतावच्छेदकावच्छिन्नस्य त्रयोदशान्योन्याभावरूपस्य साध्यस्याप्रसिद्धत्वेन व्यतिरेकनिरूपणाभावात् कथं व्यतिरेकित्वम्? अत आह – त्रयोदशेति॥

यदि चाभेदे सत्यपीति। नच हेतुसत्त्वे साध्यासत्त्वापादनरूपत्वादप्रयोजकत्वस्याभेदे सत्यपि सामानाधिकरण्यादर्शनादित्यापादनमयुक्तमिति वाच्यम् न विद्यते प्रयोजकं यस्मिन्निति व्युत्पत्त्या हेतुसत्त्वे साध्यासत्त्वमित्येवंरूपस्येवोक्तरूपाप्रयोजकत्वस्यापि सम्भवात्। अत एवोक्तम् – "तस्मिन् सत्यभवतस्तेन विनापि भवतः" इति। ननु इतरभेदानुमानेऽपि समुदितत्रयोदशाभावस्याप्रसिद्धत्वादप्रसिद्धिरित्यत आह – पृथिवीति॥ यद्यप्यत्र परपक्षदूषणाय प्रवृत्तेन दूषणस्यैवोद्भाव्यत्वेन दूषणपरिहारप्रदर्शनमयुक्तम्; तथापि शिष्यबुद्धिशिक्षणाय तत्प्रदर्शनमिति भावः।

अत्र कश्चित् – सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयं साध्यते। न च व्याघात इति वाच्यम्; स हि तदा स्यात्, यदि सत्त्वासत्त्वयोः परस्परविरहरूपत्वं स्यात्, नचैवम्; असत्त्वस्य क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वस्य विवक्षितत्वात्। एवं च त्रिकालाबाध्यविलक्षणत्वे सति क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानविलक्षणत्वरूपं साध्यं पर्यवस्यति। एवं च न व्याघातः। नापि साध्यवैकल्यम्; बाध्यत्वरूपासत्त्वव्यतिरेकस्य साध्याप्रवेशात्। यच्च निर्धर्मकस्य ब्रह्मणः सत्त्वराहित्येऽपि सद्रूपत्ववत् प्रपञ्चस्य सद्रूपत्वेनामिथ्यात्वोपपत्त्याऽर्थान्तरमुक्तम्, तन्न। एकेनैव सर्वानुगतेन सत्प्रतीत्युपपत्तौ प्रातिस्विकसत्स्वभावताकल्पने मानाभावात्, अनुगतव्यवहाराभावप्रसङ्गाच्च। सत्प्रतियोगिकासत्प्रतियोगिकं भेदद्वयं वा साध्यम्। नच – असत्त्वव्यतिरेकस्यासद्भेदस्य च प्रपञ्चे सिद्धत्वेनांशतः सिद्धसाधनमिति – वाच्यम्; गुणादिकम्,

गुण्यादिना भिन्नाभिन्नम्, समानाधिकृतत्वात्, इत्यत्रेवोद्देश्यप्रतीत्यसिद्धेर्न सिद्धसाधनम्। यथा तत्रात्यन्तभेदेऽत्यन्ताभेदे च सामानाधिकरण्यादर्शनेन मिलितसिद्धिरुद्देश्या, तथा प्रकृतेऽपि सत्त्वाभाववति तुच्छे दृश्यत्वादर्शनेनेहापि सोद्देश्येति समम्। एवं सत्त्वात्यन्ताभाववत्त्वे सत्यसत्त्वात्यन्ताभाववत्त्वमिति पक्षोऽपि साधुः। नच विशिष्टस्य साध्यत्वेऽप्रसिद्धत्वम्; उक्तरूपासत्त्वव्यतिरेकस्य शुक्तिरूप्यादौ सत्त्वेन प्रसिद्ध्युपपत्तेः। नच निर्धर्मकत्वाद् ब्रह्मणः सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वेन तत्रातिव्याप्तिः; सद्रूपत्वेन ब्रह्मणस्तदभावानधिकरणत्वात्, निर्धर्मकत्वादेवाभावरूपधर्मानधिकरणत्वाच्च इत्याह, तन्न।

यदुक्तं क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वं विवक्षितम्, इति परस्परविरहारूपतया न व्याघात इति, तन्न। एतादृशेऽसत्त्वेऽङ्गीकियमाण एतादृशस्य बौद्धेन प्रपञ्चेऽनङ्गीकारेण बौद्धेन सह विवादो न स्यात्।

किञ्च यद्युक्तरूपमसत्त्वम्, तर्हि 'असच्चेत्, न प्रतीयेते'ति प्रयोज्य-प्रयोजकभावो न स्यात्; अभेदात्। अपि च ब्रह्मण्यङ्गीकृतसत्त्वविरोधिन एवासत्त्वस्य वक्तव्यत्वेनैतादृशासत्त्वस्यावक्तव्यत्वात्। 'क्वचिदप्युपाधावि'त्यत्रोपाधेः सत्त्वं विवक्षितम्? न वा? आद्ये ब्रह्मणोऽपि सद्रूपोपाधौ सत्त्वेनाप्रतीयमानत्वेनासत्त्वापातः, शुक्तिरूप्येऽतिव्याप्तिश्च। द्वितीये यत्किञ्चिदुपाधौ शशविषाणादेरपि शशविषाणमस्तीति वाक्त्वाभासादिना ''तद्वैक आहुरसदेवेदमग्र आसीदि''त्यादिश्रुत्या च सत्त्वेन प्रतीतिसद्भावाद् असम्भवः। किञ्च प्रतीत्युपाधिकेऽसत्त्वे वक्तव्ये प्रतीत्युपाधिकमेव सत्त्वेन प्रतीतिरेव सत्त्वमिति वक्तव्यत्वेन प्रपञ्चे सत्त्वाभावसाधने बाधश्च। तस्मात् त्रिकालाबाध्यत्वरूपसत्त्वव्यतिरेक एव बाध्यत्वमसत्त्वम् इति कथं न व्याघातः? अस्तु वा तदभिमतमसत्त्वम्। तथापि तादृशासत्त्वस्य सत्त्वाभावव्याप्यतया गोत्वाश्वत्वयोरिव विरोधो भवेदेवेति वाचोविग्लापनमात्रमेतत्॥

यच्च ब्रह्मणीव प्रपञ्चेऽर्थान्तरत्वपरिहारार्थमुक्तम् – 'एकेनैव सर्वत्र सत्प्रतीत्युपपत्तौ प्रातिस्विकसत्स्वभावकल्पने मानाभावः' इति, तदपि मन्दम्; तथात्वेऽनित्यो घटः, अनित्यः पटः, प्रध्वस्तो घटः, प्रध्वस्तः पट इत्यत्राप्येकेनैव प्रध्वंसादिना व्यवहारोपपत्तौ प्रातिस्विकप्रध्वंसकल्पने मानाभाव इति प्रत्येकप्रध्वंसादिसिद्धिर्न स्यात्। तत्र प्रतीत्यन्यथानुपपत्त्या तथा कल्पने प्रकृतेऽपि तथाऽस्तु। अनुगतव्यवहारोऽपि तद्वदेव समाधेयः। किञ्चैवंविधकल्पनाया मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयः।

यत्तु अंशे सिद्धसाधनपरिहारार्थमुक्तम् – 'गुणादिकं गुण्यादिना भिन्नाभिन्नमि'त्यत्रेव विशिष्टप्रतीतेरुद्देश्यत्वात् नांशे सिद्धसाधनमिति, तन्न; तत्राभेदे सामानाधिकरण्याभावेन विशिष्टप्रतीतेरुद्देश्यत्वसम्भवात्। प्रकृते च सत्त्वाभाववति तुच्छे दृश्यत्वस्य विद्यमानत्वेन तदुद्देश्यत्वाभावात्। नच तुच्छे दृश्यत्वमेव नेति वाच्यम्; ज्ञानविषयत्वरूपदृश्यत्वस्य तुच्छेऽसत्त्वेऽसद्वैलक्षण्यज्ञानाद्यनुपपत्तेर्मूल एवोक्तत्वेन तुच्छे दृश्यत्वस्यावश्यकत्वात्। दृश्यत्वान्तरस्य हेतूकरणासम्भवस्याग्रेऽभिधास्यमानत्वात्। तस्मादंशतः सिद्धसाधनं दुर्वारम्। एतेन सदसत्प्रतियोगिकभेदद्वयं साध्यत इति परास्तम्; उक्तदूषणगणग्रस्तत्वात्। अत एव सत्त्वात्यन्ताभाववत्त्वे सत्यसत्त्वात्यन्ताभाववत्त्वसाधनमपि

साध्वित्युक्तमसाधु; तत्पक्षेऽपि मूलोक्तदूषणापरिहारात्। नच शुक्तिरूप्यादौ साध्यप्रसिद्धेः कथमप्रसिद्धिरिति वाच्यम्; अबाध्यत्वाभावरूपबाध्यत्वस्यैवासत्त्वरूपतया तस्य च शुक्तिरूप्ये सत्त्वेन तदभावरूपसाध्यस्य प्रसिद्ध्यभावात्॥

यच्च ब्रह्मण्यतिव्याप्तिपरिहारार्थमुक्तम् – सद्रूपत्वेन सत्त्वाभावाधिकरणत्वं नास्तीति, तदपि प्रपञ्चे समानम्; प्रपञ्चस्यापि सद्रूपत्वेन सत्त्वाभावानधिकरणत्वादिति। नच प्रपञ्चस्य सद्रूपत्वमसिद्धमेवेति वाच्यम्; तस्य प्रपञ्चमिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्।

यच्च निर्धर्मकत्वादेवाभावरूपधर्माधिकरणत्वं नेत्युक्तम्, तदपि न; निर्धर्मकत्वरूपहेत्वभाव रूपधर्मानधिकरणत्वरूपसाध्यभावाभावाभ्यां व्याघातस्य मूल एवोक्तत्वेनास्य वल्गनमात्रत्वात्। तस्मात् सदसत्त्वानधिकरणत्वरूपमिथ्यात्वपक्षे यद् दूषणमुक्तं मूले तत् साधूक्तम्।

न्यायामृतप्रकाशः

पक्षांतरनिषेधेनेति॥ यद्यपीत्यादिग्रंथसंदर्भेणेत्यर्थः॥ पंचधेति॥ तथापीत्यादिग्रंथेन सदसत्त्वानधिकरणत्वं सर्वस्मिन्प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वा ज्ञानत्वेन ज्ञाननिवर्त्यत्वं वा स्वात्यंताभावाधिकरण एव प्रतीयमानत्वं वा सद्रूपत्वाभावो वेति पंच प्रकारेण निरुक्तमित्यर्थः। सदसत्त्वेत्यत्र सच्च तदसच्चेति कर्मधारयाभिप्रायेणाह॥ सत्त्वे सतीति॥ सच्चासच्च सदसती तयोर्भावः सदसत्त्वं द्वंद्वांते श्रूयमाणस्त्वप्रत्ययोऽनधिकरणपदं च प्रत्येकं संबध्यते। तथा च सत्त्वानधिकरणत्वमसत्त्वानधिकरणत्वंचेति धर्मद्वयं साध्यमित्याशयेनाह॥ किंवेति॥ तस्येति॥ सत्त्वे सत्यसत्त्वरूपविशिष्टाभावस्येत्यर्थः॥ व्याहतेरिति॥ परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधि नातरीयकत्वात्सत्वात्यंताभावे साध्येऽ सत्त्वस्यैव प्राप्या पुनस्तदत्यंताभावे साध्ये व्याहतिः। एवमसत्त्वात्यंताभावे साध्ये सत्त्वस्यैव प्राप्या पुनस्तदत्यंताभावसाधने व्याहतिरित्यर्थः। ननु कथं व्याहतिः सत्त्वासत्त्वयोः परस्पर प्रागभावादि रूपतया परस्परविरहरूपत्वासंभवेनात्यंताभाव रूपतयैव परस्पर विरहरूपता वाच्या। तथा च सत्त्वात्यंताभावः कथमसत्त्वं। सिद्धांते अत्यंताभावस्या प्रामाणिकप्रतियोगिकत्वस्वीकारेण सत्त्वस्य प्रामाणिकत्वात्। तथा असत्त्वस्यापि तुच्छे प्रामाणिकत्वेन तदत्यंताभावासंभवेनासत्त्वात्यंताभाव एव सत्त्वमित्यस्याप्ययोगात्। नच तार्किकादिमते प्रामाणिकस्याप्यत्यंताभावप्रतियोगित्वस्वीकारात्तन्मतेन तयोः परस्परविरहरूपत्वाभिधानमिति वाच्यं। सिद्धांतेप्यसत्त्वाभाव एव सत्त्वं सत्त्वाभाव एवासत्त्वमिति स्वीकारात्। यद्वक्ष्यति। ''मया लाघवादावश्यकत्वादसत्त्वा भाव एव सत्त्वं तदभाव एवासत्त्वमिति स्वीकारा'' दिति। तथा च प्रामाणिकस्यात्यंताभावासंभवेन असति किंचिदारोपितं सत्त्वमस्ति तदत्यंताभाव एवासत्त्वं। सतिचारोपितं किंचिदसत्त्वमस्ति तदत्यंताभाव एव सत्त्वमिति वाच्यं। आरोपितयोश्चासत्त्वेनात्यंताभावप्रतियोगित्वसंभवात्। एवं चारोपितसत्त्वाद्यभावस्यैवासत्त्वादित्वे आरोपितसत्त्वासत्त्वयोरेव व्याहतिप्राप्त्या वास्तवसत्त्वासत्त्वयोः कथं व्याघातः। तस्मादेतत्कथमिति चेदत्रवदंति। सत्त्वासत्त्वयोः परस्परविरहरूपत्वोक्तेः परस्पर विरहव्यापकत्वेतात्पर्यं। तथा च यत्रारोपित सत्त्वात्यंताभावः तत्रासत्त्वं। यत्रारोपितासत्त्वात्यंताभावस्तत्र सत्त्वमिति व्याप्तेः।

न च घटे वास्तवसत्त्वसद्भावेनारोपितसत्त्वात्यंताभावस्य सत्त्वेप्यसत्त्वाभावात् एवं तुच्छे वास्तवासत्त्व सत्त्वेनारोपितसात्त्वात्यंताभावसद्भावेपि सत्त्वाभावाद्व्यभिचारः। तथाच कथं परस्परविरहव्यापकत्वमपीति वाच्यं। अत्यंताभावस्य प्रतियोग्यारोपपूर्वकत्वाद्यथा प्रतियोगिना सह विरोधः तथा प्रतियोग्यारोपे यत्प्रधानं तेनापि विरोधस्यांगीकार्यत्वात्। एवं चात्रात्यंताभावे प्रतियोगिभूतं यदारोपितं सत्त्वं तत्र यत्प्रधानं वास्तवं सत्त्वं तेन सममत्यंताभावस्य विरोधात्। घटेच प्रधानभूतवास्तवसत्त्वसद्भावेन तत्रारोपित सत्त्वात्यंताभावस्य वक्तुमशक्यत्वात्। एवं तुच्छे असत्वारोपप्रधान भूतवास्तवासत्व सद्भावेनारोपितासत्त्वात्यंताभावस्य वक्तुमशक्यत्वात्। एवं च न व्यभिचारः। तथाच परस्परविरहव्यापकत्वेन विरोधो युक्त इति।

नन्वथापि प्रधानभूतं वास्तवंसत्त्वं घटेऽस्ति तत्रारोपित सत्त्वात्यंताभावोप्यस्ति। तुच्छे प्रधानभूतवास्तवासत्त्वमस्ति आरोपिता सत्त्वात्यंताभावोप्यस्तीति कथं प्रतियोग्यारोपे प्रधानेनापि विरोध इति चेदुच्यते। यत्र प्रधानं वास्तवं सत्त्वं तत्रारोपितसत्त्वात्यंताभावो नास्तीत्यस्य प्रतियोग्यधिकरणसंसर्गारोपपूर्वकप्रतीति विषयाभावो नास्तीत्यर्थकरणात्। यत्र घटे प्रधान भूतं वास्तवसत्त्वमस्ति तत्र सत्त्वमारोप्य न निषिध्यते। एवं यत्र तुच्छे प्रधानभूतं वास्तवासत्त्वमस्ति तत्र असत्त्वमारोप्य न निषिध्यते इति कृत्वा असत्त्वारोप पूर्वकप्रतीति विषयाभावरूपारोपितासत्त्वात्यंताभावो नास्तीति युक्तः परस्परविरहव्यापकत्वेन विरोध इति। एवमेव दोषात्यंताभाव रूपभगवल्लक्षणं न संभवति। दोषाणां प्रामाणिकत्वेन, तदत्यंताभावायोगादिति शंकिते आरोपितदोषात्यंताभावस्य लक्षणत्वं वाच्यं। ननु तर्हि जीवेऽतिव्याप्तिरिति चेन्न। तत्राप्यत्यंताभावस्य प्रतियोग्यारोपप्रधानेन विरोधात्। दोषाणामारोपे प्रधानभूतानां वास्तवदोषाणां जीवे सत्त्वेन तत्र दोषानारोप्य निषेधः कर्तुं न शक्यते। तथा च प्रतियोग्यधिकरणसंसर्गारोपपूर्वकप्रतीतिविषयाभावाख्यारोपितदोषात्यंताभावो जीवे नास्ति। अस्ति च भगवति। भगवति आरोपिता दोषा न संतीति निषेधस्य कर्तुं शक्यत्वात्। अत्यंताभावस्य प्रतियोग्यारोपप्रधानेन विरोधात्। दोषारोपप्रधानभूतवास्तवदोषाणां च भगवत्यभावेन निषेधसंभवेन दोषाभावादिति द्रष्टव्यं। सत्त्वात्यताभावोपपादनाय निर्धर्मकेत्युक्तं। सत्त्वराहित्यस्य सद्रूपत्वानुपमर्दकत्वादिति भावः। किंच सत्त्वात्यंताभावासत्त्वात्यंताभाव रूपधर्मद्वयस्यैकस्मिन्नधिकरणे कुत्राप्य प्रसिद्ध्याऽप्रसिद्धविशेषणत्वं।

ननु पृथिवी इतरभिन्नेत्यत्र जलादित्रयोदशान्योन्याभावानामैकाधिकरण्येनाप्रसिद्धावपि तेजः प्रभृतिषु प्रत्येकं प्रसिद्ध्याऽप्रसिद्धिपरिहारवदत्रापि सत्त्वात्यंताभावासत्त्वात्यंताभावयोरैकाधिकरण्येनाप्रसिद्धावपि सति असत्त्वात्यंताभावस्यासति च सत्त्वात्यंताभावस्य च प्रत्येकं प्रसिद्ध्याऽप्रसिद्धविशेषणत्वाभावादिति चेत्सत्यं। अप्रसिद्धविशेषणत्वाभावेपि असत्त्वात्यंताभावरूपांशस्य सिद्धत्वेन सिद्धसाधनता स्यादित्याह॥ पृथिवीत्यादिना॥ अभावमनंतर्भाव्य त्रयोदशत्वं बोध्यं॥ प्रत्येकमिति॥ सति असतिचेत्यर्थः। ऐकाधिकरण्यावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेनात्र ऐकाधिकरण्यावच्छेदेन साध्य प्रसिद्धेरभावादप्रसिद्धविशेषणता स्यादेवेत्याशयेन कथंचिदित्युक्तं। ननु केवलस्यासत्त्वात्यताभावस्य सिद्धत्वेपि असिद्धेन सत्त्वात्यंताभावेन सहोच्यमानत्वादसिद्धत्वमेवेति नांशे सिद्धसाधनतेत्यत आह॥ नहीति॥ तथात्वे पर्वतो वह्निमान्पाषाणवांश्चेत्यत्रापि सिद्धसाधनता नोद्भाव्येतेति भावः। नन्वेवंपृथिवी इतरभिन्नेत्यत्रापि जलादित्रयोदशान्योन्याभावानां साध्यत्वात्

जलाद्येकैकान्योन्याभावानामपि घटो न जलादिरिति प्रतीत्या घटत्वावच्छेदेन सिद्धत्वादंशे सिद्धसाधनतापत्तिरित्यनुमानं दुष्टं स्यादित्यत आह॥ पृथिवीति॥ जलाद्येकैकान्योन्याभावस्य घटे घटत्वावच्छेदेन सिद्धावपि पक्षतावच्छेदकीभूतपृथिवीत्वावच्छेदेन घटे न सिद्धिरतो नांशे सिद्धसाधनतेत्यर्थः। पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यत्वात् तस्याश्चाजातत्वादिति भावः। पृथिवीत्वोपहिते घटे इति शेषः। प्रकृते च पक्षतावच्छेदकसामानाधिकरण्येनैवासद्वैलक्षण्यस्य सिद्धत्वात्सिद्धसाधनतेति द्रष्टव्यं॥ दृष्टांतस्येति॥ धर्मद्वयस्य साध्यत्वान्मन्मतेशुक्तिरूप्ये सत्त्वात्यंताभावस्य सत्त्वेप्यसत्त्वस्यैव सत्त्वेन तदत्यंताभावस्य तत्राभावात्साध्यवैकल्यमित्यर्थः। नन्वेवं तर्हि पृथिवी इतरभिन्नेत्यत्रापि त्रयोदशभेदानां साध्यत्वाज्जलादौतेजः प्रभृतिद्वादशभेदानां सत्त्वेपि जलभेदस्याभावात्साध्यवैकल्यं। एवं तेजःप्रभृतिष्वपि स्वस्वेतरप्रतियोगिकद्वादशभेद सत्त्वेपि स्वस्वभेदाभावात्साध्यवैकल्यमेव स्यादित्यत आह॥ पृथिवीत्वेति॥ यत्रेतरत्वं तत्र पृथिवीत्वाभाव इति व्यतिरेके जलादिर्दृष्टांत इति भावः। ननु पृथिवीत्वहेतौ व्यतिरेकिणि दृष्टांताभावे त्रयोदशान्योन्याभावानां साध्यभूतानां प्रसिद्ध्यभावेन साध्यव्यतिरेकनिरूपणं न स्यादित्यत आह॥ त्रयोदशेति॥ जलादित्रयोदशान्योन्याभावानां तेजः प्रभृतिषु प्रत्येकं प्रत्येकं ज्ञानानंतरं एते त्रयोदशान्योन्याभावा इति समूहालंबन रूपैकज्ञानोपरूढानां प्रसिद्धि संभवेन व्यतिरेकनिरूपणं संभवतीति भावः।

पूर्वं धर्मद्वयसाधनपक्षे व्याहत्यर्थांतरांशेसिद्धसाधनसाध्यवैकल्याख्यदोषचतुष्टयस्योक्तत्वेनात्रात एवेत्यति देशे दोष चतुष्टयस्याप्यति देशः प्रतीयतेऽतः अत एवेत्युक्तं विशदयति॥ व्याहतेरित्यादिना॥ धर्मद्वयसाधन इव विशिष्टसाधनेपि परस्परविरुद्धयोर्विशेषणविशेष्यभावायोगाद्व्याहतिरेव। निर्धर्मकब्रह्मवत्सत्त्वात्यंताभाववत्त्वे सत्यपि सद्रूपत्वेनाप्युपपत्त्याऽर्थांतराच्छुक्ति रूप्ये विशेष्यांशाभावेन विशिष्टाभावात्साध्यवैकल्यं चेत्यर्थः।

विशिष्टसाधनपक्षे अंशे सिद्धसाधनातिदेशः कुतो न क्रियत इति शंकायामस्मिन्पक्षे अंशे सिद्धसाधनस्यानवकाशं वदंस्तथा व्यर्थविशेष्य त्वरूपं दोषांतरं च नास्तीति वदन्नप्रसिद्धविशेषण त्वाख्यंदोषांतरमाह॥ किं चे त्यादिना॥ किं चाप्रसिद्धविशेषणत्वमित्यन्वयः॥ पक्षतावच्छेदकनानात्वेनेति॥ तथाच वाक्त्वावच्छेदेनाऽनित्यत्वस्य सिद्धत्वादिति भावः॥ पक्षतावच्छेदकैक्यादिति॥ पक्षतावच्छेदकैक्येहि पक्षतावच्छेदकसामानाधिकरण्येन साध्यस्य सिद्धत्वात्संपूर्णसिद्धसाधनमेव नांशतः सिद्धसाधनं। पृथिवी इतरभिन्नेत्यत्र तु पृथिवीत्वरूपपक्षतावच्छेदक सामानाधिकरण्येन साध्यसिद्धि रूपोद्देश्य प्रतीतेरसिद्धत्वेनांशे सिद्धसाधनानवकाशादित्यर्थः॥ साध्यतावच्छेदकेति॥ पक्षतावच्छेदकनानात्व एव अंशे सिद्धसाधनवत्साध्यतावच्छेदकनानात्व एवांशे सिद्धसाधनता। अत एव धर्मद्वयसाधनपक्षे अंशे सिद्धसाधनतोक्ता। पक्षतावच्छेदकैक्येंशेसिद्धसाधनत्वाभाववत्साध्यतावच्छेदकैक्येपि नांशे सिद्धसाधनं। एवं च प्रकृते विशिष्टस्यैकस्य साध्यत्वेन साध्यतावच्छेदकैक्येन तदवच्छिन्नसाध्यस्याऽसिद्धत्वान्नांशे सिद्धसाधनावकाश इत्यर्थः। विशिष्टं विशेषणाद्यात्मकमिति पक्षे साध्यतावच्छेदकैक्यं नास्त्येवेत्याशयेन कथंचिदित्युक्तं। कुतो न व्यर्थविशेष्यत्वमित्यतो व्यापकगतविशेषणानामुद्देश्यप्रतीतिसिद्ध्यर्थत्वस्य दर्शनादित्याह॥ विमतमित्यादिना॥ चिकीर्षादिरिवेति॥ चिकीर्षापरोक्षज्ञानविशिष्टेश्वरसिद्धेरुद्देश्यत्वादित्यर्थः। समानाधिकृतत्वात्। शुक्लः पट इत्येकविभक्त्यंत पदवाच्यत्वादिति व्याख्यानं चिंत्यं। घटः कलश इत्यादौ व्यभिचारापत्तेर्यदिचेत्युत्तरग्रंथविरोधाच्च। किंतु

विशेषणविशेष्यभावेन व्यवह्रियमाणत्वादित्येवार्थो द्रष्टव्यः। दंडी देवदत्त इत्यादौ दंडित्वस्यैव विशेषणत्वाद्विशिष्टस्य च विशेष्येण भिन्नाभिन्नत्वान्नदोष इति द्रष्टव्यं। यथा हि भेदाभेदवादिना मीमांसकेन तार्किकं प्रति प्रयुक्ते भिन्नाभिन्नमिति साध्ये भिन्नत्वविशेषणस्य तार्किकेणांगीकृतत्वेपि न वैयर्थ्यं। भिन्नाभिन्नत्व प्रकारकप्रतीतेरुद्देश्यत्वात्। एव मिहापि सद्विलक्षणत्वे सत्यसद्विलक्षणमिति विशिष्टप्रतीतेरुद्देश्यत्वान्न व्यर्थविशेष्यत्वमित्यर्थः। विशेषणानां धर्माणां।

ननु भेदाभेदानुमानदृष्टांतो न युक्तः। तत्र गुणादिकं गुण्यादिकं गुण्यादिनाऽभिन्नमित्येव कृतेऽभेदरूपसाध्यवति घटकलशादौ घटःकलश इति प्रयोगादर्शनेन समानाधिकृतत्वरूपहेत्वभावेनाभेदरूपसाध्यं प्रति समानाधिकृतत्वस्य प्रयोजकत्वाभावात्। हेतुरस्तु साध्यं मास्त्वित्येवं रूपाप्रयोजकतात्र नाभिप्रेता। किं नाम। ''तस्मिन्सत्यभवतः तेन विनापि भवतः तदप्रयोज्यत्वादि'' तिवचनात्साध्ये सत्यप्यभवतो हेतोः साध्ये प्रयोजकत्वाभावात्। अतोऽप्रयोजकतानिरासाय भेद विशिष्टाधीस्तत्रोद्देश्या। घटकलशादौ च हेत्वभाववति भेदाभेदरूपसाध्यस्याप्यभावान्नाप्रयोजकत्वमित्यप्रयोजकतापरिहारायैव भिन्नत्वविशेषणं नोद्देश्य प्रतीत्यर्थमित्याशंक्य तर्हि प्रकृतेपि सत्त्वाभावमात्रस्यैव साध्यत्वे सत्त्वाभाववति तुच्छेऽविद्यमानस्य दृश्यत्वस्याऽऽप्य प्रयोजकत्वं माभूदिति अप्रयोजकतापरिहारायैवासद्विलक्षणत्वमपि साध्यकोटौ निवेशितं। तन्निवेशे तु तुच्छे दृश्यत्वाभाववति विशिष्टं साध्यमपि नास्तीत्यप्रयोजकताया अभावादित्यप्रयोजकतापरिहारायैव विशिष्टधीस्तत्रोद्देश्या। अतो नोद्देश्यप्रतीत्यर्थं विशिष्टोपादानं। अतो न व्यर्थविशेष्यत्वमित्याह॥ यदिचेत्यादिना॥ अप्रसिद्धेति॥ विशिष्टसाध्यस्य कुत्राऽप्यप्रसिद्धत्वादिति भावः। ननु यदि सत्त्वात्यंताभाव वत्त्वे सत्यसत्त्वात्यंताभाव रूपविशिष्टसाधने अप्रसिद्धविशेषणत्वं तदा पृथिवी इतरभिन्नेत्यत्रापि जलादिद्वादशान्योन्याभाववत्त्वे सति समवायान्योन्याभाव रूपविशिष्टस्यैव साध्यत्वमंगीकृत्य तस्य कुत्राप्य प्रसिद्धत्वेनाप्रसिद्धविशेषणत्वं तत्रापि स्यात्। तथाच त्रयोदशान्योन्याभावानां प्रत्येकं प्रसिद्धया साध्य प्रसिद्धिव्युत्पादनं व्याहतं स्यादित्यत आह॥ पृथिवीति॥ साधन पक्ष एवेति॥ नोक्तरीत्या विशिष्टसाधन पक्ष इति वाक्यशेषः। विशिष्टस्य साध्यतापक्षे तु समुदायालंबनरूपैकज्ञानोपारूढत्वमादाय न साध्यप्रसिद्धिसंपादनं संभवतीति द्रष्टव्यं। ननु विशिष्टस्य साध्यत्वेपि नाप्रसिद्धविशेषणत्वं। सद्वैलक्षण्यादीनां विशकलितानां प्रसिद्धिसंभवादित्यत आह॥ अन्यथेति॥ भूःशशविषाणोल्लिखिता भूत्वादित्यत्राप्यप्रसिद्धविशेषणत्वं सर्वसंमतं न स्यात्। तत्रापि शशादीनां विशकलितानां प्रसिद्धिसंभवादिति भावः॥

८. द्वितीयमिथ्यात्वभङ्गः

न द्वितीयः। त्रैकालिकनिषेधस्य तात्त्विकत्वेऽद्वैतहानेः। प्रातिभासिकत्वे सिद्धसाधनात्। व्यावहारिकत्वेऽपि तस्य बाध्यत्वेन तात्त्विकसत्त्वाविरोधि त्वेनार्थान्तरात्। अद्वैतश्रुतेरतत्त्वावेदकत्वापाताच्च। तत्प्रतियोगिनोऽप्रातिभासिकस्य प्रपंचस्य पारमार्थिकत्वापत्तेश्च।

किंच निषेधप्रतियोगित्वं किं स्वरूपेण? किं वा असद्विलक्षणस्वरूपानुपमर्देन पारमार्थिकत्वाकारेण? नाद्यः। श्रुत्यादिसिद्धोत्पत्त्यादिकस्यार्थक्रियासमर्थस्याविद्योपादानकस्य तत्त्वज्ञाननाश्यस्य च वियदादे रूप्यादेश्च धीकाले विद्यमानेना सद्विलक्षणस्वरूपेण त्रैकालिकनिषेधायोगात्। त्रैकालिकनिषेधं प्रति स्वरूपेणा पणस्थरूप्यं पारमार्थिकत्वाकारेण प्रातिभासिकरूप्यं वा प्रतियोगीति त्वन्मतहानेश्च। अत्यन्तासत्त्वापाताच्च।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमपि ह्यन्यत्रासत्त्वेन सम्मतस्य पटादेः सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वपर्यन्तमिति त्वन्मतम्। अन्यथा अन्यत्र तत्सत्त्वापातात्। न हि तेषामन्यत्र सत्ता संभविनीति त्वदुक्तेश्च। तथाच कथं नात्यन्तासत्त्वापत्तिः? न हि शशशृंगादीनामपीतोऽन्यदसत्त्वमस्ति। न च निरुपाख्यत्वमेव तेषामसत्त्वम्। निरुपाख्यपदेनैव ख्यायमानत्वात्। असतोऽप्रतीतावसद्वैलक्षण्यज्ञानस्यासत्प्रतीतिनिरासस्य, असत्पदप्रयोगस्य चायोगाच्च। नाप्यपरोक्षतोऽप्रतीयमानत्वमसत्त्वम्। नित्यातीन्द्रियेऽपि सत्त्वात्। नापि क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वम्। जगति शुक्तिरूप्यादौ चैवंविधासद्वैलक्षण्यस्य शून्यवादेऽपि सत्त्वात्। त्वयाऽप्यसच्चेन्न प्रतीयेतेति वदतोक्ताप्रतीतिं प्रति प्रयोजकस्यान्यस्यैवासत्त्वस्य वक्तव्यत्वाच्च। ब्रह्मण्यंगीकृतं यत् प्रतिपन्नोपाधौ त्रैकालिकनिषेधाप्रतियोगित्वात्मकाबाध्यत्वरूपं सत्त्वं तद्विरूद्धस्यैवासत्त्वरूपत्वाच्च। अन्यथा प्रतीत्यनुपाधिकासत्त्वाभावे ब्रह्मण्यपि सत्त्वेन प्रतीतिरेव सत्त्वं स्यात्। येन पुंसा शशशृंगाभावो न निश्चितः तस्य गोशृंगमस्तीति वाक्यादिव शशशृंगमस्तीति वाक्यादपि ज्ञानोत्पत्तेश्च। त्वन्मतेऽपि हि तत्राध्यस्तस्यास्तित्वस्यानिर्वाच्यत्वेऽप्यधिष्ठानमसदेव। वक्ष्यते चैतदनिर्वाच्यत्वभंगे। 'तद्वैक आहुरसदेवेदमग्र आसीद्' इति श्रुत्याऽप्यसतस्सत्त्वेन प्रतीतेश्च।

नापि सदनिर्वाच्याभ्यामन्यत्वमसत्त्वम्। अनिर्वाच्यत्वस्यासत्त्वनिरूप्यत्वे नान्योन्याश्रयात्। लाघवेन सार्वत्रिकत्रैकालिकनिषेधाप्रतियोगिरूपसदन्यत्वस्यैव तत्त्वाच्च। अनिर्वाच्यस्यापि स्वरूपेण त्रैकालिकनिषेधेऽसतोऽनिर्वाच्यादन्यत्वासिद्धेश्च।

अर्थक्रियासामर्थ्याभावादिकमसत्त्वमित्यशक्यशङ्कम्। शुक्तिरूप्यादौ शुद्धब्रह्मणि च सत्त्वात्। न च निःस्वरूपत्वमसत्त्वम्। मिथ्याभूतं तु सस्वरूपमिति वाच्यम्। मिथ्याभूतस्यापि स्वरूपेणैव त्रैकालिकनिषेध इति पक्षे निःस्वरूपत्वस्य दुर्वारत्वात्। न च मिथ्याभूतं स्वरूपं मिथ्यात्वादेव स्वरूपेण त्रैकालिकनिषेधसामानाधिकरण्याविरोधीति वाच्यम्। स्वदेशकालयोः तत्स्वरूप सहिष्णोस्तत्स्वरूपप्रतिषेधत्वस्य पारिभाषिकत्वापातात्। अन्यथा तुच्छेऽपि तन्तुष्विवातन्तुष्वपि व्यावहारिक पटस्वरूपापातात्। प्रागभावादिसमानकालीनत्वेनाप्यविरोधापाताच्च। परोक्षप्रतीत्याद्य न्यथानुपपत्त्या एतादृशस्वरूपस्यापि सुवचत्वाच्च। तस्मात्सर्वत्र त्रैकालिकनिषेध प्रतियोगित्वमेवात्यन्तासत्त्वम्। तत्र तदानीमसदित्यनेन तत्र तदा निषेधप्रतियोगित्व स्येवात्यन्तासदित्यनेनापि सर्वत्र सदा निषेधप्रतियोगित्वस्यैव प्रतीतेः। न च मिथ्याभूतस्यापि स्वरूपेणैव निषेध इति पक्षे तदभावः सप्रतियोगिकः, तुच्छाभावस्तु निष्प्रतियोगिक इति वा, मिथ्याभूतस्य सदा सर्वत्र सद्वैलक्षण्यमात्रं, तुच्छस्य तु स्वरूपेणैव प्रतिषेध इति वा वैषम्यं वक्तुं शक्यम्।

अथ मतम् – असतोऽसत्त्वादेवात्यंन्तिकनिषेधप्रतियोगितापि नेति। तन्न। असत्त्वस्योक्तनिषेधप्रतियोगित्वरूपत्वेन हेतोर्विरुद्धत्वात्। असतोऽसत्त्ववत् सद्वैल क्षण्यवत् त्वयोच्यमानप्रतियोगित्वाभाववत् परोक्षज्ञानव्यवहारौ प्रति विषयत्व वदसद्वैलक्षण्यं प्रति प्रतियोगित्ववच्च निषेधप्रतियोगित्वस्याप्युपपत्तेश्च। प्रागभावादिदशायामसत एव घटादेस्तत्प्रतियोगित्वदर्शनेन प्रतियोगित्वस्य रूपादिवद्धर्मि सत्तानपेक्षत्वाच्च। कालान्तरे सत्त्वस्येदानीमनुपयोगात्। शिष्टमनिर्वाच्यत्वभंगे वक्ष्यते।

एतेन यदुक्तं मकरन्दे– असतोऽप्रसक्तेर्निषेधाप्रतियोगित्वमिति, तच्च निरस्तम्। असतोऽप्रसक्त्या ब्रह्मजगतोरसद्वैलक्षण्यस्य नासदासीदिति श्रौतनिषेधस्यासति च सद्वैलक्षण्यस्य प्रतियोगित्वाभावस्य चासिद्ध्यापातात्। तस्यापि प्रतियोगि प्रतीत्यधीनसिद्धिकत्वात्। ननु तत्र शब्दाभासादिना बुद्धिपूर्वारोपेण वा प्रसक्तिर्वा, परार्थेन शब्देनाप्रसक्तस्यानिषेधेऽपि शब्दाभासादिमूलके प्रतियोगिस्मृत्यादिके सति प्रत्यक्षेणाप्रसक्तस्यैव वा निषेधो युक्तः। अन्यथा अंगुल्यग्रे हस्तिशताभावो

न सिद्ध्येदिति चेत्, समं प्रकृतेऽपि। शशशृंगं नास्तीत्यबाधितप्रतीतेः। न च तत्रापि बुद्धिपूर्वकमारोपितस्यानिर्वाच्यस्यैव शृंगस्य निषेधः। अनाभासस्यैवारोप्य निषेध इति तार्किकमते, आभासस्यानिर्वाच्यस्य प्रसक्त्यानाभासस्य निषेध इति त्वन्मते चानिर्वाच्यान्यस्यैव शृंगस्य निषेद्धव्यत्वात्। जगदादावनिर्वाच्य भूताभासासद्वैलक्षण्यमेव, न त्वनाभासासद्वैलक्षण्यमित्यापाताच्च।

ननु सदा सर्वत्राविद्यमानत्वमसत्त्वं चेदनाश्रितात्मादिविभुद्रव्यात्यन्ताभावोऽपि केवलान्वयीत्यात्मादिरप्यसन् स्यादिति चेत्, तर्हि त्वन्मतेऽपि आत्मा मिथ्या स्यात्। तस्यापि ''स एवाधस्ताद्'' इत्यादिश्रुतिप्रतिपन्नोपाधौ कालत्रयेऽप्यभावात्। अथ विभुत्वेनोर्ध्वाधरीभावहीनोऽप्यात्मा सामान्यादिवत्स्वदेशकालयोरप्यस्ति, सदा सर्वत्रात्मेत्यबाधितप्रतीतेरिति न तस्य मिथ्यात्वम्, तर्हि तत एव नासत्त्वम्। देशकालावपि सदा सर्वत्र देशकालावित्यबाधितप्रतीत्याप्रमेयत्वाभिधेयत्ववत्तार्किकाभिमत दिक्कालात्यन्ताभाववच्च स्ववृत्ती अन्योन्यवृत्ती च। अन्यथा त्वन्मतेऽपि तयोः प्रातिभासिकसत्त्वं स्यादिति न कश्चिद्दोषः। तस्मात्स्वरूपेण त्रैकालिकनिषेध प्रतियोगित्वे अत्यन्तासत्त्वं दुर्वारम्। तदुक्तम्–

''नासीदस्ति भविष्यच्च तदिति ज्ञानमेयता।
यदि बाधस्तदाऽसत्त्वं तेनैवांगीकृतं पुनः॥''

नापि पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगित्वमित्यन्त्यः। अबाध्यत्वरूप पारमार्थिकत्वस्य बाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयात्। रूप्यं नास्ति नासीन्न भविष्यतीति, 'नेह नानास्ति किंचन' इति च स्वरूपेणैव निषेधाच्च। अन्यथा नृशृंगादेरपि न स्वरूपेण निषेधः, किन्तु सत्त्वेनेति स्यात्। रूप्यवत्तत्पारमार्थिकत्वस्याप्यपरोक्षप्रतीत्यन्यथानुपपत्त्या धीकाले वर्तमानतया निषेधायोगाच्च। पारमार्थिकत्वस्य पारमार्थिकत्वेन निषेधे त्वनवस्था। सुखाद्यनुभवरूपस्य ब्रह्मणोऽपि, ''मयि सुखाद्यनुभवः'' इत्यादिप्रत्यक्षेण ''स एवाधस्ताद्'' इत्यादिश्रुत्या च प्रतिपन्नोपाधौ निर्धर्मकत्वेन पारमार्थिकत्वाकारेण निषेधेनातिव्याप्त्यापत्तेश्च। प्रतिपन्नोपाधिशब्देनाध्यस्ताधिष्ठानविवक्षायां चाध्यस्तत्वस्य

निरुच्यमानमिथ्यात्वानतिरेकेणात्माश्रयात्। शेषवैयर्थ्याच्च। ब्रह्मणः प्रतिपन्नोपाध्यभावेऽपि पारमार्थिकत्वरूपधर्माभावस्य ब्रह्मण्यपरिच्छिन्नसद्रपत्वाविरोधित्ववद् घटादेः प्रतिपन्नोपाधिसद्भावेऽपि पारमार्थिकत्वाभावस्य घटादौ परिच्छिन्नसद्रूपत्वाविरोधित्वोपपत्तेश्च। न हि ब्रह्मण्यपि स्वरूपातिरिक्तं पारमार्थिकत्वम् तत्त्वतोऽस्ति, अद्वैतहानेः। न च सोपाधिकबाधाभावगर्भितं पारमार्थिकत्वं निरुपाधिकब्रह्ममात्रम्। एवं च ब्रह्म कालत्रयेऽपि सत्, वियदादि रूप्यादि च कदाचिदेवेति नित्यत्वानित्यत्वाभ्यामेव वैषम्यम्। न तु सत्यत्वमिथ्यात्वाभ्याम्। तथा च–

स्वरूपेण त्रिकालस्थनिषेधो नास्ति ते मते।
रूप्यादेस्तात्त्विकत्वेन निषेधस्त्वात्मनोऽपि च॥

अद्वैतसिद्धिः

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं वा मिथ्यात्वम्। ननु प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्त्विकत्वे अद्वैतहानिः, प्रातिभासिकत्वे सिद्धसाधनम्, व्यावहारिकत्वेऽपि तस्य बाध्यत्वेन तात्त्विकसत्त्वाविरोधितया अर्थान्तरम्, अद्वैतश्रुतेरतत्त्वावेदकत्वं च, तत्प्रतियोगिनोऽप्रातिभासिकस्य प्रपंचस्य पारमार्थिकत्वं च स्यादिति चेन्न। प्रपंचनिषेधाधिकरणीभूतब्रह्माभिन्नत्वान्निषेधस्य तात्त्विकत्वेऽपि नाद्वैतहानिकरत्वम्। न च तात्विकाभावप्रतियोगिनः प्रपंचस्य तात्त्विकत्वापत्तिः। तात्त्विकाभावप्रतियोगिनि शुक्तिरजतादौ कल्पिते व्यभिचारात्। अतात्त्विक एव वा निषेधोऽयम्। अतात्त्विकत्वेऽपि न प्रातिभासिकः, किं तु व्यावहारिकः। न च तर्हि निषेधस्य बाध्यत्वेन तात्त्विकसत्त्वाविरोधित्वादर्थान्तरमिति वाच्यम्। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाधदर्शनात्। निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वाविरोधित्वे न तन्त्रम्। किं तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वात् कथं न विरोधित्वम्? न च निषेधस्य निषेधे प्रतियोगिसत्त्वापत्तिरिति वाच्यम्। तत्र हि निषेधस्य निषेधे प्रतियोगिसत्त्वमायति यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते। न निषेधमात्रं निषिध्यते। यथा रजते नेदं रजतमिति ज्ञानानन्तरम् इदं नारजतमिति ज्ञानेन रजतं व्यवस्थाप्यते। यत्र तु प्रतियोगिनिषेधयोरुभयोरपि निषेधस्तत्र न प्रतियोगिसत्त्वम्। यथा ध्वंससमये प्रागभावप्रतियोगिनोरुभयोर्निषेधः। एवं

च प्रकृतेऽपि निषेधबाधकेन प्रतियोगिनः प्रपंचस्य तन्निषेधस्य च बाधनान्न निषेधस्य बाध्यत्वेऽपि प्रपंचस्य तात्त्विकत्वम्। उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात्। न चातात्त्विकनिषेधबोधकत्वे श्रुतेरप्रामाण्यापत्तिः। ब्रह्मभिन्नं प्रपंचनिषेधादिकम् अतात्विकमित्यतात्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यासम्भवात्।

ननु तन्निषेधप्रतियोगित्वं किं स्वरूपेण, उतासद्विलक्षणस्वरूपानुपमर्देन पारमार्थिकत्वाकारेण वा। नाद्यः, श्रुत्यादिसिद्धोत्पत्तिकस्यार्थक्रियासमर्थस्याविद्योपादानकस्य तत्त्वज्ञाननाश्यस्य च वियदादे रूप्यादेश्च धीकालविद्यमानेन असद्विलक्षणस्वरूपेण त्रैकालिकनिषेधायोगात्। नापि द्वितीयः; अबाध्यत्वरूपपारमार्थिकत्वस्य बाध्यत्वरूप मिथ्यात्वनिरूप्यत्वेन अन्योन्याश्रयात्। पारमार्थिकत्वस्यापि स्वरूपेण निषेधे प्रथमपक्षोक्तदोषापत्तिः, अतस्तस्यापि पारमार्थिकत्वाकारेण निषेधे अनवस्था स्याद् इति चेन्मैवम्। स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वस्य प्रपञ्चे शुक्तिरूप्ये चाङ्गीकारात्। तथा हि – शुक्तौ रजतभ्रमानन्तरम् अधिष्ठानतत्त्वसाक्षात्कारे रूप्यं नास्ति नासीन्न भविष्यतीति स्वरूपेणेव, 'नेह नाने'ति श्रुत्या च प्रपञ्चस्य स्वरूपेणैव निषेधप्रतीतेः। न च तत्र लौकिकपरमार्थरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्। भ्रमबाधयोर्वैयधिकरण्यापत्तेः, अप्रसक्तप्रतिषेधापत्तेश्च। न च तर्ह्युत्पत्त्याद्यसंभवः। न ह्यनिषिद्धस्वरूपत्वमुत्पत्त्यादिमत्त्वे तन्त्रम्। परैरनिषेध्यरूपत्वेनाङ्गीकृतस्य वियदादेरुत्पत्त्याद्य नङ्गीकारात्। किंतु वस्तुस्वभावादिकमन्यदेव किंचित् प्रयोजकं वक्तव्यम्। तस्य मयापि कल्पितस्य स्वीकारात्।

न च त्रैकालिकनिषेधं प्रति स्वरूपेणापणस्थं रूप्यं पारमार्थिकत्वाकारेण प्रातिभासिकं वा प्रतियोगीति मतहानिः स्यादिति वाच्यम्। अस्याचार्यवचसः पारमार्थिक लौकिकरजततादात्म्येन प्रतीतं प्रातिभासिकमेव रजतं प्रतियोगीत्यर्थः। तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वाशब्दः। एतावदुक्तिश्च पुरोवर्तितादात्म्येनैव रजतं प्रतीयत इति मतनिरासार्थं, लौकिकपरमार्थरजततादात्म्येनापि प्रतीयत इति प्रतिपादयितुं च। तदुक्तं तत्त्वप्रदीपिकायाम्– 'तस्माल्लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रतियोगीति पूर्वाचार्याणां वाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनात् लौकिक परमार्थरजतत्वेनापरोक्षतया प्रतीतस्य कालत्रयेऽपि लौकिकपरमार्थरजतमिदं न भवतीति निषेधप्रतियोगितामङ्गीकृत्य नेतव्ये' ति। अयमाशयः– एकविभक्त्यन्तपदोपस्थापिते धर्मिणि,

प्रतियोगिनि च नञोऽन्योन्याभावबोधकत्वनियमस्य व्युत्पत्तिबलसिद्धत्वाद् 'घटः पटो न भवती'ति वाक्यवद् 'इदं रजतं न भवती'ति वाक्यस्य अन्योऽन्याभावबोधकत्वे स्थिते अभिलापजन्यप्रतीतितुल्यत्वादभिलप्यमानप्रतीतेः 'नेदं रजत'मिति वाक्याभिलाप्य प्रतीतेरन्योन्याभावविषयत्वमेव। तथा च इदंशब्दनिर्दिष्टे पुरोवर्तिप्रातीतिकरजते रजतशब्दनिर्दिष्ट व्यावहारिकरजतान्योन्याभावप्रतीतेरार्थिकं मिथ्यात्वम्। 'नात्र रजत' मिति वाक्याभिलप्या तु प्रतीतिरत्यन्ताभावविषया। भिन्नविभक्त्यन्तपदोपस्थापितयोरेव धर्मिप्रतियोगिनोर्नञः संसर्गाभावबोधकत्वनियमात्। सा च पुरोवर्तिप्रतीतरजतस्यैव व्यावहारिकमत्यन्ताभावं विषयीकरोतीति कण्ठोक्तमेव मिथ्यात्वम्। अतो नापसिद्धान्तो नान्यथाख्यात्यापत्तिर्न वा ग्रन्थविरोध इत्यनवद्यम्।

नन्वेवम् अत्यन्तासत्त्वापातः, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं ह्यन्यत्रासत्त्वेन संप्रतिपन्नस्य घटादेः सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वं पर्यवसितम्। अन्यथा तेषामन्यत्र सत्त्वापातात्। न हि तेषामन्यत्र सत्ता संभवतीति त्वदुक्तेश्च। तथा च कथमसद्वैलक्षण्यम्, न हि शशशृङ्गादेरितोऽन्यदसत्त्वम्। न च निरुपाख्यत्वमेव तदसत्त्वम्; निरुपाख्यपदेनैव ख्यायमानत्वात्। नाप्यप्रतीयमानत्वमसत्त्वम्; असतोऽप्रतीतौ असद्वैलक्षण्यज्ञानस्या सत्प्रतीतिनिरासस्यासत्पदप्रयोगस्य चायोगात्। न चापरोक्षतया अप्रतीयमानत्वं तत्, नित्यातीन्द्रियेष्वतिव्याप्तेः इति चेन्मैवम्; सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वं यद्यपि तुच्छानिर्वाच्ययोः साधारणम्। तथापि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वमत्यन्तासत्त्वम्। तच्च शुक्तिरूप्ये प्रपञ्चे च बाधात् पूर्वं नास्त्येवेति न तुच्छत्वापत्तिः। न च बाधात् पूर्वं शुक्तिरूप्यं प्रपञ्चो वा सत्त्वेन न प्रतीयते। एतदेव सदर्थकेनोपाधिपदेन सूचितम्। शून्यवादिभिः सदधिष्ठानकभ्रमानङ्गीकारेण क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वरूपासद्वैलक्षण्यस्य (क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वरूपस्य) शुक्तिरूप्ये प्रपञ्चे चानङ्गीकारात्।

नन्वेवं सति यावत्सदधिकरणकात्यन्ताभावप्रतियोगित्वं पर्यवसितम्। तथा च केवलान्वय्यत्यन्ताभावप्रतियोगिषु गगनादिषु तार्किकाणां सिद्धसाधनम्। यदधिकरणं यत्सत् तन्निष्ठात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति विवक्षयाम्, अधिकरण पदेनावृत्तिनिराकरणेऽपि संयोगसंबन्धेन समवायसंबन्धेन वा यद् घटाधिकरणं समवायसंबन्धेन संयोगसंबन्धेन वा घटस्य तन्निष्ठात्यन्ताभावप्रतियोगितया सर्वेषु वृत्तिमत्सु दुरुद्धरं

सिद्धसाधनम्। येन संबन्धेन यद्यस्याधिकरणं तेन संबन्धेन तन्निष्ठात्यन्ताभावप्रतियोगित्वमिति विवक्षायाम् अव्याप्यवृत्तिषु संयोगादिषु सिद्धसाधनम् इति चेन्न। येन रूपेण यदधिकरणतया यत् प्रतिपन्नं तेन रूपेण तन्निष्ठात्यन्ताभावप्रतियोगित्वस्य प्रतिपन्नपदेन सूचितत्वात्। तच्च रूपं संबन्धविशेषोऽवच्छेदकविशेषश्च। न हि संबन्धविशेषमन्तरेण भूतले घटाधिकरणता प्रतीयते, अवच्छेदकविशेषमन्तरेण वा वृक्षे कपिसंयोगाधिकरणता। तथा च येन संबन्धविशेषेण येन चावच्छेदकविशेषेण यदधिकरणताप्रतीतिर्यत्र भवितुमर्हति, तेनैव सम्बन्धविशेषेण तेनैव चावच्छेदकविशेषेण तदधिकरणकात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति पर्यवसिते क्व सिद्धसाधनम्?

यदि पुनः ध्वंसप्रागभावप्रतियोगित्वमिवात्यन्ताभावप्रतियोगित्वमाकाशादौ न स्यात्। साधकमानाभावस्य तुल्यत्वाद्। इहाकाशो नास्तीति प्रत्यक्षप्रतीत्यसंभवाद्। अनुमाने चानुकूलतर्काभावात्। सामान्यतो दृष्टमात्रेण ध्वंसप्रागभावप्रतियोगित्वस्यापि सिद्धिप्रसङ्गात्। तद्व्यतिरेकेण कस्यचित् कार्यस्यानुपपत्तेरभावाच्च। एवं संयोगसंबन्धेन घटवति भूतले समवायसंबन्धेन घटाभावसत्त्वे मानाभावाल्लाघवेन घटात्यन्ताभावत्वेनैव घटसामानाधिकरण्य विरोधित्वकल्पनात् संबन्धविशेषप्रवेशे च गौरवाद् घटसमवायाद्यभावमात्रविषयकतया प्रतीतेरुपपत्तेः, आधाराधेयभावस्य प्रत्यक्षसिद्धत्वेन घटस्यावृत्तित्वशङ्कानुदयाद्, उक्तयुक्तेश्च न घटादेरत्यन्ताभावसामानाधिकरण्यम्। एवं संयोगतदभावयोर्नैकाधिकरण्यम्। अग्रे वृक्षः कपिसंयोगी मूले ने'ति प्रतीतेरग्रमूलयोरेव संयोगतदभाववत्तयोपपत्तेः, तदा सन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वमेव मिथ्यात्वं मन्तव्यम्।

न चैवं सति भावाभावयोरविरोधात्तज्ज्ञानयोर्बाध्यबाधकभावो न स्यादिति वाच्यम्। भिन्नसत्ताकयोरविरोधेऽपि समसत्ताकयोर्विरोधात्। यत्र भूतले यस्य घटस्यात्यन्ताभावो व्यावहारिकः तत्र स घटो न व्यावहारिक इति नियमात्। न चैवं सति 'शुक्तिरियं न रजत' मिति ज्ञानविषयीभूताभावस्य व्यावहारिकत्वेन पुरोवर्तिप्रतीतरजतस्य व्यावहारिकत्वापहारेऽपि प्रातीतिकसत्त्वानपहाराद् बाधोत्तरकालेऽपि 'इदं रजत'मिति प्रतीतिः स्यादिति वाच्यम्। तत्र 'इयं शुक्तिः' रित्यपरोक्षप्रमया प्रातीतिकरजतोपादानाज्ञाननिवृत्तौ प्रातीतिकसत्त्वस्याप्यपहारात्। शुक्त्यज्ञानस्य प्रातीतिकरजतोपादानत्वेन तदसत्त्वे प्रातीतिकरजतासत्त्वस्यावश्यकत्वात्। अत एव यत्र परोक्षयाऽधिष्ठानप्रमया न भ्रमोपादानाज्ञाननिवृत्तिः, तत्र व्यावहारिकत्वापहारेऽपि प्रातीतिकत्वानपहारात् 'तिक्तो

गुडः' इत्यादिप्रतीतिरनुवर्तत एव। एवमखण्डब्रह्मसाक्षात्कारात्पूर्वं परोक्षबोधेन प्रपञ्चस्य व्यावहारिकत्वापह्नोरेऽपि प्रतीतिरनुवर्तत एव। अधिष्ठानाज्ञाननिवृत्तौ तु नानुवर्तिष्यते।

एतेन उपाधिशब्देनाधिकरणमात्रविवक्षायामर्थान्तरम्। वाग्वधिकरणकात्यन्ता भावप्रतियोगित्वेऽपि रूपस्यामिथ्यात्वाद्। अधिष्ठानविवक्षायां तु भ्रमोपादानाज्ञान विषयस्याधिष्ठानत्वेनान्योन्याश्रयत्वम्। ज्ञानस्य भ्रमत्वे विषयस्य मिथ्यात्वम्, विषयस्य मिथ्यात्वे च ज्ञानस्य भ्रमत्वमिति परास्तम्; उक्तरीत्या अधिकरणविवक्षायां दोषाभावात्। न च 'स एवाधस्ताद्' इति श्रुत्या प्रतिपन्ने देशकालाद्युपाधौ परमार्थतो ब्रह्मणोऽभावात्तत्रातिव्याप्तिरिति वाच्यम्। निर्धर्मके तस्मिन्नभावप्रतियोगित्वरूपधर्माभावात्। न चैवं– सत्यत्वमपि तत्र न स्यात्, तथा च 'सत्यं ज्ञानमनन्त' मित्यादिश्रुतिव्याकोप इति वाच्यम्। अधिकरणातिरिक्ताभावानभ्युपगमेनोक्तमिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्म स्वरूपत्वाविरोधात्। एतेन स्वप्रकाशत्वाद्यपि व्याख्यातम्। परप्रकाश्यत्वाभावो हि स्वप्रकाशत्वम्, कालपरिच्छेदाभावो नित्यत्वम्, देशपरिच्छेदाभावो विभुत्वम्, वस्तुपरिच्छेदाभावः पूर्णत्वमित्यादि। तथा च भावरूपधर्मानाश्रयत्वेऽपि ब्रह्मणः सर्वधर्माभावरूपतया न काऽप्यनुपपत्तिरिति सर्वमवदातम्।

इति सदसद्विलक्षणत्वरूपद्वितीयमिथ्यात्वविचारः॥

न्यायामृततरङ्गिणी

'सर्वस्मिन् प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमि'ति द्वितीयपक्षं दूषयति – न द्वितीय इति। अद्वैतहानेरिति। उपलक्षणमेतत् – तव मते रूप्यमिथ्यात्वस्य व्यावहारिकत्वपक्षे तात्त्विकात्यन्ताभावप्रतियोगित्वस्य रूप्येऽभावात् साध्यवैकल्यं च। रूप्यमिथ्यात्वस्य तात्त्विकत्वे तद्बोधकस्य प्रत्यक्षादेस्तत्त्वावेदकत्वापत्तिरिति च बोध्यम्।

ननु प्रपञ्चनिषेधाधिकरणीभूतब्रह्ममात्रत्वात् प्रपञ्चनिषेधस्य तात्त्विकत्वेऽपि नाद्वैतहानिकरत्वमिति चेत्, मैवम्; प्रपञ्चभ्रमार्थमधिष्ठानब्रह्मस्फुरणस्यावश्यकतया ब्रह्माभिन्न प्रपञ्चनिषेधस्यापि प्रकाशे प्रपञ्चभ्रमासम्भवात्। नच इदंत्वाधिष्ठानप्रकाशेऽपि प्रपञ्चनिषेधत्वादिना न प्रकाश इति वाच्यम् ; तव मते प्रपञ्चनिषेधत्वादेरपि ब्रह्ममात्रत्वात्, अन्यथा निर्विशेषत्वहानिप्रसङ्गादिति। सिद्धसाधनादिति। अत्र साध्यवैकल्यमपि बोध्यम्।

व्यावहारिकत्वेऽपीति। घटादितुल्यतया प्रपञ्चनिषेधस्यापि बाध्यत्वम् ; अन्यथा दृश्यत्वादेस्तत्रैव व्यभिचारः स्यादित्यर्थः।

अत्र वदन्ति "अतात्त्विक एव निषेधोऽयम्। अतात्त्विकत्वेऽपि न प्रातिभासिकः, किन्तु व्यावहारिकः। नच तर्हि निषेधस्य बाध्यत्वेन तात्त्विकसत्त्वाविरोधित्वादर्थान्तरमिति वाच्यम् ; स्वाप्रार्थस्य स्वाप्रनिषेधेन बाधदर्शनाद् निषेधस्य बाध्यत्वं पारमार्थिकसत्त्वादिरोधित्वे न तन्त्रम्, किन्तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्, प्रकृते च तुल्यसत्ताकत्वात् कथं न विरोधित्वम्?

नच निषेधस्य निषेधे प्रतियोगिसत्त्वापत्तिरिति वाच्यम् ; तत्र हि निषेधनिषेधे प्रतियोगिसत्त्वमायाति यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते न निषेधमात्रं निषिद्ध्यते। यथा रजते 'नेदं रजतमि'ति ज्ञानानन्तरम् 'इदं नारजतमि'ति ज्ञानेन रजतं व्यवस्थाप्यते। यत्र तु प्रतियोगि-निषेधयोरुभयोरपि निषेधः, तत्र न प्रतियोगिसत्त्वम्। यथा ध्वंससमये प्रागभाव-प्रतियोगिनोरुभयोरपि निषेधे। एवं च प्रकृतेऽपि निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य तन्निषेधस्य च बाधनात् निषेधस्य बाध्यत्वेऽपि न प्रपञ्चस्य तात्त्विकत्वम् उभयोरपि निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात् – इति"।

अत्र ब्रूमः – स्वप्नदृष्टार्थाभावस्य जाग्रत्यबाधानुभवाद् न तस्य बाध्यत्वम्। नहि स्वप्ने दृष्टत्वमात्रेण बाध्यत्वम् ; आत्मादेरपि बाधापत्तेः। यच्चोक्तम् – प्रकृते प्रतियोगि निषेधयोस्तुल्यसत्ताकत्वमिति। तदपि न। निषेधस्य बाध्यत्वे प्रतियोगितदभावयोस्तुल्यसत्ताया एवासिद्धेः। यच्चोक्तम् निषेधस्य निषेधेऽपि न प्रतियोगिनः सत्त्वापत्तिरिति। तदपि न। त्रैकालिकनिषेधस्य बाध्यत्वे प्रतियोगिसत्त्वापत्तेर्दुर्वारत्वात्, यथोदाहृते रजतादौ। यत्र हि प्रतियोगिसत्त्वं विना निषेधस्य निषेधोऽनुपपन्नः, तत्र निषेधस्य निषेधे प्रतियोगिनः सत्त्वम् तृतीयप्रकाराभावात्। प्रागभावादौ तु नैवम् इति न प्रागभावाभावे प्रतियोगिनः सत्त्वम् तृतीयप्रकारस्य ध्वंसस्यापि सम्भवात्। तस्माद् युक्तमत्यन्ताभावस्य बाध्यत्वे प्रतियोगिनः पारमार्थिकत्वापत्तिरिति॥

अर्थान्तरादिति। व्यावहारिकप्रतियोगिमति व्यावहारिकतदत्यन्ताभावसाधने बाधोऽपि बोध्यः। तव मते जलादिसाधारणाग्न्यनौष्ण्यानुमान एव बाधः ; अन्यथा त्वग्न्यनौष्ण्यानुमानमप्यद्वैतस्यैव नामान्तरमित्युक्तत्वादिति भावः॥ अद्वैतश्रुतेरिति॥

नच ब्रह्माभिन्नं प्रपञ्च-तन्निषेधादिकमतात्त्विकत्वेन बोधयन्त्याः श्रुतेर्नाप्रामाण्यमिति वाच्यम्। प्रतियोगि-तदभावयोरतात्त्विकत्वबोधनस्य विरुद्धत्वात्, वस्तुतो मानस्य स्वार्थसत्तानिश्चायकत्वेन

जगदभावग्राहकमानस्यापि तथात्वात् तदभावस्य बाध्यत्वाङ्गीकारे श्रुतेरतत्त्वावेदकत्वं दुर्वारम्। तत्प्रतियोगिन इति॥ व्यावहारिकात्यन्ताभावप्रतियोगिन इत्यर्थः। अत्र चान्वयदृष्टान्ताभावेऽपि शुक्तिरूप्यादिरेव व्यतिरेकदृष्टान्तः। रूप्यादौ पारमार्थिकत्वात्यन्ताभाववति व्यावहारिकात्यन्ताभावप्रतियोगित्वस्य सत्त्वेन व्यतिरेकव्याप्तौ व्यभिचारवारणाय 'अप्रातिभासिकस्ये'ति विशेषणम्। तदर्थश्चोभयसिद्धमिथ्यात्वकभिन्नत्वम्। मिथ्यात्वं च सद्विविक्तत्वम्। अतस्तुच्छेऽपि न व्यभिचारः। नापि पक्षे हेत्वसिद्धिः। रूप्यादौ तु उक्ताप्रातिभासिकत्वरूपविशेषणविरहप्रयुक्तो विशिष्टव्यतिरेकोऽस्त्येव इति न व्यभिचार इत्यर्थः। नच साध्यवति ब्रह्मणि हेतोरभावाद साधारण्यमिति वाच्यम्; वास्तवासाधारण्यस्याप्रतिबन्धकत्वात्। नच साध्यवद्व्यावृत्त त्वमात्रेणासाधारणत्वम् किन्तु सर्वनिश्चितसाध्यवद्व्यावृत्तत्वेन हेतोर्ज्ञानात्। ब्रह्मणस्त्वन्मतेऽज्ञेयत्वेन साध्यवत्तयाऽनिश्चयादिति॥ किञ्चेति॥ वायौ रूपात्यन्ताभाववत् स्वरूपेणैव ब्रह्मणि प्रपञ्चस्य, पुरोवर्तिनि च रजतस्यात्यन्ताभावो वा, घटे वाच्यत्वस्य सत्त्वेऽपि समवेतत्वेन वाच्यत्वात्यन्ताभाववत् पारमार्थिकत्वेन व्यधिकरणेन धर्मेण तत्र तस्यात्यन्ताभावो वा प्रपञ्चस्य रजतस्य वा मिथ्यात्वमिति विकल्पार्थः। ननु प्रपञ्चस्य रजतादेश्च स्वरूपानुपमर्देन निषेध इत्यनुपपन्नम् मिथ्यावस्तुनः स्वरूपस्यैवाभावात्, अत उक्तम् असद्विलक्षणेति॥ असतो निरुपाख्यस्य परं स्वरूपं नास्ति। प्रपञ्चो रूप्यं चासद्विलक्षणे, अतस्तस्य किञ्चित् स्वरूपमस्त्येवेति भावः॥ श्रुत्यादिसिद्धोत्पत्त्यादिकस्येति॥ आद्यं विशेषणद्वयं वियदादेः, तृतीय-चतुर्थे वियदादेः रूप्यादेश्च। "असद्विलक्षणस्वरूपेणे"तीत्थंभूतलक्षणे तृतीया। श्रुत्यादिसिद्धोत्पत्तिकस्य धीकाले विद्यमानस्यासद्विलक्षणस्वरूपस्य त्रैकालिकनिषेधो न भवति उत्पत्त्याद्यसम्भवापातादित्यर्थः॥ त्रैकालिकेति॥ तथाचापसिद्धान्त इत्यर्थः॥

अत्र वदन्ति – "स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वं प्रपञ्चे रूप्ये चाङ्गीकुर्मः। तथाहि – शुक्तौ रजतभ्रमानन्तरमधिष्ठानतत्त्वसाक्षात्कारेण 'रूप्यं नास्ति नासीद् न भविष्यती'ति स्वरूपेणैव "नेह नाने"ति श्रुत्या प्रपञ्चस्य स्वरूपेणैव निषेधः प्रतीयते। नच तत्र लौकिकपरमार्थरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्। भ्रम-बाधयोर्वैयधिकरण्यापत्तेः। अप्रसक्तप्रतिषेधापत्तेश्च। नच तर्ह्युत्पत्त्याद्यसम्भवः। नह्यनिषिद्ध स्वरूपत्वमुत्पत्त्यादिमत्त्वे तन्त्रम्; परैरनिषिद्धस्वरूपत्वेनाङ्गीकृतस्यापि वियदादेरुत्पाद्यनङ्गीकारात्। किन्तु वस्तुस्वभावादिकमन्यदेव किञ्चित् प्रयोजकं वक्तव्यम्। तस्य मयाऽपि कल्पितस्य स्वीकारात्। नच 'त्रैकालिकनिषेधं प्रति स्वरूपेणापणस्थं रूप्यं पारमार्थिकत्वाकारेण प्रातिभासिकं वा प्रतियोगी'ति मतहानिः स्यादिति वाच्यम्; अस्य वचसो लौकिकपारमार्थिकरजततादात्म्येन प्रतीतं प्रातिभासिकमेव रजतं प्रतियोगीत्यर्थः। तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वाशब्दः॥

एतावदुक्तिश्च पुरोवर्तितादात्म्येनैव रजतं प्रतीयत इति मतनिरासार्थम्। लौकिकपारमार्थिकरजततादात्म्येनापि प्रतीयत इति प्रतिपादयितुं च। तदुक्तं तत्त्वप्रदीपिकायाम् – ''तस्माद् लौकिकपरमार्थरजतमेव 'नेदं रजतमि'ति निषेधप्रतियोगी''ति पूर्वाचार्याणां वाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनाद् लौकिकपरमार्थरजतत्वेनापरोक्षतया प्रतीतस्य कालत्रयेऽपि 'लौकिकपरमार्थरजतमिदं न भवती'ति निषेधप्रतियोगितामङ्गीकृत्य नेतव्ये''ति॥ अयमभिप्रायः – एकविभक्त्यन्तपदोपस्थापिते धर्मिणि प्रतियोगिनि च नञोऽन्योन्याभावबोधकत्वनियमस्य व्युत्पत्तिबलसिद्धत्वाद् 'घटः पटो न भवति' इति वाक्यवद् 'इदं रजतं न भवती'ति वाक्यस्यान्योन्याभावबोधकत्वे स्थिते अभिलापजन्य प्रतीतितुल्यत्वादभिलप्यमानप्रतीतेः 'नेदं रजतमि'ति वाक्याभिलप्यप्रतीतेरन्योन्याभावविषयत्वमेव। तथाचेदंशब्दनिर्दिष्टे पुरोवर्तिप्रातीतिकरजते रजतशब्दनिर्दिष्टव्यावहारिकरजतान्योन्याभाव प्रतीतेरार्थिकं मिथ्यात्वम्, 'नात्र रजतमि'ति वाक्याभिलप्यमाना च प्रतीतिरत्यन्ताभावविषया; भिन्नविभक्त्यन्तपदोपस्थापितयोरेव धर्मि-प्रतियोगिनोर्नञः संसर्गाभावबोधकत्वनियमात्। सा च पुरोवर्तिप्रतीतस्यैव व्यावहारिकमत्यन्ताभावं विषयीकरोति, इति कण्ठोक्तमेव मिथ्यात्वम्; अतो नापसिद्धान्तः, नान्यथाख्यात्यापत्तिः, न वा ग्रन्थविरोध इति॥

अत्रोच्यते – प्रातिभासिकरजतस्य लौकिकपरमार्थरजततादात्म्येन त्वन्मते प्रतीतिर्न युक्ता; प्रातिभासिकरूप्यस्य लौकिकपारमार्थिकरजताज्ञानाकार्यत्वात्। प्रातिभासिकस्य स्वोपादानाज्ञाननिवर्तकज्ञानविषयेणैव तादात्म्यप्रतीतेश्च। नहि पुरोवर्तितत्त्वाज्ञानेऽपि लौकिकपरमार्थरजततत्वज्ञानमात्रात् प्रातिभासिकरजतनिवृत्तिरस्ति। 'शुक्लः पटः' इति तु शुक्ल-पटयोरेकाज्ञानकार्यत्वाद् एकत्राध्यासाच्च। नचैवं घट-पटयोरपि तादात्म्यप्रतीत्यापत्तिः। तादृशप्रतीतौ सत्यामेतस्य निमित्तत्वं कल्प्यते, 'आरोपे सति निमित्तानुसरणम्, नतु निमित्तमस्तीत्यारोपः' इति न्यायात्। लौकिकपरमार्थरजतसन्निकर्षादिरूपसामग्रीविरहाच्च। अत एव त्वयाऽन्यथाख्यातिः प्रत्याख्याता। तस्मात् लौकिकपरमार्थरजतमेवेदंपदास्पदे स्वरूपेण निषिद्ध्यत इत्येव त्वत्प्राचामाचार्याणां वाचामर्थः। तत्र भ्रम-बाध-वैयधिकरण्यादिदोषस्तु दण्डापूपन्यायेन ममानुकूल एव। तस्माद् दुष्परिहरोऽपसिद्धान्तादिदोष इति॥

रूप्यस्य वियदादेश्च स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वे दूषणान्तरमाह – अत्यन्तासत्त्वापाताच्चेति॥ अन्यथेति॥ मिथ्यात्वानुमानकाले पटादेस्तन्त्वन्यत्रासत्त्वासंमतौ पटादेस्तन्तुभिन्नदेशे सत्त्वापत्त्याऽर्थान्तरता स्यादित्यर्थः। पटादेस्तन्त्वन्यत्र सत्ता त्वयाऽपि नाङ्गीक्रियत इत्याह – नहीति॥

रूप्यादेरसद्वैलक्षण्यनिरासायासत्त्वं विविनक्ति – नच तेषामिति॥ निरुपाख्यत्वं शब्दशक्त्यविषयत्वम्? प्रमित्यविषयत्वं वा? आद्य आह – निरुपाख्येति॥ तथाचासत्त्वेन संप्रतिपन्नस्याप्यसत्त्वं न स्यादित्यर्थः। द्वितीये दोषमाह–असत इति॥ असद्वैलक्षण्यज्ञानार्थमसतः प्रतियोगिनोऽवश्यं ज्ञेयत्वात् असत्प्रतीतिनिरासार्थमसत्प्रतीतेः प्रसक्त्यपेक्षा। सा चासदवच्छिन्नप्रतीतिविषयैव। प्रेक्षावत्कृतस्य शब्दप्रयोगस्य शब्दार्थज्ञानपूर्वकत्वात्, असत्पदप्रयोगार्थमसतो ज्ञानस्यावश्यकत्वादित्यर्थः। जगतीति॥ शून्यवाद्यनङ्गीकृतस्या सद्वैलक्षण्यस्य रूप्यादौ त्वया स्वीकार्यत्वात्। अन्यथा रूप्यादौ जगति चासद्वैलक्षण्यप्रतिपादनफलं न स्यादित्यर्थः। त्वयाऽपीति॥ अन्यथाऽऽपाद्यापादकयोरवैशिष्ट्यं स्यादित्यर्थः। ब्रह्मणीति॥ सत्त्वासत्त्वयोः परस्परविरहरूपत्वेनैव प्रतीतेरित्यर्थः। अन्यथेति॥ सत्त्वासत्त्वयोः परस्परविरहरूपत्वे स्थिते सत्त्वेनाप्रतीयमानत्वमसत्त्वं चेत्, तदभावः सत्त्वेन प्रतीयमानत्वं सत्त्वं ब्रह्मणि स्यादित्यर्थः। येन पुंसेति॥ न ह्यत्र 'जबगडदशि'त्यादिनिरर्थकेष्विव पदार्थधीरेव वा, 'कुण्डमजाजिनमि'त्याद्यपार्थकेष्विवान्वयधीर्वा नास्ति। विपरीतबोधकेषु योग्यताभावेऽपि योग्यताभ्रमेणाकाङ्क्षाज्ञानेन च वाक्यार्थज्ञानोत्पत्तेरनुभवात्। अन्यथा प्रवृत्त्यादेरयोगात्। तथाच सत्त्वेनाप्रतीयमानत्वं शशशृङ्गादावसिद्धमित्यर्थः। ननु 'शशशृङ्गमस्ती'ति वाक्याभासात् शशेऽनिर्वचनीयशृङ्गविषयको भ्रम उत्पद्यते, नत्वसद्विषयकः स इत्यत आह – त्वन्मतेऽपीति॥ अनिर्वाच्यवादिनस्तव मतेऽपि तत्राध्यस्तस्यास्तित्वस्यानिर्वाच्यत्वेऽपि 'शशशृङ्गमसदि'ति वाक्य इव 'शशशृङ्गमस्ती'ति वाक्येऽपि शशशृङ्गशब्देनासत एव प्रतीतेरित्यर्थः।

ननु शशशृङ्गादिशब्दात् विकल्पमात्रं जायते। तदुक्तम् – 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प'इति। एवं च शशशृङ्गादिशब्दात् न सतः प्रतीतिरित्यत आह – वक्ष्यते चैतदिति॥ 'विकल्पस्येच्छादिवत् ज्ञानान्यवृत्त्यन्तरत्वेऽनुभवविरोधः, प्रवृत्त्याद्ययोगश्च। नहि शशशृङ्गस्यासत्त्वाज्ञानदशायां तदस्तित्वज्ञानस्य गोशृङ्गास्तित्वज्ञानात् मात्रयाऽपि विशेषोऽनुभूयते। असति वृत्त्यन्तरवत् ज्ञानस्यैवोपपत्तेश्च। अन्यथा शुक्तिरूप्यादेरपि विकल्पमात्रम्, नतु प्रतीतिरिति स्यात्। विकल्पस्य ज्ञानविशेषत्वे त्विष्टापत्तिः। वस्तुशून्य इति च कोऽर्थः? किमप्यनुल्लिखन्निति वा? असदेवोल्लिखन्निति वा? आद्येऽनुभवविरोधः, व्यवहाराद्यनुपपत्तिश्च। नह्ययं घटादिवत् किमप्यनुल्लिखन्ननुभूयते। द्वितीये सिद्धं नः समीहितम्' इत्यादि वक्ष्यत इत्यर्थः। तद्धैक इति। असदासीदित्यसत्प्रतीतेः अनुवादमुखेनोत्केरित्यर्थः।

अनिर्वाच्यत्वस्येति। असद्विलक्षणत्वात्तस्येत्यर्थः। लाघवेनेति॥ सदन्यत्वमेवासत्त्वम्, नत्वनिर्वाच्यभिन्नत्वमपि तत्र प्रवेश्यम्। नचानिर्वाच्यस्यासत्त्वाभावार्थं तद्विशेषणम्। स्वरूपेण

निषेधे तस्यासत्त्वापरिहारादित्यर्थः। अनिर्वाच्यस्यापीति॥ तथाचासम्भव इत्यर्थः। निस्स्वरूपत्वस्येति॥ मिथ्याभूतस्य सस्वरूपत्वे तस्य स्वात्यन्ताभाव सामानाधिकरण्यायोगादित्यर्थः। नच मिथ्याभूतमिति॥ तथाच मिथ्याभूतस्य स्वरूपेणैव स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं न विरुद्धमित्यर्थः। स्वदेश-कालयोरिति॥ प्रतियोगिस्वरूपसमानाधिकरणस्यात्यन्ताभावत्वं पारिभाषिकं स्यात्। तथाच तादृशाभाव प्रतियोगित्वेऽपि स्वरूपेणाभावप्रतियोगित्वं न सिद्धेयत् इत्यतस्तत्सिद्धयर्थं तत्र रजतादिस्वरूपं नास्तीति वाच्यम्। एवं चासत्त्वापत्तिर्दुर्वारेत्यर्थः। अन्यथेति॥ निषेधाधिकरणेऽपि प्रतियोगिनः सत्त्व इत्यर्थः। अतन्तुष्वपीति॥ अत्यन्ताभावस्य प्रतियोगिना दैशिको विरोधः सर्वसिद्धो न स्यादित्यर्थः। प्रागभावादीति॥ प्रागभावादेः प्रतियोगिना कालिको विरोधो न स्यादित्यर्थः। तुच्छेऽपीति॥ स्वात्यन्ताभावाधिकरणेऽपि स्वस्य प्रतीतिमात्रेण सस्वरूपत्वं चेत्, तर्हि तुच्छेऽपि स्वात्यन्ताभावसामानाधिकरण्यसहिष्णु स्वरूपं स्यादित्यर्थः। 'सर्वस्मिन्नपि प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमि'त्यस्यात्यन्तासच्छब्देन तुल्यार्थत्वमपीत्याह – तत्र तदानीमिति॥ नचेति॥ मिथ्याभूतस्य स्वरूपेण निषेध इति पक्षे तदभावोऽपि निष्प्रतियोगिक एव, नतु सप्रतियोगिकः ; प्रतियोगिस्वरूपस्यैवाभावात्। नापि सदा सर्वत्र सद्वैलक्षण्यमात्रम् स्वरूपेणैव प्रतिषेधादित्यर्थः।

असत इति॥ असत आत्यन्तिकनिषेधप्रतियोगित्वं नास्ति, मिथ्याभूतस्य तु तदस्ति। तथाच तत्कृतमेव मिथ्याभूतस्यासद्वैलक्षण्यमित्यर्थः। असत्त्वस्येति॥ असत्, नात्यन्ताभावप्रतियोगि, असत्त्वादित्यत्र हेतुकृतमसत्त्वमत्यन्ताभावप्रतियोगित्वरूपमुक्तसाध्येन विरुद्धमित्यर्थः। ननु हेतुकृतमसत्त्वं नात्यन्ताभावप्रतियोगित्वम्, किन्तु सदनिर्वाच्यभिन्नत्वम्, अतो न विरोध इत्यत आह – असतोऽसत्त्ववदिति॥ असत्त्वादीनां धर्मिसत्तानिरपेक्षाणां यथाऽसति विद्यमानता, तथोक्तनिषेधप्रतियोगित्वस्यापीत्यर्थः। ननु धर्मिसत्तानपेक्षाणां धर्माणां धर्मिणं विनाऽप्यवस्थानमस्तु, अत्यन्ताभावप्रतियोगित्वं तु न तथेत्याशङ्क्याह – प्रागभावादीति॥ तत्प्रतियोगित्वेति॥ विद्यमानप्रागभावादिप्रतियोगित्वेत्यर्थः॥ प्रतियोगित्वस्येति॥ अभावप्रतियोगित्वस्येत्यर्थः॥ तथाचाभावप्रतियोगित्वाविशेषात् यथा विद्यमानप्राग भावादिप्रतियोगित्वं धर्मिसत्तानपेक्षम्। तथाऽत्यन्ताभावप्रतियोगित्वमपीत्यर्थः। रूपादिवदिति व्यतिरेकदृष्टान्तः। ननु विद्यमानप्रागभावादिप्रतियोगित्वं न धर्मिसत्तानपेक्षम् ; तद्धर्मिणो घटादेः प्रागभावादूर्ध्वं प्रध्वंसात् प्राक् सत्त्वादित्यत आह – कालान्तर इति॥ यस्मिन् काले विद्यमानप्रागभावादिप्रतियोगित्वं धर्मो वर्तते, तस्मिन् काले तद्धर्मी नास्ति, अन्यदा

तु सत्यपि धर्मिणि विद्यमानप्रागभावादिप्रतियोगित्वरूपधर्म एव नास्ति ; अतस्तादृशधर्मस्य धर्मिणं विनैवावस्थानमित्यर्थः।

ननु असतो नाभावप्रतियोगित्वम् ; तत्प्रतियोगित्वेऽसद्वैलक्षण्यस्य प्रयोजकत्वात्। घटादेरप्यविद्यमानतादशायां न विद्यमानप्रागभावप्रतियोगित्वरूपधर्मं प्रत्याश्रयत्वम्। किन्तु प्रागभावादेरेव विद्यमानस्य घटप्रतियोगिकत्वरूपधर्मं प्रत्याश्रयत्वम्। एवं सद्वैलक्षण्यमपि नासति। किन्तु सत्येवासद्वैलक्षण्यम्। प्रतियोगित्वाभावोऽपि नासति। किन्तु प्रतियोगित्वा भावेऽसदाश्रयकत्वम्, एवं असज्ज्ञानव्यवहारयोरेवासद्विषयकत्वम्, नत्वसति तद्विषयत्वम् ; एवमसद्वैलक्षण्य एवासत्प्रतियोगिकत्वम्, नत्वसद्वैलक्षण्यं प्रत्यसतः प्रतियोगित्व मित्याशङ्कायामाह – शिष्टमिति॥ यदुक्तम् – अभावप्रतियोगित्वं प्रत्यसद्वैलक्षण्यं प्रयोजकमिति, तन्न। तथा सति लाघवाय सत्त्वस्यैव तत्प्रयोजकत्वापत्त्याऽनिर्वचनीयस्य सद्विलक्षणस्याभावप्रतियोगित्वं न स्यात्। तस्मात् प्रतीतत्वमात्रेण सत इवासतोऽप्यभावप्रतियोगित्वमुपपद्यते। यच्चोक्तम् – प्रागभावादेरेव घटादिप्रतियोगिकत्वमित्यादि, तदपि न। घटादेः प्रागभावप्रतियोगित्वाभावे प्रागभावादिष्वपि तत्प्रतियोगिकत्वं न स्यात्। एवं प्रागभावादेर्घटादिप्रतियोगिकत्वे घटादेः प्रागभावप्रतियोगित्वादिकमवर्जनीयमेवेत्यादिकं वक्ष्यत इत्यर्थः।

असतोऽप्रसक्तेरिति॥ प्रतियोग्यधिकरणसंसर्गज्ञानं प्रसक्तिः। तथाच निषेधप्रतियोगित्व तदभावकृतमेव मिथ्याऽसतोर्वैषम्यमिति भावः। ब्रह्म-जगतोरिति॥ ब्रह्मजगतोरसद्वैलक्षण्यस्या सत्तादात्म्यप्रसक्तिपूर्वकत्वादित्यर्थः। नासदासीदिति॥ 'नासदासीन्नो सदासीत् तदानीमि'ति श्रुत्या तदानीं शब्दान्निर्दिष्टेऽसतो ज्ञानाभावे न तत्र तन्निषेधो न बोध्येतेत्यर्थः। असति चेति॥ निषेधाधिकरणे प्रतियोगिज्ञानाभावस्यापि सत्त्वादित्यर्थः। तस्यापीति॥ निषेधप्रतियोगित्वाभावस्येत्यर्थः। यद्यप्यसद्वैलक्षण्यादेरपि प्रतियोगिप्रतीत्यधीनसिद्धिकत्वम् ; तथापि परोक्तत्वात् प्रतियोगित्वाभावस्यैव ग्रहणम्। निषेधाधिकरणे प्रतियोगिप्रसक्तिं तत्र प्रसक्त्यभावेऽपि वा निषेध इति शङ्कते – ननु तत्रेति॥ परार्थेनेति॥ परप्रवृत्तिनिवृत्तिपरेणेत्यर्थः। प्रत्यक्षेणेति॥ एतेन ''नासदासीदि''ति श्रौतनिषेधो व्यावर्तितः। स्वयंप्रकाशे ब्रह्मण्यसद्वैलक्षण्यस्य प्रत्यक्षेणा'स्ति स्फुरणमि'त्यादिना प्रतीतेः। जगति तु स्पष्टमेवासद्वैलक्षण्यं प्रत्यक्षसिद्धम्। अप्रत्यक्षेऽप्यसति सद्वैलक्षण्यस्य प्रतियोगित्वाभावस्य च वायौ रूपाभाववत् प्रत्यक्षत्वसम्भवादित्यर्थः॥ अन्यथेति॥ शब्दाभासादिना प्रसक्तिर्वाऽप्रसक्तस्यैव वा प्रत्यक्षेण निषेध इत्यनङ्गीकार इत्यर्थः॥ सममिति॥ शब्दाभासादिना प्रसक्तौ सत्यामप्रसक्तस्यैव

वा शशशृङ्गादेरपि निषेधप्रतियोगित्वं भविष्यति। तथाच निषेधप्रतियोगित्व-तदभावकृतोऽपि नानिर्वचनीयासतोर्भेद इत्यर्थः॥ शशशृङ्गमिति॥ यथाऽनुभवसिद्धाया 'अङ्गुल्यग्रे हस्तिशतं नास्ती'ति प्रतीतेर्दुरपह्नवत्वात् तदुपपादकमसतः प्रसक्त्यादिकं कल्प्यते, तथा 'शशशृङ्गं नास्ती'ति प्रतीतेर्दुरपह्नवत्वात् तदुपपादकमपि कल्पनीयमेवेत्यर्थः॥ अबाधितेति॥ निर्बाधसाक्षिसिद्धेत्यर्थः॥ नच तत्रापीति॥ 'शशशृङ्गं नास्ती'त्यत्र न शशशृङ्गस्यासतो निषेधः, येन तदुपपादकमसतः प्रसक्त्यादिकं कल्प्येत। किंतु शुक्तौ रूप्यनिषेध इव शशे शृङ्गस्यैव निषेध इत्यर्थः॥ शृङ्गस्येति॥ शशशृङ्गस्येत्यर्थः। यथाऽऽपणस्थरूप्यसदृशस्यैवानिर्वचनीयरूप्यस्य शुक्तावारोपो निषेधश्च, तथाऽसदन्यस्यैवा निर्वचनीयस्यासदाभासस्य शशशृङ्गस्य प्रतिषेध इत्यर्थः॥ अनाभासस्यैवेति॥ आपणस्थरूप्यस्थानीयस्यानिर्वाच्यस्य शशशृङ्गभिन्नस्यानाभासशशशृङ्गस्यैव निषेद्धव्यत्वादित्यर्थः। तथाचानाभासस्यासतः प्रतिषेधार्थं तत्प्रसक्तिस्त्वयाऽपि वाच्येत्यभिसन्धिः॥ आभासस्येति॥ यद्यपि स्वरूपेण रूप्यादेः प्रतिषेध इति प्रस्तुते पक्षेऽनाभासस्य न निषेधः, किन्त्वाभासस्यैव। तथापि मतान्तरस्यापि त्वयाऽनुरोद्धव्यत्वादिति भावः॥ जगदादाविति॥ यदि 'शशशृङ्गं नास्ती'त्यत्रानिर्वचनीयमसदाभासरूपं शशशृङ्गं निषिध्यते, तर्हि तादृशादेवासतो वैलक्षण्यं जगद्ब्रह्मणोः सिद्ध्येत्। तस्यैव वैलक्षण्यज्ञानोपयोगिप्रतीतिविषयत्वात्। न त्वनाभासरूपादसतः। तस्य सर्वथाऽनुपस्थितत्वेन तद्वैलक्षण्यस्य दुर्बोधत्वादित्यर्थः।

ननु स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वेऽपिरूप्य जगतोर्नात्यन्तासत्त्वम्। तार्किकादिमते तादृशनिषेधप्रतियोगिनो रूप्यात्मादेरसत्त्वाभावादिति शङ्कते – नन्विति॥ तथाच त्रैकालिकनिषेधप्रतियोगित्वं नासत्त्वम्। किं त्वन्यदेव। तच्च न रूप्य-जगतोरित्यर्थः॥ तर्हीति॥ तादृशनिषेधप्रतियोगित्वरूपस्य मिथ्यात्वस्यात्मन्यपि सत्त्वादित्यर्थः। ननु आत्मनस्तादृश निषेधप्रतियोगित्वे प्रतिपन्नोपाधेरभावात्तद्विशिष्टमुक्तनिषेधप्रतियोगित्वं तत्र नास्तीत्यत आह – तस्यापीति॥ 'स एवाधस्तात् स एवोपरिष्टादि'ति भूमरूपस्यात्मनोऽप्यध आदिः प्रतिपन्नोपाधिरस्तीत्यर्थः॥ अथेति॥ तथाच न तादृशनिषेधप्रतियोगित्वमात्मनः, अतो न तस्य मिथ्यात्वमित्यर्थः। तत एवेति॥ तादृशनिषेधप्रतियोगित्वाभावादेवेत्यर्थः। ननु उक्तनिषेधप्रतियोगित्वरूपस्य सत्त्वस्यात्मनि प्रसङ्गाभावेऽपि देशकालयोरस्ति प्रसङ्गः ; नहि देश-कालौ देश-कालयोर्वर्तेते आत्माश्रयापातादित्यत आह – देशकालावपीति॥ सदेति॥ 'सदा देशकालौ' 'सर्वत्र देशकालावि'ति प्रतीत्येत्यर्थः॥ प्रमेयत्वेति॥ नच – आश्रिताश्रययोः प्रमेयत्वयोर्भेदात् न प्रमेयत्वस्य स्ववृत्तित्वमिति – वाच्यम्। नित्यस्वप्रकाशेश्वरप्रमारूपस्य

प्रमेयस्यानुगतस्य संभवे तद्भेदे मानाभावात्। गगनात्यन्ताभावस्यैकस्यैव स्ववृत्तेश्च। अन्योन्यवृत्ती इति॥ उत्पत्त्याद्यप्रतिबन्धकत्वात् नात्माश्रयोऽन्योन्याश्रयो वा दोष इति भावः। अन्यथेति॥ स्वस्मिन्नन्योन्यस्मिंश्चावृत्तित्व इत्यर्थः॥ तदुक्तमिति॥ अनुव्याख्याने द्वितीयाध्याये तृतीयपाद इति शेषः॥ तेनैवेति॥ इति वदता परेणैवेत्यर्थः।

ननु सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वं यद्यपि तुच्छानिर्वाच्ययोः साधारणम् ; तथापि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वमत्यन्तासत्त्वम्। तच्च शुक्तिरूप्ये प्रपञ्चे च बाधात् पूर्वं नास्त्येव इति न तुच्छत्वापत्तिः। नच बाधात् पूर्वं शुक्तिरूप्यं प्रपञ्चो वा सत्त्वेन न प्रतीयते। एतदेव सदर्थकेनोपाधिपदेन सूचितम्। शून्यवादिभिः सदधिष्ठानकभ्रमानङ्गीकारेण क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हरूपासद्वैलक्षण्यस्य क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वरूपस्य शुक्तिरूप्ये प्रपञ्चे वाऽनङ्गीकारात्॥ नन्वेवं सति यावत्सदधिकरणकात्यन्ताभावप्रतियोगित्वं पर्यवसितम्। तथाच केवलान्वय्यत्यन्ताभावप्रतियोगिष्ववृत्तिगगनादिषु तार्किकाणां सिद्धसाधनम्। यदधिकरणं यत् सत् तन्निष्ठात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति विवक्षायामधिकरणपदेनावृत्तेर्वारणेऽपि संयोगसम्बन्धेन समवायसम्बन्धेन वा यद् घटाधिकरणम्, समवायसम्बन्धेन संयोगसम्बन्धेन वा घटस्य तन्निष्ठात्यन्ताभावप्रतियोगितया सर्वेषु वृत्तिमत्सु दुरुद्धरं सिद्धसाधनम्। येन सम्बन्धेन यत् यस्याधिकरणम् तेन सम्बन्धेन तस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वमिति विवक्षायाम् अव्याप्यवृत्तिषु संयोगादिषु सिद्धसाधनम् इति चेन्न। येन रूपेण यदधिकरणतया यत् प्रतिपन्नम्, तेन रूपेण तन्निष्ठात्यन्ताभावप्रतियोगित्वस्य प्रतिपन्नपदेन सूचितत्वात्। तच्च रूपं सम्बन्धविशेषोऽवच्छेदकविशेषश्च। न हि सम्बन्धविशेषमन्तरेण भूतले घटाधिकरणता प्रतीयते। अवच्छेदकविशेषमन्तरेण वा वृक्षे कपिसंयोगाधिकरणता। तथा च येन सम्बन्धविशेषेण अवच्छेदकविशेषेण वा यदधिकरणताप्रतीतिर्यत्र भवितुमर्हति, तेनैव सम्बन्धविशेषेण तेनैवावच्छेदकविशेषेण तदधिकरणात्यन्ताभावप्रतियोगित्वं तस्य मिथ्यात्वमिति पर्यवसिते क्व सिद्धसाधनम्? यदि पुनर्ध्वंसप्रागभावप्रतियोगित्वमिव अत्यन्ताभावप्रतियोगित्वमपि आकाशादिषु न स्यात्। साधकमानाभावस्य तुल्यत्वात्, 'इहाकाशो नास्ती'ति प्रत्यक्षप्रतीत्यसम्भवात्, अनुमाने चानुकूलतर्काभावात्, सामान्यतो दृष्टमात्रेण ध्वंस-प्रागभावप्रतियोगित्वस्यापि सिद्धिप्रसङ्गात्, तद्व्यतिरेकेण कस्यचित्कार्यस्यानुपपत्तेरभावाच्च, एवं संयोगसम्बन्धेन घटवति भूतले समवायसम्बन्धेन घटाभावसत्त्वे मानाभावात्। लाघवेन घटात्यन्ताभावत्वेनैव घटसामानाधिकरण्यविरोधित्वकल्पनात्, सम्बन्धविशेषप्रवेशे च गौरवात् घटसमवायाद्यभावमात्रविषयतया प्रतीत्युपपत्तेः, आधाराधेयभावस्य प्रत्यक्षसिद्धत्वेन

घटस्यावृत्तित्वशङ्कानुदयात्, उक्तयुक्तेश्च न घटात्यन्ताभावसामानाधिकरण्यम्, एवं संयोगतदत्यन्ताभावयोः नैकाधिकरण्यम्। अग्रे वृक्षः कपिसंयोगी मूले न इति प्रतितेरग्रमूलयोरेव संयोग-तदत्यन्ताभावत्वयोपपत्तेः, तदा सन्मात्रनिष्ठात्यन्ताभावप्रतियोगित्वमेव मिथ्यात्वम्, इति मन्तव्यम्। नच्च – एवं सति भावाभावयोरविरोधात् तज्ज्ञानयोःबाध्य-बाधकभावो न स्यादिति – वाच्यम्। भिन्नसत्ताकयोरविरोधेऽपि समसत्ताकयोर्विरोधात्। यत्र भूतले यस्य घटस्यात्यन्ताभावो व्यावहारिकः, तत्र स घटो न व्यावहारिक इति नियमात्। नच – एवं सति 'शुक्तिरियं न रजतमि'ति ज्ञानविषयीभूताभावस्य व्यावहारिकत्वेन पुरोवर्तिप्रतीतरजतस्य व्यावहारिकसत्त्वापहारेऽपि प्रातीतिकसत्त्वानपहाराद् बाधोत्तरकालेऽपि 'इदं रजतमि'ति प्रतीतिः स्यादिति – वाच्यम्। तत्र 'इयं शुक्तिरि'त्यपरोक्षप्रमया प्रातीतिकरजतोपादानाज्ञाननिवृत्तौ प्रातीतिकसत्त्वस्याप्यपहारात्। शुक्त्यज्ञानस्य प्रातीतिकरजतोपादानत्वेन तदसत्त्वे प्रातीतिकरजतासत्त्वस्यावश्यकत्वात्। अत एव यत्र परोक्षयाऽधिष्ठानप्रमया न भ्रमोपादानाज्ञाननिवृत्तिः, तत्र व्यावहारिकत्वापहारेऽपि प्रातीतिकत्वानपहारसत् 'तिक्तो गुडः' इति प्रतीतिरनुवर्तते। एवमखण्डब्रह्मसाक्षात्कारात् पूर्वं परोक्षबाधेन प्रपञ्चस्य व्यावहारिकत्वापहारेऽपि प्रतीतिरनुवर्तत एव। अधिष्ठानाज्ञाननिवृत्तौ तु नानुवर्तते' – इति।

अत्रोच्यते। यदुक्तं क्वचिदप्युपाधावित्यादि, तन्न। 'असच्चेत् न प्रतीयेते'ति वदता तादृशाप्रतीतिं प्रति प्रयोजकस्यासत्त्वस्य प्रतीत्यनुपाधिकस्यैव वाच्यत्त्वात्। निरस्तं चैतदधस्तात्। यच्चोक्तम् – 'येन रूपेणे'त्यादि, सन्मात्रनिष्ठेत्यादि च, तदुभयमपि न। लाघवेन भावाभावयोरेव सामानाधिकरण्यविरोधात्। सत्ताभेदस्याद्याप्यसिद्धेश्च। मिथ्यात्वानुमानादेव च सत्ताभेदसिद्धावन्योन्याश्रयात्। श्रुतेः प्रत्यक्षबाधाच्च। तस्मात् साधूक्तमत्यन्तासत्त्वं दुर्वारमिति॥

अबाध्यत्वरूपेति॥ अबाध्यत्वरूपपारमार्थिकत्वज्ञाने सति तद्घटितमिथ्यात्वज्ञानम्। बाध्यत्वरूपमिथ्यात्वज्ञाने च तदभावरूपाबाध्यत्वज्ञानमित्यन्योन्याश्रय इत्यर्थः॥ रूप्यं नास्तीति॥ अन्यथा 'पारमार्थिकत्वेन रूप्यं नास्ति' 'पारमार्थिकत्वेन नाना नास्ती'ति च निषेधोल्लेखः स्यादित्यर्थः। ॥अन्यथेति॥ तथाच नृभृङ्गादेरपि पारमार्थिकस्वरूपातिरिक्तं किञ्चित् स्वरूपमनिषिद्धं स्यादित्यर्थः। 'रूप्यं नास्ति' 'नेह नास्ती'ति रूप्यप्रपञ्चयोः पारमार्थिकत्वेन निषेधानन्तरमपारमार्थिकं रूप्यस्य प्रातिभासिकं प्रपञ्चस्य व्यावहारिकं स्वरूपमनुवर्तेत; तस्यानिषिद्धत्वात्। नचेष्टापत्तिः। मोक्षेऽपि तदनुवृत्तौ निष्प्रपञ्चताया असिद्ध्यापातादित्यपि बोद्धव्यम्॥ रूप्यवदिति॥ पारमार्थिकत्वस्यापि निषेधाय

बुद्धिपूर्वकारोपरूपा प्रसक्तिर्वाच्या। आरोपश्चानिर्वचनीयपारमार्थिकत्वविषयः, इति पारमार्थिकत्वस्यापि न स्वरूपेण निषेधः। किन्तु पारमार्थिकत्वान्तरेण, तस्याप्युक्तविधया पारमार्थिकत्वान्तरेणेत्यनवस्था स्यादित्यर्थः॥ सुखादीति॥ प्रतिपन्नोपाधौ पारमार्थिकत्वाकारेण निषेधप्रतियोगित्वं ब्रह्मण्यतिव्याप्तमित्यर्थः। निर्धर्मकतया पारमार्थिकधर्मशून्यस्यापि ब्रह्मणः स्वरूपं परमार्थसदिति यदि, तदा प्रपञ्चस्यापि तथाऽस्त्विति बोध्यम्॥ मयीति॥ मदंशोऽध आदिश्च ब्रह्मणोऽपि प्रतिपन्नोपाधिरस्तीत्यर्थः। ननु पारमार्थिकस्य ब्रह्मणः कथं पारमार्थिकत्वेन निषेध इत्यत उक्तम् निर्धर्मकत्वेनेति॥ प्रतिपन्नोपाधिशब्देनेति॥ तथाच ब्रह्मण्यतिव्याप्तिरिति भावः। ननु – अध्यस्तत्वं न मिथ्यात्वम्, येनात्माश्रयः, किन्तु सदसद्भ्यामन्यत्वमित्यत आह – शेषेति॥ वैयर्थ्यादित्युपलक्षणम्। इष्टापत्तिरपि बोध्या। ननु प्रतिपन्नोपाधौ पारमार्थिकत्वाकारेण निषेधप्रतियोगित्वं मिथ्यात्वलक्षणं न ब्रह्मण्यतिव्याप्तम् ; ब्रह्मणः प्रतिपन्नोपाधेरभावात्। नच – 'मयि सुखानुभवः' इति प्रत्यक्षेण "स एवाधस्तादि"त्यादिश्रुत्या च मदंशोऽध आदिर्वाऽस्ति ब्रह्मणोऽपि प्रतिपन्नोपाधिरिति – वाच्यम्। ब्रह्मणः सर्वाधिष्ठानत्वेन मदंशाध आदेर्ब्रह्मण्यध्यस्तस्य ब्रह्म प्रत्यधिष्ठानत्वायोगादित्यत आह – ब्रह्मण इति॥ पारमार्थिकत्वधर्मशून्ययोरपि ब्रह्म जगतोः प्रतिपन्नोपाधिविरहतत्सद्भावप्रयुक्तापरिच्छिन्नत्व परिच्छिन्नत्वाभ्यां विशेषेऽपि न परमार्थस्वरूपे विशेष इत्यर्थः। ननु द्रव्यत्वहीनं गुणादिकमद्रव्यमितिवत् पारमार्थिकत्वहीनं जगदपारमार्थिकमेव स्यात् अत आह – न हीति॥ पारमार्थिकत्वहीनमपारमार्थिकं चेत्, ब्रह्माप्यपारमार्थिकं स्यादित्यर्थः। ननु पारमार्थिकत्वस्य तत्त्वतः सत्त्वेऽपि नाद्वैतहानिः। तस्य ब्रह्मस्वरूपत्वेन ब्रह्मण इव ब्रह्माद्वैताविरोधित्वादित्यत आह – नचेति॥ सोपाधिकत्व-निरुपाधिकत्वाभ्यां पारमार्थिकत्व-ब्रह्मणोर्नैकस्वरूपत्वमिति भावः। ब्रह्म-जगतोः सत्यत्वेऽप्यवान्तरवैषम्यमाह – एवञ्चेति॥ ब्रह्मणः कालत्रयेऽपि सत्त्वेन नित्यत्वम्, जगतस्तु स्वकाले कदाचिदेव सत्त्वेनानित्यत्वम्, इति नित्यत्वानित्यत्वाभ्यामेव ब्रह्म-जगतोर्वैषम्यम्, नतु सत्यत्वमिथ्यात्वाभ्यामित्यर्थः। उक्तार्थं संगृह्णाति – तथाचेति॥ निषेधो रूप्यादेरित्यन्वयः।

न्यायामृतकण्टकोद्धारः

।न द्वितीय इति। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वमिति पक्षो नेत्यर्थः। त्रैकालिकनिषेधस्येति॥ अत्र कश्चित् – त्रैकालिकनिषेधस्य ब्रह्मरूपत्वात् तात्त्विकत्वेऽपि नाद्वैतहानिकरत्वम्। न च तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य तात्त्विकत्वापत्तिरिति वाच्यम्; तात्त्विकाभावप्रतियोगिनि शुक्तिरूप्यादौ तात्त्विकत्वादर्शनात्। न च प्रपञ्चभ्रमार्थमधिष्ठानब्रह्मस्फुरणस्यावश्यकतया ब्रह्माभिन्नप्रपञ्च

निषेधस्यापि प्रकाशे प्रपञ्चभ्रमासम्भवः। न च इदन्त्वादिना अधिष्ठान प्रकाशेऽपि प्रपञ्चनिषेधत्वादिना न प्रकाश इति वाच्यम्। तव मते प्रपञ्चनिषेधत्वादेरपि ब्रह्ममात्रत्वात्। अन्यथा निर्विशेषत्वभङ्गप्रसङ्गादिति वाच्यम्; मन्मते ब्रह्मस्फुरणस्य साक्षिरूपत्वेन साक्षिरूपप्रकाशस्य भ्रमविरोधित्वाभावेन सत्यपि ब्रह्मस्फुरणे प्रपञ्चभ्रमसम्भवात्। अविद्यादेरिव प्रपञ्चभ्रमस्यापि वेदान्तजन्यचरमान्तःकरणवृत्तिमात्रनिवर्त्यत्वादित्याह, तन्न। प्रपञ्चप्रतियोगिकत्रैकालिकनिषेधस्य ब्रह्मरूपत्वे ''नेह नाने''ति ब्रह्म-निषेधयोराधाराधेयभावप्रतीतिर्न स्यात्; आधाराधेयभावस्य भेदसापेक्षत्वात्। न च 'घटाभावे घटाभावः' इतिवदभेदेऽप्याधाराधेयभावोपपत्तिरिति वाच्यम्; अभावस्य स्वरूपविशेषाभ्युपगमेन तत्र तथाभावेऽपि ब्रह्मणो निर्विशेषत्वाङ्गीकारेण तदनुपपत्तेः। किञ्च निषेधस्य प्रतियोगिघटितत्वेन सोपाधिकत्वाद् ब्रह्मणो निरुपाधिकत्वाद् विरुद्धधर्माधिकरणत्वेन निषेध-ब्रह्मणोरैक्यासम्भवः। नच प्रतियोगिनो निषेधोपलक्षणतया निषेधस्य ब्रह्मरूपत्वं भविष्यतीति वाच्यम्। एवं हि सार्वज्ञ-सर्वकर्तृत्वादीनामपि सोपाधिकत्वेऽप्युक्तन्यायेन ब्रह्मस्वरूपत्वापत्तौ ''यः सर्वज्ञः'' इत्यादिवाक्यानामपि सत्य-ज्ञानादिवाक्यवत् तत्त्वावेदकत्वापत्तेः। अखण्डार्थत्वहानेश्च।

यच्चोक्तम् – साक्षिरूपप्रकाशस्य भ्रमाविरोधित्वेन सत्यपि ब्रह्मस्फुरणे प्रपञ्चभ्रमः स्यात् इति, तदपि न; साक्षिणः स्वसमानविषयकाज्ञानभ्रमविरोधित्वाभावे ज्ञानत्वमेव न स्यात्। तद्विरोधिन एव ज्ञानत्वात्। साक्षिविषये सुख-दुःखादावज्ञानभ्रमापत्तेश्च। अन्यथाऽन्धकाराविरोधिप्रकाशान्तरस्यापि कल्पनापत्तेः। तस्मात् निषेधस्य न ब्रह्मरूपत्वम् इति तात्त्विकत्वेऽद्वैतहानिः सुस्थैव। व्यावहारिकत्व इति॥ अस्मिन् पक्षेऽर्थान्तरत्व-श्रुतेरतत्त्वावेदकत्व-प्रतियोगिपारमार्थिकत्वरूपाणि त्रीणि दूषणानि दत्तानि।

अत्र कश्चित् – निषेधस्य बाध्यत्वेऽपि यत् प्रतियोगिपारमार्थिकसत्त्वोपपत्त्याऽर्थान्तरत्वमुक्तम्, तत् तदा स्यात्, यदि निषेधबाध्यत्वं प्रतियोगिपारमार्थिकसत्त्वाविरोधित्वे तन्त्रं स्यात्, नैवम्। स्वाप्नार्थस्य स्वाप्ननिषेधेन बाध्य बाधदर्शनात्। किन्तु निषेध्यापेक्षया न्यूनसत्ताकत्वम्। प्रकृते च तुल्यसत्ताकत्वात् कथं न विरोधः?

यच्च – निषेधस्य निषेधे प्रतियोगिनस्सत्त्वापत्तिरिति, तदपि न। तत्र हि निषेधनिषेधे प्रतियोगिसत्त्वमायाति, यत्र निषेधस्य निषेधबुद्ध्या प्रतियोगिसत्त्वं व्यवस्थाप्यते, न निषेधमात्रं निषिध्यते। यथा रजते 'नेदं रजतमि'ति ज्ञानानन्तरम् 'इदं नारजतमि'ति ज्ञानेन रजतं व्यवस्थाप्यते। यत्र तु प्रतियोगिनिषेधयोरुभयोरपि निषेधः, तत्र न प्रतियोगिसत्त्वम्; यथा ध्वंससमये प्रागभाव-प्रतियोगिनोरुभयोर्निषेधे। तथाच प्रकृतेऽपि निषेधबाधकेन प्रतियोगिनः प्रपञ्चस्य तन्निषेधस्य च बाधनाद् न निषेधस्य बाध्यत्वेऽपि प्रपञ्चस्य तात्त्विकत्वम्; उभयोर्निषेध्यतावच्छेदकस्य दृश्यत्वादेस्तुल्यत्वात् इति। यच्च – अतत्त्वावेदकत्वमुक्तं श्रुतेः, तन्न। ब्रह्मभिन्नप्रपञ्चनिषेधादिकमतात्विकमतात्त्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यासम्भवात् – इत्याह, तन्न। यदुक्तम् – निषेधस्य बाध्यत्वं प्रतियोगिपारमार्थिकसत्त्वाविरोधित्वे न तन्त्रमिति, तन्न; लाघवेन निषेधबाध्यत्वस्यैव तत्र तन्त्रत्वात्। न च स्वाप्नार्थनिषेधेऽपि स्वाप्नार्थस्य सत्त्वापत्तिरिति वाच्यम्; यत्र स्वाप्नार्थो निषिध्यते, तत्र निषेधस्य बाध्यत्वासम्मतेः। स्वाप्नार्थानां जाग्रदर्थतुल्यसत्ताकत्वाभ्युपगमात्। न चैवम् शुक्तिरूप्यादेरपि सत्त्वापत्तिरिति वाच्यम्; तत्रापि

निषेधबाध्यत्वासम्मतेः। अस्तु वाऽप्रातिभासिकप्रतियोगिकनिषेधबाध्यत्वं प्रतियोगिपारमार्थिकसत्त्वाविरोधित्वे तन्त्रम्। एवं सति न कोऽपि दोषः। स्वाप्नार्थनिषेधस्या प्रातिभासिकप्रतियोगिकत्वाभावात्।

यच्चोक्तम् – प्रतियोग्यपेक्षया यूनसत्ताकत्वं तन्त्रमिति, तदपि न। प्रपञ्चसत्यत्ववादिनं प्रति तस्यापि सत्यत्वेनार्थान्तरस्य दुर्वारत्वात्। तस्मादर्थान्तरं दुर्वारम्।

यच्च – श्रुतेरतत्त्वावेदकत्वपरिहारायातात्त्विकमतात्त्विकत्वेन बोधयन्त्याः श्रुतेर्नाप्रामाण्यमित्युक्तम्, तदपि मन्दम्। श्रुत्या निषेधमात्रस्यैव बोधनेनातात्त्विकत्वांश औदासीन्यात्। अन्यथा कर्मादिस्वरूपप्रतिपादकस्य सगुणत्वप्रतिपादकस्य च वेदस्यातत्त्ववेदकत्वापत्तेः, तत्रापि तात्त्विकत्वाद्यनुल्लेखात्। यदि कर्मादिकं सत्त्वेन प्रतिपादयतीति ब्रूषे, तर्हि निषेधमपि तथेति तुल्यम्। अध्याहारेण तथा प्रतिपादकत्वं च श्रुत्यर्थमनध्याहारेण कुर्वन्तो निराकरिष्यामः। तस्मात् निषेधस्य व्यावहारिकत्वेऽतत्त्वावेदकत्वेन श्रुतेरप्रामाण्यं दुर्वारम्।

यच्च – निषेधस्य निषेधे प्रतियोगिनः सत्त्वापत्तिपरिहारार्थमुक्तम्, – प्रकृते उभयोरपि निषेधादिति, तदपि न। उभयनिषेधस्य व्याहतत्वेन कर्तुमशक्यत्वात्। न च ध्वंससमये प्रतियोगि-प्रागभावनिषेधवदुपपत्तिरिति वाच्यम्। एकविरोधिविशेषसमयेऽपरविरोधिविशेषद्वयनिषेधेऽपि सामान्यत एकसमये प्रतियोग्यत्यन्ताभावनिषेधा दर्शनात्। न च निषेध्यतावच्छेदकस्य दृश्यत्वस्योभयत्र सत्त्वेनोभयनिषेधोपपत्तिरिति वाच्यम्। दृश्यत्वस्य ब्रह्मासतोरपि सत्त्वेन निषेध्यतानवच्छेदकत्वात्। न च ब्रह्मासतोर्दृश्यत्वमेव नेति वाच्यम्। दृश्यत्वभङ्गे तस्योपपादयिष्यमाणत्वात्। एवं च यथा 'घटात्यन्ताभावो नास्ती'त्यत्यन्ताभावनिषेधे घटात्यन्ता भावविरोधिसत्त्वबुद्धिः, एवं 'प्रपञ्चात्यन्ताभावो ने'त्यत्यन्ताभावनिषेधे प्रतियोगिसत्त्वापत्तिर्दुर्वारैव इति निषेधस्य व्यावहारिकत्वे मूलोक्तदूषणत्रयं सुस्थम्, इति न काऽप्यनुपपत्तिरिति।

नाद्यः॥ श्रुत्यादिसिद्धोत्पत्त्यादिकस्येति॥ अत्र प्राचीनं विशेषणद्वयं 'वियदादेरि'त्यस्यैव। उत्तरद्वयं परमतानुसारेण वियदादेः शुक्तिरूप्यादेश्चेत्युभयोरपि। अत्र स्वरूपेण त्रैकालिकनिषेधे श्रुत्यादिसिद्धोत्पत्त्यादि कत्वमर्थक्रियाकारित्वमविद्योपादानकत्वं तत्त्वज्ञाननाश्यत्वं च न स्यात्; स्वरूपेण निषिद्धस्य शशशृङ्गादेस्तद दर्शनादित्यभिप्रेतम्। ननु प्रतिपन्नोपाधौ त्रैकालिकनिषेधे कथमत्यन्तासत्त्वम्? सार्वत्रिकत्रैकालिक निषेधप्रतियोगित्वस्य तत्त्वादित्यत आह – प्रतिपन्नोपाधाविति॥ तथाच स्वरूपेण निषेधपक्ष उत्पत्त्याद्ययोगाचार्यवचनविरोधात्यन्तासत्त्वमिति दूषणत्रयं दत्तम्।

अत्र कश्चित् – स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम्। ''नेह नाने''ति श्रुत्या 'रूप्यं ने'ति प्रतीत्या च स्वरूपेणैव निषेधात्। न च – तत्र लौकिकपारमार्थिकमेव रजतं स्वरूपेण निषिद्ध्यत इति वाच्यम्। भ्रम-बाधयोर्वैयधिकरण्यापत्तेः, अप्रसक्तप्रतिषेधापत्तेश्च। न च तर्हि उत्पत्त्याद्यसम्भव इति वाच्यम्; न ह्यनिषिद्ध्यमानत्वमुत्पत्त्यादिमत्त्वे प्रयोजकम्। तथासत्याकाशादेरपि अनिषिद्ध्यमानत्वेन उत्पत्त्यादिप्रसङ्गात्, किन्तु वस्तुस्वभावविशेषः, स च कल्पितः प्रपञ्चेऽस्ति, इति न काऽप्यनुपपत्तिः। न च आचार्यवचनविरोध इति वाच्यम्। आचार्यवचनस्य लौकिकपारमार्थिकरजततादात्म्येन प्रतीतं प्रातिभासिकमेव रजतं प्रतियोगीत्यर्थः। तच्च स्वरूपेण पारमार्थिकत्वेन वेत्यनास्थायां वाशब्दः।

एतावदुक्तिश्च पुरोवर्तितादात्म्येनैव रजतं प्रतीयत इति मतनिरासार्थम्, लौकिकपारमार्थिकरजततादात्म्येनापि प्रतीयत इति प्रतिपादनार्थं च। एवं च नाचार्यवचनविरोधः। नाप्यत्यन्तासत्त्वम् । मया स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वं यद्यप्यसत्प्रपञ्चसाधारणमङ्गीकृतं, तथापि क्वचिदुपाधौ सत्त्वेनाप्रतीय मानत्वमसत्त्वमित्यङ्गीकृतत्वेन प्रपञ्चे तदभावेनात्यन्तासत्त्वाभावादित्याह तन्न ।

यदुक्तम् – स्वरूपेण त्रैकालिकनिषेधेऽप्युत्पत्त्यादिसम्भव इति, तन्न। सर्वथा स्वरूपेण निषेधस्योत्पत्त्यादिविरुद्धत्वात्। उत्पत्तिमत्त्वे हि सस्वरूपताऽङ्गीकरणीया। अथ च स्वरूपेण निषेध इति कथं न व्याहतिः। न च अनिषिध्यमानत्वमुत्पत्तिमत्त्वे न तन्नमिति वाच्यम्। न वयमनिषिद्धत्वमानत्वमुत्पत्तिमत्त्वे तन्नमिति ब्रूमः, किन्तु स्वरूपेण निषेधस्य उत्पत्तिविरोधम्। न च काल्पनिकं स्वरूपमस्ति, पारमार्थिकमेव नास्तीति ब्रूम इति वाच्यम्; तथा निषेधे स्वरूपेण निषेध इति पक्षभङ्गप्रसङ्गात्। स्वरूपेण निषेधेऽपि चेद् उत्पत्त्यादिमत्त्वम्, तर्ह्यसतोऽप्युत्पत्त्यादिप्रसङ्गः। न च असतः कल्पितस्वरूपविशेषो नास्ति, अस्य तु सोऽस्तीति वाच्यम्। तथात्वे सर्वथा स्वरूपेण निषेध इति पक्षहानेः। सर्वथा स्वरूपनिषधेऽपि प्रपञ्चे स्वरूपकल्पनाङ्गीकारेऽसत्यपि तत्कल्पनाऽङ्गीकरणीया। अपरोक्षप्रतीत्यनुपपत्तिवत् परोक्षप्रतीत्यनुपपत्तेरपि वक्तुं शक्यत्वात्। एतेनैव – स्वरूपे विशेषः उत्पत्त्यादिमत्त्वे तन्नम्। स च कल्पितः प्रपञ्चेऽस्तीति निरस्तम्। कल्पितस्वरूपविशेषाङ्गीकारे तेन निषेधायोगादित्युक्तत्वात्। तस्मात् स्वरूपेण त्रैकालिकनिषेधे उत्पत्त्याद्ययोग इति साधूक्तम्।

यच्चाचार्यवचनविरोधपरिहारार्थमाचार्यवचनाभिप्रायकल्पनम्, तदप्यसत्। अस्पष्टस्य ह्यभिप्रायो वर्णनीयः। स्पष्टं हि भवदाचार्या बहुषु स्थलेषु वदन्ति – 'आभासप्रसक्तचाऽनाभासो निषिध्यते' इति, 'लौकिकपारमार्थिकत्वरूपेण निषिध्यते' इति। 'प्रतीतं रजतं पारमार्थिकत्वेन निषिद्ध्यते' इति च। तथाचाभिप्रायवर्णनस्य, शिष्यवञ्चनामात्रत्वादुपेक्षणीयतैव युक्तेति।

यच्च – अत्यन्तासत्त्वपरिहारार्थमुक्तम् – ''क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वमत्यन्तासत्त्वमिति, तदयुक्तम्। अत्रोपाधेः सत्त्वं विवक्षितम्, न वा? नाद्यः। ब्रह्मणि शुक्तिरूप्य आरोपितपारमार्थिकत्वे चातिव्याप्तेः। न द्वितीयः; असत्यव्याप्तेः। तस्यापि क्वचिदप्युपाधौ शब्दाभासादिना सत्त्वेन प्रतीयमानत्वात्। अत्र बहूनि दूषणानि मूल एवोक्तानीति दिक्। तस्मात् स्वरूपेण निषेध उत्पत्त्याद्यसम्भवादिति दूषणत्रयस्य मूलोक्तता साध्वीति।

निरुपाख्यत्वं किं पदजन्यज्ञानाविषयत्वम्? सर्वथाऽप्रतीयमानत्वं वा? आद्य आह – निरुपाख्यपदेनेति। द्वितीय आह – असतोऽप्रतीताविति॥ निरुपाख्यत्वपक्षदूषणसमुच्चये चशब्दः। जगतीति॥ न हि बौद्धो जगतः सत्त्वेन प्रतीतिं नाङ्गीकरोति। तथात्वे प्रतीत्यपलापिनः कथाधिकाराभावप्रसङ्गात्। न च उपाधेः सत्त्वं विवक्षितम्, बौद्धेन सदधिष्ठानकभ्रमानङ्गीकारादिति वाच्यम्। तथात्वे ब्रह्मणोऽपि सद्रूपोपाधौ सत्त्वेनाप्रतीयमानत्वेनातिव्याप्तेः। त्वयेति॥ प्रयोज्यप्रयोजकभावस्य भेदघटितत्वादिति भावः। अन्यथेत्यस्यैव विवरणम् – अप्रतीत्यनुपाधिकेति॥ उक्तासत्त्वलक्षणस्याव्याप्तिमप्याह – येनेति॥ ननु

सत्त्वेन प्रतीयमानस्य शशशृङ्गस्य प्रातिभासिकत्वेनासतः सत्त्वेन प्रतीतिर्नास्तीत्यत आह – त्वन्मतेऽपि हीति॥ श्रुत्याऽप्यसतः सत्त्वेन प्रतीतिरस्तीत्याह – तद्धैक इति॥ अन्योन्याश्रयादिति॥ असद्वैलक्षण्य स्यानिर्वाच्यलक्षणे प्रवेशादिति भावः। ननु प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूप प्रकृतानिर्वाच्यलक्षणेऽसत्त्वप्रवेशाभावात् नान्योन्याश्रय इत्यत आह – लाघवेनेति॥ असंभवमप्याह – अनिर्वाच्येति॥ अर्थक्रियासामर्थ्याभावेति॥ अत्र सामान्यतोऽर्थक्रियासामर्थ्याभावो वाऽभिप्रेतः? तत्तदुचितार्थक्रियासामर्थ्यविशेषाभावो वा? नाद्य इत्याह – शुक्तिरूप्यादाविति॥ नान्त्य इत्याह – शुद्धब्रह्मणीति॥ आद्येऽपि ब्रह्मण्यतिव्याप्तिर्द्रष्टव्या। अन्यथेति॥ यद्यत्यन्ताभावः स्वाधिकरणे प्रतियोगिस्वरूपसत्त्वाविरोधीत्यर्थः। न च अतन्तुषु पटस्वरूपाप्रतीत्या तत्र व्यावहारिकपटस्वरूपास्वीकारः तन्तुषु तु पटस्वरूपप्रतीत्या व्यावहारिकपटस्वीकार इति वाच्यम्। अतन्तुष्वारोपितपटेषु व्यावहारिकपटस्वरूपापादनात्। किञ्चात्यन्ताभावस्य स्वप्रतियोगिसमानदेशत्वस्य विरुद्धस्य यदि स्वीकारः, तर्हि प्रागभावसमानकालीनत्वस्यापि विरुद्धस्य स्वीकारप्रसङ्गः इत्याह – प्रागभावादिसमानकालीनत्वेनेति॥ असम्भवमाह – तुच्छ इति॥ उपसंहरति – तस्मादिति॥

अत्यन्तासच्छब्दार्थे विचार्यमाणे तादृशमेवासत्त्वं लभ्यत इत्याह – तत्र तदानीमिति॥ जगदसतोर्वैलक्षण्यान्तरमाशङ्क्य निषेधति – न च मिथ्याभूतस्येति॥ स्वरूपेणैव निषेध इति पक्ष इति॥ इति वा वैषम्यं न वक्तुं शक्यमित्यन्वयः। ।विरुद्धत्वादिति॥ त्रैकालिकनिषेधप्रतियोगित्वरूपासत्त्वेन तदभावसाधनं विरुद्धमित्यर्थः। न च अन्यदेवासत्त्वमिति वाच्यम्। इतोऽतिरिक्तस्यासत्त्वनिर्वचनस्य निराकृतत्वादिति भावः। किञ्चासति कस्यापि धर्मस्याभावात् त्रैकालिकनिषेधप्रतियोगित्वरूपधर्मासम्भव इति भावः? अथवा धर्म्यसत्त्वे धर्मस्याप्यसत्त्वमित्याशयः? आद्य आह – असतोऽसत्त्ववदित्यादि॥ अन्यथा हेतु-साध्ययोरभावे बाधासिद्ध्यापातादिति भावः। द्वितीय आह – प्रागभावादिदशायामिति॥ ननु घटादेः कालान्तरे सत्त्वात् प्रागभावप्रतियोगित्वरूपधर्माधिकरणत्वं भविष्यतीत्यत आह – कालान्तर इति॥ ननु केषाञ्चिद् धर्माणां धर्मिसत्त्वापेक्षत्वं केषाञ्चित् नेत्यत्र किं नियामकम्? अत आह – शिष्टमिति॥

उक्तदूषणं मकरन्दकारमतेऽप्यतिदिशति – एतेनेति॥ अत्राप्रसक्तिर्ज्ञानसामान्याभावो वाऽभिप्रेतः? आरोपरूपज्ञानाभावो वा? नाद्य इत्याह – असत इति॥ तस्येति॥ असद्वैलक्षण्यादेरित्यर्थः। आद्य-द्वितीययोः प्रतियोगिज्ञानत्वेन तृतीय-चतुर्थयोरधिकरणत्वेन चासज्ज्ञानस्यापेक्षितत्वादिति भावः। द्वितीयेऽप्येतदेवोत्तरम्। असद्वैलक्षण्यज्ञानस्य श्रौतनिषेधस्यारोपमूलकत्वादिति भावः॥

'असद्वैलक्षण्यादिसिद्धिर्न स्यादि'त्यत्र समाधिं शङ्कते – नन्विति॥ प्रसक्तौ शब्दाभासादिना बुद्धिपूर्वकारोपेण वेति हेतुद्वयम्। तथाच प्रसक्तस्यैव निषेध इति शेषः। अथवा – प्रसक्तस्यैव प्रत्यक्षेण निषेध इत्यन्वयः। न च प्रतियोगिज्ञानाभावात् कथमप्रसक्तस्य प्रत्यक्षेण निषेधः? इति वाच्यम्; शब्दाभासजन्यानुभवजन्यसंस्कारमूलकप्रतियोगिस्मृत्यादिसम्भवात्। तर्हि शब्देनाप्यप्रसक्तनिषेधः स्यादिति – चेत्, न। शब्दस्य परार्थत्वेन परप्रसक्तस्यैव निषेद्धव्यत्वेनाप्रसक्तनिषेधायोगादित्यर्थः॥

साम्यमेवोपपादयति – शशशृङ्गमिति॥ अनिर्वाच्यान्यस्येति॥ आभासान्यस्येत्यर्थः। तथाचानाभास व्यावहारिकशशशृङ्गाभावाद् अनाभासासत एव शशशृङ्गस्य निषेध इति भावः। यद्याभासप्रतीत्याऽनाभासनिषेधो न स्यात्, तदा दोषमाह – जगदादाविति॥ नैयायिकमतेन शङ्कते – ननु सदेति। प्रतिबन्धा समाधत्ते – तर्हीति॥ ननु आत्मनः प्रतिपन्नोपाध्यभावात् कथं मिथ्यात्वापादनमित्यत आह – तस्यापीति॥ वैषम्यं शङ्कते – अथेति॥ वैषम्यं परिहरति – तर्हीति॥ अन्यथेति॥ यदि देश-कालयोरपि स्वदेश-कालवृत्तित्वं न स्यादित्यर्थः। प्रातिभासिकत्वमिति॥ शुक्तिरजततुल्यत्वादिति भावः। अत्यन्तासत्त्वदूषणमुपपाद्योपसंहरति – तस्मादिति॥ उक्तरूपमेवात्यन्तासत्त्वमित्यत्राचार्यसम्मतिमाह – तदुक्तमिति॥ 'तत् नासीत् नास्ति न भविष्यती'ति ज्ञानमेयता यदि बाध इत्यन्वयः।

द्वितीये द्वितीयपक्षं निषेधति – नापीति॥ अत्र पारमार्थिकत्वमव्यावहारिकत्वं वा विवक्षितम्? अबाध्यत्वं वा? नाद्यः। तादृशपारमार्थिकत्वेन त्रैकालिकनिषेधस्य मयाऽप्यङ्गीकृतत्वेन सिद्धसाधनात्। न द्वितीय इत्याह – अबाध्यत्वरूपेति॥ अन्यथेति॥ यदि स्वरूपेणैव निषेध्यत्वेन प्रतीतस्य पारमार्थिकत्वेन निषेध उच्यत इत्यर्थः। न च शशशृङ्गादेः स्वरूपेण निषेधे बाधकाभावात् तत्र तथोच्यते, प्रकृते तु स्वरूपेण निषेधेऽर्थक्रियाकारित्वाद्यनुपपत्तिरूपबाधकसद्भावात् पारमार्थिकत्वेन निषेधप्रतियोगित्वमिति वाच्यम्। शशशृङ्गादावपि परोक्षप्रती विषयत्वाद्यनुपपत्तिरूपबाधकस्य वक्तुं शक्यत्वात्। अन्यथा स्वरूपेण प्रतिषिद्धस्येव पारमार्थिकत्वेन प्रतिषिद्धस्य शुक्तिरूप्यादेरप्यर्थक्रियाकारित्वादर्शनेन प्रपञ्चस्य पारमार्थिकत्वेन प्रतिषेधे तदनुपपत्तिप्रसङ्गेनासत्त्वादिना प्रतिषेधकल्पनापत्तेः।

किञ्च पारमार्थिकत्वाकारेण निषेध इत्यस्य पारमार्थिकत्वस्य त्रैकालिकनिषेध इति पर्यवसितोऽर्थः। ता पारमार्थिकत्वस्यापि किं स्वरूपेण वा निषेधो विवक्षितः? पारमार्थिकत्वाकारेण वा? नाद्य इत्याह – रूप्यवदिति। नान्त्य इत्याह – पारमार्थिकत्वस्येति॥ ब्रह्मण्यतिव्याप्तिमप्याह – सुखाद्यनुभवरूपस्येति॥ न च – निर्धर्मकत्वात् निषेधप्रतियोगित्वरूपधर्मोऽपि नास्तीति कथमतिव्याप्तिरिति वाच्यम्। निर्धर्मकत्वरूपहेतु-प्रतियोगित्वाभावरूपसाध्याभावाभावाभ्यां व्याघातस्योक्तत्वात्। न च अभावरूपधर्माभ्युपगमात् न दोष इति वाच्यम्, प्रतियोगित्वस्याभावविरहरूपत्वस्याभावात्मकत्वात्। प्रतिपन्नोपाधिशब्देनेति॥ बाध्यं यत् स्वम् तदधिष्ठानत्वविवक्षायामित्यर्थः। शेषेति॥ बाध्यत्वमात्रस्य मिथ्यात्वलक्षणत्वसम्भवादिति भावः। अर्थान्तरतामप्याह – ब्रह्मण इति॥ ननु ब्रह्मणि पारमार्थिकत्वमेवास्तीत्यत आह – न हीति॥ ननु पारमार्थिकत्वस्य ब्रह्मरूपत्वात् नाद्वैतहानिरित्यत आह – न चेति॥ तर्हि सत्यत्वाविशेषे ब्रह्म-जगतोः को विशेष इत्यत आह – एवं चेति॥

उक्तार्थं कारिकया संगृह्णाति – तथाचेति॥

न्यायामृतप्रकाशः

सिद्धसाधनादिति॥ प्रातिभासिकत्रैकालिकनिषेधप्रतियोगित्वस्य सत्यत्वाविरोधित्वेनेष्टत्वादिति भावः॥ बाध्यत्वेनेति॥ ब्रह्मज्ञानबाध्यत्वेनेत्यर्थः। तात्विकसत्त्वं त्रैकालिकसत्त्वं। तात्विकसत्त्वाविरोधित्वोपपादनाय तस्य

च बाध्यत्वेनेत्युक्तं। त्रैकालिकसत्तानिषेधस्य बाध्यत्वे त्रैकालिकसत्त्वमेव सिद्ध्यतीति भावः। अर्थांतरादित्युपलक्षणं। व्यावहारिकप्रतियोगिमति व्यावहारिकनिषेधसाधने बाधोऽपि द्रष्टव्यः॥ अतत्वेति॥ व्यावहारिकमिथ्याभूतनिषेधप्रतिपादकत्वान्नेह नानेत्याद्यद्वैतश्रुतेरतत्वावेदकत्वंस्यादित्यर्थः। तत्प्रतियोगिनः व्यावहारिकनिषेधप्रतियोगिनः॥ पारमार्थिकत्वापत्तेरिति॥ प्रतियोगितदभावयोर्भिन्नसत्ताकत्वांगीकारादिति भावः। नन्वथापि व्यावहारिकनिषेधप्रतियोगिनः प्रपंचस्य पारमार्थिकत्वं कुतः? प्रातिभासिकत्वेनाप्युपपत्तेः। रूप्यात्यंताभावस्य व्यावहारिकत्वेऽपि रूप्यस्य प्रातिभासिकत्ववदित्यत उक्तमप्रातिभासिकस्येति। तच्चोभय वादि सिद्धमिति भावः। वियदादेरसद्विलक्षणस्वरूपोपपादनाय श्रुत्यादीति विशेषणद्वयं। असद्विलक्षणस्वरूपाभावे उत्पत्तिरयुक्ता स्यात्। न चेष्टापत्तिः। तस्याः श्रुत्यादिसिद्धत्वात्। अर्थक्रियापि निःस्वरूपत्वे न स्यादिति भावः। वियदादे रूप्यादेश्चोभयोरप्यसद्विलक्षणस्वरूपोपपादनायाविद्येत्यादि। निस्स्वरूपत्वे सोपादानत्वा देरयोगादिति भावः॥ धीकाल इति॥ सदिति प्रतीयमानस्यापि न निस्स्वरूपत्वं युक्तमिति वक्तुमिदमुक्तमिति द्रष्टव्यं। तथा चैतादृशमिथ्यात्वसाधने वियदादौ बाधः। शुक्तिरूप्यादौ त्वद्रीत्या साध्यवैकल्यं चेत्युक्तं भवति॥ आपणस्थेति॥ आभासस्य प्रसक्त्या अनाभासस्य निषेधांगीकारादिति भावः। तथा च स्वरूपेण निषेधप्रतियोगित्वं शुक्तिरूप्ये नास्तीति लक्षणस्यासंभव इति हृदयं॥ अत्यंतासत्त्वेति॥ वियदादेः स्वरूपेण निषेधांगीकार इत्यर्थः।

तदुपपादयति॥ प्रतिपन्नेत्यादिना॥ स्वरूपेणेति शेषः। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वमपि सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वपर्यंतमिति त्वन्मतमित्यन्वयः॥ सर्वत्रेति॥ स्वोपाधौ परोपाधौ चेत्यर्थः। ननु पटादेः स्वोपाधावेव त्रैकालिकनिषेधप्रतियोगित्वं न परोपाधावित्यत उक्तं॥ अन्यत्रासत्त्वेन संमतस्येति॥ मृदादिरूपे परोपाधावसत्त्वेन संमतस्येत्यर्थः॥ अन्यथेति॥ पटादेरन्यत्र परोपाधावसत्त्वस्यासंमतत्वे। अनत्र सत्त्वांगीकार इति यावत्॥ अन्यत्र तत्सत्त्वापातादिति। सत्त्वपदं तत्प्रतीतिव्यवहारयोरुपलक्षणं। तथाच पटादेः मृदाद्युपाधौ सत्त्वप्रतीतिव्यवहारयोरापातादित्यर्थः। तथाचायं पट एतत्तंतुनिष्ठात्यंताभावप्रतियोगीति मिथ्यात्वानुमाने एतत्तंतुभिन्ने तंत्वंतरे मृदादौ च सत्त्वापात्त्या अर्थांतरता स्यादिति भावः। पटादेरन्यत्र सत्त्वांगीकारे स्वोक्तिविरोधश्च स्यादित्याह॥ न हि तेषामिति॥ तेषां पटादीनां। अन्यत्र परोपाधौ॥ तथाचेति॥ प्रतिपन्नोपाधौ स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वस्य सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वपर्यंतत्वे सतीत्यर्थः। ननु सर्वत्र स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वं नात्यंतासत्त्वं। शशशृंगादौ असत्त्वस्यै तदन्यस्यैव सत्त्वादित्यत आह॥ न हीति॥ शशशृंगादीनामितोऽन्यदसत्त्वमस्तीत्याशंक्य निषेधति॥ न चेतादिना॥ तेषां शशशृंगादीनां। निरुपाख्यत्वं नाम उपाख्यायते अनेनेति व्युत्पत्त्या पदशक्त्यविषयत्वं वा प्रतीत्यविषयत्वं वा। नाद्य इत्याह॥ निरूपाख्यपदेनैवेति॥ तथाच निरुपाख्यपदशक्तिविषयतया तत्पदेनैव व्यवह्रियमाणत्वादित्यर्थः। तथाचासत्त्वेन संप्रतिपन्नस्याप्यसत्त्वं न स्यादिति भावः। द्वितीये दोषमाह। असत इति॥ असद्वैलक्षण्येति॥ अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वादिति भावः॥ सत्प्रतीति॥ तस्यासत्प्रतीतिप्रसक्त्यपेक्षत्वादिति भावः॥ असत्पदेति॥ प्रेक्षावत्कृतशब्दप्रयोगस्य शब्दार्थज्ञानपूर्वकत्वा दसत्पदप्रयोगार्थम् असज्ज्ञानस्यावश्यकत्वादित्यर्थः॥ क्वचिदपीति॥ स्वोपाधौ परोपाधौ चेत्यर्थ॥ जगतीति॥ शून्यवादिना जगतोसत्त्वमंगीकृतमिति तद्वैलक्षण्यं त्वया साधनीयं। तेन च निस्स्वरूपत्वमेवास्त्वंगीकृतमिति

तद्वैलक्षण्यमेव त्वया साधनीयं। न तु क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वमित्यंगीकृत्य तद्वैलक्षण्यं। तथात्वे सिद्धसाधनता स्यात्। तेनापि सांवृतसत्त्वांगीकारेणैतादृशासद्वैलक्षण्यस्यांगीकारादिति भावः॥ न प्रतीयेतेति॥ सत्त्वेन न प्रतीयेतेत्यर्थः। उक्ताप्रतीतिं प्रति आपाद्यभूतसत्त्वेनाप्रतीतिं प्रति। क्वचिदप्युपाधौ सत्त्वेनाप्रतीयमानत्वं शशशृंगादीनां कुत इत्युक्ते असत्त्वादित्येवं सत्त्वेनाप्रतीतिप्रयोजकीभूतमसत्त्वं सत्त्वेनाप्रतीयमानत्वादन्यदेव वाच्यं। अन्यथेदमेव चेदसत्त्वं स्यात्तर्ह्यसच्चेन्न प्रतीयेतेत्यापादनायोगः। असच्चेदित्यस्य सत्त्वेन न प्रतीयते चेदित्यर्थः। तथाच सत्त्वेन न प्रतीयते चेत्सत्त्वेन न प्रतीयेतेत्यापाद्यापादकयोरभेदः स्यादित्यर्थः॥ तद्विरुद्धस्यैवेति॥ सत्त्वासत्त्वयोः परस्परविरहरूपत्वस्यैवानुभवेन प्रतिपन्नोपाधौ त्रैकालिकनिषेध प्रतियोगित्वात्मकबाध्यत्वमेवासत्त्वं वक्तव्यं, नोक्तरूपं सत्त्वेनाप्रतीयमानत्वमित्यर्थः। तथाचेतोन्यदसत्त्वं नास्तीति भावः। अन्यथेत्यस्य विवरणमप्रतीति। सत्त्वासत्त्वयोः परस्परविरहरूपत्वस्य स्थितत्वाज्जगति अप्रतीत्यनुपाधिका सत्त्वाभावे अप्रतीत्यघटितासत्त्वानंगीकारे सत्त्वेनाप्रतीयमानत्वमित्यप्रतीतिघटितासत्त्वांगीकारे इति यावत्। ब्रह्मण्यपि असत्त्वविरहरूपं सत्त्वं नाम सत्त्वेन प्रतीतिरेव स्यान्न वस्तुतस्तत्र सत्त्वमस्तीति प्राप्तेरित्यर्थः। सत्त्वेनाप्रतीयमानत्वरूपासत्त्वलक्षणस्य शशशृंगेऽव्याप्तिरित्याह॥ येनेति॥ ज्ञानोत्पत्तेः सत्त्वप्रकारकज्ञानोत्पत्तेः। तथाच सत्त्वेनाप्रतीयमानत्वं नास्तीति भावः। ननु शशशृंगमस्तीति वाक्यान्न शशशृंगास्तित्वप्रकारकं ज्ञानमुत्पद्यते। शशशृंगं नास्तीत्ययोग्यतानिश्चयस्य तत्र प्रतिबंधकत्वादित्यत उक्तं॥ येन पुंसेति॥ अयोग्यतानिश्चयाभावदशायां योग्यताभ्रमेणेत्यर्थः। नन्वव्याप्तिः कुत्र दीयते। न तावच्छशशृंगे। तस्यास्तित्वप्रकारकारोपं प्रत्यधिष्ठानत्वेन सत्यत्वस्यावश्यकत्वेनासत्त्वाभावेनालक्ष्यत्वात्। न हि शून्यवादिमत इवाधिष्ठानम् अपि त्वन्मतेऽसत्। नाप्यस्तित्वे। तस्यारोप्यत्वेनासद्विलक्षणत्वरूपानिर्वाच्यत्वेनालक्ष्यत्वादतः कथमेतदित्यत आह। त्वन्मतेपि हीति॥ अधिष्ठानं शशशृंगं। न चाधिष्ठानस्यासत्त्वे शून्यवादापत्तिः। न हि त्वया भ्रममात्राधिष्ठानम् असदित्युच्यते। किं नाम तुच्छाधिकरणकभ्रमोऽयत्र तत्रैव तदधिष्ठानमसदित्यतो निर्वचनीयास्तित्वप्रकारकभ्रमाधिष्ठानमपि शशशृंगमसदेवेति तत्राव्याप्तिरेवेति सांप्रदायिकोऽर्थः। ननु शशशृंगादिशब्दान्नासतः प्रतीतिर्जायते, किं नाम विकल्पमात्रमेव। यथोक्तं। ''शब्दज्ञानानुपाती वस्तुशून्यो विकल्प'' इति॥ अतः सत्त्वेनाप्रतीयमानत्वमस्त्येवेति नाव्याप्तिरित्यत आह॥ वक्ष्यते चेति॥ विकल्पस्येच्छादि वज्ज्ञानान्यवृत्त्यंतरत्वं नास्तीति वक्ष्यत इत्यर्थः। तथाचाव्याप्तिः स्यादेवेति भावः॥ तद्धैक इति॥ असदासीदित्याहुरित्यनुवादमुखेनोक्तत्वेनासतः सत्त्वप्रतीत्या सत्त्वेनाप्रतीयमानत्वरूपासत्त्वलक्षणस्यासंभव इति भावः।

अन्योन्याश्रयादिति॥ अनिर्वाच्यत्वस्यासद्विलक्षणत्वरूपत्वेनासत्त्वज्ञाने तद्घटितानिर्वाच्यत्वज्ञानं तज्ज्ञाने च तदन्यत्वरूपासत्त्वज्ञानमित्यन्योन्याश्रयादित्यर्थः॥ लाघवेनेति॥ सार्वत्रिकत्रैकालिकनिषेधाप्रतियोगिरूपं यत्सत्तदन्यत्वमेवासत्त्वमस्तु, लाघवात्। न तु तत्रानिर्वाच्यभिन्नत्वमपि प्रवेश्यं गौरवादित्यर्थः। अस्तु वाऽनिर्वाच्यभिन्नत्वस्य लक्षणे प्रवेशः, तथाप्यसंभव इत्याह॥ अनिर्वाच्यस्यापीति॥ वियदादे रूप्यादेश्चेत्यर्थः। निषेधे निषेधांगीकारपक्षे। अनिर्वाच्यस्याप्यसत्त्वप्राप्त्याऽसतोऽनिर्वाच्यादन्यत्वाभावादसंभव इत्यर्थः। कुतोशक्यशंकमित्यतस्त्वन्मते शुक्तिरूप्ये ब्रह्मणि चातिव्याप्तेरित्याह॥ शुक्तीति॥ मिथ्याभूतं वियदादिकं रूप्यादिकं च॥ सस्वरूपमिति॥ असद्विलक्षणस्य व्यावहारिकस्य प्रातिभासिकस्य वा स्वरूपस्यांगीकारादिति

भावः॥ मिथ्याभूतस्यापीति॥ रूप्यादेरित्यर्थः। तथाचातिव्याप्तिरिति भावः। ननु रूप्यादौ वियदादौ च निस्स्वरूपत्वं नास्ति, किंतु स्वरूपमस्त्येव। न च मिथ्याभूतस्यापि स्वरूपेणैव त्रैकालिकनिषेध इति पक्षे निस्स्वरूपत्वं दुर्वारमित्युक्तमिति वाच्यं। मिथ्याभूतं स्वरूपमंगीकृत्यैव त्रैकालिकनिषेधांगीकारेण मिथ्याभूतस्वरूपस्य स्वरूपेण त्रैकालिकनिषेधेन सामानाधिकरण्यांगीकारात्। न च विरोधः। मिथ्यात्वादेवाविरोधादित्याशंक्य निषेधति॥ न चेति॥ स्वदेशकालयोरिति॥ वियदादिरूपप्रतियोग्याधार भूतदेशकालयोरित्यर्थः॥ तत्स्वरूपेति॥ प्रतियोगिस्वरूपसहिष्णोस्तदनुपमर्दकस्येत्यर्थः॥ तत्स्वरूपेति॥ वियदादिस्वरूपप्रतिषेधत्वस्येत्यर्थः। अयं भावः। लोके अत्यंताभावतत्प्रतियोगिनोर्विरोधेनाभावस्य प्रतियोगि स्वरूपासहिष्णुत्वदर्शनात्तत्स्वरूपस्य कथं तत्प्रतिषेधेन सामानाधिकरण्यं वक्तुं शक्यं। तथात्वे प्रतियोगिस्वरूपसमानाधिकरणस्य तदत्यंताभावत्वं पारिभाषिकं स्यात्। तथा च पारिभाषिकात्यंता भावप्रतियोगित्वेऽपि स्वरूपेण वास्तवात्यंताभावप्रतियोगित्वं न सिद्धचेदित्यतस्तत्सिद्धचर्थं तत्र रजतस्वरूपं नास्तीत्यंगीकार्यं। एवं चासत्त्वापत्तिर्दुर्वारेति भावः॥ अन्यथेति॥ मिथ्यात्वादेव विरोधाभावमंगीकृत्य निषेधाधिकरणेऽपि प्रतियोगिनः सत्त्वांगीकार इत्यर्थः। ननु मृदादावपि प्रातिभासिकं पटस्वरूपमस्त्येवेत्यत उक्तं॥ व्यावहारिकेति॥ न च विरोधः। पटस्य मिथ्यात्वादेवाविरोधोपपत्तेरिति भावः। निषेधाधिकरणेपि प्रतियोगिनः सत्त्वमंगीकृत्य तयोः सर्वजनसिद्धदैशिकविरोधानंगीकारे प्रतियोगिनः प्रागभावेनापि समानकालीनत्वापत्त्या कालिको विरोधोऽपि न स्यात्। मिथ्यात्वादेवाविरोधस्य तत्रापि वक्तुं शक्यत्वादित्याह॥ प्रागभावादीति॥ किं च यदि प्रपंचे रूप्यादौ च स्वरूपेण त्रैकालिकनिषेधसामानाधिकरण्याविरोधिस्वरूपं किंचिदंगीक्रियते तर्हि तुच्छेऽपि एतादृशस्वरूपं स्वात्यंताभावसामानाधिकरण्याविरोधिरूपं किंचिदंगीक्रियतां तथा च निस्स्वरूपत्वोक्त्ययोगः। विरोधश्च मिथ्यात्वादेव समाधातुं शक्यः। यदि प्रपंचे अपरोक्षतः प्रतीत्यन्यथानुपपत्त्या किंचित्स्वरूपमंगीकार्यमित्युच्यते तर्हि तुच्छेऽपि परोक्षतः शब्दादिना प्रतीतिसंभवात्तदन्यथानुपपत्त्या किंचित्स्वरूपमंगीक्रियतां। तथाचासंभव इत्याह॥ तुच्छेऽपीति॥ तथाचासंभव इति भावः॥ तस्मादिति॥ प्रकारांतरस्यासंभवादिति भावः। सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वमत्यंता सत्त्वमित्यनयोरेकार्थत्वादिदमेवासत्त्वलक्षणं वाच्यमित्याशयेनोपपादयति॥ तत्र तदानीमित्यादिना॥ तत्र तदा असदिति यथा देशविशेषे कालविशेषे च निषेध प्रतियोगित्वं प्रतीयते एवमत्यंतासदित्यनेनापि अत्यंतं सर्वस्मिन्देशे सर्वस्मिन्काले चासन्निषेधप्रतियोगीतिप्रतीतेरित्यर्थः। तथाच सर्वत्र त्रैकालिकनिषेधप्रति योगित्वस्यैवात्यंतासत्त्वात्प्रपंचस्य स्वरूपेण त्रैकालिकनिषेधे तुच्छवदत्यंतासत्त्वं दुर्वारमिति तात्पर्यम्।

ननु प्रपंचस्य न तुच्छसाम्यं। प्रपंचनिषेधस्य मिथ्याभूतप्रपंचप्रतियोगिकत्वात्। तुच्छसंबंधित्रैकालिकनिषेधस्य निष्प्रतियोगिकत्वादिति तन्निषेधयोर्वैलक्षण्यादित्याशंक्य निषेधति॥ न चेति॥ तदभावः प्रपंच निषेधः। इति वा वैषम्यं वक्तुं न च शक्यमित्यन्वयः। कुत इत्यत उक्तं॥ मिथ्याभूतस्येत्यादि॥ मिथ्याभूतस्यापि स्वरूपेण निषेध इति पक्षे तदभावोऽपि तुच्छाभावन्निष्प्रतियोगिक एव न सप्रतियोगिकः। प्रतियोगिस्वरूपस्यैवाभावादिति भावः। ननु तथापि प्रपंचतुच्छयोः प्रकारांतरेण वैषम्यमस्ति। मिथ्याभूतस्य प्रपंचस्य सदा सर्वत्र सद्वैलक्षण्यमात्रमस्ति न स्वरूपेण प्रतिषेधः। असद्विलक्षणस्वरूपांगीकारात्। तुच्छस्य तु स्वरूपेणैव प्रतिषेध इति वैषम्यादित्याशंक्य निषेधति॥ मिथ्याभूतस्येति॥ सदा सर्वत्रेति॥ सद्वैलक्षण्यमात्रमिति

न स्वरूपेणैव प्रतिषेध इत्येव मात्रशब्दार्थो न त्वसद्वैलक्षण्यं नास्तीति। तस्यांगीकारेण मात्रशब्दव्यवच्छेद्यत्वाभावादिति द्रष्टव्यं। इति वा वैषम्यं वक्तुं न च युक्तं। कुत इत्याशंकायां मिथ्याभूतस्यापि स्वरूपेणैव निषेध इति पक्ष इत्येतदत्रापि योज्यं। तथाच मिथ्याभूतस्यापि स्वरूपेणैव निषेध इति पक्षे प्रपंचस्य न सदा सर्वत्र सद्वैलक्षण्यमात्रं। स्वरूपेणैव प्रतिषेधादित्यर्थः। तथाच तुच्छसाम्यं दुर्वारमिति भावः।

इदानीं सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वमेवासत्त्वमित्युक्तासत्त्वलक्षणस्यासंभवमाशंकते॥ अथ मतमिति॥ असत्त्वादेव स्वस्यैवाभावेन सकलधर्मशून्यत्वादेव॥ आत्यतिकेति॥ सर्वत्र त्रैकालिकेत्यर्थः। तथाचासदात्यंतिक निषेधप्रतियोगित्वरूपधर्मशून्यं असत्त्वादित्यनुमानमुक्तं। तथाचोक्तासत्त्वलक्षणस्यासंभव इति भावः॥ असत्त्वस्येति॥ हेतूकृतस्येत्यर्थः॥ विरुद्धत्वादिति॥ असत् आत्यंतिकनिषेधप्रतियोगित्वरहितं असत्त्वात्। आत्यंतिकनिषेध प्रतियोगित्वादिति साधने हेतोर्विरुद्धत्वादित्यर्थः। साध्याभावव्याप्तत्वरूपं लक्षणं चाभेदेऽपि व्याप्यव्यापकभावांगीकारेणोपपादनीयं। अन्यथा शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वमुपाधिः स्यात्। एवं विरुद्धत्वमुक्त्वाऽप्रयोजकतां चाह। असत इत्यादिना॥ नन्वसतो निर्धर्मकत्वान्नात्यंतिका निषेधप्रतियोगित्वरूपधर्मोंऽगीकार्य इत्यत आह॥ असत्त्ववदिति॥ त्वयोच्यमानेति॥ असतोऽसत्त्वादेवात्यंतिक निषेधप्रतियोगितापि नेति त्वयोच्यमानेत्यर्थः। नन्वसत्यसद्वैलक्षण्यादिधर्माणामभावरूपाणां सत्त्वेऽपि भावरूप आत्यंतिकनिषेधप्रतियोगित्वरूपो धर्मो नांगीक्रियत इति चेत्तत्राह॥ परोक्षेति॥ नन्वसत्त्वादीनां धर्माणां धर्मिसत्तानिरपेक्षत्वादसति धर्मिणं विनाप्यवस्थानमस्तु। आत्यंतिकनिषेधप्रतियोगित्वस्य तु धर्मिसत्तासापेक्षत्वात् कथमसत्युपपत्तिरित्यत आह॥ प्रतियोगित्वस्येति॥ अत्यंताभावप्रतियोगित्वस्येत्यर्थः। रूपादिवदिति व्यतिरेक दृष्टांतः॥ निरपेक्षत्वादिति॥ प्रत्युत धर्मिणः सत्त्वे तत्रात्यंताभावप्रतियोगित्वस्यैवासंभवादिति भावः। प्रतियोगित्वस्य धर्मिसत्तानिरपेक्षत्वे दृष्टांतः॥ प्रागभावादीति॥ असतः अविद्यमानस्य॥ तत्प्रतियोगित्वेति॥ विद्यमानप्रागभावप्रतियोगित्वेत्यर्थः। नन्वविद्यमानस्यापि घटादेः प्रागभावप्रतियोगित्वं युक्तं। उत्तरकाले घटादेः सत्त्वात्। अत्यंताभावप्रतियोगिनस्तु कदाप्यभावेन वैषम्यादित्यत आह॥ कालांतर इति॥ इदानीमिति॥ घटोत्पत्तेः प्राक्प्रागभावप्रतियोगी घट इति निरूपणसमय इत्यर्थः। ननु पूर्वोक्ता दृष्टांता न युक्ताः। तथाहि। प्रागभावादिदशायामित्येतदयुक्तं। प्रागभाव एव घटप्रतियोगिकत्वमंगीक्रियते न तु घटे अविद्यमानतादशायां तत्प्रतियोगित्वं। तथा सद्वैलक्षण्यवदित्यप्ययुक्तं। सत्येवासद्वैलक्षण्यांगीकारेणासति सद्वैलक्षण्यानंगीकारात्। तथा प्रतियोगित्वाभावोऽपि नासति। किं तु प्रतियोगित्वाभावे असदाश्रयकत्वमेवांगीकृतं। तथा असज्ज्ञानव्यवहारयोरेवासद्विषयकत्वं। न त्वसति तद्विषयत्वं स्वीकृतं। तथा असद्वैलक्षण्य एवासत्प्रतियोगिकत्वं। न त्वसद्वैलक्षण्यं प्रत्यसतः प्रतियोगित्वं स्कीकृतमित्यत आह॥ शिष्टमिति॥ प्रागभावादेर्घटादिप्रतियोगिकत्वे घटादेरविद्यमानतादशायां तत्प्रतियोगित्वमवर्जनीयमेव। तयोः समानसंवित्संवेद्य त्वादित्यादिकं वक्ष्यत इत्यर्थः।

पुनरप्युक्तासत्त्वलक्षणस्यासंभवमाशंक्य निराकरोति॥ एतेनेति॥ मकरंदो नाम मायावादग्रंथविशेषः। प्रतियोग्यधिकरणसंसर्गज्ञानं प्रसक्तिः। तथाचासन्न त्रैकालिकनिषेधप्रतियोगि अप्रसक्तत्वादित्यनुमानं द्रष्टव्यं।

असतः प्रसक्त्यनंगीकारे बाधकतर्कसद्भावात्प्रसक्तिरंगीकार्या ततश्च स्वरूपासिद्धिरित्याह॥ असतोऽप्रसक्त्येति॥ तथाच प्रतियोगित्वेनासत्प्रसक्तिरंगीकार्येत्याशयः॥ असति चेति॥ असति सत्त्वं नास्तीति सद्वैलक्षण्य सिद्धेरधिकरणत्वेनाऽसत्प्रसक्तिरपेक्षितेत्यर्थः। एतदेवोपपादयति॥ तस्येति॥ प्रतीतिः प्रसक्तिः। असद्वैलक्षण्यसिद्धेः प्रतियोगित्वेनासत्प्रसक्तिसापेक्षत्वादसति सत्त्वं नास्तीति सद्वैलक्षण्यसिद्धेरधिकरणत्वेनासत्प्रतीतिसापेक्षत्वादित्यर्थः। असतः प्रसक्त्यभावे जगदादावसद्वैलक्षण्यादिकं न सिद्ध्येदिति बाधकतर्के आपादकासिद्धिमाशंकते॥ ननु तत्रेति॥ असद्वैलक्षण्यादिस्थल इत्यर्थः। शशविषाणमस्तीति शब्दाभासेन बुद्धिपूर्वकारोपेण वेत्यर्थः। [बाधकतर्केऽप्रयोजकतां चाह॥ परार्थेनेत्यादि॥ अनिषेधेऽपि। प्रत्यक्षेणेत्याद्यन्वयः। नासदासीदिति श्रौतनिषेधसंग्रहायोक्तं॥ शब्देनेति॥ अप्रसक्तस्यापि शब्देन निषेधः कुतो न युक्त इत्यत उक्तं॥ परार्थेनेति॥ शब्दस्य परार्थत्वात्परस्य च प्रतियोगिप्रसक्त्यभावे शब्दादिना तन्निषेधकरणे शब्दस्य तं प्रत्यबोधकत्वप्राप्त्या परस्य प्रवृत्तिनिवृत्त्योरयोगादिति भावः। यथोक्तं। संदिग्धविपर्यस्तान्यतरं प्रत्येव शब्दस्याऽर्थवत्त्वादिति॥ अप्रसक्तस्यैवेति॥ शब्दाभासादिना बुद्धिपूर्वकारोपेण वेति वर्तते। प्रत्यक्षेण निषेधे एतावती सामग्री अपेक्षितेत्याह॥ शब्देत्यादि॥ ब्रह्म जगद्वाऽसदित्येवं शब्दाभासजन्यानुभवमूलके प्रतियोगिस्मृत्यादिके सति चक्षुराद्युन्मीलनानंतरं झडिति अप्रसक्तस्यैव निषेधानुभवादित्यर्थः। प्रतियोगिस्मृति मात्रस्य प्रतियोग्यधिकरणसंसर्गज्ञानरूपत्वाभावान्न स्मृत्या प्रसक्तिर्वक्तुं शक्येति हृदयं। प्रत्यक्षेणेत्युक्त्या नासदासीदिति श्रौतो निषेधो व्यावर्तितः। स्वप्रकाशे ब्रह्मणि असद्वैलक्षण्यं प्रत्यक्षेणैवास्ति। स्फुरणमित्यादिना प्रतीतेः। जगति तु स्पष्टमेवाऽसद्वैलक्षण्यं प्रत्यक्षसिद्धं। अप्रत्यक्षेप्यऽसति सद्वैलक्षण्यप्रतियोगित्वाभावस्य च वायौ रूपाभाववत् प्रत्यक्षत्वसंभवादिति भावः।

अन्यथेति॥ शब्दाभासादिना प्रसक्तिर्वा प्रसक्तस्यैव वा प्रत्यक्षेण निषेध इत्यनंगीकारे इत्यर्थः॥ न सिध्येदिति॥ तथाच तत्रांगुल्यग्रे करिशतमिति शब्दाभासेन प्रतियोग्यधिकरणसंसर्गज्ञानरूपा प्रसक्तिर्वा शब्दाभासादिजन्यानुभवजन्यसंस्कारत्वरूपो हेतुः सिद्ध इति भावः॥ प्रकृतेऽपीति॥ अप्रसक्तेर्निषेधाप्रति योगित्वमूलकस्मृत्यादिके सति प्रत्यक्षेणैवाप्रसक्तस्यैवानिषेध इत्यंगीकार्यमिति हेतुबाधकतर्कस्यायुक्तत्वमिति प्रकृतेऽपीत्यर्थः। तदुपपादयति। शशशृंगमिति॥ यथा अनुभवसिद्धायाः अंगुल्यग्रे करिशतं नास्तीति प्रतीतेः दुरपह्नवत्वात् तदुपपादकं शब्दाभासादिना प्रतियोग्यधिकरणसंसर्गज्ञानरूपप्रसक्तिरंगीकार्येति भावः। तथा चाऽसतोऽप्रसक्तेः निषेधाप्रतियोगित्वमित्यनुमाने स्वरूपासिद्धिरनेनैवोक्तेति ज्ञातव्यं। प्रत्यक्षेणैव वाऽप्रसक्तस्यैव वा प्रतिषेध इति पक्षे अनुमानेऽप्रयोजकतेति ज्ञातव्यं॥ अबाधितेति॥ निर्बाधसाक्षिसिद्धेत्यर्थः। असतोऽपि शब्दाभासादिना प्रसक्तिसद्भावात् निषेधाप्रतियोगित्वमित्युक्तं तदयुक्तं। शशशृंगं नास्तीत्यत्र यद्वास्तवमसत् शृंगं तत्र निषिध्यते। यन्निषिध्यते तन्नासत्। किं त्वनिर्वाच्यमेव। तथाच नासतो निषेधप्रतियोगित्वमित्यसत्त्वलक्षणस्यासंभव इत्याशंक्य निराकरोति॥ नचेति॥ शृंगस्य शशशृंगस्य] बाधकतर्के आपादकासिद्धिमुक्त्वा असतः प्रसक्त्यभावेऽपि जगदादावसद्वैलक्षण्यसिद्धिः प्रत्यक्षेणैव भविष्यतीत्यप्रयोजकतां चाह॥ परार्थेनेत्यादिना॥ नासदासीदित्यनेन असत्तदानीं प्रलये नासीदित्येवंशब्देन यत्रासतः सत्त्वं निषिध्यते तत्रासतः प्रसक्तिरपेक्षिता। कुत इति चेत्। शब्दस्य परबोधनार्थं प्रयुज्यमानत्वात्। परस्य प्रतियोगिप्रसक्त्यभावेऽपि शब्देन तन्निषेधे शब्दस्य तं प्रत्यबोधकत्वापातेन परस्य प्रवृत्तिनिवृत्त्योरयोगात्। यथोक्तं।

''संदिग्धविपर्यस्तान्यतरं प्रत्येव शब्दस्यार्थवत्त्वा'' दिति। तथाच यत्र शब्देन निषेधस्तत्राप्रसक्तस्य निषेधायोगेन शब्दाभासेनाहार्यारोपेण वाऽसत्प्रतीतिसापेक्षत्वेऽपि यत्र शब्दाभासादिमूलकानुभवजन्यसंस्कारमूलक प्रतियोगिस्मरणे जाते चक्षुराद्युन्मीलनानंतरमसत्प्रसक्त्यभावेऽपि झडिति जगदादावसद्वैलक्षण्यसिद्धिः तत्र प्रत्यक्षेणैव भविष्यति। भूतले घटाभावज्ञानवत्। न च प्रतियोगिस्मरणमेव तत्र प्रसक्तिरिति वाच्यं। स्मरणस्य प्रतियोगिज्ञानरूपत्वेपि प्रतियोग्यधिकरणसंसर्गज्ञानरूपप्रसक्तित्वाभावादिति भावः। प्रत्यक्षेणाप्रसक्तस्यैव निषेधानंगीकारे बाधकमाह॥ अन्यथेति॥ न ह्यं गुल्यग्रे हस्तिशतं प्रसक्तमिति भावः। यदि तत्रांगुल्यग्रे हस्तिशतमिति शब्दाभासजन्यानुभवजनितसंस्कारमूलके प्रतियोगिस्मरणे सति अप्रसक्तस्यैव निषेध इति ब्रूषे तर्हि जगदादावप्येवमेव प्रतियोगिस्मरणे सति असत्प्रसक्त्यभावेऽपि तन्निषेधरूपासद्वैलक्षण्यस्य प्रत्यक्षेणैव सिद्धिसंभवादसतः प्रसक्त्यभावे जगदादावसद्वैलक्षण्यं न सिद्ध्येदिति तर्के अप्रयोजकतेति भावः॥ प्रकृतेऽपीति॥ असतोऽप्रसक्तेर्निषेधाप्रतियोगित्वमिति प्रकृते मकरंदोक्तानुमानेऽप्यप्रयोजकत्वं समानमित्यर्थः। अत्रापि असतोऽप्रसक्तत्वेपि शब्दाभासजन्यानुभवजनितसंस्कार मूलकाऽसद्रूपप्रतियोगिस्मरणानंतरं प्रत्यक्षेणैव निषेधप्रतियोगित्वसिद्धिसंभवेनाप्रयोजकत्वसाम्यादित्यर्थः। ननु असत्प्रतियोगिको निषेधो न प्रत्यक्षसिद्ध इति चेत्तत्राह॥ शशशृंगं नास्तीत्यबाधितप्रतीतेरिति॥ अबाधित प्रत्यक्षप्रतीतेरनुभवसिद्धत्वादित्यर्थः।

यदुक्तं – असतोऽपि निषेधप्रतियोगित्वं शशशृंगं नास्तीत्यबाधितप्रत्यक्षप्रतीति सिद्धमिति तन्न। मन्मतेऽसद्विविधमस्ति। वास्तवासदेकं, अनिर्वाच्यभूतमाभासासदपरं। तत्र शशशृंगं नास्तीति निषिध्यमानं यच्छृंगं तन्न वास्तवासत्। किं त्वनिर्वाच्यभूताभासासदेव। तथाच त्रैकालिकनिषेधप्रतियोगित्वरूपासत्त्वलक्षणस्य वास्तवेऽनाभासरूपे असत्यसंभव इत्याशयेनाशंक्य निराकरोति॥ न चेत्यादिना॥ अनिर्वाच्यस्यैवेति॥ आभासासद्रूपस्य शशशृंगस्येत्यर्थः। न वास्तवासद्भूतशृंगस्येत्येवकारार्थः। तथाचाऽसत्त्वलक्षणस्यासंभव इति भावः। कुतो नेति चेत्। अत्र प्रष्टव्यं। अनिर्वाच्यस्यैव शशशृंगस्य निषेध इत्येवं तार्किकरीत्योच्यते त्वद्रीत्या वा। नाद्य इत्याह॥ अनाभासस्यैवेति॥ अन्यत्र विद्यमानस्य वास्तवस्य प्रधानभूतस्यैवेत्यर्थः। तार्किकमते अनिर्वाच्यान्यस्यैवेत्यन्वयः। तथाचानिर्वाच्यान्यद यदनाभासभूतं वास्तवासद्भूतं शशशृंगं तस्यैव निषेद्धव्यत्वादित्यर्थः। नापि द्वितीय इत्याह॥ आभासस्येति॥ अनिर्वाच्यान्यस्य आभासभूता निर्वाच्यान्यस्यानाभासस्य वास्तवासद्भूतशृंगस्यैवेत्यर्थः। तथाचासत एव निषेधप्रतियोगित्वान्न लक्षणस्यासंभव इति भावः। यत् आभासासत् अनिर्वाच्यं तदेव निषेध्यं यदनाभासासद्वास्तवं तन्न निषेध्यमिति द्विविधासत्कल्पने दूषणमाह॥ जगदादाविति॥ अनिर्वाच्यभूतं यदाऽभासासत्तद्वैलक्षण्यमित्यर्थः। तथाच शून्यवादिनो नानिष्टमिति भावः। असत आभासत्वं चानिर्वाच्यत्वेनारोपितत्वादिति ज्ञातव्यं। अनाभासासत् वास्तवासत्। तथाचैवं द्विविधासत्कल्पने अतिप्रसंगाद्वास्तवासत एव निषेद्धव्यत्वेऽसत्त्वलक्षणस्यासंभवो नास्तीति सिद्धमिति द्रष्टव्यं।

इदानीमसत्त्वलक्षणस्यातिव्याप्तिमाशंकते॥ नन्विति॥ सदा सर्वत्राविद्यमानत्वमिति॥ सर्वत्र त्रैकालिकनिषेधप्रतियोगित्वमित्यर्थः॥ अनाश्रितेति॥ समवायेन कुत्राप्यनाश्रितत्वात्सदा सर्वत्र तदत्यंताभाव एवास्तीति भावः। नन्वात्मा न मिथ्या तदत्यंताभावस्य केवलान्वयित्वेनात्मादौ त्रैकालिकनिषेधप्रतियोगित्वेऽपि प्रतिपन्नोपाधेरभावेनोक्तमिथ्यात्वलक्षणाभावान्नातिव्याप्तिरित्यत आह॥ तस्यापीति॥ भूमरूपात्मनः प्रतिपन्ने

उपाधौ अधरादिप्रदेशरूपे। ननु नात्मनो मिथ्यात्वं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपलक्षणाभावात्। न चोक्तरीत्या श्रुतिप्रतिपन्नोपाधौ कालत्रयेऽप्यभावादित्युक्तमिति वाच्यं। सदा सर्वत्रात्मेत्यबाधितप्रतीत्या स्वोचिते सर्वस्मिन्देशे स्वोचिते सर्वस्मिन्काले च सत्त्वेन सार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्व रूपलक्षणाभावात्। किंच प्रतिपन्नोपाधिरपि तस्य नास्ति। न च श्रुतिप्रतिपन्नोपाधिरस्तीति वाच्यं। कुंडबदरादाविवोर्ध्वाधरीभावेन प्रतिपन्नोपाधेर्विवक्षितत्वात्। आत्मनश्च विभुत्वेन श्रुतिप्रतिपन्नोपाधौ ऊर्ध्वाधरीभावेनाभावात्। प्रत्युताधरादेर्ब्रह्मण्यारोपि तत्व एव श्रुतेस्तात्पर्याच्च। ननूर्ध्वाधरीभावहीनश्चेदात्मा स्वोचिते देशे कथमस्तीति चेत्सामान्यादिवदिति ब्रूमः। न हि घटे घटत्वमूर्ध्वाधरीभावेनास्ति। अयुतसिद्धिस्थले ऊर्ध्वाधरीभावाभावात्। तथाचोर्ध्वाधरीभावहीनमपि सामान्यं यथा स्वदेशादावस्ति एवमात्माप्यूर्ध्वा धरीभावहीनोऽपि स्वदेशकालयोरस्तीतिमिथ्यात्वलक्षणाभावान्नाति व्याप्तिरिति यद्युच्यते तर्हि तत एव सदा सर्वत्रात्मेति सार्वदैशिकसार्वकालिकसत्त्वावगाह्यबाधितप्रतीतिबलादेव स्वोचितदेशकालयोः सत्त्वावगमात्सार्वदैशिक सार्वकालिकनिषेधप्रतियोगित्वरूपासत्त्वमप्यंगीकर्तुमशक्यमिति नास्मदुक्तासत्त्वलक्षणस्यात्मन्यतिव्याप्तिरित्याह॥ अथेत्यादिना॥ नन्वथाप्यसत्त्वलक्षणस्य देशकालयोरतिव्याप्तिः। आत्माश्रयप्रसंगेन देशकालयोर्देशकालयोरभावेन सार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वसद्भावादित्यत आह॥ देशकालावपीति॥ देशः सर्वदा सर्वत्रास्ति कालः सदा सर्वत्रास्तीत्यबाधितप्रतीत्या देशकालयोरपि देशकालयोः सद्भावावगमादित्यर्थः। तथाच सार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वाभावान्नातिव्याप्तिरिति भावः। नन्वेवं तर्ह्यात्माश्रय इत्यत आह॥ प्रमेयत्वेति॥ प्रमेयत्वं प्रमेयत्वेऽस्ति, अभिधेयत्वे चास्ति। एवमभिधेयत्वमभिधेयत्वेऽस्ति प्रमेयत्वे चास्तीत्येवं स्ववृत्तित्वमन्योन्यवृत्तित्वं चास्तीत्यर्थः॥ दिक्कालेति॥ तदत्यंताभावस्य सर्वत्र सत्त्वात् दिगत्यंताभावो दिगत्यंताभावे कालात्यंताभावे चास्ति। एवं कालात्यंताभावोऽपि कालात्यंताभावे दिगत्यंताभावे चास्तीत्यर्थः। तथाचात्माश्रयः प्रामाणिक इति भावः॥ अन्यथेति॥ स्ववृत्तित्वान्योन्यवृत्तित्वयोरभाव इत्यर्थः॥ प्रातिभासिकत्वमिति॥ तथाहि। देशकालयोः पारमार्थिकत्वायोगा ल्लौकिकप्रति पन्नोपाधेरभावेन तत्र निषेधप्रतियोगित्वासंभवात्। तथा ब्रह्मणोऽप्यहमिति स्वप्रकाशतया सिद्धस्य शुक्तिवदध्यस्तभूत देशकालसंभिन्नतया प्रतीयमानत्वाभावेन प्रतिपन्नोपाधित्वासंभवेन तत्रापि निषेधप्रतियोगित्वासंभवेन व्यावहारिकत्वायोगात्। प्रतीयमानत्वेन चासत्त्वायोगात्। देशः सदा सर्वत्रास्ति कालः सदा सर्वत्रास्तीत्यबाधितप्रतीतेर पलपितुमशक्यतया तयोः। स्ववृत्तित्वाद्यनंगीकारे देशकालयोर्देशकालौ प्रति भ्रांतिप्रतिपन्नोपाधित्वप्राप्त्या तत्र निषेध प्रतियोगिनोर्देशकालयो रूप्यवत्प्रातिभासिकत्वमेव परिशेषात्स्यादित्यर्थः। तथाच देशकालयोः स्ववृत्तित्वादिकेंऽगीकार्ये सार्वदैशिकसार्वकालिकनिषेधप्रतियोगित्वाभावान्नासत्त्वलक्षणस्य देशकालयोरतिव्याप्तिरिति भावः। तथाचासत्त्वलक्षणस्य देशकालयोरपि न कश्चिदतिव्याप्तिरूप दोष इति सिद्धमिति ज्ञातव्यं। निषेधप्रतियोगित्वं स्वरूपेणेति पक्षे आपादितमत्यंतासत्त्वमुपसंहरति॥ तस्मादिति॥ स्वोक्तमुपपादनं वियत्पादीयानुव्याख्यानसंमत्या द्रढयति॥ तदुक्तमिति॥ अनेन ''काप्युक्तस्योपपादना'' दित्युक्तं प्रदर्शितं भवति।

अन्योन्याश्रयादिति॥ अबाध्यत्वरूपपारमार्थिकत्वज्ञाने सति तद्घटितबाध्यत्वरूपमिथ्यात्वज्ञानं, बाध्यत्वरूपमिथ्यात्वज्ञाने च सति तन्निरूप्याबाध्यत्वरूपपारमार्थिकत्वज्ञानमित्यन्योन्याश्रय इत्यर्थः॥

स्वरूपेणैवेति॥ तथाच पारमार्थिकत्वाकारेण निषेधाभावात् पारमार्थिकत्वाकारेण निषेधप्रतियोगित्व रूपमिथ्यात्वलक्षणस्यासंभव इत्याशयः॥ सत्त्वेनेति॥ पारमार्थिकत्वाकारेणेत्यर्थः। प्रकारांतरेणाप्यसंभवमाह॥ रूप्यवदिति॥ अयमर्थः। रूप्यं पारमार्थिकत्वाकारेण कुतो निषिध्यते? स्वरूपेणैव कुतो न निषिध्यत इति पृष्टे स्वरूपेण निषेधेऽसत्त्वापत्त्या अपरोक्षप्रवृत्तेरनुपपत्त्याऽसद्विलक्षणस्वरूपस्य धीकाले वर्तमानतया तत्स्वरूपमंगीकृत्य तत्र पारमार्थिकत्वमेव निषिध्यते सविशेषणे हीति न्यायादिति यदि ब्रूषे तर्हि पारमार्थिकत्वमपि रूप्ये निषेद्धुं न युक्तं। तस्यापि रूप्ये अपरोक्षतः प्रतीयमानत्वेन धीकाले सत्त्वात्। अन्यथा प्रवृत्त्ययोगात्। तथाचासंभव इति। ननु रूप्यगतपारमार्थिकत्वस्याप्यपरोक्षतः प्रतीत्यन्यथानुपपत्त्या स्वरूपेण निषेधायोगात्तदपि पारमार्थिकत्वाकारेणैव निषिद्धयत इति चेत्तत्राह॥ पारमार्थिकत्वस्येति॥ रूप्यगतपारमार्थिकत्वस्यापि पारमार्थिकत्वेन निषेधे तस्याप्यपरोक्षतः प्रतीयमानत्वेन स्वरूपेण निषेधायोगात्तस्यापि पुनः पारमार्थिकत्वाकारेण निषेधेऽनवस्थेति भावः। ब्रह्मण्यतिव्याप्तिं चाह॥ सुखादीत्यादिना॥ ननु ब्रह्मणःपारमार्थिकत्वात्कथं पारमार्थिकत्वाकारेण निषेध इत्यत उक्तं॥ निर्धर्मकत्वेनेति। ननु प्रतिपन्नोपाधाविति लक्षणे विशेषणदानात् तस्य च ब्रह्मण्यभावात् नातिव्याप्तिरिति चेन्न। उपाधेः प्रतिपन्नत्वं प्रत्यक्षेण श्रुत्या वा वाच्यम्। तादृशोपाधिद्वयमपि अहमर्थाधरादिरूपं ब्रह्मण्यस्तीत्युक्तम् मयीत्यादि॥ मयीत्यनेनाहमर्थस्याधिष्ठानत्वं प्रत्यक्षेण प्रतीयत इत्यर्थः। ननु मदंशस्य सुखानुभवं प्रत्येवाधिष्ठानत्वं न ब्रह्म प्रतीत्यत आह॥ सुखादीति॥ ननु न ब्रह्मण्यतिव्याप्तिः। प्रतिपन्नोपाधिशब्देनाध्यस्तं प्रति यदधिष्ठानं तेदव विवक्षितं। न च ब्रह्माधिष्ठानभूतोऽमदंशोध रादिश्चाध्यस्ताधिष्ठानं। ब्रह्मणोऽनध्यस्तत्वात्। एवं चाध्यस्ताधिष्ठानतया प्रतिपन्नोपाधेरभावेन तद्घटितलक्षणस्य नातिव्याप्तिरित्यत आह॥ प्रतिपन्नेति॥ आत्माश्रयादिति॥ अध्यस्ताधिष्ठानत्वेन प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपमिथ्यात्वलक्षणस्याध्यस्तत्वरूपमिथ्यात्वघटितत्वेनात्माश्रय इत्यर्थः। लक्षणमादौ ज्ञात्वा तेन लक्ष्यं पश्चात्प्रतिपत्तव्यं। लक्षणमपि चेल्लक्ष्यघटितं स्यात्तदा स्वापेक्षया स्वस्य पूर्वं ज्ञातव्यत्वप्राप्त्या ज्ञप्तावात्माश्रय इति भावः। एवमेवैवंजातीयके सर्वत्र द्रष्टव्यं। ननु असच्चिद्भिन्नत्वमेवाध्यस्तत्वं विवक्षितं। न मिथ्यात्वं। येन पर्यायत्वप्राप्त्या आत्माश्रयः स्यादिति चेत्तर्हि लाघवान्निरुक्ताध्यस्तत्वमेव मिथ्यात्वमस्तु। ॐमिति चेत्तर्हि प्रतिपन्नोपाधावित्यादि शेषवैयर्थ्यं स्यादित्याह॥ शेषेति॥ न चासच्चिद्भिन्नत्वरूपाध्यस्तत्वमेव मिथ्यात्वमस्तु शिष्टं त्यज्यत इति वाच्यं। तादृशमिथ्यात्वस्य जगत्यस्माभि रंगीकारेण सिद्धसाधनापत्तेरित्याशयः।

ननु प्रतिपन्नोपाधौ पारमार्थिकत्वाकारेण त्रैकालिकनिषेधप्रतियोगित्वलक्षणस्य न ब्रह्मण्यतिव्याप्तिस्तस्य प्रतिपन्नोपाधेरेवाभावात्। न च मदंशोऽधरादिश्चतथाभूतोस्तीति वाच्यं। स एवाधस्तादित्यादि श्रुत्याम दंशाधरादेः समस्तस्यापि ब्रह्मण्यारोपितत्वावगमेन तस्यैव सर्वारोपाधिष्ठानतया मदंशादेः ब्रह्म प्रत्यधिष्ठानत्वायोगादित्यस्वरसादेतादृशमिथ्यात्वस्य जगतः सद्रूपत्वाविरोधित्वात्तत्साधने अर्थांतरता स्यादित्याह॥ ब्रह्मण इत्यादिना॥ यथा निर्धर्मकत्वेन ब्रह्मणि पारमार्थिकत्वरूपधर्माभावेऽपि सद्रूपत्वमस्ति। एवं घटादावपि पारमार्थिकत्वरूपधर्माभावेपि सद्रूपत्वमेवास्तु न मिथ्यात्वं। न च ब्रह्मणः प्रतिपन्नोपाधिर्नास्ति, घटादेः सोस्तीति वैलक्षण्यमिति वाच्यं। किं तावता ब्रह्मणः प्रतिपन्नोपाध्यभावे तत्प्रयुक्तपरिच्छिन्नत्वं नास्तीति प्राप्तं। तथाचापरिच्छिन्नसद्रूपं जातं। घटादेस्तु प्रतिपन्नोपाधिसद्भावेन तत्र सतो घटादेः तत्प्रयुक्तं

परिच्छिन्नत्वमस्तीति प्राप्तं। तथाच घटादिकं परिच्छिन्नसद्रूपं जातं। एवं च ब्रह्मजगतोः परिच्छिन्नत्वापरिच्छिन्नत्वाभ्यामेव विशेषेऽपि सद्रूपत्वे विशेषाभावाद्ब्रह्मवज्जगदपि परमार्थसद्रूपं स्यादित्यर्थांतरतेति भावः। ननु यथा द्रव्यत्वहीनं गुणादिकमद्रव्यमेव। एवं पारमार्थिकत्वहीनं जगदपरमार्थमेव भवति न परमार्थसदिति चेत्तर्हि ब्रह्माप्येवमपरमार्थसत्स्यात्। कुत इत्यत आह॥ न हीति॥ कुतः पारमार्थिकत्वं तत्त्वतो नास्तीत्यतः पारमार्थिकत्वस्य तात्विकत्वे अद्वैतहानिः स्यादित्याह॥ अद्वैतेति॥ इदमुपलक्षणं॥ निर्धर्मकत्वादित्यपि द्रष्टव्यं। तथाच ब्रह्माप्यपरमार्थसत्स्यादिति भावः। ननु पारमार्थिकत्वस्य तत्त्वतः सत्त्वेऽपि नाद्वैतहानिः। तस्य ब्रह्मस्वरूपत्वेन ब्रह्माद्वैताविरोधित्वादित्यत आह॥ न चेति॥ नन्वेवं ब्रह्मजगतोरुभयोरपि पारमार्थिकत्वसत्त्वे तयोः साम्यमेव स्यात्। न च तद्युक्तं। ब्रह्मणोऽसदृशत्वावगमादतः सत्यत्वमिथ्यात्वाभ्यामेव वैषम्यं वाच्यमित्याशंकायामाह॥ एवं चेति॥ कालत्रयेपीति॥ तथाच नित्यमिति भावः॥ कदाचिदेवेति॥ तथाचानित्यमिति भावः। मिथ्यात्वस्य यद्वितीयलक्षणं तन्निराकरणं कारिकया संगृह्णाति। तथाचेति॥ रूप्यादेरिति॥ स्वरूपेण निषेधेऽसत्त्वापत्तेरिति भावः। तात्विकत्वेन पारमार्थिकत्वेन। आत्मनोऽपि च समानमिति शेषः। निर्धर्मकत्वादिति भावः॥

९. तृतीयामिथ्यात्वभङ्गः

नापि ज्ञानत्वेन ज्ञाननिवर्त्यत्वमिति तृतीयः। अतीतघटादावव्याप्तेः। शुक्तिज्ञानेन रूप्यं नष्टमिति कदाप्यननुभवेन तत्राप्यव्याप्तेश्च। एतावन्तं कालं शुक्त्यज्ञानमासीद्, भ्रमआसीदित्यनुभवेन शुक्तिवत्सत्ये अज्ञानभ्रमादौ शुक्तिज्ञानेन तदज्ञानं नष्टमित्यनुभवेन ज्ञानत्वेन ज्ञाननिवर्त्यत्वस्य सत्त्वेनातिव्याप्तेश्च। अपरोक्षाध्यासं प्रति ज्ञानस्यापरोक्षतया निवर्तकत्वेन ज्ञानत्वेनानिवर्तकत्वाच्च।

ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वस्य चेच्छाद्यानिवर्त्ये स्मृतित्वेन स्मृतिनिवर्त्ये संस्कारादावतिव्याप्तेः। अनुभवत्वव्याप्यधर्मेण तन्निवर्त्यत्वस्य च यथार्थस्मृति निवर्त्ययथार्थस्मृतिविषयेऽव्याप्तेः। भ्रमोत्तरप्रमानिवर्त्यत्वस्य च तत्त्वज्ञानसंस्कार निवर्त्याज्ञानसंस्कारे अव्याप्तेः। स्वोपादानाज्ञाननिर्वतकज्ञाननिवर्त्यत्वस्य चानाद्य ध्यासेऽभावात्।लाघवेनाज्ञानोपादानकत्वस्यैव लक्षणत्वापाताच्च। तथा च–

विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभूयते।
किं त्वधिष्ठानवत् सत्ये तदज्ञानेऽनुभूयते॥

अद्वैतसिद्धिः

ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्। ननु– उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने अतिव्याप्तिः, मुद्गरपातादिनिवर्त्ये च घटादावव्याप्तिः, ज्ञानत्वेन ज्ञाननिवर्त्यत्वविवक्षायामप्ययं दोषः, अधिष्ठानसाक्षात्कारत्वेन निवर्त्ये शुक्तिरजतादौ च ज्ञानत्वेन ज्ञाननिवर्त्यत्वाभावात् साध्यविकलता। ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वविवक्षायां ज्ञानत्वव्याप्येन स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे अतिव्याप्तिरिति चेन्न, ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं हि ज्ञाननिवर्त्यत्वम्। अवस्थितिश्च द्वेधा स्वरूपेण कारणात्मना च; सत्कार्यवादाभ्युपगमात्। तथा च मुद्गरपातेन घटस्य स्वरूपेणावस्थितिविरहेऽपि कारणात्मनावस्थितिविरहाभावाद्, ब्रह्मज्ञानप्रयुक्त एव स इति नातीतघटादावव्याप्तिः। अत एवोत्तरज्ञाननिवर्त्ये पूर्वज्ञाने न सिद्धसाधनम् ; न वा वियदादौ ब्रह्मज्ञाननाश्यत्वेऽपि तद्वदेव मिथ्यात्वासिद्ध्याऽर्थान्तरम्; उत्तरज्ञानेन लीनस्य पूर्वज्ञानस्य स्वकारणात्मनावस्थानादवस्थितिसामान्यविरहानुपपत्तेः। शशविषाणादावस्थितिसामान्यविरहेऽपि तस्य ज्ञानप्रयुक्तत्वाभावान्नातिव्याप्तिः। शुक्तिरजता देश्चापरोक्षप्रतीत्यन्यथानुपपत्त्या प्रतिभासकाले अवस्थित्यङ्गीकारान्न बाधकज्ञानं विना तद्विरह इति न साध्यविकलता। अत एवोक्तं विवरणाचार्यैः– अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृत्तिर्बाध' इति। वार्तिककृद्भिश्चोक्तम्–

'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥ इति।

'सह कार्येण नासी' दिति लीनेन कार्येण सह निवृत्त्यभिप्रायम्, 'सह कार्येण न भविष्यती'ति तु भाविकार्यनिवृत्त्यभिप्रायमित्यन्यदेतत्। रूप्योपादानमज्ञानं स्वकार्येण वर्तमानेन लीनेन वा सहाधिष्ठानसाक्षात्कारान्निवर्तते। तत्तद्भ्रमोपादानानाम् अज्ञानानां भेदाभ्युपगमादिति न दृष्टान्ते साध्यवैकल्यम्, मुद्गरपातानन्तरं घटो नास्तीति प्रतीतिवदधिष्ठानज्ञानानन्तरं शुक्त्यज्ञानं तद्गतरूप्यं च नास्तीति प्रतीतेः सर्वसंमतत्वात्। ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वमित्यपि साधु। उत्तरज्ञानस्य पूर्वज्ञाननिवर्तकत्वं च न ज्ञानत्वव्याप्यधर्मेण? किंत्विच्छादिसाधारणेनोदीच्यात्मविशेषगुणत्वेन उदीच्यत्वेन वेति न सिद्धसाधनादि। नापीच्छाद्यनिवर्त्ये स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे अतिव्याप्तिः, स्मृतित्वेन स्मृतेः संस्कारनिवर्तकत्वे मानाभावात्। स्मृतौ हि जातायां संस्कारो दृढो

भवतीत्यनुभवसिद्धम् तेषां दृढत्वं च समानविषयकसंस्कारानेकत्वमित्यदोषः। वस्तुतस्तु साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं विवक्षितम्; अतो न पूर्वोक्तदोषः। नापि निश्चयत्वेन ज्ञानत्वव्याप्यधर्मिण ज्ञाननिवर्त्ये संशये अतिव्याप्तिरिति सर्वमवदातम्।

इति तृतीयमिथ्यात्वविचारः

न्यायामृततरङ्गिणी

॥ अतीतेति॥ अतीतस्य ज्ञानेन विनैव निवृत्तत्वादित्यर्थः॥ शुक्तिज्ञानेनेति॥ तथाच दृष्टान्तः साध्यविकल इत्यर्थः॥ एतावन्तमिति॥ ज्ञानत्वेन ज्ञाननिवर्त्यत्वं भ्रमाज्ञानादिवत् सत्यत्वेऽपि प्रपञ्चस्योपपन्नम्, अतोऽर्थान्तरमिति भावः॥ अपरोक्षेति॥ तथाचासम्भव इत्यर्थः॥ ज्ञानत्वव्याप्येति॥ तथाचापरोक्षत्वेन ज्ञाननिवर्त्यत्वेऽप्युक्तमिथ्यात्वमस्त्येवेत्यर्थः॥ इच्छाद्यनिवर्त्य इति॥ तथाच संस्कारादेरिव प्रपञ्चस्य सत्यत्वेऽप्युपपत्तिरित्यर्थः॥ अनुभवत्वेति॥ स्मृतावनुभवत्वव्याप्यधर्मस्याभावादित्यर्थः॥ भ्रमोत्तरप्रमेति॥ अत्र प्रमात्वं यथार्थज्ञानत्वमात्रम्, नत्वनुभवत्वगर्भम्। तेन यथार्थस्मृतिनिवर्त्येऽयथार्थस्मृतिविषये नाव्याप्तिः॥ अज्ञानसंस्कार इति॥ सर्वपदार्थानां संस्काररूपेण विद्यमानत्वस्य परैरङ्गीकृतत्वादज्ञानस्यापि संस्कारोऽस्ति। स चाज्ञाने निवृत्तेऽपि जीवन्मुक्त्यवस्थायां भिक्षाटनादिप्रवृत्तिहेतुरनुवर्तमानस्तत्त्वज्ञानसंस्कारेण निवर्तते। अतस्तत्राव्याप्तिरित्यर्थः। ॥ स्वोपादानेति॥ अज्ञानादेरनादेर्योऽध्यासः, तत्राप्युपादानासम्भवादित्यर्थः॥ लाघवेनेति॥ अज्ञानस्य स्वं प्रत्युपादानत्वे स्वस्याज्ञानोपादानकत्वं फलितम्, तदेव लक्षणमस्त्वित्यर्थः। संगृह्णाति – विज्ञानेति॥ मिथ्यारूप्यादौ मिथ्यात्वे नोभयसंमते रूप्यादौ विज्ञाननाश्यता नानुभूयते। अधिष्ठानवत् सत्ये रूप्याज्ञाने विज्ञाननाश्यताऽनुभूयते। तथाच रूप्यादावव्याप्तिः, रूप्याज्ञाने चातिव्याप्तिरित्यर्थः।

ननु ज्ञाननिवर्त्यत्वं नाम ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वम्,। अवस्थितिर्द्वेधा स्वरूपेण कारणात्मना च; सत्कार्यवादाभ्युपगमात्। तथाच मुद्गरपातेन घटस्य स्वरूपेणावस्थितिविरहेऽपि कारणात्मनाऽवस्थितिविरहाभावाद् ब्रह्मज्ञानप्रयुक्त एव सः, इति नातीतघटादावव्याप्तिः। अत एव न पूर्वज्ञाने सिद्धसाधनम् उत्तरज्ञानेन लीनस्य पूर्वज्ञानस्य स्वकारणात्मनाऽवस्थानादवस्थितिसामान्यविरहानुपपत्तेः। शशविषाणादावववस्थितिसामान्यविरह अपि तस्य ज्ञानप्रयुक्तत्वाभावाद् नातिव्याप्तिः। शुक्तिरजतादेश्चापरोक्षप्रतीत्यन्यथानुपपत्त्या प्रतिभासकालेऽवस्थित्यङ्गीकारात् न बाधकज्ञानं विना तद्विरहः, इति न साध्यविकलता।

अत एवोक्तं विवरणाचार्यैः– 'अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृत्तिर्बाधः' इति। वार्तिककृद्भिश्चोक्तम् –

'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति॥'

इति। 'सह कार्येण नासीदि'ति लीनेन कार्येण सह निवृत्त्यभिप्रायम्। 'सह कार्येण न भविष्यती'ति भाविकार्याभिप्रायमित्यन्यदेतत्। रूप्योपादानमज्ञानं स्वकार्येण वर्तमानेन लीनेन वा सहाधिष्ठानसाक्षात्कारात् निवर्तते। तत्तद्भ्रमोपादानानामज्ञानानां भेदाभ्युपगमात्, इति न दृष्टान्ते साध्यवैकल्यम्। 'मुद्गरपातानन्तरं घटो नास्ती'ति प्रतीतिवद'धिष्ठानज्ञानानन्तरं शुक्त्यज्ञानं तद्गतं रूप्यं च नास्ती'ति प्रतीतेः सर्वसम्मतत्वात्।

ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वमित्यपि साधु। उत्तरज्ञानस्य पूर्वज्ञाननिवर्तकत्वं न ज्ञानत्वव्याप्यधर्मेण, किंत्विच्छादिसाधारणेनोत्तरात्मविशेषगुणत्वेन, इति न सिद्धसाधनादिति। नापीच्छाद्यनिवर्त्ये स्मृतित्वेन स्मृतिनिवर्त्ये संस्कारेऽतिव्याप्तिः। स्मृतेः संस्कारनिवर्तकत्वे मानाभावात्। स्मृतौ हि जातायां संस्कारो दृढो भवतीत्यनुभवसिद्धम्। दृढत्वं च समानविषयकसंस्कारानेकत्वमित्यदोषः।

वस्तुतस्तु – साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं विवक्षितम्, अतो न पूर्वोक्तदोषः, नापि निश्चयत्वेन ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्ये संशयेऽतिव्याप्तिः– इति॥

अत्रोच्यते। यदुक्तं ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं ज्ञाननिवर्त्यत्वमिति, तत्रावस्थित्या सामान्यं वा विशेष्यते? विरहो वा? आद्येऽवस्थितिसामान्यं कारणात्मनाऽवस्थितिः, कारणमिति यावत्। ज्ञानप्रयुक्तव्यतिरेकप्रतियोगिकारणकत्वमित्यर्थः स्यात्। तत्र चोत्तरज्ञानप्रयुक्तव्यतिरेकप्रतियोगिपूर्वज्ञानजन्यसंस्कारादौ सिद्धसाधनमनाद्यविद्यादौ च बाधः, कारणशब्देनाविद्योक्तौ चाविद्याकारणकत्वमेवास्तु। शेषवैयर्थ्यात्। अनाद्यविद्यादौ बाधश्च। न द्वितीयः। घटाद्यवस्थितिसामान्यविरहस्य ज्ञानप्रयुक्तत्वं न सम्भवति; विनष्टघटाद्यवस्थितिविशेषद्वयविरहद्वयस्य ज्ञानप्रयुक्तत्वाभावात्। स्वरूपेणावस्थितिविरहस्य ज्ञानप्रयुक्तत्वाभावात्। विशेषाभावातिरिक्तसामान्याभावस्य त्वयैवाविद्यावादे निरसिष्यमाणत्वात्। ज्ञानप्रयुक्तविरहप्रतियोग्यवस्थायामवस्थात्वस्यातिप्रसंगेन प्रतियोगितानवच्छेदकत्वाच्च। शुक्तिरजतादेरवस्थित्यङ्गीकारे स्वरूपेण निषेधोक्त्ययोगाच्च। 'रूप्यादेः स्वरूपेणैव निषेधः' इति त्वदभ्युपगतपक्षे रूप्यादेरत्यन्तासत्त्वस्यापादितत्वेन रूप्याद्यभावोऽपि शशविषाणाद्यभाव इव ज्ञानाप्रयुक्तः इति दृष्टान्तस्य साध्यवैकल्यमेव। पक्षे बाधश्च॥

यच्चोक्तम् – ज्ञानत्वव्याप्येत्यादि, तदपि न। तव मते मननत्वादिना ज्ञानत्वव्याप्यधर्मेण मननिवर्त्येऽर्थगतसंशयविशेषेऽतिव्याप्तेः। तादृशसंशयनिवर्तकत्वेनैव मननस्य सप्रयोजनत्वोक्तेश्च। 'उत्तरात्मविशेषगुणत्वेने'त्याद्यपि न युक्तम्। धर्माधर्मादावतिप्रसङ्गात्॥ यच्चोक्तम् – स्मृतेः संस्कारनिवर्तकत्वं नेति, तन्न। सुखादेर्धर्मादेरिव स्मृतेरपि स्वकारणसंस्कारस्य निवर्तकत्वात्। दृढसंस्कारस्तु स्मृतिजन्योऽन्य एव॥ यच्चोक्तम् 'वस्तुतस्त्वि'त्यादि, तदपि न। त्वया प्रत्यक्षस्य शब्दबाध्यत्वमङ्गीकुर्वता 'नायं सर्पः' इत्याप्तोपदेशस्यापि सर्पादिभ्रमबाधकताया उक्तत्वेन साक्षात्कारत्वस्य बाधकतानवच्छेदकत्वादिति॥

न्यायामृतकण्टकोद्धारः

तृतीयपक्षं निराकरोति – नापीति॥ अतीतेति॥ अत्र कश्चित् – ज्ञानत्वप्रयुक्तावस्थितिसामान्यविरह्प्रतियोगित्वं हि ज्ञाननिवर्त्यत्वम्। अवस्थितिश्च द्वेधा – स्वरूपेण, कारणात्मना च; सत्कार्यवादाभ्युपगमात्। तथाच मुद्गरपातेन घटस्य स्वरूपेणावस्थितिविरहेऽपि कारणात्मनाऽवस्थितिविरहाभावाद् ब्रह्मज्ञानप्रयुक्त एव सः इति नातीतघटादावव्याप्तिः– इत्याह, तन्न। एतावता कारणात्मनाऽवस्थितिविशेषविरहस्य ज्ञानत्वप्रयोज्यत्वेऽपि कार्यात्मना अवस्थितिविशेषविरहस्य ज्ञानत्वप्रयोज्यत्वाभावे नावस्थितिसामान्यविरहस्य ज्ञानत्वप्रयोज्यत्वाभावेन घटादावव्याप्तितादवस्थ्यात्। किं चात्र विरहशब्देन न प्रागभावात्यन्ताभावौ विवक्षितौ। प्रागभावस्यानादित्वेन प्रतियोग्युत्पादकनाश्यत्वेन चात्यान्ताभावस्य चानादिनित्यत्वेन तयोः ज्ञानत्वप्रयोज्यत्वाभावात्। नापि ध्वंसः। तस्यावस्थितिसामान्यविरहत्वासंभवात्। संभवे वा ज्ञानत्वप्रयोज्यावस्थितिध्वंसप्रतियोगित्वमित्युक्तं भवति। तथाच शुक्तिरूप्येऽव्याप्तिः। अज्ञानभ्रमादौ चातिव्याप्तिः। न हि शुक्तिरूप्यं तत्त्वज्ञानेन नष्टमिति कस्यचिदनुभवः। अस्ति चाज्ञानं भ्रमश्च तत्त्वज्ञानेन नष्ट इत्यनुभवः। किं च शुक्तिरूप्यस्य अवस्थित्यभावेन तद्विरहस्य ज्ञानत्वप्रयोज्यता न संभवति। न चापरोक्षप्रतीत्यन्यथाऽनुपपत्त्या शुक्तिरूप्यादेरवस्थिति सामान्यमङ्गीकरणीयमिति वाच्यम्। शशविषाणादेरपि परोक्षप्रतीतिविषयत्वान्यथानुपपत्तेर्वक्तुं शक्यत्वेन तत्रातिव्याप्तेः। किं च ज्ञानत्वस्य भ्रमादिसाधारणत्वेन निवृत्तिप्रयोजकता न संभवति। अन्यथा वस्तुत्वस्यापि तत्प्रयोजकतापत्तेः। तथाचासंभवीदं लक्षणम्।

ज्ञानत्वव्याप्यधर्मेणेति॥ न च स्मृतित्वस्य संस्कारनिवर्तकतावच्छेदकत्वमसिद्धम्। स्मृत्या संस्कारदार्ढ्यस्यैव जायमानत्वादिति वाच्यम्। स्मृतेः संस्कारनाशकत्वाभावे नाशकान्तराभावेन संस्कारनाशानापत्तेः। संस्कारदार्ढ्यस्य समानविषयकसंस्कारान्तरेणाप्युपपत्तेः। विपरीतोत्तरज्ञाननिवर्त्ये पूर्वविपरीतज्ञानेऽतिव्याप्तेश्च।

एतेन – वस्तुतस्तु साक्षात्कारत्वेन ज्ञाननिवर्त्यत्वं विवक्षितमिति – निरस्तम्; साक्षात्कारत्वस्य भ्रमादिसाधारणत्वेन निवर्तकतानवच्छेदकत्वात्। 'साक्षात्कारेण शुक्तिरूप्यं नष्टमि'त्यननुभवेना 'ज्ञानभ्रमौ

नष्टावि'त्यनुभवेनाव्या प्यतिव्याप्त्यापत्तेश्च। भ्रमोत्तरेति॥ न च भ्रमपूर्वप्रमानिवर्त्येऽव्याप्तिरिति वाच्यम्। भ्रमसमानाधिकरणविपरीतप्रमानिवर्त्यत्वस्य विवक्षितत्वात्। लाघवेनेति॥ न च अज्ञानोपादानकत्वमेव विवक्षितमिति वाच्यम्; अज्ञान एवाव्याप्तेः। तस्याप्यज्ञानान्तरोपादानकत्वेऽनवस्था, स्वोपादानकत्वे त्वात्माश्रयः। उक्तमर्थं कारिकया सङ्गृह्णाति – तथाचेति॥

न्यायामृतप्रकाशः

अतीतेति॥ ज्ञानेन विना स्वत एवनिवृत्तत्वादिति भावः॥ अव्याप्तेश्चेति॥ तथाचानुमाने साध्यवैकलयमितिभावः। लक्षणोपपादनाय शुक्तिज्ञानेन तदज्ञानमित्यादि। इदमुपलक्षणं। भ्रमश्च नष्ट इत्यनुभवेनेत्यपि द्रष्टव्यं। नन्वज्ञान भ्रमयोर्मिथ्यात्वेन लक्ष्यत्वान्नातिव्याप्तिरित्यत उक्तं॥ एतावंतमिति॥ भ्रमरूपज्ञानस्वरूपस्य सत्यत्वेपि विषयस्य बाध्यत्वं तु परमते ब्रह्मस्वरूपत्वेन सत्यभूतसाक्षिविषयस्य दुःखादेरिवोपपन्नमिति भावः। लक्षणस्यासंभवं चाह॥ अपरोक्षेति॥ अपरोक्षाध्यास(स्य) निवर्तकतावच्छेदकं ज्ञानेन ज्ञानत्वं शंखःश्वेतः शंखत्वादित्यानुमानिकविशेष दर्शन रूपज्ञाने सत्यपि पीतः शंख इत्यपरोक्षभ्रमानिवृत्तेरतिप्रसक्तत्वात्। अतोपरोक्षज्ञानत्वमेव वाच्यं। तथाच मिथ्याभूते अपरोक्षजगदध्यासे केवलज्ञानत्वावच्छिन्ननिवर्तकताकज्ञाननिवर्त्यत्वाभावादसंभव इति भावः॥ ज्ञानत्वव्याप्यधर्मेणेति॥ तथाचापरोक्षज्ञानत्वस्यापि ज्ञानत्वव्याप्यधर्मत्वेन ब्रह्मापरोक्षज्ञाननिवर्त्ये जगदपरोक्षाध्यासेनासंभव इति भावः॥ स्मृतित्वेनेति॥ स्मृतित्वस्य ज्ञानत्वव्याप्यधर्मत्वादिति भावः। ननु स्मृतौ संस्कारनिवर्तकतावच्छेदकं न स्मृतित्वं। येन ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वसत्त्वादतिव्याप्तिः स्यात्। किंतूत्तरात्मविशेषगुणत्वमेव। नचेदं ज्ञानत्वव्याप्यधर्मः। अतो लक्षणाभावान्नातिव्याप्तिरितिचेन्न। संस्कारनिवर्तकतावच्छेदकं स्मृतित्वमेव वाच्यं। नोत्तरात्मविशेषगुणत्वं। यद्युत्तरात्मविशेषगुणत्वं संस्कार निवर्तकतावच्छेदकं स्यात्तर्हि घटानुभवेन संस्कारोत्पत्त्यनंतरं घटो मे भूयादितीच्छापि कदाचिद्भवति। तथापि संस्कारनिवृत्तिः स्यान्निवर्तकतावच्छेदकस्योत्तरात्मविशेषगुणत्वस्य तत्रापि सत्त्वात्। नचेष्टापत्तिरिति वाच्यं। कुत इत्यत उक्तं॥ इच्छाद्यनिवर्त्य इति॥ नच लक्ष्यत्वान्नातिव्याप्तिरिति वाच्यं। तत्प्रयुक्तो मिथ्यात्वव्यवहारः स्यादित्यत्र तात्पर्यात्॥ अनुभवत्वव्याप्यधर्मेणेति॥ स्मृतित्वस्यानुभवत्वव्याप्यधर्मत्वाभावान्नसंस्कारेऽतिव्याप्तिरितिभावः॥ यथार्थस्मृतिनिवर्त्येति॥ यथार्थस्मृतित्वेन यथार्थस्मृतिनिवर्त्येत्यर्थः॥ अव्याप्तेरिति॥ अयथार्थस्मृति विषयनिवर्तिकायां यथार्थस्मृतौ अनुभवत्वव्याप्यधर्माभावादिति भावः॥ भ्रमोत्तरप्रमेति॥ अत्रप्रमाशब्दो न यथार्थानुभव परः। तथात्वे अयथार्थस्मृतिविषये व्याप्यनिवारणात्। अतो यथार्थज्ञानमात्रपरः। अत्र यथार्थपदाभावे धारावाहिकभ्रमस्थले पूर्व भ्रमविषये भ्रमोत्तरभ्रमरूपज्ञाननिवर्त्यत्वाभावादव्याप्तिः स्यात्। अतो यथार्थपदं। भ्रमोत्तरपदाभावे इयं शुक्तिरिति यथार्थज्ञानानंतरं तत्रैव पुनर्दोषवशादिदं रजतमिति भ्रमरूपं ज्ञानं जायते। तथाच तद्विषये रजते पूर्वतनयथार्थ ज्ञाननिवर्त्यत्वाभावादव्याप्तिः स्यात्। अतो भ्रमोत्तरपदमिति द्रष्टव्यं। तथाचायथार्थस्मृत्यनंतरभाविन्याः यथार्थस्मृतेरपि भ्रमोत्तरयथार्थज्ञान (त्वेनत) त्वात्तन्निवर्त्यत्व मयथार्थस्मृतिविषयेऽस्तीति नाव्याप्तिरिति भावः॥ अज्ञानसंस्कार इति॥ तत्त्वज्ञाने नाज्ञाननिवृत्त्यनंतरमपि

जीवन्मुक्त्यवस्थायामज्ञानसंस्कारोऽस्तीत्यंगीकार्यं। अन्यथाभिक्षाटनादौ प्रवृत्तिर्नस्यात्। सचाज्ञानसंस्कारः तत्वज्ञानसंस्कारेण निवर्तत इत्यंगीकृतं। तथाच तस्य भ्रमोत्तरभावितत्त्वज्ञानसंस्कारनिवर्त्यत्वेन प्रमानिवर्त्यत्वा भावादव्याप्तिरित्यर्थः॥ स्वेति॥ स्वशब्देनाज्ञानकार्यप्रपंचो ग्राह्यः। तदुपादानभूतं यदज्ञानं तन्निवर्तकं यज्ज्ञानं तन्निवर्त्यत्वमित्यर्थः। ''यतो ज्ञानमज्ञानस्य तत्कार्यस्य वा निवर्तक'' मित्यंगीकारात्। अस्यापि लक्षणस्य स्वशब्देनाज्ञानसंस्कारः तदुपादानभूतं यदज्ञानं तस्य जगदुपादानत्वात्। तन्निवर्तकं यत्तत्त्वज्ञानं तन्निवर्त्यत्वं नास्ति। तत्संस्कारनिवर्त्यत्वात्। अतोऽज्ञानसंस्कारेऽव्याप्तिः स्पष्टेति तामनुक्त्वादूषणांतरमाह॥ अनादीति॥ जीव ईशोविशुद्धाचि ब्रेदःतस्यास्तयोर्द्वयोरित्या दित्यादि वचनेनाऽनादिषु अध्यस्तेष्वविद्यादिषु लक्षणाभावादव्याप्तिः। स्वशब्देना विद्यादयो ग्राह्याः। तेषां चानादित्वेनोपादानाभावेन तद्घटितलक्षणस्याप्य भावादितिभावः॥ लाघवेनेति॥ स्वोपादानेत्यादि लक्षणापेक्षयास्य लघुत्वादनादि पदार्थाव्याप्तेरुभयत्रापि तुल्यत्वादिति भावः। अस्त्विति चेन्न। अज्ञाननिराकरणेन दूष्यत्वात्। सिद्धांते अज्ञान शब्दवाच्य प्रकृ त्याद्युपादानकत्वांगीकारेण एतादृशमिथ्यात्वसाधने सिद्धसाधनतेति बोध्यं। तृतीय लक्षणनिरा करणमुपसंहरति॥ तथाचेति॥ नानुभूयते। तथाचाव्याप्तिरिति भावः। अनुभूयते। तथाचातिव्याप्तिरिति भावः।

१०. चतुर्थमिथ्यात्वभङ्गः

एतेन स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं मिथ्यात्वमिति चतुर्थोऽपि निरस्तः। अत्यन्ताभावस्य तात्त्विकत्वे प्रातिभासिकत्वे व्यावहारिकत्वे च दोषस्योक्तत्वाच्च। अत्यन्ताभावप्रतियोगित्वं स्वरूपेणेति पक्षे पारमार्थिकत्वाकारेणेति च पक्षे दोषस्योक्तत्वाच्च।

अद्वैतसिद्धिः

स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं वा मिथ्यात्वम्। तच्च स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वम्, अतः पूर्ववैलक्षण्यम्। दूषणपरिहारश्च पूर्ववत्। न च संयोगिनि समवायिनि वा देशे तदत्यन्ताभावासम्भवः, संभवे तूपादानत्वाद्यनुपपत्तिरिति वाच्यम्, काले सहसंभववद् देशेऽपि सहसंभवाविरोधात्, प्रागभावसत्त्वेनोपादानत्वाविरोधाच्च। न च अत्यन्ताभावाधिकरणे प्रागभावस्याप्यनुपपत्तिरिति वाच्यम्। काले व्यभिचारात्। न च काले प्रागभावात्यन्ताभावयोः सामानाधिकरण्यम् इदानीं घटात्यन्ताभावः, इदानीं घटप्रागभाव इति प्रतीतिबलादङ्गीकृतम्, देशे तु तदुभयसामानाधिकरण्ये न किंञ्चिदपि प्रमाणमिति वाच्यम्, मिथ्यात्वानुमितेः श्रुत्यादेश्च प्रमाणत्वात्। विषमसत्ताक

भावाभवयोरविरोधः पूर्वमुपपादितः। न च असत्यतिव्याप्तिः, स्वात्यन्ताभावाधिकरण एव सत्त्वेन प्रतीयमानत्वस्य विवक्षितत्वात्। न च 'तद्धैक आहुरसदेवेदमग्र आसी' दिति श्रुत्या असतः सत्त्वप्रतीतेस्तत्रातिव्याप्तिर्दुष्परिहरेति वाच्यम्, 'सदेवेदमग्र आसी' दित्यस्यार्थस्याभाव एव नञा प्रतिपाद्यते, न त्वसतः सत्त्वम्, विरोधात्; अतो नातिव्याप्तिः। सर्वं चान्यत् पूर्वोक्तमेवानुसन्धेयमित्युपरम्यते॥

इति चतुर्थमिथ्यात्वविचारः॥

न्यायामृततरङ्गिणी

एतेनेति॥ अत्यन्तासत्त्वापादनादिनेत्यर्थः॥ दोषस्योक्तत्वाच्चेति॥ स्वरूपेणात्यन्ता भावप्रतियोगित्वपक्षेऽत्यन्तासत्त्वापसिद्धान्तादेः, पारमार्थिकत्वेन तत्प्रतियोगित्वपक्षे ब्रह्मवत् पारमार्थिकत्वधर्मशून्यस्यापि जगतो ब्रह्मवदेवामिथ्यात्वोपपत्तेरित्यादेर्दोषस्योक्तत्वादित्यर्थः। संयोगिनि समवायिनि वा देशे तदत्यन्ताभावासम्भवः। सम्भवे तूपादानत्वानुपपत्तिरित्यपि बोध्यम्।

अत्र वदन्ति–'काले सहसम्भववद् देशेऽपि सहसम्भवाविरोधः, प्रागभावसत्त्वे नोपादानत्वाविरोधश्च। नच – अत्यन्ताभावाधिकरणे प्रागभावस्याप्यनुपपत्तिरिति – वाच्यम्। काले व्यभिचारात्। नच – काले प्रागभावात्यन्ताभावयोः सामानाधिकरण्यम् 'इदानीं घटात्यन्ताभावः' 'इदानीं घटप्रागभावः' इति प्रतीतिबलादङ्गीकृतम्, देशे तु तदुभयसामानाधिकरण्ये न किंचिदपि प्रमाणमिति – वाच्यम्। मिथ्यात्वानुमितेः श्रुतेश्च प्रमाणत्वात्। विषमसत्ताकयोरविरोधश्च पूर्वमुपपादितः। नचासत्यतिव्याप्तिः। स्वात्यन्ता भावाधिकरण एव सत्त्वेन प्रतीयमानत्वस्य विवक्षितत्वात्। नच – 'तद्धैक आहुरसदेवेदमग्र आसीदि'त्यादिश्रुत्याऽसतः सत्त्वप्रतीतेस्तत्रातिव्याप्तिर्दुरुद्धरेति – वाच्यम्। ''सदेवेदमग्र आसीदि''त्यस्यार्थस्याभाव एव नञा प्रतिपाद्यते, नत्वसतः सत्त्वम् विरोधात् अतो नातिव्याप्तिः – इति।

अत्रोच्यते; यदुक्तम् प्रतियोगितदत्यन्ताभावयोः काल इव देशेऽप्यविरोध इति, तन्न। तथा सति भावाभावयोर्विरोध एवोच्छिन्नकथः स्यात्, इति व्यावहारिक्यपि व्यवस्था न स्यात्। द्वैताद्वैतयोरविरोधापत्तेरद्वैतज्ञानस्य द्वैतज्ञाननिवर्तकत्वं न स्यात्। यच्चोक्तम् – मिथ्यात्वानुमानादेरेवात्यन्ताभाव-प्रागभावयोर्देशसामानाधिकरण्ये प्रमाणत्वमिति, तन्न।

विरोधेनानुमानस्वरूपस्यैवालभ्यत्वात्। यदपि चोक्तम् – विषमसत्ताकयोस्तयोरविरोध इति, तन्न। लाघवेनात्यन्ताभावमात्रस्यैव प्रतियोगिसामानाधिकरण्यविरोधित्वात्। यच्चोक्तम् – 'असदेवेदमि'ति श्रुत्या सदेवेदमितिश्रुत्यर्थाभावमात्रं बोध्यत इति, तन्न। 'सदेवेदमि'तिश्रुत्यर्थाभावबोधकत्वेऽप्यसद्बोधकत्वस्य दुर्वारत्वात्। तथाहि – सदेवेत्यस्य ब्रह्मसत्त्वमर्थः, तदभावस्त्वत्यन्तासत्त्वमेव। नहि ब्रह्मसत्त्वाभावः क्वचिद् देशे काले वाऽस्तीति॥

न्यायामृतकण्टकोद्धारः

चतुर्थपक्षं द्वितीयपक्षदूषणातिदेशेन दूषयति – एतेनेति॥ असत्यतिव्याप्तिश्च॥ न च स्वात्यन्ताभावाधिकरण एव सत्त्वेन प्रतीयमानत्वं विवक्षितमिति वाच्यम्। 'शशविषाणमस्ती'ति शब्दादिना ''तद्वैक आहुरि''त्यादिना चासतोऽपि सत्त्वेन प्रतीतिसम्भवात्। न च ''सदेव सोम्येदमग्र आसीदि''त्यस्यार्थस्याभाव एव नत्रा प्रतिपाद्यते, अतो नासतः सत्त्वेन प्रतीतिरिति वाच्यम्। मुख्यार्थपरत्वे बाधकाभावात्।

न्यायामृतप्रकाशः

एतेनेत्युक्तं विशदयति॥ अत्यंताभावस्येति॥ तात्त्विकत्वेऽद्वैतहानिः। प्रातिभासिकत्वे सिद्धसाधनं। व्यावहारिकत्वे तादृशात्यंताभावप्रतियोगिनो प्रातिभासिकस्य प्रपंचस्य पारमार्थिकत्वापत्तिरित्यादि दोषस्योक्तत्वादिति भावः॥ इति च पक्षेदोषस्येति॥ रूप्यादावव्याप्तिरात्मन्यतिव्याप्तिरिति दोषस्येत्यर्थः।

११. पञ्चममिथ्यात्वभङ्गः

पंचमेऽपि सत् किं सत्ताजातिमद्विवक्षितम्? अबाध्यं वा? ब्रह्म वा? नाद्यः। त्वन्मते घटादौ जातेस्सत्त्वात्। द्वितीये बाध्यत्वं मिथ्यात्वमिति स्यात्। तच्च निरस्तम्। न तृतीयः। सिद्धसाधनात्। नृशृंगादावपि सद्रूपत्वाभावादन्यस्यासत्त्वस्या भावेनात्यन्तासत्त्वापाताच्च। मन्मते अबाध्यत्वादिरूपस्य सत्त्वस्याभिधेयत्वादिवत्स्वाश्रितत्वेन ब्रह्मणि सत्त्वाभावे सद्रूपत्वासिद्धेश्च। तस्मात्–

अनिर्वाच्येऽप्रसिद्ध्यादिः प्रतीते प्रतिषेध्यता।
स्वाश्रयेऽत्यन्तविरहः सद्विलक्षणता तथा॥
इति पक्षत्रयेऽत्यन्तासत्त्वं स्यादनिवारितम्।
धीनाश्यत्वे त्वनित्यत्वमेव स्यान्न मृषात्मता॥
मम त्वत्यन्तासत्त्वमेव मिथ्यात्वमिति नास्मत्प्रतिबन्दी।
इति मिथ्यात्वनिरुक्तिभंगः॥ १॥

अद्वैतसिद्धिः

सद्विविक्तत्वं वा मिथ्यात्वम्। सत्त्वं च प्रमाणसिद्धत्वम्। प्रमाणत्वं च दोषासहकृतज्ञानकरणत्वम्, तेन स्वप्नादिवत्प्रमाणसिद्धभिन्नत्वेन मिथ्यात्वं सिध्यति। प्रमाणसिद्धत्वं चाबाध्यत्वव्याप्यमित्यन्यत्। अत्राप्यसति निर्धर्मके ब्रह्मणि चातिव्याप्तिवारणाय सत्त्वेन प्रतीयमानत्वं विशेषणं देयम्। तयोः सत्त्वप्रकारकप्रतीतिविषयत्वाभावात्। अत एव सद्विविक्तत्वमित्यत्र सत्त्वं सत्ताजात्यधिकरणत्वं वा? अबाध्यत्वं वा? ब्रह्मरूपत्वं वा? आद्ये घटादावाविद्यकजातेस्त्वयाभ्युपगमेनासम्भवः, द्वितीये बाध्यत्वरूपमिथ्यात्व पर्यवसानम्, तृतीये सिद्धसाधनमिति निरस्तम्, अनभ्युपगमादेव। सदसद्विलक्षणत्वपक्षोक्त युक्तयश्चात्रानुसन्धेयाः। अवशिष्टं च दृष्टान्तसिद्धौ वक्ष्यामः॥

इत्यद्वैतसिद्धौ पंचममिथ्यात्वनिरुक्तिः॥

न्यायामृततरङ्गिणी

सद्विविक्तत्वमिति पक्षं दूषयति॥ पञ्चमेऽपीति॥ त्वन्मतेऽपीति॥ तथाचासम्भवः, ब्रह्मण्यतिव्याप्तिश्च॥ सिद्धसाधनादिति॥ प्रपञ्चे ब्रह्मभेदस्य मयाऽप्यङ्गीकृतत्वादित्यर्थः। 'सद्रूपत्वाभावः' इत्यस्य ब्रह्मण्यतिव्याप्तिश्चेत्याह – मन्मत इति॥ ननु ब्रह्मणः सत्त्वाभावेऽपि न सद्रूपत्वासिद्धिः। सत्त्वे सत्त्वान्तराभावेऽपि सद्रूपत्वमिव ब्रह्मणोऽपि तथात्वोपपत्तेरित्यत उक्तम् – सत्त्वस्याभिधेयत्ववत् स्वाश्रितत्वेनेति॥ ननु सत्त्वस्य स्वाश्रितत्वे आत्माश्रयः स्यात्। अभिधेयत्वे तु नात्माश्रयः। अभिधेयत्वेऽप्यभिधानविषयत्वस्य प्रमितत्वादित्यत उक्तम् – अबाध्यत्वादिरूपस्येति॥ यथा घटादावबाध्यत्वेन तादृशं सत्त्वम्, तथाऽबाध्यत्वस्याप्यबाधितत्वात् तादृशसत्त्ववत्त्वं प्रमितम्। अतो नात्माश्रयदोष इति भावः।

अत्र वदन्ति – 'प्रमाणसिद्धत्वमेव सत्त्वम्। प्रमाणत्वं च दोषासहकृतज्ञानकरणत्वम्। तेन स्वप्नादिवत् प्रमाणसिद्धभिन्नत्वेन मिथ्यात्वं सिद्ध्यति। प्रमाणसिद्धत्वं चाबाध्यत्वव्याप्यमित्यन्यत्। अत्राप्यसति निर्धर्मके ब्रह्मणि चातिव्याप्तिवारणाय सत्त्वेन प्रतीयमानत्वं विशेषणं देयम्, तयोः सत्त्वप्रकारकप्रतीतिविषयत्वाभावादि'ति।

अत्रोच्यते; प्रमाणासिद्धत्वस्य सुखादौ तव मते सत्त्वेऽपि घटादावसत्त्वादव्याप्तिः। यच्चोक्तं 'प्रमाणसिद्धत्वमबाध्यत्वव्याप्यमि'ति, तन्न।प्रमाणासिद्धस्यापि ब्रह्मणोऽबाध्यत्वात्, प्रमाणसिद्धस्यापि प्रपञ्चस्य बाध्यत्वाच्चेति॥

संगृह्णाति – तस्मादिति॥ अनिर्वाच्ये सदसद्विलक्षणत्वे। प्रतीते प्रतिपन्नोपाधौ। प्रतिषेध्यता त्रैकालिकनिषेधप्रतियोगित्वम्। ननु तव मते शुक्तिरजतादेर्मिथ्यात्वात् त्वयाऽपि तत् निर्वक्तव्यम्, इति न ममैव पर्यनुयोग इत्यत आह – मम त्विति॥ मदभिमतं मिथ्यात्वं तु न त्वया प्रपञ्चस्येष्यत इति भावः॥

मिथ्यत्वपक्षाः पञ्चत्वं प्रापिताः पूर्वपक्षिभिः।
दूरं निरस्तास्ते तर्कैरिति संभृणवामहै॥
व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां मिथ्याभावोक्तिभङ्ग ऐत्॥

न्यायामृतकण्टकोद्धारः

पञ्चमेऽपीति॥ अत्र कश्चित् – सत्त्वं प्रमाणसिद्धत्वम्। तथाच प्रमाणसिद्धभिन्नत्वं मिथ्यात्वम्। न च निर्धर्मकत्वेन ब्रह्मण्यसति चातिव्याप्तिरिति वाच्यम्; सत्त्वप्रकारकप्रतीतिविषयत्वे सतीति विशेषणस्य दत्तत्वात्। तयोश्च सत्त्वप्रकारकप्रतीतिविषयत्वाभावात् – इत्याह, तन्न। ब्रह्मण्यसति चातिव्याप्तेः। तयोरपि ''तत् सत्यम्'' ''तद्धैक आहुरि''त्यादिना सत्त्वप्रकारकप्रतीतिविषयत्वात्। न च प्रतीतिपदं प्रमापरमिति वाच्यम्; व्याहतत्वेन साधयितुमशक्यत्वात्। शुक्तिरूप्यादावव्याप्तेश्चेत्यलमतिप्रसङ्गेन।

एतेन – नृसिंहाश्रमेणोक्तं 'स्वानधिकरणानधिकरणात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमि'ति तल्लक्षणम्। अस्यार्थः – स्वस्य मिथ्यात्वधर्मिणः शुक्तिरजतस्य यदनधिकरणं घटादि, तदधिकरणं न भवति यस्यात्यन्ताभावस्य, तत्प्रतियोगित्वमिति। शुक्तिरूप्यादेर्घटादिनिष्ठाभावादन्य एव 'नेदं रजतमि'ति प्रतीयमानोऽभावः। स च तदधिकरणं ब्रह्मेत्युक्तमिति नासम्भवः। प्रमाणं त्वत्र स्वसमानाधिकरणात्यन्ताभावप्रतियोगि शुक्तिरजतम्, स्वानधिकरणमात्रावृत्त्यत्यन्ताभावप्रतियोगि, दृश्यत्वात्; संयोगवत्। स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वेनार्थान्तरत्ववारणाय पक्षविशेषणम्। एतत् साध्यं त्वत्यन्ताभावस्य रजताधिकरणकत्वेन, अवृत्तित्वेन वा सिद्ध्यति। तत्र च पक्षविशेषणमहिम्ना प्रथमस्य पक्षे बाधादवृत्त्यत्यन्ताभावप्रतियोगित्वमेव सिद्ध्यति, इत्युक्तमिथ्यात्वसिद्धिः। न च घटादौ व्यभिचारः; तस्य पक्षसमत्वादिति – निरस्तम्; अत्राप्यत्यन्ताभावस्य पारमार्थिकत्वादिदूषणग्रासात्। न च अत्यन्ताभावस्य ब्रह्मरूपत्वात् पारमार्थिकत्वेन नाद्वैतहानिरिति वाच्यम्; सोपाधिक-निरुपाधिकयोरैक्यासम्भवस्योक्तत्वात्। किञ्च – 'अत्र रजतं ने'ति प्रतीत्या ''नेह नाने''ति श्रुत्या च प्रतीयमानात्यन्ताभावस्य ब्रह्माधिकरणत्वेन प्रतीत्याऽऽधाराधेययोश्च भेदस्याऽवश्यकत्वेन तयोरभेदानुपपत्तिः। अपि चाभावद्वैविध्यकल्पने प्रमाणाभावात् शुक्तिरूप्यादावव्याप्तिः; तदत्यन्ताभावस्य पारमार्थिकत्वायोगात्। न च – तत्रापि ब्रह्मैवाधिष्ठानम्; 'इदमि'ति शुक्तेरधिष्ठानत्वेन प्रतीतेः। एकेनैवाभावेन प्रतीति-व्यवहारोपपत्तेश्चानुमानमर्थान्तराग्रस्तम्। अवृत्त्यत्यन्ताभावप्रतियोगित्वस्याऽकाशात्यन्ताभावादाविव सत्त्वेऽप्युपपत्तेः। न च अभावैकस्वभावोऽभावो

विवक्षित इति वाच्यम्; ब्रह्मस्वरूपात्यन्ताभावस्याभावैकस्वभावत्वासिद्धेः। किञ्च ब्रह्मणि दृश्यत्वस्याग्र उपपादयिष्यमाणत्वेन तत्र व्यभिचाराद् विपक्षे बाधकाभावेनाप्रयोजकत्वम्। न च अपरोक्षतया प्रतीयमानस्य रजतस्य तत्र सत्त्वे त्रैकालिकाभावप्रमानुपपत्तिरिति वाच्यम्। असत्त्वेनाप्युपपत्तेः। न चासत्त्वेऽपरोक्षप्रतीतिविषयत्वानुपपत्तिः। परोक्षप्रतीतिविषयत्ववदपरोक्षप्रतीतिविषयत्वस्याप्युपपत्तेः। न चेन्द्रियसंनिकर्षाभावे कथमपरोक्षप्रतीतिविषयत्वमिति वाच्यम्। प्रातिभासिकवद् दोषवशेनासन्निकृष्टस्यापि प्रत्यक्षविषयत्वोपपत्तेरिति दिक्।

न्यायामृतप्रकाशः

पंचमे सद्विविक्तत्वपक्षे॥ सत्त्वादिति॥ तथाचान्योन्याभावस्य प्रतियोगितावच्छेदकविरुद्धत्वा त्सत्ताजातिमद्विविक्तत्वाभावादसंभव इति भावः॥ सिद्धसाधनादिति॥ ब्रह्मवैलक्षण्यांगीकारादिति भावः। सद्विविक्तत्वं नाम सद्रूपत्वाभाव इत्यर्थस्योक्तत्वात्पक्षेऽत्यंतासत्त्वापत्तिरित्याह॥ नृशृंगादावपीति॥ अनेन मिथ्यात्वलक्षणस्य नृशृंगादावतिव्याप्तिश्चस्यादिति सूचितं भवतीति ज्ञातव्यं। ब्रह्मण्यपि सद्रूपत्वाभावस्य सत्त्वादतिव्याप्तिश्चस्यादित्याह॥ मन्मत इति॥ सत्त्वरूपधर्मस्य निर्धर्मकब्रह्मण्यभावेन सद्रूपत्वमपि तत्र नास्ति। ननु ब्रह्म सत्त्वरहितत्वात्सद्रूपं न भवतीत्युक्तौ सत्त्व एव व्यभिचारस्स्यात्। आत्माश्रयप्रसंगेनसत्त्वे सत्त्वाभावात्। सत्त्वं सदिति प्रतीत्यासद्रूपत्वंचास्तीति चेन्न। अबाध्यत्वादिरूपसत्त्वस्याभिधेय त्वादिवत्स्वाश्रितत्वांगीकारेण हेतोरेवाभावान्न व्यभिचारः। तथाचात्माश्रयस्य प्रामाणिकत्वेन सह्यत्वात्। ब्रह्मणि सद्रूपत्वाभावावश्यंभावादतिव्याप्तिः स्यादेवेति भावः। मिथ्यात्वलक्षण पंचकदूषणमपि संगृह्णाति॥ तस्मादिति॥ अनिर्वाच्ये सदसद्विलक्षणत्वपक्षे, प्रतीते प्रतिपन्नोपाधौ प्रतिषेध्यता त्रैकालिकनिषेधप्रतियोगित्वं, धीनाश्यत्वे ज्ञाननिवर्त्यत्वपक्षे।

ननु भवन्मतेपि शुक्तिरजतादेर्मिथ्यात्वात्त्वयापि तन्निर्वक्तव्यमेवेति न ममैव पर्यनुयोग इत्यत आह॥ ममत्विति॥ मदभिमतं मिथ्यात्वं तु न त्वया प्रपंचस्यांगीकर्तुं शक्यं। सदसद्वैलक्षण्यांगीकारेणाप सिद्धांतापातादितिभावः॥ इति मिथ्यात्वनिरुक्तिभंगविवरणं॥

१२. अथ सामान्यतो मिथ्यात्वभङ्गः

अस्तु वा मिथ्यात्वं यत्किंचित्, तथापि मिथ्यात्वमबाध्यम्? बाध्यं वा? आद्ये अद्वैतहानिः। न हि प्रपंचोपाधिकं भ्रमकालानिश्चितं तन्मिथ्यात्वं निरुपाधिक भ्रमकालनिश्चिताधिष्ठानब्रह्ममात्रम्। तस्य मां प्रत्यपि सिद्धत्वात्। दृश्यत्वादेर्मिथ्यात्व एव व्यभिचारश्च। मिथ्यात्वस्य चादृश्यत्वेऽनुमानवैयर्थ्यम्। तस्य साध्यज्ञस्यर्थत्वात्।

अन्त्ये सिद्धसाधनम्। अद्वैतश्रुतेरतत्त्वावेदकत्वं च स्यात्। जगच्च सत्यं स्याद् आत्मवत्। न चात्मत्वमुपाधिः, सत्यत्वं विना तद्विरुद्धस्य मिथ्यात्वस्य मिथ्यात्वे व्याघातवदज्ञातृत्वादिरूपानात्मत्वस्यासत्यत्वं विना व्याघाताभावेनोपाधेरप्रयोजकत्वात्। न च मिथ्यात्वं न ब्रह्ममात्रं किन्तु द्वितीयाभावोपलक्षितं ब्रह्मेति वाच्यम्। उपलक्षणे द्वितीयाभाव एव बाध्याबाध्यविकल्पात्। द्वितीयाभावाधिकरण तयाऽविद्याधिष्ठानतया तत्साक्षितया च भासमानचिदन्यस्योपलक्ष्यस्याभावेन द्वितीया भावस्योपलक्षणत्वायोगाच्च। ननु रूप्यधर्मो मिथ्यात्वमपि मिथ्यैव। न च तथात्वे रूप्यस्य सत्यत्वं सत्यं स्यादिति वाच्यम्। धर्मिणो मिथ्यात्वे विरुद्धयोरपि धर्मयोर्मिथ्यात्वात्। परस्परविरुद्धयोरेकस्याभावेऽन्यस्य सत्त्वनियमस्तु यत्र धर्मी सत्यः तत्रैव। न हि वन्ध्यासुतस्य श्यामत्वाद्यभावे गौरत्वं सत्यम्। न वा स्वप्ने ज्ञातस्य गजस्य मिथ्यात्वे तत्रैव ज्ञातस्तदभावस्सत्य इति चेन्न, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं हि मिथ्यात्वम्। न च प्रतियोगित्वं धर्मान्तरवद्धर्मि सत्त्वापेक्षमित्यनिर्वाच्यत्वभंगे वक्ष्यते। धर्म्यसत्त्वे धर्मासत्त्वं तु धर्मिसत्त्वसापेक्ष धर्मविषयम्। मिथ्यात्वं तु तत्प्रतिकूलम्; अन्यथा सिद्धसाधनात्।

किं च प्रतिपन्नोपाधावनिषिद्धं प्रत्युत बाधकज्ञानेन विहितमपि रूप्यमिथ्यात्वं यदि प्रातिभासिकरूप्यसंबन्धमात्रेण प्रातिभासिकम्, तर्हि सति ब्रह्मणि निषिद्धा अपि धर्मास्सन्तः स्युः। रूप्याधिष्ठानशुक्तिरपि प्रातिभासिकी स्यात्। रूप्ये प्रपंचे च सद्वैलक्षण्यं च सत् स्यात्। असद्वैलक्षण्यं चासत् स्यात्। असति च सद्वैलक्षण्यमसत् स्यात्। रूप्यतन्मिथ्यात्वयोर्मिथ्यात्वे भ्रान्तिबाधव्यवस्था च न स्यात्। त्वदुक्तेन धर्मिणो मिथ्यात्वेन हेतुना साध्यस्य मिथ्यात्वमिथ्यात्वस्यापि प्रातिभासिकत्वापत्त्या हेतोरत्यन्ताप्रामाण्यं च स्यात्। हेतूकृतस्य धर्मिमिथ्यात्वस्य मिथ्यात्वे घटरूपादौ व्यभिचारापत्त्या सत्यत्वावश्यंभावाद्विरोधश्च स्यात्। न च त्वन्मते रूप्यादिकं वियदादिकं वा वन्ध्यासुतवन्निःस्वरूपम्। शून्यवादापातात्। स्वाप्नस्यापि कल्पितत्वेन तद्धंसादेर्मिथ्यात्वेऽपि तन्मिथ्यात्वं स्वप्ने प्रतीतमपि आत्मवदबाधात् सत्यमेव। न च मिथ्यात्वं प्रपञ्चसमसत्ताकम्, एवं च न तात्त्विकाद्वैतहानिः, नापि सिद्धसाधनम्, त्वन्मते प्रपंचे स्वसमसत्ताकमिथ्यात्वा

सिद्धेरिति वाच्यम्, मिथ्यात्वस्य व्यावहारिकत्वे तद्विरोधिनोऽप्रातिभासिक स्याऽनपोदितस्वतः प्रामाण्यप्रत्यक्षादिसिद्धस्य च विश्वसत्यत्वस्य पारमार्थिकत्वा पातात्। द्वैताद्वैतप्रमाणयोव्यार्वहारिकपारमार्थिकविषयत्वेन व्यवस्थोक्त्ययोगाच्च। मिथ्यात्वस्य प्रातिभासिके व्यावहारिकतया व्यावहारिके च प्रातिभासिकतया च दृष्टत्वेन तयोस्तुल्यसत्ताकत्वायोगाच्च। अन्यथा प्रपंचे सत्यत्वमिथ्यात्वयोर्विधिसमुच्चयो वा निषेधसमुच्चयो वा स्यात्। तथा च–

मिथ्यात्वं यद्यबाध्यं स्यात् सदद्वैतमतक्षतिः।
मिथ्यात्वं यदि बाध्यं स्याज्जगत्सत्यत्वमापतेत्॥

न च मिथ्यात्वस्य सत्यत्वमिथ्यात्वाभ्यां दूषणं नित्यसमा जातिः। स्वव्याघातादेरभावात्। उक्तं हि–

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत्।
सत्यत्वस्य च सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥ इति ।
किं च – धर्मस्य तदतद्रूप-विकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभंगो नित्यसमो भवेत्॥ इति तल्लक्षणम् ।

न चात्र मिथ्यात्वस्य सत्यत्वे धर्मिणो मिथ्यात्ववैशिष्ट्यभंग उक्तः। किं तु अद्वैतहानिः। प्रत्युत, भेदः किं भिन्ने? उताभिन्ने स्यात्? इति।

त्वदुक्तिरेवाभिन्नादिरूपविशिष्टमात्रनिरासकत्वेन स्वव्याघातापाताज्जातिः। उक्तं हि – "एतामेव जातिमवष्टभ्य शुष्कतर्कवादिनां बौद्धचार्वाकवेदान्तिनां बालव्यामोहहेतवः कण्ठकोलाहलाः" इति।

इति सामान्यतो मिथ्यात्वभंगः।

अद्वैतसिद्धिः

ननु– उक्तमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः, एकस्मिन् धर्मिणि प्रसक्तयोः विरुद्धधर्मयोरेकमिथ्यात्वे अपरसत्यत्वनियमात्, मिथ्यात्वसत्यत्वे च तद्वदेव प्रपञ्चसत्यत्वापत्तेः।

उभयथाप्यद्वैतव्याघात इति चेन्न; मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तेः। तत्र हि विरुद्धयोर्धर्मयोरेकमिथ्यात्वे अपरसत्यत्वम्, यत्र मिथ्यात्वावच्छेदकमुभयवृत्ति न भवेत्; यथा परस्परविरहरूपयो रजतत्वतदभावयोः शुक्तौ, यथा वा परस्परविरहव्यापकयो रजतभिन्नत्वरजतत्वयोः तत्रैव; तत्र निषेध्यतावच्छेदकभेदनियमात्। प्रकृते तु निषेध्यतावच्छेदकमेकमेव दृश्यत्वादि। यथा गोत्वाश्वत्वयोरेकस्मिन् गजे निषेधे गजत्वात्यन्ताभावव्याप्यत्वं निषेध्यताच्छेदकमुभयोस्तुल्यमिति नैकतरनिषेधे अन्यतरसत्त्वम्, तद्वत्। यथा च सत्यत्वमिथ्यात्वयोर्न परस्परविरहरूपत्वम्, न वा परस्परविरहव्यापकत्वम्, तथोपपादितमधस्तात्। परस्परविरहरूपत्वेऽपि विषमसत्ताकयोरविरोधात्, व्यावहारिक मिथ्यात्वेन व्यावहारिकसत्यत्वापहारेऽपि काल्पनिकसत्यत्वानपहारात्, तार्किकमतसिद्ध संयोगतदभाववत् सत्यत्वमिथ्यात्वयोः समुच्चयाभ्युपगमाच्च। एकस्य साधकेन अपरस्य बाध्यत्वं विषमसत्ताकत्वे प्रयोजकम्, यथा शुक्तिरूप्यतदभावयोः। एकबाधकबाध्यत्वं च समसत्ताकत्वे प्रयोजकम्, यथा शुक्तिरूप्यशुक्तिभिन्नत्वयोः। अस्ति च प्रपञ्चतन्मिथ्यात्व योरेकब्रह्मज्ञानबाध्यत्वम्। अतः समसत्ताकत्वान्मिथ्यात्वबाधकेन प्रपञ्चस्यापि बाधान्नाद्वैतक्षति रिति कृतमधिकेन।

इति मिथ्यात्वसामान्योपपत्तिः।

न्यायामृततरङ्गिणी

ननु मिथ्यात्वस्याबाध्यत्वेऽपि नाद्वैतहानिः। तस्य ब्रह्मस्वरूपत्वात् इत्यत आह – नहीति॥ भ्रमकालानिश्चितमिति॥ अन्यथा रूप्यभ्रमाद् रूप्यार्थिप्रवृत्तिर्न स्यादित्यर्थः॥ अधिष्ठानेति॥ एतच्च भ्रमकाले ब्रह्मणो निश्चयोऽस्तीत्यस्योपपादकम्॥ तस्येति॥ ब्रह्मस्वरूपमात्रस्य प्रपञ्चमिथ्यात्वस्येत्यर्थः॥ दृश्यत्वादेरिति॥ ब्रह्मस्वरूपेऽबाध्ये मिथ्यात्वे दृश्यत्वस्य सत्त्वादित्यर्थः। ननु साध्याभाववत्यपि मिथ्यात्वे दृश्यत्वस्य हेतोरभावाद् व्यभिचार इत्यत आह – मिथ्यात्वस्य चेति॥ मिथ्यात्वानुमाने यदि मिथ्यात्वं न विषयः, तदा मिथ्यात्वानुमानवैयर्थ्यमित्यर्थः॥ तस्येति॥ मिथ्यात्वानुमानस्य मां प्रति मिथ्यात्वज्ञप्त्यर्थत्वेन त्वया प्रयुक्तत्वादित्यर्थः॥ अन्त्य इति॥ मिथ्यात्वस्य बाध्यत्व इत्यर्थः॥ सिद्धसाधनमिति॥ अविद्यमानानतिरिक्तबाध्यत्वरूपमिथ्यात्वस्य प्रपञ्चे ममानिष्टत्वाभावादित्यर्थः॥ अद्वैतश्रुतेरिति॥ बाध्यत्वरूपमिथ्यात्वस्यातत्त्वस्यावेदकत्वादित्यर्थः॥ जगदिति॥ जगत् सत्यम् मिथ्याभूतमिथ्यात्व कत्वात् आत्मवदित्यनुमानादित्यर्थः॥

नचेति॥ आत्मनि सत्ये साध्यव्यापकम्, पक्ष एव साधनाव्यापकमात्मत्वमुपाधिर्न स्यादित्यर्थः॥ सत्यत्वं विनेति॥ प्रपञ्चसत्यत्वविषयके स्थापनानुमाने मिथ्याभूत मिथ्यात्वकत्वस्य हेतोः सत्यत्वरूपसाध्येन व्याप्तिग्राहको व्याघातरूपस्तर्कोऽस्ति। आत्मत्वस्योपाधेर्व्यति रेकेणानात्मत्वेन क्रियमाणे स्थापनानुमानीयसाध्यस्य सत्यत्वस्य व्यतिरेकानुमानेऽनु कूलतर्काद्यभावेनोपाधेरप्रयोजकत्वादित्यर्थः॥ नचेति॥ द्वितीयाभावोपलक्षितं ब्रह्मस्वरूपं च न निरुपाधिकम् न वा भ्रमकाले निश्चितम् इति न पूर्वोक्तदोष इति भावः॥ उपलक्षण इति॥ उपलक्षणद्वितीयाभावस्य बाध्यत्वे तद्रूपस्य मिथ्यात्वस्य बाध्यत्वात् सिद्धसाधनादि। अबाध्यत्वे त्वद्वैतहानिरिति दूषणसहिताद् विकल्पात् न वाच्यमित्यनेनान्वयः॥ द्वितीयेति॥ अप्रसिद्धोपलक्ष्यस्य प्रसिद्धमुपलक्षणं भवति। द्वितीयाभावरूपोपलक्षणं प्रत्युपलक्ष्यस्य ब्रह्मणो नित्यसिद्धत्वेन न तत् प्रति तस्योपलक्षणत्वमित्यर्थः। ज्ञातस्यैवोपलक्षणत्वेन द्वितीयाभावस्याभावरूपोपलक्षणस्य ज्ञानार्थं तदधिकरणभूतशुद्धब्रह्मज्ञानमावश्यकमित्यभि सन्यायोक्तम् – द्वितीयाभावाधिकरणतयेति॥ तथाचोपलक्षणज्ञानार्थं प्रागेव ज्ञातं शुद्धं ब्रह्म प्रति न द्वितीयाभावस्योपलक्षणत्वमिति भावः। सर्वदा प्रतीयमानत्वेनाङ्गीकृताविद्यायाः प्रतीतिस्तदधिकरणशुद्धब्रह्मस्फुरणं विना न सम्भवति, इति तदर्थमपि शुद्धब्रह्मज्ञानमावश्यक मित्यभिप्रायेणोक्तम् – अविद्येत्यादि॥ ननु काकेन गृहगतसंस्थानविशेष इव प्रकाशमानब्रह्म गतधर्मान्तरमेवं द्वितीयाभावेनोपलक्ष्यतामित्यत उक्तम् – अन्यस्येत्यादि॥ उपलक्षणकाले द्वितीयमात्राभावादिति भावः।

जगच्च सत्यं स्यादात्मवदित्युक्तानुमाने व्यभिचारं शङ्कते – नन्विति॥ रूप्यगतमिथ्यात्वस्य मिथ्यात्वेन मिथ्याभूतमिथ्यात्वकत्वं हेतुः रूप्ये वर्तते, साध्यं च सत्यत्वं नास्ति, इति व्यभिचार इति भावः। सिद्धान्ती व्यभिचारपरिहारं शङ्कते – नच तथात्व इति॥ यदि रूप्ये मिथ्यात्वं मिथ्या, तर्हि मिथ्यात्वविरुद्धं सत्यत्वं सत्यं स्यात्। यथा गवि गोत्वाभावस्य मिथ्यात्वे गोत्वं तद्विरुद्धं सत्यम्। तथाच प्रयोगः– रूप्यम् मिथ्याभूतमिथ्यात्वाधिकरणं न भवति, सत्यभूततद्विरुद्धसत्यत्वानधिकरणत्वात्। यत् सत्यभूततद्विरुद्धाधिकरणं न भवति, तत् मिथ्याभूततदधिकरणं न भवति, यथा सत्यभूतगोत्वविरुद्धगोत्वाभावानधिकरणं गौर्गोत्वाभावविरुद्धमिथ्याभूतगोत्वाधिकरणं न भवति। तथाच रूप्यमिथ्यात्वस्य सत्यत्वेन रूप्ये हेतोरेवागमनात् न व्यभिचार इति भावः। पूर्वपक्षी व्यभिचारपरिहारं दूषयति – धर्मिण इति॥ सत्यभूतसत्यत्वानधिकरणमपि रूप्यं सत्यभूतमिथ्यात्वस्याधिकरणं न भवति। किन्तु मिथ्यात्वस्यापि मिथ्याभूतस्यैवाधिकरणम्।

17. प्रमाणलक्षणे नामधेयपादे चिन्तितम् 'सोमेन यजेत' इति श्रूयते तत्र वैयधिकरणेन अन्वयो वा सामानाधिकरण्येन अन्वयो वा इति सन्देहे etc. प्र. 363.
18. अपच्छेदाधिकरणानि न्या. ३64. सि. 366 तर 367-70 कण्ट 371-373 प्र. 374-376.
19. न तौ पशौ इत्यादिनिषेधस्य अर्थवादाधिकरणम् तर. 382.
20. प्रधान भूताचमनादि पदार्थविषयस्मृत्या पदार्थ धर्मभूतक्रमविषया 'वेदं कृत्वा वेदिं करोति' इति श्रुतिः बाधितेति अन्यत्रापि तया (स्मृत्या) सा (श्रुतिः) बाध्यते न्या. 391, सि 395.
    ii. शिष्टाकोपाधिकरणम् । तर. 397-398 कण्ट. 405 प्र. 411
    iii. भाष्यकारमतेन अस्य अधिकरणस्य शरीरम् तर. 398
    iv. वार्तिककाराशयः तर. 399-400
    v. वार्तिककारस्तु इदमधिकरणं निरा चक्रे. कण्ट. 406.
21. 'द्वयोः प्रणयन्ति' न्या. 508 सि. 514.
22. षड्विंशतिर स्य वं क्रयः न्या. 508 सि. 515.
23. अयमनुवादो न 'वायु क्षेपिष्ठादिवाक्यवत्' स्तुत्यर्थः नापि 'दध्ना जुहोति' इत्यत्र जुहोतिरिवान्यविधानार्थः । न्या. 30-510 सि. 30-517.
24. 'आपश्च न प्रमिनन्ति' सि. 518.
25. उत्सार्गापवाद न्यायः 'न हिंस्यात् सर्वा भूतानि' 'अग्नीषोमीय वाक्यम्' सि. 519.
26. i. विद्वद्वाक्य विचारः तर. 531
    ii. आग्नेयीनामङ्गाङ्गि भावाधिकरणम् तर. 531.
27. षड्विधतात्पर्यलिङ्गविचारः कण्ट. 544
28. अर्थवादानां विधिना सह एकवाक्यत्वनिरूपणम् कण्ट. 551.
29. यत्परः शब्दः स शब्दार्थः । कण्ट 552

Note: **जैमिनीयसूत्राणि अधिकरणानि सङ्ग्रहश्लोकाः अन्ये च पूर्वमीमांसाविषयाः न्यायामृतादिग्रन्थेषु उल्लेखक्रमानुसारेण अत्र सङ्कलिताः ।**

♦ ♦ ♦

अनेकार्थत्वेन सावकाशायाः श्रुतेः निरवकाशमिति प्रत्यक्षस्य प्राबल्यप्रदर्शनाय उपांशुत्वस्यप्राचीन प्रदार्थत्वप्रयुक्ताधिकरणन्यायनिरूपणम् । न्या. XX-276

11. ऐन्द्र्या सुब्रह्मण्या बहुविषयया अल्पविषयायाः अग्नेय्याः सुब्रह्मण्यायाः बाधप्रदर्शनेन बहुविषय प्रत्यक्षस्य प्राबल्यप्रदर्शनाय 'बहूनां धर्मानुष्ठानाधिकरणन्यायनिरूपणम् । न्या. XX-276.

12. यदि प्रत्यक्षं लिङ्गबाध्यं तर्हि 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्' 'ऐन्द्र्या गार्हपत्यमुपतिष्ठति' 'शरमयं बर्हिर्भवति' इति श्रुतित्रयग्राह्यं प्रत्यक्षं स्मृतिलिङ्ग श्रुत्यनुमानैः बाध्येरन् इति प्रत्यक्षस्य लिङ्गाबाध्यत्वप्रतिपादनाय एतानि पूर्वमीमांसानिदर्शनानि निरूपितानि । न्या. XXII-334.

13. यदि चासंशब्दाध्यंतर्हि 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः, इति अर्थवादस्य 'अदितिर्द्यौरि'ति मन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते तदविरोधाय 'गुणवादस्तु गुणादविप्रतिषेधः स्याद्' इत्यादिना गौणार्थता नोच्येत । तत्सिद्धिरिति तत्सिद्धिपेटिकायां च 'यजमानः प्रस्तरः' इत्यादेः गौणार्थता नोच्येत । न्या. 344.

14. i. उक्तं हि शाबरभाष्ये 'न विधौ परः शब्दार्थः' । न्या. 344, सि. 346

ii. न विधौ विधिवाक्ये प्रधानवाक्ये । प्र. 363

iii. अश्वप्रतिग्रहेष्टौ प्रतिगृह्णीयादिति विधौ प्रतिग्राह्योदिति अवधारणकल्पनया लक्षणायाः अङ्गीकरणात् । सि. 348.

IV. अश्वप्रतिग्रहेष्टौ प्रतिगृह्णीयादित्यस्य उपक्रमस्वारस्यायैव उपसंहारे लक्षणा । तर. 355.

V. अश्वप्रतिग्रहेष्टौ न अर्थवादानुसारेण विधौ लक्षणा (अत्र शास्त्रदीपिकाशयः प्रभाकराभिप्रायश्च प्रकारान्तरतया निरूपितः) कण्ट. 361.

15. i. 'सोऽरोदित्' 'बर्हिषि रज्ञतं न देयं हिरण्यं दक्षिणा'

ii. 'प्रजापतिरात्मनो वपामुदखिदत्'

iii. 'अग्निर्हिमस्य भेषजम्'

iv. 'इन्द्रो वृत्राय वज्रमुदयच्छत्' विधिशेषत्वेन लक्षणाङ्गीका-गुणवादत्व-भूतार्थवादत्वनिदर्शनतया इमानि उदाहरणानि उल्लिखितानि सि. 347

16. वेदेपि गौण्याः सम्भवः इति प्रतिपादनार्थं यजमानः प्रस्तरः इति उदाहृत्य तत्सिद्धि जातिसारूप्यादीनां विवरणम् । तर. 349

APPENDIX V D

न्यायामृते अद्वैतसिद्धौ व्याख्यानत्रये च तत्र तत्र उल्लिखिताः मीमांसाविचाराः

1. मन्त्राधिकरणम् - विमतौ विमन्त्यन्तरस्य अवच्छेदकत्वमित्यस्य अनवस्थादोष परिहारार्थमुपन्यस्तम् । कण्ट. III-31.
2. यजमानः प्रस्तरः
   श्रुतेः क्वचिदमुख्यार्थत्वमित्युपपादनाय निरूपितम् । तर. VI-51.
3. विष्णवे शिपिविष्टाय
   इत्यत्र विशिष्टस्य देवतात्ववत् विशिष्टस्य दृश्यत्वविषयत्वमिति निरूपणार्थमिदमुक्तम् । सिद्धि. XIII-132
4. स्तुतशस्त्राधिकरणन्यायः
   ब्रह्मावोधकस्यापि वेदान्तरूप शब्दस्य स्तुतशस्त्राधिकरणन्यायेन वचनोपपत्तिः इति निरूपणम् । सिद्धि XIII-136.
5. अश्वप्रतिग्रहेष्टिः । तर. 355
6. कर्मणामल्पमहतां फलानां च स्वगोचरे ।
   प्रवृत्तिस्यानसामान्यादविशेषेपि चोदिते ॥ (अर्थवादपादे वार्तिककृता उक्तम्)
   अग्निहोत्रवाजपेयादिजन्यं सुखं तारतम्यवत् इति निरूपणार्थमुक्तम् । तर. XIV-187
7. उपक्रमाधिकरणन्यायः
   प्रत्यक्षस्य अनुमानाद्यपेक्षया जात्याप्राबल्यनिरूपणाय असञ्जातविरोधित्वप्रदर्शनाय अयं न्यायः निरूपितः । न्या. XX-276.
8. श्रुतिलिङ्गाधिकरणन्यायः
   लिङ्गापेक्षया श्रुतेः प्राबल्यदृष्टान्तेन प्रत्यक्षस्य प्राबल्यसमर्थनाय अयं न्यायः निरूपितः न्या. XX-276
9. अहवनीये जुहोति इति सामान्यविषयात् 'पदे जुहोति' इति विशेषविषयप्राबल्यवत् विशेषविषयस्य घटादीविषयसत्त्वप्रत्यक्षस्य सामान्यतोद्वैतनिषेधकश्रुत्यप्रेक्षया प्राबल्यप्रदर्शनाय वर्त्महीमाधिकरणन्यायनिरूपणम् । न्या. XX-276.
10. यथा 'यत्किञ्चित् प्राचीनमग्नीषोमीयमुपांशु चरति' इति विशेष वाचिनोपि सावकाशत्वात् निरवकाशेन 'यावत्या वाचा कामयीत' इत्यनेन संकोचः तथा

न शास्त्रपदवाच्याः स्युरतो धर्माप्रमाणता ।
अतो वेदाननुज्ञातशाक्यादिवचसामिह ।
अविरोधेऽपि नैवास्ति प्रामाण्यं मत्तवाक्यवत् ॥ तर. 400.
अपि वा कारणेत्यादेः भिन्नाधिकरणत्वनिरूपणम्
अपि वा कारणेत्येतद्भिन्नाधिकरणं मतम् ।
शिष्टाचारः प्रमाणं किं न वेत्यत्र विचार्यते ॥
स्मृतिन्यायेन सिद्धापि शिष्टाचारप्रमाणता
विरुद्धाचारसंसर्गात् पुनराक्षिप्य साध्यते ॥ तर. 401.

11. **मन्त्रलिङ्गाधिकरणपूर्वपक्षसङ्ग्रहः**

यदि दृष्टार्थतैव स्यान्मन्त्राम्नानमनर्थकम् ।
प्रत्यायनाददृष्टं चेत्तदुच्चारणतो वरम् ॥ तर. 530, कण्ट. 560.

12. **आग्नेयीनामङ्गाङ्गि भावाधिकरणसङ्ग्रहश्लोकाः**

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया
पदानामेकवाक्यत्वं पुनः संहत्य जायते ॥ तर. 531.
प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोप्येकयत्नतः । तर. 532.
शब्दव्यापारनानात्वे शद्धानामिति गौरवम् ।
एको क्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥ तर. 532.
प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति ।
अङ्गमाकृष्यमाणं तु नाङ्गान्तरमसङ्गते ॥ तर. 533.
क्रियापदैकयोग्यत्वे यच्छब्दो न रुजेद्विधिम् ।
कर्तृयुक्तस्य एवान्यः प्रापितार्थानुवादकृत् । तर. 533.
पूर्वपक्षिणा आग्रेयादिषु द्रव्यदेवतासद्भावकथनम्
ध्रौवं साधारणं द्रव्यं देवतामान्त्रवर्णिकी ।
रूपवन्तौ ततो यागौ विधीयेते पृथक् तथा ॥ कण्ट. 549.

वार्तिककारस्तु

अप्राप्तेषु पदार्थेषु न भवन्तिक्रमादयः ।
प्राप्तेषु तदधीनत्वान्न पदार्थविरोधिता ॥ तर. 399.
नित्यं चाचमनं सर्वं पूर्वत्वान्न विरुध्यते ।
नैमित्तिकं तु नित्यस्य क्रमादेर्बाधको भवेत् । तर. 399.
इष्टे स्मृतिप्रमाणत्वे दौर्बल्यं किं निबन्धनम् ।
अनिष्टे तु प्रमेयत्वं पदार्थानां कुतो भवेत् ।
विषयालोचनेनाऽथ स्मृतेस्त्र प्रमाणता ।
नान्योश्रयतापत्तेरेतदप्यवकल्प्यते ।
प्रमेयत्वे हि धर्मत्वात् पदार्थाः बलवत्तराः ।
बलवद्विषयत्वेन स्मृतेः स्यात् तत्प्रमेयता ।
धर्मित्वाच्च बलीयस्त्वं स्वधर्मान् प्रति सम्भवेत् ।
न चैषामप्रमेयत्वे तद्धर्मत्वं प्रमादिना ॥ तर. 400
अतः प्रमाणदौर्बल्ये प्रमेयबलवागियम् ।
व्योमचित्रायते तेन विचारोऽयं न युज्यते ।
विरोधे प्रामाण्यमनपेक्ष्यमिति वदता
अर्थादविरोधे प्रामाण्यमुक्तं तथा सति वेदाविरोधिना महिंसा
सत्यादिशाक्यवचसां प्रामाण्यं प्राप्नोतीति शङ्का
अतः शाक्यादिशास्त्रस्थं वेदवाक्याविरोधि यत् ।
सत्यो क्त्यादिवचस्तत्किं प्रमाणं नेति चिन्त्यते ।
विरोधेनाप्रमाणत्वं पूर्वमेषां निरूपितम् ।
तदभावादतः पूर्वपक्षी प्रत्यवतिष्ठते ॥ तर. 400.

सिद्धान्तसङ्ग्रहः

एवमाद्येन सूत्रेण पूर्वपक्षः कृतोऽधुना ।
न शास्त्रपरिमाणत्वादित्यनेन निराकृतः ।
चतुर्दशैव शास्त्राणि वेदाश्चत्वार एव च ।
धर्मशास्त्रपुराणाङ्गमीमांसान्यायमिश्रिताः ।
शाक्यादिसंहितास्तत्र बाह्याः शिष्टा प्रयो गतः ।

सादृश्येप्यत्र नारोपः स्पष्टभेदप्रतीतितः ।
किन्तु स्वार्थाविनाभूतशौर्यादिगुणयोगतः
पुंभिः प्रयुज्यमानस्य सिंहशब्दस्यगौणता
अतो वेदेऽपि गौणत्वं सम्भवेद् गुणयोगतः । त. 349.

7. i. **तत्सिद्धिपेटिकागताधिकरणसङ्ग्रहः**
तत्सिद्धिजातिसारूप्यप्रशंसालिङ्ग भूमभिः ।
षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता । तर. 352, प्र. 362.

ii. **अपशुशब्दस्य अजादौ प्रवृत्तिकारण प्रदर्शनम्**
गवाश्वादिगतां पूर्वमुपादाय प्रशस्तताम् ।
तदभावोऽन्यपश्वादौ नञ् समासेन बोध्यते । प्र. 362.

8. **अपच्छेदनयप्रवृत्तिप्रकारप्रदर्शनम्**
पौर्वापर्यं विरोधश्च पूर्वाप्राप्यमेव च ।
नियमान्नास्ति यत्रासावपच्छेदनयो भवेत् ॥ न्या. 365.

9. i. **शिष्टाकोपाधिकरणम् ।**
दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥ न्या. 391.

ii. **पूर्वःपक्षः**
श्रुत्युक्तानां क्रमादीनां स्मार्तैराचमनादिभिः ।
व्याकोपस्स्यादतस्तावद्विस्पष्टेव विरुद्धता ।
ततः श्रुतेर्बलीयस्त्वात् स्मृतेः स्यादप्रमाणता ।
पूर्वभाविप्रमाणस्थं प्रमेयस्यात् बलाबलात् ।
ज्यायस्तेनैव निर्णीते न पश्चादितरादरः ।
नैराकांक्ष्यात् प्रमाणानामतः स्मृत्यर्थबाधनम् ॥ तर. 397.

ii. **सिद्धान्तस्तु**
पदार्थप्राप्त्यपेक्षत्वात् क्रमादेरविरोधिता ।
विरोधेपि च दौर्बल्यं पदार्थेभ्यो गुणत्वतः ॥ तर. 398.

अर्थापत्तिस्तु नास्त्यत्र भ्रान्त्यादेरपि सम्भवात् ।
नोच्छिन्नश्रुतिमूलत्वं नित्यतोक्तविरोधतः ।
पठितश्रुतिमूलत्वे स्मृतिप्रणयनं वृथा ।
नित्यानुमेयतायां तु मूलत्वं नैव सम्भवेत् ॥
स्मर्तॄणामपि नास्मद्वत् कल्पनं ह्युपपद्यते ।

ii. **सिद्धान्तस्तु**

वैदिकार्थप्रयोक्तॄणामादरेण परिग्रहः ।
स्मार्तेषु वेदमूलत्वं विना नैवोपपद्यते ।
मन्वादयश्चा वेदेपि प्रवक्तृत्वेन कीर्तिताः ।
तेन तद्वाक्यसत्यत्वं वेदेनैवावधारितम् । तर. 318.

iii. **श्रुतिस्मृत्योः विरोधे श्रुत्यनुष्ठानमिति प्रतिपादनम्**

अप्रामाण्यं विरुद्धानामशक्यार्थविधानतः ।
औदुम्बरी न शक्नोति सर्वां वेष्टयितुं स्पृशन्
वेष्टितां चापि संस्प्रष्टुमतोऽन्योन्यविरोधतः,
प्रमेयापहृतेरेव बाधः स्यात् वह्निशैत्यवत् । तर. 336.
आत्मीयात् परकीयस्य दौर्बल्यं नहि किञ्चन
प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्षसमं हि तत् ।
यावदेकं श्रुतौ कर्म स्मृतौ चान्यत् प्रतीयते
तावत्तयोर्विरुद्धत्वे श्रुत्यनुष्ठानमिष्यते ॥ तर. 338.
कल्प्यस्य शास्त्रस्य तु कल्पनं यन्निरूध्यते मूलनिकृन्तनेन ।
क्लृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरन्ति । तर. 339.

६. **वेदेऽपि गौणीवृत्तिः सम्भवतीति निरूपणम्**

न चैवं मुख्यतापत्तिर्वाच्यस्यावास्तवत्वतः ।
वेदेऽध्यारोपकाभावान्नाध्यारोपस्तु सम्भवी
अतो वैदिकशब्देषु न गौणीवृत्तिरिष्यते ।
अत्रोच्यते न सिंहत्वबुद्धिर्नरि कदाचन ।
विलक्षणाकृतित्वेन विशेषस्यैव दर्शनात् ।

तां च श्रुतिः निक्षिपन्ती नाविरोधेन गच्छति ।
विरोधेच श्रुतिर्लिङ्गं बलीयस्त्वेन बाधते
गार्हपत्ये तु सामर्थ्यं गौणं मन्त्रस्य विद्यते ।
गुणाद्वाप्यभिधानं स्यादित्यत्रैतद्धि साधितम् । तर. 285-86.

3. i. **सामान्यशास्त्रविषशास्त्रयोः पदाहनीययोः विकल्पः इति पूर्वपक्षस्य सङ्ग्रहः**
सामान्यस्यापि लब्धत्वात् प्रत्यक्षेण विशेषवत्
नास्ति लिङ्गादिवद्बाधो नापि बाधोऽति देशवत् । तर. 286.

ii. **सामान्यविहितस्य आवहनीयस्य विशेषविहितैः पदादिभिः बाधः इति सिद्धान्तस्य सङ्ग्रहः**
प्राप्तिः सामान्यशिष्टस्य विशेषे लक्षणावशात् ।
श्रुत्या विशेषशिष्टस्य तस्मादस्ति बलाबलम् । तर. 287
प्रोणस्यापूर्वप्रयुक्तत्वाधिकरणन्यायसङ्ग्रहः

4. i. **व्रीह्यादिसमवेतसंस्कारस्याप्यपूर्वप्रयुक्तत्वनिरूपणम्**
संस्कारोपि ह्यदृष्टत्वादपूर्वमिति गीयते ।
प्रयाजापूर्ववत्तस्मादुभयं स्यात् प्रयोजकम् । तर. 290

ii. **वाङ्नियमरूपः संस्कारः परमापूर्वप्रयुक्तः इति पूर्वपक्षः**
फलवत्परमापूर्वं तच्छेषत्वं ततो भवेत् ।
स्वापूर्वं क्रतुशेषत्वान्न स्वयं फलवद्यतः ॥
फलवच्छेषता युक्ता न तु निष्फलशेषता ।
तस्मान्न साधने रूपे स्वरे भेदोऽभिधीयते ॥

iii. **प्रथमोपस्थित स्वापूर्वप्रयुक्त एव वाङ्नियमः इति सिद्धान्तसङ्ग्रहः**
एवमाश्रियमाणे हि भवेल्लक्षितलक्षणा
स्वापूर्वे लक्षणामात्रं तस्माल्लक्षितलक्षणा ॥
तच्छेषत्वेपि धर्मस्य नानर्थक्यं प्रसज्यते ।
तस्याप्यदृष्टरूपत्वात् फलापूर्वोपयोगतः ॥

4. i. **श्रुतिप्राबलयाधिकरणस्य पूर्वपक्षसङ्ग्रहः**
नैतासां श्रुतिमूलत्वे प्रत्यक्षादि प्रवर्तते ।

iii. **श्रुत्यपेक्षया लिङ्गस्य प्राधान्यमिति प्रथमः पूर्वपक्षः**

यद्वा सामर्थ्यरूपत्वाल्लिङ्गं स्यात् प्रबलं श्रुतेः
वस्तुशक्तचनुसारी हि शब्दः सर्वः प्रवर्तते ॥ तर. 285.

iv. **श्रुतिलिङ्गयोः विकल्पः इति द्वितीयः पूर्वपक्षः**

तत्र स्वतः प्रमाणत्वं लिङ्गादेः श्रुतिवन्मतम् ।
सामर्थ्यालोचनादेव सामर्थ्यं हि प्रतीयते ॥
गार्हपत्यार्थता श्रुत्येत्युभयोः तुल्यकालता ।
तेन द्वयोरुपस्थानं विकल्पेत भविष्यति ॥ तर. 285.

v. **श्रुतिलिङ्गयोः समुच्चयः इति तृतीयः ।**

समुच्चयेन वा मन्त्रः प्रयुज्येत द्वयोरपि
प्रतिप्रधानमावृत्तिर्गुणानां न विरुध्यते
यद्यपि स्या द्बलीयस्त्वं श्रुतेः लिङ्गात्तथापि तु ।
अविरोधादबाधः स्यात् सम्भवीह समुच्चयः ॥

vi. **सिद्धान्तसङ्ग्रहः**

तन्न तावद्बलीयस्त्वं लिङ्गस्य न च तुल्यता ।
विनियोगः श्रुतेः पश्चाल्लिङ्गस्यारादसौ स्थितः ॥
यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते ।
तावदेव श्रुतिर्मन्त्रं गार्हपत्यर्थतां नयेत् ॥
मन्त्रार्थं मन्त्रतो बुद्ध्वा पश्चाच्छक्तिं निरूप्य च ।
मन्त्राकांक्षावशेनेह शेषत्वे श्रुतिकल्पना ।
श्रुत्या प्रत्यक्षया पूर्वं गार्हपत्यङ्गतां गते
निराकांक्षीकृते मन्त्रे निर्मूला श्रुतिकल्पना ॥
तेन शीघ्रं प्रवर्तिन्या श्रुत्या लिङ्गस्य बाधनम् ।
प्रत्यक्षे चानुमाने च यथा लोके बलाबलम् ।
शीघ्रमन्थरगामित्वात्तथेह श्रुतिलिङ्गयोः ।
अविरोधादबाधो यो वर्णितः स न युज्यते ।
लिङ्गस्य हि प्रमाणत्वं मन्त्राकांक्षानिबन्धनम् ।

APPENDIX V C

पूर्वमीमांसाकरग्रन्थेभ्यः उदाहृताः श्लोकाः

1. i. असञ्जात विरोधित्वादर्थवादो यथा श्रुतः
व्याख्येयः तद्विरुद्धस्य विध्युद्धेशस्य लक्षणा ॥ न्या. 276.

उपक्रमाधिकरणन्यायः

ii. **उपक्रमाधिकरणस्य पूर्वपक्षसंग्रहश्लोकाः**
गुणत्वादनुवादत्वादर्थवादस्य लक्षणा
मुख्यस्यापि प्रधानत्वादप्राप्तविषयत्वतः ।
विध्युद्देशो जघन्योपि स्वार्थहानिं न गच्छति ।
मुख्यापि दीक्षणीया हि लभते न स्वधर्मताम् ।
जघन्यस्यापि सोमस्य प्रधानत्वात् स्वधर्मता ।
वक्ष्यते तद्वदत्रापि विध्युद्देशस्य सा भवेत् । तर. 283.

सिद्धान्तसङ्ग्रहः

लब्धात्मनः प्रधानस्य बलीयस्त्वं गुणाद्भवेत् ।
विधुद्देशस्त्वलब्धात्मा लब्धात्मानं न बाधते ॥ तर. 283.

श्रुतिलिङ्गाधिकरणन्यायः

2. i. प्रत्यक्षे चानुमाने च यथा लोके बलाबलम् ।
शीघ्रमन्थरगामित्वात्तथेह श्रुतिलिङ्गयोः ॥ (न्या. 276)

ii. **अत्र लिङ्गवाक्ययोः विरोधः इति निरूपणम् ।**
शेषशेषित्वमात्रं हि श्रुत्यैन्द्रीगार्हपत्ययोः ।
उक्तमन्योन्यविषयनियमस्त्वेकवाक्यतः ॥ तर. 284.
न केवलं श्रुतिलिङ्गयोः लिङ्ग वाक्ययोर्वाविरोधः
किन्तु श्रुतिवाक्ये सहिते लिङ्गेन विरुध्येते इति निरूपणम् ।
सत्यं वाक्यविरोधोस्ति श्रुतिश्चापि विरुध्यते ।
सहिते हि विरुध्येते न तु लिङ्गेन केवले ॥ तर. 284.

३. वर्त्महोमादिभिः आहवनीयस्य बाधाधिकरणम् । जै. X-8-8, न्या. 276, सि. 279, तर. 286, कण्ट. 302, प्र. 309.
४. अग्निष्टोमे उपांशुत्वस्य प्राचीनपदार्थप्रयुक्तत्वाधिकरणम् । जै. IX-1-2, न्या. 276, सि. 279, तर. 288, कण्ट. 303, प्र. 309.
५. प्रोक्षणस्य अपूर्वप्रयुक्तत्वाधिकरणम् । जै. IX-1-2, न्या. 276, सि. 279, तर. 290.
६. प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानाधिकरणम् । जै. XI-2-7, न्या. 276, सि. 279, तर. 292, कण्ट. 305, प्र. 310.
७. श्रुतिप्राबल्याधिकरणम् । जै. I-3-2, तर. 317, 336, कण्ट. 340, प्र. 343
८. शरमयबर्हिषा कौशबर्हिर्बाधाधिकरणम् । जै. X-4-2, कण्ट. 341
९. अर्थवादाधिकरणम् । जै. I-2-1, न्या. 344, सि. 345-47, तर. 348, कण्ट. 551
१०. यजमानशब्दस्य प्रस्तरादि स्तुत्यर्थत्वाधिकरणम् । (तत्सिद्धिपीटिका) जै. I-4-13 to 18, न्या. 344, सि. 345-47, तर. 348, कण्ट. 356.
११. (मन्त्रलिङ्गाधिकरणम्) I-2-4, न्या. 344, तर. 530, कण्ट. 356, 547 प्र. 560-61.
१२. वाजपेयादिशब्दानां नामधेयाधिकरणम् जै. I-4-6, न्या. 344, कण्ट. 358, प्र. 363.
१३. आनुपूर्व्येण अपच्छेदे उत्तरापच्छेदनिमित्तप्रायश्चित्तानुष्ठानाधिकरणम् । जै. VI-5-19, न्या. 364, सि. 365, तर. 367, कण्ट. 371, प्र. 374.
१४. उद्गातुः अपच्छेदेपि सर्वस्वदक्षिणादानाधिकरणम् । जै. VI-5-20, न्या. 364, सि. 366, तर. 368, कण्ट. 372, प्र. 375.
१५. यौगपद्ये अदाक्षिण्यसर्वस्वदाक्षिण्यविकल्पाधिकरणम् । जै. VI-5-18, न्या. 364, सि. 366, तर. 368, कण्ट. 372, प्र. 375.
१६. न तौ पशौ करोतीत्यादिनिषेधस्यार्थवादताधिकरणम् । जै. X-8-2, तर. 382.
१७. पदार्थप्राबल्याधिकरणम् । (शिष्टाकोपाधिकरणम्) जै. I-3-4, न्या. 391, सि. 395, तर. 397, कण्ट. 405, प्र. 411.
१८. प्रणयनशब्देन सौमिकधर्मानतिदेशाधिकरणम् । जै. VII-3-8, न्या. 508, सि. 514, तर. 525, कण्ट. 543, प्र. ५५८.
१९. आश्वमेधिकसवनीयाश्वस्य न चतुस्त्रिंशदिति ब्रूयात् इत्यनेन समस्तायाः ऋचः निषेधाधिकरणम् । जै. IX-4-3, न्या. 508, सि. 515, तर. 528, कण्ट. 545, प्र. 559.
२०. सर्वशाखाप्रत्ययैकताधिकरणम् । II-4-2, कण्ट. 541, प्र. 558.
२१. सौमिकशब्देन सौमिकधर्मानतिदेशधिकरणम् । VII-3-8, कण्ट. 543.
२२. आग्नेयीनामङ्गाङ्गि भावाधिकरणम् । तर. 531, कण्ट. 549, प्र. 561.

APPENDIX V

न्यायामृते तद्व्याख्यानत्रये च उदाहृतानि जैमिनीयसूत्राणि

१. धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् । जै.सू. I-3-1-1, तर. 317, प्र. 343

२. विरोधेत्वनपेक्षं स्यादसति हि अनुमानम् । जै. सू. I-3-21, तर. 336

३. तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायात् ।
जै.सू. I-4-13-23 to 28, सि. 345, तर. 348

४. 'शास्त्रदृष्टविरोधात्' जै.सू. I-2-1-2 कण्ट. 356, प्र. 362

५. अर्थविप्रतिषेधात् जै.सू. I-2-4-36 कण्ट. 356.

६. गुणादविप्रतिषेधः स्यात् जै.सू. I-2-4-47 कण्ट. 356.

७. नामधेये गुणश्रुतेः स्याद्विधानमितिचेत् जै.सू. I-4-6-6, कण्ट. 358

८. पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् जै.सू.VI-5-19-54 सि.365, तर.367, कण्ट.371, प्र.374.

९. विप्रतिषेधाद्विकल्पः स्यात् । जै.सू. VI-5-18-51 सि. 366, तर. 368, कण्ट. 372, प्र. 375.

१०. यद्युद्गाता जघन्यः स्यात् पुनर्यज्ञे ।

११. सर्ववेदसं दद्यात् यथेतरस्मित् । जै.सू. VI-5-20-55 सि.366, तर.368, कण्ट.372, प्र.375.

१२. अपूर्वे चार्थवादः स्यात् जै.सू. X-8-2-5, तर. 382

१३. शिष्टाकोपे विरुद्धमिति चेत् । न शास्त्रपरिमाणत्वात् - जै.सू. I-3-4-5,6, तर. 397, कण्ट. 405, प्र. 411.

१४. प्रकरणंतु पौर्णमास्यां रूपवचनात् । जै.सू. II-2-3-3, प्र. 561.

१५. तदर्थशास्त्रात् । जै.सू. I-2-4-1, कण्ट. 547.

१६. सौमिकं तु प्रणयनमवाच्यं हीतरवत् । जै.सू. VII-3-8-19, प्र. 558.

१७. शाखान्तरेषु कर्मभेदः स्यात् जै.सू. II-4-2-8, प्र. 558.

APPENDIX V B

तरङ्गिणीकण्टकोद्धारप्रकाशेषु विस्तृतया निरूपितानि पूर्वमीमांसाधिकरणानि

१. उच्चैस्त्वादीनां वेदधर्मताधिकरणम् । (उपक्रमाधिकरणम्) जै. III-2-1, न्या. 276, सि. 278, तर. 282, कण्ट. 299. प्र. 308

२. श्रुतिलिङ्गादीनां पूर्वपूर्वप्राबल्याधिकरणम् । (बलाबलाधिकरणम्, श्रुतिलिङ्गाधिकरणम्) जै. III-3-7, न्या. 276, सि. 278, तर. 284, कण्ट. 300, प्र. 308.

APPENDIX IV B

स्मृतीतिहासपुराणेभ्यः उदाहृताः श्लोकाः

१. नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसोगतम् । तर. 32-596

२. प्रत्यक्षमनुमानं च शास्त्रं च विविधागमाः
त्रयं सुविदितं कार्यं धर्मसिद्धिमभीत्सता ॥ मनु. 12-105 सि. 27-423,

३. असत्यमप्रतिष्ठं च जगदाहुरनीश्वरम् ।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽलपबुद्धयः ॥ गीता. 16-8 तर. 30-521

४. त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।
शङ्खे तिष्ठन्ति विप्रेन्द्र तस्मात् शङ्खं प्रपूजयेत् ॥ प्र. 21-330

५. अष्टाशीतिसहस्राणि विस्तीर्णं योजनानि तु ।
प्रमाणं तत्र विज्ञेयं कलाः पञ्च दशैव तु ॥ प्र. 26-411

६. स्मृतिः प्रत्यक्षमैतिह्यमनुमानचतुष्टयम् ।
प्रमाणेष्वनवस्थानाद्विकल्पाद् स विरज्यते ॥ भारते तर. 27-430

७. शमलं पापमुद्दिष्टं रागद्वेषादिकं तथा ।
अपराधश्च शमलं मलं च शमलं विदुः ॥ कर्मनिर्णयः प्र. 1-7

Note: The first number indicates the topic number and the second the page number in Appendix II to IV.

८. प्रतियोगिनि दृष्टे च जागृज्ज्ञाने मृषाभवेत् ।
स्वप्नादिबुद्धिरस्माकं तव भेदोऽपि किं कृतः ।

(भट्टवार्तिके बौद्धं प्रति) न्या. 27-414, सि. 419

९. असंकीर्णव्यवहृतेः योगिनां परमाणुषु ।
विशेषकल्पने तत्र विशेषेच्छावृथा तव ॥ प्र. 695

१०. दुष्टज्ञानगृहीतार्थप्रतिषेधोऽपि युज्यते ।
गृहीतमात्रबाधेतु स्वपक्षोपि न सिद्धचति ॥

(भट्ट वार्तिके बौद्धंप्रति) न्या. 27-415, 27-421

११. इह जन्मनि केषाञ्चिन्नतावदुपलभ्यते ।
योग्यावस्यागतानां तु न विद्मः किं भविष्यति ॥

(भट्टवार्तिके बौद्धं प्रति) न्या. 27-418, सि. 422

१२. योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते ।
भवेत्तत्रप्रतीकारः स्वतोऽसिद्धेतु का क्रिया ॥ (तदुक्तं वार्तिके बौद्धं प्रति) न्या. 566

१३. सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः ।
विरोधान्नहि सिंहत्वं सामान्यं वृक्षसिंहयोः ॥ तदुक्तं वार्तिके बौद्धं प्रति न्या. 568

१४. साधकं चेदवश्यं च परमार्थास्तिता भवेत् ।
सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते ॥ वार्तिके बौद्धं प्रति न्या. 569

१५. तस्माद्यन्नास्ति नास्त्येव यच्चास्ति परमार्थत ।
तत्सत्यमन्यन्मिथ्यैव न सत्यद्वयकल्पना ॥

१६. तुल्यार्थत्वेऽपि तेनैव मिथ्यासंवृतिशब्दयोः ।
वञ्चनार्थमुपन्यासो लाला वक्रासवादिवत् ॥ वार्तिके बौद्धं प्रत्युक्तम् न्या. 567.

१७. अन्यत् चेत् संविदो मूलं न तद्भासेत संविदि ।
भासते चेत् कुतः सर्वो न भासेतैकसंविदि ।
नियामकं न सम्बन्धं पश्यामो नील तद्धियोः ॥ आत्मख्यातिवादिनः बौद्धाः । न्या. 619

८. स्वच्छेन्तःकरणेऽशनिप्रसृमरे नेत्रादिमार्गोद्गते ।
तत्तद्ग्राह्यचयात्मना परिणते बिम्बीभवन्ती चितिः ॥

११. एकाप्यर्थमनोविशेषकवशात् द्वैतं प्रपन्ना सती ।
अज्ञानं प्रकटीकरोति विषयान् ज्ञातं मयेदंत्विति ॥ तर. 13-146
वेणुसंघर्षजो वह्निः दग्ध्वाशाम्यति तद्वनम् ।
एवं गुणव्यत्ययजो वेदः शाम्यति तद्यथा ॥ प्र. 17-242

APPENDIX IV A

न्यायबौद्धाद्याकरग्रन्थेभ्यः उदाहृताः श्लोकाः

१. स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः ।
प्रत्ययस्य मृषा दृष्टः स्वप्नादिप्रत्ययो यथा । (इति बौद्धोक्तयुक्तिः) न्या. 3-126

२. शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का कुतस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥
न्यायकुसुमाञ्जलिः, सिद्धि. 19-252, तर. 19-260

३. द्वे सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना
लोके संवृतिसत्यत्वं सत्त्वं च परमार्थतः ॥ इति बौद्धोक्तेः. न्या. 30-512

४. विकल्पदूषणाभ्यां स्वरूपं नैव हीयते ।
प्रमाणसिद्धं तत्कर्तोपेक्ष्यते भूतवज्जनैः ॥ प्र. 33-696

५. स्वप्नधीसाम्यतो बुद्धेः बुद्ध्यार्थस्य सहेक्षणात् ।
तद्भेदेनानिरूप्यत्वात् ज्ञानाकारोऽर्थ इष्यताम् ॥
विज्ञानवादिनः, सि. 30-522, तर. 30-538, 33-644

६. अर्थेनैव विशेषो हि निराकारतया धियाम् । न्यायकुसुमाञ्जलिः, सि. I-27
उत्सर्गतोऽपि यत् प्राप्तमपवादविवर्जितम् ।
व्यभिचार्यपवादेन मानमेव भविष्यति ॥ न्या. I-27-418

७. धर्मस्य तदतद्रूपविकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो मतः ॥
उक्तं च उदयनाचार्यैः न्या. 12-111 (प्र. 12-126)

APPENDIX III D

अन्याद्वैताकरग्रन्थेस्य उदाहृताः श्लोकाः

१. न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः ।
तद्बाधने बलिनिवेदनये जयश्रीः
नो चेदनिन्द्यमिदमीदृशमेव विश्वम्
तथ्यं तथागतमतस्य तु कोऽवकाशः ॥ (आत्मतत्त्वविवेके) सि. 30-522

२. तत्परत्वात् परत्वाच्च निर्दोषत्वाच्च वैदिकम् ।
पूर्वस्य बाधकं नायं सर्प इत्याप्तवाक्यवत् ॥ आनन्दबोधः न्या. 24-365

३. यत्नेनुमितोप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवानुमीयते ॥ वाचस्पतिमिश्रः सि. 25-382

४. अंशिनः स्वांशगात्यन्ताभावप्रतियोगिनः ।
अंशित्वादितरांशीव दिगैवेषागुणादिषु ॥ तत्त्वप्रदीपः, कण्ट. 16-224

५. कीदृक्प्रत्यगिति चेत् तादृगीदृगिति द्वयम् ।
यत्र न प्रसरत्येतत् प्रत्यगित्यवधार्यताम् । न्या. 33-625

६. घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः ।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत् । न्या. 33-623

७. चैतन्यं द्विविधं प्रोक्तं वृत्तौ यत् प्रतिबिम्बितम् ।
आभास उच्यतेऽन्यच्चानाभास इति शब्दितम् ॥ प्र. 3-693

८. चैत्रागः स्वविषयानित्यज्ञानातिरेकिणा ।
तदध्यक्षेण संवेद्यः प्रत्यक्षत्वात् घटादिवत् ॥ न्या. 31.

९. न सन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षयः ।
यक्षानुरूपो बलिरित्याचार्याः प्रत्यपीपदन् ॥ प्र. 29, 33-691

१०. सन्नासन्न सदसन्न चानुभयतत्त्वकम् ।
विमतं तर्कपीड्यत्वान्मरीचिषु यथोदकम् ॥ सि. 30-521, कण्ट. 30, तर. 30-536

APPENDIX III - C

खण्डनखण्डखाद्यादुदाहृताः श्लोकाः

१. अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ॥ खण्डन I-4, न्या. 32-588, सि. 32, क. 32

२. पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥ खण्डन I-5,

३. पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥
खण्डन I-23, सि. 13-313, 32-592, तर. 13-323, कण्ट. 13-325

४. बाधिताऽपन्हवा मानैर्व्यावहारिकमानता ।
मानानां तात्त्विकं किञ्चिद् वस्तु नाश्रित्य दुर्भणा ॥ खण्डन. न्या. 30 सि. 25-381

५. बाधेऽदृढेऽन्यसाम्यात्किं दृढे तदपि बाध्यताम् ।
क्व ममत्वं मुमुक्षूणां अनिर्वचनवादिनाम् ॥ खण्डन. I-33, सि. 635

७. अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति यः ।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥
खण्डन. I-11, न्या. 27-417, सि. 27-422

संक्षेपशारीरकादुदाहृताः श्लोकाः

१. आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥
सं.शा. - I-319, तर. 13-141, सि. 29-460, तर. 29-473, प्र. 33

२. बहु निगद्य किमत्र वदाम्यहं
श्रृणुत सङ्ग्रहमद्वय आत्मनि ।
सकलवाङ्मनसातिगता चितिः
सकलवाङ्मनसव्यवहारभाक् ॥ सं.शा. I-331, तर. 13-138

३. अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः ।
अक्षादीनां स्वतः सिद्धो यत्र तेषां प्रमाणता ॥
सु.वा. I-1-1002, सिद्धि. 15-200, तर. 15-206,

४. प्रत्यभिज्ञायमानेऽर्थे तदेवेदमिति ध्रुवे ।
लिङ्गमाभासतामेति प्रत्यक्षार्थविरुद्धदृग् ॥ सु.वा. I-2-58 न्या. 25-379

५. अतोऽवबोधकत्वेन दुष्टकारणवर्जनात् ।
अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवच्छ्रुतेः ॥
सु.वा. I-1-882, न्या. 25-417, सि. 27-422

६. परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ सु.वा. I-1-159, न्या. 30-510

७. सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते
प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥ मण्डनोक्तिः (ब्र.सि. IV-3) न्या. 30-510

८. सर्वतीर्थदृशां सिद्धिः स्वाभिप्रेतस्य वस्तुनः ।
यदभ्युपगमादेव तत्सिद्धिर्वार्यते कुतः ॥ सु.वा. IV-3-156

९. सर्वतीर्थदृशां तावत्सामान्यं मानलक्षणम् ।
अज्ञातार्थावगमनं त्वदुक्ते तन्न युज्यते ॥ सु.वा. IV-3-158

१०. स्वतः सिद्धोऽथवासिद्धो देहादिस्ते भवन् भवेत् ।
प्रमाणानां प्रमाणत्वं नोभयत्रापि लभ्यते ॥ सु.वा. IV-3-160

११. प्रमाणान्यन्तरेणापि देहादिश्चेत् प्रसिद्ध्यति ।
वद प्रमाणैः कोऽन्वर्थी न हि सिद्धस्य साधनम् ॥ सु.वा. IV-3-165

१२. स्वतोऽसिद्धेऽप्रमेये तु नासतो व्यञ्जिका प्रमा ।
नाभिव्यनक्ति सविता शशशृङ्गं स्फुरन्नपि ॥ सि. 33-638, कण्ट 33-673 IV-3-162

१३. घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः ।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत् ॥ सि. 33-638

१४. परमार्थप्रमेयेषु या फलत्वेन संमता ।
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ न्या. 30.

१४. दीर्घभ्रान्तिकरी चेत् स्यादतत्त्वावेदकप्रमा ।
रज्जुसर्पादिविज्ञानादाधिक्यादप्रमा मता ॥ प्र. 30-563

१५. दर्पणाभिहता दृष्टिः परावृत्य स्वमाननम् ।
व्याप्नुवन्त्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम् ॥ तर. 32-595, प्र. 32-612

APPENDIX III - A

अद्वैतसिद्धौ सङ्गृहश्लोकाः

१. तस्मादध्यक्षयोग्यस्य सत्त्वस्येहानिरुक्तितः ।
नाध्यक्षबाधौ मिथ्यात्वलिङ्गस्यात्रोपपद्यते ॥

२. न लौकिकं न सामान्यजन्यं साक्ष्यात्मकं न च ।
प्रत्यक्षं बाधते लिङ्गं मिथ्यात्वस्यानुमापकम् ॥ सि. 19-255

३. तृणादेर्भासिकाऽप्येषा सूर्यदीप्तिस्तृणं दहेत् ।
सूर्वकान्तमुपारुह्य तन्न्यायं चिति योजयेत् ॥ 13-171

४. बाधेन सोपाधिकतानुमाने उपायभावेन सहोपलम्भः ।
सारूप्यतो बुद्धितदर्थभेदस्थूलावभासो भवतोपि तुल्यः ॥
सि. 30-522, तर. 30-522, कण्ट. 30-557

६. हेतवोऽभीष्टसिद्धौ च सम्यञ्चो बहवश्च नः ।
अल्पाः परस्य दुष्टाश्चेत्यत्र सर्वमुदीरितम् ॥ सि. 29-467

७. अभीष्टसिद्धावनुकूलतर्कबलाबलं चात्र परीक्ष्य यत्नात् ।
प्रवक्ष्यते दोषगणः परेषां न खेदनीयं तु मनोऽधुनैव ॥ सि. 29-467

APPENDIX III - B

सुरेश्वरवार्तिकादुदाहृताः श्लोकाः

१. तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥
सु.वा. I-1-183 न्या. 4-37, सि. 9-99, तर. 9-101

२. जीव ईशो विशुद्धा चिद् भेदस्तस्यास्तयोर्द्वयोः ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥ तदुक्तं वार्तिके. प्र. 29-505, तर. 4-41

२. सार्वज्ञादिगुणं जीवाद् भिन्नं ज्ञापयति श्रुतिः
ईशं तामुपजीव्यैव वर्तते ह्यैक्यवादिनी ॥ अनु. II-1-1 तर. 21-322

३. यजमानप्रस्तरत्वं यथा नार्थः श्रुतेः भवेत् ।
ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः ॥ अनु I-1-1 न्या. 23-349

४. शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते ।
अनुभूतिविरोधेन कथमेकत्वमुच्यते ॥ अनु. II-2-28 तर. 21-322

५. यदि स्वतस्त्वं प्रामाण्ये विश्वसत्ता कथं न ते ।
प्रामाण्यस्य च मर्यादा कालतो व्याहता भवेत् । अनु. III-2-1, 28-445

६. अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद् भवेत् ।
सर्वापरोक्षविद्विष्णुर्विश्वदृक् तन्नतन्मृषा ॥ प्र. 29-499

७. साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता ।
स्वीकृतं ह्यविशेषस्य साध्यासाधकता पुनः ॥ अनु. I-1-1, न्या. 31-568

८. सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम् ।
तदेवार्थक्रियाकारि तत्सदेवार्थकारकम् ॥ अनु. (I.4-29), न्या. 32-588

९. मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च ।
भागशो भागशस्त्वेनमनुगच्छन्ति सर्वशः ॥ भाष्य III-1-4 (ब्रह्माण्ड) कण्ट. 15-210

१०. अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात्पक्षे नोपाधिसंभवः ॥ वि.त.नि. प्र. 16-232

११. प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् । वि.त.नि.(ब्रह्मतर्क) सि. 20-278

१२. न च मायाविना माया दृश्यते विश्वमीश्वरः ।
सदा पश्यति तेनेदं न मायेत्यवधार्यताम् ॥ तत्त्वोद्योत (ब्रह्माण्ड) प्र. 29-504

१३. मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य च सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥

वादरत्नावली, p. 15, न्या. 12-111, प्र. 12-125,

२८. दृग्दृश्ययोः न सम्बन्ध इति वाक्योत्थसंविदि
अनभ्यासात् तदर्थस्य सम्बन्धोऽन्यस्तयोर्मतः ॥ 33-622

२९. यादृशं विषयत्वं ते वृत्तिं प्रति चिदात्मनः ।
तादृशं विषयत्वं मे दृश्यस्यापि दृशं प्रति ॥ 33-625

तरङ्गिण्यां सङ्ग्रहश्लोकाः

१. मुख्यमर्थं वदन्त्येव शशशृङ्गादिकाः गिरः ।
असद्विशेषं तत्रापि विशेषोऽस्तीति ॥

२. विमतिर्नाक्षग इति त्वदुक्तिव्यक्तवेदनः ।
आत्मा ज्ञानौषधं सिद्धं विमृश्यारोग्यमाप्नुयात् ॥ तर. 30-534

कण्टकोद्धारे सङ्ग्रहश्लोकाः

१. तस्मादध्यासयोग्यस्य सत्त्वस्येह निरुक्तितः ।
प्रत्यक्षबाधो मिथ्यात्वलिङ्गस्यात्रोपपद्यते ।
लौकिकं चैव सामान्यजन्यं साक्ष्यात्मकं त्वपि
प्रत्यक्षं बाधतेलिङ्गं मिथ्यात्वस्यानुमापकम् ॥ कण्ट. 19-270

२. सम्यञ्चो बहवोऽस्माकं सत्यत्वे हेतवो मताः ।
मिथ्यात्वे कोपि हेतुस्तु सम्यग् नासीति निश्चितम् ॥ कण्ट. 29-498

२. तस्मादध्यक्षयोग्यस्य सत्त्वस्येह निरुक्तितः ।
प्रत्यक्षबाधो मिथ्यात्वलिङ्गस्यात्रोपपद्यते ॥
लौकिकं चैव सामान्यजन्यं साक्ष्यात्मकं त्वपि ।
प्रत्यक्षं बाधते लिङ्गं मिथ्यात्वस्यानुमापकम् ॥ कण्ट. 19-270

APPENDIX II - B

द्वैताकरग्रन्थेभ्यः उद्धृताः श्लोकाः

१. नासीदस्ति भविष्यच्च तदिति ज्ञानमेयता ।
यदि बाधस्तदाऽसत्त्वं तेनैवाङ्गीकृतं पुनः ॥ अनु II-3-13 न्या. 8-69

बाधाभावोऽत्र निर्णीतः शशशृङ्गाद्यभाववत् ।
अन्यथा शशशृङ्गादिरपि शङ्कचेत बाधवत् ॥ 27-418

स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम् ।
प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यताम् ॥ 28-444

प्रातिभासिकवैधर्म्यं तव येन प्रसिद्धचति ।
घटादेः परमार्थत्वं मम तेनैव सेत्स्यति ॥ 28-445

यद्यक्षसिद्धं विश्वस्य सत्यत्वं नैव तात्त्विकम् ।
तर्ह्यक्षसिद्धं रूप्यादिमिथ्यात्वं तात्त्विकं कथम् ॥ 28-446

पारमार्थिकसत्यत्वं न चेत्प्रत्यक्षगोचरः ।
तन्निषेधश्रुतीनां स्यादप्रसक्तनिषेधता ॥ 28-446

अतत्त्वं तात्त्विकत्वेन प्रपञ्चं नावभासयेत् ।
अक्षं यदि तदा तस्यातत्त्वावेदकता कथम् ॥ 28-446

असत्प्रतीतिकान्यत्वात् प्रमाणविषयत्वतः ।
अर्थक्रियाकारितादेर्विश्वं सत्यमिति स्थितम् ॥ 29-456

धर्मिप्रमातृधर्मादिभेदान्न द्वैतगीर्वृथा ।
अहिंसावाग्भिन्नशाखावाग्द्विप्रणयनादिवत् ॥ 30-508

यथा नापहरेद् द्वैताभावश्रुत्यर्थमक्षधीः ।
तथा नापहरेद् द्वैतश्रुत्यर्थमपि दुर्बला ॥ 30-509

अन्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः ।
नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः ॥

शब्दवृत्तेर्हि विषयो ब्रह्म तत्र न कल्पितम् ।
यथा तथा दृग्विषयो दृश्यं न दृशि कल्पितम् ॥

अविद्याविषयो ब्रह्म ह्यविद्यायां न कल्पितम् ।
यथा तथा दृशा ग्राह्यं न विश्वं दृशि कल्पितम् ॥ 33-624

अन्यापेक्षाभिलाषत्वमस्त्यौपनिषदात्मनि ।
त्वदुक्तास्वप्रभत्वं च रूप्ये नास्त्यस्ति चात्मनि ॥ 13-131

६. ज्ञातृज्ञेयविहीनं ते ब्रह्म ज्ञानात्मकं यदि ।
भोक्तृभोज्यविहीनाऽपि भवेत्तर्हि भुजिक्रिया ॥ 14-177

७. कालादिर्न परिच्छिन्न अग्र आसीदथामृतः ।
इत्यादिश्रुतिभिर्नो चेद् दुर्वारा व्याहतिर्भवेत् ॥ 15-197

८. यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि ।
तत्र स्यात्तदनिर्वाच्यं चेदिहापि तथाऽस्तु नः ॥ 19-242, 19-249

९. त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता ।
सत्तोच्यतेऽध्यस्ततुच्छे तं प्रति प्रतियोगिनी ॥ 19-248

१०. तत्परत्वमसिद्धत्वात्परत्वं व्यभिचारतः ।
निर्दोषताऽन्यथासिद्धेः प्राबल्यं नैव साधयेत् ॥ 24-365

११. तात्त्विकादित्यतां यूपस्याश्रित्य शरणं श्रुतिः ।
विरोधादुपजीव्येन न बिभेति कदाचन ॥ 25-379

१२. अहेतुकार्यशङ्केव स्वक्रियादिविरोधतः ।
भाविबाधकशङ्का न युक्तेऽध्यक्षे श्रुताविव ॥ 27-417

१३. स्वार्थनिश्चयरूपेण निश्चला ह्यपरोक्षधीः ।
विजातीयप्रमाणेन केवलेन न बाध्यते ॥ 26-392

१४. प्रत्यक्षे क्लृप्तदोषाणामभावोऽत्र विनिश्चितः ।
अन्यस्य कल्पना नित्ये वेदेऽपि न निवार्यते ॥ 27-416

१५. स्वाप्नाद्विशेषस्यासिद्धौ प्रपञ्चस्याद्वयश्रुतिः ।
स्यात्फलेन सह स्वाप्नी सिद्धौ शङ्काक्षजे कुतः ॥
न हि प्रत्यक्षशब्दत्वकृतं वैषम्यमीक्षते ।
बाधाबाधकृतस्त्वेव विशेषः संप्रदृश्यते ॥ 27-417

19) ब्रह्मतर्कः - तर. 281 भारत तर. 224
20) मकरन्दः - न्या. 68 कण्ट. 88 प्र. 95
21) मिथ्यात्वानुमानखण्डनटीका - प्र. 50
22) विवरणम् - न्या. 176, 392, सि. 179, कण्ट. 410
23) वार्त्तिकम् (सुरेश्वर) - न्या. 37, 379, सि. 422
24) भट्टवार्तिकम् - सि. 421-22. कण्ट. 302, तर. 187, 532
25) वाचस्पत्यम् - तर. 368
26) शाबरभाष्यम् - न्या. 344 सि. 346 प्र. 364
27) शास्त्रदीपिका - तर. 295, कण्ट. 361, प्र. 560
28) सङ्क्षेपशारीरकम् - सि. 460 तर. 138, 536
29) षष्टीदण्डकः - तर. 634
30) बृहदारण्यकभाष्यम् - सि. 514

Abbrivation: न्या - न्यायामृतम्, सि - अद्वैतसिद्धिः, तर - तरङ्गिणी, कण्ट - कण्टकोद्धारः, प्र - प्रकाशः, The numbers indicate the page numbers

APPENDIX II A
न्यायामृते सङ्ग्रहश्लोकाः

१. स्वरूपेण त्रिकालस्थनिषेधो नास्ति ते मते ।
रूप्यादेस्तात्त्विकत्वेन निषेधस्त्वात्मनोऽपि च ॥ 8-70

२. विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभूयते ।
किं त्वधिष्ठानवत् सत्ये तदज्ञानेऽनुभूयते ॥ 9-98

३. अनिर्वाच्येऽप्रसिद्ध्यादिः प्रतीते प्रतिषेध्यता ।
स्वाश्रयेऽत्यन्तविरहः सद्विलक्षणता तथा ॥
इति पक्षत्रयेऽत्यन्तासत्त्वं स्यादनिवारितम् ।
धीनाश्यत्वे त्वनित्यत्वमेव स्यान्न मृषात्मता ॥ 11-106

४. मिथ्यात्वं यद्यबाध्यं स्यात् सदद्वैतमतक्षतिः ।
मिथ्यात्वं यदि बाध्यं स्याज्जगत्सत्यत्वमापतेत् ॥ 12-111

५. न धर्मादौ फलव्याप्तिर्वृत्तिव्याप्यत्वमात्मनि ।
अज्ञातत्वादिरूपेण चिद्वेद्यत्वं तु चित्यपि ॥

APPENDIX I

The Authors and the works quoted in

Nyayāmrita, Advaita Siddhi and the three commentaries

The Authors ग्रन्थकर्तारः

1) आनन्दबोधः – न्या. 38, 265
2) खण्डनकृत् – न्या. 417, 588 सि. 381, 592, 635, प्र. 618, 688.
3) चित्सुखः – न्या. 38 सि. 220
4) नृसिंहाश्रमः – कण्ट. 108
5) बृहद्विवरणकारः – तर. 646
6) भास्करः – तर. 12
7) भगवत्पादाः (श्रीआनन्दतीर्थाः) – प्र. 126. प्र. 126 प्र. 558
8) मणिकारः (मणिकृत्) – प्र. 46
9) भाष्यकारः (शबर स्वामिन्) – तर. 291, 398.
10) मण्डनः – न्या. 218, 510
11) रुचिदत्तः – प्र. 24
12) वार्तिककारः (वार्तिककृत्-सुरेश्वरः) – न्या. 407, 520, सि. 99, 200, 638, तर. 101, 206
13) वार्तिककारः (वार्तिककृत् कुमारिलः) – कण्ट. 406 तर. 187, 291, 350, 399
14) वाचस्पतिः – न्या. 344, 364, 509, 585, कण्ट. 548 सि. 382.
15) शिरोमणिः – तर. 225

The Works - ग्रन्थाः

1) अनुव्याख्यानम् – तर-82
2) आत्मतत्त्वविवेकः – सि. 522
3) कल्पतरुः – सि. 133
4) अधिकरणमाला (मीमांसाग्रन्थः) – प्र. 698
5) कर्मनिर्णयः (द्वैतवेदान्तग्रन्थः) – प्र. 7
6) टुप्टीका – न्या. 364 तर. 352-526
7) तत्त्वप्रदीपः (प्रदीपिका) – तर. 224, 384
8) तन्त्ररत्नम् – तर. 526
9) तन्त्रसारः – कण्ट. 361
10) तात्पर्यचन्द्रिका – कण्ट. 210
11) नयविवेकः – न्या. 509 सि. 516
12) द्रव्यकिरणावली – प्र. 695
13) न्यायकुसुमाञ्जलिः – सि. 252 तर. 260
14) न्यायदीपावली – न्या. 47 प्र. 49
15) न्यायसुधा – प्र. 20
16) प्रमाणमाला – न्या. 47, 198, प्र. 50
17) प्रमाणलक्षणम् (जैमिनीयसूत्राणि) – कण्ट. 340, 356, 405, प्र. 343, 362
18) बौद्धधिक्कारः – न्या. 569, 626, तर. 225, 656

पटेपि विद्यमानत्वेन घटज्ञानावच्छेदकत्वव्याप्यत्वाभावात् तावत्युक्ते घटज्ञानावच्छेदकत्वव्याप्ये एतद्घटत्वे सामान्याकारेण घटज्ञानविषयत्वरूपत्वं स्यादत उक्तं साक्षादिति। एतद्घटत्वादिकं तु न तथा तस्य घटज्ञानावच्छेदकत्वव्याप्यघटत्वन्यूनवृत्तित्वात् तद्व्याप्यान्यूनवृत्तित्वस्येह साक्षात्पदार्थतया विवक्षितत्वात्। धर्मपदं स्वरूपकथनं। एवंचेद्देवदत्तात्मनोपि कर्तृतया ज्ञानावच्छेदकत्वेन देवदत्तात्मत्वेऽतिव्याप्तिः। यत्र देवदत्तात्मत्वं तत्र घटज्ञानावच्छेदकत्वमिति व्याप्तेर्देवदत्तात्मनि सत्त्वात्। एवं च घटज्ञानावच्छेदकत्वसाक्षाद्व्याप्य धर्मभूतदेवदत्तात्मत्वं घटज्ञानविषयता स्यादतो ज्ञानकरणसन्निकर्षसमानाधिकरणेति व्याप्यधर्मविशेषणमभिहितं। एवंच देवदत्तात्मत्वे नातिव्याप्तिः देवदत्तात्मत्वस्य ज्ञानकारणीभूतेंद्रियार्थसन्निकर्षसमानाधिकरणत्वाभावात्। ननु सामान्यतो ज्ञानकारणेत्येव विवक्षितत्वादात्ममनस्सन्निकर्षस्य देवदत्तात्मनि सत्त्वात्तत्सामानाधिकरण्यं देवदत्तात्मत्वेप्यस्तीति चेन्न। इंद्रियार्थसन्निकर्षरूपसन्निकर्षविशेषस्यैव विवक्षितत्वात्। यद्वा घटज्ञानत्वेऽतिव्याप्तिः यत्र घटज्ञानत्वं तत्र ज्ञानावच्छेदकत्वं यथा घटज्ञाने घटज्ञानमस्तीति ज्ञानावच्छेदकत्वात् ज्ञानावच्छेदकत्वं चास्ति घटज्ञाने प्रकारत्वेन प्रतीयमानस्यैव घटज्ञानत्वस्यैव ज्ञानावच्छेदकत्वात्। एवंच ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यभूते घटज्ञानत्वेऽतिव्याप्तिवारणाय घटज्ञानकारणसन्निकर्षसमानाधिकरणेत्युक्तं। घटज्ञानकारणीभूतस्य घटेंद्रियसन्निकर्षस्य घटज्ञानेऽवृत्तित्वेन घटज्ञानत्वस्य तदसमानाधिकरणत्वात् नातिव्याप्तिरिति ध्येयं। नन्वेवं घटत्ववत्तत्समनियतं कंबुग्रीवादिमत्त्वं घटत्वप्रकारकप्रमाविशेष्यत्वादिकमपि विषयत्वं स्यात् उक्तलक्षणसत्त्वादिति चेन्न। इष्टापत्तेरिति केचित्। वस्तुतस्तु व्याप्यधर्मे लघुभूतेति विशेषणं देयं। एवंच कंबुग्रीवादिमत्त्वाद्यपेक्षया घटत्वस्य लघुभूतत्वेन तदेव विषयत्वं नेतरत् गौरवात्। व्याप्यधर्मे लघुभूतत्वं तार्किकाणामपि संमतं। अन्यथा घटकारणताव्याप्यत्वं दंडत्वस्येव रूपवद्दंडत्वस्यापि स्यात्। वह्निव्याप्यत्वं धूमस्येव नीलधूमत्वस्यापि स्यादित्यतिप्रसंगवारणाय व्याप्यधर्मे लाघवस्य विवक्षितत्वादित्यतिप्रसंगो मणिकृता परिहृतः। एवमिहापीति न दोष इति सांप्रदायिकोर्थः॥ ॥दृग्दृश्यसंबंधानुपपत्तिभंगविवरणं॥

श्रीनिवासतीर्थविरचिते
इति न्यायामृतप्रकाशे प्रथमपरिच्छेदे
प्रथमोभागः



करणत्वेनाभिमतयोर्लिंगज्ञानवाक्यज्ञानयोर्लिंगिवाक्यार्थाभ्यां संबंधाभावादव्याप्तिरित्यत आह॥ लिंगज्ञानस्येत्यादिना॥ तव्याप्तेति॥ लिंगिव्याप्तं यल्लिंगं तेन संबंधः लिंगिव्याप्तलिंगविषयकत्वमिति यावत्॥ तत्परेति॥ वाक्यर्थतात्पर्यकेत्यर्थः। वाक्यार्थपरवाक्यविषयकत्वमिति यावत्। नन्वथाप्यनुमितौ व्यापकतावच्छेदकादेरपि प्रतीयमानत्वेन तस्य लिंगज्ञानेन व्याप्तिद्वारकसंबंधाभावात्तद्विषयकत्वं न स्यादित्यत आह॥ एवमन्यत्रापीति॥ व्यापकतावच्छेदकावच्छिन्नलिंगिव्याप्तलिंगविषयकत्वं लिंगज्ञानस्य संबंध ऊह्यः। तेन व्यापकतावच्छेदकस्याप्युक्तक्रमेण लिंगज्ञानेन संबंधोस्त्येवेति न कोपि दोष इति द्रष्टव्यं। ननु संयोगसमवाययोरेव सन्निकर्षत्वादुक्ताः संस्कारादयः सन्निकर्षा अप्रामाणिका एवेति चेत्तत्राह॥ नहीति॥ सन्निकर्षः विषयत्वलक्षणे विवक्षितः॥ किंत्विति॥ विवक्षितमिति शेषः। ननु लिंगज्ञानादेर्लिंग्यादिना तव्याप्तलिंगसंबंधादिकमेव सन्निकर्ष इत्युक्तं तदयुक्तं लिंगज्ञानस्य लिंगसंबंधित्वं नाम लिंगविषयकत्वमेव संबंध इति विषयलक्षणांतर्गतसन्निकर्षस्यापि पुनर्विषयघटितत्वादात्माश्रय इत्याशंक्याह॥ यद्यपीति॥ लिंगादिना लिंग्यादिव्याप्तलिंगादिनेत्यर्थः। विषयित्वं विषयवत्वं विषयीकारित्वमिति यावत्॥ स इदानीमिति॥ तव्याप्तलिंगसंबंधो लिंगज्ञाने तत्परवाक्यसंबंधश्च वाक्यज्ञाने सन्निकर्ष इत्येव व्यवहर्तव्यमित्यर्थः। ननु यत्सन्निकृष्टेनेति लक्षणं नित्येश्वरज्ञानविषयेऽव्याप्तमित्यत आह॥ इदंचेति॥ ईश्वरज्ञानव्यावृत्तये जन्यपदं। अतीतादिविषयकानुमितावव्याप्तिपरिहारायोक्तं। नियतविषयकेति। वर्तमानावर्तमानविषयकेत्यर्थः। जन्याजन्यज्ञानविषयसाधारणलक्षणमाह॥ अथवेति॥ यथा पाकजरूपवतीति॥ यथा पाकजरूपवती पृथिवीत्यत्र पाकजरूपवत्त्वं न पृथिव्या लक्षणं वज्रादौ पाकेन रूपपरिवर्तनाभावात्पाकजरूपवत्त्वं पृथिवीप्रभेदे वज्रादावव्याप्तमित्याशंक्य यथा नाऽव्याप्तिस्तथा पृथिवीलक्षणमुक्तं। पाकजरूपेति। पाकजरूपसमानाधिकरणा या द्रव्यत्वसाक्षाद्व्याप्याजातिस्तद्वती पृथिवी तत्त्वं पृथिवीत्वमित्यर्थः। जातिमती पृथिवीत्युक्ते गुणादावतिव्याप्तिरत उक्तं द्रव्यत्वव्याप्यजातिमतीति। तावत्युक्ते व्याप्यव्याप्यस्य सुतरां व्याप्यत्वेन द्रव्यत्वव्याप्यकरकत्वादेरपि द्रव्यत्वव्याप्यत्वात्तादृशजातिमति करकादावतिव्याप्तिरत उक्तं साक्षादिति। तावत्युक्ते द्रव्यत्वसाक्षाद्व्याप्यजातिभूतास्वजातिमतीष्वप्स्वतिव्याप्तिरतउक्तं पाकजरूपसमानाधिकरणेति। अस्वस्य पाकजरूपसमानाधिकरणत्वाभावान्न दोषः। तथाच वज्रादौ नाव्याप्तिः। तत्रापि वस्तुगत्या घटादौ पाकजरूपसमानाधिकरणा या द्रव्यत्वसाक्षाद्व्याप्या जातिः पृथिवीत्वं तद्वत्त्वस्य सत्त्वादिति लक्षणमुच्यते। एवमेव जन्याजन्यज्ञानविषयत्वमपि निर्वक्तुं शक्यमित्याह॥ तथा ज्ञानकारणेति॥ ज्ञानकारणीभूतो यस्सन्निकर्षःइंद्रियार्थसन्निकर्षस्तत्समानाधिकरणो यो ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यो धर्मःघटत्वादिःसएव विषयत्वं विषयस्य घटादेरित्यर्थः। घटज्ञाने घटस्य विषयत्वं नाम घटत्वमेवेत्युक्तं भवति। घटीयं ज्ञानमित्यादिव्यवहारात् घटादिज्ञेयतया ज्ञानावच्छेदको भवति। तथाच ज्ञानावच्छेदकत्वमस्ति। एवंच ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मो भवति घटत्वादिःयत्र घटत्वं तत्र ज्ञानावच्छेदकत्वमिति नियमात्। तथाच ज्ञानकारणीभूतो यस्सन्निकर्षः इंद्रियार्थसन्निकर्षः तस्य द्विष्ठत्वेन घटेपि सत्त्वात् तत्समानाधिकरणो भवति घटत्वादिः। एवंच नेश्वरज्ञानविषये घटेऽव्याप्तिः। ईश्वरज्ञानविषयघटादिनिष्ठो ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मभूतो घटत्वादिर्जन्यज्ञानविषये घटे वस्तुगत्या ज्ञानकरणसन्निकर्षसमानाधिकरण इति न दोषः। इतःपरं पदानां कृत्यं विचार्यते। तथाहि। अत्र धर्मो विषयत्वमित्युक्ते घटज्ञानविषयता द्रव्यत्वस्य स्यात् अतउक्तं ज्ञानावच्छेदकत्वव्याप्येति। द्रव्यत्वस्य

समवायावच्छिन्नस्वभावत्वाभावात् अतो नातिव्याप्तिरित्याह॥ मत्समवेतमिति॥ नतु रूपज्ञानमिति॥ रूपज्ञानमिति हेतुगर्भं। रूपावच्छिन्नस्वभावत्वेन समवायावच्छिन्नस्वभावत्वाभावादित्यर्थः। नन्वेवंचेदिच्छादिविषयेऽव्याप्तिः तत्र पूर्वोक्तज्ञानघटितलक्षणानामभावादित्यत आह॥ प्रकृतस्येति॥ दृश्यत्वरूपहेत्वर्थतया प्रकृतस्येत्यर्थः॥ शब्देनेति॥ रूपमिति शब्देनेत्यर्थः। आकाशस्य चक्षुषा संयोगःसन्निकर्षः शब्देन समवाय इति ज्ञातव्यं। लिंगकरणतापक्षमालंब्य शंकते॥ नन्विति॥ नन्वनुमितेःपक्षविषयकत्वेन लिंगजन्यज्ञानस्य पक्षविषयकत्वमिष्टमेवेति चेन्न। लिंगविषयकांशे पक्षविषयकत्वं स्यादित्यापादनात्। अंशभेदविवक्षाया आवश्यकत्वात्। अन्यथा सुरभिचंदनमित्यादि चक्षुषा जायमानानां ज्ञानानां विशेषणांशे विशेष्ये यस्सन्निकर्षस्तज्जन्यत्वाभावेनाव्याप्त्यापत्तेरितिध्येयं॥ श्रोत्रेति॥ श्रोत्रस्याकाशात्मकत्वेन वाक्येन साकं समवायोस्तीति भावः। शाब्दज्ञानं वाक्यार्थभूतसंसर्गज्ञानं। अत्र पक्षलिंगसन्निकर्षस्य श्रोत्रवाक्यसन्निकर्षस्य वानुमित्यादौ हेतुत्वादित्यपि द्रष्टव्यं। लिंगज्ञानं करणमित्यभिप्रेत्य परिहरति॥ अतीतादीति॥ लिंगकरणतापक्षे अतीतभोजनमिष्टसाधनं भोजनत्वादित्यत्राऽनुमितिर्भवति। सा न स्यात्। तत्र लिंगस्याभावात् अतो न लिंगं करणं किंतु तज्ज्ञानमेव तच्चातीतादिस्थलेप्यस्तीत्यर्थः। अतीतादीत्यादिपदेनानागतसंग्रहः। लिंगादेरित्यादिपदेन वाक्यसंग्रहः। तथाच पक्षस्य लिंगज्ञानेन श्रोत्रस्य वाक्यज्ञानेन च सन्निकर्षाभावादितिभावः। तथाच नातिव्याप्तिरिति द्रष्टव्यं। नन्वेवंचेदात्मनि अतिव्याप्तिः। लिंगादिज्ञानेनात्मनःसमवायस्य सत्त्वेनात्मसन्निकृष्टलिंगज्ञानजन्यानुमितेरप्यात्मविषयकत्वं स्यादित्याशंक्य सन्निकर्षस्याप्यस्माभिर्हेतुतया विवक्षितत्वेन तत्रातिव्याप्त्यभावात् लिंगादिज्ञानेनात्मसन्निकर्षस्यानु मित्याद्यहेतुत्वादित्याह॥ लिंगादीति॥ नन्विति॥ तथाचात्मनिरूपितकारणीभूतसन्निकर्षवता मनसा रूपादिज्ञानस्य जायमानत्वेन रूपज्ञानस्यात्मविषयकत्वं स्यादित्यर्थः॥ असाधारणेति॥ तथाच यत्सन्निकृष्टेनासाधारणकरणेनेत्यादिविवक्षितमित्यर्थः॥ साधारण्यादिति॥ सर्वोपलब्धिसाधनत्वादिति भावः॥ चक्षुरिति॥ चक्षुषःरूपज्ञानेऽसाधारणकारणत्वादिति भावः॥ चक्षुर्मनस्सन्निकर्षस्येति॥ ननु चक्षुर्मनस्सन्निकर्षवच्चक्षुषोपि द्रव्यादिज्ञानसाधारणत्वात्कथमसाधारण्यं। तथाच करणेऽसाधारण्यविवक्षयैव मनस्सन्निकृष्टचक्षुर्जन्यं रूपज्ञानं मनोविषयं स्यादित्यतिप्रसंगवारणसंभवे सन्निकर्षस्याप्यसाधारण्यं कस्माद्विवक्षणीयमितिचेदुच्यते। अस्त्यत्र संप्रदायविशेषः। अत्र चक्षुषोऽसाधारण्यं नाम चाक्षुषत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं विवक्षितं। एवंच पूर्वोक्तातिव्याप्तिःस्यादेव। चक्षुर्मनस्सन्निकर्षस्य तु द्रव्यादिज्ञानं प्रति न चक्षुर्मनस्सन्निकर्षत्वेन हेतुता मनस्त्वगिंद्रियसन्निकर्षजन्ये द्रव्यसाक्षात्कारे मनोघ्राणादिसन्निकर्षजन्यगंधादिसाक्षात्कारे चाभावेन द्रव्यत्वावच्छिन्नकार्यतान्यूनवृत्तित्वेनानवच्छेदकत्वात्। किंतु चक्षुर्मनस्सन्निकर्षस्येंद्रियमनस्सन्निकर्षत्वेनैव कारणता विवक्षिता। जन्यलौकिकसाक्षात्कारत्वेन कार्यता विवक्षिता। तथाच जन्यलौकिकसाक्षात्कारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं चक्षुर्मनस्संनिकर्षस्येंद्रियमनः संनिकर्षत्वेनास्तीत्येवं करणसन्निकर्षयोःसाधारण्यस्य भिन्नतया चक्षुर्मनस्सन्निकर्षस्य द्रव्यादिज्ञानसाधारणत्वेन सन्निकर्षासाधारण्यविवक्षयैव पूर्वोक्तातिव्याप्तिपरिहारो नोक्तरूपकरणासाधारण्यविवक्षयेति भावः। अत्र विस्तरस्त्वस्मदाचार्यकृतन्यायसुधाटिप्पण्यां द्रष्टव्यः। ननु चक्षुर्जन्यप्रत्यभिज्ञाविषयभूततत्तायामव्याप्तिः। अतीतदेशकालसंबंधरूपतत्तायाश्चक्षुषा सन्निकर्षाभावादित्यत आह॥ प्रत्यभिज्ञायामिति॥ ननु

तत्र ज्ञानजनने समवायस्यापेक्षा न विषयत्वस्येति सत्यं। प्रकृतेतु ज्ञानावच्छेदकत्वे समवायापेक्षा नास्ति। किंतु विषयत्वस्येत्युच्यत इति द्रष्टव्यं। नन्वेवं चेद्रूपज्ञानं प्रति समवायादेर्विषयत्वं स्यात्। रूपज्ञानं मत्समवेतमित्यादौ संबन्धान्तरमनपेक्ष्य समवायादीनां तदवच्छेदकत्वादत उक्तं ॥ यज्ज्ञानानवच्छिन्नस्वभावइति॥ तथाच रूपज्ञानं मत्समवेतमित्यत्र रूपज्ञानावच्छेदके आत्मनिरूपितसमवाये रूपज्ञानानवच्छिन्नस्वभावत्वं नास्ति। समवायस्य सावधिकपदार्थत्वेन रूपज्ञानरूपसंबंध्यवच्छिन्नस्वभावत्वात्। तथा रूपज्ञानमिष्टमित्यत्रापि संबंधांतरमनपेक्ष्य रूपज्ञानावच्छेदिकाया अपीच्छाया न रूपज्ञानविषयत्वंतस्याज्ञानावच्छिन्नस्वभावत्वात् इच्छाया अपि ससंबंधिकपदार्थत्वात् इष्यमाणं यद्रूपज्ञानं तदवच्छिन्नस्वभावत्वान्न तत्राप्यतिव्याप्तिः। तथा रूपज्ञानं ध्वस्तमित्यत्रापि संबन्धान्तरमन्तरेण रूपज्ञानावच्छेदकस्यापि ध्वंसस्य न रूपज्ञानविषयत्वं तज्ज्ञानानवच्छिन्नस्वभावत्वाभावात्। ध्वंसस्याभावरूपतया ससंबंधिकपदार्थत्वेन प्रतियोगिभूतरूप ज्ञानावच्छिन्नस्वभावत्वेन न तत्राप्यतिव्याप्तिः। अस्ति चैतत्पटादिज्ञाने संबंधांतरमनपेक्ष्य ज्ञानावच्छेदकस्य पटस्य ज्ञानानवच्छिन्नस्वभावत्वात् यथा ससंबंधिकपदार्थत्वात्पटज्ञानं पटावच्छिन्नस्वभावं तथा पटो न ज्ञानावच्छिन्नस्वभावः पटस्य ससंबंधिकपदार्थत्वाभावादित्याह॥ यद्यपि चेत्यादिना॥ अवच्छेदकाः तथाचातिव्याप्तिरिति भावः। इष्यमाणाद्यात्मकेत्यत्रादिपदेन प्रतियोगिग्रहणं। कुत इत्यतआह॥ संबंधेच्छादीनामिति॥ समवायरूपसंबंधस्य संबंध्यवच्छिन्नस्वभावत्वात् इच्छाया इष्यमाणावच्छिन्नस्वभावत्वात् आदिपदेन ध्वंसस्य प्रतियोग्यवच्छिन्नस्वभावत्वादिति विवेकः। लक्ष्ये उपपादयति॥ ज्ञानविषयस्त्विति॥ ज्ञानस्येति॥ ससंबंधिकपदार्थत्वादिति भावः॥ अदर्शनादिति॥ ससंबंधिकपदार्थत्वाभावादिति भावः॥ नन्वेवं चेदव्याप्तिः। तथाहि। आदौ व्यवसायो जातः। तदनंतरं तद्विषयिणी अनुमितिर्जाता। भाट्टमते ज्ञानस्य ज्ञाततालिंगकानुमितिवेद्यत्वात्। अथवा नैयायिकरीत्याऽनुव्यवसायो वा जातः। अनुमितिविषयक मनुव्यवसायविषयकं वा पुनर्ज्ञानांतरं जातं। एवं च व्यवसायविषयके मध्यस्थेऽनुमितिरूपेऽनुव्यवसायरूपे वा ज्ञाने स्वग्राहकज्ञानविषयीभूतेऽव्याप्तिः। यद्यपि संबंधांतरमनपेक्ष्याऽनुमितिरूपमनुव्यवसायरूपं वा ज्ञानं स्वग्राहकतृतीयज्ञानावच्छेदकं तथापि ज्ञानानवच्छिन्नस्वभावं न भवति। अनुमितेरनुव्यवसायस्य वा ससंबंधिकपदार्थत्वेन पूर्वव्यवसायरूपज्ञानावच्छिन्नस्वभावत्वादिति चेन्न। स्वयं यज्ज्ञानावच्छेदक स्तदनवच्छिन्नस्वभावत्वस्य सत्त्वात्। ज्ञानग्राहकानुमितेरनुव्यवसायस्य वा ससंबंधिकपदार्थत्वेन पूर्वज्ञानावच्छिन्नस्वभावत्वेपि स्वयं यज्ज्ञानावच्छेदकःस्वग्राहकज्ञानावच्छेदको भवति तदवच्छिन्नस्वभावो न भवति। नहि स्वग्राहकं ज्ञानं ज्ञानग्राहकानुमितावनुव्यवसाये वा प्रतीयते येनाऽनुमितेरनुव्यवसायस्य वा तदवच्छिन्नस्वभावत्वं स्यात् ततो नाव्याप्तिरित्याह॥ यद्यपीत्यादिना॥ स्वशब्देन ज्ञानग्राहकानुमितिरनुव्यवसायो वा ग्राह्यः॥ ज्ञानविषयकेति॥ पूर्वव्यवसायविषयकेत्यर्थः। ज्ञानावच्छिन्नस्वभावं पूर्वज्ञानावच्छिन्नस्वभावं। तथाचाव्याप्तिरितिभावः। यच्च तज्ज्ञानं च यज्ज्ञानं॥ यदीयस्वभावमिति॥ यदवच्छिन्नस्वभावमित्यर्थः। नन्वेवंचेत् मत्समवेतं रूपज्ञानमित्यत्रापि रूपज्ञानं समवायीयस्वभावमिति रूपज्ञानं प्रति समवायो विषयःस्यादिति चेन्न। मत्समवेतं रूपज्ञानमित्यस्यात्मनिरूपितसमवायवद्रूपज्ञान मित्यर्थो न विवक्षितः किंतु रूपज्ञाननिरूपितस्समवायो मय्यस्तीति। एवंच समवायएव रूपज्ञानावच्छिन्नस्वभावो न रूपज्ञानं समवायावच्छिन्नस्वभावं तत्र स्वभावावच्छेदकस्य रूपस्यैव सत्त्वेन रूपावच्छिन्नस्वभावतया

पटोपि विषयः स्यादिति तत्राह॥ घटेति॥ प्रमादएव तत्र हेतुरिति भावः। ननु क्रियाजनकत्वाख्यकारकविशेषः कर्मत्वं तच्च नित्येश्वरज्ञानविषयेऽव्याप्तमित्यत आह॥ ज्ञानकर्मशब्देनेति॥ करणपाटवाभावेन यत्र ज्ञाने व्यवहारो नोत्पन्नस्तद्विषयेऽव्याप्तिरित्यत उक्तं॥ योग्यत्वरूपेति॥ नन्वत्र विषयनिष्ठं योग्यत्वं ज्ञानाधीनव्यवहारजनकतावच्छेदकयुक्तत्वमित्युक्तं। तच्च तद्विषयकत्वमेव वाच्यं। तच्च न संभवति। तस्यैवेदानीं निरुच्यमानत्वेन तस्याज्ञानादिति चेन्न। उक्तन्यायेन ज्ञानाधीनव्यवहारे सहकारिवैकल्यप्रयुक्तकार्याभाव रूपयोग्यतायास्तत्राप्यनपायादिति ध्येयं॥ पटमिति॥ कृतिःप्रयत्नः। पटजननानुकूलयत्नवान् भवतीति तदर्थः। तथा च- कृतिकाले पटो नास्तीति तत्कर्मणि पटेऽव्याप्तिः। ननु कृतिरूपक्रियाजनकत्वं पटेस्तीति चेत् तत्र पृच्छामः किमसिद्धस्य पटस्य कृतिजनकत्वमुत सिद्धस्य। नाद्यः। असिद्धस्य जनकत्वाभावात् तस्य पूर्ववृत्तित्वघटितत्वात्। नद्वितीयः। सिद्धे इच्छायाइव यत्नस्याप्यभावात्। अतोऽव्याप्तेर्न कर्मत्वलक्षणं त्वदुक्तं किंत्वस्मदुक्तमेव तच्च तत्राप्यस्ति यदा तज्ज्ञानं भविष्यति तदा तदधीनव्यवहार योग्यतारूपकर्मत्वस्यानपायादित्याह॥ नहीत्यादिना॥ भासमानताया एवाद्याप्यनिरूपणादित्युक्तदोषं परिहरति॥ भासमानत्वं चेति॥ योग्यत्वं नाम व्यवहारजनकतावच्छेदकयुक्तत्वं तच्चावच्छेदकं तद्विषयत्वमेव वाच्यं। तन्न ज्ञातुं शक्यं तस्यैवेदानीं निरुच्यमानत्वादित्यतआह॥ योग्यत्वंचेति॥ ॥सतीति॥ सहकारिवैकल्यप्रयुक्तकार्याभाव इति यावत्। ननु योग्यतायां योग्यतान्तराभावादित्युक्ताव्याप्तिं परिहरति ॥योग्यत्वे चेति॥ तर्ह्यात्माश्रय इत्यत आह॥ आत्माश्रयादिकंत्विति॥ तद्धदेवेति॥ दृश्यत्वादिवदेवेत्यर्थः। नाव्याप्तिः योग्यतायामिति शेषः। अन्ये त्वित्यस्य न तत्राव्याप्तिर्दोष इत्याहुरित्यनेन वक्ष्यमाणे न संबंधः॥ संबंधांतरमिति॥ ज्ञातर्यतिव्याप्तिवारणाय संबंधांतरमिति॥ संबंधातराभावे सतीत्यर्थः। तत्र च समवायएवास्तीति न दोषः। एवंचेत् अहमित्यात्मविषयके ज्ञाने आत्मावच्छेदको भवति। तत्र संबंधांतराभावो नास्ति। स्वज्ञानेनात्मनःसमवायस्यैव सत्त्वात्। अतः स्वज्ञानविषये आत्मन्यव्याप्तिरित्यतउक्तं संबंधांतरमनपेक्ष्येति। संबंधांतरं तत्र तिष्ठतु। परंतु ज्ञानावच्छेदकत्वे तदपेक्षया न भवितव्यमित्यर्थः॥ एवं च नाव्याप्तिः। आत्मनः स्वविषयकज्ञानावच्छेदकत्वे विषयत्वस्यैवापेक्षा। न विद्यमानस्यापि समवायस्य। तस्यावर्जनीयसन्निधित्वात्। यदि च ज्ञानावच्छेदकत्वे विषयत्वं विहाय समवायस्यैवापेक्षा। तर्हि घटस्य ज्ञानमित्यादौ घटस्यापि ज्ञानावच्छेदकत्वं न स्यात्। ज्ञाननिरूपितसमवायस्य घटेऽभावात्। अतो विषयत्वमेव तत्रावच्छेदकतया अपेक्षितं न समवायः। अत आत्मनि संबंधांतरमनपेक्ष्य स्वज्ञानावच्छेदकत्वं वर्तत एवेति नाव्याप्तिरित्याह॥ यद्यपीत्यादिना॥ स्वज्ञानेति॥ स्वविषयकज्ञाननिरूपितसमवायशून्यस्येत्यर्थः। नन्वहमित्यत्रात्मविषयकज्ञाने आत्मनो ज्ञाननिरूपितसमवायविषयत्वयोस्सत्त्वेपि ज्ञानावच्छेदकत्वे विषयत्वस्यैवापेक्षा न समवायस्येत्येतत्कुतइत्याशंकायां उभयोस्सत्त्वेप्येकमवर्जनीयसन्निधीत्यत्रोदाहरणमाह॥ यथेति॥ यथा आत्मविषयिणी अनुमितिर्भवति तत्रात्मा विषयो जनकश्च भवति अनुमितेर्ज्ञानरूपत्वेन तां प्रत्यात्मनस्समवायिकारणत्वात्। एवं चात्मनोऽनुमितिनिरूपितसमवायविषयत्वयोः सत्त्वेप्यनुमितिं प्रति जनकतासमवायेनैव समवायिकारणत्वेनैव कारणतायाः कृप्तत्वेन विषयत्वस्यावर्जनीयसन्निधितया नपेक्षायास्तार्किकैरुक्तत्वात् विषयस्य परोक्षज्ञानेऽकारणत्वात्। एवं प्रकृतेपीत्यर्थः। नन्वेवमनुमित्यादाविवाहमिति स्वविषयकज्ञानं प्रति आत्मनस्समवायिकारणत्वात्समवायापेक्षा विषयत्वस्य स्यादिति चेन्न। भ्रांतोसि।

बौद्धधिक्कारग्रंथस्थवाक्यांतरमुदाहरति॥ दुरवगाहत्वेनापीति॥ अयमप्यर्थानुवादः। तद्ग्रंथपाठस्त्वित्थं। ''न हि लक्षणापरिज्ञानमात्रेण स्पष्टदृष्टमपि लक्ष्यमपह्नोतुं शक्यतेऽपरिज्ञानस्य दुरवगाहत्वेनाप्युपपत्तेरिति॥ नचेति॥ कुशलैर्निर्वक्तुमशक्यं न चेत्यर्थः॥ यथामंत्रस्येति॥ द्वितीयाध्याये प्रथमपादे विचारितं। ''अहिर्बुध्नीयमंत्रं मे गोपाये''त्या दिप्रतीतमंत्रस्य किंलक्षणं। न तावद्धितिाभिधायकत्वं। निषेधकेऽव्याप्तेः। नापि निषेधाभिधायकत्वं। विधायकेऽव्याप्तेः। उत्तमपुरुषांतो योमंत्र असिपदांतो योमंत्र अनयोः परस्पराव्याप्तेरित्याशंकायां याज्ञिकसमाख्यायाएव निर्दोषलक्षणत्वादिति समाहितं। यथोक्तमधिकरणमालायां

''याज्ञिकानां समाख्यायालक्षणं दोषवर्जितं।
तेऽनुष्ठानस्मारकादौ मंत्रशब्दं प्रयुंजत''इति॥

प्रयोगइति॥ प्रयुज्यत इति प्रयोगः कर्मणिघञ् अभियुक्तप्रयोगविषयत्वमित्यर्थः। न चात्माश्रयः शंक्यः। अर्थस्य लक्ष्यत्वात्। मंत्रशब्दस्यैवलक्षणांतर्गतत्वात्। तथा च घटपदप्रयोगविषयत्वं घटत्वमितिवत् मंत्रपदप्रयोगविषयत्वं मंत्रत्वमित्युक्तं भवति॥ ज्ञानविषयइति॥ ज्ञानविषयपदप्रयोगविषयत्वमित्यर्थः॥ अन्योन्येति॥ प्रयोगापरपर्याये व्यवहारे प्रवृत्तिनिमित्तज्ञानस्य कारणत्वाल्लक्षणस्यैव च प्रवृत्तिनिमित्तत्वान्मंत्रपदप्रयोगविषयत्वरूपप्रवृत्तिनिमित्तज्ञाने मंत्रपदप्रयोगः मंत्रपदप्रयोगसिद्धौ तद्घटितप्रवृत्तिनिमित्तज्ञानमित्यन्योन्याश्रय इत्यर्थः॥ पूर्वपूर्वेति॥ स्यादयमन्योन्याश्रयः। यदि मंत्रपदप्रयोगविषयत्वरूपलक्षणांतर्गतः प्रयोगो लक्षणसाध्यप्रयोग एव स्यात्। नचैवं। किंतु लक्षणसाध्यप्रयोगोऽस्मदीयो भिन्न एव। लक्षणांतर्गतो यः प्रयोगः स पूर्वतनानामेव विवक्षितः। सच भिन्न एव। पूर्वतनानामपि यः प्रयोगः सोपि तत्पूर्वतनप्रयोगज्ञानेनेति व्यक्तिभेदान्नान्योन्याश्रय इति भावः। पूर्वोक्तलक्षणान्येव दूषणपरिहारेण समर्थयते॥ अथवेत्यादिना॥ ननु चक्षुरादिना ज्ञानानंतरं वागिंद्रियपाटवाभावेनाभिलपनरूपव्यवहारः एडमूकानां न भवति तज्ज्ञानविषयेऽव्याप्तिरित्यतआह॥ करणेति॥ नाव्याप्तिःशंक्या। तत्राप्येडमूकादिज्ञाने व्यवहारकारणत्वस्य फलोपधानस्याभावेपि व्यवहारजननयोग्यतारूपं कारणत्वमस्त्येव। ननु योग्यत्वं नाम तदवच्छेदकावच्छिन्नत्वं। तत्र च ज्ञाने व्यवहारजननयोग्यत्वं नाम व्यवहारजनकतावच्छेदकावच्छिन्नत्वं वाच्यं। तद्व्यवहारजनकतावच्छेदकं तद्विषयविषयकत्वमेव वाच्यं। तत्र वक्तुं शक्यं। विषयत्वस्यैवेदानीं निरुच्यमानतया तस्याज्ञानादिति चेत्। अस्त्यत्र संप्रदायविशेषः। योग्यत्वं द्विविधं। तदवच्छेदकावच्छिन्नत्वं एकं सहकारिवैकल्यप्रयुक्तकार्याभावरूपं चापरं। उभयमपि वनस्थदंडेस्ति। प्रथमस्यायोगेपि एडमूकादिज्ञाने व्यवहाराभावेपि वाग्रूपसहकार्यभावेन सहकार्यभावप्रयुक्तकार्याभाववत्त्वा परपर्याययोग्यतारूपकारणतायाः सत्त्वान्नाव्याप्तिरित्यर्थः। सहकारिवैकल्येत्यादेर्योग्यतारूपत्वं त्वुत्तरत्रैव स्पष्टं। तार्किकाणां मते निर्विकल्पकज्ञानस्य कदापि व्यवहारजनकत्वानंगीकारात् तद्विषयेव्याप्तिरित्यतआह॥ कदापीति॥ तत्रापि निरुक्तयोग्यतारूपकारणत्वमंगीकृत्य यद्यप्यव्याप्तिःपरिहर्तुं शक्यते तथापि वस्तुस्थितिकथनमेतदित्याहुः॥ यत्वतत्वेति॥ यज्ज्ञानं यदभिलपनेत्यादिलक्षणांतर्गतयोर्यत्त्वतत्त्वजात्योर्यत्त्वजात्योरित्यर्थः॥ कस्येति॥ अयं च न्यायः तार्किकाणामपि संमत एव। कस्य व्याप्तिरितिप्रश्नेऽस्येत्यननुगताया एव लक्ष्यत्वादित्युक्तत्वात्। ननु यत्र घटज्ञानानंतरं प्रमादात्पट इति व्यवहारो भवति तत्र घटज्ञानं पटाभिलपनरूपव्यवहारकारणमतोघटज्ञानस्य

किं नाम सदसद्वैलक्षण्यं तच्च लक्षणोक्त्यनुक्त्योः सममेवेत्यर्थः। ननु सदसद्वैलक्षण्यमनिर्वाच्यत्वं तत्र तु दुर्निरूपलक्षणकत्वं प्रयोजकतया मयांगीक्रियत इति चेत्तत्राह॥ ब्रह्मणीति॥ खंडनकारोक्तरीत्या कारणत्वलक्षणं दुर्निरूपमिति ब्रह्मणि जगत्कारणत्वस्यासंभवापातात्। इष्टापत्तिं परिहर्तुं श्रौतस्येत्युक्तं। ''यतो वा इमानि भूतानी''त्यादिश्रुत्युक्तस्य जगत्कारणत्वस्यानिर्वचनीयत्वे श्रुतेरतत्वावेदकत्वं स्यादिति भावः॥ असंभवादिति॥ प्रसंगांतो हेतुः। असंभवप्रसंगादित्यर्थः। ब्रह्मणो दुर्निरूपलक्षणकत्वस्य त्वयोक्तत्वात्तस्यापि अनिर्वाच्यत्वं स्यादित्याह॥ त्वयैवेति॥ तत्प्रत्यगात्मस्वरूपं। कीदृक् कीदृशमिति चेत्पृच्छसि तर्हि तादृक् तादृशं ईदृक् ईदृशमिति निरूपणं यत्र न प्रसरति तद्वस्तु प्रत्यगित्यवधार्यतामित्यनेन ब्रह्मणोपि दुर्निरूपत्वस्योक्तत्वात्तस्याप्यनिर्वाच्यत्वं स्यादित्यर्थः। दुर्निरूपलक्षणवत्त्वेऽसत्यत्वमित्यनेन सुनिरूपलक्षणवत्त्वे सत्यत्वमिति प्राप्तं तच्च त्वन्मतेऽयुक्तमित्याह॥ प्रपंचादाविति॥ त्वदुक्तसदसद्वैलक्षण्यरूपानिर्वाच्यत्वलक्षणस्य प्रपंचेपि सुनिरूपणभावात्सत्यत्वापत्तिरित्यर्थः। प्रपंचे निर्वचनीयत्वाख्यलक्षणमाधुनिक पुरुषोत्प्रेक्षितत्वात्संभावितदोषं न तत्सत्यत्वमापादयतीत्यत आह॥ यत्कठिनमिति॥ इत्यादीत्यादिपदेन ''यद्रूवं तदापोयदुष्णं तत्तेज'' इत्यादिश्रुतिग्रहणं। तथा च निर्दोषश्रुतिसिद्धलक्षणस्य सत्त्वात्पृथिव्यादीनामपि सत्यत्वापत्त्याऽनिर्वचनीयत्वं न स्यादिति भावः। इत्थमिति वक्तुमशक्यत्वमद्भुतत्वादेव युक्तमित्यन्वयः। असत्त्वादेव वक्तुमशक्यत्वं किं न स्यादित्यत उक्तं॥ प्रमितस्येति॥ स्पष्टयाऽबाधितया दृष्टया दृष्टं विषयीकृतं यत् विलक्षणं संस्थानविशेषरूपं तस्य प्रतिपुरुषमुखे सत्त्वेपि यथाद्भुतत्वाद्वक्तुमशक्यत्वं तथा प्रमितस्य विषयत्वस्यापि अद्भुतत्वादेव निर्वक्तुमशक्यत्वमस्त्वित्यर्थः। इत्थमिति वक्तुमशक्यत्वेऽद्भुतत्वं प्रयोजकमित्येतत्प्रमाणेन द्रढयति॥ उक्तं हीति॥ अद्भुतत्वहेतोरित्थमित्यनिर्वाच्यमित्यर्थः। यदपि परैः स्वग्रंथे प्रलपितं सुनिरूपलक्षणत्वं व्यावहारिकत्वे तंत्रं दुर्निरूपलक्षणत्वं प्रातिभासिकत्वे तंत्रं। एवं च विषयत्वस्य दुर्निरूपणत्वाज्जगति तत्प्रातिभासिकमेवेति। तद्व्यभिचारेण खंडयति॥ नहीत्यादिना॥ इतरेति॥ इतरभेदकलक्षणरूपं रूप्यत्वमित्यर्थः॥ प्रातीतिकेति॥ प्रातिभासिकेत्यर्थः। तथा च प्रातिभासिकावांतरजातिविशेष एव रूप्यत्वमिति सुवचमिति संप्रदायः। रज्जुसर्पस्य भेदकं सर्पत्वमपि रूप्यत्वं स्यात् प्रातिभासिकावांतरजातिरूपत्वात्तस्यापीत्यतो विशेषपदं॥ सप्रातिभासिक इति॥ अत एव प्रातिभासिकत्वाभावोपपादनायैव स्पष्टाबाधितदृष्टिदृष्टेत्युक्तं। विषयत्वनिरुक्तिखंडनमुपसंहरति॥ तस्मादिति॥ विश्वस्य विश्वांतर्गतविषयत्वस्य॥ शब्दसाम्यादिति॥ निरुक्तौ खंडितायां निर्वचनाभावरूपमनिर्वचनीयत्वं सिद्यति। निरुक्तिविरहस्यानिर्वचनीयत्वस्य चैकार्थत्वाच्छब्दसाम्यमिति भावः॥ भ्रांतिमूलमिति॥ निरुक्तौ खंडितायां निर्वचनाभावरूपमनिर्वाच्यत्वं यद्यपि सिद्धयति तथापि सदसद्वैलक्षण्यरूपं तन्नसिद्धयति। निरुक्तिविरहेपि प्रतिपुरुषमुखवदिक्षुक्षीरादिमाधुर्यवद्ब्रह्मवदानंदादिवत्सत्त्वसिद्धेः। एवं च सदसद्वैलक्षण्यरूपानिर्वचनीयत्वसिद्धयर्थं यन्निरुक्तिखंडनं कृतं तद्भ्रांतिमूलकं। भ्रांतौ कारणमनिर्वाच्यानिरुक्तिशब्दयोरेकार्थत्वरूपं शब्दसाम्यमित्यर्थः। निर्वचनायोग्यत्वमुपेत्य समाहितं।

वस्तुतस्तदपि नास्तीत्याह॥ नचेति॥ केषांचित् निर्वचनेऽकुशलानामित्यर्थः॥ नहि जात्यंधेनेति॥ न हि जात्यंधो नीलं ज्ञातुं वक्तुं चाशक्तइत्यज्ञेयानिर्वाच्यमेव तल्लोके अन्येन ज्ञेयत्वादिसंभवादिति बौद्धधिक्कारग्रंथस्यार्थानुवादोयमिति ज्ञातव्यं॥ अज्ञेयानिर्वाच्यमेव तदिति॥ अन्येन ज्ञेयत्वादिसंभवादितिभावः।

नचेति॥ प्रमाणज्ञाने तद्विषयस्याध्यासे तुच्छादि ज्ञाने तुच्छादेरध्यासप्रसंगइत्युक्तत्वादिति भावः। दोषांतरमाह॥ तदज्ञानजन्यमिति॥ प्रमाणज्ञाने स्वविषयस्याध्यस्तत्वं न युक्तं। अध्यस्तत्वं नामाध्यासं प्रतिविषयत्वं अध्यासो हि लोकेऽधिष्ठानाज्ञानजन्योऽधिष्ठानज्ञाननिवर्त्यश्चदृष्टः। तद्विषयत्वमेवाध्यस्तत्वं तदनुविद्धतया प्रतीयमानत्वं वा। न च घटश्चलतीत्यादिचलनानुविद्धतया प्रतीयमानस्य घटादेस्तत्राध्यस्तत्वं स्यादिति वाच्यं। तदनुविद्धतया प्रतीयमानत्वविशेष एवाध्यस्त्वमिति विवक्षितत्वात्। एवं च प्रमाणज्ञाने विषयस्य नाध्यासः। तस्य प्रमाणज्ञानाज्ञानजन्यत्वाभावात्। कुतः ज्ञानस्य ज्ञातैकसत्त्वेन प्रमाणज्ञानाज्ञानस्यैवाभावात्। तथा प्रमाणज्ञानाज्ञानजन्यत्वाभावादेव प्रमाणज्ञानज्ञाननिवर्त्यत्वाभावेन तस्याध्यासत्वाभावात्। ततश्च तद्विषयत्वरूपमध्यस्तत्वमयुक्तं। तथा तदनुविद्धतया प्रतीयमानत्वरूपमप्यध्यस्तत्वं न युक्तं। इदं रजतमितिवत् प्रमाणज्ञानं स्वविषय इति प्रमाणज्ञानानुविद्धतया विषयस्य प्रतीयमानत्वाभावात्। अतो न प्रमाणज्ञाने विषयस्याध्यासइत्यर्थः। अन्यस्याध्यस्तत्वस्याभावादित्ययुक्तं। अनिर्वाच्यत्वादिरूपं यत्परोक्षा परोक्षविषयसाधारणमध्यस्तत्वं तदेवापरोक्षज्ञानविषयस्य वृत्तिप्रतिबिंबितचैतन्यरूपेण तदभिव्यक्ताधिष्ठान चैतन्यरूपेण च दृग्विशेषेण प्रकाश्यत्वे प्रयोजकं। एवं चानिर्वाच्यत्वादिरूपं प्रमाणज्ञानाध्यस्तत्वं विषयेऽस्तीत्याशंक्य निषेधति॥ न हीति॥ परोक्षज्ञानविषयस्य दृग्विशेषप्रकाश्यत्वेऽनिर्वाच्यत्वादिरूपं साधारणमध्यस्तत्वं न प्रयोजकं परोक्षविषयस्थलेऽनिर्वाच्यत्वादि रूपेऽध्यस्तत्वे सत्यपि दृग्विशेषप्रकाश्यत्वाभावात् तस्मिन्सत्यभवतस्तदप्रयोजकत्वादितिभावः॥ यादृशमिति॥ वृत्तावनध्यस्ते वृत्तिं प्रति विषये चिदात्मनि यादृशं विषयत्वं तादृशमेव ज्ञेयस्य ज्ञानं प्रत्यस्त्वित्यर्थः॥ अनिर्वाच्यमेवेति॥ निर्वक्तुमशक्यमेवेत्यर्थः। वृत्तिं प्रति चिदात्मन इति शेषः। विषयत्वस्य ब्रह्मगतस्य॥ जगतइति॥ जगन्निष्ठविषयत्वस्यानिर्वाच्यत्वेपीत्यर्थः। लक्षणस्यावश्यवक्तव्यत्वमाह॥ त्वयापीति॥ व्यावहारिकेति॥ ज्ञानविषये प्रपंच इति शेषः॥ असंकीर्णेति॥ प्रातिभासिकविषयासंकीर्णेत्यर्थः॥ लक्षणस्यापीति॥ विषयत्वस्य व्यवहारविसंवादिप्राति भासिकविषयव्यावृत्तलक्षणस्यापि प्रमाणवद्वक्तव्यत्वादित्यर्थः। तत्र दृष्टांतः अविद्यादाविवेति। यथाऽविद्यायां प्रमाणं लक्षणं च कथ्यते तद्वद्विषयत्वस्यापि लक्षणादिकं वक्तव्यमेवेत्यर्थः। तथाचावश्यवक्तव्यविषयत्वखंडनं स्वव्याहतमिति भावः॥ निर्ब्रुवतेति॥ सदसद्वैलक्षण्यमित्यादिनिर्वचनं कुर्वतेत्यर्थः॥ साधनमिति॥ विषयत्वस्य त्वदीयहेत्वंतर्गतत्वात्तद्धेतुज्ञानाय तदवश्यं लक्षणीयमित्यर्थः॥ न चेति। न हीत्यर्थः। घटादौ पटाद्यसंकीर्णव्यवहाराय तद्धेतुभूतं पटाद्यसंकीर्णपृथुबुध्नोदरादेर्ज्ञानं तादृशासंकीर्णव्यवहारश्च तवाप्यस्ति। तथाचासंकीर्णतादृशाकार एव घटादेर्लक्षणमिति लक्षणतया ज्ञातस्य तादृशाकारस्य लक्षणत्वं यावदवश्यं वक्तव्यं। एवमसंकीर्णव्यवहारहेतुतया ज्ञातस्य विषयत्वस्य लक्षणं त्वयापि वक्तव्यमिति तत्खंडनमयुक्तमित्यर्थः।

ननु तादृशाकारलक्षणज्ञानमपि न तादृशव्यवहारहेतुरिति शंकते॥ नन्विति॥ सममिति॥ असंकीर्णविषयाकारमात्रेणासंकीर्णव्यवहारोपपत्तौ तन्निर्वचनं मयापि न कर्तव्यमित्यर्थः॥ इयांस्त्विति॥ अयमांतरालिको विशेषः॥ असंकीर्णतदाकारस्यैव व्यवहारहेतुत्वादिति भावः। स आकारः। ननु विषयलक्षणं भवद्भिरेव वाच्यं। मया तन्न वक्तव्यं मया तस्याऽनिर्वाच्यत्वांगीकारात्। लक्षणवचने तु वस्तुनोऽनिर्वाच्यत्वभंगापत्तिः निर्वक्तुमशक्यत्वमेवह्यनिर्वाच्यत्वं नामेत्यत आह॥ न च लक्षणोक्तीति॥ लक्षणोक्तावनिर्वाच्यत्व भंगः अनुक्तौ तल्लाभ इति न युक्तं। न ह्यनिरुच्यमानलक्षणवत्त्वमनिर्वाच्यत्वं

स संयोगसमवायांतर्भूतश्चेत्तल्लक्षणमेव तस्यापि लक्षणं न पृथग्वक्तव्यं बहिर्भावे तु संयोगसमवायान्यत्वे सति संबंधत्वमेव तल्लक्षणमस्त्वित्याह॥ संयोगेति॥

नन्वेवं लक्षणप्रमाणाभ्यां जाता तत्सिद्धिः तस्य विशेषनाम किमितिचेत्तत्राह॥ विशेषसंज्ञायाश्चेति॥ कल्प्यत्वादिति॥ विषयविषयिभाव इत्यादिसंज्ञाकर्तव्येत्यर्थः। संयोगाद्यतिरिक्तः संबंधःसामान्यतः सिध्यतीत्युक्तं तदयुक्तमित्याशंक्य निराकरोति॥ यत्त्विति॥ संबंधस्य कल्प्यमानस्य। अनवस्थाभेदः किं भेदिभ्यां भिन्नो नवेत्यादिभेदपरंपरायामनवस्थेत्यर्थ इति केचित्। वस्तुतस्तु भिन्नस्य संबन्ध्यसंबद्धस्य स्वकार्यकारित्वाभावात्तत्रापि संबंधांतरं वक्तव्यं तत्राप्युक्तविकल्पापत्त्याऽनवस्थेत्यर्थः॥ न चेदिति॥ संबंधस्य संबंध्यभिन्नत्वे संबंध्येवास्ति न संबंधइत्यागतं। तथा च तस्य संबंधित्वं संबंधत्वं च नस्यादित्यर्थः॥ उक्तरीत्येति॥ ज्ञानस्य ज्ञेयेन संबंधो नेति त्वद्वाक्योक्तसंबंधाभावस्य ज्ञानेनासंबंधादित्युक्तरीत्या ज्ञानज्ञेययोः संबंधो नास्तीत्यादिवाक्यजन्यज्ञानस्यैतद्वाक्यप्रतिपाद्येन संबंधाभावरूपेणार्थेन संबंधासत्त्वे स्वक्रियाविरोधापत्त्या संबंधे वाच्ये तस्य च भिन्नत्वेऽनवस्था नचेत्संबंधासिद्धिरिति स्वव्याहतमित्यर्थः। संबंधः संबंध्यभिन्नएव न चोक्तदोषः। यथा दृश्यत्वे दृश्यत्वांतराभावेपि युक्तं दृश्यत्वं यथा वा प्रमेयत्वे प्रमेयत्वांतराभावेपि प्रमेयत्वमस्ति स्वनिर्वाहकत्वांगीकारात्। एवं संबंधे संबंधांतराभावेपि संबंधत्वं युक्तं स्वनिर्वाहकत्वांगीकारादित्याह॥ युक्तंचेति॥ क्वचिदिति॥ स्वविषय इत्यर्थः। स्वनिर्वाहकत्वं युक्तं चेत्यन्वयः॥ प्रकृतानुपयुक्तमिति॥ अनुकूलतर्कप्रस्तावे तन्निरुक्तिखंडनस्य प्रकृतानुपयोगादित्यर्थः॥ अनतिप्रसंगायेति॥ घटदृशि पटस्य विषयत्वपरिहाराय करणसन्निकर्षादिद्वारको दृग्दृश्ययोः संबंधो वाच्यो न तु विषयत्वमपि निर्वक्तव्यमित्यर्थः॥ नच विषयत्वस्येति॥ उक्तविकल्पखंडनाभ्यां विषयस्य मिथ्यात्ववर्णनं भौतविचारमनुसरतीत्यर्थः। उक्तं ह्यात्मतत्वविवेके। केनचिद्भूतेन द्विरदं चतुष्पादमवलोक्य विकल्पितं किमयमंधकारो मूलकमत्ति अथवा जलवाहो बलाहकान्वर्षति गर्जति च यद्वा बांधवोयं 'राजद्वारे श्मशाने च यस्तिष्ठति सबांधव' इतिवचनादितिभावः। अथवा यो यं भूमौ दृश्यते तस्यछायेयं। नाद्यः। तस्य शूर्पयुगलस्फोटनाभावात्। न द्वितीयः। तस्य स्तंभचतुष्टयाभावात्। न तृतीयः। तस्य पुच्छभ्रामणाभावात्। न चतुर्थः। तस्या नरशिरश्शतोद्गिरणभावात्। अतो न किंचिदेतत्। किं तु मिथ्यैवेति। किमेतावता विकल्पखंडनमात्रेण द्विरदस्वरूपं न हि निवर्तते किंतु यो द्विरदोस्ति सोस्त्येवेति वदन्नेव पिशा चउपेक्ष्यतेपरीक्षकैः।

"विकल्पदूषणाभ्यां स्वरूपंनैव हीयते।
प्रमाणसिद्धं तत्कर्तोपेक्ष्यते भूतवज्जनै"रिति

वचनादिति॥ विषयित्वस्येति॥ दृशो विषयवत्त्वं हि विषयित्वं ततश्च विषयत्वानिरुक्तौ तद्घटितविषयित्वस्याप्यनिरुक्तावपि न विषयिण्या दृशो मिथ्यात्वं किंतु सत्यत्वमेव। एवं विषयत्वानिरुक्तावपि विषयस्य सत्यत्वमक्षतमित्यर्थः। इत्याद्युक्तेरिति। एवमाद्यनुमाने विषयत्वस्य व्यवहृतत्वाद्विषयत्वनिरुक्तिखण्डनं व्याहृतमित्यर्थः। दृग्विषयत्वस्येति। दृग्रूपज्ञानविषयत्वस्येत्यर्थः।

ननु प्रमाणज्ञानं स्वविषयावरणेत्यत्र विषयत्वं नाम न वास्तवं किंत्वध्यस्तत्वमेव। तथा च स्वविषयावरणेत्यत्र स्वाध्यस्तावरणेत्यर्थो विवक्षितइति चेन्न। एवं वदता प्रमाणज्ञानएव विषयोऽध्यस्त इति वाच्यं। ॐमितिचेत्तत्राह॥

आक्षेप्स्यतीति भावः॥ तस्येति॥ घटस्य ज्ञानमित्यादिप्रतीतिसिद्धो यो ज्ञानज्ञेययोस्संबंधस्तं प्रत्यध्यस्तत्वरूप संबंधस्य विशेषरूपत्वाभावात्। आदावध्यस्तत्वं संबंधेनैव अकृत्रं दूरे ज्ञानज्ञेयसंबंधसामान्यं प्रति विशेषत्वेन। तथाच परिशेषेणाध्यस्तत्वेन पर्यवसानमित्यर्थः। ज्ञानज्ञेयसंबंधसामान्यं प्रत्यध्यस्तत्वरूपसंबंधस्य विशेषत्वे घटस्य ज्ञानमित्यादौ यथाज्ञानज्ञेयसंबंधसामान्यव्यवहारे ज्ञेयस्य षष्ठ्यंतेन निर्देशः ज्ञानस्य प्रथमांतेन तथा तद्विशेषभूताध्यस्तत्वरूपसंबंधव्यवहारेपि अध्यस्तस्य षष्ठ्यंतेनाधिष्ठानस्य प्रथमांतेन निर्देशः स्यात् न हि तथास्तीत्याह॥ नहीति॥ सत्त्वे दृश्यत्वं न स्यादित्यनुकूलतर्कमात्रमिति द्वितीयं निराकरोति॥ नांत्यइति॥ तर्कोऽप्रयोजक इत्याह॥ सत्त्वेपीति॥ संबंधांतरेण आध्यासिकसंबंधातिरिक्तेन संबंधेनेत्यर्थः। अत्रापादकीभूतं सत्त्वं अनिर्वाच्यत्वाभावो वा पारमार्थिकत्वं वा। नाद्य इत्याह॥ न तावदिति॥ तद्वतोपीति॥ सदसद्वैलक्षण्यरूपानिर्वाच्यत्वाभाववत इत्यर्थः। तथा च तर्कस्य तुच्छे व्यभिचारेण व्याप्तिभंगात्प्रशिथिलमूलत्वमिति भावः। न द्वितीय इत्याह॥ नापीति॥ सत्वं पारमार्थिकत्वं॥ सत्वेपीति॥ सत्त्वेपि घटस्य ज्ञानेन संबंधोऽस्त्वित्यप्रयोजकता। न च सत्त्वे संबंधायोगः। यथा ब्रह्मणः सत्यत्वेपि तद्व्यवहारेण संबंधोस्ति ब्रह्मणोपि व्यवहियमाणत्वात् तद्वत्सत्यस्यापि घटस्य ज्ञानेन संबंधोस्त्वित्यर्थः। तदध्यस्तं भावे क्तः। तस्मिन्नध्यासएव संबंध इत्यर्थः॥ नदृश्येति॥ संबंधस्याध्यस्तत्वेपि संबंधिनः पारमार्थिकत्वं संभवति घटस्य ज्ञानेनाध्यस्तसंबंधवत्त्वेपि न संबंधिनो मिथ्यात्वं विभक्तयोर्घटपटयोरारोपितसंयोगस्य मिथ्यात्वेपि संबंधिनोस्तदभावात्। यथा वा तार्किकैकदेशिमतेऽजन्यसंयोगाभावा द्विभुद्वयसंयोगस्यारोपितत्वेन मिथ्यात्वेपि संबंधिनोर्मिथ्यात्वाभावाद्व्यभिचार इत्युक्तमित्यर्थः॥ ज्ञेयवदिति॥ अध्यासस्य संबंधत्वपक्षे एकस्यापरत्राध्यासो वक्तव्यः। तत्र न तावज्ज्ञानं ज्ञेये ध्यस्तं ज्ञेयस्य मिथ्यात्वेन ज्ञानं प्रत्यधिष्ठानत्वाभावात्। तथा च ज्ञेयस्य ज्ञान एवाध्यासो वाच्यः। स न युक्तः। व्यावहारिकस्य घटादेर्व्यावहारिके तज्ज्ञानेऽनध्यासात् प्रातिभासिकस्य रूप्यादेः प्रातिभासिके तज्ज्ञानेऽनध्यासात् अर्थज्ञानात्मकोभयविधभ्रमांगीकारेण ज्ञेयवज्ज्ञानस्याप्यध्यस्तत्वेन तत्र तस्यानध्यासादित्युक्तत्वादित्यर्थः। संगृह्णाति॥ एवंचेति॥ ज्ञाने ज्ञेयाध्यासपक्षदूषणायाद्यश्लोकः। विषयोविषयिण्यध्यस्त इति सामान्यनियमखंडनाभिप्रायेण द्वितीयश्लोक इति ज्ञातव्यं। दृशा ग्राह्यं दृग्विषयः। दृशि विषयिभूतायां। आध्यासिकसंबंधखंडनमुपसंहरति॥ तस्मादिति॥ अतिप्रसंगे सर्वं सर्वेण दृश्येतेत्यतिप्रसंगइत्यर्थः। विशेषजिज्ञासायाः कोसाविति विशेषविचारस्येत्यर्थः। तत्र तार्किकोक्तं दृष्टांतमाह॥ विशेषगतेति॥ पार्थिवपरमाणुषु समानगुणकर्मसामान्यवत्सुव्यावर्तकाभावेन व्यावृत्तिबुद्ध्यभावेन योगीतरेषां परस्परासंकीर्णव्यवहारोच्छेदरूपातिप्रसंगपरिहाराय विशेषो नाम पदार्थो व्यावृत्तिहेतुतयाकल्पितः। तेन चोक्तातिप्रसंगे निरस्ते विशेषेपि व्यावृत्तिबुद्धिजनकः कस्सनिरूप्यतामिति जिज्ञासा वृथा इदानीं तत्प्रयोजनाभावादिति। यथा तार्किकेण समाधीयते तद्वदित्यर्थः। यथोक्तं द्रव्यकिरणावल्यां

"असंकीर्णव्यवहृतेर्योगिनां परमाणुषु॥
विशेषकल्पने तत्र विशेषेच्छावृथा तवे"ति।

नन्वतिप्रसंगानिरासकसंबंधसद्भावे प्रमाणस्य तल्लक्षणस्य चाभावादप्रामाणिक एवासौ संबंधः। "लक्षणप्रमाणाभ्यां वस्तुसिद्धि" रिति वचनादित्यत आह॥ प्रमाणस्येति॥ अनुमानत्रयस्येत्यर्थः। यः संबंधः कल्प्यते

त्वद्वचनविरोधः स्यादिति भावः॥ दृश्यत्वान्यथानुपपत्त्येति॥ दृश्यत्वस्यान्यथासत्त्वेनुपपत्त्येत्यर्थः॥ तत्सामग्रीति॥ अर्थापत्तिसामग्रीत्यर्थः।आक्षेप्यस्य रात्रिभोजनस्य। उपपादकत्वं पीनत्वोपपादकत्वं। आक्षेपकस्य पीनत्वस्य। अनुपपद्यमानत्वं आक्षेप्यं रात्रिभोजनं विनानुपपद्यमानत्वं॥ संबंधीति॥ ज्ञेयप्रपंचेत्यर्थः। संबंधस्येति॥ दृक्संबंधरूपदृश्यत्वस्येत्यर्थः॥ प्रतिकूलमेवेति॥ संबंधिनो मिथ्यात्वे संबंधस्वरूपमेव न सिद्धचेदिति मिथ्यात्वं संबंधरूपाक्षेपकस्य प्रतिकूलमेव नोपपादकमित्यर्थः। ननु यद्याक्षेपकः संबंधोऽध्यस्तत्वादन्यो विषयविषयिभावादिर्वास्तवः स्यात्तदैव मिथ्यात्वं तदुपपादकं न स्यात्। किंतु प्रतिकूलमेवेति वक्तुंशक्यते। नचैवं किंत्वध्यस्तत्वरूपसंबंधएव मिथ्यात्वाक्षेपकः मिथ्यात्वंचाध्यस्तत्वरूपसंबंधानुकूलमेवेति तदुपपादकं भविष्यत्येवेत्याशंक्य निषेधति॥ नचेति॥ आध्यासिकसंबंधशब्दस्यार्थद्वयमस्ति दृग्दृश्ययोरध्यासएव संबंध इति तथा अन्यः कश्चिद्विषयविषयिभावः संबंधोस्ति सोध्यस्त इति च। तत्राद्याभिप्रायेणेदं निराकरणं तस्येति। अध्यस्तत्वरूपसंबंधस्येत्यर्थः। तथाचाक्षेपकस्य प्रमितत्वाभावादर्थापत्तिसामग्रीन्यूनेति भावः। नन्वाध्यासिकसंबंधो नाम अध्यासएवसंबंध इति नार्थः। येन तस्याद्याप्यप्रमितत्वेनाक्षेपकत्वाभावः। किंनाम कश्चित्संबंधो विषयविषयिभावोस्ति सोध्यस्तो मिथ्याभूत उच्यते। तथाचैतादृशमिथ्याभूतसंबंधस्य संबंधिमिथ्यात्वोपपादकतयानुकूल्यमेव भविष्यतीत्याशंक्य निराकरोति॥ नचेति॥ संबंधस्य विषयविषयिभावस्य। तथाचैतादृशसंबंधस्य प्रत्यक्षसिद्धतया सत्यत्वेन न तस्य संबंधिमिथ्यात्वमुपपादकमिति भावः।

ननु विनैव बाधकमित्यनुपपन्नं संबंधस्यामिथ्यात्वे दृश्यमिथ्यात्वस्यैव बाधकत्वात् दृश्यस्य संबंधिनः प्रपंचस्यैव मिथ्यात्वात्तत्संबंधस्यापि मिथ्यात्वमेवांगीकार्यमित्याशंक्य निषेधति॥ नचेति॥ अन्योन्येति॥ दृग्दृश्यसंबंधमिथ्यात्वे सिद्धे दृश्यस्य सत्यत्वे संबंधानुपपत्त्या दृश्यमिथ्यात्वसिद्धिः तत्सिद्धौ च संबंधिभूतदृश्यस्य मिथ्यात्वेन तत्संबंधस्यापि मिथ्यात्वसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः॥ प्रत्यक्षादीति॥ सन्घटइत्यादिप्रत्यक्षेत्यर्थः। तथा चाक्षेपकस्य प्रमाणाविरुद्धत्वरूपार्थापत्तिसामग्रीनेत्यर्थः। नन्वाक्षेप्यमिथ्यात्वं न प्रत्यक्षविरुद्धं तस्यातत्वावेदकत्वादित्यत आह॥ नच प्रत्यक्षेति॥ स्वतःप्राप्तेति॥ स्वतःप्रामाण्यप्राप्तेत्यर्थः। ननु दृश्यत्वान्यथानुपपत्त्याध्यासिकसंबंधसिध्या प्रपंचमिथ्यात्वसिद्धेः कथं तत्सत्त्वग्राहिप्रत्यक्षस्य तत्वावेदकत्वमित्यत उक्तं प्रत्यक्षाद्यविरुद्धेति। अनेनाक्षेपकस्य दृश्यत्वस्याक्षेप्यं दृश्यमिथ्यात्वं विना सत्यसंबंधेनैवोपपत्तावनुपपद्यमानत्वमपि नास्तीत्युक्तं भवति। एकस्य दृश्यत्वस्यान्यथानुपपत्त्या सर्वप्रपंचमिथ्यात्वकल्पनमयुक्तमित्याह॥ नापीति॥ एकस्य दृश्यत्वस्योपपत्तये प्रत्यक्षादिना सत्यत्वेन प्रमितानेकप्रपंचाख्यवस्तुनस्त्यागो मिथ्यात्वकल्पनरूपो युक्तः ''त्यजेदेकं कुलस्यार्थे'' इति न्यायेन एकस्य दृश्यत्वस्यैव त्यागोस्तु बहुबाधस्यान्याय्यत्वादिति भावः। आक्षेपकं विकल्प्य दूषयति॥ आक्षेपकंचेति॥ मिथ्यात्वाक्षेपकमित्यर्थः॥ दृगिति॥ दृगध्यस्तत्वरूपं दृश्यत्वमित्यर्थः॥ आक्षेप्येति॥ दृगध्यस्तत्वस्यैवमिथ्यात्वरूपत्वादिति भावः॥ तवेति॥ विषयत्वमनंगीकर्तुः। तथा च प्रमितत्वं नास्तीतिभावः॥ अनुपपत्तीति॥ दृग्विषयत्वरूपदृश्यत्वाख्याक्षेपकस्येत्यर्थः। तथा चार्थापत्तिसामग्रीन्यूनेति भावः॥ सिद्धचसंमतेरिति॥ दृगधीनसिद्धिकत्वमित्यत्र बहुव्रीह्यर्थस्य सिद्धिसंबंधस्य विषयत्वरूपत्वादिति भावः। तच्च तवासिद्धमिति हृदयं॥ नच दृक्संबंधेति॥ दृक्संबंधसामान्यमेव दृश्यत्वं। तच्च प्रसक्त संयोगादिसंबंधविशेषनिषेधसहकृतं सत् अध्यस्तत्वरूपे संबंधविशेषे पर्यवस्यच्च संबंधिनो दृश्यस्य मिथ्यात्वं

ननु प्रातिभासिकस्यापि प्रातिभासिके स्वज्ञाने व्यावहारिकस्यापि घटादे व्यावहारिके स्वज्ञानःएवाध्यासोस्त्वतो न व्यभिचार इत्यतआह॥ अध्यस्तेति॥ अधिष्ठानस्याध्यस्ताधिक सत्ताकत्वनियमादितिभावः। अतएवाध्यस्ताधिकसत्ताकत्वाभावप्रदर्शनार्थं पूर्वं प्रातिभासिके व्यावहारिक इत्युक्तमितिध्येयं। प्रातिभासिकस्य रूप्यादेः प्रातिभासिके स्वज्ञानेऽध्यास इत्यत्र दूषणांतरमाह॥ प्रातिभासिकादिति॥ रूप्यादित्यर्थः॥ अधिष्ठानस्याध्यस्तात्पूर्वं सत्त्वनियमात्प्रातिभासिकाद्रूप्यात्पूर्वं प्रातिभासिकस्य तज्ज्ञानस्य सत्त्वमयुक्तं। रूप्यस्य प्रतिभासमात्रशरीरत्वेन तयोरेककालीनत्वादिति भावः। इतोपि न रूप्यस्य ज्ञानेऽध्यासः तथात्वे त्वन्मतविरोधादित्याह॥ त्वयापीति॥ इदमंशेति॥ शुक्त्यवच्छिन्नेत्यर्थः॥ प्रकाश्यतइति॥ तथाच रूप्याकाराविद्यावृत्तिप्रतिबिंबितचैतन्यमेव रूप्यज्ञानमित्यर्थः। तथाच रूप्यज्ञानाधिष्ठानयोर्भेदान्न रूप्यादेः स्वज्ञानेऽध्यासइत्याशयः। अधिष्ठानाज्ञानेनाध्यासजन्म तज्ज्ञानेनाध्यासनिवृत्तिरितिविवेकः॥ रूप्येति॥ रूप्यज्ञानस्याधिष्ठानत्वाद्रूप्यज्ञानाज्ञानेन रूप्यभ्रमजननप्रसंगः। रूप्यज्ञानज्ञानेन रूप्यभ्रमनिवृत्तिप्रसंगइत्यर्थः। नचेष्टापत्तिः। ज्ञानस्य ज्ञातैकसत्त्वेन तदज्ञानायोगादिति भावः॥ ज्ञानमिति॥ अधिष्ठानासंभिन्नतयाऽध्यस्तप्रतीतेर्दर्शनाज्ज्ञानं रूप्यमिति धीःस्यादितिभावः। ज्ञानात् स्वाधिष्ठानभूतात् स्वज्ञाने पश्चाद्भाविनि। तथाच घटादेःपूर्वमसत्त्वे सन्निकर्षायोगेना धिष्ठानभूततज्ज्ञानोत्पत्तेरवायोगादित्यर्थः। स्वाधिष्ठानभूतस्वज्ञाने घटादेरध्यस्तत्वे प्रातिभासिकत्वापत्त्याऽध्यासे सति घटस्वरूपसिद्ध्या घटसन्निकर्षजन्यघटज्ञानरूपाधिष्ठानसिद्धिः अधिष्ठाने सिद्धे सति तत्र घटादेरध्याससिद्धिरित्यन्योन्याश्रय इति हृदयं।

ननु न मया घटसन्निकृष्टेंद्रियजन्यज्ञानेऽध्यासोंऽगीक्रियते येनोक्तदोषः किं नाम घटसन्निकर्षजन्या या वृत्तिस्तया घटो न प्रकाश्यते सा घटज्ञानं न भवतीति यावत्। तस्यावृत्तेरज्ञाननिवर्तकत्वमात्रमेवांगीक्रियते तथाचाज्ञाने निवृत्ते तदभिव्यक्तं यद्घटाधिष्ठानचैतन्यं तेन प्रकाश्यते तदेव चैतन्यं घटज्ञानमिति यावत्। यच्चघटादिज्ञानत्वेनाभिमतं घटाधिष्ठानचैतन्यं न तद्घटसन्निकर्षजन्यं तच्चाधिष्ठानचैतन्यरूपं ज्ञानंच घटापेक्षया पूर्ववृत्तीति युक्तो घटादेःस्वज्ञानेऽध्यास इत्याशंकते॥ नन्विति॥ ननु वृत्तेरेवाज्ञानविरोधित्वं मयांगीकृतमिति ततः किंप्रकृतइत्यत आह॥ अज्ञानेति॥ अन्यस्य चैतन्यरूपस्य। तथाच वृत्तेरेव ज्ञानत्वात्तस्याश्चघटसन्निकृष्टेंद्रियजन्यत्वेन वृत्तेः पूर्वं घटस्य सत्त्वान्न तस्यज्ञानेऽध्यासइत्यर्थः। घटाधिष्ठानचैतन्यस्यैव घटज्ञानत्वांगीकारे स्ववचनविरोधं चाह॥ त्वयापीति॥ घटाधिष्ठानस्य वृत्तिप्रतिबिंबितचैतन्यस्य त्वन्मते आभाससंज्ञा। तथाचोक्तं।

"चैतन्यं द्विविधं प्रोक्तं वृत्तौ यत्प्रतिबिंबितं ।
आभास उच्यतेऽन्यच्चानाभास इति शब्दितम् ॥"

इति। उक्तिर्व्यवहारः। घटोयमित्यसावुक्तिरित्यस्य वृत्तिरूपज्ञानेन भवतीत्यर्थः। घटोयमिति व्यवहारजनकं घटोयमिति ज्ञानमाभासरूपमेवेतियावत्॥ विज्ञातइति॥ घटज्ञानवानहमित्युक्तिरित्यर्थः। ब्रह्मरूपानुभवस्साक्षी। विज्ञातो घट इत्युक्तिजनकं अनुव्यवसायरूपं ज्ञानं साक्ष्येवेति यावत्॥ घटानधिष्ठानस्येति॥ तथाच घटानधिष्ठानस्य वृत्तिप्रतिबिंबितस्य विशिष्टचैतन्यस्यैव घटज्ञानत्वावगमात् घटाधिष्ठानचैतन्यस्य घटज्ञानत्वांगीकारे

न युक्तः। तथाच ज्ञानं विप्रकृष्टेन विषयेण न संबध्यते प्रकाशत्वात्प्रदीपवदित्यनुमानविरोधइतिचेत्तत्राह। यद्यपीत्यादिना। यथेच्छाया आंतरायाबहिष्ठविषयविषयकत्वं एवं प्रकाशरूपज्ञानस्यापि। आंतरत्वेन प्रदीपवैलक्षण्यात्। तथाऽपरोक्षस्थलेंतःकरणवृत्तेर्बहिर्निस्सरणाभावेन तद्विषयिणी वृत्तिरंतरेव भवतीतित्वन्मतरहस्यं।; एवंचांतरायां परोक्षवृत्तौ विप्रकृष्टेनापि विषयेण संबंधस्य त्वन्मते दर्शनाच्च विप्रकृष्टेन प्रकाश्येनाध्यासिकसंबंधातिरिक्तो विषयविषयिभावसंबंधो युक्त एवेत्यर्थः। तथाचत्वदीयानुमाने आंतरत्वाभाव उपाधिरित्युक्तंभवति। यदि प्रदीपदृष्टांतेन प्रकाशरूपज्ञानस्य विषयेण संबंधाभावः कथ्यते तर्हि प्रदीपे प्रकाश्यस्य घटादेरध्यासाभावात्तद्दृष्टांतेन प्रकाशरूपे ज्ञानेपि ज्ञेयस्याध्यासो न युक्तः स्यादित्याह॥ अन्यथेति॥ ज्ञानविशेषे ज्ञेये नातिरिक्तसंबंधस्त्वयाप्यभ्युपगतइति सर्वत्रज्ञाने सएवास्त्वित्याह॥ किंचेति॥ नियमइति॥ येन दृश्यप्रपंचस्य दृश्यध्यासः सिद्ध्येदित्यर्थः। यज्ज्ञेयं तज्ज्ञानेऽध्यस्तमिति नियमः कुतो नास्तीत्यतो व्यभिचारादित्याह॥ अनध्यस्तस्येति॥ तुच्छस्य स्वज्ञाने शब्दादिजन्यज्ञानेऽनध्यासादित्यन्वयः। तदुपपादनायोक्तमनध्यस्तस्येति। तुच्छस्याऽनध्यस्तत्वांगीकारात्। अध्यस्ते प्रातिभासिकसत्व मंगीकृत्यासद्वैलक्षण्यांगीकारात् तुच्छस्यचाध्यासांगीकारे प्रातिभासिकताद्यापत्तेरिति भावः। पंचमप्रकारेति।

''नसन्नासन्नसदसन्नानिर्वाच्यश्चतत्क्षयः ।
यक्षानुरूपोबलिरित्याचार्याः प्रत्यपीपदनिन्''

इति वचनादितिभावः। अविद्याया अनिर्वाच्यत्वेन सदसद्वैलक्षण्यात्प्रतियोगितदभावयोर्वैलक्षण्यस्यावश्यकतया तन्निवृत्तेः पंचमप्रकारत्वं तैरंगीकृतमिति ध्येयं। अविद्यानिवृत्तेः स्वज्ञानेऽनध्यासादित्यन्वयः। अध्यस्तत्वे प्रातिभासिकसत्वापत्त्या पंचमप्रकारत्वभंगइति भावः। अभावस्य स्वज्ञानेऽनध्यासादित्यन्वयः॥

नन्वभावस्य प्रपंचांतर्गतस्य स्वज्ञानेऽध्यास एवेति चेन्न। तस्य पारमार्थिकत्वांगीकारात्। ननु कथं पारमार्थिकत्वमभावस्य तथात्वे दृग्रूपत्वापत्तेः। नचेष्टापत्तिः। भावाभावयोस्तदयोगादित्यत उक्तं॥ अदृग्रूपत्वेपीति॥ अब्रह्मरूपत्वेपीति। सत्यस्येतिशेषः। ननु तर्ह्यद्वैतहानिरित्यत उक्तमभावद्वैतमतइति। अभावरूपं द्वितीयं पारमार्थिकमस्ति ''अद्वितीय''मित्यादिश्रुतिस्तुद्वितीयभावनिषेधपरेति मत इत्यर्थः। ''भावाद्वैतमत'' इत्यपि पाठः। तत्र भावरूपं द्वितीयं नास्ति अभावरूपं द्वितीयमस्तीतिमत इत्यर्थो द्रष्टव्यः। तथाचोक्तनियमस्य तुच्छेऽविद्यानिवृत्तावभावतत्वे चाभावात्तत्रैव व्यभिचार इति भावः। पुनरुक्तनियमस्य स्थलांतरे व्यभिचारमाह॥ अपरोक्षेति॥ अतीतादेर्व्यावहारिकस्य परोक्षानुभवरूपेऽनुमित्यादिरूपस्वज्ञानेऽनध्यासादित्यन्वयः। नन्वतीतादेरपि व्यावहारिकस्यानुमित्यादिरूपपरोक्षज्ञानएवाध्यासोस्त्वित्यत उक्तमपरोक्षेति। अध्यस्तस्य अध्यस्ततयांगीकृतस्य नित्यातींद्रियस्य धर्मादेः। स्थलांतरे व्यभिचारमाह॥ स्मर्यमाणस्येति॥ स्मृतिविषयस्येत्यर्थः। ननु स्मर्यमाणमपि स्मृतावेवाध्यस्तं स्मृतेश्चैतन्यरूपत्वादित्याशंकावारणाय वृत्त्यात्मक इति। स्मृतेरंतःकरणवृत्त्यात्मकत्वात्तत्र चैतन्यप्रतिफलनादेरप्यभावादित्यर्थः। स्थलांतरे व्यभिचारमाह॥ प्रातिभासिकस्येति॥ ननु प्रातिभासिकार्थज्ञानं यत्तत्सत्यमेव तत्र प्रातिभासिकस्याध्यासः संभवतीत्यत आह॥ त्वन्मत इति॥ भ्रमरूपज्ञानस्यापि॥ अर्थज्ञानात्मकोभयविधभ्रमांगीकारादितिभावः।

संबंधिनोर्मिथ्यात्वमाक्षिपतीति शंकायां संयोगस्य मिथ्यात्वेपि संबंधिनोस्तदभावादिति दूषणे सत्येव दूषणांतरमाह॥ ज्ञानस्येवेति॥ ज्ञेयस्य दृश्यप्रपंचस्य सत्यत्वेपि तत्संबंधस्य मिथ्यात्वमस्तु संबंधिनः सत्यत्वेपि संबंधस्य मिथ्यात्वं तु तवापि संमतमित्याशयेनोक्तं। ज्ञानस्येति॥ यथादृग्दृश्ययोर्मध्ये एकस्याश्चैतन्यरूपदृशः सत्यत्वेपि तत्संबंधस्य मिथ्यात्वं स्वीकृतं। एवं दृग्दृश्ययोरुभयोस्सत्यत्वेपि तत्संबंधस्य मिथ्यात्वोपपत्तेरित्यर्थः। ननु ज्ञेयं ज्ञानेऽध्यस्तं मिथ्याभूतसंबंधप्रतियोगित्वात् यन्मिथ्याभूतसंबंधप्रतियोगितदपरस्मिन्नारोपितं यथा रजतं मिथ्याभूततादात्म्यरूपसंबंधप्रतियोगि शुक्तावध्यस्तमिति चेत्तत्राह॥ नचेति॥ दंडचैत्रयोर्विभक्तयोर्यः संयोग आरोपितो यदा तदा मिथ्याभूतसंबंधप्रतियोगी चैत्रोऽपरस्मिन्दंडेऽध्यस्तो न भवतीति चैत्रे व्यभिचार इत्यर्थः। ननु तात्विकसंबंधप्रतियोगी परस्मिन्नध्यस्त इति नोऽभिप्रायः। नच दंडचैत्रादेरारोपितः संयोगस्तात्विकः अतो न दंडे चैत्रस्याध्यासोऽतो न चैत्रे व्यभिचार इत्यतः स्वरूपासिद्धिरित्याह॥ नचेति॥ इच्छादौ इच्छेष्यमाणादौ कृप्तसंबंस्यत्यागेन ज्ञानज्ञेययोराध्यासिकसंबंधकल्पनं हि ज्ञेयमिथ्यात्वसिद्धचर्थं। नच तदंगीकारेपि ज्ञेयमिथ्यात्वसिद्धिः। तत्साधकस्य तात्विकसंबंधप्रतियोगित्वादित्यस्य स्वरूपासिद्धत्वादिति भावः। ननु दृष्टानुसारेण घटतदभावादिष्विव धर्मिसमसत्ताकः संबंधो ज्ञानज्ञेययोरस्त्वित्ययुक्तं। तत्राभावादेः प्रतियोग्यादिना तादृशसंबंधः संभवतीति कल्प्यते। घटतदभावयोरेकसत्ताकत्वात्। ज्ञानस्य ज्ञेयेन संबंधस्तथा न भवति। तथाहि। ज्ञानज्ञेययोरुभयोरपि संबंधित्वात्ससंबंधः किं ज्ञानसमसत्ताको वा ज्ञेयसमसत्ताकोवा। नाद्यः। ज्ञानस्य चैतन्यरूपतया सत्त्वेन संबंधस्यापि सत्यत्वापत्तेः। द्वितीये ज्ञेयस्यमिथ्यात्वेन संबंधस्यापि मिथ्यात्वापत्तेरिति परस्परप्रतिबंधादित्यत आह॥ नचेति॥ नियमाकेति॥ संबंधस्य सत्तासंबंधिसत्तया समाना नतु यावत्संबंधिसत्तया। नियामकाभावात्यिर्थः। तथाच ज्ञानसमसत्ताकस्तात्विकएव संबंधः स्वीकार्य इति भावः। ज्ञानज्ञेययोस्तात्विकसंबंधाकल्पने बाधकं चाह॥ दृग्दृश्ययोरिति॥ दृग्दृश्ययोः संबंधो नेत्येतद्वाक्यप्रतिपाद्यार्थस्य एतद्वाक्यजन्यज्ञानेनासंबंधेन श्रवणादिरूपक्रियायाश्च श्रोतव्येनासंबंधेन चरमवृत्तिरूपसाक्षात्काररूपक्रियायाश्च साक्षात्कर्तव्येन ब्रह्मणाऽसंबंधेन तव वाक्यप्रयोगरूपा या क्रिया सा विरुद्धचेतेत्यर्थः॥ असंबंधेनेति॥ ब्रह्मज्ञानरूपधर्मिसमसत्ताकसंबंधाभावेनेत्यर्थः। तथाचोक्तस्थले तादृशसंबंधासिद्धिरेव ज्ञानज्ञेययोस्तादृशसंबंधानंगीकारे बाधिकेत्याशयः।

ननूक्तस्थलेप्याध्यासिकसंबंधएव स्वीक्रियत इति चेत्तत्राह॥ नहीति॥ श्रवणमननादीनां चरमसाक्षात्कारस्यचेत्यत्र शंकते॥ ब्रह्मणीति॥ यथा कथं चिदेकस्यैकत्राध्यासमंगीकृत्याध्यासिकसंबंधोऽस्माभिरुच्यते तत्र साक्षात्कारादौ ब्रह्मणोऽध्यासाभावेपि साक्षात्कारश्रवणादिरूपक्रियाया ब्रह्मण्यध्यासोंगीक्रियते तावतैव ब्रह्मसाक्षात्कारादीनां ब्रह्मीयत्वं भविष्यतीत्यर्थः॥ तदिति॥ ब्रह्मेत्यर्थः॥ तत्त्वेति॥ ब्रह्मीयत्वापातादित्यर्थः। सर्वस्यापि ब्रह्मण्यध्यस्तत्वेन घटसाक्षात्कारस्यापि ब्रह्मण्यध्यस्तत्वादिति भावः। यदि साक्षात्कारस्य ब्रह्मण्यध्यासोंगीक्रियते तर्हि न्यायसाम्याद्वेदतात्पर्यादिरपि धर्मादावध्यासः स्यात्। प्रकृतेपि ज्ञेयप्रपंचएव ज्ञानाध्यासापात इत्याह॥ धर्मादावित्यादिना॥ दृग्दृश्ययोः संबंधोनेत्यादिनोक्तं संगृह्णाति॥ एवंचेति॥ तदर्थस्य दृग्दृश्यसंबंधाभावस्य अनध्यासादित्यन्वयः। अन्यः आध्यासिकसंबंधादन्यो विषयविषयिभावः। ननु ज्ञानज्ञेययोराध्यासिकसंबंधादन्यस्संबंधएव नसंभवति। तथाहि ज्ञानं प्रकाशः प्रकाशस्य च विप्रकृष्टेन प्रकाश्येन संबंधाभावस्य प्रदीपादौ दृष्टात्वादत्रापि विप्रकृष्टेन प्रकाश्येन विषयविषयिभावसंबंधो

तथेच्छायामपि स्वजनकज्ञानाधीनं सविषयकत्वमस्तीति सएव संबंधस्तत्र वक्तव्य इति भावः॥ अन्यथेति॥ घटविषयकज्ञानजन्यत्वेनैवेच्छाया घटीयत्वं न वास्तवं तद्विषयकत्वमस्तीति यद्युच्यते तर्हि घटपटाविति समूहालंबनज्ञानानंतरं पटो मे भूयादितीच्छाया अपि घटीयत्वं स्यात्। घटविषयसमूहालंबनज्ञानजन्यत्वादिति भावः। नित्येति॥ नित्याया ईश्वरेच्छाया घटादिविषयसंबंधो न स्यात् तद्विषयकज्ञानजन्यत्वाभावादिना जन्यत्वादिति भावः। अनित्येच्छायामियं व्यवस्थेति परो वदिष्यति अतो दूषणांतरमाह॥ पुत्रादीति॥ घटविषयकज्ञानजन्यत्वमेवेच्छायास्तद्विषयकत्वमिति यद्युच्यते तर्हि पुत्रादिविषयकज्ञानजन्यत्वान्निर्विषयस्य सुखादेरपि पुत्रादिविषयकत्वव्यवहारः स्यादित्यर्थः। अज्ञानस्याऽज्ञेयेनेत्यत्र शंकांपरिहरति॥ अज्ञानस्येति॥ तद्विषयत्वेति॥ वास्तवेत्यर्थः॥ अज्ञानस्यापि वास्तवमज्ञेयविषयकत्वं नास्ति किंनाम तज्ज्ञाननिवर्त्यत्वमेव तद्विषयकत्वमिति न वाच्यं। तथात्वे तद्विषयकज्ञाननिवर्त्यत्वमेव न स्यात् कुत इत्यत आह॥ तस्येति॥ अज्ञानस्येत्यर्थः॥ समानेति॥ स्वविषयविषयकेत्यर्थः। तथाचाज्ञानस्य स्वविषयविषयकज्ञाननिवर्त्यत्वनियमेन स्वविषयेत्युक्त्या वास्तवं सविषयकत्वमंगीकार्यमिति भावः। ज्ञानस्याज्ञानविषयविषयकत्वेन निवर्तकत्वानंगीकारे ''अतद्विषयज्ञानेन तदज्ञाननिवृत्तौ घटज्ञानेनापि निवर्तेते''ति भगवत्पादोक्तातिप्रसंगो द्रष्टव्यः। नन्वज्ञानस्य सविषयकत्वं तदा स्यात् यदि विषयाच्छादकत्वं स्यात् नचैवं किंनाम यथांधकारस्य गृहरूपाश्रयाच्छादकत्वं एवमज्ञानस्यापि स्वाश्रयरूपजीवाच्छादकत्वमेव स्वीकृतमिति चेत्तत्राह॥ अज्ञानस्येति॥ स्वीकृतत्वाच्चेति॥ अस्मिन्गृहे घटादिविषयेंऽधकारः प्रतिबंधकइति वदस्मिन्नस्याज्ञानमित्यज्ञानस्याश्रयविषयसाहित्यानुभवेन सविषयकत्वस्वीकाराच्चेत्यर्थः। यथोक्तं ''आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवलेति''। ध्वंसादेश्चातीता दिनेत्यतदुपपादयति॥ यदिचेत्यादिना॥ नियामकं विशिष्टव्यवहारनियामकं। स्वभावसंबंध इत्यस्य विवरणं स्वरूपात्मकइति। स्वरूपसंबंधलक्षणमाह॥ संबंधांतरमिति॥ प्रतियोगित्वादिकमित्यादिपदेनानुयोगित्वसंग्रहः॥ इहापीति॥ दृग्दृश्ययोर्विषयविषयिभावसंबंधोपि स्वभावसंबंधोवाऽसंबंधरूपोवा संबंधकार्यकारि स्यादित्यर्थः।

ननु प्रतियोग्यभावादीनामकल्पितस्य संबंधस्य दर्शनाज्ज्ञानज्ञेययोरप्यकल्पित आध्यासिक संबंधातिरिक्तस्संबंधःसिद्धयतीत्युक्तं तदयुक्तं प्रतियोग्यभावादिसंबंधस्यापि मिथ्यात्वेन दृष्टांतासंमतेरित्याशंकते॥ भावाभावादेरिति॥ आध्यासिकसंबंध इत्यस्य ज्ञानज्ञेययोः संबंधोऽस्ति। सचाध्यस्तइति तयोरध्यासएव संबंध इति चार्थद्वयं परेण स्वीकृतं तत्राऽऽद्यार्थाभिप्रायेणेयं शंकेति ज्ञातव्यं॥ प्रपंचेति॥ दृग्दृश्ययोः संबंधानुपपत्त्या ज्ञेयमात्रस्याध्यासिकत्वे सिद्धे तन्मध्यपतितस्य प्रतियोग्यभावादिसंबंधस्यापि मिथ्यात्वं सिद्धयति तन्मिथ्यात्वे सिद्धे कुत्रापि सत्यसंबंधस्याकल्पनाज्ज्ञानज्ञेययोराध्यासिकसंबंधः सिद्धयतीत्यन्योन्याश्रयइत्यर्थः॥ घटस्येति॥ ज्ञानज्ञेयसंबंधस्य मिथ्यात्वं न सिद्धयति यस्संबंधस्सधर्मिसमसत्ताको दृष्टः यथा घटस्याभाव इत्यत्र घटप्रतियोगिकोऽभावधर्मिकः संबंधोऽभावसमसत्ताको दृष्टः। एवमेव घटस्य ज्ञानमित्यत्रापि ज्ञानस्य धर्मित्वात्तत्समसत्ताकएव स्वीकार्यः ज्ञानंच चैतन्यमेवेति न संबंधमिथ्यात्वसिद्धिरित्यर्थः॥ संयोगवदिति॥ यथाविभक्तयोर्घटपटयोस्संयोग आरोपितस्तद्वदित्यर्थः। अन्येत्वन्यतरकर्मादिजन्यत्वाभावेन विभुद्रव्ययोस्संयोगा भावादजन्यसंयोगस्य चाप्रामाणिकत्वात्तत्संयोगस्तार्किकैकदेशिमते आरोपितस्तद्वदित्यर्थः इत्याहुः॥ तथाच यथा संयोगसंबंधस्य मिथ्यात्वेपि संबंधिनोस्सत्यत्वमेवं विषयत्वरूपसंबंधस्य मिथ्यात्वेपि प्रपंचमिथ्यात्वं न सिद्धयति। दृश्येतिहेतुगर्भं। ज्ञानेन सत्यतया प्रमितत्वादित्यर्थः। ननु संबंधमिथ्यात्वमेव

अपृथग्दृष्टयोस्तददर्शनात्। अपृथक् सिद्धिरयुतसिद्धिर्वासमवायसंबंधस्य बाधिकास्यादिति शंकिते तत्र त्वया समवायः सिद्ध्यन् धर्मिग्राहकप्रमाणे नापृथक् सिद्धसंबंधत्वेनैव सिद्ध्यतीति वाच्यं। तत्समंममापीत्याह॥ अन्यथेति॥ ज्ञानज्ञेययोः प्रसिद्धसंबंधातिरिक्तसंबंधानंगीकारे स्वन्यायविरोधादिस्यादित्याह॥ ध्वंसादेरित्यादिना॥ आवश्यकत्वोपपादनाय॥ मिथ्यात्वेत्यादि॥ अर्थेनासंबंधादित्यंतं स्वन्यायविरोधोदाहरणं। ज्ञानस्येत्यादिकं स्वक्रियास्ववचनविरोधयोः। तत्र ज्ञानस्य ज्ञेयेन संबंधानिरूपणन्यायेन ध्वंसप्रागभावादेः प्रतियोगिनापि दुर्निरूपणीयः स्यादिति स्वन्यायविरोधः। ज्ञानज्ञेययोः संबंधाभावं प्रतिपादयितुं ज्ञानस्य ज्ञेयेन संबंधो नास्तीति प्रागुक्तं यद्वाक्यं तत्प्रयोगरूपा या क्रिया तत्प्रतिपाद्यस्य संबंधाभावरूपार्थस्यैतद्वाक्यजन्यज्ञानस्यच संबंधान्मूकोऽहमिति स्वक्रियाविरोधः। ज्ञानज्ञेययोः संबंधाभावरूपार्थस्य ज्ञानज्ञेययोस्संबंधो नास्तीत्येतद्वाक्यजन्यज्ञानेन संबंधं बोधयितुं एतद्वाक्यं प्रयुङ्क्ते ज्ञानज्ञेययोः संबंधो नास्तीति वदतिचेति मे माता वंध्येतिवत्स्ववचनविरोधः। तथाच यथा ध्वंसप्रतियोग्यादिषु नाध्यासिकसंबंधः किंत्वन्य एव तथा ज्ञानज्ञेययोरपीत्यर्थः।

ननूक्तेषु ध्वंसादिषु आध्यासिकसंबंधो भविष्यतीति संबंधाभावप्रयुक्ताः स्वन्यायविरोधादयो न स्युरित्यतआह॥ नहीत्यादिना॥ एतेनेति॥ स्वन्यायविरोधादिनेत्यर्थः॥ न्यायइति॥ ''न्याये दृढेऽन्यसामान्यात्किंदृढेऽन्यदपि बाध्यता''मिति खंडनकारिकापाठः। तदर्थस्त्वित्थं। ज्ञानज्ञेययोः संबंधानुपपत्त्या आध्यासिकसंबधोंऽगीकार्य इति मदीये न्याये स्वतएव दृढे सति ध्वंसप्रतियोग्यादेः प्रसिद्धसंबंधाभावात्संबंधांतरं यथांगीकार्यं तथा त्वयापि ज्ञानज्ञेययोरप्यतिरिक्तः संबंधोंऽगीक्रियतां न्यायसाम्यादिति ध्वंसप्रतियोग्यादेरन्यसाम्यापादनात्किं त्वदीयन्यायादार्ढ्यसहमेव स्वीकरिष्यामीति भवदापादनं व्यर्थंस्यादितिभावः। मदीये न्याये पूर्वोक्ते दृढे सति तन्न्यायाद् ध्वंसप्रतियोग्यादीनामतिरिक्त संबंधवत्त्वं बाध्यतां तत्राप्येतन्न्यायादाध्यासिक एव संबंधोऽस्तु। ननु ध्वंसप्रतियोग्यादीनामाध्यासिकसंबंधवत्त्वे मिथ्यात्वं प्राप्तमिति चेन्न। इष्टापत्तेरित्याशयवानाह॥ न ममत्वमिति॥ अस्माकं कुत्रापि पदार्थे पक्षपातो नास्तीत्यर्थः। दृढेऽन्यदपि बाध्यतामित्याशंक्य खंडयति॥ खव्याहतस्येति॥ व्यावहारिकव्यवस्थोच्छेदस्येत्यर्थः॥ अन्यथेति॥ स्वव्याहतस्यापि न्यायस्य दार्ढ्य इत्यर्थः॥ जातीति॥ यदि महानससाधर्म्याद्धूमवत्त्वात्पर्वतोऽग्निमान्स्यात्तदा ह्रदसाधर्म्यात् द्रव्यत्वान्निरग्निकः किं न स्यादिति जात्युत्तरं। इदंच स्वव्याहतं। यदि साधकसाधर्म्यात्पक्षधर्मत्वादेः द्रव्यत्वहेतुः साध्यसाधकः स्यात्तदाऽसाधकानुमानसाधर्म्यात्पंचम्यंतत्वादेः साध्यासाधकोपि किं न स्यादित्यापादनसंभवेन स्वन्यायविरोधात्। एवं च जातिवादी वदिष्यति मदीये ज्ञाने स्वत एव दृढे साम्यापादनं व्यर्थं अहमेव तत्स्वीकरिष्यामीति दृढत्वे तद्विरुद्धत्वाद्भवदीय स्वन्यायविरोधापादनमेव बाधितमित्यर्थः। मुमुक्षायाश्च मोक्षेणेत्यत्र शंकां परिहरति। नचेति। इच्छाया विषयेणातिरिक्तो विषयविषयिभावसंबंधो नांगीक्रियते किंतर्हि घटविषयकज्ञानजन्यत्वमेवेच्छाया घटविषयकत्वं नतु ज्ञानस्येवेच्छायाः सविषयकत्वमस्तीत्यर्थः। अन्यो विषयविषयिभावः कुतो न युक्त इत्यत आह॥ ज्ञानइति॥ ज्ञाने इंद्रियसन्निकर्षाधीनं सविषयकत्वमस्ति वास्तवं तदपि न स्यात् तत्र घटसन्निकृष्टेंद्रियजन्यत्वमेव घटविषयकत्वमिति वक्तुं शक्यत्वात् स्मृतावपि घटविषयकानुभवजन्यत्वमेव सविषयकत्वमस्तु न वास्तवमिति अनुभवाधीनमनुभूयमानं वास्तवं सविषयकत्वं न स्यादित्यर्थः। तथाच यथा ज्ञानादौ सन्निकृष्टकरणजन्यत्वाद्यधीनं स्मृतौच जनकानुभवाधीनं सविषयकत्वमस्ति

श्रोत्रादिवृत्तेरप्यविद्यारूपदोषजन्यत्वेनाप्रमात्वापत्त्याऽद्वैतागमस्याप्यसिद्धिप्रसंगःस्यादिति तरंगिण्युक्तं द्रष्टव्यं। स्वरूपसंबंधस्थलेपि संयोगसमवायातिरिक्तमपि संबंधं साधयति॥ अभाववद्भूतलमिति॥ विशेषणविशेष्यकेति॥ विशेषणविशेष्यभावावगाहीत्यर्थः। परस्परासंयुक्तेत्यादिकमेव पक्षः। अभाववद्भूतलमित्यादितद्विवरणरूपमिति द्रष्टव्यं। संयोगसमवायाभ्यामर्थांतरतावारणाय पक्षे परस्परासंयुक्तेत्यादिविशेषणं। दृष्टांते संयुक्तत्वमादाय साध्यपर्यवसानं। पक्षे तु संयोगसमवायातिरिक्तमादायेति विवेकः॥ उक्तेति॥ अभाववद्भूतलमित्याद्या परस्परासंयुक्तासमवेतविशेषणविशेष्यकविशिष्टधीरित्यर्थः। ईश्वरप्रमामादाय बाधवारणाय जन्येत्युक्तं॥ संबंधनिमित्तकेति॥ तज्जन्येत्यर्थः। अबाधितपदाभावेऽत्र रजतत्वमिति भ्रमे व्यभिचारः। अत्र शुक्तौ रजतत्वसंयोगसमवाययोर्बाधेन साध्याभावात् अतोऽबाधितपदं। ईश्वरधियां व्यभिचारवारणाय हेतौ जन्यपदं॥ विमताधीरिति॥ अभाववद्भूतलमित्यादिका परस्परासंयुक्तेत्यादिरूपा जन्यप्रमाधीरित्यर्थः। तेन न बाधः॥ तत्सिद्धेरिति॥ ज्ञानज्ञेययोःसंयोगसमवायातिरिक्तद्विष्ठसंबंधसिद्धेरित्यर्थः। ननु पल्लीस्थितगोमति चैत्रे गोमांश्चैत्र इति यदा विशिष्टधीर्भवति तदा विप्रकृष्टगवां तद्वतश्चैत्रस्यच संयोगसमवायाभावादन्यस्य संबंधस्य तत्राकृत्स्नत्वाद्विशिष्टधीत्वं व्यभिचारीत्यत आह॥ गोमांश्चैत्रइति॥ गोमांश्चैत्र इत्यादावपि तेनैव हेतुना संयोगाद्यतिरिक्त संबंधसाधनान्नव्यभिचारइत्यर्थः। ननु संयोगादेरेव संबंधत्वात्तस्यच ज्ञानज्ञेयादिष्वभावात्तत्र संबंधानुमानं बाधितमित्याशंकां संयोगाद्यतिरिक्तसंबंधसाधकाभियुक्तवचसा निराकरोति॥ उक्तंहीति॥ के ते एकशतं षष्ट्यर्थसंबंधाइति शंकायामाह॥ ते चेति॥ कैयटे महाभाष्यटीकायां। षष्ठीदंडकपाठाश्रयणेनेदमुक्तमिति कैयटवाक्यस्याऽर्थानुवादोयं। कःषष्ठी दंडकशब्दार्थ इत्याशंकायां कैयटटीकाकारेण बृहद्विवरणकारेणशेक्तं ''षष्ठीदंडकोनामग्रंथविशेष'' इति।

ननु संयोगादेरन्यस्य संबंधत्वे तस्य कृत्स्नपदार्थेषु अनंतभावात्तदाधिक्यं स्यादित्यत आह॥ प्रमितेति॥ अयंच संबंधः उक्तानुमानत्रयेण प्रमितस्तादृशसंबंधसमावेशेनैव पदार्थाः परिगणनीया इत्याशयः। उक्तानुमानानां बाधकांतरमाशंक्य निराकराति॥ नचेति॥ संयोगसमवायातिरिक्तसंबंधकल्पन इतिशेषः॥ अन्योन्याश्रयादिति॥ सिद्धे द्वित्वे तद्बाधितत्वात्संयोगाद्यतिरिक्तसंबंधसाधकानुमानानामप्रामाण्यं। तस्मिंश्च सिद्धे तद्बाधाभावात्संबंधद्वित्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः। संयोगसमवायातिरिक्तसंबंधसाधकानुमानस्य यदि संबंधद्वित्वं बाधकमित्युच्यते। तर्हि इह तंतुषु पट इत्यादिप्रत्ययः विशेषणविशेष्यभावसंबंधनिबंधनः। अबाधितत्वेन प्रमितत्वादित्यनुमानेन समवायोपि न सिद्धचेत्। संयोगरूपसंबंधस्य ममते एकत्वेन तद्विरुद्धत्वादिति बाधकेऽभिहितेऽन्योन्याश्रयेण तद्बाधकं परिहरणीयं। तन्ममापि तुल्यमित्याशयेनाह॥ अन्यथेति॥ ज्ञानज्ञेययोरतिरिक्तसंबंधकल्पने बाधकांतरमाशंक्य निराचष्टे॥ नापीति॥ अतीतादिरूपज्ञेयेन साकं ज्ञानस्य संबंधो न संभवति संबंधिनोरतीतानागतयोरभावादित्यर्थः॥ विप्रकर्ष इति॥ ज्ञानस्यात्मनिष्ठत्वेनांतरत्वाज्ज्ञेयस्यच बाह्यपदार्थत्वेन तयोर्विप्रकृष्टत्वात्संबंधो न युक्त इत्यर्थः॥ अस्येति॥ संयोगसमवायातिरिक्तोऽयं संबंधोऽनुमानेन सिद्धचन् संबंध्यभावविप्रकर्षौ यथा स्वस्य बाधकौ न स्यातां तथैव स्वापेक्षिताशेषनिर्वाहकतयैव सिद्धचति यथा समवायोऽबाधितेहप्रत्ययत्वाद्यनुमानेन सिद्धचन् स्वापेक्षितैकत्वादियुततयैव सिद्धचति तद्वदित्यर्थः। उक्तानुमानसिद्धसंयोगाद्यतिरिक्तसंबंधस्य संबंध्यभावो विप्रकर्षोवा बाधक इति यद्यंगीक्रियते तर्ह्यबाधितेहप्रत्ययत्वाद्यनुमानेन समवायोपि न सिद्धचेत् पृथक्सिद्धयोर्युतसिद्धयोरेव संयोगसंबंधदर्शनात्।

अनेकाश्चैतन्यरूपब्रह्मदृशः किं सत्यभूतशुद्धब्रह्मरूपा उत घटाद्युपाधिविशिष्टाः अथवोपाध्युपलक्षिताः। नाद्यः। एकमेवेत्यादिश्रुतिविरोधेन तत्र भेदाभावात्। द्वितीयः। उपाधिविशिष्टानां चैतन्यरूपब्रह्मदृशां भेदेपि विशिष्टानां घटादिवन्मिथ्यात्वेनाधिष्ठानत्वायोगात्। अध्यस्ताधिकसत्ताकत्वस्यैवाधिष्ठानत्वौपयिकत्वात्। न तृतीयः। यद्यप्युपाध्युपलक्षिताया ब्रह्मचैतन्यरूपदृशः सत्यत्वमस्ति उपाधेरुपलक्षणमात्रत्वात्। तथाचाधिष्ठानत्वमुपपद्यते तथाप्युपाध्युपलक्षिताया: अधिष्ठानभूतायाः सत्याया दृश अभेदस्य श्रुतिसिद्धत्वान्नानेकत्वमुपपद्यते॥ तथाचानावृतैकदृगध्यस्तत्वे वाच्ये तत्रोक्तातिप्रसंगवारणाय वृत्तिरपेक्षणीयैव। उपाध्युपलक्षिते उपाधिकृतो भेदोऽस्तीति न वृत्तिरपेक्षितेति चेन्न। कथंचिदेव भेदेपि वृत्तिरावश्यक्येव। तथाहि। तत्तदर्थानां तत्तदधिष्ठानचैतन्येष्वध्यासमंगीकृत्यास्मदभिमतवृत्तिद्वारकसंबंधानंगीकारे त्वन्मतेऽस्मदभिमतवृत्तिद्वारकसंबंधात्प्रागेव घटादीनां तत्तदधिष्ठानचैतन्ये स्वतएवाध्यस्तत्वेन आध्यासिकसंबंधस्य सत्त्वाद्घटादिरूपदृश्यप्रतीतिः सर्वदा स्यादेव। अतोऽध्यस्तत्वसंबंधे सत्यपि दृश्याप्रतीतेरतिप्रसंगपरिहारार्थं वृत्तिद्वारकसंबंधोऽगीकार्य एव। तत्रापि प्रपंचस्य सत्यत्वेपि इंद्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधेनैव दृश्यत्वोपपत्तेराध्यासिकसंबंधांगीकारो व्यर्थ एव सच संबंधो विषयविषयिभाव एव। विषयत्वनिरूपणं करिष्याम इत्याशयेनाह॥ सर्वस्यापीत्यादिना। दृश्याप्रतीतेरित्यंतेन॥ वृत्तेरनावश्यकत्वे घटप्रकाशश्चैतन्यसंबंधादेव साक्षाद्भवतीत्युच्यते तत्र विकल्पयति॥ किंचेति॥ अतंत्रत्वेति॥ चैतन्याभिव्यंजकेंद्रियवृत्त्यैव घटप्रकाशोपपत्तावतिप्रसंगाभावेन घटादेश्चैतन्येऽध्यासकल्पनाया व्यर्थत्वेनाध्यासिकसंबंधस्य व्यर्थत्वापातात्। नहि वृत्तिप्रतिबिंबितचैतन्ये घटादिरध्यस्त इति भावः॥ आवश्यकेनेति॥ घटाधिष्ठानचैतन्यं घटप्रकाशकमिति मतेपि तदभिव्यक्त्यर्थं घटाकारवृत्तिप्रतिबिंबितचैतन्यस्याऽनुसरणीयत्वात् तेनैव घटाधिष्ठानचैतन्येन सत्यस्य घटस्य प्रकाशोपपत्तौ तेनाऽधिष्ठानचैतन्याभिव्यक्तिकल्पनायोगादित्यर्थः। अधिष्ठानचैतन्यमध्यस्तस्य प्रकाशकमिति मते दोषांतरमाह॥ किंचेति॥ सत्यस्येत्यधिष्ठानत्वोपपादनाय॥ नाभिव्यक्तिरिति॥ वृत्तिप्रतिबिंबितचैतन्येनेतिशेषः। तथाच न तेन घटादेः प्रकाशः स्यादित्यर्थः॥ न तदधिष्ठानत्वमिति॥ तथाच न तदपि घटादिप्रकाशकमित्यर्थः॥ आत्माश्रयादिति॥ स्वावच्छिन्नस्य स्वाधिष्ठानत्वे स्वस्याप्यधिष्ठानत्वेनात्माश्रय इत्यर्थः। केचित्त्वात्माश्रयशब्दोऽन्योन्याश्रयपरः। तथाच घटस्याध्यासे सति घटस्वरूपसिद्धौ चैतन्यस्य घटावच्छिन्नत्वं। तदवच्छिन्नेचैतन्ये सति अधिष्ठानलाभेन घटादेरध्यास इत्यन्योन्याश्रयादित्यर्थः। तथैव कचित्पाठश्चेत्याहुः। दोषांतरमाह॥ किंचेति॥ घटाधिष्ठानचैतन्यं घटप्रकाशकमिति मते मिथ्याभूतस्य घटवद्घटाधिष्ठानत्वाभावेन घटाप्रकाशकत्वात्सत्यमेव घटाधिष्ठानचैतन्यरूपं ज्ञानं घटप्रकाशकमितिवाच्यं। तस्यच सत्यत्वेन दोषाजन्यतयाऽबाधितार्थविषयकत्वरूपप्रमात्वयोगित्वेन तद्विरुद्धं यत्स्वविषयमिथ्यात्वापादनशीलं स्वविषयं प्रत्यधिष्ठानत्वं तन्न संभवतीत्यर्थः। उभयतः। प्रकाशकदृशो मिथ्यात्वे सत्यत्वेचेत्यर्थः। पाशारज्जुरिकचित्पाठः। गलबंधकरज्जुतित्यर्थः। पाशेतिपाठएवस्वरसः। ''पाशास्याद्गलबंधिके''त्यभिधानात्।

ननु दोषाजन्यत्वं न प्रमात्वप्रयोजकं। चैतन्यस्य सर्वत्र दोषजन्यत्वात् किं तु दोषाजन्यवृत्त्यवच्छिन्नत्वं प्रकृतेच तदभावान्न विषयस्य सत्यत्वमतो मिथ्याभूतस्वविषयं प्रत्यधिष्ठानत्वं सत्याया दृशो युक्तमिति नोभयतः पाशारज्जुरितिचेन्नैवं। घटाकारवृत्तेरपि संभावितेंद्रियादिदोषाजन्यत्वात्। आविद्यकत्वरूपप्रधानो दोष एवास्तीति चेन्न। अविद्यायां दोषत्वासंमतेः। अन्यथाऽद्वैतागमविषयक

ज्ञानकर्मत्वं नास्तीत्यव्याप्तिः॥ कुतइत्यत आह॥ ईश्वरेति॥ क्रियां कुर्वद्भिकारकं। कर्मच कारकविशेषः। एवंचेश्वरज्ञानस्य नित्यस्य कर्मजन्यत्वाभावेन विषयस्यैवाभावे अतीतादिज्ञानस्यच तदजन्यत्वात्तद्विषये ज्ञानकर्मत्वाभावेनाव्याप्तिरित्यर्थः॥ ज्ञानहेतूनामिति॥ ज्ञानतदाकारयोरभेदेन ज्ञानस्वरूपार्पकत्वमेवोक्तं भवति। तच्च ज्ञानजनकेंद्रियादिष्वतिव्याप्तमित्यर्थः॥ नपंचमइति॥ एतज्ज्ञानेन दृश्यमानत्वे सति तत्त्वमिति विवक्षायां नेंद्रियादावतिव्याप्तिः। तेषामेतज्ज्ञानेन दृश्यमानत्वाभावादिति पंचमो नेत्यर्थः॥ दृश्यमानतायाइति॥ दृश्यमानत्वस्य दृग्विषयत्वरूपत्वादित्यर्थः॥ योग्यतायामिति॥ ततश्च स्वज्ञानविषयीभूतायां योग्यतायामव्याप्तिरितिभावः॥ संविदो विषयत्वमिति॥ सप्तम्या विषयार्थत्वाद्यस्यां संविदि विषयभूतायामित्यर्थप्राप्त्या संविदो विषयत्वमापन्नमित्यर्थः॥ सति सप्तमीति॥ यस्यां संविदि सत्यां योऽर्थोऽवभासते विषयो भवतीत्यर्थप्राप्त्या आत्माश्रयादित्यर्थः॥ यत्समवेतमिति॥ रूपज्ञानं यन्निरूपितसमवायवदित्यर्थः॥ विनैवेति॥ रूपज्ञानात्मसमवाययोः संयोगसमवाययोरभावादित्यर्थः। तथाच तस्य वस्तुगत्या रूपज्ञानादिकं प्रत्यवच्छेदकत्वेन इदं रूपमिति। जायमानस्य केवलरूपज्ञानस्यापि विषयः स्यादित्यतिव्याप्तिरितिभावः। तस्मात् विषयत्वस्य दुर्निरूपत्वादित्यर्थः॥ दृश्यत्वानुपपत्तेरिति॥ दृग्विषयत्वानुपपत्तेरित्यर्थः॥ सिद्धांताभिधानं प्रतिजानीते॥ अत्रोच्यतइति॥ दृग्दृश्ययोराध्यासिकसंबंधःत्वया कस्मात्स्वीकृत इति प्रष्टव्यं संबंधांतरानिरूपणादिति चेन्न। इंद्रियसन्निकर्षजन्यवृत्तिज्ञानद्वारक एव संबंधोऽस्तु किमाध्यासिक संबंधदुर्व्यसनेन।

नन्विन्द्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधोऽप्रामाणिक इति चेन्न। अस्य संबंधस्य तवाप्यावश्यकत्वात्। तथाहि। त्वन्मते सर्वमपि दृश्यं घटादिकं सर्वगतं यदज्ञानानावृतं ब्रह्मचैतन्यं तत्रैवाध्यस्तं एवं चानावृतब्रह्मचैतन्यस्य सर्वान्प्रत्यविशिष्टत्वात्तत्रारोपितं घटादिकं सर्वं सर्वेषां सर्वदा प्रकाशेत नतु कश्चित्पदार्थः कदाचित्कंचित्प्रत्येव काशेत इत्यतिप्रसंगेऽभिहिते यत्सन्निकृष्टेंद्रियजन्यवृत्तिर्यदाकारा यदाच भवति स एवं तं प्रत्येव कदाचिदेव प्रकाशते न सर्वदेत्यतिप्रसंगः परिहर्तव्यः। तथाचेंद्रियसन्निकर्षजन्यवृत्तिस्तवाप्यावश्यकी। एवं च दृश्यत्वेपि सत्यत्वमेवाऽस्तु न मिथ्यात्वं, संबंधानुपपत्तिस्तु नास्ति। इंद्रियसन्निकर्षजन्यवृत्तिद्वारकसंबंधसंभवात्। एवंच तवाप्यावश्यकेनानेन संबंधेनोपपत्त्या आध्यासिकसंबंधदुर्व्यसनेन प्रयोजनाभावात्। ननु न वयं ब्रह्मात्मकानावृतैकदृगध्यस्तत्वं अभिदध्महे येन तस्य सर्वान्प्रत्यऽविशिष्टत्वात्सर्वदा सर्वस्य सर्वं प्रकाशेतेत्यति प्रसंगपरिहाराय तत्तदाकारकवृत्तिद्वारकसंबंधापेक्षा ममाप्यावश्यकी स्यात्। किंतु घटाद्यधिष्ठानभूतानां चैतन्यानां भेदांगीकारेण तत्तदर्थास्तत्तदधिष्ठानभूतेषु चैतन्येष्वध्यस्ता इत्युच्यंते। एवंचवृत्तिं विनैतादृशेन चैतन्येनैव घटादेः साक्षादेव संबंधांगीकारेण तेनैव प्रकाशो घटते अतोऽतिप्रसंगाभावान्न तदर्थं वृत्तिद्वारकसंबंधानुसरणमिति चेन्न। यथा विज्ञानवादिना तत्तदर्थास्तत्तज्ज्ञानेऽध्यस्ता इत्युच्यंते। यथाहुर्विज्ञानवादिनः। ''तत्तज्ज्ञानेषु ते तेर्थाअध्यस्ता इति नोमतमिति तथा त्वया ते तेऽर्थाः तेषु तेष्वनेकेषु अधिष्ठानचैतन्येषु अध्यस्ता इति नह्युच्यते। किंतु ब्रह्मात्मकानावृतैकदृगध्यस्तत्वमेव। तत्राऽति प्रसंगपरिहारायवृत्तिरनुसरणीयैव।

ननु विज्ञानवादिमत इव मम मतेपि घटादेस्तत्तदधिष्ठानचैतन्येषु अनेकेषु अध्यासोऽस्तु अतो न वृत्तिरपेक्षितेति चेन्न। अनेकेष्वधिष्ठानेषु त्वन्मतेऽध्यासायोगात्। तथाहि। अध्यासाधिष्ठानभूताः

यद्यस्तीति कश्चिद्ब्रूयात्तदा तं प्रति कथयति विज्ञानवादी॥ अन्यच्चेदिति॥ संविदः प्रतीतेः सकाशात् नीलरूपादि अन्यच्चेदिति सच्चेदित्यपिग्राह्यं। तथाच संविन्नीलयोर्भेदे नीलं संविदि न भासेत संविदि नीलस्य भानं न स्यात्। ननु भिन्नस्याऽपि भानमस्तु को दोष इत्यतआह॥ भासतेचेदिति॥ भिन्नमपि भासतेचेद्विज्ञानतत्वस्यैकत्वात्तस्मिन्भासमाने सति नीलेतरस्य धवलपीतादेरपि भानं स्यात्। ननु नीलसंविदि नीलस्य संबंधोऽस्तीति नीलं भासते धवलादेस्तु न तत्र संबंध इति न भानमित्यत आह॥ नियामकमिति॥ नीलस्य नीलबुद्धेश्च वक्ष्यमाणरीत्याऽन्यः संबंधो न संभवति येन विषयनियमःस्यात्। तस्मात्संविदि नीलादेरारोपितत्वमेव संबंध इति सत्यत्वे नीलादेर्विज्ञानसंबंधानुपपत्तिरूपो विपक्षे बाधकतर्कोस्तीत्यर्थः॥ आत्मेति॥ आत्मा विज्ञानस्वरूपमेव नैल्याद्यात्मना ख्यायत इति वदद्भिर्विज्ञानवादिभिरित्यर्थः॥ ग्राह्येति॥ ग्राह्यस्य नीलादेस्सर्वथाऽलीकत्वमभिदधानाः विज्ञानवादिनो ग्राह्यलक्षणाभावं तद्रूपां युक्तिं वदंति नीलतद्धियोः संयोगादेः संबंधस्या भावाद्विषयविषयिभाव एव वक्तव्यः। अर्थस्य चविज्ञानाद्भेदे ग्राह्यस्य विषयस्य यल्लक्षणं विषयत्वं तस्याभावः विषयत्वं निर्वक्तुमशक्यमिति यावत्। तथाचाऽर्थस्य विषयत्वं न स्यादिति विषयस्याऽऽरोपितत्वमेव संबंध इत्याशयः॥ भिक्षित्वेति॥ इमं तर्कं तैर्भिक्षारूपेण गृहीत्वेति यावत्। अत एव पूर्वं मायिभिक्षव इति भिक्षास्वभावस्तेषामुक्तः। तथाच विज्ञानवाद्युक्तयुक्तिछर्दिमात्रमित्यत्र तात्पर्यं।

ननु दृग्दृश्ययोःसंबंधाभावेपि असंबद्धस्यैव प्रकाशनमस्त्वित्यत आह॥ दृश्यस्येति॥ अतिप्रसंगादिति॥ घटज्ञानं पटादेः नीलज्ञानं धवलादेरपि प्रकाशकं स्यादित्यर्थः। दृग्दृश्ययोराध्यासिकं संबंधं वक्तुं संबंधांतरं निराकरोति॥ नापीति॥ आत्मेति॥ गुणत्वान्न ज्ञेयेन घटादिना संयोगः। आत्मगुणत्वान्नसमवायः संभवतीत्यर्थः॥ अन्यस्येति॥ संयोगसमवायातिरिक्तद्विष्ठसंबंधाभावादित्यर्थः॥ असंबंधत्वादिति॥ संबंधोहि संबंधिभ्यां भिन्नस्तावाश्रितश्चैकश्चेति तल्लक्षणाभावादिति भावः॥ दुर्निरूपत्वाच्चेति॥ विषयत्वस्येतिशेषः। अनेन ग्राह्यलक्षणाभावरूपस्तर्कएव विवृत इति ज्ञातव्यं॥ ज्ञानाकारेति॥ ज्ञाने स्वाकारार्पकत्वमित्यर्थः। ज्ञेयस्य घटादेर्यः पृथुबुध्नोदराकारः सएव ज्ञाने भासतइति तत्सिद्धांतः। आकाराकारिणोरभेदेन ज्ञानार्पकत्वमेवोक्तं स्यात्। तर्ह्येंद्रियादिषु ज्ञानहेतुष्वतिव्याप्तं अत उक्तं॥ दृश्यमानत्वे सतीति॥ एतज्ज्ञानेन दृश्यमानत्वे सतीत्यर्थः। इंद्रियादेःस्वकर्मकज्ञानेन दृश्यमानत्वेपि स्वजन्यैतज्ज्ञानेन दृश्यमानत्वाभावान्नातिव्याप्तिरितिभावः॥ संबंधांतरमिति॥ यो यज्ज्ञानावच्छेदकः स तस्य विषय इत्येवोक्ते ज्ञातर्यतिव्याप्तिः। ज्ञानावच्छेदको हि ज्ञेयः ज्ञाताच भवति यज्ञदत्तीयं ज्ञानं घटीयं ज्ञानमिति व्यवहारात्। अतो ज्ञातर्यतिव्याप्तिवारणाय संबंधांतरमंतरेणेत्युक्तं। सतु ज्ञातविषयविषयिभावातिरिक्तद्विष्ठसमवाय रूपसंबंधांतरेणैव ज्ञानावच्छेदको न तमंतरेणेति तद्व्यवच्छेद इतिभावः॥ अतीतादाविति॥ असति धर्मिणि धर्माजननादिति भावः॥ गगनादाविति॥ तज्ज्ञानानंतरं व्याप्तत्वेन तत्र हानादेरभावादव्याप्तिरितिभावः॥ कलधौतेति॥ रूप्यज्ञानादिविषयस्य रूप्यमलादेः रूप्येण सहोपादीयमानत्वाद्रूप्यज्ञानविषयत्वं स्यादित्यर्थः॥ अभिज्ञेति॥ प्रत्यभिज्ञेत्यर्थः॥ तस्या अपि ज्ञानजन्यत्वादिति द्रष्टव्यं॥ प्रत्यभिज्ञाव्यवहारयोर्ज्ञातृनिष्ठत्वेन ज्ञेये तदाश्रयत्वाभावादसंभवइत्यर्थः॥ हानादीति॥ कंटकादिज्ञानं कंटकादिस्वरूपमेव प्रकाशयति ततः कंटकांतरेऽनिष्टसाधनत्वं जानतःपुरुषस्य तद्दृष्टांतेन पुरोवृत्तिकंटकेपि तदनुमानं भवति तदनंतरं हेयबुद्धिर्भवति इत्यस्तिक्रमः ततश्च हानादिबुद्धीनां अनिष्टसाधनानुमिति जन्यत्वेन कंटकादिप्रत्यक्षाजन्यत्वादसंभवइत्यर्थः। नतृतीयः। ईश्वरज्ञानविषये घटेऽतीतादिज्ञानविषयेच्च घटे

अथातिरिक्ताविषयत्वे तस्यैवानुपपत्तिरिति वाच्यम्। भ्रमस्य वस्तुगत्या यत् घटवत् तद्विषयः, न तु प्रमाया इत्यतिरिक्तविषयत्वात्। तदन्यविषयत्वात्। न चातीन्द्रियाभावेऽतिव्याप्तिः। तस्यापि योग्यतावच्छेदकावच्छिन्नत्वात्। तथाहि – अत्यन्ताभावे प्रतियोगिदेशान्यदेशत्वं, प्रागभावादौ प्रतियोगिकालान्यकालत्वं, अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वं विशिष्टप्रत्यय जननयोग्यतावच्छेदकम्। तदवच्छिन्नत्वं च विशिष्टप्रत्ययाजनकेऽतीन्द्रियाभावेऽपि सुलभम्। यथाऽरण्यस्थितो दण्डो घटाजनकोऽपि घटजननयोग्यतावच्छेदकदण्डत्वावच्छिन्नः तथा इति न काऽप्यनुपपत्तिः।

ननु नित्यस्यातीन्द्रियस्याकाशात्यन्ताभावादेः विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नत्वेऽवश्यं विशिष्ट प्रत्ययजनकत्वं स्यात्। नित्यस्य स्वरूपयोग्यस्य सहकारिनियमादिति चेन्नैवम्। यत् स्वरूपयोग्यं तेनावश्यं कदाचित् फलं जननीयमिति नियमो वा? तज्जातीयेनेति वा? नाद्यः। दण्डस्याजनितघटस्य घटकारणतानापत्तेः। न हि यावान् दण्डः स सर्वो घटजनकः। तथाच दण्डत्वेन कारणता न स्यात्। किन्तु घटजनकदण्डत्वेनेति तस्य पूर्वमनिर्धारणात् कारणताया अनिश्चये प्रवृत्त्याद्यभावे सर्वव्यवहार विलेपः स्यात्। न द्वितीयः। प्रकृतेऽप्यवच्छेदकजातीये क्वचित् फलोपधानसत्त्वात्। न चातीन्द्रिये क्वचिदपि फलोपधानं नास्तीति वाच्यम्। अतीन्द्रियस्यावच्छेदककोटावनिवेशात्। अवच्छेदकजातीये च तत्सत्त्वात्। न च विशिष्टस्य प्रत्यय इत्यत्र स्वरूपसम्बन्धस्य षष्ठ्यर्थत्वे आत्माश्रय इति वाच्यम्। तस्य सम्बंधत्वेन प्रवेशेऽपि स्वरूपसम्बन्धत्वेनाप्रवेशात्। सम्बन्धसामान्ये हि षष्ठी। न तु स्वरूपसंबंधविशेष एव। यद्वा स्वरूपसंबंधस्यैव षष्ठ्यर्थत्वम्। न चात्माश्रयः। तस्य स्वरूपसंबंधान्तरत्वात्। न चानवस्था। प्रतीत्यनवस्थाया अभावात्। वस्त्वनवस्थाया स्त्वदोषत्वात्। न च ज्ञानस्याभावः, ज्ञातोऽभाव इति प्रतीत्योर्वैलक्ष्यण्यं न स्यात्। स्वरूपसम्बन्धविषयत्वस्याविशेषादिति वाच्यम्। न हि य एव स्वरूपसम्बन्धो ज्ञानस्याभाव इत्यत्र भासते स एव ज्ञातोऽभाव इत्यत्र। एकत्र प्रतियोग्यनुयोगिभावरूपस्यापरत्र विषयविषयिभावरूपस्य विषयत्वात्। न हि स्वरूपद्वयमात्रं स्वरूपसम्बन्धः। किन्तु विशिष्टप्रत्ययजननयोग्यत्वम्। विशिष्टप्रत्ययानां भेदेन तज्जननयोग्यत्वस्यापि तथात्वात्। यथा वा देवदत्तस्य दण्डो, दण्डी देवदत्त इत्यनयोः एकसम्बन्धविषयत्वेऽपि प्रतीत्योर्वैलक्ष्यण्यम्, तथाऽत्रापीति न काचिदनुपपत्तिरिति सर्वं सुस्थम्। एवञ्च विषयत्वनिरुक्तिखण्डनं बालविमोहनमात्रमिति दिक्। इति दृग्दृश्यसम्बन्धानुपपत्तिभङ्गः।

श्री पाण्डुरङ्गि आनन्दभट्टारकविरचिते
इति न्यायामृतेकण्टकोद्धारे प्रथमपरिच्छेदे प्रथमोभागः

न्यायामृतप्रकाशः

दृग्दृश्ययोस्संबंधानुपपत्तिरूपतर्कं निराकर्तुमुत्थापयति॥ अनुकूलेति॥ मायिभिक्षव इत्यस्याऽऽहुरित्यनेन संबंधः। विज्ञानवादिमते ज्ञानज्ञेययोरधिष्ठानाध्यस्तभावेनाऽभेदात् ज्ञानातिरिक्तज्ञेयप्रपंचः परमार्थसन्नास्त्येव।

ज्ञानावच्छेदकेत्युक्तम्। तस्य तु ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मत्वाभावात्। साक्षाद्व्याप्यत्वं हि तद्व्याप्याव्याप्यत्वे सति तद्व्याप्यत्वम्। घटत्वं तु तद्व्याप्यपृथिवीत्वव्याप्यमिति नातिव्याप्तिः। ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मो विषयत्वमित्युक्ते रूपज्ञानसमवायस्य रूपज्ञानविषयत्वं स्यात्। तस्यापि तज्ज्ञानावच्छेदकत्वव्याप्यधर्मवत्त्वात्। अतो ज्ञानकरणसन्निकर्षसमानाधिकरण इत्युक्तम्।

अत्र प्रष्टव्यम्। किं समवायस्य विषयत्वमात्रमापाद्यते? रूपज्ञानविषयत्वं वा? नाद्यः। इष्टत्वात्। नापरः। रूपज्ञानकरणसन्निकर्षसमानाधिकरणज्ञानावच्छेदकत्वव्याप्यधर्मवत्त्वाभावान्नातिप्रसङ्गः। न चैवं वस्तुत्वादावतिव्याप्तिरिति वाच्यम्। तस्य ज्ञानावच्छेदकत्वव्याप्यप्रमेयत्वव्याप्यत्वेन ज्ञानावच्छेदकत्व साक्षाद्व्याप्यधर्मत्वाभावात्। नन्वेवं सामान्यलक्षणे वस्त्ववस्त्वन्यतरत्वलक्षणं फलितम्। विशेष लक्षणे च तत्तत्पदार्थत्वम्। तथाच तदेवास्तु लक्षणं किं प्रकृतलक्षणेनेति चेन्न। प्रकृतलक्षणे तेन रूपेण तस्याप्रवेशात्। अन्यथा पाकजरूपवती पृथिवीत्यत्र पृथिवीत्वमेव लक्षणमस्त्विति युक्तं वक्तुं स्यात्। तत्रोपहितानुपहितभेदेन भेद इति यदि तदेतदत्रापि तुल्यम्। न च विषयत्वसामान्यलक्षणं वस्तुत्वमेवास्त्विति वाच्यम्। वस्तुत्वज्ञानमात्रेण विषयत्वाव्यवहारात्। व्यवहारप्रयोजकस्य चोक्तत्वात्। अन्यथा कारणत्वसामान्यलक्षणे वस्तुत्वमेव कारणत्वमस्त्विति पर्यनुयोगः स्यात्। तत्र निरुक्तकारणत्वज्ञान एव कारणत्वव्यवहार इति यदि तदेतदत्रापि तुल्यम्। निरुक्तविषयत्वज्ञान एव तद्व्यवहार इति सर्वं निरवद्यम्।

तस्मात् विषयत्वे प्रमाणसम्भवात् निर्वचनस्यापि सम्भवात् विषयत्वसम्बन्धेन दृश्यत्वोपपत्तेः मिथ्यात्वेऽप्रयोजकत्वं सुस्थम्। हेत्वन्तरे त्वप्रयोजकत्वं स्पष्टमित्यलं विस्तरेण।

अथवा स्वरूपसम्बन्ध एव विषयत्वमस्तु। ननु स्वरूपं सम्बन्ध इति वाऽर्थः? संयोगसमवायान्यत् स्वरूपं वा सम्बन्ध इति वा? नाद्यः। संयोगादावतिव्याप्तेः। न द्वितीयः। हिमवद्विन्ध्ययोरपि स्वरूपसंबन्धापत्तेः। न च सम्बन्धान्तरमन्तरेण विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्ध इति वाच्यम्। आत्मानं जानामीत्यत्राव्याप्तेः। तत्र सम्बन्धान्तरस्य समवायस्य सत्त्वात्। किञ्चातीन्द्रियाभावादावव्याप्तिः। न हि तस्य विशिष्टप्रत्ययजननयोग्यत्वे मानमस्ति। अन्यथा तेन विशिष्टप्रत्ययजननापत्तेः। किञ्च विशिष्टप्रत्ययजननयोग्यत्वं धर्मो वा सम्बन्धः? तादृशं स्वरूपमेव वा? आद्ये स्वरूपस्य सम्बन्धत्वं न स्यात्। प्रतीतिघटितस्य तस्य चाक्षुषादिज्ञानागोचरत्वप्रसङ्गश्च द्वितीयेऽननुगमात्। किञ्चैवमभावभ्रमो न स्यात्। तत्रापि विशिष्टप्रतीतिसम्भवेन स्वरूपसम्बन्धस्य सत्त्वात्। न च प्रमात्वघटितं तल्लक्षणम्। वास्तवसम्बन्धसत्त्वे प्रमात्वस्याप्या पाद्यत्वात्। अन्यथा तत्र तस्याप्रमात्वे सम्बन्धाभावः तस्मिंश्च सति तस्याप्रमात्वमित्यन्योन्याश्रयादिति चेदत्रोच्यते। सम्बन्धान्तरमनपेक्ष्य विशिष्टप्रतीतिजननयोग्यता वच्छेदकावच्छिन्नत्वस्य स्वरूपसम्बन्धत्वात्। आत्मानं जानामीत्यत्र सम्बन्धान्तरसत्त्वेऽपि न विशिष्टप्रतीतौ तदपेक्षा। अतो नाव्याप्तिः। एतेन विशिष्टबुद्धिघटितत्वात् स्वरूपसम्बन्धस्याचाक्षुषत्वप्रसङ्ग इति निरस्तम्। दण्डीत्यादौ संयोगत्वावच्छिन्नस्य सम्बन्धत्ववत् विशिष्टबुद्धेरवच्छेदकाविषयिण्याएवावच्छेद्यविषयत्वात्। न च प्रमाभ्रमयोः स्वरूपद्वयमात्रविषयत्वाविशेषात् प्रमाभ्रमव्यवस्थानुपपत्तिरिति वाच्यम्। घटाभाववति तदभावज्ञानत्वेन तदन्यज्ञानत्वेन व्यवस्थोपपत्तेः।

चक्षुस्सन्निकृष्टविषयजन्यत्वमादाय चक्षुष्यतिव्याप्तिः। तदर्थं करणेनेति। कालस्याकरणत्वात्। चक्षुषा जानानमीतिवत् कालेन जानामीत्यप्रतीतेः। विषयस्य कर्मत्वेन करणत्वाभावात्॥ ननु तथापीति॥ ननु पक्षस्यानुमितिविषयत्वात् कथं तत्रातिव्याप्तिदानम्। पर्वतो वह्निमानिति ह्यनुमितिः। न तु वह्निमानित्येव। तथाऽननुभवात्। सिद्धार्थतापत्तेश्चेति चेन्न। असाधारणविषयत्वस्य लक्ष्यत्वात्। व्याप्यस्य च व्यापक एवासाधारणविषय इति कथमतिव्याप्त्यभिधानसमङ्गतम्। अत एव पक्षतावच्छेदकतत्सम्बन्धादीनामपि विषयत्वात् तत्र चोक्तलक्षणाभावादव्याप्तिरिति निरस्तम्। न हीदं विषयत्वसामान्यलक्षणम्। किन्त्वसाधारणजन्यज्ञानविषयत्वमिति न कश्चिद् दोषः। यद्वा, लिङ्गस्य पक्षेणैव सन्निकर्षादसन्निकर्षात्साध्येन तथा वाक्यस्य श्रोत्रेणैव सन्निकर्षादर्थेनासन्निकर्षात् तयोरेव विषयत्वं स्यान्न कालाग्न्यादेरित्याशयेनेयं शङ्का योज्या॥ अतीतादिलिङ्गादेरिति॥ इदं च वस्तुस्थितिप्रदर्शनायोक्तम्। वस्तुतस्तु सन्निकृष्टेनेत्यत्र विशिष्टस्य हेतुत्वस्य विवक्षितत्वात् पक्षलिङ्गसन्निकर्षस्य वाक्यश्रोत्रसन्निकर्षस्य वा हेतुत्वान्न तमादायातिव्याप्तिरिति द्रष्टव्यम्। लिङ्गज्ञानस्य च यथा वह्निना सम्बन्धो वाक्यस्य च स्वार्थेन सम्बन्धो यथा तथाऽग्रे स्फुटम्। ननु लिङ्गज्ञानवाक्यज्ञानयोरात्मसन्निकृष्टयोरेव जनकत्वात् तज्ज्ञाने आत्मनो विषयत्वं स्यादित्यत आह॥ लिङ्गादिज्ञानस्य चेति॥ चक्षुर्मनस्सन्निकर्षस्य चेति॥

ननु करणासाधारणत्वविवक्षा व्यर्था। सन्निकर्षासाधारणत्वविवक्षयैवात्ममनस्सन्निकर्षमादायातिप्रसङ्गाभावात्। तस्य साधारणत्वादिति चेन्न। रूपादिसन्निकृष्टचक्षुः यच्छब्देन विवक्षित्वा तत्सन्निकृष्टमनसा जन्यरूपादिज्ञाने चक्षुषो विषयत्वं स्यादिति करणेऽप्यसाधारणत्वस्यावश्यकत्वात्। तत्र सन्निकर्षस्यासाधारणत्वान्मनसश्च साधारणत्वात्। ननु तथापि मनस्सन्निकृष्टचक्षुर्जन्यचाक्षुषज्ञाने मनसो विषयत्वं स्यात् तत्र मनश्चक्षुस्सन्निकर्षस्यासाधारणत्वात्। चक्षुरूपकरणस्याप्यसाधारणत्वात्। रूपादिज्ञानेऽसाधारणत्वाभावेऽपि चाक्षुषज्ञाने चक्षुर्मनस्सन्निकर्षस्यासाधारणत्वात् इति चेन्न। करणभिन्नयत्सन्निकृष्टासाधारणकरणेनेति विवक्षितम्। मनश्च न करणभिन्नमिति न तत्रातिव्याप्तिः। न चैवं सन्निकर्षासाधारणत्वं व्यर्थम्। चक्षुर्मनस्सन्निकर्षस्य करणभिन्नसन्निकर्षत्वाभावादेवातिप्रसङ्गाभावादिति वाच्यम्। तेनैवोक्तविवक्षाया लब्धत्वात्। न चैवमात्मकालचक्षुस्सन्निकर्ष मादायाऽत्मनोऽपि विषयत्वापत्तिरिति वाच्यम्। तत्सन्निकर्षस्यापि हेतुत्वे मानाभावादवर्जनीयसन्निधित्वाच्च। ननु प्रत्यभिज्ञानादौ कथं तत्तादिसन्निकर्षजन्यत्वमित्यत आह ॥प्रत्यभिज्ञापामिति॥ ननु संयोगसमवाययोरेव सन्निकर्षत्वात् कथं संस्कारादेः सन्निकर्षत्वमित्यत आह॥ न हीति॥ सम्बन्धव्यवहारप्रयोजकस्य सम्बन्धत्वात् संस्कारादेश्च तादृशत्वात् सम्बन्धत्वमविकलमिति भावः। नन्वीश्वरज्ञानविषये नेदं लक्षणमित्यत आह॥ इदं चेति॥ ननु सामान्यतो ज्ञानविषयत्वे जिज्ञासिते विशेषलक्षणमर्थान्तरग्रस्तमित्यत आह॥ अथवेति॥ इदं च नित्यपरोक्षज्ञानसाधारणमिति नार्थान्तरमिति भावः। ज्ञानकरणसन्निकर्षेण समानाधिकरणः ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यो यो धर्मस्स विषयत्वमित्यर्थः।

अत्र धर्मो विषयत्वमित्युक्ते घटत्वस्यापि विषयत्वप्रसङ्गः। व्याप्यो धर्म इत्युक्तेऽपि तथा। तस्यापि पृथिवीत्वव्याप्यत्वात्। साक्षाद्व्याप्य इत्युक्तेऽपि तथा। तस्यापि पृथिवीत्वसाक्षाद्व्याप्यत्वात्। अतो

गर्भत्वाभावादेवेत्यर्थः। अत्र दूषणरिहारः पूर्वलक्षणदूषणपरिहारसमान इत्यवधेयम्। ननु योग्यतायां योग्यतान्तरस्वीकारेऽनवस्था। तस्या एव स्ववृत्तित्वाङ्गीकारे आत्माश्रय इत्यत आह – योग्यत्वे चेति॥ अन्ये त्विति॥ यः सम्बन्धान्तरं संयोगसमवायरूपमनपेक्ष्य यज्ज्ञानावच्छेदको यज्ज्ञानस्य व्यावर्तकः यज्ज्ञानानवच्छिन्नस्वभावो यज्ज्ञाननिरूपणाधीननिरुपणो न स तस्य विषय इत्यर्थः। अत्रानपेक्ष्येति पदकृत्यमाह – यद्यपीति॥ आत्मा स्वविषयकज्ञानेन समवायवान्। तथाच सम्बन्धान्तरमन्तरेणेत्यस्याभावादात्मन्यव्याप्तिरिति शेषः। अनपेक्ष्येति दत्ते कथं परिहार इत्यतस्तमुपपादयति – तथापीति॥ सम्बन्धान्तरमनपेक्ष्येत्येव कृते घटज्ञाने पटोऽपि विषयः स्यात्। तस्यापि सम्बन्धान्तरमनपेक्ष्य तज्ज्ञानानवच्छिन्नस्वभावत्वादत उक्तं – यो यज्ज्ञानावच्छेदक इति। यज्ज्ञानानवच्छिन्नेति विशेषणकृत्यमाह – यद्यपि चेति॥ ननु विषयस्यापि ज्ञानावच्छिन्नस्वभावत्वादसम्भवः। घटज्ञानमितिवत् ज्ञातो घट इति प्रतीतेरित्यत आह ॥ज्ञानविषयस्त्विति॥ अत्र हि तदवच्छिन्नस्वभावत्वं तन्निरूपणाधीननिरूपणत्वम्। न हि ज्ञानं यथा घटनिरूपणाधीननिरूपणम्। एवञ्च प्रत्यक्षेण ज्ञाननिरूपणस्य घटनिरूपणं विनाऽभावेन तथाचासम्भववर्णनमबोधविजृम्भितम्। न च तन्निरूपणेत्यत्र षष्ठ्यर्थस्य विषयत्वे आत्माश्रयः इति वाच्यम्। सम्बन्धत्वेन प्रवेशेऽपि विषयत्वेनाप्रवेशादिति। ननु मत्समवेतं रूपज्ञानमित्यत्र समवायस्य विषयत्वं न स्यात्। तस्य ज्ञानसंबंधत्वेन ज्ञानरूपसंबंध्यवच्छिन्नत्वादिति चेन्न। रूपज्ञानसमवायस्य विषयत्वं न स्यादिति वा, मत्समवेतं रूपज्ञानमिति ज्ञानसमवायस्य वा? नाद्यः। अत्र हि यो यज्ज्ञानावच्छिन्नस्वभावः स तस्य विषय इति नियमेन समवायस्य घटो रूपवानिति रूपज्ञानावच्छिन्नस्वभावत्वेऽपि मत्समवेतं रूपज्ञानमिति ज्ञानावच्छिन्नस्वभावत्वाभावेन तद्विषयत्वसम्भवात्। न च समवायस्यैकत्वात् तदवच्छिन्नस्वभावत्वमस्त्येवेति वाच्यम्। एकत्वेऽपि तन्निरूपितत्वेन भेदाभ्युपगमात्। अन्यथा रसनिरूपितसमवायभाने रूपनिरूपितसमवायभानप्रसंगात्। न द्वितीयः। इष्टापत्तेः। न हि मत्समवेतं रूपज्ञानमिति ज्ञाने अस्यापि समवायो भासते। तस्मादेतत् मूर्खप्रलपितमनादेयम्।

ननु ज्ञानविषयकानुमित्यादेः स्वानुव्यवसायविषयत्वं न स्यात्। ज्ञानावच्छिन्नस्वभावत्वात् इत्यत आह ॥यद्यपीति॥ अथवेति॥ ननु यदीयेत्यत्र तद्धितस्य विषयत्वमर्थः संबंधान्तरं वा? नाद्यः। आत्माश्रयात्। द्वितीयस्य निरूपयितुमशक्यत्वादिति चेन्न। संबंधसामान्यस्य षष्ठ्यर्थत्वात्। संबंधसामान्ये षष्ठी न तु विशेषे। अन्यथा षष्ठीप्रयोगानन्तरं संबंधविशेषप्रश्नो न स्यात्। एवञ्च विषयत्वेनाप्रवेशान्नात्माश्रयत्वम्। न च रूपज्ञानस्य स्वाभावाभावरूपत्वेन स्वाभावीयत्वात् तद्विषयत्वं स्यादिति वाच्यम्। यद्धि, प्रथमं स्वप्रतीतौ यदीयस्वभावमित्यर्थात्। न हि रूपज्ञानं स्वप्रतीतौ स्वाभावनिरूपणाधीननिरूपणम्। यद्वा स्ववाचकासाधारणशब्दप्रवृत्तिनिमित्तावच्छेदेन यज्ज्ञानं स्वप्रतीतौ यन्निरूपणाधीननिरूपणमिति विवक्षितम्। न हि रूपज्ञानं रूपज्ञानशब्देन प्रतीतौ स्वाभावनिरूपणाधीननिरूपणम्। येन स्वाभावविषयः स्यादिति यत्किञ्चिदेतत्।

जन्यज्ञानासाधारणविषयत्वलक्षणमाह॥ अथवेति॥ अत्र यत्सन्निकृष्टेनेत्येतावत्युच्यमाने चक्षुस्सन्निकृष्ट कालेनापि घटादिज्ञानजननात् चक्षुष्यतिव्याप्तिः। विषयस्य ज्ञानजनकतापक्षेऽपि

दण्डेऽप्येवं कारणता न स्यात्। तत्रापि न दण्डस्य फलोपधानरूपमेव कारणत्वम्। सति फले कारणतानिर्णयः। तन्निर्णये च दण्डानयने फलमित्यन्योन्याश्रयात्। स्वरूपयोग्यत्वस्य चोक्तरीत्या प्रतिस्वं निर्णेतुमशक्यत्वात्। अथ घटजनकत्वेन तन्निर्णय इति तन्न। आत्माश्रयात्। अथास्ति दण्डे दण्डत्वम्। तदवच्छेदेन कारणत्वनिर्णय इत्यजनितफले दण्डत्वसद्भावादस्ति स्वरूपयोग्यत्वरूपं कारणत्वम्। हन्त तर्हि इहापि तत्तत्सन्निकर्षजज्ञानत्वेन वा तत्तत्प्रयोज्यजातिविशेषावच्छेदेन वा स्वरूपयोग्यत्वरूपं कारणत्वमस्तु। तथाचाजनितफले उक्तावच्छेदकसद्भावात् स्वरूपयोग्यत्वमस्त्येवेति न कश्चिद्दोषः। न च ज्ञाने सन्निकर्षप्रयोज्यजातौ मानाभावः। तस्या असतः साधकत्वभङ्गे साधितत्वात्। ननु जन्यज्ञाने तदभिलपनरूपकारणत्वस्य तत्तत्सन्निकर्षजत्वेन वा तत्प्रयोज्यजातिविशेषावच्छेदेन वा ग्रहेऽपि नित्येश्वरज्ञाने कथं सर्वाभिलपनकारणत्वावगमः तत्रोक्तप्रयोजकद्वयाभावादिति चेन्न। तस्येश्वरज्ञानत्वेनैव तद्ग्रहोपपत्तेः। न हि सर्वत्रैकेनैव रूपेणाभिलपनकाणत्वं ग्राह्यमिति राजाज्ञाऽस्ति। तथाचात्माश्रयादेरभावादुक्तं युक्तम्।

॥ अत एव चेति॥ कर्मत्वस्य जनकत्वाघटितत्वादेवेत्यर्थः। ननु कथं न दोषोऽतीतादावव्याप्तेर्दोषस्योक्तत्वादित्यत आह – ज्ञानकर्मशब्देनेति। नन्वत्र व्यवहारयोग्यत्वं किं विवक्षितम्? व्यवहाररूपफलोपधानं वा? तत्स्वरूपयोग्यत्वं वा? अवच्छेदकाद्भिन्नं वा? सहकारिविरहप्रयुक्तकार्याभावत्त्वं वा? नाद्यः। कुत्रचित् प्रतिबद्धव्यवहारेऽव्याप्तेः। न द्वितीयः। विषयत्वादन्यस्य तस्यासम्भवेनाऽत्माश्रयात्। न तृतीयः। अनुगतावच्छेदकाभावेन तस्य ग्रहीतुमशक्यत्वादिति चेन्न। अन्त्यपक्षे दोषाभावात्। अत्र हि ज्ञानसामान्यजन्यव्यवहारयोग्यतावच्छेदकं न सम्भवतीत्युच्यते, ज्ञानविशेषजन्यव्यवहारयोग्यतावच्छेदकं वा? नाद्यः। वस्त्ववस्त्वन्यतरत्वस्योक्तत्वात्। नापरोक्षज्ञानविशेषजनकसन्निकर्षाश्रयत्वस्यावच्छेदकस्य सम्भवात्। न च ज्ञाने विशेषस्तत्रद्विशेषविषयत्वमेवे त्यात्माश्रय इति वाच्यम्। विषयमनपेक्ष्यैव ज्ञाने विशेषस्य साधितत्वात्। अनुगतावच्छेदकाभावेऽपि फलविशेषोपहितसाद्दृश्यमात्रेणापि योग्यत्वसम्भवाच्च। ननु सर्वत्र कर्मत्वस्य जनकत्वविशेषरूपत्वादत्रापि विषयत्वलक्षणे तदेव कर्मत्वमिति स एव दोष इत्यत आह – न हीति॥ कुत्रापीति शेषः।

ननु विद्यमानमेव कृतिकर्म किं न स्यात्? तस्य जनकत्वसम्भवादित्यत आह – नापीति॥ सिद्धस्यापि कृतिकर्मत्वे सिद्धौदनेऽपि देवदत्तः प्रवर्तेतेति भावः। ननु घटं करोतीत्यादौ सिद्धस्यैव कपालादेः कृतिकर्मत्वम्। न चोक्तदोषः। व्यापार्यतया सर्वैः कर्मत्वाङ्गीकारात्। अत एव निष्पादनावाचिधातुसमभिव्या हृतकर्मपदशक्यावयवेत्यादौ तत्साधने निरूढलक्षणेत्याहुरसत्कार्यवादिन इति चेन्न। कृतिकर्मता हि कृत्युद्देश्यताव्याप्ता। न च सिद्धस्योद्देश्यता सम्भवति। न चासिद्धव्यापार सेति वाच्यम्। तथासति व्यापारविशिष्टस्याविशिष्टस्य सेति वाच्यम्। तथासति व्यापारविशिष्टस्याविद्यमानत्वात् जनकत्वरूपकर्मता न सम्भवत्येव। न चान्यस्य कर्मत्वस्य निर्वक्तुमशक्यत्वात् जनकत्वविशेषरूपैव कर्मतेति वाच्यम्। क्रियाजन्यतिशययोगित्वस्य तत्त्वात्। अतिशयस्य च व्यवहारादिसाधारणत्वात्। तस्य चाजनकेऽपि सम्भवान्न कुत्रापि जनकत्वगर्भकर्मत्वमिति। अत एव घटं करोतीत्यत्र लक्षणाश्रयणमपास्तम्। अविद्यमानस्याप्युक्तरूपकर्मत्वसम्भवादिति॥ अत एवेति॥ कर्मत्वस्य जनकत्वविषयत्वान्यतर

किन्तु निर्वचनानिर्वचने एवेति चेन्न। तथात्वे बहु व्याकुली स्यादित्याह ॥ न हीति॥ तथाच स्वप्रकाशाद्वितीयरूपं ब्रह्मापि न सिध्येदिति भावः। तस्मात् प्रमितत्वमेव सत्त्वप्रयोजकमित्युपसंहरति ॥ तस्मादिति॥ किञ्चानिर्वाच्यत्वं केषाञ्चिन्निर्वचनाशक्यत्वाद्वा? सर्वेषां वा? नाद्य इत्याह ॥ न चेति॥ दुरवगाहत्वेन मन्दैर्दुरवबोधत्वेन निर्वक्तुमशक्यत्वेन वेत्यर्थः।

द्वितीयं निषेधति॥ न चेति॥ ननु ज्ञानविषय इति प्रयोगः कथं लक्षणम्। प्रयोगस्य शब्दरूपस्य विषयानिष्टत्वात्। न चेदं दृष्टान्तेऽपि दूषणं समम्। तत्र मन्त्र इति प्रयोगविषयत्वस्य लक्षणत्वात्। न चात्रापि तथा। आत्माश्रयात्। विषयत्वस्यैव निरुच्यमानत्वादिति चेन्मैवं। प्रयोगयोग्यत्वस्य तत्त्वात्। न चैवं योग्यतायामव्याप्तिस्तत्र योग्यतान्तराभावादिति वाच्यम्। तस्या वक्ष्यमाणरीत्या सुपरिहरत्वात्। न च योग्यतावच्छेदकाभावेन योग्यत्वं दुर्ज्ञानम्। अननुगतस्यैव योग्यतावच्छेदकत्वात्। जन्यतावच्छेदकाननुगमेऽपि जन्यत्वानुगमवत् अनुगतयोग्यतावच्छेदकाभावेऽपि योग्यत्वानुगमसम्भवाच्च। वस्त्ववस्त्वन्यतरत्वस्यावच्छेदकत्वसम्भवाच्च। तस्मात् ज्ञानविषय इति प्रयोगयोग्यत्वं साधुलक्षणम्। अत एव यत्र प्रयोगो न कृतस्तत्राव्याप्तिरिति परास्तम्। योग्यतायास्तत्रापि सम्भवात्॥ न चान्योन्येति॥ प्रयोगे सति विषयत्वम्। विषयत्वे च सति तज्ज्ञानेन प्रयोग इत्यन्योन्याश्रय इत्यर्थः ॥ पूर्वपूर्वेति॥ ननु यत्र पूर्वप्रयोगोपरतिस्तत्र कथमुत्तरस्य विषयत्वज्ञानमिति चेन्न। अनादित्वेन दोषाभावात्। आदिसृष्टौ चेश्वरप्रयोगेनान्येषां व्यवहारात्। तस्य च स्वतन्त्रत्वेनान्यप्रयोगानपेक्षत्वात्॥ कदाऽपीति॥ प्रमाणाभावादिति भावः। ननु विशिष्टज्ञाने विशेषणज्ञानस्य हेतुता तावत् जन्यविशिष्टज्ञानं जन्यविशेषणज्ञानजन्यम्, जन्यविशिष्टज्ञानत्वात् इत्यनुमानसिद्धाऽभ्युपगन्तव्या। तस्य च सप्रकारस्यैव जनकत्वे तस्यापि विशिष्टज्ञानत्वेन विशेषणान्तरज्ञानापेक्षेति परम्परयाऽनवस्थापत्त्या जन्यविशिष्टज्ञानजनकतया निष्प्रकारकमेव विशेषणज्ञानं सिद्धं कथमप्रामाणिकमिति चेन्मैवम्। व्याप्तिग्रहणस्थलाभावेनानुमानस्याभासत्वात्। न च दण्डी पुरुष इति धीः व्याप्तिग्रहणस्थलम्। तस्या अपि दण्डपुरुषोभयेन्द्रियसन्निकर्षेणैव जन्यत्वसम्भवेन विशेषणज्ञानस्य तत्राकारणत्वात्। न चैवमुभयोरपीन्द्रियसन्निकृष्टत्वाविशेषे दण्डस्यैव विशेषणत्वं पुरुषस्य विशेष्यत्वमित्येतत् किंनिबन्धनमिति वाच्यम्। त्वन्मते उभयोरपि निर्विकल्पकविषयत्वे दण्डस्य विशेषणत्वं पुरुषस्यैव विशेष्यत्वमित्येतत् किंनिबन्धनमिति साम्यात्। न चानुमितिरूपविशिष्टज्ञाने विशेषणज्ञानकारणत्वात् सर्वत्र तथात्वमिति वाच्यम्। विशिष्ट वैशिष्ट्यबोधत्वावच्छेदेन विशेषणतावच्छेदकप्रकारकज्ञानस्यैव हेतुत्वेन विशेषणज्ञानस्य तत्त्वाभावात्। न च विशिष्ट वैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य हेतुत्वं गौरवात्। तस्माद्विशिष्टज्ञाने विशेषणज्ञानकारणत्वस्याप्रामाणिकत्वान्न तदनुरोधेन निर्विकल्पकसिद्धिरिति दिक्।

॥ न च यत्त्वतत्त्वजात्योरिति॥ तथाच तयोः व्यक्तिविशेषपरत्वात् लक्ष्यान्तरेऽभावेनाव्याप्तिरिति भावः। नन्वेतावताऽभिलपनरूपव्यवहारजननस्वरूपयोग्यत्वं विवक्षितम्। तद्धि प्रातिस्विकरूपेण वा निर्णेयमुत किञ्चिदवच्छेदेन वा? नाद्यः। प्रतिस्वं फलादर्शनात्। अजनितफलप्रातिस्विकयोग्यतायां मानाभावात्। न च तत्तद्विषयत्वेन निर्णय इति वाच्यम्। आत्माश्रयात्। न द्वितीयः। तदभावादिति चेन्न।

प्रागनिर्वाच्यत्वासिध्याऽन्योन्याश्रयेणानिर्वाच्यं विषयत्वमित्यस्य वक्तुमशक्यत्वाच्चेत्यपि द्रष्टव्यम्। न च सम्बन्धमिथ्यात्वमन्यतरसम्बन्धिमिथ्यात्वेन व्याप्तमिति कथं ब्रह्मवत् प्रपञ्चस्य सत्त्वेऽप्युपपत्तिरिति वाच्यम्। जीवेश्वरचैतन्यसम्बन्धे मिथ्याभूते व्यभिचारेण नियमासिद्धेः। अन्यथा सम्बन्धमिथ्यात्वं सम्बन्धिद्वयमिथ्यात्वव्याप्तमित्यपि स्यात्। न च तथा कुत्राप्यदृष्टेर्न तथा नियम इति वाच्यम्। त्वन्मते दण्डदेवदत्तादिसंयोग एव दृष्टत्वात्। तस्मादनिर्वाच्य विषयत्वाङ्गीकारेऽपि ब्रह्मवत् प्रपञ्चसत्त्वोपपत्तेरप्रयोजकं दृश्यत्वमित्याशयः। किञ्चानिर्वाच्यं विषयत्वमिति कोऽर्थः? किं विषयत्वं सत्त्वेन निर्वक्तुमशक्यमिति वा? विषयत्वलक्षणमेव तथेति वा? नाद्यः। तस्य सर्वसाधारणत्वेन विषयत्वमात्रदूषणस्यानुप युक्तत्वात्। सत्त्वस्यैव निरुक्तिखण्डनेन तेन दोषेण दूषितत्वाच्च। विषयत्वलक्षणखण्डनस्यानुपयोगाच्च। न द्वितीयः। तस्यासङ्कीर्णव्यवहारसिध्यर्थं स्वीकृतत्वेन स्वव्याहतत्वादित्याह ॥त्वयाऽपीति॥ किञ्च पदनिर्वाच्यं तस्य लक्षणं नैवेति नियमो वा? कस्यचिदस्ति कस्यचिन्नेति वा? द्वितीये नियामकाभावात्, प्रथमस्य च मिथ्यात्व एव व्यभिचारात् इत्याह ॥कथञ्चेति॥ न च मिथ्यात्वं नानिर्वाच्यमिति युक्तम्। तस्य सत्त्वेऽद्वैतहानेः। असत्त्वे चेष्टापत्तेः। परिशेषादनिर्वाच्यमेवेति। ननु यथा दृश्यत्वं सत्त्वेनानिर्वाच्यमित्युच्यते। न चैतावता हेतुत्वानुपपत्तिः। तत्तदाभासलक्षणानालिङ्गितत्वमात्रेण तदुपपत्तेः। न चानिर्वचनीयस्य कथं हेतुत्वम्? सत्त्वेन निर्वचना भावेऽपि तात्विकसाधारणदृक्सम्बन्धित्वादिना रूपेण निर्वक्तुं शक्यत्वादिति चेन्न। सत्त्वेन निर्वचना भावेऽसत्त्वापत्याऽसिद्धत्वेना भासलक्षणानालिङ्गितत्वस्यैवासंभवाद्धेतुत्वानुपपत्तेः। दृक्सम्बन्धत्वादिना रूपेण च तन्निर्वचने तेनैव रूपेण हेतुत्वापत्त्या तस्य च सम्बंधान्तरमादायोपपत्तेरप्रयोजकत्वाच्च।

ननु तात्विकस्यैव लक्षणनिर्वचनं न मिथ्याभूतस्येत्यत आह ॥न चेति॥ सममिति॥ विषयत्वलक्षणाभावेऽपि तत्स्वरूपज्ञानमात्रेण व्यवहारोपपत्तेरिति भावः। ननूभयोर्लक्षणनिर्वचनावश्यकत्वे को विशेष इत्यत आह॥ इयांस्त्विति॥ निर्वचनं तु साधारणमिति भावः। ननु तस्याकारस्य सत्त्वं केन माननेनेत्यत आह॥ अनिरुच्यमान इति॥ ननु लक्षणनिर्वचनेनैव सत्त्वमन्यथा नेत्यत आह ॥न चेति॥ ब्रह्मण्यपीति॥ न च लक्षणानिर्वचनमेव नानिर्वचनीयत्वप्रयोजकम्। किन्तु प्रागुक्तव्यापकानुपलब्धिसहकृतमिति शङ्क्यम्। व्यापकानुपलब्ध्यभावस्य पूर्वमेवोपपादितत्वात्॥ दुर्निरूपत्वस्य॥ आनन्दत्वादिनेति शेषः। न च ब्रह्मण आनन्दत्वादिना दुर्निरूपत्वेऽपि दुःखप्रत्यनीकत्वाद्युपलक्षितस्वरूपस्य सत्त्वेन निर्वक्तुं शक्यम्। न चैवं प्रपञ्चे सत्त्वं शक्यनिर्वचनम्। बाधकसद्भावादिति वाच्यम्। प्रपञ्चस्यापि सत्ताजात्यादिना दुर्निरूपत्वेऽपि बाध्यप्रत्यनीकत्वाद्युपलक्षितस्वरूपस्य सत्त्वेन निर्वक्तुं शक्यत्वात्। न च बाधकसद्भावात् कथं तथा निर्वचनम्? बाधकं सत् किमनुमानमथ श्रुतिः? नाद्यः। तस्याप्रयोजकत्वकान्तारनिविष्टत्वेनाबाधकत्वात्। न द्वितीयः। तस्या अग्रे निरसिष्यमाणत्वात्। किञ्च नास्त्येव पृथिव्यादीनां निरुक्तिविरहः। श्रुत्या लक्षणस्योक्तत्वादित्याह ॥यत्कठिणमिति॥ न च न सर्वथा निर्वचनाभावादनिर्वाच्यत्वम्, किन्तु सत्त्वेनेति वाच्यम्। तस्याप्युक्तरीत्या बाधाभावेन सत्त्वात्। ननु तर्ह्यनिर्वाच्यत्वोक्तौ किं निमित्तमित्यत आह॥ तस्मादिति॥ न च मिथ्यात्वादेवानिर्वाच्यत्वव्यवहार इति वाच्यम्। प्रमितत्वेन मिथ्यात्वायोगात्। ननु प्रमितत्वाप्रमितत्वे न सत्यत्वमिथ्यात्वयोः प्रयोजके।

॥यत्विति॥ सम्बन्धिभिन्नत्वे तत्रापि विशिष्टव्यवहारानुरोधेन संबंधान्तरानङ्गीकारेऽनवस्था स्यात्। न चेत्सम्बन्धिभिन्नत्वं तर्हि सम्बन्धिभिन्नत्वरूपसम्बन्धलक्षणाभावात् सम्बन्धत्वासिद्धिरित्यर्थः॥ उक्तरीत्येति॥ प्रतियोग्यनुयोगिभावत्वयुक्ताध्यासरूपसम्बन्धादेरप्युक्तरीत्या खण्डनसम्भवात् स्वव्याहतिरित्यर्थः। किञ्चोभयविकल्पेऽपि न दोषः। तत्राऽद्ये सम्बन्धिभिन्नत्वे विशिष्टप्रतीत्यन्यथानुपपत्या सिद्धस्य तस्य प्रामाणिकत्वान्नानवस्थादोषः। अन्यथा बीजाङ्कुरादावपि तद्दोषत्वप्रसङ्गात्। न च तत्सम्बन्धस्वीकारप्रसङ्गः। अनन्तपरमाणुस्वीकारवददोषात्। न चापसिद्धान्तः। मन्मते सम्बन्धद्वित्वनियमाभावात्। सम्बन्धिभिन्नत्वे समवायवत् तार्किकमते, त्वन्मते आध्यासिकसम्बन्धवच्च स्वनिर्वाहकत्वसम्भवाच्च। अन्यथा तयोरुभयमते सम्बन्धत्वं न स्यात्। सम्बन्ध्यभिन्नत्वमिति द्वितीयेऽपि न संबंधलक्षणाभावादसम्बन्धत्वापत्तिदोषः। तल्लक्षणे सम्बन्धिभिन्नत्वस्याप्रवेशात्। विशिष्टधीनियामकत्वस्यैव तल्लक्षणत्वात्। एकस्यैव संबंधसंबंधित्वयोरविरोधस्य प्रकारभेदेनोपपत्तेः। तस्माद्यत्किञ्चिदेतत्। सम्बन्धिभिन्नत्वेऽपि सम्बन्धस्य नानवस्था। स्वनिर्वाहकत्वादितीमं पक्षं दृष्टान्तमुखेनोपपादयति॥ युक्तं चेति॥ ननु मन्मते दृश्यत्वस्य सम्भवति स्वनिर्वाहकत्वं मायिकत्वात्। तस्याश्चाघटितघटनाशक्तित्वात्। त्वन्मते तु सम्बन्धस्य सत्यत्वात् न तत्सम्भवतीति चेत् सत्यम्। सत्यस्यापीश्वराधीनत्वेन स्वनिर्वाहकत्वसम्भवात्। न ह्यप्रामाणिकजडरूपमायाशक्त्यां स्वनिर्वाहकत्वं प्रामाणिकं, चेतनरूपेश्वरशक्त्यां तु न तदिति युक्तं वक्तुं देवानांप्रियेण।

॥यदपीति॥ न च विषयत्वनिरुक्तिखण्डनं कथं प्रकृतानुपयुक्तम्? तत्खण्डनेन सम्बन्धस्यैव खण्डितत्वादिति वाच्यम्। सम्बन्धस्य प्रमाणसिद्धत्वेन खण्डयितुमशक्यत्वात्। न हि यत्किञ्चिद्विशेषखण्डनेन सामान्यं खण्डितं भवति। सामान्यस्य खण्डितेतरविशेषमादायोपपत्तेः। अन्यथा संबंधसामान्यस्य प्रमाणसिद्धत्वानुपपत्तेः। प्रमाणं चोपपादितं प्राक्॥ विषयित्वस्येति॥ न च विषयित्वानिर्वचनेऽपि विषयाध्यासेनैव तदुपपन्नमिति वाच्यम्। विषयित्वानिर्वचने विषयानध्यासेऽपि उक्तप्रामाणिकत्वेन विषयत्वोपपत्तेः विषयस्य सत्त्वसम्भवात्। किञ्च विषयिणोऽध्यासेन विषयत्वोपपत्तिः किं न स्यात् विनिगमकाभावात्। न चानुवृत्तव्यावृत्तत्वप्रकाशजडत्वादिकमेव विनिगमकमिति शङ्क्यम्। अनुवृत्तव्यावृत्तत्वन्यायस्यानित्यो घटः, अनित्यः पटः इत्यादौ व्यभिचारात्। अननुवृत्तस्यापि रङ्गसीसादेः अनुवृत्तरूप्याध्यासाधिष्ठानत्वदर्शनाच्च। जडत्वप्रकाशत्वे तु जडत्वहेतुभङ्ग एव निरस्ते।

॥स्वव्याहतश्चेति॥ एवञ्च त्वयापि विषयत्वस्यावश्यं निर्वक्तव्यत्वेन तत्खण्डनं स्वव्याहतमित्यर्थः। न च मया घटादिसमकक्ष्यतया विषयत्वं निरुच्यत एव, परन्तु तस्य तात्विकत्वं नाङ्गीक्रियत इति वाच्यम्। ममापि घटादिसमकक्ष्यविषयत्वस्यैवापेक्षितत्वात्। मिथ्यात्वसिद्धेः प्राक् अतात्विकत्वासिध्याऽन्योन्याश्रयाच्च। प्रमाणविषयत्वेनैव तात्विकत्वासिध्याऽन्योन्याश्रयाच्च। प्रमाणविषयत्वेनैव तात्विकत्वसम्भवाच्च। न च प्रपञ्चविषयकप्रमाणे तत्वावेदकत्वलक्षणं प्रामाण्यं नेति वाच्यम्। दत्तोत्तरत्वात्। अतत्वावेदके प्रमाणशब्दाप्रयोगाच्च। ॥न चेति॥ प्रमाणज्ञानस्य विषयसाध्यत्वेन तदधिष्ठानत्वायोगादिति भावः। किञ्च दृगध्यस्तत्वरूपं दृश्यत्वं वदता त्वयाऽपि विषयत्वमवश्यं निर्वाच्यम्। तेन विना तस्यासंभवादित्याह॥ तदज्ञानेति॥ नन्वनिर्वाच्यत्वादिकमेवाध्यस्तमतो न दोष इत्यत आह॥ न हीति॥ तथात्वे सर्वं सर्वस्य सर्वदा प्रकाशेतेति भावः॥ विषयत्वस्येति॥ उपलक्षणमेतत्। मिथ्यात्वसिद्धेः

सत्त्वमिति॥ अबाध्यत्वरूपमित्यर्थः। तथाचाप्रयोजकत्वमिति भावः। न च व्यवहृत्या ब्रह्मण आध्यात्मिक एव सम्बन्धः। व्यवहृतौ ब्रह्मानध्यासेऽपि ब्रह्मणि व्यवहृतेरध्यासादिति वाच्यम्। तत्राध्यस्तस्य तद्व्यवहारत्वे ब्रह्मण्यध्यस्तघटव्यवहारस्यापि ब्रह्मव्यवहारत्वापत्तेरित्याद्युक्तत्वात्। किञ्चाध्यासिकसम्बन्धानुपपत्त्या विषयत्वमेव सम्बन्धः स्वीकार्य इत्याह॥ किञ्चेति॥ आद्य इति॥ यथा सम्बन्धमिथ्यात्वेऽपि दृशः सत्यत्वं तथा सम्बन्धमिथ्यात्वे दृश्यसत्यत्वं स्यादेवेत्यर्थः। ननु तत्र प्रमाणबलात् सत्त्वमङ्गीक्रियत इति चेन्न। दृश्यसत्यत्वेऽपि प्रमाणानामुक्तत्वात् ॥त्वन्मत इति॥ तथा च न तदध्यस्तत्वं तत्र सम्बन्ध इति भावः। न च ज्ञानस्याध्यस्तत्वेऽपि तत्र दृश्याध्यासोऽङ्गीक्रियत इति वाच्यम्। अध्यस्तस्य दृश्यत्वनियमेन तस्यापि स्वज्ञानाध्यासे अनवस्थापत्तेः। न च वृत्त्यवच्छिन्नचैतन्यस्याजडत्वेन सत्यत्वात् तत्राध्यासोपपत्तिरिति वाच्यम्। अवच्छेद्यस्य चैतन्यमात्रस्य सत्यत्वेऽपि ज्ञानत्वाभावात्। अवच्छिन्नस्य ज्ञानत्वेऽपि तस्य मिथ्यात्वेन तेन सममध्यासलक्षणसम्बन्धायोगात्। उक्तमर्थं दृष्टान्तेनोपपादयन् सङ्गृह्णाति– ॥एवञ्चेति॥ उपसंहरति ॥तस्मादिति॥

अत्रेष्यमाणेति दृष्टान्तार्थम्। तत्राध्यासिकसंबंधस्य परेणानुक्तत्वात्। किञ्च, येन प्रकारेण विषयविषयिभावखण्डनं कृतं तेनैवाधिष्ठानाध्यस्तभावोऽपि शक्यते खण्डयितुम्। तथाहि– अधिष्ठानाध्यस्तभावो न सम्बन्धोऽद्विष्ठत्वात्। किञ्चाध्यस्तत्वं दुर्निरूपम्। तद्धि न मिथ्यात्वम्। प्रागुक्तदूषणासहत्वात्। नाप्यसत्त्वम् अङ्गीकारपराहतत्वात्। नापि तदधिष्ठानकभ्रमविषयत्वम्। अधिष्ठानेऽपि गतत्वात्। विषयत्वघटितत्वेन दुर्निरूपत्वाच्च। तस्माद्विषयत्वपरित्यागेनोभयसाम्येऽपि अध्यस्तत्वकल्पने सौगतसौहार्दमेव। नातोऽन्यत्कारणमिति।

संबंधेनेवेति॥ न च यावद्विशेषबाधे संबंधसामान्यस्यापि बाधो नियतः। विशेषानालिंगितसामान्याभावात्। तथाच कथं विशेषजिज्ञासाऽनर्थिकेति वाच्यम्। सम्बंधसामान्यानुमानेन प्रसिद्धसंबंधबाधसहकृतेन संबंधविशेषस्यैव सिद्धत्वेन यावद्विशेषबाधाभावात्। न चानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमात् कथं सम्बन्धविशेषभानमिति वाच्यम्। ईश्वरानुमाने ज्ञाननित्यैकत्ववदविरोधात्। तत्र लाघवादिना तदुपनीतमिति यदि तर्हि इहापि इतरबाधोपनीतमस्तु अविशेषादिति। न द्वितीय इत्याह ॥प्रमाणस्येति॥ न तृतीय इत्याह ॥संयोगेनेति॥ अत्र चशब्दोऽनास्थायाम्। इतरबाधसहकृतप्रमाणेन तद्भिन्नस्यैव सिद्धत्वादिति द्रष्टव्यम्। नन्विदं कथं विषयविषयिभावलक्षणम्। प्रतियोग्यनुयोगिभावादावतिव्याप्तेरिति चेन्न। न हीदं विषयविषयिभावमात्रलक्षणम्। किन्तु संयोगसमवायानिर्वाह्यविशिष्टप्रतीतिनिर्वाहकसंबंधमात्रस्य। विषयविषयिभावमात्रस्य लक्षणमग्रे स्फुटमिति न कोऽपि दोषः। न च संयोगसमवायान्तर्भावस्य दूषितत्वात् तद्भिन्नसंबंधत्वं त्वस्माकं नानिष्टम्। न ह्यस्माभिः संयोगसमवायातिरिक्तसंबन्धो नाद्रियते। किन्तु तस्य प्रामाणिकत्वमिति वाच्यम्। व्यधिकरणत्वात्। त्वयेदानीं लक्षणे पृष्टे लक्षणमुक्तमनेन। लक्षणमङ्गीकृत्य प्रमाणं चेत् पृच्यते तस्याप्युक्तत्वेन पुनः प्रश्नायोगात्। अथ पुनः प्रामाणिकमपि तात्त्विकं नेत्युच्यते चेत् प्रमाणप्रमितस्यापि ब्रह्मणस्तात्विकता न स्यात्। अथोच्येत प्रमाणमेव तन्नेति चेत् तर्हि तस्य दूषणं वक्तव्यम्। तदनुक्त्यैव तस्याप्रामाणिकत्वकथनस्य वल्गनमात्रत्वादिति। न चतुर्थ इत्याह ॥विशेषेति॥

मिथ्याभूतदृक्सम्बन्धरूपदृश्यत्वं तदाक्षेपकमिति तृतीयमाशङ्क्य निषेधति ॥ न चेति॥ अन्योन्याश्रयादिति॥ दृश्यमिथ्यात्वे सिद्धे तस्य बाधकस्य विद्यमानत्वात् प्रमाणविषयतया सिध्यतो दृक्सम्बन्धस्य मिथ्यात्वसिद्धिः। तत्सिद्धौ दृश्यमिथ्यात्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः। तथाचाक्षेप्यस्य नोपपादकत्वमिति सिद्धम्।

आक्षेप्यस्य प्रमाणाविरुद्धत्वं च नास्तीत्याह ॥ प्रत्यक्षादीति॥ ननु प्रत्यक्षस्य तत्त्वावेदकत्वाभावात् न तद्विरोधो दूषणम्। अन्यथा प्रपञ्चस्य दृश्यता न स्यादित्यत आह ॥ न चेति॥ किञ्च दृश्यत्वोपपत्त्यर्थं प्रपञ्चमिथ्यात्वं स्वीक्रियते। तथाचैकस्योपपत्तये बहुत्यागः प्राप्नोति। तद्वरं बहूनामुपपत्तये एकस्य दृश्यत्वस्यैव त्यागः। त्यजेदेकं कुलस्यार्थ इति न्यायादित्याह– नापीति। ननु बहूनां कल्प्यत्वादप्रामाणिकत्वाच्च, क्लृप्तत्वात् प्रामाणिकत्वाच्चैकस्योपपत्तयेऽनेकत्यागो युक्त इत्यत उक्तं – प्रमितेति। तथाच बहूनां प्रमाणसिद्धत्वान्न कल्प्यत्वम्। दृश्यत्वं च न सर्वथाऽनुपपन्नमिति न तद्बलात् प्रपञ्चमिथ्यात्वं कल्प्यमिति भावः। एवमाक्षेप्ये उपपादकत्वप्रमाणविरुद्धत्वाभावमुक्त्वा आक्षेपके प्रमितत्वानुपपद्यमानत्वयोरभावमाह ॥ आक्षेपकं चेति॥ तस्येति॥ तथाचोभयोरभेदान्नाक्षेप्याक्षेपकभाव इति भावः॥ नचासिद्धेरिति॥ त्वया विषयत्वरूपसम्बन्धानङ्गीकारादित्यर्थः। ननु मिथ्याभूतविषयत्वं स्वीक्रियते। तर्हि तन्निराकरणं स्वव्याहतमिति चेन्न। तात्विकस्यैव तस्य मया निषेधादिति। मैवम्। एवं तर्हि त्वन्मते मिथ्याभूतसंयोगेनेव मिथ्याभूतविषयत्वेनैव दृक्सम्बन्धोपपत्तौ आध्यासिकसम्बन्धकल्पनानुपपत्तेः। अत एवाह ॥ सिद्धाविति॥ दृग्विषयत्वातिरिक्तेति॥ न च दृग्जन्यसिद्धिकत्वमेव दृगधीनसिद्धिकत्वं विवक्षितम् इति वाच्यम्। घटोऽयमित्यत्र सिद्धिद्वयादर्शनात्। किञ्च दृग्जन्यसिद्धिकत्वमित्यत्र यदि सिद्धिविषयत्वं तवासिद्धिः। यदि सिद्धादध्यस्तत्वं तदा ममासिद्धिः। न च दृगभिव्यक्तसिद्धिकत्वं विवक्षितम्। दृक्पदेन वृत्तेरुक्तत्वादिति वाच्यम्। तथापि पूर्वोक्तविकल्पदोषानिस्तारात्॥ न चेति॥ सम्बन्धसामान्यस्योभयसिद्धत्वान्नोभयमतेऽसिद्धिरिति भावः। नन्वेतावताऽध्यस्तत्वरूपसम्बन्धविशेषसिद्धिः कथमिति तत्राह ॥ तच्चेति॥ न हीति॥ न च रूप्यस्य शुक्तिरिति व्यवहाराभावेऽपि रूप्यस्याधिष्ठानं शुक्तिरिति व्यवहारोऽस्त्येव। चैत्रस्य मैत्र इति व्यवहाराभावेऽपि चैत्रस्य पुत्रो मैत्र इति व्यवहारवदिति वाच्यम्। पदद्वयमात्रप्रतिपाद्यसामान्यं प्रति पदद्वयमात्रप्रतिपाद्यस्यैव विशेषत्वात्। अस्य चातथात्वात्। अत्रापि रूप्यभ्रमाधिष्ठानं शुक्तिरित्येव प्रतीतिः। भ्रमस्तु नाध्यस्तोऽबाधात्। अत एव भ्रमस्य साधिष्ठानत्वनियम इति। तस्मान्नाक्षेपकस्य प्रमितत्वमनुपपद्यमानत्वं चेति भावः।

अत्रार्थापत्तिपुरस्कारेण न विपक्षबाधकप्रवृत्तिः। किन्त्वनुकूलतर्कमात्रमिति द्वितीयः पक्षोऽपि नेत्याह ॥ नान्त्य इति॥ तद्वत इति॥ तथाच व्यभिचार इति भावः। न च तुच्छस्य न दृक्सम्बन्धरूपं दृश्यत्वम्। न चैवं तद्व्यवहारानुपपत्तिः। तदाकारवृत्त्या तत्समुल्लासमात्रेण तदुपपत्तेः। तथाच दृश्यत्वाभावात् कथं व्यभिचार इति वाच्यम्। तर्हि तद्वदेव तदाकारवृत्त्या समुल्लासमात्रेण व्यवहारानुपपत्तौ प्रपञ्चेऽपि दृश्यत्वमनङ्गीकरणीयमिति कथं मिथ्यात्वे दृश्यत्वानुपपत्तिरूपोऽनुकूलतर्कोऽभिधीयते? न च ज्ञातो घट इति प्रतीत्यन्यथानुपपत्त्या दृश्यत्वमिति वाच्यम्। नृभृङ्गं ज्ञातमिति प्रतीतेरविशेषात्। न च सम्बन्ध्यभावेन तत्र दृक्सम्बन्धरूपं दृश्यत्वं न सम्भवतीति वाच्यम्। प्रकृते प्रपञ्चस्य मिथ्यात्वे सम्बन्ध्यभावस्याविशेषात्। सम्बन्ध्यभावेऽपि सम्बन्धस्योपपादितत्वाच्च। तस्मादसतोऽपि दृश्यत्वमस्तीति तत्र व्यभिचारः सुस्थः ॥ नापि

स्यात्। स्वस्य तत्सिध्यभावेऽपि परस्य तसिद्धेरन्तत ईश्वरस्य तत्सिद्धेर्नासत्त्वमिति यदि तदेतदत्रापि तुल्यम्। अत एव सुरेश्वरोक्तमप्यशुद्धम्। वृत्त्यैव सर्वसिद्धिसंभवात्। अत एव मानमेयव्यवस्थासिद्धिरपि परास्ता। वृत्त्युदयानन्तरमर्थस्य सिद्धत्वात् अन्वयव्यतिरेकग्रहेण कार्यकारणभावग्रहसंभवात्। न च कार्यकारणभावाग्रहणे वृत्तिरेव न भवतीति वाच्यम्। कार्यकारणभावग्रहस्य वृत्त्युत्पादकारणत्वात् अन्यथा विषयसन्निकर्षसमनन्तरं ज्ञानानुदयप्रसंग इति॥ त्वयापीति॥ न च वृत्तिप्रतिबिंबितस्य घटाधिष्ठानचैतन्याभेदात् न विरोध इति वाच्यम्। प्रतिबिंबितस्य विशिष्टत्वेन मिथ्यात्वात्, अधिष्ठानस्य च सत्यत्वात् तयोरभेदानुपपत्तेः। अन्यथा जीवब्रह्मणोरप्यभेदेन संसारादिव्यवस्था न स्यादिति। घटोऽयमित्यसावुक्तिः घटोऽयमित्ययं व्यवहारः। आभासस्य घटानधिष्ठानवृत्तिप्रतिबिंबितचैतन्यस्य प्रसादतो भवेत्। विज्ञातो घट इत्युक्तिः व्यवहारः। ब्रह्मानुभवतः, ब्रह्मरूपाधिष्ठानचैतन्यरूपादनुभवात् भवेदिति श्लोकार्थः। तथाचाध्याससरूपसंबंधस्यातन्त्रत्वात् तदभावेऽपि दृश्यत्वोपपत्त्या मिथ्यात्वहेतवोऽनुकूलतर्कहीना इति।

किञ्चेति॥ अर्थापत्तिरित्यत्रानुमानेऽप्रयोजकताशङ्कायां विपक्षबाधकत्वेनेति शेषः। एवमग्रेऽपि। न चानुकूल तर्कस्य प्रक्रान्तत्वेनार्थापत्तिर्वेत्यादिविकल्पानवसर इति वाच्यम्। सत्यत्वे दृश्यत्वानुपपत्तेरित्युपसंहारस्य द्वेधापि पर्यवसानसम्भवेन विकल्पोपपत्तेः। तदिति। अर्थापत्तेरित्यर्थः। काऽर्थापत्तिसामग्री याऽत्र नेत्यत आह – आक्षेप्यस्येति। प्रमितत्वं चेतीति। न चाक्षेपकस्य प्रमितत्वं नापेक्षितम्। ज्ञातत्वमेवाक्षेपकत्वे प्रयोजकम्। लाघवात्। अप्रमितेनापि प्रतिबिंबेन बिंबानुमानदर्शनाच्चेति वाच्यम्। आरोपितपुष्टत्वेनाबाध्यरात्रिभोजना क्षेपस्यादर्शनेनाऽक्षेपकप्रमितत्वस्यावश्यकत्वात्। अन्यथा आक्षेपकस्याक्षेप्य समानयोगक्षेमत्वेनाक्षेपकस्य मिथ्यात्वे तदाक्षेप्यमिथ्यात्वस्य मिथ्यात्वेन स्वप्रतिकूलाचरणापातात्। प्रतिबिंबासत्यत्वस्यासिद्धेश्च। एवं हि प्रकृते दृश्यत्वमुपपाद्यं मिथ्यात्वमुपपादकम्। तत्र मिथ्यात्वं कीदृशस्य दृश्यत्वस्योपपादकम्? किं दृक्सम्बन्धरूपस्य वा, दृगध्यस्तत्वरूपस्य वा, मिथ्याभूतदृक्संबंधरूपस्य वा? नाद्य इत्याह – न चेति। संबंधिमिथ्यात्वे संबंधस्यादर्शनादिति भावः। प्रतिकूलमेवेति। सम्बन्धिमिथ्यात्वेन सम्बन्धाभावस्यैव दर्शनादिति भावः। न च रूप्यमिथ्यात्वेऽपि शुक्तीदमंशाध्यस्तत्वरूपसम्बन्धस्य दर्शनात् कथं संबंधिमिथ्यात्वं सम्बन्धप्रतिकूलमिति वाच्यम्। तत्राध्यस्तत्वस्य सम्बन्धत्वस्यासिद्धेः। अन्यथा रजतस्य शुक्तिरिति प्रतीतिः स्यात्। ननु सम्बन्धिमिथ्यात्वस्य संयोगसमवायरूपसम्बन्धिप्रतिकूलत्वेऽपि अध्यस्तत्वरूपसम्बन्धस्य न तत्प्रतिकूलम्। प्रत्युतानुकूलमेव। सम्बन्धिसत्यत्वेऽध्यस्तत्वरूपसम्बन्ध एव न स्यात्। प्रकृते च दृगध्यस्तत्वसम्बन्धरूपदृश्यत्वस्य विवक्षितत्वादिति द्वितीयं पक्षमाशङ्क्य निषेधति – न चेति। यदि दृगध्यस्तत्वरूपदृश्यत्वं विवक्षितं तर्हि तस्य मां प्रत्यसिद्धत्वात्। सिद्धस्यैवाक्षेपकत्वात्। तस्याक्षेपकतैव न सम्भवतीत्याह– तस्येति। न च दृगध्यस्तत्वेनाक्षेपकता। येनासिद्धिः स्यात्। किन्तु दृक्सम्बन्धत्वेन। तस्य च प्रसक्तविशेषबाधेऽध्यस्तत्वरूपसम्बन्धविशेषे पर्यवसानमतो नासिद्धिरिति वाच्यम्। सम्बन्धसामान्यस्य सम्बन्धिमिथ्यात्वं विनाऽनुपपत्त्यभावेन सम्बन्धिमिथ्यात्वानाक्षेपकत्वात्। न हि दण्डसम्बन्धः सम्बन्धिमिथ्यात्वं विनाऽनुपपन्नः। प्रत्युत तत्प्रतिकूलः। न च दृक्सम्बन्धो विषयरूपसम्बन्धिमिथ्यात्वं विनाऽनुपपन्न इति वाच्यम्। विषयमिथ्यात्वाभावेऽपि ब्रह्मणो दृक्सम्बन्धस्यादृष्टत्वात्। तस्मात् दृगध्यस्तत्वेनाक्षेपकता वक्तव्या। एवञ्चासिद्धिरेवेति भावः।

इदमंशावच्छिन्नचैतन्यमेव। तच्च दैवाद्रजताकारवृत्त्यवच्छिन्नमपि न तावता भ्रमाधिष्ठानत्वे तदपेक्षा। तस्य च भ्रमविरोधिशुक्तित्वाद्याकारेणाज्ञानं भ्रमकारणम्। तेनाकारेण च ज्ञानं भ्रमनिवर्तकम्। अत एव न ज्ञानं रजतमिति भ्रमाकारापत्तिः। वृत्त्यवच्छिन्नस्यैव ज्ञानत्वात्। तस्य चाधिष्ठानत्वाभावात्। अधिष्ठानतादात्म्येन चारोप्यप्रतीतिरिति इदं रजतमित्येव भ्रमाकार इति चेन्न। एवं हि वदता भवतैव यस्य वृत्त्यवच्छिन्नस्य ज्ञानत्वं तस्य नाधिष्ठानत्वम्। यस्य चेदमंशावच्छिन्नस्याधिष्ठानत्वं न तस्य ज्ञानत्वमिति स्वीकृतम्। तथाच स्वज्ञानेन सममध्यासरूपसंबन्धाभावादसंबद्धस्य तदज्ञानत्वात्, अन्यथाऽतिप्रसङ्गात् अध्यासातिरिक्त एव सम्बन्धः स्वीकर्तव्य इति साधूक्तं तवापि न ज्ञाने ज्ञेयाध्यासनियम इति।

ननु वर्तमानघटादेर्न व्यावहारिकस्वज्ञानेन संबंधान्तरमंगीकर्तव्यम्। तत्राध्यासरूपसंबन्धसंभवात् इत्यत आह ॥ घटादेरिति॥ घटादेः स्वसन्निकर्षात्पूर्वमसत्त्वे तत्सन्निकर्षरूपकारणाभावेन तज्ज्ञानमेव न स्यात्। तथाचाधिष्ठानाभावे सुतरामध्यासायोग इति भावः। ननु घटसन्निकर्षरूपकारणाभावेन ज्ञानं न प्रकाशकम्। किन्तु घटाधिष्ठानचैतन्यरूपम्। तच्च सन्निकर्षजन्यं न भवति। एवञ्च तेन प्रकाशकेन सममध्यासरूपसम्बन्धोपपत्तिरिति शङ्कते॥ नन्विति॥ प्रकाशकं चैतन्यमज्ञानविरोधि, तदविरोधि वा? नाद्य इत्याह॥ त्वन्मत इति॥ त्वया चैतन्यरूपज्ञानस्याज्ञानविरोधित्वानङ्गीकारात्। तत्त्वे वा तस्य सर्वदा सत्त्वात् नित्याज्ञाननिवृत्तौ सर्वदा प्रकाशापातात्। किञ्चाज्ञानविरोधिन एव ज्ञानत्वात् त्वन्मतेऽपि वृत्तेरेवाज्ञानविरोधित्वेन तज्ज्ञानत्वं स्वीकर्तव्यम्। तत्र चाध्यासरूपसंबन्धासंभवात् अन्यः संबन्धः स्वीकर्तव्य इति भावः। अज्ञानानिवर्तकमेव चैतन्यरूपं ज्ञानमङ्गीक्रियते इति द्वितीयोऽपि नेत्याह॥ अज्ञानेति॥ अज्ञानानिवर्तकज्ञानस्याप्रामाणिकत्वात् तदङ्गीकारो युक्त इति भावः।

ननु चैतन्यरूपं ज्ञानं कथमप्रामाणिकम्? परिशेषप्रमाणस्यैव सद्भावात्। तथाहि - वृत्त्युदयात्प्रागज्ञातज्ञानमज्ञातार्थं सिध्यर्थमङ्गीकर्तव्यम्। अन्यथा तस्य साधकाभावेन शशशृङ्गतुल्यतया सन्निकर्षतज्जन्यज्ञानहेतुतया प्राक् तत्सत्त्वकल्पना निष्प्रामाणिकी स्यात्। तच्च साधकं न वृत्तिरूपम्। तत्कारणाप्रवृत्तेरः अतस्तदतिरिक्तमनवस्थापरिहाराय स्वप्रकाशं नित्यं चैतन्यरूपं स्वीकर्तव्यम्। तदुक्तम्–

सर्वथार्थदृशां सिद्धिः स्वाभिप्रेतस्य वस्तुनः।
यदभ्युपगमादेव तत्सिद्धिर्वार्यते कुतः॥ इत्यादि।

तथाचाज्ञानानिवर्तकं चैतन्यरूपज्ञानमवश्यमज्ञातार्थसिध्यर्थमङ्गीकर्तव्यम्। अन्यथाऽन्वयव्यतिरेकयोरग्रहेण कार्यकारणभावाग्रहात् सर्वा मानमेयादिव्यवस्थोच्छिद्येतेति। मैवं। चैतन्यरूपज्ञानेना ज्ञातार्थसिद्धिरज्ञातत्वादिरूपेण वा? तत्तत्प्रातिस्विकरूपेण वा? नाद्यः। तेनाज्ञातत्वादिना सिद्धावपि प्रातिस्विकरूपेण तत्साधकाभावात्, तेन रूपेण शशशृङ्गतुल्यता स्यात्। तादृशसिद्धेरनुपयुक्तत्वाच्च। मनसा वाऽस्मदभिमतसक्षिणा वा तादृशसिद्धिसंभवाच्च। न द्वितीयः। वृत्तिं विना तेन प्रातिस्विकसिध्यभावात्। अन्यथा वृत्तिवैयर्थ्यापत्तेः। किञ्च घटादौ चैतन्यरूपाज्ञानानिवर्तकज्ञानानङ्गीकारे तस्यासत्त्वं कुतः। वृत्त्युदयात् प्राक् स्वस्य सिद्धेरभावादिति यदि तर्हि वृत्त्युदयात् प्राक् ब्रह्मणोऽपि सिद्धेरभावात् तस्यासत्तुल्यता

तथाच मुक्तेर्नित्यत्वप्रतिपादकागमविरोधः। न चेदं मतमभावद्वैतमतं वाऽनङ्गीकारपराहतमिति वाच्यम्। येषां तन्मतं तान्प्रत्यापादनात्। अविद्यानिवृत्तेः पञ्चमप्रकारत्वानङ्गीकारे ब्रह्मरूपत्वाङ्गीकारे नित्यमुक्तत्वं स्यात्। श्रवणादिवैयर्थ्यापत्तेश्च। अभावद्वैतानङ्गीकारे स्वव्याहत्यादिप्रसङ्गात्।

॥ अपरोक्षानुभवैकरस इति॥ न चातीतादेरनुमित्यादिरूपे स्वज्ञानेऽनध्यासेऽपि यस्मिंश्चैतन्ये तदध्यस्तं तदेव चैतन्यमनुमित्यादिरूपवृत्त्यवच्छिन्नमिति नाध्यासानुपपत्तिः। अतिप्रसङ्गपरिहारार्थं चैतन्यस्य विषयसंबंधे वृत्त्युपरागापेक्षायामपि नाधिष्ठानत्वे तदपेक्षा। एवमेव नित्यपरोक्षस्थले स्मृतिस्थलेपीति वाच्यम्। व्यधिकरणत्वात्। अनुमित्यादेरतीतादिनाऽध्यासिकसंबंधाभावे चोदिते अतीताद्यधिष्ठानचैतन्यस्यानुमित्याद्यवच्छिन्नत्वोपपादनस्य प्रकृतानुपयुक्तत्वात्। न चानेन परम्परासंबंध एवोपपादित इति न प्रकृतानुपयुक्तत्वमिति वाच्यम्। परम्परासंबन्धस्य ज्ञानज्ञेयभावेऽप्रयोजकत्वात्। न हि दीपः परम्परासंबद्धः प्रकाशयतीति स्वोक्तिव्याहतेश्च। अन्यथा अध्याससंबन्धमज्जनं स्यात्। न च न व्यधिकरणत्वमनुमित्याद्यवच्छिन्नस्यैवातीताद्यधिष्ठान चैतन्यस्य तत्, ज्ञानत्वादिति वाच्यम्। तथासति चैतन्यस्याभिव्यक्तस्यैव ज्ञानत्वेन तदङ्गीकारे विषयस्यापरोक्षत्वापत्तेः। तस्यापरोक्षैकरसत्वात्। न चानुमित्यवच्छेदात् परोक्षत्वमिति वाच्यम्। तर्हीन्द्रियजन्यवृत्त्यवच्छेदादपरोक्षत्वमिति स्वतोऽपरोक्षैकरसमिति भज्येत। किञ्चानुमितिरूपवृत्तेरान्तरत्वेन न बहिष्ठं चैतन्यावच्छेदकत्वम्। अन्यथेन्द्रियवृत्तेरप्यान्तरत्वेऽपि विषयावच्छेदकत्वसम्भवान्मनसो बहिर्गमनादि व्याहतं स्यात्। एवमेव नित्यस्थले स्मृतिस्थलेऽपि परम्परासंबन्धस्याप्रयोजकत्वं द्रष्टव्यम्। सर्वत्र प्रत्यक्षस्थले इहेदमिति साक्षात्संबन्धस्यैवानुभवात्। ॥ प्रातिभासिकस्य चेति॥ प्रातिभासिके अविद्यावृत्तिरूपे तत्प्रतिबिम्बितसाक्षिरूपे चेत्यर्थः। न च प्रातिभासिकस्य प्रातिभासिक्यां वृत्तावनध्यासेऽपि अधिष्ठानविषयकवृत्त्याभिव्यक्तचैतन्य एवाध्यास इति न काप्यनुपपत्तिरिति वाच्यम्। प्राति भासिकवृत्तेः प्रातिभासिकविषयेणाध्यासिकसंबन्धाभावे शङ्किते स्वज्ञानातिरिक्तेऽध्यासरूपसंबंधवर्णनस्य व्यधिकरणत्वात्। न ह्यधिष्ठानविषयकवृत्त्यभिव्यक्तचैतन्यं प्रातिभासिकज्ञानं। तस्य तज्ज्ञानत्वेऽधिष्ठानवत् अध्यस्तस्य व्यावहारिकत्वापत्तेः। ननु तदेव प्रातिभासिकवृत्त्यवच्छिन्नं प्रकाशकम्। न चापरव्यवच्छेदमात्रेण भेद इति चेन्न। न चापरव्यवच्छेदमात्रेण भेद इति चेन्न। एकावच्छिन्नस्यापरावच्छेदासम्भवात्। न हि घटावच्छिन्नोऽपरेणावच्छिद्यते। अवच्छेदे वा भेदनियमात्। अन्यथा विशिष्टविशेष्ययोरभेदे विशिष्टसंसारेण शुद्धमपि संसारीति सर्वाव्यवस्थाप्रसङ्गः।

ननु भ्रमस्थले भ्रमस्य प्रातिभासिकाधिष्ठानत्वमस्त्येवेति तस्याध्यासिकसंबन्धोपपत्ति रित्यत आह॥ त्वन्मत इति॥ कल्पितस्याप्यधिष्ठानत्वे ब्रह्मणोप्यधिष्ठानत्वान्यथानुपपत्या सत्त्वं न स्यादिति भावः। ननु न मया कल्पितस्याधिष्ठानत्वाभावनियमः स्वीक्रियते। चिदचितोरन्योन्यतादात्म्यारोपाङ्गीकारात्। ब्रह्मणः कल्पितत्वाभावश्च बाधकाभावात्। तथाच भ्रमस्य कल्पितत्वेऽप्यधिष्ठानत्वं स्यादिति, तत्राह ॥ प्रातिभासिकादिति॥ अविद्यमानस्याधिष्ठानत्वानङ्गीकारादिति भावः। तथाऽङ्गीकारे वाऽपसिद्धान्तापत्तिरित्याह ॥ त्वमपीति॥ ॥ ज्ञानमिति॥ अधिष्ठानानुविद्धतयाऽध्यस्तभानस्येदं रूप्यमित्यत्र दृष्टत्वादिति भावः। नन्विदं सर्वमनङ्गीकारपराहतम्। न हि मया रजताकारवृत्त्यवच्छिन्नचैतन्यं भ्रमाधिष्ठानमङ्गीक्रियते। किन्तु

हि तात्पर्यम्। न च तादृशप्रतीत्याऽध्यासः संबंधः। परोक्षप्रतीतेरध्यासाधिष्ठानत्वानं गीकारात्। किञ्च तात्पर्यस्य विषयेण ज्ञानस्य ज्ञेयेनेवास्यात्र तात्पर्यमिति साक्षात् संबंधोऽनुभूयते। तादृशानुभवः कथं परम्परासंबंधेन निर्वहेत्। अन्यथा ज्ञानस्यापि विषयेण परंपरासंबंधमादाय दृश्यत्वनिर्वाहे अध्यासो न कल्प्यत एवेति। किञ्च यथा कथञ्चिदध्यासेन विषयविषयिभावोपपत्तौ दृश्ये दृशोऽध्यासेनापि विषयविषयिभावसंबंधनिर्वाहात्। दृशोऽपि मिथ्यात्वेन दृश्यत्वोपपत्या न नियतप्रपञ्चमिथ्यात्वं सिध्येत्। न च बहूनां सत्यत्वे गौरवमित्येकस्यैव सत्यत्वमंगीक्रियत इति वाच्यम्। प्रामाणिकगौरवस्य न्याय्यत्वात्। त्यजेदेकं कुलस्यार्थ इति न्यायेनैकस्या एव दृशो मिथ्यात्वस्य स्वीकर्तव्यत्वापाताच्चेत्याह ॥ इहापीति॥

उक्तातिप्रसंगं संगृह्णाति ॥ एवञ्चेति॥ अत्र संविदीति तदर्थस्येति चोपलक्षणम्। श्रवणादौ ब्रह्मणश्चेत्यपि द्रष्टव्यम्। ननु कथं ज्ञानस्य विप्रकृष्टविषयेण संबंधः। प्रकाशस्य विप्रकृष्टविषयेण संबंधाभावस्य दीपादौ दर्शनात्। अन्यथा प्रकाशत्वमेव न स्यादित्यत आह ॥ यद्यपीति॥ नन्विदं वैलक्ष्यण्यमप्रयोजकम्। देशकालविप्रकर्षाभावस्य संबंधसामान्य प्रयोजकत्वात्। ननु संबंधिभिन्नसंबंध एव गौरवात्। तथाचान्तरत्वे सत्यपि न विप्रकृष्टविषयादिसंबंध इत्यत आह– ॥ परोक्षवृत्ताविति॥ उपलक्षणमेतत्। इच्छादावित्यपि द्रष्टव्यम्। न चेच्छादौ ज्ञानद्वारकः परम्परासंबंध एव। परोक्षस्थले तु यद्यप्यधिष्ठानचैतन्येन साक्षात् संबंधस्तथापि विषयाकारवृत्त्या तदभावात्। वृत्त्यवच्छिन्नचैतन्यस्य विषयेण परंपरासंबंध एवेति वाच्यम्। इच्छादौ ज्ञानद्वारकसंबंधस्याप्रयोजकत्वात्साक्षात्संबंध एवेत्युक्तम्। परोक्षस्थले वृत्तिर्वा, वृत्त्यवच्छिन्नचैतन्यं वा प्रकाशकम्? नाद्यः। वृत्तेः साक्षात् संबंधाभावे तत्प्रकाशानुपपत्तेः। अन्यथा आध्यासिकसंबंधस्वीकारवैयर्थ्यापत्तेः। न च तत्र तत्प्रकाश एव नेति वाच्यम्। तदभावे तत्कार्याज्ञानादि निवृत्त्यनापत्तेः। तस्माद्वृत्तेः प्रकाशकत्वे तया विप्रकृष्टविषयादिना साक्षात् संबंधस्य स्वीकार्यत्वात् देशकालविप्रकर्षाभावो न संबंधसामान्यप्रयोजकः। न द्वितीयः। तदनङ्गीकारात्। चैतन्यस्यापरोक्षैकरसत्वेन तत्संबंध आपरोक्ष्यापातात्। अथ यदि दीपादौ दृष्टत्वात् तथाभावोऽङ्गीक्रियते, तत्राह॥ अन्ययेति॥ दीपादावाध्यासिकसंबंधस्याप्रयोजकत्वदर्शनात् तद्दृष्टान्तेन प्रकृतेऽप्यप्रयोजकत्वं स्यादिति भावः।

किञ्च ज्ञानज्ञेययोरध्यासातिरिक्तसंबंधस्त्वयापि क्वचित् स्वीकार्य एव। संबंधान्तरानुपपत्तेर्व्यवहारस्य प्रकारान्तरेणोपपादयितुमशक्यत्वादित्याह॥ किञ्चेति॥ अनध्यस्तस्येति॥ अत्र षष्ठ्यन्तस्य स्वज्ञानेऽनध्यासादित्यनेनान्वयः। अनध्यस्तस्येति तुच्छस्य हेतुगर्भं विशेषणम्। तुच्छस्याध्यस्तत्वे तुच्छत्वमेव न स्यात्। अध्यस्तस्य प्रातिभासिकत्वनियमादिति भावः। ननु तुच्छस्याज्ञेयत्वेन ज्ञानेऽध्यासाभावेऽपि न दोषः। ज्ञेयस्य हि ज्ञानेऽध्यासः। तुच्छस्य च न ज्ञेयता, निर्धर्मकत्वात् इति चेन्न। ज्ञेयत्वं हि न ज्ञानकर्मत्वं। तद्धि जनकत्वमिति मन्तव्यम्। तथासति अतीतादेरपि ज्ञेयता न स्यात्। किन्तु ज्ञानजन्यव्यवहारशालित्वम्। तच्चासतोऽपीति कथं न ज्ञेयता। किञ्च यद्यसतो ज्ञानविषयत्वरूपं ज्ञेयत्वं न स्यात् तर्हि तज्ज्ञानेन तद्व्यवहारो न स्यात्। तद्व्यवहारजनकत्वे तद्विषयत्वस्य तन्त्रत्वात्। अन्यथाऽतिप्रसङ्गात्। न च पञ्चमप्रकाराविद्यानिवृत्तेरपि प्रतियोग्यधिकरणे वृत्तेरवश्यंभावात् अध्यास एव संबंध इति वाच्यम्। अविद्यानिवृत्तेरध्यस्तत्वेऽध्यस्तस्य निवृत्त्यवश्यंभावेन मुक्तस्य पुनः संसारित्वं स्यात्।

तद्विषयत्वस्यैव तन्त्रत्वात्। अन्याविषयत्वादेर्मूल एव दृश्यत्वभङ्गे निरस्तत्वात्। न च तदाश्रितत्वमेव तन्त्रम्। देवदत्तस्य स्वज्ञानेन स्वाश्रितघटाज्ञानानिवृत्तेः। न च तदध्यस्तत्वं तद्विषयत्वम्। देवदत्ताज्ञानस्य देवदत्ताध्यस्तत्वाभावेन तद्विषयत्वाभावापत्तेः। नन्वावरणस्य न सविषयत्वनियमः। अन्धकारे तददर्शनादित्यत आह ॥ अज्ञातस्येति॥ भावादौ न सम्बन्धान्तरमङ्गीक्रियते। येन स्वक्रियाविरोधादिकं स्यात्। सम्बन्धव्यवहारस्य स्वरूपसंबंधादिनैवोपपत्तेरित्यत आह॥ यदि चेति॥ अन्योन्याश्रयादिति॥ सम्बन्धमिथ्यात्वसिद्धौ अनुकूलतर्कसम्पत्या प्रपञ्चमिथ्यात्वसिद्धिः। तत्सिद्धौ च तदन्तःपातात् सम्बन्धमिथ्यात्वसिद्धिरिति तुष्यतु दुर्जन इति न्यायेनाह ॥ अस्तु वेति॥ ननु सम्बन्धमिथ्यात्वं सम्बन्धिमिथ्यात्वव्याप्तमिति सम्बन्धस्य मिथ्यात्वे सम्बन्धिमिथ्यात्वं सेत्स्यतीत्यत आह ॥ ज्ञानस्येवेति॥ न च सम्बन्धमिथ्यात्वं न यावत्संबंधिमिथ्यात्वव्याप्तम्। किन्तु यत्किञ्चित्सम्बन्धिमिथ्यात्वेन। तत्र ज्ञानस्य मिथ्यात्वे बाधकसद्भावात् ज्ञेयस्यैव तदिति वाच्यम्। व्याप्तेरप्रयोजकत्वात्। ज्ञेयमिथ्यात्वेऽपि बाधकानामुक्तत्वाच्च। ननु यत्सम्बन्धमिथ्यात्वं तत्सम्बन्ध्यन्यतरस्यान्यतरस्मिन्नध्यासनियमात् ज्ञानज्ञेययोः सम्बन्धस्य मिथ्यात्वेन ज्ञानस्य ज्ञेयेऽध्यासे बाधक ज्ञाने ज्ञेयस्याध्यासः सिध्यतीत्यतः संयोगादेर्मिथ्यात्वे तत्सम्बन्ध्यन्यतरस्यान्यतरस्मिन्नध्यासः स्यादित्याह ॥ न च संयोगादिरपीति॥ नन्वाध्यासिकसम्बन्धस्तात्विक इति स एव ज्ञानज्ञेययोः कल्प्यते। न त्वभावादौ कृप्तः संबंधः। तस्य मिथ्यात्वादित्यत आह ॥ न चेति॥ तथाऽङ्गीकारेऽद्वैतहानेः॥ नियामकेति॥ तथा चोभयत्राध्यासिकातिरिक्त एव सम्बन्धः स्वीकर्तव्य इत्याशयः।

उक्तामपि व्याहतिमधिकं वक्तुमाह॥ दृग्दृश्ययोरिति॥ नन्वत्रापि विषयिणि विषयोऽध्यस्त इति तत्राह ॥ नहीति॥ ननु नायमस्ति नियमः विषयिण्येव विषयाध्यास इति। किन्तु विषयविषयिणो राध्यासिक एव संबंधः। स चोभयथा। विषयस्य विषयिणि विषयिणो वा विषये। तदिह साक्षात्कारादिशब्देन वृत्तिर्वा तदभिव्यक्तचैतन्यं वा? आद्ये तस्याः ब्रह्मण्यध्यस्तत्वेनाज्ञानाज्ञेययोरिवाध्यासिकसंबंधोपपत्तेः। किञ्च श्रवणादीनां मानसक्रियात्वात् तेषां च ब्रह्मण्यध्यासेन सम्बन्धसंभवात्। न द्वितीयः। अभेदेनातिरिक्तसंबंधानुपयोगात् इत्याशयेन शङ्कते ॥ ब्रह्मणीति॥ उभयथाऽप्याध्यासिकसंबंधसंभवेऽपि विषयिणि विषयाध्यास एव तत्साक्षात्कार प्रयोजको न तु विषये विषयिणोऽध्यासोऽपि तत्साक्षात्कार प्रयोजकोस्तु। न चातिप्रसङ्गः। अध्यासविशेषस्य प्रयोजकत्वात्। तस्य च फलबलकल्प्यत्वादिति चेन्न। फलबलेनाप्यध्यासे विशेषः किं तदधिष्ठानकत्वं वा? साक्षात्कारादिविषयकाध्यासत्वं वा? तद्विषयकसाक्षात्काराद्यध्यासत्वं वा? पक्षत्रयेऽप्यतिप्रसंगतादवस्थात्। अतिरिक्तविषयत्वाभ्युपगमप्रसंगाच्च। तत्रापि तदध्यस्तत्वमेव विषयत्वमिति चेदात्माश्रयादिप्रसंगात्। न च जातिरूप एव विशेषः। मानसत्वादिना संकरात्। अवश्यकल्पनीयविषयविषयिभावेनैवान्यथासिद्धेश्च। स्ववाक्योत्थज्ञानस्य स्ववाक्यार्थेनाध्यासिकसंबंधानुपपत्या संबंधान्तरस्यावश्यकत्वाच्च। किञ्च धर्मादौ कर्मप्रतिपादकवेदतात्पर्यमवश्यमङ्गीकर्तव्यम्। न च तत्र तात्पर्यस्य धर्मादिनाऽध्यासिकः संबंधः। परस्परानध्यासात्। अतस्तत्र विषयविषयिभाव एव स्वीकर्तव्य इत्याह ॥ धर्मादाविति॥

ननु तात्पर्यं तत्प्रतीत्युद्देश्यकत्वम्। प्रतीतेश्च ज्ञेयान्तरेणेव धर्मेणापि संबंधोऽध्यास एव। प्रतीतिद्वारा च धर्मतात्पर्ययोः संबंध इत्यनुपपत्यभाव इति चेन्न। अत्र हि प्रतीतिः शब्दादिजन्या। तदुद्देश्यकत्वं

घटेच्छा पटेच्छेत्यनुभवस्य सुवचत्वात्। अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वमिति तार्किकमतेऽपि नियमघटितकारणत्वघटितत्वेन नियमस्य च भूयोदर्शनव्यभिचारादर्शनादिग्राह्यत्वे विलम्बोपस्थितिकत्वेन तदनुभवं विनैव घटेच्छेत्याद्यनुभवेन साक्षात्संबंधस्यावश्यकत्वात्। यदि च तादृशसंबंधोपस्थितिं विना इच्छादौ व्यवहार एव नेति ब्रूषे तर्हि ज्ञानेऽपि तुल्यमित्याशयः ॥ स्मृताविति॥ न च स्मृतावनुभवाधीनसंबन्धस्य शङ्कैव नास्ति। अनुभवस्य तदानीमसत्त्वात्। उभयोरपि ज्ञानत्वेन तत्तुल्यसंबन्धसम्भवाच्चेति वाच्यम्। स्मृतिकालेऽनुभवस्य स्वरूपेणासत्त्वेऽपि संस्कारद्वारा सत्त्वसम्भवात्। उभयोरपि ज्ञानत्वे तुल्येऽपि त्वया स्मृतेर्विषयेणाध्यासिकसम्बन्धानङ्गीकारात्। तत्र प्रतियोग्यनुयोगिभावतुल्यसम्बन्धाभ्युपगमेऽनुभवेऽपि तेन संबंधेन दृश्यत्वोपपत्तौ किमाध्यासिकदुर्व्यसनेनेति दिक्।

॥ अन्यथेति॥ न चातिरिक्तसंबंधेऽपि तुल्यमिदं दूषणम्। अथैकविषयावच्छेदेनैव ज्ञानस्य जनकत्वान्नोभयविषयत्वं समम्। ममापि जनकज्ञाने जनकतावच्छेदकविषयत्वस्य सम्बन्धत्वादिति वाच्यम्। अतिरिक्तसम्बन्धपक्षे न साम्यम्। येच्छा यदीयस्वभावसम्बद्धा सा तद्विषया इति पटेच्छाया घटीयत्वाभावः। अतिरिक्तसम्बन्धानङ्गीकारे तु पटज्ञानजन्यत्वात् पटीयत्वं यथा तथा घटज्ञानजन्यत्वात् तदीयत्वमपि स्यादेव। न च पटज्ञानमेव जनकं न घटज्ञानम्। ज्ञानस्यैकत्वात्। अथ पटविषयत्वांशावच्छेदेन जनकवं न घटविषयत्वांशेनेति न ज्ञाने विषयातिरिक्तांशाभावे घटविषयत्वपटविषयत्वयोरवच्छेदकत्वे। पूर्वदोषतादवस्थ्यात्। नापि यद्धर्मावच्छेदेन पटविषयत्वं तदवच्छिन्नस्य जनकत्वमिति। घटविषयत्वांशव्यावृत्तस्य पटविषयत्वव्यवस्थापकस्य ज्ञाने विशेषस्यानङ्गीकारात्। सर्वांशे घटविषयत्वसद्भावात् तज्ज्ञानजन्यत्वे स एवातिप्रसङ्गः। किञ्च ज्ञानेऽपि न साक्षात्सम्बन्धः, इच्छातुल्ययोगक्षेमत्वादित्युक्तम् ॥ नित्येति॥ तस्या ज्ञानाजन्यत्वेन तद्व्यारकसम्बन्धासम्भवादिति भावः। न च नित्येच्छा मया नाङ्गीक्रियते, यैरपि तार्किकैरङ्गीक्रियते तैस्तत्र तत्कल्पनेऽपि जन्येच्छायां तदनङ्गीकार इति वाच्यम्। त्वयापि नित्येश्वरेच्छाया अवश्यमङ्गीकर्तव्यत्वात्। अन्यथा ज्ञानमपि नाङ्गीकर्तव्यम्। श्रुत्यादिसिद्धत्वाविशेषात्। अस्ति हि ज्ञानवदिच्छाप्रतिपादिका श्रुतिः। सोऽकामयत, स द्वितीयमैच्छत्, इत्यादिका। तार्किकैरप्येकत्र सम्बन्धकल्पने एकत्र निर्णीत इति न्यायात् जन्येच्छायामपि स एव स्वीकर्तव्यो न परम्परासम्बन्ध इति प्रसङ्गादिति ॥ पुत्रादीति॥ तद्विषयत्वं पुत्रादिविषयत्वमित्यर्थः।

ननु वैषम्यं ज्ञानस्य जनकत्वेऽपि इच्छादावेव विशेषणत्व प्रतीतिः न तु सुखादौ। वस्तुस्वाभाव्यात्। त्वयाप्यस्यैवार्थस्य वक्तव्यत्वात्। अन्यथा स्फटिके जपाकुसुमसन्निधानाल्लौहित्यवत् लोष्टेऽपि तदापद्येतेति चेन्न। एवं वदता स्वभावः प्रयोजक इति वक्तव्यम्। तथाचेश्वरेच्छादाविव स्वभावादेव विषयत्वोपपत्तौ परम्परासंबंधो न प्रयोजकः। किञ्च तज्ज्ञानजन्यत्वमेव तद्विषयत्वम् इत्यङ्गीक्रियते उत तज्ज्ञानजन्यत्वेन तद्भवतीति? आद्ये पुत्रादीत्येवोत्तरम्। न द्वितीयः। विषयत्वस्य स्वाभाविकत्वेन तज्ज्ञानजन्यत्वेन तदुत्पत्त्यभावात्। ईश्वरेच्छादौ तदभावेऽपि विषयत्वस्य दर्शनादज्ञानस्याज्ञेयेन ब्रह्मणेति दृष्टान्तमुपपादयितुमाह॥ अज्ञानस्य चेति॥ अज्ञानस्य च सविषयत्वमवश्यमङ्गीकर्तव्यम्। अस्यात्राज्ञानमिति प्रतीतेः। न च तज्ज्ञाननिवर्त्यत्वमेव तद्विषयत्वमिति वाच्यम्। तथासति तज्ज्ञाननिवर्त्यत्वमेव न स्यात्। तज्ज्ञाननिवर्त्यत्वे

व्यभिचारश्च। संबन्धिविप्रकर्षाभावस्य संबन्धिसन्निकर्षरूपतया तस्य च संबंधरूपतया यत्र सम्बन्धस्तत्र सम्बन्धिसम्बन्ध इत्यभेदेन प्रयोज्यप्रयोजकभावानुपपत्तिश्च। तथा च सम्बन्धिविप्रकर्षस्य सम्बन्धबाधकत्वाभावात् ज्ञानज्ञेययोः तात्विकसंबंधसिद्धिरिति।

उक्तानुमानेषु आध्यासिकसंबंधमादायार्थान्तरताशङ्कायाः पूर्वोक्तास्मदीयदूषणदुष्टत्वेऽपि तत्परिहारार्थमेवातिप्रसङ्गमाह॥ ध्वंसादेश्चेति॥ अत्र ब्रह्माश्रिताज्ञानमिति पक्षेऽज्ञानस्य ब्रह्मणाऽऽधाराधेयभावसंबन्ध इति परो ब्रूयात्तदर्थं जीवाश्रितेत्युक्तम्। ननु न वयं प्रतीयमानं प्रति योग्यनुयोगिभावादिकं सर्वथा निराकुर्मः। किन्तु तस्य मिथ्यात्वम्। ज्ञेयकोटि निक्षिप्तत्वादिति चेत् तर्हि प्रतीयमानत्वादेव विषयविषयिभावोऽपि स्वीकर्तव्यः। न हि घटस्याभाव इति प्रतीतितो घटस्य ज्ञानमिति प्रतीतेर्विशेषोऽनुभूयते। न चाध्यासिकसंबन्धेनैवोक्तप्रतीतिनिर्वाहः क्वचिद् दृष्टचरः। आध्यासिकसम्बन्धस्थलेऽपि शुक्ते रजतमिति प्रतीतेरदर्शनात्। अन्यथा प्रति योग्यनुयोगिभावादिस्थलेऽपि आध्यासिकसंबंधेनैवोपपत्तिरस्तु। अर्धजरतीयायोगात्। तत्र सम्बन्धान्तरमङ्गीकृत्यात्रानङ्गीकारे बीजाभावात्। तथाच व्याहत्यादि दुर्वारम्। यच्च प्रतियोग्यनुयोगिभावादेर्मिथ्यात्वं ज्ञेयकोटिनिक्षिप्तत्वादिति तदतिस्थवीयः। न ह्यद्यापि ज्ञेयस्य मिथ्यात्वं सिद्धम्। दृग्दृश्यसंबन्धानुपपत्या तत्सिद्धौ चक्रकापातात्। दृग्दृश्ययोः सम्बन्धान्तरानुपपत्तौ ज्ञेयमिथ्यात्वसिद्धिः। ततस्तन्निक्षिप्तत्वात्प्रतियोग्यनुयोगिभावादेर्मिथ्यात्वसिद्धिः। ततश्च दृग्दृश्ययोस्तात्विकसम्बन्धान्तरानुपपत्तिरिति दिक्।

ननु प्रतियोग्यादयोऽप्यभावादावध्यस्ता एव। तथाचाध्यासिकसंबंधस्य सर्वत्राङ्गीकारान्न स्वव्याहत्यादीत्यत आह ॥न हीति॥ तथात्वे ज्ञानवत् ध्वंसादिकमपि सत्यं स्यात्। तथाच सद्द्वैतमतक्षतिरिति भावः। एतेन खण्डनोक्तमपि निरस्तमित्याह– एतेनेति॥ बाधे व्यापकानुपलब्धिरूपे अदृढे सति। अन्यसाम्यात् उदाहरणान्तरसाम्यात् बाधे दृढे अन्यदपि बाध्यताम्। तत्र हेतुः – न ममत्वमिति॥ पक्षपाताभावादित्यर्थः। एतेनेति परामृष्टं हेतुं दर्शयति – स्वव्याहतस्येति॥ व्यापकानुपलब्धिबाधाभावस्य पूर्वमुपपादितत्वात् स्वव्याहतिरूपप्रतिकूलतर्कपराहतेश्च न्यायस्यादृढत्वमेवेति भावः। स्वव्याहतमपि चेद्भूषणं स्यात्तर्हि जातिवादिना जितमित्याह - अन्यथेति॥ ननु जातिवादिना नियमसापेक्षानित्यत्वसाधककृतकत्वादौ नियमानपेक्षदर्शनमात्रेण रूपवत्त्वादिकमापाद्यते। न ह्यस्माभिस्तथा नियमानपेक्षसाहचर्यमात्रेण किञ्चिदापाद्यते। तथाच कथं जातिवादित्वमिति चेन्न। व्याप्यादेर्मिथ्यात्वाङ्गीकारे तदनपेक्षाया अविशेषात्। स्वव्याहत्यादिना जातिवादित्वसाम्याच्च। न हि व्याप्यनङ्गीकारमात्रेणैव जातित्वम्। किन्तु स्वव्याहत्यादिनैव। व्याप्याद्यनपेक्षा च स्वव्याहत्यादेरुपपादिका। अतो जातिवादित्वं दुर्वारम्॥ ज्ञान इति॥ ननु सम्बन्धानुभवस्य ज्ञानद्वारकसम्बन्धेनाप्युपपत्तेरतिरिक्तसम्बन्धकल्पने मानाभावः। न च तदन्यसम्बन्धस्याप्यनुभवात्तदङ्गीकारः। ज्ञानाधीनसम्बन्धाननुभवात्। न च ज्ञानेऽपि सन्निकर्षादिनैव संबंधानुभवोपपत्तेरतिरिक्तसंबंधो न स्यादिति वाच्यम्। इंद्रियसन्निकर्षादीनामतीन्द्रियत्वेन तेषामनुमित्यादिनोपस्थितिं विनैव घटज्ञानं पटज्ञानमित्याद्यनुभवात् साक्षात् संबंधोऽपीति चेन्मैवम्। इच्छायामतिरिक्तसंबंधस्यावश्यकत्वात्। तत्रापि ज्ञानाधीनसंबंधस्य जनकभावरूपत्वेन शक्तिरेव जनकत्वमित्यावयोर्मतत्वेन तस्याप्यतीन्द्रियत्वेन तस्यानुमित्यादिनोपस्थितिं विनैव

सम्बन्धस्तात्त्विकः कल्पितो वा? नाद्यः। त्वयानङ्गीकारात्। अङ्गीकारेऽपसिद्धान्तात्। न द्वितीयः। प्रमाणविषयतयाऽर्थे साध्यमाने कल्पितेनार्थान्तरशङ्कायाः काप्यदर्शनात्। अन्यथा मिथ्यात्व स्वप्रकाशत्वानुमानादिष्वपि कल्पितमिथ्यात्वादिना सिद्धसाधनार्थान्तरत्वाद्यन्यतरापातात्।

किञ्च तात्विकसम्बन्धबाधे कल्पितसम्बन्धकल्पनम्। न च तद्बाधकं प्रकृतेऽस्तीति वक्ष्यते। तथापि गोमांश्चैत्र इत्यादौ हेतुसत्त्वेऽपि साध्यासत्त्वाद्व्यभिचार इत्यत आह ॥ गोमांश्चैत्र इति॥ तथाच तस्यापि पक्षत्वान्न व्यभिचारः। न हि पक्षे व्यभिचारः। तथात्वे अनुमानमात्रोच्छेदः स्यादिति भावः। नन्वनेकसम्बन्धाङ्गीकारः प्रामाणिकासम्मत इत्यतो महाभाष्यकैयटसंमतिमाह ॥ उक्तं हीति॥ ननु संयोगः समवायश्चेति द्वावेव सम्बन्धाविति हि प्रक्रिया। तथाच कथमनेकसम्बन्धस्वीकार इत्यत आह ॥ प्रमितेति॥ तथाच तादृशप्रक्रियाया अप्रामाणिकत्वान्न तद्विरोध इति भावः। ननूक्तानुमानजातेन कथमतिरिक्तसम्बन्धसिद्धिस्तत्वे बाधकसद्भावादिति चेत् किं सम्बन्धद्वित्वमेव बाधकं? सम्बन्ध्यसत्त्वं वा? सम्बन्धिविप्रकर्षो वा? नाद्य इत्याह॥ न च सम्बन्धेति॥ अन्योन्येति॥ सम्बन्धद्वित्वसिद्धौ तद्बाधकादनेनातिरिक्तसम्बन्धाभावसिद्धिः। तत्सिद्धौ च सम्बन्धद्वित्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः॥ अन्यथेति॥ यद्यसिद्धमेव सम्बन्धद्वित्वमतिरिक्तसम्बन्धबाधकं स्यादित्यर्थः। न द्वितीयतृतीयावित्याह॥ नाप्यतीतादाविति॥ तस्येति॥ न च समवायेऽपि सम्बन्धिविप्रकर्षो बाधकः। तस्यापि देशकालविप्रकृष्टयोः सम्बन्धव्यवहाराप्रयोजकत्वादिति वाच्यम्। न हि देशकालविप्रकर्षमात्रेण सम्बन्धाभावः सिध्यति। तत्सत्वेऽपि तदङ्गीकारात्। तर्हि देशकालविप्रकर्षेऽपि सम्बन्धव्यवहारः स्यादिति वाच्यम्। न हि व्यवहर्तव्यमात्रसत्त्वं व्यवहारे प्रयोजकमतिप्रसङ्गात्। प्रकृते च सम्बन्धिविप्रकर्षस्य प्रतिबन्धकत्वेन तदभावरूपकारणाभावेन व्यवहाराभावोपपत्तेः। किञ्चातीतविप्रकृष्टपरोक्षज्ञानस्य ज्ञेयेन त्वयापि सम्बन्धः स्वीकर्तव्यः। न च तत्राऽध्यासिकसम्बन्धः सम्भवति। तथाच तत्र सम्बन्धिविप्रकर्षादिकं यथा न बाधकं तथा प्रकृतेऽपीति द्रष्टव्यम्। न चैवं समवायवत् सम्बन्धिविप्रकर्षो ज्ञानज्ञेययोः सम्बन्धव्यवहारे प्रतिबन्धकः स्यादिति वाच्यम्। प्रतिबन्धस्य फलबलकल्प्यत्वात्। अन्यथा अतीतस्य ज्ञानमित्यादि न व्यवह्रियेतेति॥ अन्यथेति॥ यद्यत्र सम्बन्धिविप्रकर्षो बाधक एवेत्युच्यते इत्यर्थः।

ननु अयुतसिद्धिर्न सम्बन्धबाधिका युतसिद्धेः सम्बन्धेन समव्याप्त्यभावेन सम्बन्धाप्रयोजकत्वात्। न हि यत्र युतसिद्धिस्तत्रावश्यं सम्बन्ध इति व्याप्तिरस्ति। न च यत्र सम्बन्धस्तत्र युतसिद्धिरिति विषमव्याप्तिरस्तीति वाच्यम्। तादृशव्याप्तिकल्पने मानाभावात्। संबंधिविप्रकर्णाभावश्च संबंधव्यापकः। संबंधिविप्रकर्षाभाववतां सर्वेषां संबंधदर्शनात्। तथाच संबंधिविप्रकर्षे सम्बन्धः कथं स्यात्। प्रयोजकाभावे प्रयोज्याभावनियमादिति चेन्न। प्रकृतेऽपि संबंधिविप्रकर्षाभावविशिष्टे युतसिद्धेः संबन्धसमव्याप्तत्वसम्भवात्। अयुतसिद्धेः संबन्धबाधकत्वं स्यादेव। किञ्च, यत्र सम्बन्धस्तत्र युतसिद्धिरिति व्याप्तेर्युतसिद्धेर्व्यापकत्वात्तन्निवृत्तौ सम्बन्धनिवृत्तिः स्यादेव। व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वात्। न च तादृव्याप्तौ मानाभावः, अनुकूलतर्काभावादिति वाच्यम्। निरुपाधिकसहचारभङ्गरूपानुकूलतर्कसम्भवेन व्याप्तेः प्रामाणिकत्वात्। प्रत्युत तवैव यत्र संबंधस्तत्र संबंधिविप्रकर्षाभाव इत्यत्रानुकूलतर्काभावात् व्याप्त्यभावः। अतीतादि ज्ञानज्ञेयभावादौ

तथाचाधिष्ठानीभूतशुद्धव्यक्तेरभावात् घटप्रकाश एव न स्यादिति भावः। ननु शुद्धव्यक्तिर्द्विविधा। मूलाज्ञाननिवृत्तिलक्षणा तूलाज्ञाननिवृत्तिलक्षणा च। तत्राद्यायाश्चरमसाक्षात्कारात्पूर्वमभावेऽपि द्वितीयायास्तदवस्थालक्षणतूलाज्ञाननिवृत्तेः सत्त्वात् तावन्मात्रेण घटादि प्रकाशोपपत्तिरिति चेन्मैवम्। मूलाज्ञान तदवस्थालक्षणमज्ञानमेकमुत भिन्नम्? नाद्यः। उभयोरभेदे एकसत्त्वे परापगमासम्भवात्। न चोपादानोपादेयभावादुपपत्तिः। अज्ञानस्यानादित्वाङ्गीकारात्। द्वितीये तदवस्थालक्षणाज्ञानं मूलाज्ञानं च प्रत्येकं शुद्धावरकं न वा? नेति पक्षे सर्वदा प्रकाशः। आद्ये एकावरणापगमेऽपि द्वितीयावरणसत्त्वात् भित्तिद्वयव्यवहितघटस्यैकभित्त्यपगमेऽपि भित्त्यन्तरस्य सत्त्वादप्रकाशवत् एकावरकापगमेऽपि आवरकान्तरस्य सत्त्वाच्छुद्धाभिव्यक्तिरेव नेति पुनर्घटप्रकाश एव स्यात्। अन्यथाऽदृष्टकल्पनापातात्। अदृष्टकल्पनाविशेषे आवरणानभिभवेऽप्यभिव्यक्तिरिति कल्पनीयं स्यादिति। नान्त्य इत्याह। अभिव्यक्तस्येति॥ ननु तत्तदाकारवृत्त्या आवरणीभूताज्ञानस्यापसरणं वा तत्प्रकाशप्रतिबन्धाक्षमत्वादिकं वा क्रियते। तावन्मात्रेणाभिव्यक्तं शुद्धं घटप्रकाशकम्। चरमवृत्त्या तु तन्निवृत्तिरेवेति नोक्तदोष इत्यरुचेराह ॥किञ्चेति॥ घटप्रकाशिकाया इति॥ मिथ्याभूतस्याप्यधिष्ठानत्वेऽधिष्ठानत्वान्यथानुपपत्त्या ब्रह्मसत्त्वं न स्यादिति भावः ॥स्वल्पत्व इति॥ ननु दोषाजन्यत्वं न प्रमात्वप्रयोजकम्। चैतन्यस्य सर्वत्र दोषाजन्यत्वात्। किन्तु दोषाजन्यवृत्त्यवच्छिन्नत्वम्। प्रकृते च तदभावान्न विषयस्य सत्यत्वम्। अतो मिथ्याभूतविषयं प्रति अधिष्ठानत्वं सत्याया दृशो युक्तमिति चेन्न प्रकाशकस्य ज्ञानस्य प्रमात्वे दोषाजन्यत्त्यमेव प्रयोजकम्। न दोषाजन्यवृत्यवच्छिन्नत्वम्। तथात्वे चरमवृत्तेः प्रमात्वं न स्यात्। तस्या दोषाजन्यवृत्त्यवच्छिन्नत्वाभावात्। न च तत्रापि चैतन्यस्यैव प्रमात्वम्, न वृत्तेरिति वाच्यम्। चरमवृत्त्या चैतन्यस्याभिव्यक्तयनङ्गीकारात्। अङ्गीकारे च तद्वदत्रापि चैतन्यस्यैव प्रमात्वोपपत्तेः। न चात्र वृत्तेर्दोषजन्यत्वमिति वाच्यम्। क्लृप्तदोषाभावात्। तदभावेऽप्यक्लृप्तकल्पने चरमवृत्तावपि कल्पना स्यात्। न च चैतन्यमात्रस्य सर्वत्र दोषाजन्यत्वात् तद्विषयस्य शुक्तिरजतस्य सत्यत्वं स्यादिति वाच्यम्। तत्र चैतन्यमात्रस्य प्रकाशकत्वानभ्युपगमात्। अविद्यावृत्तिप्रतिबिम्बितस्यैव प्रकाशकत्वात्। तस्य च दोषजन्यत्वनियमात्। न च प्रकृतेऽप्यन्तःकरणवृत्त्यवच्छिन्नस्य वा, तत्प्रतिबिम्बितस्य वा प्रकाशकत्वमिति वाच्यम्। आध्यासिकसम्बन्धस्यातन्त्रत्वप्रसङ्गेन निरस्तत्वादिति दिक्।

ननु प्रमाणाभावात् कथं तदङ्गीकार इत्यतस्तत्र प्रमाणमाह ॥अभाववदिति॥ तत्र संयोगसमवायाभ्यामर्थान्तरतावारणाय परस्परेति पक्षे विशेषणम्। हेतौ विशिष्टपदं निर्विकल्पकाभ्युपगन्तृन्यायमतानुसारेण। अतो न तस्यास्मन्मते व्यर्थत्वमिति भावः॥ उक्तेति॥ अत्र पक्षहेत्वोः प्रत्यक्षेति विशेषणं देयम्। तेन न परोक्षबुद्धौ बाधो व्यभिचारो वेति द्रष्टव्यम्। नन्वत्र द्वितीयानुमाने अबाधितत्वं हेतावसिद्धम्। तृतीये साध्ये अबाधितत्वं आब्रह्मज्ञानं, सर्वथा वा? आद्ये सिद्धसाधनम्। आध्यासिकसम्बन्धस्याब्रह्मज्ञानमबाधात्। द्वितीये दृष्टान्ते साध्यसाधनवैकल्ये। पक्षे च बाधस्वरूपासिद्धी इति चेत्, न। अन्त्यपक्षस्यैवाश्रयणात्। न च पूर्वोक्तदोषः। बाधो हि सप्रकारेण वा निष्प्रकारेण वा? नाद्यः। त्वयाऽनङ्गीकारात्। न द्वितीयः। तदबाधकत्वस्य पूर्वमुपपादितत्वात्। तथाच यावद्विशेषाभावे बाधसामान्याभावः सिद्धो भवतीति कथमसिद्धत्वम्। न चानुमानद्वये आध्यासिकसम्बन्धेनार्थान्तरम्। तस्याप्रामाणिकत्वेन तेनार्थान्तरत्वानवकाशात्। किञ्चाऽध्यासिक

नाऽध्यासिकसम्बन्धः स्वीकर्तव्य इति भावः। न च प्रकाशकस्य साक्षात् स्वसंसृष्टप्रकाशकत्वनियमात् चैतन्यस्य परम्परासम्बन्धेन न विषयप्रकाशकत्वम्। न हि दीपः परम्परासम्बद्धं प्रकाशयतीति वाच्यम्। अस्त्वेवं साक्षात् सम्बन्ध एव प्रयोजक इति। तावतापि न तस्याध्यासिकत्वं सिध्यति। सत्यत्वेऽपि विषयप्रदीपयोरिवान्यस्यैव साक्षात्सम्बन्धस्य सम्भवात्। यथा चैतत् तथाऽग्रे स्फुटम्। किञ्च यत्र परम्परासम्बन्धस्यातिप्रसञ्जकत्वं तत्र साक्षात्सम्बन्धः स्वीकर्तव्यः। प्रकृते तु तत्तत्सन्निकर्षजन्यतत्तदाकारवृत्तिरूपपरम्परासम्बन्धे नातिप्रसङ्गः। तथाच परम्परासम्बन्धेन प्रकाशे किमाध्यासिकेन। न च प्रदीपादौ साक्षात्सम्बन्धेन प्रकाशकत्वं दृष्टमित्यन्यत्रापि तथा कल्पनीयमिति वाच्यम्। तथात्वे प्रदीपादौ संयोगेनैव प्रकाशकत्वं दृष्टमित्यन्यत्रापि तत्कल्पना स्यात्। तस्मादनतिप्रसञ्जकसम्बन्धः प्रकाशे तन्त्रमिति क्वचित् साक्षात्, क्वचिच्च परम्परेति न कश्चिद्विशेषः। अन्यथा ज्ञानेन स्ववृत्त्यप्रामाण्यादिकमपि प्रकाशेत। तेनापि समं साक्षात्सम्बन्धसत्त्वात्। तस्मादेतत् दुर्व्यसनम्।

ननु तत्तदर्थानां तत्तज्ज्ञानेऽध्यस्तत्वादाध्यासिकः सम्बन्धः प्रयोजक इत्यभ्युपेयते इत्यत आह॥ न हीति॥ तथाच सति विज्ञानवादिमतप्रवेशः स्यादिति भावः। प्रकाशकताप्रयोजकत्वं चास्य नोपपद्यते। तथाहि – किं त्वन्मते शुद्धदृशः प्रकाशकत्वं, उपाधिविशिष्टाया अथ तदुपलक्षितायाः? नाद्य इत्याह॥ शुद्धदृश इति॥ तथाच सति सर्वं प्रति सर्वदा सर्वं प्रकाशः स्यादित्यतिप्रसङ्ग एवेति भावः। न द्वितीय इत्याह ॥उपाधि विशिष्टाया इति॥ तथाचाध्यासिकसम्बन्धस्यातन्त्रत्वापातादिति भावः। विशिष्टस्य मिथ्यात्वात् प्रकाशकत्वायोग इत्यपि द्रष्टव्यम्। न तृतीय इत्याह॥ उपाध्युपलक्षिताया इति॥ तथाच पूर्वोक्तएवातिप्रसङ्ग इति भावः। ननूपलक्षणभेदेनोपलक्ष्यभेदो भविष्यतीत्यत आह ॥कथञ्चिदिति॥ उपलक्षणभेदस्य नोपलक्ष्यभेदप्रयोजकत्वम्। अन्यथा जन्मादिकारणत्वादीनामुपलक्षणानां भेदात् ब्रह्मणोऽपि भेदप्रसङ्ग इति कथञ्चिच्छब्दाभिप्रायः। तथाचाध्यासिकसम्बन्धस्याति प्रसञ्ज्क्वाद्वृत्तिद्वारकसम्बन्धस्य तदभावात् स एव प्रकाशकत्वे तन्त्रमिति भावः॥ आध्यासिकसम्बन्धस्येति॥ प्रतिबिम्बितस्य विशिष्टत्वेनाधिष्ठानत्वाभावात् अन्योन्याश्रयाच्चेति भावः॥ आवश्यकेनेति॥ न च परोक्षविवेकेन स्फुटतरव्यवहारार्थमधिष्ठानचैतन्याभिव्यक्तिकल्पनेति वाच्यम्। तदभावेऽपि तत्तत्सन्निकृष्टेन्द्रिय जन्यतत्तदाकारवृत्तिप्रतिबिम्बितचैतन्यसम्बन्धमात्रेण तादृशव्यवहारोपपत्तेः। न हि परोक्षस्थले वृत्तिप्रतिबिम्बितचैतन्यसम्बन्धोऽस्ति। अन्यथा तेनाधिष्ठानचैतन्याभिव्यक्तौ तदभेदेनाभिव्यक्तस्य विषयस्यापरोक्षत्वापातादिति।

ननु चैतन्यप्रतिबिंबमात्रेण न स्फुटतरापरोक्षव्यवहारः। प्रतिबिंबितस्य मिथ्यात्वेनापरोक्षैकरसत्वाभावात्। किन्त्वभिव्यक्ताधिष्ठानचैतन्यसम्बन्धेन। तस्य सत्यत्वेनापरोक्षैकरसत्वात्। तथाचाधिष्ठानचैतन्याभिव्यक्तिरवश्यं कल्पनीयैवेत्यरुचेराह ॥किञ्चेति॥ घटं प्रति किं शुद्धं चैतन्यमधिष्ठानम्? किं वा घटावाच्छिन्नचैतन्यम्? आद्य आह॥ घटाधिष्ठानचैतन्यस्येति॥ यदि चरमसाक्षात्कारात् पूर्वं शुद्धस्य व्यक्तिरङ्गीक्रियते तदा शुद्धाभिव्यक्तेरेव मोक्षहेतुत्वात् तस्याश्च जातत्वात् श्रवणादिवैयर्थ्यम्। तस्माच्च शुद्धव्यक्तिः।

ज्ञातता वक्तुं न शक्यत इति भावः। ॥कलधौतमलादेरिति॥ यद्यपि कलधौतमलादौ हानबुद्धिर्न कलधौतमलज्ञानसाध्या। तद्धानबुद्धेस्तदनिष्टसाधनतानुमितिसाध्यत्वात्। तद्बुद्धौ च कलधौतमलस्य पक्षत्वेन विषयत्वादिष्टापादनम्। तथापि कलधौतमलस्य पक्षत्वे विशेषणीभूतकलधौतस्यापि पक्षत्वात् तज्ज्ञानस्यापि परम्परया कलधौतमलहानादिबुद्धिजनकत्वात् तद्विषयत्वापादनमिति नेष्टापत्तिरिति भावः। ॥तयोरिति॥ न चाभिज्ञापलपनयोरपि विषयविषयिभावेन ज्ञेयनिष्ठत्वादिदमयुक्तमिति वाच्यम्। विषयत्वस्यैव निर्वक्तव्यत्वेनात्माश्रयात्। न च विषयत्वस्य प्रवेशो न तत्त्वेन, किन्त्वाधारत्वेनैवेति नात्माश्रय इति। आधारत्वस्य प्रकृते विषयत्व एव पर्यवसानेनात्माश्रयापरिहारादिति भावः ॥न द्वितीय इति॥ हानादिबुद्धीनामिष्टसाधनतादिज्ञानसाध्यत्वादिति भावः॥ गोचरताया इति॥ तथा चात्माश्रय इति भावः॥ ईश्वरस्येति॥ कर्मत्वस्य कर्मकारकतया जनकत्वस्य विवक्षित्वादिति भावः योग्यतायामिति॥ व्यवहारादियोग्योऽयमिति ज्ञाने विषयभूतायां योग्यतायां सैव योग्यता उत योग्यतान्तरम्। आद्ये आत्माश्रयात्। सैव स्वनिर्वाहिका अभिधेयत्वे अभिधेयत्ववदिति चेत् योग्यातावच्छेदकापरिचयेन योग्यत्वस्यैव ज्ञातुमशक्यत्वात्। द्वितीयेऽनवस्थापत्तेरिति भावः। ॥नित्येति॥ अनादीत्यपि बोध्यम्। न च जन्यज्ञानविषयत्वस्यैवेदं लक्षणमिति नातिव्याप्तिरिति वाच्यम्। सामान्येन विषयत्वमात्रजिज्ञासायां विशेषलक्षणाभिधानस्यार्थान्तरग्रस्तत्वात्।

॥संविद इति॥ न च संविदोविषयत्वेऽर्थस्य कथं विषयित्वम्। न ह्यर्थं प्रति विषयत्वं ज्ञानस्य विवक्षितमिति वाच्यम्। ज्ञानस्य विषयत्वं न तावत् स्वं प्रति। एकस्य विषयत्वविषयित्वयोर्विरोधात्। नाप्यन्यं प्रति। तस्मिन्नर्थभाननियमाभावात्। अतः परिशेषादर्थं प्रत्येव विषयत्वमित्यर्थस्य विषयित्वमित्यभिप्रायेण दूषणाभिधानमिति भावः ॥भासमानताया इति॥ तथाचात्माश्रय इत्यर्थः। न च भासमानत्वं व्यवह्रियमाणत्वं विवक्षितमिति नोक्तदोष इति वाच्यम्। व्यवह्रियमाणत्वस्यापि व्यवहारविषयत्वरूपत्वेनात्माश्रयात्। न च तद्योग्यत्वं तत्। तदवच्छेदकापरिचयेन तस्य दुर्ज्ञानत्वादिति भावः। ॥मत्समवेतमिति॥ इत्यत्रेत्यस्य अवच्छेदकस्येत्यनेनान्वयः। तथाचायमर्थः – रूपज्ञानात्मसमवायस्य घटो रूपवानिति ज्ञानविषयत्वं स्यात्। तस्य रूपज्ञानं प्रति संबंधान्तरं विनैवावच्छेदकत्वात् कथं तस्यावच्छेदकत्वमित्यत उक्तं॥ मत्समवेतमिति॥ अत्र हि मत्समवेतमित्यनेनान्यसमवेतरूपज्ञानाद्रूपज्ञानं व्यावर्त्यते। अवच्छेदकत्वस्यैव व्यावर्तकत्वात्। तथाचैवं विधविषयत्वलक्षणे रूपज्ञानात्मसमवायेऽतिव्याप्तिरिति। उपसंहरति॥ तस्मादिति॥ एतावता परस्य किमभिमतम्? किं चैतन्यमेव प्रकाशकं, वृत्तिरपीति वा। आद्ये परोक्षार्थप्रकाशो न स्यात्। तत्र चैतन्यस्यानभिव्यक्तत्वेनाप्रकाशकत्वात्। द्वितीये वृत्तिः सम्बद्धा प्रकाशिका असम्बद्धा वा? अन्त्येऽतिप्रसङ्गः। आद्ये वृत्त्या समं आध्यासिक एव वा संबंधः? अन्यो वा? नाद्योऽनङ्गीकारात्। न द्वितीयस्तदभावात्। भावे वा तेनैव सत्यत्वेऽपि दृश्यत्वोपपत्त्याऽनुकूलतर्काभावात्। अस्तु वा चैतन्यमेव प्रकाशकम्। तथापि विषयप्रकाशे आध्यासिक एव संबंधस्तन्त्रमन्यो वा? नाद्यः। आध्यासिकसंबंधस्य दृश्यमात्रसाधारणत्वेन सर्वस्य सर्वदा सर्वं प्रति प्रकाशापत्तेः। अतो द्वितीय एवाङ्गीकर्तव्य इत्याह – सर्वस्यापीति॥ तथाच चैतन्यसम्बन्धमात्रं न प्रकाशकम्। किन्त्वनावृततत्सम्बन्धः। एवञ्चावरणाभिभवप्रयोजकसम्बन्धेनैव प्रकाशोपपत्तौ तदर्थं

न्यायामृतकण्टकोद्धारः

॥ अत्र केचिदिति॥ अत्र केचिन्मायिभिक्षवः आत्मख्यातिवादिभिरुक्तं ग्राह्यविषयाभावलक्षणं तर्कं भिक्षित्वाऽऽहुरित्यन्वयः। कीदृशस्तर्क इत्यत उक्तम्। अन्यच्चेदिति। अस्यार्थः – नीलं नीलशब्दोपलक्षितो विषयः संविदोऽन्यच्चेत् ज्ञानादन्यश्चेत् तत् तर्हि तच्चीलशब्दोपलक्षितो विषय संविदि न भासेत न प्रकाशेत। संबंधं विना अन्यस्मिन् अन्यप्रकाशे काश्मीरस्थेन दीपेन केरलदेशस्थोऽपि प्रकाशेतेति। यद्येवमपि भासेत तदैकस्मिन् सर्वमपि प्रकाशेत नियामकसंबंधाभावादित्यतिप्रसंगात् नीलशब्दोपलक्षितविषयसंविदोराध्यासिक एव नियामकसंबंधः स्वीकर्तव्यः। संबंधान्तरानुपपत्तेरिति संबंधांतरानुपपत्तिपूर्वकं तर्कं वक्तुमुपोद्घातमाह॥ दृश्यत्वस्येति॥ अतिप्रसंगादिति। उक्तातिप्रसंगादित्यर्थः। आत्मगुणस्येति॥ अत्र गुणत्वात् ज्ञानस्य विषयेण संयोगो न संभवति। द्रव्ययोरेव संयोगात्। आत्मातिरिक्तविषयेण समवायो न संभवति। यो यस्य गुणस्तस्य तेन समवायात्। समवायस्य प्रकाशताप्रयोजकत्वे घटज्ञानमात्मप्रकाशकं स्यादित्यपि द्रष्टव्यम्॥ अन्यस्य चेति॥ संयोगसमवायादन्यस्येत्यर्थः। ननु विषयविषयिभावस्योक्तसंबंधद्वयातिरिक्तस्य संबंधस्य सत्त्वादयुक्तमेतदित्यत आह ॥ विषयेति॥ अद्विष्ठत्वेनेति॥ विषयत्वस्य विषयमात्रनिष्ठत्वात् विषयित्वस्य ज्ञानमात्रनिष्ठत्वात् उभयाश्रितत्वाभावादद्विष्ठत्वम्। संबंधिद्वयाश्रितस्तदतिरिक्तः स्वयमेक एवेत्यस्य तल्लक्षणत्वादिति भावः। ननूभयसंबंधिनिरूप्यत्वं संबंधसामान्यलक्षणमस्तु। नतूक्तविशेषणघटितम्। तस्य च सत्त्वादित्यत आह ॥ दुर्निरूपत्वाच्चेति॥ विषयत्वस्येति शेषः ॥ ज्ञानजन्येति॥ अत्र कर्तुरन्यत्वे सतीति विशेषणम्। तेन ज्ञानजन्येच्छाधारत्वेनात्मनि नातिव्याप्तिरिति द्रष्टव्यम्। यद्वा, ज्ञानत्वावच्छिन्नजन्यत्वं विवक्षितम्। इष्टसाधनज्ञानजन्येच्छायां ज्ञानत्वावच्छिन्नजन्यत्वाभावात् तामादाय नातिव्याप्तिरिति॥ ज्ञानजन्यहानादीति॥ अत्र ज्ञानजन्यहानाद्यन्यतरबुद्धिगोचरत्वमित्यर्थः। तेनैकैकगोचरे त्रितयगोचरत्वाभावान्नासंभव इति द्रष्टव्यम्। ॥ ज्ञानकर्मत्वं वेति॥ अत्र कर्मत्वं कर्मकारकतया जनकत्वम्। न तु तज्जन्यफलशालित्वम्। अतो न प्रथमाभेदः कर्मत्वप्रवेशेन तज्जन्यफलाश्रयत्वप्राप्तावपि प्रकृते तादृशकर्मकारकतया जनकत्वरूपत्वेन विवक्षणान्न प्रथमाभेदः। अत एवैतत्पक्षनिराकरणावसरे कर्मकारकाजन्यत्वादिति वक्ष्यतीति भावः॥ यत्संन्निकृष्टेति॥ न चेन्द्रियसन्निकृष्टविषयेण जन्यज्ञाने इंद्रियादेरपि विषयत्वं स्यादिति वाच्यम्। ज्ञाने विषयस्य कारणत्वाभावात्। विषयाभावेऽपि अनुमानादिना ज्ञानजननात्। न च विषयाभावेऽनुमानादेः करणस्य तत्सन्निकर्षानुपपत्तिरिति वाच्यम्। सन्निकर्षमात्रे संबंधिद्वयानपेक्षणात्। अत एव प्रतियोग्यनुयोग्यादिः सन्निकर्ष इति सर्व एव सम्प्रदायविदः आहुरिति भावः ॥ अनंगीकारात्॥ मायावादितत्त्ववादिभ्यामिति शेषः। तथाच तद्घटितत्वे उभयासिद्धिरिति भावः।

ननु भट्टमतानुसारिणा मायावादिना ज्ञाततोऽङ्गीक्रियत एवेत्यत आह ॥ अतीतादाविति॥ ननु कार्यकारणयोरभेदात् कार्याकारस्य नाशेऽपि कारणाकारस्य विद्यमानत्वात् तदाश्रिता ज्ञातता भविष्यतीति चेन्न। न हि कारणाकारज्ञानेन कार्याकारो ज्ञात इति व्यवहारः। किन्तु कार्याकारज्ञानेन। तथाच यदाकारज्ञानानन्तरं ज्ञातता प्रतीयते तदाकारनिष्ठा ज्ञातता वक्तव्या। कार्याकारस्य च नष्टत्वेन तदाश्रिता

विशिष्टप्रतीतिजननापत्तेः। किं च विशिष्टप्रतीति जननयोग्यत्वं धर्मो वा संबंधः तादृशस्वरूपद्वयमेव वा? आद्ये स्वरूपस्य संबंधत्वव्याघातः। प्रतीतिघटितस्यास्य चाक्षुषादिज्ञानागोचरत्वप्रसंगाच्च। द्वितीयेऽननुगमः। किं चैवमभावभ्रमानुपपत्तिः। तत्रापि विशिष्टप्रतीतिसंभवे स्वरूपसंबंधस्य सत्त्वात्। न च प्रमात्वघटितं तल्लक्षणम्। वास्तवसंबंधसत्वे प्रमात्वस्यापाद्यत्वात्। अन्यथा तत्र तस्याप्रमात्वे संबंधाभावः। तस्मिंश्च तस्याप्रामात्वमित्यन्योन्याश्रयादिति चेत्। मैवम्। संबंधांतरमंतरेण विशिष्टप्रतीतिजनन योग्यतावच्छेदकावच्छिन्नस्वरूपस्य संबंधत्वात्। संयोगत्वावच्छिन्नस्य दंडीत्यादौ संबंधत्ववत्। विशिष्टबुद्धिश्चावच्छेदकाविषयिण्येवावच्छेद्यसंबंधविषया। अतो न स्वरूपसंबंध गोचरविशिष्टबुद्धेश्चाक्षुषत्वनिरोधः। न च तर्ह्यभावप्रमाभ्रमयोः स्वरूपद्वयमात्रविषयत्वाविशेषात् भ्रमव्यवहारानुपपत्तिरिति वाच्यम्। घटाभाववति घटाभावज्ञानत्वेन तद्भिन्नज्ञानत्वेन च व्यवस्थोपपत्तेः। नन्वतिरिक्ताविषयत्वे तस्यैवानुपपत्तिः। न हि भवद्रीत्या तस्योभयात्मकत्वेन तदुभयसत्त्वेन व्यधिकरणप्रकारत्वरूपभ्रमस्यैवाभावे भ्रमतदन्यत्वाभ्यां व्यवस्था संभवतीति चेन्न। घटाभावाभावस्य घटत्वेन तद्वति घटाभावज्ञानस्य व्यधिकरणप्रकारत्वसंभवात्। किं च भ्रमस्य यद्वस्तुगत्या घटवत् स विषयः। न तु प्रमाया इत्यतिरिक्तविषयत्वमस्त्येव न चातींद्रियाभावेऽव्याप्तिः। अत्यंताभावे प्रतियोगिदेशान्यदेशत्वं; प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वं अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वं विशिष्टप्रत्ययजननयोग्यतावच्छेदकम्। तदवच्छिन्नत्वं च विशिष्टप्रतीत्यजनकेऽप्यतींद्रियाभावे सुलभम्। न ह्यरण्यस्थदंडो न घटजननस्वरूपयोग्य इति। ननु नित्यस्यातींद्रियस्याकाशात्यंता भावादेर्विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नत्वेऽवश्यं विशिष्टप्रत्ययजनकत्वप्रसंगः। नित्यस्य स्वरूपयोग्यस्य सहकारिसमवधाननियमादिति चेन्न। नियमासंमतेः। नित्यस्या न्यथाकरणसामर्थ्यस्य ईशसंबंधिनस्तथाविधेश्वरेच्छाविरहेण कार्यानुपधानदर्शनात्। न चाकार्याभावे तथाविधसामर्थ्यसत्त्वे मानाभावः। ऐश्वर्यस्यैव तत्र मानत्वात्। श्रूयते च सर्वस्य वशी सर्वस्येशान इति। तस्मादभावादाविव विषयेण स्वरूपसंबंध एव नत्वाध्यासिकः सः॥

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि ।
न्यायामृततरंगिण्यामध्यस्तत्वं न युक्तता ॥

श्री व्यासरामाचार्यविरचितायां
इति न्यायामृततरङ्गिण्यां प्रथमपरिच्छेदे
प्रथमोभागः

संबंधोऽस्तीत्यर्थः। नन्वेवं कूटलिंगज्ञानजन्यानुमितेः साध्यविषयकत्वं न स्यात्। तद्व्याप्तसंबंधाभावात्। तात्पर्यभ्रमावगतवाक्यार्थस्य चातत्परवाक्यज्ञानजन्यज्ञानं प्रति विषयत्वं न स्यात्। ननु यथा शुक्तौ रजतज्ञानं प्रति शुक्तेरेव विषयत्वं न तु रजतस्य तथोक्तस्थलेषु साध्यवत्त्वेन पक्षस्यैव संसृष्टत्वेन पदार्थानामेव च विषयत्वं न तु साध्यस्य संसर्गस्येति चेन्न। पक्षेण समं व्याप्तेः पदार्थैः समं तात्पर्यस्य चाभावात्। न ह्यसद्भ्यां तद्व्याप्ति तात्पर्याभ्यां तज्ज्ञानयोः सम्बन्धः सम्भवतीति चेन्न सर्वसामर्थ्यविकलस्याप्य सतोऽतीतादेरिव स्वज्ञानेनाभावादिना च संबंधस्यांगीकरणीयत्वात्। सार्वजनीनव्यवहारानुसारेण तथैव कल्पनस्योचितत्वात्। एवं धूलीपटलादौ जायमानस्य वह्निव्याप्तधूमभ्रमस्यासताऽपि तादृशधूमेन संबंधोऽस्त्येव। एवं तात्पर्येणाप्यसतो भ्रमस्य संबंधोऽस्तीति नोक्तदोषः। चक्षुरादेस्तु रजतेनासता संनिकर्षो न संभवतीति शुक्तौ रजतज्ञानं रजतविषयकमित्युच्यते। अनन्यगत्या ज्ञानादेरतीतादिनेवासता संबंधस्यांगीकारेऽपि नेंद्रियादीनामतीतादिनेवासता सः। अत्र मते असता ज्ञानसंबंधेऽपि न तस्य तद्विषयत्वमिति तस्यालक्ष्यत्वान्न तत्राव्याप्तिरिति सर्वमनवद्यम्। नन्वेवं व्यापकतावच्छेदकतत्संबंधपक्षव्यापकसंबंधानामनुमितौ स्मर्यमाणस्य स्मृतौ विषयत्वं न स्यादित्याशंकां परिहरति॥ एवमिति॥ यथा चैतत्तथावोचाम। संस्कारादेस्सन्निकर्षत्वाप्रसिद्धिं परिहरति॥ न हीति॥ किं त्विति॥ संयोगादेरादरणं प्रत्यासन्नत्वार्थम्। तच्च तत्तादेः संस्कारादिनाऽपि संभवतीत्यर्थः। यद्यप्युक्तलक्षणे लिंगज्ञानादेर्न प्रवेशस्तथापि करणशब्देन लिंगज्ञानादेर्न प्रवेशस्तथापि करणशब्देन लिंगज्ञानादेरपि परामर्शादस्ति चोद्यावकाशः। नित्यज्ञानविषयेऽव्याप्तिं परिहरति॥ इदं चेति॥ तस्यालक्ष्यत्वान्न तत्राव्याप्तिरित्यर्थः। जन्याजन्यज्ञानविषयसाधारणं लक्षणमाह॥ अथवेति॥ यथा श्रुतस्य पाकजरूपरहिते वज्रादावव्याप्तत्वेऽपि तादृशायाः पृथिवीत्वजातेस्तत्रापि सत्त्वेन नाव्याप्तिरित्यर्थः। तथा ज्ञानकारणं ये सन्निकर्षाः तैः समानाधिकरणो ज्ञानावच्छेदकत्वस्य साक्षाद्व्याप्यो यो धर्मः सत्त्वादिस्तदेव विषयत्वमित्यर्थकरणेन नित्यज्ञानविषयेऽपि जन्यज्ञानविषये तादृशसन्निकर्षेण समानाधिकरणो ज्ञानावच्छेदकत्वस्य साक्षाद्व्याप्यो धर्मोऽस्तीति न नित्यज्ञानविषये अव्याप्तिरित्यर्थः। अस्मिन्नपि पक्षे नासतो ज्ञानविषयत्वमिति ध्येयम्॥

इतीति॥ इतिकरणो नानुकूलतर्काभावोपपादनसमापनार्थः। तस्याग्रे समाप्स्यमानत्वात्। किंतु दिगर्थः। तथाहि दृग्दृश्ययोः स्वरूपसंबंध एवास्तु किमाध्यासिकसंबंधेनाकृष्टेन। ननु स्वरूपसंबंध इति कोर्थः। संबंधांतरमंतरेण विशिष्ट प्रत्ययजननयोग्यत्वं तदिति चेत् आत्मानं जानामीत्यादावव्याप्त्यापत्तेः। तत्र संबंधांतरस्य समवायस्य सत्त्वात्। अतींद्रिया भावादावव्याप्त्यापत्तेः। न हि तस्य विशिष्टप्रतीतिजननयोग्यत्वे मानमस्ति। अन्यथा तेन

जन्यज्ञानविषयस्य लक्षणमाह॥ अथवेति॥ यत्सन्निकृष्टेति॥ ज्ञानासाधारणकारणासाधारण कारणप्रतियोगिकसन्निकर्षाश्रयत्वम्। आश्रयत्वं च तादृशसन्निकर्षानुयोगित्वम्। तेन करणे नाति व्याप्तिः। आद्यस्य कारणांतरस्य प्रयोजनमाह॥ न चैवमिति॥ एवं लक्षणकरणे आकाशेऽति व्याप्तिर्नेत्यर्थः॥ हेतुत्वेनेति॥ कारणत्वस्य सन्निकर्षविशेषणत्वेन प्रथमत एवाभिधित्सितत्वादित्यर्थः। संपूर्णेऽपि दोषं शंकते॥ नन्विति॥ यद्यप्याद्य इष्टापत्तिः। तथापि तादृशलिंगधर्मिभावरूपकरण सन्निकर्षाश्रयत्वेन पक्षस्यैव विषयत्वं स्यात्, न लिंगिनः। तथा च तत्राव्याप्तिरित्यत्र तात्पर्यात्। अत एव क्वचित्पुस्तके एवकारो दृश्यते॥ अतीतादीति॥ तथा च कारणपदेनैवोक्तादोषवारणमिति भावः। कारणपदोपादानेनाप्यात्मन्यतिव्याप्तिर्नेत्याह॥ लिंगादीति॥ द्वितीयस्यासाधारणपदस्य प्रयोजनं वक्तुं शंकामुत्थापयति॥ नन्विति॥ असाधारणेति॥ आत्मन्यतिव्याप्तिवारणाय द्वितीयासाधारणपदस्य कारणविशेषण स्योपादानमित्यर्थः। प्रथमासाधारणपदप्रयोजनमाह॥ तर्हीति॥ सन्निकर्षस्यापीति॥ मनस्यतिव्याप्तिवारणाय प्रथमासाधारणपदं सन्निकर्षणविशेषणमित्यर्थः। न च चक्षुर्मनः संयोगस्यापि चाक्षुषज्ञानासाधारणकारणत्वादुक्तदोषतादवस्थ्यम् इति वाच्यम्। अर्थसन्निकर्षावच्छिन्ने मनः संयोगस्य कारणत्वेन चक्षुर्मनःसंयोगस्य हेतुत्वे एव मानाभावात्तदसाधारण्यस्य दूरापास्तत्वात्। एकेनैव कार्यकारणभावेनानतिप्रसंगे तत्तदिंद्रियमनःसंयोगरूपानेककारणतदवच्छेदककल्पने मानाभावाच्च। चालनीन्यायेन विनिगमनाविरहादर्थतत्सन्निकर्षादीनामपि हेतुत्वानपायाच्चेति वयमालोचयामः। ननु तत्संयोगतदाश्रयतत्समवायानामेव संयुक्तसमवायत्वाद्घ्राण्वादिसंयोगजन्ये वायुस्पर्शवायूप नीतसूक्ष्मगतगंधादिसाक्षात्कारे घ्राण्वादीनां विषयत्वापत्तिरिति चेत्। योग्यसंनिकर्षस्य हेतुत्वेन घ्राण्वादीनां संयोगस्य तत्स्पर्शादिग्रहे अहेतुत्वात्। साक्षादेव घ्राण्वादिस्पर्शादिना इंद्रियस्य संबंधसंभवाच्चेति दिक्।

प्रत्यभिज्ञाविषये तत्तायामव्याप्तिं परिहरति॥ प्रत्यभिज्ञायामिति॥ यथा च न तस्याः स्मृतित्वं तथाऽन्यतोऽवगंतव्यम्। सन्निकर्षत्वेनाभिमतस्य संयोगादेरभावात्। परोक्षज्ञाने अव्याप्तिं परिहरति॥ लिंगेति॥ तव्याप्तेति॥ तेन व्यापकतावच्छेदकावच्छिन्नेन पक्षसंबंधविशेषवता लिंगिना व्याप्तं यल्लिंगं तेन संबंधः। लिंगिलिंगज्ञानयोर्लिंगलिंगिव्याप्तिद्वारकः संबंधोऽस्तीत्यर्थः। व्यापकतावच्छेदकव्यापकसंबंधादीनामप्युक्तक्रमेण लिंगज्ञानेन संबंधोऽस्त्येव। तेन व्यापकतावच्छेदकादीनामनुमित्यविषयत्वापत्तिरिति दूषणमनवकाशं वेदितव्यम्॥ वाक्यज्ञानस्य चेति॥ वाक्यार्थेन चेति शेषः॥ वाक्यज्ञानस्य वाक्यार्थेन सह वाक्यवाक्यार्थतात्पर्यद्वारकः

अनुव्यवसायस्य च व्यवसायरूपं यज्ज्ञानं तदवच्छिन्नस्वभावत्वाच्चाव्याप्तिरिति शंकां परिहरति यद्यपीति॥ स्वग्राहकेति॥ स्वस्य ज्ञानविषयकानुमितेरनुव्यवसायस्य च यद्ग्राहकं ज्ञ तत्प्रति विषयभूतमित्यर्थः। एतेन तयोर्लक्ष्यत्वमुक्तम्॥ ज्ञानविषयकेति॥ अने ज्ञानावच्छिन्नस्वभावत्वं ज्ञानानुमित्यनुव्यवसाययोरुक्तम्। ज्ञानस्य विषयावच्छिन्नस्वभावत्वात् ज्ञानानुमित्यनुव्यवसाययोस्तु ज्ञानविषयकत्वादित्यर्थः॥ अनुमितीति॥ अनुमितिः अनुव्यवसायश्चेति विग्रहः। आदिशब्देन ज्ञानमस्तीत्यादिशब्दजन्यज्ञानपरिग्रहः। ज्ञानावच्छिन्नेति॥ विषयभूतेन ज्ञानेनावच्छिन्नस्वभावमित्यर्थः॥ स्वयमिति। ज्ञानविषयकानुमित्यनुव्यवसायादिकमित्यर्थः॥ यज्ज्ञानमिति॥ ज्ञानमनुमिनोमि घटज्ञानं निश्चिनोमि इत्यादिज्ञानं प्रतीत्यर्थः॥ तदवच्छिन्नेति॥ तेन ज्ञानानुमित्यनुव्यवसायेन घटज्ञाननिश्चयानुव्यवसायेन वेत्यर्थः। ननु मत्समवेतं रूपज्ञानमित्याकारक ज्ञानस्यात्मसमवायविषयत्वाभावप्रसंगः। आत्मसमवायस्य संबंधत्वेन संबंधिभूतज्ञाना वच्छिन्नत्वात्। घटस्य ज्ञानमिति प्रतीत्या घटावच्छिन्नस्वभावत्वं यथा ज्ञानस्य तथा ज्ञातो घट इति प्रतीत्या घटस्यापि ज्ञानावच्छिन्नस्वभावत्वेना संभवश्चेति चेन्न। आत्मसमवायस्य स्वविषयकज्ञानेन संबंधिभूतेनावच्छिन्नत्वेपि ज्ञानत्वेन न तदवच्छिन्नता। किं तु संयोगादिसाधारणसंबंधित्वेन दुःखादिसाधारणात्मसमवेतत्वेन वा। विषयस्तु न केनापि रूपेण ज्ञानावच्छिन्नस्वभावः। ज्ञातो घट इत्यादौ घटादेर्ज्ञानावच्छिन्नत्वेऽपि न तदवच्छिन्नस्वभावत्वम्। दंडी देवदत्त इत्यादौ दंडस्येव देवदत्ते ज्ञानस्यापि घटादौ विशेषणत्वमात्रत्वात्। ज्ञानं तु विषयावच्छिन्नस्वभावम्। विषयेण विना ज्ञानानिरूपणात्। ज्ञानमस्तीत्यादावपि सामान्यतो विषयो निरूपकोऽस्त्येव। न जानामीत्यज्ञाने विषयवत्। ज्ञानं विना तु विषयो निरूप्यत एव। घटोऽयं घटोयमित्यादि। एतदर्थमेव लक्षणे स्वभावपदमुपात्तमिति भावः॥ यज्ज्ञानमिति॥ यदीयत्वं यत्संबंधित्वम्। एतेन यदीयमिति तद्धितस्य यद्विषयकत्वार्थत्वे आत्माश्रयः। अर्थांतरस्य चाभाव इति निरस्तम्। वस्तुतो विषयत्वस्य संबंधत्वेनैव ज्ञेयत्वात्। न तु विषयत्वेनेति। स्वभावः स्वरूपम्। तथा च ज्ञानस्वरूपमेव ज्ञानस्यार्थेन सह संबंधः। सामान्यतश्च विषयिता ज्ञानस्वरूपम्। घटादिविषयता तु संबंधिना घटादिनानुगता ज्ञानविशेष एव संयोगविशेषा एव घटादीनां संबंधः। व्यवहारनिमित्तं च ज्ञाननिष्ठमर्थसंबंधित्वम्। नार्थनिष्ठं ज्ञानसंबंधित्वम्। अतीतानागतव्यवहारानुरोधादिति बोध्यम्। तदुक्तं बौद्धधिक्कारे। लक्ष्यस्तावदत्र विषयविषयिभावः। स च प्रकाशस्य सतस्तदीयतामात्रनिबंधनः स्वभावविशेषः। स्वभावत्वादेव च नोपकारांतरमपेक्षते। तन्मात्रीयत्वादेव च नान्यदीय इति।

इति चेन्न। शब्दरूपस्य तस्यासंबंधत्वात् संबंधत्वेनाप्रवेशाच्च॥ करणपाटवेति॥ एडमूकादीनां अभिलपनरूपव्यवहाराभावेऽपीत्यर्थः॥ अस्त्येवेति॥ तथा च न तत्राव्याप्तिरित्यर्थः। निर्विकल्पकानंगीकारेण तत्राव्याप्तिं परिहरति॥ कदापीति॥ कस्येति॥ लक्ष्यस्याननुगतत्वाल्लक्षणाननुगमो न दोष इत्यर्थः॥ न घटज्ञानमिति॥ भिन्नविषयतया घटज्ञानं पटव्यवहारे न हेतुरित्यर्थः। नन्वभिलपनरूपव्यवहारजननयोग्यत्वेन प्रातिस्विकरूपेण निर्णेयम्। अवच्छेदकत्वस्य फलनिर्णेयत्वात्। प्रतिस्वं च फलादर्शनात्। अजनितफले प्रातिस्विकयोग्यतायां मानाभावात्। किं तु तत्रानुगततत्तद्वृत्तिविषयत्वेन। तथा चात्माश्रय इति चेन्मैवम्। संशयादिभिन्नज्ञानत्वस्य योग्यतावच्छेदकत्वे अन्योन्याश्रयानवकाशात्। न चातिप्रसंगः। विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वादिति भावः॥ अत एवेति॥ योग्यत्वस्य विवक्षितत्वादित्यर्थः। तदेवोपपादयति॥ ज्ञानकर्मेति॥ ननु कर्मत्वस्य जनकत्वापरपर्यायकारकविशेषत्वात्तदतिक्रमदोष इत्यत आह॥ न हीति॥ पटमिति॥ तथा च तत्र द्वितीयाविभक्तिरनुपपन्ना स्यादित्यर्थः॥ सिद्धमिति॥ पटावयवादिकमित्यर्थः। ननु पटं करोतीत्यादौ सिद्धस्यैव तंत्वादेः कृतिकर्मता। व्यापार्यतया सिद्धस्यैव सर्वैः कृतिकर्मतांगीकारात्। अत एव निष्पादनावाचिधातुसमभिव्याहृतकर्मपदे शक्यावयवे निरूढलक्षणामाहुरसत्कार्यवादिनः। सत्कार्यवादिनां तु पूर्वं सतोऽप्यभिव्यंजनीयतया न कारकत्वकृतिकर्मत्वयोरनुपपत्तिरिति चेत् न। पटं करोतीत्यादौ अवयवव्यापार्यत्वातिरिक्तस्य पटीयकर्मत्वादेरननुभवात्। अत एव कृतेः सिद्धवृत्त्यसिद्धविषयत्वनियम इत्याहुः। अन्यथा स्वर्गं कुर्यादित्यादौ स्वर्गपदस्य तत्साधनयागलक्षणायामनन्वयः स्यात्। क्रियाधीन व्यवहारयोग्यत्वरूपातिशयवत्त्वेन पटं करोतीत्यादौ मुख्यप्रयोगोपपत्तौ निरूढलक्षणानाश्रयणाच्चेति भावः। अत्माश्रयपरिहारार्थं विषयसप्तमीभ्रमं निराकरोति॥ सति सप्तमीति॥ योग्यत्वं चेति॥ योग्यतावच्छेदकं चोक्तमिति नोक्तदोषः॥

अन्ये त्विति॥ एतस्य इत्याहुरित्यग्रेतनेन संबंधः॥ समवायवानिति॥ अत एव संबंधांतरं विनेत्यनुक्त्वा संबंधांतरमनपेक्ष्येत्येवोक्तमिति भावः। मत्समवेतं रूपज्ञानमित्यत्रात्मसमवायादीनां रूपज्ञानावच्छेदकत्वादिति पूर्वोक्तामतिव्याप्तिं परिहरति॥ यद्यपीति॥ तदवच्छिन्नस्वभावत्वमुपपादयति॥ संबंधेति॥ असंभवशंकां परिहरति॥ ज्ञानेति॥ स्वभावपदप्रयोजनमग्रे वक्ष्यते। ननु ज्ञानविषयकानुमितावनुव्यवसाये चाव्याप्तिः ज्ञानानुमितेरनुमित्यनुव्यवसायं प्रति, अनुव्यवसायस्य च स्वविषयकानुव्यवसायं प्रति विषयत्वेनास्ति लक्ष्यत्वम्। ज्ञानानुमितेः साध्यरूपं यत् ज्ञानं तदवच्छिन्नस्वभावत्वात्।

विषयत्वनिरुक्तिखंडनस्य प्रकृतानुपयुक्तत्वमुक्तमुपसंहरति॥ तस्मादिति॥ शब्दसाम्यादिति॥ निरुक्तौ खंडितायां निर्वचनाभावरूपमनिर्वचनीयत्वं सिध्यति। निरुक्तिविरहस्यानिर्वचनीयत्वस्य चैकार्थत्वात् शब्दसाम्यमिति भावः भ्रांतिमूलमिति॥ निरुक्तौ खंडितायां निर्वचनाभावरूपमनिर्वचनीयत्वं यद्यपि सिद्ध्यति तथापि सदसद्वैलक्षण्यरूपं तन्न सिद्ध्यति। निरुक्तिविरहेऽपि प्रतिपुरुषमुखवत् इक्षुक्षीरादिमाधुर्यवत् ब्रह्मवत् आनंदादिवत् सत्त्वसिद्धेः। एवं सत्यपि सदसद्वैलक्षण्यरूपानिर्वाच्यत्वसिध्यर्थं यन्निरुक्तिखंडनं कृतं तद्भ्रांतिमूलम्। भ्रांतौ कारणम्। अनिर्वाच्यनिरुक्तिविरहशब्दयोः एकार्थत्वरूपं शब्दसाम्यमित्यर्थः।

एतावता निर्वचनायोग्यत्वमभ्युपेत्य समाहितं वस्तुतस्तदपि नास्तीत्याह॥ न चेति॥ केषांचिदिति॥ निर्वचनेऽकुशलानामित्यर्थः। न हि त्वन्मतेऽपि मंदेनौपनिषदा पदेन भेदवादिनं प्रत्यैक्यं अशक्यनिरूपणमिति तन्निर्वचनायोग्यं भवति। अन्येनोपनिषदो रसेन सुनिरूपत्वात्। तथा ग्राह्यलक्षणमपीत्यर्थः॥ उक्तं हीति॥ बौद्धधिक्कारे हि जगतोऽनिर्वाच्यदूषणं प्रकृत्यैतदुक्तं परामर्शपाटवाभावेनाप्युपपत्तेः। न हि जात्यंधो नीलं ज्ञातुं निर्वक्तुं वा न शक्त इत्यज्ञेयानिर्वाच्यमेव तल्लोक इति। बौद्धधिक्कारस्थं वाक्यांतरमप्युदाहरति॥ दुरवगाहत्वेनेति॥ अर्थानुवादोऽयम्। तद्ग्रंथपाठस्तु न हि लक्षणापरिज्ञानमात्रेण स्पष्टदृष्टमपि लक्ष्यमपह्नोतुं शक्यते। अपरिज्ञानस्य तदुरवगाहत्वेनाप्युपपत्तेरिति। ननु केषांचिन्निर्वचनशक्तिरित्यनुपपन्नं, मम निर्वचनासामर्थ्येन सर्वेषामेव तत्राशक्तिसिद्धेरित्यत आह॥ न चेति॥ सर्वेषामिति शेषः। ग्राह्यलक्षणस्य कुशलमतिभिः सुवचत्वेऽपि तव तत्रासामर्थ्येन सर्वेषामेव तन्निर्वचनाभाववचनं वानरवचनतुल्यम्। वानरवचनं तु बौद्धधिक्कारे उक्तम्। पवनतनयवार्तामुपश्रुत्य तत्स्पर्धया कश्चिद्वानरः कियद्दूरमुत्पत्य महार्णं एव पतितः प्राह पार एवायमकूपारः। मिथ्या रामायणमिति। तथा स्वासामर्थ्येन सर्वेषामेव तत्कल्पयसीत्यर्थः॥

प्रयोग इति॥ प्रयुज्यत इति प्रयोगः। कर्मणि घञ्॥ न चेति॥ विषयत्वज्ञाने सति तद्घटितो ज्ञानविषय इत्यभियुक्तप्रयोगः। तादृशप्रयोगे च तत्प्रयोगरूपविषयत्वज्ञानमित्यन्योन्याश्रय इत्यर्थः॥ पूर्वपूर्वेति॥ यं प्रयोगविशेषं यन्मंत्रत्वमपेक्षते तन्मंत्रत्वं सप्रयोगविशेषो नापेक्षते किं तु तदतिरिक्तमिति नान्योन्याश्रय इत्यर्थः॥ न चैतावता ज्ञेयत्वमात्रं सामान्यतः स्यात् न त्वेतज्ज्ञानविषयत्वमिति वाच्यम्। एतदर्थान्तर्भावेण तद्विशेषस्यासिद्धेः। न च सादौ पूर्वप्रयोगमपेक्ष्य प्रयोगो न वक्तुं शक्यते, तस्यानादिमात्रविषयत्वादिति वाच्यम्। नियामकाभावाल्लिप्यादिसंप्रदायवदुपपत्तेश्च। वैदिक प्रयोगस्यापि त्वन्मते मुख्यानादित्वाभावाच्च। ननु प्रयोगोऽपि स्वविषये संबंध इत्यात्माश्रय

ग्राह्यलक्षणस्यासंकीर्णाकारस्यानिर्वचनेपि तादृशाकारज्ञानमात्रेणैवासंकीर्णो ग्राह्यव्यवहारो भविष्यतीति तन्निरुक्तिखंडनेऽपि ममानिष्टाभावात्तत्खंडनं प्रकृतानुपयुक्तमिति भावः॥ इयांस्त्विति॥ अयमांतरालिको विशेषो प्रयोजकः। असंकीर्णतदाकारज्ञानस्य व्यवहारहेतुत्वादिति भावः॥ स इति॥ आकारः। ननु विषयाकारलक्षणस्यानुक्त्या विषयस्यानिर्वचनीयत्वं सिध्यतीत्यत आह॥ न चेति॥ न ह्यनिरुच्यमानलक्षणकत्वमनिर्वचनीयत्वम्। किं तु सदसद्वैलक्षण्यं तत्। तच्च लक्षणोक्त्यनुक्त्योः सममेव। ननु सदसद्वैलक्षण्यरूपानिर्वाच्यत्वं प्रति दुर्निरूपलक्षणकत्वं प्रयोजकं मयांऽगीक्रियत इत्यत आह॥ ब्रह्मणीति॥ कारणत्वस्य लक्षणं दुर्निरूपमिति ब्रह्मणि जगत्कारणत्वस्यासंभवापातादिष्टापत्तिं वारयितुं श्रौतस्येत्युक्तम्। यतो वा इमानि भूतानि जायंत इत्यादि श्रुतिबोधितस्य कारणत्वस्यानिर्वचनीयत्वे श्रुतेर्व्यावहारिकमपि प्रामाण्यं न स्यादित्यर्थः॥ असंभवादिति॥ प्रसंगांतो हेतुः। असंभवप्रसंगादित्यर्थः। ब्रह्मणोऽपि दुर्निरूपलक्षणत्वादनिर्वचनीयत्वं स्यादित्याह॥ त्वयैवेति॥ प्रत्यगात्मस्वरूपं तत् कीदृगिति प्रश्ने तादृशमीदृशमिति विशिष्यनिरूपणं यत्र न प्रसरति तद्वस्तु प्रत्यक् इत्यवधार्यतामित्यनेन दुर्निरूपत्वोक्तेरित्यर्थः। सुनिरूपलक्षणत्वेऽपि न सत्यत्वमित्याह॥ प्रपंचादावपीति॥ त्वद्रीत्या अनिर्वाच्यत्वादिना प्रपंचस्य लक्षणं सुकरमिति प्रपंचोऽप्यनिर्वाच्यो न स्यात्। सत्य एव स्यादित्यर्थः। ग्राह्यस्य घटादेर्लक्षणखंडनं श्रुतिविरुद्धमित्याह॥ यत्कठिनमिति॥ यद्वा ननु निर्दुष्टलक्षणाभावोऽनिर्वाच्यत्वे हेतुः। प्रपंचगतानिर्वाच्यत्वलक्षणं त्वाधुनिकपुरुषोत्प्रेक्षितत्वात्संभावितदोषमित्यत आह॥ यत्कठिनमिति निर्दोषश्रुतिसिद्धस्य लक्षणस्य निर्दुष्टत्वात्तादृश लक्षणानुक्तेरभावात्पृथिव्यादीनामनिर्वाच्यत्वं न स्यादिति भावः। ननु ग्राह्यलक्षणस्य सत्त्वे तस्य निर्वचनमपि पृथिव्यादेः काठिन्यस्येव स्यात्। न च तन्निर्वचनमस्ति। तस्मान्न ग्राह्यलक्षणस्य सत्त्वमित्याशंक्य तदनिर्वचनमन्यथा सिद्ध्यति॥ तस्मादिति॥ इत्थमिति वक्तुमशक्यत्वमद्भुतत्वादेव युक्तमित्यन्वयः। असत्त्वादेव वक्तुमशक्यत्वं किं न स्यादित्यत उक्तं प्रमितस्येति॥ प्रमितस्य दुरपह्नवत्वादित्यर्थः। स्पष्टया अबाधितदृष्ट्या दृष्टं यदबाधितलक्षणं संस्थानविशेषरूपं तस्य प्रतिपुरुषमुखे सत्त्वेपि यथाद्भुतत्वाद्वक्तुमशक्यत्वं तथा ब्रह्मलक्षणस्यापीति॥ अद्भुतत्वादिति॥ अद्भुतत्वाद्धेतोः इत्थमिति निर्वाच्यत्वाभाव इत्यर्थः। ननु नाद्भुतत्वादनिर्वाच्यत्वं किं तु प्रतिभासमात्रत्वादित्याशंक्य व्यतिरेकव्यभिचारेण परिहरति॥ न हि शुक्तीति॥ यदि प्रातिभासिकत्वेनानिर्वाच्यत्वं तर्ह्यनिर्वाच्यत्वाभावेन सुवचत्वेनाप्रतिभासिकत्वं व्यावहारिकत्वरूपं स्यादित्यर्थः। अप्रयोजकत्वं वक्तुं अन्वयव्यभिचारमप्याह॥ न वा मुखेति॥ प्रातिभासिकत्वाभावेऽपि मुखसंस्थानादौ विद्यमानस्यानिर्वाच्यत्वस्य तदप्रयोज्यत्वादिति भावः। व्यभिचारांतरमाह॥ न वेति॥

ननु न वयं विषयत्वं सर्वथा निराकरिष्यामः। अपि त्वध्यस्तत्वातिरिक्तम्। स्वविषयावरणेत्यादौ तु विषयत्वमध्यस्तत्वरूपं मया व्यवहृतम्। तेन न स्वव्याहतिरित्याशंक्य निराकरोति॥ न चेति॥ स्वविषयावरणेत्यत्र स्वशब्दस्य पक्षीभूतप्रमाणज्ञानपरतया प्रमाणज्ञानस्य च विषयानध्यस्तत्वपर्यंततया सत्यं स्वविषयं प्रति नाधिष्ठानत्वम्। व्याघातादित्यर्थः। प्रमाणज्ञाने तद्विषयस्याध्यासे दोषांतरमाह॥ तदज्ञानेति॥ यदि प्रमाणज्ञाने तद्विषयोऽध्यस्तः स्यात्तदा प्रमाणज्ञानविषयकाज्ञानेन तज्ज्ञानेन च तद्विषयविषयकाध्यासस्य तज्ज्ञानापरपर्यायस्य जन्मनिवृत्ती स्याताम्। प्रमाणज्ञानविषयस्य प्रमाणज्ञानानुविद्धतया प्रमाणज्ञानविषय इत्यादि रूपेण इदमंशानुविद्धतया इदं रजतमिति रजतस्येव प्रतीतिः स्यात्। न चैतदस्ति। अन्यादृशं च नाद्यस्तत्वम्। तस्मात्प्रमाणज्ञानेन तद्विषयोऽध्यस्त इत्यर्थः। ननु विषयत्वनिरुक्तिखंडनं न प्रकृतानुपयुक्तम्। तथाहि दृशं प्रति दृश्यस्य विषयत्वे खंडिते अन्यस्य संबंधस्याभावाद्दृगसंबद्धस्य दृश्यस्य दृक्प्रकाश्यत्वानुपपत्तेर्दृगध्यस्तत्वरूपो दृक्संबंधः सिध्यतीति घटादि दृश्यगतदृक्प्रकाश्यत्वरूपदृश्यत्वोपपादकाध्यस्तत्वसमर्थनार्थत्वादित्याशंक्य निराकरोति॥ न हीति॥ साधारणं परोक्षभ्रमविषये विद्यमानम्। दृश्यविशेषस्य अपरोक्षज्ञानविषयस्य। दृग्विशेषप्रकाश्यत्वे वृत्तिप्रतिबिंबितचैतन्येन वा तदभिव्यक्तघटाधिष्ठान चैतन्येन वा प्रकाश्यत्वे। परोक्षभ्रमस्थले अनिर्वाच्यत्वरूपाध्यस्तत्वे विद्यमानेऽप्युक्तचैतन्यप्रकाश्यत्वरूप दृश्यत्वा भावान्नाध्यस्तत्वं तस्योपपादकम्। नहि सामान्यं विशेषस्योपपादकम्। तस्मिन् सत्यभवतस्त दप्रयोज्यत्वात् तथाचाध्यस्तत्वस्य दृश्यत्वानुपपादकत्वात् तत्सिध्यर्थं न विषयत्वखण्डनम्। किं तु प्रकृतानुपयुक्तमेव तदिति भावः॥ तादृशमिति॥ चिदात्मनि वृत्तावनध्यस्ते वृत्तिं प्रति विषये यादृशं विषयत्वलक्षणं तादृशं ज्ञेयं प्रति ज्ञानस्यापि तदस्त्वित्यर्थः। विषयत्वलक्षणस्यावश्यं वक्तव्यत्वमाह॥ त्वयापीति॥ लक्षणस्यापीति॥ तदुक्तं बौद्धधिक्कारे तत्सिद्धौ तल्लक्षणमपि किंचिदस्त्येवेति। तथाचावश्यवक्तव्यस्य विषयत्वलक्षणस्य खंडनं स्वव्याहतमित्यर्थः॥ प्रमाणवदिति॥ प्रमाणवल्लक्षणस्यापीत्यर्थः॥ अविद्यादाविवेति॥ अविद्यावद्विषयस्यापीत्यर्थः॥ साधनमिति॥ विषयत्वस्य त्वदीय हेत्वंतर्गतत्वात् हेतुज्ञानाय तदवश्यं लक्षणीयमित्यर्थः। ग्राह्यलक्षणज्ञानवतस्तव तत्प्रत्याख्यानं व्याहतमित्याह॥ न च तवापीति॥ घटादेः पटाद्यसंकीर्णव्यवहाराय तद्धेतुभूतं पटाद्यसंकीर्णस्य पृथुबुध्नोदराकारादेर्ज्ञानं तादृशासंकीर्णव्यवहारवत्तवापि वर्तते। असंकीर्णतादृशाकार एव लक्षणम्। ज्ञातस्य वस्तुनः त्वयापि किमपि लक्षणं निर्वक्तव्यमेवेति तत्खंडनं व्याहतमित्यर्थः। ननु निरुच्यमानलक्षणस्य ज्ञानं न तादृशव्यवहारहेतुः। किं तु लक्षणस्य। तावतैव तादृशव्यवहारसिद्धेरिति शंकते॥ नन्विति॥ तन्निर्वचनेनेति॥ असंकीर्णाकाररूपलक्षणस्य निर्वचनेनेत्यर्थः॥ सममिति॥

किं तु इष्यमाणेच्छादिवत् विषयविषयिभावः तात्विकः संबंधोऽस्तु। ननु शाब्दवृत्तेः सादित्वान्न तत्र ब्रह्माध्यासः। ब्रह्मण्यनादौ दृश्याध्यासो भविष्यतीत्यतो दृष्टान्तांतरमाह॥ अविद्येति॥ उपसंहरति॥ तस्मादिति॥ प्रमाणस्येति॥ अनुमानत्रयस्येत्यर्थः॥ तल्लक्षणस्येति॥ संयोगस्य समवायस्य च यल्लक्षणं तदेव ज्ञानज्ञेययोः संबंधस्य लक्षणं भविष्यतीत्यर्थः॥ विशेषसंज्ञाया इति॥ यथा संयोगः समवाय इति तयोः संज्ञा तथा ज्ञेयज्ञानसंबंधस्यापि यथारुचि विषयविषयिभाव इत्यादिसंज्ञा कर्तव्येत्यर्थः॥ उक्तरीत्येति। संबंधासिद्धिरित्यादि वाक्यजन्यज्ञानस्यैतद्वाक्यप्रतिपाद्येन संबंधसिद्ध्यबाध्यभावरूपेणार्थेन संबन्धसत्त्वासत्त्वाभ्यां व्याहतमित्यर्थः। स्वनिर्वाहकत्वमिति॥ संबंधांतरं विनैव संबंधस्य संबंधत्वमित्यर्थः। अन्यथाऽऽध्यासिकसंबंधेऽपि संबंधांतरपरंपरा स्यात्। न चाध्यासिकसंबंधस्य मायिकत्वेन मायायाश्चाघटनघटनापटीयस्त्वेन सर्वानुपपत्तिर्भूषणमिति वाच्यम्। सत्ययैवेश्वरशक्त्यासत्यज्ञेयस्य स्वज्ञानेन संबंधस्य च स्वनिर्वाहकताऽस्तु। न तु मातरीव ईश्वरशक्तौ भक्तिं त्यक्त्वा कापुरुषस्य कुलटायामिवानिर्वाच्यमायायां भक्तिर्युक्ता॥ यदपीति॥ विषयत्वं किं ज्ञानजन्यफलाश्रयत्वं वेत्यादिना कृतमित्यर्थः॥ प्रकृतानुपयुक्तमिति॥ अनुकूलतर्कप्रस्तावे अनुपयोगात् भौतिकविचारमनुसरतीत्यर्थः। उक्तं ह्यात्मतत्वविवेके केनचिद्भौतिकेन राजद्वारि द्विरदमवलोक्य विकल्पितं – किमयमंधकारो मूलकमत्ति, आहोस्विज्जलवाहो बलाकावान्वर्षति गर्जति च। यद्वा बांधवोऽयम् राजद्वारे श्मशाने च यस्तिष्ठति स बांधव इति परमाचार्यवचनात्। अथवा योऽयं भूमौ दृश्यते तस्य च्छायेति। दूषितं च। न प्रथमः। तस्य शूर्पयुगलप्रस्फोटनाभावात्। न द्वितीयः। तस्य स्तंभचतुष्टयायोगात्। न तृतीयः। तस्य लगुडभ्रमणाभावात्। न चतुर्थः। तस्य नरशिरः शतोद्गिरणाभावात्। अतो न किंचिदिदमिति। किमेतावता द्विरदस्वरूपमेव निवर्तताम्। किं तु यो द्विरदोऽस्ति सोस्त्येव॥ अनतिप्रसंगायेति॥ घटदृशि पटस्य दृश्यत्वपरिहाराय करण सन्निकर्षादिद्वारको दृक्दृश्ययोः संबंधो वाच्यः। न तु दृश्यगतं विषयत्वमपि निर्वाच्यमित्यर्थः। ननु प्रकृतस्य दृश्यमिथ्यात्वस्य सिध्यर्थं विषयत्वनिरुक्तिखंडनमित्यत आह॥ न चेति॥ विषयस्य दृश्यस्य॥ विषयत्वस्येति। विषयत्वानिरुक्तौ तद्घटितविषयित्वस्याप्यनिरुक्तावपि विषयिण्या दृशो यथा सत्यत्वं तथा दृश्यस्यापि सत्यत्वमक्षतमित्यर्थः। विषयत्वनिरुक्तिखंडनं साधनभिन्न एव न निविशते किं तु बाधकेऽपि निविशते तदित्याह॥ स्वव्याहतं चेति॥ त्वयैवेति॥ विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणेत्याद्यनुमाने विषयत्वस्य व्यवहृतत्वा द्विषयत्वनिरुक्तिखंडनं स्वव्याहतमित्यर्थः॥ दृग्विषयत्वस्येति॥ दृश्यत्वस्येत्यर्थः।

दृग्विषयत्वस्य कल्पने मानाभावात्। ननु इच्छादिसाधारणं विषयत्वमस्तु दृश्ये तदेव दृश्यस्याध्यस्तत्वे मानमित्यत आह॥ सिद्धौ वेति॥ अतिप्रसंगस्य विषयत्वसंबंधेनैव भंगादिति भावः॥ सिद्ध्यसंमतेरिति॥ दृगधीनसिद्धिकत्वमित्यत्र बहुव्रीह्यर्थस्य सिद्धिसंबंधस्य तद्विषयत्वरूपत्वादित्यर्थः॥ न चेति॥ दृक्संबंधसामान्यं दृश्यत्वं तच्च प्रसक्तसंयोगादि विशेषनिषेधसहकृतं अध्ययस्तत्वरूपे विशेषसंबन्धे पर्यवस्यत्संबंधिनो दृश्यस्य मिथ्यात्वमाक्षेप्स्यतीत्यर्थः॥ तस्येति॥ घटस्य ज्ञानमितिप्रतीति सिद्धो यो ज्ञानज्ञेययोः संबंधः तं प्रति अध्यस्तत्वरूपसंबंधस्य विशेषरूपत्वाभावात्। प्रथममध्यस्तत्वं संबंधत्वेनैव न क्लृप्तम्। दूरे ज्ञानज्ञेयसंबंधसामान्यं प्रति विशेषत्वेन। तथा च न परिशेषेणाध्यस्तत्वे पर्यवसानमिति भावः॥ न हीति॥ ज्ञेयज्ञानसंबंधसामान्यं प्रति अध्यस्तत्वरूपसंबंधस्य विशेषत्वे घटस्य ज्ञानमित्यत्र यथा ज्ञेयज्ञानसंबंधसामान्यव्यवहारे ज्ञेयस्य षष्ठ्यं तेन निर्देशः, ज्ञानस्य प्रथमांतेन, तथाऽध्यस्तत्वरूपविशेषसंबंधव्यवहारेऽपि अध्यस्तस्य षष्ठ्यंतेन अधिष्ठानस्य प्रथमांतेन निर्देशः स्यात्। न तु तथाऽस्तीत्यर्थः। न च रूप्यस्य शुक्तिरधिष्ठानमिति प्रतीत्या अध्यस्तत्वस्य संबंधविशेषत्वसिद्धिरिति वाच्यम्। घटस्य संबंधः घटस्य संयोग इति सामान्यविशेषसंबंधव्यवहारे पदांतरप्रयोगादर्शनात्। रूप्यस्य किंचित् शुक्तिरिति संबंधसामान्यं प्रति रूप्यस्याधिष्ठानं शुक्तिरित्ये तस्य विशेषत्वेऽपि ज्ञेयज्ञानसंबंधं प्रति न विशेषत्वमित्यर्थः॥ तद्वत इति॥ सदसद्वैलक्षण्याभावरूपानिर्वाच्यत्वाभाववत इत्यर्थः। ननु करणसामर्थ्येन तुच्छे तदाकारवृत्तिसमुल्लासेऽपि दृक्संबंधरूपं दृश्यत्वं तुच्छत्वविरोधि न तुच्छऽस्ति। तुच्छाकारताया वृत्तिगतत्वेऽपि वृत्तिसंबंधस्य तुच्छगतत्वाभावोपपत्तेरिति चेन्न। वृत्तिसंबंधातिरिक्तस्य दृग्विषयत्वस्य घटादावप्यभावेनापादकासिद्धेः। तुच्छाकारताया वृत्तिगतत्वे तुच्छेऽपि वृत्तिसंबंध स्यावर्जनीयत्वाच्च॥ सत्त्वेपीति॥ न च ब्रह्मणि तव्यवहारोऽध्यस्त इति वाच्यम्। घटव्यवहारस्यापि ब्रह्मण्यध्यस्तत्वेन तस्यापि ब्रह्मव्यवहारत्वापातादित्युक्तत्वात्॥ यः कश्चिदिति॥ दृक्दृश्ययोर्यावान् संबंधः स सर्वोऽप्यध्यस्तो मिथ्येत्यर्थः॥ आद्य इति॥ दृक्दृश्य इति संबंधस्य सर्वस्य मिथ्यात्वेऽपि दृश्य इव दृश्यस्याप्यमिथ्यात्वोपपत्तेरित्युक्तत्वादित्यर्थः॥ त्वन्मत इति॥ घटादेस्स्वसन्निकर्षजन्यात्स्वज्ञानात्पूर्वं सत्त्वेन स्वज्ञाने अध्यासायोगादित्युक्तत्वादित्यर्थः।

संगृह्णाति॥ एवं चेति॥ शाब्दवृत्तेरिति॥ शब्दजन्यायां ब्रह्माकारवृत्तौ विषयाधिष्ठान चैतन्यादिकल्पनां विना वृत्तिमात्रं प्रति ब्रह्मणो विषयत्वं, विषयिण्यां च वृत्तौ विषयस्य ब्रह्मणो नाध्यस्तत्वं, तथा घटादिरपि स्वसन्निकृष्टेंद्रियजन्यवृत्तिविषय एव तादृशवृत्त्यभिव्यक्तचैतन्येन घटादेः प्रकाश्यत्वेऽपि न चैतन्येन घटस्याध्यस्तत्वं संबंधः।

तर्कमात्रमिति॥ अर्थापत्तेः प्रमाणत्वेनार्थसाधकत्वं, तर्कस्य स्वतोऽप्रमाणत्वेन नार्थसाधकत्वं, किं तु प्रमाणसहकारित्वमिति मात्रशब्दार्थः॥ संबंधस्येति॥ दृक्संबंधरूपदृश्यत्वस्येत्यर्थः॥ किं त्विति॥ संबंधिनो मिथ्यात्वे संबंधस्यानुपपत्तिरेव स्यादित्यर्थः। संबंधिमिथ्यात्वं प्रकृतसंबंधप्रतिकूलं नेत्याशंक्य निराकरोति॥ न चेति॥ अध्यस्तत्वेति॥ मिथ्याभूतसंबंधिकसंबंधस्येत्यर्थः। तथाचोक्तरूपस्याध्यस्तत्वरूपसंबंधस्य संबंधिमिथ्यात्वं न प्रतिकूलं किं तु तादृशसंबंधस्वरूपसंपादकत्वेनानुकूलमेवेति भावः॥ तस्येति॥ संबंधस्य हि अन्यत्र कृत्सत्यसंबंधिकत्वेनैवाक्षेपकता न त्वन्यत्राकृत्साध्यस्तत्वादिरूपेण। तथा च येन रूपेण संबंधस्याक्षेपकता तद्रूपाक्रांतस्य आक्षेपकस्य आक्षेप्यसंबंधिमिथ्यात्वं प्रतिकूलमेवेत्यर्थः। दृक्संबंधरूपदृश्यत्वं प्रति संबंधिमिथ्यात्वं प्रतिकूलमेव। अध्यस्तत्वरूपसंबंधं प्रति संबंधिमिथ्यात्वस्य प्रतिकूलत्वाभावेपि तादृशसंबंधस्यासिद्धत्वान्न संबंधिमिथ्यात्वा क्षेपकतेत्याखंडलार्थः। ननु दृश्यत्वरूपदृक्संबंधं प्रतिसंबंधमिथ्यात्वं न प्रतिकूलम्। तादृशसंबंधस्य स्वरूपेण मिथ्यात्वात्। तत्सत्त्वे हि संबंधिमिथ्यात्वेन तस्यापि मिथ्यात्वापत्त्या तन्मिथ्यात्वं संबंधप्रतिकूलं स्यात्। न तु तदस्तीत्याशंक्य निराकरोति॥ न च मिथ्याभूतेति॥ स्वत इति॥ स्वतः प्रामाण्यप्रत्यक्षादिसिद्धेच्छादिसाधारणस्य विषयत्वरूपसंबंधस्य बाधकमंतरेण मिथ्यात्वायोगादित्यर्थः। अन्योन्येति॥ दृक्दृश्यसंबंधस्य मिथ्यात्वे संबंधानुपपत्त्या दृश्यमिथ्यात्वसिद्धिः तत्सिद्धौ च संबंधिभूतदृश्यस्य मिथ्यात्वेन तत्संबंधस्य मिथ्यात्वसिद्धिरित्यर्थः। आक्षेप्यस्य प्रमाणांतराविरुद्धत्वं च नास्तीत्याह॥ प्रत्यक्षादीति॥ ननु न प्रत्यक्षविरोधः। तस्या तत्वावेदकत्वादित्यत आह॥ न चेति॥ यथा च न प्रत्यक्षाविरोधस्तथोक्तमधस्तात्। आक्षेपकस्य दृश्यत्वस्य आक्षेप्यं दृश्यमिथ्यात्वं विनाऽनुपपद्यमानत्वमपि नास्तीत्यभिप्रायेणोक्तं प्रत्यक्षादीत्यादि। अन्यथाप्युपपन्नस्य न तदाक्षेपकत्वमित्यर्थः। त्वदभिमतस्य दृगध्यस्तत्वरूपस्य दृश्यत्वस्य मिथ्यात्वाक्षेपकस्य प्रमितत्वमपि नास्तीत्याह॥ नाप्येकस्येति॥ प्रमितानेकवस्तुत्यागबाधकेन त्वदभिमतदृश्यत्वस्य न प्रमितत्वम्। दृश्यत्वस्याध्यस्तत्वरूपत्वे हि दृश्यग्राहकस्य प्रत्यक्षादेः स्वतःप्रामाण्यादित्यागः। अद्वैतागमाद्यनाश्वास इत्यादि बहुविक्लवं स्यादित्यर्थः। न चा क्षेपके प्रमितत्वमनपेक्षितं अप्रमितेनापि प्रतिबिंबेन बिंबाक्षेपदर्शनादिति वाच्यम्। प्रतिबिंबस्य त्वन्मतेऽपि सत्यत्वात्। तज्ज्ञानस्यैवाक्षेपकत्वाच्च॥ अनेकेति॥ बहुबाधस्यान्याय्यत्वादित्यर्थः।

दृश्यत्वं विकल्प्य दूषयति॥ आक्षेपकमिति॥ तवेति॥ न चाध्यासरूपं दृग्विषयत्वं ममापि संमतमिति वाच्यम्। इच्छादिसाधारणानध्यस्तदृग्विषयत्वेनैवोपपत्तौ अध्यस्तस्य

चैतन्यरूपे ज्ञाने सत्यप्यज्ञानानिवृत्तेः वृत्तौ सत्यामज्ञाननिवृत्तेरन्वयव्यतिरेकाभ्यां वृत्तेरेवाज्ञानविरोधितया वृत्तेरेव ज्ञानत्वं तदतिरिक्तज्ञाने मानाभावादित्यर्थः।

ननु न वृत्त्यतिरिक्ते ज्ञाने मानाभावः। वृत्त्युदयात्प्रागज्ञातार्थसिद्ध्यर्थं वृत्त्यतिरिक्तज्ञानस्यावश्यमभ्युपेयत्वात्। अन्यथा तस्य साधकाभावेन शशशृंगतुल्यतया सन्निकर्षजन्यज्ञानहेतुत्वेन प्राक्सत्त्वकल्पना निष्प्रामाणिकी स्यात्। तस्माद्यादृशस्य घटादेरिंद्रियसंनिकर्षाश्रयत्वेन ज्ञानकारणत्वं तादृशस्य साधनं किंचिज्ज्ञानमवश्यमभ्युपेयम्। अन्यथा अन्वयव्यतिरेकयोरग्रहेण कार्यकारणभावाग्रहात् सर्वा मानमेयादिव्यवस्थोच्छिद्येत। तच्च मानं न वृत्तिरूपम्। तदानीं वृत्तिकारणाप्रवृत्तेरिति तद्विलक्षणं नित्यं स्वप्रकाशमेकमेव लाघवात्। तदेव नानाविधोपाधिसंबंधान्नानाविधव्यवहारभाग्भवति। नभ इव घटमणिमल्लिकाद्युपाधिभेदेन। तच्चाज्ञानसाधकत्वात्स्वरूपतो नाज्ञाननिवर्तकम्। वृत्त्युपरक्तं त्वज्ञाननिवर्तकमिति न वृत्तेरनुपयोगः। तथा च सर्वाज्ञानसाधके साक्षिचैतन्ये अस्मिन्यटादेरध्यासः। तदुक्तं सुरेश्वरवार्तिके सर्वतीर्थदृशां सिद्धिःस्वाभिप्रेतस्य वस्तुनः। तदभ्युपगमादेव तत्सिद्धिर्वार्यतेकुतः॥ सर्वतीर्थदृशां तावत्सामान्यं मानलक्षणं। अज्ञातार्थावगमनं त्वदुक्ते तन्न युज्यते॥ स्वतस्सिद्धोऽथवाऽसिद्धो देहादिस्ते भवद्भवेत्। प्रमाणानां प्रमाणत्वं नोभयत्रापि लभ्यते॥ प्रमाणान्यंतरेणापि देहादिश्चेत्प्रसिध्यति। वद प्रमाणैः कोन्वर्थो न हि सिद्धस्य साधनम्॥ स्वतोऽसिद्धे प्रमेये तु नासतो व्यंजिका प्रमा। नाभिव्यनक्ति कविता शशशृंगमपि स्फुरन्निति अत्रोच्यते। आस्तां तावदेषा प्रक्रिया तथापि न तावद्घटादेः साधकं वृत्तिं विना चैतन्यरूपं ज्ञानम्, सर्वदा सर्वस्य सर्वप्रकाशापत्तेः। वृत्त्युदयात्पूर्वमपि योगिवृत्त्यंतरसत्त्वेन तदसिद्धेरभावात्। अज्ञाननिवृत्त्यादिकार्यं वृत्त्यैवेत्युक्तम्। तस्माद्वृत्त्यतिरिक्तघटज्ञानं त्वद्रीत्या न सिध्यतीति साधूक्तम्।

शुद्धस्य घटाधिष्ठानस्य घटप्रकाशकत्वे विरोधमाह॥ त्वयापीति॥ आभासस्येति॥ शुद्धातिरिक्तस्येत्यर्थः॥ ब्रह्मानुभवत इति॥ साक्षिरूपादित्यर्थः॥ घटानधिष्ठानस्येति॥ वृत्तिप्रतिबिंबितस्य विशिष्टस्य घटप्रकाशकस्य घटानधिष्ठानत्वात्, घटाधिष्ठानस्य घटप्रकाशकत्वोक्तौ त्वदाचार्यवचोविरोध इत्यर्थः। न च वृत्तिप्रतिबिंबितचैतन्यस्य घटाधिष्ठानचैतन्येन सह भेदाभावेन तस्यैव तद्भासकत्वमिति वाच्यम्। वस्तुत एकत्वेऽपि कल्पितभेदवत्त्वात्। अन्यथा सर्वस्य सर्वदा सर्वप्रकाशापत्तिरिति भावः॥ दृश्यत्वेति॥ दृक्संबंधान्यथानुपपत्त्येत्यर्थः॥ अर्थापत्तिरिति॥ यद्यप्यनुकूलतर्काभावोक्तिप्रस्तावे नार्थापत्तिविकल्पदूषणयोरवसरः तथाप्यर्थापत्तिदूषणस्य तर्केऽप्युद्भावनीयत्वात्तदुक्तिरित्यविरोधः॥

ननु ज्ञानज्ञेययोराध्यासिकसंबंधाभावे तयोः संबंध एव न सिद्ध्येत्। तथाहि। ज्ञानं प्रकाशः। तस्य च देशकालविप्रकर्षादिकं प्रकाश्यसंयोगादिषु बाधकमस्तीत्याशंक्य परिहरति॥ यद्यपीति॥ आंतरत्वेनेति॥ बाह्यप्रकाशस्य प्रकाशस्यसान्निध्यं संयोगादिहेतुर्न त्वांतरस्यापि तस्येत्यर्थः॥ परोक्षेति॥ परोक्षवृत्तौ साक्षाद्विषयसंबंधस्य त्वयापि स्वीकारादित्यर्थः। ननु परोक्षस्थले यद्यप्यधिष्ठानचैतन्येन साक्षादेव संबंधः तथापि विषयाकारवृत्त्या साक्षात्संबंधाभावात् वृत्त्यवच्छिन्नचैतन्ये विषयस्य परंपरासंबंध एवेति चेत् मैवं। अपरोक्षस्थलेऽपींद्रियजन्यवृत्त्यवच्छिन्नेन चैतन्येन विषयस्य तादृशसंबंधेनैव भानोपपत्तावाध्यासिकसंबंधकल्पनायां मानाभावादिति भावः॥ अन्यथेति॥ प्रकाशेषु वैचित्र्यानंगीकारे॥ (प्र)दीपवदिति॥ प्रकाशरूपे प्रदीपे अध्यासादर्शनात् प्रकाश्यस्य ज्ञानरूपेऽपि तस्मिन् स न स्यादित्यर्थः। ज्ञानविशेषे ज्ञेयेन सह अध्यासातिरिक्तसंबंधस्त्वयाभ्युपगत इति सर्वत्र ज्ञाने स एवास्त्वित्याह॥ किं चेति॥ अपरोक्षेति॥ नन्वपरोक्षानुभवैकरसे ब्रह्मण्यध्यस्तस्यातीतादेर्व्यावहारिकस्य स्वज्ञानेऽनुमित्यादिरूपे अनध्यासेपि यस्मिन् चैतन्ये तदध्यस्तं तदेव चैतन्यमनुमित्यादिरूपवृत्त्यवच्छिन्नमनुमितिरिति नाध्यासानुपपत्तिः। अतिप्रसंगपरिहारार्थं चैतन्यस्य विषयसंबंधे वृत्त्युपरागापेक्षायामपि नाधिष्ठानत्वे तदपेक्षा। एवमेव स्मृतिस्थलेऽपीति चेन्मैवम्। अतीतादेर्ज्ञानं हि न तदधिष्ठानचैतन्यमात्रम्। किं त्वनुमित्यादिरूपवृत्त्यवच्छिन्नं तत्। तथा तस्मिंश्च नातीतादेरनुमेयस्याध्यास इति न तस्य स्वज्ञानेऽध्यासः॥ तत्प्रतीतेरिति॥ ननु प्रातिभासिकस्य प्रातिभासिक्यां वृत्तावनध्यासेऽपि अधिष्ठानविषयकवृत्त्यभिव्यक्तचैतन्य एवाध्यास इति चोद्यं निराकरोति॥ त्वयापीति॥ तथा च रूप्यज्ञानाधिष्ठानयोर्भेदान्न रूप्यस्य स्वज्ञाने अध्यास इत्यर्थः। नन्विदमंशाकारवृत्त्यच्छिन्नमेव चैतन्यं रूप्याकाराविद्यावृत्त्यवच्छिन्नमिति एकावच्छिन्न एवापरावच्छेदेन निरपेक्षोपाधेरिवात्र भेदकाभावाद्रूप्यज्ञानाधिष्ठानयोरेकत्वम्। अत एवाभियुक्तैः फलैक्यादैक्यं ज्ञानस्योच्यत इति मैवम्। अस्तु वस्तुतो वृत्तिभ्यामवच्छिन्नचैतन्यमेकं तथाप्येकैकवृत्त्यवच्छिन्नस्यैव तस्य रूप्याधिष्ठानज्ञानत्वे। न तूभयवृत्त्यवच्छिन्नस्य ते इत्याशयः। ननु अस्तु रूप्याकाराविद्यावृत्त्यवच्छिन्नस्य रूप्यज्ञानस्य रूप्याधिष्ठानत्वमत आह॥ रूप्यादेरिति॥ रूप्यज्ञानस्याज्ञानेति॥ रूप्यज्ञानस्य ज्ञातैकसत्त्वेन तत्राज्ञानस्य त्वयाप्यनंगीकारादित्यर्थः॥ ज्ञानं रूप्यमिति॥ अधिष्ठानसामानाधिकरण्येनाध्यस्तप्रतीतेर्दर्शनाच्च ज्ञानं रजतमिति धीः स्यादित्यर्थः॥ घटादेरिति॥ अध्यासेन घटस्वरूपे सिद्धे घटसन्निकर्षजन्य घटज्ञानरूपघटाधिष्ठानसिद्धिः। अधिष्ठाने च सति तत्र घटादेरध्याससिद्धिरित्यन्योन्याश्रयापात इत्यर्थः॥ नन्विति॥ तथा च घटस्य तत्प्रकाशरूपस्य घटज्ञानस्य शुद्धस्य घटाधिष्ठानत्वेनाभिमतस्य च न परस्परापेक्षेति नान्योन्याश्रय इत्यर्थः॥ त्वन्मतेपीति॥

ननु संबंधमिथ्यात्वमेव संबंधिनो दृश्यस्य मिथ्यात्वमाक्षेप्स्यति। न च विभुद्रव्यादिषु संयोगमिथ्यात्वमादाय व्यभिचारः। संबंधांतरस्य तत्र सत्त्वात्। प्रकृते दृक्दृश्ययोस्तु न कोपि संबंधः संभवतीत्यत आह॥ ज्ञानस्येवेति॥ ननु मिथ्याभूतसंबंधप्रतियोगी अपरस्मिन्नारोपितः। यथा शुक्तौ रजतं। तथा ज्ञेयं ज्ञाने अध्यस्तमित्यत आह॥ न चेति॥ मिथ्याभूतसंयोगप्रतियोगिनोरपि दंडचैत्रयोरन्योन्यस्मिन्ननध्यासादित्यर्थः। ननु तात्विकसंबंधप्रतियोगी अपरस्मिन्नध्यस्त इति नियमः। न च दंडचैत्रादेः संबंधस्तात्विकः। अतो न दंडे चैत्रस्याध्यास इत्यत आह॥ न चाध्यासिकेति॥ इच्छेष्यमाणादौ कृप्तस्य विषयविषयिभावसंबंधस्य त्यागेन ज्ञानज्ञेययोराध्यासिकसंबंधकल्पनं हि ज्ञेयमिथ्यात्वसिध्यर्थं। न च तदंगीकारेऽपि ज्ञेयमिथ्यात्वसिद्धिः। तात्विकसंबंधप्रतियोगीत्यादेः स्वरूपासिद्धेरित्यर्थः। ननु दृष्टानुसारेण घटतदभावादिष्विव धर्मिसमसत्ताकः संबंधो ज्ञान ज्ञेययोरस्त्वित्युक्तमयुक्तं। तत्र तादृशसंबंधः संभवतीति कल्प्यते। ज्ञानज्ञेययोस्तु धर्मिसमसत्ताकः संबंधो न संभवति। तथाहि। ज्ञानज्ञेययोः संबंधो ज्ञानसमसत्ताको वा ज्ञेयसमसत्ताको वा। नोभयथाऽपि। परस्परप्रतिबंधादित्यत आह॥ न चाभावादेरिति॥ नियामकेति॥ संबंधसत्ता संबंधिसत्तया समाना। न तु यावत्संबंधिसत्तया। नियामकाभावादित्यर्थः। ननु ज्ञानज्ञेययोर्धर्मिसमसत्ताकसंबंधे नियामकसत्त्वेपि न तथा तत्संबंधकल्पनं। तदकल्पने बाधकाभावादित्याशंक्य तत्र बाधकमाह॥ दृग्दृश्ययोरिति॥ दृग्दृश्ययोः संबंधो नेति वाक्यप्रयोगरूपक्रियायाः दृग्दृश्ययोः संबंधो नेत्येतद्वाक्यप्रतिपाद्यार्थस्यैतद्वाक्यजन्यज्ञानेन संबद्धुं, श्रवणादिरूपक्रियायाः श्रोतव्येन ब्रह्मणा, वृत्तिरूपसाक्षात्कारक्रियायाः साक्षात्कर्तव्येन ब्रह्मणा, संबद्धुं या तव वाक्यप्रयोगरूपा क्रिया सा विरुद्धेतेत्यर्थः। असंबंधेन धर्मिसमसत्ताकसंबंधाभावेन। तथा चोक्तस्थले तादृशसंबंधासिद्धिरेव ज्ञानज्ञेययोस्तादृशसंबंधानंगीकारे बाधिकेत्यभिप्रायः। ननूक्तस्थलेऽपि न धर्मिसमसत्ताकसंबंधोऽगीक्रियते। येन तदसिद्धिर्बाधिका स्यादित्यत आह॥ न हीति॥ नन्वस्ति ब्रह्मणि तत्साक्षात्कारस्य श्रवणादिरूपक्रियायाश्चाध्यासः। तावता च ब्रह्मसाक्षात्कारादीनां ब्रह्मीयत्वं भविष्यतीति शंकते॥ ब्रह्मणीति॥ घटेति॥ घटसाक्षात्कारस्यापि ब्रह्मण्यध्यस्तत्वादित्यर्थः। न चाध्यासविशेषस्तदीयताप्रयोजकः। एतदपेक्षया इच्छादिषु कृप्तस्य संबंधस्यैव लघुत्वादिति भावः॥ धर्मादाविति॥ तात्पर्यस्य धर्मादिसंबंधो न स्यादित्यर्थः। ननु तात्पर्यं तत्प्रतीत्युद्देश्यकत्वं प्रतीतेश्च ज्ञेयांतरेणेव धर्मेणापि संबंधोऽध्यास एव प्रतीतिद्वाराधर्मतात्पर्ययोः संबंध इति चेत् मैवम्। एतादृशपरंपरासंबंधस्य घटेपि साम्यादिति भावः॥ इहापीति॥ ब्रह्मसाक्षात्कारस्य ब्रह्मण्यध्यस्तत्वेन ब्रह्मसंबंधवत् घटज्ञानस्यापि घटे अध्यस्तत्वेन घटीयत्वं स्यादित्यर्थः। संगृह्णाति॥ एवं चेति॥ तदर्थस्य दृग्दृश्यसंबंधाभावस्य। अन्यः आध्यासिकसंबंधादिति शेषः।

मोक्षस्य पुरुषार्थत्वं न स्यात्। त्वदुक्तदोषस्य प्रपंचसत्यत्वादिना दूष्येण संबंधाभावे तन्निराकरणं न स्यात्। त्वद्वाक्यस्यार्थेन संबंधाभावे तन्निरर्थकं स्यात्। ज्ञानस्य ज्ञेयेन संबंधो नास्तीत्येवं रूपं यत्त्वद्वाक्यं तत्प्रतिपाद्यो यो ज्ञानज्ञेयसंबंदाभावः तस्य एतद्वाक्यजन्यं यत् ज्ञानं तेन संबंधाभावात् ज्ञानज्ञेययोः संबंधाभावः परेण ज्ञातो न स्यादित्यर्थः॥ स्वन्यायेत्यादि॥ उक्तरीत्या स्वन्यायविरोधः। ज्ञानज्ञेययोः संबंधाभावं प्रतिपादयितुं ज्ञानस्य ज्ञेयेन संबंधो नेति प्रयुक्तं यद्वाक्यं तत्प्रयोगरूपा या क्रिया तत्प्रतिपाद्यस्यार्थस्यैतद्वाक्यजन्यस्य ज्ञानस्य संबंधाभावात् स्वक्रियाविरोधः। ज्ञानज्ञेययोः संबंधाभावरूपार्थस्य ज्ञानज्ञेययोः संबंधो नास्तीत्येतद्वाक्यजन्यज्ञानेन संबंधं बोधयितुं एतद्वाक्यं प्रयुक्तं। ज्ञानज्ञेययोः संबंधो नास्तीति वदतीति स्ववचनविरोधः। तथा च यथा ध्वंसप्रतियोग्यादिषु नाध्यासिकः संबंधः किंत्वन्यः तथा ज्ञानज्ञेययोरपीत्यर्थः। ननूक्तेषु ध्वंसादिष्वध्यास एव संबंधो भविष्यतीति संबंधाभावप्रयुक्ताः स्वन्यायविरोधादयो न स्युरित्यत आह॥ न हीति॥ एतेनेति॥ स्वन्यायविरोधादिनेत्यर्थः॥ स्वव्याहतस्येति॥ व्यावहारिकव्यवच्छेदकस्येत्यर्थः। मुमुक्षायाश्च मोक्षेणेत्यत्र शंकां परिहरति॥ न चेच्छाया इति॥ इच्छेष्यमाणयोः संबंधघटकं तद्ज्ञानजन्यत्वं न तु तदेव तयोः संबंध इत्यर्थः॥ पटेच्छाया इति॥ पटमात्रेच्छाया इत्यर्थः। न च घटविषयत्वेन घटज्ञानजन्यत्वं तस्यां नेति वाच्यं। एतस्य विषयसंबंधसिध्यधीनत्वात्, गौरवाच्च। ज्ञाने तदंगीकारे इच्छायामपि तदंगीकारौचित्याच्च। अज्ञानस्याज्ञेयेनेत्यत्र शंकां परिहरति॥ अज्ञानस्येति॥ अस्यास्मिन्नज्ञानमित्याश्रयविषययोरनुभवादित्यर्थः॥ स्वीकृतत्वाच्चेति॥ यथाहुः आश्रयविषयत्वभागिनीति। ध्वंसादेश्चातीतादिनेत्येतदुपपादयति॥ यदि चेति॥ तथैवास्त्विति॥ न तु ज्ञानज्ञेययोराध्यासिकः संबंध इत्यर्थः। ननु प्रतियोग्यभावादीनां संबंधस्याकल्पितत्वनिदर्शनेन न ज्ञानज्ञेययोरकल्पितसंबंधसिद्धिः। तत्संबंधस्यापि कल्पितत्वादित्याशंक्य निराकरोति॥ भावाभावादेरिति॥ प्रपंचेति॥ दृक्दृश्यसंबंधानुपपत्त्या ज्ञेयमात्रस्याध्यासिकत्वे सिद्धे तन्मध्यपतितस्य प्रतियोग्यभावादिसंबंधस्यापि मिथ्यात्वं सिध्यति। तन्मिथ्यात्वे सिद्धे कुत्रापि सत्यसंबंधस्याकल्पनात् ज्ञानज्ञेययोरप्याध्यसिकसंबंधः सिध्यतीत्यन्योन्याश्रय इत्यर्थः॥ घटस्येति॥ ज्ञानज्ञेययोः संबंधविचारे दृष्टानुसारित्वात् कल्पनायाः घटतदभावादाविव धर्मिसमसत्त्वस्य संबंधस्य कल्पनीयत्वादित्यर्थः॥ अस्तु वेति॥ मिथ्यात्वमागृह्णतस्तव मते विषयत्वमपि मिथ्यैव। न च विषयत्वमिथ्यात्वमात्रेण दृश्यस्य विषयस्य मिथ्यात्वं सिध्यति। यथा तार्किकाणां मते विभुद्रव्यादीनां संयोगस्य मिथ्यात्वेपि न तेषां मिथ्यात्वमित्यर्थः। ननु मिथ्याभूतविषयत्वाश्रयो न वस्तुतो विषयो भवति। न हि मिथ्याभूतघटत्वाश्रयो वस्तुतो घटो भवतीत्यत उक्तं॥ दृश्येति॥ विषयत्वस्योपाधेर्मिथ्यात्वेऽपि वस्तुतस्तदुपहितस्य न मिथ्यात्वं। परिदृश्यमानत्वादित्यर्थः।

सूत्रे महाभाष्ये। 'ननु नेदं सूत्रमारंभणीयं। अस्तेर्भूरित्यादौ षष्ठीनिर्देशात् विनापि सूत्रेणास्तेः संबंधी भूरादेशो भविष्यतीति चोदयित्वा नियमार्थोऽयमारंभ इत्युक्तं। नन्वनेकप्राप्तेरभावात् कथं नियम इत्याशंकामभिप्रेत्य तत्परिहारार्थं एकशतं षष्ठ्यर्था इत्युक्तमित्यर्थः॥ ते चेति॥ षष्ठीदंडकपाठाश्रयणेनैतदुक्तमिति कैयटवाक्यस्यार्थानुवादोऽयं॥ षष्ठीदंडकइति॥ षष्ठीदंडको नाम ग्रंथविशेष इति बृहद्विवरणकारः। ननु संयोगादेरन्यस्य संबंधत्वे तस्य कृत्नपदार्थेष्वन्तर्भावाभावादाधिक्यं स्यादत आह॥ प्रमितेति॥ तादृशसंबंधसमावेशेनैव पदार्थाः परिगणनीया इत्यर्थः। उक्तानुमानेषु व्यापकानुपलब्धिबाधं शंकते॥ नचेति॥ संबंधद्वित्वमिति॥ संयोगसमवायान्यद्वित्वव्यापकसंख्यापूरणवृत्तित्वेन संबधत्वानवगाहित्वं विशेषणविशेष्यसंबंध विषयकत्वरूपसाध्यस्य व्यापकं दंडी शुक्ल इत्यादिविशेषणविशेष्यसंबंधविषयबुद्धौ दृष्टं। अभाववद्भूतलं ज्ञातो घट इत्यादौ पक्षीकृतविशिष्टबुद्धौ तदभावात्साध्यस्यापि बाध इत्यर्थः। एवमनुमानांतरेऽपि बोध्यं॥ अन्योन्याश्रया इति॥ निरुक्तस्य विशिष्टबुद्धित्वव्यापकत्वे तन्निवृत्त्या पक्षे साध्याभावसिद्धिः। पक्षे साध्याभावसिद्धौ च व्यभिचाराभावेन निरुक्तस्य विशिष्टबुद्धित्वव्यापकत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः॥ अन्यथेति॥ एतदप्युक्तदिशा व्याख्येयं॥ नापीति॥ विद्यमानमात्रसंबंधिविषयकत्वं सन्निकृष्टमात्रसंबंधिविषयकत्वं वा नोक्तसाध्यव्यापकं। येन तन्निवृत्तिर्बाधिका स्यादित्यर्थः॥ अस्येति॥ निरुपाधिकहेतुसाध्यसहचारावगतसाध्यव्याप्तिकहेतोः पक्षवृत्तितया पक्षे संयोगादि विलक्षणसंबंधिकस्य संबंधस्यसिद्धेः। निरुक्तयोस्तु नोक्तसाध्यव्यापकतासिद्धिः। अन्योन्याश्रयादनुकूलतर्काभावाच्च। देशकाल सन्निकर्षवतीनामपि सपत्नीनां संबंधाभावात्। विप्रकृष्टानां गोगोमतां संबंधदर्शनाच्च। न हि तयोराध्यासिकः संबंधोऽस्तीत्याशयः॥ अन्यथेति॥ अनुकूलतर्काभावेपि व्यापकताग्रह इत्यर्थः॥ पृथक्सिद्धयोरेवेति॥ पृथक्सिद्धसंबंधिविषयकत्वादेरित्यर्थः॥ संयोगेति॥ दण्डीत्यादिविशिष्टबुद्धौ संबंधविषयकत्वादि व्यापकत्वग्रहादित्यर्थः॥ अपृथक्सिद्धिरिति॥ पृथक्सिद्धसंबंधिविषयकत्वरूपस्य संबंधविषयकत्वव्यापकस्य निवृत्तिरित्यर्थः॥ समवायेति॥ समवायसाधकस्य विशेषणविशेष्यसंबंधविषयेत्यनुमानस्य व्यापकानुपलब्धित्वेन बाधिका स्यादित्यर्थः॥ ध्वंसादेरित्यादि॥ अतीतादिनेत्यादीनां वक्ष्यमाणेनासंबंधादित्यनेन संबंधः। ध्वंसादेरतीतेन प्रतियोगिना संबंधाभावे तस्यायं ध्वंस इति नियमो न स्यात्। मिथ्यात्वलक्षणांतर्गतस्यात्यंताभावस्य प्रतियोगिना संबंधाभावे प्रतियोगिनो मिथ्यात्वं न स्यात्। वेदांतनिष्ठशक्तितात्पर्ययोर्ब्रह्मणा संबंधाभावे वेदांतेभ्यो ब्रह्मसिद्धिर्न स्यात्। जीवाश्रिताज्ञानस्य ब्रह्मणा संबंधाभावे जीवो ब्रह्म न जानातीति न सिध्यति। व्यवहारस्य व्यवहर्तव्येन ब्रह्मणा संबंधाभावे ब्रह्मणोऽयं व्यवहार इति न सिध्यति। मुमुक्षाया मोक्षेण संबंधाभावे

ननु शुद्धचैतन्यस्यैव घटाद्यधिष्ठानत्वं। तस्य च चरमसाक्षात्कारात्पूर्वं मूलाज्ञाननिवृत्तिरूपव्यक्त्यभावेऽपि तदवस्थाविशेषादिनिवृत्तिलक्षणाभिव्यक्त्यादि विषयप्रकाशोपपत्तिरिति चेन्मैवं। मूलाज्ञानं यदि नावरणं, न तर्हि तत्सिद्धिः। आवरणार्थमेव त्वयाऽज्ञानस्य साधितत्वात्। यदि तदावरणं तर्ह्येकावरणनिवृत्तावप्यावरणांतरस्य सत्त्वे न शुद्धचैतन्यस्य घटाधिष्ठानस्याभिव्यक्तिरिति भावः। दोषांतरमाह॥ किंच घटेति॥ घटाधिष्ठानचैतन्यं घटप्रकाशकमिति मते मिथ्याभूतस्य घटवत् घटाधिष्ठानत्वाभावेन घटाप्रकाशकत्वात्सत्यमेव घटाधिष्ठानं घटप्रकाशकमिति वाच्यं। तस्य च सत्यत्वेन दोषाजन्यतयाऽबाधितार्थकत्वरूपप्रमात्वयोगित्वेन तद्विरुद्धस्वविषयमिथ्यात्वापादनशीलं स्वविषयं प्रत्यधिष्ठानत्वं न संभवतीत्यर्थः। ननु दोषाजन्यत्वं न प्रमात्वप्रयोजकं। चैतन्यस्य सर्वत्र दोषाजन्यत्वात्। किं तु दोषाजन्यवृत्त्यवच्छिन्नत्वं। प्रकृते च तदभावान्न विषयस्य सत्यत्वम्। अतो मिथ्याभूतस्वविषयं प्रत्यधिष्ठानत्वं सत्याया दृशोऽयुक्तमिति चेन्मैवम्। घटाद्याकारवृत्तेरपि संभावितेंद्रियादिदोषजन्यत्वात्। अविद्यायाश्च दोषत्वासंप्रतिपत्तेः। अन्यथा अद्वैतागमविषयश्रौत्रादिवृत्तेरपि अविद्यारूपदोषजन्यत्वेनाप्रमात्वापत्त्याऽद्वैतागमस्यासिद्धिप्रसंगादिति॥ अभाववद्भूतलमिति॥ अत्र परस्परासंयुक्तासमवेतेत्यादिकमेव पक्षः। तत्परिचायकत्वेनाभाववद्भूतलमित्यादि॥ उक्तेति॥ परस्परासंयुक्तेत्यादिरूपेत्यर्थः॥ अबाधितेति॥ अपरोक्षत्वमपि विशेषणं। तेन परोक्षधीषु न व्यभिचारः। न चोभयत्राध्यासिकसंबंधस्यैव विषयत्वेन निमित्तत्वेन चोपपत्तावर्थांतरमिति वाच्यं। तात्विकसंबंधबाधे आध्यासिकसंबंधसिद्धिः। तथाच संयोगसमवायातिरिक्त तात्विकसंबंधपर्यंतं नाध्यासिकसंबंधसंभावनेति न तेनार्थांतरं, व्यापकानुपलब्धिबाधश्च निरसिष्यत इत्यर्थः॥ विमतेति॥ आनंदो, ब्रह्म वा स्फुरति इत्यादिकेत्यर्थः॥ अबाधितविशेषणेति॥ संबंधिसमसत्ताकविशेषणविशेष्यसंबंधविषयेत्यर्थः। एतेन ब्रह्मज्ञानपर्यंतमाध्यासिकसंबंधस्याबाधितत्वेन सिद्धसाधनं सर्वथा अबाधितत्वे साध्ये साध्यवैकल्यं दृष्टांतस्येति निरस्तं॥ आनंदस्य स्फुरणस्य ब्रह्मणो वा या सत्ता तद्वतः संबंधस्य सिद्धेः। न च तत्र विशिष्टबुद्धित्वमसिद्धमिति वाच्यं। घटश्चलतीत्यादिवदस्या अपि तथात्वादिति। ननु गोमांश्चैत्र इत्यादौ विप्रकृष्टगवीनां तद्वतश्च संयोगाद्यभावात् अन्यस्य च संबंधस्य तत्राक्लृप्तत्वाद्विशिष्टबुद्धित्वं तत्र व्यभिचारीति शंकां परिहरति॥ गोमानिति॥ गोमांश्चैत्र इत्यादावपि संबंधस्य तत एव साधनान्न तत्र व्यभिचार इत्यर्थः।

ननु संयोगादेरेव संबंधत्वात्तस्य च ज्ञानज्ञेययोरभावात्तत्र संबंधानुमानं बाधितमित्याशंकां संयोगाद्यतिरिक्तसंबंधसाधकाभियुक्तवचसा निराकरोति॥ उक्तं हीति॥ षष्ठी स्थाने योगेति

विषयत्वापातादित्यर्थः॥ तथाचेति॥ सत्यभूतानामेव घटादीनां स्वाकारवृत्तिद्वारा चैतन्यसंबंधोऽस्त्वित्यर्थः। ननु प्रकाशस्य साक्षात्स्वसंसृष्टप्रकाशकत्वनियमेन चैतन्यस्य परंपरासंबंधेन विषयप्रकाशकत्वायोगः। न हि प्रदीपः परंपरासंबद्धं प्रकाशयतीति चेन्न। न हि वृत्तिद्वारक इत्यस्य परंपरासंबंध इत्यर्थः। किं तु सर्वव्यापि चैतन्यस्याविद्यावृतस्य वृत्त्याऽवरणे निवृत्ते अनावृतेन चैतन्येन सत्यानामेव घटादीनां साक्षात्संबंधोऽस्तु। किमर्थमाध्यासिकसंबंधकल्पनमित्यर्थः।

ननु न वयं प्रपंचस्य ब्रह्मात्मकदृगध्यस्तत्वं वदामहे। येन सर्वस्य सर्वदा सर्वं प्रति प्रकाशप्रसंगरूपानिष्टप्रसंगपरिहाराय तत्तदाकारवृत्तिद्वारकसंबंधापेक्षा स्यात्। किं तु तत्तदाकारवृत्त्याऽनावृते चैतन्ये तादृशचैतन्येन साक्षादेव घटादेः संबंधो घटते। अतो न तदर्थं वृत्तिरूपद्वारानुसरणमित्यत आह॥ न हीति॥ विज्ञानवादिमत इति। यदाहुर्विज्ञानवादिनः – "स्वप्नधीसाम्यतो बुद्धेर्बुध्याऽर्थस्य सहेक्षणात्। तद्भेदेनानिरूप्यत्वात् ज्ञानाकारार्थ इष्यताम्" इति। भवतां मते तु दृश्यस्य न तज्ज्ञानेऽध्यासः। किं तु ब्रह्मात्मकदृश्ये वेत्यर्थः। ततः किमित्यत आह॥ सत्याया इति॥ तथाचोक्तातिप्रसंगभंगाय वृत्तिरनुसरणीयेति भावः। नन्वस्तु मम मतेऽपि घटादेः तत्तज्ज्ञान एवाध्यास इत्यत आह॥ उपाधीति॥ मिथ्यात्वेनेति॥ अधिष्ठेयाधिकसत्ताकत्वस्याधिष्ठानत्वौपयिकस्याभावादिति भावः। ननूपाध्युपलक्षितेऽप्युपाधिकृतो भेदोऽप्यस्तीत्यत आह॥ कथंचिदिति॥ दृश्याप्रतीतेरिति॥ तथाच वृत्तिरावश्यकीत्यर्थः॥ आध्यासिकेति॥ घटाकारवृत्तिप्रतिबिंबितचैतन्ये घटप्रकाशके घटानध्यासेन दृक्दृश्ययोराध्यासिकसंबंधसत्त्वात् प्रकाश्यप्रकाशभाव इति कल्पनाऽनुपपन्ना स्यादित्यर्थः॥ आवश्यकेनेति॥ घटाधिष्ठानभूतचैतन्यं घटप्रकाशकमिति मतेऽपि तदभिव्यक्त्यर्थं घटाकारवृत्तिप्रतिबिंबितस्य चैतन्यस्यानुसरणीयत्वात्तेनैव घटानधिष्ठानेन सत्यस्य घटस्य प्रकाशोऽस्तु। तरणिकिरणैरिव स्वानधिष्ठितस्य घटादेरित्यर्थः। न च परोक्षविलक्षणस्फुटतरव्यवहारार्थं विषयाधिष्ठान चैतन्याभिव्यक्तिकल्पनेति वाच्यं। आवश्यकेंद्रिय जन्यवृत्तिप्रतिबिंबितचैतन्येनैव तदुपपत्तेरिति भावः। अधिष्ठानचैतन्यमधिष्ठेयस्य प्रकाशकमिति मते दोषांतरमाह॥ किंचेति॥ सत्यस्येत्यधिष्ठानत्वोपपादनाय॥ नाभिव्यक्तिरिति॥ तथाच न तेन घटादेः प्रकाशः स्यादित्यर्थः॥ न तदधिष्ठानत्वमिति॥ तथाच न तदपि घटादिप्रकाशकमित्यर्थः। ।आत्माश्रयादिति। स्वावच्छिन्नस्य स्वाधिष्ठानत्वे स्वस्यापि स्वाधिष्ठानत्वप्रसङ्गेनात्माश्रय इति। यद्वा घटस्याध्यासे सति घटस्वरूपप्रसिद्धौ चैतन्यस्य घटावच्छिन्नत्वं तदवच्छिन्ने चैतन्ये सत्यधिष्ठानलाभे घटादेरध्यास इत्यात्माश्रय इत्यर्थः।

भानं न स्यात्। भिन्नस्यापि भाने नीलसंविदि नीलेतरस्य धवलादेरपि भानं स्यात्। ननु नीलसंविदि नीलस्य संबंधोऽस्तीति नीलं भासते, धवलादेस्तु तत्र न संबंध इति न भानमित्यत आह॥ नियामकमिति॥ नीलस्य नीलबुद्धेश्च वक्ष्यमाणरीत्याऽन्यः संबंधो न संभवति। येन नियमः स्यात्। तस्मात्संविदि नीलादेरारोपितत्वमेव संबंध इति सत्यत्वे नीलादेः दृक्दृश्यसंबंधानुपपत्तिरूपो बाधकस्तर्कोऽस्ति विपक्षे इत्यर्थः। आत्मख्यातिवादिभिः विज्ञानवादिभिः॥ ग्राह्यलक्षणाभावाख्यमिति॥ ग्राह्यांशस्य घटादेरलीकत्वमभिदधानाः विज्ञानवादिनो ग्राह्यलक्षणाभावं युक्तिं तत्र वदंति। ग्राह्यस्य घटादेर्विषयस्य लक्षणं विषयत्वं तस्याभावः तस्माद्विज्ञानात्मा अर्थः। अर्थस्य विज्ञानाद्भेदे तत्र विषयत्वं न स्यात्। लक्षणानिर्वचने सामर्थ्येनापि ज्ञानविज्ञानविषयत्वं न संभवतीत्यादि। एतच्च बौद्धधिक्कारे स्पष्टम्।

ननु दृग्दृश्ययोः संबंधाभावेऽपि असंबद्धस्यैव तया प्रकाशनमस्त्वित्यत आह दृश्यस्येति। दृक्दृश्ययोराध्यासिकसंबंधं वक्तुं संबंधांतरं निराकरोति॥ नापीति॥ आत्मेति॥ गुणत्वान्न ज्ञेयेन घटादिना संयोगः आत्मगुणत्वान्न समवायः संभवतीत्यर्थः॥ ज्ञानजन्यहानादीति॥ यद्यप्येतत् करिष्यमाणप्रथमपक्षविकल्परीत्या प्रथमपक्षेऽन्तर्भवति। तथापि बुद्धिगोचरत्व मित्यत्रात्माश्रयं वक्तुं पृथग्विकल्पितमिति ध्येयम्॥ ज्ञानकर्मत्वं वेति॥ कर्मत्वं च क्रियाजन्यफलाश्रयत्वातिरिक्तं करणव्यापारविषयत्वादिकत्राभिमतमतो न प्रथमविकल्पांतर्गतिरिति बोध्यम्॥ ।कलधौतेति। रूप्यज्ञानाविषयस्य रूप्यमलादेः रूप्येण सहोपादीयमानत्वाद्रूप्यज्ञानविषयत्वं स्यादित्यर्थः तयोरिति॥ तथाचासंभव इति भावः॥ हानादीति॥ कंटकादिज्ञानं कंडकादिकमेव प्रकाशयति। ततः कंटकांतरेऽनिष्टसाधनत्वं जानतः पुरुषस्य पुरोवर्तिकंटकेऽपि तदनुमानं भवति। अनिष्टसाधनत्वाच्च हेयताबुद्धिर्जायत इत्यंगीकारात् हानादिबुद्धीनां कंटकादिप्रत्यक्षजन्यत्वासंभव इत्यर्थः॥ विषयत्वेति॥ अनुमित्यादिविषयेऽव्याप्तिश्च बोध्या॥ दृश्यमानताया इति॥ दृश्यमानत्वस्य दृग्विषयत्वरूपत्वादित्यर्थः॥ योग्यतायामिति॥ न च योग्यता योग्यतांतरं विनैव योग्या यथा दृश्यत्वं दृश्यत्वांतरं विनैव दृश्यमिति वाच्यम्। अवच्छेदकरूपापरिचये योग्यताया एव ग्रहीतुमशक्यत्वात्। ननु यस्यां संविदीत्यत्र सप्तम्यर्थो न विविक्षित इत्यत आह॥ संविद इति॥ नापीति॥ यस्यां संविदि सत्यां योऽर्थोऽवभासते विषयो भवतीत्यर्थे आत्माश्रय इत्यर्थः॥ मत्समवेतमिति॥ यथा रूपज्ञानमिष्टं ध्वस्तमित्यादौ इच्छादीनां रूपज्ञानावच्छेदकत्वं तथा मत्समवेतं रूपज्ञानमित्यत्र रूपज्ञानात्मसमवायस्य रूपज्ञानावच्छेदकत्वमस्तीत्यर्थः॥ तद्विषयत्वेति॥ इदं रूपमिति ज्ञाने

सापृथिवी'त्यादिश्रुत्या पृथिव्यादीनामपि लक्षणत्वोक्तेश्च। तस्मादनिर्वाच्यत्वं न सत्त्वविरोधि। सत्त्वेऽप्यद्भुतत्वादेवानिर्वाच्यत्वोपपत्तेः। न च निर्वाच्यत्वमपि सत्त्वप्रयोजकम्, न हि शुक्तिरूप्यस्यापीतरभेदसाधकं रूप्यत्वं प्रातीतिकजातिरूपतया सुवचमपि सत्यम्। किं च ब्रह्मण आनन्दत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादि खण्डनोक्तरीत्या दुर्वचमिति ब्रह्म तत्वतोऽनानन्दाद्यात्मकं स्यात्। तस्मादिक्षुक्षीरादिमाधुर्यवदनि र्वाच्यमपि विषयत्वं सदेवेति। अत्रोच्यते – दृश्यत्वादेरनिर्वचनीयत्वं किं सत्त्वेन, उत स्वरूपेण। नाद्यः, सत्त्वेनानिर्वचनीयत्वेऽपि तत्तदाभासलक्षणानालिङ्गितत्वमात्रेणा हेतुत्वोपपत्तेः तन्निर्वचनानपेक्षणात्। न द्वितीयः तात्त्विकातात्त्विकसाधारणेन दृक्संबन्धित्वादिना रूपेण दृग्विषयत्वस्य निर्वक्तुं शक्यत्वात्। लक्षणोक्त्यनुक्त्योर्न सदसद्वैलक्षण्यरूपा निर्वाच्यत्वहानिलाभकरत्वमिति यदवोचः, तदपि न, पूर्वोक्तव्यापकानुपलब्धिसहिताया लक्षणानिरुक्तेः उक्तरूपानिर्वचनीयत्वप्रयोजकत्वात्।

यत्त्वानन्दत्वादिना धर्मेण कीदृगित्यादिना स्वरूपेण च दुर्निरूपत्वाद् ब्रह्मणोऽप्यनिर्वचनीयत्वप्रसङ्ग इति, तन्न, आनन्दत्वादिधर्मवत्तया दुर्निरूपत्वेऽपि दुःखप्रत्यनीकत्वाद्युपलक्षितस्वरूपस्य सत्त्वेन निर्वक्तुं शक्यत्वात्। न चैवं प्रपञ्चे सत्त्वं शक्यनिर्वचनम्, बाधकसद्भावात्। अत एव – कठिनस्पर्शवत्त्वादिना पृथिवीत्वादीनां निर्वचनमस्त्येव, सत्त्वेऽप्यद्भुतत्वादिनानिर्वाच्यत्वोपपत्तिरिति निरस्तम्, न हि निरुक्तिविरहमात्रेणानिर्वाच्यत्वं ब्रूमः, किंतु सत्त्वादिना निरुक्तिविरहेण। स च प्रपञ्चे बाधकादस्त्येव। न च – ज्ञाने विषयस्याध्यस्तत्वे तदज्ञानजन्यं तज्ज्ञाननिवर्त्यं चाध्यासं प्रति विषयत्वं तदनुविद्धतया प्रतीत्यभावश्च न संभवतीति वाच्यम्, चैतन्यमात्राज्ञानजन्यत्वात्, तज्ज्ञाननिवर्त्यत्वाच्च घटादिप्रपञ्चस्येत्युक्तत्वात्। सदिति प्रतीयमानाधिष्ठानचैतन्यानुविद्धतया प्रतीयमानत्वमप्यस्त्येव। तस्मात्सत्त्वे दृग्दृश्यसम्बन्धानुपपत्तिर्दैवै॥ इत्यद्वैतसिद्धौ प्रपञ्चमिथ्यात्वानुकूलतर्कनिरूपणम्॥

इति श्रीमधूसूदन सरस्वतीविरचितायां अद्वैतसिद्धौ प्रथमपरिच्छेदे प्रथमो भागः

न्यायामृततरङ्गिणी

दृग्दृश्यसंबंधानुपपत्तिरूपं पूर्वोक्तं तर्कं निराकर्तुमुत्थापयति॥ अनुकूलेति॥ मायिभिक्षव इति॥ अस्य आहुरित्यनेन संबंधः॥ अन्यचेति॥ नीलसंविदोर्भेदे नीलसंविदि नीलस्य

विषयत्वखण्डनेन निरुच्यमानप्रकृतसंबन्धस्यैव खण्डनात्। न च – विषयित्वानिरुक्तावपि विषयिणः सत्यत्ववद् विषयत्वानिरुक्तावपि विषयः सत्यः स्यादिति वाच्यम्, विषयित्वानिरुक्तावपि विषयाध्यासेनैव तदुपपत्त्या विषयिणः सत्यत्वं युक्तम्, विषयत्वानिरुक्तौ तु विषयस्य सत्यत्वं न युक्तम्, विषयिणोऽनध्यस्तत्वेन विषयाध्यासमन्तरेणान्य स्योपपादकस्याभावत्। यत्र तु विषयिण एवाध्यासः, तत्र विषयः सत्य एव, यथाज्ञानविषयो ब्रह्म। न चोभयाध्यासः, शून्यवादप्रसङ्गात्। अन्यतराध्यासे च विनिगमकमनुवृत्तत्व व्यावृत्तत्वप्रकाशत्वजडत्वादिकमेव। तस्माद्विषयिणो नित्यदृशोऽनध्यासाद् विषयस्यै वात्राध्यासः। न च – 'प्रमाणज्ञानं स्वविषयावरणे' त्याद्युक्त्वा दृग्विषयत्वरूपदृश्यत्वस्य हेतूकरणेन च त्वयाऽपि विषयत्वं निर्वाच्यमेवेति वाच्यम् तत्त्वतोऽनिर्वाच्यत्वेऽपिऽप्यध्यस्तत्वेन घटादिसमकक्षनिर्वाच्यत्वस्य संभवात्।

ननु – कथं प्रमाणज्ञानविषयोऽध्यस्त इति – चेत्(न), प्रपञ्चविषयकज्ञाने तत्त्वावेदकत्वलक्षणप्रामाण्याभावादिति गृहाण। अत एव–

यादृशं विषयत्वं ते वृत्तिं प्रति चिदात्मनः।
तादृशं विषयत्वं मे दृश्यस्यापि दृशं प्रतीति

निरस्तम्, चिदात्मनोऽनध्यासेऽपि वृत्तेस्तत्राध्यस्तत्वेन तद्दृष्टान्तेन प्रकृतेऽनध्यासस्य वक्तुमशक्यत्वात्।

स्यादेतत् – मिथ्यात्वं निर्वचता तत्साधनं दृश्यत्वादिकं निर्वक्तव्यमेव, न हि घटपटाद्यसङ्कीर्णाकारज्ञानं विना तद्विलक्षणव्यवहारः, अथानिरुक्तासङ्कीर्णाकारज्ञानमात्रेण तदुपपत्तिः, तर्हि तुल्यं ममाऽपि। इयांस्तु विशेषः, यत्तव स आकारः सद्विलक्षणः, मम तु त्वन्मतसिद्धप्रातिभासिकवैलक्षण्यसाधकमानसिद्धसत्ताकः, न हि लक्षणोक्त्यनुक्तिभ्यां सदसद्वैलक्षण्यरूपानिर्वचनीयत्वहानिलाभौ, ब्रह्मण्यपि श्रौतस्यापि जगत्कारणत्वादिलक्षणस्य कारणत्वखण्डनरीत्या असंभवात्, त्वयैव–

'कीदृक्तत्प्रत्यगिति चेत्तादृगीदृगिति द्वयम्।
यत्र न प्रसरत्येतत्प्रत्यगित्यवधारये'ति

ब्रह्मणोऽपि दुर्निरूपत्वोक्तेश्च, प्रपञ्चेऽपि त्वदुक्तानिर्वाच्यत्वसमकक्षलक्षणसंभवाच्च, 'यत्कठिनं

तुच्छाकारताया वृत्तिगतत्वेऽपि वृत्तिसंबधस्य तुच्छगतत्वाभावोपपत्तेः। नापि – यथा सतो ब्रह्मणः स्वव्यवहृत्या संबन्धः, तथा घटादेरपि सत एव स्वज्ञानेन संबन्धोऽस्त्विति वाच्यम्, दृष्टान्ते ब्रह्मण्यध्यासस्यैव व्यवहृतिसंबन्धत्वात्। तथा च उभयसंबन्धिसत्त्वे विषयविषयिभावानुपपत्तिः नाप्रयोजकत्वादिना परिभूयते।

एतेन – अध्यासिकः संबन्धो नाम अध्यस्तसंबन्धो वा? अध्यस्तत्वमेव वा? आद्ये सम्बन्धस्य मिथ्यात्वेऽपि सम्बन्धिनो दृश्यस्य दृश इव मिथ्यात्वानुपपत्तिः, द्वितीये ज्ञानस्याप्यध्यस्तत्वेन तत्र अध्यासानुपपत्तिः स्वस्वज्ञानपरंपरायामध्यासस्वीकारे अनवस्था चेति निरस्तम्, ज्ञानं हि वृत्त्यवच्छिन्नं चैतन्यम्, तत्रावच्छेदिकाया वृत्तेर्जडाया अध्यस्तत्वेऽप्यवच्छेद्यस्य चैतन्यस्य प्रकाशरूपस्य अनध्यस्तत्वेन तत्र दृश्यस्याध्यासाद् दृश्यमिथ्यात्वेऽप्यनवस्थाविरहस्योपपत्तेः। अत एव – शाब्दवृत्तिविषयो ब्रह्म न वृत्तौ कल्पितमविद्याविषयो ब्रह्माविद्यायां न कल्पितं यथा तथा दृश्यं न दृशिकल्पितम्, तथा च दृग्दृश्यादेस्तात्त्विक एव सम्बन्धः, सामान्यसम्बन्धेनैवातिप्रसङ्गे निरस्ते विशेषजिज्ञासा विशेषोक्तिश्च विशेषजिज्ञासादिवदनर्थिकैवेति निरस्तम्, वृत्त्यविद्ययोः ब्रह्मणोऽनध्यासेऽपि तयोरेव ब्रह्मण्यध्यासात् सम्बन्धोपपत्तेः, अतस्तत्र तात्त्विकसम्बन्धाभावात्, कथं तद्दृष्टान्तेन दृग्दृश्ययोरपि तात्त्विकसम्बन्ध इत्युच्यते? तथा च प्रसिद्धविशेषे बाधिते सामान्यस्यैव बाधशङ्क्या अतिप्रसङ्गे प्राप्ते विशेषजिज्ञासाया विशेषोक्तेश्च साफल्यात्, न ते निरर्थिके। एतेन सम्बन्धस्य प्रामाणिकत्वे यथाकथंचन लक्षणं भविष्यति। तथा हि – संयोगसमवायान्तर्भावे तल्लक्षणमेव लक्षणं भविष्यति, तदनन्तर्भावे तु तदुभयभिन्नसम्बन्धत्वमेव लक्षणमस्त्विति निरस्तम्, उक्त्युक्त्या प्रामाणिकसंबन्धस्य संयोगसमवायान्तर्भावस्य च दूषितत्वात्। तदुभयबहिर्भूतसम्बन्धत्वं तु वयमपि न निरकुर्मः, किं तु तस्य प्रामाणिकत्वम्। किं च दृक्दृश्ययोः न तात्त्विकसम्बन्धः, सम्बन्धिभिन्नत्वे अनवस्थानात्। न च दृश्यत्वान्तरहीनस्य दृश्यत्वादेरिव सम्बन्धस्यापि स्वनिर्वाहकत्वं क्वचिद् भविष्यतीति वाच्यम्, दृश्यत्वमपि दृक्संबन्ध एव। तस्य च स्वनिर्वाहकत्वं न मायिकत्वं विनेति नास्माकं प्रतिकूलमभ्यधायि देवानां प्रियेण, अभिन्नत्वे सम्बन्धत्वायोगात्,। न चैवमाध्यासिकसंबन्धत्वेऽप्येतद्दोषप्रसङ्गः, तस्य मायिकत्वेन मायायाश्चाघटितघटनापटीयस्त्वेन सर्वानुपपत्तेर्भूषणत्वात्। न च – अतिप्रसङ्गनिराकरणार्थं दृग्दृश्ययोः संबन्धनिर्वचनं प्रकृतम्, न तु विषयत्वनिर्वचनम्, अतो विषयत्वखण्डनमनुक्तोपालम्भनमिति वाच्यम्;

ननु – दृश्यत्वान्यथानुपपत्त्या मिथ्यात्वमित्यर्थापत्तिर्विवक्षिता? किं वा सत्यत्वे दृश्यत्वं न स्यादित्यनुकूलतर्कमात्रम्? नाद्यः, तत्सामग्र्यभावात्। तथा हि – आक्षेप्यस्योपपादकत्वम्, प्रमाणाविरुद्धत्वम्, आक्षेपकस्यानुपपद्यमानत्वं, प्रमितत्वं चेत्यर्थापत्तिसामग्री। प्रकृते चाक्षेप्यं संबन्धिनो मिथ्यात्वं मिथ्यात्वं नाक्षेपकस्य सम्बन्धस्योपपादकम्, प्रत्युत प्रतिकूलमेव। न चाध्यस्तत्वरूपसंबन्धस्य न तत्प्रतिकूलत्वम्, तस्याद्याप्यसिद्धेरनाक्षेपकत्वात्। प्रत्यक्षादिविरुद्धं चेदमाक्षेप्यम्। नाप्येकस्य दृश्यत्वस्योपपत्तये प्रमितानेकस्य त्यागो युक्तः। आक्षेपकं च न दृगध्यस्तत्वम्, तस्यैव फलत आक्षेप्यत्वात्। नापि दृग्विषयत्वरूपो दृग्संबन्ध, तवासिद्धेः। न दृगधीनसिद्धिकत्वम्, दृग्विषयत्वातिरिक्तस्य तस्यासिद्धेः। नान्त्यः, सत्त्वेऽप्युक्तरीत्या संबन्धान्तरेणैव दृश्यत्वस्योपपन्नतया अनुपपत्तेरेवाभावादिति चेन्न, अनुकूलतर्कस्यैव प्रक्रान्तत्वेनार्थापत्तिर्वेत्यादिविकल्पानवकाशाद्, उभयथाप्यदोषाच्च। तथा हि – सत्यत्वे दृग्दृश्यसंबन्धानुपपत्तिः। मिथ्यात्वं च तदुपपादकम्। न च तत्संबन्धप्रतिकूलम्, मिथ्यात्वेऽपि शुक्तिरूप्यस्येदमंशेऽध्यस्तत्वरूपसंबन्धदर्शनेन संबन्धसामान्ये प्रतिकूलत्वाभावात्। आक्षेपकोऽपि दृग्विषयत्वरूपो दृक्संबन्ध एव अध्यासरूपस्य दृग्विषयत्वस्य ममाऽपि संप्रतिपत्तेः, तात्त्विकस्यैव तस्य निषेधात्। न चाध्यस्तत्वस्याद्याप्यसिद्धिः दृक्संबन्धसामान्यस्याक्षेपकस्य प्रसक्तविशेष निषेधेऽप्यध्यस्तत्वरूपविशेषपर्यवसानेनासिद्ध्यभावात्। न हि अध्यस्तसंबन्धत्वेनाक्षेपकता, किं तु संबन्धत्वेन। स चाध्यस्तत्वसंबन्धसंभावनयाप्यबाधित एवेति। न च – घटस्य ज्ञानमिति धीसिद्धसंबन्धसामान्यस्याध्यस्तत्वं न विशेषः, न हि रूप्यस्य शुक्तिरिति प्रतीतिरस्तीति वाच्यम्, रूप्यस्य शुक्तिरिति प्रतीत्यभावेऽपि रूप्यस्य शुक्तिरधिष्ठानमिति प्रतीत्या अध्यस्तत्वस्य संबन्धविशेषत्वसिद्धेः, चैत्रस्य मैत्र इति प्रतीत्यभावेऽपि चैत्रस्य पिता मैत्र इति प्रतीतिवत्। आक्षेप्यमप्यत्र प्रमाणाविरुद्धमेव, अध्यक्षादिविरोधस्य प्रागेव परिहृतत्वात्। आक्षेपके च प्रमितत्वमनपेक्षितमेव, अप्रमितेनापि प्रतिबिम्बेन बिम्बाक्षेपदर्शनात्। तर्कपरतायामपि नाप्रयोजकता, सत्यत्वे सम्बन्धानुपपत्तेर्भवदुक्तन्यायखण्डनेन प्रथमत एवोपपादितत्वात्। दृश्यत्वाभावस्यापादकमत्र सत्त्वमनिर्वाच्यत्वाभावो वा, त्रिकालाबाध्यत्वं वा, उभयथाऽपि न दोषः। न चानिर्वाच्यत्वाभावस्य तुच्छे परोक्षधीवेद्यतया दृश्येऽपि सत्त्वेन व्यभिचारः, कारणासामर्थ्येन तत्र तदाकारवृत्तिसमुल्लासेऽपि दृक्संबन्धरूपस्य दृश्यत्वस्य तुच्छत्वविरोधिनस्तत्राभावात्,

प्रकाश्यो घटाधिष्ठानचैतन्येन न तत्सन्निकर्षजमिति वाच्यम्, वृत्त्यतिरिक्तज्ञाने मानाभावात्। अज्ञाननिवृत्तेरपि तत एव भावादिति चेन्न, वृत्त्युदयात् प्रागज्ञातार्थसिद्ध्यर्थं वृत्त्यतिरिक्तज्ञानस्यावश्यमभ्युपेयत्वात्। अन्यथा तस्य साधकाभावेन शशशृङ्गतुल्यतया सन्निकर्षतज्जन्यज्ञानहेतुत्वेन प्राक् सत्त्वकल्पना निष्प्रामाणिकी स्यात्। तस्माद्यादृशस्य घटादेरिन्द्रियसन्निकर्षाश्रयत्वेन ज्ञानकारणत्वम्, तादृशस्य साधकं किञ्चिन्मानमवश्यमभ्युपेयम्, अन्यथाऽन्वयव्यतिरेकयोरग्रहेण कार्यकारणभावाग्रहात् सर्वमानमेयादिव्यवस्थोच्छिद्येत। तच्च मानं न वृत्तिरूपम्। तदानीं वृत्तिकारणाप्रवृत्तेरिति तद्विलक्षणं नित्यं स्वप्रकाशमेकमेव लाघवाद्, वृत्तिगतोत्पत्तिविनाशजडत्वादिभिस्तदसंस्पर्शात्। तदेव च नानाविधोपाधि संबन्धान्नानाविधव्यवहारभाग् भवति नभ इव घटमणिकमल्लिकाद्युपाधिभेदेन; तच्चाज्ञानसाधकत्वात्स्वरूपतो नाज्ञाननिवर्तकं, वृत्त्युपरक्तं त्वज्ञाननिवर्तकमिति न वृत्तेरनुपयोगः। तथा च सर्वाज्ञानसाधके साक्षिचैतन्ये तस्मिन् घटादेरध्यास इति न काऽप्यनुपपत्तिः? तदुक्तं सुरेश्वराचार्यैः–

सर्वतीर्थदृशां सिद्धिः स्वाभिप्रेतस्य वस्तुनः।
यदभ्युपगमादेव तत्सिद्धिर्वार्यते कुतः॥ इति।
सर्वतीर्थदृशां तावत्सामान्यं मानलक्षणम्।
अज्ञातार्थावगमनं त्वदुक्ते तन्न युज्यते॥
स्वतः सिद्धोऽथवासिद्धो देहादिस्ते भवन् भवेत्।
प्रमाणानां प्रमाणत्वं नोभयत्रापि लभ्यते।
प्रमाणान्यन्तरेणापि देहादिश्चेत् प्रसिध्यति।
वद प्रमाणैः कोन्वर्थो न हि सिद्धस्य साधनम्॥
स्वतोऽसिद्धेऽप्रमेये तु नासतो व्यञ्जिका प्रमा।
नाभिव्यनक्ति सविता शशशृङ्गं स्फुरन्नपि॥ इति।
न च 'घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत्॥'

इति वदता वृत्तिप्रतिबिम्बितस्य घटानधिष्ठानचैतन्यस्य घटानुभवत्वोक्तिविरोध इति वाच्यम्। वृत्तिप्रतिबिम्बितचैतन्यस्य घटाधिष्ठानचैतन्येन सह भेदाभावात्, चैतन्यस्यैकत्वात्। यथा चैकस्यैव चैतन्यस्य सर्वभावकत्वं तथा विस्तरेणोपपादितं 'नाभाव उपलब्धेरित्यस्मिन्नधिकरणे' भाष्यकृद्भिः।

विषयस्य परंपरासंबन्ध एव। ननु – तवापि मते ज्ञेयस्य न स्वज्ञानेऽध्यस्तत्वनियमः, अनध्यस्तस्य तुच्छस्य पञ्चमप्रकारत्वपक्षे अविद्यानिवृत्तेर्भावाद्वैतपक्षे अभावस्य चाऽदृग्रूपत्वेऽपि स्वज्ञानेऽनध्यासाद्, अपरोक्षैकरसे ब्रह्मण्यध्यस्तस्य व्यावहारिकस्यातीतादेर्नित्यातीन्द्रियस्य च परोक्षानुभवरूपे स्वज्ञानेऽनध्यासात्, स्मर्यमाणस्य च स्मृतिरूपे स्वज्ञानेऽध्यासात्, प्रातिभासिकस्य च प्रातिभासिके स्वज्ञानेऽनध्यासात्, त्वन्मते भ्रमरूपज्ञानस्यापि कल्पितत्वादिति चेत्, मैवम्, तुच्छस्याज्ञेयत्वेन ज्ञाने अध्यासाभावाद्, ज्ञेयस्य हि ज्ञानेऽध्यासः, तुच्छस्य तु न ज्ञेयतेत्यग्रे वक्ष्यते। पञ्चमप्रकाराविद्यानिवृत्तेरपि प्रतियोग्यधिकरणे ध्वंसस्यापि तत्र वृत्तेरवश्यंभावाद् अध्यास एव संबन्धः। वस्तुतस्त्वविद्यानिवृत्तेः पञ्चमप्रकारत्वं च भावाद्वैतं चानभ्युपगमपराहतम्। यथा चाविद्यानिवृत्तेर्ब्रह्मरूपत्वं सर्वाद्वैतं च तथोपरिष्टाद्वक्ष्यते। अपरोक्षैकरसे ब्रह्मण्यध्यस्तस्यातीतादेरनुमित्यादिरूपज्ञाने अनध्यासेऽपि यस्मिंश्चैतन्ये तदध्यस्तं तदेव चैतन्यमनुमित्यादिरूपवृत्त्यवच्छिन्नमिति नाध्यासानुपपत्तिः। अतिप्रसङ्गपरिहारार्थं चैतन्यस्य विषयसंबन्धे वृत्त्युपरागापेक्षायामपि नाधिष्ठानत्वेन तदपेक्षा। एवमेव नित्यपरोक्षस्थले स्मृतिस्थलेऽपि प्रातिभासिकस्य प्रातिभासिक्यां वृत्तावनध्यासेऽप्यधिष्ठानविषयकवृत्त्यभिव्यक्तचैतन्य एवाध्यास इति न काप्यनुपपत्तिः।

न च – रूप्यादिकमिदमंशावच्छिन्नचैतन्येऽध्यस्तम्, भासते च अविद्यावृत्तिप्रतिबिम्बित चैतन्येनेति विषयिणि ज्ञाने विषयस्याध्यासः कथमिति – वाच्यम्; एकावच्छिन्न एवापरावच्छेदेन निरपेक्षोपाधेरिवात्र भेदकत्वाभावात्। अत एव अभियुक्तैः फलैक्यादैक्यं ज्ञानस्योच्यते। न च – रूप्यादेः स्वज्ञानेऽध्यस्तत्वे रूप्यज्ञानस्याज्ञाने भ्रमोत्पत्तिस्तञ्ज्ञानेन तन्निवृत्तिरिति च स्याद्, अधिष्ठानाज्ञानज्ञानाभ्यामध्यासस्य जन्मनिवृत्त्योर्नियतत्वाद्, ज्ञानं रजतमिति प्रतीतिप्रसङ्गाच्चेति वाच्यम्; रजताकारवृत्त्यवच्छिन्नचैतन्यस्य रजतभ्रमाधिष्ठानत्वानभ्युपगमाद्, इदमंशावच्छिन्नचैतन्यमेव तु रजतभ्रमाधिष्ठानम्। तच्च दैवाद्रजताकारवृत्त्यवच्छिन्नचैतन्यमपि, नैतावता भ्रमाधिष्ठानत्वे तदपेक्षा। तस्य च भ्रमविरोधिशुक्तित्वाद्याकारेणाज्ञानं भ्रमकारणम्। तेनाकारेण च ज्ञानं भ्रमनिवर्तकम्। अत एव न ज्ञानं रजतमिति भ्रमाकारापत्तिः, वृत्त्यवच्छिन्नस्यैव ज्ञानत्वात्तस्य चाधिष्ठानत्वाभावात्। अधिष्ठानतादात्म्येन चारोप्यप्रतीतिरिति इदं रजतमित्येव भ्रमाकारः।

ननु – घटादेः स्वसन्निकृष्टेन्द्रियजन्यस्वज्ञानात् पूर्वं सत्त्वेन तत्राध्यासो न युक्तः। न च या घटेन्द्रियसन्निकर्षजा वृत्तिस्तया घटो न प्रकाश्यः, येन च

ब्रह्मविषयताप्रयोजकस्याध्यासविशेषस्य तत्राभावात्, तस्य च फलबलकल्प्यत्वात्, न हि चरमवृत्तौ ब्रह्माकारतावदत्राऽपि साऽनुभूयते, इच्छेष्यमाणयोस्तु ज्ञानद्वारक एव संबन्ध इति न पृथक्संबन्धापेक्षा। न च ज्ञाने सन्निकर्षाधीनस्येव स्मृतावनुभवाधीनस्येवेच्छायां ज्ञानाधीनस्य विषयसंबन्धस्यानुभवात् सन्निकर्षादिभ्यो भिन्न इव ज्ञानाद् भिन्न एव संबन्धो वक्तव्य इति वाच्यम्, संबन्धानुभवस्य ज्ञानद्वारकसंबन्धेनाप्युपपत्तेरतिरिक्तसंबन्धकल्पने मानाभावात्, ज्ञानाधीनसंबन्धान्तरस्याननुभवात्। ज्ञाने त्विन्द्रियसन्निकर्षादिना न संबन्धानुभवोपपत्तिः, इन्द्रियसन्निकर्षादीनामतीन्द्रियत्वेन तेषामनुमित्यादिनोपस्थितिं विनैव घटज्ञानमित्यादि संबन्धानुभवात्। स्मृतौ तु अनुभवाधीनसंबन्धस्य शङ्कैव नास्ति, अनुभवस्य तदानीमसत्त्वाद्, उभयोरपि ज्ञानत्वेन तुल्यवदेव सम्बन्धसम्भवाच्च। न च समूहालम्बनजन्यैकविषयेच्छायामुभय विषयत्वापत्तिः, जनकज्ञानस्योभयविषयत्वादिति वाच्यम्, अतिरिक्तसम्बन्धपक्षेऽपि तुल्यत्वात्। अथैकविषयावच्छेदेनैव ज्ञानस्य जनकत्वात् नोभयविषयत्वं, समं ममाऽपि, जनकज्ञाने जनकतावच्छेदकविषयत्वस्यैव सम्बन्धत्वात्। न च नित्येश्वरेच्छाया विषयत्वसंबन्धानुपपत्तिः, तस्या अस्माभिरनङ्गीकारात्, तार्किकाणामपि तत्साधकमानबलेन विलक्षणसंबन्धकल्पनेऽपि जन्यज्ञानजन्येच्छयोरुक्तप्रकारेणैव विषयताभ्युपगमात्। न च – पुत्रादिधीजन्यसुखादेः पुत्रादि विषयत्वापत्तिः, इच्छान्यायादिति वाच्यम्, वैषम्यात्। ज्ञानस्य समानत्वेऽपि इच्छादावेव सविषयत्वप्रतीतिः, न तु सुखादौ। वस्तुस्वाभाव्यात् त्वयाप्यस्यैवार्थस्य वक्तव्यत्वात्। अन्यथा स्फटिके जपाकुसुमसन्निधानाल्लौहित्यवल्लोष्ठेऽप्यापद्येत।

अथ धर्मे तात्पर्यस्यानघ्यासात्तात्पर्यसम्बन्धो न स्यात्, न। तात्पर्यं हि तत्प्रतीत्युद्देश्यकत्वम्, प्रतीतेश्च ज्ञेयान्तरेणेव धर्मेणाऽपि संबन्धोऽध्यस्य एव, प्रतीतिद्वारा च धर्मतात्पर्ययोः संबंध इत्यनुपपत्त्यभावात्। न च – ज्ञानस्य प्रकाशत्वेन प्रदीपसाम्येऽपि आन्तरत्वेन तद्वैलक्षण्यमङ्गीकर्तव्यम्, अत इच्छादिवद्विप्रकृष्टेनापि संबन्धःस्याद्, अन्यथा प्रदीपवदेवाध्यासिकसंबन्धोऽपि न स्यात्, परोक्षवृत्तौ विप्रकृष्टसंबन्धदर्शनाच्चेति वाच्यम्, देशकालविप्रकर्षाभावस्य संबन्धसामान्यप्रयोजकत्वे संभवत्यान्तरप्रतियोगिकसंबन्धभिन्नसंबन्ध एवास्य प्रयोजकत्वमिति कल्पनाबीजाभावात्। इच्छायास्तु नेष्यमाणेन साक्षात्संबन्धः, किं तु ज्ञानद्वारकः परंपरासंबन्ध एवेत्युक्तम्। परोक्षस्थले तु यद्यप्यधिष्ठानचैतन्येन साक्षादेव संबन्धः, तथापि विषयाकारवृत्त्या साक्षात्संबन्धाभावाद् वृत्त्यवच्छिन्नचैतन्येन

भिन्नमेव ज्ञेयकुक्षिनिक्षिप्तत्वात् मिथ्याभूतमङ्गीकुर्मः। स च संयोगादिवदतिरिक्तो वा स्वरूपं वा पराङ्गीकृतपदार्थान्तर्गतो वा तदतिरिक्तो वेत्यस्यां काकदन्तपरीक्षायां न नो निर्बन्धः। न च मिथ्यात्वसिद्धेः प्राक् तदसिद्ध्या अन्योन्याश्रयः, दृग्दृश्यसंबन्धानुपपत्त्या ज्ञेयमात्रस्याध्यासिकत्वे सिद्धे तन्मध्यपतितस्य प्रतियोग्यभावादिसंबन्धस्यापि मिथ्यात्वं, न तु प्रतियोग्यभावादिसंबन्धमिथ्यात्वसिद्ध्यनन्तरं दृश्यमिथ्यात्वसिद्धिरिति व्यवहारोपयुक्तसंबन्धसामान्यस्याप्रतिक्षेपात् न स्ववचनादिविरोधः। तदुक्तं खण्डनकृद्भिः–

बाधेऽदृढेऽन्यसाम्यात् किं? दृढे तदपि बाध्यताम्।
क्व ममत्वं मुमुक्षूणामनिर्वचनवादिनाम्' ॥ इति।

न चादृढत्वं बाधस्य व्यापकानुपलब्धिरूपतर्कस्योक्तत्वात्, स्वक्रियादि विरोधरूपप्रतिकूलतर्कस्य परिहृतत्वाच्च। अत एव न जातिवादिसाम्यम्, तेन हि नियमसापेक्षानित्यत्वसाधककृतकत्वादौ नियमानपेक्षेण दर्शनमात्रेण रूपवत्त्वादिकमापाद्यते, न त्वस्माभिस्तथा नियमनिरपेक्षेण साहचर्यमात्रेण किंचिदापाद्यते। न चैवं ज्ञानज्ञेययोरपि प्रतियोग्यभावादिसमकक्ष्य एव संबन्धोऽस्तिति वाच्यम्, परस्पराध्यासात्मकसंबन्धासंभवेनैव संबन्धान्तरकल्पनात्, तत्संभवे तस्यैव संबन्धत्वात्। न च अज्ञानविषयस्य ब्रह्मणो विषयिण्यज्ञानेऽनध्यासेन विषयस्य विषयिण्यध्यासनियमो न सिद्ध इति वाच्यम्, एवं नियमानभ्युपगमात्, किं तु ज्ञानाज्ञानयोरध्यास एव विषयेण संबन्धः। स च ज्ञाने ज्ञेयस्याज्ञेये चाज्ञानस्याध्यासाद् उपपद्यते। अत एवाध्यासिकसंबन्धव्यतिरेकप्रदर्शने अज्ञानस्याज्ञेयेनेत्यनुदाहरणम्।

ननु – श्रवणादीनां चरमसाक्षात्कारान्तानां स्वविषयेण ब्रह्मणा संबन्धानुपपत्तिः, न हि श्रवणादौ साक्षात्कारे वा ब्रह्माध्यस्तमिति चेन्न, साक्षात्कारो हि वृत्तिर्वा? तदभिव्यक्तचैतन्यं वा? आद्ये तस्याः ब्रह्मण्यध्यस्यत्वेनाज्ञानाज्ञेययोरिव संबन्धोपपत्तेः। अत एव श्रवणादिनापि मानसक्रियारूपेण न संबन्धानुपपत्तिः, द्वितीये तु अभेदेन तत्संबन्धानुपयोगात् तत्संबन्धानुपपत्तिर्न दोषाय। अत एव चरमसाक्षात्कारस्य ब्रह्मण्यध्यस्तत्वाद् यदि तद्विषयत्वं, तदा घटसाक्षात्कारस्यापि ब्रह्मण्यध्यस्तत्वात् तद्विषयत्वापत्तिरिति निरस्तम्, घटसाक्षात्कारस्य घटाभिव्यक्तचैतन्यरूपत्वे ब्रह्मण्यनध्यासाद्, वृत्तिरूपत्वे तस्याः ब्रह्मण्यध्यासेऽपि नाधिष्ठानभूतस्य ब्रह्मणो विषयत्वम्,

द्वितीये परोक्षधीषु व्यभिचारश्च। तृतीयेऽपि ब्रह्मज्ञानपर्यन्ताबाधितत्वेन सिद्धसाधनमेव। सर्वथा अबाधितधीविषयत्वे साध्ये साध्यवैकल्यम्। न च – तात्त्विकसम्बन्धबाधे आध्यासिकसंबन्धसिद्धिः, तथा च संयोगसमवायातिरिक्ततात्त्विकसम्बन्धबाधपर्यन्तं नाध्यासिकसम्बन्धसंभावना, तथा च कथमर्थान्तरसिद्धसाधनसाध्यवैकल्यानीति वाच्यम्, तात्त्विकसंबन्धस्य व्यापकानुपलब्ध्या बाधात्। तथाहि – तात्त्विकसम्बन्धस्य व्यापको देशकालविप्रकर्षाभावः। स चातीतादिविषयकज्ञानादीनां नास्त्येवेति कथं तात्त्विकस्तेषां सम्बन्धः? न च – समवायवत् सम्बन्ध्यभावविप्रकर्षाद्यविरुद्धत्वेनैव तत्सिद्धिरिति वाच्यम्, समवायस्यापि देशकालविप्रकृष्टयोः सम्बद्धव्यवहाराप्रयोजकत्वात्। न हि संबन्ध्यभावेऽपि सन् समवायोऽद्य विनष्टं घटं श्वस्तनेन रूपेण विशिनष्टि। न चाध्यासिकत्वे संबन्धस्य साध्ये धर्मिग्राहकमानबाधः, विशिष्टबुद्धित्वेन प्रथमं तात्त्विकातात्विक साधारणसंबन्धस्यैव सिद्धेः।

किं च संबन्धग्राहक एव तात्त्विकसंबन्धव्यापकानुपलब्धिरूपबाधसहकृतः आध्यासिकसंबन्धे पर्यवस्यति। अतो न धर्मिग्राहकबाधशङ्कापि। न चैवं – युतसिद्धयोरेव संयोगरूपसंबन्धदर्शनादयुतसिद्धिरपि समवायस्य बाधिका स्यादिति वाच्यम्, युतसिद्धयोरपि क्वचित्संबन्धादर्शनेन युतसिद्धत्वस्य संबन्धाप्रयोजकत्वाद्, यस्मिन् सत्यवश्यं संबन्धः, स एव संबन्धस्य प्रयोजक इति समव्याप्तत्वाभावेन युतसिद्धचनुपलब्धेरबाधकत्वाद्, यत्र संबन्धस्तत्रावश्यं युतसिद्धिरिति विषमव्याप्तिकल्पनेऽपि मानाभावाद्, अनुकूलतर्कादर्शनात्, देशकालविप्रकर्षाभाववतां तु सर्वेषां संबन्धदर्शनेन विप्रकर्षे तददर्शनेन च समव्याप्तया प्रयोजकस्य देशकालविप्रकर्षाभावस्यानुपलब्धेः संबन्धबाधकत्व स्यावश्यमङ्गीकरणीयत्वात्। न हि प्रयोजकाभावे प्रयोज्यसंभवः।

नन्वेवं – ध्वंसादरेतीतादिना, मिथ्यात्वलक्षणान्तर्गतस्यात्यन्ताभावस्य प्रतियोगिना, शक्तेः शक्येन अज्ञानस्याज्ञेयेन, इच्छाया इष्यमाणेन, व्यवहारस्य व्यवहर्तव्येन, वाक्यस्यार्थेन, वृत्तिरूपज्ञानस्य ज्ञेयेन, संबन्धो नेति त्वद्वाक्योक्तसंबन्धाभावस्य ज्ञानेनासंबन्धात् स्वन्यायस्वक्रियास्ववचनविरोधाः स्युः, न हि ज्ञाने ज्ञेयमिव प्रतियोग्यादिक मभावादावध्यस्तमिति चेन्न, यद्यप्युक्तन्यायसाम्येन ध्वंसादीनां स्वप्रतियोग्यादिभिस्तात्त्विकः संबन्धो नास्त्येव, अध्यासोऽपि न ज्ञानज्ञेयन्यायेन, उभयोरपि मिथ्यात्वात्। तथापि प्रतीयमानं प्रतियोग्यनुयोगिभावादिकं सर्वथा न निराकुर्मः, किंतु तात्त्विकाध्यासाभ्यां

न हि भवतां विज्ञानवादिनामिव तत्तज्ज्ञाने तत्तदर्थाध्यासस्वीकारः, शुद्धदृशः स्वतो भेदाभावाद् उपाधिविशिष्टाया भेदेऽपि घटादिवत्तस्या अपि मिथ्यात्वेनाधिष्ठानत्वायोगादिति, – चेन्न, प्रकाशस्य साक्षात् स्वसंसृष्टप्रकाशकत्वनियमेन चैतन्यस्य परम्परासम्बन्धेन विषयप्रकाशकत्वायोगात्। न हि प्रदीपः परम्परासम्बद्धं प्रकाशयति; अतो विषयाधिष्ठानचैतन्यमनावृतमेव प्रकाशकम्, आवरणभङ्गश्च वृत्त्या, अतो वृत्तेः पूर्वमाध्यासिकसंबन्धे विद्यमानेऽपि दृश्याऽप्रतीतिरुपपन्ना। अत एव– वृत्तिप्रतिबिम्बित चैतन्यस्य घटप्रकाशकत्वे आध्यासिकसम्बन्धस्यातन्त्रतापातः, घटाभिव्यक्तचैतन्यस्य घटप्रकाशकत्वे आवश्यकेन वृत्तिप्रतिबिम्बितचैतन्येनैव घटप्रकाशोपपत्तौ तदधिष्ठान चिदभिव्यक्तिकल्पनायोग इतिनिरस्तम्, परोक्षविलक्षणस्फुटतरव्यवहारार्थं विषयाधिष्ठान चैतन्याभिव्यक्तिकल्पनाया युक्तत्वात्। न च – शुद्धचैतन्यस्य चरमसाक्षात्कारात्पूर्वं नाभिव्यक्तिः, अभिव्यक्तस्य च घटाद्यवच्छिन्नचैतन्यस्य न तदधिष्ठानत्वम्, आत्माश्रयादिति– वाच्यम्, चरमसाक्षात्कारात् पूर्वमपि शुद्धचैतन्यस्याविद्यावशादधिष्ठानभूतस्य मूलाज्ञाननिवृत्तिलक्षणाभिव्यक्त्यभावेऽपि तदवस्थाविशेषादिनिवृत्तिलक्षणाभिव्यक्त्या विषयप्र काशकत्वोपपत्तेः। न च – घटप्रकाशिकायाः दृशो मिथ्यात्वेनाधिष्ठानत्वं सत्यत्वे दोषाजन्यत्वेन प्रमात्वात् सत्यं स्वविषयं प्रति नाधिष्ठानत्वमित्युभयतःपाशारज्जुरिति – वाच्यम् यतो दोषाजन्यत्वं न प्रमात्वप्रयोजकम्, चैतन्यस्य सर्वत्र दोषाजन्यत्वात्, किंतु दोषाजन्यवृत्त्यवच्छिन्नत्वम्, प्रकृते च तदभावात् न विषयस्य सत्यत्वम्, अतो मिथ्याभूतविषयं प्रत्याधिष्ठानत्वं सत्याया दृशो युक्तम्।

ननु – तात्त्विकसम्बन्धासंभवे आध्यासिकसंबन्धकल्पनम्? स एव तु कुतः? क्लृप्तसंयोगबाधे गुणगुणिनोः समवायवत्तदुभयबाधे तृतीयस्य संभवात्। न च तत्र मानाभावः, समवायवदनुमनाध्यक्षयोः सत्त्वात्। तथा हि– परस्परासंयुक्तासमवेत विशेषणविशेष्यकविशिष्टधीर्विशेषणविशेषसंबलन्धविषया, विशिष्टधीत्वाद् दण्डीति विशिष्ट धीवद्; उक्ता जन्यप्रमा, विशेषणविशेष्यसंबन्धनिमित्तिका, अबाधितजन्यविशिष्टधीत्वात्, संमतवत्; विमता धीः, अबाधितविशेषणविशेष्यसंबन्धविषया, अबाधितजन्य विशिष्टधीत्वाद्दण्डीति विशिष्टधीवत्। गोमांश्चैत्र इत्यादिबुद्धेरपि पक्षकुक्षिनिक्षेप एवेति न तत्र व्यभिचारशङ्का। तथा च संयोगसमवायातिरिक्तसंबन्धसिद्धिरिति – चेन्न, प्रथमे द्वितीये चार्थान्तरम्, आध्यासिकसम्बंधस्यैव विषयत्वेन निमित्तत्वेन चोपपत्तेः।

ननु सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नस्वरूपस्य सम्बन्धत्वं संयोगत्वावच्छिन्नस्य दण्डीत्यादौ सम्बन्धत्ववद्, विशिष्टबुद्धिश्चावच्छेदका विषयिण्येवावच्छेद्यविषया। अतो न स्वरूपसम्बन्धगोचरविशिष्टबुद्धेश्चाक्षुषत्वविरोधः। नच तर्ह्यभावप्रमाभ्रमयोः स्वरूपद्वयमात्रविषयत्वाविशेषात् प्रमाभ्रमव्यवस्थानुपपत्तिरिति वाच्यम्। घटाभाववति घटाभावज्ञानत्वेन तद्भिन्नज्ञानत्वेन च व्यवस्थोपपत्तेः। ननु अतिरिक्ताविषयत्वे तस्यैवानुपपत्तिः न हि भवद्रीत्या तस्योभयात्मकत्वेन तदुभयसत्त्वेन व्यधिकरणप्रकारत्व रूपभ्रमत्वस्यैवाभावे भ्रमतदन्यत्वाभ्यां व्यवस्था संभवतीति चेन्न। घटाभावाभावस्य घटत्वेन तद्वति घटाभावज्ञानस्य व्यधिकरणप्रकारकत्वसम्भवात्। किं च भ्रमस्य वस्तुगत्या यद् घटवत् स विषयः। न तु प्रमाया इत्यतिरिक्तविषयत्वमस्त्येव। न चातीन्द्रियाभावे अव्याप्तिः। अत्यन्ताभावे प्रतियोगिदेशान्यदेशत्वं, प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, अन्योन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वं विशिष्टप्रत्यय जननयोग्यतावच्छेदकम्। तदवच्छिन्नत्वं च विशिष्टप्रतीत्यजनकेऽप्यतीन्द्रियाभावे सुलभम्। न ह्यरण्यस्थो दण्डो न घटजननयोग्यतावच्छेदकावच्छिन्न इति चेत्, नित्यस्यातीन्द्रियस्याकाशा त्यन्ताभावादेर्विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नत्वे अवश्यं विशिष्टप्रत्ययजनकत्व प्रसङ्गात्। नित्यस्य स्वरूपयोग्यस्य सहकारिसमवधाननियमात्।

किं च विशिष्टस्य प्रत्यय इत्यत्र स्वरूपसम्बन्धस्य षष्ठ्यर्थत्वे आत्माश्रयः। सम्बन्धमात्रस्य तदर्थत्वे आत्मत्वादिविशिष्टात्मसम्बन्धिसमूहालम्बनविषये घटपटादावति व्याप्तिः। तयोरपि विशिष्टसम्बन्ध्यविशिष्टविषयज्ञानजनकत्वात्। ज्ञानस्याभावः ज्ञातोऽभाव इति प्रतीत्योर्वैलक्षण्यं न स्यात्। ज्ञानाभावयोरुभयोरेवोभयत्र स्वरूपसंबन्धत्वे विषयकृतविशेषाभावात्। अत एव विशिष्टप्रतीतिजननयोग्यत्वं ज्ञानज्ञेयादिस्थले अतिरिक्तमेव सम्बन्ध इति निरस्तम्। अतीन्द्रिये नित्याभावेऽव्याप्तेः। न हि तत्र विशिष्टप्रतीतिजननयोग्यता, फलोपधानापत्तेः। प्रतीतिघटितस्य चाक्षुषादिप्रतीतावविषयत्वप्रसङ्गाच्च। तस्मात्सत्यत्वे सम्बन्धानुपपत्तेराध्यसिक एव दृग्दृश्ययोः सम्बन्ध इति। इत्यद्वैतसिद्धौ प्रपञ्चसत्यत्वे दृग्दृश्यसम्बन्धभङ्गः।

स्यादेतत्–सर्वस्यापि दृश्यस्य ब्रह्मात्मकदृगध्यस्तत्वेऽपि कस्यचित् कदाचित् कञ्चित् प्रति प्रकाशाय त्वयाऽपि तत्तत्सन्निकृष्टेन्द्रियजन्यतत्तदाकारवृत्तिद्वारक एवानावृतदृक्सम्बन्धः स्वीकृतः, तथा च सत्यत्वेऽपि तद्द्वारक एव सम्बन्धोऽस्तु, किमाध्यासिकसम्बन्धदुर्व्यसनेन ?

अथ यज्ज्ञानं यदीयस्वभावं स तस्य विषयः। मत्समवेतं रूपज्ञानमित्यत्र तु समवाय एव रूपज्ञानावच्छिन्नस्वभावो न तु रूपज्ञानं तदवच्छिन्नस्वभावम्। इदं च ज्ञानस्यैव विषयत्वमुक्तम्, न त्विच्छादिसाधारणमिति नाव्याप्तिरिति चेन्न। यदीयस्वाभावमिति तद्धितस्य यद्विषयकत्वार्थकत्वे आत्माश्रयाद्। अर्थान्तरस्य च निरूपयितुमशक्यत्वाद्। रूपज्ञानाभावाभावस्य रूपज्ञानरूपत्वेन रूपज्ञानस्याप्यभावीयतया तद्विषयत्वापत्तेः। ननु ज्ञानजनककरणसन्निकर्षाश्रयत्वं तद्विषयत्वम्। न च रूपज्ञानकरणमनस्सन्निकर्षाश्रयस्यात्मनस्तद्विषयत्वापत्तिः। करणपदेनासाधारणज्ञानकरणस्यैव विवक्षितत्वात्। न चासाधारणज्ञानकरणचक्षुस्सन्निकर्षाश्रयस्य मनसोऽपि रूपज्ञान विषयत्वापत्तिः। सन्निकर्षपदेनाप्यसाधारणज्ञानजनकसन्निकर्षस्यैवोक्तत्वादिति चेन्न। चक्षुर्मनस्संयोगस्यापि चाक्षुषज्ञानासाधारणकारणत्वेन मनसोऽपि चाक्षुषज्ञानविषयत्वापत्तेः। परोक्षविषये अव्याप्तेश्च। न च तत्र लिङ्गज्ञानं करणम्। तत्र च लिङ्गिनः तद्व्याप्तत्वं सम्बन्धोऽस्तीति वाच्यम्। लिङ्गस्यापि स्वज्ञानसम्बन्धित्वेनानुमितिविषयत्वापत्तेः। न चानुमितौ तद्व्याप्ततारूपसम्बन्ध एव विषयतानियामकः। व्यापकतावच्छेदकव्यापक संबन्धादीनामविषयत्वापत्तेः। न च ज्ञानकरणसन्निकर्षसमानाधिकरणो ज्ञानावच्छेदकत्व साक्षाद्व्याप्यधर्मो विषयत्वम्, इदं च नित्यपरोक्षसाधारणमिति वाच्यम्। वस्तुत्वादिकमेव विषयत्वमित्यापत्तेः। ज्ञानावच्छेदकत्वस्य रूपज्ञानाविषये समवायेऽपि सत्त्वेनातिव्याप्तेश्च। न च ज्ञानज्ञेययोः स्वरूपसंबन्ध एव विषयत्वमिति वाच्यम्, असिद्धेः। तथा हि – स्वरूपसंबन्ध इत्यस्य स्वरूपं संबन्ध इत्यर्थत्वे संयोगादावतिव्याप्तिः। न च तदुभयान्यत्वं विशेषणम्। हिमवद्विन्ध्ययोरपि स्वरूपसंबन्धापत्तेः। संबन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यत्वं स्वरूपसंबन्ध इति चेन्न। आत्मानं जानामीत्यत्राव्याप्तेः। तत्र संबन्धान्तरस्य समवायस्यैव सत्त्वाद्। अतीन्द्रियाभावादावव्याप्तेश्च। न हि तस्य विशिष्टप्रतीतिजननयोग्यत्वे मानमस्ति। अन्यथा तेन विशिष्टप्रत्ययजननापत्तेः। किं च विशिष्टप्रतीतिजननयोग्यत्वं धर्मो वा संबन्धः? तादृशं स्वरूपद्वयमेव वा? आद्ये स्वरूपस्य संबन्धत्वव्याघातः। प्रतीतिघटितस्यास्य चाक्षुषादिज्ञानागोचरत्वप्रसङ्गश्च। न द्वितीयः, अननुगमात्। किं चैवमभावभ्रमानुपपत्तिः। तत्रापि विशिष्टप्रतीतिसंभवे स्वरूपसंबन्धस्य सत्त्वात्। न च प्रमात्वघटितं तल्लक्षणम्। वास्तवसंबन्धसत्त्वे प्रमात्वस्याप्यापाद्यत्वात्। अन्यथा तत्र तस्याप्रमात्वे सम्बन्धाभावः, तस्मिंश्च तस्याप्रमात्वमित्यन्योन्याश्रयात्।

प्रातिस्विकयोग्यतायां मानाभावात्, किंतु तत्र तत्रानुगततत्तद्वृत्तिविषयत्वेन, तथा च आत्माश्रयः। अत एव ज्ञानकर्मत्वं विषयत्वम्। कर्मत्वं च न कारकविशेषः, येनातीतादौ तदभावो भवेत्। किंतु क्रियाधीनव्यवहारयोग्यत्वरूपातिशयवत्त्वम्। अन्यथा घटं करोतीत्यादावसिद्धं घटादि न जनकं, सिद्धं च न कृतिकर्मेति द्वितीयाविभक्तिरनर्थिका स्यादिति निरस्तम्। व्यवहारयोग्यत्वं न व्यवहाररूपफलोपहितत्वम्। कुत्रचित् प्रतिरुद्धे व्यवहारे अव्याप्तेः। नापि तत्स्वरूपयोग्यत्वम्। विषयत्वादन्यस्य तस्यासंभवादिति पूर्वोक्तदोषात्। नच अवच्छेदकाद् भिन्नं सहकारिविरहप्रयुक्तकार्याभाववत्त्वं तदिति वाच्यम्। अनुगतावच्छेदकधर्मं विना तस्यापि ग्रहीतुमशक्यत्वात्। घटं करोतीत्यत्र सिद्धस्यैव कपालादेः कृतिकर्मता। (व्यापार्यतयाऽसिद्धस्यैव कृतिकर्मताङ्गीकारात्। अत एव निष्पादनावाचिधातुसमभिव्याहृतकर्मपदे शक्यावयवे निरूढलक्षणामाहुरसत्कार्यवादिनः। सत्कार्यवादिनां तु पूर्वे सतोऽप्यभिव्यञ्जनीयतया न कारकत्वकृतिकर्मत्वयोरनुपपत्तिः। एतेन – 'यस्यां संविदि' इत्यादि पूर्वोक्तेऽपि न दोषः। संविदीति सति सप्तमी। भासमानत्वं च व्यवहारयोग्यत्वम्। तच्च सति कारणान्तरे व्यवहारावश्यम्भाव इत्येतदपि निरस्तम्।

ननु यः संबन्धान्तरमनपेक्ष्य यज्ज्ञानावच्छेदको यज्ज्ञानानवच्छिन्नस्वभावश्च स तस्य विषयः। यद्यप्यात्मा स्वविषयज्ञानसमवायवान्, तथापि न तस्य ज्ञानावच्छेदे समवायापेक्षा। ज्ञानासमवायिनोऽपि घटादेस्तदवच्छेदकत्वदर्शनात्। यद्यपि च रूपज्ञानं मत्समवेतं, ध्वस्तमिष्टमित्यादौ रूपज्ञानाविषया अप्यात्मसमवायेच्छाध्वंसादयः संबन्धान्तरमनपेक्ष्य ज्ञानावच्छेदकाः, तथापि समवेतेष्यमाणप्रतियोग्यात्मकरूपज्ञानावच्छिन्नस्वभावा एव, संबन्धेच्छादीनां संबन्धीष्यमाणाद्यवच्छिन्नस्वभावत्वादिति नातिव्याप्तिः। ज्ञानविषयस्तु न ज्ञानावच्छिन्नस्वभावः। ज्ञानस्य घटाद्यवच्छिन्नस्वभावत्ववद् घटादेर्ज्ञानावच्छिन्न स्वभावत्वादर्शनात्। यद्यपि स्वग्राहकज्ञानविषयीभूतं ज्ञानविषयकानुमित्यनुव्यवसायादिकं (ज्ञानं) ज्ञानावच्छिन्नस्वभावम्, तथापि स्वयं यज्ज्ञानं प्रति विषयस्तदवच्छिन्नस्वाभावं नेति नाव्याप्तिरिति चेन्न। मत्समवेतं रूपज्ञानमित्याकारकज्ञानस्यात्म समवायविषय कत्वाभावप्रसङ्गाद्। आत्मसमवायस्य संबन्धत्वेन संबन्धिभूतस्वज्ञानावच्छिन्नत्वाद्। घटस्य ज्ञानमिति प्रतीत्या घटावच्छिन्नस्वभावत्वं यथा ज्ञानस्य तथा ज्ञातो घट इति प्रतीत्या घटस्यापि ज्ञानावच्छिन्नस्वभावत्वेनासंभवाच्च।

नाप्यभिज्ञाभिलपने, तयोर्ज्ञेयावृत्तित्वात्। न च विषयविषयिभावेन ते तत्र स्य इति वाच्यम्। तस्यैव विचार्यमाणत्वात्। अत एव न द्वितीयोऽपि। न तृतीयः। ईश्वरज्ञानस्यातीतादिज्ञानस्य च कर्मकारकाजन्यत्वेन निर्विषयत्वप्रसङ्गात्। न चतुर्थः। ज्ञानतदाकारयोरभेदेन सर्वेषां ज्ञानहेतूनां विषयत्वापाताद्। अनुमित्यादिविषये तदभावापाताच्च। न पञ्चमः। दृश्यमानत्वस्य विषयत्वघटितत्वेनात्माश्रयात्। न षष्ठः। योग्यतायां योग्यतान्तराभावात्। न च योग्यता योग्यतां विनैव योग्या, यथा दृश्यत्वं दृश्यत्वान्तरं विनैव दृश्यमिति वाच्यम्। अवच्छेदकरूपापरिचये योग्यताया एव ग्रहीतुमशक्यत्वात्। न च ज्ञानविषयत्वं तदवच्छेदकम्, आत्माश्रयात्। न सप्तमः। नित्येश्वरज्ञानस्य निर्विषयत्वप्रसङ्गात्। नाष्टमः, संविदीति न तावदधिकरणसप्तमी। ज्ञानस्य ज्ञेयानधिकरणत्वात्। नापि विषयसप्तमी, तस्यैव निरूप्यमाणत्वात्। संविदो विषयत्वं संवेद्यस्य च विषयित्वमिति वैपरीत्यापाताच्च। नापि सति सप्तमी। भासमानत्वस्य विषयताघटितत्वेनाऽत्माश्रयात्। नापि नवमः। मत्समवेतं रूपज्ञानमित्यत्र रूपज्ञानसमवायस्य संबन्धान्तरं विनैव रूपज्ञानावच्छेदकस्य 'इदं रूपम्' इति ज्ञानेऽपि विषयत्वापातात्। ननु ज्ञानविषय इत्यभियुक्तप्रयोग एव ज्ञानविषययोः संबन्धः। यथा अभियुक्तस्य मन्त्र इति प्रयोगविषयत्वमेव मन्त्रलक्षणम्। न चान्योन्याश्रयः, पूर्वपूर्वप्रयोगमपेक्ष्योत्तरोत्तरप्रयोगादिति – चेन्न। एतावता हि ज्ञेयत्वमात्रं सामान्यतः स्यात्, न त्वेतज्ज्ञानविषयत्वम्। न चास्मिन् सादौ पूर्वप्रयोगमपेक्ष्य उत्तरोत्तरप्रयोगो वक्तुं शक्यते। तस्यानादिमात्रविश्रान्तत्वात्। किं च प्रयोगोऽपि स्वविषये सम्बन्ध इत्यात्माश्रयोऽपि।

ननु यज्ज्ञानं यदभिलपनरूपव्यवहारकारणं स तस्य विषयः। करणपाटवाद्यभावेन व्यवहारानुदयेऽपि सहकारिविरहप्रयुक्तकार्याभाववत्त्वरूपं कारणत्वमस्त्येव। न च निर्विकल्पकविषये अव्याप्तिः। तस्यानङ्गीकारात्। न च यत्तद्वचाममनुगमो दोषः। कस्य को विषय इति अननुगतस्यैव प्रश्नविषयत्वेन तस्यादोषत्वात्। न च घटज्ञानानन्तरं प्रमादाद्यत्र पट इति व्यवहारस्तत्र घटज्ञानस्य पटाभिलपनरूपव्यवहारजनकत्वेन पटविषयत्वापत्तिः। समानविषयाभिलापं प्रत्येव ज्ञानस्य जनकतया घटज्ञानस्य भिन्नविषयतया तत्राजनकत्वादिति चेन्न। अभिलपनरूपव्यवहारजननयोग्यत्वं न प्रातिस्विकरूपेण निर्णेयम्। अवच्छेदकत्वस्य फलनिर्णेयत्वात्। प्रतिस्वं च फलादर्शनाद्। अजनितफले

विवक्षितत्वात्। चक्षुर्मनस्सन्निकर्षस्य च द्रव्यादिज्ञानसाधारणत्वात्। प्रत्यभिज्ञाया मिन्द्रियस्य तत्तया संस्कारः लिंगज्ञानस्य च लिंगिना तद्व्याप्तलिंगसम्बन्धः, वाक्यज्ञानस्य च तत्परवाक्यसन्निकर्षः। एवमन्यत्रापि सन्निकर्षः ऊह्यः। न हि संयोगादिरेव सन्निकर्षः, किं तु प्रत्यासत्तिमात्रम्। तच्चानतिप्रसंगाय तत्तादिना सह वक्तव्यमिति नाव्याप्तिः। यद्यपि लिंगज्ञानादेः लिंगादिना विषयित्वमेव सम्बन्धः, तथापि स इदानीमुभयसंमतेन सम्बन्धत्वेनैव ज्ञेयः, न तु विषयित्वेनेति नात्माश्रयः। इदं च नियतविषयकजन्यज्ञानविषयलक्षणम्। अथवा यथा पाकजरूपवती पृथिवीत्यत्र पाकजरूपसमानाधिकरणद्रव्यत्व व्याप्यजातिमत्त्वं विवक्षितम्, तथा ज्ञानकरणसन्निकर्षसमानाधिकरणः ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मो विषयत्वमिति नाव्याप्तिरिति। दृग्दृश्यसम्बन्धानुपपत्तिभंगः।

इति श्री व्यासतीर्थविरचितन्यायामृते प्रथमपरिच्छेदस्य प्रथमोभागः।

अद्वैतसिद्धिः

ननु मिथ्यात्वानुमानमप्रयोजकम्, सत्यत्वेऽपि दृश्यत्वोपपत्तेरिति चेन्न। दृग्दृश्यसंबन्धानुपपत्तेः। न हि ज्ञानं ज्ञेयासंबद्धमेव प्रकाशकम्, अतिप्रसङ्गात्। नापि संबद्धम्, आत्मस्वरूपस्य तद्गुणस्य वा ज्ञानस्य ज्ञेयेन संयोगसमवाययोरभावात्। अन्यस्य चानाध्यासिकस्य संबन्धस्याभावात्। न च विषयविषयिभावः सः। तस्य विषयत्वविषयित्वरूपस्य एकैकमात्रनिष्ठत्वेन द्विष्ठसंबन्धात्मकत्वासंभवाद्। दुर्निरूपत्वाच्च। तथा हि (१) विषयत्वं किं ज्ञानजन्यफलाधारत्वम्? किं वा (२) ज्ञानजन्यहानादिबुद्धिगोचरत्वम्? उत (३) ज्ञानकर्मत्वम्? (४) ज्ञानाकारार्पकत्वं वा? (५) दृश्यमानत्वे सति तत्त्वं व? (६) ज्ञानजन्यव्यवहारयोग्यत्वं वा? (७) यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पाद्यते तत्त्वं वा? (८) यस्यां संविदि योऽर्थोऽवभासते स तस्या विषयः, तथा च संविदि भासमानत्वमिति वा? (९) संबन्धान्तरमन्तरा ज्ञानावच्छेदकत्वं वा? आद्ये फलं न तावत् ज्ञातता, अनङ्गीकाराद्, अतीतादावभावाच्च। नापि हानादिः। गगनादौ तदभावात्। कलधौतमलादेरपि तज्ज्ञानविषयत्वप्रसङ्गाच्च।

अन्ये तु यस्संबन्धान्तरमनपेक्ष्य यज्ज्ञानावच्छेदको यज्ज्ञानानवच्छिन्नस्वभावश्च, स तस्य विषयः। यद्यप्यात्मा स्वविषयकज्ञानेन समवायवान्, तथापि न तस्य तदवच्छेदे तदपेक्षा, स्वज्ञानासमवायिनोऽपि घटादेः स्वज्ञानावच्छेदकत्वदर्शनात्। यथात्मनः स्वानुमितिविषयत्वेऽपि विषयत्वेन तत्र हेतुता, तद्वत्। यद्यपि च रूपज्ञानं मत्समवेतम्, रूपज्ञानमिष्टम्, रूपज्ञानं ध्वस्तमित्यादौ रूपज्ञानाविषया अप्यात्मसमवायेच्छाध्वंसादयस्सम्बन्धान्तरमनपेक्ष्य रूपज्ञानावच्छेदकाः, तथापि ते समवेतेष्यमाणाद्यात्मकरूपज्ञानावच्छिन्नस्वभावाः, सम्बन्धेच्छादीनां सम्बन्धीष्यमाणाद्यवच्छिन्नस्वभावत्वादिति नातिव्याप्तिः॥ ज्ञानविषयस्तु न ज्ञानावच्छिन्नस्वभावः, ज्ञानस्य घटावच्छिन्नस्वभावत्ववद् घटादेर्ज्ञानावच्छिन्नस्वभावत्वस्यादर्शनात्। यद्यपि स्वग्राहकज्ञानविषयभूतं ज्ञानविषयकानुमित्यनुव्यवसायादिकं ज्ञानावच्छिन्नस्वभावम्, तथापि स्वयं यज्ज्ञानं प्रति विषयः, तदवच्छिन्नस्वभावं नेति नाव्याप्तिः। अथवा यज्ज्ञानं यदीयस्वभावं स तस्य विषयः। मत्समवेतं रूपज्ञानमित्यत्र तु समवाय एव रूपज्ञानावच्छिन्नस्वभावः, न तु रूपज्ञानं तदवच्छिन्नस्वभावम्। प्रकृतस्य ज्ञानविषयत्वस्यैवेयं निरुक्तिर्नत्विच्छादिविषयत्वस्यापीति न तत्राव्याप्तिर्दोष इत्याहुः।

अथवा यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पद्यते, स तस्य विषयः। न चैवमाकाशसन्निकृष्टेन चक्षुरादिना शब्देन च जन्यं रूपादिज्ञानं प्रति आकाशस्य विषयतापत्तिः, सन्निकर्षस्यापि हेतुत्वेन विवक्षितत्वात्। न च चक्षुरादिनाकाशास्य सन्निकर्षो रूपादिज्ञानहेतुः। ननु तथापि पक्षसन्निकृष्टलिंगजानुमितिं प्रति पक्षः, श्रोत्रसन्निकृष्टवाक्यजशाब्दज्ञानं च प्रति श्रोत्रं विषयः स्यादिति चेन्न, अतीतादिलिंगादेर्ज्ञानेनानुमित्यादिदर्शनेन लिंगज्ञानवाक्यज्ञानयोरेव करणत्वात्। लिंगादिज्ञानस्य चात्मसन्निकर्षो नानुमित्यादिहेतुः, किं त्ववर्जनीयसन्निधिः।

ननु तथापि रूपादिज्ञानस्यात्मा विषयः स्यात्। तत्र मनसः करणत्वादात्ममनस्सन्निकर्षस्य च रूपादिधी हेतुत्वादिति चेत्, न, असाधारणकरणत्वस्य विवक्षितत्वात्, मनसश्च साधारण्यात्। तर्हि मनस्सन्निकृष्ट चक्षुर्जन्यं रूपज्ञानं मनोविषयं स्यादिति चेन्न, सन्निकर्षस्याप्यसाधारणहेतुत्वेन

लक्षणोक्तेश्च। तस्मात्प्रमितस्येत्थमिति निर्वक्तुमशक्यत्वं प्रतिपुरुषमुखं स्पष्टाबाधित दृष्टिदृष्टविलक्षणसंस्थानविशेषस्येव सत्त्वेऽप्यद्भुतत्वादेव युक्तम्। उक्तम् हि – ''अद्भुतत्वादनिर्वाव्यम्'' – इति। न हि शुक्तिरूप्यस्येतरभेदकं रूप्यत्वं प्रातीतिकजातिरूपतया सुवचमिति तद्वचावहाकिम्। न वा मुखसंस्थानविशेषो दुर्वच इति स प्रातिभासिकः, न वा ब्रह्मण आनन्दत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादिकं खण्डनोक्तरीत्या दुर्वचमिति ब्रह्म तत्त्वतोऽनानन्दाद्यात्मकम्। तस्मान्निर्वचनायोग्यस्यापि विश्वस्येक्षुक्षीरादिमाधुर्यवद् ब्रह्मवच्च प्रामाणिकत्वादेव सत्त्वसिद्धेः सदसद्वैलक्षण्य रूपानिर्वाच्यत्वाय निरुक्तिखण्डनं शब्दसाम्याद् भ्रान्तिमूलम्। न च केषांचिन्निर्वचनाशक्तिमात्रेण वस्तूनां तदयोग्यत्वम्। उक्तं हि बौद्धधिक्कारे– ''न हि जात्यंधेन नीलं द्रष्टुं वक्तुं न शक्यत इति अज्ञयेमनिर्वाच्यमेव तत्, दुरवगाहत्वेनापि तदुपपत्तेः'' इति।

'न च तदनिर्वचनं यथा मंत्रस्य 'मन्त्र' इत्यभियुक्तप्रयोग एव लक्षणं तथा ज्ञानविषयस्यापि ज्ञानविषय इत्यभियुक्तप्रयोग एव लक्षणम्। न चान्योन्याश्रयः, पूर्वपूर्वप्रयोगस्य ज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः। अथवा यज्ज्ञानं यदभिलपन रूपव्यवहारकारणं स तस्य विषयः। करणपाटवाद्यभावेन व्यवहारानुदयेऽपि सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वरूपं कारणत्वमस्त्येव। कदापि व्यवहाराजनकं तु निर्विकल्पकं नोपेयत इति नाव्याप्तिः। न च यत्त्वतत्त्वजात्योरभावेनाननुगमः, कस्य को विषय इत्यननुगतप्रश्ने अस्यायं विषय इत्यननुगतस्यैव वक्तव्यत्वात्। घटज्ञानानन्तरं प्रामादिके पट इति व्यवहारे न घटज्ञानं हेतुरिति नातिव्याप्तिः। अत एव ज्ञानकर्मत्वं विषयत्वमित्यत्रापि न दोषः, ज्ञानकर्मशब्देन ज्ञानाधीनव्यवहारयोग्यत्वरूपातिशयवत्त्वस्य विवक्षितत्वात्। न हि क्रियाजन कत्वविशेषः कर्मत्वम्, घटं करोतीत्यादावभावात्। न ह्यसिद्धं जनकम्, नापि सिद्धं कृतिकर्म। अत एव यस्यां संविदीत्यादिलक्षणेऽपि न दोषः। यतस्संविदीति सतिसप्तमी। भासमानत्वं च व्यवहारयोग्यत्वम् योग्यत्वं च सति कारणान्तरे व्यवहारावश्यंभावः। योग्यत्वे च दृश्यत्वे दृश्यत्ववदाध्यासिकसंबन्धे आध्यासिक सम्बन्धवच्च तदेव वान्यद्वा योग्यत्वमस्ति। आत्माश्रयादिकं तु तद्वदेवोत्पत्त्याद्य प्रतिबंधकत्वाददोष इति नाव्याप्तिः।

दृश्यत्वादेरिवसम्बन्धस्यापि क्वचित् स्वनिर्वाहकत्वम्। यदपि ज्ञानविषयत्व निरुक्तिखण्डनम्, तत्प्रकृतानुपयुक्तम्। अनतिप्रसंगाय हि दृग्दृश्ययोस्संबंधो वाच्यः। न तु ज्ञानविषयत्वं निर्वक्तव्यम्। न च विषयत्वस्यानिरुक्तिमात्रेण विषयस्य मिथ्यात्वम्, विषयित्वस्यानिरुक्तावपि विषयीभूतदृग्वत् सत्त्वोपपत्तेः, स्वव्याहतं च। त्वयैव प्रमाणज्ञानं स्वविषयावरणेत्याद्युक्तेः, दृग्विषयत्वस्य हेतूकृतत्वाच्च। न च प्रमाणज्ञाने विषयोऽध्यस्तः, तदज्ञानजन्यं तज्ज्ञाननिवर्त्यं वाऽध्यासं प्रति विषयत्वाद्वा तदनुविद्धतया प्रतीयमानत्वविशेषाद्वान्यस्य तत्राध्यस्तत्वस्याभावाच्च। न ह्यनिर्वाच्यत्वादिरूपं साधारणमध्यस्तत्वं दृश्यविशेषस्य दृग्विशेषप्रकाश्यत्वे तन्त्रम्। किं च–

यादृशं विषयत्वं ते वृत्तिं प्रति चिदात्मनः ।
तादृशं विषयत्वं मे दृश्यस्यापि दृशं प्रति ॥

नन्वनिर्वाच्यमेव विषयत्वं मया व्यवहृतमिति चेन्न, विषयत्वस्यानिर्वाच्यत्वेऽपि तव ब्रह्मवन्ममापि जगतस्सत्त्वोपपत्तेः। त्वयापि व्यावहारिकसत्त्वस्यासंकीर्णव्यवहारस्य च सिद्ध्यर्थं व्यवहाराविसंवादिनो लक्षणस्यापि प्रमाणवदविद्यादाविव वक्तव्यत्वाच्च। कथं च त्वया साध्यं मिथ्यात्वं निर्ब्रुवता साधनं दृग्विषयत्वं न निर्वक्तव्यम्? न च तवापि घटादौ पटाद्यसंकीर्णव्यावहारिकपृथुबुध्नोदराद्याकाराद्यज्ञाने असंकीर्ण घटादिव्यवहारः। नन्वसंकीर्णाकारज्ञानमात्रेण तदुपपत्तौ किं तन्निर्वचनेनेति चेत्, समंममापि। इयांस्तु विशेषः तव स आकारः सद्विलक्षणः, मम तु सन्नितीति। अनिरुच्यमानोऽपि स तव येन मानेनाप्रातिभासिकः, तेनैव मम तात्त्विकोऽस्तु। न च लक्षणोक्त्यनुक्तिभ्यां सदसद्वैलक्षण्यरूपानिर्वचनीयत्वहानिलाभौ, ब्रह्मण्यपि श्रौतस्यापि जगत्कारणत्वादिलक्षणस्य कारणत्वादिखंडनरीत्या असम्भवात्। त्वयैव–

कीदृक्तत्प्रत्यगिति चेत्तादृगीदृगितिद्वयम् ।
यत्र न प्रसरत्येतत्प्रत्यगित्यवधारय ॥

इति ब्रह्मण्यपि दुर्निरूपत्वस्योक्तत्वाच्च। प्रपंचादावपि त्वदुक्तानिर्वाच्यत्वादिलक्षणसम्भवाच्च। "यत्कठिनं सा पृथिवी" त्यादिश्रुत्या पृथिव्यादीनामपि

दृश्यत्वोपपत्तौ प्रत्यक्षस्य स्वतःप्राप्ततत्त्वावेदकत्वत्यागो युक्तः। नाप्येकस्य दृश्यत्वस्योपपत्तये प्रमितानेकवस्तुत्यागो युक्तः। आक्षेपकं च न तावद् दृगध्यस्तत्वम्, तस्याक्षेप्याभिन्नत्वेन मां प्रत्यसिद्धेः। नापि दृग्विषयत्वरूपो दृक्सम्बन्धः। तवासिद्धेः। सिद्धौ वा तेनैव संबंधेन प्रकाशोपपत्त्याध्यस्तत्वं विनानुपपत्त्यभावात्। नापि दृगधीनसिद्धिकत्वम्, दृग्विषयत्वातिरिक्तसिद्धयसंमतेः। नच दृक्संबंधसामान्य माक्षेपकम्, तच्च प्रसक्तविशेषप्रतिषेधेऽध्यस्तत्वरूपविशेषे पर्यवस्यतीति युक्तम्, तस्य घटस्य ज्ञानमिति धीसिद्धसम्बन्धसामान्यं प्रत्यविशेषत्वात्। न हि रूप्यस्य शुक्तिरित्यस्ति। नान्त्यः, सत्त्वेऽप्युक्तरीत्या संबंधान्तरेणैव दृश्यत्वोपपत्याऽ प्रयोजकत्वात्। किं च न तावदनिर्वाच्यत्वाभाव आपादकः, तद्वतोऽपि तुच्छस्य परोक्षधीवेद्यत्वेन दृश्यत्वात्। नापि सत्त्वम्, सत्त्वेऽपि ब्रह्मणस्स्वव्यवहृत्येव घटस्यापि स्वज्ञानेन सन्बन्धोपपत्तेः।

किं चाध्यासिकसम्बन्ध इति कोऽर्थः? किं यः कश्चित्सम्बन्ध एवाध्यस्त इति? किं वा तदध्यस्तत्वमेव सम्बन्ध इति? आद्ये न दृश्यमिथ्यात्वसिद्धिरित्युक्तम्। नान्त्यः, त्वन्मते ज्ञेयवत्तज्ज्ञानस्याप्यध्यस्तत्वेन तत्र तस्यानध्यासादित्युक्तत्वात्। एवं च–

शाब्दवृत्तेर्हि विषयो ब्रह्म तत्र न कल्पितम् ।
यथा तथा दृग्विषयो दृश्यं न दृशि कल्पितम् ॥
अविद्याविषयो ब्रह्म ह्यविद्यायां न कल्पितम् ।
यथा तथा दृशा ग्राह्यं न विश्वं दृशि कल्पितम् ॥

तस्माद् दृग्दृश्येच्छेष्यमाणादेर्नाध्यासिकस्संबन्धः, किन्त्वन्य एव। कोऽसाविति चेत्, न। संबंधेनैवातिप्रसंगे निरस्ते विशेषजिज्ञासाया विशेषगतविशेषजिज्ञासाया इवानर्थकत्वात्। प्रमाणस्य चोक्तत्वात्। संयोगसमवायान्तर्भावे च तल्लक्षणस्यैव बहिर्भावे तु तदितरत्वे सति सम्बन्धत्वादेर्लक्षणत्वाद्, विशेषसंज्ञायाश्च यथारुचि कल्प्यत्वात्।

यत्तु संबंधस्य सम्बन्धिभिन्नत्वेऽनवस्था, न चेत्संबन्धासिद्धिरिति संबंधसामान्यखण्डनम्, तदुक्तरीत्या स्वव्याहतम्। युक्तं च दृश्यत्वाद्यन्तरहीनस्यापि

चादृग्रूपत्वेऽपि स्वज्ञानेऽनध्यासात्। अपरोक्षानुभवैकरसे ब्रह्मण्यध्यस्तस्य व्यावहारिकस्यातीतादेर्नित्यातीन्द्रियस्य च परोक्षानुभवरूपे स्वज्ञानेऽनध्यासात्। स्मर्यमाणस्य च स्मृतिरूपे वृत्त्यात्मके स्वज्ञानेऽनध्यासात्। प्रातिभासिकस्य च प्रातिभासिके स्वज्ञाने व्यावहारिकस्य च वर्तमानघटादेर्व्यावहारिके स्वज्ञानेऽनध्यासात्। त्वन्मतेऽर्थवद् भ्रमरूपज्ञानस्यापि कल्पितत्वात्। अध्यस्ततुल्यत्वेन कल्पितस्य चानधिष्ठानत्वात्, प्रातिभासिकात् पूर्वमसत्यास्तत्प्रतीतेरधिष्ठानत्वायोगाच्च। त्वयापि रूप्यादिकमिदमंशावच्छिन्नचैतन्येऽध्यस्तम्, रूप्याकाराविद्यावृत्तिप्रतिबिंबितेन तु चैतन्येन प्रकाशत इत्यंगीकाराच्च। रूप्यादेः स्वज्ञानेऽध्यस्तत्वेऽधिष्ठाना ज्ञानज्ञानाभ्यामध्यासजन्मनिवृत्त्योर्नियतत्वाद्रूप्य ज्ञानस्याज्ञानज्ञानाभ्यां रूप्यभ्रम जन्मनिवृत्योः प्रसङ्गाच्च। ज्ञानं रूप्यमिति धीप्रसङ्गाच्च। घटादेः स्वसन्निकृष्टेन्द्रियजन्यात् पूर्वं सत्वेन स्वज्ञानेऽध्यासायोगाच्च। ननु या घटसन्निकर्षजा वृत्तिर्न तया घटः प्रकाश्यः, येन च प्रकाश्यः घटाधिष्ठानचैतन्येन न तद् घटसन्निकर्षजन्यमिति चेन्न, त्वन्मतेऽपि वृत्तेरेवाज्ञानविरोधित्वात्। अज्ञाननिवर्तकादन्यस्य च ज्ञानस्यानुपलम्भात्, त्वयापि–

घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः ।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत् ॥

इति वदता वृत्तिप्रतिबिंबितस्य घटानधिष्ठानस्य चैतन्यस्यैव घटानुभवत्वोक्तेश्च।

किं च दृश्यत्वान्यथानुपपत्त्या मिथ्यात्वमित्यर्थापत्तिर्विवक्षिता? किं वा सत्यत्वे दृश्यत्वं न स्यादित्यनुकूलतर्कमात्रम्? नाद्यः, तत्सामग्र्यभावात्। आक्षेप्यस्योप पादकत्वं प्रमाणाविरुद्धत्वं चाक्षेपकस्यानुपपद्यमानत्वं प्रमितत्वं चेति ह्यर्थापत्तिसामग्री। न चाक्षेप्यं सम्बन्धि मिथ्यात्वमाक्षेपकस्य सम्बन्धस्योपपादकम्, किंतु प्रतिकूलमेव। न चाध्यस्तत्वरूपसम्बन्धस्य न तत्प्रतिकूलम्, तस्याद्याप्यसिद्ध्याऽनाक्षेपकत्वात्। न च मिथ्याभूतसम्बन्धस्य न तत्प्रतिकूलम्, स्वतः प्रमाणप्रत्यक्षसिद्धसम्बन्धस्य विनैव बाधकं मिथ्यात्वायोगात्। नच दृश्यमिथ्यात्वमेव बाधकम्, अन्योन्याश्रयात्। प्रत्यक्षादिविरुद्धं चाक्षेप्यं मिथ्यात्वम्। न च प्रत्यक्षाद्यविरुद्धसंबंधान्तरकल्पनेनैव

अज्ञानस्य च तज्ज्ञाननिवर्त्यत्वातिरिक्ततद्विषयत्वाभावे तन्निवर्त्यत्वमेव न स्यात्, तस्य समानविषयकज्ञाननिवर्त्यत्वात्। अज्ञानस्यान्धकारवद् आश्रयाच्छादकत्वेऽपि सविषयत्वस्य स्वीकृतत्वाच्च। यदि च भावाभावादेः सम्बन्धान्तरमन्तरेण तद्विशिष्टव्यवहारजननयोग्यस्वरूपात्मकः स्वभावसम्बन्धो वा असम्बन्धरूपं प्रतियोगित्वादिकं वा नियामकं सत्यसम्बन्धकार्यकारि, तर्हीहापि विषयत्वं तथैवास्तु। भावाभावादेरपि संबंधो मिथ्यैवेति चेन्न। प्रपञ्चमिथ्यात्वसिद्धेः प्राक् तदसिद्ध्याऽन्योन्याश्रयात्। घटस्याभावमित्यादावभावसमसत्ताकसंबंधवद् घटस्य ज्ञानमित्यत्रापि ज्ञानसमसत्ताकसंबंधस्य स्वीकार्यत्वसिद्धिः, ज्ञानस्येव ज्ञेयस्य सत्यत्वेऽपि तत्संबंधमिथ्यात्वोपपत्तेः। न च संयोगादिरपि त्वन्मते तात्त्विकः। न च तावता दण्डे चैत्रोऽध्यस्तः। न चाध्यासिकसंबन्धोऽपि तात्त्विकः येनेच्छादौ कृत्स्नसंबंधत्यागेन ज्ञाने स आश्रीयेत। न चाभावादेः प्रतियोग्यादिना सम्बन्धोऽस्ति न तु ज्ञानस्य ज्ञेयेनेति युक्तं नियामकाभावात्। दृग्दृश्ययोः सम्बन्धोनेत्ये तद्वाक्यजज्ञानस्य स्वज्ञेयेन, श्रवणमननादीनां च श्रोतव्यादिरूपेण ब्रह्मणा, चरमसाक्षात्कारस्य च साक्षात्कर्तव्येन ब्रह्मणा, असंबंधेन स्वक्रियादिविरोधापाताच्च। न हि दृग्दृश्ययोस्संबंधोनेति वाक्यजज्ञाने दृग्दृश्यसंबंधाभावश्चरमसाक्षात्कारादौ च ब्रह्माध्यस्तम्। ब्रह्मणि अध्यस्तस्य तत्साक्षात्कारत्वे घटटसाक्षात्कारस्यापि तत्त्वापातात्। धर्मादौ तत्तात्पर्यादिरनध्यासाच्च। इहापि ज्ञेये ज्ञानाध्यासापाताच्च। एवं च–

दृग्दृश्ययोर्न संबन्ध इति वाक्योत्थसंविदि ।
अनध्यासात्तदर्थस्य संबंधोऽन्यस्तयोर्मतः ॥

यद्यपि ज्ञानं प्रकाशस्तथापीच्छादिवदान्तरत्वेन प्रदीपवैलक्षण्यात्, परोक्षवृत्तौ दर्शनाच्च विप्रकृष्टेनापि प्रकाश्येन संबन्धो युक्तः, अन्यथा दीपवदेवाध्यासिकसबन्धो न स्यात्।

किं च तवापि मते ज्ञेयस्य न स्वज्ञानेऽध्यस्तत्वनियमः, अनध्यस्तस्य तुच्छस्याविद्यानिवृत्तिः पंचमप्रकारेति मतेऽविद्यानिवृत्तेर्भावाद्वैतमते अभावस्य

विशेषणविशेष्यतत्सम्बन्ध विषयिका, विशिष्टधीत्वात्, दंडीतिविशिष्टधीवत्। उक्ता जन्यप्रमा विशेषणविशेष्यसम्बन्धनिमित्तिका, अबाधितविशिष्टजन्यधीत्वात्, संमतवत्। विमता धीः, अबाधितविशेषणविशेष्यसम्बन्धविषयिका, अबाधितविशिष्टधीत्वाद्, दंडीति प्रमावदित्यनुमानात्तत्सिद्धेः। गोमांश्चैत्र इत्यादिधीरपि पक्ष एव। उक्तं हि – "षष्ठी स्थाने योगे" त्यत्र महाभाष्ये – "एकशतं षष्ठ्यर्था" इति। ते च स्वस्वामिभावादयः सम्बन्धाः षष्ठीदंडके पठिता इत्युक्तं कैयटे। प्रमितवस्त्वनुसारेण हि प्रक्रिया कल्प्या, न तु स्वकल्पितप्रक्रियानुरोधेन प्रमितित्यागः। न च सम्बन्धद्वित्वमेव बाधकम्, अन्योन्याश्रयात्। अन्यथा सम्बन्धैक्यं समवायबाधकं स्यात्। नाप्यतीतादौ सम्बन्ध्यभावो वा ज्ञानज्ञेययोर्विप्रकर्षो वा बाधकः, अस्य संबंधस्य समवायवत् संबंध्यभावविप्रकर्षाद्यविरुद्धत्वेनैव धर्मिग्राहकेण सिद्धेः। अन्यथा हि पृथक्सिद्धयोरेव संयोगसम्बन्धदर्शनाद् अपृथक्सिद्धिः समवायसंबंधस्य बाधिकास्यात्। ध्वंसादेश्चातीतादिना मिथ्यात्वलक्षणांतर्गतस्यात्यंताभावस्य च प्रतियोगिना वेदान्तनिष्ठशक्तितात्पर्ययोश्च ब्रह्मणा जीवाश्रिताज्ञानस्य चाऽज्ञेयेन ब्रह्मणा व्यवहारस्य च व्यवहर्तव्येन ब्रह्मणा मुमुक्षायाश्च मोक्षेण त्वदुक्तदूषणस्य च दूष्येण त्वद्वाक्यस्य चाऽर्थेन ज्ञानस्य ज्ञेयेन संबंधो नेति त्वद्वाक्योक्तसंबंधाभावस्य स्वज्ञानेनाऽसंबंधात्स्वन्यायस्वक्रियास्ववचनविरोधाःस्युः। न हि ज्ञेयं ज्ञान इव प्रतियोगिशक्याज्ञेयेष्यमाणव्यवहर्तव्यादयः अभावशक्त्यज्ञानेच्छाव्यवहारादावध्यस्ताः। एतेन

न्यायेऽदृढेऽन्यसाम्यात्किं दृढेऽन्यदपि बाध्यताम् ।
न ममत्वं मुमुक्षूणामनिर्वचनवादिनाम्॥

इति निरस्तम्, स्वव्याहतस्य न्यायाभासतया दाढर्याभावात्। अन्यथा जातिवाद्यपीत्थं वदेत्। न चेच्छायास्तज्ज्ञानजन्यत्वादन्यस्तत्सम्बन्धो नेति युक्तम्, ज्ञाने सन्निकर्षाधीनस्येव स्मृतावनुभवाधीनस्येव चेच्छायां ज्ञानाधीनस्य विषयसम्बन्धस्यानुभवात्। अन्यथा घटपटावितिज्ञानजन्यायाः पटेच्छाया घटीयत्वापातात्। नित्येश्वरेच्छाया विषयाऽऽसम्बन्धापाताच्च, पुत्रादिधीजन्यसुखादेस्तद्विषयत्वापाताच्च।

न तृतीयः। ईश्वरज्ञानस्यातीतादिज्ञानस्य च कर्मकारकाजन्यत्वात्। न चतुर्थः, ज्ञानतदाकारयोरभेदेन सर्वेषां ज्ञानहेतूनां विषयत्वापातात्। न पंचमः। दृश्यमानताया एवाद्याप्यनिरूपणात्। न षष्ठः। योग्यतायां योग्यतांतराभावात्। न सप्तमः। नित्येश्वरज्ञानस्य निर्विषयत्वापातात्। अष्टमेऽपि संविदीति न तावदधिकरणसप्तमी। ज्ञानस्य ज्ञेयं प्रत्यनधिकरणत्वात्। नापि विषयसप्तमी। तस्यैव निरुच्यमानत्वात्। संविदो विषयित्वमर्थस्य विषययित्वमिति वैपरीत्यापाताच्च। नापि सति सप्तमी। भासमानताया एवाद्याप्यनिरूपणात्। न नवमः। यत्समवेतं रूपज्ञानमित्यत्र रूपज्ञानात्मसमवायस्य संबंधांतरं विनैव रूपज्ञानावच्छेदकस्य तद्विषयत्वापातात्। तस्मात्सत्यत्वे दृश्यत्वानुपपत्तेर्दृग्दृश्ययोराध्यासिक एव संबंध इति।

अत्रोच्यते– सर्वस्यापि दृश्यस्य ब्रह्मात्मैकदृगध्यस्तत्वेऽपि कस्यचित्कदाचित्कंचित् प्रति प्रकाशाय त्वयापि तत्तत्संनिकृष्टेन्द्रियजन्यतत्तदाकारवृत्तिद्वारक एवाऽनावृत दृक्संबंधः स्वीकृतः। तथा च सत्यत्वेऽपि तद्द्वारक एव संबंधोऽस्तु, किमाध्यासिकसम्बन्धदुर्व्यसनेन? न हि त्वन्मते विज्ञानवादिमत इव तत्तदर्था स्तत्तज्ज्ञानेऽध्यस्ताः। सत्यायाः शुद्धदृशः स्वतो भेदाभावादुपाधिविशिष्टाया भेदेऽपि घटादिवन्मिथ्यात्वेन तदधिष्ठानत्वायोगात्। उपाध्युपलक्षितायास्सत्यत्वेऽप्यभेदात्। कथंचिद्भेदेऽपि वृत्तिद्वारकसम्बन्धात्प्रागध्यस्तत्वरूपे सम्बन्धे सत्यपि दृश्याप्रतीतेः। किं च किं घटाकारवृत्तिप्रतिबिंबितं चैतन्यं घटप्रकाशकम्? किं वा तदभिव्यक्तं घटाधिष्ठानचैतन्यम्? नाद्यः, आध्यासिकसम्बन्धस्याऽतंत्रत्वापातात्। नांत्यः, आवश्यकेन वृत्तिप्रतिबिंबितेनैव प्रकाशोपपत्तौ तेनाधिष्ठानचिदभिव्यक्त्यादि कल्पनायोगात्। किं च घटाधिष्ठानस्य सत्यस्य चिन्मात्रस्य चरमसाक्षात्कारात्पूर्वं नाभिव्यक्तिः। अभिव्यक्तस्य तु घटाधिष्ठानचैतन्यस्य न तदधिष्ठानत्वम्, आत्माश्रयात्। किं च घटप्रकाशिकाया दृशो घटवन्मिथ्यात्वे न तदधिष्ठानत्वं सत्यत्वे दोषाजन्यत्वेन प्रमात्वात् सत्यं स्वविषयं प्रति नाधिष्ठानत्वमित्युभयतः पाशारज्जुः। यत्तूक्तं ज्ञानज्ञेययोर्न सन्बन्ध इति तन्न, गुणगुण्यादेस्संयोगासंभवे समवायवत् ज्ञानज्ञेययोरुभयासंभवेऽन्यस्य संभवात्। अभाववद् भूतलं, ज्ञातो घटः, इष्टो घटः, घटस्याभाव इत्यादिका परस्परासंयुक्तसमवेतविशेषणविशेष्यविषयकविशिष्टधीः,

तथाचासत्यायामेवासत्तायामधिष्ठानत्वं प्राप्तमिति अधिष्ठानमसदिति प्रसिद्ध्यतीत्युपपादनं द्रष्टव्यं। अथवा अधिष्ठानत्वस्य सत्तायामभावे तद्विरुद्धासत्त्वप्राप्त्या सर्वथाऽत्यंतासत्त्वप्राप्तेः सत्तास्वरूपमेव कुत्रापि नास्तीति प्राप्तं तथाच यदधिष्ठानत्वेन संमतं किंचित्तत्रापि सत्ता नास्तीति प्राप्त्याधिष्ठानमसदेवापन्नमिति भावः। असत्कारणता श्रुत्यादिविरुद्धाचेत्याह॥ कथमिति॥ असदेवेदमग्र आसीदित्यादिनाऽसतः कारणत्वं पूर्वपक्षय्य कथं नु खलु सोम्यैवं स्यात्कथमसतः संज्जायेतेत्यादिनाऽसतःकारणत्वं निषिद्धमित्यर्थः॥ नासत इति॥ असतःकारणत्वं न युज्यतेऽदृष्टत्वादिति सूत्रार्थः। विरुद्धाऽन्यत्र निरस्ताच असत्कारणतेति वर्तते। उपसंहरति॥ तस्मादिति॥ असत्त्वइति॥ दृश्यत्वादिहेतुभिर्हेतुवाक्यादिप्रापितानां साधनव्याप्त्यादीनां मिथ्यात्वबोधनेन तेषामसत्त्वे प्राप्तेऽसिद्ध्यादि दुर्वारमित्यर्थः॥ असतःसाधकत्वाभावे बाधकोद्धारविवरणं॥

३३. दृग्दृश्यसम्बन्धानुपपत्तिभङ्गः

अनुकूलतर्कहीनाश्च मिथ्यात्वहेतवः। अत्र केचिन्मायिभिक्षवः-

अन्यच्चेत्संविदो नीलं न तद् भासेत संविदि।
भासते चेत्कुतः सर्वो न भासेतैकसंविदि॥
नियामकं न संबंधं पश्यामो नीलतद्धियोः।

इत्यादिवदद्वैरात्मख्यातिवादिभिरुक्तं ग्राह्यलक्षणाभावाख्यं तर्कं भिक्षित्वाऽऽहुः। दृश्यस्य सत्यत्वे न तावज्ज्ञानं तदसम्बद्धं प्रकाशकम्, अतिप्रसंगात्। नापि संबद्धम्। आत्मगुणस्य ज्ञानस्य ज्ञेयेन संयोगसमवाययोरयोगात्। अन्यस्य च संबंधस्याऽभावाद्। विषयविषयिभावस्य चाद्विष्ठत्वेनासम्बन्धत्वाद् दुर्निरूपत्वाच्च। तथा हि-विषयत्वं किं ज्ञानजन्यफलाधारत्वम्? ज्ञानजन्यहानादिबुद्धिगोचरत्वं वा? ज्ञानकर्मत्वं वा? ज्ञानाकारार्पकत्वं वा? दृश्यमानत्वे सति तत्त्वं वा? ज्ञानजन्यव्यवहारयोग्यत्वं वा? यत्संनिकृष्टकरणेन यज्ज्ञानमुत्पद्यते, स तस्य विषय इति वा? यस्यां संविदि योऽर्थोऽवभासते स तस्या विषय इति वा? संबंधांतरमंतरेण यो यज्ज्ञानावच्छेदकः स तस्य विषय इति वा? आद्येऽपि फलं न तावज्ज्ञातता, अनंगीकाराद्। अतीतादावसंभवाच्च। नापि हानादिः, गगनादौ तदयोगात्। कलधौतमलादेरपि तज्ज्ञानविषयत्वापाताच्च। नाप्यभिज्ञाभिलपने, तयोर्ज्ञेयानिष्ठत्वात्। न द्वितीयः। हानादिबुद्धीनां तदजन्यत्वाद्। गोचरताया एवाद्याप्यनिरूपणाच्च।

सत्तायांच सत्ताविरहात्। एवं च सत्ताविरहितत्वेनासत्या एव सत्तायाः काणत्वं प्राप्तमिति असतः कारणत्वसिद्धिः। द्वितीये तर्ह्यसदेव कारणमित्यायातं कुतः ततः सत्तायां कारणत्वास्वीकारात्। अयं भावः। सत्ताजातिस्तावत् द्रव्यं सत् गुणः सन् कर्मसदित्यनुगतव्यवहारजनकत्वेनाभ्युपेया। प्रकारांतराभावात्। एवंच सत्तायां कारणत्वाभावेऽनुगतव्यवहारजनकत्वमेव न स्यात्। जनकत्वस्य कारणत्वरूपत्वात्। तथाच सत्तास्वरूपएव प्रमाणाभावप्राप्त्या सत्तावार्तायां एव लोपेन सर्वेषामपि कारणानां दंडादीनामसत्त्वप्राप्त्याऽसतामेव कारणत्वसिद्धिरिति॥ असत्कारणतेति॥ एतस्य स्वव्याहतेत्यादिनान्वयः। तदीयग्रंथे तदीयप्रमेये पूर्वपक्षिणा केनचिच्छ्लोकेन दूषिते सति तेनोक्तमस्ति।

त्वद्ग्रंथएवान्यथाकारा अक्षराणि कियंत्यपि।
तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठेति।

अस्मिन्नर्थेऽस्मदभिमतविषयेपि त्वद्ग्रन्थ एव। किंयंत्यक्षराणि स्थापयित्वाऽन्यथाकारा दुष्पठा न खलुसुपठैवेति तदर्थः। एतमेवखंडनकारोक्तं न्यायं हृदि निधायाह॥ अस्येत्यादिना॥ तत्प्रकारस्तु

अंतर्भावितसत्त्वं चेदनसत्कारणं ततः।
नांतर्भावितसत्त्वं चेदनसत्कारणंतत इति।

अकारप्रश्लेषेण पठितुं शक्यत्वादित्यर्थः। कारिकार्थस्त्वित्थं अंतर्भावितसत्त्वं अबाध्यत्वरूपसत्ताविशिष्टं दंडादिकारणं चेत् तर्हि ततः सत्ताविशिष्टस्य कारणत्वाभ्युपगमात् अनसत्कारणं असत्कारणं न, किन्नाम तदेव कारणमित्यायातम्। अबाध्यत्वरूपसत्ताविशिष्टे अबाध्यत्वरूपसत्तायाः सत्त्वात् आत्माश्रयत्वस्य प्रमेयत्वादेः स्ववृत्तित्व इवादोषत्वात्। नान्तर्भावितसत्त्वंचेत् सत्त्वोपलक्षितं कारणं चेत् तर्हि ततस्सत्त्वोपलक्षितस्य कारणत्वांगीकारादेवानसत्कारणं सदेव कारणमिति सिध्यति। अबाध्यत्वरूपसत्त्वोपलक्षितेपि अबाध्यत्वरूपसत्तायाः सत्त्वादित्यर्थः। एवंद्वितीययोजनायामपि कारणत्वं सत्तायां वर्तते नवेत्यर्थः। तत्र कारणत्वं सत्तायां वर्तत इति पक्षेप्यनसत्कारणं सिध्यति सत्तायामप्यबाध्यत्वरूपसत्तायाः स्वीकारेण सत्तायां सत्तारहितत्वाभावात्। कारणत्वं सत्तायां नास्तीति पक्षेप्यनसत्कारणं सिद्ध्यति। सत्तायां कारणत्वाभावे तस्याः स्वज्ञानं प्रत्यपि कारणत्वाभावप्रसंगेन सत्तास्वरूपस्यैवाप्रामाणिकत्वं स्यात् अतः कारणभिन्नसत्ता सति तिष्ठतीत्यंगीकार्यं तथाच सत्ताया एव कारणत्वसिद्धिरिति किंचिद्द्रष्टव्यं॥ अंतर्भावितेति॥ अयमिह कारिकार्थः। अंतर्भावितसत्त्वंचेदधिष्ठानं सत्ताविशिष्टमधिष्ठानमिति यावत्। तर्ह्यधिष्ठानमसदेवेति प्राप्तं सत्ताविशिष्टेऽधिष्ठाने आत्माश्रयप्रसंगेन सत्ताया अभावात्। नांतर्भावितसत्त्वं चेदधिष्ठानं सत्तोपलक्षितं सत्ताविरहितंचेदधिष्ठानमिति यावत्। तर्ह्यधिष्ठानमसदेवेति प्राप्तमिति त्वदुक्तन्यायेनाधिष्ठानस्याप्य सत्त्वापत्तिःस्यादित्यर्थः। यद्वा उभयत्राप्यधिष्ठानमिति भावप्रधानः। तथाचांतर्भावितसत्त्वंचेदधिष्ठानमित्यादेः सत्तामंतर्भाव्याधिष्ठानत्वं वर्तते नवा अधिष्ठानत्वाश्रयकोटौ सत्ता वर्तते वा न वेत्यर्थः। सत्तायामधिष्ठानत्वं वर्तते वा नवेति यावत्। आद्येऽसदधिष्ठानं सत्तायां सत्ताभावेनासत्त्वात्। द्वितीये सत्तायामधिष्ठानत्वं नास्ति चेत्तर्हि असदेवाधिष्ठानमिति प्राप्तं असत्तायांच सत्ताया व्याघातेनाभावादसत्ताऽसत्येवेति।

क्षीरादिसंबंधं विनापि प्रकारांतरेण प्रतिपादयितुमशक्यत्वात्क्षीरादिनैव निरूपणं तथा ज्ञानस्य स्वतोविलक्षणस्यापि घटादिसंबंधं विना प्रकारांतरेण निरूपयितुमशक्यत्वात् घटादिना निरूपणं युक्तं। तावता नानुभवसिद्धविशेषापलापः कार्यइत्यर्थः। किंच सविशेषआख्यातुंच शक्यत इत्याशयेनाह॥ किंचेति॥ तत्तदाकारत्वेन तत्तत्प्रतिबिंबितत्वेन स्वतएव वैलक्षण्यमिति संबंधः॥ तत्तदीयेति॥ घटपटीयस्वभावत्वादिरेव विशेषइत्यर्थः। नन्वेवं घटीयस्वभावस्य ज्ञानस्य स्वकार्यं प्रति कारणत्वाद्घटादेरपि कारणत्वेन निवेशःप्राप्तः तव्यवहारजननशक्तत्वस्य वा ज्ञानगतविशेषत्वे तत्कार्येपि तत्कारणत्वेन निवेशःप्राप्तएवेत्यतआह॥ नहीति॥ घटीयस्वभावस्य तदभावस्येति सामानाधिकरण्यं। अयमत्रविवेकः। त्वन्मते घटाकारवृत्तिरस्ति तत्र घटाकारवृत्तेर्यत्कार्यमस्ति तत्कारणत्वेन घटादेरपि न निवेशः। तत्र दृष्टांतो गवयेति। गवयाकारेरेखाच वर्तते तस्या यत्कार्यं तत्र कारणत्वेन प्रसिद्धगवयस्य न निवेशस्तद्वत् ज्ञानस्य तदीयस्वभावत्वेपि तत्तदीयस्वभावोपेतज्ञानकार्ये न घटादेःकारणत्वेन प्रवेशः। तत्र दृष्टांतः घटीयस्वभावस्य तदभावस्येति। घटीयस्वभावस्य घटाभावस्य यत्कार्यं तत्कारणत्वेन घटादेर्नप्रवेशस्तद्वत् तथाज्ञानस्य तव्यवहारजननशक्तत्वेन स्वतो वैलक्षण्ये तव्यवहारजननशक्तस्य ज्ञानस्य कार्ये तच्छब्दोदितघटादेः कारणत्वेन न प्रवेशः। तत्र दृष्टांतो दाहशक्तेरिति। दाहशक्तिमतो वह्नेरित्यर्थः। यथा दाहशक्तिमतोवह्नेर्यत्कार्यं हिमनिवारणादि तत्र कारणत्वेन न वह्नेः प्रवेशस्तथेत्यर्थः। अत्र सर्वस्यापि तत्तद्विषयसंबंधं विना व्यवहर्तुमशक्यत्वादेव तत्तव्यवहारो न तु तद्बलात् कारणकोटौ प्रवेशोऽस्य कल्प्यइत्याशयः॥ तद्धेतुजन्यत्वादिति॥ सर्पज्ञाने या कृत्स्नसामग्री तज्जन्यत्वादित्यर्थः। यद्यपि सर्पज्ञानहेतुसर्पसन्निकर्षजन्यत्वं रज्जुसर्पज्ञाने नास्ति रज्जुसन्निकर्षस्यैव सर्पज्ञानहेतुत्वमित्यंगीकारात् तथापि सर्पज्ञानहेतुर्द्विविधः सर्पसन्निकर्षो दोषश्चेति रज्जुसर्पज्ञानेच दोषरूपसर्पज्ञानकारणमस्त्येवेति भावः। तथाचोक्तं सुधायां। सचायंविशेषः सत्यसर्पज्ञाने समीचीनसामग्र्या जातो मिथ्यासर्पज्ञाने त्वसमीचीनयेति न कश्चिद्दोष इति। तदेतदाह। भ्रमत्वेनाधिकजन्यत्वेपीति। तज्जन्यत्वादिति। विषयकृतवैलक्षण्याभावोपपादनायेति ज्ञातव्यं। तादृशं मिथ्याभूतसर्पाद्यनवच्छिन्नं स्वतएवासर्पज्ञानाद्व्यावृत्तम् इत्यर्थः।

खंडनकारोक्तासत्कारणत्वसाधकयुक्तिमनूद्य दूषयति॥ अंतर्भावितसत्त्वंचेदिति॥ अयं कारिकार्थः। अंतर्भावितं सत्त्वं यस्मिंस्तदंतर्भावितसत्त्वं सत्ताविशिष्टमितियावत्। दंडादि। तथा अंतर्भावितं सत्त्वं यस्मिन्न भवति तन्नांतर्भावितसत्त्वं सत्तोपलक्षितमिति यावत्। दंडादि। तथाच सत्ताविशिष्टं वा कारणं सत्तोपलक्षितं वा कारणं नाद्य इत्याह॥ अंतर्भावितेति॥ अंतर्भावितसत्वं सत्ताविशिष्टं दंडादिकारणंचेत्तर्हि ततः सत्ताविशिष्टं कारणमित्यभ्युपगमात्सत्ताविशिष्टे सत्ताया आत्माश्रयेणाभावात् सत्ताविशिष्टमसदेवेति प्राप्तं तथाचासतः कारणत्वसिद्धिः। न द्वितीय इत्याह॥ नांतर्भावितेति॥ न समासोऽयं नांतर्भावितसत्वं सत्त्वोपलक्षितं सत्ताविरहितं दंडादिकं कारणं चेत्तर्हि ततः सत्तोपलक्षितं कारणमित्यभ्युपगमादसदेव कारणमिति प्राप्तं। सत्ताया उपलक्षणत्वमात्रेण वस्तुतो दंडादौ सत्ताया अभावादिति प्राप्तेरितिभावः। यद्वा कारणमित्युभयत्र भावप्रधानो निर्देशः। कारणत्वमन्तर्भावितसत्त्वं अन्तर्भावित सत्त्वोपेतं भवति सत्तामन्तर्भाव्यकारणत्वं वर्तते वा न वा कारणत्वाश्रयकोटौ सत्ता वर्तते वा न वेत्यर्थः। सत्तायां कारणत्वं वर्तते वा न वेति यावत्। आद्ये तर्हि असदेव कारणमिति प्राप्तम्। कुतः ततः सत्तायां कारणत्वस्वीकारात्।

आह॥ उपलक्षणेन चेति। उपलक्षणीभूतविशेषणं चेत्यर्थः॥ स्वतइति॥ उपलक्षणीभूतसर्पादिविषयोपस्थाप्यो ज्ञाने विशेषःसिद्धइत्यर्थः॥ एवं चेति॥ यथेत्यस्य यथा सर्पज्ञानमपीतिदूरस्थेन तथाशब्देनान्वयः॥ अनंतर्भाव्येति॥ प्रतियोग्यघटितस्य रूपतयेत्यर्थः। तस्योपलक्षणत्वेनाभावस्वरूपानंतर्गतत्वादिति भावः॥ अभावांतरादिति। अस्य विलक्षणमित्यनेनाग्रेतनेन संबंधः। यथाचेत्यादौ सर्वत्र विषयमनंतर्भाव्येत्यस्यानुषंगः॥ ज्ञानांतरादीति॥ अतीतानागतज्ञानं वर्तमानवस्तुज्ञानांतरात् असद्विषयकपरोक्षज्ञानव्यवहारौ सद्विषयकापरोक्षज्ञानव्यवहाराभ्यामित्यर्थः। ज्ञानव्यवहारौ ज्ञानांतरादितो विलक्षणाविति लिंगवचनव्यत्ययेनान्वयः॥ अन्यथेति॥ परोक्षापरोक्षज्ञानस्मृत्यनुभवादीनां वैलक्षण्यानंगीकारे परोक्षापरोक्षज्ञानस्मृत्यनुभवकार्याणां संकरापत्त्याऽसंकीर्णव्यवहारादिकंच न स्यात्। तथाऽभावस्याभावांतराद्वैलक्षण्यानंगीकारे तयोस्सांकर्यापत्त्या दोषाभावगुणाभावकार्याणां भ्रमादीनामपि संकरः स्यादित्यर्थः। नन्वभावकृत्यतीतादिज्ञानेषु प्रतियोगिविषयाभ्यां कृतासंकरसंभवात्तत्कार्येष्वसंकरोपपत्तिरित्याशंक्य निराकरोति॥ नचेति॥ कुतोनचेत्यत आह॥ ध्वंसादेरिति॥ आदिपदेन प्रागभावः। प्रागभावप्रध्वंसाभावकाले प्रतियोगिनोरसत्त्वात्कृतेः काले विषयस्यासत्त्वात्। कृत्यपरपर्याययत्नस्य सिद्धवस्तुकर्मकत्वाभावेन कृतेः कालेपि विषयाभावादतीतादिज्ञानकालेच विषयस्यासत्त्वादितियोजना। ननु प्रध्वंसादेः काले प्रतियोग्यादेरसत्त्वेपि कदाचित्सत्त्वमस्त्येवेत्यत आह॥ पूर्वक्षणइति॥ अयमर्थः कदाचित्प्रतियोगिनः सत्त्वेपि ध्वंसनिर्वाह्यकार्यापेक्षया पूर्वकालप्रतियोगिनोऽसत्त्वेन प्रतियोगिसंकीर्णस्वरूपस्य ध्वंसादेः कारणस्यासिद्ध्या ध्वंसादिकार्याणामसंकरो न स्यात्। एवंच कृत्युत्तरकाले शिलोद्धरणरूपविषयस्य सत्त्वेपि कृतिकाले तस्यासत्त्वेन असंकीर्णस्वरूपालाभात् कृतिकार्याणामसंकरो न स्यात्। कार्यापेक्षया पूर्वक्षणेऽसतोऽविद्यमानस्यासंकीर्णस्वकार्यं प्रति नियतपूर्वक्षणवृत्तित्वरूपं कारणत्वं व्याहतमिति।

ननु ध्वंसादेः काले प्रतियोग्यादीनामसत्त्वेन विशेषणत्वायोगेपि तेषां तत्रोपलक्षणत्वं भविष्यति तथाचोपलक्षणीभूतप्रतियोग्यादिसंबंधमात्रेण ध्वंसादिस्वरूपाणामसांकर्ये सति तत्कार्येप्यसांकर्यं भविष्यतीत्यत आह॥ उपलक्षणेति॥ अन्यथा संस्थानविशेषं विना काकहंसाद्युपलक्षणसत्त्वमात्रेण गृहं विचित्रकारणजं विचित्रकार्यकारिच स्यात् कलमबीजांकुरतद्बीजे अपि उपलक्षणीभूतचैत्रादिसंबंधमात्रेण विलक्षणे स्यातामित्यतिप्रसंगः स्यादितिभावः। इदमुपलक्षणं काकादिकं ह्युपलक्षणं स्वोपलक्ष्यगृहादिना कदाचित्संबद्धं सदुपलक्षणं दृष्टं। प्रतियोग्यादिकंच ध्वंसादिना कदाप्यसंबद्धमिति नोपलक्षणमित्यपि द्रष्टव्यं। शिलोद्धरणकृतेर्माषोद्धरणकृतितो वैलक्षण्ये हेतुमाह॥ शिलोद्धरणार्थमिति॥ माषोद्धरणे यावान्प्रयत्नः तावति प्रयत्ने कृतेपीत्यर्थः। यदि शिलोद्धरणकृतेर्माषोद्धरणकृतितो वैलक्षण्यं न स्यात्साम्यं स्यादितियावत्। तर्हि माषोद्धरणकृतितः शिलोद्धरणनिष्पत्तिः स्यान्नचैवं। ततो वैलक्षण्यं तयोरनुभवसिद्धमितिभावः। विषयकृतवैलक्षण्याभावस्तु पूर्वमेवोपपादित इति द्रष्टव्यं॥ विषयमिति॥ विषयांतर्भावं विना स्वतएव विलक्षणं विशेषयुक्तमित्यर्थः। नन्वसौ ज्ञानगतो विशेषः यद्यौपाधिकस्तर्हि वक्तव्य इति चेत्तत्राह॥ तस्य जातिरूपस्येति॥ तस्याप्रामाणिकत्वं न मंतव्यमित्याशयेनोक्तं उक्तप्रमाणैरिति। ननु ज्ञाने विशेषः स्वतो न युक्तः घटज्ञानमित्यादिविषयविशेषनिरूपितत्वेनैव व्यवहाराज्जातिविशेषस्य सत्त्वेतु कदाचिद्विषयसंबंधं विना व्यवहारः स्यात् तेन ज्ञायते सविशेषोऽप्रामाणिकइति तत्राह॥ घटज्ञानमिति॥ यथा माधुर्यादेः स्वतो विलक्षणत्वेपि

स्वरूपसंबंधत्वं माभूदिति संबंधांतरमंतरेणेत्युक्तं। घटवद्भूतलस्य चत्वरीयघटाभावेन सह संबंधांतरशून्यत्वसद्भावेन स्वरूपसंबंधप्रसंगावारणाय विशिष्टप्रत्ययजनकत्वमित्युक्तं। विशिष्टप्रत्ययाजनके नित्यातींद्रियाभावभूतलयोः स्वरूपसंबंधेऽव्याप्तिवारणाय योग्येत्युक्तं। योग्यत्वं सहकारिविरहप्रयुक्तकार्याभावः। एतादृशयोग्यतायास्तत्रापि सद्भावान्नाव्याप्तिः। अयमात्मेति आत्मविषयकज्ञानस्यात्मना विषयविषयिभावलक्षणस्वरूपसंबंधसद्भावात्तत्रा व्याप्तिःस्यात् समवायस्यैव संबंधांतरस्य सत्त्वादत उद्देश्यप्रतीतिनिर्वाहकेति संबंधांतरे विशेषणं देयं। दंडी देवदत्तः रूपी घट इत्यत्र संयोगसमवाययोरुद्देश्य विशिष्टप्रतीतिनिर्वाहकत्वे सत्यपि अयमात्मेति विषयविषयिभावरूपा या उद्देश्यप्रतीतिः तन्निर्वाहकत्वं सतोपि समवायस्य नास्तीति उद्देश्यप्रतीतिनिर्वाहकसंबंधांतरमंतरेण विशिष्टव्यवहारजननयोग्यत्वस्य सत्त्वान्नाव्याप्तिरिति संप्रदायविदः॥ ज्ञानमात्रनिष्ठेति॥ सर्पज्ञानमात्रनिष्ठेत्यर्थः। सच क्षीरमाधुर्यादिवदाख्यातुमशक्यो वा तव्यवहारजननशक्तत्वरूपो वा वक्ष्यमाणरीत्या द्रष्टव्यः। एतच्चद्वितीयपक्षाभिप्रायेण। प्रथमपक्षे तु ज्ञानमेवविशेष इति बोध्यं॥ सर्पज्ञानमिति॥ रज्जाविति़शेषः॥ धर्मी विषयः। तथाच संबंधांतरमनपेक्ष्येत्यर्थः। अतएवोत्तरत्र तथैवव्यवहारः स्वतएवेतियावत्॥ तदिति। असर्पज्ञानजनकसामग्रीविलक्षणसामग्रीजन्यत्वं पक्षे॥ दृष्टांते तु यवांकुरजनकसामग्रीविलक्षणसामग्रीजन्यत्वं कलमांकुरेऽस्तीति ज्ञातव्यं॥ तदिति॥ असर्पज्ञानजन्यं यत्संतोषादिकार्यं तद्विलक्षणं यद्भयादिकार्यं तज्जनकत्वं पक्षेस्ति। दृष्टांते तु यवबीजजन्यं यद्यवांकुररूपं कार्यं तद्विलक्षणं यत्कलमांकुररूपं कार्यं तज्जनकत्वं कलमबीजेस्तीति ज्ञातव्यं॥ विलक्षणेति॥ तथाच धर्म्यंतरसंबंधमनपेक्ष्य विलक्षणत्वरूपं साध्यं विनापीत्यर्थः॥ यवबीजेत्यादि॥ यवबीजविलक्षणजन्यं कलमांकुरं यवांकुरविलक्षणजनकं कलमबीजं ते अपीतिविवेकः। तथाच स्वाभाविकवैलक्षण्यं विनैव धर्म्यंतरसंबंधेन तज्जनकविलक्षणजन्यत्वं चेत्तर्हि यवांकुरजनकबीजविलक्षणसामग्रीजन्यमपि कलमांकुरं कदाचित्कल मांकुरत्वरूपस्वाभाविकविशेषं विनैवोपलक्षणभूतचैत्रादिधर्म्यंतरसंबंधित्वमात्रेण यवाकुराद्विलक्षणं स्यात् तथा स्वाभाविकं वैलक्षण्यं विनैव धर्म्यंतरसंबंधमात्रेणैव तज्जन्यजनकविलक्षणजनकत्वं चेत्तर्हि यवबीजजन्ययवांकुरकार्यविलक्षणजनकमपि कलमबीजं कदाचित्कलमबीजत्वरूपस्वाभाविकवैलक्षण्यं विनाप्युपलक्षणीभूतचैत्रादिसंबंधित्वमात्रेणं यवबीजाद्विलक्षण स्यात्। नचोभयत्रापीष्टापत्तिरिति वाच्यं। चैत्रादिसंबंधित्वाज्ञानेपि कलमांकुरत्वतद्बीजत्वदर्शनमात्रेणांकुरांतरात् बीजांतराच्च वैलक्षण्यानुभवस्य सार्वजनीनत्वादित्यर्थः। कादाचित्कविषयसंबंधमात्रेण हेत्वोरुपपत्तावुच्यमानायां अतिप्रसंगांतरमाह॥ साक्षात्कारोपीति॥ अन्येति॥ चैत्रादि संबंधित्वमात्रेणेत्यर्थः। पुनस्तत्रैव दूषणांतरमाह॥ गृहमिति॥ गृहं विचित्रकारणजमिति संबंधः। कादाचित्कविचित्रकाकहंसाद्युपलक्षणत्वमात्रेणेत्यर्थः॥ विचित्रकार्यकारीति॥ इतरगृहासाध्यातपवारणादिरूपकार्यविशेषकारि स्यादित्यर्थः॥ अभावस्येति॥ यथा घटप्रागभाव इत्यादौ प्रतियोगिनोऽभावं प्रत्युपलक्षणत्वं तथेत्यर्थः।

ननु घटादेः प्रागभावं प्रत्युपलक्षणत्वमेव न विशेषणत्वं तयोरेककालत्वाभावात् प्रकृते तु विषयस्य ज्ञानं प्रति विशेषणत्वमेव किं न स्यादित्यत आह॥ अतीतादीति॥ तथा दर्शनात् विषयाभावेपि ज्ञानदर्शनादित्यर्थः। तदेवोपपादयति॥ नहीति॥ अनिर्वाच्यः रूप्यवत्प्रातिभासिकः। व्यावहारिकस्तु दूरापास्त इत्यपिशब्दार्थः। तथाच विषयस्य न विशेषणत्वं युक्तं किंतूपलक्षणत्वमेवेतिभावः। किं प्रकृतइत्यत

विशेषणं। तथाच घटबुद्ध्यभावे घटं करिष्यामीतीच्छानुदयेन घटोत्पत्त्यनुपपत्तेर्घटबुद्धेर्घटं प्रति हेतुत्वेपि घटस्य तदभाववदित्यर्थः॥ ब्रह्मणः तदभावनिवर्तकत्वे हेतुरुदासीनस्वभावस्येति। कर्तृत्वकरणत्वाद्युदासीनत्वस्वभावस्य निवर्तकत्वाद्यनुपपत्तेरित्यर्थः। अर्थावच्छिन्नस्येति॥ ज्ञानस्येतिशेषः॥ तादस्थ्येनेति॥ उपलक्षणत्वेनेत्यर्थः। संगृह्णाति॥ तथाचेति॥ सर्पपूर्वकं नैव कारणमिति संबंधः। तस्य दृष्टांतः फलेच्छेति। फलं स्वर्गापरपर्यायसुखमित्यर्थः। फलेच्छासाध्ययागादौ फलस्यापि कारणत्वे तस्य प्राक्सत्त्वापत्त्या कामनैवायुक्ता। सिद्धे इच्छाविरहादिति भावः।

ननु केवलस्यातिप्रसंगित्वादसतोऽर्थस्यावच्छेदकत्वमंगीकृत्य अवच्छेदकत्वं नाम व्यावर्तकत्वं तच्च व्यावृत्तिप्रत्ययजनकत्वमित्यसतोपि हेतुत्वं प्राप्तमित्याशंकते॥ नन्विति॥ यत इति॥ व्यावृत्तिधीजनकत्वं न व्यावर्तकत्वं सत्यपि दंडविशिष्टदेवदत्ते तदज्ञाने व्यावृत्त्यज्ञानात् अतो व्यावृत्तिधीहेतुधीविषयत्वमेव व्यावर्तकत्वं दंडविशिष्टो देवदत्त इति ज्ञानादेवदत्तेऽदंडिव्यावृत्तिधीर्जायते तद्विषयत्वं नाम तत्प्रकारत्वं विवक्षितं। अन्यथा विशेष्येऽतिव्याप्तेः। अतोऽविशिष्टात् व्यावृत्तिधीहेतुभूता या धीः दंडप्रकारिका देवदत्तविशेष्यका विशिष्टधीः तत्प्रकारत्वं दंडेऽस्ति एवमिहापि सर्पज्ञानेऽसर्पज्ञानाद्व्यावृत्तिबुद्धिर्भवति तज्जनिका या धीः इदं सर्पज्ञानमित्येवं सर्पप्रकारिका तज्ज्ञानविशेष्यकाऽनुव्यवसायरूपा विशिष्टधीः तत्प्रकारत्वं सर्पेऽस्ति अतो न मिथ्यार्थस्य व्यावृत्तिधीजनकत्वं किंतु तज्ज्ञानस्यैव प्राप्तमिति न कोपि दोषः। सत्यपि दंडइत्येतत् दंड विशिष्टे देवदत्ते तदज्ञाने दंडप्रकारकदेवदत्तविशेष्यकविशिष्टज्ञानाभावेऽविशिष्टाद्व्यावृत्त्यज्ञानादिति व्याख्येयं। नन्वथापि ज्ञानस्यैव हेतुत्वांगीकारेपि असत्यस्यैव हेतुत्वं सिद्ध्यति ज्ञानस्य भयादिजनकत्वेऽतिप्रसंगभयाय सर्पाद्यवच्छिन्नत्वं कारणतावच्छेदकं वाच्यं। तथाचावच्छेदकीभूतस्य सर्पादेर्मिथ्यात्वेन तदवच्छिन्नज्ञानस्यापि मिथ्यात्वं प्राप्तमित्याशंकते॥ नन्विति॥ स्यादिदं यद्यवच्छेदकस्य यद्भवति तत् अवच्छिन्नस्यापीति नियमः स्यात् नचैवं व्यभिचारादित्याह॥ तुच्छस्येति॥ अवच्छेदकीभूतस्य तुच्छस्य तुच्छत्वेपि तदवच्छिन्नज्ञाने तुच्छवैलक्षण्ये च तुच्छत्वस्यादर्शनादित्यन्वयः। अविद्यानिवृत्तिःपंचमप्रकारा वा। आत्मैवाज्ञानहानिरितिवचनात् अधिकरणातिरिक्ताभावाभावादात्मस्वरूपावेति मतद्वयसद्भावादाह॥ पंचमेति॥ चतुर्थप्रकारानिर्वचनीयत्वाभावोपपादनाय पंचमप्रकारेत्यादिविशेषणं। अत्रापि मतद्वयसद्भावादाह॥ परमार्थिकेति॥ अनृतं यद्वैतं तस्याभावे इत्यर्थः। ततः अनृतात् द्वैतात्। अनृतद्वैताभावस्यानृतव्यावृत्तेश्च पारमार्थिकत्वात् पारमार्थिकात्मस्वरूपत्वमेव। तद्भिन्नत्वेपि नाद्वैतहानिः अभावरूपधर्मा नाद्वैतं घ्नंतीति मंडनवचनादितिध्येयं। तत्रेति॥ तत्र तुच्छज्ञानादौ। असदादीनां तादस्थ्ये उपलक्षणत्वे अत्रापि सर्पज्ञानादौ विषयस्योपलक्षणत्वमेवास्त्वित्यर्थः॥ अर्थानवच्छिन्नमेवेति॥ एवं चावच्छेदकस्य मिथ्यात्वेऽवच्छिन्नस्यापि तन्नियमादसत्यस्यापि हेतुतेतिचोद्यानवकाश इति भावः॥ अतिप्रसंग इति॥ विषयातिरिक्तस्य व्यावर्तकस्य ज्ञानेऽभावात् विषयस्य च व्यावर्तकत्वानंगीकारे ज्ञानमात्रस्यैव भयादौ हेतुत्वांगीकारापातेन सर्पाभावघटादिज्ञानमपि भयादिहेतुःस्यादित्यतिप्रसंगइत्यर्थः। विषयावच्छेदं विषयरूपं व्यावर्तकं॥ स्वरूपातिरिक्तेति॥ विषयतत्संबंधयोर्ज्ञानेन सह स्वरूपसंबंधातिरिक्तद्विष्ठसंबंधस्याभावादित्यर्थः॥ असंबद्धस्येति॥ विषयस्य तत्संबंधस्य च ज्ञानेनासंबद्धस्येत्यर्थः। ज्ञानं प्रत्यव्यावर्तकत्वात्। अन्यथातिप्रसंगः स्यादित्यर्थः। स्वरूपमेव संबंधइत्यन्वयः। किमिदं स्वरूपसंबंधत्वमित्यतस्तन्निर्वक्ति॥ संबंधांतरमिति॥ घटसंयुक्ते पटे

हेतुःकिंनस्यादित्यतआह॥ सत्यप्यर्थइति॥ अभावादिति॥ ज्ञानस्यैव हेतुत्वं नार्थस्येतिभावः॥ एवमिति॥ ज्ञानस्यैवारिष्टादिहेतुत्वं नार्थस्येत्यंगीकार इत्यर्थः॥ अनुमितिमिति॥ प्रमानुमितिं प्रतीत्यर्थः॥ व्याप्त्यादीति॥ अतद्गुणसंविज्ञानबहुव्रीहिणाऽबाधितत्वं ग्राह्यं। तथाचाबाधितत्वज्ञानमेवेत्यर्थो द्रष्टव्यः। यथाश्रुतेतु व्याप्त्यादिप्रमाया न हेतुत्वं तथात्वे गंधप्रागभावावच्छिन्नो घटो गंधवान्पृथिवीत्वादित्यत्र व्याप्त्यादिप्रमाजन्याया अप्यनुमितेर्बाधितत्वेन प्रमात्वाभावादसंगतिःस्यादित्यवधेयं॥ नतु हेत्वादीति॥ अबाधितविषयत्वमित्यर्थः॥ तज्ज्ञानेति॥ अबाधितत्वज्ञानेत्यर्थः। तथाच हेत्वाभासव्यावृत्त्यर्थं अबाधितत्वप्रमाया एवानुमितिप्रमां प्रति प्रयोजकत्वे वाच्ये प्रमात्वघटकाबाधितत्वरूपार्थस्यापि तत्प्रयोजकत्वं प्राप्तमित्यर्थः। इत्येवं व्याचक्षते। वस्तुतस्तु व्याप्त्यादिज्ञानमेवेत्यादियथास्थितएवास्तु गंधप्रागभावावच्छिन्नो घटो गंधवान् इत्यत्र तु बाधादनुमितिरेव नोत्पद्यत इतितार्किकैरंगीकृतत्वेनातिप्रसंगाभावादितिसंप्रदायः। ज्ञानमात्रस्य हेत्वाभासेपि सत्त्वात्प्रमानुमितेर भावात्तत्प्रमायाएव हेतुत्वे वाच्ये प्रमात्वस्यार्थसत्ताघटितत्वाद्धेतुव्याप्त्यादीनामपि हेतुत्वं प्राप्तमेवेति संप्रदायः। किंच न हेत्वादिज्ञानमात्रस्य प्रमानुमितिं प्रति हेतुत्वं। तथाहि। हेत्वादिज्ञानं त्वन्मतेवृत्तिर्वा वृत्तिप्रतिबिंबितचैतन्यंवा विशिष्टं तदुभयमपि मिथ्याभूतमेव। ततश्चन मिथ्यामूतस्य हेतुव्याप्त्यादिज्ञाने प्रमात्वं नास्तीतिचेन्न। तत्र व्याप्त्यादिज्ञानस्य जनकत्वाभावात् यज्जातीयानंतरं नियमेन कार्योत्पत्तिसत्त्वमेव जनकत्वमभिप्रेतमिति न दोष इतिज्ञेयं।

ननु भयादिरूपार्थक्रिया तावत्सर्पजन्या सा कथं सर्पभिन्ना तज्ज्ञानात्स्यादतोऽसतःसर्पस्यैव कारणत्वमित्यतो न भयादिकं सर्प कार्यमित्युच्यते किंतु सर्पज्ञानकार्यमिति सन्निहितेपि सर्पेतमजानानस्य भयाद्यदर्शनात् सर्पकार्यत्वभिसर्पणादिकमेवेत्याह॥ सत्येति॥ अतिप्रसंगइति॥ सर्पाभावघटादिज्ञानस्यापि भयहेतुत्वापत्तिरित्यर्थः॥ हेतुःस्यादिति॥ अवच्छिन्नस्य यद्भवति तत् अवच्छेदकस्यापि भवतीतिनियमादित्यर्थः। अस्य नियमस्य व्यभिचारमाह॥ घटेत्यादिना॥ घटावच्छिन्नस्य घटात्यंताभावस्य घटदेशमृत्पिंडभिन्नदेशत्वेपि घटस्य तदभाववदित्यर्थः। घटावच्छिन्नस्य ध्वंसस्य घटकालभिन्नकालत्वेपि घटस्य तदभाववदित्यर्थः॥ घटब्रह्मणोरिति॥ घटस्य नित्यस्य ब्रह्मणश्च घटज्ञानवेदांतसाध्यत्वाभाववदित्यर्थः॥ विहितनिषिद्ध करणाभावयोरिति॥ विहितकरणाभावनिषिद्धकरणाभावयोरित्यर्थः। प्रत्यवायादिमित्यादिपदेन प्रत्यवाया भावसंग्रहः। ततश्चघटप्रागभावस्य घटं प्रति हेतुत्वेपि घटस्य तदभावावत् विशेषदर्शनाभावस्य भ्रमं प्रति हेतुत्वेपि अवच्छेदकस्य विशेषदर्शनस्य तदभाववत् विहितकरणाभावस्य प्रत्यवायहेतुत्वेपि अवच्छेदकस्य विहितकरणस्य प्रत्यवायं प्रति हेतुत्वाभाववत् निषिद्धकरणाभावस्य प्रत्यवायाभावं प्रति हेतुत्वेपि अवच्छेदकस्य निषिद्धकरणस्य प्रत्यवायाभावहेतुत्वाभाववत् स्वर्गकामनाया यागं प्रति हेतुत्वेपि अवच्छेदकस्य स्वर्गस्य यागहेतुत्वाभाववत् अतीतादिवस्तुस्मृत्यादेर्दुःखादिकं प्रतिहेतुत्वेपि अवच्छेदकस्यातीतादेः तदभाववत् असद्विषयकपरोक्षज्ञानस्य तद्व्यवहारं प्रति हेतुत्वेपि अत्यंतासतस्तद्व्यवहारं प्रति हेतुत्वाभाववदिति विवेकः। न च स्वर्गस्यातीतादेरसतश्च यागदुःखव्यवहारान्प्रतिहेतुत्वं किं न स्यादिति वाच्यं। कामनावत्कामनाविषयस्यापि स्वर्गस्य जनकत्वे तस्य पूर्ववृत्तित्वघटितत्वात् सुखापरपर्यायस्य स्वर्गस्य प्राक्सत्त्वापत्त्या तत्कामनैव व्याहन्येत। सिद्धे इच्छाविरहारत् अतीतस्यापि दुःखजनकत्वे कार्याव्यवहितपूर्वसमये सत्त्वापत्तिः असतो जनकत्वे तु निस्स्वरूपत्वव्याघात इत्यवधेयं॥ चिकीर्षितेति॥ कर्तुमिष्टेत्यर्थः। अनागतेति यावत्। अवर्तमानत्वोपपादनायेदं

न्यायामृतप्रकाशः

प्रतिबिंबंबिंबस्येति॥ अयं प्रदेशो बिंबवान् क्वचित्स्थले प्रतिबिंबयुक्तत्वादित्येवं बिंबानुमापकत्वं प्रतिबिंबे दृष्टमित्यर्थः। स्वाप्नार्थःस्वाप्नमंत्रादिरूपः। पीतिव्यवहारदितिज्ञयं॥ अर्थभेदस्येति॥ वृक्षहस्तिरूपार्थभेदस्येत्यर्थः॥ त्वन्मतेपीति॥ स्वच्छंदर्पणादिषु प्रतिफलनेन परावृत्ता नायनरश्मयो ग्रीवास्थमुखेन संबद्धा ग्रीवास्थमेव मुखं गृह्णंति। तत्रैव दर्पणस्थत्वं ग्रीवास्थमुखभिन्नत्वादिकं चारोपयंति। यथोक्तं त्वया।

''दर्पणाभिहतादृष्टिःपरावृत्य स्वमाननं।
व्याप्नुवत्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखमिति''।

लिंगलिंगिभावस्तु वृक्षशिंशुपावदिति परैरंगीकारात्। अतो ग्रीवास्थमुखस्यैव प्रतिबिंबतायास्त्वयोक्तत्वात्तस्य प्रतिबिंबस्वरूपस्य सत्यत्वादित्यर्थः॥ ज्ञानमेवेति। तच्च सत्यमेवेतिभावः।

ननु स्वाप्नकामिन्यादेश्चरमधातूत्सर्गार्थक्रियाहेतुत्वदर्शनात्स्वाप्नपदार्थस्यैव साधकत्वं न तु तज्ज्ञानस्येति चेत्तत्राह॥ अन्वयेति॥ जाग्रति अन्वयव्यतिरेकाभ्यां तज्ज्ञानस्यैवार्थक्रियाहेतुत्वं दृष्टं न स्वरूपसत्कामिन्यादेः अतस्तदृष्टांतेन स्वप्नेपि तथात्वं कल्प्यतेऽतस्सत्यस्यैव साधकत्वमित्यर्थः॥ लौहित्यस्यापीति॥ लोहितिमविशिष्टजपाकुसुमस्य तदवयवसमुदायस्यवेत्यर्थः। तेन गंधरसादेरिव न रूपस्य प्रतिबिंबो दृष्टचर इतिचोद्यानवकाशः। पदस्यार्थ इव वर्णे रेखायाःसंकेतितत्वेनेत्यर्थः। वर्णस्य रेखास्मारितत्वे हेतुरयं। वर्णश्चसत्य एवेति भावः। अत्र पदस्यार्थे संकेतित्वेनेति पररीत्यैव। स्वमते स्वाभाविकीशक्तिरेवेत्यंगीकारात्। नित्ययोगोपि शब्दानामर्थेनैवेत्युक्तेः॥ अतएवेति॥ रेखाया वर्णे संकेतितत्वादेवेत्यर्थः। रेखास्मारितवर्णेषु दीर्घत्वं स्वतोस्त्येव तच्चश्रुतादिवत्स्वरूपसदेवार्थविशेषधीजनकं नतु ज्ञाततयेत्येकःपक्षः। वस्तुतो दीर्घत्वं वर्णेषु नास्त्येव किंत्वारोपितमेव तच्च ज्ञातं सदेव तथेत्यन्यःपक्षः। तत्राद्यपक्षे दीर्घत्वं निर्वक्ति॥ दीर्घत्वादिकमिति॥ वर्णेषु दीर्घत्वं नाम दीर्घध्वनिसंनिहितत्वमेव नान्यदित्यर्थः॥ तद्व्यक्तत्वरूपमिति॥ दीर्घध्वनिव्यक्तत्वाख्यो धर्मइत्यर्थः। तथाच वस्तुतो दीर्घो यो ध्वनिस्तद्व्यक्तत्वरूपो धर्मो वर्णेष्वस्ति तदेव दीर्घत्वं न ततोऽतिरिक्तं तत्सत्यमेवेतिभावः। तथाचैतादृशदीर्घत्वं पारिभाषिकमितिभावः। द्वितीयेऽसत्यस्यैव साधकत्वं प्राप्तमितिचेत्तत्राह॥ ज्ञातं सदिति॥ आरोपितं सदित्यर्थः। ननु ज्ञेयभेदानवच्छिन्नस्य ज्ञानमात्रस्यातिप्रसंगेन तदवच्छिन्नस्य सिद्ध्यंगतायां विशिष्टस्य यद्भवतीति न्यायेनासतोप्यर्थस्य हेतुत्वं प्राप्तमेवेत्यत उक्तं॥ अर्थानवच्छिन्नमिति॥ एतच्चोत्तरत्रापाकरिष्याम् इतिभावः॥ एतेनेति॥ आद्यपक्षानुसारेण वर्णेषु दैर्घ्यस्य सत्त्वेन द्वितीयेतु सत्यस्यैतज्ज्ञानस्यैव साधकत्ववचनेनेत्यर्थः॥ यथेति॥ असतःसाधकत्वे परेणोक्ते ऽसत्त्वाविशेषाद्धूमाभासस्यापि वह्निसाधकत्वं स्यादित्यतिप्रसंगेऽस्माभिरभिहिते सति यथेत्यादिवाचस्पतिना जल्पितमित्यर्थः। सदर्थभेदरूपं प्रमेयं॥ धात्विति॥ साच सत्यैवेतिभावः। धातुव्याकुलतायांच भयं भयेच विषशंकारूपं ज्ञानमेव हेतुस्तच्च सत्यमेवेति हृदयं॥ आत्मवदिति॥ अबाधादितिभावः। ननु सत्यभूतस्य मंत्रस्य कथं स्वप्ने भानमित्यतआह॥ स्वयमिति॥ नन्वथापि भारतयुद्धादौ घटोत्कचादिसृष्टमायिकगजादेरर्थक्रियाकारित्वं दृष्टमितिचेत्तत्राह॥ भारतयुद्धादाविति॥ वक्ष्यमाणरीत्येतिपूर्वमुक्तं तदुपपादयति॥ वक्ष्यमाणरीत्येतिपूर्वमुक्तं तदुपपादयति॥ सवित्रिति॥ नन्वर्थएव

अथानुगमार्थं सत्ताभ्युपगम इति न वाच्यम्। सत्तां विनाऽप्यभावादौ स्वरूपसत्त्वैरेवानुगमदर्शनादिति। तथाच स्वरूपसत्त्वांगीकारो न युक्तः। अथ नान्तर्भावितसत्त्वं तदाऽपि सत्तामनन्तर्भाव्य कारणं सत्त्वं कारणकोटौ न विशेष्यते, सत्त्वविशिष्टमेव कारणमिति यावत्। तत् तर्हि असदपि तथास्तु। अतः सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाविशेषात्। तथाचासतः कारणत्वमायातम्। ननु कारणत्वस्य सत्त्वनियतत्वात् कथमसतः कारणत्वं? नियतपूर्वसत्त्वस्यैव कारणत्वादिति चेत्। न द्वित्रिचतुरकक्ष्यास्वबाधितत्वसत्त्वबुद्ध्यैव कारणत्वो पपत्तेरिति। खण्डनोक्ता कारणता स्वव्याहता विरुद्धा अन्यत्र निरस्ता चेत्यन्वयः। कुत इत्यत आह॥ अस्यैव श्लोकस्येति॥ अकारप्रश्लेषेण पाठस्तु –

अन्तर्भावितसत्त्वं चेदकारणमसत्ततः।
नान्तर्भावितसत्त्वं चेदकारणमसत्ततः॥ इति

कथमनेन खण्डनोक्तासत्कारणतापरिहारः इति चेदित्थम्। यत् त्वया पृष्टं सत्त्वविशिष्टस्य कारणत्वं तदविशिष्टस्य वा इति तत्र तावदाद्यमंगीकुर्मः। न च सत्त्वविशिष्टस्यासत्त्वात् कथमसदकारणमिति वाच्यम्। सत्त्वविशिष्टस्य सत्त्वांगीकारात्। न च सत्त्वविशिष्टस्य सत्त्वे जातेः स्ववृत्तित्त्वांगीकार इति वाच्यम्। सत्त्वस्याबाध्यत्वरूपत्वेन जातित्वाभावात्। तस्य च प्रमेयत्वं प्रमेयमितिवत् अबाध्यत्वमबाध्यमिति प्रतीत्या स्ववृत्तित्वाभ्युपगमात्। किंच यथा ब्रह्मणः सत्त्वानधिकरणत्वेऽपि सत्स्वरूपत्वात् नासत्त्वम् तथा सत्त्वविशिष्टस्य सत्त्वानधिकरणत्वेऽपि सत्त्वस्वरूपत्वात् नासत्त्वम्। अन्यथा ब्रह्मणोऽप्यसत्त्वापत्तेः। तथाच अनन्तर्भावितसत्वं चेत् कारणमिति शेषः। ततः तर्हि असदकारणम्। कुतः। ततः कारणस्यान्तर्भावितसत्त्वात्। असतश्च तदभावात्। अथ नान्तर्भावितसत्त्वं कारणत्वं, सत्वाविशिष्टस्यैव कारणत्वमिति यावत्। तर्हि असदकारणम्। कारणत्वस्य सत्त्वनियतत्वात्। कारणतावच्छेदकत्वाद्वा। यथा दण्डत्वस्य कारणकोट्यप्रवेशेऽपि कारणतावच्छेदकत्वात् अदण्डस्याकारणत्वं तथेत्यर्थः। न च सत्त्वबुध्या कारणत्वोपपत्तिरिति वाच्यम्। बुद्धिमात्रस्य कारणत्वानुपयोगित्वस्य मूल एवोक्तत्वादित्यलम्।

खण्डनोक्तासत्कारणत्वस्य स्वव्याहतिमाह॥ अन्तर्भावितेति॥ अत्रापि सत्त्वविशिष्टस्याधिष्ठानत्वे विशिष्टे सत्त्वाभावादसदधिष्ठानमिति प्राप्तम्। अथ सत्त्वमधिष्ठानकोटौ न प्रवेश्यते तर्हि असदप्यधिष्ठानमस्तु। सत्त्वासत्वयोरधिष्ठानकोट्यप्रवेशादिति स्वव्याहतिरित्यर्थः। न च मयाऽधिष्ठाने स्वरूप सत एव सत्त्वमंगीक्रियते। त्वया कारणे स्वरूपातिरिक्तमंगीक्रियते इति वैषम्यमिति वाच्यम्। अस्य प्रकृतानुपयुक्तत्वात्। मयापि स्वरूपातिरिक्तसत्त्वानंगीकारात्। तदंगीकारिभिरपि सत्तधिकरणत्वेनैव सत्त्वमित्यनंगीकारात्। स्वरूपसत्त्वेनापि समवायादिसद्बुध्यंगीकाराच्चेति। असतः कारणत्वे श्रुतिसूत्रस्वभाष्यविरोधमाह ॥कथमसत इति॥ न च तेषां तुच्छजनकत्वनिषेधपरत्वमिति वाच्यम्। प्रपञ्चस्यापि स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वे तुच्छत्वापातेन समत्वात् इतोऽतिरिक्तस्य तुच्छत्वस्याभावादित्यलं विस्तरेण। परमप्रमेयमुपसंहरति– ॥तस्मादिति॥ ॥इति असतः साधकत्वाभावे बाधकोद्धारवर्णनम्॥

किञ्च त्वयाऽपि विषयस्य व्यावर्तकत्वनियम..... तत्तदाकारवृत्तेराकारविशेषवत्त्वेनैव चैतन्यस्य च तद्घटितोपाधिनैव व्यावृत्तिसम्भवादित्याह – किञ्चेति। मम त्विति तु दृष्टान्ततयोच्यत इति ज्ञेयम्। न च विषयस्यैवाकारसमर्पकत्वात्तत्रैरपेक्ष्यं व्यावर्तकतायां वक्तुमशक्यमिति वाच्यम्। विषयस्य कारसमर्पक्ष्यं व्यावर्तकतायां वक्तुमशक्यमिति वाच्यम्। विषयस्याकारसमर्पकत्वं नाम न तज्जनकत्वम्। अतीतासज्ज्ञानादौ विषयस्यासत्त्वेनाऽकारजनकत्वासम्भवात्। न च तत्र करणसामर्थ्यस्यैव तदाकारजनकत्वमिति वाच्यम्। सर्वत्र करणसामर्थ्यस्यैव तत्तद्वृत्त्याकारसमर्पकत्वसम्भवात्। अत एव विलक्षणहेतुनैव ज्ञाने विशेष इत्युक्तम्। न चासज्ज्ञानादौ विषयस्योपाधित्वेनाकारसमर्पकत्वेऽपि अन्यत्र विशेषणत्वादाकारसमर्पकत्वमिति वाच्यम्। ज्ञानस्य जन्यत्वे जनकत्वे वा विषयस्य विशेणत्वाभावस्य पूर्वमेवोपपादितत्वात्। विशेषणत्वोप लक्षणत्वातिरिक्तस्योपाधित्वस्य दुर्वचत्वस्य प्रागेवोक्तत्वादित्यलमतिविस्तरेण।

आकारहेतुतायां विषयप्रवेशमेव दृष्टान्तेन विशदयति – न हीति। नन्वस्तु सर्पभ्रमाया असर्पज्ञानाद्विलक्षणहेतुजन्यत्वेन स्वतो वैलक्षण्यम्। न तु सर्पभ्रमस्य। तस्या – सर्पज्ञानहेतु विलक्षणसर्पसन्निकर्षादिरूपहेतुजन्यत्वाभावात्। प्रत्युता सर्पसन्निकर्षजन्यत्वात्। तथा च भ्रमे विषयस्यैव विशेषणत्वेन व्यावर्तकत्वमित्याशङ्कां परिहरन्नुपसंहरति – तस्मादिति। सर्पभ्रमस्यापि सर्पज्ञानत्वेन सर्पभ्रमवदसर्पज्ञानाद्वैलक्षण्यं साध्यत इति तत्रपि स्वत एव विशेषसिद्धेर्न विषयस्य विशेषणत्वेन व्यावर्तकत्वम्। न च तद्धेतुविलक्षणहेतुजन्यत्वमुपाधिरिति वाच्यम्। सर्पभ्रमस्थासर्पज्ञानहेतुविलक्षणसर्पसंस्कारजन्यत्वेनोपाधेः पक्षवृत्तित्वेन साधनव्यापकत्वात्। न चासर्पज्ञानजनकासर्पसन्निकर्षजन्यत्वात् न तद्वैलक्षण्यमिति वाच्यम्। तस्यासर्परूपाधिष्ठान ज्ञानांश एव जनकत्वेन सर्पज्ञानांशे तदभावात्। सर्पज्ञानांशस्य तु दोषसहकृतसर्पसंस्कारमात्रेणैवोपपत्तेः। न च तदंशे प्रत्यक्षत्वं न स्यात्। व्यापाराभावेनेन्द्रियाजन्यत्वादिति वाच्यम्। तत्र सादृश्यज्ञानस्यैव दोषत्वेनेन्द्रियव्यापारत्वसम्भवात्। न चैवं तद्धेतुविलक्षणहेतुजन्यत्वेनैव तद्वैलक्षण्ये सिद्धे सर्पज्ञानत्वेन तत्साधनमयुक्तमिति वाच्यम्। उपायस्योपायान्तरादूषकत्वात्। सर्पभ्रमेऽपि स्वतो वैलक्षण्यमस्तीति विषयमनपेक्ष्य भ्रम एवार्थक्रियाकारीत्यत्रा चार्यसम्मतिमाह – तदुक्तमिति। सर्पभ्रमादावपि तादृशं ज्ञानमस्त्येव सर्पप्रमायामिवार्थक्रियाकारि, न तु विषयविशिष्टमित्यर्थः। तच्च सदेवाबाधात्। अतो नासतः साधकत्वमित्यर्थः।

एतेन खण्डनोक्तमसतः साधकत्वसाधनमयुक्तमिति दर्शयितुं तत्साधकश्लोकमनुवदति – अन्तर्भावितेति। अस्यार्थः – अन्तर्भावितसत्त्वं चेद्यदि कारणमन्तर्भावितसत्त्वम्। कोऽर्थः? कारणकोटौ यदि सत्त्वं निवेश्यत इति, सत्त्वविशिष्टस्य कारणत्वमिति यावत्, तर्ह्य सत् कारणमित्यायातम्। कुतः? ततः कारणस्यान्तर्भावितसत्त्वात्। न चान्तर्भावितसत्त्वे कथं कारणस्यासत्त्वमिति वाच्यम्। स्वविशिष्टे स्वस्याभावात्। कुतः? स्वविशिष्टेस्ववृत्तिरंशतः स्ववृत्तिमापादयतीत्यात्माश्रयात्। न च विशिष्टं पदार्थान्तरमिति वाच्यम्। तथापि स्वस्मिन् स्ववृत्तिवत् स्वविशिष्टे स्वव्यतिरेकनियमदर्शनात्। तथाच सत्त्वविशिष्टस्य कारणत्वे सत्त्वविशिष्टस्यासत्त्वादसदेव कारणमित्यायाति। न च स्वरूपसत्त्वानामनन्तत्वात् सत्त्वविशिष्टे सत्त्वं भविष्यतीति वाच्यम्। तर्हि तैरेव सद्व्यवहारोपपत्तौ सत्तैव नांगीक्रियेतेति वृद्धिमिच्छतो मूलहान्यापत्तेः।

सत्त्वस्य चोपाधित्वेनाभिमतपद्मत्वादौ भावात्। न हि पङ्कजादेर्व्यावृत्तिधीकाले नियमेन पद्मत्वादिकं नास्ति। ब्रह्मोपलक्षणत्वेन स्वीकृतजन्मादिकारणत्वे अध्यासतटस्थलक्षणे चातिव्याप्तेश्च। तस्यापि व्यावृत्तिकाले विशेष्ये नियमेन सत्त्वात्। न द्वितीयः। उक्तातिव्याप्तेरेव। अत एव न तृतीयः। उपलक्षणत्वलक्षणमपि उपलक्षणत्वेनाभिमत जन्मादिकारणत्वाव्यापकत्वादयुक्तम्। उपाधित्वलक्षणं त्वसंभवि। पद्मत्वादौ तदभावात्। न हि पद्मत्वं पङ्कजपदजन्यप्रतीतावुदासीनम्। तस्य गोत्वादिवत् विशेष्योपरञ्जकत्वात्। अन्यथा गोत्वादिकमपि तथा स्यात्। अविशेषात्। अत एव नैयायिकानां तत्र समुदायशक्त्यभ्युपगमः। न चाकाशत्वे प्रयोगोपाधित्वमस्तीति तत्रोपाधित्वलक्षणसत्वान्नासंभव इति वाच्यम्। तस्यापि व्यावृत्तिकाले विशेष्योपरञ्जकत्वेन त्वदुक्तविशेषणत्वलक्षणवत्त्वात्। अत एव गङ्गेशेनाकाशपदाशक्यमप्याकाशत्वमाकाशपदादुपतिष्ठत इत्युक्तम्। तस्माद् विशेषणत्वोपलक्षणत्वान्यदुपाधित्वं दुर्वचमिति विषयस्योपलक्षणत्वविशेषणत्वान्यतरत्वे वक्तव्ये कार्यान्वयित्वरूपविशेषणत्वे बाधकादुपलक्षणत्वस्यैव वक्तव्यत्वात् तस्य चोपलक्ष्यतावच्छेदक धर्मान्तरोपस्थापकत्वनियमाद् विषयोपलक्ष्ये ज्ञाने विशेषसिद्धिरिति दिक्।

एवं ज्ञाने विशेषमुपपाद्य सदृष्टान्त मुपसंहरति – एवं चेति। अत्र घटाभावादिकं प्रतियोग्यादिकमनन्तर्भाव्यैव पटाभावादितो विलक्षणं यथा तथा सर्पज्ञानमपि विषयमनन्तर्भाव्यासर्पज्ञानाद् विलक्षणमित्यन्वयः। घटस्मृतिरिति। न चैकविषयकस्मृत्यनुभवयोः परोक्षापरोक्षयोश्च विषयमनपेक्ष्य जात्या व्यावर्तनसंभवेऽपि भिन्नविषयकसमानजातिषु तदसंभव इति वाच्यम्। तत्रापि क्षीरादिमाधुर्यवत् जातेः स्वीकारात्। न च संकरः। तददोषत्वस्योक्तत्वात्। घटाभावादौ स्वतो विलक्षणत्वानङ्गीकारे बाधकमाह – अन्यथेति। घटाभावादिकार्यं पटाभावादिनापि स्यादिति सङ्कर इत्यर्थः। अत्र च व्यवच्छेदकत्वं व्यावृत्तिबुद्धिजनकत्वं, व्यावृत्तिधीजनकधीविषयत्वं वा? आद्ये आह – ध्वंसादेरिति। न द्वितीयः। सुषिरादिज्ञानेऽपि विषयस्य तथैव व्यावर्तकत्वोपपत्तावसतः साधकत्वेऽस्योदाहरणत्वासंभवात्। ननु प्रतियोग्यादेरुपलक्षणत्वेन व्यावर्तकत्वान्न व्याघात इत्यत आह – उपलक्षणभेदेति। उपलक्षणभेदमात्रेण विलक्षणकार्यकारित्वे एकस्यैव कलमबीजस्य विलक्षणदेवदत्तसंबन्धमात्रेण विलक्षणकार्योत्पादकत्वं स्यात्। विषयस्योपलक्षणत्वेऽपि तदन्यथानुपपत्त्यैव विशेषसिद्धेश्चेति भावः। ननु कदाचित् सत्त्वात् कारणत्वं स्यात् इति चेन्न। कदाचित् सत्त्वस्य कारणत्वानुपयुक्तत्वात्। अन्यथा भविष्यद्दण्डेनापि घटोत्पत्तिप्रसङ्गः। अत्यन्तासज्ज्ञानादौ च विषयस्य न कदापि सत्त्वमित्याह – अत्यन्तेति। किं च यदि विषयमनन्तर्भाव्य कृत्यादौ वैलक्षण्यं न स्यात् तर्हि माषोद्धरणप्रयत्नात् शिलोद्धरणकार्यं स्यादित्याह – शिलोद्धरणार्थमिति। न च तत्र कार्यकारणभावार्थं जातिः स्वीक्रियतेऽतो नातिप्रसङ्ग इति वाच्यम्। तर्हि तयैव व्यावृत्तिसिद्धावुपाधेस्तद्व्यावर्तकत्वोपपादनवैय्यर्थ्यात्। ज्ञानेऽपि तदर्थं जातिस्वीकारस्यावश्यकत्वाच्च। न हि व्यावृत्त्यर्थमेव जातिस्वीकारे मम निषेधः। किन्तु ज्ञाने स्वाभाविकविशेषसिद्धौ। तथा च कृतिन्यायेन ज्ञानेऽपि विशेषसिद्धौ नातिप्रसङ्ग इति। नन्वाख्यानुपपत्तिरशक्यत्वान्न जातिविशेष उक्तप्रमाणैर्यदि स्यात्तर्हि घटादेर्घटत्वादिने व तेन जातिविशेषणख्यानं स्यात्। न चैवम्। किन्तु घटज्ञानमित्येव। तथा च कथं विशेष इत्यत आह – उक्तप्रमाणैरिति। प्रमाणसिद्धत्वादाख्यातुमशक्यत्वेऽपि प्रत्याख्यातुं न शक्यत इति भावः।

किन्तु घटरूपोपाधिनैवेति धर्म्यन्तर संबन्धमपेक्ष्यैव विलक्षणे घटसंयोगत्वावच्छिन्ने साध्याभाववति उक्तहेतुसत्त्वाद् व्यभिचार इति। मैवम्। तस्य पक्षतुल्यत्वेन व्यभिचाराभावात्। अन्यथा क्षितिमात्रपक्षकमिथ्यात्वानुमाने सलिले व्यभिचारः स्यात्। न चोक्तानुमानात् तस्य विपक्षत्वम्। अनुमानस्य स्वरूपासिद्धत्वात्। न चान्यतरकर्मजत्वादिना सांकर्यम्। तस्या नानात्वात्। अनुगमस्य च पूर्वोक्तरीत्या संभवात्। गुणगतजातावदोषत्वाच्चेति दिक्।

अप्रयोजकत्वं परिहरति– न चेति। न चेष्टापत्तिः। न हि जातेर्व्यावर्तकत्वे उपाधिरव्यावर्तको भवतीति वाच्यम्। स्वाभाविक वैलक्षण्याभावेऽप्युपाधिसंबन्धमात्रेण व्यावृत्तौ एकस्याप्यनेकसंबन्धसंभवेन स्वस्य स्वस्माद्वैलक्षण्यं स्यात्। तथाचानुभवविरोध इति नाप्रयोजकत्वमिति भावः। न केवलमनुमानेन विशेषः सिध्यति। विषयस्योपलक्षणत्वान्यथानुपपत्त्याऽपि स सिध्यतीत्यभिप्रेत्य ज्ञाने विषयस्योपलक्षणत्वानङ्गीकारिणमुपलक्षणत्वं साधयति – अपि चेति। कुत इत्यत आह – अतीतादिज्ञान इति। न चातीतादिज्ञाने विषयस्योपलक्षणत्वेऽपि वर्तमानविषयकज्ञाने विशेषणत्वं किं न स्यादिति वाच्यम्। तत्राप्युपलक्षणत्वस्यावश्यकत्वात्। अन्यथा विषयस्य ज्ञाने विशेषणत्वे ज्ञानोत्पादकानामिन्द्रियादीनां विषयोत्पादकत्वं स्यात्। विषयोपलक्षितज्ञानेनैव स्वकार्योत्पत्तौ तत्र विषयस्यापि विशेषणत्वेन कारणत्वे गौरवाच्च। नन्वतीतादिज्ञानेऽपि विषयो विशेषणमित्यत आह – न हीति। सर्वथाऽविद्यमानस्य विशेषणत्वासंभवादिति भावः। नन्वस्तु विषयस्योपलक्षणत्वम्। ततः किम्? तत्राह –उपलक्षणेन चेति। उपलक्ष्यतावच्छेदकाभावे उपलक्षणत्वासंभवात्। उपलक्ष्यतावच्छेदकस्य ज्ञाननिष्ठस्य विशेषस्य सिद्धिरिति भावः। नन्वतीतादिज्ञाने विषयस्याविशेषणत्ववद् उपलक्षणत्वमपि मया नाङ्गीक्रियते। किन्तूपाधित्वम्। न च विशेषणत्वोपलक्षणत्वाभ्यामन्यद् उपाधित्वं दुर्वचमिति वाच्यम्। येन स्वोपरागाद् विशेष्ये व्यावृत्तिबुद्धिर्जन्यते तद्विशेषणम्। व्यावृत्तिबुद्धिकाले विशेष्योपरञ्जकमित्यर्थः। यथा गोत्वादि। येन च स्वोपरागमुदासीनं कुर्वता विशेष्यगतव्यावर्तकोपस्थापनेन व्यावृत्तिबुद्धिर्जन्यते तदुपलक्षणम्। यथा काकादि। यत्तु विशेष्ये नोपरञ्जकं, न वा धर्मान्तरोपस्थापकम्, अथ च व्यावर्तकं तदुपाधिः। यथा पङ्कजशब्दप्रयोगे पद्मत्वं। यथा वोद्भिदादिशब्दप्रयोगे यागत्वावान्तरजातिविशेषः। न हि पद्मत्वयागत्वावान्तरजातिविशेषधर्मौ पङ्कजननकर्तरि फलोद्भेदनकर्तरि च धर्मान्तरमुपस्थापयतः। तथाऽप्रतीतेः। नापि स्वोपरक्तबुद्धिं जनयतः। समुदाये शक्त्यन्तरानभ्युपगमात्। अथ च कुमुदज्योतिष्टोमादिभ्यो व्यावर्तकौ। तस्मादुपाधी। इदं च भट्टप्राभाकराणां मतेन निदर्शनम्। नैयायिकमते च आकाशपदप्रयोगे आकाशत्वमुपाधिर्यथेति निदर्शनम्। तथाच विषयस्योपाधित्वात् उपलक्षणत्वाभावेन तदन्यथानुपपत्त्या न ज्ञाने विशेषसिद्धिरिति।

अत्रोच्यते। एवं हि वदता सर्वत्र विषयस्योपाधित्वमेवाङ्गीकृतम्, अथ क्वचिद्विशेषणत्वं, क्वचिदुपाधित्वमिति वा? आद्ये सदादिज्ञानकार्ये सदादेरुपाधित्वेनाजनकत्ववत् सुषिरादि ज्ञानेऽपि तथात्वापातेन स्वप्रातिकूल्यमेवाचरितं स्यात्। द्वितीयस्यार्धजरतीयपराहतत्वात्। यच्च विशेषणत्वादिलक्षणकथनं तदपि मन्दम्। तथाहि। विशेषणत्वलक्षणे विशेष्योपरञ्जकत्वं किं विशेष्ये विद्यमानत्वं वा, स्वविशिष्टबुद्धिजनकत्वं, स्वाविशिष्टबुद्धिविषयत्वं वा? नाद्यः। काकेऽतिव्याप्तेः। तस्यापि कदाचिद् विशेष्ये सत्त्वात्। नियमेन

मास्तु विषयस्योपलक्षणत्वेन भयादि हेतुत्वम्। तथापि ज्ञानावच्छेदकत्वमस्त्येव। अवच्छेदकत्वं च व्यावर्तकत्वम्। तथाच व्यावृत्तिधीहेतुताङ्गीकृतैवेत्यसतो हेतुत्वं दृष्टमित्याशङ्कते नन्विति। व्यावर्तकत्वं च न व्यावृत्ति धीहेतुत्वम्। किन्त्वन्यदेवेति परिहरति यत इति। नन्विदमेव व्यावर्तकत्वमित्यत्र किं नियामकमित्यत आह सत्यपीति। तथा चान्वय व्यतिरेकावेव तत्र मानमिति भावः। अवच्छेदकस्य यद्रूपं तदवच्छिन्नस्येति सामान्यव्याप्तिरुतावच्छेदकस्य मिथ्यात्वेऽवच्छिन्नस्य मिथ्यात्वमिति विशेषनियमः? तत्र नाद्य इत्याह तुच्छस्येति। न द्वितीयः। कुत्राप्यदर्शनात्। ननु स्वप्ने गजादिज्ञानादौ दृष्टमिति चेत् न। गजादि ज्ञानस्याबाधेन तन्मिथ्यात्वासंमतेः। ननु यत्रावच्छेदकानां विशेषणत्वं तत्रावच्छेदकस्य यद्रूपं तदवच्छेद्यस्येति नियमः। उदाहृतस्थलेष्ववच्छेदकानां ताटस्थ्यात् प्रकृतौ च विशेषणत्वादित्यत आह तत्रेति। न च प्रकृते दृष्टान्तवद् विशेषणत्वे बाधकाभाव इति वाच्यम्। अत्रापि बाधकस्य पूर्वमेवोदाहृतत्वात्। अर्थावच्छिन्नं ज्ञानं भयादिकारणमित्यङ्गीकृत्यार्थस्याहेतुत्वं समर्थ्य संप्रति तदनवच्छिन्नं स्वतो विलक्षणं ज्ञानं हेतुरित्यभिप्रेत्य ज्ञाने स्वतो विशेषं साधयितुं प्रतिजानीते वस्तुतस्त्विति। न चेति। घटादिज्ञानस्यापि भयादि हेतुत्वं स्यादिति भावः। स्वत एवेति। स्वाभाविकविशेषादेवेत्यर्थः। ज्ञाने स्वाभाविकविशेषे परिशेषं प्रमाणयति तथाहीत्यादिना। तर्हीति। तथाच परिशेषप्रमाणेन ज्ञाने विशेपस्य सिद्धत्वान्नातिप्रसङ्ग इति। ननु सर्पज्ञानत्वावच्छिन्नस्यासर्पज्ञानाद् व्यावर्तकं वाच्यम्। तच्च न स्वरूपमेव। सर्वसर्पज्ञानसाधारण्याभावात्। किं त्वनुगतो धर्मो वक्तव्यः। स च न जातिरूपः। प्रत्यक्षत्वानुमितित्वादिना संकरप्रसंगात्। किन्तूपाधिरूपः। स च स्वरूपसंबन्धेन बाऽऽध्यासिकसंबन्धेन वा संबन्धिभूत विषयादन्यो न भवति, मानाभावात् इति चेन्न। विषयस्य स्वरूपसंबन्धेन तावद् ज्ञानव्यावर्तकता न संभवति। स्वरूपसंबन्धस्याननुगतत्वेन तद्घटितधर्मस्योपाधिरूपस्याननुगतत्वात्। नाध्यासिकसंबन्धेन। तस्याद्याप्यसिध्याऽन्योन्याश्रयात्। तस्माद् ज्ञाननिष्ठो धर्मो व्यावर्तको वक्तव्यः। न च तस्य जातिरूपत्वे जाति संकर इति वाच्यम्। नैयायिकाभिमत जातेर्मयानङ्गीकारात्। अङ्गीक्रियते चेत् तत् तज्ज्ञानमात्रनिष्ठा। सा च सादृश्यत्वादिनानुगतेति। अन्यथा विशेषादौ तन्मतेऽनुगतव्यवहाराभावप्रसंगात्। अस्तु वा जातिरूपः। न च साङ्कर्यम्। प्रत्यक्षत्वादिव्याप्यस्य नानाविधस्याङ्गीकारात्। न चाननुगमः। स जातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन तारत्वादीनामिव सर्पज्ञान व्यावर्तकत्वेनानुगमसंभवात्। गुणगतजातौ संकरस्यादोपत्वाच्च। उपाधिसांकर्यस्यादोपत्ववत् जाति सांकर्यस्याप्यदोषत्वसंभवाच्च। अनुमानेनापि ज्ञानगतो विशेषः सिध्यतीत्याह किंचेति। सर्पज्ञानमसर्पज्ञानत्वावच्छिन्नव्यावर्तकधर्मान्तरसंबन्धानपेक्षधर्मोपेतमिति साध्यार्थः। तेनासर्पज्ञानस्यापि परोक्षादिरूपस्य संभवात् सर्पज्ञानस्य तेन रूपेण वैलक्षण्य संभवेन सिद्धसाधनतेति परास्तम्। अत्र सामान्यव्याप्तौ दृष्टान्तमाह यवाङ्कुरादिति। न च सामान्यव्याप्तेर्यत्तद्घटितत्वात् सर्वनाम्नश्च तत्तद्व्यक्तिपरत्वेनानुगत व्यापकतावच्छेदकाभावात् कथं व्याप्तिग्रह इति वाच्यम्। सर्वनाम्नोऽपि बुद्धिस्थत्वावच्छिन्नवाचकत्वात्। अन्यथाऽनुगतवाच्यतावच्छेदकाभावेन तत्र शक्त्यग्रहे तस्याबोधकत्वमेव स्यादिति सकलव्यवहारोच्छेदः। अत एव यत्तच्छब्दघटिताः प्राचां प्रयोगा बहुलमुपलभ्यन्त इति। न चोक्तरीत्या जातिरूपस्य वैलक्षण्यस्यासंभवात् बाधितमनुमानमिति वाच्यम्। तस्य परिशेषोपपादनावसर एव साधितत्वात्। ननु घटसंयोगत्वावच्छिन्ने व्यभिचारः। घटसंयोगः पटसंयोगान्न जात्या भिद्यते। तदवृत्तिजात्यनधिकरणत्वात्।

सत्वमित्यस्यान्योन्याश्रयादिना पराहतत्वात्। न चासद्वैलक्षण्य साधकत्वं स्वरूपेणात्यन्तभावप्रतियोगिनः तद्वैलक्षण्यानुपपत्तेः। एतदपेक्षया सत्वस्यैव लघुत्वाच्च। तथाच स्वप्रागभावादीनां जनकत्वे स्वस्योपलक्षणत्वम्। विशेषणत्वे स्वापेक्षया पूर्वसत्वव्याघातादि बाधकसत्वात्। तथा सवितृसुषि रादीनामप्युक्त बाधकादुपलक्षणत्वमेवेति न तेषां जनकत्वम्। ननु तथापि उक्तस्थले विषयस्यापि जनकत्वं स्वीकर्तव्यम्। तदुत्कर्षविधानात्। तथाहि। स्वप्ने जागरे चोत्कृष्टकलधौतदर्शनात् उत्कृष्टं सुखम्। तथोत्कृष्टसर्पादिज्ञानाच्चोत्कृष्टं भयादि दृश्यते। विषयस्याकारणत्वे तदुत्कर्षानुविधानं कार्ये नस्यात्। न ह्यकारणोत्कर्षमकार्यमनुविधत्ते इति न्यायात्। न च ज्ञानप्रकर्षादेव तत्र प्रकर्ष इति वाच्यम्। विषय गतप्रकर्षं विनान्यस्य ज्ञानगतस्य प्रकर्षस्याभावात्। न च जातिरूप एव प्रकर्षः। चाक्षुषत्वादिना संकरप्रसंगात्। विषयप्रकर्षेणैवोपपत्तौ चाक्षुषत्वादिव्याप्यनानाजाति कल्पने गौरवादिति। उच्यते। विषयोत्कर्षेण कार्योत्कर्षासिद्धेः। अन्यथोत्कृष्टसर्पादेरनुत्कृष्टत्वादिना ज्ञानेऽपि कार्योत्कर्षः स्यात्। कार्योत्कर्षप्रयोजकस्य विषयोत्कर्षस्य विद्यमानत्वात्। तस्मात् यथा रजतत्वाद्यभावेऽपि तत्प्रकारकज्ञानं प्रवृत्त्यादिजनकं तथा विषय गतोत्कर्षाद्यभावेऽपि उत्कृष्टत्वादि प्रकारक ज्ञानत्वमेव ज्ञानगतं भयाद्युत्कर्ष प्रयोजकमिति न विषयस्य कारणत्वमिति। किंच वक्ष्यमाणरीत्या ज्ञानगत एव जातिरूपो विशेषो भयाद्युत्कर्ष हेतुः। न च साङ्कर्यम्। मन्मते तस्याभावात्। भावे वा गुणगतजातौ तथाऽभावाच्च। नच ज्ञानस्य भयादि जनकत्वे सर्पाद्यवच्छिन्नत्वमेव कारणतावच्छेदकमास्थेयम्। ज्ञानत्वेन जनकत्वेऽतिप्रसङ्ग इति वाच्यम्। प्रागभावस्य घटादिजनकत्वे घटाद्यवच्छिन्नत्वमेव जनकतावच्छेदकमास्थेयम्। प्रागभावत्वेन तत्वेऽतिप्रसंगादिति साम्यात्। तत्र घटादीनामवच्छेदकत्वेप्युपलक्षणत्वमिति यदि तदेतत् प्रकृतेऽपि तुल्यम्। बाधस्यो भयत्रापि साम्यात्। न च ज्ञानस्यापि मिथ्यार्थावच्छिन्नत्वात् मिथ्यात्व मेवेति वाच्यम्। यद् यादृशावच्छिन्नं तत् तादृशमिति व्याप्तेरभावात्। ब्रह्मज्ञानस्य ब्रह्मावच्छिन्नत्वेऽपि त्वन्मते सत्यत्वाभावात्। असद्वैलक्षण्यस्यासदवच्छिन्नत्वेऽप्यसत्वाभावात्। अज्ञानस्य मिथ्यात्वेऽपि तदवच्छिन्नस्य साक्षिणो मिथ्यात्वाभावात्। अन्यथा ज्ञानादेरपि सत्यत्वाद्यापत्तिरिति। नच सर्वत्रावच्छेद्यवच्छेदकयोरैकरूप्यं नेति वाच्यम्। प्रकृतेऽपि तथाभ्युपगमप्रसंगात्। बाधकस्याविशेषात्। न च स्वरूपतोऽबाधे विषयतोऽप्यबाधप्रसंग इति वाच्यम्। विषयतोऽबाधे स्वरूपाबाधवत् स्वरूपतोऽबाधे विषयबाधोपपत्तेः। न च मिथ्यात्वप्रयोजकदृश्यत्वादेरुभयसाधारणत्वादुभयोरपि मिथ्यात्वमिति वाच्यम् दृश्यत्वादेर्मिथ्यात्व प्रयोजकत्वाभावस्य पुरैवोपपादितत्वात्। ननु कारणत्वमेकमनुगतं चेत् तत्र सत्वं तवावच्छेदकम्। ममासद्विलक्षणत्वम्। तदेव न। कारणत्वस्य संबन्धितावच्छेदकघटत्वादिभेदेन भेदात्। तत्र च दण्डत्वादिकमेवावच्छेदकम्। तच्च सत्वासत्वोभयोदासीनमिति चेन्न। अनुगतमतेरनुगतस्य तस्य स्वीकर्तव्यत्वात्। न च संबन्धितावच्छेदक भेदेन तद्भेदः। संबन्धितावच्छेदकभेदस्य ससंबन्धिके भेदेऽप्रयोजकत्वात्। अन्यथा ईश्वरज्ञानादीनां भेदप्रसङ्गः। किं च न वयं सत्वं कारणतावच्छेदकं ब्रूमः। किन्तु सत्वाभावे कारणत्वमेव न स्यात्। कारणत्वस्य सत्वघटितत्वात्। तथाच बन्ध्यात्वे मातृत्वमिव सत्वाभावे कारणत्वं व्याहतम्। एवं च सत्वस्य कारणत्वनिर्वाहकत्वेन कारणत्व प्रयोजकत्वम्। यथा पुत्रस्य मातृत्वे। न तु कारणतावच्छेदकत्वेन। तथाचानुक्तोपालम्भोयमिति दिक्। उक्तमर्थं कारिकारूढं करोति तथाचेति। ननु

नन्वत्रार्थानवच्छिन्नज्ञानमात्रं हेतुः उतार्थावच्छिन्नं तत्? नाद्यः। ज्ञानमात्रस्य भयादिहेतुत्वे घटज्ञानादेरपि भयादिहेतुत्वापत्तेः। न द्वितीयः। अवच्छिन्नस्य हेतुत्वेऽवच्छेदकस्यापि तत्प्रसङ्गः। अवच्छिन्नकारणताग्राहक प्रामाणस्य बाधकाभावेऽवच्छेदक कारणत्व ग्राहकत्वस्येन्द्रियसन्निकर्षादौ दर्शनात्। अन्यथा इन्द्रियस्यापि घटसाक्षात्कारादौ जनकत्वं न स्यात् इत्याशयेन शङ्कते नन्विति। अत्रावच्छिन्नस्य यद् भवति तद् अवच्छदकस्यापि भवतीति सामान्य व्याप्तिर्वावच्छिन्नस्य कारणत्वेऽवच्छेदकस्यापि कारणत्वमिति विशेषव्याप्तिर्वाभिप्रेता? उभयथापि व्यभिचारादित्याह घटावच्छिन्नस्येति। तत्राद्यव्याप्तेः घटात्यन्ताभावादौ व्यभिचारः। द्वितीयाया घटेच्छादाविति विवेकः। अत्रोक्तदृष्टान्तेष्ववच्छिन्नस्य हेतुत्वेऽप्यवच्छेद कस्याहेतुत्ववदर्थावच्छिन्नस्य ज्ञानस्य हेतुत्वेऽप्यर्थस्याहेतुत्वोपपत्तेः। न च तत्रावच्छेदकस्योपलक्षणत्वम्। प्रकृतेऽपि तदस्तु। अत एवोक्तं कुरूणां क्षेत्रे वसतीति। तथाचार्थस्योपलक्षणत्वात् विशेषणत्वाभावेन विशिष्टकारणताग्राहकन्यायाप्रवृत्तिरिति भावः। ननु सवितृसुषिरादीनां ज्ञानविशेषणत्वमेव नोपलक्षणत्वम्। उपलक्षणत्वकल्पनस्य विशेषणत्वबाधपूर्वकत्वात् अन्यथा 'दण्डी प्रैषानन्वाह' 'लोहितोष्णीषाः ऋत्विजः प्रचरन्तीत्यादावपि वेदे दण्ड लौहित्यादेरप्युपलक्षणत्वं स्यात्। तथाच तदभावेऽपि अनुष्ठानप्रसङ्गः। तथा 'सर्वादीनि सर्वनामानि' 'जन्माद्यस्य यतः' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा जन्मनश्च ब्रह्मलक्षणत्वं च न स्यात्। विशेषणार्थत्वे तद्गुणसंविज्ञानबहुव्रीहिसंभवेऽपि उपलक्षणार्थत्वेऽतद्गुणसंविज्ञान बहुव्रीहिस्वीकारप्रसंगात्। एवम् 'असिपाणयः प्रवेशयन्ताम्' इत्यादि लौकिक प्रयोगेऽपि। तथाच विशेषणत्वे बाधकाभावात्। सवितृ सुषिरादिज्ञानानां जनकत्वं तद्विशेषण सुषिरादीनां जनकत्वम्। न च तर्ह्युदाहृतस्थलेष्वपि विशेषणत्वं स्यादिति वाच्यम्। तत्र बाधकसद्भावात्। तथाहि प्रथमे घटकालदेशौ गृहीत्वा तद्भिन्नदेशकालत्वं तदत्यन्ताभावादौ ग्राह्यम्। घटस्यापि तत्संबन्धे तद्देशकालभिन्नदेशकालत्वमेव व्याहतं स्यात्। द्वितीये त्विष्टापत्तिः। घटज्ञानस्य घटेच्छाजनकत्ववत् घटं प्रत्यपि जनकत्वात्। ब्रह्मणो वेदान्तसाध्यत्वे नित्यत्वविरोधः। तृतीये प्रागभाववत् घटस्य जनकत्वे प्रतियोगिप्रागभावयोः समानकालत्वापत्तिः। स्वावधिकपूर्वत्वघटितजनकत्वस्य स्वस्मिन् व्याहतत्वं च। चतुर्थे पञ्चमे च प्रतियोगितदभावयोः सहावृत्त्या भ्रमप्रत्यवाययोरनुत्पत्तिप्रसङ्गः। षष्ठे कामनावत् कामनाविषयस्य जनकत्वे तस्य प्राक् सत्तया कामनैव व्याहन्येत। सिद्धे इच्छाविरहात्। सप्तमेऽतीतस्य जनकत्वे कार्याव्यवहित पूर्वकाले स्वस्वव्याप्यान्यतरसत्वापत्तिः। अष्टमेऽसतो जनकत्वे निःस्वरूपत्वव्याघातः। नवमे चिकीर्षितघटज्ञानवत् स्वस्य जनकत्वे पूर्ववत् व्याघातः। दशमे उदासीनस्य ब्रह्मणो न निवर्तकत्वं स्वरूपतः। उपहितस्यैव वृत्तिविषयत्वेन तस्याविषयत्वात्। उपहितस्य च निवर्तकत्वमस्त्येव। एकादशे ब्रह्माज्ञानस्य परिणामिकारकत्वेऽपि न ब्रह्मणस्तत्कारणत्वम्। कार्ये जडत्वोपलम्भात्। एवंविधबाधकात् तत्रोपलक्षणत्वं स्वीक्रियते। न च प्रकृते बाधकमस्ति। अव्यवहित देश कालवृत्तित्वस्य प्रातिभासिक साधारणत्वात्। इदानीमत्र सर्प इत्यादि प्रतीत्यविशेषात्। न हि बाधकेन कचिन्मुख्यार्थपरित्यागः कृत इति सर्वत्र तथैव भविष्यतीति। अत्रोच्यते। प्रकृतेऽपि सवितृसुषिरादीनां प्रतिपन्नोपाधौ स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वेनासत्वात् तेषां कार्यपूर्वक्षणसत्वघटितजनकत्वव्याघातो विशेषणत्वे बाधकः। न चात्यन्ताभाव प्रतियोगित्वेपि, सत्त्वरूपत्वात् जनकत्वाविरोध इति वाच्यम्। तथाभूतस्यापि सस्वरूपत्वे तुच्छस्यापि तत्प्रसङ्गात् पारमार्थिकत्वेनात्यन्ताभावप्रतियोगित्वं स्वरूपेण तु

वर्णारोपासंभवात्। नच शैशवे अयं ककारोऽयं गकार इत्यभेदानुभवात् अभेदेनैव स्मरणात् विवेके सत्यपि दृढतरसंस्कारवशान्नारोपनिवृत्तिरिति वाच्यम्। लिपीनां देशभेदेन भेदानुभवेऽपि वर्णानामेकत्वानुसंधानेन 'लिपि मात्रमिदं नाना वर्णस्तु सर्वलिपि ज्ञाप्य एक एवेत्यनुभवेन अयं ककारोऽयं गकार इत्यस्याभेदोपचारत्वात्। अत एवाह अत एवेति। तस्माद् रेखाया वर्णे संकेतमात्रमेव स्वीकर्तव्यम्। न वर्णारोप इति नायमप्यसतः साधकत्वे दृष्टान्त इति भावः। नगो नाग इत्यादाविति। अत्र दीर्घत्वादिकमेवार्थविशेषप्रत्ययहेतुः तज्ज्ञानं वा? आद्य आह दीर्घत्वादिकमिति। अयमभ्युपगमवादः। वस्तुतस्तु दीर्घत्वादिज्ञानमेव हेतुः। अज्ञातदीर्घत्वादेरर्थविशेष प्रत्ययानुदयादिति ध्येयम्। आदिपदेन ह्रस्वत्वपरिग्रहः। ननु दीर्घत्वादिकं वर्णनिष्ठं चेत् जातिरूपं वा, उपाधिरूपं वा? नाद्यः। एकस्मिन् वर्णे दीर्घत्वह्रस्वत्वरूप विरुद्ध जातिद्वयायोगात्। विरुद्धजात्योरेकत्रादर्शनात्। न द्वितीयः। उपाधेरनिर्वचनादिति चेन्न। उभयथाप्यदोषात्। जातिख्याप्यवृत्तिरिति मतेन प्रमात्वाप्रमात्वयोरव्याप्यवृत्तित्वेऽपि जातित्ववत् दीर्घत्वह्रस्वत्वयोरपि तदुपपत्तेः। तत्र देशभेदोऽवच्छेदक इति चेत् इह कालभेदः पुरुषभेदसंबन्धो वावच्छदकोऽस्तु। द्वितीयेऽनिर्वचनं दोष इति चेन्नेत्याह दीर्घध्वनीति। न च ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इति प्रत्ययात् कथमेतादृशं दीर्घत्वमिति वाच्यम्। दीर्घ इत्यत्र दीर्घत्वस्फुरणे तस्य ध्वनिघटितत्वेन तदस्फुरणे तत्स्फुरणासिद्धेः। अन्यथा दीर्घत्वारोपोऽपि न स्यात्। अस्य गृह्यमाणारोपत्वेन ध्वन्यस्फुरणे तदसंभवात्। दीर्घत्वज्ञानं कारणमिति पक्ष आह ज्ञातं सदिति। नन्वर्थानवच्छिन्नज्ञानमात्रस्य हेतुत्वेऽतिप्रसङ्ग इत्यत आह वक्ष्यमाणेति। दीर्घत्वादेस्तज्ज्ञानस्य वा सत्यस्यैवार्थप्रत्ययहेतुत्वसमर्थनेनेत्यर्थः। ननु दैर्ध्यादेरसत्वेऽपि तस्मात् तात्विकार्थसिद्धिः संभवति। न हि तात्विकार्थसिद्धौ साधनसत्यत्वं तन्त्रम्। किन्तु साधकतावच्छेदकव्याप्त्यादिमत्वमिति चेन्न। सत्यत्वाभावे साधकतावच्छेदकरूपव्याप्त्यसंभवात्। अन्यथा धूमाभासस्यापि साधकत्वं स्यात्। नचानाभासत्वग्रहस्तत्र प्रयोजक इति वाच्यम्। आभासरूपानाभासत्वग्रहस्य तत्रापि संभवात्। तात्विकानाभासत्वग्रहस्य त्वन्मते कुत्राप्यभावात्। तस्मात् साधकता प्रयोजकरूपस्य सत्यत्वं विनाऽसंभवात् तदर्थमेव सत्यत्वं साधकस्यापेक्षितमिति ध्येयम्। ननु स्वाप्नमन्त्रस्यासत एव साधकत्वं दृष्टमित्यत आह स्वाप्नमन्त्रोऽपीति। ननु घटोत्कचादिसृष्टमाया हस्त्यादेरसत्यस्यापि साधकत्वं दृष्टमित्यत आह भारतयुद्धादाविति। मायासृष्टगजादेः सप्रकाराबाध्यार्थक्रियाकारित्वात् सत्यत्वमेवेति भावः। स वितृसुषिररज्जुसर्पादि ज्ञानमेवेति। ज्ञानस्यैवान्वयव्यतिरेकित्वमेवकारार्थः। एवं च ज्ञानमेव भयादिहेतुः। नत्वर्थः। तस्यान्वयव्यतिरेकाभावादित्याह – सत्यपीति। ननु यथा भयादिकं प्रति सर्पादि ज्ञानमेव कारणम्, नत्वर्थः, अर्थाभावेऽपि ज्ञानमात्रेण भयादिदर्शनात्, तथानुमित्यादावपि हेत्वादिज्ञानमेव कारणम्, न हेत्वादि, तदभावेऽपि ज्ञानमात्रेणानुमितिदर्शनादित्याशङ्क्य निषेधति नचैवमिति। तज्ज्ञानमात्रस्येति। तथाच यथा हेत्वाभासेषु हेत्वाद्यसत्वेनानुमितेराभासत्वं तथा प्रकृतानुमानस्याप्याभासत्वं स्यात्। तद्वद्व्याप्त्याद्यसत्वात्। यादृच्छिकातिरिक्तस्थले व्याप्त्याद्यसत्वेऽनुमितेराभासत्वनियमादित्याशयः। किंच हेत्वाभासस्थले ज्ञानमात्रस्य सत्वात् तस्मात् कार्योत्पत्तिः संभविनी प्रकृतानुमाने त्वन्मते ज्ञानस्यापि मिथ्यात्वात् कथं तेन कार्योत्पत्तिरित्याह त्वन्मत इति। ननु सत्यस्थले सर्पादिर्भयादिरूपार्थक्रियाकारित्वदर्शनात् कथं तज्ज्ञानमात्रेण भयादिकमित्यत आह सत्यसर्पादेस्त्विति। भयादौ तु तज्ज्ञानमेव कारणमिति भावः।

असदेव कारणमिति मत्कथाप्यापाततो वृथेत्यर्थः। मैवं दंडत्वतंतुत्वादेः त्वन्मते दंडाद्याभासेऽतिप्रसक्तत्वेन न तस्य हेतुत्वावच्छेदकत्वम्। न ह्यकारणे विद्यमानं कारणतावच्छेदकम्। दंडाभासदेश्चाकारणत्वं त्वयाप्यंगीकृतमेव। यथोक्तं वाचस्पत्ये असत्यत्वाविशेषेपि वर्णदैर्ध्यादिना असत्यं ज्ञायते न तु धूमाभासादिनेति। कारणस्यानेकत्वेन दंडत्वावच्छिन्नस्वभावत्वेपि सत्त्वं तत्र प्रयोजकमास्थेयम्। मम तु सदसतोरेकसामान्य दंडत्वादेरभावेन सद्विशेषदंडत्वादेः कारणतावच्छेदकत्वे सत्त्वस्य कारणत्वप्रयोजकत्वमिति। उपसंहरति॥ तस्मादिति॥ असत्व इति॥ दृश्यत्वादि हेतुभिर्हेतुवाक्यादि प्रापितानां साधनव्यास्यादीनां मिथ्यात्वबोधने न तेषामसत्वमित्यर्थः। व्यासाद्रिकृततर्काब्धुपूरैः पक्षयुगंयुजि॥ न्यायामृततरंगिण्यामसतोऽहेतुताऽन्यथा॥ असतः साधकत्वाभावे बाधकोद्धारः॥

न्यायामृतकण्टकोद्धारः

असतः साधकत्वाभावे दर्शनं बाधकमाशङ्कते नन्विति। प्रतिबिम्बेति। नच मन्मते प्रतिबिम्बस्य बिम्बात्मना सत्वेऽपि प्रतिबिम्बात्मनाऽसत्वमेवेति वाच्यम्। तस्य प्रतिबिम्बात्मनापि सत्वस्य स्वीकार्यत्वात्। अन्यथा बिम्बमेवास्ति, न प्रतिबिम्बमिति त्वन्मते ऐक्यं न स्यात्। नहि सदसतोरैक्यम्। अन्यथा गोविषाण नरविषाण योरैक्यं स्यात्। अपि चास्तु प्रतिबिम्बात्मनाऽसत्यत्वम्। तथापि तत्स्वरूपस्य सत्वात् तस्यैव साधकत्वात् असतः साधकत्वे नायं दृष्टान्तः। किञ्च तज्ज्ञानमेव साधकम्। अज्ञातप्रतिबिम्बस्य बिम्बानुमित्यदर्शनात्। ज्ञानं च सदेवेति नासतः साधकत्वम्। वक्ष्यमाणरीत्या प्रतिबिम्बसत्यतायास्त्वां प्रति साधयिष्यमाणत्वाच्च। ज्ञानमेवेति। नच विषयानवच्छिन्न ज्ञानमात्रस्यातिप्रसक्तत्वात् तदवच्छिन्नस्य सूचकत्वे विषयस्यापि सूचकत्वमेवेति वाच्यम्। अस्याग्रे दूष्यत्वात्। ननु स्वाप्नकामिन्यादेरर्थक्रियादर्शनात् कथं ज्ञानमेव सूचकमित्यत आह अन्वयव्यतिरेकाभ्यां चेति। अज्ञातकामिन्यादेः सुखाहेतुत्वादिति भावः। स्फटिकेति। ननु धर्मिभूतमुखादिनिरपेक्षेण तद्धर्मभूतरूपादि प्रतिबिम्बादर्शनात् जपाकुसुम प्रतिबिम्बं विना कथं तद्धर्म लौहित्यप्रतिबिम्ब इति चेन्न। अनुभवबलेन धर्ममात्रारोपवत् धर्ममात्रप्रतिबिम्बस्यापि स्वीकार्यत्वात्। क्वचिद् धर्ममात्रप्रतिबिम्बादर्शनं च धर्मिप्रतिबिम्ब सामग्रीसाहित्य निबन्धनम्। यत्रोभयप्रतिबिम्बसामग्री तत्रोभयप्रतिबिम्बः। यत्रैकमात्रप्रतिबिम्बसामग्री तत्रैकमात्रप्रतिबिम्ब इत्यङ्गीकारे बाधकाभावात्। सामग्रीसत्वस्य फलबलकल्प्यत्वात्। न च शुक्तिरजतवत् स्फटिके लौहित्यं मिथ्येति कृत्वा स्फटिके तदारोप इति वाच्यम्। अत्र रजतत्वं नेतिवत् स्फटिके लौहित्यं मिथ्येति बाधकाभावात्। अन्यथा प्रतिमुखमपि मिथ्या स्यादविशेषादिति साधुसमर्थितो जीवब्रह्मैक्यवादः। न च प्रतिबिम्बस्याव्याप्यवृत्तित्वनियमात् लौहित्यस्य च व्याप्यवृत्तित्वात् कथं प्रति बिम्बत्वमिति वाच्यम्। धर्मिप्रतिबिम्बे तथा नियमेऽपि धर्मप्रतिबिम्बे तथा नियमाभावात्। लौहित्यस्य व्याप्यवृत्तित्वासिद्धेश्च। रेखायाश्चेति। अत्र रेखास्मारितवर्णस्यैव बोधकत्वम्। न रेखारोपितवर्णस्य। भेदज्ञानेन रेखायां

विशेषणमुपलक्षणं वा। यदि विशेषणं तदा सत्तापि कारणमित्यायातम्। सत्तायां च न सत्तेत्यसत्कारणमित्यायातम्॥ तत इति॥ सत्ताविशिष्टं कारणमित्यभ्युपगमादित्यर्थः। द्वितीये सत्तोपलक्षितं सत्तारहितं कारणमिति त्वयैवाभ्युपगमादित्यर्थः॥ तत इति॥ सत्तोपलक्षितं कारणमित्यभ्युपगमादित्यर्थः। यद्वा कारणमित्युभयत्र भावप्रधानो निर्देशः। सत्तामंतर्भाव्य कारणत्वं वर्तते न वा। कारणत्वाश्रयकोटौ सत्ता वर्तते न वेत्यर्थः। सत्तायां कारणत्वं वर्तते न वेति यावत्। आद्येऽसदपि कारणं। सत्तायाः सत्ताविरहेणासत्त्वात्। द्वितीये सत्तायाः सदाकारप्रत्ययो नेति तन्मात्रप्रमायाः सत्तायाः लोपे सर्वकारणमसदेव प्राप्तमित्यर्थ इत्यस्मिन्पक्षे सत्तायां कारणत्वस्वीकारास्वीकारौ ततः शब्दार्थः॥ खंडनोक्तेति॥ यद्यपि खंडने अनेन वार्तिकेन सत्कारणत्वं निषिध्यते। असत्कारणत्वं तु प्रागेवोक्तमिति तव्याख्यातारः। तथाप्यसत्कारणत्वस्य कंठरवेण प्रतीतत्वात्तथोक्तमिति ध्येयम्॥ असत्कारणतेति॥ एतस्य स्वव्याहतेत्यनेनान्वयः॥ अस्यैवेति॥ त्वद्ग्रंथ एव अन्यथाकारमक्षराणि कियंत्यपि। तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुःपठेति त्वदुक्तन्यायेन।

अंतर्भावितसत्वं चेदनसत्कारणं ततः।
नांतर्भावितसत्वं चेदनसत्कारणं तत इति।

अकारांतर्भावेण पठितुं शक्यत्वादित्यर्थः। अबाध्यत्वरूपसत्त्वविशिष्टे तदुपलक्षिते वा अबाध्यत्वरूपसत्त्वस्य सत्वात्। दृश्यत्वे दृश्यत्ववदिति भावः॥ अंतर्भावितसत्वं चेदिति॥ सत्ताविशिष्टस्याधिष्ठानत्वे विशेषणीभूतायाः सत्तारहितायाः अपि सत्तायाः अधिष्ठानत्वमायातम्। सत्तोपलक्षितस्याधिष्ठानत्वे सत्ताविरहितमधिष्ठानमिति त्वयैवाभ्युपगमादित्यर्थः। एवं द्वितीयव्याख्यानमपि योज्यम्। तत इति। सत्ताविशिष्टं तदुपलक्षितं वाऽधिष्ठानमित्यभ्युपगमादित्यर्थः॥ कथमिति॥ असदेवेदमग्र आसीदित्यादिना अतः कारणत्वं पूर्वपक्षस्य कथं नु खलु सोम्यैवं स्यात् कथमसतः सज्जायेतेत्यादिना असत्कारणत्वं निपिद्धम्॥ नासत इति॥ असतः कारणत्वं न। अदृष्टत्वादिति सूत्रार्थः।

अत्र केचित्। दंडतंतुसाधारणमेकं कारणत्वं नास्त्येव। यत्र तव सत्त्वमवच्छेदकं मम तुच्छविलक्षणत्वादिकं। किंतु कार्यतावच्छेदकं घटत्वपटत्वादि। कारणतावच्छेदकं दंडत्वतंतुत्वादि। तद्भेदाच्च कारणत्वं भिन्नं। यथा गोर्गवयसादृश्यमन्यत् मातृभगिन्यादिसादृश्यमन्यत्। तत्र नैकमवच्छेदकं, किंतु गवयत्वादिकमेव। तद्वदत्रापि दंडत्वादिकमेव सत्त्वासत्त्वोदासीनमवच्छेदकं वाच्यम्। तथाच जनकत्वाजनकत्वानुसारेणापि न सत्त्वासत्त्वसिद्धिः। तदुक्तं खंडने पूर्वसंबंधनियमो हेतुत्वे तुल्य एव नौ। हेतुतत्वबहिर्भूतसत्त्वासत्त्वकथा वृथेति। अस्यार्थः। न सत्कारणम्। नाप्यसत्कारणम्। किंतु नियतपूर्ववृत्तिकारणम्। तच्च यथा सत्तथा असदपीति सदेव कारणमिति त्वत्कथावत्

प्रतियोग्यादिकं प्रध्वंसादिना कदापि न संबद्धम्। अतस्तत्र नोपलक्षणमित्यर्थः। ननु माभूत्प्रतियोग्यादिकं प्रध्वंसादावुपलक्षणं प्रध्वंसादिना संबध्यमानं देवदत्तादिकं तत्रोपलक्षणं भविष्यतीत्यत आह॥ विलक्षणेति॥ देवदत्ताद्युपलक्षणभेदमात्रेण विलक्षणकार्यजननेऽतिप्रसंग इत्यर्थः। शिलोद्धरणकृतेर्माषोद्धरणकृतितो वैलक्षण्ये हेतुमाह॥ शिलोद्धरणार्थमिति॥ ननु ज्ञानगतधर्मस्य गुणत्वव्याप्यत्वाद्यनुपपत्त्या निरूपयितुमशक्यत्वादनंगीकार्यतेत्यत आह॥ उक्तप्रमाणैरिति॥ आख्यातुमशक्यत्वात् हेतोः प्रत्याख्यानमशक्यमिति शेषः। तत्र हेतुरुक्तप्रमाणैरित्यादि। ननु ज्ञाने स्वतो विशेषो न युक्तः। घटज्ञानमित्यादि विषयेणैव विशिष्टत्वादित्यत आह॥ घटज्ञानमितीति॥ यथा माधुर्यादेः स्वतो विलक्षणत्वेपि प्रकारांतरेण प्रतिपादयितुमशक्यत्वात्क्षीरादिनैव निरूपणं तथा ज्ञानस्य स्वतो विलक्षणस्यापि घटादिना विषयेण निरूपणं युक्तमित्यर्थः॥ तत्तद्वृत्तेरिति॥ परिणामानां स्वभावविलक्षणत्वादित्यर्थः॥ न हीति॥ घटीयस्वभावस्य तदभावस्येति समानाधिकरणम्। तस्य घटस्य तत्तदाकारवृत्तिरूपे ज्ञाने तदीयस्वभावे ज्ञाने तत्तद्व्यवहारजननशक्ते च ज्ञाने क्रमेण गवयाकाररेखा घटीयस्वभावरूपघटाभावः दाहशक्तिश्च दृष्टांतः। यथा गवयाकाररेखायाः कार्ये गवयस्य घटाभावकार्ये घटस्य दाहशक्तिकार्ये वह्न्यादेर्न निवेशः तथा तादृशज्ञानकार्ये विषयस्य न निवेश इत्यर्थः॥ अधिकेति॥ दोषजन्यत्वादित्यर्थः। न च सर्पप्रमाया गुणजन्यत्वान्न सर्पभ्रमेण समानं कारणमिति वाच्यम्। प्रमाया गुणजन्यत्वानंगीकारात्। दोषाभावस्य कारणतावच्छेदकत्वेनाकारणत्वादिति भावः॥ तद्धेतुजन्यत्वादिति॥ यद्यपि सर्पज्ञानहेतु सर्पसन्निकर्षजन्यत्वं रज्जुसर्पज्ञाने नास्ति। रज्जुसन्निकर्षस्यैव रज्जुसर्पज्ञानहेतुत्वमित्यंगीकारात्। तथापि सर्पज्ञानहेतुर्द्विविधः सर्पसन्निकर्षः तत्संयोगादिव्यास्यादिरूपः दोषश्च। रज्जुसर्पज्ञाने च दोषरूपं सर्पज्ञानकारणमस्तीति भावः॥ तादृशमिति॥ मिथ्याभूतसर्पाद्यनवच्छिन्नं स्वत एवा सर्पज्ञानाद्व्यावृत्तमित्यर्थः॥ सदेवेति॥ ननु स्वरूपेणापि भ्रमज्ञानस्य मिथ्यात्वम्। स्वरूपतो बाधाभावे विषयतोऽप्यबाधप्रसंगात्। न च गुणजन्यत्वमुपाधिः। तस्याप्यापाद्यमानत्वेन वह्न्यनुमाने वह्निसामग्र्या इव साधनव्यापकत्वेनानुपाधित्वात्। विषय इव मिथ्यात्वप्रयोजकदोषादि समवहितसामग्र्या ज्ञानेऽप्यविशेषाच्चेति चेन्मैवम्। शुद्धचैतन्यस्याबाधितत्वेऽपि तद्विषयस्याज्ञानस्य बाधितत्वेन व्यभिचारात्। अप्रयोजकत्वं च। साध्ये सत्यपि हेतोरभावात्। निर्गुणब्रह्मविषय कदहरादिविद्यानामखंडार्थनिष्ठवेदांतवाक्यस्य स्वरूपतो मिथ्यात्वेन विषयतोऽपि मिथ्यात्वापत्तेः। अबाधात्तद्विषयस्य सत्यत्वे सर्पादिज्ञानस्य विषयिणोऽपि तत एव सत्यत्वम्। नायं सर्पः किंतु तथा ज्ञात इति सर्वानुभवात्। अन्यथा नायं सर्प इतिवन्नेदं ज्ञानमिति बाधो ज्ञानस्यापि स्यादिति॥ अंतर्भावितेति॥ एतच्च व्याख्यातं शंकरेण। कारणे सत्ता

तज्जनकेति॥ असर्पज्ञानजनके योऽसर्पसन्निकर्षादिस्तद्विलक्षणेन सर्पसन्निकर्षादिना जन्यत्वादित्यर्थः। ननु घटसंयोगः पटसंयोगान्न जात्या भिद्यते। तदवृत्तिजात्यनधिकरणत्वात्। किंतु घटरूपोपाधिनैवेति धर्म्यंतरसंबंधमपेक्ष्यैव विलक्षणे घटसंयोगत्वावच्छिन्ने साध्याभाववति उक्तहेतु सत्त्वाव्यभिचार इति चेन्न। जातिविशेषावच्छिन्नतत्तत्कर्मप्रयोज्यधर्मस्य घटनिरूपितस्य घटसंयोगेपि सत्त्वात्। नानादंडजन्येषु घटेषु विलक्षणजनकतावच्छेदकावच्छिन्नजन्यत्वाभावान्न व्यभिचारः। न च तादृशतत्तद्घटप्रागभावजन्येषु घटेषु व्यभिचारतादवस्थ्यम्। तस्य हेतुत्वे मानाभावात्। भावत्वेन जनकविशेषणाद्वा न दोषः। रज्जौ सर्पज्ञाने रज्जुसंयोगजन्ये सर्पसंयोगस्य विलक्षणस्य जनकस्याभावेपि तथाविधदोषस्य सत्त्वान्नासिद्धिः॥ यवांकुरतद्बीजाभ्यामिति॥ अवधौ पंचमी॥ चैत्रादीति॥ न चेष्टापत्तिः। चैत्रादिसंबंधित्वाज्ञानेऽपि कलमांकुरत्व तद्बीजत्वदर्शनमात्रेणांकुरांतराद्बीजांतराच्च वैलक्षण्यानुभवस्य सार्वजनीनत्वादिति भावः। ननु विशेषणत्वे संभवति नोपलक्षणत्वमंगीकर्तुमुचितमत आह॥ अतीतादीति॥ अतीतादिज्ञाननिष्ठव्यावर्तकतायां व्यावहारिकस्य वाऽनिर्वचनीयस्य वाऽर्थस्याभावेना किंचित्करत्वात् सर्वत्र ज्ञाने उपलक्षणीभूतविषयोपस्यापि तस्वाभाविकविशेषेण ज्ञानं व्यावृत्तमित्यर्थः॥ एवं च यथेति॥ यथेत्यस्य तथा सर्पज्ञानमपीत्यत्रत्येन तथा शब्देनान्वयः॥ अभावांतरादिति॥ अस्य विलक्षणमित्यनेनाग्रेतनेन लिंगविपरिणामात्संबंधः। ज्ञानांतरादित इत्यत्र वचनव्यत्ययोऽपि॥ तत्तत्कार्येति॥ दोषाभावगुणाद्यभाव कार्याणां प्रमाभ्रमादीनां संकरः स्यादित्यर्थः। अभावादिषु प्रतियोग्यादिकृतादसंकरात्तत्कार्येऽप्यसंकरशंकां निराकरोति॥ न चेति॥ ध्वंसादेरिति॥ ध्वंसादेः काले प्रतियोगिनोऽसत्त्वात् कृतेः काले कृतिविषयस्यासत्त्वम्। कृतेरविद्यमानविषयकत्वात्। तदुक्तंकृतेः सिद्धवृत्त्यसिद्धविषयत्वादिति। अतीतादिज्ञानकाले विषयस्यासत्त्वादिति योजना। ननु ध्वंसादेः काले प्रतियोगिनोऽसत्त्वेपि कदाचित्सत्त्वमस्त्येवेत्यत आह॥ पूर्वक्षण इति॥ कदाचित्प्रतियोगिनः सत्त्वेऽपि ध्वंसनिर्वाह्यकार्यकाले प्रतियोगिनोऽसत्त्वेन तत्कृतासंकीर्णस्वरूपस्य प्रध्वंसादेः कारणस्यासिध्या ध्वंसादिकार्याणामसंकरो न स्यात्। एवं कृत्युत्तरकाले विषयस्य सत्त्वेति कृतिकालेऽसत्त्वेन असंकीर्णस्वरूपस्यालाभात्। कृतिकार्याणा मसंकरो न स्यात्। कार्यपूर्वक्षणेऽसतो विद्यमानस्यासंकीर्णध्वंसादि रूपस्यासंकीर्णस्वकार्य प्रति नियतपूर्ववृत्तित्वरूपं कारणत्वं व्याहतमित्यर्थः। ननु ध्वंसादिकाले प्रतियोग्यादीनामसत्त्वेपि तेषां तत्रोपलक्षणत्वं भविष्यति। तथा च तदुपलक्षणेनैव ध्वंसादिस्वरूपाणामसांकर्ये तत्कार्येष्वप्यसांकर्यं भविष्यतीत्यत आह॥ उपलक्षणभेदमात्रेण चेति॥ मात्रशब्द एवार्थः। प्रध्वंसादौ प्रतियोग्यादेर्नोपलक्षणत्वम्। उपलक्षणभेदमात्रेणाप्रसिद्धकाकाद्युपलक्षणसकाशात् भेदेनैव काकादिकं ह्युपलक्षणम्। स्वोपलक्ष्येण गृहादिना कदाचित्संबद्धं तत्रोपलक्षणं दृष्टम्।

तुच्छेति॥ असत्सर्पावच्छिन्नज्ञाने यद्यसत्त्वं तर्हि तुच्छावच्छिन्ने तुच्छज्ञाने तुच्छाद्वैलक्षण्ये च तुच्छत्वं स्यात्। एवं प्रातिभासिकवैलक्षण्यादौ ज्ञेयम्। ननु नावच्छिन्नावच्छेदकयोः सर्वत्र सारूप्यम्। प्रकृते चावच्छेदक इवावच्छिन्नेऽपि मिथ्यात्वप्रयोजकस्य तुल्यत्वेन सारूप्योपपत्तिरिति चेन्न। मिथ्यात्वप्रयोजकस्य बाधादेरर्थे सत्त्वेऽपि तदवच्छिन्ने अभावात्। दृश्यत्वादेस्तु मिथ्यात्वं प्रत्यप्रयोजकत्वात्॥ तत्रेति॥ तुच्छज्ञानादौ असदादीनां तुच्छादीनां तटस्थ्ये उपलक्षणत्वे सर्पज्ञानादावपि विषय उपलक्षणमस्त्वित्यर्थः॥ अर्थानवच्छिन्नमिति॥ एवं चावच्छेदकस्य मिथ्यात्वे तदवच्छिन्नस्यापि मिथ्यात्वादिचोद्यानवकाश इत्यर्थः। ननु विषयातिरिक्तस्यावच्छेदकस्य ज्ञानेऽभावात् विषयस्यावच्छेदकस्य त्वयानंगीकारात् ज्ञानमात्रमेव भयादौ हेतुरित्यंगीकृतं स्यात्। तथाच सर्पाभावज्ञानमपि भयादौ हेतुः स्यादित्याशंक्य निराकरोति॥ विषयावच्छेदकमिति॥ स्वरूपातिरिक्तेति॥ विषयतत्संबंधयोर्ज्ञानेन सह द्विष्ठसंबंधस्य स्वरूपातिरिक्तस्याभावादित्यर्थः॥ असंबद्धस्य चेति॥ विषयस्य तत्संबंधस्य च ज्ञानेनासंबद्धस्य ज्ञानं प्रत्यव्यावर्तकत्वादित्यर्थः॥ संबंधांतरमिति॥ घटसंयुक्ते पटे स्वरूपसंबंधत्वं माभूदिति संबंधांतरमंतरेणेत्युक्तम्। आत्मविषयकज्ञानेनात्मनः स्वरूपसंबंधेऽव्याप्तिवारणायोद्देश्य प्रतीतिनिर्वाहकेति संबंधांतरविशेषणम्। संयोगादिश्च न विषयत्वादिप्रतीतिनिर्वाहकः। अतो नोक्तदोषः। घटवद्भूतलस्य चत्वरीयाभावेन स्वरूपसंबंधत्वं माभूदिति विशिष्टप्रत्ययजननेति। विशिष्टप्रत्ययाजनके अतींद्रियाभावरूपे स्वरूपसंबंधेऽव्याप्तिवारणाय योग्येति॥ ज्ञानमात्रेति॥ परोक्षापरोक्षज्ञानानुगतः ज्ञानेतरव्यावृत्तो धर्म इत्यर्थः॥ तर्हीति॥ उक्तसंबंधस्य विषयानिरूप्यत्वादित्यर्थः। नन्वाद्ये पक्षे तत्तज्ज्ञानस्वरूपाणामननुगतत्वेन सर्वसर्पज्ञानसाधारण्याभावात् सर्पज्ञानत्वावच्छिन्नस्यासर्पज्ञानात् व्यावृत्तिं प्रति न प्रयोजकत्वम्। द्वितीये तादृशसर्पज्ञानमात्रे धर्मो न जातिरूपः। प्रत्यक्षत्वानुमितित्वादिना संकरप्रसंगात्। किंतूपाधिरूपः। स च स्वरूपसंबंधेनाध्यासिकसंबंधेन वा संबंधिभूतविषयादन्यो न भवति। मानाभावादिति चेन्मैवम्। न तावदाद्योदोषः। तत्तज्ज्ञानस्वरूपाणामननुगतत्वेपि सादृश्यविशेषादिना सर्पज्ञानत्वेनानुगतीकृतानां तेषामेवासर्प ज्ञानाव्यावृत्तिसिद्धेः। द्वितीयेऽपि न दोषः। सांकर्यस्य जातावुपाधाविव बीजाभावेनादोषत्वात्। शशविषाणादेरतीतस्य च ज्ञाने विषयादन्यस्यैव तस्य वाच्यत्वाच्चेति भावः। ज्ञान एवेति॥ एतच्चांत्यपक्षाभिप्रायेण। प्रथमे तु ज्ञानमेव विशेष इति बोध्यम्॥ सर्पज्ञानमिति॥ सर्पे रज्जौ वेति शेषः। स्वाभिमतज्ञानतन्निष्ठधर्मसंबंधावपेक्ष्य सर्पज्ञानस्य वैलक्षण्यं स्वमतेऽप्यस्तीति बाधो माभूदिति धर्मीति। न च ज्ञानस्वरूपस्य ज्ञानगतधर्मस्य स्वगतधर्माद्यपेक्षया धर्मित्वादुक्तदोषतादवस्थ्यमिति वाच्यम्। धर्मिशब्देन स्वस्वानाश्रितयोर्विवक्षितत्वादिति भावः।

तथाऽवधारणात्। न च तत्र व्यास्यादेरपि हेतुत्वात् स्वज्ञानं प्रति तस्य विशेषणत्वमिति वाच्यम्। व्याप्तिभ्रमादनुमित्यभावापत्तेः। न च तत्रापि व्याप्तिरनिर्वचनीयास्त्येवेति वाच्यम्। अतींद्रियव्याप्तिभ्रमे तदभावात्। नचातींद्रियभ्रमेप्यर्थोत्पत्तिरस्त्येव। अन्यथा तत्रान्यथाख्याते रसत्ख्यातेर्वा प्रसंग इति वाच्यम्। अस्तु तावदिदं, तथाप्यतीतत्वेन निश्चिताद्धूमादेर्ज्ञानादनुमितिर्न स्यात्। न हि तत्राप्यर्थ उत्पद्यते अतीतज्ञानस्य भ्रमत्वाभावात्। विशेषदर्शनस्य सत्त्वात्। तस्माद्यत्र ज्ञानस्य हेतुत्वं न तत्र तद्विषयस्य हेतुत्वम्। गौरवात्। दंडीप्रैषानन्वाहेत्यादौ तदस्यास्त्यस्मिन्निति मतुबिति मतुप् प्रत्ययस्य वर्तमानत्वरूपास्तित्वे विधानात् श्रौतमेव विशेषणत्वम्। लोहितोष्णीषाऋत्विज इत्यादावपि मतुपा समानार्थत्वाद्बहुव्रीहेः श्रौतमेव विशेषणत्वम्। सर्वादीनि सर्वनामानीत्यत्र जन्माद्यस्य यत इत्यत्र च क्रियान्वितसमस्य मानपदार्थकत्वरूपमुख्यसमासस्य तद्गुणसंविज्ञानस्य संभवेनानेवं विधस्यातद्गुण संविज्ञानस्यानाश्रयणात्। वक्ष्यते चैतत्स्वप्रकाशत्वभंगे। तस्मात्सर्पज्ञानादौ कारणेन सर्पादेर्विशेषणत्वं बाधकवशादेव। किंतु क्षेत्रे कुरूणामिव ताटस्थ्येनोपलक्षणत्वम्। तस्य गुणभूतस्यापि सम्यग्विज्ञानं यस्माद्भवति सः तद्गुणसंविज्ञानः। सम्यक्त्वं च विशेष्यक्रियान्वयिन्यन्वयित्वं नोपलक्षणत्वं। ननु तथाप्यसतः सर्पादेर्हेतुत्वं भयादौ वाच्यम्। तदुत्कर्षेण तदुत्कर्षात्। तथाहि। स्वप्ने जागरे चोत्कृष्टकलधौतदर्शनादुत्कृष्टसुखं उत्कृष्टसर्पादिदर्शनाच्चोत्कृष्टभयादि दृश्यते। विषयस्याकारणत्वे तदुत्कर्षानुविधानं कार्ये न स्यात्। नह्यकारणोत्कर्षः कार्यमनुविधत्त इति न्यायात्। न च ज्ञानप्रकर्षादेव तत्र प्रकर्षः। ज्ञानेपि विषयगतं प्रकर्षं विहायान्यस्य प्रकर्षस्याभावात्। न च ज्ञानगतजातिरेव प्रकर्षः। चाक्षुषत्वादिना संकरप्रसंगात्। विषयप्रकर्षेणैवोपपत्तौ चाक्षुषत्वादि व्याप्यनानाजात्यंगीकारे गौरवान्मानाभावाच्चेति चेन्न। दोषोत्कर्षेण ज्ञानोत्कर्षोपपत्तेः। दृश्यते हि पित्तादिदोषोत्कर्षात् भ्रमोत्कर्षः। तस्मान्नासतो भयादौ हेतुत्वम्। संगृह्णाति॥ तथाचेति॥ सर्पपूर्वकं सर्पादिकं॥ फलेति॥ स्वर्गेच्छासाध्ये यागादौ स्वर्गादिफलस्य यथा न कारणत्वमित्यर्थः॥ अथापीति॥ सर्पज्ञाने कार्ये भयादौ सर्पादिहेतुत्वाभावेपीत्यर्थः॥ सत्यपीति॥ तथाच व्यावृत्तिधीजनकत्वरूपं व्यावर्तकत्वं व्यावर्तकत्वेन संमते दंडादौ नास्तीति व्यावृत्तिधीहेतुधीविषयत्वरूपमेव व्यावर्तकत्वं वाच्यमित्यर्थः॥ नन्वथापीति॥ ज्ञानस्य भयादिजनकत्वे सर्पाद्यवच्छिन्नत्वमेव कारणतावच्छेदकं वाच्यम्। ज्ञानत्वेन ज्ञानजनकत्वेऽतिप्रसंगात्। तथाच मिथ्यार्थावच्छिन्नत्वाकारेण ज्ञानस्य मिथ्यात्वात् भ्रमस्थले ज्ञानमात्रस्य जनकत्वेऽपि मिथ्याभूतस्य जनकत्वमागतमेव। जनकतावच्छेदकरूपेण च मिथ्यात्वे रूपांतरेण सत्त्वमप्यसत्त्वान्नातिरिच्यते। अनुपयोगात्। तदुक्तं खंडने। अन्यदा सत्त्वं तु पाटच्चरलुंटिते वेश्मनि यामिकजागरणवृत्तांतमनुसरतीति॥

तद्भिन्नदेशकालत्वं तदत्यंताभावध्वंसयोर्ग्राह्यं। घटस्यापि तद्देशकालभिन्नदेशकालत्वं व्याहतं स्यादित्यर्थः॥ घटेति॥ न च घटज्ञानस्य घटेच्छाद्वारा घटजनकत्वे इष्टापत्तिः। तस्य घटकृतावन्यथासिद्धत्वेन घटजनकत्वे मानाभावादिति भावः॥ ब्रह्मण इति॥ ब्रह्मणो वेदांतसाध्यत्वे नित्यत्वविरोधादित्यर्थः॥ घटं प्रतीति॥ अस्य वक्ष्यमाणेन हेतुत्वेऽपीत्यनेन संबंधः॥ विहितनिषिद्धकरणाभावयोरिति॥ विहितकरणाभावस्य प्रत्यवायं प्रति निषिद्धकारणाभावस्य च आदिपदार्थप्रत्यवायाभावं प्रतीत्यन्वयः॥ अवच्छेदकस्य घटस्येति॥ घटप्रागभाववत् घटस्य घटजनकत्वे घटतत्प्रागभावयोः समानकालत्वापत्तिः। तत्प्रागभावकालवृत्तित्वस्य तत्पूर्वत्वात्। कारणत्वस्य च तत्पूर्वत्वरूपत्वादित्यर्थः॥ विशेषदर्शनस्य विहितनिषिद्धकारणयोरिति॥ विशेषदर्शनादेर्भ्रमादौ हेतुत्वे प्रतियोगितदभावयोः सहावृत्त्या भ्रमप्रत्यवाययोरनुत्पत्तिप्रसंगः॥ स्वर्गस्येति॥ कामनावत् कामनाविषयस्यापि यागजनकत्वे तस्येच्छावत् प्राक् सत्तापत्त्या तत्कामनैव व्याहन्येत॥ सिद्धे इच्छाविरहादित्यर्थः॥ अतीतादेरिति॥ अतीतस्य जनकत्वे कार्याव्यवहितपूर्वसमये स्वस्वव्याप्यान्यतरसत्त्वापत्तिः॥ अत्यंतेति॥ असतो जनकत्वे निःस्वरूपत्वव्याघातः॥ घटस्येति॥ चिकीर्षितघटज्ञानवत् घटस्य घटहेतुत्वे पूर्ववत् घटतत्प्रागभावयोः समानकालत्वापत्तिः॥ उदासीनस्वभावस्येति॥

ननु वृत्त्युपहितस्यैव ब्रह्मणो वृत्तिविषयत्वं। तस्य चाज्ञाननिवर्तकत्वमस्त्येवेति चेत्। न। वृत्तेः स्वविषयत्वे स्वप्रकाशत्वस्य अप्रमात्वस्य चापातेन शुद्धब्रह्मण एव वृत्तिविषयत्वौचित्यादित्युक्तत्वात्॥ ब्रह्मण इति॥ ब्रह्मणो जगत्प्रति परिणामिकारणत्वे जगति जडत्वोपलंभानुपपत्तिः॥ तादस्त्येनेति॥ उपलक्षणत्वेनेत्यर्थः। ननु विशेषणत्वे संभवत्युपलक्षण त्वायोगः विशेषणत्वबाधपूर्वकत्वादुपलक्षणत्वकल्पनायाः अन्यथा दंडी प्रैषानन्वाह लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यादावपि दंडलौहित्यादेः उपलक्षणत्वापत्त्या दंडाद्यभावे प्रैषाद्यनुवचनापत्तिः। सर्वादीनि सर्वनामानीत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा न स्यात्। जन्माद्यस्य यत इत्यत्र जन्मनो ब्रह्मलक्षणत्वं न स्यात्। विशेषणार्थत्वेन तद्गुणसंविज्ञानबहुव्रीहिसंभवेप्युपलक्षणार्थत्वेना तद्गुणसंविज्ञान बहुव्रीहिस्वीकारप्रसंगाच्च। एवमसिपाणयः प्रवेश्यंतामित्यादि लौकिकप्रयोगेऽपि। प्रतिबिंबादि ज्ञानानां जनकत्वे च विशेषणतया प्रतिबिंबादीनामपि जनकत्वे बाधकाभावात् नोपलक्षणत्वपक्षो युज्यते। उदाहृतस्थले तु सर्वत्र बाधकमस्त्येवेति न विशेषणत्वमिति चेत् मैवं। धूमाभासादौ साधकत्वाभावस्य सार्वजनीनत्वेन प्रकृतेपि बाधकसत्वात्। तथा हि। सर्पज्ञानादावसति भयाद्यभावात् सति सर्पज्ञाने भयादिदर्शनात् सर्पज्ञानस्य हेतुत्वे स्थिते ज्ञानजन्येषु कार्येषु तद्विषयस्योपलक्षणत्वमेव, न तु विशेषणत्वम्। व्याप्त्यादिज्ञाने

नेक्षेतोद्यंतमादित्यं नास्तंयंतं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम् ॥

इति नभःस्थादित्यस्यैव उद्यत्त्वादिविशेषणवद्वारिस्थत्वेनापि विशेषणाच्च॥ रेखेति॥ लिपिभेदेन रेखाभेदग्रहेपि वर्णाभेदानुभवादिति भावः। नन्वाशैशवं रेखायामयं ककारोऽयं गकार इत्यभेदानुभवाहितदृढतरसंस्कारवशान्नारोपनिवृत्तिः। अत एव ककारं पठति लिखति चेति सार्वलौकिको व्यवहार इति चेत् मैवं। दृढतरभेदप्रत्ययेन रेखावर्णयोर्नाभेदारोपः, किंतु कर्दमलेपने सति कृष्णं वस्त्रप्रमितिवदुपचारमात्रत्वात्॥ दीर्घध्वनीति॥ ननु ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इत्यादि प्रत्ययात् न दीर्घध्वनिसाहित्यरूपं वर्णेषु दीर्घत्वमिति चेत् न। ध्वन्यग्रहे दीर्घत्वग्रहासिद्धेः। तवापि दैर्घ्यारोपार्थं ध्वनेरावश्यकत्वात् योग्यत्वाच्च तद्ग्रहोपपत्तेः। ननु शीतलं शिलातलं सुरभि जलमितिवत् उपाध्यग्रहेपि दीर्घत्वभ्रमो भविष्यति। न च योग्यत्वात्तद्ग्रहः। तथापि तन्नियमाभावादित्यत आह। तद्व्यक्तेति॥ वस्तुतो दीर्घो यो ध्वनिः तद्व्यक्तं यद्रूपं तदेव दीर्घत्वमित्यर्थः॥ सत्यं ज्ञानमिति॥ यथा च सर्वज्ञानस्य सत्यत्वं तथा वक्ष्यते॥ निरस्तमिति॥ चक्षुरादेः साधकत्वे क्वचिन्ने रसादिषु तदभावेन योग्यत्वायोग्यत्वे कल्प्येते। असतस्तु सर्वसामर्थ्यविधुरस्य कुत्रापि साधकत्वादर्शनात् सत एव तत्कल्प्यत इति विशेषः। ननु साधकतावच्छेदकरूपवत्त्वमेव साधकतायां प्रयोजकं न त्वारोपितत्वं अनारोपितत्वं वेति चेत् न। आरोपितार्थांगीकारे दंडत्वादिसाधकतावच्छेदकस्य तत्रापि सत्त्वेन तद्व्यावृत्त्यर्थमनारोपितत्वस्यापि साधकतायां प्रयोजकत्वात्।

वक्ष्यमाणरीत्येति पूर्वमुक्तमुपपादयति॥ सवित्रिति॥ नन्वर्थस्य हेतुत्वे संभवति न तज्ज्ञाने हेतुत्वं कल्प्यमित्यत आह॥ सत्यपीति॥ अनुमितिं प्रतीति॥ प्रमानुमितिं प्रतीत्यर्थः॥ व्याप्त्यादीति॥ अतद्व्रुणसंविज्ञान बहुव्रीहिणा अबाधितत्वमित्यर्थः॥ हेत्वादीति॥ अत्राप्यबाधितत्वं हेतुर्न स्यादित्यत्र तात्पर्यम्॥ तज्ज्ञानेति॥ अबाधितत्वज्ञानस्येत्यर्थः। तथा च हेत्वाभासव्यावृत्त्यर्थं अबाधितत्वप्रमाय अनुमितिप्रमां प्रति प्रयोजकत्वे प्रमात्वघटकस्याबाधितत्वरूपस्यार्थस्यापि तत्प्रयोजकत्वमिति भावः। यथाश्रुते रूपप्रागभावविशिष्टे घटे व्याप्त्यादिमल्लिंगजन्याया अपि अनुमितेः प्रमात्वाभावादसंगतिः स्यादिति बोध्यम्। ननु सर्पादिजन्या? भयादिरूपार्थक्रिया कथमसर्पात्तज्ज्ञानात्स्यादत आह॥ सत्येति॥ अभिसर्पणेति॥ भयादिकं तु न सर्पार्थक्रिया सन्निहितेपि सर्पेतमजानानस्य भयाभावादिति भावः॥ अतिप्रसंग इति॥ सर्पाभावज्ञानस्यापि भयहेतुत्वप्रसंग इत्यर्थः॥ अवच्छिन्नस्येति॥ अवच्छिन्नस्य ज्ञातत्वे अवच्छेदकस्यापि ज्ञातत्ववत् अवच्छिन्नस्य हेतुत्वे अवच्छेदकस्यापि हेतुत्वमित्यर्थः॥ घटस्येति॥ घटदेशकालौ गृहीत्वा

इत्यादिभाष्येण च विरोधः। तेषां तुच्छे जनकत्वनिषेधपरत्वाद्। अस्माभिश्च तुच्छे जनकत्वस्यानुक्तत्वात्। तस्मात् सद्विविक्तत्वं साधनमिति सिद्धम्॥ इत्यद्वैतसिद्धौ असतः साधकत्वाभावे बाधकम्॥

न्यायामृततरङ्गिणी

उभयसिद्धे सद्विविक्ते साधकत्वदर्शनात् पारमार्थिकसत्त्वस्य साधकतायां अप्रयोजकत्वमिति शंकते॥ नन्विति॥ प्रतिबिंबस्येति॥ अयं देशो बिंबवान् उचितस्थले प्रतिबिंबवत्त्वात् इत्यादिक्रमेण बिंबानुमापकत्वं प्रतिबिंबे दृष्टमिति संबंधः॥ लौहित्यं चेति॥ नच लौहित्यं स्फटिके न मिथ्या किं तु धर्ममात्रप्रतिबिंब इति पृथगुदाहरणानुपपत्तिरिति वाच्यम्। धर्मिभूतमुखादिनैरपेक्ष्येण तद्धर्मभूतरूपादिप्रतिबिंबादर्शनात्। लौहित्ये स्फटिकस्यारोपे तस्य प्रतिबिंबत्वं स्फटिके लौहित्यारोपेण तु तस्य मिथ्यात्वमित्यंगीकाराच्च। स्फटिकमणेरेवो पधाननिमित्तो लोहितिमेति लोहितिम्नो मिथ्यात्वं दर्शितं प्रतिबिंबस्य सत्त्वमंगीकृत्य पंचपादिकायामित्याशयः॥ प्रतिबिंबेति॥ नच प्रतिबिंबस्य बिंबात्मना सत्त्वेपि प्रतिबिंबाकारेणासत्त्वमिति वाच्यम्। तयोरभेदे बिंबाकारातिरिक्तस्य प्रतिबिंबाकारस्याभावात्॥ सत्यत्वादिति॥ स्वच्छदर्पणादिषु प्रतिफलनेन परावृत्ता नयनरश्मयो ग्रीवास्थमुखेन संबद्धास्तदेव गृह्णंति। तत्रैव दर्पणस्थत्वग्रीवास्थमुखभिन्नत्वादिकं चारोपयंति। यथोक्तं।

दर्पणाभिहता दृष्टिः परावृत्य स्वमाननं ।
व्याप्नुवंत्याभिमुख्येन व्यत्यस्तं दर्शयेन्मुखम् ॥

इति। लिंगलिंगिभावस्तु वृक्षशिंशुपादिवदिति परैरंगीकारादित्यर्थः॥ ज्ञानमेवेति॥ तच्च सत्यमित्यर्थः। ननु स्वाप्नकामिन्यादेः सुखहेतुत्वदर्शनात् स्वप्नपदार्थस्य साधकत्वं न तु तद्भानस्येत्यत आह॥ अन्वयेति॥ जाग्रत्यन्वयव्यतिरेकाभ्यां तज्ज्ञानस्य सुखहेतुत्वदर्शनात्स्वप्नेपि तथात्वं कल्प्यत इत्यर्थः॥ लौहित्यस्यापीति॥ लोहितिमविशिष्टजपाकुसुमस्य तदवयवसमुदायस्येत्यर्थः। तेन धर्मिभूतमुखादिनैरपेक्ष्येण तद्धर्मरूपादेः नीरूपस्य प्रतिबिंबो न दृष्टचर इति चोद्यानवकाश;। ननु प्रतिबिंबस्याव्याप्यवृत्तित्वनियमाल्लौहित्यस्य स्फटिके व्याप्यप्रतीतिरयुक्ता। प्रतिबिंबस्याभिमुख्य प्रतीतिनियमेन लौहित्यस्या(स्य)तिर्यक् प्रतीतिरप्ययुक्तेति चेत् मैवम्। प्रतिबिंबस्यानेकविधत्वात्। अत एव गगनस्थितसवितुः स्वच्छदर्पणादौ व्यत्यस्तेनापि दर्शनम्। तस्य च तव मतेपि प्रतिबिंबत्वात्।

उक्तरूपव्यावर्तकत्वस्यात्यन्तासत्यपि सम्भवेन कदाचित् सति संभवस्य कैमुतिकन्यायसिद्ध। ननु विषयस्य व्यावर्तकत्वेऽपि सर्वत्र विशेषणत्वासंभवाद् उपलक्षणत्वमेव वाच्यम्। उपलक्षणेन चोपलक्ष्यगतस्वसंबन्धव्यतिरिक्तः कश्चिद्धर्म एवोपस्थाप्यते, काकेनेव गृहसंबन्धिना तद्गतसंस्थानविशेषः। तथा च स एव व्यावर्तक इति विषयसंबन्धमनपेक्ष्य स्वगतेनैव धर्मेण ज्ञानस्य व्यावृत्तिसिद्धिरिति चेन्न। विषयस्य विशेषणत्ववदुप लक्षणत्वस्याप्यनम्युपगमात्। येन हि स्वोपरागाद्विशेष्ये व्यावृत्तिबुद्धिर्जन्यते तद्विशेषणं व्यावृत्तिबुद्धिकाले विशेष्योपरञ्जकमित्यर्थः, यथा गोत्वादि। येन च स्वोपरागमुदासीनं कुर्वता विशेष्यगतव्यावर्तकधर्मोपस्थापनेन व्यावृत्तिबुद्धिर्जन्यते तदुपलक्षणम्, यथा काकादि। यत्तु-विशेष्ये नोपरञ्जकम्, न वा धर्मान्तरोपस्थापकम्, अथ च व्यावर्तकं तदुपाधिः। यथा पङ्कजशब्दप्रयोगे पद्मत्वम्, यथा वोद्भिदादिशब्दप्रयोगे यागत्वावान्तरजातिविशेषः। अत्र हि पद्मत्वयागत्वावान्तरधर्मौ पङ्कजनिकर्तरि फलोद्भेदनकर्तरि च न धर्मान्तरमुपस्थापयतः, अप्रतीतेः। न वा स्वोपरक्तां बुद्धिं जनयतः, समुदाये शक्त्यन्तरानभ्युपगमाद्। अथ च कुमुदज्योतिष्टोमादिभ्यो व्यावर्तकावित्युपाधी एव। इदं च प्राभाकराणां भाट्टानां च संमतमुदाहरणयुगलम्। तार्किकाणां त्वाकाशशब्दप्रयोगे शब्दाश्रयत्वमुदाहरणम्। अत एवाविद्यादिकं साक्षित्वादावुपाधिरिति सिद्धान्तो वेदान्तिनाम्। अतो यत्र विषयस्य विशेषणत्वं न संभवति, तत्कालासत्त्वात्, तत्रोपाधित्वाभ्युमगमान्नोपलक्षणत्वनिबन्धन दोषावकाशः। सन्देहे तु विशेषणत्वमेवाभ्यर्हि तत्वादुपेयते। तस्माद्विषय एव सर्वत्र ज्ञाने व्यावर्तकः। एकविषयकस्मृत्यनुभवयोः परोक्षापरोक्षयोश्च विषयमनपेक्ष्य जात्या परस्परव्यावृत्तिदर्शनात्। सर्वत्र विषयनिरपेक्षा जातिरेव व्यावर्तिकेति न युक्तम् भिन्नविषयके समानजातीये तदसंभवात्। न च तत्रापि जातिरस्ति क्षीरादिमाधुर्यवदिति वाच्यम्। चाक्षुषत्वादिना सङ्करस्योक्तत्वात्। न च तव मते तत्तद्वृत्तेस्तत्तदाकारत्वेन चैतन्यस्य तत्प्रतिबिम्बितत्वेन तदभिव्यक्तत्वेन वा मम तु तत्तज्ज्ञानस्य तत्तदीयस्वभावत्वेन तत्तद्व्यवहारजननशक्तत्वेन वा स्वत एव वैलक्षण्यमिति वाच्यम्। विषयस्यैवाकारसमर्पकत्वेन स्वभावव्यवहारयोः परिचायकत्वेन च तन्नैरपेक्ष्येण व्यावर्तकताया वक्तुमशक्यत्वाद्। अस्माभिश्च तुच्छे जनकत्वस्यानुक्तत्वात्। विशेषणत्वोपाधित्वयोः संभवे च नोपलक्षणत्वमित्युक्तम्। न च 'कथमसतः सज्जायेत' इति श्रुत्या 'नासतोऽदृष्टत्वात्' इति सूत्रेण 'शशविषाणादिभ्यः सदुत्पत्त्यदर्शनाद्' –

तज्जनकविलक्षणजन्यत्वाद्, यवाङ्कुरात् कलमाङ्कुरवत्, तज्जन्यविलक्षणजनकत्वाद्वा, यवबीजात्कलमबीजवत्। न च विलक्षणविषयसंबन्धेनैव हेत्वोरुपपत्तावप्रयोजकत्वम्। तथात्वे हि यवबीजतदङ्कुरविलक्षणजन्यजनके कलमाङ्कुरतद्बीजेऽपि यवाङ्कुरतद्बीजाङ्कुराभ्यां कलमाङ्कुर तद्बीजत्वरूपस्वाभाविकवैलक्षण्यं विना कदाचिदुपलक्षणीभूतचैत्रादिसंबन्धित्वमात्रेण विलक्षणे स्याताम्। साक्षात्कारोऽपि परोक्षज्ञानादन्यसंबन्धितामात्रेण विलक्षणः स्यात्। एवं च यथा प्रतियोगिनमनन्तर्भाव्यैव घटस्याभावोऽभावान्तराद्, यथा च विषयमनन्तर्भाव्यैव शिलोद्धरणकृतिर्माषोद्धरणकृतितः, यथा चातीतादिज्ञानमसद्विषयकपरोक्षज्ञानव्यवहारौ च ज्ञानान्तरादितः, यथा च घटस्मृतिर्घटानुभवाद्, यथा च घटस्य परोक्षज्ञानं तदपरोक्षज्ञानाद् विलक्षणम्, अन्यथा तत्तत्कार्यसङ्करः स्याद्, एवं सर्पज्ञानमपि रज्जौ सर्पज्ञानस्य भ्रमत्वेनाधिकजन्यत्वेऽपि सर्पज्ञानत्वेन तद्धेतुजन्यत्वात् स्वत एव वा असर्पज्ञानाद्विलक्षणमिति न कोऽपि दोषः। न चाभावादावपि प्रतियोग्यादेरवच्छेदकत्वं। ध्वंसादेः कृतेरतीतादिज्ञानस्य च सत्तासमये प्रतियोगिविषययोरसत्त्वाद् इति। तन्न। सर्पज्ञानत्वावच्छिन्नस्यासर्पज्ञानाद् व्यावृत्तौ प्रयोजकं न तत्तत्स्वरूपमेव। सर्वज्ञानसाधारण्याभावात्। किंत्वनुगतो धर्मः कश्चित्। सोऽपि सर्पज्ञानमात्रे न जातिरूपः, प्रत्यक्षत्वानुमानत्वादिना सङ्करप्रसङ्गात्, किंतूपाधिरूपः। स च स्वरूपसंबन्धेनाध्यासिकसंबन्धेन वा संबन्धिभूतविषयादन्यो न भवति, मानाभावात्। अत एवं धर्म्यन्तरसंबन्धमनपेक्ष्य विलक्षणमित्युक्तानुमानं बाधितं द्रष्टव्यं व्यभिचारि च। तथा हि-घटसंयोगः, पटसंयोगान्न जात्या भिद्यते, तदवृत्तिजात्यनधिकरणत्वात्, किंतु घटरूपोपाधिनैवेति धर्म्यन्तरसम्बन्धमपेक्ष्यैव विलक्षणे घटसंयोगत्वावच्छिन्ने साध्याभाववति उक्तहेतुसत्त्वाद् व्यभिचारः, अप्रयोजकत्वम्। न च उपलक्षणीभूतचैत्रसंबन्धेनापि कलमाङ्कुरादेर्व्यावृत्ततापत्तिः, विपक्षबाधायामिष्टापत्तेः। न हि जातेर्व्यावर्तकत्वे उपाधिरव्यावर्तको भवति। एवं शिलोद्धरणमाषोद्धरणकृत्योः परस्परं जात्या व्यावृत्तावपि विषयरूपोपाधिनाऽपि व्यावृत्तिरविरुद्धा। शिलोद्धरणे च जातिविशेषविशिष्टायाः कृतेर्जनकत्वेन तद्रहिताया माषोद्धरणकृतेस्तदनिष्पत्तिरदोषः। व्यावृत्तेरन्यतोऽपि सिद्धिसंभवे कार्यकारणभावादिनिर्वाहाय जातिविशेषस्यापि कल्पनात्। अतीतासद्विषयकज्ञानव्यवहारादौ चातीतासतोरेव व्यावर्तकत्वम्। न हि व्यावृत्तिधीजनकत्वं तत्, येन सत्त्वाभावे प्राक्सत्त्वशरीरतया न स्यात्। किं तु व्यावृत्तिधीजनक धीविषयत्वमित्युक्तम्। तच्चातीतादौ सुलभमेव। अत एवाभावादिनिदर्शनमपि निरस्तम्।

खण्डनकृद्भिः-'अन्यदा सत्त्वं तु पाटच्चरलुण्ठितवेश्मनि यामिकजागरण वृत्तान्तमनुसरति' इति। स्वरूपेणापि तु भ्रमज्ञानस्य मिथ्यात्वमस्त्येव। स्वरूपतो बाधाभावे विषयतोऽप्यबाधप्रसङ्गात्। न च गुणजन्यत्वमुपाधिः, तस्याप्यापाद्यत्वेन वह्नचनुमाने वह्निसामग्र्या इव साधनव्यापकत्वेनानुपाधित्वाद्। विषय इव मिथ्यात्वप्रयोजकदोषादिसमवहितसामग्र्या ज्ञानेऽपि अविशेषाच्च। तुच्छज्ञानतद्वैलक्षण्यादौ च तुच्छत्वादर्शनमबाधकम्। अवच्छेद्यावच्छेदकयोः सर्वत्र सारूप्यनियमानभ्युपगमात्। प्रकृते चावच्छेदक इवावच्छेद्येऽपि मिथ्यात्वप्रयोजकरूपतुल्यत्वेन सारूप्योपपत्तेः। सर्वसाधारणं चैकं कारणत्वमभ्युपगम्यैतदवोचाम। वस्तुतस्तु-दण्डतन्त्वादिसाधारणमेकं कारणत्वं नास्त्येव। यत्र तव सत्वमवच्छेदकं (तत्र न) मम तुच्छविलक्षणत्वादिकम्, किं तु कार्यतावच्छेदकं घटत्वपटत्वादि, कारणतावच्छेदकं च दण्डतन्त्वादि। तद्भेदाच्च कारणत्वं भिन्नम्। यथा गोगवयसादृश्यमन्यद् भ्रातृभगिन्यादिसादृश्यमन्यत्। तत्र नैकमवच्छेदकम्, किंतु गवयत्वभगिनीत्वादिकमेव। तद्वदत्रापि दण्डत्वादिकमेव सत्त्वासत्त्वोदासीनमवच्छेदकं वाच्यम्। तथा च जनकत्वानुसारेण न सत्त्वासत्त्वसिद्धिः। तदुक्तं खण्डनकृद्भिः-

'पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥' इति
अन्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः।
नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः॥' इति च।
न चैवम् – अन्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः।
नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः॥' इति

इति तवापि समानमिति-वाच्यम्। ममाधिष्ठाने स्वरूपत एव सत्ताङ्गीकारः। तव तु कारणे स्वरूपातिरिक्तत्ताङ्गीकार इति विशेषात्। यत्तु अर्थो न ज्ञानस्य जनकतायामवच्छेदकोऽपि। मानाभावात्। न चातिप्रसङ्गः। विषयावच्छेदमनपेक्ष्यैव सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तिसिद्धेः। तथा हि-सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तिर्व्यावर्त काधीना। न च विषयस्तत्सम्बन्धो वा व्यावर्तकः। स्वरूपातिरिक्तद्विष्ठसंबन्धाभावात्। असंबद्धस्य चाव्यावर्तकत्वात्। अथ संबन्धान्तरमन्तरेण विशिष्टव्यवहारजननयोग्यं ज्ञानस्वरूपमेव वा ज्ञानमात्रनिष्ठः कश्चिद्धर्मो वा संबन्धः तर्हि विषयमनन्तर्भाव्यैव ज्ञानात्तद्गतधर्माद्वा विशेषसिद्धिरित्यायातम्। किं च सर्पज्ञानमसर्पज्ञानाद्धर्म्यन्तर संबन्धमनपेक्ष्य विलक्षणम्,

प्रयोगेऽपि। प्रतिबिम्बादिज्ञानानां जनकत्वे च विशेषणतया प्रतिबिम्बादीनामपि जनकत्वे बाधाभावात् नोपलक्षणत्वपक्षो युज्यते। उदाहृतस्थलेषु सर्वत्र बाधकमस्त्येवेति विशेषः। तथा हि-प्रथमे घटदेशकालौ गृहीत्वा तद्भिन्नदेशकालत्वं तदत्यन्ताभावादौ ग्राह्यम्। घटस्यापि तत्संबन्धे तद्देशकालभिन्नदेशकालत्वमेव व्याहतं स्यात्। द्वितीये त्विष्टापत्तिः। क्वचिद् घटज्ञानस्य घटेच्छाजनकत्ववद् घटं प्रत्यपि जनकत्वाद्। ब्रह्मणो वेदान्तसाध्यत्वे तु नित्यत्वविरोधः। तृतीये प्रागभाववद् घटस्य स्वजनकत्वे प्रतियोगिप्रागभावयोः समानकालीनत्वापत्तिः। स्वावधिकपूर्वत्वघटितजनकत्वस्य स्वस्मिन् व्याहतत्वं च। चतुर्थे पञ्चमे च प्रतियोगितदभावयोः सहावृत्त्या भ्रमप्रत्यवाययोरनुपपत्तिप्रसङ्गः। षष्ठे कामनावत् कामनाविषयस्य यागजनकत्वे तस्य प्राक्सत्तया तत्कामनैव व्याहन्येत, सिद्धे इच्छाविरहात्। सप्तमे अतीतस्य जनकत्वे कार्याव्यवहितपूर्वकाले स्वस्वव्यापारान्यतरसत्त्वापत्तिः। अष्टमे असतो जनकत्वे निःस्वरूपत्वव्याघातः। नवमे चिकीर्षितघटज्ञानवत् स्वस्य जनकत्वे पूर्ववद् व्याघातः। दशमे उदासीनस्य ब्रह्मणो न निवर्तकत्वम्। स्वरूपतः उपहितस्यैव वृत्तिविषयत्वेन तस्याविषयत्वाद्। उपहितस्य च निवर्तकत्वमस्त्येव। एकादशे ब्रह्माज्ञानस्य परिणामिकारणत्वेऽपि न ब्रह्मणो जगत्कारणत्वम्, कार्ये जडत्वोपलम्भात्। एवंविधबाधकबलेन तत्रोपलक्षणत्वस्वीकारात्। न च प्रकृते बाधकमस्ति। अव्यवहितदेशकालादिवृत्तित्वस्य प्रातिभासिकसाधारणत्वात्। इदानीमत्र सर्प इत्यादिप्रतीत्यविशेषात्। न हि क्वचिद् बाधकबलेन मुख्यपरित्यागः कृत इति सर्वत्र तथैव भविष्यति। उत्कर्षाद्यनुविधानाच्च। तथा हि-स्वप्ने जागरे चोत्कृष्टकलधौतदर्शनाद् उत्कृष्टं सुखम् उत्कृष्टसर्पादिदर्शनाच्चोत्कृष्टं भयादिं दृश्यते। विषयस्याकारणत्वे तदुत्कर्षानुविधानं कार्ये न स्यात्। न ह्यकारणोत्कर्षः कार्यमनुविधत्ते इति न्यायात्। न च ज्ञानप्रकर्षादेव तत्प्रकर्षः, ज्ञानेऽपि विषयगतप्रकर्षं विहायान्यस्य प्रकर्षस्याभावात्।

अथ ज्ञानगता जातिरेव प्रकर्षः, न चाक्षुषत्वादिना सङ्करप्रसङ्गाद्। विषयप्रकर्षेणैवोपपत्तौ चाक्षुषत्वादिव्याप्यनानाजात्यङ्गीकारे गौरवान्मानाभावाच्च। किं च ज्ञानस्य भयादिजनकत्वे सर्पाद्यवच्छिन्नत्वमेव कारणतावच्छेदकमास्थेयम्। ज्ञानत्वेन जनकत्वे अतिप्रसङ्गात्। तथा च मिथ्यात्वावच्छिन्नत्वाकारेण ज्ञानस्य मिथ्यात्वाद् भ्रमस्थले ज्ञानमात्रस्य जनकत्वेऽपि मिथ्याभूतस्य जनकत्वमागतमेव। जनकतावच्छेदकरूपेण च मिथ्यात्वे रूपान्तरेण च मिथ्यात्वे रूपान्तरेण सत्त्वमप्यसत्त्वात् नातिरिच्यते; अनुपयोगात्। तदुक्तं

तच्च स्वरूपतः सत्यमेव। अन्वयव्यतिरेकावपि ज्ञानस्यैव कारणतां ग्राहयतः। न हि सन्निहितं सर्पमजानानो बिभेति। न च अर्थानवच्छिन्नस्य ज्ञानस्य हेतुत्वेऽतिप्रसङ्गादर्थावच्छिन्नमेव ज्ञानं हेतुः। तथा चार्थोऽपि हेतुरेवेति वाच्यम्, अर्थावच्छिन्नस्य ज्ञानस्य हेतुत्वेऽपि अवच्छेदकस्यार्थस्य तादस्थ्येनाहेतुत्वोपपत्तेः (१) घटावच्छिन्नस्य तदत्यन्ताभावतद्ध्वंसादेर्घटदेशकालभिन्नदेशकालादित्वेऽप्यवच्छेदकस्य घटस्य तदभाववत्, (२) घटेच्छाब्रह्मज्ञानयोर्घटज्ञानवेदान्तसाध्यत्वेऽपि घटब्रह्मणोः तदभाववत्, (३) घटप्रागभावस्य घटं प्रति जनकत्वेऽपि घटस्याजनकत्ववत्, (४) विशेषादर्शनस्य भ्रमं प्रति जनकत्वेऽपि विशेषदर्शनस्य तदभाववत्, (५) विहिताकरणस्य प्रत्यवायजनकत्वेऽपि विहितकरणस्य तदभाववत्, (६) स्वर्ग कामनायाः यागजनकत्वेऽपि स्वर्गस्य तदजनकत्ववत्, (७) अतीतादिस्मृत्यादेर्दुःखादि जनकत्वेऽप्यतीतादेस्तदजनकत्ववत्, (८) असद्विषयकपरोक्षज्ञानस्य तद्व्यवहारहेतुत्वेऽप्य सतस्तदभाववत्, (९) चिकीर्षित घटबुद्धेर्घटहेतुत्वेऽपि घटस्य तदहेतुत्ववत्, (१०) ब्रह्म ज्ञानस्य तदज्ञाननिवर्तकत्वेऽप्युदासीनस्वभावस्य ब्रह्मणस्तदभाववत्, (११) ब्रह्माज्ञानस्य जगत्परिणामिकारणत्वेऽपि ब्रह्मणस्तदभाववच्च। न च-तथापि मिथ्यार्थे ज्ञानव्यावर्त कताऽस्तीत्यसतोऽपि हेतुत्वमिति-वाच्यम्। न हि व्यावृत्तिधीहेतुत्वं व्यावर्तकत्वम्। किन्तु व्यावृत्तिधीहेतुधीविषयत्वमेव। सत्यपि दण्डे तदज्ञाने व्यावृत्त्यज्ञानात्। अथावच्छेदकस्य मिथ्यात्वे अवच्छिन्नस्यापि तन्नियमः। न। तुच्छज्ञाने तुच्छवैलक्षण्ये च तुच्छत्वस्य, प्रातिभासिकाद्वैलक्षण्ये प्रातिभासिकत्वस्य, पञ्चमप्रकारायामात्मस्वरूपभूतायां वा अनिर्वचनीयाज्ञानस्य निवृत्तौ चतुर्थप्रकरानिर्वचनीयत्वस्य, पारमार्थिकात्मस्वरूपे तद्भिन्ने वा अनृतद्वैतस्याभावेऽनृतत्वस्य चादर्शनात् तत्रावच्छेदकानामसदादीनां तादस्थ्येऽत्रापि तथास्त्विति-चेत्, अत्रोच्यते। यदुक्तं तादस्थ्यलक्षणमुपलक्षणत्वमेव सर्वत्रावच्छेदस्येति, तन्न। विशेषणत्वे सम्भवत्युपलक्षणत्वायोगात्। विशेषणबाधपूर्वकत्वादुपलक्षणत्वकल्पनायाः। अन्यथा, 'दण्डी प्रैषानन्वाह', 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादावपि वेदे दण्डलौहित्यादेरुपलक्षणत्वात् तदभावेऽपि अनुष्ठानप्रसङ्गः। 'सर्वादीनि सर्वनामानि' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा न स्यात्। 'जन्माद्यस्य यतः' इत्यत्र जन्मनो ब्रह्मलक्षणत्वं न स्यात्, विशेषणार्थत्वेन तद्गुणसंविज्ञानबहुव्रीहिसंभवेऽप्युपलक्षणार्थत्वेनातद् गुणसंविज्ञानव्रीहिस्वीकारप्रसङ्गात्। एवं 'असिपाणयः प्रवेश्यन्ताम्' इत्यादिलौकिक

साधकत्वाप्रयोजकत्वाच्च। तथा हि-प्रतिबिम्बे बिम्बसाधकत्वं तावदस्ति। तस्य बिम्बात्मना सत्त्वेऽपि प्रतिबिम्बाकारेणासत्त्वात् परमार्थसत्त्वं न साधकत्वे प्रयोजकम्। एवं स्वाप्नार्थस्यासतोऽपि भाविशुभाशुभसूचकत्वम्। यद्यपि तत्रत्यदर्शनस्यैव सूचकत्वम्। 'पुरुषं कृष्णं कृष्णदन्तं पश्यति' इत्यादिश्रुतिबलात्। तथापि दर्शनमात्रस्यातिप्रसक्तत्वेन विषयोऽप्यवश्यमपेक्षणीय एव। एवं स्फटिकलौहित्यस्य उपाधिसन्निधानसाधकत्वं च। न च लौहित्यं स्फटिके न मिथ्या, किंतु धर्ममात्रप्रतिबिम्ब इति न पृथगुदाहरणमिति वाच्यम्। धर्मिभूतमुखादिनैरपेक्ष्येण तद्धर्मभूतरूपादिप्रतिबिम्बादर्शनात्। प्रतिबिम्बस्या व्याप्यवृत्तित्वनियमेन लौहित्यस्य स्फटिके व्याप्यवृत्तित्वप्रतीत्ययोगाच्च। लौहित्ये स्फटिकस्य त्वारोपे तस्य प्रतिबिम्बत्वम्, स्फटिके लौहित्यारोपे तु तस्य मिथ्यात्वमिति विवेकः। ''स्फटिकमणेरिवोपधाननिमित्तो लोहितिमा'' इति लोहितिम्नो मिथ्यात्वं दर्शितं प्रतिबिम्बसत्यत्ववादिभिः पञ्चपादिकाकृद्भिः। एवं रेखातादात्म्येनारोपितानां वर्णानामर्थ साधकत्वम्। न च-रेखास्मारिता वर्णा एवार्थसाधका इति-वाच्यम्। आशैशवमयं ककारोऽयं गकार इत्यनुभवाद्, अभेदेनैव स्मरणाद्। विवेके सत्यपि दृढतरसंस्कारवशात् नारोपनिवृत्तिः। अत एव ककारं पठति लिखति चेति सार्वलौकिको व्यवहारः। वर्णारोपितदीर्घह्रस्वत्वादीदां च नगो नाग इत्यादावर्थविशेषप्रत्यायकत्वम्। न च वर्णेष्वनारोपितध्वनिसाहित्यं तदभिव्यक्तत्वरूपं वा दैर्ध्यं प्रत्यायकम्, एवं ह्रस्वत्वादिकमपीति वाच्यम्। ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इत्यादिप्रत्ययात्।

ननु आरोपितेन वर्णदैर्घ्यादिना कथं तात्त्विकार्थसिद्धिः? न ह्यारोपितेन धूमेन तात्त्विकवह्निसिद्धिरिति चेन्न। साधकतावच्छेदकरूपवत्त्वमेव साधकतायाः प्रयोजकम्, न त्वारोपितत्वमनारोपितत्वं वा। धूमाभासस्य त्वसाधकत्वम् साधकतावच्छेदकरूपव्याप्त्यभावात्, नासत्त्वाद्। अनाभासत्वग्रहश्च तत्र बहुलोर्ध्वतादिग्रहणवद्व्याप्तिग्रहणार्थमेवापेक्षितः। तदुक्तं वाचस्पतिमिश्रैः- 'यथा सत्यत्वाविशेषेऽपि चक्षुषा रूपमेव ज्ञाप्यते न रसः तथैवासत्त्वाविशेषेऽपि वर्णदैर्घ्यादिना सत्यं ज्ञाप्यते, न तु धूमाभासादिना' इति। दृष्टं हि मायाकल्पितहस्त्यादेः रज्जुसर्पादेश्च भयादिहेतुत्वं, सवितृसुषिरस्य च मरणसूचकत्वं, शङ्काविषस्य च मरणहेतुत्वम्। ''ननु तत्र शङ्कैव भयमुत्पाद्य धातुव्याकुलतामुत्पादयतीति सैव मरणहेतुः, न तु शङ्कितं विषमपि। एवं सवितृसुषिरमायाकल्पितगजादीनामपि ज्ञानमेव तत्तदर्थक्रियाकारि, न त्वर्थोऽपि। तथा च सर्वत्रोदाहृतस्थलेषु ज्ञानमेव हेतुः।

सर्पज्ञानमपि विषयमनंतर्भाव्यैव असर्पज्ञानाद्विलक्षणम्। उक्तप्रमाणैरनुभवेन च सिद्धस्य तस्य जातिरूपस्य विशेषस्याऽख्यातुमशक्यत्वात्। घटज्ञानमिति व्यवहारः क्षीरमाधुर्यं, चाक्षुषज्ञानमितिवद्युक्तः। किं च त्वन्मते तत्तद्वृत्तेस्तत्तदाकारत्वेन चैतन्यस्य च तत्तत्प्रतिबिंबितत्वेन वा तदभिव्यक्तत्वेन वा, मम तु तत्तज्ज्ञानस्य तत्तदीयस्वभावत्वेन वा तत्तद्व्यवहारजननशक्तत्वेन वा स्वत एव वैलक्षण्यम्। न हि गवयाकाररेखाया घटीयस्वभावस्य तदभावस्य वा दाहशक्तेर्वा यत्कार्यं तद्धेतुकोटौ गवयादेर्निवेशः। तस्माद्रज्जौ सर्पज्ञानस्य भ्रमत्वेनाधिकजन्यत्वेऽपि सर्पज्ञानत्वेन तद्धेतुजन्यत्वात् स्वत एवासर्पज्ञानाद् वैलक्षण्यमिति न कोऽपि दोषः। तदुक्तम्–

सर्पभ्रमादावपि हि ज्ञानमस्त्येव तादृशम्।
तदेवार्थक्रियाकारि तत्सदेवार्थकारकम्॥ इति।
अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः॥

इत्यादिखंडनोक्ताऽसत्कारणता, अस्यैव श्लोकस्याकारप्रश्लेषेण पठितुं शक्यत्वात्,

अंतर्भावितसत्त्वं चेदधिष्ठानमसत्ततः।
नांतर्भावितसत्त्वं चेदधिष्ठानमसत्ततः॥

इत्यपि पठितुं शक्यत्वाच्च स्वव्याहता। "कथमसतः सज्जायेत" इत्यादिश्रुत्या "नासतोऽदृष्टत्वाद्" इत्यादिसूत्रेण, "असद्भ्यः शशविषाणादिभ्यः सदुत्पत्त्य दर्शनाद्" इत्यादिस्वीयभाष्येण च विरुद्धाऽन्यत्रनिरस्ता च। तस्माद्धेतुव्याप्त्यादीना मसत्त्वेऽसिद्ध्यादि दुर्वारमिति। असतः साधकत्वाभावे बाधकोद्धारः।

अद्वैतसिद्धिः

ननु सत्त्वापेक्षया तुच्छविलक्षणत्वादेर्गौरवतरत्वेन साधकत्वे कथं तन्त्रत्वमिति चेन्न। त्रिकालबाधविरहरूपस्य सत्त्वस्य लघुत्वाभावात्। जात्यादिरूपस्य तस्य मिथ्यात्वाविरोधित्वाद्। उभयसिद्धे सद्विविक्ते साधकत्वदर्शनेन पारमार्थिकसत्त्वस्य

ततो व्यावृत्तौ चानृतत्वस्यादर्शनात्। तत्रावच्छेदकानामसदादीनां तादस्थ्येऽत्रापि विषयस्तथास्तु। वस्तुतस्त्वर्थानबच्छिन्नमेव ज्ञानं हेतुः। न चातिप्रसङ्गः। विषयावच्छेदमनपेक्ष्य स्वत एव सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तेः। तथा हि सर्पज्ञानमसर्पज्ञानात्तावद्व्यावृत्तम्। व्यावृत्तिश्च व्यावर्तकाधीना। न च विषयस्तत्संबंधो वा व्यावर्तकः। स्वरूपातिरिक्तद्विष्ठसम्बन्धाभावात्। असंबद्धस्य चाव्यावर्तकत्वात्।

अथ संबंधान्तरमन्तरेण विशिष्टव्यवहारजननयोग्यं स्वरूपमेव वा ज्ञानमात्रनिष्ठधर्मो वा संबंधस्तर्हि विषयमनन्तर्भाव्य ज्ञान एव विशेषः सिद्धः। किं च सर्पज्ञानमसर्पज्ञानाद्धर्म्यंतरसंबंधमनपेक्ष्य विलक्षणम्। तज्जनकविलक्षण जन्यत्वाद्, यवांकुरात्कलमांकुरवत्। तज्जन्यविलक्षणजनकत्वाद्, यवबीजात्कलम बीजवत्। न च विलक्षणविषयसंबंधेनैव हेत्वोरुपपत्तेरप्रयोजकत्वम्। तथात्वे हि यवबीजतदंकुरविलक्षणजन्यजनके कलमांकुरतद्बीजे अपि कदाचिद्यवांकुरतद्बीजाभ्यां कलमांकुरत्वतद्बीजत्वरूपस्वाभाविकवैलक्षण्यं बिनोपलक्षणभूतचैत्रादिसंबंधित्वमात्रेण विलक्षणे स्याताम्। साक्षात्कारोऽपि परोक्षज्ञानादन्यसंबंधित्वमात्रेण विलक्षणः स्यात्। गृहमपि संस्थानविशेषं विना विचित्रकाकहंसोपलक्षणत्वमात्रेण विचित्रकारणजं विचित्रकार्यकारि च स्यात्। अपि च ज्ञानस्य स्वकारणादुत्पत्तौ स्वकार्यकरणे च विषयः अभावस्य प्रतियोगीवोपलक्षणम्। अतीतादिज्ञानेऽसद्विषयकपरोक्षज्ञाने च तथा दर्शनात्। न हि तत्रार्थः अनिर्वाच्योऽप्यस्ति। उपलक्षणेन चान्यो व्यावर्तक उपस्थाप्यः, काकेन संस्थानविशेष इवेति स्वतो विशेषसिद्धिः। एवं च यथा प्रतियोगिनमनंतर्भाव्यैव घटस्याभावः अभावांतराद्, यथा च विषय मनंतर्भाव्यैव शिलोद्धरणकृतिर्माषोद्धरणकृतितः, यथा चातीतादिज्ञानमसद्विषयक परोक्षज्ञानव्यवहारौ च ज्ञानांतरादितः, यथा च घटस्मृतिर्घटानुभवात्, यथा च घटस्य परोक्षज्ञानं तदपरोक्षज्ञानाद्विलक्षणम्, अन्यथा तत्तत्कार्यसंकरः स्यात्। न चाभावाद्यवच्छेदकप्रतियोग्यादिविशेषादसंकरः। ध्वंसादेः कृतेरतीतादिज्ञानस्य च काले प्रतियोगिविषययोरसत्त्वात्। पूर्वक्षणेऽसतश्च नियतपूर्ववृत्तित्वरूपकारणत्व व्याघातात्। उपलक्षणभेदमात्रेण च विलक्षणकार्याद्ययोगात्। अत्यन्तासतश्च कदाऽप्यभावात्। शिलोद्धरणार्थं माषोद्धारप्रयत्ने कृतेऽपि तदनिष्पत्तेश्च। तथा

एव स्वयंप्रतिभातवेदवददृष्टाद्भासते। भारतयुद्धादौ घटोत्कचादिभिः शक्तिविशेषात्सृष्टमर्थ क्रिया कारिगजादिकं सत्यमेव। सवितृसुषिररज्जुसर्पादिज्ञानमेव चारिष्टभयादिहेतुर्न त्वर्थः, सत्यप्यर्थे तदज्ञाने भयाद्यभावात्। न चैवमनुमितिं प्रत्यपि हेतुव्याप्त्यादिज्ञानमेव कारणं न तु हेत्वादीति वाच्यम्। तज्ज्ञानमात्रस्य हेत्वाभासेऽपि सत्त्वात्। त्वन्मते वृत्तिरूपस्य तत्प्रतिबिंबितचैतन्यरूपस्य वा ज्ञानस्यापि मिथ्यात्वाच्च। सत्यसर्पादेस्त्वभिसर्पणदंशनादिरेवार्थक्रिया न तु भयादिः।

नन्वर्थानवच्छिन्नस्य ज्ञानस्य हेतुत्वेऽतिप्रसंगः, अवच्छिन्नस्य हेतुत्वेऽर्थोऽपि हेतुः स्यादिति चेन्न। घटावच्छिन्नस्य घटात्यंताभावध्वंसादेर्घटदेशकालभिन्न देशकालादित्वेऽपि अवच्छेदकस्य घटस्य तदभाववद्, घटेच्छाब्रह्मज्ञानयोर्घट ज्ञानवेदान्तसाध्यत्वेऽपि घटब्रह्मणोस्तदभाववद्, घटप्रागभावस्य घटं प्रति, विशेषदर्शनाभावस्य च भ्रमं प्रति, विहितनिषिद्धकरणाभावयोः प्रत्यवायादिं प्रति, स्वर्गकामनायाश्च यागं प्रति, अतीतादिस्मृत्यादेर्दुःखादिकं प्रति, असद्विषयकपरोक्षज्ञानस्य च तद्व्यवहारं प्रति हेतुत्वेऽपि अवच्छेदकस्य घटस्य, विशेषदर्शनस्य, विहितनिषिद्धकरणयोः स्वर्गस्यातीतादेरत्यंतासतश्च तदभाववत्, चिकीर्षितघटबुद्धेर्घटहेतुत्वेऽपि घटस्य तदभाववत्, ब्रह्मज्ञानस्य तदज्ञाननिवर्तकत्वेऽप्यु दासीनस्वभावस्य ब्रह्मणस्तदभाववत्, ब्रह्माज्ञानस्य जगत्प्रति परिणामिकारणत्वेऽपि ब्रह्मणस्तदभाववच्चार्थावच्छिन्नस्य हेतुत्वेऽपि अवच्छेदकार्थस्य कुरूणां क्षेत्रे वसतीत्यत्र कुरूणामिव तादस्थ्येनाहेतुत्वोपपत्तेः। तथा च– रज्जुसर्पादिधीसाध्यभयादौ सर्पपूर्वकम्। फलेच्छासाध्ययागादौ फलवन्नैव कारणम्॥ नन्वथापि मिथ्यार्थे ज्ञानं प्रति व्यावृत्तिधीहेतुत्वरूपव्यावर्तकत्वमस्तीत्यसतोऽपि हेतुतेति चेन्न। यतो व्यावृत्तिधीहेतुधीविषयत्वमेव व्यावर्तकत्वम्। सत्यपि दण्डे तदज्ञाने व्यावृत्त्यज्ञानात्।

नन्वथाप्यवच्छेदकस्य मिथ्यात्वेऽवच्छिन्नस्यापि तन्नियमादसत्यस्य हेतुतेति चेन्न। तुच्छस्य ज्ञाने तुच्छाद्वैलक्षण्ये च तुच्छत्वस्य, प्रातिभासिकाद्वैलक्षण्ये च प्रातिभासिकत्वस्य, पञ्चमप्रकारायामात्मस्वरूपभूतायां वाऽनिर्वचनीयाज्ञाननिवृत्तौ च चतुर्थप्रकाररूपानिर्वचनीयत्वस्य, पारमार्थिकात्मस्वरूपे तद्भिन्ने वाऽनृतद्वैतस्याभावे

तदाभासोऽसाधकत्वेन एवमिहापि दृश्यत्वादेर्धूमाभासादेश्चमिथ्यात्वाविशेषेपि हेतुतदाभासव्यवस्थया साधकत्वाद्युपपत्तेरित्यर्थः। एतेनेत्युक्तमेव विशदयति॥ तद्वदेवेति॥ स्वप्नदृष्टधूमादिना वास्तववह्निसिद्ध्यदर्शनादिहापि दृश्यत्वादिना वास्तवमिथ्यात्वरूपसाध्यसिद्धिर्नस्यादित्यर्थः। उपसंहरति॥ तस्मादिति॥ असत्यादिति॥ स्वबोधितमिथ्यात्वकविश्वांतर्गतत्वेनासत्यदृश्यत्वादेस्सकाशान्नसत्य भूतमिथ्यात्वादिसिद्धिरिति बाधादिकं दुर्वारमितिभावः॥ साधकंचेदिति॥ किंचिद्धेत्वादिकं नेद्यदि साधकं तर्हि तस्य परमार्थास्तिता पारमार्थिकसत्त्वं अवश्यमपेक्षितं भवेदेव। परमार्थसत्त्वस्यैव साधकत्वे तंत्रत्वादितिभावः। नन्वपरमार्थसतोपि साधकत्वं किंन स्यादित्यतआह॥ सिद्धिर्नेति॥ सवितृसुषिरादावपि सत्यस्यैव साधकत्वमित्यनुपदमेव वक्ष्यतइतिभावः॥ लोकस्यापीति॥ सदसतोःसाधकत्वासाधकत्वातिक्रमे विचारस्य दैववशसंपन्नवनस्थवेणुनिस्सृतस्वनवद्यादृच्छिकवाङ्मात्रत्वापत्त्या प्रमाणसिद्धत्वाभावापातेनार्थनिश्चायकत्वाभावा पातात्। अतोलोकमर्यादानुसारेणैव सतएवसाधकत्वं नासतइत्यंगीकार्यमितिभावः॥ असतस्साधकत्वे बाधकविवरणं॥

३२. असतः साधकत्वाभावे बाधकोद्धारः

नन्वसत्यमपि प्रतिबिंबं बिंबस्य, स्वाप्नार्थश्च शुभाशुभयोः, स्फटिकलौहित्यं चोपाधिसंनिधानस्य, रेखारोपितवर्णश्चार्थस्य, वर्णदैर्घ्यादिकं च नगो नाग इत्यादावर्थभेदस्य, शंकाविषं च मरणस्य, सवितृसुषिरादि चारिष्टादेः साधकं दृष्टमिति चेन्न। प्रतिबिंबस्वरूपस्य त्वन्मतेऽपि सत्यत्वात्। स्वाप्नस्य च मन्मते सत्यत्वात्। त्वन्मतेऽपि पुरुषं कृष्णं कृष्णदन्तं पश्यतीत्यादिश्रुत्या ज्ञानमेव सूचकम्। अन्वयव्यतिरेकाभ्यां च स्वाप्नकामिन्यादिज्ञानमेवार्थक्रियाकारीत्युपपत्तेः। स्फटिकलोहित्यस्यापि प्रतिबिंबत्वात्। रेखायाश्च वर्णे पदस्यार्थ इव संकेततत्वेन रेखास्मारितवर्णस्यैवार्थबोधकत्वात्। अत एव रेखां दृष्ट्वा वर्णमुच्चारयन्ति। नगो नाग इत्यादौ दीर्घत्वादिकं स्वरूपसदेवार्थविशेषधीहेतुश्चेद्दीर्घध्वनिसाहित्यरूपं वा तद्व्यक्तत्वरूपं वा दीर्घत्वं वर्णगतं सत्यमेव हेतुः, न ध्वनिगतं वर्णेष्वारोपितं हेतुः। ज्ञातं सद्धेतुश्चेद्वक्ष्यमाणरीत्या सवितृसुषिरादिज्ञानमिवार्थावच्छिन्नं सत्यं ज्ञानमेव हेतुः। एतेन "यथा सत्यत्वाविशेषेऽपि चक्षुषा रूपज्ञानमेव जायते, न तु रसज्ञानं, तथैवासत्त्वाविशेषेऽपि वर्णदैर्घ्यादिना सत्यं ज्ञायते, न तु धूमाभासादिना" इति वाचस्पत्युक्तं निरस्तम्। शंकाविषेऽपि शंकानिमित्तभयजन्या धातुव्याकुलतैव मरणहेतुः, न च विषम्। स्वाप्नमन्त्रोऽपि फलसंवादी चेत् स्वप्नप्रतीतत्वेऽप्यात्मवत्सत्य

स्यादितिभावः॥ गौरवादिति॥ सत्त्वद्वैविध्यादिकल्पनमनादृत्य सत्त्वमात्रस्यैव साधकतायां प्रयोजकत्वे लाघवमितिभावः। नन्वस्तु सत्त्वमेव प्रयोजकं तत्राह॥ व्यावहारिकेति॥ पारमार्थिकसत्त्वातिरिक्तव्यावहारिकसत्वरूपव्यक्त्यभावादितिभावः॥ अतीति॥ उक्तसत्त्वापेक्षयेत्यर्थः॥ अन्यथेति॥ लघुनि संभवे गुरुणोंगीकारइत्यर्थः॥ उपस्थितेति॥ उपस्थितं यद्रूप्यत्वादिकं तस्य पुरोवृत्तिनि योऽसंसर्गःतदग्रहएव प्रवृत्तौ हेतुःस्यात्। एवंच भ्रांतिर्नसिद्धचेत्। संसर्गग्रहे भ्रमरूपं विशिष्टज्ञानं सिद्धचेत्। एवंच संप्रतिपन्नविशिष्टज्ञानेनैव प्रवृत्तिर्भवति तत्रासंसर्गस्याभावादेव तदग्रहोस्ति तत्साद्दश्यादसंसर्गाग्रहादिदंरजतमिति ज्ञानादपि प्रवृत्तिर्भविष्यति विद्यमानस्याप्यसंसर्गस्याग्रहणसद्भावादिति प्राभाकरेणोक्ते त्वया वाच्यं निषेधद्वयगर्भत्वेन गौरवाल्लाघवात्संसर्गग्रहएव प्रवृत्तौ हेतुरिति। एवंसति भ्रमरूपविशिष्टज्ञानसिद्धिरिति। तथाचलाघवानादरेणैतदपि न स्यात् साध्यं न सिद्धमित्यर्थः॥ सदिति॥ सतःसाधकत्वानंगीकारादितिभावः। नन्वसतःसाधकत्वमपि असतैव साधकांतरेण प्रतिवादिनं त्वां प्रति सिध्यतीतिचेत्तत्राह॥ अनवस्थानादिति॥ ननु सतःसाधकत्वमपि विप्रतिपन्नत्वात्साध्यं तत्साधकंच मानं तावन्मां प्रत्यसिद्धं। तथापि। न तावत्सतःसाधकत्वं सता साध्यते ममासिद्धेः। नाप्यसता तवासिद्धेरित्याशंक्य निराकरोति॥ नचेति॥ न सतःसाधकत्वं मया साधनीयं त्वन्मते सतःसाक्षिणोऽज्ञानादिसाधकत्वस्य सिद्धत्वादित्याह॥ त्वन्मतेपीति॥ तथाच सतःसाधकत्वमुभयसंमतमित्यर्थः। अत्रानुव्याख्यानसंमतिमाह॥ उक्तंहीति॥ साक्षिणाऽज्ञानादिसिद्धिमिच्छता तेन मायावादिना सतस्साधकत्वं स्वीकृतमित्येव परंतु तन्न संभवति। अविशेषस्य साधकता पुनःसाध्यैव नतु सिद्धा सर्वशक्तिरहितस्य शून्यवत्साधकताऽयोगादित्यर्थः॥ औत्सर्गिकेति॥ धूमादिग्राहकस्य ज्ञानस्योत्सर्गतःप्रमाणत्वात्प्रामाण्यस्य स्वार्थसत्त्वपर्यंतत्वात्प्रमाणसिद्धानां सतां धूमादीनां साधकत्वस्य तत्साधकत्वे पर्यवसानादित्यर्थः॥ उपायांतरेति॥ लोकमर्यादासिद्धोपायाति रिक्तोपायाभावेनेत्यर्थः॥ स्वच्छायेति॥ यथा स्वकीयाच्छाया स्वेनैवोल्लंघितुं न शक्यते एवं पर्वतवर्तिनएव साधकत्वं नतु बाष्पारोपितधूमस्येत्येवं लोकसिद्धं यत्सतःसाधकत्वं तदप्युल्लंघितुं न शक्यतइत्यर्थः। नन्वसतःसाधकत्वं नास्तीति वदतां लौकिकानामयमभिप्रायः। असतो जायमाना सिद्धिः सती प्रमारूपा नभवतीति मयात्वसतोऽसत्सिद्धिरुच्यतइति न मम लोकमर्यादोल्लंघनमित्यतआह॥ नचेति॥ अन्योन्येति॥ असतःसाधकत्वे सिद्धेऽसतःसाधकत्वं नास्तीति लोकप्रसिद्धेर्विषयांतरपरत्वं लोकप्रसिद्धेर्विषयांतरपरत्वेच तद्विरोधाभावादसतोपि साधकत्वं सिद्धचतीत्यन्योन्याश्रयइत्यर्थः॥ अन्यथेति॥ लोकमर्यादातिक्रमइत्यर्थः॥ प्रतीतिरिति॥ असच्चेन्न प्रतीयेतेति प्रतीत्यन्यथानुपपत्तिरूपार्थापत्त्या प्रपंचेऽसद्वैलक्षण्यं साध्यते तन्न स्यात्। लोकमर्यादासिद्धाया रूप्यादिप्रतीतेरप्यत्यंतासत्त्वस्य शून्यवादिना वक्तुं शक्यत्वादित्यर्थः॥ सल्लक्षणेति॥ सतस्साधकस्य यल्लक्षणं पक्षवृत्तित्वादिरूपं तद्योगित्वं साधकत्वे तंत्रं सल्लक्षणायोगित्वमसाधकत्वे तंत्रमित्यर्थः। तच्च पर्वतवृत्तिधूमेऽस्ति अतस्तत्र साधकत्वं नतु तदाभास इतिनातिप्रसंगः। प्रकृते दृश्यत्वादौच सल्लक्षणयोगित्वमस्तीति साधकत्वं युक्तमितिभावः॥ असत्त्वइति॥ दृश्यत्वादिभिरेव प्रयोगैःप्रपंचांतर्गतस्य हेत्वादेरपि मिथ्यात्वबोधनेनासत्त्वापत्त्या सतःसाधकस्य यल्लक्षणं पक्षवृत्तित्वव्याप्तिमत्त्वादिरूपं तद्योगित्वाभावेन पक्षवृत्तित्वव्याप्त्यादिराहित्यरूपासत्साधकलक्षणयोगित्वप्राप्तेर्न साधकत्वं युक्तमित्यर्थः॥ स्वप्नवदिति॥ यथा स्वप्नप्रतीतयोर्धूमतदाभासयोरु भयोरपि मिथ्यात्वाविशेषेपि तत्र कश्चनसद्धेतुःसाधकत्वेन व्यवह्रियते कश्चन

परमार्थसतएव साधकत्वं सिद्धयतीति द्रष्टव्यं॥ विरोधादिति॥ अबाध्यत्वादिरूपसत्त्वस्य बाध्यत्वादिरूपमिथ्यात्वाश्रयमृषार्थेवृत्तिर्नसंभवति स्वाभाववति स्ववृत्तेर्विरुद्धत्वादित्यर्थः॥ वृषसिंह्योरिति॥ वृषस्य सिंहप्रभेदत्वाभावादितिभावः। नन्वपरमार्थसतोपि अबाध्यत्वरूपसद्विशेषत्वात्तत्रसत्त्वसामान्यं संभवतीत्यतआह॥ अपरमार्थसतइति॥ शाबलेयस्य शबलगोजन्यस्य गोरूपपदार्थस्य॥ सद्वैलक्षण्यमिति॥ अबाध्यत्वरूपसत्त्वाविरोधिनःअपारमार्थिकत्वस्य पारिभाषिकत्वापत्त्याऽपरमार्थसतोपि प्रपंचस्य वस्तुतः परमार्थसद्विशेषत्वात्तत्रसद्वैलक्षण्यं न स्यादित्यर्थः॥ सामान्यविधिमिति॥ अनारोपितब्राह्मण्यवान्यजेतेति विशेषाश्रवणादित्यर्थः। ब्राह्मण्यां ब्राह्मणस्त्रियां। अब्राह्मणात् शूद्रांत्यजादेर्जातश्चंडालः। एतच्चात्यंतनिषिद्धता सूचनाय। ननु प्रतिलोमजानां यज्ञाधिकारे निषेधवचनविरोध इत्यतआह॥ निषेधस्यत्विति॥ तथाचारोपितब्राह्मण्यवान् निषेधाविषयइति तस्यापि विधिविषयत्वापत्तिरितिभावः। तदनुगतं आरोपितानारोपितानुगतं सत्त्वसामान्यं। तस्य तंत्रत्वे सत्त्वसामान्यस्य तंत्रत्वे। स्वाप्नेन प्रातिभासिकत्वोपेतेन॥ तत्फलस्येति॥ ऐक्यापत्तिस्वर्गरूपफलस्येत्यर्थः। पारमार्थिकस्येत्येतत् द्वैतस्य वह्नेरित्यत्राप्यनुषंजनीयं॥ विरुद्धधर्मेणेति॥ सर्वज्ञत्वाल्पज्ञत्वादिरूपविरुद्ध धर्मेणेत्यर्थः। साधकत्वप्रयोजकीभूतस्य सत्त्वसामान्यस्य सत्त्वादितिभावः॥ धर्मीति॥ तादृशसत्त्ववान् धर्मी। तद्वान् हेतुःसाधकइत्यर्थः। अतएव धर्मिभूतयोर्विशिष्टयोर्जीवेशयोर्व्यावहारिकत्वेन तत्तुल्यसत्ताकेनासद्विलक्षणेनच विरुद्धधर्मरूपहेतुना पारमार्थिक जीवेश्वरभेदसिद्धिप्रसंगादेवेत्यर्थः। ननु व्यावहारिकेश्वरभेदसिद्धिर्भवत्येवेत्यस्वरसादाह॥ गौरवाच्चेति॥ सत्त्वे द्वैविध्याभावेन धर्मितुल्यसत्त्वासद्विलक्षणत्वापेक्षया सत्त्वमात्रस्य साधकत्वे तंत्रत्वोक्तौ लाघवमित्यर्थः। धूमाभासेन पारमार्थिकवह्नेःसिद्धिःस्यादित्यत्र परिहारं शंकते॥ नन्विति॥ कुतोव्याप्यभावइत्यतआह॥ बहुलेति॥ यथा धूममात्रे न वह्निव्याप्तिः किंतु बहुलोर्ध्वत्वाविच्छिन्नमूलत्वयुक्ते तथा आभासधूमेपि न वह्निव्याप्तिः किंत्वाभासभिन्न एवेत्यर्थः। व्याप्यर्थत्वात् व्याप्युपयोगित्वात्॥ अस्या इति॥ असतःसाधकत्वे सिद्धे धूमाभासस्यापि साधकत्वं स्यादित्यतिप्रसंगवारणाय बहुलोर्ध्वतादिवदाभासविविक्तत्वस्यापि व्याप्युपयोगित्वसिद्धिःतत्सिद्धौ तदभावादेवासाधकत्वं धूमाभासस्य नासत्त्वादितिकल्पनायाःसिद्धयाऽतिप्रसंगाभावेनासतःसाधकत्वसिद्धिरित्यन्योश्रयादित्यर्थः। आरोपितेति आभासविवेकस्य विशेषणं। तथाच व्यर्थमाभासविविक्तत्वविशेषणं। धूमाभासे व्यभिचारस्स तदवस्थत्वादितिभावः॥ प्रकृतेपीति॥ तथाच यथा ह्रदादावारोपिते धूमे न व्याप्तिःकिंत्वाभासविविक्ते पर्वतवृत्तिधूमएव एवं ब्रह्मण्यारोपिते दृश्यत्वेपि न व्याप्तिरस्तीति व्याप्तिसिद्धये प्रपंचे दृश्यत्वस्य सत्त्वं स्वीकार्यमित्यर्थः। साधकत्वार्थंवा साधकत्वोपयुक्तव्याप्त्यार्थंवा दृश्यत्वादेस्सत्त्वमावश्यकमितिनासतः साधकत्वमितिभावः। किंच दृश्यत्वादिहेतोः सत्त्वमावश्यकं अन्यथा हेत्वाद्यारोपस्य सर्वत्र सौलभ्येनासिद्धयादिविभागएव न स्यात् अतस्तदर्थं वास्तवसत्त्वमेव वाच्यमित्याह॥ हेत्वादीति॥ ननु मिथ्यात्वानुमानेनासत्त्वेन बोधितानामपि पक्षहेत्वादीनां साध्यव्याप्त्यादीन्प्रत्याश्रयत्वं भविष्यति वंध्यासुतो न वक्ता अत्यंताभावप्रतियोगित्वादित्यत्रासतोपि साधनं प्रत्याश्रयत्वदर्शनादित्यतआह॥ आश्रयादेरिति। आदिपदेन साध्यसंसर्गग्रहणम्। आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणमिति वचनेन आश्रयासिद्धयादेरदूषणत्वेन तस्य सत्त्वनियमाभावेपि व्याप्तिरेवहि प्रयोजिकेत्युक्तत्वेन तस्याश्चसदाश्रयकत्वनियमेन हेत्वादेःसत्त्वमावश्यकमितिभावः॥ तुच्छइति॥ असद्वैलक्षण्यघटितानिर्वाच्यत्वरूपप्रातिभासिकत्वस्य तुच्छेऽभावेन तस्याप्रातिभासिकत्वेन साधकत्वं

तथाचैवं भट्टाचार्यैः बौद्धंप्रत्युक्तत्वात्तवापि प्रच्छन्नबौद्धत्वात्सांवृतसत्त्वस्थानाभिषिक्तव्यावहारिकसत्त्वस्यापि मिथ्याशब्दपर्यायत्वात्तदुपन्यासो वंचनार्थएवेतिभावः। तथाच व्यावहारिकसत्त्वं साधकत्वोपयोगि न भवतीति ध्येयं। व्यावहारिकसत्त्वस्य साधकतायां प्रयोजकत्वे साक्षिणि व्यभिचार इत्याह॥ अज्ञानादेरिति॥ आदिपदेन सुखादि॥ सिद्धीति॥ स्वरूपसतःसत्त्वपर्यंतेत्यर्थः। साक्षिणि शुद्धचैतन्ये। सिद्धिपर्यंतसाधक इत्यनेन रूप्यादिसाधकाविद्यावच्छिन्नसाक्षिणो व्यावहारिकाद्वैलक्षण्यं सूचितमिति ज्ञेयं॥ साक्ष्यपीति॥ अविद्याकाराऽविद्यावृत्तिर्जायते। तस्यां प्रतिबिंबितएव साक्षी अविद्यादिकं साधयति। तस्यच व्यावहारिकत्वान्न व्यभिचारइतिभावः। चैत्रराग:चैत्रगतःस्वशब्दःसमभिव्याहृतपरः। स्वशब्देन रागःतद्विषयकं यदनित्यज्ञानं अयमिच्छावान् प्रयत्नवत्त्ववत्त्वादित्यनुमानजन्यं तदतिरिक्तं यदध्यक्षं तद्वेद्यइत्यर्थः। घटादौ तु पटविषयकं यदनित्यज्ञानं अस्मदादिज्ञानं वृत्तिरूपं तदतिरिक्तं यदध्यक्षं अधिष्ठानचैन्यरूपं तद्वेद्यत्वमस्तीति ज्ञेयं। अविद्यावृत्तिप्रतिबिंबितसाक्षिरूपाध्यक्षवेद्यत्वेन सिद्धसाधनतावारणाय अनित्यज्ञानातिरेकिणेत्युक्तं। अविद्यावृत्ति प्रतिबिंबितं विशिष्टं साक्षिचैतन्यं चानित्यमितिभावः। सुखादावपि रागवदिदमनुमेयमितिभावः॥ नित्यधीति॥ शुद्धसाक्षीत्यर्थः। तथाच तत्र व्यावहारिकसत्त्वाभावाद्व्यभिचारइतिभावः। सुखेच्छाज्ञानादीनामप्यविद्यावृत्ति प्रतिबिंबितसाक्षिवेद्यत्वे सुखाद्युत्पत्त्यनंतरं कदाचिदविद्यावृत्तिविलंबेन तज्ज्ञानविलंबापत्त्या सुखादीनां ज्ञातैकसत्त्वं न स्यादित्याह॥ अज्ञानेति॥ अस्तुवा यथाकथंचित्सुखादेरविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वं तथाप्यविद्याया नाविद्यावृत्तिप्रतिबिंबितसाक्षिवेद्यत्वं। आत्माश्रयानवस्थापत्तेरतःशुद्धसाक्षिवेद्यत्वमेव वाच्यं। तथाचाविद्या साधकशुद्धसाक्षिणि व्यभिचारःसुस्थइयाशयेनाह॥ अविद्यावृत्तिं प्रतीति॥ साधकताया अज्ञानसाधकतायाः। शुद्धसाक्षिणःसाधकत्वाभाव इतियावत्॥ अन्योन्येति॥ अज्ञानस्वरूपसिद्धौ तदधीनस्य साक्षिणस्साधकत्वस्य सिद्धिः तत्साधकत्वे सिद्धेऽज्ञानस्य प्रातीतिकत्वसिद्धिः अज्ञानस्य प्रातीतिकत्वेन साक्षिण एव तत्सत्त्वसाधकत्वादित्यन्योन्याश्रय इत्यर्थः॥ एतेनेति॥ मयोच्यमानमसतःसाधकत्वं यथात्वदसंमतं एवंभवदभिमतं सतस्साधकत्वं न ममापि संमतमित्येतदेतेनैव सत्यस्य साक्षिणोह्यावयोर्मते साधकत्वांगीकारेणैव निरस्तमित्यर्थः। विमतिर्विवादः। आनंदबोधः चित्सुखः॥ नापीति॥ कचित्पारमार्थिकी सत्ता साधकत्वे तंत्रं कचिद्व्यावहारिकी सत्ता कचित्प्रातिभासिकीसत्तेति सत्तात्रयमपि तंत्रं। अथवा द्वयं प्रातिभासिकसत्त्वातिरिक्तं सत्त्वद्वयमित्यर्थः॥ अननुगमादिति॥ पारमार्थिकसत्त्वाभावेपि व्याहारिकसत्त्वोपेतादप्यर्थसिद्धेर्दर्शनाद्व्यभिचारइत्यर्थः। ननु तृणाभावेपि पर्णादिना वह्नेर्जायमानत्वेन व्यभिचारान्न वह्नौ तृणादीनां कारणत्वं एवमेव यागस्यापि न स्वर्गसाधनत्वमित्याशंकायां यथा तृणजन्यवह्नेःसकाशान्मणिजन्यवह्नौ यथावा यागजन्यस्वर्गात् दानादिजन्ये स्वर्गे वैजात्यमंगीकृत्य व्यभिचारः परिह्रियते एवमिहापि पारमार्थिकसत्त्वोपेतप्रमाणजन्यसिद्धितो व्यावहारिकादिसत्त्वोपेतप्रमाणजन्यसिद्धौ वैजात्यकल्पनान्न व्यभिचारइत्याशंकां परिहरति॥ प्रयोज्येति॥ तृणादिप्रयोज्यवह्नेस्तृणादिजन्यतावच्छेदकीभूत जातिविशेषस्यानुभवसिद्धत्वात् तृणे सति तादृशजात्युपेततार्णो वह्निविशेषइत्यस्य व्यभिचारो नास्तीति कल्प्यते तद्वदिह पारमार्थिकसत्त्वादिप्रयोज्यजातिविशेषाणामभावेन तृणारणिमणिन्यायासंभवादितिभावः॥ अपरमार्थेति॥ पारमार्थिकसद्भिन्नव्यावहारिकादिसत इत्यर्थः॥ असत्त्वेनेति॥ सत्प्रभेदत्वाभावेन सत्त्वसामान्यं प्रति अव्यक्तित्वादित्यर्थः। तथाच शशविषाणगोविषाणानुगतविषाणत्वसामान्यवत् सत्त्रयसद्वयानुगतसत्त्वसामान्यस्याप्यभावादित्यर्थः। तथाच

तत्कृतइत्यतउक्तं॥ पूर्वपक्षीति॥ तेनेति॥ स्वार्थानुमाने पराभावादितिभावः। स्वार्थानुमाने परसिद्धसत्त्वानपेक्षायामपि परार्थानुमानं तदपेक्षमस्त्वित्यत आह॥ परार्थेति॥ प्रयोगस्य ज्ञानपूर्वकत्वेन स्वस्य ज्ञानाभावे परार्थप्रयोगएवायुक्तइतिभावः॥ परेति॥ परप्रसिद्धसत्त्वोपेतेन दृश्यत्वादिहेतुनेत्यर्थः। वास्तवसाध्यं मिथ्यात्वं। असिद्धेस्तवेतिशेषः। तथात्वे बौद्धप्रसिद्धहेतुना त्वन्मते जगति वास्तवसन्नभंगित्वादिकमपि सिद्धचेदितिभावः। पररीत्या बौद्धरीत्या। अतो बौद्धमतप्रसिद्धेनैव दृश्यत्वेन हेतुना मिथ्यात्वमपि त्वद्रीत्यैव साध्यं तेन मन्मते तद्वास्तवमतो नोक्तदोष इतिभावः॥ बौद्धरीत्येति॥ परसिद्धेन परं प्रति मिथ्यात्वसिद्धावपि तव प्रपंचमिथ्यात्वसिद्धचभावेन वस्तुतस्त्वन्मते जगतस्सत्यत्वमेव स्यात् बौद्धोक्तसाधनेन बौद्धमत एवात्मनो मिथ्यात्वेपि त्वन्मते तस्य सत्यत्ववदित्यर्थः॥ मिथ्यात्वस्येति॥ मिथ्यात्वमपि पररीत्यैव न वास्तवमित्यंगीकारे तद्बोधकस्य नेहनानेति प्रमाणस्य त्वदभिमततत्वावेदकत्वं न स्यादितिभावः॥ योपीति॥ यःपदार्थःपरमतेऽसिद्धःस्वमते सिद्धस्तत्र प्रतीकारो दूषणं स्यात् स्वमतेऽसिद्धोऽयमिति वादिनं प्रति कःप्रतीकारःतेनैवासिद्धत्वांगीकारात्तद्दूषणं व्यर्थमित्यर्थः। तथाच मिथ्यात्वं वास्तवं मया नांगीक्रियत इत्युच्यते चेदस्मदिष्टसिद्धचा न तद्दूणेनास्माकं कृत्यमित्याशयः॥ अन्योन्येति॥ सिद्धे प्रपंचमिथ्यात्वे व्यावहारिकसत्त्वसिद्धिस्तत्सिद्धौच तस्य साधकत्वे तंत्रत्वसिद्धचा तादृशसत्त्ववता दृश्यत्वादिना मिथ्यात्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः। व्यावहारिकेण दृश्यत्वादिहेतुना। पारमार्थिकासिद्धेःपारमार्थिकस्य मिथ्यात्वस्यासिद्धेरित्यर्थः। कुतोऽसिद्धिरितिचेत् हीनसत्ताकेनाधिकसत्ताकसाध्य सिद्धेरदर्शनादित्याशयेनोक्तं प्रातिभासिकेनेति। नन्वेतदयुक्तं। यादृच्छिकस्थले आरोपितेनापि धूमेन व्यावहारिकवह्नि सिद्धेर्दर्शनादित्यस्वरसादाह॥ किंचेति॥ उक्तदोषाइति॥ सत्त्वेन व्यवहारमात्रं वस्तुतस्सत्त्वं नास्तीत्यंगीकारे हेत्वादिवाक्यप्रतिपाद्यस्य दृश्यत्वादेःसत्त्वाभावप्राप्त्या स्वरूपासिद्धिव्याप्यत्वासिद्धचादयो दोषा उक्ता इत्यर्थः। बहुकालानुवृत्तभ्रांतिहेतुत्वेन नभोनैल्यभ्रमहेतोरिव व्यावहारिकसत्त्वविषयश्रुतीनामप्रामाण्यापातात्। अतो बहुकालानुवृत्तभ्रांतिहेतुत्वेन नभोनैल्यभ्रमहेतोरिवव्यावहारिकसत्त्वविषयश्रुतीनामप्रामाण्यापातात्। अतो बहुकालानुवृत्तभ्रांतेर्नसाधकत्वप्रयोजकत्वं। नभोनैल्यछत्राकारत्वादिप्रत्यक्षस्यापि सादकत्वापत्तेरित्यर्थः। संगृह्णाति॥ तथाचेति॥ साधकत्वप्रयोजकभूतं सत्त्वं यदा यर्हि व्यवहारसिद्धं अबाध्यत्वादिरूपं विवक्षितं तर्हि अस्माकं का क्षतिः इष्टापत्तिरितिभावः। नचेत् सत्त्वेन व्यवहारमात्रं वस्तुतस्सत्त्वं नास्तीत्यंगीकृतंचेत् असतस्साधकत्वं नास्तीत्यत्रकिमायातं। हेत्वादिवाक्यप्रतिपाद्यस्य दृश्यत्वादेःसत्त्वाभावात्स्वरूपासिद्धचादिदोषःस्यादतः साधकत्वायोग इत्यभिहिते नासतःसाधकत्वं मयोच्यते दृश्यत्वादेर्व्यावहारिकसत्त्वांगीकारात्तस्यैव साधकत्वे तंत्रत्वादिति त्वयेरितं। तत्र व्यावहारिकसत्त्वरूपविचारे वस्तुतस्सत्त्वं नास्तीत्युक्तं स्यात्। तथाचासतएव पुनःसाधकत्वोक्तेरसतःसाधकत्वं नास्तीत्यस्माभिरभिहितप्रमेये दूषणं किमायातमित्यर्थः। असतोपि साधकत्वमित्येतां तु दुराशां उत्तरत्रापाकरिष्याम इतिभावः॥ तस्मादिति॥ यन्नास्ति शशशृंगादि तन्नास्त्येव यदस्ति तत्परमार्थतएवास्ति तस्मात्तत्सत्यमेव अन्यच्छशशृंगादिकं मिथ्यैवेति सत्यद्वयकल्पना सत्यद्वैविध्यकल्पना पारमार्थिकसांवृतरूपसत्त्वद्वैविध्यकल्पना न युक्ता। पारमार्थिकमिथ्याव्यतिरिक्तसांवृतसत्त्वोपेतवस्तुनोऽभावात्। सांवृतत्वोक्त्या शशशृंगवन्मिथ्यात्वमेवोक्तं स्यात्। तथाच प्रत्यक्षादिबाधः। तेन कारणेन लालावक्त्रासवादिशब्दवत् मिथ्यासांवृतशब्दयोस्तुल्यार्थत्वे पर्यायत्वे सति शशशृंगंमिथ्याजगत्सांवृतं सत्यमित्युपन्यासः शिष्यवंचनार्थमेवेत्यर्थः।

वाक्येन पक्षे मिथ्यात्वं विधीयते। अनुमानप्रयोगेण तु विश्वमिथ्यात्वं साधयता विश्वांतर्गतस्य मिथ्यात्वरूपप्रतिज्ञार्थस्यात्यंताभावरूपमिथ्यात्वं साध्यते इति व्याहतिरित्यर्थः॥ बाधेति॥ अनुमानेन विश्वांतर्गतमिथ्यात्वस्यापि अत्यंताभावप्रतियोगित्वरूपमिथ्यात्वबोधने पक्षेऽभावप्राप्त्या बाध इत्यर्थः॥ स्वरूपासिद्धीति॥ अनुमानेन विश्वांतर्गतदृश्यत्वादिहेतूनां अत्यंताभावसाधने पक्षेऽसत्त्वप्राप्त्या स्वरूपासिद्धिरित्यर्थः॥ व्याप्यत्वेति॥ उदाहरणवाक्यप्रापितस्य व्याप्यत्वस्य मिथ्यात्वबोधने व्याप्यभावप्राप्त्या व्याप्यत्वासिद्धिरित्यर्थः। नन्वनुमानप्रयोगेण दृश्यत्वादीनां मिथ्यात्वबोधनेपि साधकत्वमुपपद्यत एव मिथ्याभूतस्यैव मया साधकत्वांगीकारदित्यतआह॥ परमार्थेति॥ परमार्थसत्त्वस्य साधकत्वे तंत्रत्वं परिशेषेणोपपादयति॥ तथाहीत्यादिना॥ तत्र साधकत्वे॥ तुच्छस्यापीति॥ शब्दाभासादिना व्योमकमलादीनामपि ज्ञानसंभवेन साधकत्वप्रसंगइत्यर्थः॥ नापीति॥ तथाच तुच्छव्यावृत्तिरित्यर्थः। प्रपंचे त्वद्रीत्याऽपरोक्षभ्रांतिसिद्धेनात्यंताबाधेन पारमार्थिकत्वस्य सिद्धिःस्यादित्यर्थः। धीमात्रादेःसाधकत्वे व्यतिरेकव्यभिचारमाह॥ वह्नित्वेनेति॥ नारिकेलद्वीपवासिनो वह्नेर्वह्नित्वेन ज्ञानाभावेपि दाहरूपकार्यसिद्धेर्दर्शनादित्यर्थः। धीमात्रादेस्तंत्रत्वेऽन्वय व्यभिचारमप्याह॥ अमृतत्वेनेति॥ विषस्यमृतत्वज्ञाने सत्यपि संजीवनरूपकार्यादर्शनादित्यर्थः॥ अबाधितेति॥ तथाच ह्रदेऽपरोक्षभ्रांतिसिद्धेन धूमेन वह्न्यसिद्धिः। अमृतत्वेन ज्ञातेनापि विषेण संजीवनासिद्धिःतज्ज्ञाने त्रिचतुरकक्षासु बाधसद्भावादितिभावः। इत्येतदप्यतएव निरस्तं। प्रपंचेऽपरोक्षभ्रांतिसिद्धात्यंताबाधस्यापि ब्रह्मज्ञानपर्यंतमपि बाधाभावेन त्रिचतुरकक्ष्यास्वबाधितसत्त्वप्रकारकधीविषयत्वसत्त्वेन पारमार्थिकत्वसिद्धिः स्यादितिभावः। त्रिचतुरकक्ष्यास्वबाधितसत्त्वधियःसाधकत्वतंत्रत्वे दूषणांतरमाह॥ गौरोहमिति॥ तदेवोपपादयति॥ गौरोहमित्यादावपीति॥ गौरत्वादेरात्मादौ सत्त्वधियः त्रिचतुरकक्ष्यास्वबाधितत्वेन आत्माऽनित्यःरूपवत्त्वादित्येवं गौररूपेणात्मन्यनित्यत्वसिद्धिःस्यात्॥ भौतिकंत्वेव रूपादिव्याप्तं नाशेनेतिवचनात्। तथा नभःस्पर्शवन्नील रूपवत्त्वादित्येवं नीलरूपेणाकाशेपि स्पर्शसिद्धिःस्यादितिभावः। ननु त्रिचतुरकक्ष्यास्वबाधित्वं नाम नप्रत्यक्षमात्रेण बाधाभावः किंतु बाधसामान्याभावः। तथाच न तत्र त्रिचतुरकक्ष्यास्वबाधः। आत्माकाशौ नरूपवंतौ विभुत्वादित्यनुमानबाधोऽस्तीतिचेत्तत्राह॥ त्वन्मंतइति॥ प्रपंचे सत्त्वधियोप्यनुमानबाधितायास्त्वयांगीकृतत्वान्न त्रिचतुरकक्ष्यास्वबाधितासत्त्वधीस्त्वन्मतेस्तीति दृश्यत्वादीनां साधकत्वं न स्यादित्यर्थः॥ लोकप्रसिद्धिरिति॥ सत्त्वेन लोकप्रसिद्धिरित्यर्थः। इष्टसिद्धिर्मायावादग्रंथविशेषः। तदप्येतेनैव निरस्तं। गौरोहं नीलं नभ इत्यादेरपि सत्त्वेन परमलोकप्रसिद्धेःसत्त्वादित्यर्थः। एतेनेत्युक्तं विशदयति॥ निपुणेनेति॥ कथायां कुशलेनेत्यर्थः॥ उक्तधीविषयेति॥ त्रिचतुरकक्ष्यास्वबाधितवादिप्रतिवादिप्राश्निकसत्त्वधीविषयेत्यर्थः। तथाच निपुणबौद्धोक्तानां शून्यमेवाद्वितीयं तत्त्वमित्येतदर्थप्रतिपादकहेतूनामपि प्राश्निकादिभिस्त्रिचतुरकक्ष्यास्वबाधितत्वेन ज्ञातत्वात् त्वां प्रति तदुक्तैरपि हेतुभिस्तवशून्याद्वैतसिद्धिःस्यादितिभावः॥ यादृश्येति॥ यादृश्या बुद्ध्या नभोनैल्यादिधीव्यावृत्तया घटादौ सत्त्वसिद्धिस्तादृशबुद्धिविषयत्वमेव मम साधकत्वे तंत्रमित्यर्थः। एतेनेत्युक्तं विशदयति॥ यादृश्येति॥ शब्दे कृत्स्न दोषा अर्थबाधादयः। प्रत्यक्षे कृत्स्नदूरत्वादिदोषरहितेन प्रत्यक्षेण जगति सत्त्वस्य सिद्धत्वात्तादृशधियस्त्वया साधकत्वांगीकारे पारमार्थिकसत्त्वधिय एव साधकत्वप्राप्तेरित्यर्थः। ननु प्रत्यक्षे कृत्स्नदोषराहित्यमसिद्धं। शुक्तिरूप्यप्रत्यक्षदृष्टांतेन जगत्प्रत्यक्षेपि प्रत्यक्षत्वहेतुना दोषोनुमीयते तेन न जगति सत्त्वसिद्धिरितिचेत् तत्राह॥ अन्यथेति॥ तर्हि तवापि शब्दे कृत्स्नदोषहीनवेदांतजन्यया धिया ब्रह्मण्यपि सत्त्वं न सिद्धचेत्।

अत एवेति। धर्मिसमसत्वस्य प्रयोजकत्वेऽद्वैतश्रुतिसाक्ष्यादेर्धर्मिसमसत्वाभावात् तेनाद्वैतादिसिध्यभावप्रसङ्गः। असद्विलक्षणत्वस्य प्रयोजकत्वे तूक्तातिप्रसङ्गः। गौरवाच्चेति। उक्तप्रयोजकद्वयापेक्षयाऽबाध्यत्वरूप सत्वस्यैव तन्त्रत्वे लाघवमिति भावः। चशब्दस्त्वत एवेति परामृष्टहेतु समुच्चयार्थः। धूमाभासेन व्यावहारिकवह्नेः सिद्धिः स्यादित्यति प्रसंगं परिहर्तुं शङ्कते नन्विति। ननु धूमाभासे व्याप्त्यभावः किं निमित्त इत्यत आह बहुलोर्ध्वतादिवदिति। अस्या इति। धूमाभासेऽस्या साधकताव्याप्त्यभावादिति कल्पना तदा स्यात् यद्यसतः साधकत्वं सिद्धं स्यात्। असतः साधकत्वसिद्धिश्चैवं कल्पनेत्यन्योन्याश्रय इत्यर्थः। नन्वाश्रयादेः सत्वनियमाभाववद् हेत्वादेस्तन्नियमाभावः किं न स्यादित्यत आह आश्रयादेरिति। अत्राति प्रसंगपरिहारादिकं पूर्वोक्तमेवानुसंधातव्यम्। नापीति। अत्र सत्वमबाध्यत्वं वा, व्यावहारिक पारमार्थिकानुगतं सत्व सामान्यं वा? आद्य आह गौरवादिति। अप्रातिभासिकेति विशेषणस्य व्यर्थत्वांदित्यर्थः। द्वितीय आह व्यावहारिकेति। अन्यथेति। गौरवानादर इत्यर्थः। किंचासतः साधकत्वं न संभवति। तत्साधक प्रमाणाभावात्। तत्साधकं च भवत् किं सत्, उत सत्? नाद्यः। सतः प्रमाणस्यानङ्गीकारात्। द्वितीये विवादादित्याह किंचेति। त्वन्मतेऽपीति। नचाविद्यावच्छिन्नस्य साक्षित्वेन तस्य च व्यावहारिकत्वात् कथं सतः साधकत्वमिति वाच्यम्। अत्र हि साधकता साक्षिणि। अविद्या अवच्छेदिका इति वाभिप्रायः, अथवा विशिष्टस्य साक्षितेति? नाद्यः। दण्डनिष्ठसाधनताया दण्डत्वावच्छिन्नत्वेऽपि साधनताया दण्डमात्रनिष्ठत्वात् साक्षिगत साधकताया अविद्यावच्छिन्नत्वेऽपि तस्याः सन्मात्रसाक्षिगतत्वेन सतः साधकत्वात्। न द्वितीयः। विशिष्टस्य जडत्वेनास्वप्रकाशत्वेनाज्ञानादिसाधकतासंभवात्। अन्योन्याश्रयादेरुक्तत्वाच्च। सतः साधकत्वं त्वन्मतमित्याचार्यैरप्युक्तमित्याह उक्तं हीति। अविशेषस्य निर्विशेषस्य। असत इति यावत्। ननु तथापि सतः साधकत्वे किं प्रमाणमित्यत आह औत्सर्गिकेति। धूमज्ञानादिकं साधकमिति ज्ञानं जायत इत्यविवादम्। तच्च निरपवादेन साक्षिणा प्रमाणत्वेन सिद्धमिति सतः साधकत्वं प्रामाणिकमिति भावः लोका मर्यादयापि सतः साधकत्वं सिध्यतीत्याह तवापीति। मर्यादोल्लङ्घने कापि व्यवस्था न सिध्यतीति भावः। अन्योन्याश्रयादिति। सिद्धेरवास्तवत्वे सिद्धे सतः साधकत्वाभावेऽसतोऽपि साधकत्वसंभवेनानुमानेन मिथ्यात्वसिद्धिः। तत्सिद्धौ सिद्धेरवास्तवत्वमित्यन्योन्याश्रय इत्यर्थः। अन्यथेति। यदि सतः साधकत्वसिद्धिरसतीत्यर्थः। असत साधकत्वं नेत्यत्र भट्टवार्तिक संमतिमाह तदुक्तमिति। तत्रोपपादकमाह सिद्धिरिति। विचारस्येति। अर्थशून्यो विचारः स्यादित्यर्थः। इत्यसतः साधकत्वे बाधकवर्णनम्॥

न्यायामृतप्रकाशः

सत्त्वसाधकप्रमाणापेक्षया मिथ्यात्वसाधकानुमानानां व्याहत्यादिना दौर्बल्याच्च न तद्बाधकत्वमित्याह॥ किंचेति॥ एतैर्दृश्यत्वजडत्वपरिच्छिन्नत्वादिहेतुभिः। प्रतिज्ञावाक्येन प्रापितस्य मिथ्यात्वरूपसाध्यस्य हेतुवाक्यप्रापितस्य साधनस्य उदाहरणवाक्यप्रापिताया व्याप्तेरुपनयादिवाक्यप्रापितानां चार्थानां मिथ्यात्वं न बोध्यते बोध्यते वा। आद्यआह॥ नबोध्यतइति॥ द्वितीयेत्वाह॥ बोध्यतइति॥ विमतं मिथ्येति प्रतिज्ञानरूपेण

साक्षित्वात् तस्य च व्यावहारिकत्वात् व्यावहारिक सत्वस्य प्रयोजकत्वे न व्यभिचार इति भावः। त्वयैवेति। अविद्यावृत्तिप्रतिबिम्बितस्य साक्षित्वे तस्यानित्यत्वात् नित्यज्ञानवेद्यत्वं सुखादेस्त्वयोक्तं भज्येतेति भावः। न चाविद्यावृत्तेरुपलक्षणत्वमिति वाच्यम्। तर्हि तदुपलक्ष्यस्य चिन्मात्रत्वे व्यावहारिक सत्वस्याप्रयोजकत्वापातः। विशिष्टत्वे तस्यानित्यत्वाद् अपसिद्धान्तः स्यादिति। अज्ञानसुखादेरिति। यथान्तःकरणवृत्तिप्रतिबिम्बितसाक्षिवेद्यत्वेन घटादेर्ज्ञातैकसत्वाभावः तथा वृत्तिप्रतिबिम्बित साक्षिवेद्यत्वे सुखादेरपि ज्ञातैकसत्वाभावः स्यात्। न चान्तः करणवृत्तेरिन्द्रियसन्निकर्षजन्यत्वात् इन्द्रियसन्निकर्षस्यार्थं विनाऽयोगेनान्तःकरणवृत्तिप्रतिबिम्बितसाक्षिवेद्यत्वे न ज्ञातैकसत्वम्। अविद्यावृत्तेर्दोषमात्रजन्यतया सुखाद्यभावेऽपि तदुत्पत्त्युपपत्तेः वृत्तिप्रतिबिम्बितसाक्षिवेद्यत्वे कथं ज्ञातैकसत्वाभाव इति वाच्यम्। एवं ह्यविद्यावृत्तिस्थलेऽर्थाध्यासस्वीकारो न स्यात्। तेन विनाप्यविद्यावृत्त्युपपत्तेः। तथाचासत्ख्यातिवादि चरणानुप्रवेशः स्यात्। लाघवेन साक्ष्यभिव्यञ्जकवृत्तित्वावच्छेदेनैवार्थोपयोगस्याङ्गीकर्तव्यत्वाच्च। नचापरोक्षवृत्तेरर्थसाहित्यनियमाद् अर्थाध्यासाङ्गीकारो न तु वृत्तिजनकत्वेनेति वाच्यम्। एवं ह्यन्तःकरण वृत्तिस्थलेपि नियमादेवार्थ सत्वाङ्गीकारो, न तु जनकत्वेनेति घटादेरपि ज्ञातैकसत्वं स्यात्। अविद्यावृत्तिस्थल इव तत्राप्यदृष्टविशेष सहकृतान्तः करणमात्रेणैव वृत्युपपत्तेः। अर्थसाहित्यनियमस्याप्यन्तः करणवृत्तिमात्रविषयत्वसंभवाच्च। तस्मादपरोक्षवृत्तित्वावच्छेदेनार्थस्योपयोग इति अर्थाध्यासोऽङ्गीकार्य इति कथं न ज्ञातैकसत्वाभावः? अविद्यावृत्तिं प्रतीति। तत्प्रतिबिम्बितस्य अविद्यावृत्ति साधकत्वे व्यक्तिपरम्परायामनवस्था। अन्यथा आत्माश्रयादिकमिति भावः। सुषुप्तौ दोषाभावेनाविद्यावृत्तेरभावात् तद्वृत्तिप्रतिबिम्बितसाक्ष्यभावेऽज्ञानाद्यनुभवाभावे परामर्शविरोधश्चेत्यपि द्रष्टव्यम्। नन्वज्ञानोपहितं चैतन्यं साक्षीत्यङ्गीक्रियते। अतो न कश्चिद् विरोध इत्यत आह साक्षिगतसाधकतया इति॥ एवं च साक्षिणि सिद्धे प्रातीतिकाज्ञानसिद्धिः। तत्सिद्धौ तदुपहितत्वेन साक्षिसिद्धिरित्यन्योन्याश्रयत्वमिति भावः। तथाच शुद्धचैतन्यस्यैव साक्षित्वस्य वक्तव्यत्वेन व्यावहारिकसत्वस्य प्रयोजकत्वे साक्षिणि तदभावेन व्यभिचारः सुस्थ इति। एतेनेति। शुद्धचैतन्यरूपसाक्षिणो ज्ञानादिसाधकत्वसमर्थनेनेत्यर्थः। नापीति। प्रातिभासिकमपि कस्यचित् साधकमित्याशयेन प्रथमः कल्पः। तदसाधकमित्याशयेन द्वितीयः। ननु तृणारणिमणि न्यायेन अनेकेषां प्रयोजकत्वं किं न स्यादित्यत आह प्रयोज्य इति। नापि सदिति। अत्रापि तदेव तात्पर्यम्। तथाच नाननुगम इति भावः। अपरमार्थेति। नचापरमार्थसत्वेऽपि असद्विलक्षणत्वात् कथमसत्वमिति वाच्यम्। अपरमार्थसत्वं बाध्यत्वं वा, अबाध्यत्वरूपसद्विशेषो वा? आद्ये कथमसत्वाभावः? प्रतिपन्नोपाधौ स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वस्यैवा सत्त्वात्। मृषार्थपरमार्थानुगतं सत्वं नास्तीत्यत्र भट्टवार्तिक सम्मतिमाह तदुक्तमिति। द्वितीय आह अपरमार्थ सत इति। आरोपितानारोपित साधारण सत्वसाम्याङ्गीकारे बाधकान्तरमाह किं चेति। आरोपित ब्राह्मण्यादिकेऽपि ब्राह्मणत्वस्य सद्भावादिति भावः। निषेधस्येति। अब्राह्मणो याजनाध्यापने न कुर्यादित्यत्राब्राह्मणशब्देनारोपितब्राह्मण्यहीनः कश्चन वर्णबाह्यो विषयः स्यादिति क्षत्रियादेर्याजनादौ निषेधो न स्यादित्यर्थः। अभ्युपेत्याह अस्तुवेति। तदनुगतम् आरोपितानारोपितानुगतम्। तन्त्रत्व इति शेषः। तत्फलस्य। तयोरद्वैतसाक्षात्काराश्वमेधयोः फलस्य अद्वैतभावापत्तेः, ब्रह्महत्यातरणरूपस्य। द्वैतस्य पारमार्थिकस्येति शेषः। वह्नेः व्यावहारिकस्येति शेषः।

तथाचापसिद्धान्त इत्याह मिथ्यात्वस्येति। परसिद्धेन साध्यसाधनमयुक्तमित्यत्र भट्टवार्तिक संमतिमाह तदुक्तमिति। योर्थः परसिद्धः पररीत्या सिद्धः। स्वयं सिद्धः स्वस्य सिद्धः। अभिधीयते साध्यत्वेन साधनत्वेन वा प्रयुज्यते तत्र प्रतीकारः असाध्यत्वा साधनत्वापादकदूषण परिहारो भवेत् कर्तुं शक्यते। स्वतोऽसिद्धे साधने साध्येवा का क्रिया? न कोऽपि दूषण परिहारोपाय इत्यर्थः। नापीति। साध्यसाधन इति शेषः। अत्र व्यावहारिकं सत्वमिति कोऽर्थः? किं बाध्यत्वं विवक्षितम्, अथवाऽबाध्यत्वं, यद्वा सत्वेन व्यवहारमात्रम्? नाद्य इत्याह प्रपञ्चेति। प्रातिभासिकेनेति। ननु हेतुव्याप्त्यादेरनुमितिविषयसमसत्ताकत्वमसिद्धम्। धूलीपटले धूमविभ्रमनन्तर वह्निमति वह्न्यनुमितेः प्रमात्वेन व्यभिचारात्। तत्र हेत्वादेः प्रातिभासिकत्वात्। गन्धप्रागभावावच्छिन्नो घटो गन्धवान् इत्यत्र व्याप्त्यादेः सत्वेऽपि अनुमेयार्थस्य प्रातिभासिकत्व दर्शनादिति चेन्न। यादृच्छिकातिरिक्त पक्षतावच्छदकाविरुद्धसाध्यकानुमितित्वावच्छेदेनानुमेयार्थ समसत्ताकत्वं हेतुव्याप्त्यादेर्नियतमिति विवक्षितत्वात्। यद्वा हेतुव्याप्त्यादेरित्यत्रातद्गुणसंविज्ञान बहुव्रीहिणाऽबाधितत्वानुमिति प्रामाण्ययोरनुमेय समसत्ताकत्वमुक्तम्। एवं च यादृच्छिकस्थले न व्यभिचारः। तत्राप्यबाधितत्वानुमिति प्रामाण्ययोः सत्वात्। गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यादौ तदभावादनुमेयार्थस्य प्रातिभासिकत्वम्। मिथ्यात्वानुमितिस्थले तु अबाधितत्वानुमिति प्रामाण्ययोर्व्यावहारिकत्वादनुमेयार्थस्यापि व्यावहारिकत्वमेव स्यादिति। अबाध्यत्वं व्यावहारिकत्वमिति द्वितीयपक्षे इष्टापत्तिरित्याह किञ्चेति। तृतीये आह सत्वेनेति। उक्तदोषाः। अमृतत्वेन ज्ञातस्य विषयस्य संजीवकत्वमित्याद्याः। ननु ब्रह्मज्ञानेतराबाध्यत्वं व्यावहारिकसत्वं विवक्षितम्। इदं च न मिथ्यात्वसिध्यधीनम्। मिथ्यात्वमनङ्गीकुर्वतस्तवापि सिद्धत्वात्। अत्यन्ताबाध्यसाधारणत्वाच्च। एवं च नान्योन्याश्रयादिकमिति चेन्न। तथासति तुच्छस्यापि साधकत्व प्रसंगात्। त्वन्मते तस्यापि ब्रह्मज्ञानेतराबाध्यत्वात्। असत्वेऽप्यनेनैवार्थक्रियाद्युपपत्त्या सद्वैलक्षण्याङ्गीकारवैयर्थ्याच्च। किञ्च ब्रह्मण्यारोपित जडत्वादेर्व्यावहारिकत्वेन तेन तस्य मिथ्यात्वाचेतनत्वादिकं स्यात्। एवं ब्रह्मण्यारोपित क्षणिकत्वादेरपि व्यावहारिकत्वेन शून्यपक्षोक्तसकलदोषस्य त्वन्मते प्रसङ्गाच्च। तस्मान्नेदं व्यावहारिकत्वम्। किन्तूक्तरूपमेव वाच्यमिति मूलोक्तदूषणं सुस्थमिति। ननु सत्वेन बहुकालीनभ्रान्तिविषयत्वं साधकत्वे प्रयोजकम्। अमृतत्वेन ज्ञातविषादौ च न बहुकालीन भ्रान्तिरित्यत आह भ्रान्तेर्बहुकालेति। नभो नैल्यादेरपि तादृश भ्रान्तिविषयत्वेनात्माद्यनित्यत्वादि साधनत्वं स्यादिति भावः। उक्तमर्थं संगृह्णाति तथाचेति। पारमार्थिकमेव सत्वं, न सत्यद्वयकल्पनेत्यत्र भट्टवार्तिकसम्मतिमाह तदुक्तमिति। तस्माद् यन्नास्ति कुत्रापि तन्नास्त्येव सर्वथा असदेवेत्यर्थः। यच्चास्ति परमार्थतः कुत्रापि तत् सत्यम्। अन्यन्मिथ्यैवासदिति न सत्यद्वयकल्पना पारमार्थिक सांवृतरूपसत्यद्वयकल्पनेत्यर्थः। ननु मिथ्या संवृतिशब्दयोस्तुल्यार्थत्वे मिथ्येत्यनुक्त्वा संवृतीति कथमुच्यत इत्यत उक्तं तुल्यार्थत्वेऽपीति। वञ्चनार्थं लोकानां मोहनार्थम्। अप्रसिद्धशब्दप्रयोग इति भावः। किं च व्यावहारिक सत्वं न साधकत्वप्रयोजकम्। अज्ञानसाधके साक्षिणि अभावादित्याह अज्ञानादेरिति। ननु ब्रह्मज्ञानेतरज्ञानाबाध्यत्वरूप व्यावहारिकत्वस्य परमार्थसति साक्षिणि संभवात् साधकत्वं भविष्यतीति चेन्न। अस्य परमार्थसत्साधारणत्वेन जनकत्वाप्रयोजकत्वात्। अतिप्रसङ्गादेः प्रागेवोक्तत्वाच्च। एतदपेक्षयाऽबाध्यत्वरूप परमार्थत्वस्यैव प्रयोजकत्वाच्चेत्यलं विस्तरेण। नचेति। तथाचाविद्यावृत्तिप्रतिबिम्बितस्यैव

गृह्यते। न तु त्रिकालाबाध्यत्वम्। अनुमानेन च त्रिकाल बाध्यत्वमिति कथं विरोध इति चेन्न। त्रिकाल बाध्यत्वस्य त्रिकालासत्वरूपतया तद्ग्राहिण एककालसत्वग्राहिणा विरोधात्। एककालसत्वग्राहिणापि त्रिकाले यदसत्वं तदभाव सिध्यविरोधाच्च। न च प्रतिज्ञादि बोध्यं सत्वं व्यावहारिकमिति वाच्यम्। तस्य मिथ्यात्वसिध्युत्तरकालीनत्वात्। व्यावहारिकशब्देनाबाध्यत्वविवक्षायां विरोधापरिहाराच्च। बाध्यत्वस्यद्याप्यसिद्धेः। बाधेति। प्रतिज्ञार्थस्य मिथ्यात्वे साध्याभावेन बाधः। हेतुवाक्यार्थस्य मिथ्यात्वे लिङ्गाभावेन स्वरूपासिद्धिः। उदाहरणार्थस्य मिथ्यात्वे व्याप्यत्वासिद्धिः। प्रतिज्ञादेर्मिथ्यात्वे तदभावेन परार्थानुमानप्रयोगः आदिशब्देन ग्राह्य इत्यर्थः। तस्मान्नैतैः प्रयोगैर्मिथ्यात्वसिद्धिः। असतः साधकत्वासंभवात् इति भावः। किं तर्हि साधकत्वे प्रयोजकम्?

अत आह परमार्थेति। ननु व्याध्यादीनामसत्वेऽपि तज्ज्ञानस्य सत्वसाधकत्वं स्याद् इति चेन्न ज्ञानस्यापि ब्रह्मेतरत्वेन मिथ्यात्वात्। एतदेव परिशेषेण साधयितुमाह तथाहीति। धीमात्रमित्यत्र मात्रपदेन सत्वासत्व परोक्षत्वौपरोक्षत्वादासीनधीर्विवक्षिता। अत एवाह तुच्छस्यापीति। तस्याप्यसत्वेन धीसत्वादिति भावः। नित्यातीन्द्रिय इति। तथाच धर्मादीनां स्वर्गादि साधकत्वं न स्यादिति भावः। असतोऽपि सत्वेन वासत्वेन वाऽपरोक्षधिय अग्रे उपपादयिष्यमाणत्वेन तत्राप्यतिप्रसङ्गस्तदवस्थो द्रष्टव्यः। इदं इति। न च तत्र बाधादेव वह्न्याद्यसिद्धिरिति वाच्यम्। प्रकृतेऽपि बाधस्योक्तत्वात्। बाधानवतारदशायां व्यावहारिक वन्ह्यादि सिद्धिप्रसङ्गाच्च। वह्नित्वेनेति। वह्नित्वेन ज्ञातात् गुञ्जापुञ्जादपि दाहापत्तिरित्यपि द्रष्टव्यम्। अत एवेति। अत्राबाधितासत्वधीर्यस्य कस्यापीति विवक्षितम्। तेन गौरोऽहमित्यादौ गौरत्वादावस्माकं त्रिचतुरकक्ष्यास्वबाधितसत्वबुध्यभावेऽपि अदोष इति द्रष्टव्यम्। गौरोहमित्यादाविति। यस्य कस्येत्यर्थः। तेनास्माकं तत्र बाधितसत्वबुद्धावपि न दोषः। ननु गौरोऽहमित्यादौ प्रत्यक्षबाधाभावेऽपि यौक्तिकबाधसत्वात् कथं गौरत्वादिनात्माद्यनित्यत्वादिसाधनमित्यत आह यौक्तिकेति। प्रकृते जगत् सत्वबुद्धावित्यर्थः। एतेनेति। लोकप्रसिद्धिः किं यत्किञ्चिल्लोकप्रसिद्धिः सकललोक प्रसिद्धिर्वा, परीक्षकप्रसिद्धिर्वा? नाद्यः। गौरत्वादावपि सत्वात्। न द्वितीयः। प्रपञ्चेऽप्यभावात्। न तृतीयः। दृश्यत्वादेर्मिथ्यात्वसाधकत्ववादिसंकरादीनां परीक्षकत्वस्यैवासंप्रतिपत्तेः। एतेनैवेति। तेन गौरत्वादिनानात्माद्यनित्यत्वादि साधनम्। तत्र तत्ववादिनः सत्वबुद्धेरभावादिति भावः। निपुणेनेति। तत्काले शून्याद्वैतसाधक हेतुषु वादि प्रतिवादि प्राश्निकानां त्रिचतुरकक्ष्यास्वबाधितत्व बुद्धिसत्वात् बाधकास्फुरणादिति भावः। यादृश्येति। न च ब्रह्मसत्वबुद्धिवत् जगत्सत्वबुद्धेर्नाबाधितत्वम्। जगत्सत्वग्राहिप्रत्यक्षस्य त्रिकालाबाध्यत्वरूप सत्वाविषयत्वं चेति कथं तेन सत्वसिद्धिरिति वाच्यम्। ब्रह्मबुद्धिवत् जगत्सत्वबुद्धेरपि परीक्षितत्वेन बाधाभावस्योपपादितत्वात्। प्रत्यक्षस्यापि त्रिकालाबाध्यत्वरूपसत्वविषयत्वस्योपपादितत्वाच्च। तेन सत्वसिद्धिरुपपन्नेति। अन्यथेति। यदि दोषाजन्यत्वेन निश्चिते दोषशङ्का अबाधितत्वेन निश्चितेऽपि बाधशङ्का तर्हीत्यर्थः। तुल्य न्यायत्वादिति भावः। नापीति। परप्रसिद्धं हेत्वादीनां सत्वं साध्यसाधकत्वे तन्त्रमिति नेत्यर्थः। ननु मास्तु स्वार्थानुमानम्। परार्थ प्रयोगस्तु स्यादेवेत्यत आह परार्थेति। किं च परप्रसिद्धं सत्वमवास्तवमिति स्वीकर्तव्यम्। तथाच कथं तेन मिथ्यात्वरूपस्य साध्यस्य वास्तवत्वसिद्धिः? अवास्तवेन गुञ्जापुञ्ज समारोपितेन वह्निना वास्तवदाहादर्शनादित्याह परसिद्धेति। किंच मिथ्यात्वस्यावास्तवत्वे तद्बोधकश्रुतीनां तत्वावेदकत्वं न स्यात्।

अनवस्थानादिति॥ ननु सतः साधकत्वमपि विप्रतिपन्नत्वात्साधनीयं। तत्साधनं च न सता मां प्रत्यसिद्धेः। नाप्यसता तवासिद्धेरित्याशंक्य परिहरति॥ नचेति॥ तथाच सतः साधकत्वमुभयसंमतमित्यर्थः॥ उक्तं हीति॥ साक्षिणा अज्ञानादिसिद्धिमिच्छता तेन मायावादिना सतः साधकत्वं स्वीकृतमेव। तत्तु परं न संभवति। अविशेषस्य सर्वशक्तिरहितस्य साध्यसाधकत्वायोगाच्छून्यवदित्यर्थः। औत्सर्गिकेति॥ धूमादिग्राहकज्ञानस्य उत्सर्गतः प्रमाणत्वात्। प्रामाण्यस्य च स्वार्थसत्त्वपर्यंतत्वात्। प्रमाणसिद्धानां धूमादीनां साधकत्वस्य सत्साधकत्वे पर्यवसानादित्यर्थः॥ स्वच्छायेति॥ स्वकीया च्छाया यथास्वेन उल्लंघितुं न शक्यते तथा धूमस्य साधकत्वं न तु बाष्पारोपित धूमस्येत्येवं लोकसिद्धं यत्सतः साधकत्वं असतश्चासाधकत्वं तदप्युल्लंघितुं न शक्यत इत्यर्थः॥ ननु लोकेऽसतः साधकत्वं नास्तीति प्रसिद्धिः सतीं सिद्धिमाश्रित्य। मया तु असती सिद्धिरुच्यत इति न मम लोकमर्यादोल्लंघनमित्यत आह। नचेति॥ अन्योन्याश्रयादिति॥ असतः साधकत्वे सिद्धे लोकप्रसिद्धेर्विषयांतरपरत्वम्। लोकप्रसिद्धेर्विषयांतरपरत्वे च तद्विरोधाभावात्। असतोपि साधकत्वं सिध्यतीत्यन्योन्याश्रय इत्यर्थः॥ अन्यथेति॥ लोकमर्यादातिक्रम इत्यर्थः॥ प्रतीतिरिति॥ असच्चेन्न प्रतीयेतेति प्रतीत्या रजतस्य वियदादेश्चासद्वैलक्षण्यं साध्यते, तन्न स्यात्। रजतादिप्रतीतेः लोकमर्यादासिद्धाया अप्यत्यंतासत्त्वस्य वक्तुं शक्यत्वादित्यर्थः॥ सल्लक्षणेति। सतो यल्लक्षणं पक्षवृत्तित्वं व्याप्तिमत्त्वमित्यादि। तच्च धूमेऽस्ति। नतु तदाभास इत्यर्थः॥ हेत्विति॥ हेतोरसत्त्वेऽसिध्यापातेना सल्लक्षणयोगित्वमेव स्यात्। एवं व्याप्त्यादावपि। असति हेत्वादौ विद्यमानस्य तस्य सल्लक्षणत्वायोगाच्चेत्यर्थः॥ तद्वदेवेति॥ स्वप्नदृष्टधूमादिना वास्तववह्निसिद्धिविरहवदित्यर्थः॥ ।अपरमार्थेनेति। सवितृसुषिरादिष्वपि तज्ज्ञानस्य सत एव साधकत्वमिति अनुपदमेव वक्ष्यमाण त्वादित्यर्थः। लोकस्यापीति। सदसतोः साधकत्वासाधकत्वरूप लोकव्यवहारातिक्रमे विचारस्य दैवशसंपन्नवतस्यवेणुनिस्सृत निस्स्वनतु न स्यत्वं स्यादित्यर्थः व्यासाद्रिसृततर्कांबुपूरैः पक्षयुगंयुजि।

न्यायामृततरंगिण्यां असत्साधकबाधनं॥

असतः साधकत्वे बाधकविवरणम्॥

न्यायामृतकण्टकोद्धारः

हेतूदाहरणादीत्यादिशब्देनाबाधितविषयत्वादिप्रतिपादक वाक्योपादानम्। व्याप्त्यादीनामित्यत्र चादिपदेना बाधितविषयत्वादिग्रहणम्। सर्वमिथ्यात्वासिद्धेरिति। ब्रह्मासत्प्रातिभासिकान्यसर्वमिथ्यात्वासिद्धेरित्यर्थः। तथैव विप्रतिपत्तेः। साध्यादिसाधारणपक्षतावच्छेदक निर्वचनात् साध्यादिव्यतिरिक्तमिथ्यात्वसाधनस्यार्थान्तर ग्रस्तत्वादिति भावः। परस्परव्याहतिरिति। लिङ्गेन हेतुवाक्यार्थेन साध्यादीनां मिथ्यात्वं बोध्यते प्रतिज्ञादिभिश्च सत्यत्वमिति लिङ्गस्य प्रतिज्ञादिभिः परस्परं विरोध इत्यर्थः। ननु प्रतिज्ञादिभिः एककालसत्वमात्रं

सूचनाय॥ निषेधस्य त्विति॥ प्रतिलोमजानां यज्ञादावनधिकारबोधकस्येत्यर्थः॥ तत्फलस्येति॥ अद्वैतसाक्षात्कारफलस्य पारमार्थिकस्य सिद्धिःस्यादित्यर्थः। पारमार्थिकस्येति द्वैतादिषु संबंधनीयम्। नच यत्र यत्साधकं व्यावहारिकं तत्र तत् व्यावहारिकं। यत्र तु साधकं प्रातीतिकं तत्फलमपि तथैव नतु व्यावहारिकमिति वाच्यम्। प्रातिभासिकेनापि सवितृसुषिरादिना स्वाप्नपदार्थेन च व्यावहारिकस्यानिष्टस्य शुभस्य च सिद्धेस्त्वदभिमतत्वात्॥ धर्मीति॥ यादृशसत्त्ववान् धर्मी तत्र तादृशसत्ववान् हेतुः साध्यसाधकः। अतो नासिध्यादिरित्यर्थः॥ गौरवादिति॥ सत्ये द्वैविध्याभावेन सत एव लाघवेन साधकत्वात्। धूमाभासेन पारमार्थिकवह्नेः सिद्धिः स्यादित्यत्र परिहारं शंकते॥ नन्विति॥ बहुलेति। यथा धूममात्रे न वह्निव्याप्तिः किं तु बहुत्वोर्ध्वत्वादियुक्ते। तथा आभासधूमेपि न व्याप्तिः, किंतु आभासभिन्न इत्यर्थः॥ अस्या इति॥ असतः साधकतायां स्वरूपयोग्यत्वे असतः कार्यादर्शनात् व्याप्त्यादिसहकारिवैकल्यकल्पनाया इत्यर्थः॥ अन्योन्याश्रयादिति॥ दृश्यत्वादेरसतः साधकतायां परेणोक्तायां च धूमाभासाद्वह्निसिद्धेरभावात् व्यभिचार इति प्रत्युक्तायां धूमाभासे व्याप्तिप्रयोजकस्याभासविवेकस्याभावात् न वह्निसाधकत्वम्। अतो न व्यभिचार इति कल्पनम्। अव्यभिचारे च कृप्ते आभासविविक्तत्वं विशेषणमिति अन्योन्याश्रय इत्यर्थः॥ आभासेपीति॥ तथाच व्यर्थमाभासविविक्तत्वं विशेषणं धूमाभासे व्यभिचारः तदवस्थ एवेति भावः॥ प्रकृतेपीति॥ यथा ह्रदादावारोपिते धूमे न व्याप्तिः किं त्वाभासविविक्ते पर्वतवृत्तिधूमे व्याप्तिः। एवं दृश्यत्वेपि ब्रह्मण्यारोपिते न व्याप्तिरिति व्याप्तिसिध्यर्थमेव प्रपंचदृश्यत्वस्य सत्त्वं स्वीकर्तव्यमित्यर्थः। साधकत्वार्थं साधकत्वोपयुक्तव्याप्त्याद्यर्थं वा दृश्यत्वादेः सत्त्वमावश्यकमिति भावः॥ हेत्वादीति॥ तथाच सिद्ध्यसिद्ध्यादिविभागाय वास्तवहेतुसत्त्वासत्त्वयोरेव वक्तव्यत्वादित्यर्थः। ननु वंध्यासुतो न वक्ता अत्यंताभावप्रतियोगित्वादित्यादौ असतोपि साध्यसाधनं प्रत्याश्रयत्वदर्शनान्मिथ्यात्वानुमानेन बाधितानामपि पक्षहेत्वादीनां साध्यव्याप्त्यादीन्प्रत्याश्रयत्वं भविष्यतीत्याशंक्य निराकरोति॥ आश्रयादेरिति॥ आदिशब्देन पक्षसाध्यसंसर्गादेः यथोचितस्य ग्रहणम्॥ तुच्छइति॥ असद्वैलक्षण्यघटितस्य प्रातिभासिकत्वस्य तुच्छे अभावादित्यर्थः॥ गौरवादिति॥ सत्त्वद्वैविध्यकल्पनमनादृत्य सत्त्वमात्रस्यैव साधकत्वप्रयोजकत्वे लाघवादिति भावः। नन्वस्तु तत्त्वमेव प्रयोजकं तत्राह॥ व्यावहारिकेति॥ सत्त्वानेकत्वमते सत्त्वस्य व्यक्तिरूपत्वेनाननुगमादित्यर्थः॥ अतिगौरवादिति॥ उक्तसत्त्वापेक्षयेत्यर्थः॥ अन्यथेति॥ लघूनि संभवेपि गुरुणोंऽगीकार इत्यर्थः॥ किंचेति॥ असतो ज्ञान जनकत्वरूपो योर्थः स सदेव साधकमिति ब्रुवाणं मां प्रति न सिद्ध इति त्वया साधनीय इत्यर्थः। नन्वसतो ज्ञानजनकत्वमसतैव साधनीयं। नच प्रतिवादिनं प्रत्यसिद्धिः। असतो ज्ञानजनकत्वसाधनस्याप्यसदंतरेण प्रतिवादिनं प्रति साधनादित्यत आह॥

तच्च न मिथ्यात्वघटितं। अत्यंताबाध्ये ब्रह्मज्ञानबाध्ये च तुल्यत्वात्। अत एव नेदं परमार्थसत्त्वव्याप्यं परमार्थसत्त्वस्य साधकतायामतंत्रत्वेन तदभावेपि न साधकत्वानुपपत्तिरिति चेन्मैवं। एतदपेक्षयाऽबाध्यत्वस्यैव साधकत्वे प्रयोजकत्वौचित्यात्। ब्रह्मणो वृत्तिव्याप्यत्वाभावपक्षे जगतोपि ब्रह्मज्ञानेतरबाध्यत्वेन तदितराबाध्यत्वस्य त्वन्मते जगत्यसिद्धेश्च। शुक्तिज्ञानस्यापि ब्रह्मज्ञानत्वेन तदितराबाध्यत्वस्य त्वन्मते शुक्तिरजते सत्त्वेन तस्यापि व्यावहारिकत्वापाताच्च॥ संगृह्णाति॥ तथाचेति॥ व्यावहार्यमबाध्यत्वादिरूपं॥ न चेदिति॥ सत्त्वेन व्यवहारमात्रस्य व्यावहारिकत्वेऽसतः साधकत्वांगीकारात्। तस्य च दूषितत्वादित्यर्थः॥ तस्मादिति॥ यन्नास्ति शशशृंगादि तन्नास्त्येव। यत्तु वियदाद्यस्ति तत्परमार्थत एवास्ति। तस्मात्तत्सत्यमेव। अन्यत् शशशृंगादिकं मिथ्यैव। एवं स्थिते सत्ये द्वैविध्यं पारमार्थिकत्वव्यावहारिकत्वरूपं न कल्पनीयं। प्रमाणाभावात्। मिथ्या इत्यस्य सांवृतमित्यस्य च शब्दस्य तुल्यार्थत्वेपि द्वैविध्यकल्पनारूपोऽयमुपन्यासः केवलं स्वशिष्यवंचनार्थमेव। यथा लालावक्त्रासवादिना बाला वञ्च्यन्ते इत्यर्थः। व्यावहारिकसत्त्वस्य साधकतायां प्रयोजकत्वे साक्षिणि व्यतिरेकव्यभिचारमाह॥ अज्ञानादेरिति॥ सिद्धिपर्यंतसाधक इत्यनेन रजतादिसाधकाभासाद्वैषम्यमाचष्टे। व्यभिचारमुद्धरति॥ नचेति॥ अविद्याकाराविद्यावृत्तिः जायते। तस्यां प्रतिबिंबित एव साक्षी अविद्यादिकं साधयति। स च व्यावहारिक इति न व्यभिचार इति भावः॥ चैत्रराग इति॥ चैत्रेच्छास्वविषयकं यदनित्यज्ञानं तदतिरिक्तेन प्रत्यक्षेण संवेद्या। प्रत्यक्षत्वस्य ज्ञानत्वाघटितत्वान्न वैयर्थ्यं। ईश्वरज्ञानवेद्यत्वेन सिद्धसाधनवारणाय तत्पदं चैत्रपरं॥ अज्ञानेति॥ अज्ञानाद्याकारवृत्तिविलंबेन तज्ज्ञानविलंबादित्यर्थः॥ अविद्यावृत्तिमिति॥ अनवस्थाभयादिति भावः। साक्षिगतेति॥ अज्ञानस्वरूपसिद्धौ तदधीनं साक्षिणः साधकत्वं तस्य साधकत्वे चाज्ञानस्य प्रातीतिकं सत्वमित्यन्योन्याश्रय इत्यर्थः॥ एतेनेति॥ सतः साक्षिण एव साधकत्वेनेत्यर्थः॥ नापीति॥ क्वचित्पारमार्थिकसत्ता क्वचिद्व्यावहारिकी क्वचित्प्रातिभासिकीति सत्तात्रयमपि विकल्पेन कारणमित्यर्थः॥ अननुगमादिति॥ व्यभिचारादित्यर्थः॥ व्यभिचारादित्यर्थः। ननु तृणजन्यवह्नेः सकाशात् मणिजन्यवह्नेः वैजात्यवत् इहापि कार्यवैजात्यकल्पनान्न व्यभिचार इत्याशंक्य परिहरति॥ प्रयोज्य इति॥ अपरमार्थेति॥ तथाच सत एव साधकत्वं न त्वसतोपीति भावः॥ विरोधादिति॥ अबाध्यत्वादिरूपस्य सत्त्वस्य बाध्यत्वादिरूपमिथ्यात्वाश्रये मृषार्थे वृत्तिर्न संभवति। स्वाभाववति स्ववृत्तेर्विरोधादित्यर्थः। ननु मृषार्थे न बाध्यत्वादिरूपं मिथ्यात्वं, किंत्वन्यदेव। तथाच मृषार्थेप्यबाध्यत्वादिरूपं सत्वसामान्यं भविष्यतीत्यत आह॥ अपरमार्थसत इति॥ अबाध्यत्वादिरूपसत्वाविरोधिनो पारमार्थिकत्वस्य पारिभाषिकत्वापत्त्या अपरमार्थसतोपि वस्तुतो परमार्थसद्विशेषत्वात् तत्र सद्वैलक्षण्यं न स्यादित्यर्थः। ब्राह्मण्यामिति॥ एतच्चात्यंतापकर्ष

सत्वघटितत्वात् तदन्यथानुपपत्त्या परमार्थसत्वमायातीति मिथ्यात्वानुमानस्य विरोध एवेति भावः॥ ह्रद इति॥ ह्रदे ह्यपरोक्षभ्रांतिसिद्धेन धूमेन वह्नेः सिद्धिः। प्रपंचे चापरोक्षभ्रांतिसिद्धेनात्यंताबाधेन पारमार्थिकत्वसिद्धिः स्यादित्यर्थः॥ वह्नित्वेनेति॥ तथाच तद्धीमात्रादीनां व्यतिरेकव्यभिचार इत्यर्थः। अमृतत्वेनेति। तथा च तेषामन्वयव्यभिचार इत्यर्थः॥ लोकप्रसिद्धिरिति॥ सत्त्वेन लोकप्रसिद्धिरित्यर्थः॥ इष्टसिद्धीति। गौरोहं नीलं नभ इत्यादेरपि सत्त्वेन पामरलोकप्रसिद्धेः सत्त्वात् निरस्तमित्यर्थः॥ निपुणेनेति॥ कथायां कुशलेनेत्यर्थः। तादृशबौद्धोक्तानां शून्यमद्वितीयमित्यस्मिन्नर्थे हेतूनामपि प्राश्निकादिभिः त्रिचतुरकक्ष्यास्वबाधितत्वेन ज्ञातत्वात्तदुक्तैरपि हेतुभिः शून्याद्वैतस्यापि सिद्धिः स्यादित्यर्थः॥ यादृश्येति॥ यादृश्या बुध्या तव नभोनैल्यादिधीव्यावृत्तया घटादौ सत्त्वसिद्धिः तादृग्बुद्धिविषयत्वमेव मम साधकत्वे तंत्रमित्यर्थः। प्रत्यक्ष इति तादृशनिर्दुष्टबुद्धिविषयत्वस्य ब्रह्मणि सत्त्वाव्यभिचारित्वेन दृष्ट तया लाघवेन च सत्त्वस्यैव साधकत्वे प्रयोजकत्वादित्यर्थः। सत्यत्वं यथा प्रत्यक्षविषयः तथोक्तं प्राक्॥ अन्यथेति॥ योग्यानुपलब्ध्यादिना दोषाभावनिश्चयस्तु श्रुत्यर्थ इव प्रत्यक्षे सम इति भावः॥ तेनेति॥ स्वार्थानुमाने पराभावादिति भावः। ननु स्वार्थानुमानाभावेपि परार्थानुमानं भवतीत्यत आह॥ परार्थेति॥ परप्रसिद्धेति॥ एकतरसिद्धसाधनेन सर्वान्प्रति साध्यसिद्धिर्न संभवति। तदुपायाभावादित्यर्थः।

ननु साध्यसिद्धिरपि न सर्वान्प्रति। किंतु यं प्रति साधनं सिद्धमस्ति तं प्रत्येवेत्यत आह॥ न च मिथ्यात्वमिति॥ बौद्धेति॥ परसिद्धसाधनेन परं प्रति साध्यसिद्धावपि तव मिथ्यात्वविषयतत्वज्ञानं न स्यात्। बौद्धोक्तसाधनेन बौद्धरीत्याऽऽत्मनो मिथ्यात्वेपि त्वांप्रत्यात्मनः सत्यत्ववत्प्रपंचस्य सत्यतैव स्यादित्यर्थः॥ मिथ्यात्वस्येति॥ मिथ्यात्वस्य मिथ्यात्वे तद्बोधकस्य नेहनानेति प्रमाणस्य त्वदभिमतं तत्वावेदकत्वं न स्यादित्यर्थः। ननु मिथ्यात्वस्य मिथ्यात्वेपि तत्वावेदक श्रुतिवेद्यत्वोपपत्तिः। सत्त्वेन सत इव मिथ्यात्वेन मिथ्याभूतस्यापि प्रमाणगम्यत्वाविरोध इति चेन्मैवं। ब्रह्मबोधकवाक्येन ब्रह्मणस्तात्विकत्वसिद्धिरिव मिथ्यात्वबोधकवाक्येन मिथ्यात्वस्य तात्विकस्यैव सिद्धेरुचितत्वात्। मिथ्यात्वबोधकवाक्ये मिथ्यात्वस्य च मिथ्यात्वेन बोधने तादृशपदराहित्येन सामर्थ्याभावाच्च। अन्यथा यजमानः प्रस्तर इति वाक्यं यजमानस्य प्रस्तरत्वं प्रातिभासिकं प्रातिभासिकत्वेनैव बोधयतीति तत्सिद्धिरित्यादिना गौणार्थता नोच्येतेति भावः। योपीति॥ परन्प्रति असिद्धः कृतकत्वादिः स्वयं स्वमते सिद्धत्वेनाभिधीयते। तत्र परं हेतुसाधनादिप्रतीकारो भवति। स्वतोसिद्धे तु का क्रिया न प्रतीकार इत्यर्थः॥ अन्योन्याश्रयादिति॥ व्यावहारिकत्वस्य पारमार्थिकभिन्नत्वस्य प्रपंचे पारमार्थिकत्वसंदेह दशायां असिद्धेरित्यर्थः। ननु ब्रह्मज्ञानेतराबाध्यत्वमेव व्यावहारिकत्वं।

पारमार्थिकव्यावृत्तव्यावहारिकत्वनिरुक्तावपि जनकतायां तत्साधारण्येऽप्यदोषात्। वस्तुतस्तु-साक्ष्यप्यज्ञानोपहित एवाज्ञानादिसाधकः। स च व्यावहारिक एव। अनुपहितेन परमार्थसदाकारेण तस्यासाधकत्वात्। एवं च व्यावहारिकसत्त्वमेव सर्वत्र साधकतायां प्रयोजकमिति स्थितम्। यथा चाज्ञानोपहितस्य साक्षित्वेऽपि नात्माश्रयादिदोषः तथोक्तं दृश्यत्वहेतूपपादने प्राक्। अग्रे च वक्ष्यते। यत्र च यत्साधकं व्यावहारिकम् तत्र तद् व्यावहारिकम्। यत्र तु साधकं प्रातीतिकं, तत्र फलमपि तथैव, न तु व्यावहारिकमिति सर्वविधिप्रतिषेधादिव्यवहारासङ्करः। अत एव लोकस्यापि व्यतिक्रमे विचारस्य यादृच्छिकवाङ्मात्रतापत्तिरित्युदयनोक्तमपि निरस्तम्, व्यावहारिकसत्त्वेन लोकमर्यादा नतिक्रमात्। भट्टाचार्यवचनानि विरुद्धत्वेन भासमानानि सत्त्वत्रैविध्यनिरूपणायामविरोधेन व्याख्यास्यन्ते। तस्मात् पक्षादिसर्वमिथ्यात्वसाधनेऽपि न व्याहतिः॥ इत्यद्वैतसिद्धौ असतः साधकत्वोपपत्तिः।

न्यायामृततरङ्गिणी

सत्वसाधकमानापेक्षया मिथ्यात्वसाधकानुमानानां व्याहत्यादिना दौर्बल्यमित्याह॥ किंचेति॥ एतैः दृश्यत्वजडत्वादिघटितैः। प्रतिज्ञारूपवाक्येन प्रापितस्य मिथ्यात्वरूपसाध्यस्य एवं हेतुरूपवाक्यादिभिः प्रापितानां दृश्यत्वादिलिंगादीनां मिथ्यात्वाबोधने सर्वमिथ्यात्वासिद्धिरित्यर्थः॥ व्याहतिरिति॥ विमतं मिथ्येति प्रतिज्ञारूपेण वाक्येन पक्षे मिथ्यात्वं विधीयते। अनुमानप्रयोगेण विश्वमिथ्यात्वं साधयता विश्वांतर्गतस्य मिथ्यात्वरूपस्य प्रतिज्ञार्थस्य बाधितत्वरूपं मिथ्यात्वं साध्यत इति व्याहतिरित्यर्थः। बाधेति॥ अनुमानप्रयोगस्य व्याप्त्याद्युपेतत्वेन प्रतिज्ञामात्रापेक्षया बलवत्त्वेन प्रतिज्ञोपनीतसाध्यापहारे च बाध इत्यर्थः॥ स्वरूपासिद्धिरिति॥ हेतुवाक्योपनीतस्य लिंगस्य अनुमानादपहारे स्वरूपासिद्धिः। एवमुदाहरणवाक्यार्थस्यापहारे व्याप्यत्वासिद्धिरित्यर्थः। ननु मिथ्यात्वसाधके प्रतिज्ञाद्युपनीतपक्षादीनां मिथ्यात्वसाधनेपि व्याहत्यभावः। प्रतिज्ञादिभिस्तेषां त्रिकालाबाध्यत्वरूपसत्त्वाप्रतिपादनादिति चेन्मैवं। एककाले सत्त्वप्रतिपादकैः प्रतिज्ञादिभिः त्रिकालवृत्यभावप्रतियोगित्वरूपमिथ्यात्वानुमानस्य विरोध एव। एककाले सतोपि कालत्रयेऽसत्त्वाभावादित्युक्तत्वात्।

नन्वनुमानप्रयोगेण दृश्यत्वादिहेतूनां मिथ्यात्वसाधनात्पारमार्थिकसत्वापहारेपि प्रकारांतरेण साधकतोपयुक्तं सिद्ध्यादिकं भविष्यतीत्यत आह॥ परमार्थेति॥ तथाच साधकत्वस्य प्राक्

तादृग्बुद्धिविषयत्वस्यैव साधकत्वे तन्त्रत्वात्। अत एव लोकप्रसिद्धिस्तन्त्रमितीष्ट सिद्ध्युक्तमप्युक्ताभिप्रायेण सम्यगेव। एवं त्रिचतुरकक्ष्यास्वबाधिता वादिप्रतिवादिप्राश्निकादीनां सत्त्वबुद्धिस्तन्त्रमित्युपपन्नमेव। गुञ्जापुञ्जस्य वह्नित्वे, आत्मनो गौरत्वे, नभसो नीलत्वे च तादृग्बुद्धिविषयत्वस्य तवाप्यसंप्रतिपत्तेः। अन्यथा तेषामपि तत्र सत्त्वसिद्धिप्रसङ्गात्।

अथ यादृश्या शब्दे क्लृप्तदोषरहितया बुद्ध्या तव ब्रह्मणि सत्त्वसिद्धिः तादृश्या प्रत्यक्षे क्लृप्तदोषरहितया मम जगति सत्त्वसिद्धिरस्तु, साधकतुल्यत्वादिति चेन्न। ब्रह्मसत्त्वबुद्धिवद् जगत्सत्त्वबुद्धेरबाधितत्वाभावात्। त्रिकालाबाध्यत्वरूपस्य सत्त्वस्य प्रत्यक्षाविषयताया उक्तत्वाच्च। न च बुद्धिविषयत्वस्य तन्त्रत्वे वह्नित्वेनाज्ञातस्य वह्नेरदाहकत्वप्रसङ्गः, अमृतत्वेन ज्ञातस्य च विषस्य सञ्जीवकत्वप्रसङ्ग इति वाच्यम्। वह्नौ तादृग्बुद्धिविषयत्वस्येश्वरादिसाधारणस्य सत्त्वात्। विषे सञ्जीवकत्वप्रसङ्गस्य नभोनैल्यादितुल्यत्वात्। वस्तुतस्तु ज्ञाताज्ञातसाधारणं व्यावहारिकं सत्त्वमेव साधकत्वे तन्त्रम्। तच्च ब्रह्मज्ञानेतराबाध्यत्वमेव। तच्च न मिथ्यात्वघटितम्। अत्यन्ताबाध्ये ब्रह्मज्ञानबाध्ये च तुल्यत्वात्। अत एव नेदं परमार्थसत्त्वव्याप्यम्। एवं च परमार्थसत्त्वस्य साधकतायामतन्त्रत्वेन तदभावेऽपि न साधकतानुपपत्तिः।

एतेन-व्यावहारिकत्वं ब्रह्मज्ञानबाध्यत्वं वा? व्यावहारिकविषयत्वे सति सत्त्वं वा? सत्त्वेन व्यवहारमात्रं वा? नाद्यः। मिथ्यात्वसिद्धेः प्राक् तदसिद्ध्या अन्योन्याश्रयात्। नापि द्वितीयः। तस्यास्माकं मिथ्यात्वविरोधित्वेनेष्टत्वात्। न तृतीयः। सत्त्वाभावे साधकत्वानुपपत्तेरिति-निरस्तम्। उक्तनिरुक्तेरदुष्टत्वात्। न च हेत्वादीनां व्यावहारिकसत्त्वे साध्यस्यापि व्यावहारिकसत्त्वमेव स्यादनुमितिविषयसाध्यस्य परामर्शविषयहेतुना समानसत्ताकत्वनियमादिति वाच्यम्। दृश्यत्ववन्मिथ्यात्वस्यापि व्यावहारिकत्वेन समानसत्ताकत्वस्येष्टत्वात्। समानसत्ताकत्वनियमासिद्धेश्च। धूलीपटले धूमभ्रमादपि वह्न्यनुमितिप्रमादर्शनाद्। गन्धव्याप्यपृथिवीत्वप्रमातोऽपि गन्धप्रागभावावच्छिन्ने घटे पक्षे बाधास्फूर्तिदशायामनुमितिभ्रमदर्शनाच्च। मिथ्यात्वस्य मिथ्यात्वेऽपि तत्त्वावेदक श्रुतिवेद्यत्वोपपत्तिः। सत्त्वेन सत इव मिथ्यात्वेन मिथ्याभूतस्यापि प्रमाणगम्यत्वाविरोधाद्। एकांशे तत्त्वावेदकत्वाभावेऽपि अपरांशे तत्त्वावेदकत्वोपपत्तेः।

ननु व्यावहारिकत्वं साधकतायामतन्त्रम्। अज्ञानादिसाधके परमार्थसति साक्षिणि तदभावादिति चेन्न। ब्रह्मज्ञानेतराबाध्यत्वस्यात्यन्ताबाध्येऽपि सत्त्वस्योक्तत्वात्। त्रैविध्यविभागे

इति। औत्सर्गिकप्रामाण्येन सिद्धत्वाच्च। तवापि व्यवहारे उपायांतराभावेन स्वच्छायाबद् दुर्लङ्घ्यलोकमर्यादासिद्धत्वाच्च। न च सिद्धिरप्यसतीत्युक्ते निस्तारः, अन्योऽन्याश्रयात्। अन्यथा प्रतीतिरप्यत्यन्तासतीति सुवचत्वेन प्रतीत्या असद्वैलक्षण्यं न सिध्येत्। एतेन सल्लक्षणयोगित्वायोगित्वे एव साधकत्वासाधकत्वयोस्तंत्रे, न तु सत्त्वासत्त्वे इति खण्डनोक्तं निरस्तम्। हेतुव्याप्त्यादेरसत्त्वेऽसिद्ध्य व्याप्त्याद्यसल्लक्षणापाताच्च। एतेन मिथ्यात्वाविशेषेऽपि स्वप्नवद्धेतुतदाभासव्यवस्थेति निरस्तम्। तदुक्तं वार्तिके बौद्धं प्रति–

साधकं चेदवश्यं च परमार्थास्तिता भवेत्।
सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते॥

उक्तं च बौद्धधिक्कारे-''लोकस्यापि व्यतिक्रमे विचारस्य यादृच्छिकवाङ्मात्रत्वापत्तेः'' इति। असतः साधकत्वे बाधकविवरणम्।

अद्वैतसिद्धिः

ननु सत्त्वसाधकानां मिथ्यात्वसाधकानुमानेभ्यः प्राबल्यम्। मिथ्यात्व साधकप्रतिज्ञाद्युपनीतपक्षादीनां मिथ्यात्वाबोधने सर्वमिथ्यात्वासिद्धिः, तद्बोधने परस्परव्याहतिराश्रयासिद्ध्यादिकं चेति चेन्न। मिथ्यात्वसाधकप्रतिज्ञाद्युपनीतपक्षादीनां मिथ्यात्वबोधनेऽपि व्याहत्यभावात्। प्रतिज्ञादिभिस्तेषां त्रिकालाबाध्यत्वरूपसत्त्वाप्रतिपादनात्। ननु साधकत्वान्यथानुपपत्त्या परमार्थसत्त्वमायाति। परमार्थसत एव साधकत्वात्। साधकतायाः प्राक्सत्त्वघटितत्वात्। न तु धीमात्रविषयत्वम्, अपरोक्षधीविषयत्वम्, सत्त्वेन तादृशधीविषयत्वं वा साधकताप्रयोजकम्। तुच्छे नित्यातीन्द्रिये चातिव्याप्त्यव्याप्तिभ्याम्। तत्त्वेन ज्ञानमपि न तत्र प्रयोजकम्। वह्नित्वेनाज्ञातेऽपि वह्नौ दाहकत्वदर्शनाद्। वह्नित्वेन ज्ञातेऽपि गुञ्जापुञ्जे तददर्शनाच्च। नापि त्रिचतुरकक्ष्यास्वबाधितासत्त्वप्रतीतिस्तन्त्रम्। आत्मनो गौरत्वेनानित्यत्वस्य नभसो नैल्येन स्पर्शवत्त्वस्य चापत्तेः। गौरोऽहं; 'नीलं नभः' इत्यादिप्रतीतावपि त्रिचतुरकक्ष्यास्वबाधाद्, यौक्तिकबाधस्य त्वन्मते प्रकृतेऽपि भावादिति चेन्न। यादृश्या बुद्ध्या तव नभोनैल्यादिधीव्यावृत्तया घटादौ सत्त्वसिद्धिः

सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः।
विरोधान्न हि सिंहत्वं सामान्यं वृक्षसिंहयोः॥

अपरमार्थसतः अबाध्यत्वरूपसद्विशेषत्वे च शाबलेयस्य गोविशेषत्ववत् प्रपञ्चस्यापि ब्रह्मवत् सद्विशेषत्वात् सद्वैलक्षण्यं न स्यात्। किं च यद्यारोपितानारोपितानुगतं सामान्यं स्यात्तर्हि ब्राह्मणो यजेतेत्यादिसामान्यविधिं प्रति ब्राह्मण्यामब्राह्मणाज्जात आरोपितब्राह्मण्यादिरपि नियोज्यः स्यात्। निषेधस्य तु आरोपितेनापि ब्राह्मण्येन हीनो विषयः स्यात्। अस्तु वा तदनुगतं सामान्यं तथापि तस्य तंत्रत्वे स्वाप्नेनाद्वैतसाक्षात्कारेणाश्वमेधादिना च तत्फलस्य द्वैतश्रुत्यादिना च द्वैतस्य धूमाभासेन च वह्नेर्व्यावहारिकेण च विरुद्धधर्मेण पारमार्थिकस्य जीवेश्वरभेदस्य सिद्धिः स्यात्। अत एव धर्मितुल्यसत्त्वं वा असद्विलक्षणत्वं वा न तंत्रम्। गौरवाच्च।

ननु धूमाभासस्यासाधकत्वं नासत्त्वात्, किं तु व्याप्त्यभावाद्। बहुलोर्ध्वतादिवदाभासविवेकस्यापि व्याप्त्यर्थत्वादिति चेन्न। अस्याः कल्पनाया असतः साधकत्वसिद्धिसापेक्षत्वेनान्योऽन्याश्रयात्। आभासेऽप्यारोपितव्याप्तेरारोपिता भासविवेकस्य च सत्त्वाच्च। प्रकृतेऽपि दृश्यत्वस्यारोपि तस्य ब्रह्मण्यपि सत्त्वेन व्याप्त्यर्थमेव हेत्वादिसत्त्वस्यापेक्षितत्वाच्च। हेत्वाद्यारोपस्य सर्वत्र सौलभ्येनासिद्ध्यादेरदोषतापाताच्च। आश्रयादेरसत्त्वनियमाभावेऽपि व्याप्त्या देस्तन्नियमाच्च। नाप्यप्रातिभासिकत्वं तंत्रम्। तुच्छेऽतिप्रसक्तेः। नाप्यप्रातिभासिकसत्त्वं तंत्रम्। गौरवात्। व्याहारिकतात्त्विकानुगतसत्त्वसामान्यस्याभावाच्च। नाप्यसद्विलक्षणत्वे सति प्रातिभासिकवैलक्षण्यं तंत्रम्। अतिगौरवात्। अन्यथा प्रवृत्तौ न संसर्गग्रहो हेतुः, किं तूपस्थितासंसर्गाग्रह इति भ्रांतिर्न सिद्धचेत्। किं चासतः साधकत्वं विप्रतिपन्नत्वात्साध्यम्। तत्साधकं च न तावत् त्वन्मते सद्, अपसिद्धांतात्। नाप्यसत्, प्रतिवादिनस्तत्साधकत्वे विप्रतिपत्त्याऽनवस्थानात्,। न च सतः साधकत्वेऽप्ययं दोषः। त्वन्मते सतः साक्षिणः साधकत्वाद्। उक्तं हि–

"साधकत्वं सतस्तेन साक्षिणा सिद्धिमिच्छता।
स्वीकृतं ह्यविशेषस्य साध्यासाधकता पुनः॥"

नापि व्यावहारिकसत्त्वं तन्त्रम्। प्रपंचमिथ्यात्वसिद्धेः प्राक् तदसिद्ध्याऽन्योन्याश्रयापातात्। प्रातिभासिकेन हेतुव्याप्त्यादिना व्यावहारिकसाध्यसिद्ध्यदर्शनेन हेतुव्याप्त्यादेरनुमितिविषयसमसत्ताकत्वनियमेन व्यावहारिकेण पारमार्थिकासिद्धेश्च। किं च व्यावहारिकसत्त्वस्याबाध्यत्वरूपसत्त्वविशेषत्वेऽस्मदिष्टसिद्धिः। सत्त्वेन व्यवहार मात्रत्वे चोक्तदोषाः। भ्रांतेर्बहुकालानुवृत्तिश्चाप्रयोजिका। तथा च–

व्यावहार्यं यदा सत्त्वमस्माकं तर्हि का क्षतिः।
न चेदसत्साधकत्वं नास्तीत्यत्र किमागतम्॥
तस्माद्यन्नास्ति नास्त्येव यच्चास्ति परमार्थतः।
तत्सत्यमन्यन्मिथ्यैव न सत्यद्वयकल्पना॥
तुल्यार्थत्वेऽपि तेनैव मिथ्यासंवृतिशब्दयोः।
वञ्चनार्थमुपन्यासो लालावक्त्रासवादिवत्॥ इति।

अज्ञानादेः सिद्धिपर्यन्तसाधके स्वरूपेण परमार्थसति साक्षिणि व्यावहारिकसत्त्वाभावाच्च। न च साक्ष्यप्यविद्यावृत्तिप्रतिबिंबित एवाज्ञानादिसाधकः। त्वयैव

"चैत्रागः स्वविषयानित्यज्ञानातिरेकिणा।
तदध्यक्षेण संवेद्यः प्रत्यक्षत्वाद् घटादिवद्॥"

इति सुखादेर्नित्यधीवेद्यत्वोक्तेः। अज्ञानसुखादेर्ज्ञातैकसत्त्वाभावापाताच्च। अविद्यावृत्तिं प्रति तदप्रतिबिंबितस्यैव साधकत्वाच्च। साक्षिगतसाधकताया अज्ञानधीनत्वेऽ पारमार्थिकतया प्रातीतिकस्याज्ञानसत्त्वस्य साक्षिणा सिद्धिं विनाऽयोगेनाऽ न्योऽन्याश्रयाच्च। एतेन तवासत इव मम सतोऽपि साधकत्वे विमतिरित्यानंदबोधाद्युक्तं निरस्तम्। नापि सत्तात्रयं द्वयं वा तंत्रम्। अननुगमात्। प्रयोज्यवैजात्याभावेन तृणारणिमणिन्यायासंभवाच्च। नापि सत्तयानुगतं सद्द्वयानुगतं वा सत्त्वसामान्यं तंत्रम्। अपरमार्थसतोऽसत्वेन तत्र सत्त्वस्य विरुद्धत्वात्। तदुक्तं वार्तिके बौद्धं प्रति–

३१. असतः साधकत्वे बाधकविवरणम्

किं चैतैरेव प्रयोगैः स्वप्रतिज्ञाहेतूदाहरणादिप्रापितानां साध्यसाधनव्याप्त्यादीनां मिथ्यात्वं न बोध्यते चेत्, सर्वमिथ्यात्वासिद्धिः, बोध्यते चेत् परस्परव्याहतिः, बाधस्वरूपासिद्धिव्याप्यत्वासिद्ध्यादिकं च स्यात्। परमार्थसत्त्वस्यैव साधकत्वे तंत्रत्वात्। तथा हि– न तावद्धीमात्रं तत्र तन्त्रम्। तुच्छस्यापि तत्प्रसंगात्। नाप्यपरोक्षधीः, अपरोक्षसत्त्वधीर्वा तन्त्रम्। नित्यातीन्द्रिये तदभावात्। ह्रदे प्रपंचे चापरोक्षभ्रांतिसिद्धेन धूमेनात्यंताबाधेन च वह्नेःपारमार्थिकसत्त्वस्य चासिद्धेश्च। वह्नित्वेनाज्ञातस्यापि वह्ने र्दाहकत्वाच्च। अमृतत्वेन ज्ञातस्यापि विषस्यासंजीवकत्वाच्च। अत एव न त्रिचतुरकक्ष्यास्वबाधिता सत्त्वधीस्तंत्रम्। गौरोऽहं, नीलं नभ इत्यादि भ्रांतिसिद्धेन गौरत्वनीलत्वादिना आत्माकाशादेरपि अनित्यत्व स्पर्शवत्त्वाद्यापाताच्च। गौरोऽहमित्यादावपि तत्कक्ष्यासु प्रत्यक्षाबाधात्। यौक्तिकादि बाधस्य च त्वन्मते प्रकृतेऽपि भावात्। एतेन लोकप्रसिद्धिस्तंत्रमितीष्टसिद्ध्युक्तं निरस्तम्। एतेनैव त्रिचतुरकक्ष्यास्वबाधिता वादिप्रतिवादिप्राश्निकानां सत्त्वधीस्तंत्रमिति निरस्तम्। निपुणेन बौद्धेनोक्तधीविषयव्याप्त्यादिमत्त्वेन व्युत्पादितैः शून्याद्वैतादिहेतु भिस्तत्सिद्ध्यापातात्। एतेनैव यादृश्या तव सत्त्वसिद्धिस्तादृशी धीर्मम तंत्रमिति खंडनोक्तं निरस्तम्। यादृश्या शब्दे क्लृप्तदोषहीनया तव ब्रह्मणि सत्त्वसिद्धिस्तादृश्या प्रत्यक्षे क्लृप्तदोषरहितया मम जगति सत्त्वसिद्धेः। अन्यथा शुक्तिरूप्यादिप्रत्यक्षदृष्टान्तेन जगत्प्रत्यक्ष इव पूर्वपक्षिप्रतिपन्नश्रुत्यर्थदृष्टान्तेन त्वत्प्रतिपन्नेऽपि श्रुत्यर्थे दोषान्तरशंका कालान्तरभाविबाधशंका च स्यात्। नापि परप्रसिद्धं सत्त्वं तन्त्रम्। तेन स्वार्थानुमानायोगात्। परार्थप्रयोगस्य च तत्पूर्वकत्वात्। परप्रसिद्धिमात्रेण हेतुना वास्तवसाध्यासिद्धेश्च। न च मिथ्यात्वमपि पररीत्यैव न तु वास्तवमिति वाच्यम्। बौद्धरीत्या मिथ्याभूतस्यात्मन इव जगतो वस्तुतस्सत्त्वापातात्। मिथ्यात्वस्य तत्त्वावेदकश्रुतिवेद्यत्वाच्च। तदुक्तं वार्तिके बौद्धं प्रति–

योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया॥ इति।

तन्मतनिरासकसूत्राणांत्वन्मतनिरासायोदाहरणे न दोष इत्यत आवयोर्मतवैलक्षण्यमस्तीत्याह॥ तन्मतइति॥ असद्विलक्षणत्वादिति॥ अर्थक्रियाद्यन्यथानुपपत्त्याऽसद्विलक्षणस्वरूपांगीकारादितिभावः। त्वदभिमतमसद्वैलक्षण्यं शून्यवादिमतेप्यस्तीत्याह॥ अर्थेति॥ शशशृंगादीति॥ शशशृंगादिरूपासदित्यर्थः। तन्मतेपि शून्यवादिमतेपि। ननु जगति प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मयांगीकृतमस्ति असति शशशृंगादौतु नास्ति तस्य प्रतिपन्नोपाधेरभावात् अतोऽर्थक्रियाकारित्वादिनाऽसद्वैलक्षण्यस्य तन्मतेसत्त्वेपि प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वेन धर्मेणासद्वैलक्षण्यं मयांगीक्रियत इति चेत् तत्राह॥ प्रतिपन्नोपाधाविति॥ त्वन्मतेपीति॥ प्रतिपन्नोपाधौ स्वरूपेण त्रैकालिकनिषेधप्रतियोगित्वांगीकारे शून्यवादिमतइव त्वन्मतेपि जगतोऽत्यंतासत्त्वमेव प्राप्तमिति शशशृंगवत्प्रतिपन्नोपाध्यभावएव प्राप्तोऽतःशून्यवादिनिरासकसूत्राणां त्वन्मतनिरासायोदाहरणंयुक्तमेवेतिभावः। किंच प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं जगत्यंगीकृत्यासद्वैलक्षण्यं यद्युच्यते तर्हि ''वैधर्म्याच्चनस्वप्नादिवदि''ति स्वप्नाद्वैधर्म्योक्तिरयुक्ता। स्वप्नस्य त्वन्मतेप्रातिभासिकत्वेन प्रतिपन्नोपाधौनिषेधप्रतियोगित्वसद्भावेनानेनरूपेणस्वप्नजगतोःसाम्यादित्याह॥ सूत्रइति॥ नन्वनेन रूपेण साम्येपि व्यावहारिकसत्त्वप्रातिभासिकसत्त्वाभ्यां जगत्स्वप्नयोर्मन्मते वैधर्म्यमस्तीत्यतआह॥ व्यावहारिकेति। तन्मतेपीति॥ शून्यवादिमतेपीत्यर्थः। तथाच पुनस्तव तत्सालक्षण्यमेवेतिभावः। व्यावहारिकसत्त्वं शून्यवादिनाप्यंगीकृतमिति कथं ज्ञायत इत्यतस्तद्वाक्यंपठति॥ द्वे सत्त्वेइति॥ देशना उपदेशः। संवृतिसत्यत्वं किंनामेत्यतःसत्त्वंविविच्य दर्शयति॥ सत्त्वंत्विति॥ निवृत्तौ संवृतिशब्दोक्ताविद्यानिवृत्तौ। श्रुत्यादिविरोधमुपसंहरति॥ तस्मादिति॥ तत्तत्प्रमाणेति॥ घटपटचक्षुर्मनोधर्मादिपदार्थप्रापकप्रत्यक्षानुमानागमेत्यर्थः। ननु तत्तत्प्रमाणैस्तत्तद्विषयस्य सत्त्वं सिद्ध्यतीत्ययुक्तं। तथाहि अग्निरासीदिति ज्ञानं भवति। तत्राग्निरासीदित्यस्याग्निरिदानीं नास्ति ध्वंसप्रतियोगीत्यर्थः। तथा वृष्टिर्भविष्यतीतिज्ञानं भवति। तत्र वृष्टिर्भविष्यतीत्यस्य वृष्टिरिदानीं नास्ति प्रागभावप्रतियोगिनीत्यर्थः। तथारूप्यं मिथ्येतिज्ञानं भवति। तत्ररूप्यं मिथ्येत्यस्य रूप्यं त्रैकालिकनिषेधप्रतियोगीत्यर्थः। तथाचाग्निरासीदित्यादिज्ञानेन विषयस्य सत्त्वं न सिद्ध्यति तत्र विषयभूतस्य ध्वंसप्रतियोगिनः प्रागभावप्रतियोगिनश्च ज्ञानकालेऽभावात् अत्यंताभावप्रतियोगिनश्चकदाप्यभावात् अतस्ते ते विषयभूतास्तत्तत्प्रमाणेन सत्त्वेनैव सिद्धाइत्येतदयुक्तमित्यतआह॥ अग्निरासीदित्यादिना। अयमर्थः नात्राग्निरासीदित्यादेरग्न्यादिषु ध्वंसादिप्रतियोगित्वमर्थः। येन प्रतियोगिप्राधान्येनार्थस्य विवक्षितत्वादग्न्यादेर्ध्वंसादिप्रतियोगिनस्तत्तज्ज्ञानविषयत्वमंगीकृत्य तस्य तदाऽसत्त्वं शंकनीयं स्यात्। नचैवं किंत्वभावप्राधान्येन। तथाचाग्निरासीदित्यस्याग्निप्रतियोगिको ध्वंसोऽस्तीत्यर्थः। एवंचात्र तथा वृष्टि र्भविष्यतीत्यस्यापि वृष्टिप्रतियोगिकप्रागभावोऽस्तीत्यर्थः। तथा रूप्यं मिथ्येत्यस्यापि रूप्यप्रतियोगिकोत्यन्ताभावोऽस्तीत्यर्थः। ध्वंसप्रागभावात्यंताभावानामेव विषयत्वात्तत्रतैस्तैर्ज्ञानैस्सत्त्वं विषयीक्रियत एवेति सत्त्वेनैव तत्तत्प्रमाणसिद्धान्प्रध्वंसादीन्पक्षीकृत्य मिथ्यात्वसाधने तत्तन्मानविरोधस्तदवस्थएवेति॥ अन्यथेति॥ ध्वंसादिरूपविषयसत्त्वं अग्निरासीदित्यादिज्ञानेन न गृह्यतेचेत्तर्हि तत्तज्ज्ञानानंतरं ध्वंसाद्युचितार्थक्रिया भवति सा नस्यादित्यर्थ इत्येवं अग्निरासीदित्यादिकं योज्यमिति संप्रदायः। अन्येतु न प्रमाणैर्विषयसत्त्वं सिद्ध्यति। अतीतादिग्राहकमाने विषयभूतार्थस्य सत्त्वाभावादित्यतआह॥ अग्निरासीदिति॥ नात्र | सत्त्वं विद्यमानत्वं किंत्वबाध्यत्वं तच्चातीतादिष्वप्यस्तीति तद्बोचरज्ञानस्यापि स्वार्थसत्त्वग्राहकत्वमक्षतमेव। रूप्यस्य सद्विलक्षणतया तद्भूतं मिथ्यात्वमसदेवेत्यर्थइत्याहुः॥ मिथ्यात्वस्यागमादिबाधविवरणं॥

प्रत्यक्षेति॥ प्रत्यक्षप्राप्तसत्त्वप्रतिपादकत्वेनापूर्वताया अभावात्तद्विरोधेन मिथ्यात्वश्रुतेरप्रामाण्यं नास्तीतिभावः॥ तद्विरुद्धेति॥ प्रत्यक्षविरुद्धमिथ्यात्वप्रतिपादकत्वादेव स्वार्थपरा नस्यादित्यर्थः। ननु मानांतरप्राप्तेरपूर्वताभंजकत्वेनातात्पर्यहेतुत्वं दृष्टं नतु मानांतरविरोधस्येत्यतआह॥ मानांतरेति॥ मानांतरप्राप्तार्थत्वेऽनधिगतार्थत्वहानिः। मानांतरविरुद्धार्थत्वेतु तथाभूतार्थत्वमेव नस्यादित्यर्थः॥ प्रत्यक्षेति॥ तथाच न मिथ्यात्वश्रुतेःप्रमाणांतरविरोधोस्त्यतोऽद्वैतवाक्यं प्रबलमितिभावः॥ तदगृहीतेति॥ त्रिकालाबाध्यत्वरूपसत्त्वस्य प्रत्यक्षेणागृहीतत्वादेव सत्त्वश्रुतेरनुवादकत्वाभावात् त्रिकालाबाध्यत्वरूप सत्त्वविधिपरैवास्त्वित्यर्थः॥ फलवदिति॥ प्रयाजज्योतिष्टोमादिवाक्यवदित्यर्थः। तथाच सुषुप्तौ निष्प्रपंचतायाः सुखत्वेन फलवत्त्वात्तद्बोधकास्थूलादिवाक्यस्य प्रधानार्थप्रतिपादकतुल्यत्वात्सप्रपंचसगुणवाक्यस्य निष्फलप्रपंच प्रतिपादकत्वेन प्रयाजाद्यंगवाक्यतुल्यतया प्रधानवाक्यानुसारेणांगवाक्यस्य नेतव्यत्वादस्थूलादिप्रपंचनिषेधक वाक्यनुसारेण सत्यत्वप्रतिपादकसप्रपंचवाक्यं स्तुत्यर्थकत्वेन नेयमित्यर्थः॥ तस्याइति॥ निष्प्रपंचतायाइत्यर्थः। दुःखमात्रप्रतिस्मृतेरितिवचनेन निष्प्रपंचताया दुःखहेतुत्वेन फलवत्त्वव्यभिचारान्न पुरुषार्थत्वमित्यर्थः। तथाच फलवत्सन्निधाविति न्यायानवकाश इतिभावः। प्रपंचस्य विद्यमानस्य। तथाच मूर्च्छायां निष्प्रपंचतैव नास्तीति तस्या अपुरुषार्थत्वमित्यर्थः॥ सममिति॥ तथाच तत्रापि विद्यमानप्रपंचाज्ञानमेव नत्वभावः अतो निष्प्रपंचतायाःसुषुप्तावपि न फलवत्त्वमित्यर्थः। ननु निष्प्रपंचतायाःप्रयोजनमुत्सर्गतःबाधकादपोद्यते मूर्च्छायामपि मन्मते निष्प्रपंचतैव तथाच मूर्च्छायां प्रसक्तं निष्प्रपंचतायाःपुरुषार्थत्वं दुःखयोगरूपाद्बाधकादपोद्यतइत्याशंक्याह॥ यदिचेति॥ मूर्च्छायां निष्प्रपंचता दुःखयोगेनापुरुषार्थभूतेतियावत्। तर्हिसुषुप्तौ निष्प्रपंचतायाः पुरुषार्थत्वदर्शनादित्युक्तमयुक्तमित्याह॥ तर्हीति॥ सुषुप्तेरपि न प्रपंचाभावरूपफलेन पुरुषार्थत्वं तस्य पुरुषेणानर्थ्यत्वात् किंतु सुखयोगेनैवेत्यपि प्राप्या निष्प्रपंचतायाःसुषुप्तौ पुरुषार्थप्रदत्वमेव नास्तीति न निष्प्रपंचताप्रधानतुल्येतिभावः। ननु ''द्वितीयाद्वैभयं भवती''ति श्रुतेर्द्वितीयाभावरूपनिष्प्रपंचताया दुःखराहित्यापादकत्वेन पुरुषार्थत्वमेवेतिचेत्। ''तस्मादेकाकी नरमत'' इति श्रुतेर्निष्प्रपंचताया अपि दुःखहेतुत्वादपुरुषार्थत्वं स्यादित्याह॥ अस्तिचेति॥ नन्वेकधैवानुद्रष्टव्यमित्यादिवाक्यस्वारस्या दभेदज्ञानस्यैव मोक्षहेतुत्वान्निष्प्रपंचतैव पुरुषार्थ इत्यतआह॥ संतिचेति॥ तेन भेदज्ञानेन। तेन परमात्मनावा तुष्टः अलंबुद्धियुतः। ततः परमात्मनःप्रसादात् तथाच सप्रपंचतैव पुरुषार्थइति तदेवप्रधानमिति तद्वाक्यानुसारेणैव निष्प्रपंचवाक्यं अस्वातंत्र्यादिनार्थांतरे योज्यमिति सिद्धमितिभावः। प्राबल्यं विधिरूपद्वैतवाक्यादितिशेषः।

निषेधकवाक्यस्यैव प्राबल्येऽतिप्रसंगमाह॥ तर्हीति॥ कितिचेति॥ ''कितिचे''ति कितिङितिच प्रत्यये परे तन्निमित्तकगुणवृद्धी नस्तइतिसुत्रिङ्कृत्तद्धितसाधारणे कितिपरे वृद्धिर्निषिद्धा। तदपवादकतया ''कितिचे''ति किति तद्धिते परे पूर्ववृद्धिःस्यादिति वृद्धिर्विहितास्ति सा न स्यादित्यर्थः। इत्यादीत्यादिपदेन ग्रहणाग्रहणवाक्ययोरुभयोरपि समत्वेन विकल्प एवाश्रितो मीमांसकैः सोपि न स्यादितिग्राह्यं। प्रत्युत द्वैतवाक्यस्यैव पूर्वं अद्वैतवाक्यात्प्राबल्यं प्रतिपादितमस्तीत्याह॥ प्रत्यक्षेति॥ अनुपसंजातेत्यादिन्यायः पूर्वमुक्तोऽनुसंधेयः। ननु मिथ्यात्वानुमानस्योक्तरीत्या विश्वंसत्यमित्याद्युदाहृतश्रुतिविरोधेपि ''असत्यमप्रतिष्ठं ते नाभाव'' इत्यादिस्मृतिसूत्रविरोधो नास्ति। सर्वजगदत्यंतासत्त्ववादिशून्यवादिनिंदार्थ त्वात्स्मृतेः। सूत्रस्यापि तदभिमतसर्वासत्त्वनिरासकत्वादित्याशंक्य निराकरोति॥ नचेति॥ ननु शून्यवादिनस्सकाशात्तववैलक्षण्याभावेन

वेदांतवाक्यबोध्यार्थस्य ब्रह्मणोऽखंडत्वांगीकारात् यदा ब्रह्मशब्दोल्लेखस्थले इत्थंगतिस्तदा सत्सुखस्फुरणं मय्यज्ञानमस्तीत्यत्रापि ब्रह्मशब्दोल्लेखाभावेपि सुखाज्ञानविशिष्टे सत्ताया बाधितत्वेन लक्षणयाऽखंडार्थनिष्ठवेदांतवाक्यबोध्यं यद्ब्रह्मचैतन्यं तत्सत्त्वमेव प्रतीयते। विशिष्टे विशेष्यांशसद्भावादित्येव वक्तव्यमितिभावः॥ प्रत्यक्षेति॥ सुखं सुप्तोस्मीति साक्षिप्रत्यक्षेत्यर्थः॥ किंचैवमिति॥ अबाध्यत्वरूपो यो बाधनिषेधस्तदर्थमित्यर्थः। विज्ञानवादिरीत्या प्राप्तं यत्प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वं तन्नेहनानेति वाक्येनाऽनूद्य विश्वं सत्यमिति वाक्येनाऽबाध्यत्वरूपबाधनिषेधे प्रतिपादिते बाध्यत्वं निषिध्यत इत्यपि स्यादित्याशयः॥ स्वर्गनरकादेरिति॥ स(त्य)त्वस्येतिशेषः। विश्वांतर्गतातींद्रियधर्मादिपदार्थसत्यत्वस्य प्रत्यक्षादिनाऽप्राप्तत्वेपि शब्दतएव प्राप्तिसंभवाच्छब्दप्राप्तधर्मादिसत्यत्वं नेहनानेति निषेधाय विश्वंसत्यमित्यनेनाऽनूद्यत इत्यतआह॥ शब्देति॥ अतिप्रसंगांतरमाह॥ सत्यमिति॥ अनुवादित्वनिराकरणमुपसंहरति॥ तस्मादिति॥ वैयर्थ्यमेवोपपादयति॥ नहीति॥ येन संप्रति ''विश्वंसत्य'' मितिवाक्येन व्यावहारिकसत्यत्वं बोधनीयं स्यात् बौद्धादिमतेपि जगति व्यावहारिकसत्त्वापर पर्यायसांवृतसत्त्वसद्भावादितिभावः। प्रपंचे सर्वांगीकृतमपि व्यावहारिकसत्यत्वं श्रुतिःप्रतिपादयत्वितिचेत्तत्राह॥ अप्राप्तेचेति॥ तथाचापूर्वताभंग इतिभावः॥ इष्टापत्तिरिति॥ श्रुतेरबाध्यसत्त्वप्रतिपादकत्वमस्माकमपि संमतमितिभावः॥ बाध्योक्ताविति॥ बाध्यसत्त्वप्रतिपादकत्व इत्यर्थः॥ श्रुतिरिति॥ श्रुतिप्रतिपादितसत्वस्य बाध्यत्वे भ्रांतिहेतुत्वेनातत्वावेदकतयाऽप्रामाण्यं प्राप्तं नेदं वाक्यांतराप्रामाण्यतुल्यं किंत्वित्यतउक्तं॥ चिरेति॥ अनादिकालानुवृत्तेत्यर्थः॥ दृढेति॥ ब्रह्मज्ञानात्प्राग्बाधाभावेनेत्यर्थः। अतएवात्यंताप्रामाण्यं रज्जुसर्पादिविज्ञाना दप्याधिक्येन स्वकार्यहेतुभ्रांत्यतिशयजनकत्वादिति द्रष्टव्यं। यथोक्तं

''दीर्घभ्रांतिकरीचेत्स्यादतत्वावेदकप्रमा।
रज्जुसर्पादिविज्ञानादाधिक्यादप्रमामते''ति॥

नचेति॥ मिथ्यात्वश्रुतेःप्रामाण्यांगीकारेण ब्रह्मेतरसर्वमिथ्यात्वप्रतिपादकश्रुतिविरोधात्तदप्रामाण्यमिष्टमेवेत्यर्थः॥ त्वत्पक्षइति॥ त्वन्मते जगन्मिथ्यात्वप्रतिपादकश्रुतिरेव नास्ति सर्वश्रुतेरपि लक्षणया चिन्मात्रपरत्वात् मिथ्यात्वस्यापि श्रुतिप्रतिपाद्यत्वांगीकारे ब्रह्मप्रतिपादनमात्रपरत्वादिरूपाखंडार्थत्वहानेरित्यर्थः। नच मिथ्यात्वेऽवांतरतात्पर्यमस्ति महातात्पर्यं चिन्मात्रएवेति वाच्यं। अवांतरतात्पर्यविषयस्यापि तात्विकत्वांगीकारात् धर्मादेरिवमिथ्यात्वस्यापि अतात्विकत्वापातेन श्रुतेरतत्वावेदकत्वं स्यादित्यादिवक्ष्याम इतिभावः।

नेहनानेतिश्रुतिविरोधाद्विश्वंसत्यमित्यादिश्रुतेर्व्यावहारिकसत्त्वपरत्वेऽतिप्रसंगमाह॥ असद्वा इत्यादिना॥ ब्रह्मादिसर्वासत्त्वप्रतिपादकश्रुतिविरोधात्तत्सत्यमितिश्रुतेःप्रातिभासिकसत्त्वपरत्वादित्यर्थः॥ सुवचत्वादिति॥ श्रुतित्वाविशेषादित्यर्थः॥ प्रबलमिति॥ तथाचाद्वैतस्य सत्यत्वेन तत् श्रुतेनाद्वैतसत्त्वश्रुतिविरोधेना प्रामाण्यमितिभावः। कुतःप्रबलं नचेत्यतआह॥ लिंगानिहीति॥ तथाच तात्पर्यलिंगैरद्वैतसत्त्वं न सिध्यति। उपक्रमादिलिंगैस्तात्पर्ये सिद्धे। तथात्वंतु प्रमाणाविरोधेनैव निश्चेयं प्रकृते प्रमाणविरोधइतिभावः। ''विश्वंसत्य'' मित्यादिवाक्येपि तात्पर्यलिंगमस्तीत्याह॥ अस्तिचेति॥ अस्मत्पक्षे षड्विधंतात्पर्यलिंगमस्ति भवत्पक्षेतूपपत्तिरूपमेकमेवेत्यतो वैषम्यमित्यतआह॥ लिंगेति॥ व्यर्थमिति॥ अनुवादकत्वादितिभावः॥

फलवाक्योक्तद्वित्वसंपादनेनानुवाद्यस्वार्थपरत्वाभावे ''स्वर्गकामो यजेते''ति वाक्ये यजेतेति पदप्रतिपाद्ययागरूपार्थप्राशस्त्यबोधकतया पदैकवाक्यतैवोच्येतेत्यर्थः। किंचायमनुवादःस्तुत्यर्थोवान्यविधानार्थोवा निषेधार्थोवा। नाद्यइत्याह॥ किंचायमिति॥ विश्वंसत्यमित्यनुवादइत्यर्थः। ''वायव्यं श्वेतमालभेतभूतिकामो वायुर्वैक्षेपिष्ठादेवते''त्यादौ इत्थं वायव्यश्वेतपश्वालंभःप्रशस्तः यतःशीघ्रगामिनी वायुदेवतेत्यादिवत् स्तुतेरत्राभावादित्यर्थः। नापि द्वितीयइत्याह॥ नापीति॥ ''दध्ना जुहोती''त्यत्र जुहोतीति यत्तद्वध्नेति दधिरूपगुणविधानाय जुहोत्यनुवादो यथा तथान्यविधानार्थो न भवतीत्यर्थः। कुतोनेत्यतआह॥ विधानायेति॥ कुतोयं नियम इत्यत आह॥ नहीति॥ व्रीहीनिति प्रमाणवाक्यं प्रत्यक्षप्राप्तव्रीह्यनुवादेन प्रोक्षणं विधत्ते। एवंच प्रमाणानूदितस्य व्रीह्यादेस्तात्विकत्वनियमान्नारोपितत्वमित्यर्थः। आद्यादिपदेन दध्ना जुहोतीत्यादेर्ग्रहणं। द्वितीयादिपदेन होमादेरितिज्ञेयं। अस्त्वारोपितव्रीह्यादेरेव धीरित्यत आह॥ अनुवाद्यस्येति॥ अनुवाद्यस्यासत्त्वेऽनुवाद्यविधेयसंसर्गरूपवाक्यार्थो बाधितःस्यादित्यन्वयः। तत्र दृष्टांत आश्रयासिद्धावित्यादि। नापि तृतीय इत्याह॥ नापीति॥ तत्रैवेति॥ नेहनानास्ति किंचनेति वाक्ये किंचनेत्यनेनैव सर्वानुवादोपपत्तेस्तदर्थंपृथक् विश्वं सत्यमिति वाक्यांतरमनपेक्षितमित्यर्थः। तदेव दृष्टांतेनोपपादयति॥ नहीति॥ वाक्यांतरं अनुवादकभूतं। तत्र सुरामित्यस्यैवानुवादकांशत्वादितिभावः। किंच नेहनानेति निषेधार्थोयमनुवादो न भवति किंनाम विधानार्थएव। विश्वंसत्यमितिवाक्ये एव वांव्रतं तत्सर्जनादिकं आपश्चन आपोपि सर्वदेवता अपि प्रमिनंतिजानंतीत्येवं पारमेश्वरसृष्टचादेस्सत्यत्वेन ज्ञानं सर्वदे वानामप्यस्तीति सर्वदेवसंबंधितादृश ज्ञानरूपस्यालौकिकप्रमाणस्योक्तेरित्याह॥ अत्रचेति॥ विश्वं सत्यमितिवाक्यइत्यर्थः॥ यत्तन्नेतीति॥ यतूतन्नेत्येवं निषेधार्थानुवादलिंगस्य एकस्याप्यभावादित्यर्थः। तदभावेपि तदनुवादलिंगाभावेपि। ननु तत्सत्यमित्यादिवाक्यं न ब्रह्मसत्तानुवादकं। तस्या मानांतराप्राप्तत्वादित्यतआह॥ तदभावेपि तदनुवादलिंगाभावेपि। ननु तत्सत्यमित्यादिवाक्यं न ब्रह्मसत्तानुवादकं। तस्या मानांतराप्राप्तत्वादित्यतआह॥ सर्वेति॥ व्यवस्थिते अनुस्यूते। तथाच ब्रह्मणः सर्वप्रत्ययवेद्यत्वेन सन्घट इत्यत्र ब्रह्मसत्त्वस्य प्रत्यक्षेण प्राप्तत्वात्तत्सत्यमित्यादेरनुवादकत्वं युक्तमित्यर्थः। विशिष्टस्यैव सर्वप्रत्ययवेद्यत्वं न शुद्धस्येति शंकामपाकर्तुमुत्तरार्धःप्रवृत्तः। प्रपंचविलयाधिष्ठानत्वेन सर्वप्रत्ययवेद्यस्य शुद्धत्वादितिभावः॥ परागर्थेति॥ घटज्ञानस्य ब्रह्मज्ञानत्वोपपादनायेदं वाक्यांतरं परागर्थाः प्रत्यगर्थाःतद्रूपाणि यानि प्रमेयानि तेषु फलभूता या संवित् घटादिभासकं चैतन्यं तदेव वेदांतवाक्यरूपप्रमाणस्य प्रमेयं। तथाच घटज्ञानस्य ब्रह्मज्ञानत्वात्सत्पटज्ञानमित्यत्र ब्रह्मसत्ताप्रतीयतइत्यर्थः। ननु घटावच्छिन्नचैतन्यरूपे ब्रह्मणि सत्त्वप्रतीतावपि न शुद्धे तत्प्रतीतिरित्यतस्तदंगीकृत्य दूषणांतरमाह॥ सदिति॥ तत्प्रतीतौ ब्रह्मसत्ताप्रतीतौ। कुत इत्यतआह॥ शुद्धेति॥ अज्ञोस्मीत्यत्र कथं ब्रह्मसत्ता प्रतीयत इत्यत आह॥ अज्ञानादीति॥ अज्ञोस्मीत्यस्याज्ञानं मय्यस्तीत्यर्थः। तथाचाऽज्ञानाधिष्ठानचैतन्ये अस्तीति सत्ता प्रतीयत इत्यर्थः। नन्वत्रापि विशिष्टेऽज्ञानविशिष्टेच सत्ताप्रतीयते न केवले इत्यतआह॥ अधिकेति॥ चिदस्फुरणाभावादिति॥ विशिष्टे विशेष्यांशसद्भावादितिभावः। ननु सत्सुखस्फुरणमित्यादौ ब्रह्मशब्दोल्लेखाभावेन ब्रह्मणि सत्त्वं न प्रतीयतइति चेत्तत्राह॥ ब्रह्मशब्देति॥ यत्र ब्रह्मशब्दोल्लेखोस्ति ''सत्यं ज्ञानमनंतं ब्रह्मे''ति तत्रापि ब्रह्मणि सत्त्वं न प्रतीयतएव। ''अथ कस्मादुच्यते ब्रह्मेति बृहंतोह्यस्मिन्गुणा'' इतिश्रुतेर्ब्रह्मशब्दस्य गुणविशिष्टवाचित्वात्तस्यच मिथ्यात्वेन तत्र सत्यत्वबोधनस्य बाधिततया लक्षणया ब्रह्मचैतन्यमात्रपरत्वमेवांगीकृतं। वेदांतानामखंडार्थनिष्ठत्वेन

अनुवादकत्वभिया श्रुतेरपूर्वार्थत्वं त्वयाप्यंगीकृतमित्याह॥ उक्ताचेति॥ एवमनुवादित्वमुक्त्वा ब्रह्मपरत्वमुक्तमित्याशयः।

किंच सत्त्वश्रुतेःसापेक्षानुवादित्वं वानिरपेक्षानुवादित्वं वा नाद्यइत्याह॥ किंचसत्त्वश्रुतेरिति॥ द्वितीयेत्वाह॥ निरपेक्षेति॥ धारावाहिकेति॥ उत्तरज्ञानेन स्वार्थे विषयीकरणीये न पूर्वज्ञानापेक्षा। पूर्वज्ञानगृहीतार्थविषयकत्वमात्रेणानुवादकत्वं त्वस्ति तन्नाप्रामाण्यकारणं तद्वदितिभावः। न प्रमितिःअप्रामाण्यं दैवादनुवादे निरपेक्षानुवादे धारावाहिकवत् प्रामाण्यमित्यर्थः। नच धारावाहिकस्थलेपि विशेषणज्ञानापेक्षेतिवाच्यं। आद्यविशेषणज्ञानस्यैकस्यैव उत्तरभाविसर्वविशिष्टज्ञानहेतुत्वोपपत्तेः। अतो निरपेक्षानुवादकत्वं धारावाहिकस्थल इति संप्रदायः। संवादः निरपेक्षानुवादकत्वं। अर्थवादात् अनुवादात् अनुवादवाक्यात् प्रसिध्यतीति। तथाच प्रामाण्यमेवेतिभावः। निरपेक्षानुवादित्वमेवोपपादयति॥ द्वयोरिति॥ संवादसंवादिप्रमाणयोः परस्परानपेक्षयोरैवैकत्रार्थेप्रवृत्तेः। तत्र दृष्टांतःप्रत्यक्षेति। प्रमात्रिति॥ प्रमाणयोःपरस्परनिरपेक्षतयैव स्वार्थप्रतिपादकत्वान्नानुवादकत्वेनाप्रामाण्यं प्रमात्रपेक्षया प्राप्तमनुवादकत्वंत्वस्त्वित्यर्थः। तदुपपादयति॥ प्रमाताहीति॥ व्युत्पत्त्यनंतरमर्थावगमे तं प्रति प्रत्यक्षादिसिद्धार्थबोधकतयानुवादकत्वं स्यादेवेत्यर्थः। तथाच निरपेक्षानुवादित्वं त्वप्रामाण्यसाधकं न भवतीति वाचस्पतेःसंमतमितिफलितोर्थः। किंचसत्त्वश्रुतेर्निष्प्रयोजनानु वादित्वं सप्रयोजनानुवादित्वंवा नाद्य इत्याह॥ वादीति॥ द्वितीयेत्वाह॥ सप्रयोजनेति॥

मीमांसकैरिति॥ द्वितीयाध्याये द्वितीयपादे चिंतितं। ''प्रकरणंतु पौर्णमास्यां रूपावचनादि''त्यत्र यदाग्नेयोऽष्टकपालोमावास्यां पौर्णमास्यां वाच्युतोभवति तावब्रूतामग्नीषोमावाज्यस्यैव नोपांशु पौर्णमास्यां यजेन्नैंद्रं दधिअमावास्याया''मिति तत्राग्नेयःऐंद्रंदधि ऐंद्रंपयःइत्यमावास्याकालसंबंधि यागत्रिकं आग्नेयःआज्यभागः उपांशुयागश्चेतिपौर्णमासीकालसंबंधि यागत्रिकं विहितं। एतत्सन्निधौ ''यएवंविद्वान्पौर्णमासीं यजते यएवंविद्वानमावास्यां यजत'' इतिवाक्यद्वयं श्रुतं। तथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति श्रुतम्। तत्र य एवं विद्वानिति विद्वद्वाक्ये सन्देहः। य एवं विद्वानिति वाक्याभ्यां पौर्णमास्यामावास्या संज्ञकौ यागान्तरौ विधीयेते उत पूर्वप्राप्तामावास्यात्रिकपौर्णमासत्रिकानुवाद एव क्रियते इति सन्देहेऽनुवादस्य व्यर्थत्वात् अपूर्वयागान्तरविधायकाविति पूर्वपक्षे पूर्वप्राप्त षड्यागानुवादित्वमेव। नचैवं प्रयोजनाभावादनुवादित्वमिति वाच्यं पूर्वप्राप्त ''दर्शपौर्णमासानुवादेन फलविधायके ''दर्शपौर्णमासाभ्या'' मितिवाक्ये द्विवचनप्रयोगोस्ति। सच पूर्वप्राप्तषडंगेष्वयुक्तःअतःफलवाक्ये द्विवचनेन सम्यग्व्यवहारोपपत्त्यर्थं षण्णां यागानां द्वित्वं संपाद्यतेऽनेन वाक्येन। अमावास्यापौर्णमास्यासंबंधिन आग्नयादिषडंगागान् त्रिकत्वेन त्रिकत्वेनैकीकृत्य ''यएवंविद्वान्पौर्णमासीं यजते अमावास्यां यजत'' इत्युक्तमितिसिद्धांतितं॥ समुदायेति॥ षडंगरूपसमुदायस्य द्वित्वापादनरूपप्रयोजनसद्भावादित्यर्थः। तदपि द्वित्वापादनं दर्शपौर्णमासाभ्यामिति फलवाक्ये द्वित्वोपपत्त्यर्थमिति ज्ञातव्यं। एवंच पौर्णमासामावास्यायागसमुदायस्य विद्वद्वाक्यनिष्पन्नार्थस्य दर्शाख्येन समुदायेन पौर्णमासाख्य समुदायेन फलकाम इष्टिंकुर्यादिति फलवाक्येनान्वयाद्विद्वद्वाक्यस्य फलवाक्येनैकवाक्यत्वमुक्तमित्यर्थः॥ स्वार्थेति॥ यथा ''वायुर्वैक्षेपिष्ठादेवते''त्यादीनां अवांतरप्राप्तमनुवदतां अनुवाद्यस्वार्थे तात्पर्याभावेनावांतरवाक्यार्थमनादृत्य पदप्रतिपाद्यालंभने प्राशस्त्यबोधकतया तदेकवाक्यतोच्यते। तथाविद्वद्वाक्येपि

मित्यपिपठंति। संगृह्णाति॥ तस्मादिति॥ प्रत्यक्षाविषये धर्मिणि सत्यत्वबोधनाय धर्मिभेदः विप्रतिपत्त्यादिना प्रत्यक्षेण येन सत्त्वं न गृहीतं तत्र तद्बोधनाय प्रमातृभेदः प्रत्यक्षगृहीतव्यावहारिकसत्त्व भिन्नाव्यावहारिकसत्त्वरूधर्मग्रहाय धर्मभेदः आदिपदेन दाढर्यार्थत्वप्रतिप्रसवयोर्ग्रहणं। न हिंस्यादित्यहिंसा वाग्वद्धर्मिभेदः भिन्नशाखावाग्वत् एकार्थकनानाशाखागतवाग्वत् प्रमातृभेदः द्विप्रणयनादिवत् धर्मभेद इति विवेकः। प्रमाणं अबाधितार्थग्राहकमित्यर्थः॥ तद्बाधइति॥ विरुद्धयोर्द्वयोरप्यबाधितार्थत्वानुपपत्तेरित्यर्थः॥ नचेदिति॥ प्रमितप्रमापकत्वाभावादित्यर्थः। अननुवादकत्वमेव दर्शयति॥ श्रुतेरिति॥ अननुवादकत्वोपपादनाय प्रत्यक्षाप्राप्तेत्युक्तं। सदर्थत्वोपपादनाय तात्विकसत्त्वेत्युक्तमिति यथायोग्यं संबंधो द्रष्टव्यः।

प्रमाणस्याप्यप्रमाणप्राप्तानुवादकत्वमस्त्वित्यतआह॥ नहीति॥ येन भ्रमप्राप्तानुवादकत्वं प्रमाणस्य स्यादितिभावः॥ यथेति॥ द्वैतग्राहिप्रत्यक्षं अद्वैतश्रुतिविषयापहारकं यथा न भवति दुर्बलत्वात् तथाद्वैतश्रुत्यर्थं भेदमपि नोपहरेत् न प्रापयेत्। कारिकार्थमेवाह॥ प्रत्यक्षमित्यादिना॥ पूर्वं प्रमाणत्वे दोष उक्तः इदानीं तन्निश्चये दोष उच्यतइतिभेदः। तदेव विशदयति॥ स्वप्रामाण्येति॥ नन्वेवं चेत्स्पार्शनप्रत्यक्षेण हिमभेषजत्वरूपो यस्तस्य गृहीतत्वात्तत्प्रतिपादकाग्निर्हिमस्य भेषजमिति श्रुतेरनुवादकत्वं सर्वसंमत न स्यात् तत्रापि प्रत्यक्षस्य दुर्बलत्वेनाग्निर्हिमस्य भेषजमितिश्रुतिविषयापहारकं न भवति स्वप्रामाण्यनिर्णयाय श्रुतिसंवादापेक्षं सत् न श्रुत्यनुवादकत्वापादकमिति वक्तुं सुशकत्वादित्यत आह॥ अग्र्यौष्ण्येति॥ प्रमाणाप्रमाणयोरेक विषयकत्वाभावेनापूर्वताप्राप्त्या विधायकमेव तन्नानुवादकमितिभावः॥ अन्यथेति॥ विश्वसत्यत्वश्रुतेः प्रत्यक्षप्राप्तसत्यत्वानुवादकत्वइत्यर्थः। ननु ब्रह्मसत्त्वस्याप्राप्तत्वात्कथमनुवादकत्वमित्यतआह॥ ब्रह्मसत्त्वस्येति॥ लोकतइति॥ सत् सुखस्फुरणमिति प्रत्यक्षेणेत्यर्थः। नच ब्रह्मत्वसामानाधिकरण्येन सत्त्वंन प्रत्यक्षसिद्धमितिवाच्यं। स्फुरणत्वस्यैव ब्रह्मत्वादितिभावः॥ भ्रमेति॥ यद्भ्रमाधिष्ठानं तत्सदिति दर्शनात् जगद्भ्रमाधिष्ठानं ब्रह्मसदिति त्वद्रीत्यानुमानेनेत्यर्थः। विश्वमिथ्यात्वप्रतिपादिकाया नेहनानेति श्रुतेरनुवादित्वमुपपादयति॥ विश्वेति॥ नन्वनादिश्रुतेःकथं वादिप्राप्तानुवादित्वमित्यतउक्तं॥ प्रवाहानादीति॥ यथोक्तं ''अनादिकालतोवृत्ता स्समयाहिप्रवाहत'' इति। तस्यवेदमूलकत्वेन वेदानुप्रवेशेन वेदस्यं न तत्प्राप्तानुवादकत्वमतउक्तं॥ अवेदमूलेति॥

नन्वनुवादप्राप्तानुवादकत्वं श्रुतेःकुत्रापि न दृष्टमितिचेत्तत्राह॥ उक्ताहीति॥ प्रमाणलक्षणे ''तदर्थशास्त्रादि''ति सूत्रइत्यर्थः॥ तदर्थेति॥ तदर्थं श्रुतिविनियोगार्थं यच्छास्त्रं तत् तदर्थशास्त्रं ब्राह्मणं तस्येत्यर्थः। ''उरुप्रथस्वउरु ते यज्ञपतिःप्रथतामिति पुरोडाशं प्रथयतीति'' श्रूयते तत्र उरुप्रथस्वेतिमंत्रविनियोजकं यत् ''इतिपुरोडाशं प्रथयती''ति ब्राह्मणवाक्यं तदनुवादकं नवेतिसंदेहे अननुवादकमेव अन्यथावैयर्थ्यापत्तेरिति प्राप्ते पुरोडाशप्रथनाभिधानरूपमंत्रगतलिंगेन पुरोडाशप्रथनरूपेऽर्थे उर्विति मंत्रविनियोगस्य सिद्धत्वात् ''इति पुरोडाशंप्रथयती''ति ब्राह्मणरूपतदर्थशास्त्रस्यानुवादकत्वं युक्तमित्यर्थः। तर्हि वैयर्थ्यमिति न वाच्यं। उच्चारणमात्रेणादृष्टार्थत्वादिति प्रथमाध्यायस्य द्वितीयचरणेऽभिहितं। उक्तं चशास्त्रदीपिकायां

''यदि दृष्टार्थतैवस्यान्मंत्राम्नानमनर्थकं।
प्रत्यायनाददृष्टंचेत्तदुच्चारणतोवर''मिति।

नन्वेवमपूर्वविषयांतरदानेन सर्वत्रानुवादकत्वमात्रोच्छेदःस्यादित्यतआह॥ अनुवादकत्वंत्विति॥ स्थलांतरेऽनुवादकत्वं सावकाशमित्यर्थः। दाढर्यहेतुत्वाच्चनानुवादकत्वं दोषायेत्याह॥ निगमनवदित्यादिना॥ पिपासितस्येतिहेतुगर्भं अत्यंतं तृषितत्वादेव एकप्रमाणोक्तौ विश्वासाभावादेकजलरूपार्थविषयकशब्दादि बहुप्रमाणापेक्षेत्यर्थः॥ प्रत्यक्षसिद्धइति॥ अहमज्ञ इति प्रत्यक्षसिद्धइत्यर्थः॥ त्वन्मतइति॥ त्वन्मते तमश्शब्दस्य भावरूपाज्ञानपरत्वादिति द्रष्टव्यं। ऐक्यतात्पर्ये ऐक्यविषयकतात्पर्ये। नन्वेवं चेत्सर्वत्राप्यनाश्वासनिरासार्थत्वेन दार्ढ्यार्थत्वस्य वक्तुं शक्यत्वादनुवादकत्वमात्रोच्छेद इत्यतआह॥ अनुवादकत्वंत्विति॥ प्रागेवेति॥ अनाश्वासपरिहारेणेत्यर्थः॥

यथाषड्विंशतिरस्य वंक्रयइति॥ नवमेध्याये चतुर्थपादे चिंतितं। अग्निष्टोमीयपशौ श्रूयते ''षड्विंशतिरस्यवंक्रयःता आनुष्टचोच्यावयतादि''ति। अस्यायमर्थः। अग्निष्टोमीयपशोर्वंक्रयःपार्श्वस्थीनि षड्विंशतिसंख्याकानि एकैकस्मिन्पार्श्वे त्रयोदशानामवस्थितत्वात् ताश्चवंक्रीःअनुष्ठयाऽनुक्रमेण गणयित्वेतियावत् उच्यावयतात् उद्धरतादिति। षड्विंशति वंक्रिकपशुयुताग्नीषोमीयप्रकृतिकेऽश्वमेधे श्रूयते। ''चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्ये''ति। तथा ''न चतुस्त्रिंशदितिब्रूयात्षड्विंशतिरित्येव ब्रूयादि''तिच। तत्रसंदेहः किंचोदकप्राप्तस्य षड्विंशतिरिति मंत्रस्य बाधोस्त्युतनेति। तत्राश्वमेधे ''प्रकृतिवद्विकृतिःकर्तव्ये''ति चोदकेन षड्विंशतिरिति मंत्रप्राप्तौ चतुस्त्रिंशदिति वैशेषिकमंत्रस्य प्रेषणपठितस्य बाधायोगाच्चोदकप्राप्तस्यैव बाध इति प्राप्ते ''षड्विंशतिरित्येव ब्रूयादि''ति प्रतिप्रसवसद्भावादपवादस्यापवादे पुनरुत्सर्गस्यैवावस्थितिरितिन्यायेन चोदकप्राप्तःषड्विंशतिरस्येति मंत्रएव प्रयोक्तव्यः। अतो न तस्य बाधः चतुस्त्रिंशदित्यस्यतु मंत्रस्यास्मात्प्रकरणात्स्थानांतरं प्रत्युत्कर्षःकार्य इतिसिद्धांतः।

ननु षड्विंशतिरित्येव ब्रूयादित्यत्र न तुचतुस्त्रिंशदितीतरनिषेधकैवकारश्रवणेन चोदकप्राप्तमंत्रापवादकवैशेषिकमंत्रप्रतीतस्य बाधकत्वमस्तु विश्वं सत्यमित्यादौ तु निषेधाश्रवणात्कथं प्रत्यक्षप्राप्तसत्यतापवादकनिषेधरहिताद्वैतश्रुतिबाधकत्वमित्यतआह॥ दृश्यंतेहीति॥ ''असंयोगाल्लिङ्किदि'' तिकित्वविधिसन्निधिपठितस्य निषेधरहितस्य ''मृडमृदगुधकुषक्लिशवदवसःक्त्वे''तिसूत्रस्य ''नक्त्वासेडि''ति कित्वापवादकं प्रति यथाबाधकत्वं तथा विश्वं सत्यमित्यादेर्निषेधविधुरस्यापि सत्त्वग्राहिप्रत्यक्षाप वादकाद्वैतकश्रुतिबाधकत्वं युक्तमित्यर्थः। यथोक्तं

''कित्वंहिक्त्वोनिजंयन्नक्त्वासेडितिनिराकृतं।
मृडेत्यादिविधानं तु पुनरुज्जीवयत्यद'' इति।

क्त्वः क्त्वाप्रत्ययस्य हि यस्मात्कित्वं निजं स्वाभाविकमेवास्ति ततो मृडेत्यादिना क्त्वाप्रत्ययस्य कित्वकथनमयुक्तं तथापि न क्त्वासेडिति यत्कित्वं निराकृतं तद्बाधकं मृडेत्यादिविधानं अदःकित्वं पुनरुज्जीवयतीत्यर्थः।

''स्वतएवकितःक्त्वायाः किद्वाचोऽनर्थकत्वतः।
सेटःक्त्वायाःकिन्निषेधनिषेधार्थत्वमास्थित''

इतोपि विश्वं सत्यमित्यादेर्नज्ञातज्ञापकत्वेन वैयर्थ्यमित्याह॥ एकशाखेति॥ ''प्रातस्संध्यामुपासीते'' तिऋग्वेदशाखागतं वाक्यं तत्समानार्थकमपि यजुश्शाखागतं ''प्रातस्संध्या'' मिति वाक्यं न व्यर्थं ऋक्शाखाध्यायिनं प्रति व्यर्थत्वेपि येन पुंसा ऋक्शाखाध्ययनं न कृतं तं प्रत्यर्थवत्त्वांगीकारात्। एवं प्रत्यक्षेण विश्वसत्यता येन न निर्णीता वादिविप्रतिपत्त्यादिना प्रत्यक्षेऽप्रामाण्यशंकनात् तं प्रतिविश्वं सत्यमिति वाक्यस्याऽर्थवत्त्वसंभवादित्यर्थः।

एकशाखेत्युक्त्या पूर्वमीमांसान्यायः सूचितः। तथाहि। द्वितीयाध्याये चतुर्थपादे चिंतितं। ''शाखांतरेषु कर्मभेदःस्या'' दित्यत्र नानाशाखाम्नातं अग्निहोत्रादिकं कर्म भिद्यते न वेतिसंशये अविशेषेण पुनः श्रुतिरूपाभ्यासस्य कर्मभेदाभावे वैयर्थ्यापत्तेः कर्मभिद्यत इति पूर्वपक्षः। सिद्धांतस्तु पुनः श्रुत्या शाखांतरोक्तमेव कर्म विधीयत इति सिद्धचति न तु कर्मभेदः तर्हि वैयर्थ्यमिति न शंकनीयं शाखाभेदानामध्येतृभेदनियतत्वेन विहितस्यापि विधानं पुरुषांतराधिकारेण संभवत्येवेति तस्यैव कर्मणो विधानेपि न वैयर्थ्यमिति न शंकनीयं शाखाभेदानामध्येतृभेदनियतत्वेन विहितस्यापि विधानं पुरुषांतराधिकारेण संभवत्येवेति तस्यैव कर्मणो विधानेपि न वैयर्थ्यमिति।

नन्वेवंरीत्या सर्वत्रानुवादमात्रोच्छेदप्रसंगः स्यादित्यथः ''सर्वाविवादस्थल एवकथं चिदनुवादकत्व'' मिति भगवत्पादवाक्यं हृदि निधायाह॥ अनुवादकत्वंत्विति॥ अतएवेति॥ सर्वाविवादस्थल एवानुवादकत्वस्य सावकाशत्वेन यत्र विवादस्तत्र तस्यादोषत्वादेवेत्यर्थः॥ देहेति॥ देहातिरिक्तात्मेत्यर्थः॥ अस्तीति॥ देहातिरिक्तोस्तीत्यर्थः॥ प्रत्यक्षप्राप्तेति॥ मम देह इति प्रत्यक्षेण देहात्मभेदस्य सिद्धत्वादित्यर्थः। इत्यादिना सिद्धांतभाष्येण। किंच विश्वं सत्यमिति श्रुतेर्नानुवादकत्वं। यथाहि तव मते सन्घटः सन्पटः सद्घटज्ञानं सत् सुखस्फुरणमित्यादिप्रत्यक्षेणात्मसत्यत्वस्य प्राप्तेरात्मसत्यत्वप्रतिपादिकायाः सत्य आत्मेत्यादि श्रुतेर्वैयर्थ्यं स्यात्तन्माभूदित्येवमर्थं प्रत्यक्षेण वर्तमानकाल एव सत्ताग्रहणात् वर्तमानकालमात्रे सत्ताग्राहिप्रत्यक्षाप्राप्तत्रिकाला बाध्यत्वरूपसत्यत्वप्रतिपादकत्वमंगीकृतं। एवं प्रकृते वयमपि सन्घटइत्यादिप्रत्यक्षेण विश्वसत्यत्वस्य प्राप्तत्वाद्विश्वं सत्यमित्यादिश्रुतेर्वैयर्थ्यं स्यात्तन्माभूदित्येवमर्थं वर्तमानकालमात्रे सत्ताग्राहिप्रत्यक्षाप्राप्तत्रिकालाबाध्यत्वरूप सत्यत्वप्रतिपादकत्वमंगीकुर्मोऽतो न दोषइत्याह॥ इहापि श्रुतेरिति॥ विश्वं सत्यमित्यादिकाया इत्यर्थः।

अत्र पूर्वतंत्रसिद्धो दृष्टांतउक्तः॥ द्वयोःप्रणयंतीत्यादिना॥ सप्तमाध्याये तृतीयपादे चिंतितं। ''सौकंतु प्रणयनमवाच्यंहीतरवदि''त्यत्र चातुर्मास्येषु यज्ञेषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरसंज्ञकपर्वचतुष्टयमस्ति। मासानामेव पर्वसज्ञा तत्र ''द्वयोःप्रणयंती''ति श्रूयते मध्यस्थयोर्द्वयोःपर्वणोःप्रणयंति गार्हपत्यादाहवनीयं प्रत्यग्निर्नेतव्यइत्यर्थः। चातुर्मास्यंच कर्म दर्शपौर्णमासाख्यकर्मप्रकृतिकं तत्र चातुर्मास्य पर्वणां मध्ये मध्यस्थयोर्द्वयोःपर्वणोरुच्यमानमग्निप्रणयनं किं दर्शपौर्णमासधर्मकं उतापूर्वं तद्विलक्षणमिति संशये चातुर्मास्यानां दर्शपौर्णमासप्रकृतिकतया चोदकप्राप्तत्वेन तदीयांगकलापयुक्ततया चोदकप्राप्तप्रणयनप्रापकत्वमेवेति पूर्वपक्षे द्वयोःपर्वणोरग्निप्रणयनस्य दर्शपौर्णमासप्रकृतिकतया सिद्धत्वेन पुनर्द्वयोःप्रणयंतीत्यस्य वैयर्थ्यापत्तेस्तदवैयर्थ्याय चोदकाप्राप्तांगकलापयुक्तापूर्वप्रणयनप्रतिपादकत्वमेवेति सिद्धांतितं तद्वदिहापीत्यर्थः॥ अन्यथेति॥ विश्वं सत्यमित्यादेरपूर्वसत्यत्वप्रतिपादकत्वाभावइत्यर्थः॥ स्यादिति॥ तथाच प्रत्यक्षाप्राप्तानंदत्वप्रतिपादकत्वं श्रुतेरंगीकार्यमितिभावः।

'बाधेन सोपाधिकतानुमाने उपोपभावेन सहोपलम्भः।
सारूप्यता बुद्धितदर्थभेदः स्थूलार्थभङ्गे भवतोऽपि तुल्यः॥'

सूत्रार्थस्तु नाभावः ज्ञानव्यतिरिक्तस्यार्थस्य नासत्वं, किन्तु व्यवहारदशाऽबाध्यार्थक्रियाकारित्वरूपं सत्त्वमेव। उपलब्धेः ज्ञानातिरेकेण प्रमाणैरुपलब्धेः। स्वप्नवैधर्म्योक्तिर्बाध्यत्वायुपाधिप्रदर्शनाय। तेन बाधात् सोपाधिकत्वाच्च पूर्वानुमानं दुष्टमित्यर्थ इति। तदप्यशोभनम्। न भावोऽनुपलब्धेरित्यनेनैव विज्ञानवादिमतनिराकरणेनास्य तथा व्याख्याने पुनरुक्तिप्रसङ्गात्। किंचैवं साधनं परं प्रति सिद्धसाधन ग्रस्तम्। न हि परो विज्ञानवादी ज्ञानाद् बहिः कल्पितोऽर्थो नास्तीत्यङ्गीकरोति। किन्तु तत्वतो नास्तीति। बाह्यार्थस्यापि बाह्यार्थ क्रियाकारित्वमपि स्वाप्नादिरूपार्थवदङ्गीकरोत्येव। तत्कालबाधाबाधरूपं वैषम्यमप्यङ्गीकरोतीति व्यर्थमिदं साधनम्। किंच हेतुरपि परं प्रत्यसिद्धः। परेण ज्ञानाद् भेदसाधकस्याप्रमाणत्वाङ्गीकारात्। अपि चानेनैव हेतुना तात्विकत्वस्यापि ब्रह्मवत् सुसाधत्वेन स्वव्याहतिः। स्वप्नवैधर्म्योक्तिश्च पूर्ववदयुक्तेत्यास्तां विस्तरः। तस्मात् जगतोऽसत्वनिरासार्थमेवैतत् सूत्रद्वयम्। धर्मिबाधस्तु पूर्वमेवोपपादित इति। – इत्यागमादिबाधवर्णनम्।

न्यायामृतप्रकाशः

विश्वमिथ्यात्वानुमानस्यागमबाधमप्याह॥ किंचेति॥ प्रत्यक्षप्राप्तेति॥ प्रत्यक्षप्राप्तसत्यत्वेत्यर्थः। व्यावृत्तं अननुवृत्तं यद्घटादितदन्यद्यदनुवृत्तं ब्रह्मतत्त्वेन तत्स्वरूपत्वेन परमते घटो नित्य इत्यादिष्विव सन्घट इत्यत्रघटे सत्त्वं न प्रतीयते किंत्वधिष्ठानभूतसद्ब्रह्मानुवेधमात्रमित्यंगीकारेण घटः सन्नित्यादि प्रत्यक्षेण घटादिषु सत्यत्वस्याप्राप्तेः श्रुतेरनुवादकत्वायोग इत्यर्थः॥

यच्चिकेतेत्यादीति॥ ''विश्वंसत्य'' मित्यत्र सत्यत्वमात्रस्य प्रत्यक्षप्राप्तत्वसंभावनया कथंचिदनुवादकत्वशंकायामपि ''यच्चिकेते'' त्यादिवाक्यद्वयेन तच्छंका। अत्रेश्वरस्य सत्यजगत्स्रष्टृत्वोक्तेः तस्य च प्रत्यक्षाद्यवेद्यतया प्राप्यभावात्तत्प्रतिपादकश्रुतिद्वयस्य नानुवादकत्वमिति भावः। ''विश्वं सत्य'' मित्यस्याः श्रुतेः कथंचिदनुवादकत्वेपि ''यच्चिकेते'' त्यादिश्रुतिद्वयस्य तावन्नानुवादकत्वमित्यंगीकृत्योक्तं। इदानीं ''विश्वंसत्य'' मित्यस्यअपि श्रुतेर्नानुवादकत्वमस्तीत्याह॥ पृथिवीति॥ यथा पृथिवीइतरभिन्नेत्यत्रैकदेशघटाद्यवच्छेदेनेतरभेदस्य प्रत्यक्षेण सिद्धावपि पृथिवीत्वावच्छेदेन सर्वत्रासिद्ध्यानुमानस्याननुवादकत्वं यथाच ''न हिंस्यात्सर्वाभूतानी''त्यत्र ''ब्राह्मणोनहंतव्य'' इत्यादिना ब्राह्मणादावेकदेशे हिंसाभावस्य सिद्धावपि भूतपदोक्तप्राणिमात्रे तदसिध्या न हिंस्यादिति वाक्यस्याननुवादकत्वं तथेहापि विश्वं सत्यमित्यत्र विश्वैकदेशघटाद्यवच्छेदेन प्रत्यक्षेण सत्त्वग्रहेपि विश्वत्वावच्छेदेन प्रत्यक्षेण तदग्रहात्तदयोग्येषु धर्मादिषु श्रुत्या सत्यत्वबोधनान्नविश्वं सत्यमित्यस्याः श्रुतेरनुवादकत्वमित्यर्थः। ज्ञातज्ञापकत्वमात्रमित्यत्र मात्रशब्दोऽयोगव्यवच्छेदार्थः॥ अतिप्रसंगादिति॥ सिद्धं धर्म्यंशमुद्दिश्यासिद्धविधायकस्य ''दध्ना जुहोती'' त्यस्याप्यनुवादकत्वमापद्येतेत्यर्थः॥ ज्ञातमात्रेति॥ तथाच धर्म्यंशस्य सिद्धत्वेपि अधिकस्याज्ञातस्य दधिरूपगुणस्यापि तत्र विधानान्न ज्ञातमात्रज्ञापकत्वमस्तीति नातिप्रसंगइत्यर्थः। एवंच प्रकृतेपि विश्वं सत्यमित्यादेर्नज्ञातमात्रज्ञापकत्वं ''अपश्चन प्रमिनंती'' तिवाक्यशेषेण विश्वसत्यत्वस्य समस्तदेवताप्रमितिविषयत्वस्यासिद्धस्यापि कथनादिति भाव इति संप्रदायः।

असद्विलक्षणत्वादित्यत्रासत्वं किं विवक्षितम्? अर्थक्रियानर्हत्वं वा, प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा, क्वचिदप्युपाधौ सत्वेनाप्रतीयमानत्वं वा? आद्यतृतीययोराह अर्थक्रियेति। द्वितीये आह प्रतिपन्नोपाधाविति। सूत्र इति। स्वप्नस्याप्यसद्वैलक्षण्यादिति भावः। ननु स्वप्नस्य प्रातिभासिकं सत्वं, प्रपंचस्य तु व्यावहारिकमिति स्वप्नवैलक्षण्योक्ति संभव इत्यत आह व्यावहारिकसत्वेनेति। अत्र बौद्धसम्मतिमाह द्वे सत्वे इति। धर्मदेशना धर्मचोदनेत्यर्थः। नन्वेतत् सूत्रार्थानवबोधविजृम्भितम्। तथाहि सद्रूपाद् ब्रह्मणो जगत्सर्गं वदतः समन्वयस्य सर्वमसदित्यनुमानविरोधसंदेहे

'न सन्नासन्नसदसन्न चानुभयतत्वकम्।
विमतं तर्क पीड्यत्वान्मरीचिषु यथोदकम्'

इति ब्रह्मसाधारण्यां निस्तत्वतायां प्राप्तायां सूत्रेण परिहारः सतो ब्रह्मणो नाभावो न शून्यत्वम् उपलब्धेः सत्वेन प्रमाणात् प्रतीतेः। तथाच किंचित् परमार्थमवश्यं शून्यवादिनापि स्वीकार्यम्। अन्यथा बाधस्य निरवधिकत्वप्रसंगादिति सूत्रार्थः। स च न प्रपञ्च मिथ्यात्वविरोधीति चेन्मैवं भविष्ठाः। एवं हि सूत्रार्थं वर्णयता ब्रह्मणः शून्यात् तत्त्वतो वैशेष्यं वक्तव्यम्। तदभावे शून्याद् वैलक्षण्यासिद्धेः। न च निर्विशेषे ब्रह्मणि तदङ्गीकर्तुं शक्यते। कल्पित विशेषवत्त्वस्य च वैलक्षण्यासाधकत्वात्। यच्चोक्तं सत्वेन प्रमाणात् प्रतीतेरिति तदपि स्वपरासिद्धम्। न हि पर आगमप्रामाण्यमङ्गीकरोति। न वा त्वमपि सत्वप्रकारकब्रह्मविषयकप्रतीतिं प्रमाणादङ्गीकरोषि। अखण्डार्थत्वहानेः। तस्मादसतः सदुत्पत्तिर्न दृष्टेत्युक्ते जगतोऽसत्वादसत उत्पत्तिरुपपद्यत इति चोदिते जगतोऽसत्वनिराकरणपरतयेदं सूत्रमुपतिष्ठत इति सद्विलक्षणत्वं वदता सत्वमेवाङ्गीकृतमिति त्वन्मत निरास एवानेन सूत्रद्वयेन युक्त इति। यदप्युक्तं स्वप्नवैधर्म्योक्तिर्मन्मते संभवति। तस्याः विमतं निस्तत्वं तर्कपीड्यत्वं तर्कपीड्यत्वान्मरीचिकजलवदित्यनुमाने बाध्यत्व प्रमाणागम्यत्व दोपजन्यत्वाद्युपाधिप्रदर्शनार्थत्वादिति तदपि तुच्छम्। एतेषां जगतो निस्तत्वसाधकानुमानेष्वपि संभवेन व्याहतत्वात्। परेण पक्षे तेपामङ्गीकृतत्वेन साधनव्यापकत्वाच्च। किंचासंभावितमपि स्वप्नवैधर्म्यवचनं परस्य। स्वप्नेपि अधिष्ठानस्य परेण परमार्थस्यैव वक्तव्यत्वात्। तत्राधिष्ठानस्य मिथ्यात्वे प्रपञ्चाधिष्ठानस्य तत्वप्रसंगात्। स्वाप्नप्रपञ्चस्य जाग्रत् प्रपञ्चस्य च बाध्यत्व प्रमाणागम्यत्व दोपजन्यत्वानि तुल्यानीति किमंशे स्वाप्नवैधर्म्यं प्रदर्शनीयमिति मूर्खव्यामोहनमात्रमेतत्। एतेन यदुक्तं परेण विज्ञानवादनिराकरणार्थमपीदं सूत्रम्। तथाहि रूपादिरहितब्रह्मजगदुपादानत्वप्रतिपादकसमन्वयस्य नीलाद्यकारं विज्ञानं साधयताऽनुमानेन विरोधसन्देहे

'स्वप्नधीसाम्यतो बुद्धे र्बुध्यार्थस्य सहेक्षणात्।
तद्भेदेनानिरूप्यत्वात् ज्ञानाकारोऽर्थ इष्यताम्।'

विमताधीर्नज्ञानव्यतिरिक्तालम्बना। धीत्वात् स्वाप्नधीवत्। विपक्षे ज्ञानाभावेनाप्यर्थभानप्रसङ्गो बाधकः। न हि भिन्नयोरश्वमहिषयोः सहोपलम्भनियमोऽस्ति। तस्मान्न ज्ञानातिरिक्तं सदिति प्राप्ते परिहारसूत्रं नाभाव उपलब्धेरित्यादि।

सत्वपरत्वं स्वसिद्धान्तविरुद्धं चेत्यपि द्रष्टव्यम्। अत्यन्ताप्रमाणं स्यादिति। एवं च जगतः प्रातिभासिकत्वं स्यादित्याशयः। न च ब्रह्मज्ञानेतराबाध्यत्वादप्रातिभासिकत्वमिति वाच्यम्। ब्रह्मज्ञानबाध्यानां ब्रह्मक्षणिकत्वादीनां प्रातिभासिकत्वदर्शनात्। श्रुतेश्च प्रातिभासिकत्वपरत्वे दृढतरमप्रामाण्यम्। न च तद्युक्तम्। अपौरुषेयत्वेन निर्दोषत्वात्। अखण्डचिन्मात्रपरत्वेनेति। नचाखण्डार्थ बोधेऽस्य द्वितीयाभावबुद्धिद्वारा जायमानत्वेन जगत्सत्यत्वस्य विरोधित्वमिति शङ्क्यम्। द्वितीयाभावे तात्पर्याभावेन तद्बुद्धेः प्रातिभासिकविषयतया जगत्सत्वाविरोधित्वात्। न चावान्तरतात्पर्यमस्तीति वाच्यम्। अवान्तरतात्पर्यविषयस्य तस्य धर्मादिवद् बाध्यत्वेन तद्बुद्धेरबाधकत्वात्। महातात्पर्ये चाखण्डार्थत्व हानेः। विस्तरिष्यते चैतत्। असद्वेत्यादि। न च ब्रह्मणः प्रातिभासिकत्वे शून्यवादापत्तिरिति वाच्यम्। निर्विशेषत्वेऽपि साम्यात्। न हि निर्विशेषं शून्यमिति शब्दयोरर्थतः कश्चित् विशेषः। अर्थतथात्वस्येति। न च वैदिकतात्पर्यविषयस्य तात्विकत्वनियमेन तात्पर्यज्ञापकानामपि लिङ्गानामर्थतथात्वे एव पर्यवसानमिति वाच्यम्। सत्वश्रुतावपि तात्पर्य ज्ञापकस्य सत्वात्। न च सत्ववाक्यस्थपदानामन्यपरत्वात् तत्रातात्पर्यमिति वाच्यम्। तर्हि मिथ्यात्वश्रुतिस्थपदानामपि अन्यपरत्वात् तत्र तात्पर्यं नेत्यपि सुवचत्वात्। अत एवाहास्ति चात्रापीति। तर्हि मिथ्यात्वश्रुतिरपीति। नच श्रुतेः प्रत्यक्षापेक्षया प्रबलत्वात् न तद्विरोधित्वं स्वार्थपरत्वं हन्तीति वाच्यम्। प्रत्यक्षापेक्षया श्रुतिप्राबल्यस्य प्रागेव निरासात्। श्रुतेः प्रबलत्वात् यथा न तद्बाधकं प्रत्यक्षं तथानुवादकत्वरूपदौर्बल्यापादकमपि नेत्यस्यापि पूर्वमेवोक्तत्वाच्च। न च प्राप्तार्थत्वेन भेदश्रुतेरन्यशेषतया दुर्बलत्वम्। मिथ्यात्वश्रुतेरपि तथाभावस्य पूर्वमेवोक्तत्वात्। सत्वश्रुतेरप्यप्राप्त विषयत्वस्य समर्थितत्वाच्च। तस्मात् सावकाशत्वात् मिथ्यात्वश्रुतिरेव विश्वसत्यत्वश्रुत्यनुसारेण योजनीयेति। तस्या इति। ननु 'तदात्मत्वं प्रसमीक्ष्य देही एकः कृतार्थो भवति वीतशोकः' इत्यभेदज्ञानस्य मोक्षहेतुत्वात् निष्प्रपञ्चतापुरुषार्थ इति चेन्न। एकः देही तदात्मत्वं तस्मिन् ब्रह्मणि आत्मत्वं जीवादानादिकर्तत्वं प्रसमीक्ष्येति भेदज्ञानस्यैव पुरुषार्थहेतुत्वोक्तेः। अत एव पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्तेनामृतत्वमेतीति स्पष्टं भेदज्ञानस्य मोक्षहेतुत्वश्रवणमुपपद्यते। न च सगुण ब्रह्मज्ञानवत् परम्परया मोक्षसाधनं प्रेरकत्वेन ब्रह्मज्ञानमिति वाच्यम्। साक्षात्साधनत्वे बाधकाभावात्। न चैकधैवानुद्रष्टव्य इति श्रुतिविरोध इति वाच्यम्। तस्या एकेन सर्वोत्तमत्वेन प्रकारेणैव द्रष्टव्यो न तु तद्विरुद्धनिर्गुणत्वादिनेत्येवं परत्वात्। अत एव धालूप्रत्ययः। त्वन्मते च ब्रह्मणि प्रकाराभावेन तद्वैयर्थ्यम्। न च भेदज्ञानस्य जोषहेतुत्वेन न मोक्षहेतुत्वमिति वाच्यम्। यस्य प्रसादादित्यादि श्रुत्यनुरोधेन जोषशब्दवाच्यप्रसादद्वारा तस्य तद्धेतुत्वाङ्गीकारादित्यास्तां विस्तरः। यदि चेति। ननु वैषम्यम्। तथाहि न हिंस्यादित्यादेः अग्नीषोमीयादि वाक्यादितः सावकाशत्वेन दुर्बलत्वात्। नहि निषेधवाक्यत्वमात्रेण प्राबल्यम् येनातिप्रसङ्गः। किन्तु निरवकाशत्वतात्पर्यादिकम्। तच्चाद्वैतश्रुतेरस्ति। तस्या निरवकाशत्वात् तात्पर्यवत्त्वाच्च। सत्वश्रुतिश्च व्यावहारिकसत्वविषया सावकाशेति कथमतिप्रसङ्ग इति चेन्मैवम्। सत्वश्रुतेर्व्यावहारिकविषयत्वस्य मूल एव दूषितत्वात्। आपश्चन प्रमिनन्ति व्रतं वामित्युपपत्त्याख्यतात्पर्यलिङ्ग सत्वाच्च सत्वश्रुतेरेव निरवकाशत्वम्। अद्वैतश्रुतेस्त्वद्वैतस्य चिन्मात्रत्वेन तस्यच नित्यसिद्धतया तत्र तात्पर्यस्यैवासंभवात्। समाधिकद्वितीयरहितपरत्वेन सावकाशत्वाच्च। एवं च सावकाशत्व निरवकाशत्वयोः वैपरीत्ये निषेधवाक्यत्वेनैव प्राबल्ये मूलोक्तातिप्रसङ्गः सुस्थ इति।

तथाचाधिकस्फुरणेऽपि सत्स्वरूपचिन्मात्रस्यापि स्फुरणेनानुवादकत्वं युक्तमिति भावः। ननु प्रत्यक्षे ब्रह्मशब्दानुल्लेखात् श्रुतौ तु तदुल्लेखात् कथमनुवादकत्वमित्यत आह ब्रह्मशब्दानुल्लेखेऽपीति। ब्रह्मशब्दार्थविषयस्य श्रौतप्रत्यक्षबोधविषयत्वेनैवानुवादकत्वादिति भावः। एवमिति। न च प्रत्यक्षं दुःख साहचर्येण वैषयिकमेव सुखं गृह्णातीति न ब्रह्मरूपसुखबोधकानन्दश्रुतेः अनुवादकत्वमिति वाच्यम्। त्वया वृत्त्येव विषयैरपि ब्रह्मसुखमेवाभिव्यज्यत इत्यङ्गीकारेण वैशेषिकसुखाभावात्। सुप्तौ च वैषयिक सुखाभावेन स्वरूपसुखानुभवस्यैवाङ्गीकृतत्वाच्च। किंचैवमिति। ननु भावाभावयोः परस्परविरुद्धत्वे समेऽपि भावग्रहो नाभावग्रमपेक्षते, निरपेक्षत्वात्। अभावग्रहस्तु भावग्रहमपेक्षते, सप्रतियोगिकत्वात्। एवं च सत्वस्य भावरूपत्वात् श्रुते र्न नेहनानेति श्रुत्यपेक्षा। नेह नानेति श्रुतेस्तु तदभाव श्रुतित्वात् श्रुत्यपेक्षा। अन्यथान्योन्याश्रयापत्तेरिति चेन्मैवम्। सत्वस्यासत्वाभावरूपत्वेन सत्वश्रुतेर्नेहनानेति श्रुति सापेक्षत्वात्। अत एवोक्तं प्राक् सार्वदेशिक त्रिकालनिषेधप्रतियोगित्वभाव एव सत्वमिति। न चैवमन्योन्याश्रयः। सार्वदेशिकनिषेधप्रतियोगित्वरूप त्वेनासत्वस्य भावरूपत्वात्। यथा चैतत् तथोपपादितमधस्तात्। अस्तु वा भावरूपं सत्वं, तथापि नेहनानेति श्रुत्यपेक्षास्त्येव। विशेषविधेः शेषनिषेधाभ्यनुज्ञापकत्वात्। एवं च पदार्थो भूतसत्वबोधार्थ नेहनानेति श्रुत्यपेक्षाभावेऽपि फलीभूतासत्वनिषेधबोधार्थं तदपेक्षेति नेह नानेति श्रुतेरनुवादकत्वोपपत्तेः। अतोऽपि नान्योन्याश्रयः। सत्वश्रुत्या स्वफलज्ञानार्थं तदपेक्षणेऽपि स्वार्थज्ञानार्थं तदनपेक्षणात्। किं च नेह नानेति श्रुत्या प्रत्यक्षप्राप्त घटादेरेव निषेधः क्रियते? ब्रह्मातिरिक्तस्य सर्वस्य वा? नाद्यः। सर्वमिथ्यात्वासिद्धेः। न द्वितीय इत्याह किं चेति। ननु शब्देनैव प्राप्तिर्भविष्यतीत्यत आह शब्द प्राप्तस्य चेति। तथाच यथा न हिंस्यादिति श्रुतिः सामान्यप्राप्तहिंसानिषेधेन चरितार्था अग्नीषोमीयादि वाक्यप्राप्तिं नापेक्षते। अन्यथाग्नीषोमीयादेर्निषिद्धत्वेनाधर्मसाधनत्वं स्यात्। तथा नेह नानेति वाक्यमपि सामान्यप्राप्तगुणगुण्यादिभेदं निषेधति नतु वाक्यान्तरप्राप्तविश्वसत्यत्वमपि। अन्यथा बाधितार्थकत्वे तस्याप्रामाण्यं स्यादिति भावः। ननु वैषम्यं दृष्टान्तदार्ष्टान्तिकयोः। तथाहि दृष्टान्ते ह्यग्नीषोमीयवाक्ये निषेधसमानविषयत्वाभावात् स्वार्थे तात्पर्यवत्त्वाच्च न निषेधवाक्यशेषता। विश्वसत्ववाक्यस्य निषेधसमानविषयत्वात् स्वार्थे तात्पर्यरहितत्वाच्च निषेध्यसमर्पणद्वारा निषेधवाक्यशेषतैवोचितेति चेन्न। प्रकृतेऽपि समानविषयत्वस्यासिद्धेः। नेह नानेति श्रुतेः प्रकृतेश्वररूपभेदनिषेध विषयत्वात्। सत्वश्रुतेश्च विश्वसत्वविषयत्वात्। तात्पर्याहित्यं चासिद्धम्। बाधकाभावात्। अन्यथाग्नीषोमीय वाक्यस्यापि तात्पर्यं न स्यात्। तत्रापि न हिंस्यादित्यस्य बाधकत्वात्। तत्र तस्याबाधकत्वे प्रकृते नेहनानेति वाक्यस्यापि बाधकत्वं न स्यात्। तस्माद् यथा न हिंस्यादिति विहितेतरपरं तथा नेहनानेत्यपि तथेति भावः। भेदश्रुतेरुपपादितमननुवादकत्वमुपसंहरति तस्मादिति।

ननु मास्त्वनुवादकत्वं सत्वश्रुतेः। व्यावहारिकपरत्वमेव किं न स्यादित्यत आह नापीति। वैयर्थ्यात् व्यावहारिकसत्वप्रतिपादनस्येति शेषः। विप्रतिपन्नं हि श्रुत्या प्रतिपादनीयम्। नहि व्यावहारिकसत्वे कोऽपि विप्रतिपद्यत इत्याह नहीति। न च देशविशेषे स्वर्गनरकादिसत्वप्रतिपादनेन तत्प्राप्तिपरिहारार्थ प्रवृत्तिनिवृत्त्योरेव तत्प्रयोजनत्वमिति वाच्यम्। एवमपि विशेषवाक्यानां सार्थक्येऽपि विश्वं सत्यमित्यादिवाक्यानां वैयर्थ्यापरिहारात्। इष्टापत्तिरिति। अस्माभिरप्यबाध्यत्वस्यैव सत्वस्याङ्गीकारादिति भावः। परस्य तादृश

प्रामाण्यमङ्गीकुर्वन्तं प्रत्याह अनुवाद्यस्येति। तथाच वाक्यप्रामाण्यं न स्यादिति भावः। न चेष्टापत्तिः। अपौरुषेयत्वात्। अन्यथा सत्यं ज्ञानमित्यादेरपि तथात्वं स्यादिति। तृतीयं निराकरोति नापि नेह नानेति। न च सामान्यतो निषेधस्य किंचनेत्यनेन निषेध्यसमर्पणेऽपि विशिष्य निषेधे विशिष्य निषेध्यसमर्पणस्योपयोगात् विशिष्य निषेध्यसमर्पणार्थमेतस्योपयोग इति वाच्यम्। विशेष निषेधकमिदमेव वा, अन्यद्वा? नाद्यः। अत्र सामान्यनिषेधस्यैव प्रतीतेः। 'किंचन' शब्दस्य सर्वनामत्वेन सर्वनाम्नां च प्रातिस्विकरूप पुरस्कारेणोपस्थापकतया अनेनैव विशिष्य निषेध्यसमर्पणाच्च। विश्वं सत्यमित्यादावपि सामान्याकारेणैव विश्वप्रतीतेश्च। न द्वितीयः तददर्शनात्। तत्सत्वे वा तत्रैव निषेध्यसमर्पकपदविशेषसंभवात्। किं च निषेधवाक्यस्य न निषेध्यसमर्पक वाक्यान्तरापेक्षा। न सुरां पिबेदित्यादौ सुरां पिबेदित्यादि निषेध्यसमर्पकवाक्यान्तरापेक्षाऽदर्शनादित्याह नहीति। न च सर्वत्र पदपेक्षाभावेपि सति संभवे प्रकृते त्यागायोग इति वाच्यम्। तदभावेऽपि निषेधोपपत्तौ तस्यार्थान्तरपरत्वस्यैव वक्तव्यत्वात्। अन्यथा वैयर्थ्यापत्तेः। न च वैदिकवाक्यस्य तद्युक्तम्। अदृष्टकल्पनापाताच्च। नन्वतिरात्रे षोडशिनं गृह्णातीति वाक्यान्तरप्राप्तस्य वाक्यान्तरेण नातिरात्रे षोडशिनं गृह्णातीत्यनेन निषेधो दृष्ट इति कथमदृष्टकल्पनेति चेन्न। तद्वदेव वस्तुविकल्पापत्तेः। न च सिद्धे वस्तुनि विकल्पायोग इति वाच्यम्। यथाकथंचिदसिद्धत्वस्य प्रकृतेपि भावात्। सर्वथाऽसिद्धत्वस्य तत्राप्यभावात्। न च ग्रहणाहणवाक्ययोरुभयोरप्राप्त विषयत्वेन तुल्यबलत्वात् तत्र विकल्पसंभवेऽपि इह सत्वश्रुतेर्मानान्तरप्राप्तविषयत्वेन निषेधश्रुतेश्चाप्राप्तविषयत्वेन तुल्यबलत्वाभावात् न विकल्प इति वाच्यम्। अत्राप्यप्राप्तविषयत्वस्य पूर्वमुक्तत्वात्। किं च भिन्नप्रकरणस्थस्यैतस्य वाक्यस्य भिन्नप्रकरणस्थनिषेधायानुवादकत्वं तदा कल्प्यं यदि स्ववाक्यास्थविधेयं न लभ्येत। सन्निधौ तल्लाभे दूरस्थकल्पनस्याप्रामाणिकत्वात् इत्याशयेनाह अत्रेति। तथा च देवप्रमितत्व विधानार्थमयमनुवादः। न तु निषेधार्थमिति भावः। एतेन नेत्यस्य भिन्नपदत्वं प्रकल्प्य आपश्च न प्रमिनन्ति न हिंसन्तीति व्याख्यानमसत्। 'चन' शब्दस्याप्यर्थताया निरुक्तकारादिभिर्व्याख्यातत्वेनैकपदत्वस्य चाध्यापक संप्रदाय सिद्धत्वेन तद्विरुद्धस्यास्यानादरणीयत्वात्। न चास्य वाक्यस्य स्तुतिपरत्वान्न विधिपरत्वमिति वाच्यम्। तथात्वे निषेधायानुवाद इति त्वदीयमतमपि न स्यात्। स्तुतिपरत्वाभावस्य प्रागेवोपपादितत्वात्। अन्यथा सत्यं ज्ञानमित्यादेरपि तदापत्तेरिति। यत्तन्नेत्यादीत्यत्रादिशब्देन निषेधवाक्यसमीपस्थत्वादिपरिग्रहः। तदभावेऽपीति। निषेधार्थानुवादलिङ्गाभावेऽपीत्यर्थः। ननु तत् सत्यमिति वाक्यं कथं ब्रह्मसत्वानुवादकम्? तस्य प्रमाणान्तराप्राप्तत्वादित्यत आह सर्वप्रत्ययवेद्येचेति। ननु तत्सत्यमित्यादौ ब्रह्मत्वसामानाधिकरण्येन सत्वं बोध्यते। न च तत् प्रत्यक्षप्राप्तम्। प्रत्यक्षं हि घटत्वज्ञानत्वस्फुरणत्व सामानाधिकरण्येन सत्वं गृह्णातीति चेन्न। तर्हि विश्वं सत्यमित्यपि श्रुतिः विश्वत्वसामानाधिकरण्येन सत्वं गृह्णातीत्यपि समम्। किंच प्रत्यक्षं स्फुरणत्वं ज्ञानत्व सामानाधिकरण्येन तद् गृह्णाति। स्फुरणत्वमेव च ब्रह्मत्वम्। ततोऽन्यस्य निर्वक्तुमशक्यत्वात्। अपरिच्छिन्नत्वादेरसत्यपि संभवात्। तस्मात् कथं न प्रत्यक्षप्राप्तानुवादित्वमिति। किं च ब्रह्मत्वसामानाधिकरण्येन सत्वबोधकत्वेऽखण्डार्थत्वभङ्गः। विशिष्टार्थस्यातत्वरूपत्वेनातत्वावेदकता च स्यात्। लक्षणया सत्स्वरूपमात्रपरत्वे च प्रत्यक्षेऽपि तस्य स्फुरणेनानुवादकत्वं दुष्परिहरमेव। ननु सत् सुखस्मरणम् अज्ञोऽस्मि इत्यादौ सन्मात्रस्फुरणं नास्तीति कथमनुवादकत्वमित्यत आह अधिकेति।

स्तुत्यर्थेन प्राशस्त्यलक्षणया स्तुतिरूपेण द्वारेण। क्रियाकरणभाव्येतिकर्तव्यतान्यराप्रतिपादकत्वात् कथं विधिनैकवाक्यत्वमिति शङ्कायां शाब्दभावनापेक्षितेतिकर्तव्यता प्रतिपादकत्वात् विधिनैकवाक्यता। अर्थवादं विनापि विध्युद्देशस्य स्वार्थप्रतिपादकत्वेन निराकांक्षत्वात् कथमर्थवादान्वय इत्याशङ्कायां यथा रक्तः पटो भवतीत्यत्र रक्तपददर्शनेन पटे उत्थापिताकांक्षा तथार्थवादपददर्शनेन विध्युद्देशस्योत्थापिताकांक्षया रक्तपदान्वयवत् प्राशस्त्यलक्षणयाऽर्थवादपदान्वय इति पदैकवाक्यतोक्ता। न च वाक्यार्थएवार्थवादानां लक्षणास्तु। तथा च स्वार्थपरत्वेन वाक्यैकवाक्यतैव स्यादिति वाच्यम्। शक्यसंबन्धरूपलक्षणाबीजस्य वाक्येऽसंभवात्। शक्तेः पदधर्मत्वात्। स्वार्थपरत्वाभावात्। विद्वद्वाक्यस्य स्वार्थपरत्वाभावे पदैकवाक्यतोच्येत। न प्रयाजाद्यङ्गवाक्यवत् वाक्यैकवाक्यतेति भावः। तथाच विद्वद्वाक्यं स्वार्थपरम्। तथा विश्वसत्यत्ववाक्यमपीति।

ननु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम्। विद्वद्वाक्ये सप्रयोजनानुवादित्वम्। प्रकृते च प्रयोजनं न संभवति। न च विप्रतिपत्तिनिरास एव प्रयोजनमिति वाच्यम्। अशेषविशेषग्राहिणि प्रत्यक्षे विप्रतिपत्त्ययोगादिति चेत् भ्रान्तोऽसि। यतो भवानेव प्रत्यक्षे विप्रतिपद्यते, विप्रतिपत्तिर्नास्तीति वदतीति कथं न स्वक्रियाविरोधः? प्रत्यक्षे दोषशङ्क्या विप्रतिपत्त्युपपत्तेः। अन्यथा क्षणिकत्ववादिनः प्रति आत्मस्थायित्वप्रत्यक्षे प्रामाण्यसमर्थनप्रयासानर्थक्यापत्तेः। तस्मात् प्रत्यक्ष गृहीतेऽपि दोषशङ्क्या विप्रतिपत्तिसंभवात् तन्निरासार्थं निर्दोषश्रुत्या प्रत्यक्षगृहीतार्थानुवादोपपत्तिरिति। नचैवमग्निर्हिमस्य भेषजमित्यपि नानुवादकम्। स्वार्थपरं च स्यात्। तत्रापि तादृश प्रयोजनस्य वक्तुं शक्यत्वादिति वाच्यम्। अग्न्यौष्ण्यप्रत्यक्षस्य प्रतिवाद्यसंमतावेवमेव। नह्यनुवादकत्वं सर्वान् प्रतीति पुरोक्तम्। किंचास्तु वाऽनुवादकता श्रुतेः। तथापि न साऽप्रामाण्यहेतुरित्याह किंचानुवादकत्वेऽपिति। नन्वनुवादकत्वे कथं प्रामाण्यम्? तात्पर्यविषये शब्दः प्रमाणम्। यत्परः शब्दः स शब्दार्थ इत्यभ्युपगमात्। अन्यथा स्वाध्यायविधिग्रहणानुपपत्तेरुक्तत्वात्। न ह्यन्यतः सिद्धेऽर्थे तात्पर्यम्। अतो न सिद्धेऽर्थे प्रामाण्याभावः? किं तात्पर्यविषयार्थप्रतिपादकत्वं प्रामाण्यम्? अबाधिगतार्थगन्तृत्वं वा? अबाधितार्थकत्वं वा? नाद्यः। बौद्धागमादेरपि तात्पर्यविषयार्थप्रतिपादकत्वात् प्रामाण्यापत्तेः। नापरः। बौद्धशास्त्रादेरप्यनधिगतासत्कारणत्वादि प्रतिपादकत्वात्। यथार्थत्वे सतीति विशेषणे च तावतैव प्रमाणत्वव्यवहारसंभवेऽनधिगतत्वस्य व्यर्थत्वात्। अत एव स्मृत्यादौ प्रामाणिकानां प्रमाणत्वव्यवहारः। नापि तृतीयः। तस्य सिद्धार्थप्रतिपादकत्वेऽप्यक्षतेः अनुवादकत्वाविरोधित्वात्। भट्टाचार्यवचनं तु सिद्धार्थप्रतिपादकत्वे निष्प्रयोजनत्वं स्यादित्येवं परम्। अत एवाहार्थवदिति। स्वाध्यायविधिग्रहणं च फलवदर्थप्रतिपादकत्वमात्रेणोपपन्नम्। तच्चान्येनार्थ प्रतिपादनेऽप्यक्षतम्। किञ्च त्वन्मते स्वाध्यायविधेरक्षरग्रहण मात्रपर्यवसिततयाऽदृष्टार्थत्वात् सिद्धार्थप्रतिपादकत्वेऽप्यदृष्टार्थत्वस्यानपायात् अध्ययनविधिग्रहणोपपत्तेः। अन्यथाग्निर्हिमस्य भेषजमित्यादेः स्वाध्यायविधिग्रहणं न स्यादिति दिक्। किं चायमनुवादः स्तुत्यर्थो वा, अन्यविधानार्थो वा, निषेधार्थो वेति विकल्प्य क्रमेण दूषयति किं चायमिति। तद्वदत्र विधायकवाक्यान्तराभावादिति भावः। द्वितीयं दूषयति नापीति। अत्र हेतुमाह विधानायेति। धर्मिसत्तासापेक्ष धर्मविधानायेत्यर्थः। तेन वन्ध्यासुतो न वक्तेत्यादौ न व्यभिचार इतिध्येयम्। अप्रमाणवाक्येन विधानायानूदितस्य तात्विकत्वाभावात् व्यभिचारवारणाय प्रमाणेति। नियममेवानुभवेन द्रढयति नहीति। अनुभव

जुहोतीत्यनेन गुणविधानवदिति चेन्न। दृष्टान्तदार्ष्टान्तिकयोः वैषम्यात्। तथाहि दृष्टान्ते हि एकेन वाक्येन एक एव गुणो विधीयते। प्रकृते तु अनेकगुणविधानम्। एवं चैकेन वाक्येन विहितकर्मानुवादेनानेकगुणविध्यसंभवात् प्रतिगुणं पृथग्विधौ वाक्यभेदः प्रसज्येत। आग्नेयादिवाक्यानां विशिष्टविधायकत्वे विशिष्टविधिरेवार्थात् विशेषणेषु संक्रान्तो भवतीति न विध्यावृत्तिदोषः। तथाहि भावनास्थोपि विधिस्तादर्थ्याभेदेन तत्र तत्र संक्रामति। यत्परश्च विधिः स एव विधेयो नान्यः। तद्देशोऽपि तद्यदापूर्वकर्मपरो विधिर्भवति तदा तस्यैकस्यानेकगुणविशिष्टस्य विधानात् विशेषणानां चार्थापत्त्या विधिसिद्धेर्नासकृच्छ्रवणदोषः प्रसज्यते। यदा त्वन्यतः प्राप्तं कर्म भवति तदा तस्याविधेयत्वात् विशेषणपरो भवति। तत्रानेकेषु विशेषणेष्वेकेन विहितेन इतरानाक्षेपात् तत्रापि श्रुत्यैव विधानं कर्तव्यमिति वाक्यभेदप्रसङ्गः। विशेषणान्यपि यानि प्रागेव क्रियान्वयात् मिथः संबन्धितया शब्देन प्रतिपादितानि तत्र विनैव विधिना प्रसिद्धसंबन्धानि भवन्ति। यथा पशुनेत्येकपदोपात्तानि जातिलिङ्गसंख्याकारकाणि। तत्र प्रत्ययाभिधेयमेकं प्रधानभूतं कारकम् उपसर्जनीभूतजात्यादि विशिष्टं पदेन प्रतिपादितम्। प्रसिद्धा च कारकशक्तिः। जात्यादीनां प्रमाणान्तरेण विनैव विधिर्नेति शक्यं प्राप्तकर्मानुवादेनापि तदेकं विधातुम्। अत्र तु आग्नेयोऽष्टादशकपालः पौर्णमास्यामिति यद्यपि तद्धितस्य सन्निहितद्रव्यवचनत्वात् सामानाधिकरण्यलक्षणशाब्दः संबन्धः प्रागेव पौर्णमासीसंबन्धादाग्नेयाष्टाकपालयोर्लभ्यते। तथाप्यसौ संबन्धः प्रमाणान्तरेणासिद्धत्वात् अत्रैव विधातव्यः। तं तु विधाय पुनः पौर्णमासीसंबन्धविधिरिति वाक्यभेदः। न त्वेवं संभवति य आग्नेयोऽष्टाकपालः स पौर्णमास्यामिति। अप्रसिद्धत्वादाग्नेयस्याष्टाकपालस्य। अत एवं वक्तव्यम् अष्टाकपाल आग्नेयः कर्तव्यः, स च पौर्णमास्यामिति। तथाच वाक्यभेद एव। तस्माद् गुणविध्यसंभवात् आग्नेयादिवाक्यैर्विशिष्टकर्मविधिरिति विद्वद्वाक्यमनुवादकमेवेति। किञ्च विद्वद्वाक्यस्यानुवादकत्वमनभ्युपगम्य कर्मान्तरविधित्वे फलवाक्येन प्रकरणपठितसर्वेषां फलसंबन्धात् राजसूये पशुसोमेष्टिवत् समप्रधानभावः स्यात्। तथाच प्रयाजादीनां प्रधानत्वात् आग्नेयादिवत् सौर्यादिविकृतिष्वतिदेशे न स्यात् इत्यनुष्ठानविरोधः स्यात्। तस्मादप्यनुवाद इति। तथाच यथा विद्वद्वाक्यस्य सप्रयोजनानुवादित्वेन स्वार्थपरत्वं तथा जगत्सत्त्वप्रत्यक्षस्यापि वादिविप्रतिपत्तिनिरासरूपप्रयोजनवत्त्वात् अनुवादित्वेपि स्वार्थपरत्वं युक्तमेवेति भावः। ननु विद्वद्वाक्यस्य स्वार्थपरत्वाभावात् दृष्टान्तएवासंमत इत्यत आह अतएवेति। यतो वार्थपरत्वमत एवेत्यर्थः। तत्रैव हि वाक्यैक वाक्यता भवति यत्र वाक्यद्वयं प्रात्यात्मिकस्वार्थाप्रतिपादनसमर्थं सत् प्रयोजनवशेन परस्परान्वितं भवति। यथाङ्गवाक्यप्रधानवाक्ये। ताभ्यां हि परस्परनिरपेक्षाभ्यामङ्गप्रधानयोर्विहितयोरनन्तरं प्रयोजनवशेन परस्परं प्रयोजनाङ्गाकाङ्क्षावशेनान्वयो भवति। सेयं वाक्यैकवाक्यता। तथाच विद्वद्वाक्यस्य प्रधान वाक्येनवाक्यैकवाक्यतोक्तन्यथानुपपत्त्या स्वार्थपरत्वं सिध्यतीति भावः।

अर्थवादवत् पदैकवाक्यतेति। यथार्थवादाधिकरणे वायुर्वै क्षेपिष्ठेत्यादिवाक्यं प्रमाणमप्रमाणं वेति संदिह्य, अप्रमाणम्, आम्नायस्य क्रियार्थत्वात् अर्थवादस्याक्रियार्थत्वात्, क्रियोपयुक्तभाव्यकरणेति कर्तव्यतान्यतराप्रतिपादकत्वाच्च अप्रामाण्यमिति पूर्वपक्षयित्वा विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरित्यनेन सूत्रेण अर्थवादाः विधीनां संबन्धिनः स्युः। कुतः? विधिनैकवाक्यत्वात्। केन द्वारेण?

वक्तव्यम्। एकाभिधानेन चैकावगतिः। नचाग्नेयादीनां त्रिकस्य त्रिकस्यैकमभिधानं प्राक् सिद्धम्। य एवं विद्वानित्यनेन वा उत्पत्तिवाक्यैर्वा एकाभिधानम्? नाद्यः। तस्यानुवादकत्वानङ्गीकारात्। न द्वितीयः। आग्नेयादि वाक्यस्यैकैक कर्मविधायकत्वेन समुदायाभावात्। तस्मादत्रैव समुदायः। एवं च यथा राजसूयेन यजेतेत्यत्र यजिपरतन्त्रेण राजसूयपदेन प्रकरणपठितानां सर्वेषां पशुसोमेष्ट्यादीनां ग्रहणं तथात्रापि फलवाक्ये यजिपरतन्त्रेण दर्शपौर्णमासपदेन सर्वग्रहणे सर्वेषां फलसंबन्धात् समप्रधानतेति द्विवचनानुपपत्तिः। न च दर्शपौर्णमासशब्दाभ्यां त्रिकत्रिकग्रहणमिति वाच्यम्। तयोर्यजिपरतन्त्रत्वात्। एवं च द्विवचनं बहुवचनार्थत्वेन नेयमिति।

सिद्धान्तस्तु भवेदनयोः कर्मान्तरविधायकत्वं यदि द्रव्यदेवतालक्षणं रूपं लभ्येत। न चैवम्। तत्र द्रव्यस्य ध्रौवाज्यस्य लाभेऽपि देवतायाः सर्वथा लाभाभावात्। न च देवतापि मन्त्रवर्णाल्लभ्यत इत्युक्तमितिवाच्यम्। मन्त्रवर्णयोराज्यभागदेवताप्रतिपादकत्वात्। तथाहि हौत्रकाण्डे सामिधेनीरावाहननिगदं प्रयाजमन्त्रांश्चाम्नाय प्रयाजनन्तरभाविनोराज्यभागयोः क्रमेण वार्त्रघ्नौ वृधन्वत्यौ चाम्नाते। लिङ्गं चाग्निविषयं सोमविषयं च तत्रोपलभ्यते। ततो लिङ्गक्रमाभ्यामाज्यभागविषयत्वं मन्त्राणाम्। न च तर्हि वार्त्रघ्नी पौर्णमास्यामित्यादि वाक्यमनर्थकमिति वाच्यम्। लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेनाव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्था मात्रविधायकत्वेन सार्थकत्वात्। व्यवस्थामात्रविधाने च लाघवात्। न तु विद्वद्वाक्यविहितकर्मान्तर संबन्धः। येन देवता मन्त्रवर्णिकी स्यात्। न च देवता कल्प्यत इति वाच्यम्। देवतात्वस्य विधिगम्यत्वात्। न चासत्यां देवतायां द्रव्यमात्रेण यागानुष्ठानमिति वाच्यम्। यागस्वरूपस्य देवता घटितत्वात्। देवतोद्देशेन द्रव्यत्यागस्य यागत्वात्। अतो रूपाभावान्न विद्वद्वाक्यं कर्मान्तरविधयकम्। किंतर्हि? पूर्वप्रकृताग्नेयादिषु षट्सु त्रिकरूपौ द्वौ समुदायावनुवदति। न च कालवाचिभ्यां पौर्णमास्यमावास्याशब्दाभ्यां यागानुवादानुपपत्तिरिति वाच्यम्। तत्कालविहितयोर्यागत्रिकयोरुपलक्षितत्वात्। न चानुवादो व्यर्थः। समुदायद्वित्वसिद्धेस्तत्प्रयोजनत्वात्। न च सापि व्यर्थेति वाच्यम्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यस्मिन् फलवाक्ये षड्यागविवक्षया द्विवचननिर्देशार्थत्वात्। तथाहि पौर्णमासीसंयुक्तेन वाक्येनोपपदवशात् पौर्णमासीसंयुक्तानां त्रयाणां तन्त्रोणानुवादः। तेनैकानुवादेन त्रयाणामपि तेषामेकसमुदायापत्तिः। तदेकत्वात् पौर्णमासीमित्येकवचनम्। एवममावास्यासंयुक्तेऽपि। ततश्च समुदाययसिद्धेः कालयोगाच्चाग्नेयादीनां प्रसिद्धं द्वित्वं दर्शपूर्णमासाभ्यामिति द्विवचनान्तं कालयोगि चोपपदं शक्नोत्याख्यातं विशेषे स्थापयितुमिति तेषामेव प्राधान्यमिति द्विवचनापेक्षित समुदायसिद्धिः समुदायानुवादप्रयोजनमिति नानर्थक्यम्। यदप्युक्तम् अनुवादपक्षे पौर्णमास्यामित्यादि वैयर्थ्यमिति तदपि मन्दम्। कालविधानासंभवेऽपि एकैकस्य त्रिकस्य सह्प्रयोगार्थत्वात्। कथम्? आग्न्येयोपांशुयाजाग्नीषोमीयाणां त्रयाणां पौर्णमासीकालविहितानां सह्प्रयोगः पौर्णमास्येत्यनेन तृतीयैकवचनान्तेन विधीयते। एवमितरत्रापि। न चोत्पत्तिवाक्येन तत्सिद्धिरिति वाच्यम्। उत्पत्तिवाक्येन हि प्रत्येककालयोगो ज्ञातो, न तु त्रयाणामेककालतेति कथमनयोर्वैयर्थ्यम्? एवं च रूपाभावान्न कर्मान्तरविधिरिति। ननु विद्वद्वाक्यस्य कर्मान्तरविधायकत्वाभावेऽपि नानुवादकत्वम्। तयोः कर्मविधायकत्वाभ्युपगमात्। न च रूपाभावः। आग्नेयादिवाक्यैरेव विद्वद्वाक्यविहित कर्मानुवादेन द्रव्यदेवतालक्षणगुणविधानसंभवात्। अग्निहोत्रं जुहोतीति विहिताग्निहोत्रानुवादेन दध्ना

विद्वद्वाक्य इवेति। द्वितीयाध्याये द्वितीयपादे तृतीयाधिकरणे चिन्तितम्। प्रकरणं तु पौर्णमास्यां रूपावचनादिति सूत्रम्। यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति। तावब्रूतामग्रीषोमावाज्य स्यैव तावुपांशु पौर्णमास्यां यजन्निति। ताभ्यामेतमग्रीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् ऐन्द्रं दध्यमावास्यायाम् ऐन्द्रं पयोऽमावास्यायामिति कालसंयुक्तानि वचनानि श्रूयन्ते। तथा समिधो यजति तनूनपातं यजति आज्य भागौ यजतीत्यकालसंयुक्तानि। तेषां सन्निधौ य एवंविद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इति वाक्यद्वयं श्रुतम्। अत्र सन्देहः। किमिदं वाक्यद्वयं प्रकृताग्नेयादि षड्यागानुवादकम् उतापूर्व कर्मद्वयविधायकम्? पूर्वपक्षस्तु इदं वाक्यद्वयं कर्मान्तरविधायकम्। कुतः? अविशेष पुनः श्रुतिरूपादभ्यासात्। तथाहि पूर्वाधिकरणे समिधो यजतीत्यादौ अभ्यासात् कर्मभेद उक्तः। तथात्रापि यजत इत्यभ्यासः श्रूयते। ततः कर्मभेदः स्यादेव। न च द्रव्यदेवतयोरभावात् कथमस्य कर्मान्तरविधायकत्वमिति वाच्यम्। ध्रौवादिसद्भावात्। तथोक्तम्–

ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी ।
रूपवन्तौ ततो यागौ विधीयेते पृथक् तथा ॥ इति ।

द्रव्यं तावच्चतुर्विधम्। ध्रुवायां गृह्णातीत्यसंयुक्तोत्पन्नं ध्रौवाज्यं प्रयोजनापेक्षं द्रव्यापेक्षिणां प्रकरणगतानां सर्वकर्मणामविशेषेणांगं भवत् प्रयाजादीनामिवानयोरपि कर्मणोर्लभ्यते। वचनाद्वा, सर्वस्मैवा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति। देवताया मान्त्रवर्णिकत्वमित्येवमुन्नेतव्यम्। 'तस्माद् वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यामि'ति वार्त्रघ्न्यौ वृधन्वत्यौ च क्रमेण कालद्वयोपेते कर्मणि विधीयेते। तत्र 'अग्निर्वृत्राणि जङ्घनद्' इत्येको वार्त्रघ्नो मन्त्रः। 'अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्यदन्यया। समिध वृत्रहा हुतः जुषाणो अग्निराज्यस्य वेतु। त्वं सोमासि सत्पतिस्त्वं राज्ञोत वृत्रहा। त्वं भद्रो असिक्रतुः जुषाणः सोम आज्यस्य हविषो वेत्तु' इत्यपरः। तयोरुक्तावग्नीषोमौ पौर्णमासी देवता। एवमन्तराम्नातयोः वृधिधातु युक्तयोर्मन्त्रयोरुक्तावग्नीषोमावमावास्यादेवता। तथाचाभ्यां वाक्याभ्यां पौर्णमास्यमावस्यासंज्ञकयोः कर्मणोरत्र विधानात् मान्त्रवर्णिकी देवतेति द्रव्य देवतारूपलाभात् यागान्तरमभिधीयते। न च प्रकृतषड्यागानुवाद एव किं न स्यादिति वाच्यम्। विधेयान्तरस्य कस्यचिददर्शनेन विद्वद्वाक्यस्यानर्थक्यापत्तेः। केवलमेतद्वाक्यस्यैवानर्थक्यमिति न। किन्तु पौर्णमास्यां पौर्णमास्या यजेत। अमावास्यायामावास्यया यजेतेत्येतदपि व्यर्थं स्यात्। न चैतत् कालविपयकम्। यदाग्नेय इत्याद्युत्पत्तिवाक्यैरेव तद्विधानात्। विद्वद्वाक्यविहितस्य कर्मान्तरत्वे कालविधायकमेतद् भविष्यति। तस्मात् कर्मान्तरविधिः। यदा च कर्मान्तरविधानं तदा तत्प्रकरणपठिताः सर्वे यागाः फलसंबन्धात् समप्रधानभूताः। न च फलवाक्यगतं दर्शपूर्णमासपदं यजेतेत्याख्यातावच्छेदकं भविष्यतीति वाच्यम्। अप्रसिद्धार्थत्वात्। कालनिमित्तं द्विवचनान्तं च। तथा च यत्र द्वित्वं कालसंबन्धश्च तत्र द्विवचनान्तपदप्रवृत्तिः। तदिहयत्राज्यभागयोर्द्वित्वं तत्र प्रातिपदिकमसमर्थम्। यत्र वा आग्नेयादौ कालसंयोगेन प्रातिपदिकं समर्थं तत्र द्विवचनमसमर्थम्। तेषां बहुत्वात्। न च समुदायापेक्षया द्वित्वसंभव इति वाच्यम्। समुदायः किं पूर्वसिद्धौ गृह्यते अथवा राजसूयवदत्रैव संपद्यते? न तावदाद्यः। पूर्वं समुदायसिद्धेरभावात्। समुदायद्वयं एकावगत्यनुप्रवेशेन

तद् भवतीति तदाम्नानमिति वाच्यम्। तथापि यदा प्रकारान्तरेण स्मरणं संभवि तदा मन्त्राणामनुपयोगात् नित्यवदाम्नानमनर्थकम्। न च मन्त्रैरर्थप्रत्ययादृष्टं कल्प्यत इति सार्थक्यं मन्त्राणामिति वाच्यम्। तर्हि कियद् दूरं गत्वा तत् कल्पनीयमेवेति उच्चारणादेव तत्कल्पनं युक्तियुक्तम्। तद्विपुरुषव्यापारगोचरः। प्रत्यायनं तु तस्मिन्ननुष्ठिते स्वयमेव भवतीति स्वव्यापारगोचरे पुरुषो नियुज्यते। तत्र फलाकांक्षा तेन चावश्यं भाविनी अदृष्टकल्पना। सा चात्रैव युक्ता। न तु तस्य प्रत्यायनार्थत्वं प्रत्यायनं चादृष्टार्थमिति युक्तम्। तस्मादृष्टार्था मन्त्राः। एवं सति तदर्थशास्त्रादिकमुपपद्यते। इतरथा परिसंख्याद्याश्रयणे क्लेशः स्यादिति।

सिद्धान्तस्तु – अविशिष्टस्तु वाक्यार्थ इति। लौकिकवाक्यैः सह वैदिको वाक्यार्थोऽविशिष्टः। यथा लौकिकवाक्यानां विवक्षितोऽर्थः, एवं वेदेऽपीत्यर्थः। अयमाशयः। मन्त्रोच्चारणं क्रियाङ्गत्वेन कथंभावाकांक्षापूरणसमर्थमपि दृष्टाक्षर ग्रहणार्थतया अक्षराणि च द्रव्यदेवताप्रकाशनयोग्यतया पदार्थज्ञानमपि वाक्यार्थज्ञानार्थतया समुल्लङ्घ्य प्रकरणादिना वाक्यार्थज्ञाने क्रियारूपे समवेतार्थावभासिनीतिकर्तव्यतात्वेन गृह्यमाणसमाम्नानार्थवत्त्वोपपत्तौ दृष्टद्वारेणैव सर्वार्थलाभे उच्चारणस्यादृष्टार्थत्वे किं मानम्? दृष्टद्वारालाभे ह्यदृष्टकल्पना। अत एवावघातादौ दृष्टमेव द्वारं कल्प्यते। यत्र हि सर्वथा दृष्टद्वारं न लभ्यते मन्त्रेणैव स्मरणमापाद्यमिति नियमः तत्रास्त्वदृष्टं, न नो हानिः। किंच कर्म प्रकरणेषु मन्त्राणामुच्चारणं न विधीयते, न वाक्षिप्यते मन्त्रविधिभिरनपेक्षितत्वेन तैरनाक्षेपात्। पुंव्यापारस्य मन्त्रगतत्वाभावेन मन्त्राङ्गत्वनिर्वाहकतया तेनाप्यनाक्षेपाच्च। मन्त्रोच्चारणकर्तव्यतायामेव प्रमाणं नेति न तस्य तद्वारत्वं, किन्तु अनुष्ठापककर्मविधिभिरपेक्षिततया मन्त्रगतत्वेन च मन्त्राङ्गत्वनिर्वाहकतया चाभिधान विध्याक्षेपसंभवाच्चाभिधानस्य द्वारत्वं युक्तम्। तादर्थ्येन तु पश्चादुच्चारणस्यापि कर्तव्यतासिद्धिः। तस्मादर्थाभिधानमेव द्वारम्। नियमस्य त्वदृष्टमिति। न च तदर्थशास्त्रानर्थक्यम्। तस्यार्थवादो वेत्यादिनार्थवादार्थत्वेन सार्थक्याभिधानादिति। एवं च मन्त्राधिकरणे लिङ्गप्राप्तार्थबोधकत्वेनानुवादकत्वस्य सिद्धत्वात् तन्न्यायेन सत्वश्रुतेरप्यनुवादकत्वं स्यादिति। किञ्चेति। न चाप्रामाण्येऽनुवादकत्वमेव प्रयोजकम् लाघवात् न निरपेक्षानुवादित्वमिति वाच्यम्। अनुवादकत्वमात्रस्यैवाप्रामाण्यप्रयोजकत्वे अद्वैतश्रुतेरप्यनुवादकत्वेनाऽप्रामाण्यं स्यात्। तस्या अपि पदार्थांशेऽनुवादेऽपि प्रामाण्यदर्शनादिति वाच्यम्। एवं तर्हि सापेक्षानुवादित्वमेवाप्रामाण्यप्रयोजकम्। निरपेक्षानुवादित्वस्य प्रमाणसंप्लवस्थल इवाप्रामाण्यानापादकत्वात्। अन्यथा त्वन्मते नवकृत्वोऽभ्यासस्याप्रामाण्यापत्तेः। न चानधिगतार्थगन्तृत्वस्य प्रमाणलक्षणत्वात् अधिगतार्थगन्तृत्वेऽप्रामाण्यम् इति शङ्क्यम्। ब्रह्मसत्त्वबोधकश्रुतेरप्यप्रामाण्यं स्यात्। तस्या अपि लिङ्गादिबोधित सत्वबोधकत्वात्। न च सत्त्वश्रुतिरपि सापेक्षानुवादिन्येव। न हि सत्त्वप्रत्यक्षं विना तन्मूलकशक्त्यादिग्रहमूलकशब्दप्रवृत्तिसंभव इति वाच्यम्। एवं ह्यद्वैतश्रुतेरप्यनुवादकत्वापरिहारात्। तत्रापि प्रत्यक्षं विना तन्मूलकशक्तिग्रहमूलशब्दप्रवृत्तेरभावात्। यदि च तत्राद्वैतमात्रसिद्धावपि ब्रह्माद्वैतमसिद्धं तर्हि प्रकृतेऽपि सत्त्वमात्रसिद्धावपि विश्वसत्वमसिद्धमेवेति समम्। तत्राद्वैतं न पदार्थोऽपितु वाक्यार्थ इति चेत् एकमेवाद्वितीयमित्यादौ पदार्थत्वात्। प्रकृतेऽपि सत्वस्य वाक्यार्थताया वक्तुमशक्यत्वात् इति। अत एव वाचस्पतिवचनमन्यथा न व्याख्येयमिति भावः।

प्रमाणत्वानिश्चयपक्ष एव परस्याभिप्रेत इति दर्शयितुं निश्चयपक्षमुपयैव दूषयति प्रत्यक्षमिति। न श्रुत्यनुवादकत्वापादकमिति। स्वस्याप्रमाण्य शङ्काकलङ्कितत्वेन स्वप्रतिपादितार्थस्यप्रतिपादितप्रायत्वेन संदिग्धत्वात् तन्निश्चयार्थं प्रवृत्तश्रुत्यनुवादकत्वापादकं न भवतीत्यर्थः। न च प्रत्यक्षं यदि स्वप्रामाण्यनिर्णायं श्रुतिसंवादमपेक्षते तर्हि श्रुतिसंवादविरहिणि कुत्रापि निःशङ्कप्रवृत्तिर्नस्यादिति वाच्यम्। न वयं सर्वत्र प्रत्यक्षे प्रामाण्यशङ्केति ब्रूमः। यत्र वादि विप्रतिपत्त्यादिनाऽप्रामाण्यशङ्का तत्र श्रुतिसंवादमपेक्षते। यत्र प्रमाणान्तरेण वा स्वत एव वा शङ्काविरहः तत्र श्रुतिसंवादापेक्षाविरहेण निःशङ्कप्रवृत्तिसंभवात्। न चैवमग्निर्हिमस्य भेषजमित्याद्यप्यनुवादकं न स्यादिति जगत्यनुवादकत्वकथोच्छेदः स्यादिति वाच्यम्। यत्र प्रत्यक्षे यस्याश्वासः तं प्रति तदर्थकवाक्यस्यानुवादकत्वोपपत्तेः। अग्र्यौष्ण्यप्रत्यक्षेऽनाश्वासे तु अग्निर्हिमस्य भेषजमित्याद्यप्यननु वादकमेव। अत एवाह – अग्र्यौष्ण्य प्रत्यक्षस्येति। अन्यथेति। यद्यप्रामाण्यशङ्का निरासकत्वेनाननुवादकत्वं नोच्येत तदेत्यर्थः। ननु ब्रह्मसत्वं केनापि न प्राप्तमिति कथमनुवादकतेत्यत आह ब्रह्मसत्वस्येति। ननु न सत्यं ज्ञानमित्यादेरनुवादकता। अत्र हि ब्रह्मत्व सामानाधिकरण्येन सत्त्वं बोध्यते। न च तत् प्रत्यक्षप्राप्तम्। ब्रह्मत्वस्य प्रत्यक्षावेद्यत्वात्। नाप्यनुमानगम्यम् तस्य मूर्खामूर्ख साधारणत्वाभावादित्यादिना परिहृतत्वात्। नापि प्रवाहानादिविज्ञानवादादिमतेन। तस्यापौरुषेयश्रुत्यवधिक पूर्वत्वाभावादिति चेन्न। सत्यमित्यादेः ब्रह्मत्व सामानाधिकरण्येन सत्वबोधकत्वे विशिष्टार्थत्वेनाखण्डार्थत्वहानेः श्रुतेरप्रामाण्यप्रसंगाच्च, लक्षणया सत्वस्वरूपमात्र परत्वे वक्तव्ये प्रत्यक्षेऽपि सत्वस्वरूप भावात् कथमननुवादकत्वम्? भ्रमाधिष्ठानत्वादिना लिङ्गेनापि सत्वसिद्धिः। व्यास्यविदुषोऽव्युत्पन्नस्य तदसिद्धावपि व्युत्पन्नं प्रति तस्यानुवादकत्वापरिहारात्। विज्ञानवादादिना वा सत्वसिद्धिः। न च तस्यापौरुषेय श्रुत्यवधिकपूर्वत्वमसंभवतीति वाच्यम्। श्रुत्यवधिकपूर्वत्वासंभवेऽपि तज्जन्यप्रतिपत्त्यवधिकपूर्वत्वसंभवात्। त्वन्मते श्रुत्यनादित्वस्य बद्धकालीनत्वमात्र एव पर्यवसानाच्च। अन्यथा प्रत्यक्षस्यापि श्रुत्यवधिकपूर्वत्वासंभवेन विश्वसत्त्वश्रुतेरप्यनुवादकत्वं न स्यात्। भवदुक्तसर्वप्रकारस्य विश्वसत्त्वश्रुतौ वक्तुं शक्यत्वात्। ननु लिङ्गस्मृत्यादि सिद्धत्वेन कथमनुवादकत्वम्? लिङ्गादीनां श्रुत्यादितो दुर्बलत्वात्। न हि दुर्बल सिद्धेन प्रबलस्यानुवादकतेत्यत आह – उक्ताहीति। यथा मन्त्राधिकरणे लिङ्गसिद्धार्थप्रतिपादकत्वेन तदर्थशास्त्रस्यानुवादकता तद्वदिहापि लिंगसिद्धार्थप्रतिपादकत्वेनानुवादकता स्यादेवेत्यर्थः।

प्रमाणलक्षणे द्वितीयपादे चतुर्थाधिकरणे चिन्तितम् – तदर्थशास्त्रात्। अत्र उरुप्रथस्वेत्यादयो मन्त्रा उदाहरणम्। अस्यायमर्थः। भो पुरोडाश त्वम् उरु विपुलता यथा भवति तथा प्रसरेति। एवमादीनां मन्त्राणामाद्याधिकरणे आनर्थक्यमाशङ्क्य स्वाध्यायविधिवशेनार्थवत्तया भवितव्यमित्येतदपर्यवसितं कथितम्। तत्पर्य वसानायेदानीमर्थविशेषश्चिन्त्यते। मन्त्रास्तावत् क्रमप्रकरणाभ्यां क्रत्वङ्गभावं भणन्त इत्यविवादम्। तत् क्रत्वङ्गत्वं किं दृष्टेनैवार्थप्रकाशनेनोपकारेण भवति किं वा उच्चारणमात्रेणादृष्टेनेति। पूर्वपक्षस्तु – मन्त्रा उच्चारणमात्रेणोपकुर्वन्ति। तत्र हेतुः तदर्थशास्त्रादिति। यदि मन्त्रा अर्थप्रकाशनेनोपकुर्युः तर्हि अर्थाभिधानसामर्थ्येन लिङ्गेनैव पुरोडाशप्रथनमन्त्रे प्राप्ते तदर्थाभिधायि उरुप्रथस्वेति पुरोडाशं प्रथयतीति शास्त्रमनर्थकं स्यात्। किंच मन्त्राणां दृष्टार्थत्वे वैयर्थ्यमेव स्यात्। न च प्रयोगवेलायामर्थस्मरणार्थं मन्त्राणामावश्यकत्वात् कथमानर्थक्यमिति वाच्यम्। उपायान्तरेणाप्यर्थस्मरण संभवात्। न च मन्त्रेणापि

समस्तायां ऋचः प्रतिषेधः। तथा सति षड्विंशतिरित्येव ब्रूयादिति चोदकप्राप्तत्वात् अनुवादः। न च पदमात्रग्रहणेन कथं समस्तनिषेध इति वाच्यम्। चतुस्त्रिंशत्पदस्याद्यत्वात् तद्ग्रहणेन ऋक्प्रतिषेधसंभवात्। गिरापदं चानाद्यत्वात् तद्ग्रहणमशक्यमिति वैषम्यम्। तथाचैवं वाक्यार्थः। न चतुस्त्रिंशदिति पठितं ब्रूयात्, किन्तु यथाप्राप्त मध्रिगुवचनमेवेति। तस्मात् समस्यवचनम्। पक्षे च वैशेषिकं ऋग्वचनम् एवं च यथा षड्विंशतिरित्येव ब्रूयादिति वचनमनुवादकमपि प्रतिप्रसवार्थं तथा जगत्सत्यत्ववचनस्यापि प्रतिप्रसवार्थत्वात् अनुवादकत्वेऽप्यक्षतिरिति भावः। न चैवं सति मिथ्यात्वश्रुतेः प्रत्यक्षबाधकत्वाभ्युपगमे तस्या बलवत्त्वात् तद्विरोधात् सत्यत्वश्रुतेरुतत्परत्वमेवेति प्रतिप्रसवार्थत्वं वक्तुमशक्यमेवेति वाच्यम्। मिथ्यात्वश्रुतेः प्रत्यक्षात् प्राबल्येऽपि सत्यत्वश्रुतेः प्राबल्याभावात्। न चोपक्रमादिना तन्निर्णयः। उपक्रमादेः अन्यथैवोपपत्तेः। ननु तथापि तुल्यबलत्वेन प्रतिरोधकत्वं न तु बाधकत्वमिति चेत् न। प्रत्यक्षप्राबल्य प्रस्तावोक्तन्यायैः सत्यत्वश्रुतेरपि प्राबल्यस्य समर्थयिष्यमाणत्वात्। ननु विधिरूपस्य कथं प्रतिप्रसवार्थत्वम्, अदृष्टत्वादित्यत आह – दृश्यत इति। क्त्वाप्रत्ययस्य लशकतद्धित इति प्राप्तस्य कित्त्वस्य न क्त्वा सेडित्यनेनापोदितस्य प्रतिप्रसवार्थो मृडमृदेत्यादिविधिर्दृश्यत इति निषेधरूपत्वं प्रतिप्रसवार्थत्वे न प्रयोजकमिति भावः। उक्तमर्थं संगृह्य दर्शयति – तस्मादिति। धर्मिभेदात् धर्मितावच्छेदकभेदात्। प्रत्यक्षे घटत्वादिकं सत्वधर्मितावच्छेदकम्। श्रुतौ तु विश्वत्वमिति। प्रमातृभेदात् अधिकारिभेदादिति यावत्। धर्मभेदात् त्रिकालाबाध्यत्व वर्तमानकालीनत्वरूपधर्मविषयत्वादिधर्मभेदादित्यर्थः। आदिशब्देन दार्ढ्यार्थत्वम्। द्विप्रणयनादीत्यत्रादिपदेन निगमनादिकं गृह्यते। यथाक्रमेणैव दृष्टान्ता योजनीयाः।

प्रकारान्तरेण भिन्नविषयत्वमुपपादयन् अनुवादकत्वं परिहरति किंचेति। प्रमाणं चेत् तात्विकं चेदिति शेषः। अन्यथा भिन्नविषयत्वेन बाध्यबाधकभावा संभवात्। तस्मादबाध्यत्वाय मिथ्यात्वानुमानादेर्नेतिपक्ष एव तव शरणम्। तदाश्रयणे च भिन्नविषयकत्वान्नानुवादकत्वं श्रुतेरित्यर्थः। तदेव दर्शयति श्रुतेरिति। एकविषयत्वमेव किं न स्यादित्यतो नहीति। ननु प्रत्यक्षाप्रामाण्येऽपि तत्सिद्धबोधकत्वेनानुवादकत्वम्। नहि प्रमितप्रमापकत्वमनुवादकत्वम्। किंतु पश्चाद्वादकत्वमात्रम्। पश्चात्त्वं च प्रमाणावधिकमप्रमाणावधिकमिति न कश्चिद्विशेष इति चेन्न। श्रुतेरपौरुषेयत्वेनाधुनिक प्रत्यक्षपश्चाद्वादकत्वानुपपत्तेः। श्रुतेरपौरुषेयत्वेन प्रमाणतया प्रत्यक्षस्य जन्यत्वेनाप्रमाणतया तयोरेकविषयत्वानुपपत्तेर्मूल एवोक्तत्वाच्च। नचाप्रमाणसिद्धमेव श्रुतिरनुवदति बौद्धमतप्राप्तासत्कारणत्ववदिति वाच्यम्। तत्र निषेधवदत्र प्रयोजनाभावात्। विधिरूपत्व प्रत्ययाच्च। अत एवाह श्रुतेरिति। नन्वनुवादकत्वपरिहारार्थं न तात्त्विक विषयता कल्प्या। सत्त्वांशस्य प्रत्यक्षसिद्धत्वेपि क्रियासमभिव्याहारादिसिद्धस्य वाक्यार्थस्यापूर्वत्वेन तद्विषयत यैवाननुवादकत्वोपपत्तेरिति चेत् न तात्विकविषयत्वेनाप्यननुवादकत्वसंभवात्। न च तात्विकविषयत्वेनाननुवादकत्वं वक्तुमशक्यम्, अद्वैत श्रुतिविरुद्धत्वादिति वाच्यम्। तस्या एवैतद्विरोधेनातात्विकविषयत्वसंभवात्। न च तस्याबलत्वम्। तस्याद्याप्यसिद्धेः। अपौरुषेयत्वेन प्रामाण्यार्थं तात्विकविषयताया आवश्यकत्वाच्च। न च व्यावहारिकत्वेन प्रामाण्यं निर्वहतीत्युक्तम्। न च तात्विकविषयत्वे ब्रह्मविषयत्वं तन्त्रमिति वाच्यम्। अबाधितत्वादेरेव तत्र प्रयोजकत्वात्। अन्यथाऽसद्विषयत्वादेरपि प्रयोजकत्वं वक्तुं शक्यं स्यात्। ननु प्रत्यक्षं प्रमाणमपि प्रमाणत्वेनानिश्चितत्वान्नाद्वैतश्रुतिबाधकं, प्रमाणत्वादेव श्रुतेरनुवादत्वापादकं चेत्यस्वरसादाह किंच यथेति।

भावरूपेति। ननु तम आसीदित्यस्य सृष्टिपूर्वकालसंबन्धबोधकत्वेन अज्ञानग्राहकप्रत्यक्षमनपेक्ष्य भिन्नविषयत्वेनैव प्रामाण्यसंभवादिति चेन्न। त्वन्मते कालस्य जन्यत्वेन सृष्टेः पूर्वं कालासंभवेन तत्संबन्धबोधकत्वासंभवात्। अज्ञानाद्यंशेऽनुवादकत्वापरिहाराच्च। प्रकृतेऽपि प्रत्यक्षश्रुत्योः वर्तमानकालावच्छिन्न तदनवच्छिन्नविषयत्वेनानन्दश्रुतेरिवोपहितानुपहितविषयत्वेन भिन्नविषयत्वान्नानुवादकता। तर्ह्यनुवादकत्वं कुत्रेत्यत आह – अनुवादकत्वं त्विति। उक्तार्थे आचार्यवचनं प्रमाणयति–तदुक्तमिति। प्रकारान्तरेणानुवादकत्वं परिहरति – किंचेति। नवमस्य चतुर्थपादे तृतीये चिन्तितम्। तत्प्रतिषिध्य प्रकृतिर्निर्युज्यते सा चतुस्त्रिंशद् वाच्यत्वात् इति सूत्रम्। अश्वमेधे त्रयः पशवः सवनीयाः श्रुताः। अश्वस्तुपरगोमृगस्ते प्राजापत्या इति। ते त्रयोऽप्यग्नीषोमीय पशोर्विकृतिभूताः। तत्राग्नीषोमीयपशौ अध्रिगुप्रैष एवमाम्नातं – षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्यावयतादिति। अस्यार्थः – वङ्क्रयो वक्राणि पार्श्वास्थीनि। तान्यस्य पशोः षड्विंशतिसंख्याकानि। कथम्? एकैकस्मिन् त्रयोदशानामवस्थितत्वात्। ता वङ्क्रीरनुष्ठ्यानुष्ठायानुक्रमेण गणयित्वेति यावत्, उच्यावयतात् उद्धरतादिति। सोऽयं मन्त्र आश्वमेधीयेषु त्रिषु पशुषु प्राप्तः। तत्राश्वस्य चतुस्त्रिंशद् वङ्क्रयः। तथाच वैशेषिको मन्त्रः – चतुस्त्रिंशद् वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेतीति। अस्याप्ययमर्थः। वाजिनो गन्धर्ववाहकस्य देवबन्धोर्देवानां प्रियस्य अश्वस्य वङ्क्रीः स्वधितिच्छेदन हेतुः शस्त्रं समेतीति। एवं चाश्वमेधे चोदकप्राप्तस्य वैशेषिकेणापवादेन नित्यनिवृत्तौ प्राप्तायामिदमाम्नायते 'न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादि'ति। तत्र संशयः किमश्वस्य पठितमेव वैशेषिकं चतुस्त्रिंशदिति वचनं कर्तव्यमिति प्राकृतस्य सर्वथा निवृत्तिः, उत तदपि कर्तव्यमित्यनिवृत्तिरिति। अनिवृत्तिपक्षेऽपि किं तुपरगोमृगयोरश्वस्य च समस्य वचनं षड्विंशतिरेषां वङ्क्रय इति उत तूपरगोमृगयोः सामासिकं वचनं कृत्वा अश्वस्य षड्विंशतिरस्य वङ्क्रय इत्येवमयथाप्राप्तमध्रिगुवचनं कर्तव्यमिति। पूर्वपक्षस्तु – न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादित्यनेन वाक्येन पठितायामेवर्चिचतुस्त्रिंशदिति पदं निषिध्य षड्विंशति पदं विधीयते। यथा यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षस इत्यत्र न गिरागिरेति प्रब्रूयाद्, ऐरं कृत्वोद्वेयमित्यनेन गिरापदनिषेधेन इरापदं विधीयते। एवं च सैव षड्विंशतिपदयुक्ता पठितव्येति प्राकृतस्य सर्वथैव निवृत्तिरिति। सिद्धान्तस्तु – न चतुस्त्रिंशदिति ब्रूयात्, षड्विंशतिरित्येव ब्रूयादित्येकं वाक्यम्। अत्रोभयं विधातुमशक्यम्। वाक्यभेदापत्तेः। तस्मादेकोऽत्र विधिः इतरोऽनुवाद इति। तत्र यदि गिरापदवत् षड्विंशतिर्विधीयते ततश्चतुस्त्रिंशत्प्रतिषेधो गिरापदप्रतिषेधवदनूद्येत। न चात्र षड्विंशतिपदं विधातुं शक्यम्। एवकारेण विधिप्रत्ययबाधात्। तथाहि– षड्विंशति मन्त्रस्तावत् चोदकप्राप्तत्वान्न विधेयः। तस्य चतुस्त्रिंशन्मन्त्रेणापवादप्रसक्तौ न चतुस्त्रिंशदित्यपवादकं मन्त्रं प्रतिषिध्य चोदकप्राप्तस्यानयोदितत्वेन यथापूर्वमवस्थानमनूद्यत इत्येवमर्थं सूचयितुमेवकारः प्रयुक्तः। गिरापददृष्टान्तस्तु विषमः। अप्राप्तत्वाद् गिरापदं तत्र विधीयते। तेन च विहितेन पाठप्राप्ते गिरापदे बाधिते स बाधो न गिरागिरेति पदेनानूद्यत इति महद् वैषम्यम्। तेन चतुस्त्रिंशत् प्रतिषेधोऽत्र विधीयते। न च पदमात्रस्य प्रतिषेधात् सैव षड्विंशतिपदयुक्ता पठनीयेति वाच्यम्। यदि पदमात्रं प्रतिषिध्येत, न षड्विंशतिपदमनुवदितुं शक्यते। प्राप्यभावात्। न हि पठितायां ऋचि चतुस्त्रिंशत्पदे प्रतिषिद्धे षड्विंशतिपदस्य प्राप्तौ प्रमाणमस्ति। न चानेन षड्विंशतिपदविधानं संभवतीत्युक्तम्। तस्मात्

प्रयोजनवत्त्वं चेति। त्रिविधं तु शब्दनिष्ठमतिप्रसंगनिरासकम् – उपक्रमोपसंहारयोरैकरूप्यमभ्यासोऽर्थवादश्चेति। तत्र शब्दनिष्ठलिङ्गत्रये न विवादः। सर्वासामुपनिषदामेवं प्रवृत्तत्वात्। मानान्तरासिद्धतया मोक्षहेतुज्ञानविषयतया वाऽज्ञातत्वं सप्रयोजनवत्त्वं च निर्विवादमेव। अबाधितत्वमात्रं सन्दिग्धम्। तदप्यनुपपत्तिगतिसामानाभ्यां निर्णीयते। न चाद्वैतं व्यावहारिकमिति वाच्यम्। सर्वप्रपञ्चनिषेधरूपत्वात्। तथा च श्रुतेर्व्यावहारिकप्रामाण्यासंभवात् तत्र तात्विकमेव तदिति चेन्मैवं वोचः। अद्वैतश्रुतेः षड्विधतात्पर्याभावात्। यच्च प्रामाण्यशरीरघटकमर्थनिष्ठं त्रयमुक्तं तत्र न तावदबाधितत्वम्। परीक्षितप्रत्यक्षापूर्वार्थकभेदश्रुत्योरेव बाधकत्वात्। न चानुपपत्तिगतिसामान्याभ्यां तन्निश्चयः। अद्वैते तात्पर्यस्यैवा भावात्। एकविधब्रह्मप्रतिपादकत्वेन गतिसामान्यसंभवाच्च। ऐक्यज्ञानस्य च मोक्षसाधनज्ञानविषयत्वमसिद्धम्। प्रत्युतैकात्म्यं नाम यदिदं केचिद् ब्रुयुरनैपुणा इति प्रमाणेनानर्थसाधनमेव। तस्मादबाधितत्वं प्रयोजनवत्त्वं च नास्त्येव। अज्ञातत्वमात्रमवशिष्टम्। तावन्मात्रेण प्रामाण्ये बौद्धोक्तानां क्षणिकत्वशून्यकारणत्वप्रतिपादकानामपि प्रामाण्यं स्यात्। शब्दनिष्ठमपि त्रयमसिद्धम्। अद्वैते उपक्रमाद्यभावात्। यथा चैतत् तथा तत्त्वमसीति श्रुतिव्याख्यानावसरे वक्ष्यते। भेदश्रुतावेव षड्विधतात्पर्यस्य वक्ष्यमाणत्वाच्च। किंचाद्वैतश्रुतिर्यदि मिथ्यात्वविशिष्टपरा तदाऽखण्डार्थत्वभङ्गः। यदि च लक्षणया स्वरूपमात्रपरा तदा न भेदबाधिकेत्यास्तां विस्तरः। तस्मादपूर्वत्रिकालाबाध्यसत्त्वप्रापकता सत्त्वश्रुतेर्युक्तेति।

ननु विश्वसत्यत्वश्रुतिरन्यथा व्याख्यातुं शक्यते। चतुर्धा हि सामानाधिकरण्यं संभवति। अध्यासे – इदं रजतमित्यादौ। बाधायां – स्थाणुः पुमानित्यादौ। विशेषणविशेष्यभावेन – नीलमुत्पलमित्यादौ। अभेदेन – तत्त्वमसीत्यादौ। एवं चाध्यासे बाधायां वा विश्वं सत्यमिति सामानाधिकरण्योपपत्तेः नानेन विश्वसत्यत्वसिद्धिरिति चेन्मैवम्। तर्हि तत्त्वमसीत्यत्रापि तथा वक्तुं शक्यत्वात् जीवात्मैक्यासिद्धिः स्यात्। तत्र बाधकाभावान्मैवमिति यदि तर्हि प्रकृतेऽपि तथाऽस्तु। तत्रैक्यवाक्यमेव बाधकमिति यदि तर्हि ऐक्यवाक्येऽपि भेदवाक्यं बाधकमिति तुल्यम्। अन्यत् साम्यं पुरैवोपपादितमित्यलम्। अन्यथेति। प्रत्यक्षश्रुत्योर्भिन्नविषयत्वानङ्गीकारे इत्यर्थः। ननु च साक्षिण उपहितानन्दविषयत्वेन श्रुतेश्च निरुपाधिकानन्दविषयत्वेन भिन्नविषयत्वात् कथमनुवादकत्वमिति चेन्न। प्रकृतेऽपि भिन्नविषयत्वस्योक्तत्वात्। साक्षिण उपहितविषयत्वे उपहितस्य मिथ्यात्वे तद्विषयकस्य साक्षिणोऽप्रमात्वे दोषजन्यत्वेन साक्षिणोऽनित्यत्वापातात्। तथाच तेनाज्ञानादिसिद्धिर्न स्यात् इत्युक्तत्वात्। श्रुताविव प्रत्यक्षेऽप्युपाध्यनुल्लेखाच्च। न ह्युपहितं सुखीत्यनुभवः। तर्ह्यनुवादकत्वं कुत्रेत्यत आह – अनुवादकत्वं त्विति। समानविषयत्वमङ्गीकृत्याप्यनुवादकत्वं परिहरति – निगमनवदिति। पिपासितस्यैवेति। ननु पिपासितस्य शब्दलिङ्गानन्तरं जलप्रत्यक्षमपेक्षितम्। न तु प्रत्यक्षानन्तरं शब्दलिङ्गे। अशेषविशेषग्राहिप्रत्यक्षप्राप्ते दार्ढ्यार्थमन्यानपेक्षणादिति चेन्न। प्रकृतेऽपि श्रुत्यनन्तरं प्रत्यक्षसंभवात्। न ह्ययं नियमः प्रत्यक्षानन्तरमेव श्रुतिप्रवृत्तिरिति। भेदप्रत्यक्षस्य भेदश्रुत्युपजीव्यत्वाभावात्। भावे वा अनाश्वासनिरासकत्वेन श्रुत्यादेर्दार्ढ्य हेतुत्वसंभवाच्च। पिपासितस्यापि दूरात्प्रत्यक्ष ज्ञाते जलेऽनाश्वासनिरासकत्वेन शब्दलिङ्गसापेक्षत्वात्। अत एव पिपासितास्तत्र जलमस्ति न वेति प्रत्यक्षतो ज्ञात्वा पृच्छन्ति, लोकानां कुम्भमादाय गमनादिनानुमपयन्ति च।

प्रत्यक्षतैव नास्ति। अन्यथा प्रत्यक्षप्रामाण्यवादिनश्चार्वाकादेस्तत्र विप्रतिपत्तिर्न स्यादिति चेन्न। तथा भाष्यार्थ वर्णने प्रत्यक्षविरोधात्। देहव्यतिरिक्तात्मप्रत्यक्षस्य प्राणभृन्मात्रसिद्धत्वात्। मम देह इति हि सर्वेषां प्रत्ययः, न तु देहोऽहमिति कस्यापि। अन्यथा देहभेदाननुसन्धाने यत् स्तनपानं तद् इष्टसाधनं, यथा पूर्वदेहभुक्तस्तनपानमिति व्याप्ययोगेनेष्टसाधनत्वानुमित्यभावापत्त्या प्रवृत्त्यनुपपत्तौ जीवनमेव न स्यात्। तस्मात् देहभेदस्यैव सर्वेषां प्रत्यक्षत्वेन उक्तरीत्यैव भाष्यं व्याख्येयम्। प्रत्यक्षैकप्रमाणवादिनश्चार्वाकस्य च स्वसमयाग्रहमात्रेण प्रत्यक्षे प्रामाण्यशङ्कायां तत्र विप्रतिपत्त्युपपत्तेः। न हि चार्वाकोऽपि सर्वं प्रत्यक्षं यथार्थमेवेति मन्यते। अपि पुनः शुक्ताविदं रजतमिति भ्रमोऽपि।

धर्म भेदादपि नानुवादकत्वमित्याह। प्रणयतीति – सप्तमस्य तृतीये चिन्तितम्। सौमिकं हि प्रणयनमवाच्यं हीतरदिति सूत्रम्। चातुर्मास्ये चत्वारि पर्वाणि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यानि। तत्र मध्यमयोः पर्वणोः श्रूयते द्वयोः प्रणयन्तीति द्वाभ्यामेतीति। अत्र सन्देहः किमिदं प्रणयनं प्राकृतमुत सौमिकम् उतापूर्वमिति। अत्र प्रणयनमात्रश्रवणात् तस्य चातिदेशतः प्राप्तेस्तस्यैवेयं पुनःश्रुतिः परिसंख्यार्था गुणार्थार्थवादार्था वेत्येकः पूर्वपक्षो न युज्यते परिसंख्यायास्त्रिदोषत्वात्, गुणस्य चाश्रुतेः। अर्थवादस्य च विध्यभावे आनर्थक्यात्। किन्तु आनर्थक्य परिजिहीर्षया सामान्यवचनोऽपि प्रणयनशब्दः सधर्मिकं सौमिकं प्रणयनं लक्षणया प्रतिपादयतीति द्वितीयः पूर्वः पक्षः। तथाचोत्तरवेदिनिषेधोऽवकल्पते 'न वैश्वदेव उत्तरवेदिमुपवपन्ति' 'न शुनासीरीय' इति। न चायमुपावपन्तीत्यस्य प्रतिषेध इति वाच्यम्। तस्यावान्तरप्रकरणेन वरुणप्रघासविषयत्वात्। प्रथमोत्तमयोरप्राप्तेः प्रतिषेधानर्थक्यात्। अस्मिन् पक्षे प्रथमोत्तमयोरिदं सौमिकं प्रणयनमुत्तरवेदिं विना न संभवतीत्युत्तरवेदिप्राप्तौ सत्यां निषेधोऽवकल्पते, नान्यथा। यदि चेदं सौमिकं प्रणयनं मध्यपर्वणोः स्यात् ततस्तद्वशेनैव मध्यमोत्तमयोरुत्तरवेदिसिद्धे उपावपतीत्ययं प्रथमोत्तम विषय एव स्यात्। तथा च तयोरेव प्रतिषेध इति व्याघातः। तस्मात् प्रथमोत्तमयोः सौमिकं प्रणयनं उत्तरवेदिकं विधीयत इति। सिद्धान्तस्तु – प्रणयन्तीति प्रणयनशब्दो न सौमिकं प्रणयनं प्रतिपादयति। प्रणयनशब्दस्य सौमिकप्रणयनवाचकत्वाभावात्। लक्षणया तत्परत्वस्यागतिकगतित्वात्। प्राकृतप्रणयनानुवादे नानर्थक्यम्। तस्मात् प्रणयन्तीत्येतत् अप्रकृतमसौमिकमपूर्वमेव प्रणयनं वदत्वाहवनीयतः। न चात्र प्रणयनमात्रं श्रूयते नाहवनीयत इति विशेष इति वाच्यम्। शाखान्तरे आहवनीयाच्चाग्निं प्रणयत इति वचनात् तत्प्रतीतेः। तथाचैतद्वचनैकार्थेन द्वयोः प्रणयन्तीत्यनेन प्राकृतप्रणयनोत्तरकाले आहवनीयात् अग्न्यन्तरस्य प्रणयनं विधीयते। तच्चार्थवादवशात् मध्यमयोः पर्वणोर्भवति। उत्तरवेदिप्रतिषेधस्तूपावपन्तीत्यस्य सामान्यविषयस्य पयुदासार्थः। सामान्यविषयत्वं चास्य भाष्य एव समर्थितम्। तस्मादपूर्वमेव प्रणयनं विधीयत इति स्थितम्। एवं च यथात्रानर्थक्यपरिहारायापूर्व प्रणयनप्रापकता तथा श्रुत्यानर्थक्यपरिहाराय प्रत्यक्षाद्यप्राप्तत्रिकालाबाध्यत्वरूपसत्त्वप्रापकत्वात् नानुवादकतेति। न च त्रैकालिकसत्त्वनिषेधकश्रुतिविरोधेन विश्वसत्यत्वश्रुतेः त्रैकालिकसत्त्वपरत्वं न संभवतीति वाच्यम्। विश्वसत्यत्व श्रुतिविरोधेनाद्वैतश्रुतेरेव त्रैकालिकसत्त्वनिषेधपरत्वाभावात्। विनिगमकाभावात्। ननु चाद्वैतश्रुतेस्तत्परत्वे तात्पर्यानुप पत्तिगतिसामान्ययोरेव विनिगमकत्वम्। तथाहि – अद्वैतश्रुतिर्हि षड्विधतात्पर्यलिङ्गोपेता। तत्र त्रिविधं तात्पर्यलिङ्गं प्रामाण्यशरीरघटकमर्थनिष्ठम् – अज्ञाततत्वमबाधितत्वं

निवेशमलभमान कर्मान्तरं कल्पयति। तथा काठककाण्वादिनामभेदाच्च तत्सिद्धिः। कारीरीवाक्यान्यधीयानाः केचित् शाखिनो भूमौ भोजनमाचरन्ति। शाखान्तराध्यायिनो नाचरन्ति इति धर्मभेदाच्च। एकस्यां शाखायामधीता इषे त्वेत्यादयो मन्त्राः पलाशशाखाच्छेदादयः क्रियाश्च शाखान्तरेऽधीयन्त इति पुनरुक्तेश्च। एवमशक्त्यादयो भेदहेतव उदाहर्तव्याः। न ह्यल्पायुषा मनुष्येण सर्वशाखाध्ययनपूर्वकं कर्मानुष्ठानं कर्तुं शक्यम्। तस्मात् शाखाभेदेन कर्मभेद इति। सिद्धान्तस्तु – रूपाद्यभेदादेकं प्रतिशाखं कर्मेति। तथाहि – आग्नेयाष्टाकपालादियागरूपं यदेकस्यां शाखायां प्रतीयते तदेवान्यत्रापि उपलभ्यते। तथा दर्शपूर्णमासाभ्यां यजेतेति यागरूपपुरुषव्यापारश्चैकविधः। दर्शपूर्णमासाविति कर्मनामाप्येकम्। स्वर्गकाम इति फलसंबन्धोऽप्येकः। तथाचाभेदेन प्रत्यभिज्ञानात् अभिन्नं कर्म। न चाविशेषपुनःश्रुतिलक्षणाभ्यासप्रकरणान्तरगुणादिभिर्भेद उक्त इति वाच्यम्। अविशेषपुनःश्रुत्या हि कर्म विधेयमित्येव सिध्यति। विधिवशात्तु भेदः। विहितस्य विधानायोगात्। एवं दूरत्वेऽपि विपरिवृत्त्यभावात् कर्मविधानम्। विधानाच्च भेदः। एवमत्रापि अभ्यासादिवशात् कर्म विधेयमित्येव सिध्यति। न तु विधानाद् भेदसिद्धिः। न चैवं तर्हि पूर्वं कथं तैः प्रमाणैर्भेदसिद्धिरिति वाच्यम्। तत्रैव हि तैः प्रमाणैः भेदः सिध्यति यत्र विहितस्य विधानं न संभवति। प्रकृते च विहितस्यापि पुरुषान्तरं प्रति विधिसंभवात्। यथा खल्वेकस्यामेव शाखायां विद्यमानमग्निहोत्रादिवाक्यम् एकस्य पुरुषस्य विहितमेवापरस्यापि विधत्ते, न कर्मान्तरम्, एवमत्राप्यध्येतृभेदात् तान् प्रति सर्वाण्येव वाक्यानि एकमेव कर्म विदधति, न कर्मान्तरम्। एवं गुणादपि कर्मभेदः। एकादशद्वादशकपालयोरपि अधिकारिभेदेनोत्पत्तिशिष्टत्वेन बलाबलाभावात्। नामभेदस्तु नास्त्येव। काठककालापादिकं तु ज्योतिरादिवत् न कर्मनामधेयम्। ज्योतिषा यजेतेतिवत् काठकेन यजेतेति यजिसामानाधिकरण्येनाश्रवणात्। किं तर्हि? काठकमधीयत इति प्रयोगात् ग्रन्थनामैव तदिति ज्ञातव्यम्। भूभोजनादिरध्ययनधर्मो, न कर्मधर्मः। न चाल्पायुषा मनुष्येण सर्वशाखाध्ययनपूर्वकं कर्मानुष्ठानं कर्तुमशक्यमिति वाच्यम्। अल्पायुषापि स्वशाखाध्ययनेन शाखान्तरस्थोपसंहारन्यायेन कर्मानुष्ठानं शक्यते। एवमन्यदपि भेदकं परिहरणीयम्। तथाच कर्मभेदकानां नामादीनामन्यथासिद्धत्वात् रूपप्रत्यभिज्ञानाच्च शाखाभेदेऽपि न कर्म भिद्यत इति।

नन्वेवमधिकारिभेदेनानुवादकत्वपरिहारे कुत्राप्यनुवादकत्वं न स्यात् इति चेत्, सर्वाविवादस्थल एव तस्य संभवात्। न च तदनिश्चयः। न ह्यनुवादकत्वं निरवधिकम्। येन हि स्फीतालोकमध्यवर्तिघटो निर्णीतः, तं प्रति तत्र घटसत्त्वप्रतिपादकवाक्यस्यानुवादकत्वसंभवात्। अत एव शाखान्तराधिकरणेऽनेकशाखाध्यायिनं प्रति तदभ्युपगम्य एकशाखामात्राध्यायिनं प्रति अननुवादकत्वमुक्तम्। तावतापि सार्थकत्वसंभवात्। न च शाखान्तराधिकरणे नानुवादकत्वम्। अनुवादकत्वस्य पुरोवादपूर्वकत्वात् इति शङ्क्यम्। प्रतिपत्रपेक्षया तत्संभवात्। येन हि पुंसा स्वशाखाऽधीता, पुनश्च शाखान्तरमधीतम्, तस्य स्वशाखायाः पुरोवादत्वेन शाखान्तराणामनुवादकत्वम् इति संभवात्।

अत एवेति। ननु भाष्यस्य नायमर्थः – देहव्यतिरिक्तात्मप्रत्यक्षमस्ति, अस्तीत्येवोपलब्धव्य इत्यादिश्रुतेश्च वादिविप्रतिपत्तिनिरासेन सार्थकत्वमननुवादकत्वं चेति। किं तर्हि? वादिविप्रतिपत्तिदर्शनेन देहव्यतिरिक्तात्मनः

एवं च व्यवहारेण येन सत्यपदस्याबाध्यत्वमात्रे शक्तिर्गृहीता तस्य विश्वं सत्यमित्यत्र सत्पदेन विश्ववृत्त्यबाध्यत्वस्योपस्थितौ क्वानुवादकत्वमिति। अस्तु वा घटादिसत्त्वस्यैव प्रत्यक्षेण प्राप्तिः। तेन च कथंचित् विश्वं सत्यमित्यत्रानुवादकत्वशङ्कायामपि उत्तरवाक्यद्वये नैवमित्याह– यच्चिकेतेत्यादीति। मानान्तराप्राप्तसत्येति स्रष्टृत्वविशेषणम्। न तु जगतः। नन्वेवं सृष्टेः सत्त्वे कथं जगतः सत्त्वमिति चेत् जगत्सत्त्वं विना सृष्टिसत्यत्वानुपपत्तेः। अथवाऽस्तु जगतो विशेषणम्। तथाप्यदोषः। जगति महदादौ प्रत्यक्षेण सत्त्वं न प्राप्तम्। प्रकरणानुरोधेन उत्तरवाक्येऽपि अर्थानित्यस्य महदादीनिति व्याख्यानाच्च। पृथिवी इतरभिन्नेत्यत्रैकदेशे घटादौ प्रत्यक्षेणेतरभेदसिद्धावपि पृथिवीमात्रे तदसिध्या यथा न सिद्धसाधनता, यथा वा न हिंस्यात् सर्वा भूतानीत्यत्र ब्राह्मणादौ, ब्राह्मणो न हन्तव्य इत्यादि वाक्यान्तरेण विधेयाहिंस्यत्वसिद्धावपि भूतमात्रे तदसिध्या नानुवादकता तथा प्रत्यक्षेणापि घटादावेकदेशे सत्त्वसिद्धावपि विश्वत्वावच्छेदेन तदसिध्या विश्वमित्यत्रापि नानुवादकतेत्यर्थः। ननु वैषम्यम्। दृष्टान्ते हि पृथिवीत्वं भूतत्वंचेत्यनुगत धर्मोऽस्तीति तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्राननुवादकत्वं युक्तम्। इह तु विश्वत्वं नैकाधर्मोऽस्ति। किन्तु विश्वशब्दः सर्वनाम। तेन तेन रूपेण घटादीनामुपस्थापकः। तेषु च प्रत्येकं सत्त्वं गृहीतमेवेति कथं नानुवादकत्वमिति चेन्न। सर्वनाम्नोऽपि बुद्धिस्थत्वावच्छिन्नवाचकत्वात् बुद्धिस्थत्वावच्छेदेन तदसिध्याऽत्रापि नानुवादकता। अन्यथा विश्वादिशब्दानां नानार्थकत्वं स्यात्। एकदा सर्वपदार्थोपस्थापकत्वं च न स्यात्। विश्वशब्दे सङ्केतग्रहश्च न स्यात्। विश्वशब्दात् समूहालम्बनं च न स्यात्। केनचिद्धर्मेणैकीकृतसर्वपदार्थानुभवविरोधश्च स्यात्। तस्मात् केन चिद्धर्मेणैकीकृतबुद्धिस्थसर्ववाचको विश्वशब्द इत्यकामेनापि स्वीकर्तव्यम्। तथाच कथमनुवादकत्वमिति। अस्तु वा प्राति स्विकरूपेणोपस्थापकत्वम्। तथापि घटाद्यंशेऽनुवादकत्वेऽपि प्रत्यक्षायोग्यांशे तदप्राप्त्या नानुवादकत्वमिति।

ननु तथापि ज्ञातज्ञापकत्वस्यैवानुवादकत्वप्रयोजकत्वात् कथं नानुवादकत्वमित्यत आह – अनुवादकत्वं हीति। तस्माद्धर्मिभेदान्नानुवादकत्वमित्येतावतोक्तम्। इदानीं प्रमातृभेदाच्च नेत्याह – एकशाखास्थेति। तथाच शाखान्तराधिकरणे यथाऽनेकशाखास्थान्येकार्थानि वाक्यानि पुरुषभेदेन नानुवादकानि तथा येन पुरुषेण विप्रतिपत्त्यादिना भेदो न निर्णीतः तं प्रति वाक्यस्यापरिच्छिन्नार्थपरिच्छेदकत्वेन सार्थकत्वमित्यर्थः। शाखान्तराधिकरणं त्वित्थम्। द्वितीयाध्याये चतुर्थपादे द्वितीयाधिकरणे चिन्तितम्। नामरूपधर्मविशेष पुनरुक्तिनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे कर्मभेदः स्यादिति सूत्रम्। काठककाण्व माध्यन्दिनतैत्तिरीयशाखादिषु दर्शपूर्णमासाग्निहोत्रादिकं कर्म समाम्नातम्। तत्र सन्देहः। प्रतिशाखं कर्म भिद्यते न वेति। पूर्वपक्षस्तु – प्रतिशाखं कर्म भिद्यते। कर्मभेदकानां प्रमाणानामत्र बहुलमुपलम्भादिति। तथाहि पूर्वं इडो यजतीत्यादावविशेषपुनः श्रुतिलक्षणाभ्यासात् कर्मभेद उक्तः। सोऽविशेषपुनः श्रुतिलक्षणाभ्यासोऽत्राप्यस्तीति तेन कर्मभेदसिद्धिः। तथा कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यत्र दूरत्वलक्षणात् प्रकरणान्तराद् भेद उक्तः। तच्च दूरत्वलक्षणं प्रकरणान्तरमिहाप्यस्ति। तेनापि कर्मभेदसिद्धिः। तथा सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र उत्पत्तिशिष्ट गुणावरुद्धे उत्पन्नशिष्टगुणानन्वयात् गुणात् कर्मभेद उक्तः। तथेहापि क्वचिदैन्द्राग्नमेकादशकपालं निर्वपेदिति श्रुतम्। क्वचिद् द्वादशकपालमिति। तत्रावश्यमन्यतरेण कर्मोत्पादयितव्यमिति येन चोत्पादितं तद्गतो गुण उत्पत्तिशिष्ट इति इतरस्तत्र

नाभाव इति। जगदभावो न असन्न। उपलब्धेः सदिति प्रतीयमानत्वात्। ननु सदिति प्रतीयमानमपि स्वप्नवद् असत्यं किं न स्याद् इत्यत्रोक्तं वैधर्म्याच्चेति। सदिति प्रतीयमानत्वेऽपि जगत् स्वप्नवद् असन्न। बाधाभावरूप स्वप्नवैधर्म्यादिति सूत्रद्वयार्थः। न च स्तुतिपरत्वात् मन्त्रद्वयस्य न जगत्सत्यत्वे मानत्वमिति वाच्यम्। एवं सर्वत्र मन्त्रेषु स्तुतिपरतायाः वक्तुं शक्यत्वेन वस्तुपरत्वाभावे अर्थप्रकाशनसामर्थ्यरूपलिङ्गेन मन्त्राणां विनियोगो जैमिनिना नोच्यते। मन्त्राणामिन्द्रादि परत्वाभावेनार्थप्रकाशनरूपसामर्थ्याभावात्। तथा श्रुत्या लिङ्गबाधोऽपि नोच्येत। लिङ्गप्राप्तार्थकस्य तदर्थशास्त्रस्यानुवादकताऽपि नोच्येत। न चार्थपरत्वाभावेऽपि तत्प्रतीतिमात्रेणार्थप्रकाशन रूपलिङ्गसद्भाव इति वाच्यम्। तात्पर्यभ्रमेण शक्तिभ्रमेण वाऽन्यार्थप्रतीतिसंभवात्। किंचैवं स्तुति परत्वं सत्यं ज्ञानमनन्तमित्यादावपि वक्तुं शक्यम्। यतः सत्यत्वादिधर्मोपेतम् अतः उत्कृष्टं ब्रह्म ज्ञेयमिति। एवं च ब्रह्मणः सत्यत्वं न सिध्येत्। तत्र तात्पर्यलिङ्गमस्तीति चेत् प्रकृतेऽपि तस्याग्रे वक्ष्यमाणत्वात्। अपि च स्तुतिपरत्वेपि कुतः सत्यत्वाद्यसिद्धिः? स्तुतेरसद्गुणकीर्तनरूपत्वादिति चेन्न। नाविद्यमानमिति श्रुतिविरोधात्। अविद्यमानस्तुत्याऽनर्थोक्तेश्च। नन्वेवमुभयत्र तात्पर्ये वाक्यभेद इति चेन्न। सत्यज्ञानादिवाक्ये सत्यत्वासद्व्यावृत्त्योरिवोभयत्र तात्पर्योपपत्तेः। तत्र सत्यत्वे शब्दतोऽन्यत्रार्थत इति न वाक्यभेद इति यदि तर्हि प्रकृतेऽपि जगत्सत्यत्वे शब्दस्य स्वतस्तात्पर्यम्, अर्थात् स्तुताविति अस्तु। तस्मात् स्तुतिपरत्वान्न सत्यत्वादौ तात्पर्यमित्ययुक्तम्।

अत्रादिपदेन क्रमेण 'विश्वं सत्यं कृणुहि विष्टमस्तु।' 'असत्यमाहुर्जगदेतदज्ञाः।' 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्। अपरस्पर संभूतम्।' 'नासतो दृष्टत्वात्।' इति श्रुतिस्मृतिसूत्राणि ग्राह्याणि। तत्र तावत् श्रुतेरनुवादकत्वेनाप्रामाण्यात् दुर्बलत्वात् प्रमाणीभूतमिथ्यात्वानुमानादेर्न बाधकत्वम्। अधिकबलस्यैव तथात्वादित्याशङ्क्य निषेधति – न चायमिति। ततश्चाप्रामाण्यादिकं दूर इति भावः। त्वन्मत इति। तथाचेदं रजतमित्यत्र यथा शुक्तिनिष्ठत्वेनेदंत्वं धर्मितावच्छेदकत्वेन भासते तथा सन् घट इत्यत्रापि घटादिधर्मितावच्छेदकत्वेन ब्रह्मनिष्ठमेव सत्त्वं भासते न तु घटनिष्ठत्वेनेति घटादिनिष्ठसत्त्वस्य प्रत्यक्षाप्राप्ततया घटनिष्ठसत्त्वबोधकश्रुतेर्नानुवादकत्वमिति भावः। मन्मतेऽनुवादकत्वेऽपि त्वां प्रति तत्परिहारमात्रेण प्रमाणत्वसंभवात्। अन्यथा परार्थानुमानप्रयोगे प्रतिवादिना वादिसिद्धतया सिद्धसाधनतोच्येत।

ननु इतरसत्त्वबाधपुरःसरत्वाद् ब्रह्मस्फुरणाभ्युपगमस्य तत्रैव सत्यादिपदवृत्तिस्वीकारेण तदतिरिक्तविश्वसत्त्वस्य शाब्दबोधाविषयत्वात् तदादायानुवादकत्वापरिहार इति चेन्न। एवं हि वदतेदमुक्तं भवति। ब्रह्मसत्त्वमेव घटादौ स्फुरतीत्यङ्गीक्रियते। इतरस्य घटादिनिष्ठसत्त्वस्य बाधात्। एवं च ब्रह्मसत्त्व एव सत्त्वपदशक्तिर्गृहीतेति यत्र यत्र सत्पदं श्रूयते तत्र सर्वत्र ब्रह्मसत्त्वस्यैव बुद्धिः। नेतरस्य। तत्र शक्तेरगृहीतत्वात्। एवं च विश्वं सत्यमित्यादावपि प्रत्यक्षे यत् सत्त्वं भातं तदेव स्फुरतीत्यनुवादकत्वमिति। तदेतद् वल्गनमात्रम्। एवं हि तत्सत्यमित्यादेरप्यनुवादकत्वं दृढीकृतं स्यात्। प्रत्यक्षप्राप्तब्रह्मसत्त्वबोधनादेव ब्रह्मसत्त्वे वेदान्तानां तात्पर्यं च न स्यात्। अपूर्वत्वाभावात्। किंच व्यवहारानुमेयः संकेतः। न तु स्वसमयमात्रेण। अर्थप्रत्ययेऽति प्रसंगात्। न हि लोके सत्यादिपदैः ब्रह्मसत्त्वमेव व्यवह्रियते।

इति हि द्वितीयाष्टकस्थो हि मन्त्रः। हे इन्द्राब्रह्मणस्पती मघवाना मघवानौ मघवन्तौ। मघमिति धननाम। मखवन्ताविति वा। युवोः युवयोः संबन्धि विश्वं सर्वं जगत्। यद्वा अर्थवशात् विभक्तिविपरिणामः। युवाभ्यां सृष्टं जगत्। सत्यमित्। इच्छब्दोऽवधारणे। सत्यमेव यथार्थमेव, न तु ज्ञानबाध्यमित्यर्थः। अत्रोपपत्तिमाह – आपश्चन। चनशब्दो निपातसमुदायोऽप्यर्थः। आपो वै सर्वा देवता इति श्रुतेः देवता अपि वां। युवयोर्व्रतं सत्यजगत्सर्जनादिरूपं प्रमिनन्ति यथार्थतो जानन्ति। तथा च देवैर्यथार्थतो ज्ञातत्वात् ब्रह्मवत् सत्यमित्युक्तं भवति। यद्वा, विश्वं समग्रं सत्यं कर्म युवयोरित् युवामुद्दिश्यैवानुष्ठेयमिति। द्वितीयपादार्थः पूर्ववत्। अस्मिन् पक्षे जगत्सत्यत्वाभावे कर्मणां सत्यत्वं नोपपद्यत इति तत्सत्यत्वोक्त्या जगत्सत्यत्वमपि सिध्यति। अथवा युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थम्। यद् यद् गुणजातं श्रुत्या प्रतिपाद्यते तत् सर्वं युवयोर्विद्यमानमेव, न त्वारोपितमित्यर्थः। एतादृशौ युवां नोऽस्माकं हविर्दध्यादिकम् अन्नं चरुपुरोडाशादिकं च अच्छा अभिलक्ष्य वाजिना वेगवन्तौ अश्वाविव युजा युक्तौ जिगातम् आगच्छतम्। अयं गतिकर्मा जुहोत्यादिकः। अन्नं घासं प्रति अश्वाविवेति वा। न चात्र सत्यं सत्यत्वेन प्रतीयमानमित्यर्थ इति वाच्यम्। 'तत् सत्यं स आत्मा' इत्यत्रापि तथात्वापत्तेः।

यच्चिकेतेति। शाक्मना शाको अरुणः सुपर्ण आयो महः शूरः सनादनीळः।
यच्चिकेत सत्यमित् तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥

इति मन्त्रस्यायमर्थः। शक्मैव शाक्म। तेन शाक्मना बलेन शाकः शक्तः। स्वशक्त्यैव सर्वं कर्तुं शक्त इत्यर्थः। न हीन्द्रस्य सहायान्तरापेक्षास्तीन्द्रत्वादेव। अरुणः अरुणवर्णः सुपर्णः सुष्ठु परमानन्दरूपः। आ इत्युपसर्गश्रुतेः आगच्छतीत्यध्याहारः। यद्वा आसमन्ताद् यो महान् शूरः विक्रान्तः सनात् पुराणः अनीळः अनीडः। उपलक्षणमेतत्। पोषकादिविहीनः। एवं भूतो य इन्द्रः स यच्चिकेत यच्चकार तत् सत्यमित्। तत् सत्यमेव। न तु बाध्यमित्यर्थः। कथंभूतः? स्पार्हं स्पृहणीयं वसु धनं जेतापि शत्रुभ्यः, दातापि स्वभक्तेभ्यः। उतशब्दोऽप्यर्थः। जेता दातेति तृन्। तेन नलोकेति षष्ठीनिषेधः।

याथातथ्यत इति। कविर्मनीषी परिभूः स्वयं – भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः। इति श्रुतेरयमर्थः। कविः सर्वज्ञः। मनीषी मनसामीशिता इन्द्रियप्रेरकः। परिभवति सर्वानिति परिभूः। स्वयंभूः स्वतन्त्रो भगवान्। अर्थान् महदादीन् शाश्वतीभ्यः समाभ्योऽनन्तानन्तकालेषु याथातथ्यतो यथार्थानेव व्यदधात् अकरोदिति।

स्मृतौ, येऽसत्यमप्रतिष्ठं जगदाहुस्त आसुरा इत्यग्रिमेण संबन्धः। अप्रतिष्ठं ज्ञानबाध्यम्। असत्यं सद्विलक्षणम्।

स्वप्नधीसाम्यताबुद्धेर्बुध्यार्थस्य सहेक्षणात् ।
तद्भेदेनानिरूप्यत्वाज्ज्ञानाकारोर्थ इष्यते ॥

विमताधीर्न ज्ञानव्यतिरिक्तालंबना धीत्वात् स्वप्नधीवत्। विपक्षे च ज्ञानाभानेप्यर्थभानप्रसंगो बाधकः। नहि भिन्नयोरश्वमहिषयोः सहोपलंभनियमोस्ति। तस्मान्न ज्ञानातिरिक्तं सदिति प्राप्ते परिहारसूत्रं। नाभाव उपलब्धेरिति।

बाधेन सोपाधिकतानुमाने उपाध्यभावेन सहोपलंभः ।
सारूप्यतो बुद्धितदर्थभेदस्थूलार्थभंगे भवतोपि तुल्याः।

सूत्रार्थस्तु। नाभावः ज्ञानातिरिक्तस्यार्थस्य नासत्वं किंतु व्यवहारदशाबाध्यार्थक्रियाकारित्वरूपं सत्वमेव। उपलब्धेः ज्ञानातिरेकेण प्रमाणैरुपलब्धेरिति। तदुक्तं। तस्मान्नज्ञानाकारोऽर्थः किंतु बाह्यः। स चार्थक्रियाकारित्वसत्वोपेतोपि अद्वैत श्रुतिवशाद्ब्रह्मणि कल्पितो न परमार्थसन्निति सिद्धांतस्य सुगतमताद्भेद इति। तस्मान्नस्मृतिसूत्र विरोधोऽस्माकमित्याशंक्य परिहरति॥ न च स्मृतिसूत्रे इति॥ ननु न तत्सूत्रे स्वप्नवैधर्म्योक्त्ययुक्तिः। तस्या विमतं निस्तत्वं तर्कपीड्यत्वात् मरुमरीचिकाजलवदित्यनुमाने बाध्यत्व प्रमाणागम्यत्वदोष जन्यत्वाद्युपाधिप्रदर्शनपरत्वात् इत्याशंक्य निराकरोति॥ सूत्र इति॥ निस्तत्वानुमानस्य मिथ्यात्वानुमानसमतया निस्तत्वानुमाननिराकरणपरया स्वप्नवैधर्म्योक्त्या मिथ्यात्वानुमानस्यापि निरस्तत्वेन स्वप्नवैधर्म्योक्तिर्भवत्प्रतिकूलेत्यर्थः। संवृतिसत्यत्वं आविद्यकसत्यत्वं। श्रुत्यादि विरोधमुपसंहरति॥ तस्मादिति॥ ननु न प्रमाणैर्विषयसत्त्वं सिद्ध्यति। अतीतादिग्राहकमाने विषयीभूतार्थस्य सत्त्वाभावादित्यत आह॥ अग्निरासीदिति॥ नात्र सत्त्वं विद्यमानत्वं किंतु अबाध्यत्वं। तच्चातीतादिष्वप्यस्तीति अतीतज्ञानस्यापि स्वार्थसत्वग्राहकत्वमक्षतमेवेति भावः॥ रूप्यमिति॥ रूप्यस्य सद्विलक्षणत्वेपि तद्भतं मिथ्यात्वं सदेवेत्यर्थः॥

व्यासाद्रिसृततर्कांबुपूरैः पक्षयुगंयुजि॥
न्यायामृततरंगिण्यां मिथ्यामाऽऽगमबाधिता॥

विश्वमिथ्यात्वस्यागमबाधः॥

न्यायामृतकण्टकोद्धारः

क्रमप्राप्तमागमबाधमाह – किंचेति। विश्वं सत्यमिति मन्त्रस्य तावदयमर्थः–

विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम् ।
अच्छेन्द्रा ब्रह्मणस्पती हविर्नोन्नं युजेव वाजिना जिगातम् ॥

अस्ति चेति॥ तथाच निष्प्रपंचताया अपि तस्मादेकाकी न रमत इति श्रुतेरेव दुःखवत्त्वादपुरुषार्थत्वमित्यर्थः। ननु एकधैवानुद्रष्टव्यमिति वाक्यस्वारस्यात् अभेदज्ञानस्यैव मोक्षहेतुत्वान्निष्प्रपंचतैव पुरुषार्थ इत्यत आह॥ संति चेति॥ आत्मानं जीवं प्रेरितारं प्रेरयितारं पृथक् भेदेन मत्वा तेन भेदज्ञानेन परमात्मना वा जुष्टः प्रीतियुतः सन् ततः परमात्मनः सकाशादमृतत्वमेतीत्यर्थः। अत एवोत्तरत्र

अत्रापि तं वेदविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ।
तदात्मतत्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥

इति भेदज्ञानस्यैव मोक्षहेतुत्वमुक्तं॥ तर्हीति॥ तर्हि किति तद्धिते परे वृद्धिविधायकात् किति चेति सूत्रात्सकाशात् सामान्यतः सर्वत्र किति प्रत्यये परे वृद्धिनिषेधकस्य क्ङितिचेति सूत्रस्य प्राबल्यं स्यादित्यर्थः। ननु सामान्यविशेषन्यायेन क्ङितिचेत्याद्यपेक्षया किति चेत्यादेर्बलवत्त्वमिति चेत् तर्हि 'यदंग दाशुषे त्वमग्ने भद्रं' तस्तं 'भद्यां मंत्रेभिः सत्यैः कृण्वन्विश्वान्यपांसि' 'सत्या ऋतावरी ऋतजातस्य सत्ये सत्यमिंद्रसत्य' 'इंदुः आद्वां ब्रवाम सत्यान्युक्थ्या सत्यमिद्वा उतं वयमिंद्रं स्तवाम नानृतं' 'योभूत्सोमैः सत्यमद्वा' 'सत्योयं पूर्वेचिद्देवासश्चियमीधिरे' 'ऋतं यतीसरमागा अविंदद्विश्वानि सत्यांगिराश्चकार तं नुसत्यं पवमानस्यास्तु' इत्यादिषु बहुषु विशिष्य मंत्रादीनां कर्मणां देवतानां पृथिव्यादीनां च सत्यत्वोक्त्या सामान्यतो नेति नेतीति श्रुतेः सकाशात् सत्यत्वश्रुतेरेव विशेषश्रुतित्वेन बलवत्त्वात्॥ अनुपसंजातेति॥ न्यायाः पूर्वमुक्ता अनुसंधेयाः।

ननु मिथ्यात्वानुमानस्य श्रुतिसूत्रविरोधो न संभवति। ययोः शून्यवादिमतनिरासार्थत्वात्। तथाहि सद्रूपाद्ब्रह्मणो जगत्सर्गं वदतः समन्वयस्य सर्वमसदित्यनुमानेन विरोधे ब्रह्मसाधारण्यां निस्तत्वतायां प्राप्तायां सूत्रेण परिहारः। सतो ब्रह्मणो नाभावः न शून्यत्वं उपलब्धेः। सत्वेन प्रमाणांतरप्रतीतेः। तथाच किंचित्परमार्थसदवश्यं शून्यवादिनापि स्वीकार्यं। अन्यथा बाधस्य निरवधित्वप्रसंगादिति सूत्रार्थः। सच न प्रपंचमिथ्यात्वविरोधी। तथा चोक्तं।

''बाधितापह्नवामानैर्व्यावहारिकमानता ।
मानानां तात्विकं किंचिद्वस्त्वनाश्रित्य दुर्भणा''

इति। विज्ञानवादिनिराकरणपरेणापि नानेन सूत्रेण विरोधः। रूपादिरहितब्रह्मजगदुपादानत्व प्रतिपादकस्य समन्वयस्य नीलाद्याकारं विज्ञानं साधयतानुमानेन विरोधसंदेहे –

सत्त्वात्। यथाहुः

न सन्नासन्न सदसन्नैवानुभयतत्वकं ।
विमतं तर्कपीड्यत्वान्मरीचिषु यथोदकम् ॥ इति।

द्वे सत्त्वेसमुपाश्रित्येत्यादि च वक्ष्यते॥ अप्राप्ते चेति॥ व्यावहारिकसत्त्वस्य सर्वसंमतत्वान्नतद्बोधनेन श्रुतेरर्थवत्त्वमित्यर्थः॥ त्वत्पक्ष इति॥ नन्वखंडार्थबोधस्य द्वितीया भावबुद्धिद्वारत्वेन जगत्सत्यत्वविरोधित्वमिति चेन्न। द्वितीयाभावस्य द्वितीयतयाऽखंडार्थविरोधित्वेन तस्य तद्बोधे द्वारत्वायोगात्। स्वरूपात्मकत्वे तु स्वरूपमात्रप्रतिपादनपर्यवसानेन श्रुतेस्तद्बोधिकायाः सत्यत्वश्रुत्यविरोधित्वात्। जगत्सत्यत्वाविरोधित्वात् जगत्सत्यत्वबोधकागमा विरोधित्वात्। ननु वैदिकतात्पर्यविषयस्य तात्विकत्वनियमेन तात्पर्यज्ञापकानामपि लिंगानामर्थतथात्वज्ञापकत्व एव पर्यवसानमित्यत आह॥ अस्तिचेति॥ तथाचो भयोस्तात्पर्यलिंगवत्तया न बाधकत्वाध्यवसाय इत्यर्थः॥ मानांतरेति॥ मानांतरप्राप्तार्थत्वे त्वनधिगतार्थत्वक्षतिः। मानांतरविरुद्धार्थत्वे तु याथार्थ्यमेव न स्यादिति विशेषोपि बोध्यः। ननु प्राप्तार्थयोर्विरोधे प्राप्तार्थस्याप्राप्तार्थविध्यर्थत्वेनान्यशेषत्वनियमादप्राप्तार्थस्यैवानन्यशेषत्वेन बलवत्त्वं। तदुक्तं संक्षेपशारीरके। अतत्परातत्परवेदवाक्यैर्विरुध्यमाना गुणवाद एवेति चेन्नैवं। विश्वसत्यत्व श्रुतेरन्यशेषत्वस्य प्राप्तार्थत्वेपि दार्ढ्यादिप्रयोजनवत्तया अतत्परत्वस्य चाभावात्। प्रत्युत मिथ्यात्वश्रुतेरेव मानांतरविरोधेन प्रस्तरादिवाक्यवदतत्परत्वात्॥ यदि त्विति॥ तथाच मिथ्यात्व श्रुतेर्न मानांतरविरोध इति भावः॥ तर्हीति॥ तथाच सत्त्वश्रुतेर्नानुवादत्वमिति भावः। श्रुत्योः प्राबल्यप्रसंगेनास्योक्तत्वात् न धर्मादिभेदान्न द्वैतगीर्वृथेत्यनेन न पौनरुक्त्यमिति विभावनीयं॥ सुषुप्ताविति॥ सुषुप्तौ निष्प्रपंचतायाः सुखत्वेन फलवत्त्वात्। तद्बोधकस्य स्थूलादिवाक्यस्य प्रधान प्रतिपादकवाक्यतुल्यत्वात्। सप्रपंचसगुणवाक्यस्य निष्फलप्रपंचादि प्रतिपादकत्वेनांगवाक्य तुल्यतया प्रधानवाक्यानुसारेण चांगवाक्यस्य नेयत्वात्। अस्थूलादिप्रपंचनिषेधकवाक्यानुसारेण सत्यत्वप्रतिपादकं सप्रपंचवाक्यं स्तुत्यर्थत्वेन नेयमित्यर्थः॥ तस्या इति॥ निष्प्रपंचताया इत्यर्थः॥ मूर्च्छायामिति॥ तथाच निष्प्रपंचतायाः फलवत्त्वव्यभिचार इति भावः॥ सममिति॥ तथाच निष्प्रपंचतायाः फलवत्त्वं न कुत्रापि दृष्टचरमिति भावः॥ यदि चेति॥ सुप्तौ निष्प्रपंचतायाः प्रसक्तं पुरुषार्थत्वं दुःखयोगादपोद्यते। उत्सर्गतस्तु निष्प्रपंचता पुरुषार्थ एवेति भावः॥ तर्हीति॥ सुषुप्तिरपि प्रपंचाभावरूपफलेन न पुरुषार्थः किंतु सुखेनैवेति निष्प्रपंचता न प्रधानतुल्येति भावः। ननु सप्रपंचतादुःखवत्त्वादपुरुषार्थः। द्वितीयाद्वै भयं भवतीति श्रुतेः। निष्प्रपंचता तु दुःखरहितत्वादेव पुरुषार्थ इत्यत आह॥

तेषु या फलभूता संवित् घटादिभासकं चैतन्यं तदेव वेदांतवाक्यरूपप्रमाणस्य प्रमेयमित्यर्थः। तथाच घटज्ञानस्य ब्रह्मत्वात् सत् घटज्ञान मित्यत्र ब्रह्मसत्ता प्रतीयत इत्यर्थः। ननु घटादिविशिष्टे ब्रह्मणि सत्त्वप्रतीतावपि शुद्धे न तत्प्रतीतिरित्यत आह॥ सदिति॥ नन्वत्रापि सुखविशिष्टे अज्ञानविशिष्टे च सत्ताप्रतीयते न केवल इत्यत आह॥ अधिकेति॥ ननु सत्सुखस्फुरणमित्यादौ ब्रह्मत्वसामानाधिकरण्येन न सत्त्वं प्रतीयत इत्यत आह॥ ब्रह्मशब्देति॥ तव मते सत्यादिवाक्यस्याखंडार्थनिष्ठतया ब्रह्मत्वसामानाधिकरण्येन सत्त्वाबोधकतया ब्रह्मस्वरूपे सत्त्वं तेन बोध्यत इति वाच्यं। तच्च सत्सुखस्फुरणमित्यत्राप्यस्ति। तार्किकमते निर्विकल्पके भातस्य घटस्य सविकल्पकेपि भानवत्॥ एवमानंदेति॥ नन्वदुःखमसुखमित्यत्र दुःखसाहचर्येण सुखस्यापि वैषयिकस्यैव ग्रहणेन तन्निषेधाय ब्रह्मस्वरूपसुखानुवादायोग इति चेन्मैवं। दुःखे वैषयिकत्वाव्यभिचारेण दुःखमात्रस्यैव ग्रहणमिति तत्सहपठितस्यापि सुखस्य सर्वस्य निषेधाय ब्रह्मानंदश्रुतिरप्यनुवादिनी स्यादित्याशयः॥ विश्वं सत्यमिति॥ विश्वं सत्यमित्यादि श्रुत्या बाध्यत्वाभाव रूपमिथ्यात्वाभावं बोधयंत्या तद्रूपं मिथ्यात्वं निषिध्यत इति विश्वसत्यत्वश्रुतिरेव निषेधश्रुतिः। तां च प्रतिनिषेध्यमानं मिथ्यात्वं विज्ञानवादादिप्राप्तमेव नेह नानेति श्रुतिरनुवादिनी स्यादित्यर्थः। ननु भावाभावयोः परस्परविरहरूपत्वे समेपि भावग्रहो निरपेक्षत्वान्ना भावग्रहमपेक्षते। अभावग्रहस्तु सप्रतियोगिकत्वाद्भावग्रहमपेक्षते। अतो नेति नेतीति श्रुतेरेव सत्त्वश्रुत्यपेक्षा नतु सत्त्वश्रुतेर्नेतिर्नेतीति श्रुत्यपेक्षेति चेन्मैवं। सत्यत्वस्य बाध्यत्वादिभावरूपमिथ्यात्वाभावरूपतया तद्बोधयंत्याः सत्त्वश्रुतेरेवात्यंताभाव प्रतियोगित्वादिरूप भावरूपमिथ्यात्वप्रतिपादकश्रुत्यपेक्षाया एवोचितत्वात्॥ स्वर्गनरकादेरिति॥ सत्यत्वस्येति शेषः॥ तेन नोपक्रमानानुगुण्यं। नच धर्मिप्रमातृभेदेनेत्यादिना पौनरुक्त्यं। नह्यत्र धर्माद्यंशे प्रत्यक्षाप्राप्तसत्त्वविधानेन विश्वं सत्यमित्यादेरननुवादत्वमुच्यते। किंतु वाक्यप्राप्तस्य वाक्यांतरेण निषेधेऽतिप्रसंग उच्यते॥ एतच्छास्त्रास्थेति॥ यथा न हिंस्यात्सर्वा भूतानीति श्रुतिरविशेषप्रवृत्तापि हिंसात्वसामान्यस्य प्रत्यक्षादिप्राप्तत्वात् निषेध्योपस्थितौ नाग्नीषोमीयवाक्यमपि निषेध्यसमर्पणायापेक्षते तथा नेति नेतीत्यादि श्रुतिरविशेषप्रवृत्तापि प्रत्यक्षप्राप्तघटादिसत्त्वरूपं निषेध्यमादाय निराकांक्षा सती न प्रत्यक्षाप्राप्तधर्माधर्मादि सत्यत्व बोधिकां विश्वं सत्यमित्यादि श्रुतिमपि निषेध्यसमर्पणायापेक्षितुमर्हति। मानांतरेण निषेध्योपस्थितावपि वाक्यापेक्षणे अग्नीषोमीयहिंसाया अपि तथा निषिद्धत्वेनाधर्मसाधनत्वं स्यादिति बोध्यं। नन्वग्नीषोमीयवाक्यस्य निषेधविषयन्यूनविषयत्वेन न निषेध्यसमर्पकत्वमिति चेन्न। विश्वं सत्यमित्यस्यापि प्रत्यक्षाप्राप्तधर्माधर्मादिसत्यत्वबोधकतया सर्वनिषेधकान्नेति नेतीत्येतस्मान्न्यून विषयत्वात्। एवं च दृश्यत्वादिहेतोर्धर्माद्यंशे श्रुत्यादिबाध एव॥ नहीति॥ बौद्धादिमतेपि जगति व्यावहारिकसत्त्वस्य

सप्रयोजनं स्वार्थपरं च स्यात्। अतो न प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासार्थमन्यापेक्षेति चेन्नैवं। प्रत्यक्षसिद्धे भावरूपाज्ञाने वादिविप्रतिपत्तेस्त्वयांगीकारात्। तत्र श्रुत्यादेरुपन्यासाच्च।

विमतिर्नाक्षग इति त्वदुक्तिव्यक्तवेदनः ।
आत्मा ज्ञानौपधं सिद्धं विमृश्यारोग्यमाप्नुयात्॥

वस्तुतस्तु प्रत्यक्षेण सत्त्वे गृहीतेपि वादिविप्रतिपत्त्या प्रत्यक्षेऽप्रामाण्यशंकायां तदाहितार्थसंशये सति सर्वजनसिद्धप्रामाण्यया श्रुत्या प्रत्यक्षगृहीतार्थस्यानुवादे सति सर्वसंशयबीजनिरासोऽस्यानुवादस्य प्रयोजनं। अस्ति हि मीमांसकानां प्रत्यक्षसिद्धेपि वायुप्रत्यक्षत्वे नैयायिकानां चात्मप्रत्यक्षत्वे तत्र तदन्येषां विवाददर्शनात्। सत्यां विप्रतिपत्तावग्निर्हिमस्य भेषजमित्याद्यपि द्वीपविशेषस्थं प्रत्यननुवाद एव। पुरुषविशेषं प्रत्येवानुवादकत्वं। सप्रयोजनानुवादकत्वाभावेपि सत्त्वश्रुतेः प्रामाण्यस्याक्षतत्वात् तया मिथ्यात्वानुमानं बाधितमेवेत्याह॥ किंचानुवादत्वेपीति॥ नचाधिगतेऽर्थे तात्पर्याभाव इति वाच्यं। अधिगतेपीष्टे क्रियासमभिहारेण बालभाषितवत्तात्पर्योपपत्तेः। नैष्फल्यं अज्ञाननिवृत्त्यादि फलाभावः। इष्टबोधनस्यापि सुखादिहेतुत्वात्॥ किंचायमिति॥ वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवतेत्यादौ इत्थं वायव्यश्वेतालंभः प्रशस्तः यत्र शीघ्रगामिनी वायुदेवता इज्यत इत्यादिस्तुतेरत्राभावात्॥ आश्रयेति॥ विधीयमानो गुणो यत्र कारकतामापद्यते स आश्रयः। यथा दध्ना जुहोतीत्यत्र विधीयमानस्य दध्नः होमं प्रतिकारकत्वात् होमो दध्न आश्रयः। तथाचानुवाद्यत्वसिद्धौ तत्संसर्गोपि सिद्धः स्यादित्यर्थः॥ तत्रैवेति। नेह नानास्ति किंचनेति वाक्य एव किंचनेत्यनेन सर्वानुवादसंभवादित्यर्थः। ननु सामान्यतो निषेधस्य किंचनेत्यनेन निषेध्यसमर्पणेपि विशिष्य निषेधे विशिष्य निषेध्यार्पणस्योपयोग इत्यत आह॥ न हीति॥ निषेद्धुं प्राप्तिरपेक्षिता। न तु शब्दतः। गौरवादिति भावः। विश्वं न सत्यमित्यादिविशिष्य निषेधादर्शनाच्च। अस्थूलादिवाक्ये स्थूलादिपदस्यैव निषेध्यानुवादस्य सत्त्वात्॥ अत्रेति॥ परमेश्वरकृतजगत्सृष्ट्यादेः सत्यत्वेन ज्ञानं देवानामप्यस्तीति देवसंबंधितादृशज्ञानरूपस्यालौकिक प्रमाणस्योक्तेरित्यर्थः॥ यत्तन्नेत्यादीति॥ इति यत्तन्न इत्येवं निषेधार्थानुवादलिंगस्यैकस्याप्यभावादित्यर्थः। एतेन यत्किंचिल्लिंगाभावे न लैंगिकाभावो वक्तुमशक्य इति परास्तं। ननु तत्सत्यमित्यादिवाक्यं न ब्रह्मसत्तानुवादकं। तस्याः मानांतराप्राप्तत्वादित्यत आह॥ सर्वेति॥ व्यवस्थिते अनुस्यूते। ब्रह्मणः सर्वप्रत्ययवेद्यत्वेन सन्घट इत्यत्र ब्रह्मणि सत्त्वप्रतीतिरित्यर्थः। ननु विशिष्टस्यैव सर्वप्रत्ययवेद्यत्वं न तु शुद्धस्येति शंकामपाकर्तुमुत्तरार्ध उदाहृतः। प्रपंच विलयाधिष्ठानत्वेन सर्वप्रत्ययवेद्यस्य ब्रह्मणः शुद्धत्वमितिभावः॥ परागर्थेति॥ परांचो येऽर्थाः ते च प्रमेयानि

इति। विशिष्टविधिनिमित्तत्वादर्थापत्तिः पश्चाद्भवंती यद्यपि विशेषणविधीनुत्तरकालमवगमयति तथापि विशेषणान्यनुपादाय विशिष्टे व्यापारासंभवात् नूनं पूर्वतरं विशेषणविधयो निष्पन्नाः। यतस्तदधीनसिद्धिर्विशिष्टप्रत्ययो दृश्यते तेन बहव एव चैते विधय इति प्रत्यक्षार्थापत्तिलभ्या युगपत्क्रमेण वा व्याप्रियंत इति अनेकविध्यंतरप्रसवसमर्थैकविशिष्ट विधिप्रसादेनानेकगुण विधानमपूर्वभावनाविधिपक्षे सुलभं। यदा तु भावनाऽन्यतः प्राप्ता भवति तदापिष्टपेषणवत्प्रतिहतशक्तिर्विधायको भावनामविदधत्ततोवतीर्य तत्संगतानि करणान्युपसर्पति। तत्रानेकेषु विशेषणेषु एकेन विहितेनेतरानाक्षेपात् तत्रापि श्रुत्यैव विधानं कर्तव्यमित्यावृत्तिप्रसंगः। तदुक्तं वार्तिके।

प्रधानं नीयमानं हि तत्रांगान्यपकर्षति ।
अंगमाकृष्यमाणं तु नांगांतरमसंगतेः ॥ इति।

तस्माद्विद्वद्वाक्यविहितकर्मानुवादेनाष्टाकपालादि वाक्यैरग्नेयाष्टाकपाल संबंधस्तस्य पूर्णमासीकालसंबंध इत्यनेक गुणविधानं न संभवति। आग्नेयोऽष्टाकपालः पूर्णमास्यामित्यत्र यद्यपि तद्धितस्य सन्निहितद्रव्यवचनत्वात्सामानाधिकरण्यलक्षणः संबंधः प्रागेव पूर्णमासीसंबंधात् आग्नेयाष्टाकपालयोर्लभ्यते। तथाप्यसौ संबंधः प्रमाणांतरेणासिद्धत्वात् अत्रैव विधातव्यः। तं च विधाय पुनः पूर्णमासीसंबंधविधिरित्यावृत्तिप्रसंगः। नह्येवं संभवति य आग्नेयोऽष्टाकपालः स पूर्णमास्यामिति आग्नेयाष्टाकपालस्याप्रसिद्धत्वात्। अत एव वक्तव्यं अष्टाकपाल आग्नेयः कर्तव्यः स च पूर्णमास्यामिति। तथा सत्यावृत्तिः प्रत्ययस्य स्यात् तस्माद्य एवं विद्वानिति विहितकर्मानुवादेनाष्टाकपालादिवाक्ये गुणविधानासंभवात् अवश्यमेव भावनांतरं द्रव्यदेवताविशिष्टं आक्षिप्तयजिकं विधातव्यं। नच भावनांतरं भावनांतरस्य रूपं भवतीति सिद्धमरूपत्वं। अतो विद्वद्वाक्यगतौ यजती समुदायानुवादौ। ततश्चागत्या पूर्णमासीमित्येकवचनं लक्षणया समुदायपरं भविष्यति। किंच यदाग्नेयोऽष्टाकपाल इत्यादिक्रियासमानाधिकरण यच्छब्दाद्विलक्षणः य एवं विद्वानिति कर्तृसमानाधिकरणो यच्छब्द उपबध्यमानो विधिसामर्थ्यं निरुंधे। तथाचोक्तं वार्तिके

क्रियापदैकयोगित्वे यच्छब्दो न रुजेद्विधिं ।
कर्तृयुक्तस्य एवान्यः प्रापितार्थानुवादकृत् ॥

इति। तस्मात्समुदायानुवादौ। ननु प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासरूपप्रयोजनवत्त्वेन प्रमाणांतरस्य सप्रयोजनतया स्वार्थपरत्वोक्तावग्निर्हिमस्य भेषजमित्याद्यपि तेनैव प्रयोजनेन

य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते इति वाक्यद्वयं श्रुतं। तथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवाक्यं श्रुतं। तत्र संशयः किमिमौ विद्वद्वाक्यगतौ यजतीति फलवाक्यबोधितफलसंबंधे पूर्णमास्यमावास्यासंज्ञके अपूर्वकर्मणी विधातारौ उत पूर्णमास्यमावास्याकालसंयोगनिमित्ताग्नेयादिनामधेयत्वाभ्यां पूर्णमास्यमावास्यापदाभ्यां विशेष्यमाणौ प्रकृतानाग्नेयादीन् पूर्णमास्यमावास्याकाल संयुक्ताननुवदितारौ इति। तत्सिध्यर्थमप्येतच्चिंतनीयं किमपूर्वकर्मविधौ रूपं लभ्यते नवेति ततोप्येतद्विचारणीयं। किं प्राप्तकर्मानुवादेनानेकगुणविधानं एकेन विधिना संभवति उत नेति। तत्र पूर्वःपक्षः। य एवं विद्वानित्येताभ्यां पूर्णमास्यमावास्यासंज्ञकौ यागौ विधीयेते अनुवादमात्रस्य व्यर्थत्वात् किं पुनरनयोर्द्रव्यदेवतं तदुच्यते। यदाग्नेयोऽष्टाकपालो भवतीत्यादिभिः पूर्णमास्यमावास्यासंज्ञाभ्यां तावेव यागौ अनूद्याष्टाकपालादिद्रव्यमग्न्यादयश्च देवता विधीयंत इति तदेव द्रव्यदेवतं। अस्मिंश्च पक्षे पूर्णमासीमित्येकत्वं प्रातिपदिकार्थगतमेव भविष्यति। यागश्च प्रत्यक्षतः श्रुतः। तौ च द्वावेव। तदपूर्वे च द्वे इति लाघवं। समुदायानुवादत्वे तु प्रातिपदिकार्थलक्षितसमुदायगतमेकत्वं। यागश्च क्लेशेन द्रव्यदेवतासंबंधादनुमातव्यः। ते चानेके तदपूर्वाणि चानेकानीति गौरवं। फलवाक्यं तु तयोरेव फलसंबंधबोधकमिति। सिद्धांतस्तु नैतेऽष्टाकपालादयो गुणविधयः प्राप्तकर्मानुवादेनानेकगुणविधाने प्रत्ययावृत्ति रूपदोषप्रसंगात्। तदुक्तं वार्तिके।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयंते बहवोप्येकयत्नत ॥

इति। कर्मोत्पत्तिवाक्ये श्रूयमाणो विधिः भावनाया अप्राप्तत्वात्तां विधातुमुपक्रांतोपि केवलायास्तस्याः अनुष्ठातुमयोग्यत्वात्। कारकविभक्त्यंतपदां तरादिप्रतिपादितैः भावनांशभूतैर्विशेषणैर्विशेष्यमाणां तां विदधत्तद्विशेषणानि अर्थापत्त्या विदधातीति न तत्र प्रत्ययावृत्तिदोषः। विशिष्टायां भावनायां श्रौतविधित्वमादाय यद्यन्यत्रापि श्रुत्यैव पुनर्व्याप्रियेत ततः पुनरुच्चारणदोषमवैदिकत्वापत्त्या लभेत। अयं पुनः सकृद्विधाय निवृत्तव्यापारः स्वार्थान्यथानुपपत्या सर्वविशेषणेषु प्रत्येकनिष्ठानि विध्यंतराण्याविर्भावयन्सन् समाम्नायावगतैकरूपापरित्यागेनैवासकृदुच्चारणे वर्तते। तदुक्तं वार्तिके।

शब्दव्यापारनानात्वे शब्दानामतिगौरवं ।
एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते ॥

तात्पर्यविषये शब्दः प्रमाणं यत्परः शब्दः स शब्दार्थ इत्यभ्युपगमात् अन्यतः सिद्धे च शास्त्रतात्पर्यं न संभवति। अतोऽनुवादस्यानुवाद्ये स्वार्थे तात्पर्यासंभवात् न तत्र तस्य तात्पर्यमिति शंकां विश्वसत्यत्ववाक्यस्य विश्वसत्यत्वे तात्पर्यकथनेनोपपादयति॥ किं च वादीति॥ विद्वद्वाक्ये य एवं विद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इत्यादौ॥ अत एवेति॥ विद्वद्वाक्यस्याग्नेयादिपङ्यागानां पौर्णमासीकालयुक्तानां त्रयाणाममावास्याकाल युक्तानां च त्रयाणां यागानां विद्वद्वाक्यगताभ्यां पौर्णमास्यमावास्याकालयोगनिमित्त प्रसिद्धयागत्रिकत्रिकनामधेयत्वाभ्यां पौर्णमास्यमावास्या पदाभ्यां निर्देशे सति एकावगत्या त्रिकस्य त्रिकस्य एकैककरणेन समुदायद्वयसंपादकतया दर्शपूर्णमासाभ्यामिति फलवाक्यगतद्विवचनांतपदस्य आज्यभागौ यजतीति द्वित्वसंख्योपेते आज्यभागादिपु प्रातिपदिकार्थासंभवेन आग्नेयादिपु द्विवचनार्थासंभवेनानुपपन्नस्य समुदायद्वयपरत्वे सति उपपन्नार्थस्य प्रसिद्धार्थकतया फलवाक्यगताप्रसिद्धार्थ यजिविशेपकतया यजेर्नामपरतंत्रत्वेन नामार्थस्य त्रिकद्वयस्यैव फलवाक्येन फलसंबंधो भवती त्येवं सप्रयोजनानुवादो विद्वद्वाक्यं। अन्यथा दर्शपूर्णमासपदस्य यजिपरतंत्रत्वे यजेश्च तंत्रेण प्रकृताग्नेयाज्यभागसमिदादि सर्वयागोपस्थापकतया सर्वेपामेव फलसंबंधः स्यादिति सर्वेपां समप्राधान्यमापद्येत। सप्रयोजनानुवादत्वादेव विद्वद्वाक्यस्य पौर्णमास्यमावास्याकालयुक्त आग्नेयादियागलक्षणानुवाद्य भूतस्वार्थपरत्वं। अत एव पौर्णमास्यमावास्याख्ययागसमुदायस्य विद्वद्वाक्यनिष्पन्नार्थस्य दर्शाख्येन समुदायेन पूर्णमासाख्येन च समुदायेन स्वर्गकाम इष्टं कुर्यादिति फलवाक्यार्थेनान्वयात् विद्वद्वाक्यस्य फलवाक्येनैकवाक्यत्वं।

स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया।
पदानामेकवाक्यत्वं पुनः संहत्य जायते ॥

इति वचनात्॥ स्वार्थेति॥ वायुर्वै क्षेपिष्ठा देवतेत्यादीनामसति प्रयोजने मानांतर प्राप्तार्थमनुवदतामनुवाद्ये तात्पर्याभावेऽवगतेऽवांतरवाक्यार्थमनादृत्यैव वायव्यश्वेतालंभन रूपप्रधानस्तुतिपरत्वं यथोक्तं तथा विद्वद्वाक्येष्युच्येतेत्यर्थः। ननु विद्वद्वाक्यस्यानुवादकत्वमेव कुत इति चेत् मैवं। द्वितीयाध्यायस्य द्वितीयपादे निर्णीतत्वात्। तथाहि। यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशुपौर्णमास्यां यजेरन्। ताभ्यामेतमग्नीपोमीय मेकादशकपालं पूर्णमासे प्रायच्छत्। ऐद्रं दध्यमावास्यायामैंद्रं पयोऽमावास्यायामिति कालसंयुक्तनि वचनानि श्रूयंते। तथा समिधो यजति। तनूनपातं यजति। आज्यभागौ यजतीत्यकालसंयुक्तानि वचनानि। तेषां संनिधौ

अत आह॥ उक्ता हीति॥ उरुप्रथस्वोरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयतीति श्रूयते। तत्र पुरोडाशप्रथनाभिधानसामर्थ्यरूपलिंगेन पुरोडाशप्रथनरूपे कर्मणि उरु प्रथस्वेत्यादिमंत्रस्य विनियोगे सिद्धे इति पुरोडाशं प्रथयतीति ब्राह्मणरूपस्य तदर्थशास्त्रस्य वैयर्थ्यादनुवादकत्वमुक्तमित्यर्थः। ननु क्रमप्रकरणाभ्यां लब्धांगभावा मंत्राः न पुरोडाशप्रथनादितत्तत्कर्मसमवेतार्थं प्रकाशने नोपकुर्वंति। येन तत्प्रकाशितार्थस्य कर्मसमवायित्वरूपलिङ्गेन मंत्रविनियोग इति तदर्थशास्त्रवैयर्थ्यं स्यात्। किंतु अनुच्चरितानामनभिधायकत्वात्। प्राथम्यावश्यकत्वाभ्यामुच्चारणमात्रेण यद्यर्थप्रकाशनमेव मंत्राणां कार्यं स्यात्तर्हि तेषां नित्यवदाम्नानमनर्थकं स्यात्। उपायांतरेणापि प्रयोगवेलायामर्थप्रकाशनस्य शक्यत्वात्। अथार्थप्रकाशनाददृष्टं कल्प्येत तदूरमपि गत्वा कल्प्यमदृष्टं तदुच्चारणादेव कल्पयितुमुचितं। तस्माददृष्टार्था मंत्राः। तदुक्तं

यदि दृष्टार्थतैव स्यान्मंत्राम्नानमनर्थकं ।
प्रत्यायनाददृष्टं चेत्तदुच्चारणतो वरम् । इति।

अत्राहुः –कर्मप्रकरणे मंत्रोच्चारणस्याविधानेन तस्य कर्मविध्यनपेक्षितत्वेन तैरनाक्षेपात् पुंव्यापारस्य मंत्रगतव्यापारत्वाभावेन मंत्रांगत्वानिर्वाहकतया तेनाप्यनाक्षेपात् मंत्रोच्चारणकर्तव्यतायामेव न प्रमाणमस्ति दूरे द्वारकल्पना। किंतु मंत्रगतव्यापारत्वेन मंत्रांगत्वनिर्वाहकतयाभिधानस्य विध्याक्षेपसंभवादभिधानस्य द्वारत्वं युक्तं। तदर्थं तु पश्चादुच्चारणस्य कर्तव्यतासिद्धिः। तस्मादभिधानरूपदृष्टार्था मंत्राः। यस्तु मंत्रैरेवाभिधानं कर्तव्यमिति नियमः। तस्य न किंचिद्दृष्टं प्रयोजनमस्तीति अदृष्टं कल्प्यत इति तदर्थशास्त्रस्यानुवादकता। एतच्च प्रथमाध्यायस्य द्वितीयपादेभिहितं॥ अनुवादितेति॥ पूर्वपक्षरीत्येत्यर्थः॥ नाप्रामाण्य हेतुरिति॥ न च लाघवादनुवादकत्वमेवाप्रामाण्ये प्रयोजकं। ननु सापेक्षानुवादत्वं अनधिगतार्थबोधकत्वस्य प्रामाण्यघटकस्य तावतैव गतत्वादिति वाच्यं। याथार्थ्यस्यैव प्रामाण्यप्रयोजकत्वस्यानुपदमेव वक्ष्यमाणत्वात्। अन्यथा धारावाहनधीप्रामाण्यं न स्यात्। न च तस्याः वर्तमानार्थग्राहकत्वेन तत्तत्क्षणविशिष्टग्राहकतया प्रामाण्यमिति वाच्यं। प्रत्यक्षे सूक्ष्मक्षणभानायोगात्। वर्तमानता तु स्थूलकालोपाधिमादायैव सर्वज्ञानधारासाधारिणीति न विषयभेदिका। नच सत्वश्रुतिरपि सत्वप्रत्यक्षसापेक्षत्वात् सापेक्षानुवादिन्येव। नहि सत्वप्रत्यक्षं विना तन्मूलशक्यशक्त्यादि ग्रहमूलकशब्दप्रवृत्तिसंभव इति वाच्यं। ब्रह्मसत्वबोधकस्य सत्यज्ञानादिवाक्यस्यापि तथैव प्रत्यक्षसापेक्षत्वात्। अज्ञोऽस्मीत्यादि प्रत्यक्ष सिद्धसत्वानुवादित्वाच्च सापेक्षानुवादः स्यादिति भावः। नन्वनुवादोपि धारावाहनज्ञानवत्प्रामाण्यम् अस्यैवेति यदुक्तं तदयुक्तं। तथाहि।

प्रमितप्रापकत्वं नानुवादकत्वं किंतु प्रमाणेन वाऽप्रमाणेन वा बोधितस्य बोधकत्वं तच्चास्ति सत्त्वश्रुतेरिति चेन्मैवं। यतः न बोधिमंदबोधोपि बुधंमन्योभवान्। नहि प्रमितप्रमापकत्वमनुवादक लक्षणमस्माभिरभिहितं किंतु प्रमाणस्य श्रुतेरप्रमाणप्रत्यक्षावधिक मनुवादकत्वं न संभवतीत्यभिहितं। नन्वद्वैतश्रुतिविरोधेन सत्त्व श्रुतिरप्रमाणं अतोऽनुवादिनी स्यात् अत आह॥ श्रुतेरिति॥ सत्त्वश्रुतेः॥ अद्वैत श्रुतिस्तु प्रत्यक्ष गृहीतसत्त्वमेव निषेधतु तथाच न सत्त्वश्रुतिरप्रमाणं अनुवादिनीवेति भावः। ननु सत्त्वश्रुतेः प्रत्यक्षसिद्धसत्त्वग्राहकत्वेपि वाक्यार्थस्य क्रियासमभिव्याहार सिद्धस्यापूर्वत्वेन तद्विषयतयैवाननुवादकत्वोपपत्तावद्वैत श्रुतिविरुद्धतात्विकसत्त्वविषयकत्वकल्पना तदर्थमयुक्ता। परमार्थसद्विषयता तु सर्वश्रुतीनां शुद्धब्रह्मतात्पर्यकत्वेनैव। अवांतरतात्पर्यमादाय व्यावहारिकसद्विषयतेति चेत् मैवं। सत्यज्ञानादिवाक्येप्येवं कल्पयितुं शक्यत्वेन ब्रह्मणोपि न तात्विकसत्त्वसिद्धिः स्यात्। न च सत्यादिवाक्ये न क्रियासमभिव्याहारोऽस्तीति वाच्यं। ब्रह्मविदाप्नोतीत्यादिक्रियायाः सत्त्वात्। इहापि सिद्धार्थवाक्यानां

विश्वमाप्रा अंतरिक्षं महित्वा सत्यमद्धा न किरन्यस्त्वावान्।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु।
सत्रा सोमा अभवन्नस्य विश्वे

इत्यादि बहूनां सत्त्वात्। त्वन्मते जरद्गवादिवाक्यानामपि लक्षणया अखंडब्रह्मपरत्वसंभवेन तद्विलक्षणप्रामाण्यस्य कर्मकांडवाक्ये अनुपपादनात्। अवांतरतात्पर्यप्रतिपादितार्थस्य बाधितत्वेनाप्रामाण्योपपादन एव पर्यवसानाच्च। प्रमाणस्याप्यप्रमाणापेक्षयानुवादितास्त्वित्यत आह। नहीति॥ यथेति॥ द्वैतग्राहिप्रत्यक्षं द्वैतग्राहिश्रुत्यर्थभूतं द्वैतं नोपहरेत् प्रत्यक्षस्याप्रमाणत्वेनार्थानिश्चायकतया द्वैतश्रुतिप्रतिपिपादयिषितद्वैतोपनायकत्वायोगादित्यर्थः॥ प्रमाणत्वेनेति॥ पूर्वं प्रमाणत्वे दोष उक्तः। इदानीं तन्निश्चये दोष उच्यत इति भेदः॥ लोकत इति॥ अज्ञोऽस्मि सत्सुखस्फुरणमित्यादि प्रत्यक्षेणेत्यर्थः। नच ब्रह्मत्वसामानाधिकरण्येन सत्त्वं न प्रत्यक्षसिद्धमिति वाच्यं। अज्ञत्वस्फुरणस्यैव ब्रह्मत्वात्। अखंडार्थनिष्ठेन सत्यादि वाक्येनापि ब्रह्मत्वसामानाधिकरण्येन सत्त्वाप्रतिपादनाच्च॥ लिंगेन चेति॥ नचानुमानममानमिति वाच्यं। प्रत्यक्षादिसहकृतस्य तस्य मानत्वात्। त्वयाप्यविद्यादावनुमानोक्तेः। अत्राप्यज्ञोऽस्मीत्यादि प्रत्यक्षसहकृतत्वादनुमानस्येति भावः। प्रवाहानादीति॥ नच श्रुतेरपौरुषेयत्वेन विज्ञानवादादेर्न तदवधिकपूर्वत्वमिति वाच्यं। त्वन्मते श्रुतेरपि सर्गादावुत्पन्नत्वेन तयोः पौर्वापर्यानिश्चयादित्यर्थः। ननु स्वरूपप्रवाहाभ्यामनादित्व शून्यादनुमानात् विज्ञानादिवादाद्वा सकाशान्न श्रुतेरनुवादकत्वं

षड्विंशतिरस्येति मंत्रोपि चोदकादश्वमेधे प्राप्तः। तस्य चाश्वमेधिकवैशेषिकमंत्रेण चतुस्त्रिंशत्पदोपेतेन अपवादप्रसक्तौ सत्यां अश्वमेधप्रकरण एव न चतुस्त्रिंशदिति ब्रूयात्षड्विंशतिरित्येव ब्रूयादिति पठ्यते। तत्र संशयः। किमश्वमेधप्रकरण एव पठितवैशेषिकमंत्रोऽश्वपशौ पंठनीय इति कृत्वा चोदकप्राप्तमंत्रस्य सर्वथा निवृत्तिः उत न निवृत्तिरिति। तत्र चतुस्त्रिंश दित्यादिवैशेषिकमंत्रस्य प्रकरणपठितस्य बाधायोगत्तेन चोदकप्राप्तस्यैव बाधः। नच वैशेषिकमंत्रस्यापि न चतुस्त्रिंशदित्यादिना प्रतिषेध इति वाच्यं। तस्य चतुस्त्रिंशद्वाजिनो देवबंधोरित्यस्यां ऋचि चतुस्त्रिंशत्पदमुत्कृष्य षड्विंशतिपदं प्रक्षेपणीयं इत्यर्थवत्त्वोपपत्तेः। अतः चोदकप्राप्तस्य सर्वथा बाध एवेति प्राप्ते प्रकरणपठितायां ऋचि चतुस्त्रिंशत्पदप्रतिषेधेन तत्र तत्स्थाने षड्विंशतिपदप्राप्तौ प्रमाणाभावात् षड्विंशतिरित्येव ब्रूयादिति तदनुवादासंभवात् तस्यापि विधौ वाक्यभेदापत्तेरेकवाक्यत्वनिर्वाहाय न चतुस्त्रिंशदित्यनेन वैशेषिकीं ऋचं प्रतिषिध्य षड्विंशतिरित्येव ब्रूयादित्यनेन निष्परिपंथिचोदकप्राप्त प्राकृताध्रिगुवचनमनूद्यत इत्यभ्युपेयत्वात् न तस्य निवृत्तिरिति नवमाध्यायस्य चतुर्थपादे सिद्धांतितं। ननु षड्विंशतिरित्येव ब्रूयादित्यत्र न चतुस्त्रिंशदिति ब्रूयादिति निषेधश्रवणेन चोदकप्राप्तमंत्रापवादकवैशेषिकमंत्रं प्रति बाधकत्वमस्तु विश्वं सत्यमित्यादौ निषेधाश्रवणात्कथं प्रत्यक्षापवादकाद्वैतश्रुतिबाधकत्वमित्यत आह॥ दृश्यंते हीति॥ असंयोगाल्लिट्कित्वविधिसन्निधिपठितस्य निषेधरहितस्य मृडमृदगुधकुषक्लिशवदवसःक्त्वेति सूत्रस्य। न क्त्वासेडिति कित्त्वापवादं प्रति यथा बाधकत्वं। तथा विश्वं सत्यमित्यादेः निषेधविधुरस्यापि सत्त्वग्राहिप्रत्यक्षापवादकाद्वैतश्रुति बाधकत्वं युक्तमित्यर्थः।

कित्त्वं हि क्त्वोनिजंयन्नक्त्वासेडिति निराकृतम्।
मृडेत्यादिविधानं तत्पुनरुज्जीवयत्यदः ।
स्वत एव कितः क्त्वायाः किद्वाचोऽनर्थकत्वतः ।
सेटः क्त्वायाः किन्निषेधनिषेधार्थत्वमास्थितम् ।

इत्युक्तेः। संगृह्णाति॥ तस्मादिति॥ प्रत्यक्षाविषये धर्मिणि सत्यत्वबोधनाद्धर्मिभेदः। विप्रतिपत्त्यादिना प्रत्यक्षागृहीतसत्त्वं प्रमातारं प्रति तद्बोधनात् प्रमातृभेदः। प्रत्यक्षगृहीतव्यावहारिक सत्त्वभिन्नतात्विकसत्त्वरूपधर्मग्रहाद्धर्मभेदः। न हिंस्यादित्याद्यहिंसावाक्यं अहिंसावाक्। एकार्थकनानाशाखास्थवाक्यं भिन्नशाखावाक्। द्वयोः प्रणयंतीति वाक्यं द्विप्रणयनादिशब्देन गृह्यते॥ प्रमाणमिति॥ अबाधितार्थग्राहकमित्यर्थः॥ तद्बाध इति॥ विरुद्धयोर्द्वयोरप्य बाधितार्थत्वानुपपत्तेरित्यर्थः॥ न चेदिति॥ प्रमितप्रमापकत्वाभावादिति भावः। ननु

वा सामानाधिकरण्योपपत्तेर्न सत्त्वबोधकश्रुतेः षड्विधतात्पर्यलिंगोपेताद्वैतश्रुतिबाधकत्वमिति। अत्रोच्यते। एवं हि बाधिततया प्रतीयमानादन्यार्थस्यानुपपत्त्या स एवाबाधितोर्थ इत्यध्यवसीयत इत्युक्तं स्यात्। तथाच तत्त्वमसीत्यादौ सामानाधिकरण्यस्य तत्त्वमादिपदार्थविशिष्टैक्यं विना यस्यार्थस्यानुपपत्त्याविशिष्टैक्यमर्थः स्यात्तत्र लक्षणादिनोपपत्तिरिति यदि तर्ह्यद्वैतवाक्येपि स्वतंत्राद्वितीयमर्थोस्तु। अन्यथा तव मते व्यावहारिकार्थं प्रस्तरवाक्यं व्यावहारिकं यजमानाभेदं बोधयेत्। मानांतरं तु प्रातिभासिकं यजमानभेदं बोधयति। तत्वमसिवाक्यमपि तात्विकं विशिष्टाभेदं बोधयति। प्रत्यक्षं तु तयोर्व्यावहारिकं भेदं बोधयतीति। द्वय्यपि मीमांसोन्मूलिता स्यात्। गतिसामान्यं त्वभ्यासपर्यवसन्नमबाधित्वा साधकमसिद्धंच। सर्वस्यापि वाक्यस्य त्वन्मते अखंडब्रह्मपरत्वात्। तस्माद्वैताद्वैतवाक्ययोर्विरोधे मानांतराविरुद्ध एव वाक्यार्थोऽध्यवसातव्य इति द्वैतश्रुतेरेवाद्वैत श्रुतिबाधकत्वं युक्तं। व्यावहारिकतात्विकार्थविषयत्वेन श्रुतेर्व्यवस्थापनं त्वयुक्तं। अन्योन्याश्रयापातेन विनिगमनाविरहात्। अध्यासे बाधे च सामानाधिकरण्योपपादनमप्ययुक्तं। तदध्यासादेरद्याप्यसिद्धेरिति॥ सुखं सुप्तोऽस्मीति॥ सुप्तौस्वरूपानंदो गृह्यते स्वरूपं च तदज्ञानोपहितमेव साक्षिविषय इति सौषुप्तिकानंदस्यातात्विकत्वमित्यर्थः। ननु साक्षिण उपहितानंदविषयत्वं श्रुतेश्च निरुपाधिकानंदविषयत्वात् नानुवादकत्वं भिन्नविषयत्वादिति चेत् तर्हि प्रत्यक्ष गृहीतसत्त्वापेक्षया श्रुतेरपि भिन्नसत्त्वं विषय इति नानुवादकत्वं श्रुतेरित्यवेहि। साधारणधर्मदर्शनादिजन्यप्रामाण्य संशयाक्रांतत्वरूपानाश्वासनिरासप्रयोजनवत्त्वेन न निष्प्रयोजनानुवाद इत्याह॥ निगमन वदित्यादिना॥ ननु पिपासितस्य शब्दादिना जले ज्ञातेपि न प्रत्यक्षेण तज्ज्ञानमिति तत्सिध्यर्थं प्रत्यक्षापेक्षा प्रकृते तु प्रत्यक्षसिद्धे सत्यत्वे न शब्दापेक्षा भविष्यतीत्यत आह॥ प्रत्यक्षसिद्ध इति॥ न किं चिदवेदिषमिति प्रत्यक्षसिद्धेप्यज्ञाने तम आसीदिति श्रुतेस्त्वयापि प्रमाणत्वेनोपन्यासादित्यर्थः। नच तम आसीदित्यस्य सृष्टिकालसंबंधित्वेनाज्ञानग्राहितया सुषुप्तिकालसंबंधित्वेनाज्ञानग्राहकप्रत्यक्षमपेक्ष्य भिन्नविषयत्वेनैव प्रामाण्यसंभव इति वाच्यं। एतावंतंकालं शुद्धं ब्रह्म नावेदिषमिति अनादिकालसंसृष्टाज्ञानानुभवेन सृष्टिकालेपि तत्सिद्धेः॥

षड्विंशतिरस्येति॥ अग्नीषोमीयपशौ दैव्याः शमितार आलभध्वमित्यादिरूपोऽध्रिगुसंज्ञकः प्रैषोस्ति। तस्मिन् प्रैषे षड्विंशतिरस्य वंक्रयस्ता अनुष्टयोच्चावयतादिति मन्त्रोस्ति। अश्वमेधेऽश्व स्तूपरागो मृग इति प्राजापत्यः त्रयः पशवः सन्ति तस्मिन्प्रकरणे चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्य स्वधितिः समेतीति वैशेषिकमंत्रोस्ति। आश्वमेधिकस्याश्वस्याग्नीषोमीय पशुविकारत्वेन ततः षड्विंशतिपदोपेतमंत्रविशिष्टोऽध्रिगुश्चोदकात्प्राप्नोति। तन्मध्यपतितः

तस्मिन्नेव वाक्ये गुणिनमुच्चार्य किंचिद्विधीयते। यथा दध्ना जुहोति शरमयं बर्हिर्भवतीति। तत्र गुणविधिः। इह तु प्रणयनमुच्चार्य न किंचिद्विधीयते। न तृतीयः। यत्र हि कस्यचिद्विधिस्तत्रार्थवादो भवति। विधिना त्वेकवाक्यत्वादित्युक्तं। प्रणयनं तु दर्शपूर्णमासयोर्विधीयते। इह तु वाक्ये तदविधानात् किमर्थवादेन। तस्मात् प्रणयनपुनः श्रुतिरनन्यार्था भेदिका भवतीति दर्शपूर्णमासपूर्वकाद् गार्हपत्यावधिकाहवनीयप्रणयनाद पूर्वमेवाहवनीयावधिकमुत्तराहवनीयप्रणयनं द्वयोः प्रणयन्तीति वाक्येन बोध्यते। तदुक्तं टुपटीकायां तंत्ररत्ने च सप्तमाध्याये तृतीयपादे। शाखांतरे अग्निप्रणयनोत्तरकालं आहवनीयात् द्वावध्वर्युप्रतिप्रस्थातारौ अग्नी प्रणयत इति श्रूयते। तदेकवाक्यतया द्वयोः प्रणयंतीत्यनेनाहवनीयात् प्रणयनं विधीयते। तेन चोदकप्राप्तं यद्गार्हपत्यप्रणयनं ततो विलक्षणमिदं तदुत्तरकालमाहवनीयाद्विहारयोः प्रणयनं पशुबंधवदिति। अत्र कश्चिदग्निप्रणयनमबुद्धा तत्स्थाने अप्प्रणयनमिति लिखति। स मीमांसागंधवैधुर्यमात्मनो व्यानंजेत्युपेक्षणीयः॥ श्रुतेरिति॥ विश्वं सत्यमित्यादिकायाः॥ तत्सत्यमित्यादीति॥ तव मते सन् घटः सद्घटज्ञानं अहमस्मि अज्ञोस्मि सत्सुखस्फुरणमित्यादिप्रत्यक्षेणात्मसत्यत्वप्राप्तेः आत्मसत्त्व प्रतिपादिकायास्तत्सत्यं स आत्मेत्यादिकायाः श्रुतेर्वैयर्थ्यं स्यात्तन्माभूदित्येवमर्थमित्यर्थः।

ननु न विश्वसत्यत्वश्रुतिस्त्रैकालिकसत्त्वपरा। त्रैकालिकसत्त्वनिषेधकश्रुतिविरोधात्। नच वैपरीत्यमेव किं न स्याद्विनिगमकाभावादिति वाच्यं। तात्पर्यान्यथानुपपत्तिगतिसामान्ययोरेव विनिगमकत्वात्। अद्वैतश्रुतिर्हि षड्विधतात्पर्यलिंगोपेता। तत्र त्रिविधं तात्पर्यलिंगं प्रामाण्यशरीरघटकं अर्थनिष्ठमज्ञातत्वमबाधितत्वं प्रयोजनवत्त्वं च। त्रिविधं तु शब्दनिष्ठमतिप्रसंगवारकं उपक्रमोपसंहारैकरूप्यमभ्यासोर्थवादश्चेति। तत्र शब्दनिष्ठलिंगत्रये तावन्नविवादः। सर्वासामुपनिषदामेवं प्रवृत्तत्वात् मानांतरासिद्धतया मोक्षहेतुज्ञानविषयतया चाज्ञातत्वं प्रयोजनवत्त्वं च निर्विवादमेव। अबाधितत्वमात्रं संदिग्धं। तच्चान्यथानुपपत्तिगतिसामान्याभ्यां निर्णीयते। नहि सर्वप्रपंचनिषेधरूपमद्वैतं व्यावहारिकं। येन तत्र श्रुतेर्व्यावहारिकं प्रामाण्यं स्यात्। अतस्तत्र तात्विकमेव प्रामाण्यं। द्वैतसत्यत्वं तु व्यावहारिकं। अतस्तत्र न श्रुतेस्तात्विकं प्रामाण्यं। परस्परविरुद्धयोर्द्वयोस्तात्विकत्वायोगात्। वस्तुनि च विकल्पासंभवात्। तात्विक व्यावहारिकप्रामाण्यभेदेन व्यवस्थोपपत्तेः। स्तुतिपरत्वेनावधारितस्य विश्वसत्यत्ववाक्यस्यैवान्यथाव्याख्यातुमुचितत्वात्। तथा हि। चतुर्धा हि सामानाधिकरण्यं। अध्यासे इदं रजतमित्यादौ। बाधायां स्थाणुः स पुमान्नैवेत्यादौ। विशेषणविशेष्यभावेन तु नीलमुत्पलमित्यादौ। अभेदेन तत्त्वमसीत्यादौ। अत्र च बाधायामध्यासे

वेति संशये अनन्यार्थपुनःश्रुतिरूपादभ्यासाद्विद्यत इति प्राप्ते पुनः श्रुत्या हि कर्म विधेयमित्येव तावत्सिध्यति। नतु भेदः। विधिवशात्तु भेदसिद्धिरन्यत्र विहितस्य विधानायोगादिति। इह तु शाखाभेदानामध्येतृभेदनियतत्वेन विहितस्यापि पुरुषांतरं प्रति विधिः संभवतीत्यन्यथासिद्धा पुनरुक्तिर्न कर्म भिनत्तीति। नामरूपाद्युदाहरणानि वार्तिकादिषु द्रष्टव्यानि॥ येन पुंसेति॥ प्रतिपत्तृव्यवस्थयाऽनधिगतार्थबोधकत्वस्येहापि सत्त्वादित्यर्थः। नच पुरोवादपूर्वकत्वादनुवादस्यात्रायं पुरोवाद इत्यस्यैवाभावान्न शाखांतरस्थवाक्यस्यानुवादकत्वप्रसंग इति वाच्यं। ''भूयस्त्वेनोभयश्रुती'' ति न्यायेन कर्मस्वरूपनिश्चयवद्वेदद्रष्टृप्रथमव्यक्त्यपेक्षया पुरोवादस्यापि निश्चयात्। सादिप्रत्यक्षस्यानादिवेदात्पुरोवादकत्वासंभवाच्च। तस्मात्प्रतिपत्तृव्यवस्थयैवाननुवादकत्वं वाच्यमिति भावः॥ न निर्णीतिति॥ एतच्च विशेषादर्शनकालीनसंशयस्य प्रतिबंधकतया तत्सामग्र्या अपि तथात्वमित्यभिप्रेत्योक्तं। नन्वेवमनुवादः क्वापि न सिध्येदित्यत आह॥ अनुवादकत्वं त्विति॥ नच सर्वाविवाद एकत्रासंभवीति वाच्यं। अग्निर्हिमस्य भेषजं अस्यामोषधयो जायंते अग्निरेनां स्वदयतीत्यादिषु सर्वाविवादस्य सिद्धत्वात्॥ वादिविप्रतिपत्तीति॥ ननु तत्र वादिविप्रतिपत्तिदर्शनेन देहव्यतिरिक्तात्मनः प्रत्यक्षतैव नास्ति। अन्यथा प्रत्यक्षप्रामाण्यवादिनश्चार्वाकादेस्तत्र विप्रतिपत्तिर्नस्यादित्युक्तं बृहदारण्यकभाष्ये। नतु वादिविप्रतिपत्तिनिरासेनास्तीत्यादेः सार्थकत्वमननुवादकत्वं वा तत्रोक्तमिति चेत् मैवं। तद्वदेव वादिविप्रतिपत्तिदर्शनाज्जगत्सत्यत्वमपि न प्रत्यक्षविषयः। अन्यथा प्रत्यक्षप्रामाण्यावादिनस्तव ममेव जगत्सत्यत्वे विप्रतिपत्तिर्न स्यादित्येवं परत्वादस्य वाक्यस्य न कोपि दोषः। अत एव बृहदारण्यकभाष्य एवोक्तं तस्माज्जन्मांतरसंबंध्यात्मास्तित्वे जन्मांतरेप्विष्टा निष्टप्राप्तिपरिहाररूपविशेषोपाये च शास्त्रं प्रवर्तत इति॥

द्वयोः प्रणयंतीति॥ चातुर्मास्यानीति कर्मनाम। तेषु वैश्वदेववरूणप्रघाससाकमेध शुनासीरीयाख्यानि चत्वारि पर्वाणि। तत्र द्वयोः प्रणयंति तस्माद्वाभ्यामेतीति श्रूयते। तस्य च द्वाभ्यामेतीति वाक्यशेषात् ''ऊरू वा एतौ यज्ञस्य यद्वरुणप्रघासश्च साकमेधश्चेति'' गमनसाधनोरुसंस्तुतमध्यपर्वद्वयविषयत्वे निश्चिते चातुर्मास्यानां दर्शपूर्णमासविकृतित्वेन प्रणयनस्य प्राप्ततया प्रणयनपुनःश्रुतेर्वैयर्थ्यं। तथाहि। सा किं परिसंख्यार्था वा गुणार्था वाऽर्थवादार्था वा। नाद्यः। तथासति द्वयोर्मध्यमपर्वणोरेव प्रणयनं नेतरयोर्द्वयोरिति तत्राहवनीयाभावाद्यागाभावः स्यात्। अथोच्येत। न प्रणयनमात्रं परिसंख्येयं। किंतु धर्मपरिसंख्या। द्वयोरेव धर्मवत्प्रणयनं नेतरयोरिति। मैवं। नहि धर्मवद्दर्शपूर्णमासयोः प्रणयनं। येन धर्ममात्रपरिसंख्यायां कृतायां केवलमधर्मकं प्रणयनमितरत्रापि क्रियते। तस्मान्न परिसंख्यार्था। न द्वितीयः। यत्र हि

यथार्थशब्दसमानार्थात्ततोऽबाध्यत्वरूपार्थस्यैव प्रतीतेः। असत्यमिति। असत्यं ब्रह्मण्यप्रतिष्ठितं जगत् ये आहुः ते असुरा इत्यर्थः। नाभावइति॥ अभावः सद्भिन्नं जगन्न भवति उपलब्धेः सत्त्वेनोपलब्धेरित्यर्थः॥ वैधर्म्यादिति॥ जगत् स्वप्नमरीचितोयतुल्यं न भवति। वैधर्म्यात् स्वप्नादिवैलक्षण्यानुभवादित्यर्थः। स्वप्नशब्देनात्र स्वप्नगजादिगतं जाग्रत्त्वं गृह्यते। जगतः स्वप्नसाम्यस्य सिद्धांतेपीष्टत्वादिति विभावनीयं॥ त्वन्मत इति॥ परमते घटो नित्यः इत्यादिष्विव सन् घट इत्यत्र घटे सत्त्वं न विषयः। किंत्वधिष्ठानभूत सद्ब्रह्मानुवेधमात्रमित्यंगीकाराद्घटादिषु सत्यत्वस्य प्रत्यक्षतो प्राप्तेरिति भावः॥ यच्चिकेतेत्यादीति॥ यच्चिकेतेत्यत्रेश्वरकृतजगदनुवादेन न सत्यत्वमात्रविधिः संभवति। जगत ईश्वरकृतत्वस्य केवलानुमानाद्यवेद्यतया मानांतराप्राप्तत्वेनानुवाद्यत्वायोगात्। किंतु सत्यकामादिवाक्य इव सत्यत्वविशिष्टजगत्स्रष्टृत्वमीश्वरस्योच्यते। विधानाभावाच्च न विशिष्टविधिशेषः। नचास्य स्तुतिपरतया न स्वार्थपरतेति वाच्यं। मानांतराविरोधे सति आ ते सिंचामि कुक्ष्योरित्यादेर्देवताविग्रहस्येव जगत्सत्यत्वस्याप्येतस्मात्सिद्धेः। उक्तंचैतद्वाचस्पत्ये देवताधिकरणे॥ पृथिवीति॥ घटादावितरभेदस्य प्रत्यक्षेण ब्राह्मणो न हंतव्य इत्यादिना ब्राह्मणादावेकदेशे हिंसाभावस्य सिद्धावपि पृथिवीमात्रे प्राणिमात्रे च तयोरसिध्या यथा नानुवादकत्वं तथेहापि कतिपयेषु घटादिषु प्रत्यक्षेण सत्त्वग्रहेपि तदयोग्येषु श्रुत्या सत्यत्वबोधनान्न तस्या अनुवादकत्वमित्यर्थः। ननु दृष्टांते हि पृथिवीत्वं हिंसात्वं चैकोऽनुगतो धर्म इति तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्राननुवादकत्वं युक्तं। इह तु विश्वत्वं नाम नैको धर्मोस्ति। किंतु विश्वशब्दः सर्वनामत्वान्न तेन रूपेण घटपटादीनामुपस्थापकः। तेषु च प्रत्येकं सत्यत्वं गृहीतमेवेति कथं नानुवादकता। प्रकारवैलक्षण्याभावादिति चेन्नैवं। सर्वनामपदेषु तदादिषु प्रकृतानां तत्तद्रूपेणोपस्थापकत्वेपि जगदादिशब्दसमानार्थकविश्वादिशब्दैः सर्ववृत्तिधर्मप्रकारेण सर्वोपस्थापकत्वस्यानुभवसिद्धत्वेन घटत्वादिप्रकारभिन्नप्रकारेण जगत्सत्यत्वस्य विश्वं सत्यमित्यादिना बोधनात्। यच्चोक्तं हिंसात्वमेकोनुगतो धर्म इति तत्तुच्छं। नहि न हिंस्यादित्यहिंसात्वावच्छेदन किंचिद्विधीयते। किंतु भूतेषु हिंसाभावः। तथाच किं हिंसात्वस्यानुगमकथनेनेति भावः॥ अतिप्रसंगादिति॥ सिद्धमनूद्यासिद्धं विदधदपि दध्ना जुहोतीत्याद्यनुवादवाक्यमापद्येतेत्यर्थः॥ एकशाखास्थेति॥ तत्तच्छाखागतवाक्यानां तत्तच्छाखाध्येतॄन्प्रत्यर्थवत्त्वं। अन्यथा अनन्यार्थपुनःश्रुतिरूपादभ्यासाच्छाखांतरे कर्मभेदः स्यादित्यर्थः।

उक्तं च द्वितीयस्य चतुर्थपादे नामरूपधर्मविशेषपुनरुक्तिनिंदाशक्तिसमाप्ति वचनप्रायश्चित्तान्यार्थदर्शनाच्छाखांतरे कर्मभेदः स्यात्। नानाशाखाम्नाताग्निहोत्रादि भिन्नं न

न्यायामृततरङ्गिणी

विश्वमिथ्यात्वस्यागमबाधमाह॥ किंचेति॥ विश्वं सत्यमित्यादि॥ विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनंति व्रतं वां। अच्छेंद्रा ब्रह्मणस्पती हविर्वो अन्नं युजेव वाजिना जिगातं इति मंत्रस्यायमर्थः। हे मघवंतौ धनवंतौ मखवंताविति वा इंद्राब्रह्मणस्पती युवोः युवयोः संबंधि विश्वं जगत् सत्यमित् सत्यमेव वां युवयोः व्रतं सत्यजगत्सर्जनादि आपश्चन व्यापनशीलाः देवता अपि प्रमिनंति जानंति। डु मिञ् प्रक्षेपणे क्रयादिः नः अस्मदीयं हविर्दध्यादिकं प्रति अन्नं च पुरोडाशादिकं च प्रति अच्छजिगातं सम्यक् आगच्छतं। जिगातिः गतिकर्मा जौहोत्यादिकः। काविव? वाजिनावन्नवंतौ युजेव सखायाविवेति यस्तु विश्वं सर्वं सद्भावत्वाद्वा फलस्यावश्यकत्वाद्वा सत्यं कर्म युवोरित् युवाभ्यामेवोद्दिश्य क्रियते। वां युवयोर्व्रतं जगत्सर्जनादि आपो देवता अपि न हिंसंति। चनेत्येतत्पदद्वयं। अध्यापकप्रसिद्ध्यात्वेकं पदमित्याह। तन्न। सत्यशब्दस्यकर्मण्यप्रसिद्धेः अबाध्य एव प्रसिद्धेश्च। अन्यथा सत्यं ज्ञानमित्यादावपि सद्धेतुत्वादिस्तदर्थः स्यात्। पदगणनायामध्यापकेषु चैकपदत्वेन प्रसिद्धस्य भिन्नपदत्वे मानाभावात्। नुकं इत्यादिवत् चन शब्दस्याव्ययेषु चनाभ्यां पृथक् पाठाच्च। ममच्चनत्वा युवतिः परासमच्चनत्वा कुषवा जगारेत्यादिषु चनशब्दस्यैकपदत्वेनैव माधवीये व्याख्यातत्वेनेहापि तथात्वस्यैवोचितत्वात्। नेह नानास्ति किंचनेत्यादिषु तदेकपदत्वस्य स्वयमप्यंगीकृतत्वाच्च। शाक्मना शाको अरुणःसुपर्णः। आ यो महः शूरः सनादनीडः। यच्चिकेत सत्यमित्तन्न मोघं वसुस्पार्हमुत जेतोत दाता। इतींद्रप्रतिपादकमंत्रस्यायमर्थः। शाक्मना शक्मैव शाक्म। तेन शाक्मना बलेन। शाकः शक्तः स्वशक्त्यैव सर्वं कर्तुं शक्त इत्यर्थः। नहि इन्द्रे सहायांतरापेक्षाऽस्ति इंद्रत्वादेव। अरुणोऽरुणवर्णः सुपर्णः शोभनपतनः यः प्रसिद्धः। आ अभिव्याप्तः महः महान् शूरः विक्रांतः सनात् पुराणः अनीडः नीडस्याकर्ता। नहींद्रोग्निवत्कुत्रचिदपि यज्ञे निकेतनं करोति। स्पार्हं स्पृहणीयं वसुधनं जेता जयति शत्रुभ्यः सकाशात् उत अपि दाता ददाति स्तोतृभ्यः। जेता दातेति तृन्। तेन न लोकेत्यादिना षष्ठीनिषेधः। एवंविधः इंद्रः यत् यस्मात् सत्यमित सत्यमेव चिकेत तत्तस्मान्न मोघं न मिथ्या। कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्य इति मंत्रस्यायमर्थः। कविः ज्ञानी।मनसां मनसा वा ईष्टे इति मनीषी। परिभावयति सर्वानिति परिभूः सर्वोत्तमः स्वयंभूः स्वरूपसामर्थ्यः। शाश्वतीभ्यः समाभ्यः सर्वदा। याथातथ्यतः सत्यान् अर्थान् महदादीन् व्यदधात् निर्मितवान्। नच याथातथ्यत इत्यस्य पूर्वसृष्टप्रकारेण सर्जनमर्थ इति वाच्यं।

नापि स्वप्नवैधर्म्योक्त्ययोगः, तस्याः 'विमतं निस्तत्त्वं तर्कपीड्यत्वात् मरुमरीचिकाजलव'दित्यनुमाने बाध्यत्वप्रमाणा गम्यत्वदोषजन्यत्वाद्युपाधिप्रदर्शनपरत्वात् विज्ञानवादनिराकरणपरेणापि नानेन सूत्रेण विरोधः। रुपादिरहितब्रह्मजगदुपादानत्वप्रतिपादकसमन्वयस्य नीलाद्याकारं विज्ञानं साधयता अनुमानेन विरोधसन्देहे–

स्वप्नधीसाम्यतो बुद्धेर्बुध्याऽर्थस्य सहेक्षणात्।
तद्भेदेनानिरुप्यत्वात् ज्ञानाकारोऽर्थ इष्यताम्॥

विमता धीः, न ज्ञानव्यतिरिक्तालम्बना, धीत्वात्, स्वप्नधीवत्। विपक्षे च ज्ञानाभानेऽप्यर्थभानप्रसङ्गो बाधकः। नहि भिन्नयोरश्वमहिषयोः सहोपलम्भनियमोऽस्ति। तस्मान्न ज्ञानातिरिक्तं सदिति प्राप्ते परिहातसूत्रं 'नाभाव उपलब्धे'रित्यादि।

बाधेन सोपाधिकतानुमाने उपायाभावेन सहोपलम्भः।
सारूप्यतो बुद्धितदर्थभेदस्थूलार्थभङ्गो भवतोऽपि तुल्यः॥

सूत्रार्थस्तु – नाभावः ज्ञानातिरिक्तस्यार्थस्य नासत्वम्, किंतु व्यवहारदशाबाध्यार्थक्रियाकारित्व रूपं सत्त्वमेव। उपलब्धेः ज्ञानातिरेकेण प्रमाणैरुपलब्धेः। स्वप्नवैधर्म्योक्तिः बाध्यत्वाद्युपाधिप्रदर्शनाय। तेन बाधात् सोपाधिकत्वाच्च पूर्वानुमानं दुष्टमित्यर्थः। तस्मान्नैवमपि विरोधशङ्का। तदुक्तं तस्मान्न ज्ञानाकारोऽर्थः, किंतु बाह्यः, स चार्थक्रियाकारित्वसत्त्वोपेतोऽपि अद्वैतश्रुतिवशाद् ब्रह्मणि कल्पितो न परमार्थसन्निति सिद्धान्तस्य सुगतमताद्भेद इति। उक्तं चात्मतत्त्वविवेके–

'न ग्राह्यभेदमवधूय धियोऽस्ति वृत्ति
स्तद्बाधने बलिनि वेदनये जयश्रीः।
नो चेदनिन्द्यमिदमीदृशमेव विश्वं
तथ्यं -तथागतमतस्य तु कोऽवकाशः॥' इति।

धर्मिग्राहकमानबाधश्च प्रागेव परिहृत इति शिवम्॥ इति विश्वमिथ्यात्वस्यागमादिबाधोद्धारः॥

चेति सूत्रं बलवत् स्याद्, अग्नीषोमीयवाक्यादहिंसा वाक्यम्, षोडशिनो ग्रहणवाक्यादग्रहणवाक्यम्, 'सत्यं ज्ञानमनन्त'मित्यादिवाक्याद् 'असद्वा इदमग्र आसी'दित्यादिवाक्यं च बलवत् स्यादित्यपास्तम्। सामान्यविशेषभावादिना सावकाशत्वनिरवकाशत्वादिरूपबलवैपरीत्यात्। 'विश्वं सत्य' मित्यादेस्तु व्यावहारिक सत्त्वविषयतया अन्यशेषतया च सावकाशत्वादेः प्रागुक्तत्वात्। तस्मान्न सत्त्वश्रुतिविरोधः। नापि

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः॥ (गी०)

इत्यादिस्मृतिविरोधः, सद्विविक्तत्ववादिनो मम जगत्यसद्वैलक्षण्याङ्गीकारेण तत्प्रतिपादकस्मृति विरोधाभावात्।

ननु 'नाभाव उपलब्धेः' 'वैधर्म्याच्च न स्वप्नादिव'दिति सूत्रद्वयेन जगतः पारमार्थिकसत्त्वबोधनेन विरोधः। न चानेन शून्यवादिनिरासार्थेनासद्वैलक्षण्यमात्रप्रतिपादनान्न विरोधः। अर्थक्रियाकारित्वलक्षणस्यासद्वैलक्षण्यस्य शून्यवादिमतेऽपि सत्त्वेन तन्मतनिरासार्थत्वानुपपत्तेः। निषेधाप्रतियोगित्वरूपस्यासद्वैलक्षण्यस्य त्वयाप्यनङ्गीकारात्। असद्वैलक्षण्यमात्रस्य साधने सूत्रे स्वप्नवैलक्षण्योक्त्ययोगाच्च। व्याबहारिकसत्यत्वमात्रेण स्वप्नवैलक्षण्यस्य त्वयाप्यङ्गीकाराद्। असद्वैलक्षण्यमात्रस्य तन्मतेऽपि सत्वाच्च। तदुक्तं बौद्धैः– 'द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना' इति चेन्न। सूत्रार्थानवबोधात्। तथा हि – सद्रूपाद् ब्रह्मणो जगत्सर्गं वदतः समन्वयस्य सर्वमसदित्यनुमानेन विरोधसन्देहे

'सन्नासन्न सदसन्न नचानुभयतत्त्वकम्।
विमतं तर्कपीडत्वत्वान्मरीचिषु यथोदकम्॥'

इति ब्रह्मसाधारण्यां निस्तत्त्वतायां प्राप्तायां सूत्रेण परिहारः। सतो ब्रह्मणो नाभावः न शून्यत्वम्, उपलब्धेः सत्त्वेन प्रामाणात् प्रतीतेः। तथा च किंञ्चित्परमार्थसदवश्यं शून्यवादिनापि स्वीकार्यम्, अन्यथा बाधस्य निरवधिकत्वप्रसङ्गादिति सूत्रार्थः। स च न प्रपञ्चमिथ्यात्वविरोधी। तथा चोक्तं–

'बाधितोऽपह्नवो मानैः व्यावहारिकमानता।
मानानां तात्त्विकं किंचिद् वस्तु नाश्रित्य दुर्भणा॥' इति।

अथवा व्यावहारिकसत्त्वपरेयं विश्वसत्यत्वश्रुतिः। न च व्यावहारिकसत्त्वे सर्वविप्रतिपत्तेस्तत्प्रतिपादनवैयर्थ्यम्। दशाविशेषे स्वर्गनरकादिसत्त्वप्रतिपादनेन तत्प्राप्ति परिहारार्थं प्रवृत्तिनिवृत्त्योरेव तत्प्रयोजनत्वात्। व्यावहारिकत्वं च ब्रह्मज्ञानेतराबाध्यत्वं न तु अबाध्यत्वम्, मिथ्यात्वबोधकश्रुतिविरोधात्। न चैवं दृढभ्रान्तिजनकत्वाद् अत्यन्ताप्रामाण्यापत्तिः, स्वप्नार्थप्रतिपादनवदुपपत्तेः। एतावानेव विशेषः – तत् प्रातिभासिकम्, इदं तु व्यावहारिकमिति। ननु मिथ्यात्वश्रुतेर्लक्षणया अखण्डचिन्मात्रपरत्वेन सत्त्वबोधनाद् अविरोधित्वमेव। न। अखण्डार्थबोधस्य द्वितीयाभावबुद्धिद्वारकत्वेन जगत्सत्यत्वविरोधित्वात्। न च प्रपञ्चसत्यत्वश्रुतेरप्रामाण्यप्रसङ्गः, अतत्त्वावेद कत्वस्यावान्तरतात्पर्यमादायेष्टत्वात्। परमतात्पर्येण तु तत्त्वावेदकत्वं सर्वश्रुतीनामपि समम्। प्रातिभासिकव्यावृत्तस्य व्यावहारिकस्य तद्वति तत्प्रकारकत्वादिरूपस्य निराकर्तुमशक्यत्वात्। आसां व्यावहारिकं प्रामाण्यमव्याहतमेव। 'असद्वा इदमग्र आसी'दित्यादिश्रुत्यनुरोधेनापि 'तत्सत्य'मित्यादिश्रुतिर्न ब्रह्मणि व्यावहारिकसत्त्वपरा। ब्रह्मणो व्यवहारातीतत्वात्। तस्यापरमार्थत्वेन च निरधिष्ठानतया शून्यवादापत्तेः। किंचित्तत्त्वमगृहीत्वा च बाधानुपपत्तेः। अत एव सत्यत्वश्रुतिविरोधेन मिथ्यात्वश्रुतिरेवान्यपरेत्यपि न। षड्विधतात्पर्यलिङ्गोपेतत्वेन मिथ्यात्वश्रुतेरनन्यपरतया प्रबलत्वात्। वैदिकतात्पर्यविषयस्य च तात्त्विकत्वनियमेन तात्पर्यज्ञापकानामपि लिङ्गानामर्थतथात्व एव पर्यवसानात्। सत्त्वश्रुतिवाक्यस्थपदानां चान्यपरत्वान्न सत्त्वे तात्पर्यलिङ्गाशङ्का।

ननु यदि सत्त्वश्रुतिः प्रत्यक्षप्राप्तार्थत्वान्न स्वार्थपरा, तर्हि मिथ्यात्वश्रुतिरपि तद्विरुद्धार्थत्वात् स्वार्थपरा न स्यात्। तत्प्राप्तितद्विरोधयोस्तात्पर्याभावहेत्वोरुभयत्रापि समत्वाद् इति चेन्न। प्रत्यक्षापेक्षया चन्द्राधिकपरिमाणबोधकागमस्येव मिथ्यात्वबोधकागमस्यापि बलवत्त्वेन प्रत्यक्षप्राप्तानुवादिसत्त्वश्रुत्यपेक्षयापि बलवत्त्वात् (प्राप्तार्थाप्राप्तार्थयोर्विरोधे प्राप्तार्थस्याप्राप्तविध्यर्थत्वेनान्यशेषत्वनियमादप्राप्तार्थस्यैवानन्यशेषत्वेन बलवत्त्वात्।) अन्यथो भयोरपि अप्रामाण्यापत्तेः। तदुक्तं संक्षेपशारीरके- 'अतत्परा तत्परवेदवाक्यैर्विरुध्यमाना गुणवाद एवेति।' अत एवानन्यशेषमिथ्यात्वश्रुतिविरोधात् न प्रत्यक्षागृहीतत्रिकाला बाध्यत्वरूपसत्यत्वपरा जगत्सत्यत्वश्रुतिरित्युक्तम्। अद्वैतश्रुतेश्च प्राबल्ये निरवकाशत्वतात्पर्य वत्त्वादिकमेव प्रयोजकम्, न निषेधवाक्यत्वम्। एतेन निषेधवाक्यत्वेन प्राबल्ये किति तद्धिते वृद्धिविधायकात् 'किति च' इति सूत्रात् सामान्यतो गुणवृद्धिनिषेधकं ङिति

सुषुप्तिमुक्तिकालीननिष्प्रपञ्चतायां स्वरूपसुखानुभवेन तस्याः पुरुषार्थत्वात्। तथा च श्रुतिः ''द्वितीयाद्वै भयं भवति'' इति। अथ 'तस्मादेकाकी न रमत' इति श्रुतेः सप्रपञ्चतापि पुरुषार्थः। न। तस्या दुःखसाधनत्वेन पुरुषार्थत्वायोगात्। कर्मकाण्डवदस्याः श्रुतेः अविवेकिपुरुषपरत्वाच्च।

ननु 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती'ति भेदज्ञानस्य मोक्षहेतुत्वश्रवणात् कथं न सप्रपञ्चता पुरुषार्थ इति चेन्न। मतेः पूर्वं ममापि प्रेरकपृथक्त्वदृष्टेः, सगुणब्रह्मज्ञानवत् प्रेरकत्वेन ब्रह्मज्ञानस्यापि परम्परयोपकारकत्वात्। 'एकधैवानुद्रष्टव्य'- मित्यादिवाक्यस्वारस्यादभेदज्ञानस्यैव साक्षात् मोक्षहेतुत्वात्। अत एव प्रेरकत्वज्ञानस्य जोषहेतुत्वमुक्तम्। तथोत्तरत्रापि 'वेदविदो विदित्वा लीना ब्रह्मणि तत्परा ये विमुक्तास्तदात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोक' इत्यभेद एव श्रूयते। अतो न भेदज्ञानस्य मोक्षहेतुत्वम्। एतेन 'नेह नाने'ति श्रुतिरेव 'विश्वं सत्यम्' इत्यबाध्यत्वरूपबाधनिषेधाय विज्ञानवादादिप्राप्तविश्वनिषेधानुवादिनी किं न स्यादिति निरस्तम्। भावाभावयोः परस्परविरहरूपत्वे समेऽपि भावग्रहो निरपेक्षत्वात् नाभावग्रहमपेक्षते। अभावग्रहस्तु सप्रतियोगिकतया भावग्रहमपेक्षते। अतो 'नेति नेति' श्रुतेरेव सत्त्वश्रुत्यपेक्षा, न तु सत्त्वश्रुतेर्नेति श्रुत्यपेक्षा, अन्यथा अन्योन्याश्रयापत्तेः।

ननु उत्सर्गापवादन्यायोऽस्तु, यथा हि 'न हिंस्यात् सर्वा भूतानी'ति श्रुतिरविशेषप्रवृत्तापि हिंसात्वसामान्यस्य प्रत्यक्षादिप्राप्तत्वान्निषेध्योपस्थितौ नाग्नीषोमीयवाक्यमपि निषेध्यसमर्पणायापेक्षते, तथा 'नेतिने' त्यादिश्रुतिरविशेषप्रवृत्तापि प्रत्यक्षप्राप्तघटादि सत्त्वरूपनिषेध्यमादाय निराकाङ्क्षा सती न प्रत्यक्षाप्राप्तधर्माधर्मादिसत्यत्वबोधिकां 'विश्वंसत्य' मित्यादिश्रुतिमपि निषेध्यसमर्पणायापेक्षितुमर्हति। यत्र तु मानान्तरेण निषेध्यस्याप्राप्तिस्तत्र निषेधश्रुतिः निषेध्यसमर्पणाय श्रुत्यन्तरमपेक्षत एव। यथा षोडशिग्रहणाग्रहणयोः। मानान्तरेण निषेध्योपस्थितावपि वाक्यापेक्षणे अग्नीषोमीयहिंसाया अपि निषेध्यत्वेनाधर्मत्वं स्याद् इति चेत्, मैवम्, अग्नीषोमीयवाक्यस्य निषेधविषयन्यूनविषयत्वेनानन्यशेषतया स्वार्थतात्पर्यवत्त्वेन च न निषेध्यसमर्पणद्वारेण निषेधवाक्यशेषता। विश्वं सत्य' मित्यादेस्तु निषेधविषयसमविषयत्वेन स्वार्थतात्पर्यरहितत्वेन च निषेध्यसमर्पणद्वारेण निषेधवाक्यशेषतोचितैव। अत एव प्रत्यक्षाप्राप्तधर्मादिसत्त्वोपस्थापनेन वाक्यसाफल्यमपि। स्वार्थतात्पर्यरहितत्वेन च नाग्नीषोमीयवाक्यतुलत्यत्वमित्युक्तम्। अतो दृश्यत्वादिहेतोर्धर्माद्यंशेऽपि श्रुत्या न बाधः।

स्वप्नाध्याये, शुक्तौ 'नेदं रजत' मिति वाक्ये च व्यभिचारात्। अथ तत्र ज्ञानविषयतया निषेध्यतया चानुवाद इति न तात्त्विकत्वम्, तर्हि प्रकृतेऽपि 'नेह नाने'ति निषेधार्थत्वादस्यानुवादस्य न तात्त्विकत्वमिति गृहाण। अत एव न वाक्यार्थस्यासत्त्वप्रसङ्गः, तात्पर्यविषयस्य सत्त्वात्।

अथ 'किं चने'त्यनेनैवानुवादस्य कृतत्वात् किमधिकेनेति चेन्न, सामान्यतो निषेधस्य हि 'किं चने'त्यनेन निषेध्यसमर्पणेऽपि विशिष्य निषेधे विशिष्य निषेध्यसमर्पणस्योपयोगात्। अथ निषेधवाक्यस्य न निषेध्यसमर्पकवाक्यान्तरापेक्षा, अन्यथा 'न कलञ्जं भक्षये'दित्यादावपि निषेध्यसमर्पणार्थं 'कलञ्जं भक्षये' दित्यादिवाक्यान्तरसापेक्षत्वप्रसङ्गः इति चेन्न, सर्वत्रापेक्षानियमाभावात्। सति संभवे प्रकृते त्यागायोगात्। 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाती'त्यदौ वाक्यान्तरप्राप्तस्य निषेधदर्शनाच्च। न च तद्वदेव विकल्पापत्तिः, सिद्धे वस्तुनिविकल्पायोगात्। षोडशिग्रहणाग्रहणवाक्ययोरुभयोरपि मानान्तराप्राप्तविषयत्वेन तुल्यबलत्ववदिह सत्त्वश्रुतेर्मानान्तरप्राप्तविषयत्वेन निषेधश्रुतेश्चा प्राप्तविषयत्वेन तुल्यबलत्वाभावाच्च। अत एव निषेधवाक्यप्राबल्यात्तदनुरोधेनेतरन्नीयते।

अथ–अप्राप्तान्यप्राप्त्यर्थत्वेऽप्यलौकिकस्य 'आपश्च न प्र मिनन्ती'इत्यादिपदार्थसंसर्गस्य विधेयस्य सत्त्वान्न निषेध्यार्थानुवादकत्वमिति चेन्न, तदन्यपरत्वस्य प्रागेवोक्तत्वात्। ननु 'यत्तन्ने'ति निषेधानुवादलिङ्गाभावान्नानुवादः। न। यत्किंचिल्लिङ्गाभावेन लैङ्गिकाभावस्य वक्तुमशक्यत्वात्। ननु तर्हि 'तत्सत्यमि' त्याद्यपि 'न सत्तन्नासदुच्यत' इति, 'असद्वा इदमग्र आसी'दिति च निषेधाय 'सन् घटः' 'सद् घटज्ञानम्' 'सत्सुखस्फुरण' मित्यादिसिद्धब्रह्मसत्त्वानुवादि स्याद्-इति चेन्न। ब्रह्मत्वसामानाधिकरण्येन सत्त्वस्य प्रत्यक्षादिभ्योऽप्राप्तेः। शून्यवादप्रसङ्गेन तस्य निषेधायोगाच्च। 'इदं सर्वं यदयमात्मे' त्यत्रानुवादलिङ्गसम्भवेन कल्पनाच्च। एवमानन्दश्रुतेरपि, 'अदुःखमसुखं सम'मिति निषेधाय न प्रत्यक्षप्राप्तानन्दानुवादित्वम्, दुःखसाहचर्येण सुखस्यापि वैषयिकस्यैव ग्रहणेन तन्निषेधाय ब्रह्मरूपसुखानुवादायोगात्। एतच्च सर्वमुक्तं विवरणे– ''निष्प्रपञ्चास्थूलादिवाक्यानुसारेण 'इदं सर्वं यदयमात्मे' त्यादीनि निषेध्यसमर्पकत्वेनैकवाक्यतां प्रतिपद्यन्ते, सुषुप्तौ निष्प्रपञ्चतायाः पुरुषार्थत्वदर्शनाद्''इति। अथ-निष्प्रपञ्चता न पुरुषार्थः। मूर्च्छायां तत्त्वादर्शनात्, न च तदा तदज्ञानमात्रं न तु तदभाव इति वाच्यम्, समं सुषुप्तावपीति–चेन्न। मूर्च्छायां स्वरूपसुखस्फुरणाभावात्। तथा च सूत्रम् – ''मुग्धेऽर्धसंपत्तिः परिशेषाद्''-इति।

प्रयोजकम्। न तु सापेक्षानुवादकत्वम्। अनधिगतार्थबीधकत्वस्य प्रामाण्यघटकत्वस्य तावतैव गतार्थत्वात्। न च तर्हि धारावहनबुद्धावप्रामाण्यम्, तस्याः वर्तमानार्थग्राहकत्वेन तत्तत्क्षणविशिष्टग्राहकतया अनुवादकत्वाभावात्। किं च श्रुतेरतत्परत्वे प्राप्तत्वमात्रमेव प्रयोजकम्। अन्यथा वैफल्येन स्वाध्यायविधिग्रहणानुपपत्तेः। अपि चेयं सत्त्वश्रुतिरपि सत्त्वप्रत्यक्षसापेक्षत्वात् सापेक्षानुवादिन्येव। न हि सत्त्वप्रत्यक्षं विना तन्मूलशक्त्यादिग्रहमूलकशब्दप्रवृत्तिसंभवः। अत एव ''यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोऽर्थः प्रसिध्यति, द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमान योरिवैकार्थे प्रवृत्तेः, प्रमात्रपेक्षया त्वनुवादकत्वम्। प्रमाता ह्यव्युत्पन्नः प्रथमं प्रत्यक्षादिभ्यो यथाऽर्थमवगच्छति, न तथाऽऽम्नायतः, तत्र व्युत्पत्त्यपेक्षत्वात्'' इति वाचस्पत्युक्तमप्येतमर्थं संवदति। तेनाम्नायस्य व्युत्पत्त्यपेक्षत्वेन प्रत्यक्षसापेक्षत्वस्यैवोक्तेः। न च वादिविप्रतिपत्तिनिरासप्रयोजनवत्त्वेन न निष्प्रयोजनानुवादकत्वं। सप्रयोजनानुवादकत्वं तु न स्वार्थपरत्वविरोधि। विद्वद्वाक्ये समुदायद्वित्वापादनरूपप्रयोजनवत्त्वेनानुवाद्यस्वार्थपरताया दृष्टत्वात्। अत एव तत्र वाक्यैकवाक्यतोक्ता। अन्यथा अर्थवादवत् पदैकवाक्यतैव स्यादिति वाच्यम्। प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासरूपप्रयोजनवत्त्वेन प्रमाणान्तरस्य सप्रयोजनतया स्वार्थपरत्वोक्तौ 'अग्निर्हिमस्य भेषज'मित्याद्यपि तेनैव प्रयाजनेन सप्रयोजनं स्वार्थपरं च स्यात्। तथा च न प्रत्यक्षसिद्धे वादिविप्रतिपत्तिनिरासार्थमन्यापेक्षा। दृष्टान्ते तु समुदायानुवादेन द्वित्वसम्पादनस्योद्देश्यस्यान्यतो लब्धुमशक्यतया तेन प्रयोजनेन स्वार्थपरत्वस्य वक्तुं शक्यत्वात्। एतदभिप्रायं च पूर्वोक्तं नयविवेकवाक्यम्। न च अनुवादत्वेऽपि नैष्फल्यमात्रम्, न त्वप्रामाण्यम्, याथार्थ्यमेव प्रामाण्यं, न त्वनधिगतार्थत्वे सति याथार्थ्यमिति वाच्यम्। तात्पर्यविषये शब्दः प्रमाणम् 'यत्परः शब्दः स शब्दार्थ' इत्यभियुक्ताभ्युपगमात्। अन्यथा स्वाध्यायविधिग्रहणानुपपत्तेरुक्तत्वाच्च। न ह्यन्यतः सिद्धेऽर्थे शास्त्रतात्पर्यम्, अतो न तत्र प्रामाण्यम्, यदाहुर्भट्टाचार्याः 'अप्राप्ते शास्त्रमर्थव'दिति।

ननु अयमनुवादो न 'वायुर्वै क्षेपिष्ठा देवते'त्यादिवत् स्तुत्यर्थः। न वा 'दध्ना जुहोती'त्यादिवदन्यविधानार्थः। अनुवाद्यत्वेऽपि अन्यविधानाय प्रमाणानूदितस्य तात्त्विकत्वनियमात्। नहि 'व्रीहीन् प्रोक्षती' त्यादावारोपितव्रीह्यादेर्धीः, अनुवाद्यस्यासत्त्वे ह्याश्रयासिद्धौ धर्मधर्मिसंसर्गरूपानुमितिवेद्य इवानुवाद्यविधेयसंसर्गरूपवाक्यार्थो बाधितः स्याद् इति चेन्न। अस्यानुवादस्याप्राप्तान्यप्राप्त्यर्थत्वात्। न च प्रमाणानूदितस्य तात्त्विकत्वनियमः।

प्रत्यक्षप्राप्तजगत्सत्त्वस्य मिथ्यात्वश्रुत्यापाततोऽपोदितस्य प्रतिप्रसवार्थं सत्त्वश्रुतिः इति चेन्न, मिथ्यात्वश्रुतेः प्रत्यक्षबाधकत्वाभ्युपगमे तस्याः बलवत्त्वेन तद्विरोधात् सत्यत्वश्रुतेरन्यपरत्वाद् देवताधिकरणन्यायासंभवाच्च प्रतिप्रसवार्थत्वस्य वक्तुमशक्यत्वात्।

ननु सत्त्वप्रत्यक्षप्रामाण्ये तेनैव मिथ्यात्वश्रुत्यनुमानादिबाधः, तदप्रामाण्ये न तेन सत्त्वश्रुतेरनुवादकत्वम्– इति चेन्न, प्रत्यक्षाप्रामाण्येऽपि तत्सिद्धबोधकस्यानुवादकत्वसंभात्। न हि प्रमितप्रमापकत्वमनुवादकत्वम्, किंतु पश्चाद्बादकत्वमात्रम्। पश्चात्त्वं च प्रमाणावधिकमप्रमाणावधिकं चेति न कश्चिद्विशेषः। न च श्रुतेः सर्वसिद्धप्रमाणभावायाः सदर्थत्वाय चाननुवादकत्वाय च प्रत्यक्षाप्राप्ततात्त्विकसत्त्वविषयत्वमवश्यं वक्तव्यम्। तथा चाप्रमाणेन प्रत्यक्षेण कथं श्रुतेरनुवादकत्वमिति – वाच्यम्; सत्त्वांशस्य प्रत्यक्षसिद्धत्वेऽपि वाक्यार्थस्य क्रियादिसमभिव्याहारसिद्धस्यापूर्वत्वेन तद्विषयतयैवाननुवादकत्वोपपत्तावद्वैत श्रुतिविरुद्धतात्त्विकसत्त्वकल्पनायास्तदर्थमयोगात्। परमार्थसद्विषयता तु सर्वश्रुतीनां शुद्धब्रह्मतात्पर्यकत्वेनैव, अवान्तरतात्पर्यमादाय व्यावहारिकसद्विषयतेति कर्मकाण्डप्रामाण्योप पादने वक्ष्यते। न च प्रत्यक्षं स्वप्रामाण्यनिर्णयार्थं श्रुतिसंवादमपेक्षत इति न तेन श्रुतेरनुवादकत्वम्। अन्यथा 'सत्यं ज्ञानम्' 'नेह नाने'त्यादिश्रुतिरप्यनुवादिनी स्यात्, ब्रह्मसत्त्वस्य लोकतो भ्रमाधिष्टानत्वेन लिङ्गेन च मिथ्यात्वस्य दृश्यत्वाद्यनुमानेना वेदमूलप्रवाहानादिविज्ञानवादादिना च प्राप्तेरिति वाच्यम्। यदि हि दृष्टेऽप्यर्थे प्रत्यक्षं स्वप्रामाण्यनिर्णयाय श्रुतिसंवादमपेक्षेत तदा श्रुतिसंवादविरहिणि दृष्टे कुत्रापि निश्शङ्कप्रवृत्तिः न स्यात्। न स्याच्चैव 'मग्निर्हिमस्य भेषजमित्याद्यपि अनुवादकम्। न चेष्टापत्तिः, मानान्तरगृहीतप्रमाणभावप्रत्यक्षनिर्णीति मानान्तरस्याननुवादकत्वे जगत्यनुवादकत्वकथोच्छेद प्रसङ्गात्। न च 'सत्यं ज्ञानम्' 'नेह नाने'त्यादेरप्यनुवादकतापत्तिः। अनुवादकता हि न तावत् प्रत्यक्षेण। ब्रह्मत्वसामानाधिकरण्येन सत्त्वादिकं ह्यनेन प्रतिपादनीयम्। तच्च न प्रत्यक्षगम्यम्। नाप्यनुमानेन। न हि तर्कः सर्वदेशकालीनपुरुषसाधारण इत्यादिना प्रागेव निराकृतत्वात्। नापि प्रवाहानादिविज्ञानवादिमतेन। तस्यापौरुषेयश्रुत्यवधिक पूर्वत्वाभावात्।

न च – सत्त्वश्रुतेः सत्त्वप्रत्यक्षानपेक्षत्वात् न सापेक्षानुवादकत्वम्। निरपेक्षानुवादकत्वं तु धारावहनवन्नाप्रामाण्यहेतुः, उक्तं हि नयविवेके – 'सापेक्षानुवादे हि न प्रमितिः, न तु दैवादनुवादे, धारावहनवदिति' इति – वाच्यम्। यतो लाघवादनुवादकत्वमेवाप्रामाण्ये

किं नस्यात्? विनिगमकाभावादितिवाच्यम्; तात्पर्यान्यथानुपपत्तिगतिसामान्यानामेव विनिगमकत्वात्। अद्वैतश्रुतिर्हि षड्विधतात्पर्यलिङ्गोपेता। तत्र त्रिविधं तात्पर्यलिङ्गं प्रामाण्यशरीरघटकमर्थनिष्ठम ज्ञातत्वमबाधितत्वं प्रयोजनवत्त्वं च। त्रिविधं तु शब्दनिष्ठमतिप्रसङ्गवारकमुपक्रमोप संहारयौरैकरूप्यम् अभ्यासः, अर्थवादश्चेति। तत्र शब्दनिष्ठलिङ्गत्रये तावन्न विवादः। सर्वासामेवोपनिषदामेवं प्रवृत्तत्वात्। मानान्तरासिद्धतया मोक्षहेतुज्ञानविषयतया च अज्ञातत्वं सप्रयोजनत्वं च निर्विवादमेव। अबाधितत्वमात्रं सन्दिग्धम्। तच्चान्यथानुपपत्त्या गतिसामान्येन च निर्णीयते। न हि सर्वप्रपञ्चनिषेधरूपमद्वैतं व्यावहारिकम्, येन तत्र श्रुतेर्व्यावहारिकं प्रामाण्यं स्यात् ; अतस्तत्र तात्त्विकमेव प्रामाण्यम्, द्वैतसत्यत्वं तु व्यावहारिकम्। अतस्तत्र न श्रु- तेस्तात्त्विकं प्रामाण्यम्। परस्परविरुद्धयोर्द्वयोस्तात्त्विकत्वायोगाद्, वस्तुनि च विकल्पासंभवात्, तात्त्विक व्यावहारिकप्रामाण्यभेदेन च व्यवस्थोपपत्तेः, अतत्परत्वेनावधारितस्य विश्वसत्यत्ववाक्यस्यै वान्यथा व्याख्यातुमुचितत्वात् । तथा हि – चतुर्धा हि सामानाधिकरण्यम् – अध्यासे 'इदं रजत' मित्यादौ, बाधायां 'स्थाणुः पुमानि' त्येवमादौ, विशेषणविशेष्यभावेन 'नीलमुत्पलमित्यादौ, अभेदेन 'तत्त्वमसी'त्येवमादौ। अत्र च बाधायामध्यासे वा सामानाधिकरण्योपपत्तेर्न सत्यत्वबोधकश्रुतेः षड्विधतात्पर्यलिङ्गोपेताद्वैतश्रुतिबाधकत्वम्। ननु आत्मन आनन्दत्वबोधिका श्रुतिरपि 'सुखं सुप्तोऽस्मी'ति साक्षिप्रत्यक्षसिद्धानन्दानुवादिनी सत्त्वश्रुतिवद्भवेत् इति चेन्न, साक्षिण उपहितानन्दविषयत्वेन श्रुतेश्च निरुपाधिकानन्दविषयत्वेन भिन्नविषयत्वादनुवादत्वायोगात्। तदा हि स्वरूपानन्दो गृह्यते। स्वरूपं चाज्ञानोपहितमेव साक्षिविषयः। ननु– 'तत्त्वमसी'त्यादौ नवकृत्वोऽभ्यासवत्, पिपासितस्य जलगोचरप्रमाणसंप्लववत्, ऐक्ये षड्विधतात्पर्यलिङ्गवत्, भावरूपाज्ञाने प्रत्यक्षसिद्धे 'तम आसी'दित्यादिश्रुतिवत्, सत्त्वश्रुतिर्दार्ढ्यार्था – इति चेन्न। अशेषविशेषग्राहिप्रत्यक्षप्राप्ते दार्ढ्यार्थमन्यानपेक्षणात्। पिपासितस्य शब्दलिङ्गानन्तरं जले प्रत्यक्षमपेक्षितम्, न तु प्रत्यक्षानन्तरं शब्दलिङ्गे। न च तर्हि 'तम आसी'दित्यादेः न किंचिदवेदिषमिति प्रत्यक्षसिद्धाज्ञानदार्ढ्यार्थत्वं न स्यादिति – वाच्यम्, 'तम आसी'दित्यस्य सृष्टिपूर्वकालसंबन्धित्वेनाज्ञानग्राहितया सुषुप्तिकालसंबन्धित्वेनाज्ञानग्राहकं प्रत्यक्षमपेक्ष्य भिन्नविषयत्वेनैव प्रामाण्यसंभवात्।

ननु – 'षड्विंशतिरस्य वंक्रय' इति मन्त्रस्याश्वमेधे चोदकप्राप्तस्य 'चतुस्त्रिंशद्वाजिनो देवबन्धो'रिति वैशेषिकमन्त्रेणापोदितस्य षड्विंशतिरित्येव ब्रूयादिति वचनवत्

'अग्निर्हिमस्य भेषज'मित्यादिवाक्यवन्न तत्परत्वम्। न च – त्वन्मते सर्वत्र ब्रह्मसत्त्वस्यैव स्फुरणात्तदतिरिक्तस्य कालत्रयाबाध्यत्वरूपस्य घटादिसत्त्वस्य प्रत्यक्षेणाप्राप्तेः तद्बोधकत्वेन श्रुतेर्नानुवादकत्वमिति वाच्यम्; इतरसत्त्वबाधपुरस्सरत्वाद् ब्रह्मसत्त्वस्फुरणाभ्युपगमस्य तत्रैव सत्यादिपदप्रवृत्तिस्वीकारेण तदतिरिक्तविश्वसत्यत्वस्य शाब्दबोधाविषयत्वात् तदादायानुवाद कत्वापरिहारात्। अथ – 'पृथिवी इतरभिन्ना, 'न हिंस्यात्सर्वा भूतानी'त्यादौ घटादावेकदेशे प्रत्यक्षेण, ब्राह्मणादावेकदेशे वाक्यान्तरेण, विधेयसिद्धावपि सर्वत्रासिद्धत्वाद् यथा नानुवादकत्वं, तथा विश्वमात्रसत्यत्वस्य प्रत्यक्षेणाप्राप्तत्वात् नानुवादकत्वमिति – मैवम्; दृष्टान्ते हि पृथिवीत्वं हिंसात्वं च एकोऽनुगतो धर्म इति तदवच्छेदेन विधेयस्याप्राप्तत्वेन तत्र नानुवादकत्वं युक्तम्, इह तु विश्वत्वं नाम नैको धर्मोऽस्ति, किंतु विश्वशब्दः सर्वनामत्वात्तेन तेन रूपेण घटपटादीनामुपस्थापकः। तेषु च प्रत्येकं सत्त्वं गृहीतमेवेति कथं नानुवादकत्वम्? प्रकारवैलक्षण्याभावात्। नच एकशाखास्थविधिवाक्यैकार्थशाखान्तरस्थ विधिवाक्यस्य पुरुषान्तरं प्रतीव येन पुंसा वादिविप्रतिपत्त्यादिना घटादिसत्ता प्रत्यक्षेण न निर्णीता, तं प्रत्यर्थवत्त्वेन नानुवादकत्वमिति– वाच्यम्, एवं सत्यनुवाद स्थलस्यैवाभावप्रसङ्गात्। न च सर्वाविवादस्थलमेवोदाहरणम्, सर्वाविवादस्य निश्चेतुमशक्यत्वात्। पुरोवादपूर्वकत्वादनुवादस्यात्रायं पुरोवाद इत्यस्यैवाभावात् न शाखान्तरस्थवाक्यस्यानुवादकत्वप्रसङ्गः।

यत्तु – बृहदारण्यकभाष्ये देहभिन्नात्मबोधिकायाः 'अस्तीत्येवोपलब्धव्य' इत्यादिश्रुतेः प्रत्यक्षप्राप्तानुवादित्वमाशंक्य वादिविप्रतिपत्तिदर्शनादित्यादिना तत्परिहृतम्; तथा च प्रत्यक्षसिद्धसत्त्वग्राहकत्वेऽपि वादिविप्रतिपत्ति निरासार्थकत्वेन नानुवादकत्वं प्रकृतेऽपीत्युक्तं तदयुक्तम्। भाष्यार्थानवबोधात्। तथाहि तत्र वादिविप्रतिपत्तिदर्शनेन देहव्यतिरिक्तत्वेनात्मनः प्रत्यक्षतैव नास्ति। अन्यथा प्रत्यक्षप्रामाण्यवादिनश्चार्वा कादेस्तत्र विप्रतिपत्तिर्न स्यादित्युक्तम्, न तु वादिविप्रतिपत्तिनिरासेनास्तीत्यादेस्सार्थकत्वम्, अननुवादकत्वं वा। तथा चोक्तं तत्रैव – तस्माज्जन्मान्तरसंबन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहाविशेषोपाये च शास्त्रं प्रवर्तत इति। ननु – चातुर्मास्यमध्यपर्वणोः 'द्वयोः प्रणयन्ती'ति वाक्यस्य चोदकप्राप्ताग्निप्रणयनव्यतिरिक्ताग्नि प्रणयनविधायकत्ववत् प्रत्यक्षप्राप्तव्यावहारिकसत्त्व विलक्षणत्रिकालनिषेधाप्रतियोगित्वरूपसत्त्वप्रमापकत्वं प्रकृतेऽस्त्विति – चेन्न। त्रैकालिकसत्त्व निषेधकश्रुतिविरोधेन विश्वसत्यत्वश्रुतेस्त्रैकालिकसत्त्वपरत्वाभावात्। न च – वैपरीत्यमेव

फलस्यावश्यंभावित्वाद्वा। तादृशं कर्म युवोरित् युवयोः इत् इत्थमवधारणे वा। युवामेवोद्दिश्य सर्वाणि कर्माण्यनुष्ठेयानीत्यर्थः। आपो व्यापनशीला देवताः, चनेत्येतत्पदद्वयसमुदायः, ऐकपद्यं त्वध्यापकसंप्रदायसिद्धम्। वां युवयोर्व्रतं संकल्पं कर्म वा न प्रमिनन्ति न हिंसन्ति (मीङ्हिंसायां, क्र्यादिकः,) किंत्वनुमोदन्त इति यावत्। नोऽस्माकं हविर्दध्यादिकं अन्नं च पुरोडाशादिकं च। अच्छ अभिलक्ष्य। वाजिना वेगवन्तावश्वाविव। युजा युक्तौ सन्तौ। जिगातं देवयजनमागच्छतम्। (जिगातिर्गतिकर्मा जौहोत्यादिकः) अन्नं घासं प्रति अश्वाविवेति वा। यद्वा – हे इन्द्राब्रह्मणस्पती! विश्वं सर्वं, सत्यं सत्यत्वेन परिदृश्यमानं जगत्, युवोरित् युवयोरेव, युवाभ्यामेव सृष्टम्। अथवा – युवयोरेव विश्वं सर्वं स्तोत्रं, सत्यं यथार्थम्, यद्यत् गुणजातं स्तुत्या प्रतिपाद्यते तत्सर्वं युवयोर्विद्यमानमेव न त्वारोपितमित्यर्थः। आपो व्यापनशीला देवताः, अबुपलक्षितानि पञ्चमहाभूतानि वा। युवयोर्व्रतं जगदुत्पादनाख्यं कर्म न हिंसन्ति। इत्थं महानुभावौ युवां जिगातम्। शेषं पूर्ववद्व्याख्येयम्। तथा च स्तुतिपरतया नास्य विश्वसत्यत्वे तात्पर्यम्॥

'शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीलः।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता'

इत्यस्यापि अष्टमाष्टकस्थस्येन्द्रस्तुतिपरतया न विश्वसत्यत्वे तात्पर्पम्। तथा हि–शाक्मना शाकैव शाक्मा तेन शाक्मना बलेन। शाकः शक्तः, स्वशक्त्यैव सर्वं कर्तुं शक्त इत्यर्थः। न हीन्द्रस्य सहायान्तरापेक्षास्ति, इन्द्रत्वादेव। अरुणः अरुणवर्णः कश्चित् शोभनपर्णः पक्षी आ गच्छतीत्यध्याहारः, उपसर्गश्रुतेः। यो महो महान् शूरः विक्रान्तः, सनात् पुराणः, अनीलः अनीडः नीडस्याकर्ता। न हीन्द्रः अग्निवत् कुत्रचिदपि यज्ञे निकेतनं करोति। एवं सुपर्ण इत्यादिरूपकेणेन्द्रमाह। स इन्द्र इदमिदानी कर्तव्यमिति यच्चिकेत जानाति, तत्सत्यमित्सत्यमेव, न मोघं न व्यर्थम्। स्पार्हं स्पृहणीयं वसु निवासार्हं धनं जेता जयति शत्रुभ्यः सकाशात्। उत अपि, दाता ददाति च स्तोतृभ्यः। जेता दातेति तृन्। तेन 'न लोके' त्यादिना षष्ठीप्रतिषेधः। एवमेवान्यदपि सत्यत्वप्रतिपादकमुन्नेयम्। 'याथातथ्यतोऽर्थान् व्यदधा'दित्यपि वाक्यं न प्रपञ्चसत्यत्वे प्रमाणम्। तस्य पूर्वसृष्टप्रकारेण सर्जनमर्थः, न तु जगत्सत्यत्वं जगत्सर्जनगतसत्यत्वं वा। यत्र च स्तुत्यादिपरत्वं नास्ति, तत्रापि प्रत्यक्षसिद्धानुवादकतया

जगतोत्यन्तासत्वात्, मन्मते असद्विलक्षणत्वादिति वाच्यम्। अर्थक्रियाकारित्वादिना शशशृङ्गादिवैलक्षण्यस्य तन्मतेऽपि सत्वात्। प्रतिपन्नोपाधौ निषेधप्रतियोगित्वेन तद्वैलक्षण्यस्य त्वन्मतेऽप्यभावात्। सूत्रे स्वप्नवैलक्षण्योक्त्ययोगाच्च। व्यावहारिकसत्त्वेन स्वप्नवैलक्षण्यस्य तन्मतेऽपि सत्त्वात्।

द्वै सत्त्वे समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोके संवृतिसत्यत्वं सत्त्वं च परमार्थतः ॥
सत्त्वं तु द्विविधं प्रोक्तं सांवृतं पारमार्थिकम् ।
सांवृतं व्यावहार्यं स्यान्निवृत्तौ पारमार्थिकम् ॥

इति बौद्धोक्तेः । तस्मात् श्रुत्यादिबाधो दुर्वारः ।

किं च त्वयापि तत्तत्प्रमाणसिद्धा एवार्थाः पक्षीकर्तव्याः। तैश्च ते सत्त्वेनैव सिद्धा इति तत्तन्मानबाधः। अग्निरासीद्, वृष्टिर्भविष्यति, रूप्यं मिथ्येत्यादिधीरपि स्वविषयसत्त्वं गृह्णाति। अन्यथा तदुचितप्रवृत्त्याद्ययोगादिति। इति विश्वमिथ्यात्वस्यागमादिबाधः ।

अद्वैतसिद्धिः

ननु– अस्तु शब्दबाधः, तथाहि – 'विश्वं सत्यम्', 'यच्चिकेत सत्यमित्तन्न मोघम्', 'याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' इत्यादिश्रुतिभिः 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वर' मित्यदिस्मृतिभिः 'नाभाव उपलब्धेः' 'वैधर्म्याच्च न स्वप्नादिव' दित्यादिसूत्रैश्च विश्वस्य सत्यत्वप्रतिपादनादिति – चेन्न। श्रुतेस्तत्परत्वाभावात्। तथा हि–

'विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगात'-

मिति ऋक्संहिताद्वितीयाष्टकवाक्यस्यायमर्थः – हे इन्द्राब्रह्मणस्पती! मघवाना मघवानौ धनवन्तौ मघमिति धननाम, मखवन्ताविति वा। विश्वं सर्वं सत्यं कर्म, सद्भूतत्वात्,

नापि व्यावहारिकसत्त्वपरा, वैय्यर्थ्यात्। न हि कोऽपि प्रपंचे व्यावहारिकसत्यतां नोपैति। अप्राप्ते च शास्त्रमर्थवत्। किं च व्यावहारिकशब्देनाबाध्योक्ताविष्टापत्तिः। बाध्योक्तौ श्रुतिश्चिरानुवृत्तदृढभ्रांतिहेतुत्वेनात्यंताप्रमाणं स्यात्। न च मिथ्यात्व श्रुतिविरोधात्तदिष्टम्। त्वत्पक्षे तस्या लक्षणया अखंडचिन्मात्रपरत्वेन जगत्सत्त्वा विरोधित्वात्। असद्वा इत्यादिश्रुतिविरोधेन तत्सत्यमित्यादेरपि प्रातिभासिकसत्त्व परत्वापाताच्च। सत्त्वश्रुतिविरोधेन मिथ्यात्वश्रुतिरेवाप्रमाणमित्यपि सुवचत्वाच्च। न च षड्विधतात्पर्यलिंगवत्त्वाद्द्वैतवाक्यं प्रबलम्। लिंगानि हि तात्पर्यज्ञापकानि, न त्वर्थतथात्वस्य। अस्ति चात्रापि वाक्यशेषे आपश्चन प्रमिनंतीति प्रामाणिकत्वरूपा, न मोघमित्यर्थक्रियाकारित्वरूपा चोपपत्तिस्तात्पर्यलिंगम्। लिंगबहुत्वं तु त्वत्पक्षे प्रमाणबाहुल्यवद्बचर्थमित्युक्तम्। यदि च सत्त्वश्रुतिः प्रत्यक्षप्राप्तार्थत्वान्न स्वार्थपरा, तर्हि मिथ्यात्वश्रुतिरपि तद्विरुद्धार्थत्वात्तथा स्यात्, मानान्तरप्राप्ति वत्तद्विरोधस्याप्यतात्पर्यहेतुत्वात्। यदि तु मिथ्यात्वश्रुतिः प्रत्यक्षागृहीतत्रिकालाबाध्यत्व निषेधपरा, तर्हि सत्त्वश्रुतिरपि तदगृहीततद्विधिपराऽस्तु। न च सुषुप्तौ निष्प्रपञ्चतायाः पुरुषार्थत्वदर्शनात्, फलवत्संनिधावफलं तदंगमिति न्यायेन निष्प्रपञ्चवाक्यानुसारेण सप्रपञ्चवाक्यं नेयमिति विवरणोक्तं युक्तम्। तस्या मूर्च्छायामपुरुषार्थत्वस्यापि दर्शनात्। मूर्च्छायां प्रपञ्चस्याज्ञानमेव न त्वभाव इति चेत्, समं सुषुप्तावपि। यदि च मूर्च्छा दुःखयोगेनैवापुरुषार्थः, तर्हि सुषुप्तिरपि सुखयोगेनैव पुरुषार्थः। अस्ति च "द्वितीयाद्वै भयं भवति" इति श्रुतिरिव "तस्मादेकाकी न रमते" इत्यपि श्रुतिः। सन्ति च भेदज्ञानस्य मोक्षसाधनत्वे "पृथगात्मानं प्रेरितारं च मत्वा तुष्टस्ततस्तेनामृतत्वमेति" इत्याद्याः श्रुतयः। यदि चाद्वैतवाक्यस्य निषेधवाक्यत्वात्प्राबल्यम्, तर्हि "किति च" इति वृद्धिसूत्रात् क्ङिति चेति तन्निषेधसूत्रस्याऽग्नीषोमीयवाक्यादहिंसावाक्यस्य षोडशिग्रहणवाक्यादग्रहणवाक्यस्य सत्यज्ञानादिवाक्यादसद्वा इत्यादिवाक्यस्य प्राबल्यापातेनाहिंसा पारमार्थिको धर्मः, अग्नीषोमीयहिंसा तु व्यावहारिको धर्म इत्यादि स्यात्। प्रत्यक्षप्राबल्यप्रस्तावे उक्तप्रकारेणाऽद्वैतवाक्याद् द्वैतवाक्यस्यानुपसञ्जातविरोधित्वशीघ्रगामित्वविशेषविषयत्व निरवकाशत्वादिना प्राबल्याच्च। न च स्मृतिसूत्रे शून्यवादिनिरासार्थे। तन्मते

तात्त्विकत्वनियमात्। न हि "व्रीहीन् प्रोक्षति" इत्यादावारोपितव्रीह्यादेर्धोः॥ अनुवाद्यस्यासत्त्वे ह्याश्रयासिद्धौ धर्मिधर्मसंसर्गरूपानुमितिवेद्य इवाऽनुवाद्यविधेयसंसर्ग रूपवाक्यार्थो बाधितः स्यात्। नापि नेह नानेति निषेधार्थः। तत्रैव किंचनेत्यनुवादकांशस्य सत्त्वात्। न हि "न सुरां पिबेत्" इति निषेधाय सुरां पिबेदिति वाक्यान्तरमपेक्षितम्। अत्र चा "आपश्चन प्रमिनन्ति" इत्यलौकिकस्य प्रमाणस्य विधेयस्य सत्त्वाच्च। यत्तन्नेत्यादिनिषेधार्थानुवादलिंगाभावाच्च। तदभावेऽपि निषेधायानुवादे "तत्सत्यम्" इत्याद्यपि "न सत्तन्नासदुच्यते," "असद्वा इदमग्र आसीत्" इति निषेधाय ब्रह्मसत्तानुवादकं स्यात्।

सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते ।
प्रपंचस्य प्रविलयः शब्देन प्रतिपाद्यते ॥

इति मण्डनोक्त्या सन् घट इत्यत्रापि ब्रह्मसत्ताप्रतीतेः।

परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥

इति सुरेश्वरोक्त्या सद् घटज्ञानमित्यत्रापि तत्प्रतीतेश्च। सत्सुखस्फुरणं अज्ञोऽस्मीत्यादौ तु तत्प्रतीतौ न विवादः। शुद्धचित एव सुखस्फुरणत्वाद्, अज्ञानाद्यध्यासाधिष्ठानत्वाच्च। अधिकस्फुरणेऽपि चित्स्फुरणाभावात्। ब्रह्मशब्दानुल्लेखेऽपि अखंडार्थनिष्ठवाक्यबोध्यं यद् ब्रह्म तत्सत्त्वप्रतीतेः। एवमानन्दश्रुतिरपि अदुःखमसुखं सममित्यादिनिषेधाय प्रत्यक्षप्राप्तानंदानुवादिनी स्यात्। किं चैवं नेह नानेति श्रुतिरेव विश्वं सत्यमित्यबाध्यत्वरूपबाधनिषेधाय विज्ञानवादादि प्राप्तविश्वबाधानुवादिनी किं न स्यात्? किं च धर्माधर्मस्वर्गनरकादेर्न प्रत्यक्षादिना प्राप्तिः। शब्दप्राप्तस्य शब्देन निषेधायानुवादे एतच्छाखास्थाग्नीषोमीयवाक्यस्य न हिंस्यादिति निषेधाय शाखान्तरोक्ताग्नीषोमीयहिंसानुवादित्वं स्यात्। सत्यं ज्ञानमित्यादेरपि "इदं वा अग्रे नैव किं च नासीत्" इति निषेधाय तत्सत्यमित्यादिवाक्योक्तब्रह्मसत्तानुवादित्वं स्यात्। तस्मान्नानुवादिनी श्रुतिः।

तात्त्विकसत्त्वविषयकत्वोपपत्तेः। न हि प्रमाभ्रमयोरेकविषयता। किं च–

यथा नापहरेद् द्वैताभावश्रुत्यर्थमक्षधीः।
तथा नोपहरेद् द्वैतश्रुत्यर्थमपि दुर्बला॥

प्रत्यक्षं प्रमाणत्वेन निश्चितं चेत्ताद्बाधो मिथ्यात्वानुमानादेः। अनिश्चितं चेत्प्रत्यक्षं मित्थात्वश्रुतिविषयापहार इव सत्त्वश्रुतिविषयापहारेऽप्यशक्तं, स्वप्रामाण्यनिर्णयाय श्रुतिसंवादापेक्षं सन्न श्रुत्यनुवादकत्वापादकम्। अग्न्यौष्ण्यप्रत्यक्षस्य प्रामाण्यानिश्चयेऽग्निर्हिमस्य भेषजमित्यादिरप्यनुवादो न स्यादेव। अन्यथा "सत्यं ज्ञानम्," "नेह नाना" इत्यादिश्रुतिरप्यनुवादिनी स्यात्। ब्रह्मसत्त्वस्य लोकतो भ्रमाधिष्ठानत्वादिलिंगेन च विश्वमिथ्यात्वस्य च दृश्यत्वाद्यनुमानेना वेदमूलप्रवाहानादिविज्ञानवादादिना च प्राप्तेः। उक्ता हि मंत्राधिकरणे मंत्रलिंगप्राप्तबोधकस्यापि तदर्थशास्त्रस्यानुवादकता। उक्ता च त्वयैवेक्षत्यधिकरणे सदेवेत्यादिवाक्यस्य प्रधानपरत्वे सांख्यस्मृतिप्राप्तानुवादिता। किं च सत्त्वश्रुतेः सत्त्वप्रत्यक्षानपेक्षत्वान्न सापेक्षानुवादत्वम्। निरपेक्षानुवादित्वं तु धारावाहिकज्ञान इव नाप्रामाण्यहेतुः। उक्तं हि नयविवेके– "सापेक्षानुवादे हि न प्रमितिः, न तु दैवादनुवादे धारावाहिकवत्" इति। उक्तं च वाचस्पत्ये "यत्र तु प्रमाणांतरसंवादः तत्र प्रमाणांतरादिवार्थवादादपि सोऽर्थः प्रसिद्ध्यति। द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेः। प्रमात्रपेक्षया त्वनुवादत्वं प्रमाता ह्यव्युत्पन्नः प्रथमं यथा प्रत्यक्षादिभ्योऽर्थमवगच्छति, न तथाऽऽम्नायतस्तत्र व्युत्पत्त्यपेक्षत्वात्" इति। किं च वादिविप्रतिपत्तिनिरासार्थत्वान्न निष्प्रयोजनानु वादत्वम्। सप्रयोजनानुवादत्वं तु विद्वद्वाक्य इव स्वार्थपरत्वाविरोधि। अतएव मीमांसकैर्विद्वद्वाक्यस्य समुदायद्वित्वापादनरूपप्रयोजनवत्त्वेनानुवाद्यस्वार्थपरत्वाद्वाक्यैक वाक्यतोक्ता। स्वार्थपरत्वाभावे ह्यर्थवादवत् पदैकवक्यतोच्येत। किं चानुवादत्वेऽपि नैष्फल्यमात्रं न त्वप्रामाण्यम्। याथार्थ्यमेव प्रामाण्यं न त्वनधिगतार्थत्व मित्यन्यत्रोक्तत्वात्। किं चायमनुवादो न ताबद्वायुक्षेपिष्टादिवाक्यवत्स्तुत्यर्थः, नापि "दध्ना जुहोती" त्यत्र जुहोतिरिवान्यविधानार्थः। विधानाय प्रमाणान्तूदिस्य

अनुवादकत्वं हि वाक्यस्य न ज्ञातज्ञापकत्वमात्रम्, अतिप्रसंगात्। किंतु ज्ञातमात्रज्ञापकत्वम्। एकशाखास्थविधिवाक्यैकार्थशाखांतरस्थविधिवाक्यस्य पुरुषांतरं प्रतीव येन पुंसा वादिविप्रतिपत्त्यादिना प्रत्यक्षेण विश्वसत्यता न निर्णीता तं प्रत्यर्थवत्त्वाच्च। अनुवादकत्वं तु सर्वाविवादस्थले सावकाशम्। अत एव त्वयापि बृहदारण्यकभाष्ये देहान्यात्मबोधिकायाः ''अस्तीत्येवोपलब्धव्यः'' इति श्रुतेः प्रत्यक्षप्राप्तानुवादित्वमाशंक्य वादिविप्रतिपत्तिदर्शनादित्यादिना तत्परिहृतम्। ''द्वयोः प्रणयंति'' इति वाक्यस्यावैयर्थ्याय चातुर्मास्यमध्यपर्वणोश्चोदका प्राप्तप्रणयनांतरप्रापकत्ववद् इहापि श्रुतेरवैयर्थ्याय ''तत्सत्यं'' इत्यादिश्रुतिवद् वर्तमानमात्रग्राहिप्रत्यक्षाप्राप्तकालत्रयाबाध्यत्वरूपसत्यत्वप्रापकत्वाच्च। अन्यथा आत्मन आनन्दत्वश्रुतिरपि सुखं सुप्तोऽस्मीति प्रत्यक्षप्राप्तातात्त्विकानंदत्वानुवादिनी स्यात्। अनुवादकत्वं तु अप्राप्तविषयांतराभावे सावकाशम्। निगमनवत्, तत्त्वमसीति नवकृत्वोऽभ्यासवत्, पिपासितस्य एकजलविषयकलिंगशब्दप्रत्यक्षरूपप्रमाणसंप्लववत् त्व(न्मते)त्पक्षे प्रत्यक्षसिद्धभावरूपाज्ञाने ''तम आसीत्'' इत्यादिश्रुतिवत्, श्रुतैरैक्यतात्पर्ये षड्विधलिंगवच्च प्रत्यक्षानाश्वासनिरासेन दार्ढ्यार्थत्वाच्च। अनुवादकत्वं तु यत्र दार्ढ्यं प्रागेव सिद्धं, तत्रैव। तदुक्तम् – ''बहुप्रमाणसंवादश्च दार्ढ्यहेतुरेव'' इति।

किं च यथा ''षड्विंशतिरस्य वंक्रयः'' इति मंत्रस्याश्वमेधे चोदकप्राप्तस्य ''चतुस्त्रिंशद्वाजिनो देवबंधोः'' इति वैशेषिकमंत्रेणापोदितस्य प्रतिप्रसवार्थं षड्विंशतिरित्येव ब्रूयात्'' इति वचनम् तथा प्रत्यक्षप्राप्तस्य जगत्सत्त्वस्याऽद्वैतश्रुत्याऽऽपाततोऽपोदितस्य प्रतिप्रसवार्थं सत्त्वश्रुतिः किं न स्यात्? दृश्यंते हि मृडमृदेत्याद्याः प्रतिप्रसवार्थं विधयः। तस्मात्–

धर्मिप्रमातृधर्मादिभेदान्न द्वैतगीर्वृथा।
अहिंसावाग्भिन्नशाखावाग्द्विप्रणयनादिवत्॥

किं च प्रत्यक्षम्, प्रमाणं चेत्तद्बाधो मिथ्यात्वानुमानादेः। न चेत्कथं सत्त्वश्रुतिरनुवादः? श्रुतेः सदर्थत्वायाननुवादकत्वाय च प्रत्यक्षाप्राप्त

एतद्घटान्योन्याभावत्वे एतद्घटसमानकालीनान्योन्याभाववृत्ति नि हेतोर्व्यभिचारः स्यात्। अत आद्यमन्योन्याभावातिरिक्तेत्यभावविशेषणं। तावत्युक्ते तंत्वादिनिष्ठैतद्घटात्यंताभावत्वे एतद्घटसमानकालीनतंतु निष्ठैतद्घटात्यंताभाववृत्तिनिहेतोर्व्यभिचारः स्यात्। अत एतद्घटसमानाधिकरणेति द्वितीयं विशेषणं। एतावत्युक्ते एतद्घटसमानाधिकरणैतद्घटसमानकालीनकपालरूपवर्तिनि कपालरूपत्वे व्यभिचारः स्यात्। अत एतद्घटप्रतियोगिकाभाववृत्तित्वादित्युक्तं। तावत्युक्ते एतद्घटसमानाधिकरणात्यंताभाववृत्तिनि पटात्यंताभावत्वे एतद्घटसमानकालीनपटात्यताभाववृत्तिनिच व्यभिचारः स्यात्। अत एतद्घटप्रतियोगिकेत्युक्तं। एतावत्युक्ते एतद्घटकपालसमवायो द्विनिष्ठत्वेन कपाले एतद्घटसमानाधिकरणः स्वप्रतियोगिकत्वेनैतद्घटप्रतियोगिकश्चभवति। तद्वृत्तिनि एतद्घटकपालसमवाये एतद्घटसमानकालीनो यः एतद्घटसमवायः तद्वृत्तिनि व्यभिचारः स्यात्। अतः अभावेत्युक्तं। तावत्युक्ते प्रमेयत्वे एतद्घटसमानकालीनयत्समवेतादिवर्तिनि व्यभिचारः स्यात्। अतो मात्रपदं। एतावत्युक्ते समवेतत्वरूपव्यधिकरणधर्मावच्छिन्नैतद्घटात्यंताभावत्वे एतद्घटसमानकालीनो यः समवेतत्वावच्छिन्नतद्घटात्यंताभावः तद्वृत्तिनि व्यभिचारः स्यात्। अतो व्यधिकरणधर्मानवच्छिन्नेत्यपि विशेषणं देयं। दृष्टांते पटप्रागभावत्वे एतद्घटसमानकालीनो यःपटप्रागभावः तद्वृत्तित्वेन साध्यवैकल्यं स्यात्। एतद्घटप्रतियोगिकाभाववृत्तित्वाभावेन साधनवैकल्यंच स्यात्। अत एतद्घटप्रतियोगिकेत्युक्तमिति संप्रदायगम्यानि पदानां कृत्यानि द्रष्टव्यानि॥ अनेनचेति॥ अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटसमानकालीनाभावस्य निषेधे स्वसमानाधिकरणात्यंताभावप्रतियोगित्वरूपमिथ्यात्वाभावरूपसत्वसिद्धिरित्यर्थः॥ अत्रचेति॥ सामान्येनात्मसत्यत्वे विशिष्यानात्मसत्यत्वेचोक्तानुमानेष्वित्यर्थः। संगृह्णाति॥ तथाचेति॥ असदिति॥ अनेन प्रातिभासिकत्वानधिकरणत्वे सति असत्वानधिकरणत्वादित्यनुमानसंग्रहः॥ प्रमाणेति॥ अनेनानिषेध्यत्वेन प्रमां प्रतिसाक्षाद्विषयत्वादित्यनुमानसंग्रहः॥ आदिपदेनारोपितमिथ्यात्वकल्पकरहितत्वाद्यनुमानानां संग्रहः कृत इति ज्ञातव्यं॥ विश्वमिथ्यात्वस्यानुमानबाधविवरणं॥

३०. अथ विश्वामिथ्यात्वस्यागमादिबाधः॥

किं च "विश्वं सत्यं यच्चिकेत सत्यमित्तन्न मोघम्", "याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" इत्यादिश्रुतिभिः, "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इत्यादिस्मृतिभिः "नाभाव उपलब्धेः, वैधर्म्याच्च न स्वप्नादिवत्" इत्यादिसूत्रैश्च बाधिता दृश्यत्वादयः।

न चायं प्रत्यक्षप्राप्तानुवादः। त्वन्मते सन् घट इत्यस्य सदर्थस्य व्यावृत्तघटाद्यन्यानुवृत्तब्रह्मत्वेन घटादिसत्त्वस्याप्राप्तेः। यच्चिकेतेत्यादिवाक्यद्वये ईश्वरस्य मानांतराप्राप्तसत्यजगत्स्रष्टृत्वस्यैवोक्तेश्च। "पृथिवी इतरभिन्ना," "न हिंस्यात्सर्वा भूतानि" इत्यादाविव एकदेशे विधेयसिद्धावपि विश्वमात्रे तदसिद्ध्याऽननुवादकत्वाच्च।

दोषाजन्यत्वात्तत्प्रतिनिषेध्यत्वेन साक्षाद्विषये रूप्ये व्यभिचारवारणायानिषेध्यत्वेनेति। इदं रूप्यमिति ज्ञानं प्रत्येव साक्षादनिषेध्यत्वेन विषये रूप्ये तद्धारणाय दोषाजन्यज्ञानं प्रतीत्युक्तं। इदं रूप्यमित्यस्यच दोषजन्यत्वान्न व्यभिचारः। व्यवसायद्वाराऽनुव्यवसायं प्रति विषये रूप्ये तद्धारणाय साक्षादित्युक्तं। विमतं घटादिरूपं विश्वं॥ त्वन्मत इति॥ घटज्ञानस्य घटएव कस्माद्विषयः पटोपि किं न स्यादिति शंकायां प्रतिकर्मव्यवस्था सिध्यर्थं घटसन्निकृष्टेंद्रियजन्यत्वात् घटज्ञानस्य घटविषयकत्वमित्येवमिंद्रियसंनिकर्षार्थं घटादिसाक्षात्कारात्पूर्वमपि घटादेर्विद्यमानत्वमावश्यकत्वं। स्वविषयकसाक्षात्कारश्चाध्यसरूप एव॥ तथाच ततः पूर्वमपि विद्यमानस्य घटादेरधिष्ठानादिवत्सत्वमेव सिध्यतीत्यर्थः॥ अन्योन्याभावातिरिक्तेति॥ मायावादिना हि घटादेरन्यत्रासत्वस्य सिद्धत्वात्स्वयं यत्रास्ति तत्रापि तदत्यंताभावोऽस्तीत्युच्यते। तद्विरोधितयाऽस्माभिः साध्यते। अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रति योगिको योऽत्यंताभावः स एवैतद्घटसमानकालीन इति परेणोच्यते। अस्माभिस्त्वेतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावत्वं एतद्घटसमानकालीनो योऽत्यंताभावः तदवृत्तीत्युच्यते। एतद्घटात्यंताभाव एवैतद्घटसमानाधिकरण एतद्घटसमानकालीनश्चन भवतीतियावत्। एवंच स्वसमानाधिकरणस्वसमानकालीनात्यंताभावाप्रतियोगित्वरूपसत्वसिद्धिः। अन्योन्याभावातिरिक्तेत्यभावविशेषणं। एतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावः अन्योन्याभावोपि भवति। कपालमेतद्घटोनेति प्रतीत्या एतद्घटान्योन्याभावस्य कपाले एतद्घटसमानाधिकरणत्वात् सचैतद्घटसमानकालीनोपि भवति। एवंचैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावत्वं एतद्घटसमानकालीनावृत्तीति साधने एतद्घटान्योन्याभावत्वमादाय बाधः स्यात्। अतोऽन्योन्याभावातिरिक्तेति। तावत्युक्ते तंत्वादौ एतद्घटप्रतियोगिकात्यंताभावस्तावदस्ति सचान्योन्याभावातिरिक्त एतद्घटसमानकालीनश्च एतद्घटस्य तंत्वादावेतद्घटात्यंताभावस्यच समानकालीनत्वात्। एवंचैतद्घटप्रतियोगिकाभावत्वं एतद्घटसमानकालीनावृत्तीति साधने तंत्वादिनिष्ठैतभावान्नबाधः। अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणनिष्ठधर्मत्वमित्येतावत्युक्ते कपालरूपादिकमन्योन्याभावातिरिक्त मेतद्घटसमानांधिकरणमेतद्घटसमानकालीनंच भवति। एवंच कपालरूपत्वे एतद्घटसमानकालीनावृत्तित्वसाधने बाधःस्यात्। अतः अभावत्वमित्युक्तं। तावत्युक्ते अन्योन्याभावातिरिक्ते कपाले एतद्घटसमानाधिकरणो यः पटात्यन्ताभावः स एतद्घटसमानकालीनश्च भवति। तथा च तन्निष्ठे पटात्यन्ताभावत्वे एतद्घटसमानकालीनावृत्तित्वसाधने बाधःस्यात् अतएतद्घटप्रतियोगिकेत्युक्तं। नन्वेतद्घटप्रतियोगिपदेनैव कपालरूपत्वमादाय बाधस्य परिहृतत्वादेतद्घटप्रतियोगिकनिष्ठधर्मत्वमित्येवास्तु अभावत्वमित्येतत्किमर्थमिति चेदुच्यते। एतद्घटसमावायो द्विनिष्ठत्वेन कपाले एतद्घटसमानाधिकरणः स्वप्रतियोगिकत्वेनैतद्घटप्रतियोगिकत्वेनैतद्घटप्रतियोगिकश्चभवति। तद्वृत्तियदेतद्घट कपालसमवायत्वं तदादाय बाधः स्यात् तस्यैतद्घटसमानकालीनो यः एतद्घटसमवायः तद्वृत्तित्वात्। अतोऽभावत्वमित्युक्तम्। नन्वेवं चेत्पुनर्बाधः व्यधिकरणधर्मावच्छिन्नाभावपक्षे संयोगेन संबंधेन घटवति भूतले समवेतत्वावच्छिन्नघटो नास्तीति प्रतीत्याऽन्योन्याभावातिरिक्तः भूतलादावेतद्घटसमानाधिकरणः यः एतद्घटात्यंताभावः असमवेतत्वरूपव्यधिकरण धर्मावच्छिन्नत्वाद्यत्यंताभावः स एतद्घटसमानकालीनश्चभवति। एवं च व्यधिकरणधर्मावच्छिन्नैतद्घटात्यंताभावत्वे एतद्घटसमानकालीनावृत्तित्वसाधने बाधः स्यात्। अतोऽन्योन्याभावातिरिक्तैतद्घटसमानाधिकरण व्यधिकरणधर्मानवच्छिन्नैतद्घटात्यंताभावत्वमिति विशेषणीयं। अतो न बाधः। हेतावाद्यविशेषणत्यागे

द्रष्टव्यानीत्यन्वयः॥ आत्मान्येति॥ तथाचात्मान्यस्मिन्ननात्मनि कुत्रचिन्नास्तीति प्राप्या आत्मान्यदनात्मभूतं किंचित्सत्यभूतमिति हृदयं। ज्ञेयत्वादौ मिथ्याभूतरूप्यादिवर्तिनि आत्मान्यसर्ववस्तुवृत्तिनि व्यभिचारवारणाय हेतौ मात्रपदं। मात्रपदेन सत्यवृत्तित्वव्यावृत्तिः अभावद्वैतांगीकारेणात्मनः परमार्थसदभावान्यत्वस्य सिद्धत्वात्सिद्धसाधनता स्यादत आह॥ परमार्थसद्भावान्यइति॥ आभ्यामनुमानाभ्यामात्मव्यतिरिक्तस्य कस्यचिदनात्मनः परमार्थसत्वं परमार्थसद्भावत्वंच लब्धमिति हृदयं। दृष्टांते अनात्मनि परमार्थसद्भावभूतब्रह्मान्यत्वमस्तीति द्रष्टव्यं॥ यावदिति॥ अनेनचानुमानेनानात्मन अव्याकृताकाशवर्णप्रकृत्यादेर्यावदात्मस्वरूपमनुवर्तमानत्वोक्त्या त्रैकालिकनिषेधरूपमिथ्यात्वाभावसिद्धिः। अभावमादाय सिद्धसाधनतावारणायाह॥ यावदिति॥ सिद्धसाधनतावारणायैवाह॥ स्वेति॥ स्वप्रतियोगीति॥ मायिमते स्वात्मतत्वसाक्षात्कारेण बंधो निवर्तत इत्यंगीकृतं। ज्ञानेन बंधनिवृत्तिदशायांच सर्वस्याप्यनात्मनो बाध्यत्वंचांगीकृतं। तदानीं बंधनिवृत्तिसमानात्मकालीनोऽबाध्यः कश्चनानात्मास्तीति साध्यते। तथाहि। स्वशब्दनिर्दिष्टबंधनिवृत्तिः तस्याः प्रतियोगी बंधः तस्य विषयः कर्मीभूतो बंध्य इति यावत्। एतादृश आत्मा जीवः तद्विषयकं यद्ज्ञानं आत्मतत्वसाक्षात्कारः। तेनाबाध्यो योऽनात्मा तत्समानकालीनेत्यर्थः॥ निगडेति॥ निगडबंधनिवृत्तिप्रतियोगिनिगडबंध विषयापराधिपुरुषविषयकज्ञानाबाध्य घटाद्यनात्मसमानकालीनत्वं निगडबंधनिवृत्तावस्तीत्यर्थः। बंधनिवृत्तेरात्मतत्वसाक्षात्काराबाध्याभावरूपानात्मसमानकालीनत्वमादाय सिद्धसाधन तावारणायाह॥ उक्तेति॥ स्वप्रतियोगिविषयिकेत्यर्थः। आत्मधीः चरमसाक्षात्कारः॥ स्वेति॥ स्वशब्देन आत्मधीः तद्विषयः आत्मा तद्विषयिणी या धीःस्वयमेव तद्बाध्या स्वयं धीरेव कतकरजोवदिति परेणांगीकृतं। बाध्या न भवतीति चास्माभिः साध्यते। तथाचानेन विशिष्यात्मधीरूपानात्मसत्यत्वसिद्धिरितिज्ञेयं। भ्रमहेतुरज्ञानादिः। स्वशब्देनाज्ञानं तत्कार्यो यो भ्रमो जगद्भ्रमः तदधिष्ठानं यद्ब्रह्म तज्ज्ञानबाध्यइति परेणांगीकृतं तदभावस्त्वस्माभिः साध्यते इत्यवधेयं। भ्रमकत्वात्। भ्रमजनकत्वात्॥ काचादिरिति॥ स्वशब्देन काचादिः तत्कार्यो यो रजतभ्रमः तदधिष्ठानशुक्तिज्ञानबाध्यो न भवतीत्यर्थः। नन्वेवं चेच्छुक्त्यज्ञाने व्यभिचारः। भ्रमकत्वे सत्यपि शुक्त्यज्ञानकार्यभ्रमाधिष्ठानभूतशुक्त्यज्ञानबाध्यत्वेन साध्याभावादित्यतआह॥ शुक्त्यज्ञानमपीति॥ एतावंतं कालं शुक्त्यज्ञानमासीदित्यनुभवेनाज्ञानस्य सत्यत्वसिद्धेः स्वकार्यभ्रमाधिष्ठान ज्ञानबाध्यत्वाभावोप्यस्माभिः साध्यते इति तस्यापि पक्षतुल्यत्वान्नव्यभिचार इत्यर्थः॥ ब्रह्मान्यदनादीति॥

जीव ईशो विशुद्धाचित् भेदस्तस्यास्तयोर्द्वयोः ।
अविद्यातच्चितोर्योगः षडस्माकमनादय ॥

इतिश्लोकोक्तमनादिजातमित्यर्थः। अनादित्वेप्यध्यस्तत्वमेवास्तु इत्यप्रयोजकतायामाह॥ दोषेति॥ स्वाध्यासात्पूर्वमनादित्वादेव सतोपीत्यर्थः॥ अनादीति॥ ब्रह्मज्ञानानिवृत्तेः सत्वेनानाद्यध्यस्तत्वमित्यंगीकारे ब्रह्मणोप्यनादित्वाविशेषादनाद्यध्यस्तत्वं स्यात् तथोत्तरत्र तन्निवर्तकाभावादनंताध्यस्तत्वंच स्यादित्यर्थः॥ कालादीति॥ अनेन कालादेर्यावद्ब्रह्मस्वरूपवर्तमानत्वोक्त्याऽबाध्यत्वसिद्धिः। पक्षे हेतूपपादनाय वेदैकगम्यमित्युक्तं। आदिपदेन ब्रह्मग्रहणे सिद्धसाधनतापरिहाराय ब्रह्मान्यदित्युक्तं। दोषाजन्यज्ञानविषयत्वोपपादनाय साक्षिवेद्यमित्युक्तं। साक्षिरूपज्ञानस्य नित्यत्वेन दोषाजन्यत्वादितिभावः। बाधकज्ञानस्य

कल्पकरहितत्वहेतोस्तत्र व्यभिचार इत्यत आह॥ अत्रचेति॥ तथाच साध्यभूतं सत्वं नामाकल्पितत्वमेव विवक्षितं। अतो सति साध्यस्यापि सत्वान्न व्यभिचारइत्यर्थः॥ विपक्षइति॥ कल्पकरहितत्वेपि कल्पितत्वमेवास्त्वित्यप्रयोजकतायामित्यर्थः। व्याघातमेवाह॥ कल्पकमिति॥ हेतोरेवाऽभावान्न व्यभिचार इत्याशयेनाह॥ तस्येति॥ शुक्तिरूप्येऽसद्वैलक्षण्यमंगीकृत्य व्यभिचारदानाय सद्वैलक्षण्यांगीकारे व्याघातःस्यात्। असद्वैलक्षण्ये सत्वस्यैव प्राप्तेस्तद्वैलक्षण्यायोगात्। नचेष्टापत्तिरितिवाच्यं। तत्र तत्वस्य बाधितत्वात्। अतो व्यभिचारदानाय यदि सद्वैलक्षण्यं तस्यांऽगीक्रियते। तर्ह्यऽसत्वस्यैव प्राप्या सद्विलक्षणत्वायोगेन हेतोरेवाभावान्नव्यभिचारइति ''तुंदिलसुरतन्याय'' इतिभावः॥ विमतमित्यादि॥ अर्थज्ञानात्मकोभय विधभ्रमांगीकारात्तद्विरोधित्वेनाद्यानुमानद्वयं॥ तस्मिन्निति॥ चैतन्यइत्यर्थः। नेदं रजतमितिज्ञानं प्रति निषेध्यत्वेन साक्षाद्विषये व्यवसायद्वारा अनुव्यवसायविषयेच रजते व्यभिचारवारणायानिषेध्यत्वेन साक्षादितिच विशेषणद्वयं। तस्मिन्नपरोक्षेपीति स्वरूपसंकीर्तनं॥ यदेवमिति॥ यद्यस्मिन्नपरोक्षेपि अनिषेध्यत्वेन साक्षाद्भासते न तत्तदज्ञानकार्यादीति सामान्यव्याप्तिरित्यर्थः। उक्तभानवान्। अनिषेध्यत्वेन साक्षाद्भानवान्। समूहालंबनादावितिशेषः। ननु चैतन्यस्याऽपरोक्षत्वाभावात्तस्मिन्नपरोक्षेपीत्यस्यासिद्धिरित्यतआह॥ चैतन्यंचेति॥ आरोपाधिष्ठानतयेत्यर्थः। चैतन्यस्य सर्वप्रत्ययवेद्यत्वांगीकारेणायंघट इत्यादावधिष्ठानत्वेन प्रमितचैतन्यस्यैव निर्देशादितिभावः। ननु शंखत्वे अपरोक्षेपि अनिषेध्यत्वेन साक्षाद्भानवान्। समूहालंबनादावितिशेषः। ननु चैतन्यस्याऽपरोक्षत्वाभावात्तस्मिन्नपरोक्षेपीत्यस्या सिद्धिरित्यतआह॥ चैतन्यंचेति॥ आरोपाधिष्ठानतयेत्यर्थः। चैतन्यस्य सर्वप्रत्ययवेद्यत्वांगीकारेणायंघटइत्यादावधिष्ठानत्वेन प्रमितचैतन्यस्यैव निर्देशादितिभावः। ननु शंखत्वे अपरोक्षेपि अनिषेध्यत्वेन पीतःशंख इत्यत्र साक्षाद्भासमानं पीतत्वं शंखत्वाज्ञानकार्यं भवत्येवेति पीतत्वे सामान्यव्याप्तेर्व्यभिचारइत्यतआह॥ शंखत्वादाविति॥ तदिति॥ शंखत्वेत्यर्थः॥ श्वेतत्वेति॥ श्वेतत्वंच नापरोक्षतया भासत इत्याशयः। अप्रयोजकतापरिहारायाह॥ अत्रापीति॥ आपरोक्ष्यस्य अधिष्ठानापरोक्ष्यस्य। आत्मनि शुद्धे॥ तत्तत्वेति॥ शुद्धात्मतत्वसाक्षात्कारवान् य ईशःशबलःशुकादिजीवन्मुक्तश्च तयोर्याप्रवृत्तिः पालनभिक्षाटनशिष्यबोधनादिरूपा तद्विषयत्वादित्यर्थः। तत्र पटे। ननु शंखगतं यच्छंखत्वं तत्साक्षात्कारवत्प्रवृत्तिविषयमपि पैत्यं शंखे अध्यस्तमिति पैत्ये व्यभिचार इत्यतआह॥ शंखइति। शंखतत्वेति॥ श्वेतत्वेत्यर्थः॥ शंखतत्वंच न शंखत्वं किंतु श्वैत्यमेव अतो हेतोरेवानागमनान्न व्यभिचारइतिभावः।

''नचमायाविना माया दृश्यते विश्वमीश्वरः।
सदा पश्यति तेनेदं न मायेत्यवधार्यता''

मिति प्रमाणोक्तानुमानमाह॥ विमतमिति। ननु जीवे सुप्ते अहमर्थपर्यंतं जगद्विलयांगीकारादसिद्धिरित्याशंक्य निषेधति॥ नचेति॥ सुषुप्तौ जगद्विलयांगीकारे पुनरुत्थानानंतरं पूर्वस्मिन् दिने यं घटमहमद्राक्षं सएवायं घट इति प्रत्यभिज्ञाविरोधात्। तदप्रामाण्ये बौद्धौक्तक्षणिकत्वनिरासोपायाभावेन क्षणिकवादापातात्। अप्रामाण्यस्य बाधकैकोन्नेयत्वेन प्रत्यभिज्ञाप्रामाण्ये बाधकाभावाच्चेत्याह॥ प्रत्यभिज्ञानादित्यादिना॥ यदि सुषुप्त्यवस्थायां जगद्विलयमंगीकृत्यासिद्धिः शंक्यते तर्ह्यस्य सुप्त्यनंतरं पुनरुद्बोधो न स्यात्। उद्बोधकानिष्टसंस्कारादेर्नाशादित्याह॥ अदृष्टादेरपीति॥ सामान्येनेति॥ सामान्यत आत्मव्यतिरिक्तं किंचिदनात्मभूतं सत्यमस्तीत्यत्र इत्यादीत्यनुमानानि

सप्रकारकाबाध्येति पदस्य कृत्यमाह॥ अर्थक्रियाया इति॥ सत्यभूतार्थक्रियाकारित्वं हेतुरुतासत्यभूतार्थक्रियाकारित्वं नाद्य इत्याह॥ सत्यायाइति॥ व्याप्तिपक्षधर्मतयोरिति॥ यथायोग्यं संबंधो न यथाक्रमं। सत्यभूतार्थक्रियायाः पक्षेऽसिद्ध्या पक्षधर्मतायास्सपक्षे ब्रह्मण्यसिद्ध्या व्याप्तेश्चायोगादित्यर्थः। न द्वितीयइत्याह॥ असत्यायाश्चेति॥ सप्रकारकेति॥ ऐंद्रजालिकार्थक्रियातु सप्रकारकेण इदानींतनबाधेन बाध्येति न तत्र व्यभिचारइत्यर्थः। ननु सप्रकारकजाग्रद्बाधाबाध्यचरमधातूत्सर्गरूपार्थक्रियाकारित्वस्य मिथ्याभूते स्वाप्नप्रियासंगमे सत्त्वेन व्यभिचार इत्यत आह॥ व्यभिचारस्त्वस्येति॥ न स्वाप्नप्रियासंगमस्यार्थक्रियाकारित्वं किंतु तज्ज्ञानस्य तच्च सत्यमेवेति निरसिष्यत इत्यर्थः। ननु दृष्टांते ब्रह्मण्यर्थक्रियाकारित्वाभावात्साधनवैकल्यमित्यतआह॥ सत्यस्येति॥ साक्षिचैतन्यस्य ब्रह्मरूपत्वादितिभावः॥ साधकत्वादिति॥ यथोक्तं ''साधकत्वं सतस्तेनसाक्षिणासिद्धिमिच्छता। स्वीकृतंही''ति। ''साधकत्वं तु सत्यस्य साक्षिणोह्यावयोर्द्वयोः सम्यक्संप्रतिपन्न''मितिच। नन्वविद्यावृत्तिप्रतिबिंबितचैतन्यस्यैव साक्षित्वात्तस्यैवाज्ञानादिसाधकत्वमंगीकृतं। तस्य चमिथ्याभूतत्वान्नदृष्टांतत्वं। दृष्टांतस्तुशुद्धब्रह्मैव तत्र हेतोरेवाभावात्साधनवैकल्यं स्यादेवेत्यस्वरसादाह॥ असद्धेति॥ ननु सत्त्वरूपसाध्ययुक्तात्मनः सपक्षाद्धेतोर्व्यावृत्ततयाऽसाधारण्यदोषः स्यादित्यत आह॥ असाधारण्यस्येति॥ यथा भूर्नित्या गंधवत्त्वादित्यत्र नित्यव्यावृत्तगंधवत्त्वाद्भूः किमनित्या उतानित्यव्यावृत्तगंधवत्त्वाद्भूः किं नित्येति विरुद्धोभयपरामर्शोत्थापकतया सत्प्रतिपक्षत्वेन सांशयिकत्वेनवानुकूलतर्कादिरूपविशेषादर्शनदशायामेवा साधारण्यस्य दोषत्वं दृष्टं एवं प्रकृतेपि सत्यभूतब्रह्मव्यावृत्तार्थक्रियाकारित्वात्प्रपंचः किं मिथ्या उत मिथ्याभूतरूप्यादि व्यावृत्तार्थक्रियाकारित्वात् प्रपञ्चः सत्य इत्येवं विरुद्धोभयपरामर्शोत्थापकतया सत्प्रतिपक्षत्वेन सांशयिकत्वेन वा दोषत्वं वाच्यं। इदं चानुकूलतर्कादिरूपविशेषादर्शनदशायामेव। अत्र च मिथ्याभूतरूप्यादिव्यावृत्तार्थक्रियाकारित्वात्सत्यः प्रपंच इति परामर्शेऽनुकूलतर्काणां वक्ष्यमाणत्वेन विशेषदर्शनसद्भावान्नसत्प्रतिपक्षत्वेन सांशयिकत्वेन वा तस्य दोषत्वं संभवतीत्यर्थः। यथोक्तं गंगेशेन ''संशयः सत्प्रतिपक्षोवाऽसाधारण्यस्य दूषकतायां द्वारं सचेह विशेषदर्शनान्नास्ती''ति। अर्थक्रियाकारित्वेपि सत्यत्वं मास्त्वित्यप्रयोजकतायामाह॥ विपक्षइति॥ अर्थक्रियाकारित्वस्य सत्त्वप्रयोज्यत्वेन प्रयोज्यभूतार्थ क्रियाकारित्वमंगीकृत्य तत्प्रयोजकीभूतसत्यत्वानंगीकारो विरुद्धइत्यर्थः। दृष्टांते हेतुसाध्ययोर्व्याप्तेर्निर्णीतत्वान्ना प्रयोजकत्वशंका कार्येत्याह॥ ब्रह्मणीति॥ हेतुत्वं सप्रकारकाबाध्यजगद्धेतुत्वाद्यर्थक्रियां प्रति अर्थक्रियाऽकारणं यदसदादितद्व्यावृत्तस्य परमार्थसत्त्वस्यैव प्रयोजकत्वेनावधारणात् प्रपंचे तदभावे प्रयोज्यस्यार्थ क्रियाकारित्वस्याप्यभावरूपविपक्षबाधकतर्केण हेतोर्व्याप्यत्वग्रहान्नाप्रयोजकत्वमित्यर्थः॥ पंचमइति॥ आरोपितमिथ्यात्वकत्वादिति पंचमहेतावित्यर्थः॥ परमतइति॥ मिथ्यात्वस्य सत्यत्वेऽद्वैतहानिप्रसंगात्सोपाधिकस्य निरुपाधिकेनैक्यासंभवादारोपितत्वमेव तस्य वक्तव्यमित्यर्थः। मिथ्यात्वस्य सत्तानिषेधरूपत्वेन सत्यत्वेप्यभावद्वैतांगीकारादविरोध इत्येतत्तु पूर्वमेव दूषितमितिभावः। नन्वसतो निर्धर्मकत्वेन तत्र मिथ्यात्वाख्याभावरूपधर्मस्याप्यारोपितत्वाद्व्यभिचार इत्यतआह॥ अत्रचेति॥ तथाचारोपित सत्त्वाभाववत्त्वादित्यर्थः। असतिच सत्त्वाभावो वास्तव एवेति न व्यभिचार इतिभावः। षष्ठे कल्पकरहितत्वादिति हेतौ कल्पकं किं चिन्मात्रं तदन्यद्वा। नाद्य इत्याह॥ चिन्मात्रस्येति॥ कल्पनोपयुक्तदेहेंद्रियाद्यभावादितिभावः। न द्वितीयइत्याह॥ अन्यस्येचेति॥ तथाच स्वेनैव स्वस्य कल्पितत्वं विरुद्धमित्यर्थः। नन्वसतःकेनाप्यकल्पितत्वेन

नात्राऽप्रयोजकताशंक्या। प्रातिभासिकत्वानधिकरणत्वे सति असत्वानधिकरणत्वरूपहेतोरसत्प्रातिभासिक व्यावृत्तिरूपत्वात् तादृशहेतुं प्रति प्रयोजकत्वेन पारमार्थिकसत्त्वस्यैव दृष्टांते ब्रह्मणि कृत्स्नतया जगत्यपि पारमार्थिकसत्त्वाभावे हेतूच्छित्तेरेव बाधकत्वात्। ननु दृष्टांते ब्रह्मणि तथा कृत्स्नत्वेपि प्रकृते व्यावहारिकसत्त्वेनैवोक्तहेतोरुपपत्तिः किं नस्यादिति चेत्तत्राह॥ ब्रह्मणीति॥ व्यावर्तकतया असत्प्रातिभासिकयोरतिप्रसंगभंजकतयेत्यर्थः॥ त्यागस्येति॥ व्यावहारिकसत्त्वमंगीकृत्येतिशेषः॥ अन्योन्याश्रयादिति॥ विश्वमिथ्यात्वे सिद्धे व्यावहारिकसत्त्वसिद्धया तेनैवहेतोरुपपत्त्या हेतोरप्रयोजकत्वसिद्धिः। तत्सिद्धौ चानुमानस्य दुष्टत्वेन तद्बाधाभावाद्विश्वमिथ्यात्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः॥ अन्यथेति॥ कृत्स्नपरित्यागेनाकृत्स्नकल्पने वह्निं प्रति धूममप्रयोजकीकृत्य पर्वतत्वमेव प्रयोजकमंगीकृत्य महानसस्यापि वह्निमत्त्वं न स्यादित्यतिप्रसंगइत्यर्थः। ननु दृष्टांते ब्रह्मण्यपि असदादिव्यावृत्तेर्नसत्त्वं तंत्रत्वेन कृत्स्नं। किंतु ज्ञानत्वाद्यपरपर्यायं यद्ब्रह्मत्वं तदेवेत्याशंक्य निराकरोति॥ नचेति॥ अन्यथेति॥ तद्व्यावृत्तिं प्रति तद्विरुद्धधर्मवत्त्वस्य प्रयोजकत्वमनंगीकृत्यासद्व्यावृत्तिं प्रति तदविरुद्धं ज्ञानत्वादिकमेव प्रयोजकं न तद्विरुद्धं सत्त्वमित्यंगीकारइत्यर्थः॥ सत्यज्ञानादीत्यादि॥ सत्यज्ञानादिवाक्येपि ज्ञानपदेन ज्ञानत्वप्रतिपादनद्वारानृतव्यावृत्तेरपि सिद्धिप्रसंगेन सत्यपदं व्यर्थं स्यादित्यर्थः॥ प्रपंचइति॥ यद्यसद्व्यावृत्तौ ज्ञानत्वादिरूपं ब्रह्मत्वमेव प्रयोजकमित्युच्यते तर्ह्यसद्व्यावृत्तिमति प्रपंचे ब्रह्मत्वाभावेन प्रयोज्यापेक्षया न्यून वृत्तित्वान्नं तत्प्रयोजकमित्यर्थः॥ द्वितीयइति॥ अनिषेध्यत्वेन प्रमां प्रतिसाक्षाद्विषयत्वादिति द्वितीयहेतावित्यर्थः। अत्र तत्त्ववेदकप्रमाविषयत्वं हेतुरतत्त्ववेदकप्रमाविषयत्वं वा। नाद्यः। ममासिद्धेरित्याह॥ तत्वेति॥ नद्वितीयइत्याह॥ अतत्वेति॥ अप्रयोजकतेति॥ अतत्ववेदकप्रमाविषयत्वस्य सत्त्वाभावेप्युपपत्तेरित्यर्थः॥ व्याहतत्वादिति॥ अर्थसत्त्वगर्भप्रामाण्यस्यार्था सत्त्वगर्भातत्ववेदकत्वेनात्यंतविरोधात्प्रामाण्यातत्ववेदकत्वयोः सामानाधिकरण्यस्य व्याहतत्वेन विकल्प एवायुक्त इति भावः॥ प्रत्यक्षस्येति॥ तथाच तत्त्ववेदकप्रमोक्तावपि नासिद्धिरितिभावः॥ अनुमानादेश्चेति॥ तत्त्ववेदकं यत्प्रमाणं विमतं सत्यं प्रमाणदृष्टत्वादित्यनुमानरूपं तद्विषयत्वस्य प्रपंचे सद्भावेनापि नासिद्धिः। नचानुमानमतत्त्ववेदकमितिवाच्यं। त्वयापि दृश्यत्वादेस्तत्त्वभूतमिथ्यात्वादौ प्रमाणीकरणेन तस्य तत्त्ववेदकत्वांगीकारात्तज्जातीयास्मदनुमानविषयत्वेनापि तत्त्ववेदकप्रमा विषयत्वं पक्षे नासिद्धमित्यर्थः। प्रमाणविषयत्वभावेपि सत्त्वं मास्त्वित्यप्रयोजकताशंकापरिहारायाह॥ विपक्षइति॥ व्याघातमेवोपपादयति॥ विषयबाधइति॥ विषयासत्त्वइत्यर्थः॥ प्रामाण्यं प्रमाविषयत्वं। प्रपंचस्य सत्त्वाभावे विषयसत्त्वघटितप्रमाविषयत्वरूपहेतोरेवायोगादिति हेतूच्छित्तिर्बाधिकेतिभावः॥ नापि तृतीयइति॥ अनिषेध्यत्वेनेश्वरं प्रति साक्षादपरोक्षत्वहेतावित्यर्थः॥ असिद्धिरिति॥ ईश्वरं प्रत्यपि निषेध्यत्वेनैव विश्वस्यापरोक्षत्वादसिद्धिरित्यर्थः॥ शास्त्रेति॥ वेदकर्तृत्वेनेत्यर्थः। तद्दृष्टत्वोक्तेः स्वकृतजगच्छास्त्रद्रष्टृत्वोक्तेर्नासिद्धिरित्यर्थः॥ अन्यथेति॥ निषेध्यत्वेनेश्वरं प्रत्यपरोक्षत्व इत्यर्थः। प्रातिभासिकत्वापत्त्येति शेषः। तत्पालनादौ प्रातिभासिकजगत्पालनादौ। अप्रयोजकतां परिहरति॥ विपक्षइति॥ अनिषेध्यत्वेनेश्वरज्ञानविषयस्यापि विश्वस्य सत्यत्वाभावे रूप्यवन्निषेध्यत्वप्राप्त्या निषेध्यमेव प्रपंचमनिषेध्यत्वेन ईश्वरो जानातीति स्यात्। तथाचेश्वरस्य भ्रांतत्वं स्यादिति बाधकसद्भावान्नाप्रयोजकता शंक्येत्यर्थः। अस्त्वीश्वरस्य भ्रांतिरित्यत आह॥ साचेति॥ ''शोकं मोहं जरां मृत्युमत्येती'' त्यादि श्रुतिविरुद्धेत्यर्थः॥ चतुर्थइति॥ सप्रकारकाबाध्यर्थक्रियाकारित्वादिति हेतावित्यर्थः।

जगतः सप्तभंगित्वेन सदसत्त्वस्य तन्मते प्रसिद्धत्वेन व्यावर्त्यत्वं परैरुक्तं तद्वदित्यर्थः। परप्रसिद्धिमात्रेणेत्यस्य स्याद्वादिप्रसिद्धिमात्रेणेति सांप्रदायिकोर्थः। कस्यचित्पुंसः सदसत्त्वारोपः कुत्रचिज्जातः तादृशभ्रमरूपप्रसिद्धिमात्रेणेत्यर्थइत्येतदसांप्रदायिकं व्याख्यानमित्युपेक्ष्यं। किंच मया त्वां प्रत्यनुमानं प्रयुज्यते तत्र विमतं सदित्येव प्रयोगे तव सिद्धसाधनता स्यादतः परमार्थेति विशेषणं। नचेदं मत्प्रयोजनमेव न भवत्प्रयोजनमिति वाच्यं। अनुमानप्रयोक्त्रा मया यथा तव सिद्धसाधनादिकं न स्यात्तथा यत्नःकार्यः। अतस्तव प्राप्तसिद्धसाधनोद्धारोपि मत्प्रयोजनमेवेत्याह॥ परार्थेति॥ जन्येति॥ यथा निरीश्वरवादिनं मीमांसकं प्रति जन्यपदस्य व्यर्थत्वेपि जन्यकृत्यजन्यत्वावच्छिन्ने सकर्तृकत्वसिद्धेरुद्देश्यत्वेन उपरंजकव्यावर्तकं विशेषणं तदित्यंगीकृतं। यथा वा पर्वतः प्रमेयवह्निमानित्यत्र प्रमेयत्वं वह्नेर्नव्यावर्तकं विशेषणं किंतु प्रमेयवह्निसिद्धेरुद्देश्यत्वेनोपरंजकमेव तदिति अवैयर्थ्यमित्युच्यते। तथा परमार्थसत्त्वरूपसाध्यसिद्धेरुद्देश्यत्वेन उपरंजकविशेषणत्वेनावैयर्थ्यादित्यर्थः। यथोक्तं परेण ''विशेषणमपिद्विविधं व्यावर्तकमुपरंजकं चेति। तत्राव्यावर्तकं विशेषणमुपरंजकमित्युच्यत'' इति॥ मां प्रतीति॥ त्वन्मते व्यावर्त्याप्रसिद्धेरितिभावः॥ आद्येति॥ प्रातिभासिकत्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वादित्याद्यहेतावित्यर्थः॥ वादिनं प्रतीति॥ अनुमानप्रयोक्तारं त्वां प्रतीत्यर्थः॥ अप्रसिद्धिरिति॥ ''सन्ध्यामधिकरणप्रतियोगिभ्यामभावो निरूप्यत'' इति वचनादिति भावः॥ अप्रामाणिकस्यापीति॥ तथाच प्रतियोगिसत्त्वं नापेक्षितमित्यर्थः॥ प्रतिभासमात्रशरीरेति॥ मात्रशब्देनार्थो व्यावर्त्यते अर्थाभावेपि प्रतिभासवत्त्वमित्यर्थः। यथाश्रुते ज्ञानात्मकत्वापत्तौ विरोधः स्यादितिध्येयं। तस्य प्रातिभासिकत्वस्य। प्रसिद्धेः मन्मतेपीतिशेषः॥ अन्यथेति॥ प्रातिभासिकत्वाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धौ चोदितायामित्यर्थः। त्वयापि प्रातिभासिकान्यद्विश्वं मिथ्येत्यनुमातव्यं। अन्यथा सिद्धसाधनतापत्तेः। ''ब्रह्मप्रातीतिकान्यद्विश्वं मिथ्याप्रतीतित'' इति त्वदुक्तेश्च। तथाच तत्र प्रतियोग्यप्रसिद्ध्या तदन्यत्वाप्रसिद्धेः पक्षएवाप्रसिद्ध इत्यनुमानस्यैवायोग इति दोषसाम्यमित्यर्थः॥ असिद्धीति॥ अनधिकरणत्वे सतीत्येवोक्ते यत्किंचिदधिकरणे प्रपंचेऽनधिकरणत्वमसिद्धमित्यर्थः। विमतं पर्वतादिरूपं सौरभेत्याद्यनुमानं धूमवह्न्योः सद्भावदशायामेव। अन्यथा चंदनप्रभवादिविशेषणस्यासिद्धिवारकत्वायोगादिति द्रष्टव्यं। विमतं तप्तायोगोलकं॥ दृष्टांतेपीति॥ आत्मनीत्यर्थः। आत्मनोपि यत्किंचिदधिकरणत्वादितिभावः। तथाचानधिकरणत्वस्य कुत्राप्यप्रसिद्धत्वेन तदवच्छेदेन व्याप्तेर्गृहीतुमशक्यत्वेनाप्रसिद्धिवारकतया व्याप्तिग्रहोपयुक्तत्वं प्रातिभासिकत्वविशेषणस्येत्यर्थः॥ रूपादीनामिति॥ ''चक्षुः तैजसं रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वादि'' त्यत्रालोकादौ रूपत्वादिव्यंजकत्वस्यापि सद्भावेन रूपस्यैवाभिव्यंजकत्वस्य कुत्राप्यप्रसिद्धत्वेन तदवच्छेदेन व्याप्तिग्रहासंभवात्तद्धारणाय रूपादिषु पंचसु मध्यइत्युक्तं। एवं च यथा तस्याप्रसिद्धिवारकत्वेन व्याप्तिग्रहोपयुक्तत्वं तद्वदित्यर्थः। ननु हेतौ व्यभिचारवारकमेव विशेषणं देयं नतु व्याप्तिग्रहोपयुक्तमिति नियमोस्तीति चेत्तत्राह॥ व्यभिचारेति॥ तदौपयिकत्वस्य व्याप्तिग्रहोपयुक्तत्वस्य। हेतोर्व्यभिचारे तत्सत्त्वावच्छेदेन साध्यनिरूपिता व्याप्तिर्गृहीतुमशक्येति तद्वारकेपि विशेषणे व्याप्तिग्रहोपयुक्तत्वमेव तंत्रमित्यर्थः॥ यत्किंचिदिति॥ वस्तुत्वादीत्यर्थः। केचिदित्यस्वरसोद्भावनं। तद्बीजंतु अनधिकरणत्वहेतोः अधिकरणत्वसामान्याभावपरत्वांगीकारात् निषेधप्रतियोगित्वरूपधर्मविशेषाधिकरणे प्रातीतिके सामान्याभावायोगेन व्यभिचारस्यैवाभावादिति॥ व्यावहारिकेति॥ पारमार्थिकसत्त्वाभावेप्युपपन्नत्वादिति भावः।

असत्यार्थक्रियाकारित्वस्यैंद्रजालिकेपि सत्त्वाव्यभिचारवारणायाबाध्येत्युक्तं। ऐंद्रजालिकार्थक्रिया तु बाध्येति। नन्वेवं स्वरूपासिद्धिः। प्रपंचगतार्थक्रियाया निष्प्रकारकब्रह्मज्ञानबाध्यत्वांगीकारादित्यत उक्तं॥ सप्रकारकाबाध्येति॥ तथाच नासिद्धिः। प्रपंचगतार्थक्रियाया निष्प्रकारकज्ञानबाध्यत्वेन सप्रकारकाबाध्यत्वादितिभावः। रूप्यादौ व्यभिचारवारणाय आरोपितेत्युक्तं। प्रातिभासिक स्येत्यादेरुक्तरीत्यार्थःस्पष्टः। वैकल्पिकं वा शब्दोपेतं॥ एतद्विशेषणेति॥ ब्रह्मप्रमान्येनेत्यादिविशेषणेत्यर्थः। स्वबाधकाभिमतबाध्यदोषजन्यज्ञान विषयत्वेन स्वबाधकाभिमता बाध्यबाधविषयत्वेन परमते पर्यवसानेन पक्षलाभः। अस्मन्मते पक्षलाभाय नञ्द्वयगर्भत्वं। स्वबाधकस्यैवाभावेन तदबाध्यदोषजन्यज्ञानविषयत्वं तदभिमताबाध्यबाधविषयत्वं च नास्ति अतो नास्माकं पक्षालाभ इतिज्ञेयं। प्रातिभासिकं चैतेन पक्षाव्यावर्तितं प्रातिभासिकरजतविषयकज्ञानहेतुकाचादिदोषस्य रजतबाधकत्वेनाभिमतं यन्नेदं रजतमिति ज्ञानं तदबाध्यत्वेन स्वबाधकाभिमताबाध्यदोषजन्यज्ञानविषयत्वस्यैव सत्त्वात्। तथा प्रातिभासिकविषयको यो बाधस्तस्या प्रातिभासिकबाधकत्वेनाभिमतेन स्वेनैव बाध्यत्वादितिध्येयं॥ समानाधिकरणेति॥ ज्ञानेन समानाधिकरणेत्यर्थः। ज्ञानेनाबाध्यत्वे सतीत्येवोक्ते मायिमते पक्षालाभः अतःकर्मप्रागभावसमानकालीनेत्युक्तं। जगद्बाधकंच ज्ञानं न कर्मप्रागभावसमानकालीनं साक्षात्कारानंतरं ''क्षीयंते चास्यकर्माणि तस्मिन्दृष्टेपरावर'' इति वचनात् कर्मणामनुदयेन तदाकर्मप्रागभावाभावात् अतः कर्मप्रागभावसमानकालीनं यदयं घटइति ज्ञानं तदबाध्यत्वमस्तीति न पक्षालाभः। नन्वथापि पक्षालाभः यज्ञदत्तस्य जगद्बाधकज्ञानोत्पत्तिकाले देवदत्तकर्मप्रागभावसत्त्वेन प्रपंचस्य देवदत्तकर्मप्रागभावसमान कालीनयज्ञदत्तज्ञानेन बाध्यत्वात्। अतःसमानाधिकरणेति कर्मप्रागभावविशेषणं। तथाच बाधकज्ञानाधिकरणको यः कर्मप्रागभावो यज्ञदत्तीयएव तत्समानकालीनं यज्ज्ञानं अयं घटइति ज्ञानं तेनाबाध्यत्वमस्तीत्यर्थः। प्रातिभासिकं चानेन पक्षाव्यावर्तितं। शुक्तिसाक्षात्कारानंतरमपि कर्मणामुदयेन प्रातिभासिकरजतबाधकस्य शुक्तिज्ञानस्य ज्ञानसमानाधिकरणकर्मप्रागभावसमानकालीनत्वेन तादृशज्ञानेनाबाध्यत्वस्य प्रातिभासिकेऽभावादिति द्रष्टव्यं। स्वबाधकेत्यादिप्रकारत्रयेण पक्षनिर्देशेन प्रातिभासिकव्यावृत्तिर्जातेत्याह॥ प्रातिभासिकेत्यादिना॥ प्रातिभासिकेति॥ प्रातिभासिकस्य यद्बाधकं तेन बाध्यौ न भवत इत्यर्थः। सद्धेति साध्यनिर्देशकृत्यमाह॥ व्यावहारिकेति॥ द्वितीयसाध्ये विशेषणवैयर्थ्यं परिहरति॥ अर्थगतमिति॥ मायिकं व्यावहारिकं। ननु वादिनस्तव मते परमार्थसद्धेति द्वितीयसाध्ये परमार्थेति विशेषणं व्यर्थं। नचापरमार्थसद्व्या वृत्त्यर्थं तदिति वाच्यं। भवन्मतेऽपरमार्थसतोऽभावेन व्यावर्त्याप्रसिद्धेः अतः सदित्युक्ते परमार्थसत्त्वस्यैव प्राप्तेस्तद्विशेषणं अनुमानप्रयोक्तुर्वादिनस्तव मते व्यर्थमित्याशंक्य निराकरोति॥ नचेति॥ सत्त्वेनेति॥ सत्त्वेन धीमात्रमेव न तु वास्तवं सत्त्वमित्येवं रूपमपारमार्थिकसत्त्वं रूप्यादौ मयाप्यंगीकृतमिति तद्वारणाय तत्सार्थकमिति भावः। तर्हि मायिमते प्रवेशःस्यादित्यस्वरसादेवाह॥ अनिर्वाच्येति॥ नेदं विशेषणं व्यर्थं। प्रातिभासिकव्यावहारिकसत्त्वव्यावृत्त्यर्थत्वात्। नच भवन्मते व्यावर्त्या प्रसिद्धिरितिवाच्यं। परमते तत्सद्भावेन परप्रसिद्धिमात्रेण व्यावर्त्यत्वोपपत्तेः। परप्रसिद्धिमात्रेण स्वलक्षणस्थविशेषणकृत्यकथनमदृष्टमिति चेन्न। यथाहि सत्त्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वे सति सदसत्त्वानधिकरणत्वमनिर्वचनीयत्वमित्यनिर्वाच्यत्वलक्षणे आद्यविशेषणद्वयव्यावर्त्यप्रसिद्धावपि सदसतो मायिमतेऽभावात्तृतीयं विशेषणं व्यर्थमित्याशंकायां स्याद्वादिमते

न्यायामृतप्रकाशः

प्रत्यक्षबाधमभिधायानुमानबाधमाह॥ अनुमानेति॥ ब्रह्मप्रमान्येनेत्यादि॥ ब्रह्मान्यदित्येवोक्तेऽसतोपि पक्षकोटिनिवेशप्राप्त्या तत्र सत्त्वसाधने बाधःस्यात्तद्वारणाय असत्त्वानधिकरणत्वे सतीत्युक्तं। तर्हि प्रातिभासिकस्यापि पक्षकोटिनिवेशापत्त्या बाधवारणायाबाध्यत्वे सतीत्युक्तं। मायिमते प्रपंचस्या बाध्यत्वाभावेनाश्रयासिद्धिवारणाय ब्रह्मप्रमान्येनेत्युक्तं प्रपंचस्य मायिमते ब्रह्मप्रमान्येनाबाध्यत्वान्नपक्षालाभः। प्रातिभासिकस्यतु ब्रह्मप्रमान्येन बाध्यत्वात्तद्व्यावृत्तिः। तत्त्ववादिमते पक्षलाभाय नञ्द्वयगर्भता। ब्रह्मवृत्तिव्याप्यमिति मतेनेदं विशेषणं। ब्रह्मवृत्तिव्याप्यं नेति मते ब्रह्मप्रमेत्येव वक्तुमशक्यमतआह॥ वेदांतेति॥ प्रपंचस्य वेदांततात्पर्यप्रमाजन्यं यज्ज्ञानं चरमवृत्तिरूपं तदन्येनाबाध्यत्वान्न मायिमते पक्षालाभः। प्रातिभासिकस्य तु वेदांततात्पर्यप्रमाजन्यज्ञानान्यज्ञानबाध्यत्वात्तद्व्यावृत्तिः। तत्त्ववादिमते पक्षलाभाय नञ्द्वयगर्भत्वं। शाब्दप्रमां प्रति तात्पर्यप्रमाहेतुरिति मतेनेदं। शाब्दप्रमां प्रति तात्पर्यप्रमा नहेतुः अन्योन्याश्रयात् मानांतरागम्यस्य वाक्यार्थस्य वाक्या दुपस्थितौ सत्यां तत्र वाक्यस्य तात्पर्याविधारणं तात्पर्याविधारणेच तेन वाक्यार्थप्रतीतिः तात्पर्यज्ञानस्य वाक्यार्थज्ञाने कारणत्वस्य परेणोच्यमानत्वादित्येवमन्योन्याश्रयान्न शब्दार्थसंसर्गरूपवाक्यार्थप्रमां प्रति तात्पर्य प्रमाहेतुरितिमतेनाह॥ मोक्षहेत्विति॥ प्रपंचस्य मोक्षहेतुभूतं यज्ज्ञानं चरमवृत्तिरूपं तदन्येनाबाध्यत्वान्न मायिमते पक्षालाभः। तत्ववादिमते पक्षलाभाय नञ्द्वयगर्भता। गौरवान्नैवं पक्षनिर्देश इत्याशयेनाह॥ विमतं वेति॥ सद्धा परमार्थसद्धेति साध्यद्वयं। तत्र प्रपंचे व्यावहारिकसत्त्वं नाम सत्त्वेन प्रतीतिमात्रं वस्तुतोऽर्थगतं सत्त्वं नास्ति। अत एव प्रतिपन्नोपाधौ स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वमंगीकुर्वंति। तन्मतानुसारेण सदित्येव साध्यनिर्देशः। अर्थगतं मायिकं सत्त्वमस्ति। अत एव प्रतिपन्नोपाधौ स्वरूपेणैव सत्ताप्रतिषेधस्य कर्तुमशक्यत्वात्पारमार्थिकत्वाकारेणैव निषेधमंगीकुर्वंति। तन्मते सदित्येव साध्यनिर्देशे सिद्धसाधनता स्यादतः परमार्थसद्धेत्युक्तं। तेन पारमार्थिकसत्त्वनिषेधांगीकारात्परमार्थसद्धेति साधितमिति भावः॥ प्रातिभासिकत्वेति॥ अनधिकरणत्वादित्येवोक्ते सत्त्वादिधर्मानधि करणेऽसति व्यभिचारः स्यादतः असत्त्वानधिकरणत्वादित्युक्तं। तावत्युक्ते प्रातिभासिके व्यभिचारः स्यादतः सत्यंतविशेषणं। असति व्यभिचारवारणाय विशेष्यभागः॥ अनिषेध्यत्वेनेति॥ पुरोवृत्तिनं रंगं रजततया जानामीत्याद्यनुव्यवसायरूपप्रमां प्रति व्यवसायद्वारा विषये प्रातिभासिके रजते व्यभिचारवारणाय साक्षादित्युक्तं। नेदं रजतमिति बाधकज्ञानरूपप्रमां प्रति निषेध्यतया साक्षाद्विषये रजते व्यभिचारपरिहाराय अनिषेध्यत्वेनेति विषयविशेषणं। इदं रजतमिति भ्रमं प्रति अनिषेध्यत्वेन साक्षाद्विषये रजते व्यभिचारवारणाय प्रमां प्रतीत्युक्तं॥ अनिषेध्यत्वेनेति॥ पदानां कृत्यं पूर्ववत्। इदं रजतमित्यस्मदादिभ्रमरूपं ज्ञानं प्रति अनिषेध्यत्वेन साक्षादपरोक्षत्वं रजतेप्यस्तीति व्यभिचारवारणाय पूर्वं प्रमां प्रतीत्युक्तं। अत्र तत्स्थाने ईश्वरं प्रतीत्युक्तं। रजतं चेश्वरं प्रति निषेध्यत्वेनैव साक्षादपरोक्षमित्यदोषः। इदं च

"अपरोक्षदृशो मिथ्यादर्शनं न क्वचिद्भवेत्।
सर्वापरोक्षविद्विष्णुर्विश्वदृक्तन्नातन्मृषा॥"इति प्रमाणोक्तमनुमानं।

अत एव एतत्पटात्यन्ताभाव एतत्तन्तुनिष्ठः, एतत्पटानाद्यभावत्वात् एतत्पटान्योन्याभाववदित्यापि न। अंशित्वहेतुदूषणगणग्रस्तत्वादेव। अन्यसंबन्धावच्छिन्नस्य व्यधिकरणधर्मावच्छिन्नस्य वा तन्तुनिष्ठत्वेन सिद्धसाधनाच्च। तदनवच्छिन्नेति विशेषणे वा अत्यन्ताभावत्वावच्छिन्नस्य पक्षीकरणे वा बाधाद्यनिस्तारात्। साधनावच्छिन्नसाध्यव्यापकस्य एतत्प्रतियोगिकान्योन्यप्रागभावान्यतरत्वस्य वाऽन्योन्याभावप्रागभावान्यतरत्वस्य वोपाधित्वाच्च। एतद्घटप्रागभाव एतन्निष्ठो न, प्रागभावत्वात् पटप्रागभाववदित्याभाससाम्यं चेत्यलम्।

अव्याप्यवृत्तित्वानधिकरणत्वे सत्युक्तपक्षतावच्छेदकवत् स्वसमानाधिकरणात्यन्ताभावप्रतियोगि, अनात्मत्वात्, संयोगवत् इत्यपि न। विश्वात्यन्ताभावे व्यभिचारात्। न च तस्याधिकरणस्वरूपत्वात् हेतोरेवागमनान्न व्यभिचार इति वाच्यम्। सप्रतियोगिकत्वेन निरुपाधिकात्मस्वरूपत्वानुपपत्तेः। न चातिरिक्तत्वेऽपि पक्षतुल्यत्वान्न व्यभिचार इति वाच्यम्। तथा सति विश्वस्य सत्यत्वं स्यात्। यत्र यदत्यन्ताभावो मिथ्या तत्र तत्प्रतियोगिनः सत्यत्वनियमात्। आत्मनि स्थायित्वात्यन्ताभावस्य मिथ्यात्वे स्थायित्वसत्यत्ववत्। उपपादितं चैतत् सामान्यतो मिथ्यात्वभङ्गे। अव्याप्यवृत्तित्वानधिकरणत्वरूपविशेषणमपि प्रागेव दूषितम्। न चाव्याप्यवृत्तित्वानधिकरणशब्देन एकदेशावच्छेदेनाविद्यमानत्वं विवक्षितमिति चोद्यम्। अवृत्तित्वेनार्थान्तरात्। तदर्थं वृत्तिमत्त्वे इत्यपि विशेषणे स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमेवोक्तं स्यादिति मूलोक्त बाध एव सुस्थः स्यात्। भिन्नशब्दप्रयोगमात्रेणार्थभेदेऽतिप्रसंगात्। संयोगे आवयोर्मते साध्यवैकल्यं च। रूप्यस्यैव दृष्टान्तत्वे तत्र मन्मते साध्यासंमतेः। आपणस्थरूप्यमेव निषिध्यत इति मते परमतेऽपि साध्यवैकल्यम्। प्रातिभासिकत्वमुपाधिश्च। न च दृष्टिसृष्टिपक्षे साधनव्यापकता। तस्य प्रतिकर्मव्यवस्थाप्रत्यभिज्ञादिविरोधेनाप्रामाणिकत्वात्। अर्थक्रियाकारित्वाभावस्योपाधित्वेऽदोषाच्च। साध्यस्य बाधितत्वेन पक्षेतरत्वस्यापि तथात्वसंभवात्। अनात्मत्वहेतुश्च पूर्वमेव दूषितः। उक्तविधः पक्षो नोक्तसाध्यवान् असत्प्रातिभासिकभिन्नत्वात् ब्रह्मवदिति सत्प्रतिपक्षश्च। असत्यपि व्यभिचारश्च। उक्तविधः पक्षः, स्वसमानकालीनप्रागभावप्रतियोगि अनात्मत्वाद् व्यतिरेकेण ब्रह्मवदित्याभास साम्यं चेत्यलम्। अत एव नवीनतृतीयानुमानमपि परास्तम्। उक्तदोषगणग्रासात्। असत्त्वापत्तिश्च। न चोत्पत्ति निवृत्त्यन्यतरप्रतियोगित्वेन तद्वैलक्षण्यमिति वाच्यम्। स्वरूपेण त्रैकालिकनिषेधे तयोरप्ययोगादिति।

अत एव च नवीन चतुर्थानुमानमप्यपास्तम्। असत्प्रातिभासिकाप्रतियोगिकात्मत्वावच्छिन्नधर्मिताको भेदः परमार्थसत्प्रतियोगिकः। असत्प्रातिभासिकाप्रतियोगिकभेदत्वात् आत्मप्रतियोगिकशुक्तिरूप्यनिष्ठभेदवदिति सत्प्रतिपक्षश्च। असत्प्रातिभासिकान्यतरप्रतियोगिकत्वमुपाधिश्च। आभाससाम्यस्य मूल एवोक्तत्वादिति दिक्।

एवमेव मिथ्यात्वसाधकत्वेनावभासमानानामाभासानां दूषणं स्वयमेव द्रष्टव्यमिति विस्तरभयादुपरम्यते।

सम्यञ्चो बहवोऽस्माकं सत्यत्वे हेतवो मताः ।
मिथ्यात्वे कोऽपि हेतुस्तु सम्यङ् नास्तीति निश्चितम् ॥

इत्यनुमानबाधवर्णनम् ॥

उभयसिद्धमसद्विलक्षणं मिथ्यात्वासमानाधिकरणधर्मानधिकरणम्, आधारत्वात् शुक्तिरूप्यवदित्यपि मन्दम्। ब्रह्मणि असद्विलक्षणे पक्षे मिथ्यात्वासमानाधिकरण ब्रह्मत्वरूप धर्माधिकरणत्वात् बाधः। तद्व्यावृत्त्यर्थं सद्विलक्षणमिति पक्षविशेषणे चाश्रयसिद्धिः। उभयसिद्धमसद्विलक्षणं मिथ्यात्वासमानाधिकरणधर्माधिकरणम्, असद्भिन्नाधारत्वात् ब्रह्मवदिति प्रतिपक्षश्च। यदि प्रातिभासिके व्यभिचारशङ्का तदा तद्भिन्नत्वेनापि विशेषणीयम्। प्रातिभासिकत्वं चोपाधिः। विमतं प्रातिभासिकत्वासमानाधिकरणधर्मानधिकरणम् आधारत्वात् रूप्यत्ववदित्यभास साम्यं च। त्वन्मतरीत्याऽसति व्यभिचारश्चेत्यलम्। प्रतियोग्यवच्छिन्नो देशः अत्यन्ताभावाश्रयः। आधारत्वात् कालवदित्यप्ययुक्तम्। यत्किंचिदत्यन्ताभावाश्रयत्वेन सिद्धसाधनात्। यत्प्रतियोग्यवच्छिन्नस्तदत्यन्ताभावाश्रयः इति साधने च बाधात्। विमतं नात्यन्ताभावाश्रयः संयोगसमवायान्यतरसंबन्धेन तदाश्रयत्वात् व्यतिरेकेण पटवदिति प्रतिपक्षश्च। कालवदेव वा अव्याप्यवृत्तित्वेन वोपपत्त्यार्थान्तरं च। पक्षधर्मावच्छिन्नसाध्यव्यापकस्य प्रतियोग्यनाधारत्वस्योपाधित्वाच्च। प्रतियोग्यवच्छिन्नो देशो न प्रतियोग्युपादानं, देशत्वात् पटवदित्याभासतुल्यत्वं च।

अथ मतम्। आत्मत्वावच्छिन्नं परमार्थसत्त्वाधिकरणप्रतियोगिकभेदत्वावच्छिन्नरहितम्। परमार्थसत्त्वात्। परमार्थसत्त्वावच्छिन्नवत्। परमार्थसति परमार्थसद्भेदाङ्गीकारवादिमतेऽपि स भेदो न परमार्थसत्त्वावच्छिन्ननिष्ठः। किन्तु घटत्वाद्यवच्छिन्ननिष्ठ एवेति न साध्यवैकल्यमिति। तन्न। बाधानिस्तारात्। विमतम् उक्तसाध्यरहितं पदार्थत्वात् शुक्तिरूप्यवदिति प्रतिरोधाच्च। दृष्टान्तस्य साध्यवैकल्याच्च। परमार्थसत्त्वावच्छिन्नस्य परमार्थसत्त्वावच्छिन्नप्रतियोगिकभेदत्वावच्छिन्नत्वरहितत्वेऽपि परमार्थसत्त्वाधिकरण प्रतियोगिक भेदत्वावच्छिन्नत्वात्। परमार्थसत्त्वावच्छिन्नप्रतियोगिकभेदत्वावच्छिन्नरहितत्वसाधने च सिद्धसाधनात्। परमार्थसत्त्वावच्छिन्नत्वमुपाधिश्च। न च साधनव्यापकता, पक्षेऽप्युपाधि सत्त्वादिति वाच्यम्। तत्सत्त्वस्य संदिग्धत्वात्। तावता संदिग्धोपाधित्वोपपत्तेश्च। घटत्वावच्छिन्नं व्यावहारिकसत्त्वाधिकरण प्रतियोगिकभेदत्वावच्छिन्नरहितम् व्यावहारिकसत्त्वात् व्यावहारिकसत्त्वावच्छिन्नवत्। एवं शुक्तिरूप्यत्वावच्छिन्नं प्रातिभासिकसत्वाधिकरणप्रतियोगिक भेदत्वावच्छिन्नरहितम् प्रातिभासिकसत्त्वात् प्रातिभासिक सत्त्वावच्छिन्नवदित्याभाससाम्यं वा। अथापि स्यात्। शुक्तिरूप्यं मिथ्यात्वेन प्रपञ्चान्न भिद्यते व्यवहारविषयत्वात् ब्रह्मवत्। साध्यमत्र त्रेधा। स्वस्यामिथ्यात्वेन उभयोर्मिथ्यात्वेन, उभयोरमिथ्यात्वेन वा। तत्रान्तिमपक्षस्यासंभवात् पक्षे साध्यसिद्धिपर्यवसानं मध्यमपक्षेण। दृष्टान्ते तु प्रथमपक्षेणेति विवेक इति। तदपि मन्दम्। बाधस्य पृष्ठलग्नत्वात्। विमतं साध्यहीनम्। प्रातिभासिकत्वात् व्यतिरेकेण ब्रह्मवदिति प्रतिरोधश्च। ब्रह्मव्यावहारिकान्यतरत्वमुपाधिश्च। शुक्तिरूप्यं प्रातिभासिकत्वेन प्रपञ्चान्न भिद्यते व्यवहारविषयत्वाद् ब्रह्मवदित्याभाससाम्यं च।

विमतं मिथ्या, मोक्षहेतुज्ञानाविषयत्वे सत्यसदन्यत्वात् शुक्तिरूप्यवदित्यपि तुच्छम्। मिथ्यात्वस्य प्रागेव सम्यग् दूषितत्वात्। ब्रह्मणो वृत्तिव्याप्यत्वं नेति मते ब्रह्मण्यनैकान्तिकत्वाच्च। जगतोऽपि ब्रह्मकार्यत्वेन ब्रह्मनिष्ठकारणत्व प्रतियोगित्वेन मोक्षहेतुज्ञानविषयत्वेन विशेषणासिद्धेश्च। उक्तहेतुनैव प्रातिभासिकत्वसाधनसंभवेनाऽभाससाम्यं च। प्रतिपक्षादिकं च मूलोक्तमेव ज्ञातव्यमित्यलं पिष्टपेषणेन।

साध्यविकलः भेदत्वात् व्यावहारिकप्रति योगिकभेदवदिति प्रतिरोधश्च। भेदत्वावच्छिन्नं सद्विलक्षणप्रतियोग्यधिकरणान्यतरवत् अभावत्वात् शुक्तिरूप्य प्रतियोगिकाभाववत् इत्यपि न। परमार्थसत्प्रतियोगिकस्य परमार्थसन्निष्ठस्य भेदस्यानुभूयमानत्वेन भेदत्वावच्छिन्ने एवंविधसाध्यस्य बाधात्। अत एव भेदत्वाभावस्योपाधित्वाच्च। भेदत्वावच्छिन्नं व्यावहारिक प्रतियोग्यधिकरणान्यतरवत् अभावत्वात् रूप्यप्रतियोगिकाभाववदित्याभाससाम्यं च। परमार्थसत्प्रतियोगिकत्वसमानाधिकरणं भेदत्वं परमार्थनिष्ठवृत्ति भेदवृत्तित्वात् शुक्तिरूप्यप्रतियोगिकभेदत्ववदिति सत्प्रतिपक्षश्चेति। परमार्थसन्निष्ठो भेदः न परमार्थसत्प्रतियोगिकः परमार्थसदधिकरणत्वात् शुक्तिरूप्यप्रतियोगिक भेदवदित्यप्यसाधु। ब्रह्माधिकरणकब्रह्मात्यन्ताभावे व्यभिचारात्। तन्निरासाय भेदत्वे सतीति विशेषणे चाप्रयोजकत्वम्। अत्यन्ताभाववदेवाधिकरणत्वप्रतियोगित्व योरुभयोरप्युपपत्तेः। तुच्छप्रतिभासिकप्रतियोगिकान्य परमार्थसन्निष्ठो भेदः परमार्थसत्प्रतियोगिकः तुच्छप्रातिभासिकान्यभेदत्वात् शुक्तिरूप्यनिष्ठपरमार्थप्रतियोगिक भेदवदिति प्रतिपक्षश्च। व्यावहारिकनिष्ठो भेदः। न व्यावहारिकसत्प्रतियोगिकः व्यावहारिकसदधिकरणत्वात् शुक्तिरूप्यप्रतियोगिकभेदवदित्याभास साम्यं च।

मिथ्यात्वं ब्रह्मतुच्छोभयातिरिक्तत्व व्यापकम्। सकलमिथ्यावृत्तित्वात्, मिथ्यात्वसमानाधिकरणात्यन्ताभावा प्रतियोगित्वाद्वा। दृश्यत्ववदित्यप्यचारु। असत्त्वे सन्दिग्धानैकान्तिकत्वात्। तत्र साध्याभावस्य निश्चितत्वात्। मदंगीकारत्वदंगीकाराभ्यां हेतुसंदेहात्। ब्रह्मतुच्छोभयातिरिक्त घटादौ मिथ्यात्वाभावस्य प्रत्यक्षसिद्धत्वाद् बाधश्च। मिथ्यात्वं नोक्तसाध्यवत् मिथ्यामात्रवृत्तित्वात् प्रतिभासिकत्ववदिति सत्प्रतिपक्षश्च। ब्रह्मवृत्तित्वमुपाधिश्च। न च व्यावहारिकप्रातिभासिकान्यतरत्वे साध्याव्यापकत्वम्। व्यावहारिकशब्देनाबाध्यविवक्षायां तत्र साध्याभावात्। बाध्यविवक्षायां चास्मन्मते तत्र साध्याभावात्। साध्यव्यापकतासन्देहेऽपि संदिग्धसाध्यव्यापकतानिस्तारात्। दृश्यत्वस्य ब्रह्मणि समर्थितत्वेन द्वितीयहेतोः साधनवैकल्यं च। मिथ्यात्वं तुच्छातिरिक्तत्वव्यापकं, सकलमिथ्यावृत्तित्वात् ज्ञेयत्ववत्, प्रातिभासिकत्वं वा ब्रह्मतुच्छोभयातिरिक्तत्वव्यापकं, सकलप्रातिभासिकवृत्तित्वात् अभिधेयत्ववदित्याभाससाम्यं चेत्यलम्।

दृश्यत्वं न परमार्थसद्वृत्ति, अभिधेयमात्रवृत्तित्वात् रूप्यत्ववत् इत्यप्यसङ्गसम्। दृश्यत्वस्य ब्रह्मणि साधितत्वेन बाधात्। दृश्यत्वं परमार्थसद्वृत्ति प्रमेयवृत्तित्वात् ब्रह्मत्ववदित्यादिना सत्प्रतिपक्षश्च। न चासिद्धिः। प्रत्यक्षादिप्रामाण्यस्य समर्थितत्वात्। असत्प्रातिभासिकान्यतरमात्रवृत्तित्वं चोपाधिः। ब्रह्मत्वज्ञानत्वानन्दत्वानि न परमार्थ सद्वृत्तीनि अभिधेयमात्रवृत्तित्वात् रूप्यत्ववदित्याद्याभासतुल्यता च।

दृश्यत्वं परमार्थसद्भिन्नत्वव्याप्यम्। दृश्येतरावृत्तिधर्मत्वात्। प्रतिभासिकत्ववत् इत्यप्यपटु। ब्रह्मत्वेऽनैकान्त्यात्। दृश्यत्वं न साध्यवत् सकलदृश्यवृत्तित्वात् प्रमेयत्ववदिति प्रतिपक्षश्च। अब्रह्मवृत्तित्वमुपाधिश्च। दृश्यत्वस्य ब्रह्मणि साधितत्वादेव साधनाव्यापकत्वं च। तत्संदेहेऽपि संदिग्धोपाध्यनिस्तारात्। दृश्यत्वं व्यावहारिकसद्भिन्नत्वव्याप्यं, दृश्येतरावृत्तित्वात् प्रातिभासिकत्व वदित्याभाससाम्यं च।

मिथ्यात्वेनानादिनित्यत्वाभावादसिद्धेः। मिथ्यात्वेऽपि तस्याविद्यादेरिवानादित्वे षडस्माकमनादय इति सिद्धान्तहानेः। अत्यन्ताभावस्य प्रतियोगिविशिष्टवृत्तित्वे साध्ये बाधाच्च। अत्यन्ताभाव उक्तसाध्यवान् संसर्गाभावत्वात् प्रागभाववत् इति सत्प्रतिपक्षाच्च। साधनावच्छिन्नसाध्यव्यापकस्यान्योन्या भावत्वस्योपाधित्वाच्च। प्रागभावो बा ध्वंसो वा प्रतियोग्यवच्छिन्नवृत्तिः। अभावत्वादन्योन्याभाववत् इत्याभाससाम्यं च। न द्वितीयः। संयोगवदव्याप्यवृत्तित्वेनोपपत्त्या अर्थान्तरात्। न च व्याप्यवृत्तिप्रतियोगिकत्वमत्यन्ताभावे विशेषणम्। अतो नोक्तदोष इति वाच्यम्। बाधाद्यनिस्तारादित्यलम्। अत्यन्ताभावत्वं प्रतियोग्यशेषाधिकरणवृत्तिमात्र वृत्ति। प्रतियोग्यवच्छिन्नवृत्तिमात्रवृत्ति वा नित्याभावमात्रवृत्तित्वात् अन्योन्याभावत्ववत् इत्यपि दुष्टम्। साध्ये मात्रपदस्य कात्स्न्यर्थत्वेऽवधारणार्थत्वे वा बाधात्। अत्राभावत्वं नोक्तसाध्यवत् संसर्गाभाववृत्तित्वात् प्रागभावत्ववदिति प्रतिषेधाच्च। साधनधर्मावच्छिन्नसाध्यव्यापकान्योन्याभाववृत्तित्वस्योपाधित्वाच्च। प्रागभावत्वं ध्वंसत्वं वा उक्तसाध्यवत् अभाववृत्तित्वादन्योन्याभावत्ववदित्याभाससाम्यं च। हेतुदूषणं च पूर्ववत्। घटात्यन्ताभावत्वं प्रतियोगिजनकाभावसमानाधिकरणवृत्ति, एतत्कपालसमानकालीनैतद्घट्प्रतियोगिका भाववृत्तित्वात्, प्रमेयत्ववत्। अत्र कपालनाशजन्यघटप्रतियोगिकध्वंसत्वे व्यभिचारनिरासायैतत्कपालसमान कालीनेति विशेषणमित्यप्यपटु। अव्याप्यवृत्तित्वेनोपपत्त्यार्थान्तरत्वात्। व्याप्यवृत्तिप्रतियोगिकेति पक्षविशेषणे बाधानिस्तारात्। अत्यन्ताभावत्वमुक्तसाध्यवन्न, अत्यन्ताभावमात्रवृत्तित्वाद्, व्यतिरेकेण ध्वंसत्ववदिति प्रतिरोधाच्च। न च साधारण्यम्। तस्यापि सत्प्रतिपक्षतयैव दोषतया सत्प्रतिपक्षे सत्प्रतिपक्षान्तरासम्भवात्। साधनावच्छिन्नसाध्यव्यापकप्रध्वंसान्योन्याभावान्यतरवृत्तित्वस्योपाधित्वाच्च। प्रागभावत्वं प्रध्वंसत्वं वा प्रतियोगिसमानकालीनवृत्ति, अभावत्वादत्यन्ताभाववदित्याभासतुल्यत्वात्।

अत एव एतत्कपालं एतद्घटात्यन्ताभावाधिकरणमाधारत्वात् पटादिवदित्यप्यसाधु। बाधात्। एतत्कपालं नोक्तसाध्यवत्, एतदारम्भकत्वात्, व्यतिरेकेण पटवदिति प्रतिपक्षाच्च। एतत्कपालं एतद्घटानारम्भकम्, आधारत्वात् पटादिवदित्याभाससाम्यं च। ब्रह्मत्वं न परमार्थसन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकं, ब्रह्मवृत्तित्वादसद्वैलक्षण्यवदित्यतिदुष्टम्। परमार्थसच्छब्देन ब्रह्मोक्तौ सिद्धसाधनम्। अबाध्योक्तौ च त्वन्मते सतोऽप्यबाध्यत्वेन तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वाद् बाधः। किं चान्योन्याभावस्यातात्विकत्वे सिद्धसाधनम्। तात्विकत्वे त्वपसिद्धान्तः। अब्रह्मवृत्तित्वमुपाधिश्च। ब्रह्मत्वं नोक्तसाध्यवत्, व्यतिरेकिधर्मत्वात्, घटवदिति प्रतिपक्षश्च। घटत्वं न व्यावहारिकनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं, व्यावहारिकवृत्तित्वात्, प्रमेयत्ववदित्याभासतुल्यता च॥

परमार्थसत्प्रतियोगिको भेदो न परमार्थसन्निष्ठः। परमार्थसत्प्रतियोगिकत्वात्। परमार्थसत्त्वावच्छिन्न प्रतियोगिकाभाववत्। एतदप्यसाधु। पक्षे साध्ये च परमार्थशब्देन ब्रह्मोक्तौ सिद्धसाधनम्। अबाध्योक्तौ त्वन्मते सतोऽपि अबाध्यत्वेन अबाध्यप्रतियोगिकस्य भेदस्याबाध्यनिष्ठत्वेन बाधात्। अबाध्यत्वावच्छिन्नप्रतियोगिकभेद पक्षीकारे तस्याबाध्यनिष्ठत्वाभावस्य मयाप्यंगीकृतत्वात् सिद्धार्थतैव स्यात्। असत्प्रातिभासिकान्यतर मात्रनिष्ठत्वमुपाधिश्च। व्यावहारिकसत्प्रतियोगिको भेदो न व्यावहारिकनिष्ठः। व्यावहारिकसत्प्रतियोगिकत्वात् व्यावहारिकसत्त्वावच्छिन्नप्रतियोगिकाभाववत् इत्याभाससाम्यं च। पक्षः

चेत्यलम्। अत एव विमतं मिथ्या ब्रह्मन्यत्वात् शुक्तिरूप्यवदित्यतितुच्छम्। मिथ्यात्वस्य पूर्वमेव दूषितत्वात्। बाधोपाधिसत्प्रतिपक्षाप्रयोजकत्वानिस्ताराच्च। विमतं नार्थक्रियाकारि। ब्रह्मन्यत्वात्। शुक्तिरूप्यवदित्याभाससाम्यं च। परमार्थसत्त्वं स्वसमानाधिकरणान्योन्याभावप्रतियोग्यवृत्ति सदितरावृत्तित्वात् ब्रह्मत्ववदित्यप्यसाधु। बाधाप्रयोजकत्वानिस्तारात्। किं च हेतौ सत्त्वं किं विवक्षितम्? पारमार्थिकसत्त्वं वा साधारणं वा? नाद्यः साध्याविशेषात्। द्वितीये च घटत्वादौ व्यभिचारः। तस्यापि तदितरस्मिन्नवृत्तेः। स्वसमानाधिकरणान्योन्याभाव प्रतियोगिनि घटान्तरे वृत्तेश्च। परमार्थसत्त्वम् उक्तसाध्यव्यतिरेकवत् तत्तत्वब्रह्मत्वेतरधर्मत्वात् घटत्ववत् इति सत्प्रतिपक्षाच्च। तद्घटत्वादौ व्यभिचारवारणाय तत्तत्वेतरेति। ब्रह्मत्वे तद्वारणाय ब्रह्मत्वेतरेति। ब्रह्ममात्रवृत्तित्वं चोपाधिः। साधनावच्छिन्नसाध्यव्यापकस्य तथात्वेन तद्घटत्वादौ न साध्याव्यापकता। परमार्थसत्त्वं न ब्रह्ममात्रवृत्ति ब्रह्मत्वेतरधर्मत्वात् ज्ञेयत्ववदित्यादिना पक्षावृत्तित्वासिद्धेः न साधनव्यापकतापि। तत्संदेहेऽपि संदिग्धोपाधित्वाच्च। अनेनैव वा सत्प्रतिपक्षः। प्रकृतसाध्याभावानवगाहनेऽपि पर्यवसितसाध्याभावावगाहनात्। न चैवमतिप्रसङ्गः। अनुकूलतर्कभावाभावाभ्यां विशेषात्। व्यावहारिकत्वं वा प्रातिभासिकत्वं वा असत्त्वं वा उक्तसाध्यवत्। व्यावहारिकेतरावृत्तित्वात् तद्घटत्ववत्। घटत्वादिकं च पक्षतुल्यम्। प्रातिभासिकेतरावृत्तित्वात् रूप्यवत्। असदितरावृत्तित्वात् शशविषाणत्ववदित्याद्याभाससाम्यं चेति। ब्रह्मत्वमेकत्वं वा सत्त्वव्यापकम्। सत्त्वसमानाधिकरणत्वात्। असद्वैलक्षण्यवत् इत्यपि मन्दम्। प्रत्यक्षादिबाधाद्यनिस्तारात्। अत्रापि हेतौ साध्ये च सत्त्वपदं पारमार्थिकादिसाधारणम्। पारमार्थिकत्वमात्रपरं वा? आद्ये घटत्वादौ व्यभिचारात्। तस्यापि सत्त्वसमानाधिकरणत्वात् सत्त्वाव्यापकत्वाच्च। सकलसदवृत्तित्वमुपाधिश्च। द्वितीये तत्रैव संदिग्धानैकान्तिकता। निश्चितसाध्याभाववति विवक्षितहेतुसंदेहात्। ब्रह्मेतरवृत्तित्वमुपाधिश्च। ब्रह्मत्वं सत्त्वाव्यापकम्। तन्मात्रवृत्तित्वात् व्यतिरेकेणाभिधेयत्ववदिति सत्प्रतिपक्षश्च। व्यावहारिकत्वादि उक्तसाध्यवत् उक्तहेतोरुक्तदृष्टान्तवदित्याभाससाम्यं चेत्यलम्।

व्याप्यवृत्तिर्घटादिः पक्षः जन्याभावातिरिक्तसमानाधिकरणाभावमात्रप्रतियोगी। अभावप्रतियोगित्वात् अभिधेयत्ववत्। अभिधेयत्वं हि परमते केवलान्वयित्वात् अन्योन्याभावमात्रप्रतियोगि। स च समानाधिकरण एव। अस्मन्मते तु मिथ्यैवेति नोभयथापि साध्यवैकल्यमित्यपि तुच्छम्। अत्र साध्ये मात्रपदं कात्स्न्यर्थकं वा अवधारणार्थकं वा? नाद्यः। घटादेः स्वसमानाधिकरणयावदभावप्रतियोगित्वस्य बाधितत्वात्। न हि घटः स्वसमानाधिकरणपटाभावप्रतियोगी। दृष्टान्ते साध्यवैकल्यं च। द्वितीयेऽपि बाध एव। व्यधिकरणस्यापि घटाभावस्य घटादेः प्रतियोगित्वात्। मात्रपदत्यागे सिद्धसाधनात्। अभावपदस्यात्यन्ताभावपरत्वे च जन्याभावातिरिक्तेति विशेषणवैयर्थ्यम्। दृष्टान्ते साध्यवैकल्यं च। ब्रह्मणि हेतुव्यावृत्त्याऽनैकान्त्याच्च। तत्रान्योन्याभावप्रतियोगित्वानङ्गीकारे ब्रह्मणो जडाद्यात्मकत्वापत्त्या बहुव्याकुलि स्यात्। प्रत्यक्षबाधाच्च। अप्रयोजकत्वाच्च। घटादिः उक्तसाध्यव्यतिरेकवान् तदधिकरणव्याप्यवृत्तित्वात्। व्यतिरेकेणासद्वदिति प्रतिरोधाच्च। घटादिः स्वसमानाधिकरणप्रागभावप्रतियोगी न। अभावप्रतियोगित्वात् अभिधेयत्ववत् इत्याभाससाम्यं च। अत्यन्ताभावः प्रतियोग्यवच्छिन्नवृत्तिः। नित्याभावत्वात् अन्योन्याभाववत् इत्यपि न। अत्र हि प्रतियोग्यवच्छिन्नवृत्तित्वं प्रतियोगिविशिष्टवृत्तित्वं वा प्रतियोग्यधिकरणवृत्तित्वं वा? नाद्यः। ध्वंसेऽनैकान्त्यात्। ध्वंसस्यानित्यत्वे अज्ञाननिवृत्तेरपि ध्वंसे मुक्तस्य संसारापातात्। अनादीति विशेषणेऽत्यन्ताभावस्यापि

सर्वस्यापि यत्किञ्चित्समान कालीनवृत्तित्वात्। घटसमानकालीनावृत्तीत्युक्ते यत्किञ्चिद्घटसमानकालीनवृत्तित्वेन बाधः। तदर्थमेतदिति प्रमेयत्वे व्यभिचारः। तदर्थमभावमात्रवृत्तित्वादिति। तावत्युक्ते गगनात्यन्ताभावत्वे व्यभिचारः। तदर्थं घटप्रतियोगिकेति। एवमपि घटान्तरप्रागभावत्वे स एव दोषः। तदर्थमेतदिति। एवमपि तन्तुनिष्ठैतद्घटात्यन्ताभावत्वे व्यभिचारः। तदर्थं घटसमानाधिकरणेति। एवमपि मृत्पिण्डान्तर निष्ठैतद्घटात्यन्ताभावत्वे स एव दोषः। तदर्थमेतदिति। एतद्घटान्योन्या भावत्वे व्यभिचारः। तदर्थमन्योन्याभावातिरिक्तेति। हेतावभावपदत्यागे एतद्घटसमवायत्वे व्यभिचारः। तदर्थमभावेति। समवायानङ्गीकर्तृमते स्वरूपसंबन्धविशेषे व्यभिचार इति सर्वं सुस्थम्।

अत्र हेतौ पक्षे च प्रतियोगिवृत्तिताप्रयोजकसंबन्धान्यानवच्छिन्नेत्यभावविशेषणम्। तेन संयोगेन घटवत्यपि भूतले समवायसंबन्धेन घटात्यन्ताभावसत्वात् घटात्यन्ताभावत्वे साध्याभावेन बाधः। तत्रैव साध्याभाववति हेतोर्वृत्तेर्व्यभिचार इति च निरस्तम्। समवायसंबन्धावच्छिन्नाभावस्य भूतले घटवृत्तिताप्रयोजकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वात्। न च साधनावच्छिन्नसाध्यव्यापकमेतद्घटप्रतियोगिक जन्यजनकान्यतरमात्रवृत्तित्वमुपाधिरिति वाच्यम्। जन्यजनकमात्रवृत्तिविशेषणस्योपाधित्वप्रयोजकस्य पक्षमात्रव्यावर्तकतया पक्षेतरत्वात्। अन्यथा पर्वतावयववृत्त्यन्यत्वादेरप्युपाधित्वं स्यात्। अप्रयोजकत्वाच्च। वक्ष्यमाणानुकूलर्केण हेतोः साध्यव्यापकतयोपाधेस्तदव्यापकतया साध्याव्यापकत्वाच्चेत्यलं पल्लवेन। ननु व्यधिकरणधर्मावच्छिन्नाभावभादाय बाध इत्यत आह– व्यधिकरणेति। अत्रादिपदेन सूचितम्- एतद्घटप्रागभावः एतद्घटसमानकालीनान्योन्याभावातिरिक्ततदभाव समानाधिकरणो न। एतद्घटप्रागभावत्वात्। व्यतिरेकेण पटप्रागभाववत् इत्याद्यनुमानम्। न चात्राप्रसिद्धिः। निरधिकरणे प्रसिद्धेः। न चासाधारण्यम्। तस्य दशाविशेषे दोषत्वात्। अनुकूलतर्कस्य वक्ष्यमाणत्वाच्च न कश्चिद् दोषलेशः। अथवा अंशित्वानुमानसत्प्रतिपक्षानुमान इव सामान्यतः साध्यप्रसिद्धिर्द्रष्टव्येति।

नन्वनेनानुमानेन कीदृशसत्त्वं सिद्धमित्यत आह अनेनेति। अत्र चेति। उक्तचतुर्विंशत्यनुमानेष्वित्यर्थः। तत्र सर्वत्र ब्रह्मत्वादय उपाधयः। आभाससाम्यं च प्राक् दर्शितमेव द्रष्टव्यम्। अव्यवहितानुमाने च एतद्घटप्रतियोगिक प्रागभावप्रध्वंसान्यतरमात्रवृत्तित्वमुपाधिः। एतद्घटप्रतियोगिकप्रागभावत्वम् एतद्घटसमानाधिकरणावृत्ति अन्योन्याभावातिरिक्तैतद्घटप्रतियोगिकाभावमात्रवृत्तित्वात् एतद्घटात्यन्ताभावत्व वदित्याभाससाम्यं च। न चैतद्घटध्वंसत्वे व्यभिचारः। तस्य पक्षतुल्यत्वात् इत्यादिकं न शङ्क्यमिति भावः। उक्तमर्थं संगृह्णाति – तथाचेति। आदिपदेनोक्तचतुर्विंशतिहेतवो गृह्यन्ते।

एतेनाधुनिकैर्विश्वमिथ्यात्वे विशेषतोऽनुमानान्युक्तानि अपहस्तितानि। तथाहि – तत्र तावद् ब्रह्मज्ञानेतराबाध्य ब्रह्मान्यासत्त्वानधिकारणत्वं पक्षः। पारमार्थिकसत्त्वाधिकरणावृत्तिब्रह्मावृत्तित्वात् शुक्तिरूप्यवत् इति न साधु। परीक्षितप्रत्यक्षानुमानाभ्यां घटादौ पारमार्थिकसत्त्वसिध्या तत्रोक्तधर्मस्यापि सिध्या बाधः। अत एवासत्प्रतिभासिकान्यतरमात्र वृत्तित्वमुपाधिश्च। उक्तो धर्मः पारमार्थिकसत्त्वाधिकरणवृत्तिः असदवृत्तित्वे सति प्रातिभासिकावृत्तिधर्मत्वात् ब्रह्मत्ववत् इति सत्प्रतिपक्षश्च। अप्रयोजकत्वं च। उक्तो धर्मः व्यावहारिकसत्त्वाधिकरणावृत्तिः, अर्थक्रियाधिकरणावृत्तिर्वा ब्रह्मावृत्तित्वात् शुक्तिरूप्यत्ववदित्याभाससाम्यं

ब्रह्मान्यद् वेदैकगम्यमिति। न चात्र पारमार्थिकत्वेन श्रुतितात्पर्यविषयत्वमुपाधिः। ब्रह्मणि तस्याभावेन साध्या व्यापकत्वात्। उपक्रमादिकं हि तात्पर्यसाधकम्। न च तस्य पारमार्थिकत्वेन तात्पर्यसाधकत्वम्। तथात्वे कर्मकाण्डे उपक्रमादिना पारमार्थिकत्वेन तात्पर्यं सिध्येत्। ब्रह्मविषयकोपक्रमादिकं तथा तात्पर्यकमित्यस्याप्रयोजकत्वात्। अधर्मादिविषयकमुपक्रमादिकं तथा साधकमित्यस्यापि सुवचत्वात्। ब्रह्मणो निर्धर्मकत्वेन पारमार्थिकत्वाभावस्य पूर्वमेवोपपादितत्वाच्च। जगत्यपि तथा सत्त्वेन साधनत्यापकत्वाच्च।

साक्षिवेद्यमिति। अत्र हेतौ ज्ञानं प्रति विषयत्वादित्युक्ते शुक्तिरूप्ये व्यभिचारः। तदर्थं दोषाजन्यज्ञानं प्रतीति। एवमपि निषेध्यत्वेन तादृशज्ञानविषयत्वात् उक्तदोषतादवस्थ्यम्। अत उक्तम् अनिषेध्यत्वेनेति। एवमपि व्यवसायद्वाराऽनुव्यवसायविषयत्वाद् दोषतादवस्थ्यम्। अतः साक्षादिति। नन्वेवमपि शुक्तिरूप्यादिषु व्यभिचारः। तेषां दोषजन्यवृत्तिविषयत्वेऽपि तदजन्यसाक्षिविषयत्वादिति चेन्न। त्वयाप्यविद्यावृत्ति प्रतिबिम्बितसाक्षिविषयत्वस्यैवाङ्गीकृतत्वेन प्रतिबिम्बितस्य विशिष्टस्य दोषजन्यत्वनियमात् शुक्तिरूप्यादिषूक्तहेतोरगमनान्न व्यभिचारः। दोषाजन्यज्ञानं प्रत्यनिषेध्यत्वेन साक्षाद्विषयस्यापि मिथ्यात्वे तादृशवेदान्तजन्यज्ञानविषयस्य ब्रह्मणः सत्यत्वे को विश्वासः? न हि परमार्थसत्त्वे उक्तहेत्वतिरिक्तं प्रयोजकम्। न च दोषजन्यज्ञानविषयत्वाभावस्तत्र प्रयोजक इति वाच्यम्। ब्रह्मणोऽपि क्षणिकमित्यादिदोषजन्यज्ञानविषयत्वेन सत्यत्वाभावापत्तेः। असतोऽपि चैतादृश ज्ञानविषयत्वाभावेन सत्यत्वापत्तेश्च। तस्माद् उक्तहेतोरेव सत्यत्वप्रयोजकतया तदभावार्थं त्वयापि शुक्तिरजतादेरुक्तहेत्व भावोऽङ्गीकरणीय इति कथं व्यभिचारः? न चैवमसिद्धिः। सुखादेरपि दोषजन्याविद्यावृत्ति प्रतिबिम्बितसाक्षिविषयत्वादिति वाच्यम्। सुषुप्तौ दोषाभावेनाविद्यावृत्त्यभावेऽपि सुखादिस्फुरणेन तस्य केवल साक्षिवेद्यत्वात्। अविद्यातद्वृत्त्यादेरपि तत्प्रतिबिम्बितसाक्षिविषयत्वेऽनवस्थापत्तेश्च। तस्मन्नासिद्धिः। न चात्मन्युक्त साधनाभावात् साधनविकलतेति वाच्यम्। तस्य दृश्यत्वभङ्गे वृत्तिव्याप्यत्वस्य साधितत्वात्। न चात्मनो देहैक्य भ्रमविषयत्वात् साधनविकलता। तद्विषयत्वेऽपि वेदान्तजन्यतादृश ज्ञानमादायोक्तसाधनसंभवात्। देहात्मैक्य भ्रमासंभवस्योक्तत्वाच्च। न चासतोऽपि दोषजन्य शाब्दज्ञानविषयत्वेन तत्र व्यभिचारः शङ्क्यः। तत्रानिषेध्यत्वेन तादृशज्ञानविषयत्वाभावात्। अनिषेध्यत्वेन तादृशज्ञानस्य दोषजन्यत्वनियमादिति दिक्।

विमतमिति। न च दृष्टिसृष्टिपक्षेऽसिद्धिः। दृष्टिसृष्टिपक्षस्य क्षणिकवादतुल्यत्वेनायुक्तत्वात्। तस्याग्रे दूषयिष्यमाणत्वाच्च। न चानादित्वमुपाधिः। तस्य पारमार्थिकत्वाप्रयोजकत्वेन अनुपाधित्वात्। प्रयोजकस्यैवोपाधित्वात्। अन्योन्याभावातिरिक्तेति। अन्योन्याभावातिरिक्तः एतद्घटसमानाधिकरणः एतद्घट प्रतियोगिको योऽभावस्तत्वं पक्षः। अत्राभावत्वमात्रस्य पक्षत्वे पटाभावत्वस्यापि पक्षत्वापत्तौ बाधः। तदर्थं घटेति। एवमपि घटान्तराभावत्वस्य पक्षत्वे स एव दोषः। तदर्थमेतदिति। एवमपि तन्तुवृत्त्यैतद्घटात्यन्ताभावस्य पक्षत्वापत्तौ स एव दोषः। तदर्थं घटसमानाधिकरणेति। एवमपि हेतौ चाभाववृत्तित्वादित्युक्ते मृत्पिण्डान्तरनिष्ठैतद्घटात्यन्याभावत्वस्य पक्षत्वे स एव दोषः। तदर्थमेतदिति। एवमप्येतद्घटान्योन्याभावत्वस्य पक्षत्वे स एव दोषः। तदर्थमन्योन्येति। साध्येसमानकालीनावृत्तीत्युक्तेऽप्रसिद्धिः।

ननु तथापि यत्र दूरादिदोषादुपलादौ चाकचिक्यकल्पना, तेन च चाकचिक्यदोषेण शुक्ताविव रजतकल्पना, तत्र चाकचिक्ये व्यभिचारः। तत्र स्वकार्यभ्रमाधिष्ठानज्ञानेन चाकचक्यरूप्ययोरुभयोरपि बाधेन साध्याभावात्, भ्रमहेतुत्वाच्चेति चेन्न। अत्र हि चाकचक्यं न दोषः। किन्तु तज्ज्ञानम्। तस्यैव भ्रमान्वयव्यतिरेकात्। चाकचक्यज्ञानं तु नाधिष्ठानज्ञानबाध्यम्। तस्याधिष्ठानवत् बाधानन्तरमप्येतावन्तं कालं भ्रम आसीदिति सत्त्वानुसन्धानात्। तथाच यो दोषश्चाकचक्यज्ञानं न तदधिष्ठानज्ञानबाध्यं, यद्बाध्यं चाकचक्यं तन्न दोष इति कथं तत्र व्यभिचारः? न चैवं सादृश्यमत्रापि दोषो न स्यात्। इष्टापत्तेः! तज्ज्ञानस्यैव दोषत्वात्। यद्वा, चाकचक्यज्ञानस्य पक्षसमत्वान्न व्यभिचारः। नन्वेवं सादृश्यस्य कथं दोषत्वव्यवहार इति चेन्न। दोषभूतज्ञानविषयत्वादिति गृहाण। न च व्यावृत्ताकाराधिष्ठानज्ञानानवधित्वं, स्वकार्यभ्रमाधिष्ठानानारोपितत्वं वा उपाधिः शङ्क्यः। अपरोक्षसाक्षात्कारानन्तरमपि शरीरेन्द्रियानुवृत्तिदर्शनेनोपाधिद्वयस्य पक्षे निर्णीतत्वेन साधनव्यापकत्वात्। अन्यथा जीवन्मुक्तस्य भिक्षाटनादौ प्रवृत्तिर्न स्यात्। व्यावृत्ताकाराधिष्ठानज्ञानासंभवस्य पूर्वमेवोपपादितत्वाच्च। वक्ष्यमाणानुकूलतर्केण हेतोः साध्यव्याप्यत्वे निर्णीते साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः साध्याव्यापकत्वादित्यस्य पृष्ठलग्नत्वाच्च। नन्वज्ञाने व्यभिचार इत्यत आह - शुक्त्यज्ञानमपीति। तथाच पक्षे पक्षतुल्ये वा न व्यभिचार इत्याशयः।

ब्रह्मान्यदनादीति। नन्वत्र ब्रह्मशब्देन ब्रह्मशब्दवाच्यं विशिष्टं वा विवक्षितं, तत्पदलक्ष्यं शुद्धं निर्गुणं वा? नाद्यः। विशिष्टान्यस्य शुद्धस्य पक्षत्वापत्तौ सिद्धसाधनात्। द्वितीये तादृशस्य तवासिद्ध्या पक्षासिद्धिरिति चेन्न। वेदान्ततात्पर्यविषयान्यस्य विवक्षणात्। घटादौ स्वरूपासिद्धिवारणाय पक्षेऽनादीति विशेषणम्। तेन घटादिव्यतिरिक्तं ब्रह्मान्यदनादि पक्ष इत्युक्तं भवति। अनादित्वादिति। नन्वत्रानादित्वं किं विवक्षितम्? न तावत् प्रागभावाप्रतियोगित्वम्। तस्यासत्यपि सत्त्वेनानैकान्त्यात्। नापि प्रागभावानवच्छिन्नसत्तायोगित्वं विवक्षितम्। असति च न सत्तायोग इति वाच्यम्। सत्ता किं जातिर्वा, अबाध्यत्वं वा? आद्ये तस्या ब्रह्मण्यावाभ्यामनङ्गीकारेण साधनवैकल्यात्। पक्षेऽप्यभावेन स्वरूपासिद्धेश्च। द्वितीये तादृशसत्तायोगस्य पक्षे प्रतिवादिनो ममासिद्धेरिति चेन्न। प्रागभावाप्रतियोगिवस्तुत्वस्य विवक्षितत्वात्। एवं चासतो वस्तुत्वाभावादेव न व्यभिचारः। पक्षेऽप्येतादृशमेवानादित्वं विवक्षितमिति नासतः पक्षत्वम्। तेन न बाधस्वरूपासिद्धी इति मन्तव्यम्। ब्रह्मवदिति। विवक्षितेति शेषः। तेन न साध्यसाधनवैकल्ये। न च ध्वंसाप्रतियोगित्वमुपाधिरिति वाच्यम्। घटादेरुक्तरीत्या परमार्थसत्त्वस्य प्रत्यक्षादिसिद्ध्या तत्रोपाधेः साध्याव्यापकत्वात्। असतो ध्वंसाप्रतियोगित्वसत्त्वेऽपि परमार्थसत्त्वादृष्ट्या तस्य तत्राप्रयोजकत्वेनानुपाधित्वाच्च। उक्तरीत्या हेतोः साध्यव्याप्यत्वेन तदव्यापकतया साध्याव्यापकत्वाच्च। अप्रयोजकत्वं परिहरति - दोषजन्यज्ञानादिति। ब्रह्मेति। अत्रापि ब्रह्मपदार्थः पूर्ववत्। तेन शबलब्रह्माऽदाय न सिद्धसाधनतेति बोध्यम्। नन्वत्र कथं व्याप्तिः? यदा ब्रह्म तदा काल इति वा, यत्र ब्रह्म तत्र काल इति वा? नोभावपि। सिद्धसाधनात्। न हि देशकालयोर्देशकालासंबन्धः। परममुक्तौ तु न देशो न काल इति चेन्न। ब्रह्म कालाद्यविनाभूतमिति साधनात्। कालाद्यविनाभावो हि कालादिव्यतिरेकेण सद्रूपत्वशून्यत्वम्। न चैतत् ब्रह्मणः परमते सिद्धम्। परेण कालाद्यसत्त्वेऽपि परममुक्तौ ब्रह्मणः सद्रूपत्वाङ्गीकारात्।

स्वप्रतियोगिविषयविषयकेत्याद्युक्तम्। अनात्मेति विशेषणाभावे सिद्धार्थतैव, तादृशज्ञानाबाध्यात्म समानकालीनत्वादिति सर्वं सार्थकम्। ननु हेतौ बन्धपदेनाज्ञानादिरूपो बन्धो विवक्षितोऽथ निगडादिरूपो वा, साधारणो वा? नाद्यः। दृष्टान्तस्य साधनवैकल्यात्। द्वितीये स्वरूपासिद्धेः। न तृतीयः। साधारणस्य बन्धपदार्थस्यानिर्वचनात् इति चेन्न। प्रभुप्रसादसाध्यनिवृत्तिप्रतियोगित्वस्य, बन्ध इत्यभियुक्तव्यवहारविषयत्वस्य वा साधारणस्य बन्धत्वनिर्वचनसंभवेनोक्तदोषाभावात्। न चाद्यं बन्धत्वं संसाररूप बन्धस्यासिद्धम्। यस्य प्रसादादित्यादिश्रुतिसिद्धत्वात्। नापि द्वितीयेऽन्योन्याश्रयः। प्रयोगविषयत्वे ज्ञाते च प्रयोगः, प्रयोगे च तद्विषयत्वमिति। पूर्वपूर्वाभियुक्तप्रयोगविषयत्वज्ञानेनोत्तरोत्तरप्रयोगोपपत्तेः। अत एव द्वितीयाध्याये वेदब्राह्मणलक्षणमेवमेव कृतम्। न च साध्ये स्वपदाननुगमो दोषः। तस्याव्यवहितानुमानोक्तरीत्या परिहारसंभवात्। न च हेतौ बन्धपदं व्यर्थमिति व्याप्यत्वासिद्धिः। घटनिवृत्तौ व्यभिचारवारणार्थत्वात्। घटनिवृत्तिप्रतियोगिनो घटस्य सविषयत्वाभावेनविषयत्वघटित साध्याभावात्। अज्ञाननिगडादिरूपबन्धस्य ज्ञानादिवत् सविषयत्वानुभावन्नासिद्धिसाध्यवैकल्ये। उक्तहेतोरुक्तसाध्येन निरुपाधिकसहचारदर्शनात्, श्रुत्यनुगृहीतत्वाच्च नाप्रयोजकत्वमपि। कस्याश्चिन्निवृत्तेरनात्मसमानकालीनत्वदर्शनात् निवृत्तिमात्रस्य तथात्वं यदि साध्येत तर्हि संसारकालीनाया दुःखनिवृत्तेः समानाधिकरणदुःखप्रागभावकालीनत्वदर्शनमपि दुःखनिवृत्तिमात्रस्य तथात्वं साधयेदित्यतिप्रसङ्गोऽपि न। वैषम्यात्। दुःखप्रागभावसमानकालीनत्वसाधनस्य मुक्तेरपुमर्थत्वप्रसङ्गरूपप्रतिकूलतर्कपराहतिवत् प्रकृतानुमानस्य तदभावात्। प्रत्युतानात्मसमानकालीनत्वाभावे कालाकाशाद्यभावे व्याहतिप्रसङ्गरूपविपक्षबाधकस्यैव संभवाच्चेत्यलं मृतमारणेनेति।

अत्राऽदिपदेन विमत आनन्दो, ज्ञानं वा स्वज्ञानाबाध्यानात्मवान् तादृशभावरूपानात्मवान् वा ज्ञानत्वादानन्दत्वात् लौकिकानन्दादिवदित्यादीनि गृहीतानि। आत्मधीरिति। अत्र वेदान्ततात्पर्यविषयात्मधीः पक्षः। तेन विशिष्टात्मधियः पक्षत्वे तस्यां साध्यसत्त्वात् सिद्धार्था प्रतिज्ञेति निरस्तम्। स्वविषयमात्रविषयकधीबाध्या नेति साध्यार्थः। तेनेदं रजतमिति ज्ञाने न व्यभिचारः। तस्य स्वविषयविषयकनेदं रजतमिति ज्ञानेन रजताभावविषयकेण बाध्यत्वेन स्वविषयमात्रविषयकज्ञानबाध्यत्वाभावात्। अत एवान्धोऽयं रूपज्ञानवानिति अन्धस्य रूपविषयतया कल्पितं यज्ज्ञानं तस्य रूपं नान्धगम्यमिति स्वविषयविषयकप्रत्ययबाध्यत्वदर्शनेन व्यभिचार इत्यपास्तम्। विवक्षितसाध्यस्य तत्रापि सत्त्वात्। न ह्यन्धो रूपज्ञानवानिति ज्ञानविषयमात्रविषयकं रूपं नान्धगम्यमिति ज्ञानम्। नञर्थस्याधिकस्य भानादिति। न च पक्षे धीपदेन चैतन्यरूपधीविवक्षायां सिद्धार्थता। धीपदेन वेदान्तजन्य वृत्तेर्विवक्षितत्वात्। न चात्र स्वविरोध्यविषयत्वमुपाधिः। पक्षीभूताया धियः आत्ममात्रविषयत्वेन स्वविषयविरोध्यविषयत्वेन साधनव्यापकत्वेनानुपाधित्वात्। अप्रयोजकत्वेन साध्याव्यापकत्वाच्चेति। आत्माधिष्ठानकभ्रम हेतुरिति। अत्र हेतौ हेतुत्वादिति दण्डादौ व्यभिचारि। अप्रसिद्धप्रतियोगिकाभावानङ्गीकर्तृमते दण्डादिकार्यभ्रमाभावेन तदधिष्ठानज्ञानबाध्यत्वस्याप्रसिद्धत्वेन तदभावस्य तत्रासंभवात्। अतो भ्रमेति। भ्रमहेतुत्वं च दण्डादौ नास्ति। भ्रमहेतुता हि दोषत्वेन वा, इन्द्रियसंप्रयोगत्वेन वा? नोभयथापि। दण्डादेर्दोषत्व संप्रयोगत्वयोरसंभवात्। नाप्यधिष्ठानत्वेन। तस्य भ्रमाहेतुत्वात्। अतीताद्यधिष्ठानकभ्रमस्यापि दर्शनात्।

साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः साध्याव्यापकत्वात्। अनुकूलतर्काणां वक्ष्यमाणत्वात्। अन्यथा पर्वतेतरत्वादेरप्युपाधित्वं स्यादित्यलम्।

आत्मेति। न च विशिष्टात्मनः परमार्थसदन्यत्वात् सिद्धसाधनम्। आत्मशब्देन वेदान्ततात्पर्यविषयस्य विवक्षणात्। अत एव व्यावहारिकभेदमादायापि न सिद्धसाधनम्। वेदान्ततात्पर्यविषये परमार्थसतप्रतियोगिकव्यावहारिकभेदस्य परेणाप्यनङ्गीकारात्। कल्पितप्रातिभासिकभेदेन सिद्धसाधने मूल एवाति प्रसंगस्योक्तत्वात्। न चानानन्दत्वमुपाधिः। तस्य वैषयिकानन्दे परीत्यैव साध्याव्यापकत्वात्। वैषयिकानन्दो ब्रह्मस्वरूपातिरिक्तो नास्त्येव। किन्तुतत्स्वरूपस्यैव विषय संबन्धेनाभिव्यक्तिरिति न युक्तम्। जडत्वभङ्गे ब्रह्मस्वरूपातिरिक्तस्यैव तस्य समर्थनात्। अन्तःकरणवृत्तिरूपानन्दाभावे च तद्वृत्तिरूपं ज्ञानमपि न स्यात्। किं चाप्रयोजकश्चोपाधिः। न च परमार्थसदन्यत्वेऽनानन्दत्वं प्रयोजकम्। किन्तर्ह्यसत्त्वम्। अन्यथा, सत्यं ज्ञानमित्यादिवाक्ये आनन्दपदेनैवानृतव्यावृत्तिसिद्धौ सत्यपदवैयर्थ्यापत्तेः। तस्मात् नानानन्दत्वमुपाधिः। आत्मा यावत्स्वस्वरूपेति। अत्राऽत्मशब्देन तदेव विवक्षितम्। तेन विशिष्टात्मनि उक्तसाध्यसत्त्वात् सिद्धसाधनतेति निरस्तम्। न च पञ्चमप्रकाराविद्यानिवृत्तिमादाय सिद्धसाधनशङ्का। तस्या अपि यावदात्मस्वरूपमनुवर्तमानत्वाभावात्। तत् कस्य हेतोः? अविद्यावस्थायामभावादेव। अविद्यानिवृत्तेरात्मवत् सर्वदा सत्त्वे तदर्थकश्रवणादिविधिवैयर्थ्यम्। अभाव द्वैतस्य पूर्वमेव निरस्तत्वाच्च। तन्मतानुसारेणभावत्वविशेषण प्रक्षेपेणाप्यनुमानं दर्शयति – यावत्स्वस्वरूपमनुवर्तमान भावरूपेति। ननु यावत्स्वस्वरूपेत्यत्र स्वपदस्य यत्किञ्चित्स्वरूपपरत्वं वा, आत्मस्वरूपपरत्वं वा विवक्षितम्?. नाद्यः। सिद्धसाधनात्। द्वितीयेऽप्रसिद्धिः। न हि यावदात्मस्वरूपमनुवर्तमानोऽनात्मा प्रसिद्धोऽस्ति। अन्यथा सिद्धसाधनमेवेति चेन्न। स्वपदस्य समभिव्याहृतपरत्वेन व्याप्तिग्रहदशायां दृष्टान्तस्वरूपं, साध्यप्रमितिदशायां चात्मस्वरूपमेव प्राप्यते। एवं च नाप्रसिद्धिः। नवा सिद्धसाधनम्। यथा, क्षित्यादिकं स्वोपादानगोचरापरोक्षज्ञानादिमज्जन्यमित्यत्र, तद्वत्। ननु च शब्दाद् यदा बोधस्तदैवं वक्तव्यम्। न ह्यत्र शाब्दो बोधः। किन्त्वनुमानजन्यः। अनुमाने च शब्दस्वभावोऽनुपयुक्तः। अत एव स्वज्ञानाबाध्येत्यत्रापि स्वपदेऽयं दोषस्तुल्य इति चेन्न। भ्रान्तोऽसि। न हि वयमनुमाने शब्दस्वभाव उपयुज्यत इति ब्रूमः। किन्तु वाक्यरूपात् परार्थानुमानात् परस्य तथोपस्थितिरिति। तत्र च साध्याप्रसिद्धिर्न दूषणम्। व्याप्तिग्रहदशायां स्वशब्देन परबुद्धिस्थदृष्टान्तस्यैवोपस्थित्या व्याप्तिग्रहसंभवे विषयसिद्धेरनपेक्षणात्। अन्यथा तवापि प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तेति त्वदीयानुमाने उक्तदूषणसंभवे उत्तराभावप्रसङ्गात्। अत एव स्वज्ञानाबाध्येत्यत्रापि नायं दोष इत्यालोचनीयम्।

विमतेति। परममोक्ष रूपेत्यर्थः। तेन जीवन्मुक्तिरूपबन्धनिवृत्तावुक्तसाध्यसत्त्वात् सिद्धसाधनमिति परास्तम्। साध्यस्य चायमर्थः। स्वस्या बन्धनिवृत्तेर्यः प्रतियोगी बन्धोऽज्ञानादिरूपस्तस्य यो विषयः शुद्धचिन्मात्रं तद्विषयकं यज्ज्ञानं तेनाबाध्यो योऽनात्मा तत्समानकालीनेति। अत्रानात्मसमान कालीनेत्युक्तेऽनेकजीववादिमते सिद्धसाधनता। यत्किंचिदात्मबन्धनिवृत्तेर्यत्किञ्चिदनात्मसमानकालीनत्वात्। एकजीववादिमते त्वर्थान्तरता। आत्माज्ञानाबाध्येत्येव क्रियमाणे परमते दृष्टान्ते साध्यविकलता स्यादिति

तद्वदनाप्तत्वापत्त्या तदुक्तपुराणादौ आश्वासायोगाच्च। 'अनाद्यनन्तम्' 'न त्वेवाहं जातु नासम्' इत्यादितद्वचनेनापि जगत् सत्यत्वेनैव पश्यति इति सिद्धेश्च। नापि देहात्मैक्यभ्रमे व्यभिचारः। तदभावस्योपपादयिष्यमाणत्वात्। तत्सत्त्वेऽपि तस्याऽविद्यकत्वेनेश्वरमायाकल्पितत्वाभावात्। माया विद्ययोरभेदेऽपि केनापि रूपेण शक्तिभेदेन वा भेदस्यावश्यकत्वात्। अन्यथा घटादिवद् देहात्मैक्यभ्रमस्य सर्वसाधारणत्वापातात्। मन्मते भ्रमस्य सत्यत्वेन तद्विषयस्यासत्त्वेन च मायाकल्पितत्वाभावसत्त्वाच्च। त्वां प्रति तूष्णपादनान्नोक्तदोष इति हृद्यम्।

विमतमिति। जीवाज्ञानपरिकल्पितमिति मतेऽस्याभिधानान्न मतान्तरे सिद्धसाधनं शंक्यम्। तस्येति। न च प्रत्यक्षप्रत्यभिज्ञानस्य सुषुप्तिकालस्थायित्वासाधकत्वादसिद्धिः। किंतु तत्कालपर्यन्तस्थायित्वसाधकत्वम्। अतो न क्षणिकत्वापत्तिरपीति वाच्यम्। एवं ह्यात्मस्थायित्वप्रत्यभिज्ञानस्यापि सुप्तिकालस्थायित्व साधकत्वाभावप्रसङ्गात्। तथाचाऽत्मनोऽनित्यत्वापत्त्या क्षणिकत्वानुमानेनात्मनोऽपि क्षणिकत्वापत्तेः। प्रत्यभिज्ञया तावत्कालस्थायित्वस्येव सुषुप्तिकालस्थायित्वसिद्धिसंभवे संकोचे कारणाभावात्। बाधकाभावेऽपि सुषुप्तिकालस्थायित्वासिद्धौ तथा तावत्कालस्थायित्वस्याप्यसिद्धेश्च क्षणिकत्वं दुर्वारमिति। अदृष्टादेरिति। न चादृष्टादेः कारणात्मनाऽवस्थितत्वेन पुनरुद्बोधापत्तिरिति शङ्क्यम्। अदृष्टादेः कारणं हि अन्तःकरणमहंकारो वाऽविद्या वा। तदवस्थानाङ्गीकारे तस्यैव जीवाकल्पितत्वं स्यात्। न चादृष्टस्य कारणमात्मैवेति युक्तम्। आत्ममात्रस्य पुनरुद्बोधकत्वासंभवात्। तदङ्गीकारे वा मोक्षेऽप्युद्बोधापत्तेरिति दिक्।

सामान्येनेति। पूर्वं यावद् विमतिविषयीभूतं तावत् पक्षीकृत्य सत्यत्वं साधितवान्। इदानीं यं कंचन पदार्थं पक्षीकृत्य साध्यमानं सत्यत्वं ब्रह्मान्यस्मिन् यस्मिन्कस्मिंश्चित् विमते पदार्थे पर्यवस्यतीति सामान्येनेत्युक्तम्। अग्रे तु पदार्थविशेषं पक्षीकृत्य साध्यमानं साध्यं विशेष एव पर्यवस्यतीति विशिष्येत्युक्तमिति द्रष्टव्यम्। मिथ्यात्वमिति। नन्वत्र सदसद्विलक्षणत्वं मिथ्यात्वं न पक्षः। तस्य वादिनं प्रत्यसिद्धत्वेनाश्रयासिद्धेः। सिद्धसाधनाच्च। सदसद्विलक्षणत्वस्यात्मान्यसर्वमध्यपतितासत्यवृत्तेरिति चेन्न। सद्विलक्षणत्वस्य मिथ्यात्वपदेन विवक्षितत्वात्। तच्च वादिनः सिद्धमिति नाश्रयासिद्धिः। न वा सिद्धसाधनम्। यद्वा, प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं तदिति न कोऽपि दोषः। हेतावपि मिथ्यापदेनैतद्वयमेव विवक्षितम्। अत उक्तमिथ्यात्वस्य सदसद्विलक्षणरूपमिथ्यामात्र वृत्तित्वाभावादसिद्धिरिति परास्तम्। न च संदिग्धानैकान्तिकता, निश्चितसाध्याभाववत्यात्मभेदे हेतुसंदेहादिति वाच्यम्। आत्मभेदो हि आत्मनिष्ठो वाऽऽत्मप्रतियोगिको वा? नाद्यः। तत्र हेत्वभावस्यैव निर्णीतत्वात्। न द्वितीयः। तत्र त्वन्मते हेतोर्निर्णयान्न संदिग्धानैकान्तिकता। नापि मन्मते। मम तत्र हेत्वभावस्यैव निर्णयात्। न च मिथ्यात्वन्यूनवृत्तित्वमुपाधिः। शुक्तिरूप्यत्वे साध्यव्यापकत्वात्, पक्षे च साधनाव्यापकत्वादिति शङ्क्यम्। तद्धि क्वचिन्मिथ्यात्वाधिकरणवृत्तित्वम्। एवं चात्मत्व एव साध्याव्यापकता। तस्यात्मान्यसर्ववृत्तित्वाभावेन साध्यवत्त्वात्। मिथ्यात्वाधिकरणावृत्तित्वेनोपाधिशून्यत्वाच्च। न चात्मत्वस्य विशिष्टात्मवृत्तितया तत्र साध्योपाध्योः सत्वात् नोपाधेः साध्याव्यापकतेति युक्तम्। आत्मत्वशब्देन परमार्थत्वस्य विवक्षितत्वात्। विशिष्टात्मनि तदभावात्। मिथ्यात्वन्यूनवृत्तित्वं नाम मिथ्यात्वाव्यापकत्वमित्यपि न। अनुकूलतर्केण हेतोः साध्यव्याप्यत्वे

वक्तव्यम्। एवं च कथमसिद्धिः? तस्येदानीमपि प्रकाशमानत्वात्। नन्विदानीं चैतन्यप्रकाशाभावादेव हेतोरसिद्धिरित्यत आह – चैतन्यं चेति। न च चैतन्यशब्देन वेदान्ततात्पर्यविषयस्य विवक्षितत्वात् तस्य चेदानीमभानादसिद्धिरिति वाच्यम्। सुखादिसाक्षिण एव शुद्धस्य परेण वेदान्ततात्पर्यविषयत्वाङ्गीकारात् अन्यस्याशुद्धस्य जडत्वेन साक्षित्वानुपपत्तेरिति। ननु शङ्कत्वाज्ञानकार्ये पीतत्वादौ व्यभिचार इत्यत आह – शङ्कत्वादाविति। न चाप्रयोजकत्वमित्याह-अत्रापीति। उक्तन्यायमन्यत्राप्यतिदिशति – एवमिति। विमतमिति। अत्र साध्ये आत्मशब्देन वेदान्ततात्पर्यविषयो विवक्षितः। तेन विशिष्टात्मन्यध्यस्तत्वाभावेन सिद्धसाधनत्वशङ्का निरस्ता। हेतौ तत्त्वपदं रूप्ये व्यभिचारवारणाय। तस्यापि शुक्तिसामान्याकारसाक्षात्कारवत्प्रवृत्तिविषयत्वात् इति वाच्यम्। न च तत्वशब्देनानारोपिताकारविवक्षायां स एव दोषः। तस्यापीदंत्वाकारसाक्षात्कारवत्प्रवृत्तिविषयत्वात् इति वाच्यम्। अनारोपितासाधारणाकारस्य विवक्षितत्वात्। तत्राप्यसाधारणपदेनासंकीर्णस्वरूपं विवक्ष्यते। तेन ब्रह्मणो निराकारत्वेनोक्तविषयत्वस्य न सिद्धिः। ब्रह्मणोऽसंकीर्णस्वरूपस्य परेणाप्यङ्गीकृतत्वात्। ननु प्रतिबिम्बे व्यभिचारः। स हि मुखैक्यसाक्षात्कारवत्प्रवृत्तिविषयो भवति, मुखे चाध्यस्त इति चेन्न। मुखैक्यसाक्षात्काराभावेन हेतोरेवागमनान्न व्यभिचारः। मम मुखमित्यस्य च लांछिते मम मुद्रेतिवद् गौणत्वात्। यदि च तत्र भेदप्रत्ययात् तथा, प्रकृतेऽपि ह्रस्वत्वदीर्घत्वादिविरुद्धधर्मप्रत्यक्षे तस्याऽवश्यकत्वात्। बिम्बप्रतिबिम्बयोः सादृश्यज्ञानस्य च सर्वसिद्धत्वाच्च। अत एव प्रतिबिम्बे बालानां बालान्तरभ्रमः। अस्त्वैक्यसाक्षात्कारः। तथापि तस्य तत्वसाक्षात्कारत्वाभावादेव न व्यभिचारः। बिम्बप्रतिबिम्बयोर्भेदस्य समर्थयिष्यमाणत्वात्। तस्य तत्वसाक्षात्कारत्वे वा न तत्राध्यास इति साध्याभावादेव न व्यभिचार इत्यनवद्यम्।

अथैवं तद्व्यतिरेकेणोपलभ्यमानत्वमुपाधिरिति। तस्यात्मनि साध्याव्यापकत्वात्। नच साधनधर्मावच्छिन्नसाध्यव्यापकत्वमिति वाच्यम्। तत्रापि जीवन्मुक्तोपास्तिरूपप्रवृत्तिविषयत्वसत्त्वेन साधनावच्छिन्न साध्यस्यापि सत्त्वात्। जीवन्मुक्तो नोपास्ते फलाभावादिति तन्न। मोक्षे आनन्दातिशयरूपफलसम्भवात्। तस्य च समर्थयिष्यमाणत्वात्। अनुकूलतर्कसत्त्वेन हेतोः साध्यव्याप्यत्वेन साध्यव्याप्यहेत्वव्यापकत्वेन उपाधेः साध्याव्यापकत्वाच्च। पक्षे उपाधेः सत्त्वेन साधनव्यापकत्वाच्च। न च विश्वं ब्रह्मणा सहैवोपलभ्यते, सन् घट इत्यादि प्रतीतेरिति वाच्यम्। अत्र घटगतसत्त्वस्यैव भानेन ब्रह्मरूपसत्तायाश्चाक्षुषादिज्ञानविषयत्वाभावादित्युक्तत्वात्। एवमग्रेऽप्युपाधिनिराकरणं बोध्यम्।

ननु शङ्कारोपितपीतत्वे व्यभिचार इत्यत आह – शङ्क इति। विमतमिति। नन्वत्र हेतौ सामान्यव्याप्तिरेव ग्राह्या। विशेषव्याप्तौ दृष्टान्ताभावात्। यद् यं प्रत्यपरोक्षं न तत् तन्मायाकल्पितमिति। एवं चैन्द्रजालिकं प्रत्यपरोक्षे तन्मायाकल्पिते व्यभिचारः। तथा दैहात्मैक्यभ्रमे च। न च देहात्मैक्यस्याऽविद्यकत्वान्न मायाकल्पितत्वमिति साध्यसत्त्वान्न व्यभिचार इति वाच्यम्। माया‌विद्ययोरभेदादिति चेन्नैवम्। अत्र ह्यपरोक्षत्वमनिषेध्यत्वेन विवक्षितम्। ऐन्द्रजालिकं प्रत्यैन्द्रजालिकं गजाद्यनिषेध्यत्वेन नापरोक्षमिति न तत्र व्यभिचारः। ईश्वरस्यानिषेध्यत्वेन जगद्दर्शनाभावे तत्पालनार्थं प्रवृत्त्यनुपपत्तेर्नासिद्धिः। न चैन्द्रजालिकप्रवृत्तिवदुपपत्तिः। तस्य लोकवञ्चनेन स्वप्रयोजनवद् ईश्वरस्य जगद्वञ्चनेन प्रयोजनाभावात्।

किञ्चेति। अत्र सत्त्वं तात्त्विकं विवक्षितम्। तेन न व्यावहारिकसत्त्वाङ्गीकारेण सिद्धसाधनम्। हेतौ च सत्त्वं सार्वदेशिकसार्वकालिकनिषेधप्रतियोगित्वं विवक्षितमिति नास्मदभिमताप्रातिभासिके व्यभिचार इति। पररीत्या व्यभिचारमाशङ्क्य निषेधति – न चेति। तथा च रूप्यं नासद्विलक्षणं, सद्विलक्षणत्वादित्यनेन हेत्वभावस्य साधनान्न व्यभिचारः। न चात्रप्रयोजकत्वं, हेतूच्छित्तेरित्याह – तस्यासद्विलक्षणत्व इति। न च शुक्तिरूप्यस्यासत्त्वेऽपरोक्षप्रतीतिर्न स्यादिति वाच्यम्। असतोऽप्यपरोक्षप्रतीतौ बाधकाभावात्। न चादर्शनमेव बाधकम्। तत् किं प्रातिभासिकस्य तद् दृष्टम्? इहैव तत् कल्प्यत इति चेत् सममितरत्रापि। किं चासद्विलक्षणत्वे सद्विलक्षणत्वानापत्त्या साध्यसत्त्वादेव न व्यभिचारः। अथ गजादौ गोवैलक्षण्येऽपि अश्ववैलक्षण्यवद् असद्वैलक्षण्येऽपि सद्वैलक्षण्योपपत्तिरिति चेन्न। गोत्वाश्वत्वयोः परस्परविरहरूपत्वाभावात्। सत्त्वासत्त्वयोश्च परस्परविरहरूपताया मिथ्यात्वनिरुक्तिभङ्गे समर्थितत्वादिति वैषम्यम्। तथाऽपि किं तत्वमितिचेद् असदेव रजतं प्रत्यभादित्यनुभवात् असत्त्वमेवेति न व्यभिचार इति निरवद्यम्।

विमतमिति। नन्वत्राज्ञानशब्देन ज्ञानाभावो वा, अनिर्वचनीयरूपमज्ञानं वा विवक्षितम्? नाद्यः। सिद्धसाधनात्। न हि ज्ञानाभावकार्यं जगदित्यङ्गीक्रियते। न द्वितीयः। वादिनोऽप्रसिद्धविशेषणत्वादिति चेन्न। असत्प्रतियोगिकाभावाङ्गीकर्तुर्वादिनः पराभ्युपगममात्रेण प्रसिद्धिसंभवात्। न च द्वितीयसाध्ये आत्मनि व्यभिचारः। अस्ति च तत्र हेतुः। नास्ति च साध्यम्। तस्य चैतन्यं क्षणिकमिति चैतन्याज्ञानकार्यधीविषयत्वादिति वाच्यम्। अनधिष्ठानतयेत्यस्य साध्यविशेषणत्वात्। तत्रात्मनोऽधिष्ठानतया विषयत्वेनविशेषणाभावायत्त विशिष्टाभावसत्त्वात्। ननु तथापि अनात्माधिष्ठानकात्मभ्रमविषये व्यभिचारः स्यादिति चेद्, अनध्यस्ततयेत्यपि विशेषणीयम्। नन्वत्र सर्वत्र चैतन्यशब्देन विशिष्टचैतन्यविवक्षायां सिद्धसाधनम्। शुद्ध चैतन्यविवक्षायामप्रसिद्धिरिति चेन्न। दत्तोत्तरत्वात्। चैतन्यशब्देनवेदान्त तात्पर्यविषयस्य विवक्षितत्वाद्वा। नन्वत्र हेतौ तस्मिन्नपरोक्ष इत्यत्रापरोक्षत्वं साधारणाकारेण वाऽसाधारणाकारेण वा? नाद्यः। शुक्तिरूप्ये व्यभिचारात्। साधारणेनेदंत्वादिना शुक्तौ भासमानायामनिषेध्यत्वेन भासमानस्य शुक्तिरूप्यस्य तदज्ञानकार्यत्वात्। न द्वितीयः। पक्षेऽसिद्धेः। न हीदानीं ब्रह्मासाधारणाकारेण भासते। तथात्वेऽधिष्ठानत्वमेव न स्यात्। भासते च वेदान्तजन्यवृत्तावसाधारणाकारेण। न च जगत्तदा भासते। तथा च नायं हेतुः साधुरिति चेन्न। द्वितीयस्यैव विवक्षितत्वात्। न चैवमसिद्धिः। ब्रह्मणोऽसाधारणाकारो हि सत्स्फुरणादिरूपम्। इदानीमपि घटः स्फुरति, घटः सन्, घटः प्रकाशत इति तस्य स्फुरणात्। न चाद्वितीयानन्दादिरूप एवासाधारणाकारस्तस्येति वाच्यम्। तस्यापि स्फुरणमात्रत्वे तत्प्रकाशे प्रकाशनियमात्। स्फुरणविशेषत्वे ब्रह्मणः सविशेषत्वापत्त्याऽखण्डत्वहानेः।

किंच वेदान्तजन्यवृत्तौ ब्रह्म व्यावृत्ताकारेण भासत इति कोऽर्थः? वृत्तावेव प्रमाणाहिताकारविशेष इति वा, ब्रह्मैवासाधारणाकारेण भासत इति वा? नाद्यः। ज्ञाने विषयविशेषातिरिक्त विशेषानङ्गीकारेणापसिद्धान्तात्। न द्वितीयः। वेदान्तानामखण्डार्थत्वविरोधात्। असाधारणाकारेणेत्यस्य व्यावृत्तिव्यावृत्तान्यतरविशिष्टत्वानतिरेकात्। तथा च ब्रह्मणः स्वरूपमेव ब्रह्मणोऽसाधारणाकार इति

तत्समानकालीनं यज्ज्ञानं तेनाबाध्यत्वे सतीत्यर्थः। चरमसाक्षात्कारस्यान्यकर्मप्रागभावसमानकालीनत्वात् तादृशज्ञानबाध्यत्वेनाश्रयासिद्धिः स्याद्। अतः समानाधिकरणविशेषणम्। चरमसाक्षात्कारानन्तरं कर्मान्तरानुदयात् चरमसाक्षात्कारस्य समानाधिकरण कर्मप्रागभावसमानकालीनत्वाभावान्नासिद्धिः।

नन्वाद्ये साध्ये सिद्धसाधनम्। व्यावहारिकसत्त्वस्य पराभ्युपगमादित्यत आह – व्यावहारिकसत्त्वमिति। तथा च न सिद्धसाधनमिति भावः। ननु सत्त्वेन धीमात्ररूपत्वं स्वाभावे सति सत्त्वेन धीविषयत्वम्। तत् कथं सत्त्वम्? सत्त्वाभावस्य सत्त्वरूपत्वे व्याघातादित्यत आह – अनिर्वाच्यलक्षण इति। नन्वेवं स्वमते व्यर्थविशेषणस्यापि हेतुत्वं स्यात्। तत्रापि परं प्रति व्यभिचारोद्धारस्य स्वप्रयोजनत्वसंभवात्। न चेष्टापत्तिः। असांप्रदायिकत्वादित्यत आह – जन्यकृत्यजन्यानीति। नन्वेतावता पक्षे उपरञ्जकविशेषणमस्तु। न तु साध्ये। अदर्शनादिति चेन्न। साध्यविशिष्टपक्षप्रतीतिरुद्देश्या। सा चोभयथाऽपि संभवति। पक्षे उपरञ्जकविशेषणेन वा, साध्ये उपरञ्जकविशेषणेन वा। तथाच पक्ष एवोपरञ्जकविशेषणमिति नियमोऽप्रयोजकः। दृष्टं च विमतं भिन्नाभिन्नमित्यत्र साध्येऽप्युपरञ्जकंविशेषणम्। तत्राप्रयोजकत्वपरिहारार्थं तदिति यदि तर्हि प्रकृतेऽपि पूर्वोक्तप्रयोजनसंभवादिति द्रष्टव्यम्। अन्यथेति। साध्यविशेषणस्योक्तप्रयोजनानङ्गीकार इत्यर्थः। प्रतिभासमात्र शरीरत्वरूपस्येति। अत्र प्रतिभासमात्रशरीरत्वं नाम ब्रह्मज्ञानेतरज्ञानबाध्यत्वादिकम्। न तु यथाश्रुतम्। प्रतिभासस्य सत्त्वेन तद्रूपत्वे रजतस्य ज्ञानरूपत्वेन बाह्यमतापत्तेः। ज्ञानस्य परमार्थत्वेन तद्रूपस्य पारमार्थिकत्वापत्तावपसिद्धान्तापत्तेश्चेति द्रष्टव्यम्।

ननु द्वितीयानुमानेऽनभ्यासदशायामित्यस्य पक्षविशेषणत्वेन हेतुविशेषणत्वाभावात्, तृतीयचतुर्थयोश्च विशिष्टयोरेव कार्यकारणभावेन कारणाभावेन कार्याभावानुमाने विशेषणानां व्याप्तिग्रहोपयुक्तत्वेन सार्थकत्वम्। प्रकृते च नैवमित्यरुचेराह – किं चेति। तथाच प्रकृतेऽपि व्याप्तिग्रहोपयुक्तत्वेन सार्थकत्वमिति भावः। इदं च सम्यग् हेतुव्याख्यानावसर एव व्याख्यातम्। न चेत्यारभ्य ब्रह्मत्वाभावाच्चेत्यन्तो ग्रन्थः हेतोरप्रयोजकत्वपरिहारार्थः। तत्तात्पर्यं सर्वमेव कथितं द्रष्टव्यम्। अन्यथेति। अकस्मात् कृप्तप्रयोजकत्याग इत्यर्थः। अनुमानादेश्चेति। तस्य तत्वावेदकत्वं परस्यापि सिद्धमिति भावः। सा च श्रुत्यादीति। निरनिष्टो निरवद्य इत्यादीत्यर्थः। चतुर्थ इति। तथाच परमतरीत्या सप्रकाराबाध्येत्यस्य व्यभिचारवारकत्वात् तद्रीत्यैवायं हेतुरिति द्रष्टव्यम्। ननु सप्रकाराबाध्यार्थक्रियाकारित्वं स्वाप्नप्रियासंगमादौ व्यभिचारीत्यत आह – व्यभिचारस्त्विति। स्वाप्नप्रियासंगमज्ञानस्यैवार्थक्रियाकारित्वं, न त्वर्थस्येति तत्र हेतोरेवाभावात्, ज्ञाने च साध्याभावाभावान्नोभयत्र व्यभिचार इति निरसिष्यत इत्यर्थः। शुद्धब्रह्मणो दृष्टान्तीकरणे तस्यार्थक्रियाकारित्वानङ्गीकारात् साधनविकलतेत्यत आह– सत्यस्येति। विशिष्टस्य तथाऽङ्गीकारेऽन्योन्याश्रयादिति भावः। ननु सति सपक्षे तत्राप्रवेशी हेतुरसाधारणः। ततः सपक्षे ब्रह्मण्यस्य हेतोरवृत्तित्वेनासाधारण्यमित्यत आह– असाधारण्यस्येति। अनुकूलतर्काभावदशायामित्यर्थः। अनुकूलतर्क दशायां तु साध्यवति हेतुव्यतिरेकासंभवात्। प्रकृते चानुकूलतर्कसद्भावादित्याह – विपक्ष इति। अत्र सर्वत्र कण्टकोद्धारः पुरैव कृतो द्रष्टव्यः ज्ञानत्वेन ज्ञाननिवर्त्यत्वरूपमिथ्यात्वस्यारोपितस्यासति सत्त्वेन व्यभिचार इत्यत आह – अत्र चेति। न चैवं तादृशमिथ्यात्वस्यालीकत्वेन कथं प्रपञ्चे तदारोप इति शङ्क्यम्। आरोपे आरोप्यज्ञानमात्रं प्रयोजकं, न तु वास्तवमित्याशयात्। चिन्मात्रस्येति। त्वन्मत इति शेषः। मन्मते तु कल्प्याभावादेवेति भावः। तदेवं षडपि हेतवः साधवः।

वाच्यम्। विषयातिरिक्तस्य ज्ञाने हेतुविशेषजन्यस्य वा, स्वाभाविकस्य वा विशेषस्यासतः साधकत्वभङ्गे साधयिष्यमाणत्वात्। तादृग्विशेषानङ्गीकारे त्वन्मते ब्रह्मापरोक्षवृत्त्येव परोक्षवृत्त्याऽपि संसारनिवृत्त्यापत्तेः। ज्ञाने विषयान्यस्य विशेषस्य भावात्। विषयरूपस्य विशेषस्योभयत्रापि तुल्यत्वात्। तस्मात् विषयानपेक्षितज्ञानविशेषाङ्गीकारे कथमतिप्रसङ्गः? यद्वा, विषयस्योपलक्षणत्वान्नार्थक्रियाकारित्वम्। नच ज्ञानस्वरूपाणामननुगतत्वात् ज्ञानत्वस्यातिप्रसक्तत्वात् अनुगतोपलक्ष्यतावच्छेदकस्याभावान्नोपलक्षणत्वमिति वाच्यम्। हेतुविशेषप्रयोज्यस्य स्वाभाविकस्य वोपलक्ष्यतावच्छेदकस्य संभवात्। उपलक्ष्यतावच्छेदकाभावेऽपि त्वया द्वितीयाभावस्य ब्रह्मोपलक्षकत्वस्वीकाराच्च। सर्वैश्च घटप्रागभावो घटजनकः, घटः स्वध्वंसजनक इत्यत्र प्रागभावप्रध्वंसौ प्रति घटस्योपलक्षणत्वाङ्गीकाराच्च। विस्तरिष्यते चैतत् असतः साधकत्वभङ्गे। न च विषयबाधे ज्ञानस्यापि बाध इति। अज्ञानबाधेऽपि साक्षिणोऽबाधात्। तथा च परेणापि प्रियासंगमादिज्ञानस्यैव सुखजनकत्वस्वीकारात् तद्विषये न परमतेनापि व्यभिचारः। न चानादित्वमुपाधिः। उक्तहेतुं प्रति ब्रह्मणि परमार्थत्वस्यैव प्रयोजकतया हेतोः साध्यव्याप्यतया तदव्यापकत्वेनोपाधेः साध्याव्यापकत्वात्। यदि च परमार्थसत्त्वापेक्षया प्रातीतिकसत्त्वं लघ्विति तर्हि प्रातीतिकसत्त्वेऽपि जगतोऽर्थक्रियाकारित्वोपपत्त्या तद्वैलक्षण्याङ्गीकारवैयर्थ्यापत्तिः। रूप्यादेरपि सप्रकाराबाध्यार्थ क्रियाकारित्वापत्तेश्च। न च व्यावहारिकसत्त्वमेवोक्तहेतुं प्रति जगति प्रयोजकमिति वाच्यम्। ब्रह्मणि चान्यस्यैव प्रयोजकतायां प्रयोजकद्वैविध्यकल्पनागौरवात्। शुद्धस्यैवाज्ञानसाधकत्वाङ्गीकारात् न दृष्टान्तीकृते शुद्धे ब्रह्मणि साधनवैकल्यं शङ्क्यम्। अन्यथाऽन्योन्याश्रयादित्यलं पल्लवेन।

आरोपितेति। आरोपितं मिथ्यात्वं यस्य तत्कत्वादित्यर्थः। रूप्ये व्यभिचारवारणायारोपितेति। नन्वारोपितत्वं प्रातिभासिकत्वं चेत् प्रपञ्चेऽसिद्धिः। तस्य सत्यत्वसिद्ध्युत्तरकालीनत्वात्। व्यावहारिकत्वं चेत् शुक्तिरूप्ये व्यभिचार इति चेन्न। आरोपितशब्देन बाध्यत्वस्य विवक्षितत्वात्। रूप्यमिथ्यात्वस्य च ब्रह्मज्ञानाबाध्यत्वस्य सामान्यतो मिथ्यात्व भङ्गे साधितत्वात्। न चासति व्यभिचारः। तत्रात्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वस्य सत्त्वात्। बाधाभावाच्च। उपपादितं चैतत् पूर्वमेवेत्यलम्। न चैवमप्यसिद्धिः। प्रपञ्चमिथ्यात्वस्य सत्यत्वादिति वाच्यम्। तस्य ब्रह्मातिरिक्तत्वेऽद्वैतहानेः। नापि तत्स्वरूपत्वम्। सोपाधिकत्वादिति। कल्पकेति। न चासिद्धिः, शुद्धस्यैवाविद्यावशेन कल्पकत्वोपपत्तेरिति शङ्क्यम्। अविद्याया अपि कल्पितत्वेन तत्सिद्धौ कल्पकत्वसिद्धिरित्यन्योन्याश्रयात्। न च कल्पकत्वं कल्पनाश्रयत्वं, कल्पनाविषयत्वं, तद्भासकत्वं वा। तदविद्यां विनैव भविष्यतीति वाच्यम्। तथात्वे तेषां निरुपाधिकत्वेन स्वाभाविकत्वापत्तेः। न च विशिष्टस्यैव कल्पकत्वम्। न चानवस्था। अविद्याध्यासावसानत्वादिति वाच्यम्। कल्पकाभावेनाविद्याध्यासासंभवे विशिष्टाभावेन कल्पकासंभवात्। तथाच यावद्विशेषाभावे कल्पकरहितत्वसिद्धिरिति नासिद्धिः। न चासति व्यभिचारः। तस्य मूल एव परिहृतत्वादिति सर्वं निरवद्यम्।

वैकल्पिकाद्यविशेषणप्रयोजनमाह – प्रातिभासिकस्येति। इदं च विशेषणत्रयं मतभेदेन, न सर्वसाधारणमित्याह तत्रापीति – सर्वसाधारणपक्षलाभाय सर्वसाधारणवैकल्पिकविशेषणत्रयमाह। यद्वैतदिति। शुक्तिरजतस्य चस्वबाधकाभिमताबाध्यदोषजन्यज्ञानविषयत्वात् स्वबाधकाभिमताबाध्यबाधविषयत्वाच्च आद्यविशेषणद्वयेन शुक्तिरजतव्यावृत्तिः। समानाधिकरणेति। समानाधिकरणो यः कर्मप्रागभावः

अनिषेध्यत्वेनेति। अत्र विषयत्वादिति करणे रूप्ये व्यभिचारः। ततः प्रमां प्रतीति। तथाऽप्यनिवृत्तिः। तस्याप्यनुव्यवसायरूपप्रमाविषयत्वात्। अतः साक्षादिति। तथाऽप्यनिवृत्तिः। तस्यापि निषेध्यत्वेन साक्षाद् बाधरूप प्रमाविषयत्वात्। अतो निषेध्यत्वेनेति। नन्वत्र प्रमात्वं किं तद्वति तत्प्रकारत्वं वा, तत्वावेदकत्वं वा? नाद्यः। दृष्टान्तस्य साधनवैकल्यात्। दृष्टान्तीभूतं हि शुद्धं ब्रह्मैव वक्तव्यम्। न हि तस्य सप्रकारकज्ञानविषयत्वम्। न च धर्मवत एव दृष्टान्तत्वम्। तस्य पक्षनिक्षिप्तत्वेन दृष्टान्तत्वासंभवात्। नापरः। तस्याबाधितार्थकत्वेन तदसिद्ध्या हेतोः संदिग्धासिद्धत्वात्। तत्सिद्धौ वा साध्यसिद्ध्या सिद्धसाधनत्वादिति चेन्मैवम्। अस्त्वाद्यः पक्षः। न च साधनवैकल्यम्। वेदान्ततात्पर्यविषयो ब्रह्म स्वज्ञानाबाध्यप्रकारकज्ञानविशेष्यम्। अधिष्ठानत्वादित्यादिना तत्सिद्धेः। वक्ष्यति चैतत् सगुणवादे। द्वितीयो वाऽस्तु। न चासिद्धिः। प्रत्यक्षादीनां तत्वावेदकत्वस्य प्राक् साधितत्वात्। न च सिद्धसाधनम्। प्रत्यक्षादिकमबाधितार्थकमिति सिद्धावपि विमतमबाध्यमिति उद्धेश्यप्रतीतेरसिद्धत्वेन सिद्धसाधनत्वासंभवात्। सिषाधयिषया वा तत्संभवाच्च। अत एव नाप्रयोजकत्वम्। विषयबाधे तज्ज्ञानस्याबाधितार्थकत्वरूप प्रामाण्यासंभवादिति वक्ष्यमाणत्वात्। अनिषेध्यत्वेनेश्वरं प्रतीति। अत्राप्यपरोक्षत्वादित्युक्ते रूप्ये व्यभिचारः। तदर्थमीश्वरं प्रतीति। तथाऽप्यनिवृत्तिः। तस्यापि निषेध्यत्वेनेश्वरं प्रत्यपरोक्षत्वात्। अतोऽनिषेध्यत्वेनेति। तथाऽप्यनिवृत्तिः। तस्यायं भ्रमवानितीश्वरापरोक्षे अनिषेध्यत्वेनापि विषयत्वात्। अतः साक्षादिति। न चापरोक्षत्वस्य लिङ्गाद्यजन्यज्ञानविषयत्वरूपतया ईश्वरं प्रत्यनिषेध्यत्वेन साक्षाज्ज्ञातत्वादित्येवास्तु। शेषस्य व्यभिचारावारकतया वैयर्थ्यमिति वाच्यम्। अत्रापरोक्षत्वस्य ज्ञानत्ववत् जातिरूपतयाऽखण्डतया वा ज्ञातत्वाद्यघटितत्वेन वैयर्थ्याभावात्। न च भवन्मते जातेरस्वीकारात् वाद्यसिद्धो हेतुरिति वाच्यम्। सर्वानुगतस्यैकस्य धर्मस्य तार्किकाभिमतस्यास्वीकारेऽपि साजात्यनिर्वाहकस्याननुगतस्यैव धर्मस्य स्वीकारात्। अथ सत्यत्वसिद्धिं विनाऽनिषेध्यत्वेनेत्यस्यासिद्ध्या स्वरूपासिद्धिरिति चेत्, न। जगत्पालनार्थं प्रवृत्त्यन्यथानुपपत्त्याऽनिषेध्यत्वेनेत्यस्य सिद्धेः। न हि निषेध्यत्वेन जानंस्तत्पालनार्थं प्रवर्तते। न चैन्द्रजालिकवदुपपत्तिः। तस्यानिषेध्यत्वेनापरोक्षज्ञानाभावेऽपि तेन रूपेण परोक्षज्ञानस्य सत्त्वात्। न चेश्वरस्य परोक्षज्ञानं श्रुत्यादिविरुद्धं स्वीकर्तुमपि शक्यम्। अथ निषेध्यत्वेन पश्यंस्तत्पालनार्थं प्रवर्तते, को दोष इति चेत्, न अदृष्टकल्पनाप्रसङ्गात्। न हि स्वयं निषेध्यत्वेन पश्यन् परोक्षतोऽप्यनिषेध्यत्वेनाजानंस्तत्पालनादौ प्रवर्तत इति दृष्टचरम्। ईश्वरस्य भ्रान्तत्वापत्तिरूपप्रतिकूलतर्कसत्त्वेन नाप्रयोजकता। न चेष्टापत्तिः। निरनिष्टो निरवद्य इत्यादिश्रुतिविरोधात्। अस्या निर्गुणविषयताया मिथ्यात्वसिद्ध्युत्तरकालीनत्वात्। सप्रकारकाबाध्येति। सप्रकारकं यज्ज्ञानं तदबाध्यार्थक्रियाकारित्वं, तस्मादित्यर्थः। अयं च हेतुः पररीत्यैव। स्वमते प्रातिभासिकार्थक्रियाकारित्वाभावेन तद्व्यावर्तकसप्रकारकाबाध्येति विशेषणवैयर्थ्यापत्तेः।

अथापि स्यात्। परमते प्रियासंगमादिविशेषिताप्रमाणीभूतज्ञानस्य सप्रकाराबाध्यार्थक्रियाकारित्वदर्शनेन तद्विषये व्यभिचार इति चेन्न। तत्र ज्ञानस्यैवार्थक्रियाकारित्वेन तद्विषयस्यातथात्वात्। न च विषयानवच्छिन्नज्ञानमात्रस्यातिप्रसंजकतया तदवच्छिन्नस्य जनकत्वे विशेषणीभूतस्य विषयस्यापि जनकत्वमिति

ननु तथापि हेतोः प्रातिभासिकत्वविशेषणस्यासिद्धिवारकत्वात् व्यर्थविशेषणता। न च मूलोक्तरीत्या तस्य व्याप्तिग्रहोपयोगित्वेनोपयोग इति वाच्यम्। तदभावेऽपि वस्तुगात्या निर्धर्मके शुद्धे ब्रह्मणि अनधिकरणत्वबाधाभावरूपहेतुसाध्ययोर्व्याप्तिग्रहसंभवादिति चेन्न। शुद्धब्रह्मणो निर्धर्मकत्वे हेतुसाध्ययोस्तत्राभावेन व्याप्तिग्रहासंभवात्। हेतुसाध्ययोस्तत्र सत्त्वे वा कथं निरधिकरणत्वम्? व्याहतत्वात्। न चातिरिक्तधर्माभावेपि स्वरूपभूतधर्माधिकरणत्वमस्तीति वाच्यम्। एवमधिकरणत्वसामान्ये विद्यमाने तत्सामान्याभावासंभवेन हेतोरभावेन व्याप्तिग्रहासंभवात्। हेतुसाध्ययोरभावरूपत्वेन प्रतियोगिसापेक्षत्वेन निरुपाधिकब्रह्मरूपत्वासंभवाच्च। संभवे वा सार्वज्ञादीनामपि ब्रह्मरूपत्वसंभवेन तत्प्रतिपादकसगुणवाक्यानां तत्त्वावेदकत्वं स्यात्। तस्मात् प्रातिभासिकत्व विशेषणाभावेव्याप्तिग्रहासंभवात् तद्विशेषणस्य व्याप्तिग्रहोपयुक्तत्वेन सार्थकत्वमिति व्यर्थत्वप्रयुक्तव्याप्यत्वासिद्धिर्नेति युक्तमुत्पश्यामः। न च परमार्थसत्त्वे बाधो न स्यादिति प्रतिकूलतर्कपराहतमनुमानमिति वाच्यम्। बाधाभावस्योप पादितत्वेनेष्टापत्तेः। न च व्यावहारिकत्वोपपत्त्या हेतोरप्रयोजकत्वमिति वाच्यम्। मूलोक्तरीत्या ब्रह्मणि विशिष्टहेतुं प्रति परमार्थसत्त्वस्यैव प्रयोजकत्वेन प्रपञ्चे प्रयोजकान्तरकल्पने कल्पनागौरवात्। ननु न प्रातिभासिकासतोरेका व्यावृत्तिः। प्रतियोगिभेदेन व्यावृत्तिभेदात्। नाप्युभयी परस्परव्याप्ता। परस्परव्यभिचारात्। तथाच नैकप्रयोजकप्रयोज्यत्वम्। किन्तु प्रातिभासिकव्यावृत्तिप्रयोजकं ब्रह्मविश्वासत्साधारणमेव वक्तव्यम्। असत्यपि प्रातिभासिकत्वाभावात्। एवमसद्व्यावृत्तावपि प्रयोजकं ब्रह्मविश्वप्रातिभासिकसाधारणमेव वक्तव्यम्। प्रातिभासिकेऽप्यसत्त्वाभावात्। तथाच प्रयोजकद्वयसमावेशादेव ब्रह्मण्युभय व्यावृत्युपपत्तौ नीलघटत्ववत् नातिरिक्तप्रयोजककल्पनायामस्ति किञ्चिन्मानम्। तथा च कथं नाप्रयोजकत्वमिति चेन्मैवम्। व्यावृत्तेरेकत्वेनैकप्रयोजकप्रयोज्यत्वस्यावश्यकत्वात्। अनृतादिव्यावृत्तीनां ब्रह्मात्मकत्वपक्षे प्रतियोगिभेदेऽपि व्यावृत्त्यभेदात्। तद्भेदे तासां सत्यत्वेऽद्वैतहानेः। अभावद्वैतस्य च पूर्वमेव निरस्तत्वात् मिथ्यात्वेऽनृताद्यात्मकत्वापत्तेस्तद्भेदपक्षो दुष्ट एव। न च प्रत्येकप्रयोजकप्रयोज्यत्वेनैवोपपत्तौ नैकप्रयोजकप्रयोज्यतेति वाच्यम्। व्यावृत्तेरेकत्वेन प्रत्येकप्रयोजकप्रयोज्यत्वस्या संभवात्। अस्तु वा व्यावृत्तिरुभयी। तथापि विशिष्टस्य हेतूकरणादेकप्रयोजकप्रयोज्यत्वमावश्यकम्। नीलघटत्वादौ तु प्रत्येकप्रयोजकस्य वक्तुं शक्यत्वात्, प्रकृते चासद्व्यावृत्तिं प्रति ब्रह्मविश्वप्रातिभासिकसाधारणस्यैकस्याभावात्। न च प्रतीयमानत्वमपरोक्षतः प्रतीयमानत्वं, सत्त्वेन प्रतीयमानत्वं वा तत्प्रयोजकं प्रकृतेऽपि शक्यं वक्तुमिति वाच्यम्। असत्यतिव्याप्तेः। नाप्यर्थक्रियाकारित्वम्। प्रातिभासिकशुद्धब्रह्मणोस्तदभावात्। नापि वस्तुत्वम्। निर्धर्मके ब्रह्मणि रूप्ये चाभावात्। कल्पितस्यासत्यपि सत्त्वात्। नापि सत्स्वरूपत्वम्। प्रतिभासिकस्यैव स्वरूपेण निषेध इति पक्षे तत्राव्याप्तेः। एवमेव प्रातिभासिकव्यावृत्तिं प्रत्यपि नैकं प्रयोजकम्। तस्मात् प्रत्येकप्रयोजकासंभवात् एकं परमार्थसत्त्वमेव प्रयोजकं स्वीकर्तव्यमिति नाप्रयोजकत्वम्। अन्यथा सत्त्वनाधिकरणत्वे सत्यसत्त्वानधिकरणत्वे सति सदसत्त्वानधिकरणत्वरूपानिर्वचनीयत्वसाध्यके प्रतीयमानत्वे सति बाध्यत्वादिति हेतावपि प्रत्येकप्रयोजकादेव हेतोरुपपत्त्याऽप्रयोजकत्वं स्यात्। भेदाभेदसाधके समानाधिकरणत्वादित्यादावपि प्रत्येकप्रयोजकेन साध्योपपत्त्याऽप्रयोजकत्वं स्यादित्यलं विस्तरेण। तस्मादप्रयोजकत्वादिदोषाभावादनुमानं निरवद्यमाद्यम्।

ननु देहात्मैक्ये व्यभिचारः। तस्योक्तप्रातिभासिकत्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वादिति चेन्न। देहात्मैक्यभ्रमाभावस्योपपादयिष्यमाणत्वेनास्मदुक्तासत्त्वानधिकरणत्वप्रतीकेनैव वारणात्। गौरोऽहमिति सामानाधिकरण्यप्रतीतेश्च मम देह इति देहात्मभेदस्यैव सर्वप्राणभृत्प्रत्यक्षत्वेन सिंहो देवदत्त इत्यादिवद् व्यपदेशमात्रत्वात्। अस्तु वा देहात्मैक्यभ्रमः। तथापि न तत्र व्यभिचारः। तस्य मम देह इति वा, नाहं गौर इति वा परीक्षितप्रत्यक्षेण ब्रह्मज्ञानातिरिक्तेनैव बाध्यतया ब्रह्मज्ञानेतरज्ञानबाध्यत्व रूपप्रातिभासिकत्वसत्त्वात्। तदनधिकरणत्वाभावात्। अत एव पक्षीयवैकल्पिक विशेषणवत्त्वेन देहात्मैक्यस्यापि पक्षत्वात् तत्र च साध्यस्य बाधात् पक्षत्वाभावेनाश्रयासिद्धिरित्यप्यपास्तम्। ब्रह्मज्ञानेतरदेहात्म भेदज्ञानबाध्यतयोक्तवैकल्पिकविशेषणाभावात् पक्षत्वस्यैवाभावेन नाश्रयासिद्धिः। ननु तथाप्यात्मन्यारोपिते क्षणिकत्वे व्यभिचारः। तस्याधिष्ठानब्रह्मज्ञानबाध्यत्वेन भवदुक्तप्राति भासिकत्वानधिकरणत्वात्। साध्याभावाच्चेति चेन्न। अत्र हि ब्रह्मप्रातिपदिकार्थेतरज्ञानबाध्यत्वं प्रातिभासिकत्वम्। एवं च क्षणिकत्वं न ब्रह्मेति ज्ञानमात्रबाध्यम्। किन्तु ब्रह्माक्षणिकं, स्थायीति ज्ञानेन। तथा च ब्रह्मप्रातिपदिकेतराक्षणिकत्वादिज्ञानबाध्यत्वाद् उक्तप्रातिभासिकत्वानधिकरणत्वाभावान्न व्यभिचार इति। ब्रह्म वृत्तिव्याप्यं नेति मते त्वात्मनि क्षणिकत्वारोप एव न संभवति। अत एव तस्य पक्षीयवैकल्पिकविशेषणवत्त्वात् पक्षत्वापत्त्यांऽशे बाध इति परास्तम्। पक्षविशेषणस्यापि ब्रह्मज्ञानेतरज्ञानबाध्यभिन्नत्वपरत्वेन ब्रह्मण्यारोपितक्षणिकत्वादेरपि व्यावर्तनात् तस्या पक्षत्वेन नांशबाध इति। प्रातिभासिकत्वानधिकरणत्वादित्युक्तेऽसति व्यभिचारः। तदर्थमसत्त्वानधिकरणत्वेति। तस्माद् विशेषणद्वयं सार्थकम्। इदं चोभयसिद्धं हेतुमङ्गीकृत्य व्याख्यानम्। यदा तु परमात्रसिद्धेन हेतुना साधनमिति पक्षः तदा न कोऽपि दोष इति ध्येयम्।

नन्वेतेष्वनुमानेषु नित्यत्वमुपाधिः। पक्षातिरिक्ततुच्छप्रातिभासिकयोर्नित्यत्वाभावेन साध्यव्यतिरेकदर्शनात्। साध्याभावाविनाभावी यदत्यय इति हि तल्लक्षणमिति चेन्न। उक्तहेतुं प्रति प्रकृतसाध्यस्यैव प्रयोजकत्वेनानुकूलतर्कसंभवेन प्रकृतहेतोः प्रकृतसाध्यव्याप्यतया साध्यव्याप्यहेत्वव्यापकत्वेनोपाधेः साध्यव्यापकत्वाभावेनाप्रयोजकतया तदभावस्यापि साध्याभावाव्याप्यत्वात्। किंचेदं नित्यत्वम्? ध्वंसाप्रतियोगित्वं, तदनुपलक्षितसत्तायोगित्वं वा? नाद्यः। तुच्छप्रातिभासिकयोर्ध्वंसाप्रतियोगित्वेन तव्यतिरेकाभावेन तत्रोपाध्यभावेन साध्याभावदर्शनोक्तच्ययोगात्। न द्वितीयः। सत्ता हि जातिर्वा, अबाध्यत्वं वा? नाद्यः। आत्मनि सत्ताजात्यभावेन साध्यव्यापकत्वाभावात्। कल्पितसत्ताऽस्तीति चेत् कल्पितं नित्यत्वमंगीकृतं स्यात्। तस्य पक्षेऽपि सत्त्वेन साधनव्यापकत्वेनानुपाधित्वात्। न द्वितीयः। तादृशनित्यत्वस्य परमार्थतो निर्धर्मके ब्रह्मण्यप्यभावेन साध्यव्यापकत्वग्रहस्थलाभावात्। मन्मते ब्रह्मणि तत्सद्भावेऽपि तस्य परमार्थसत्त्वप्रयोजकतया तद्व्यापकत्वात्। त्वन्मते तुच्छस्याबाध्यत्वेन तत्र नित्यत्वव्यतिरेकाभावेन तदभावस्य साध्याभावव्याप्यत्वदर्शनोक्तच्ययोगाच्च। तस्मान्नित्यत्वं नोपाधिः। एतेनात्मत्वज्ञानत्वानन्दत्वाद्युपाधयो निरस्ताः। अनुकूलतर्कभावेन साध्यव्याप्यहेत्वव्यापकत्वेन च तेषां साध्याव्यापकत्वात्। प्रकृतहेतोः साध्यव्याप्यताग्राहकश्चानुकूलतर्को वक्ष्यत इत्यनवद्यम्।

मात्रवृत्तितद्धटत्वादौ साध्याव्याप्तेः। नच साधनावच्छिन्नसाध्यव्यापकत्वं। पक्षीकृतधर्मस्यात्यंताभाव वृत्तित्वसंदेहे साधनाव्यापकत्वसंदेहात्। नच विपक्षबाधकतर्कानवतारदशायां तादृशोप्युपाधिरिति वाच्यं। तदभावात्। प्रत्युत स्थापनायामेवानुकूलतर्कोस्तीत्याह॥ अत्र चेति॥ संगृह्णाति॥ तथाचेति॥

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि॥
न्यायामृततरंगिण्यां विश्वसत्त्वानुमा इमाः।
विश्वमिथ्यात्वस्यानुमानबाधः॥

न्यायामृतकण्टकोद्धारः

प्रत्यक्षबाधमुक्त्वाऽनुमानबाधमाह - अनुमानेति। ननु बाधकत्वे ह्यधिकबलत्वं प्रयोजकम्। प्रकृते च तदभावात् कथं बाधकत्वमिति चेत् न। अनुमानानां निरवकाशत्वेन प्राबल्यात्। निरवकाशत्वं च व्याप्तिपक्षधर्मत्वोपेतत्वेन वा अबाधितप्रत्यक्षादिमूलकत्वेन वा प्रतिकूलतर्करहितत्वेन वोपपन्नम्। मिथ्यात्वानुमानं च नैतादृशम्। निरवकाशत्वप्रयोजकस्याभावात्। न तावत् व्याप्तिपक्षधर्मतोपेतत्वेन निरवकाशत्वम्। व्यभिचारादिना तदभावस्योपपादितत्वात्। नाप्यबाधितप्रत्यक्षादिमूलकत्वेन। जगति मिथ्यात्वस्य प्रत्यक्षाद्यसिद्धत्वात्। नापि प्रतिकूलतर्काहित्येन। तस्याग्रे वक्ष्यमाणत्वादिति। तस्मान्न तुल्यबलत्वम्। उभयसाधारणं पक्षं निर्दिशति – ब्रह्मप्रमान्येनेति। अत्र पक्षव्याख्यानं विप्रतिपत्तिपक्षव्याख्यानेनैव कृतमिति नेह तन्यते। वैकल्पिकविशेषणत्रयप्रयोजनं साध्यद्वयकरणप्रयोजनमपि स्वयमेव वक्ष्यति। हेतौ तु असत्त्वानधिकरणत्वादित्युक्ते शुक्तिरूप्ये व्यभिचारः।तन्निवृत्तये प्रातिभासिकत्वेति। न च स्वमते शुक्तिरूप्यस्यासत्त्वेन तदनधिकरणत्वाभावेन हेतोरेवागमनान्न व्यभिचार इति वाच्यम्। कदाचिदपि केनापि सत्त्वेनाप्रतीतत्वरूपस्यासत्त्वस्य विवक्षणात्। तादृशासत्त्वानधिकरणत्वस्य शुक्तिरूप्यादावपि भावात्। न च तादृशमसत्त्वमसिद्धमेव। न हि यदसत् तत् सत्त्वेन प्रत्येतव्यमिति नियमोऽस्ति। येन तादृशासत्त्वाप्रसिद्धिः स्यात्। यद्वा पररीत्या व्यभिचारपरिहारार्थमेतत्। पररीत्यैव हेतूकरणान्न स्वमते वैयर्थ्यम्। ननु तथापि कथमनेन व्यभिचारपरिहारः? सत्त्ववादि मते प्रातिभासिकत्वस्य खपुष्पतुल्यत्वेन तदभावस्य शुक्तिरूप्येऽपि भावादिति चेन्नैवम्। सत्त्वेन प्रतीतत्वमात्रस्वरूपस्य प्रातिभासिकपदेन विवक्षितस्यास्मन्मतेऽपि सत्त्वेन तदनधिकरणत्वस्य रूप्येऽभावात् भवति व्यभिचारपरिहार इति। तेषां सत्त्वेन प्रतीतत्वमात्रमित्यस्य मात्रपदमहिम्ना सत्त्वाभावेऽपि सत्त्वेन प्रतीतत्वे पर्यवसानात्। तदर्थगतं मायिकं सत्त्वं नेति मते पक्षेऽसिद्धिः। सत्त्वाभावेऽपि सत्त्वेन प्रतीतत्वरूपप्रातिभासिकत्वसत्त्वेन तदनधिकरणत्वाभावात्। अस्तीति मते शुक्तिरूप्ये प्रातिभासिकत्वाभावेन पुनरपि व्यभिचार एवेति दूषणं विदांकुर्वन्तु। वस्तुतस्तु प्रातिभासिकत्वं नाम ब्रह्मज्ञानेतरज्ञानबाध्यत्वं विवक्षितम्। तस्योभयमतेऽपि रूप्ये सत्त्वेन तदनधिकरणत्वाभावान्न व्यभिचारः। नाप्युभयमतेऽसिद्धिः। न चैवमग्रिमग्रन्थविरोधः। तस्याप्यत्रैव तात्पर्यादिति। यद्वा, स्वबाधकाभिमताबाध्यदोषजन्यज्ञानविषयत्वादिकं प्रातिभासिकत्वमिति न कश्चित् क्षुद्रोपद्रवः।

विशेषितत्वात्। धर्मादावपरमार्थत्वेन श्रुतितात्पर्याविषये परमार्थत्वेनैव श्रुतितात्पर्यविषयत्वस्य वाच्यतयोपाधेः पक्षादव्यावृत्तेश्च। अप्रयोजकत्वाच्च॥ दोषाजन्येति॥ शुक्तिरूप्यादीनां दोषजन्यज्ञानविषयाणामपि दोषाजन्यसाक्षिरूपज्ञानं प्रत्यविषयत्वान्न तेषु व्यभिचारः। न च पक्षे हेत्वसिद्धिः साक्ष्यवच्छेदकाविद्यावृत्तिरूपदोषस्यो भयसिद्धत्वाभावेन विशिष्टाभावरूपहेतोः पक्षे सत्वाच्च। साक्षाद्विशेषणत्वेनेत्यपि बोध्यं। तेन क्षणिकत्वादिप्रकारकदोषजन्यज्ञानं प्रति विशेष्यत्वादात्मनि न साधनवैकल्यं साक्षात्पदेन संसृष्टतया देहात्मैक्यभ्रमे आत्मनोपि विशेषणतया विषयत्वात्साधनवैकल्यं परिहृतं। दोषेप्युभयसिद्धत्वं विवक्षितं। तेन अखंडाभावरूपतया हेतौ न विशेषणस्यासिद्धिवारकतया वैयर्थ्यमिति बोध्यं। शुद्धस्य वृत्तिविषयत्वानभ्युपगमेपि न साधनवैकल्यं। विशिष्टाभावस्य तत्रापि सत्त्वात्। एतेनात्मनो वृत्तिविषयत्वाभ्युपगमे विषयत्वमात्रस्यैव परमार्थसत्त्वसाधकत्वोपपत्तौ दोषेत्यादिविशेषणवैयर्थ्याद्व्याप्यत्वा सिद्धिः। तावन्मात्रं च पक्षे स्वरूपासिद्धमिति निरस्तं। विशिष्टोपाधौ वैयर्थ्यशंकानुदयात्॥ स्वविषयेति॥ पररीत्या रूप्यादौ व्यभिचारवारणाय स्वविषयकेत्यादिविशेषणं। नच दृष्टिसृष्टिपक्षेऽसिद्धिः। प्रतिकर्मव्यवस्थानुपपत्त्या तस्य त्वयाप्यभ्युपगमनीयत्वात्॥ अन्योन्याभावातिरिक्तेति॥ एतच्चाभावविशेषणं। एतद्घटसमानाधिकरणे एतद्घटप्रतियोगिकान्योन्याभावे एतद्घटसमानकालीने एतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावत्वं वर्तत इति बाधवारणाय। तंत्वादिनिष्ठैतद्घटप्रतियोगिकात्यंताभावे एतद्घटसमानकालीने बाधवारणायै तद्घटसमानाधिकरणेति विशेषणं। एतद्घटसमानाधिकरणे कपालरूपादौ बाधवारणाय एतद्घटप्रतियोगिकाभावत्वं विशेषणं। एतद्घटसमानाधिकरणे कपालरूपादौ बाधवारणाय एतद्घटप्रतियोगिकाभावत्वं विशेषणं। हेतौ एतद्घटान्योन्याभावत्वे व्यभिचारवारणाय आद्यं विशेषणं। तंत्वादिनिष्ठैतद्घटात्यंताभावे तद्वारणाय द्वितीयं। तदर्थस्तु संबंधविशेषेण एतद्घटः तत्समानाधिकरणेत्यर्थः। तेन संयोगसंबंधेन घटवत्यपि भूतले समवायसंबंधेन घटात्यंताभावसत्वात्साध्याभाववति घटात्यंताभावत्वे व्यभिचार इति शंका परिहृता। पक्षेप्येतद्घटसमानाधिकरणेत्यस्यैवमेवार्थः। तेन तत्र बाधशंका परिहृता। एतद्घटसमानाधिकरणपटात्यंताभावत्वे व्यभिचारवारणाय तृतीयविशेषणं। एतद्घटकपालसमवाये तद्वारणायाभावेति। प्रमेयत्वादौ तद्वारणाय मात्रेति। पटप्रागभावादौ साध्यसाधनवैकल्यपरिहाराय एतद्घटेत्यादि दृष्टांते विशेषणं। अनेन चेति। अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणै तद्घटसमानकालीनाभावस्य निषेधेस्वसमानाधिकरणात्यंताभावप्रतियोगित्वरूपमिथ्यात्वाभावरूप सत्त्वसिद्धिरित्यर्थः। नचैतद्घटप्रतियोगिकजन्यजनकान्यतरवृत्तित्वमुपाधिः। एतद्घटपूर्वकालीन

अविविक्षितार्था वा। नन्वप्रयोजकमिदं कस्याश्चिन्निवृत्तेरनात्मसमानकालीनत्वदर्शनं निवृत्तिमात्रस्य तथात्वसाधने संसारकालीनाया दुःखनिवृत्तेः समानाधिकरणदुःखप्रागभावसमानकालीनदर्शनमिव दुःखनिवृत्तिमात्रस्य तथात्वसाधन इति चेत् मैवं। निवृत्तेः स्वकारणानात्मसहभावं विना तज्जन्यत्वासिद्धेरित्यादितर्कानुगृहीतत्वात्। उक्तनिवृत्तेस्तु नानुग्राहकस्तर्कोस्तीति विशेषात्॥ न स्वविषयेति॥ क्षणिकत्वादिरूपेणात्मधियो क्षणिकत्वादिधीबाध्यत्वात् बाधवारणाय स्वविषयेति विशेषणं। यत्तु धीपदेन चैतन्यमात्रविवक्षायां सिद्धसाधनमिति तदसत्। चैतन्यमात्रस्यात्मधीत्वासंभवेन तच्छंकाया एवानुदयात्॥ धीत्वादिति॥ ननु अंधोयं रूपज्ञानवानिति अंधकस्य रूपविषयतया कल्पितं यज्ज्ञानं तस्य रूपं नांधगम्यमिति स्वविषयविषयकप्रत्ययबाध्यत्वदर्शनेन व्यभिचारः। कल्पितत्वात्तत्र तद्बाधने प्रकृतेपि वृत्तेः कल्पितत्वं सममिति चेन्मैवं। रूपविषयतया कल्पितस्य ज्ञानस्य रूपं नांधगम्यमिति ज्ञानेन समानविषयत्वाभावात्॥ आत्माधिष्ठानकेति॥ एतच्च शुक्त्यधिष्ठानकभ्रमहेतुचाकचक्यादेः पक्षत्वे सिद्धसाधनवारणाय॥ न स्वकार्येति॥ शुक्तिकायां रूप्यभ्रमहेतोश्चाकचक्यस्य घटादौ बाध्यत्वदर्शनाव्यभिचारवारणाय साध्ये स्वकार्येति विशेषणं। शुक्त्यज्ञानमपीति॥ तथाच तत्र व्यभिचारो न दोष इत्यर्थः। ननु दूरादिदोषेणोपलादौ यत्र चाकचक्यकल्पना तेन चाकचक्यदोषेण शुक्ताविव रजतकल्पना तत्राधिष्ठानज्ञानेन चाकचक्यरूप्ययोरुभयोरपि बाधदर्शनाव्यभिचार इति चेन्मैवं। आरोपितस्य सद्विलक्षणत्वेनाहेतुत्वात्। सत्यपि चाकचक्यादौ तज्ज्ञानं विनाऽऽरोपादर्शनेन तज्ज्ञानस्यैव हेतुत्वात्। तत्र साध्यस्यापि सत्त्वात्। नच व्यावृत्ताकाराधिष्ठानज्ञानान्याबाध्यत्वं वा स्वकार्यभ्रमाधिष्ठानानारोपितत्वं वोपाधिरिति वाच्यम्। व्यावृत्ताकारेत्यस्य पक्षमात्रव्यावर्तकत्वेनाद्यस्योपाधेः पक्षेतरत्वात्। द्वितीये साधनव्यापकत्वम्। तत्रारोपितस्य तदधिष्ठानभ्रमाहेतुत्वेन साधनाव्याप्तिसंदेहस्याप्यभावात्। अप्रयोजकत्वाच्च॥ ब्रह्मान्यदनादीति॥ अत्र पक्षे हेतौ चानादिपदमनादिभावपरम्। अत एव ध्वंसाप्रतियोगित्वं नोपाधिः। पक्षादव्यावृत्तेः। कालाद्यसंबंधं नावतिष्ठत इति॥ ननु कालसंबंधं विना नावतिष्ठत इत्यस्य यदा ब्रह्म तदावश्यं कालसंबंध इत्येवंरूपा व्याप्तिरित्यर्थः। तथाच सिद्धसाधनम्। नहि यस्मिन्काले ब्रह्म तस्मिन्काले ब्रह्मणः कालसंबंधो नास्ति। एवं यत्रात्मा तत्र कालसंबंध इति दैशिकव्याप्तावपि सिद्धसाधनम्। नहि देशः कालासंबद्धः कदाप्यस्ति। परममुक्तौ तु न देशो न वा काल इति चेन्मैवं। कालासंसृष्टसत्ताराहित्यस्य साध्यार्थत्वे सिद्धसाधनानवकाशात्। नहि परमते मुक्तौ ब्रह्मणः सत्तायाः कालसंसर्गोस्ति॥ वेदैकगम्यमिति॥ नच पारमार्थिकत्वेन श्रुतितात्पर्यविषयत्वमुपाधिः। ईश्वरानुमाने शरीरजन्यत्वादिवत्साधन

संदिग्धानैकांतिकता। साध्याभाववत्यात्मभेदे हेतुसंदेहादप्रयोजकत्वाच्चेति। अत्र ब्रूमः। आद्यपक्षे दोषाभावः। साध्यगतसर्वशब्दस्य सर्वनामतया सद्विलक्षणसर्वपरत्वात्। अनुकूलतर्कस्योक्तत्वान्ना प्रयोजकत्वादिकमिति। परमार्थसदन्य इति॥ परमार्थसतः सकाशादन्य इत्यर्थः। भेदस्य बाधेन पक्षधर्मताबलात्स्वेतरपरमार्थसद्भेदसिद्धिः। नच कल्पितेनात्मप्रतियोगिकभेदेनार्थांतरं॥ कल्पिताकल्पितयोरेकसामान्याभावेन तेन समं व्याप्तेरग्रहात्। अन्यथा मिथ्यात्वानुमानेपि कल्पितमिथ्यात्वमादायार्थांतरं स्यात् सिद्धसाधनं वा। नच व्यावहारिकपदार्थमादाय सिद्धसाधनेऽतिप्रसंगाभाव इति वाच्यं। आत्मनि स्वप्रतियोगिकस्य व्यावहारिकभेदस्य तव मतेऽप्यभावात्। आत्मान्यस्य परमार्थसतोऽभावात्। परमार्थसदंतराभावेन साध्यसिध्यभावापत्तेः। नचानानंदत्वमुपाधिः। परमार्थसदन्यत्वाभावं विना आनंदत्वस्योपाध्यभावस्य व्याघाताद्य भावेनोपाधेरप्रयोजकत्वात्। भावान्य इति॥ अभावस्य द्वितीयस्य परमार्थत्वपक्षे सिद्धसाधनतावारणाय भावेति। एवमग्रेपि॥

यावत्स्वेति॥ ननु यावत्स्वरूपमित्यत्र स्वशब्दस्य यत्किंचित्स्वरूपपरत्वे सिद्धसाधनं। आत्मस्वरूपपरत्वे साध्याप्रसिद्धिः। नहि यावदात्मस्वरूपमनुवर्तमानोऽनात्मा प्रसिद्धोस्ति। तथा सत्यनुमानवैयर्थ्यादिति चेन्मैवं। स्वशब्दस्य समभिव्याहृतपरत्वाद्व्याप्तिग्रहदशायां दृष्टांतस्वरूपपरत्वं। पक्षधर्मताग्रहदशायां चात्मस्वरूपपरत्वमेवेति न साध्याप्रसिद्धिर्नवा सिद्धसाधनमिति। नचानुमाने शब्दस्वभावोपन्यासानुपयोग इति वाच्यं। आत्मा यावत्स्वस्वरूपमनुवर्तमानेति वाक्ये यतो विशेषादाकांक्षोत्थापने सति स्वपदेन आत्मस्वरूपमेव बोध्यते न त्वन्यत्। नच विशेषः पक्षधर्मतायाः विशेषसाधनसामर्थ्ये उपयुज्यत एव। यदेव हि विशेषबोधने प्रतिज्ञायामाकांक्षाविशेषोत्थापकतया सहकारि तदेव तत्रानुमाने पक्षधर्मतायां तथा। अत एव प्रतिज्ञायामाकांक्षालभ्योऽर्थः पक्षधर्मताविषय इत्युच्यत इति न कश्चिद्दोषः। अविद्यानुमाने स्वप्रागभावव्यतिरिक्तस्वविषयावरणेत्यादि बहुस्वशब्दकसाध्यस्य त्वदीयैर्विवरणेप्युक्तत्वात्। स्वप्रतियोगीति॥ स्वशब्दनिर्दिष्टायाः बंधनिवृत्तेः प्रतियोगी बंधस्तस्य विषय आत्मा तद्विषयकं यज्ज्ञानं आत्मतत्वसाक्षात्कारः तेनाबाध्यो योऽनात्मा तेन सह वर्तत इत्यर्थः॥ निगडेति॥ चोरादिविषयज्ञानाबाध्यानात्मसमानकालीना निगडबंधनिवृत्तिर्भवतीत्यर्थः। ननु पक्षदृष्टांतयोर्बंधपदार्थस्यैकस्याभावेन स्वरूपासिद्धिसाधन वैकल्यान्यतरापात इति चेन्मैवं। नहि निगडादावपि बंधशब्दप्रयोगेण तन्निमित्तस्याविद्यायामिव तत्रापि वाच्यत्वात्। अप्रकाशितार्थप्रकाशकत्वादित्यविद्यानुमाने त्वदीयैरपि ज्ञानप्रभयोः प्रकाशत्वस्योक्तेश्च। हेतौ च बंधपदं निवृत्तिविशेषलाभाय। अतोखंडाभावतुल्यतया न वैयर्थ्यं।

भ्रमनिवर्तकत्वाभिमतव्यावृत्ताकारापरोक्षप्रतीतिविषयः। तथासत्यधिष्ठानमेव न स्यात्। यदा तु वेदांतवाक्यजन्यवृत्तौ व्यावृत्ताकारतयाऽपरोक्षं तदा अनिषेध्यत्वेन प्रपंचापरोक्ष्यं क्वापि नास्ति। अतः प्रमाणजन्यासाधारणाकारज्ञानस्यैवाज्ञान विरोधित्वान्नापरोक्षज्ञानमात्रेणा ज्ञानपराहतिप्रसंग इति॥ अत्रोच्यते॥ भ्रमनिवर्तकाभिमताधिष्ठानापरोक्षज्ञानान्यूनविषय काधिष्ठानापरोक्षज्ञानस्यात्रापरोक्षपदेन विवक्षितत्वात्। तव मते च चैतन्यमात्रस्यैव भ्रमनिवर्तकज्ञानविषयत्वात्। तावन्मात्रस्य चेदानीमपि स्फुरणात्। व्यावृत्तासाधारणाकारस्य स्वरूपातिरिक्तस्य वेदांतजन्यवृत्तावपि न विषयता। निष्प्रकारकत्वहान्यापत्तेरिति। यत्तु अज्ञानपदेन ज्ञानाभावोक्तौ सिद्धसाधनं। अनिर्वचनीयाज्ञानोक्तौ च तस्य खपुष्पायमाणत्वेन प्रतियोगित्वासिद्धिरिति। तदसत्। पराभ्युपगममात्रेणैव प्रतियोगिप्रसिद्धिसंभवात्। तदुक्तं मतद्वयेप्यप्रामाणिकस्यापि निषेधप्रतियोगित्वादिति।

शंखतत्वेति॥ श्वैत्येत्यर्थः। ननु प्रतिबिंबे व्यभिचारः। स हि मुखैक्यसाक्षात्कारवत् प्रवृत्तिविषये मुखेऽध्यस्त इति चेन्न। नहि मुखैक्यसाक्षात्कारवतः प्रवृत्तिविषयः प्रतिबिंबः। किंतु तद्भेदज्ञानवत एव। अत एव बालानां तत्र बालांतरधीः। नच तव्यतिरेकेणोपलभ्यमानत्वमुपाधिः। व्यतिरेकेणेत्यस्य भेदेनेति यदि तदोपाधेर्न पक्षाव्यावृत्तिः। शुद्धं ब्रह्म न जानामि घटस्य स्फुरणमित्यादि भेदेनैव प्रपंचोपलंभात्। अथ विनेत्यर्थस्तदा रूपादिहीनेनाऽसंसारमज्ञानावृतेन चैतन्येन विनापि चाक्षुषादिज्ञाने घटादेरुपलभ्यमानत्वेनोपाधेर्न पक्षाव्यावृत्तिरिति॥ तं प्रतीति॥ नन्वैंद्रजालिकं प्रत्यपरोक्षे तन्मायाकल्पिते व्यभिचार इति चेन्न। मायाविनं प्रति मायिकस्यापरोक्षत्वाभावात्। तदुक्तं। "न च मायाविना माया दृश्यत" इति॥ न च मायाऽविद्ययोरभेदाद्देहात्मैक्ये व्यभिचार इति वाच्यं। तयोर्भेदपक्षे अस्योक्तत्वात्। अत एव न रूप्येपि व्यभिचारः॥ प्रत्यभिज्ञानादिति॥ नच सुषुप्तिकालस्थायित्वासाधकत्वस्य प्रत्यभिज्ञायाः दृष्टिसृष्टिसमर्थने वक्ष्यमाणत्वादसिद्धिरिति वाच्यं। तत्रैव निरसिष्यमाणत्वात्॥ अदृष्टादेरिति॥ नचादृष्टादेः कारणात्मनावस्थानात्पुनरुत्थानसंभव इति वाच्यं। तस्याप्यदृष्टसमानयोगक्षेमत्वात्॥ मिथ्यामात्रेति॥ प्रतियोगित्वादौ व्यभिचारवारणाय मात्रेति। नच मिथ्यात्वन्यूनवृत्तित्वमुपाधिः। प्रमेयत्वादौ साध्याव्यापकत्वात्। तस्यात्मान्यसर्वांतः पातिन्यसति वृत्त्यभावेन साध्यवतो मिथ्यात्वन्यूनवृत्तित्वाभावात्।

ननु पक्षीकृतं मिथ्यात्वं सदसद्विलक्षणत्वं वा सद्विलक्षणत्वमात्रं वा। आद्ये सिद्धसाधनं। तस्यात्मान्यसर्वमध्यपतितासद्वृत्तित्वाभावात्। द्वितीये तु हेतौ मिथ्यापदस्य सदसद्वैलक्षण्यमात्रपरत्वे

सामान्याभावसिद्धेरित्यर्थः॥ अत्र चेति॥ ननु नासति व्यभिचारः। सिद्धांते तस्यापि भ्रांतिविषयत्वेन शुक्तिरूप्यवत्कल्पकोपेतत्वादिति चेत् न। स्वप्रत्यासन्नकल्पकरहितत्वादित्यर्थात्। असतोऽप्रत्यासन्नत्वात्। कल्पकशब्दस्य पित्रादिशब्दवत्संबंधिविशेषपरतया तद्राहित्यं पक्षे स्वमतेऽप्यस्तीति भावः।

ननु शुद्धस्याप्यनाद्यविद्योपधानवशेन कल्पकत्वमस्तु। कल्पकत्वं हि कल्पना प्रत्याश्रयत्वं विषयत्वं साधकत्वं वा। तच्च सर्वं कल्पनासमसत्ताकत्वेन शुद्धत्वाव्याघातकं। तदुक्तं। ''आश्रयत्वविषयत्वभागिनी''ति। अस्तु वोपहितस्य कल्पकत्वं। न चानवस्था। अविद्याद्यध्यासस्याध्यासांतरानपेक्षत्वात् स्वपरसाधारणसर्वनिर्वाहकतोपपत्तेः। अकल्पितस्य कल्पकत्वादर्शनात्। कल्पितप्रतिबिंबविशिष्टादर्शादेरादर्शांतरे प्रतिबिंबकल्पकत्वदर्शनाच्च। बिंबस्य द्वितीयादर्शसंमुखत्वाभावेन तत्कल्पकत्वायोगादिति। मैवं। कल्पितेनापि संसारेणास्पृष्टस्य चैतन्यस्याभावे नित्यमुक्तश्रुतेर्निर्विषयत्वापत्तेर्वक्ष्यमाणत्वात्। अतात्विकसंसारास्पृष्टत्वस्य सर्वसाधारणत्वात्। नापि शुद्धस्य कल्पनां प्रत्याश्रयत्वादिकं। अस्यास्मिन्कल्पनेति कल्पनाया द्वयसापेक्षत्वात्कल्पकस्यान्यस्य संभवे तत्कल्पनां प्रति शुद्धस्याश्रयत्वादिकं संभवेत्। शुद्धस्य कल्पनां प्रति कर्तृत्वं तु न संभवति। देहेंद्रियाद्यभावादित्युक्तत्वात्। नाप्युपहितस्य कल्पकत्वे अनवस्याद्यभावः। अविद्याध्यासस्य स्वपरनिर्वाहकत्वकल्पनाया निर्बीजत्वात्। प्रपंचस्य सत्यत्वेनैवोपपत्तेश्च। आदर्शांतरे प्रतिबिंबस्याकल्पितत्वस्य वक्ष्यमाणत्वाच्चेति साधूक्तं कल्पकं विना कल्पनायोगादिति॥ तस्येति॥ तथाच रूप्ये हेतुसत्त्वे साध्यस्यापि सत्त्वापातान्न व्यभिचार इति भावः। ननु न रूप्ये साध्यस्य सत्त्वस्यापातः। तथात्वे हि सर्वजनसिद्धबाधविरोधात्। गजादौ गोवैलक्षण्येपि तद्विरुद्धाश्ववैलक्षण्ययोगवत्सद्वैलक्षण्येप्य सद्वैलक्षण्ययोगोपपत्तिरिति चेत्। मैवं। रूप्ये बाधोपपत्त्यर्थमसत्वस्यैवांगीकर्तुमुचितत्वात्। न च तथात्वे प्रतीत्यनुपपत्तिः। प्रतीत्युपपत्त्यर्थं सत्त्वस्याप्यङ्गीकरणीयत्वात्। निषेधसमुच्चय वद्विधिसमुच्चयस्याप्यनिर्वचनीयवादेऽविरोधापत्तेः। सत्त्वासत्त्वयोः परस्परात्यंताभावरूपत्वस्य मिथ्यात्वनिरुक्तिभंगे उक्तत्वेन गजादौ गोत्वतदभाववैलक्षण्यवत्सामानाधिकरण्यानुपपत्तेश्चेति॥ तस्मिन्नपरोक्षेपीति॥

ननु सामान्याकारेणापरोक्षेपि शुक्त्यादौ रजतादेरनिषेध्यत्वेन साक्षाद्भासमानतया तत्र व्यभिचारः। अथ व्यावृत्ताकारेण यस्मिन् भासमाने यदनिषेध्यत्वेन साक्षाद्भासते न तत्तदज्ञानकार्यादीति व्याप्तिरिति मन्यसे तदाऽसिद्धिः। नहि चैतन्यमिदानीं

ननु साध्ययुक्तादात्मनः सपक्षाद्धेतुव्यावृत्तावसाधारण्यं दोषः स्यादित्यत आह॥ असाधारण्यस्येति॥ अगृह्यमाणेति॥ साध्यतदभावानुमित्यनुकूलव्यतिरेकव्याप्तिद्वयवत्तया वा तादृशव्याप्तिग्रहहेतुव्यतिरेकसहचारवत्तया वा ज्ञायमानत्वे सति पक्षधर्मतया ज्ञायमानत्वेन साध्यतदभावौ प्रति हेतोरगृह्यमाणविशेषावस्थायामसाधारण्यं दोष इत्यर्थः। प्रकृते तु नागृह्यमाणविशेषावस्था। विपक्षे बाधकतर्केण स्थापनासाध्यं प्रति हेतोर्व्याप्यत्वग्रहान्नासाधारण्यं। न वाऽप्रयोजकत्वमित्यर्थः॥

ननु तथाप्युक्तहेतुरयुक्तः। अनादित्वस्य विषमव्याप्तस्योपाधित्वात्। न चोक्तविपक्ष बाधकतर्केण हेतोः साध्यव्याप्यतया तदव्यापकतयोपाधेः साध्याव्यापकत्वमिति वाच्यं। प्रातिभासिकरज्जुसर्पादौ भयकंपादिकार्यकारित्वदर्शनेन प्रातिभासिकसाधारण्यस्य तुच्छव्यावृत्तस्य प्रतीतिकालसत्त्वस्यैवार्थक्रियाकारित्वं प्रति प्रयोजकत्वात्। प्रातिभासिकस्यार्थक्रियाकारित्वा नभ्युपगमे सप्रकारकाबाध्येति हेतुविशेषणवैयर्थ्यापत्तेः। कस्मिन्नपि देशे कस्मिन्नपि काले केनापि पुरुषेणाबाध्यत्वं हि परमार्थसत्त्वं। तदपेक्षया प्रतीतिकालसत्त्वस्य लघुत्वादिति चेन्नैवं। स्वरूपेणैव प्रपंचस्य निषेध इति त्वया व्यवस्थापितत्वेन सत्त्वेन प्रतीयमानत्वातिरिक्तस्य प्रतिभासिकसत्त्वस्य तव मतेऽभावेन तस्य हेतुत्वं प्रत्यप्रयोजकत्वात्। अन्यथा शशविषाणमस्तीति शब्दाभासात्सत्त्वेन प्रतियमानस्य निरुपाख्यस्यापि हेतुतापत्तेः। यथा च शशविषाणमस्तीत्यादिनाऽनाभासस्यासतः प्रतीतिस्तथोक्तं पुरस्तात्। यथा च हेतौ न विशेषणवैयर्थ्यं तथा तत्रैवावोचाम।

ननु घटे घटत्वस्येव मिथ्याभूते प्रपंचे मिथ्यात्वस्य परमते सत्वान्न तत्र तदारोपितं। अतो हेत्वसिद्धिरित्याशंकां परिहरति॥ न च पंचम इति॥ आरोपितत्वादिति॥ नन्वारोपितत्वं प्रातिभासिकत्वं चेत्प्रपंचे हेत्वसिद्धिः। तत्सिद्धेः पारमार्थिकत्वसिद्धयुत्तरकालीनत्वात्। व्यावहारिकत्वं चेच्छुक्तिरूप्यादौ व्यभिचारः। उभयसाधारण्येप्ययमेव दोष इति चेन्नैवं। मिथ्यात्वेनोभयसंमतत्वस्यारोपितत्वस्य हेत्वंतर्गतत्वात्। अस्ति च ब्रह्मजगतोस्तादृशं मिथ्यात्वं। अतो नासिद्ध्यादि। रूप्ये च तादृशमिथ्यात्वाभावान्न व्यभिचार इति। नन्वसति सदसद्वैलक्षण्यादिरूपमिथ्यात्वस्याभावेनारोपितमेव तत्र तदित्यत आह– अत्र चेति। ननु प्रपञ्चस्य कल्पितत्ववादे कश्चित् कल्पकोऽस्त्येवेति हेतोरसिद्धिरितिशङ्कां। परिहरति– न च षष्ठ इति॥ चिन्मात्रस्येति। कल्पनोपयोगिदेहाद्यध्यासाभावादित्यर्थः॥ अन्यस्य चेति॥ चिन्मात्रस्याकल्पकतया कल्पितांतरेणैव कल्पितस्य कल्पना वाच्येत्यनवस्थापत्त्या यावद्विशेषबाधे

न हि क्वचिदप्यसति सुखे सुखज्ञानमस्ती''त्याशंक्य सत्यमेतत् न तु तेन पूर्वज्ञानप्रामाण्याध्यवसायनं युक्तं। अप्रमाणेनापि प्रियासंगमविज्ञानेन स्वप्नावस्थायां सुखदर्शना''दिति। ननु स्वरूपाणामननुगततया ज्ञानत्वादेश्चातिप्रसक्ततयाऽनुगतानति प्रसक्तोपलक्ष्यतावच्छेदकाभावादुपलक्षणत्वासंभव इति चेन्न। विशेषणत्वमप्यसंभवि अनागतादिज्ञाने तत्कालाविद्यमानस्य विषयस्य पूर्वभावित्वरूपजनकत्वासंभवात्। ननु स्वव्यापारजन्ये व्यापारिणोऽसतो जनकत्ववत्स्वज्ञानजन्येऽप्यसतो जनकत्वमस्त्विति चेन्न॥ व्यापारद्वारा व्यापारिणो जनकत्वमित्यस्य कार्यजनकव्यापारजनकत्वमित्यर्थः। भवति च यागादि तथा। तस्यापूर्वोत्पत्तिकाले सत्त्वात्। मिथ्याभूतं तु स्वकालेपि सद्विलक्षणस्वभावं कथं स्वज्ञानं व्यापारं जनयेत्। असद्वैलक्षण्यापेक्षया लाघवेन सत्त्वस्यैव कारणत्वे प्रयोजकत्वात्। स्वज्ञानाजनकस्यापि मिथ्यार्थस्य स्वज्ञानजन्यकार्यं प्रति स्वज्ञानस्य जनकत्वमात्रेण मिथ्यार्थस्यापि जनकत्वाभिधानं त्वमानकं। नन्वतीतानागतावस्थस्यापि सद्धर्माश्रयत्वमभ्युपगम्यत एव। अन्यथा ध्वंसप्रागभावप्रतियोगित्वतज्ज्ञानविषयत्वादीनामनाश्रयत्वापत्तेः। प्रमाणबलात्कारणत्वाभ्युप गमस्यापि तुल्यत्वादिति चेन्मैवं। विद्यमानप्रागभावप्रतियोगित्वादीनामनाश्रितत्वासंभवाद विद्यमानाश्रयत्ववत् कारणत्वस्य पूर्ववृत्तित्वरूपस्यासत्यसंभवाद्विद्यमानाश्रितत्वं। न हि विद्यमानत्वमविद्यमानेऽस्ति। व्याघातादिति सर्वं मनोरमम्।

नन्वर्थोपलक्षितज्ञानस्यार्थक्रियाकारित्वमिति पक्षेऽप्युक्तहेतोः स्वाप्नगजादिज्ञान एव व्यभिचारः। स्वरूपाबाध्यस्य विषयाबाध्यत्वदर्शनेन विषयबाधे स्वरूपबाधस्यावश्यकतया स्वाप्नादिज्ञानं सदेवेत्यस्य वक्तुमशक्यत्वादिति चेन्न। असत्यपि गजे गजज्ञानमासीदिति तज्ज्ञानस्य जाग्रत्यप्यनुभवेन विषयासत्त्वेपि सत्त्वात्। स्वरूपाबाध्यसाक्षिविषयस्यापि रूप्यस्य बाध्यत्वदर्शनाच्चेति। ननु शुद्धस्यार्थक्रियाकारित्वाभावात्साधनविकलत्वं। उपहितस्य पक्षनिक्षेपात्साध्यविकलत्वमित्यत आह॥ सत्यस्येति॥ आश्रयत्वविषयत्वादिनाऽज्ञानादि सिद्धिरूपार्थक्रियाकारित्वं शुद्धात्मनि दृष्टांते वर्तते। तदुक्तं संक्षेपशारीरके।

''आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवले''ति।

शुद्धस्य जगद्धेतुत्वेनाप्यर्थक्रियाकारित्वात्। अत एवानुपदं वक्ष्यति। ब्रह्मणि हेतुत्वं प्रतीत्यादि। अन्यथा तद्वाक्यस्यासंगतत्वापात इत्यर्थः। एतेन मम मते अविद्योपहितस्य साक्षिणो मिथ्यात्वात्साधनवत्यपिसाक्षिणि साध्यवैकल्यं साध्यवति शुद्धात्मनि साधनवैकल्यमिति निरस्तं। साक्षिशब्देन विश्वसाक्षिणः शुद्धात्मन उपादानात्। तस्य चार्थक्रियाकारित्वोक्तेश्च। तुष्यतु दुर्जन इति न्यायेनोक्तार्थक्रियातिरिक्तार्थक्रियामभिप्रेत्याह॥ असद्वेति॥ वाशब्दोऽनास्थायां।

शास्त्रयोनित्वादिति सूत्रे च सर्वकर्तृत्वसिद्धमेव सार्वज्ञं स्फोर्यत इति त्वदुक्तमयुक्तं स्यादिति भावः। अन्यथेति। ईश्वरस्याप्यनिषेध्यत्वेन जगद्द्रष्टृत्वाभावे पालनीयाज्ञानात्तत्पालनादौ प्रवृत्तिर्न स्यादित्यर्थः। नन्वीश्वरः प्रपंचं निषेध्यत्वेनैव जानाति। अत एव न तस्य भ्रांतत्वं। मिथ्याभूतस्य च मिथ्यात्वेनैव ग्रहणादैंद्रजालिकवद्भ्रांतित्वायोगात्। अन्यथा सर्वविषयक भ्रमज्ञातृत्वेन भ्रांतत्वस्य दुर्वारतापत्तेः। न च निषेध्यत्वेन ज्ञाने तत्पालनार्थमीश्वरस्य प्रवृत्तिर्न स्यादिति वाच्यं। ऐंद्रजालिकप्रवृत्तिवदीश्वरप्रवृत्तेरपि तथाविधत्वादिति चेन्मैवं। न ह्यैंद्रजालिकस्तत्पालयति। किं तु दर्शयामीति भ्रमयति। ईश्वरस्तु पालयति। एष लोकपालः। विश्वं तद्भद्रं यदवंति देवा इत्यादि श्रुतेः। यस्माद्देवाः विश्वं रक्षंति तस्माद्भद्रं सत्यमिति माधवीयव्याख्यानात्। सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि। स ईक्षतेमे नु लोकाश्च लोकपालाश्चेत्यादावनिषेध्यत्वेनैव सर्वज्ञानोक्तेश्च। यः सर्वज्ञः सर्वविदित्यादौ सामान्यविशेषाभ्यां ज्ञानोक्तेश्च। निषेध्यत्वेन ज्ञाने सामान्यविशेषाभावाच्चेति। विपक्ष इति। अनिषेध्यत्वेनेश्वरज्ञाननिषयस्यापि विश्वस्य सत्यत्वाभावे निषेध्यमेव प्रपंचमनिषेध्यत्वेन ईश्वरो जानातीति स्यात्तथाचेश्वरस्य भ्रांतत्वं स्यादित्यर्थः। सा चेति। शोकं मोहं जरां मृत्युमत्येतीत्यादिभिर्विरुद्धेत्यर्थः। सत्याया इति। सत्यत्वविशेषितार्थक्रियायाः हेतुविशेषणत्व इत्यर्थः। यथाश्रुते असिद्ध्याद्यभावादिति बोध्यं। पक्षे सपक्षेचेति। पक्षेऽसिद्ध्या पक्षधर्मतायाः सपक्षेऽसिद्ध्या व्याप्तेरयोगादित्यर्थः। असत्यायाश्चेति। अर्थक्रियामात्रस्य हेतुविशेषणत्व इत्यर्थः। नन्वैंद्रजालिकादेरसत्त्वात्कथं स्वमते तस्यार्थक्रियाकारित्वमिति चेन्न। तस्याप्यविद्यमानापरपर्यायमिथ्याभूतार्थक्रियाहेतुत्वात्। अत एव ब्रह्माणीत्याद्यग्रिमग्रंथविरोधोऽपि नेति ध्येयं॥ सप्रकारकेति। ऐंद्रजालिकार्थक्रिया तु सप्रकारेणेदानींतनबाधेन बाध्येति न तत्र व्यभिचार इत्यर्थः। ननु सप्रकारकजाग्द्बोधा बाध्यस्वप्नजलाव गाहनप्रियासंगमादिविशेषिताप्रमाणीभूतज्ञानस्यार्थक्रियाकारित्वदर्शनेन तद्विषये तत्र व्यभिचारः। अथ तत्र ज्ञानमेव सुखादिजनकं तच्चाबाध्यमेवेति मतं। तदसत्। ज्ञानमात्रस्य हि तादृशसुखाजनकत्वेन किंचिद्विशेषितस्यैव तथात्वं वाच्यं। ज्ञाने च विशेषो नार्थातिरिक्तः। तदुक्तं। "अर्थेनैव विशेषो हि निराकारतया धिया" मिति। अर्थेनेत्यर्थ एवेत्यर्थः। तथा च मिथ्याभूतविशेषितस्य जनकत्वाभ्युपगमे मिथ्याभूतस्यापि जनकत्वाव्यभिचार एवेति शंकां परिहरति। व्यभिचारस्त्विति।

"अत्र ब्रूमः। विषयविशेषोपलक्षितज्ञानस्यैव जनकत्वमस्तु, तत्कुतो विषयस्य जनकत्वं। तथा चोक्तं शास्त्रदीपिकायां बौद्धं प्रति। "अथ सुखज्ञानमेवार्थक्रिया। तच्चाव्यभिचार्येव।

न व्यावहारिक्यपि व्यावृत्तिः। किं तु व्यावृत्तावेवासत्प्रतियोगिकत्वादिकं। न वा ब्रह्मविश्वासत्सु प्रातिभासिकव्यावृत्तिं प्रति प्रयोजकोऽनुगतो धर्मः संभवति। ब्रह्मणो निर्धर्मकत्वात्। विश्वस्य व्यावहारिकधर्मवत्त्वात्। असतो निरुपाख्यत्वात्। नापि ब्रह्मविश्वप्रातिभासिकेषु असद्व्यावृत्तिरेका संभवति। नाप्येकव्यावर्तकप्रयोज्या। ब्रह्मविश्वयोस्त्वसत्प्रातिभासिकव्यावृत्तिः सामान्याभाव रूपतयैका संभवति। अधिकरणभेदेनाभावभेदाभावात्। तथा च ब्रह्मविश्वयोर्विद्यमानामुक्तव्यावृत्तिं प्रति व्यावर्तकतया प्रयोजकमेकमनुगतमवश्यं वाच्यं। तच्च पारमार्थिकसत्त्वमेव। अवच्छेदकांतरानुपपन्नप्रयोज्यकत्वादिति साधु कृतबुद्धयो विदां कुर्वंतुतरां। नापि नित्यत्वमुपाधिः। पक्षे पारमार्थिकसत्त्वाभावे तद्विरुद्धस्वभावासत्प्रातिभासिकयोर्व्यावृत्तावुच्यमानायां व्याघात वत्पारमार्थिकसत्त्वाभावे ध्वंसप्रतियोगित्वरूपस्य नित्यत्वाभावस्योक्तौ व्याघाताभावेनोपाधेः पक्षे साध्याभावासाधकत्वात्। उक्तानुकूलतर्कगृहीतसाध्यव्याप्तिकहेत्वव्यापकत्वेन साध्याव्याप कत्वाच्चेति।

प्रामाण्येति। अर्थसत्त्वगर्भप्रामाण्यस्यार्थासत्त्वगर्भातत्वावेदकत्वेनात्यंतविरोधात्प्रामाण्या तत्वावेदकत्वयोः सामानाधिकरण्यादर्शनात्। प्रामाण्यस्य साधारणधर्मत्वा भावेनातत्वावेदकत्वकोट्यस्मारकतया नोक्तविधविकल्पः संभवतीत्यर्थः। प्रत्यक्षस्येति। तथा च तत्वावेदकप्रमोक्तावपि नासिद्धिरिति भावः। अनुमानादेश्चेति। तथा च तत्वभूतमिथ्यात्वावेदकतया तत्वावेदकजातीयानुमानविषयत्वेनापि तत्वावेदकप्रमाविषयत्वं पक्षे नासिद्धमिति भावः। विपक्ष इति। मिथ्याविषयकज्ञानस्यापि प्रमात्वे व्याघात इत्यर्थः। विषयेति। रूप्यज्ञानस्यापि प्रामाण्यप्रसंगादित्यर्थः। अत्र हेतौ नित्यत्वमुपाधिः पूर्ववन्निरसनीयः।

अत्र वदंति। "प्रमात्वं तद्वति तत्प्रकारकत्वं वा तत्वावेदकत्वं वा। आद्ये दृष्टांतस्य साधनवैकल्यं। न हि परमार्थतः शुद्धस्य ब्रह्मणस्सप्रकारकज्ञानविषयत्वं। न च धर्मवतो दृष्टांतत्वं संभवति। तस्य पक्षकुक्षिनिक्षिप्तत्वेन निश्चितसाध्यवत्त्वाभावात्। द्वितीये तत्वावेदकत्वस्याबाधितविषयत्वरूपत्वेन साध्याविशेषपर्यवसानात्। हेतुग्रहे सिद्धसाधनं। हेत्वग्रहे तु स्वरूपासिद्धिरिति। मैवं। विशेष्यावृत्त्यप्रकारकज्ञानत्वादेः प्रमात्वस्य विवक्षायां दोषाभावात्। तत्वावेदकप्रमोक्तावप्यदोषत्वस्योक्तत्वाच्च। न च साध्यावैशिष्ट्यं दोषः। अर्थसत्त्वाग्रहेपि शब्दादिना तज्ज्ञाने तद्विषयकत्वग्रहसंभवात्। शब्देऽनित्यत्वाग्रहेपि शब्दत्वानित्यत्वयोर्व्याप्तिग्रहवदिति सर्वमनवद्यं।

ननु सत्यत्वसिद्धिं विना अनिषेध्यत्वेनेत्यंशस्यासिद्धिः। तथा चान्योन्याश्रय इत्यत आह। त्वयापीति। अन्यथा जन्माद्यस्य यत इति सूत्रे जगत्कर्तृत्वेन ब्रह्मणः सर्वज्ञत्वसिद्धिः,

तार्किकादीनां मिथ्यात्वेन संमतम्। अतस्तत्र नव्यभिचारः। तदिदमुक्तमारोपितत्वेनो भयसम्मतत्वरूपस्येति। न चेति॥ तथा च न पारमार्थिकसत्त्वसिद्धिरित्यर्थः। व्यावर्तकतयेति॥ व्यावृत्तेर्व्यावर्तकप्रयोज्यत्वनियमादित्यर्थः।

नन्वसत्प्रातिभासिकव्यावृत्तिं प्रति व्यावर्तकं पारमार्थिकसत्त्वं ब्रह्मण्यस्तु। तत्र पारमार्थिकसत्त्वस्य संभवात्। प्रपंचे तूक्तहेतुं प्रति न पारमार्थिकसत्त्वं व्यावर्तकम्। प्रपंचस्य मिथ्यात्वेन पारमार्थिकसत्त्वस्याभावात्। किंतु व्यावहारिकसत्त्वमेव व्यावृत्तिरूपहेतुं प्रति प्रपंचे व्यावर्तकम्। तथाचाननुगतमेव सत्त्वमुक्तहेतुं प्रति प्रयोजकमित्याशंकापरिहारार्थमुक्तं विश्वमिथ्यात्वेत्यादि। अन्योन्याश्रयादिति। व्यावृत्तिरूपोक्तहेतुं प्रति पारमार्थिकसत्त्वस्याव्यावर्तकत्वे उक्तहेतोरप्रयोजकत्वेन मिथ्यात्वानुमानं प्रति बाधकत्वाभावसिद्धौ मिथ्यात्वानुमानेन मिथ्यात्वसिद्धिः तत्सिद्धौ चानुगतव्यावर्तकस्यासंभवादननुगतस्य व्यावर्तकत्वेनोक्तहेतोर प्रयोजकत्वमित्यन्योन्याश्रय इत्यर्थः। तत्प्रयोजकमिति। उक्तहेतुं प्रति व्यावर्तकतया प्रयोजकमित्यर्थः। असद्व्यावृत्तिं च प्रतीति। असत्प्रातिभासिकव्यावृत्तिं प्रतीत्यर्थः। सत्त्वस्यैवेति। ब्रह्मप्रपंचयोर्विद्यमानासत्प्रातिभासिकव्यावृत्तिं प्रति व्यावर्तकतया प्रयोजकमुभयानुगतं तद्विरुद्धं पारमार्थिकसत्त्वमेव वाच्यम्। न तु ब्रह्मत्वादिकम्। तस्य प्रपंचेऽविद्यमानत्वेन न्यूनवृत्तित्वादित्यर्थः। यथाश्रुते त्वसद्व्यावृत्तेः परमते शुक्तिरूप्येपि सत्त्वेन तत्र त्प्रयोजकसत्त्वस्याभाववत्प्रपंचेपि तदभावोपपत्तेरसंगतिः स्यादिति ध्येयं। अन्यथेति। उक्तव्यावृत्तिं प्रति ज्ञानत्वादेः प्रयोजकत्वे सत्यज्ञानादिवाक्ये ज्ञानपदेन ज्ञानत्वप्रतिपादनद्वाराऽनृतव्यावृत्तिसिद्धिप्रसंगेन सत्यपदवैयर्थ्यं स्यादित्यर्थः। प्रपंच इति। अनुगतस्य संभवे बाधकं विना त्यागायोगादिति भावः।

अत्र वदंति। "अयुक्तमेतत्। न हि प्रातिभासिकासतोरेका व्यावृत्तिरुभया वा समव्याप्ता। येनैकप्रयोजकप्रयोज्या भवेत्। किं तु प्रातिभासिकव्यावृत्तिप्रयोजकं ब्रह्मविश्वासत्साधारणमेव वक्तव्यम्। असत्यपि प्रातिभासिकत्वाभावात्। एवमसद्व्यावृत्तावपि प्रयोजकं ब्रह्मविश्वप्रातिभासिकसाधारणमेव वक्तव्यं। प्रातिभासिकस्याप्यसत्त्वाभावात्। तथा च तत्प्रयोजकद्वयसमावेशादेव ब्रह्मण्युभयव्यावृत्त्युपपत्तौ नीलत्वघटत्वरूपावच्छेदकद्वय समावेशोपपन्ननीलघटत्ववन्नातिरिक्तप्रयोजककल्पनायामस्ति किंचिन्मानमिति कृतबुद्धयो विदांकुर्वंतु। नित्यत्वं चोपाधिः। तुच्छप्रातिभासिकयोर्नित्यत्वव्यतिरेके साध्यव्यतिरेकदर्शनादिति।

अत्र ब्रूमः। न तावद्ब्रह्मविश्वासत्सु प्रातिभासिकव्यावृत्तिरेका परमते संभवति। ब्रह्मणि सा धर्मिस्वरूपा। जगति व्यावहारिकी अन्योन्याभावादिरूपा। असति तु निर्धर्मकत्वेन

विशेष्यसत्त्वेपि रूप्यज्ञानस्याप्रमात्वात्। किं तु स्वोल्लिखितस्य प्रकारसंबंधस्य विशेष्ये सत्त्वम्। तच्च प्रकृतेऽप्यस्त्येवेति भावः। प्रतिभासेति। मात्रशब्देनार्थो व्यावर्त्यते। अर्थाभावेपि प्रतिभासवत्त्वमित्यर्थः। यथाश्रुते ज्ञानात्मकतापत्तौ विरोधः स्यादिति बोध्यम्। असिद्धीति॥ यत्किंचिदधिकरणे प्रपंचे अधिकरणत्वाभावस्यासिद्धिरित्यर्थः। असिद्धिवारकस्यापि बहुशोऽभियुक्तैः प्रयुक्तत्वान्न वैयर्थ्यमित्याह – शरीरेत्यादि॥ विमतमिति॥ वह्निमतः पक्षीकरणादसिद्धिर्बोध्या। विमतं तन्नायःपिंडादि॥ किंचेति॥ तथा चाप्रसिद्धिवारकतया सहचारग्राहकतया व्याप्तिग्रहोपयुक्तत्वान्न तद्वैयर्थ्यमित्यर्थः। केचिदित्यस्वरसोद्भावनम्। तद्बीजं तु अनधिकरणत्वस्याधिकरणत्वसामान्याभावपरत्वे व्यभिचाराभावः। विशेषाभावपरत्वे तु प्रातिभासिकत्वविशेषणेऽपि व्यभिचार एवेति।

ननु तथापि प्रातिभासिकत्वविशेषणं व्यर्थम्। अनधिकरणत्वे सत्यसत्त्वानधिकरणत्वस्यैव परमार्थसत्वसाधकत्वोपपत्तेः। शुद्धमेव हि ब्रह्म दृष्टांतत्वेनाभ्युपेयम्। धर्मवतो दृष्टांतत्वे साध्यवैकल्यापत्तेः। साध्यं तु बाधाभावरूपत्वादधिकरणस्वरूपमेव। न धर्मः। धर्म्यतिरिक्ताभावानभ्युपगमात्। तथा च क्षित्यादिकमकर्तृकं शरीराजन्यत्वादित्यत्रशरीरस्येव व्याप्तिग्रहानुपयोगित्वेन प्रातिभासिकत्वस्य वैयर्थ्यमेव। आकाशादावजन्यत्वकर्तृजन्यत्वाभावयोरिव निर्धर्मके ब्रह्मण्यनधिकरणत्वपरमार्थत्वयोर्व्याप्तिग्रहोपपत्तेः। तथाचैकामसिद्धिं परिहरतो द्वितीयापत्तिः। स्वरूपासिद्धिपरिहारार्थं विशेषणं प्रक्षिपतो व्याप्यत्वासिद्ध्यापत्तिरित्यर्थः। व्याप्तावनुपयोगस्य दर्शितत्वादिति चेत्। अत्र ब्रूमः। शुद्धे ब्रह्मण्यनधिकरणत्व तदभावाभ्यामधिकरणत्वस्यैव प्राप्याऽनधिकरणत्वासिद्धेर्व्याप्यग्रहात् प्रातिभासिकत्वविशेषणे तु व्याप्तिग्रहात्तस्य सार्थक्यम्। वस्तुतस्तु अधिकरणत्वाभावातिरिक्तस्य प्रातिभासिकत्व विशेषिताधिकरणत्वस्य विशिष्टस्याभावो अखंड एव हेतूकृतः। अतो न वैयर्थ्यगंधोऽपि। न चैवं शरीराजन्यत्वादित्यत्राप्युक्तविधयाऽखंडाभावसत्त्वेन वैयर्त्योक्तिरसंगता स्यादिति वाच्यम्। इष्टापत्तेरिति विभावनीयम्। ननु तथापि त्वन्मते प्रातिभासिकस्याप्यसत्त्वेन व्यर्थविशेषणतया व्याप्यत्वासिद्धिः। अस्मन्मतमाश्रित्य हेतूकरणे च देहात्मैक्ये ब्रह्मज्ञानेतराबाध्ये व्यभिचारः। न च तस्य त्वन्मते प्रातिभासिकत्वेन प्रातिभासिकत्वानधिकरणत्वविशेषणेनैव व्यावर्तिततया न तत्र व्यभिचार इति वाच्यम्। तस्य ब्रह्मज्ञानेतरबाध्यादन्यत्वेन प्रातिभासिकत्वाभावात्। न हि प्रातिभासिकं ब्रह्मज्ञानेतरबाध्यादन्यदिति चेन्नैवम्। न हि प्रातिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वमितीहाभिप्रेतम्। येनोक्तदोषः स्यात्। किं तु सत्यत्ववादिमिथ्यात्व वाद्युभयसंमतमिथ्यात्वकत्वं प्रातिभासिकत्वमिहाभिप्रेतम्। देहात्मैक्यं च सत्यत्ववादिनां

वाक्याद्वाक्यार्थोपस्थितिरित्यर्थः। ननु ज्ञानमेवाज्ञाननिवर्तकमिति परमते अज्ञाननिवृत्तिरूपमोक्ष हेतोर्ज्ञानान्यस्याभावेनाव्यावर्तकतया ज्ञानेति व्यर्थम्। न चाज्ञाननिवृत्तिरदृष्टादिकारिताऽपीति वाच्यम्। तर्हि तद्वदेव प्रपंचस्याप्यदृष्टसहितज्ञानबाध्यत्वापत्तौ ज्ञानान्याबाध्यत्वमसिद्धमित्यरुचेराह – यद्वेति। ननु शशशृंगमस्तीति शब्दाभासजन्यासद्विषयकज्ञानहेतोर्दोषस्या सद्बाधकाभिमताबाध्यतया सत्यंतविशेषणेनैवा सद्व्यावृत्तिसंभवे तद्वारकस्यासत्त्वानधिकरणत्वे सतीत्यस्य वैयर्थ्यमेव। रूप्याकाराविद्यावृत्त्यनंगीकर्तृमते साक्षिविषयस्यापि रूप्यस्य दोषजन्यज्ञानाविषयतया तस्यापि पक्षत्वापत्तौ बाधश्चेत्यरुच्या पक्षांतरमाह – स्वबाधकाभिमतेति। समानाधिकरणेति। मनःपरिणामस्य ज्ञानस्य कर्मप्रागभावसामानाधिकरण्यं बोध्यम्।

ननु सर्वेष्वप्येषु पक्षेषु वादिनं प्रति प्रातिभासिकव्यावृत्त्यर्थमुपात्तमाद्यं सत्यंतं वैकल्पिकं विशेषणं व्यर्थम्। तन्मते प्रातिभासिकस्यासत्त्वेनासद्व्यावर्तकासत्त्वानधिकरणत्वविशेषणेनैव प्रातिभासिकस्यापि व्यावृत्तिसिद्धेः। न च परार्थानुमाने प्रतिवादिनं प्रति सिद्धसाधनोद्धारस्यापि वादिनं प्रति प्रयोजनत्वात् जन्यकृत्यजन्यानीत्यत्र पक्षतावच्छेदके मीमांसकं प्रति जन्यत्वस्येवेहापि वादिनं प्रति सत्यंतस्य तदुपरक्तबुद्धेरुद्देश्यत्वेन विशेषणत्वोपपत्तेश्च न वैयर्थ्यमिति वाच्यं। एवमपि देहात्मैक्यस्यापि पक्षत्वे बाध एव। बाधे च सति पक्षविशेषणस्य पक्षत्वस्यासिद्ध्या आश्रयासिद्धिरपीति चेन्मैवम्। देहात्मैक्याध्यासनिराकरणाभिप्रायेणास्योक्तत्वाददोषः। वस्तुतस्तु आद्यसत्यंतविशेषणस्य सत्यत्ववादिमिथ्यात्ववाद्युभयसिद्धमिथ्यात्वकभिन्नत्वमर्थः। अस्ति च रूप्ये देहात्म्यैक्ये च तार्किकादीनां सत्यत्ववादिनां मिथ्यात्ववादिनां च मिथ्यात्वप्रसिद्धिरतस्तस्य न पक्षता। प्रपंचे च तार्किकादीनां न मिथ्यात्वप्रसिद्धिः। अतः प्रपंचस्य पक्षतोपपत्तिः। सिद्धांते देहात्म्यैक्यभ्रमाभावेपि दोषाभावश्चेति दिक्।

प्रथमसाध्ये सिद्धसाधनतां परिहरति – व्यावहारिकसत्त्वमिति॥ तथा च परमते प्रपंचे सत्त्वव्यवहारेऽपि सत्त्वस्याभावान्न सिद्धसाधनमित्यर्थः। द्वितीयसाध्ये व्यर्थविशेषणत्वं परिहरति – अर्थगतमिति॥ तथा च प्रपंचेऽपि तन्मते सत्त्वस्य विद्यमानत्वात्तद्विशेषणाभावे सिद्धसाधनता स्यादित्यर्थः। अनिर्वाच्येति॥ सदसत्त्वं क्वचिद्बौद्धमस्ति। तदनधिकरण मनिर्वाच्यमिति लक्षणमाश्रित्येदमुक्तं – परार्थानुमान इति। विशेषणत्वे तूभयसिद्धं प्रयोजनवत्त्वं तंत्रं, न तु प्रयोजनस्याप्युभयसिद्धत्वमिति भावः। अप्रसिद्धिरिति। प्रतियोगिप्रमाविरहेणा भावाज्ञानमित्यर्थः। मतद्व्येऽपीति। प्रतियोगित्वादित्यतः परं प्रतियोगिज्ञानमात्रस्यैवा भावधीहेतुत्वादिति शेषः। केनचिद्रूपेण प्रतियोगिप्रमापि संभवतीत्याह – आरोपितत्वेनेति। न च विशेष्यस्यासत्त्वात्कथं सा प्रमेति वाच्यम्। प्रमां प्रति न विशेष्यसत्त्वं प्रयोजकम्।

स्वमते तु शुक्तिरूप्यवदित्येव। न च – स्वरूपेणात्यन्ताभावप्रतियोगित्वे अत्यन्तासत्त्वापातः, तद्वैलक्षण्यप्रयोजकाभावदिति – वाच्यम्, उत्पत्तिनिवृत्त्योरन्यतरप्रतियोगित्वेन परिहारात्। (२७) आत्मत्वावच्छिन्नधर्मिको भेदो न परमार्थसत्प्रतियोगिकः, आत्माप्रतियोगिकत्वात्, शुक्तिरूप्यप्रतियोगिकभेदवत्। न च घटपटसंयोगे व्यभिचारः, हेतुमत्तया निर्णीते अङ्कुरादाविव साध्यसन्देहस्यादोषत्वात्। एवमन्येऽपि प्रयोगा यथोचितमारचनीया विपश्चिद्भिरिति दिक्।

'हेतवोऽभीष्टसिद्ध्यर्थं सम्यश्चो बहवश्च नः।
अल्पाः परस्य दुष्टाश्चेत्यत्र स्पष्टमुदीरितम् ॥
अभीष्टसिद्धावनुकूलतर्कबलाबलं चात्र परीक्ष्य यत्नात् ।
प्रवक्ष्यते दोषगणः परेषां न खेदनीयं तु मनोऽधुनैव ।'
इत्यद्वैतसिद्धौ विश्वमिथ्यात्वे विशेषतोऽनुमानानि ॥

न्यायामृततरङ्गिणी

प्रत्यक्षबाधमभिधायानुमानबाधमाह॥ अनुमानेति॥ ब्रह्मप्रमान्येनेत्यादि॥ अत्र बाधादिवारकविशेषणस्य प्रयोजनवत्त्वं विप्रतिपत्तावुक्तमनुसंधेयम्॥ सद्वेति॥ पारमार्थिक सत्त्वातिरिक्तं व्यावहारिकं प्रातिभासिकं वा सत्त्वं नास्तीति पक्षे सदित्येव साध्यनिर्देशः। व्यावहारिकसत्त्वादिकमादाय सिद्धसाधनाभावादित्यभिप्रायः॥ अनिषेध्यत्वेनेति॥ पुरोवर्तिनं रजततया जानामीत्याद्यनुव्यवसायरूपप्रमाविषये प्रातिभासिके व्यभिचारवारणाय साक्षात्पदम्। तत्रैव मिथ्यात्वप्रमितेः साक्षाद्विषये व्यभिचारवारणायानिषेध्यत्वेनेति विषयत्वविशेषणम्। इदं रजतमिति ज्ञानं प्रति साक्षाद्विषये रूप्ये व्यभिचारवारणाय प्रमेति। तेन रजताभावस्यानिषेध्यत्वेन रजतं नास्तीति प्रमां प्रति विषये रजते न व्यभिचारः। न चैवं स्वप्रमाविषयत्वमेवास्त्विति वाच्यम्। यथोक्तविशेषणविशेष्यभावे वैयर्थ्याभावात्। अनिषेध्यत्वेन ईश्वरं प्रतीति॥ अपरोक्षत्वस्य ज्ञानत्वाघटितत्वान्न वैयर्थ्यमिति बोध्यम्॥ प्रातिभासिकस्येति॥ ननु सर्वप्रत्ययवेद्यत्वाद्ब्रह्मणः प्रातिभासिकबाधकज्ञानमपि ब्रह्मज्ञानमेव। न च तस्य ब्रह्मज्ञानत्वेऽपि न तत्प्रमात्वमिति वाच्यम्। ब्रह्मांशे तस्यापि प्रमात्वात्। न चोभयसिद्धा या ब्रह्मप्रमा तदन्येति विवक्षितमिति वाच्यम्। ब्रह्मण्यारोपितस्य क्षणिकत्वादेस्तथाप्यबहिर्भावादिति चेन्न। उभयसिद्ध ब्रह्माधिष्ठानकभिन्नत्वे सतीत्यस्यापि विशेषणत्वादिति न कोपि दोषः॥ अन्योन्याश्रयादिति॥ मानांतरागम्यस्य वाक्यार्थस्य वाक्यादुपस्थितौ तत्र तात्पर्यावधारणं, तदवधारणे च

घटत्वाद्यवच्छिन्ननिष्ठ एव। (२०) शुक्तिरूप्यं मिथ्यात्वेन प्रपञ्चान्न भिद्यते, व्यवहारविषयत्वाद्, ब्रह्मवत्। साध्यसत्त्वमत्र त्रेधा – स्वस्यामिथ्यात्वेनोभयोर्मिथ्यात्वेनोभयोरमिथ्यात्वेन वा। तत्रान्तिमपक्षस्यासंभवात् पक्षे साध्यसिद्धिपर्यवसानं मध्यमपक्षेण, दृष्टान्ते तु प्रथमपक्षेणेति विवेकः। (२१) विमतं मिथ्या, मोक्षहेतुज्ञानाविषयत्वे सत्यसदन्यत्वात्, शुक्तिरूप्यवत्। (२२) मोक्षहेतुज्ञानविषयत्वं परमार्थसत्त्वव्यापकम्, परमार्थसत्त्वसमानाधिकरणत्वात्, पारमार्थिकत्वेन श्रुतितात्पर्यविषयत्ववत्। (२३) एतत्पटात्यन्ताभावः, एतत्तन्तुनिष्ठः, एतत्पटानाद्यभावत्वात्, एतत्पटान्योन्याभाववत्। तन्तुनाशजन्यपटनाशस्य कदापि तन्तुवृत्तिता नास्तीति तत्र व्यभिचारवारणायानादिपदम्। यस्य पटस्याश्रयविभागेन नाशस्तदत्यन्ताभावस्य पक्षत्वे त्वनादिपदमनादेयमेव। अत्र चैतत्पटप्रतियोगिकात्यन्ताभावत्वावच्छिन्नस्य पक्षीकरणान्न संबन्धान्तरेणात्यन्ताभावमादायांशतः सिद्धसाधनम्, पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। समवायसम्बन्धावच्छिन्नो व्यधिकरणधर्मानवच्छिन्नश्च यः एतत्पटात्यन्ताभावः, स एव वा पक्षः। तन्तुशब्देन च पटोपादानकारणमुक्तम्। तत्र च प्रागभावस्य सत्त्वान्न तेन व्यभिचारः। कार्यकारणयोरभेदेन सिद्धसाधनादि दूषणानि प्रागेव तत्त्वप्रदीपिकानुमानोपन्यासे निराकृतानि। (२४) यद्वा समवायसम्बन्धावच्छिन्नोऽयमेतत्पटात्यन्ताभावः, एतत्तन्तुनिष्ठः, एतत्पटप्रतियोगिकात्यन्ताभावत्वात्, संबन्धान्तरावच्छिन्नैतत्पटात्यन्ताभाववदिति विशिष्यानुमानम्। (२५) अव्याप्यवृत्तित्वानधिकरणत्वे सत्युक्तपक्षतावच्छेदकवत्, स्वसमानाधिकरणात्यन्ताभावप्रतियोगि, अनात्मत्वात्, संयोगवत्। न च विश्वात्यन्ताभावे व्यभिचारः, तस्याधिकरणस्वरूपत्वे अनात्मत्वहेतोरेवाभावात्। अतिरिक्तत्वे तस्य मिथ्यात्वेनात्यन्ताभावप्रतियोगितया साध्यस्यैव सत्त्वात्। न च – अत्यन्ताभावस्यात्यन्ताभावे तत्प्रतियोगित्वलक्षणमिथ्यात्वासिद्धिरिति वाच्यम्; अभावे अभावप्रतियोगित्वस्य भावगताभावप्रतियोगित्वाविरोधित्वात्, प्रागभावस्यात्यन्ताभाव प्रतियोगित्वेऽपि तत्प्रतियोगित्वस्य घटादौ सर्वसिद्धत्वात्। उपपादितञ्चैतन्मिथ्यात्वमिथ्यात्वे। अत्र चाव्याप्यवृत्तित्वानधिकरणशब्देनैकदेशावच्छेदेनाविद्यमानत्वं पक्षविशेषणं विवक्षितम्। एतेन – स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वोक्तौ बाधः। अवयववृत्तित्वानधिकरणत्वोक्तौ घटादीनामपक्षत्वापत्तिरिति दूषणद्वयमपास्तम्। अनात्मत्वहेतुस्तु जडत्वहेतुव्याख्यानेनैव व्याख्यातः। (२६) अत एव नित्यद्रव्यान्यदव्याप्यवृत्तित्वानधिकरणमुक्तपक्षतावच्छेदकवत्, केवलान्वय्यत्यन्ताभावप्रतियोगि, पदार्थत्वात्, नित्यद्रव्यवदित्यपि साधु। दृष्टान्तश्चायं पररीत्या,

अथ मिथ्यात्वे विशेषानुमानम्

मिथ्यात्वे च विशेषतोऽनुमानानि – (१) ब्रह्मज्ञानेतराबाध्यब्रह्मान्यासत्त्वानधिकरणत्वं पारमार्थिकसत्त्वाधिकरणावृत्ति, ब्रह्मावृत्तित्वात्, शुक्तिरूप्यत्ववत्, परमार्थसद्भेदवच्च। (२) विमतं मिथ्या, ब्रह्मान्यत्वात्, शुक्तिरूप्यवत्। (३) परमार्थसत्त्वं, स्वसमानाधिकरणान्योन्याभावप्रतियोग्यवृत्ति, सदितरावृत्तित्वाद्, ब्रह्मत्ववत्। (४) ब्रह्मत्व मेकत्वं वा सत्त्वव्यापकम्, सत्त्वसमानाधिकरणत्वाद्, असद्वैलक्षण्यवत्। (५) व्याप्य वृत्तिघटादिः, जन्याभावातिरिक्तस्वसमानाधिकरणाभावमात्रप्रतियोगी, अभावप्रति योगित्वाद्, अभिधेयत्ववत्। अभिधेयत्वं हि परमते केवलान्वयित्वादन्योऽन्या भावमात्रप्रतियोगि। स च समानाधिकरण एव। अस्मान्मते तु मिथ्यैवेति, नोभयथापि साध्यवैकल्यम्। (६) अत्यन्ताभावः, प्रतियोग्यवच्छिन्नवृत्तिः, नित्याभावत्वा दन्योऽन्याभाववत्। (७) अत्यन्ताभावत्वं प्रतियोग्यशेषाधिकरणवृत्तिमात्रवृत्ति, प्रतियोग्यवच्छिन्नवृत्तिमात्रवृत्ति वा, नित्याभावमात्रवृत्तित्वाद्, अन्योन्याभावत्ववत्। (८) घटात्यन्ताभावत्वं (स्व)प्रतियोगि जनकाभावसमानाधिकरणवृत्ति, एतत्कपालसमानकालीनैतद्घटप्रतियोगिकाभाववृत्तित्वात्, प्रमेयत्ववत्। (९) एतत्कपालमेतद्घटात्यन्ताभावाधिकरणमाधारत्वात्पटादिवत्। (१०) ब्रह्मत्वं न परमार्थसन्निष्ठान्योऽन्याभावप्रतियोगितावच्छेदकम्, ब्रह्मवृत्तित्वादसद्वैलक्षण्यवत्। (११) पर मार्थसत्प्रतियोगिको भेदो न परमार्थसन्निष्ठः, परमार्थसत्प्रतियोगिकत्वात्, परमार्थसत्त्वावच्छिन्नप्रतियोगिकाभाववत्। (१२) भेदत्वावच्छिन्नं सद्विलक्षणप्रतियोग्यधि करणान्यतरवद्, अभावत्वाच्छुक्तिरूप्यप्रतियोगिकाभाववत्। (१३) परमार्थसन्निष्ठो भेदः, न परमार्थसत्प्रतियोगिकः, परमार्थसदधिकरणत्वात्, शुक्तिरूप्यप्रतियोगिकभेदवत्। (१४) मिथ्यात्वं ब्रह्मतुच्छोभयातिरिक्तत्वव्यापकम्, सकलमिथ्यावृत्तित्वात्, मिथ्यात्वसमानाधि करणात्यन्ताभावाप्रतियोगित्वाद्वा, दृश्यत्ववत्। (१५) दृश्यत्वं परमार्थसदवृत्ति, अभिधेय मात्रवृत्तित्वाच्छुक्तिरूप्यत्ववत्। (१६) दृश्यत्वं परमार्थसद्भिन्नत्वव्याप्यम्, दृश्येतरावृत्ति धर्मत्वात्, प्रातिभासिकत्ववत्। (१७) उभयसिद्धमसद्विलक्षणं मिथ्यात्वासमानाधि करणधर्मानधिकरणम्, आधारत्वाच्छुक्तिरूप्यवत्। (१८) प्रतियोग्यवच्छिन्नो देशः, अत्यन्ताभावाश्रयः, आधारत्वात्कालवत्। (१९) आत्मत्वावच्छिन्नं परमार्थसत्त्वाधि करणप्रतियोगिक भेदत्वावच्छिन्नरहितं परमार्थसत्वात्, परमार्थसत्वावच्छिन्नवत्। परमार्थसति परमार्थसद्भेदाङ्गीकारवादिमतेऽपि स भेदो न परमार्थसत्त्वावच्छिन्ननिष्ठः, किन्तु

सिद्धसाधनम्। न हि देशकालासंबन्धः कदाप्यस्ति । परममुक्तौ तु न देशो न काल इति सुस्थिरं सिद्धसाधनम्।

·५. ब्रह्मान्यद्वैदैकगम्यं धर्मादि, परमार्थसत्, श्रुतितात्पर्यविषयत्वाद्, ब्रह्मवादित्यपि न साधु। परमार्थिकत्वेन श्रुतितात्पर्यविषयत्वस्योपाधित्वात्।

६. साक्षिवेद्यं सुखादि, परमार्थसत्, अनिषेध्यत्वेन दोषाजन्यज्ञानं प्रति साक्षाद्विषयत्वाद्, आत्मवदित्यपि न; शुक्तिरूप्यादिषु व्यभिचारात्। तेषां दोषजन्यवृत्तिविषयत्वेऽपि दोषाजन्यसाक्षिविषयत्वात्। शुद्धस्य वृत्तिविषयत्वानभ्युपगमे दृष्टान्तस्य साधनविकलत्वाच्च। दोषजन्यज्ञानाविषयत्वविवक्षायां चाऽसिद्धो हेतुः। साक्ष्यवच्छेदिकाया अविद्यावृत्तेर्दोषजन्यत्वात्। असद्गोचरशाब्दज्ञानात्मकविकल्पस्य दोषाजन्यत्वेनासति व्यभिचाराच्च। आत्मनो वृत्तिविषयत्वाभ्युपगमे दोषजन्यदेहात्मैक्य भ्रमविषयत्वात् साधनविकलो दृष्टान्तः। तदनभ्युपगमे तु अविषयत्वमात्रस्यैव परमार्थसत्त्वसाधकत्वोपपत्तौ दोषजन्यज्ञानेति विशेषणवैयर्थ्याद्धचाप्यत्वासिद्धिः। तावन्मात्रं च पक्षे स्वरूपासिद्धमित्यन्यत्र विस्तरः।

७. विमतं, परमार्थसत्, स्वविषयज्ञानात्पूर्वभावित्वाद्, आत्मवदित्यपि न। दृष्टसृष्टिपक्षे असिद्धेः। विषमव्याप्तस्यानादित्वस्योपाधित्वाच्च।

८. अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावत्वं, एतद्घट समानकालीनवृत्ति, अन्योन्याभावातिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावमात्र वृत्तित्वात्, एतद्घटप्रागभावत्ववद्, व्यधिकरणधर्मावच्छिन्नाभावपक्षे व्यधिकरणधर्मा नवच्छिन्नेत्यपि विशेषणीयम्। अत्र च स्वसमानाधिकरणः स्वसमानकालीनोयोऽत्यन्ता भावस्तदप्रतियोगित्वलक्षणसत्त्वसिद्धिरित्यपि न साधु। साधनावच्छिन्नसाध्यव्यापकस्यैतद् घटप्रति योगिकजन्यजनकान्यतरमात्रवृत्तित्वस्योपाधित्वात्। न च – पक्षीभूतधर्मस्यात्यन्ता भाववृत्तित्वसन्देहे साधनाव्यापकत्वसन्देह इति – वाच्यम्, विपक्षवाधकतर्कानवतारदशायां सन्दिग्धोपाधेरपि दूषणत्वसम्भवात्। घटात्यन्ताभावत्वे च व्याभिचारात्। संयोगसंबन्धेन घटवत्यपि भूतले समवाय संबन्धेन घटात्यन्ताभावसत्त्वात् साध्याभाववति तत्र ेतोर्वृत्तेरित्यलमतिविस्तरेण। इत्यद्वैतसिद्धौ विश्वसत्यत्वानुमानभङ्गः।

अत एव – विमता, बन्धनिवृत्तिः, स्वप्रतियोगिविषयविषयकज्ञानाबाध्यानात्म समकालीना, उक्तज्ञानाबाध्यभावरूपानात्मसमानकालीना वा, बन्धनिवृत्तित्वात्; निगडबन्धनिवृत्तिवदित्यपि – निरस्तम्; पक्षदृष्टान्तयोर्बन्धपदार्थस्यैकस्याभावेन स्वरूपासिद्धि साधनवैकल्यान्यतरापातात्। स्वपदे चोक्तः साध्याप्रसिद्धिदोषः। हेतौ च बन्धेतिविशेषणवैयर्थ्यात् व्याप्यत्वासिद्धिः। अप्रयोजकत्वं च कस्याश्चिन्निवृत्तेरनात्मसमान कालीनत्वदर्शनं निवृत्तिमात्रस्य तथात्वसाधने; संसारकालीनाया दुःखनिवृत्तेः समानाधिकरणदुःखप्रागभावकालीनत्वदर्शनमिव दुःखनिवृत्तिमात्रस्य तथात्वसाधने।

नन्वेवं सामान्यानुमानेषु निराकृतेषु विशिष्यानुमानं भविष्यति–

१. आत्मधीः, न स्वविषयविषयकधीबाध्या, धीत्वात् शुक्तिधीवत् – इत्यपि बालभाषितम्; स्वविरोध्यविषयक (प्रत्ययविषयक) त्वस्योपाधित्वात्। अन्धोऽयं रूपज्ञानवानित्यन्धस्य रूपविषयतया कल्पितं यद् ज्ञानं तस्य रूपं नान्धगम्यमिति स्वविषयविषयकप्रत्ययबाध्यत्वदर्शनेन व्यभिचारात्। कल्पितत्वात्तत्र तद्बाधने प्रकृतेऽपि वृत्तेः कल्पितत्वं समम्। धीपदेन चैतन्यमात्रविवक्षायां तु सिद्धसाधनमेव।

२. आत्माधिष्ठानकभ्रमहेतुः, न स्वकार्यभ्रमाधिष्ठानज्ञानबाध्यः, भ्रमहेतुत्वाद्, यदेवं तदेवम्, यथा शुक्त्यधिष्ठानकभ्रमहेतुकाचादी' त्यपि न साधु। व्यावृत्ताकाराधिष्ठानज्ञानानवधित्वस्य स्वकार्यभ्रमाधिष्ठानानारोपितत्वस्य वा उपाधित्वाद्। दूरादिदोषादुपलादौ यत्र चाकचक्यकल्पना तेन चाकचिक्यदोषेण शुक्ताविव रजतकल्पना, तत्राधिष्ठानज्ञानेन चाकचिक्यरूप्ययोरुभयोरपि बाधदर्शनेन व्यभिचाराच्च।

३. ब्रह्मान्यदनादि, परमार्थसत्, अनादित्वात्, ब्रह्मवदित्यपि न भद्रम्। तत्र ध्वंसाप्रतियोगित्वस्योपाधित्वात्।

४. ब्रह्म, देशकालसंबन्धं विना नावतिष्ठते, पदार्थत्वाद्, घटवदित्यपि न। कालसंबन्धं विना नावतिष्ठत इत्यस्य यदा ब्रह्म तदावश्यं कालसंबन्ध इत्येवंरूपा व्याप्तिरर्थः। तथा च सिद्धसाधनम्। न हि यस्मिन् काले ब्रह्म तस्मिन् काले ब्रह्मणः कालसंबन्धो नास्ति। एवं यत्रात्मा तत्र कालसंबन्ध इति दैशिकव्याप्तावपि

एवं च – विमतं, नेश्वरमायाकल्पितं, तं प्रत्यपरोक्षत्वात्, यदेवं तदेवं, यथा चैत्रं प्रत्यपरोक्षो घटो न चैत्रमायाकल्पितः। विमतं, न जीवकल्पितं, तस्मिन् सुषुप्तेऽप्यवस्थितत्वात्, आत्मवत्। न चासिद्धिः, प्रत्यभिज्ञानाद्। अदृष्टादेरभावे पुनरुत्थानायोगाच्च – इत्यपि निरस्तम्। आद्ये ऐन्द्रजालिकं प्रत्यपरोक्षे तन्मायाकल्पिते व्यभिचारात्। मायाविद्ययोरभेदेन देहात्मैक्यभ्रमे व्यभिचाराच्च। द्वितीये त्वसिद्धेः। न च प्रत्यभिज्ञया प्रपञ्चस्य स्थायित्वसिद्धेर्नासिद्धिः। सुषुप्तिकालस्थायित्वासाधकत्वस्य प्रत्यभिज्ञाया दृष्टिसृष्टिसमर्थने वक्ष्यमाणत्वात्, अदृष्टादेः कारणात्मनाऽवस्थितत्वेन पुनरुत्थानसंभवाच्च॥

मिथ्यात्वं आत्मान्यसर्ववृत्ति न, मिथ्यामात्रवृत्तित्वात्, शुक्तिरूप्यत्ववद् इत्यपि न। मिथ्यात्वन्यूनवृत्तित्वस्योपधित्वात्। मिथ्यात्वं च सदसद्विलक्षणत्वं, सद्विलक्षणत्वमात्रं वा। आद्ये सिद्धसाधनम्। तस्यात्मान्यसर्वमध्यपतितासद्वृत्तित्वाभावात्। द्वितीये तु हेतौ मिथ्यापदस्य सदसद्वैलक्षण्यपरत्वे स्वरूपासिद्धिः। सद्वैलक्षण्यरूपे पक्षे तुच्छसाधारणे सदसद्विलक्षणेतरावृत्तित्वरूपहेत्वभावात्। तस्यापि सद्वैलक्षण्यमात्रपरत्वे संदिग्धानैकान्तिकता। साध्याभाववत्यात्मभेदे हेतुसन्देहात्। अप्रयोजकत्वादिकं च पूर्वोक्तं दूषणमनुवर्तत एव।

आत्मा, परमार्थसदन्यः, परमार्थत्वादनात्मवत्। नच कल्पितात्म प्रतियोगिकभेदेनार्थान्तरम्। कल्पितमिथ्यात्वेन मिथ्यात्वानुमानेऽपि सिद्धसाधनापत्तेरित्यपि न। व्यावहारिकपदार्थमादाय सिद्धसाधने अतिप्रसङ्गाभावात्। अनानन्दत्वस्योपाधित्वाच्च।

अथ आत्मा, यावत्स्वरूपमनुवर्तमानानात्मवान्, यावत्स्वरूपमनुवर्तमान भावरूपानात्मवान् वा, स्वज्ञानाबाध्यानात्मवान्, स्वज्ञानाबाध्यभावरूपानात्मवान्वा, पदार्थत्वाद्, भावत्वाद्वा घटादिवद् इति। अत्र पञ्चमप्रकाराविद्यानिवृत्त्यभ्युपगमपक्षे सिद्धसाधनपरिहाराय साध्ययोर्भावरूपपदमनात्मविशेषणमित्यपि मन्दम्। 'यावत्स्वरूपं' इत्यस्य यत्किंचित्स्वरूपपरत्वे सिद्धसाधनाद्। आत्मस्वरूपपरत्वे साध्याप्रसिद्धेः। न हि यावदात्मस्वरूपमनुवर्तमानोऽनात्मा प्रसिद्धोऽस्ति। तथा सत्यनुमानवैयर्थ्यात्। अथ – स्वरूपपदस्य समभिव्याहृतपरत्वाद् व्याप्तिग्रहदशायां दृष्टान्तस्वरूपं पक्षधर्मताग्रहदशायां चात्मस्वरूपमेव प्राप्यत इति न साध्याप्रसिद्धिर्न वा सिद्धसाधनमिति – चेन्न। शब्दस्वभावोपन्यासस्यानुमाने अनुपयोगात्। स्वज्ञानाबाध्येत्यत्र स्वशब्देऽपि तुल्योऽयं दोषः।

अथ विमतं, न सद्विलक्षणम्, असद्विलक्षणत्वादात्मवदिति अनुमानान्तरं भविष्यतीति मतम्। तन्न। प्रातिभासिके शुक्तिरूप्यादौ व्यभिचारात्। न च तत्रासद्विलक्षणत्वहेतुरेव नास्तीति वाच्यम्। असद्विलक्षणत्वाभावे हि अपरोक्षतया प्रतीतिरेव न स्यात्। ननु तर्ह्यसद्विलक्षणत्वे तद्विरुद्धसद्विलक्षणत्वायोगः, तथा च साध्यस्यापि विद्यमानत्वान्न व्यभिचार इति चेन्न। सत्त्वे सर्वजनसिद्धबाधविरोधात्। गजादौ गोवैलक्षण्येऽपि तद्विरुद्धाश्ववैलक्षण्ययोगवत् सद्वैलक्षण्येऽप्यसद्वैलक्षण्ययोगोपपत्तेः प्रथममिथ्यात्व निरुक्तावुक्तत्वात्।

ननु – विमतं, न चैतन्याज्ञानकार्यं, न तत्कार्यधीविषयः, न तत्कार्यसत्त्ववत्, न तज्ज्ञानबाध्यसत्त्ववद्वा, तस्मिन्नपरोक्षेऽप्यनिषेध्यत्वेन साक्षाद्भासमानत्वाद्, यदेवं तदेवम्, यथा घटे अपरोक्षेऽप्यनिषेध्यत्वेन साक्षाद्भासमानः पटो न घटाज्ञानकार्यादिः। विपक्षे च तदापरोक्ष्ये तदज्ञानव्याहतिरेव बाधिका। न चासिद्धिः, अधिष्ठानतया सुखादिसाक्षित्वेन चेदानीमपि चैतन्यापरोक्ष्याद् – इति चेन्न। सामान्याकारेणापरोक्ष्येऽपि शुक्त्यादौ रजतादेरनिषेध्यत्वेन साक्षाद्भासमानतया तत्र व्यभिचारात्। अथ व्यावृत्ताकारेण यस्मिन् भासमाने यदनिषेध्यत्वेन साक्षाद् भासते, न तत्तदज्ञानकार्यादीति व्याप्तिरिति मन्यसे, तर्ह्यसिद्धिः। नहि चैतन्यमिदानीं भ्रमनिवर्तकत्वाभिमतव्यावृत्ताकारापरोक्षप्रतीतिविषयः। तथा सत्यधिष्ठानमेव न स्यात्। यदा तु वेदान्तवाक्यजन्यवृत्तौ व्यावृत्ताकारतया अपरोक्षं तदा अनिषेध्यत्वेन प्रपञ्चे आपरोक्ष्यशङ्काऽपि नास्ति। अतः प्रमाणजन्यासाधारणाकारभानस्यैवाज्ञानविरोधित्वान्नापरोक्षतामात्रेणाज्ञानपराहतिप्रसङ्गः। यत्त्वज्ञानपदेन ज्ञानाभावोक्तौ सिद्धसाधनम्; अनिर्वचनीयाज्ञानोक्तौ च तस्य खपुष्पायमाणत्वेन प्रतियोग्यप्रसिद्धिरिति तत्तुच्छम्। असत्प्रतियोगिकाभावं स्वीकुर्वतः पराभ्युपगममात्रेणैव प्रतियोगिप्रसिद्धिसंभवात्।

ननु – विमतं, नात्मन्यध्यस्तम्; आत्मसाक्षात्कारवत्प्रवृत्तिविषयत्वात्, यदेवं तदेवं, यथा घटसाक्षात्कारवत्प्रवृत्तिविषयो घटो न तत्राध्यस्तः। न चासिद्धिः, ईशजीवन्मुक्तयोरात्मसाक्षात्कारवतोरपि जगद्रक्षणभिक्षाटनादौ प्रवृत्तेः। शङ्खे अध्यस्तमपि पीतत्वं न शङ्खश्वेतत्वसाक्षात्कारवत्प्रवृत्तिविषय इति न तत्र व्यभिचार – इति चेन्न। प्रतिबिम्बे व्यभिचारात्। सहि मुखैक्यसाक्षात्कारवत्प्रवृत्तिविषयो मुखेऽध्यस्तः। तद्व्यतिरेकेणोपलभ्यमानत्वस्योपाधित्वाच्च।

तज्ज्ञानविषयत्वादीनामनाश्रयत्वापत्तेः। प्रमाणबलात् कारणत्वाभ्युपगमस्यात्रापि तुल्यत्वात्। किञ्च स्वरूपाबाध्यस्य विषयाबाध्यत्वदर्शनेन विषयबाधे स्वरूपबाधस्यावश्यकतया स्वप्नादिज्ञानं सदेवेत्यस्य वक्तुमशक्यत्वात्। अनादित्वस्य विषमव्याप्तस्योपाधित्वाच्च। न च अर्थक्रियाकारित्वं प्रति परमार्थत्वस्य ब्रह्मणि प्रयोजकत्वेनावधारणादकारणककार्योत्पत्ति रूपविपक्षबाधकतर्केण हेतोः साध्यव्यापकतया तदव्यापकतयोपाधेः साध्याव्यापकत्वमिति वाच्यम् प्रातिभासिकरज्जुसर्पादौ भयकम्पादिकार्यकारित्वदर्शनेन प्रातिभासिकसाधारणस्य तुच्छव्यावृत्तस्य प्रतीतिकालसत्त्वस्यैवार्थक्रियाकारित्वं प्रति प्रयोजकत्वात्। प्रातिभासिकस्यार्थक्रियाकारित्वानभ्युपगमे सप्रकाराबाध्येति हेतुविशेषणवैयर्थ्यापत्तेः। कस्मिन्नपि देशे कस्मिन्नपि काले केनापि पुरुषेणाबाध्यत्वं हि परमार्थसत्त्वम्। तदपेक्षया प्रतीतिकालसत्त्वस्य लघुत्वाच्च। किञ्च शुद्धस्यार्थक्रियाकारित्वाभावात् साधनविकलत्वम्। उपहितस्य पक्षनिक्षेपात् साध्यविकलत्वम्।

आरोपितमिथ्यत्वकत्वादित्यपि न हेतुः। आरोपितत्वं प्रातिभासिकत्वं चेत्, प्रपञ्चे हेतोरसिद्धिः। तत्सिद्धेः पारमार्थिकसिद्ध्युत्तरकालीनत्वात्। व्यावहारिकत्वं चेत्, शुक्तिरूप्यादौ व्यभिचारः। उभयसाधारण्येऽप्ययमेव दोषः।

कल्पकरहितत्वादित्यपि न हेतुः। असति व्यभिचारात्। यथाश्रुतस्यासिद्धेश्च। ननु नासिद्धिः। शुद्धं हि चैतन्यं न कल्पकम्, अदुष्टत्वात्। नोपहितम्। कल्पित्वादेवान्यथानवस्थानात्। तथा च यावद्विशेषाभावे कल्पकसामान्याभावसिद्धिः इति चेन्न। शुद्धस्याप्यनाद्यविद्योपधानवशेन कल्पकत्वोपपत्तेः। कल्पकत्वं हि कल्पनां प्रत्याश्रयत्वं, विषयत्वं, भासकत्वं वा। तच्च, सर्वं कल्पनासमसत्ताकत्वेन शुद्धत्वाव्याघातकम्। तदुक्तं संक्षेपशारीरके–

'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥'

इति। अस्तु वोपहितस्य कल्पकत्वम्। न चानवस्था। अविद्याध्यासस्याध्यासान्तरानपेक्षत्वात्। स्वपरसाधारणसर्वनिर्वाहकत्वोपपत्तेः। अकल्पितस्य कल्पकत्वादर्शनाच्च। कल्पितप्रति बिम्बविशिष्टादर्शादेरादर्शान्तरे प्रतिबिम्बकल्पकत्वदर्शनाच्च। बिम्बस्य द्वितीयादर्श संमुखत्वाभावेन तत्र कल्पकत्वायोगात्। अन्यथा अतिप्रसङ्गात्। विस्तरेण चैतदग्रे वक्ष्यामः। तदेवं निराकृताः परमार्थसत्त्वे साध्ये षडमी हेतवः। एवमन्येऽपि निराकार्याः।

तस्य पक्षकुक्षिनिक्षिप्तत्वेन निश्चितसाध्यवत्त्वाभावात्। द्वितीये तत्त्वावेदकत्वस्याबाधित विषयत्वरूपत्वेन साध्याविशेषपर्यवसानाद्धेतुग्रहे सिद्धसाधनम्। हेत्वग्रहे तु स्वरूपासिद्धिः। यत्तु – प्रमाविषयत्वमात्रेणैव परमार्थत्वोपपत्तौ विशेषणे व्यर्थे इति। तन्न। पुरोवर्तिनं रजततया जानामीत्याद्यनुव्यवसायरूपप्रमाविषये प्रातिभासिके व्यभिचारवारकत्वात् साक्षात्पदस्य। तत्रैव च मिथ्यात्वप्रमितेः साक्षाद्विषये व्यभिचारवारकत्वाद् अनिषेध्यत्वेनेत्यस्य। न ह्यनुव्यवसायमिथ्यात्वप्रमे न भवतः।

नाप्यनिषेध्यत्वेनेश्वरं प्रति साक्षादपरोक्षत्वं हेतुः। सत्यत्वसिद्धिं विना अनिषेध्यत्वेनेत्यंशस्यासिद्धेः। तथा चान्योन्याश्रयः। न चेश्वरज्ञानविषयस्य प्रपञ्चस्य मिथ्यात्वे तस्य भ्रान्तत्वप्रसङ्गः। मिथ्याभूतस्य मिथ्यात्वेनैव ग्रहणाद् ऐन्द्रजालिकवद् भ्रान्तत्वायोगात्। अन्यथा सविषयकभ्रमज्ञातृत्वेन भ्रान्तत्वस्य दुर्वारत्वापत्तेः। अथ निषेध्यत्वेन ज्ञाने तत्पालनार्थमीश्वरस्य प्रवृत्तिर्न स्यात् न, ऐन्द्रजालिकप्रवृत्तिवदीश्वरप्रवृत्तेरपि तथाविधत्वात्।

नापि सप्रकारकाबाध्यार्थक्रियाकारित्वं हेतुः। सप्रकारकजाग्रद्बोधाबाध्य स्वप्नजलावगाहनप्रियासङ्गमादिविशेषिताप्रमाणीभूतज्ञानस्यार्थक्रियाकारित्वदर्शनेन तद्विषये तत्र व्यभिचारात्। अथ तत्र ज्ञानमेव सुखादिजनकं, तच्चाबाध्यमेवेति मतम्। तदसत्। ज्ञानमात्रस्य हि तादृक्सुखाजनकत्वेन किंचिद्विशेषितस्यैव तथात्वं वाच्यम्। ज्ञाने च विशेषो नार्थातिरिक्तः। तदुक्तम् – 'अर्थेनैव विशेषो हि निराकारतया धियाम्–' इति। अर्थेनित्यर्थ एवेत्यर्थः। तथा च मिथ्याभूतविशेषितस्य जनकत्वाभ्युपगमे मिथ्याभूतस्यापि जनकत्वाद्व्यभिचार एव। तथा चोक्तं शास्त्रदीपिकायां बौद्धं प्रति – 'अथ सुखज्ञानमेवार्थक्रिया तच्चाव्यभिचार्येव। न हि क्वचिदप्यसति सुखे सुखज्ञानमस्तीत्याशङ्क्य च सत्यमेतन्न तु तेन पूर्वज्ञानप्रामाण्याध्यवसानं युक्तम्। अप्रमाणेनापि प्रियासङ्गमविज्ञानेन स्वप्नावस्थायां सुखदर्शनाद्' इति। ननु विषयविशेषोपलक्षितस्यैव ज्ञानस्य सुखजनकत्वमस्तु। तत् कुतो विषयस्य जनकत्वमिति चेन्न। स्वरूपाणामननुगततया ज्ञानत्वादेश्चातिप्रसक्ततया अनुगतानतिप्रसक्तोपलक्ष्यतावच्छेदकाभावादुपलक्षणत्वासम्भवात्। ननु विशेषणत्वमप्यसम्भवि। अनागतज्ञानजन्ये तत्कालाविद्यमानस्य विषयस्य पूर्वभावित्वरूपजनकत्वासम्भवाद् इति चेन्न। स्वव्यापारजन्ये व्यापारिणोऽसतो जनकत्ववत् स्वज्ञानजन्येऽप्यसतो जनकत्वसम्भवात्। अतीतानागतावस्थस्यासत्त्वधर्माश्रयत्वेनैवाभ्युपगमात्। अन्यथा ध्वंसप्रागभावप्रतियोगित्व

प्रातिभासिकत्वविशेषणं व्यर्थम्। अनधिकरणत्वे सत्यसत्त्वानधिकरणत्वमात्रस्यैव परमार्थसत्त्वसाधकत्वोपपत्तेः। शुद्धमेव हि ब्रह्म दृष्टान्तत्वेनाभ्युपेयम्। धर्मवतो दृष्टान्तत्वे साध्यवैकल्यापत्तेः। साध्यंतु बाधाभावरूपत्वादधिकरणस्वरूपमेव न धर्मः। धर्म्यतिरिक्ताभावानभ्युपगमस्योक्तत्वात्। तथा च चक्षुस्तैजसत्वानुमाने रूपादिषु मध्य इत्यस्यासिद्धिवारकस्यापि व्याप्तिग्रहौपयिकत्वेन व्यभिचारवारकविशेषणतुल्यतया यद्यपि सार्थकत्वम्। व्यभिचारवारकस्यापि सार्थकत्वे व्याप्तिग्रहौपयिकत्वमात्रस्य तन्त्रत्वात्। तथापि 'क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात्' इत्यत्र शरीरस्येव व्याप्तिग्रहानुपयोगित्वेन प्रातिभासिकत्वस्य वैयर्थ्यमेव। आकाशादावजन्यत्वकर्तृजन्यत्वाभावयोरिव निर्धर्मके ब्रह्मण्यनधिकरणत्वपरमार्थसत्त्वयोर्व्याप्तिग्रहोपपत्तेः। तथा चैकामसिद्धिं परिहरतो द्वितीयासिद्ध्यापत्तिः। स्वरूपासिद्धिपरिहारार्थं विशेषणं प्रक्षिपतो व्याप्यत्वासिद्धिरित्यर्थः। व्याप्तावनुपयोगस्य दर्शितत्वात्। किं च व्यावहारिकसत्त्वमात्रेणैवोपपत्तेः, उक्तहेतोर प्रयोजकत्वम्। परमार्थसत्त्वे बाधानुपपत्तिलक्षणप्रतिकूलतर्कपराघाताच्च।

ननु ब्रह्मण्यसत्प्रातिभासिकव्यावृत्तिरूपं हेतुं प्रति व्यावर्तकतया प्रयोजकत्वेन परमार्थसत्त्वं क्लृप्तम्। अपृथिवीव्यावृत्तिं प्रति पृथिवीत्वस्येवासद्व्यावृत्तिं प्रति तद्विरुद्धसत्त्वस्यैव प्रयोजकत्वात्। ज्ञानत्वानन्दत्वादिकं तु न तत्प्रयोजकम्। साक्षादसत्त्वाविरोधित्वात्। प्रपञ्चे तदभावाच्च। तथा च ब्रह्मविश्वसाधारणं परमार्थसत्त्वमेव तत्प्रयोजकम्। न च विश्वमिथ्यात्वात् परमार्थसत्त्वमपि न विश्वसाधारणं, ज्ञानत्वानन्दत्वादिवदिति वाच्यम्, अन्योऽन्याश्रयापत्तेः इति चेद्, अयुक्तमेतत्। न हि प्रातिभासिकासतोरेका व्यावृत्तिरुभयी वा समव्याप्ता, येनैकप्रयोजकप्रयोज्या भवेत्। किंतु प्रातिभासिकव्यावृत्तिप्रयोजकं ब्रह्मविश्वासत्साधारणमेव वक्तव्यम्। असत्यपि प्रातिभासिकत्वाभावात्। एवमसद्व्यावृत्तावपि प्रयोजकं ब्रह्मविश्वप्रातिभासिकसाधारणमेव वक्तव्यम्। प्रातिभासिकेऽप्यसत्त्वाभावात्। तथा च तत्प्रयोजकद्वयसमावेशादेव ब्रह्मण्युभयव्यावृत्त्युपपत्तौ नीलत्वघटत्वरूपावच्छेदकद्वय समावेशोपपन्ननीलघटत्ववन्नातिरिक्तप्रयोजककल्पनायामस्ति किंचिन्मानमिति कृतबुद्धयः एव विदांकुर्वन्तु। नित्यत्वं चोपाधिः। तुच्छप्रातिभासिकयोर्नित्यत्वव्यतिरेके साध्यव्यतिरेकदर्शनात्।

अत एवानिषेध्यत्वेन प्रमां प्रति साक्षाद्विषयत्वादित्यपि न हेतुः। किं च प्रमात्वं तद्वति तत्प्रकारकत्वं तत्त्वावेदकत्वं वा? आद्ये दृष्टान्तस्य साधनवैकल्यम्। न हि परमार्थसतः शुद्धस्य ब्रह्मणः सप्रकारकज्ञानविषयत्वम्। न च धर्मवतो दृष्टान्ततेत्युक्तम्।

अद्वैतसिद्धिः

स्यादेतत्– अध्यक्षस्य भिन्नविषयत्वादिना बाधाक्षमत्वेऽपि अनुमानमेव बाधकं स्यात्। तथा हि – ब्रह्मप्रमान्येन, वेदान्ततात्पर्यप्रमितिजन्यज्ञानान्येन वा, मोक्षहेतुज्ञानान्येन वा अबाध्यत्वे सत्यसत्त्वानधिकरणत्वे सति ब्रह्मान्यद्, विमतं वा सत् परमार्थसद्वा, प्रातिभासिकत्वानधिकरणत्वे सत्यसद्विलक्षणत्वाद्, ब्रह्मवद्, व्यतिरेकेण शशशृङ्गवद्वेति चेन्न। त्वन्मते प्रातिभासिकस्याप्यसत्त्वेन व्यर्थविशेषणतया व्याप्यत्वासिद्धेः। अस्मन्मतमाश्रित्य हेतूकरणे च देहात्मैक्ये ब्रह्मज्ञानेतराबाध्ये व्यभिचारात्। न हि प्रातिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वादन्यत्। त्वया हि प्रातिभासिकस्य शुक्तिरूप्यादेरपक्षत्वाय सत्यन्तमाद्यं विशेषणत्रयं विकल्पेन पक्षे प्रक्षिप्तम्। तत्र ब्रह्म वृत्तिव्याप्यमिति मतेनाद्यम्। तदनभ्युपगमे तु शाब्दप्रमां प्रति तात्पर्यप्रमा हेतुरिति मतेन द्वितीयम्। अन्योन्याश्रयत्वात् न सा हेतुरिति मतेन तृतीयम्। तथा च प्रातिभासिकस्यासत्त्वानधिकरणत्वमङ्गीकृतमेव। अन्यथा तुच्छवारकासत्त्वानधिकरणत्वविशेषणेनैव तद्व्यावृत्तावेतावत्प्रयासवैयर्थ्यापत्तेः। एवं च देहात्मैक्यस्यापि पक्षत्वे बाध एव। बाधे च सति पक्षविशेषणस्य पक्षत्वस्यासिद्ध्याऽऽश्रयासिद्धिरपि। अत एव स्वबाधकाभिमताऽबाध्यदोषजन्यज्ञानाविषयत्वे सतीति वा, स्वबाधकाभिमताबाध्यबाधाविषयत्वे सतीति वा, स्वसमानाधिकरणकर्मप्रागभाव समानकालीनज्ञानावाध्यत्वे सतीति वा विशेषणप्रक्षेपेऽपि न निस्तारः। देहात्मैक्ये पूर्वोक्तदोषाव्यावृत्तेरेव।

यत्तु– प्रथमे साध्ये व्यावहारिकसत्त्वमादाय सिद्धसाधनम्। द्वितीयसाध्ये तु वादिनः परमार्थत्वविशेषणं व्यर्थम्। व्यावर्त्याप्रसिद्धेः इति। तन्न। व्यावहारिकसत्त्वं सत्त्वेन व्यवहारमात्रमिति मतेन प्रथमप्रयोगात्। अनुगतं पृथग्व्यावहारिकं सत्त्वमिति तु मते द्वितीयः प्रयोगः। न च विशेषणं व्यर्थम्। परार्थानुमाने परं प्रति सिद्धसाधनोद्धारस्य तत्प्रयोजनत्वात्। ईश्वरानुमाने जन्यकृत्यजन्यानीत्यत्र मीमांसकं प्रति जन्यत्वस्येव विश्वपरमार्थत्ववादिनं प्रति परमार्थत्वस्य प्रमेयत्वादिवदुपरञ्जकत्वेन विशेषणत्वोपपत्तेश्च। तस्मात् पूर्वोक्त एव दोषः। हेतौ च व्यर्थविशेषणत्वदोषः। यद्यपि मतद्वयेऽपि अप्रामाणिकस्यापि निषेधप्रतियोगित्वाभ्युपगमादारोपितत्वेनोभयसंमतत्वरूपस्य वा, प्रतिभासमात्रशरीरत्वरूपस्य वा, प्रतिभासिकत्वस्य प्रसिद्धिरस्ति। अन्यथा सिद्धान्तेऽपि मिथ्यात्वानुमाने प्रातिभासिकान्यस्यैव पक्षीकर्तव्यत्वाद्दोषसाम्यं स्यात्। तथापि हेतौ

वा, पदार्थत्वाद्भावत्वाद्वा घटवत्। विमता बंधनिवृत्तिः, स्वप्रतियोगिविषयविषयक ज्ञानाबाध्यानात्मसमानकालीना, उक्तज्ञानाबाध्यभावरूपानात्मसमानकालीना वा, बंधनिवृत्तित्वात्, निगडबंधनिवृत्तिवदित्यादीनि द्रष्टव्यानि।

विशिष्यानात्मसत्यत्वे तु, आत्मधीः न स्वविषयविषयकधीबाध्या, धीत्वात्, शुक्तिधीवत्। आत्माधिष्ठानकभ्रमहेतुः न स्वकार्यभ्रमाधिष्ठानज्ञानबाध्यः, भ्रमक (हेतु)त्वाद्, यदेवं तदेवं, यथा शुक्त्यधिष्ठानकभ्रमहेतुः काचादिः। शुक्त्यज्ञानमपि पक्षतुल्यम्। ब्रह्मान्यदनादि परमार्थसद्, अनादित्वाद् ब्रह्मवत्। दोषजन्यज्ञानात्पूर्वं सतोऽप्यनादेरनाद्यध्यस्तत्वे ब्रह्मापि अनाद्यनन्ताध्यस्तं स्यात्। ब्रह्म कालाद्यसंबद्धं नावतिष्ठते, पदार्थत्वाद्, घटवत्। ब्रह्मान्यद्वेदैकगम्यं धर्मादि, परमार्थसत्, श्रुतितात्पर्यविषयत्वाद्, ब्रह्मवत्। साक्षिवेद्यं सुखादि परमार्थसद्, अनिषेध्यत्वेन दोषाजन्यज्ञानं प्रति साक्षाद्विषयत्वाद्, आत्मवत्। विमतं परमार्थसत्, स्वविषयकसाक्षात्कारात्पूर्वभावित्वाद् आत्मवत्। न चाऽसिद्धिः, त्वन्मतेऽपि प्रतिकर्मव्यवस्थार्थं स्वविषयसाक्षात्कारात्पूर्वं घटादेर्भावात्। अन्योऽन्याभा (वातिरि) वव्यतिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावत्वम्, एतद्घटसमानकालीनावृत्ति, अन्योन्याभावव्यतिरिक्तैतद्घटसमानाधिकरणैतद्घटप्रतियोगिकाभावमात्रवृत्तित्वाद्, एतद्घटप्रतियोगिकप्रागभावत्ववदित्याद्यूह्यम्।

व्यधिकरणधर्मावच्छिन्नाभावपक्षे व्यधिकरणधर्मानवच्छिन्नेति विशेषणीयम्। अनेन च स्वसमानाधिकरणः स्वसमानकालीनः अन्योन्याभावव्यतिरिक्तो योऽभावः तदप्रतियोगित्वरूपसत्त्वसिद्धिः। अत्र चानुकूलतर्का वक्ष्यन्त इति नोपाध्या भाससाम्यादिशंका। तथा च–

असत्प्रातीतिकान्यत्वात् प्रमाणविषयत्वतः ।
अर्थक्रियाकारितादेर्विश्वं सत्यमिति स्थितम् ॥

॥ इति विश्वमिथ्यात्वस्यानुमानबाधः ॥

जगन्मिथ्यात्वस्यारोपितत्वात्। अत्र च हेत्वंतर्गतं मिथ्यात्वं सत्त्वाभावोऽभिप्रेत इति नासत्यनैकांत्यम्। न च षष्ठेऽसिद्धिः। चिन्मात्रस्याद्रष्टृत्वेनान्यस्य च कल्पितत्वेनाकल्पकत्वात्। अत्र चाकल्पितत्वस्य साध्यत्वान्नासति व्यभिचारः। विपक्षे व्याघातः। कल्पकं बिना कल्पनाऽयोगात्।

किं च, विमतं न सद्विलक्षणम्, असद्विलक्षणत्वाद्, आत्मवत्। न च शुक्तिरूप्ये व्यभिचारः। तस्यासद्विलक्षणत्वेन तद्विरुद्धसद्विलक्षणत्वायोगात्। विमतं न चैतन्याज्ञानकार्यं, न चैतन्याज्ञानकार्यधीविषयो वा, न चैतन्याज्ञानकार्यसत्त्ववद्वा, चैतन्यज्ञानबाध्यं वा, चैतन्यज्ञानाबाध्यसत्त्ववद्वा, तस्मिन्नपरोक्षेऽपि अनिषेध्यत्वेन साक्षाद्भासमानात्वाद्, यदेवं तदेवम्, यथा पटेऽपरोक्षेऽप्युक्तभानवान् घटो न पटाज्ञानकार्यादिः। चैतन्यं चाधिष्ठानतया सुखादिसाक्षित्वेन चेदानीमप्यपरोक्षमिति नासिद्धिः। शंखत्वादावपरोक्षेऽपि भासमानं पीतत्वादिकं न तदज्ञानकार्यं, किं तु श्वेतत्वाज्ञानकार्यादिकमिति न व्यभिचारः। अत्राप्यापरोक्ष्यस्याज्ञानविरोधित्वात् सति तस्मिन्नज्ञानांगीकारे व्याघातः। एवमुत्तरत्रापि विपक्षे बाधकमुन्नेयम्।

विमतं नात्मन्यध्यस्तम्, तत्तत्त्वसाक्षात्कारवत्प्रवृत्तिविषयत्वाद्, यदेवं तदेवं, यथा पटसाक्षात्कारवत्प्रवृत्तिविषयो घटो न तत्राध्यस्तः। न चासिद्धिः। ईशजीवन्मुक्तयोरात्मसाक्षात्कारवतोरपि जगद्रक्षणभिक्षाटनशिष्यबोधनादौ प्रवृत्तेः। शंखेऽध्यस्तमपि पीतत्वं न शंखतत्त्वसाक्षात्कारवत्प्रवृत्तिविषय इति न व्यभिचारः। विमतं नेश्वरमायाकल्कितम्, तं प्रत्यपरोक्षत्वात्, यदेवं तदेवं, यथा चैत्रं प्रत्यपरोक्षो घटो न चैत्रमायाकल्पितः। विमतं न जीवकल्पितम्, तस्मिन्सुषुप्तेऽप्यवस्थितत्वात्, आत्मवत्। न चाऽसिद्धिः। प्रत्यभिज्ञानात्। तस्यात्यंताप्रामाण्ये च क्षणिकवादापातात्। बाधकाभावाच्च। अदृष्टादेरप्यभावेन पुनरुद्बोधायोगाच्च।

सामान्येनात्मसत्यत्वे, मिथ्यात्वं नात्मान्यसर्ववृत्ति, मिथ्यामात्रवृत्तित्वात्, शुक्तिरूप्यत्ववत्। आत्मा परमार्थसदन्यः, परमार्थसद्भावान्यो वा, पदार्थत्वात्, अनात्मवत्। आत्मा यावत्स्वरूपमनुवर्तमानानात्मवान्, यावत्स्वरूपमनुवर्तमान भावरूपानात्मवान् वा, स्वज्ञानाबाध्यानात्मवान् वा, स्वज्ञानाबाध्यभावरूपानात्मवान्

विशेषणस्यासिद्धिवारकत्वं दोषः। "शरीराजन्यत्वाद्," "अनभ्यासदशायां सांशयिकत्वाद्," "विमतं सौरभविशेषवद्धूमरहितम्, चन्दनप्रभववह्निरहितत्वाद्," "विमतं निर्धूमम् आर्द्रेन्धनप्रभववह्निरहितत्वाद्" इत्यादावसिद्धिवारकविशेषणास्यापि स्वीकारात्। किं चानधिकरणत्वस्य दृष्टान्तेऽप्यभावेन प्रातिभासिकत्वस्य चक्षुस्तैजसत्वानुमाने "रूपादीनां मध्ये" इत्यस्येव व्याप्तिग्रहौपयिकत्वाद् व्यभिचारवारकेऽपि तदौपयिकत्वस्यैव तन्त्रत्वान्न दोषः। यत्किञ्चिदनधिकरणत्वस्य प्रातीतिकेऽपि सत्त्वाद्व्यभिचारवारकमेवेदं विशेषणमिति केचित्। न च व्यावहारिकसत्त्वेनाप्याद्यहेतोरुपपत्त्याऽप्रयोजकता। ब्रह्मण्यसत्प्रातिभासिक व्यावृत्तिरूपहेतुं प्रति व्यावर्तकतया प्रयोजकत्वेन कृत्स्नपरमार्थसत्त्वत्यागस्य विश्वमिथ्यात्वसिद्धिं विनाऽयोगेनान्योन्याश्रयात्। अन्यथाऽतिप्रसंगात्। न च ब्रह्माणि ज्ञानत्वानंदत्वादिरूपब्रह्मत्वमेव तत्प्रयोजकम्। अपृथिवीव्यावृत्तिं प्रति पृथिवीत्वस्येवासद्व्यावृत्तिं प्रति तद्विरुद्धसत्त्वस्यैव प्रयोजकत्वेन कृत्स्नत्वात्। अन्यथा सत्यज्ञानादिवाक्ये ज्ञानपदेनैवानृतव्यावृत्तिसिद्धौ सत्यपदवैयर्थ्यं स्यात्। प्रपंचेऽसत्प्रातीतिकव्यावृत्तौ सत्यामपि ब्रह्मत्वाभावाच्च। न च द्वितीये तत्त्वावेदकप्रमोक्तावसिद्धिः, अतत्त्वावेदकप्रमोक्तौ त्वप्रयोजकतेति वाच्यम्। प्रामाण्यातत्त्वावेदकत्वयोर्व्याहतत्वात्। प्रत्यक्षस्य तत्त्वावेदकतोक्तेश्च। अनुमानादेश्च परेणापि मिथ्यात्वादौ प्रमाणीकरणात्। विपक्षे व्याघातात्। विषयबाधे प्रामाण्यायोगात्। नापि तृतीयेऽसिद्धिः। त्वयाऽपीशस्य जगत्कर्तृत्वशास्त्रयोनित्वादिना कुलालपाणिन्यादिवदनिषेध्यत्वेन तद्दृष्टत्वोक्तेः। अन्यथेशस्य तत्पालनादौ प्रवृत्तिर्न स्यात्। विपक्षे चेशस्य भ्रांतिः स्यात्। सा च श्रुत्यादिविरुद्धा। चतुर्थेऽर्थक्रियायाः सत्यायाः पक्षे सपक्षे च परं प्रत्यसिद्ध्या व्याप्तिपक्षधर्मतयोरयोगाद्, असत्यायाश्चैन्द्रजालिकादौ व्यभिचारात्सप्रकारकाबाध्यत्वेन सा विशेषिता। व्यभिचारस्त्वस्य निरसिष्यते। सत्यस्य साक्षिणोऽज्ञानादिसाधकत्वान्न दृष्टान्तः साधनहीनः। असद्वा व्यतिरेकदृष्टान्तः। असाधारण्यस्यागृह्यमाणविशेषत्वावस्थायामेव दोषत्वात्। विपक्षे व्याघातः। ब्रह्मणि हेतुत्वं प्रति अकारणासदादिव्यावृतस्य परमार्थसत्त्वस्यैव प्रयोजकत्वेन कृत्स्नत्वात्। न च पंचमेऽसिद्धिः। परमतेऽ

साक्षाद्विषयत्वाद्, अनिषेध्यत्वेनेश्वरं प्रति साक्षादपरोक्षत्वात्, सप्रकारका बाध्यार्थक्रियाकारित्वाद्, आरोपितमिथ्यात्वकत्वात्, कल्पकरहितत्वाच्च, आत्मवत्। प्रातिभासिकस्य रूप्यादेः बाधकं हि ज्ञानं ब्रह्मप्रमान्यद्, वेदान्त तात्पर्यप्रमाजन्यज्ञानान्यत्, मोक्षहेतुज्ञानान्यच्चेति तस्यापक्षत्वाय पक्षे सतीत्यन्तं वैकल्पिकमाद्यं विशेषणत्रयम्। तत्रापि ब्रह्म वृत्तिव्याप्यमिति मतेनाऽऽद्यं विशेषणम्। ब्रह्म वृत्तिव्याप्यमपि नेति मतेन तु द्वितीयतृतीये। तत्रापि शाब्दप्रमां प्रति तात्पर्यप्रमाहेतुरिति मतेन द्वितीयम्। अन्योन्याश्रयान्न हेतुरिति मतेन तृतीयम्।

यद्वा एतद्विशेषणस्थाने स्वबाधकाभिमताऽवाध्यदोषजन्यज्ञानाविषयत्वे सतीति वा, स्वबाधकाभिमताबाध्यबाधाविषयत्वे सतीति वा, समानाधिकरणकर्म प्रागभावसमानकालीनज्ञानाबाध्यत्वे सतीति वा विशेषणं देयम्। प्रातिभासिक विषयकज्ञानहेतुर्दोषः तद्बाधश्च न प्रातिभासिकबाधकबाध्यौ। तथा चरमसाक्षात्कारानन्तरं समानाधिकरणकर्मान्तरानुदय इव शुक्तिसाक्षात्कारानन्तरं तदनुदयाभावात् प्रातिभासिकं समानाधिकरणकर्मप्रागभावसमानकालीनज्ञानबाध्यमिति तद्व्यवच्छेदः। व्यावहारिकसत्त्वं सत्त्वेन व्यवहारमात्रमिति मतानुसारेणाद्यं साध्यम्। अर्थगतं मायिकं सत्त्वमिति मतानुसारेण द्वितीयम्। न च वादिनः पारमार्थिकत्वविशेषणं व्यर्थं, व्यावर्त्याप्रसिद्धेरिति युक्तम्। सत्त्वेन धीमात्ररूपस्या पारमार्थिकसत्त्वस्य मन्मतेऽपि सत्त्वात्। अनिर्वाच्यलक्षणे सदसत्त्वानधिकरणत्वे सतीति विशेषणव्यावर्त्यस्य सदसत्त्वस्येव परप्रसिद्धत्वमात्रेण व्यावर्त्यत्वोपपत्तेश्च। परार्थानुमाने परं प्रति सिद्धसाधनोद्धारस्यापि मत्प्रयोजनत्वाच्च। जन्यकृत्यजन्यानीत्यत्र मीमांसकं प्रति जन्यत्वस्येवेहाऽपि मां प्रति परमार्थत्वस्य प्रमेयत्वादिवदुपरञ्जकत्वेन विशेषणत्वोपपत्तेश्च। अन्यथा प्रपञ्चः परमार्थसद्विविक्त इति त्वदीयप्रयोगेऽपि परमार्थत्वविशेषणं मां प्रति व्यर्थं स्यात्। न चाऽद्यहेतौ वादिनं प्रति प्रातिभासिकत्वाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धिः। मतद्वयेऽप्यप्रामाणिकस्यापि निषेधप्रतियोगित्वात्। आरोपितत्वेनोभयसम्मतत्वरूपस्य वा, प्रतिभासमात्र शरीरत्वरूपस्य वा तस्य प्रसिद्धेश्च। अन्यथा त्वन्मतेऽपि मिथ्यात्वानुमाने प्रातिभासिकान्यस्यैव पक्षीकर्तव्यत्वाद्दोषसाम्यम्। न चाद्यहेतौ प्रातिभासिकत्व

यत्र यस्य येन सत्ता गृहीता तद्देशकालप्रकारावच्छेदेन तत्र तस्य तेन सत्त्वसिद्धावपि न त्रैकालिकनिषेधाप्रतियोगित्वसिद्धिः। ''नेहनाने'' तिभाविबाधबाधितत्वादित्यत आह॥ कालांतरेति॥ अन्येति॥ यत्कालाद्यवच्छेदेन तेन स्वार्थो गृहीतस्तत्कालभिन्नकालावच्छेदेन तन्निषेधतीत्यर्थः॥ आद्यइति॥ अनेन बाधकप्रमाणेन रूप्यज्ञानवत् यस्मिन्काले यत्रार्थो गृहीतस्तस्मिन्नेव काले तत्रार्थापहारादित्यर्थः॥ अंत्यइति॥ यस्मिन्कालादौ योऽर्थो गृहीतः पूर्वज्ञानेन तस्मिन्नेव कालादौ बाधकज्ञानेन सोऽर्थोऽप्रतिषिद्धएव। अन्यदैवतु निषिद्धइति अनित्यत्वमेव स्यादित्यर्थः। कथमित्यत आह॥ नहीति॥ अन्यथेति॥ वर्तमानमात्रग्राहित्वइत्यर्थः। प्रत्यक्षस्य त्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वग्राहित्वाभावेनाप्रामाण्ये घटादेःप्रातिभासिकवैधर्म्यरूपव्यावहारिकत्वं न सिद्धचेत्। नचार्थक्रियाकारित्वेन तद्वैधर्म्यसिद्धिरिति वाच्यं। तस्यैव मम तात्विकत्वसाधकत्वात्। तथाच प्रत्यक्षस्य त्रिकालाबाध्यत्वरूपतात्विकसत्ताग्राहित्वं सिद्धचतीत्याह॥ किंचेति॥ येन विशेषेण वैधर्म्यं व्यावहारिकत्वं। कारिकार्थमाह॥ अस्तिहीति॥ विशेषः अर्थक्रियाकारित्वरूपः। तात्विकं त्रिकालाबाध्यं॥ तहींति॥ तथाच तदपि तात्विकं न स्यादित्यर्थः। कथमिदमापादनमित्यतस्तयोरविशेषादित्याह॥ नहि घट इति॥ दोषाभावादिनिश्चयस्य रूप्यमिथ्यात्वप्रत्यक्षइव विश्वसत्यत्वप्रत्यक्षेप्यविशेषादित्यर्थः।

ननु अक्षसिद्धत्वाविशेषाद्रूप्यमिथ्यात्वं तात्विकं नस्यादित्यत्रेष्टापत्तिः यतः रूप्यधर्मो मिथ्यात्वमपि मिथ्यैव। धर्मिणएव मिथ्यात्वे धर्मस्यापि मिथ्यात्वात्। नहिं वंध्यासुतस्य श्यामत्वाभावे गौरत्वं सेत्स्यतीत्यत आह॥ रूप्येति॥ कालांतरबाध्यत्वे मिथ्यात्वइत्यर्थः॥ तात्विकं स्यादिति॥ मिथ्याभूतमिथ्यात्वकत्वाद्रूप्यं सत्यं स्यादित्यर्थः। तथाच परस्परात्यंताभावरूपयोरेवान्यतरनिषेधेऽन्यतरस्य सत्यत्वं गौरश्यामरूपयोस्तु नपरस्परविरहरूपत्वं अतो नैकाभावेऽपरस्य सत्यत्वमितिभावः। किंच प्रत्यक्षस्यातत्वावेदकत्वं तावदंगीकृतं। तत्रातत्त्वं नामान्यस्यान्यात्मत्वं तथाच वस्तुतो व्यावहारिकस्य प्रपंचस्य त्रिकालाबाध्यत्वरूपपारमार्थिकत्वरूपं यदन्यात्मत्वाख्यमतत्वं तदावेदकत्वे खलु प्रत्यक्षस्यातत्वावेदकत्वं सिद्धचति। एवंच त्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वावगाहिताया आवश्यकत्वेन नवर्तमानमात्रग्राहित्वनियमइत्याह॥ किंचेति॥ अतत्वं तत्वं पारमार्थिकं तद्भिन्नमतत्वं व्यावहारिकं। इदमेव व्यावहारिकत्वं जगतस्तत्त्वं वास्तवं रूपं तन्मत इत्यर्थः। तथैव व्यावहारिकतयैव। यद्यथास्ति तत्तथैव गृह्णतस्तत्वावेदकत्वमेव स्यात्। त्वदभिमतमतत्वावेदकत्वं न सिद्धचेदित्यर्थः। त्रिकालाबाध्यत्वरूपपारमार्थिकसत्त्वग्राहित्वमनुभवसिद्धंचेत्याह। अनुभूयतेचेति॥ प्रत्यक्षबाधमुपसंहरति॥ तस्मादिति॥ प्रत्यक्षस्यपारमार्थिकसत्त्वग्राहित्वविवरणं॥

२९. अथ विश्वमिथ्यात्वस्यानुमानबाधः

अनुमानबाधिताश्च दृश्यत्वादयः। तथा हि – ब्रह्मप्रमान्येन वा वेदान्ततात्पर्यप्रमाजन्यज्ञानान्येन वा, मोक्षहेतुज्ञानान्येन वा अबाध्यत्वे सति असत्त्वानधिकरणत्वे सति ब्रह्मान्यद्विमतं वा, सद्वा, पारमार्थिकसद्वा, प्रातिभासिकत्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वाद्, अनिषेध्यत्वेन प्रमां प्रति

न्यायामृतप्रकाशः

पूर्वं प्रत्यक्षमप्रमाणमेव उत प्रमाणमपि कालत्रयाबाध्यत्वरूपसत्त्वग्रहाक्षममिति द्वौ विकल्पावुक्तौ तत्राद्यस्त्रेधा विकल्प्य निराकृतः। संप्रति द्वितीयमनूद्य निराकरोति॥ नापीति॥ प्रत्यक्षस्य वर्तमानमात्रग्राहित्वात् रसग्रहणादौ चक्षुषइव त्रिकालाबाध्यत्वरूपसत्यताग्रहणेऽक्षमत्वादित्यर्थः॥ तद्धीति॥ अबाध्यत्वरूपं सत्यत्वमित्यर्थः। सत्त्वं विद्यमानत्वं। तदभावात् कालत्रयेपि सत्त्वरूपाबाध्यत्वाभावादित्यर्थः॥ कदाचित्सत्त्वइति॥ वर्तमानकालीने सत्त्वइत्यर्थः॥ स्वकालइति॥ ननु कथमत्र विरोधः नहि वर्तमानकालीनं सत्त्वं कालत्रयवृत्तिसत्ताप्रतिषेधाभावरूपमिति चेत् उच्यते। अनुमानग्राह्यं यत्कालत्रयवृत्ति सत्त्वप्रतिषेधरूपमिथ्यात्वं तदभावव्याप्यभूतैककालीनसत्त्वावगाहित्वेन विरोधोऽत्राभिप्रेत इत्याहुः। तन्न। वह्निरनुष्ण इत्यत्रापि कालत्रये औष्ण्याभावस्य साध्यत्वात्प्रत्यक्षेणच वर्तमानकालएव औष्ण्यग्रहणात् त्रैकालिका नौष्ण्याभावव्याप्यभूतैककालीनौष्ण्यग्रहणात्साक्षात्साध्याभावावगाहित्वेन बाधकत्वं सर्वसंमतं न स्यादिति। गुरुचरणास्तु प्रतिपन्नोपाधौ त्रैकालिकसत्तानिषेधइत्यत्र देशकालयोरपि न निषेध्यकोटौ प्रवेशः किंत्वधिकरणकोटावेव तथाच सर्वदेशे कालत्रयेच या सत्ता तत्प्रतिषेधो विवक्षित स्तथाच वर्तमानकालेस्ति तां सत्तां गृह्णन्साक्षात्कारः कालत्रये सत्ताप्रतिषेधमात्ररूपबाध्यत्वं निरुंधानोऽत्यबाध्यतां गृह्णात्येव। तथाच साक्षाद्ग्राह्याभावावगाहित्वेनैव विरोधइति। यथोक्तं भक्तिपादीयसुधायां ''तत्सत्ताप्रतिषेधमात्ररूपबाधस्य तत्सत्ताग्राहिणा प्रत्यक्षेण विरोधावश्यं भावादि''ति। एतच्च तट्टिप्पण्यां गुरुचरणैर्निपुणतरमुपपादितमनुसंधेयं। किंच प्रत्यक्षं स्वविषयस्य वास्तवाबाध्यत्वग्राहि प्रमाणत्वात् वेदवत्। नचवेदे शब्दत्वादिकमेव स्वविषयाबाध्यत्वे प्रयोजकं नतु तज्जन्यज्ञानप्रामाण्यमिति वाच्यं। मद्वाक्यविषयः सर्वकालसंबंधी भाविबाधकशून्यश्चेत्यनाप्तवाक्ये व्यभिचारेण शब्दत्वाद्युपाधेः समव्याप्त्यभावात्। ततश्चज्ञानप्रामाण्यमेव विषयाबाध्यत्वे तंत्रमित्यंगीकार्यमित्याह॥ वेदेपीति॥ उक्तानुमानदृष्टांतभूते वेदेपीत्यर्थः। उक्तप्रकारयुक्तानाप्तवाक्येत्येवपाठः। उक्तप्रकारत्वयुक्तेति पाठे शब्दत्वस्य सिद्धत्वात् तदनभिप्रेतमिति मंतव्यं। ततः किमित्यत आह॥ तच्चेति॥

ननु ज्ञानग्राहकेण साक्षिणा प्रामाण्यस्य ग्राह्यत्वं कुत इत्यत आह॥ प्रामाण्यस्येति॥ स्वतस्त्वादिति॥ ज्ञानग्राहकग्राह्यत्वस्यैव स्वतस्त्वादित्यर्थः। ननु घटादिज्ञाने कश्चिद्दोषो बाधो वा भविष्यतीति न विषयाबाध्यत्वगर्भं प्रामाण्यमित्यत आह॥ नचेति॥ कालतो मर्यादित्यन्वयः। मर्यादाव्यवच्छेदः तात्कालिकत्वमितियावत्। श्रुतिप्रत्यक्षयोः सत्यत्वग्रहणेप्यवांतरवैषम्यमस्तीत्याह। इयांस्त्विति॥ वर्तमानेति॥ ''तत्सत्य''मित्यादिश्रुतौ वर्तमानकालोपस्थापकपदाभावादितिभावः। तत्र ब्रह्मणि। सा सत्ता तदनवच्छिन्ना वर्तमानकालानवच्छिन्ना॥ प्रत्यक्षेणेति॥ प्रत्यक्षज्ञाने वर्तमानकालस्यावश्यं विषयता प्रतीयते। इदमिदानीमितिहि प्रत्यक्षानुभवः। अत एव ''कालःषडिंद्रियवेद्य'' इति प्रवादइत्यर्थः। तत्र घटादौ सा सत्ता तदवच्छिन्ना वर्तमानकालावच्छिन्ना। प्रामाण्यप्रयुक्ताऽबाध्यत्वं वेदाक्षोभयसाधारणमित्याह॥ यद्देशेति॥ उभयेति॥ वेदप्रत्यक्षोभयेत्यर्थः॥ नित्यत्वादीति॥ सर्वकालावच्छिन्नसत्तासंबंधरूपनित्यत्वाद्यसिद्धावपीत्यर्थः॥ त्रैकालिकेति॥ तद्व्याप्यावगाहित्व इति केचित्। उक्तरीत्या कालस्य अधिकरणकोटावेव प्रवेशेन निषेध्यकोटावप्रवेशात्सत्ताग्राहित्वेन कालत्रये यस्सत्यताप्रतिषेधस्तदप्रतियोगित्वरूपाबाध्यत्वग्राहित्वं साक्षादस्त्येवेति गुरुचरणाः। ननु यद्देशकालप्रकारावच्छेदेन

नेति व्याहतम्। यत् प्रमाणं तत् प्रमाणमेव सर्वदा। यदप्रमाणं तत् सर्वदाऽप्रमाणमेवेति व्याप्तेरिति भावः। नन्वेवं ब्रह्मसत्त्वविषयकश्रौतज्ञान इव घटादिसत्त्वविषयकप्रत्यक्षज्ञानेऽपि प्रामाण्यं साक्षिसिद्धं चेत् ब्रह्मघटयोः सत्त्वाविशेषः स्यादित्यत आह-इयांस्तु भेद इति। अविशेषः किं देशकालानवच्छिन्नत्वेन, उताबाध्यत्वेन? नाद्य इत्याह - तत्सत्यमिति। एवं च श्रुतेस्तथा सामर्थ्यात् तद्गृहीता सत्ता देशाद्यनवच्छिन्ना। प्रत्यक्षस्यातीतकालादिग्रहणे सामर्थ्याभावात् तद्गृहीता वर्तमानमात्रकालावच्छिन्नेति विशेषादिति भावः। द्वितीयस्वीकारमुखेन प्रत्यक्षस्य वर्तमान सत्त्वग्राहित्वेऽपि उक्तमिथ्यात्व प्रतिबन्धकत्वमिति प्रमेयमुपसंहरति-यद्देशेति। ननु कालान्तरादिबाधकसंभवात् कथमत्यबाध्यत्वसिद्धिरपीत्यत आह - कालान्तरादिस्थमिति। आद्य इति। तत्प्रामाण्यस्य पूर्वमेव साधितत्वादिति भावः।

एतावता ग्रन्थकलापेन प्रत्यक्षस्य वर्तमानमात्रसत्त्वग्राहकत्वं स्वीकृत्य तावताऽपि मिथ्यात्वानुमितिप्रतिबन्धः संभवतीत्युक्तम्। इदानीं कालत्रयाबाध्यत्वमपि साक्षिणा स्वविषयस्य सुखादेः साक्षात्, घटादेश्च प्रामाण्यग्रहणद्वारा गृह्यते। प्रामाण्यस्य विषयाबाध्यत्वघटितत्वात्। ततश्च कालत्रयाबाध्यत्वग्राहाक्षमत्वं नेत्याह – किंचेति। किंच बाह्यप्रत्यक्षस्यापि न वर्तमानमात्रग्राहकत्वनियमः। केवलस्य तथात्वेऽपि सहकारिसमवहितस्य प्रत्यभिज्ञाव्याप्ति प्रत्यक्षादाविवातीतादिग्राहकत्व संभवात्। तथाच बाह्यप्रत्यक्षादिनाऽप्यत्यबाध्यत्वं सिध्यतीत्येवं हृदि निधायाऽह - त्यक्तव्यं चेति। अन्यथेति। प्रत्यक्षस्य वर्तमानमात्रग्राहकत्वाङ्गीकार इत्यर्थः। इदमपि विस्तरेण तत्रैवोक्तं द्रष्टव्यम्। प्रकारान्तरेण घटादेः तात्विकत्वं साधयितुमाह - किं चेति। न च मम ब्रह्मज्ञानबाध्यत्वेनैव प्रातिभासिकवैधर्म्यं सिध्यतीति वाच्यम्। ब्रह्मण्यारोपितक्षणिकत्वादौ ब्रह्मज्ञानबाध्यत्वेऽपि प्रातिभासिकवैधर्म्याभावात्। नाप्यर्थक्रियाकारित्वेन प्रातिभासिकवैधर्म्यसिद्धिरिति वाच्यम्। तेनैव तात्विकत्वस्य सिद्धत्वात्। न च दृष्टान्ताभावः। ब्रह्मण एव दृष्टान्तत्वोपपत्तेः। न च तत्रार्थक्रियाकारित्वं नेति वाच्यम्। मन्मते तस्य स्वतः, त्वन्मते परतस्तदुपपत्तेः। न च प्रत्यक्षविशेषेण मम प्रातिभासिकवैधर्म्यसिद्धिरिति वाच्यम्। प्रत्यक्षे विशेषः किं जातिरूप उपाधिरूपो वा। नाद्यः। तस्यासिद्धेः। तेनैव तात्विकत्वस्यापि सिद्ध्यापत्तेश्च। न द्वितीयः। तस्यानिर्वचनात्। न च व्यावहारिक प्रामाण्यमेवोपाधिरिति वाच्यम्। व्यावहारिकपदेन बाध्यत्वविवक्षायां शुक्तिरूप्यप्रत्यक्षेऽपि तस्य सत्त्वेन तेनापि तद्विषयस्य व्यावहारिकत्वापत्तेः। अथाबाध्यत्वं विवक्षितं तर्हि तेनैव तात्विकत्वापत्तेः। अथ प्रत्यक्षं सहकारिवशात् प्रातिभासिकवैधर्म्यं गृह्णातीति यदि, तर्हि तदेव तादृशमत्यबाध्यत्वं गृह्णीयादिति दिक्। ननु प्रत्यक्षसिद्धं सत्त्वं न तात्विकं, प्रत्यक्षसिद्धत्वादेवेत्यत आह - किं चेति। ननु रूप्यमिथ्यात्वमपि तात्विकमेव। तस्य कालान्तराबाध्यत्वादित्यत आह - रूप्यमिथ्यात्वस्येति। यथा चैतत् तथोक्तमधस्तात्। पारमार्थिकसत्त्वस्य प्रत्यक्षाविषयत्वे बाधकमाह-किं चेति। न चाप्रसक्तस्यैव वा परोक्षप्रसक्तस्यैव वा प्रतिषेधोऽस्विति वाच्यम्। परार्थेन शब्देन पराप्रसक्तनिषेधे वैयर्थ्यापत्तेरित्युक्तत्वात्। परोक्षप्रसक्तेश्च प्रागेव दूषितत्वाच्च। प्रत्यक्षस्य पारमार्थिकसत्त्वाविषयत्वे बाधकान्तरमाह – किञ्चेति। तत्रैवानुभवविरोधमाह - अनुभूयते चेति। तस्मात् प्रत्यक्षं पारमार्थिकसत्त्वग्राहीति तद्बाधिता दृश्यत्वादय इत्युपसंहरति तस्मादिति। इति प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वम्।

वदन् प्रष्टव्यः, किमिदमात्यन्तिकाबाध्यत्वम्? त्रिकाले सत्त्वम्, किं वा त्रिकाले यदसत्त्वं तदभावो वा? नाद्य इत्याह-तद्धीति। द्वितीयं स्वीकृत्याह-किन्त्विति। ननु कदाचित् सत्त्वे गृहीते कथं कालत्रयासत्त्वाभावग्रहः? न हि कदाचित् सत्त्वमेव कालत्रयासत्त्वाभावः। तथा सत्याकाशादेः कालत्रयासत्त्वाभावाधिकरणत्वं न स्यात्। कदाचिन्मात्रसत्त्वाभावादिति गृहीत एवेत्युक्तिरनुपपन्नेति चेन्न। भावानवबोधात्। कदाचित्सत्त्वे गृहीते कालत्रयासत्त्वाभावो गृहीत एवेत्युक्तेरयमर्थः – कालत्रयासत्त्वाभावग्रहस्य यत् कार्यं मिथ्यात्वानुमितिप्रतिबन्धरुपं तत् कदाचित्सत्त्वग्रहोऽपि शक्नोति कर्तुमिति। न हि मिथ्यात्वमपि यदा कदाचिदसत्त्वम्। किं नाम, त्रिकालेऽसत्त्वम्। तथाच यत्कालावच्छेदेन सत्त्वं गृहीतं तत्कालावच्छेदेन तदभावग्रहणमनुमानेन विरुद्धम् इति साधूक्तं गृहीत एवेति। अत एवाह-मिथ्यात्वाभावसिद्धिरिति। कदाचित्सत्त्वस्य मिथ्यात्वाभावव्याप्तत्वादिति भावः। तदेतत्स्ववचनस्याभिप्रायमाविष्करोति - स्वकाल इति। वर्त मानमात्रास्तित्वग्राहकः साक्षात्कारो मिथ्यात्वानुमितिं प्रतिबध्नन् अत्यबाध्यतां कालत्रयासत्त्वाभावं गृह्णाति। अनुमानविधयेति शेषः। तथाच प्रत्यक्षस्य साक्षात् कालत्रयासत्त्वाभावग्राहकत्वाभावेऽपि कदाचित् सत्त्वमात्रग्राहकत्वात् बाधकत्वोपपत्तिरिति भावः। ननु सत्त्वसाक्षात्कारस्य विषयात्यबाध्यत्वसाधकत्वे रजतास्तित्वसाक्षात्कारस्यापि तथात्वं स्यादविशेषात्। न चावधृतप्रामाण्यस्य तथात्वम्। तस्य वेदेऽप्यभावेन तद्विषयस्याबाध्यत्वं न स्यात्। किन्तु तदन्यत् शब्दत्वादिकमेव तद्विषयाबाध्यत्वे प्रयोजकं वक्तव्यम्। प्रत्यक्षे च तदभावान्न तस्याबाध्यत्वसाधकत्वमपीत्यत आह - वेदेऽपीति। तथाच वेदे प्रयोजकान्तरासंभवेन ज्ञानप्रामाण्यमेव स्वीकर्तव्यम्। तस्य चोक्तप्रत्यक्षे सत्त्वात् तस्य विषयाबाध्यत्वसाधकत्वं युक्तम्। रजतास्तित्वसाक्षात्कारस्य च तथात्वाभावान्न तथात्वमिति भावः। प्रयोजकान्तराभावमेवोपपादयति – न तु शब्दत्वं वेत्यादिना। शब्दत्वस्य प्रामाण्यप्रयोजकत्वस्य "न हि प्रत्यक्ष शब्दत्वकृतं वैषम्यमीक्ष्यते" इत्यत्र शून्यमेव तत्वमिति शब्देऽपि तस्य सत्त्वेन तस्यापि प्रामाण्यापत्त्या दूषितत्वात् स्फुटतरदूषणेन परानभिप्रेतत्वाद्वा एतद्दूषणविषयत्वेऽपि उत्तरप्रकारत्रयमेव दूषयति - उक्तप्रकारत्रययुक्तेति। यद्वा अस्मत्प्रत्यक्षस्येवाद्वैतज्ञानस्यापि भाविबाधाभावग्राह्यमत्वेन तस्य प्रामाण्यप्रयोजकत्वस्य परानभिप्रेतत्वात् बहिरेव दूषयित्वा आद्यप्रकारत्रयमेव दूषयति - उक्तप्रकारेति।

ननु तथापि न प्रत्यक्षज्ञानस्य विषयात्यबाध्यत्वसाधकत्वम्। तत्र प्रामाण्यग्राहकाभावेन प्रामाण्यानिश्चयादित्यतो यदेव तव श्रौतज्ञाने प्रामाण्यग्राहकं तदेव ममापीति भावेनाह - तत्रेति। ननु ज्ञानग्राहिणा ज्ञानमेव गृह्येत। कुतस्तत्प्रामाण्यमपीत्यत आह - प्रामाण्यस्येति। तथा सामर्थ्यादिति भावः। नन्वेवं रूप्यज्ञानग्राहिणापि साक्षिणा तत्प्रामाण्यमपि गृह्यतामविशेषादित्यत आह - न चेति। तथाच स्वयं प्रामाण्यग्रहणे समर्थोऽपि बाधदोषनिश्चयेन प्रतिबद्धत्वादसमर्थस्तत्प्रामाण्यग्रहणे साक्षी। स्वयं गतिसमर्थोऽपि गजो गोक्षुरकादिना प्रतिबद्धोऽसमर्थो गताविव। अप्रतिबद्धस्यैव च प्रामाण्यग्राहकत्वाङ्गीकारात्। प्रकृते च प्रतिबन्धाभावात् अद्वैतज्ञान इव प्रत्यक्षे प्रामाण्यं गृह्णातीति भावः। उक्तमर्थमाचार्यवचसा द्रढयति-तदुक्तमिति। ते मते यदि प्रामाण्ये स्वतस्त्वं तर्हि विश्वसत्ता कथं न स्यात्? बाधकाभावेन साक्षिणा तद्ग्रहणात् स्यादेव। ननु तावत्कालपर्यन्तं प्रामाण्यं ममापीष्टमेवेत्यत आह - प्रामाण्यस्य चेति। प्रामाण्यस्य कालतो मर्यादा किंचित् काले प्रामाण्यं, पश्चात् प्रामाण्यं

तस्मिन्कालादौ बाधकज्ञानेन सोऽर्थो प्रतिषिद्ध एव। अन्यदा निषिद्ध इत्यनित्यत्वमेव स्यादित्यर्थः। वेदेऽपि हि विषयस्याबाध्यत्वे ज्ञानप्रामाण्यमेव तंत्रम्। न तु शब्दत्वादयश्चत्वारः प्रकाराः। आद्यानां त्रयाणामनाप्तवाक्यसाधारण्यात्। चतुर्थस्तु प्रत्यक्ष इव शब्देऽप्यसंभवीत्युक्तम्। यदि कश्चिद्वैयात्याद्ब्रूयात् शब्देऽस्त्येव भाविबाधाभावग्रहणं प्रामाण्यग्रहणद्वारेति तर्हि प्रत्यक्षेऽप्यस्ति प्रामाण्यग्रहणद्वारा भाविबाधाभावग्रहणमित्याह॥ किं चानागतेति॥ त्यक्तव्यं चेति॥ घटात्यंताभावस्य कालत्रयसंबंधग्रहं विना घटादिमिथ्यात्वग्रहो न संभवतीत्यर्थः। कालत्रयसंसृष्टो योऽत्यंताभावस्तत्प्रतियोगित्वरूपमिथ्यात्वाभावस्त्वेककाले प्रतियोगिसत्तामात्रग्रहेऽपि सुग्रह इति दर्शयति परेणैवेत्येवकारेण॥ प्रतिभासिकेति॥ प्रत्यक्षस्याप्रामाण्ये घटादेः प्रातिभासिकवैधर्म्यासिद्ध्या तत्प्रामाण्यं त्वयाऽप्यभ्युपेयमित्यर्थः॥ यद्यक्षसिद्धमिति॥ दोषाभावादिनिश्चयस्य रूप्यमिथ्यात्वप्रत्यक्ष इव विश्वसत्यत्वप्रत्यक्षेऽप्यविशेषादित्यर्थः। ननु रूप्यधर्मो मिथ्यात्वमपि मम मते मिथ्यैव। धर्मिण एव मिथ्यात्वे धर्मस्यापि मिथ्यात्वात्। न हि वंध्यासुते श्यामरूपं नास्तीत्येतावता गौररूपं सेत्स्यतीत्यत आह – रूप्यमिथ्यात्वस्येति॥ परस्परात्यंताभावरूपयोरन्यतरनिषेधे अन्यतरसत्यत्वम् गौरश्यामरूपयोस्तु न परस्परविरहरूपत्वम्। अतो नैकाभावे अपरस्य सत्वमित्यर्थः। न च वृद्धिमिच्छत इत्यनेन पौनरुक्त्यम्। तत्र नेदं रजतमित्यस्य बाध्यत्वे रजतस्य मिथ्यात्वं न सिध्यतीत्युक्तम्। अत्र तु प्रत्यक्षस्य पारमार्थिकसत्यत्वाग्राहकत्वे रूप्यमिथ्यात्वस्य पारमार्थिकत्वं न सिध्यतीत्युच्यत इति भेदः॥ पारमार्थिकेति॥ न च मिथ्यात्वश्रुतेरप्रसक्तप्रतिषेधापात इत्यनेन पुनरुक्तिः। तत्र प्रत्यक्षानुमानयोर्व्यावहारिकपारमार्थिकप्रतियोगितदभावविषयत्वेन कालात्ययापदिष्टव्यवस्थोक्तौ श्रुतेरप्रसक्तप्रतिषेधतोक्तिः। इह तु प्रत्यक्षस्य तात्विकसत्त्वाविषयत्वे सोच्यत इति भेदः। प्रत्यक्षबाधमुपसंहरति॥ तस्मादिति॥

व्यासाद्रिसूततर्काब्धुपूरैः पक्षयुगंयुजि॥
न्यायामृततरंगिण्यां सत्सत्त्वेऽपि क्षमाऽक्षधीः॥

प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वम्॥

न्यायामृतकण्टकोद्धारः

नन्वस्तु प्रत्यक्षस्य प्रामाण्यम्। तथापि तस्य कालत्रयाबाध्यत्वग्रहाक्षमत्वात् आत्यन्तिकाबाध्यत्वं न तद्विषय इति द्वितीयं पक्षमाशङ्क्य निषेधति-नापीति। आत्यन्तिकाबाध्यत्वं न प्रत्यक्षविषय इति

तदत्यंताभावसंबंधाभावस्य ग्रहणात्। प्रतियोग्यधिकरणसंसर्गाभावस्यैवाधिकरणेऽत्यंता भावसंबंधरूपतया अधिकरणे प्रतियोगिसंसर्गस्यात्यंताभावसंबंधाभावरूपत्वादिति युक्तमुत्पश्यामः। सत्त्वे विद्यमानत्वसंसर्गे। सत्त्वग्राहिणा विद्यमानत्वसंसर्गग्राहिणा। अस्तितां विद्यमानतासंबंधम्। प्रतिषेधं निरुंधानः अत्यंताभावसंबंधाभावं विषयीकुर्वन्। ननु घटादिसाक्षात्कारो न स्वार्थस्य घटादेर्विद्यमानतां गृह्णाति। घटादिज्ञाने प्रामाण्य संशयस्यानुभवसिद्धत्वात्। अन्यथा स्वार्थसत्त्वनिश्चयस्य स्वस्यैव स्वप्रामाण्यसंशयविरोधि त्वात्तदनुपपत्तिप्रसंगादित्यत आह – वेदेऽपि हीति॥ घटादिज्ञाने अर्थसत्त्वगर्भप्रामाण्यस्य घटादिज्ञानानंतरमेव साक्षिणा ग्रहणाच्छ्रौतज्ञान इव प्रत्यक्षेऽप्यर्थसत्त्वसिद्धिरित्यर्थः॥ उक्तप्रकारत्रयेति॥ चतुर्थस्तु वेदेऽप्यसंभवी। अपदार्थतयाऽवाक्यार्थतया च भाविबाधाभावस्य श्रौतज्ञानाविषयत्वात्। नन्वेवं प्रामाण्यग्रहेऽनुभूयमानस्तत्संशयोऽनुपपन्नः स्यादित्यत आह – प्रामाण्यस्येति॥ स्वतस्त्वाद्दोषाभावे सति ज्ञानग्राहकग्राह्यत्वात्। तथा च संशयस्थले दोषसत्त्वेन प्रामाण्याग्रहात्संशय उपपद्यत इत्यर्थः। ननु घटादिज्ञानेऽपि कश्चिद्दोषो भविष्यतीत्यत आह – न च रूप्यादीति॥ घटादिज्ञान इति वाक्यशेषः। प्रत्युत योग्यानुपलब्ध्या दोषाभाव एव निश्चित इति भावः। ननु गृह्यत एव प्रामाण्यं मम मतेऽपि ज्ञानग्राहकेण। परं तु चरमबाधावधीत्याशंकामनुव्याख्यानवचनेन परिहरति – तदुक्तमिति॥ कालतो मर्यादा व्यवहारे प्रामाण्यं परमार्थतो नेत्येवंरूपा। श्रुतिप्रत्यक्षयोः सत्त्वग्रहणे अवांतरवैषम्यमाह॥ इयांस्त्विति॥ वर्तमानेति॥ तत्सत्यमित्यादिश्रुतौ वर्तमानकालोपस्थापकपदाभावादित्यर्थः॥ प्रत्यक्षेणेति॥ प्रत्यक्षज्ञाने वर्तमानकालस्यावश्यं विषयता। इदमिदानीमेवमिति हि प्रत्यक्षानुभवः। अत एव कालस्य षडिंद्रियवेद्यतामाहुः। तच्चोपनयाद्वाऽन्यथा वेति प्रकारमात्रे विवादः। जागराद्यनुभवेऽपीदंताभासत एव। विशिष्टानुभवस्य विशेषणज्ञानजन्यत्वानभ्युपगमात्। अनुभवस्य वा जागराद्यत्वमसिद्धमिति भावः॥ नित्यत्वाद्यसिद्धावपीति॥ कालानवच्छिन्नसत्तासंबंधरूप नित्यत्वाद्यसिद्धावपीत्यर्थः। प्रागभावप्रध्वंसाभावाप्रतियोगित्वरूपनित्यत्वस्य तत्सत्यमिति श्रुतितोऽप्यसिद्धेः।

ननु यद्देशकालप्रकारावच्छेदेन यत्र यस्य येन सत्ता गृहीता तद्देशकालप्रकारावच्छेदेन तत्र तस्य तेन सत्त्वसिद्धावपि न त्रैकालिकनिषधाप्रतियोगित्वसिद्धिः। नेह नानेति भाविबाधबाधितत्वात्। न चैतावताऽन्यतराप्रामाण्यम्। पूर्वोत्तरकालव्यवस्थयोभयोपपत्तेरित्यत आह – कालांतरादिस्थमपीति॥ आद्य इति॥ रूप्यज्ञानवद्यस्मिन्काले यत्रार्थो गृहीतस्तस्मिन्नेव काले तत्रैवार्थापहारादित्यर्थः॥ अंत्य इति॥ यस्मिन्कालादौ योऽर्थो गृहीतः पूर्वज्ञानेन

यद्यऽक्षसिद्धं विश्वस्य सत्यत्वं नैव तात्त्विकम् ।
तर्ह्यक्षसिद्धं रूप्यादिमिथ्यात्वं तात्त्विकं कथम् ॥

न हि घटस्सन्, रूप्यं मिथ्येति प्रत्यक्षयोर्मात्रयापि विशेषोऽनुभूयते । रूप्यमिथ्यात्वस्य कालान्तरबाध्यत्वे च रूप्यं तात्त्विकं स्यात्। किं च–

पारमार्थिकसत्यत्वं न चेत् प्रत्यक्षगोचरः।
तन्निषेधश्रुतीनां स्याद्प्रसक्तनिषधता॥

किं च–

अतत्त्वतात्त्विकत्वेन प्रपंचं नावभासयेत् ।
अक्षं यदि तदा तस्याऽतत्त्वावेदकता कथम् ॥

न हि व्यावहारिकं तथैव गृह्णद् अतत्त्वावेदकं भवति, किं तु पारमार्थिकत्वेन। अनुभूयते च जगति लौकिकानां पारमार्थिकत्वधीः। तस्मात्प्रत्यक्षस्य प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावग्राहित्वात्तद्बाधिता दृश्यत्वादयः। इति प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वम्।

न्यायामृततरङ्गिणी

पूर्वं किं प्रत्यक्षमप्रमाणमेवोत प्रमाणमपि त्रिकालाबाध्यत्वरूपसत्त्वग्रहाक्षममिति द्वौ विकल्पावुक्तौ। तत्राद्यस्त्रेधा विकल्प्य निराकृतः। संप्रति द्वितीयं निराकरोति – नापीति॥ प्रत्यक्षस्य वर्तमानमात्रग्राहित्वाद्रासग्रहादौ चक्षुष इव सत्त्वग्रहेऽक्षमत्वादित्यर्थः॥ तद्धीति॥ अबाध्यत्वरूपसत्यत्वमित्यर्थः। सत्त्वं विद्यमानता॥ किं त्विति॥ सर्वकालावच्छेदेन सर्वाधिकरणसंसृष्टव्याप्यवृत्त्यत्यंताभावप्रतियोगिविद्यमानताकत्वरूपं यदसत्वं तदभाव इत्यर्थः। यथाश्रुते असत्वशब्दस्य विद्यमानतात्यंताभावार्थकत्वे कालत्रयवर्तित्वस्य विशेषणस्याव्यावर्तकता। अभावमात्रार्थत्वे तादृशविद्यमानतान्योन्याभावस्य घटादौ सत्यत्वपक्षे सत्त्वात्तदभावासिद्धिरित्यादि शंकावकाशः स्यात्। तार्किकादिसाधारणमिदमुच्यत इति न क्षुद्रोपद्रवः॥ स चेति॥ घटादौ स्वकाले विद्यमानत्वस्य संसर्गे प्रत्यक्षेण गृहीते उधिकरणे तत्काले

वेदेऽपि हि विषयस्याबाध्यत्वे ज्ञानप्रामाण्यमेव तंत्रं न तु शब्दत्वं वा, वर्तमानकालाद्यनवच्छेदेन स्वविषयसत्त्वग्राहित्वं वा, सर्वकालादिसम्बन्धित्वेन स्वविषयसत्त्वग्राहित्वं वा तन्त्रम्। उक्तप्रकारत्रययुक्तानाप्तवाक्यविषयस्यात्यन्ता बाध्यत्वापातात्। तच्च तत्त्वावेदनरूपं प्रामाण्यं श्रौतज्ञानस्येवाक्षजज्ञानस्याऽपि ज्ञानग्राहिणा साक्षिणा गृह्यते। प्रामाण्यस्य स्वतस्त्वात्। न च रूप्यादिज्ञानेष्विव बाधो वा, दोषो वा निश्चितः। येन तदपोद्येत। तदुक्तम्–

यदि स्वतस्त्वं प्रामाण्ये विश्वसत्ता कथं न ते।
प्रामाण्यस्य च मर्यादा कालतो व्याहता भवेत्॥

इयांस्तु भेदः – ''तत्सत्यम्'' इत्यादिश्रुत्या ब्रह्मणो वर्तमानादिकालाद्यनवच्छेदेन सत्ता गृहीतेति तत्र सा तदनच्छिन्नेति। प्रत्यक्षेण तु घटादेस्तदवच्छिन्ना सा गृहीतेति तत्र तदवच्छिन्नेति। यद्देशकालप्रकारावच्छेदेन तु यस्य येन सत्ता गृहीता तदवच्छेदेन तस्याबाध्यत्वं प्रामाण्यप्रयुक्तम् उभयसाधारणमिति प्रमाणेन प्रत्यक्षेण नित्यत्वाद्यसिद्धावपि स्वोपाधौ त्रैकालिकनिषेधाप्रतियोगित्वरूप मात्यन्तिकाबाध्यत्वं सिद्ध्यत्येव। कालान्तरादिस्थमपि हि बाधकं किं यत्कालाद्यवच्छेदेनानेन स्वार्थो गृहीतस्तदवच्छेदेनैव तन्निषेधति? अन्यावच्छेदेन वा? आद्ये कथमस्य प्रामाण्यम्? अन्त्ये त्वनित्यत्वादिकमेव स्यान्न तु मिथ्यात्वम्। किं चानागतकालग्राही साक्षी स्वविषयस्य गगनादेः साक्षात्स्वाविषयस्य घटादेरपि निर्दोषतद्धीप्रामाण्यग्रहणद्वारा भाविबाधाभावं गृह्णात्येव। न हि विषयाबाधमनन्तर्भाव्य प्रामाण्यग्रहणं नाम। त्यक्तव्यं च परेणैव प्रत्यक्षस्य वर्तमानमात्रग्राहित्वम्। अन्यथा रूप्यादेः प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं प्रत्यक्षं न स्यात्। किं च–

प्रातिभासिकवैधर्म्यं तव येन प्रसिध्यति।
घटादेः परमार्थत्वं मम तेनैव सेत्स्यति॥

अस्ति हि त्वन्मतेऽपि घटादेर्व्यावहारिकसत्त्वाय तज्ज्ञाने रूप्यादिधीतो विशेषः। तथा च तेनैव विशेषेण तात्त्विकत्वसिद्धिः । किं च–

अग्नीषोमीयपशुहिंसाव्यतिरिक्तब्राह्मणादिहिंसाया अकर्तव्यत्वरूपस्तदर्थो न सिद्ध्येदित्यप्रामाण्यं स्यादित्यर्थः। इष्टापत्तिं परिहर्तुमाह॥ उक्तंहीति॥ उपसंहरति॥ तस्मादिति॥

भाविबाधकशंकया प्रत्यक्षमात्रस्याप्रामाण्यं न वक्तुं युक्तमित्याह॥ किंचेति॥ अन्यथा तस्याप्रामाण्ये॥ वृद्धिमिच्छतइति॥ शतद्रव्यवतःकुसीदादिना शतद्वयं मे स्यादिति द्रव्याभिवृद्धिमिच्छतो मूलहानिवत् नेदंरजतमिति प्रत्यक्षविरोधे न शुक्तिरूप्यप्रत्यक्षस्याप्रमाणतया तद्विषयस्य मिथ्यात्वात्तद्दृष्टांतेन समस्तस्यापि जगतो मिथ्यात्वं सिषाधयिषितं। अन्यथा नेदं रजतमिति प्रत्यक्षस्याप्रामाण्ये इदं रूप्यमिति प्रत्यक्षस्याप्रामाण्यसाधकाभावेन प्रामाण्यापत्त्या शुक्तिरूप्यादेर्मिथ्यात्वसाधकाभावेन मिथ्यात्वाभावात् दृष्टांताभावान्नविश्वमिथ्यात्वसिद्धिरित्यर्थः। अत्र शुक्तिरूप्यमिथ्यात्वं मूलं विश्वमिथ्यात्वं वृद्धिरितिविवेकः। यद्वा इदानीं त्वया रूप्यप्रत्यक्षदृष्टांतेन सर्वजगत्प्रक्षस्याप्यप्रामाण्यं सिषाधयिषितं तत्र नेदं रजतमित्येकस्य बाधकस्य प्रत्यक्षस्याप्रामाण्ये इदं रजतमिति प्रत्यक्षस्याप्रामाण्यं न सिद्ध्यति। तस्य बाधकप्रमाणकत्वात्। तथाच दृष्टांताभावान्नप्रत्यक्षमात्रस्याऽप्रामाण्यं वक्तुं युक्तमित्यर्थः। अत्र रूप्यप्रत्यक्षाप्रामाण्यं मूलं सर्वजगत्प्रत्यक्षाप्रामाण्यं वृद्धिरिति विवेकः। मूलसंरक्षणार्थं रूप्यादिबाधकप्रत्यक्षस्य प्रमाणत्वेंगीकार्ये घटादिसत्ताग्राहकस्यापि प्रामाण्यं स्यादित्याह॥ तथाचेति॥ नेदंरूप्यमिति प्रत्यक्षस्य प्रामाण्ये सिद्धेसतीत्यर्थः॥ तत्तुल्येति॥ नेदंरूप्यमिति प्रत्यक्षतुल्ययोगक्षेममित्यर्थः॥ सौषुप्तिकानंदानुभवस्येति॥ तद्रूपसाक्षिप्रत्यक्षस्येत्यर्थः। सुखमस्वाप्समित्युत्तरकालीनपरामर्शबलेन आत्मन आनंदरूपत्वं साक्षिणा सुषुप्तौ तात्विकमेवानुभूयत इति स्वीकृतं साक्षिप्रत्यक्षस्यैवाप्रामाण्ये कथमानंदरूपता तात्विकी स्यात् प्रमाणाभावादित्यर्थः। ननु सौषुप्तिकानंदानुभवस्याप्रामाण्येपि आत्मन आनंदरूपता ''विज्ञानमानंदं ब्रह्मे'' त्यादिश्रुत्या सेत्स्यतीत्यतआह॥ आनंदेति॥ अनुभूतेति॥ अप्रमाणभूतसाक्षिसिद्धेत्यर्थः। तत्प्रामाण्यं प्रत्यक्षप्रामाण्यं। ननु नास्माकं श्रुतिस्मृतिविरोधः श्रुतौ तत्त्ववेदकप्रामाण्यस्य प्रत्यक्षेत्वतत्त्ववेदकप्रामाण्यस्य चांगीकारादित्यत आह॥ नचेति॥ कुतोनयुक्तमितिचेत् सकृत्प्रयुक्तशब्दस्यार्थद्वयकल्पनाया बलवत्साधकाधीनत्वात्। प्रत्यक्षेत्वतत्ववेदकप्रामाण्यसाधकानां भाविबाधक शंकादिरूपाणां बाधकानां परिहृतत्वादित्याशयः॥ प्रत्यक्षस्य भाविबाधकशंकाभंगविवरणं॥

२८. अथ प्रत्यक्षस्य पारमार्थिकसत्त्वग्राहित्वविवरणम् ।

नापि प्रत्यक्षं कालत्रयाबाध्यत्वग्रहाक्षममिति द्वितीयः। तद्धि न कालत्रयेऽपि सत्त्वम्। मन्मतेऽप्यनित्यप्रपंचे तदभावात्। किं तु कालत्रयवृत्ति यदसत्त्वं तदभावः। स च कदाचित्सत्त्वे गृहीतेऽपि गृहीत एवेति प्रतिपन्नोपाधौ सत्त्वग्राहिणा प्रत्यक्षेण तदुपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावसिद्धिः।

स्वकाले ह्यस्तितां गृह्णन् साक्षात्कारस्त्रिकालगम्।
प्रतिषेधं निरुंधानो गृह्णात्येवात्यबाध्यताम्॥

स्वाप्नवेदपरीक्षातुल्यत्वादित्याह॥ स्वाप्नस्येत्यादिना॥ नन्वद्वैतश्रुतिपरीक्षायाः स्वाप्नशून्याद्वैतश्रुतिपरीक्षातो वैषम्यमनुभूयतइति चेत् तर्हि स्वाप्नजलप्रत्यक्षे सुखांतपरीक्षायाः सकाशात् जाग्रत्कालीनप्रत्यक्षेपि सुखांतपरीक्षाया वैषम्यमनुभवसिद्धमित्याह॥ स्वाप्नेति॥ अन्यथेति॥ परीक्षायामप्यनाश्वसइत्यर्थः॥ न सिद्ध्येदिति॥ तत्सिद्धिश्चत्वया परीक्षयैव वाच्या तदप्रामाण्ये तन्न सिद्ध्येदित्यर्थः। प्रपंचस्य स्वाप्नाद्विशेषस्येत्यन्वयः। स्वाप्नी स्वाप्नशून्याद्वैतश्रुतिसमाना स्यात्। सिद्धौ प्रपंचस्य स्वाप्नाद्विशेषस्येति वर्तते।

ननु प्रत्यक्षं प्रत्यक्षत्वादेवाप्रमाणं अद्वैतश्रुतिस्तुशब्दत्वादेव प्रमाणमित्युच्यत इत्यत आह॥ नहीति॥ नहीक्षते प्रामाण्यमिति शेषः। ईक्ष्यत इतिपाठमंगीकृत्य प्रामाण्याप्रामाण्यप्रयोजकत्वेन न प्रदर्श्यत इत्यर्थइत्यन्ये। प्रामाण्यं कर्तृ वैषम्यं नेक्षते। नापेक्षत इत्यर्थः। विशेषइत्यनंतरं प्रामाण्ये प्रयोजकतयेतिशेषः। प्रत्यक्षे श्रुतिवत्प्रामाण्यप्रयोजकोऽबाधोस्तीत्युपसंहरति॥ तस्मादिति॥ सप्तमेति॥ शंकामात्रेणापवादे सप्तमो रसःकश्चन स्यादित्यपि शंकास्यादितिभावः॥ स्वव्याघातादिनेति॥ भाविबाधकशंकायामपि भाविबाधकशंकाप्रसरादित्यर्थः॥ उक्तंहीति॥ बाधाभावस्य प्रामाण्यप्रयोजकत्वमित्यर्थः। अर्थेऽत्यंतासत्यपि शब्दस्तावदत्यंतासद्रूप्यादिविषयकं ज्ञानं करोत्येव तत्र विषयाभावात्तज्ज्ञानं बाध्यते। अत्रेति तद्ग्रंथप्रकृतपरामर्शः। तत्र स्वतःप्रामाण्यान्निश्चलामचलां प्रमां करोति। तत्रहेतुरबाधात्त्विति॥ तुल्यमिति॥ औत्सर्गिकप्रामाण्यस्य बलवद्बाधकैकापोद्यत्वेन प्रकृतेतदभावात्प्रत्यक्षस्य प्रामाण्यनिश्चयइत्यर्थः। अतःश्रुतेःप्रमाणत्वमित्यन्वयः। तत्रहेतुरबोधकत्वेनेत्यादि। वस्तुनि वस्तुसद्भावे। श्रुतेरबाधितत्वेन प्रामाण्येऽक्षप्रामाण्यस्य दृष्टांतत्वेनोपादानादित्यर्थः। स्वक्रियादिविरोधतः तत्वज्ञानाय वेदांतश्रवणादिरूपस्वक्रियाविरोधप्रसंगात्। अध्यक्षे श्रुताविव भाविबाधकशंका न युक्ता। स्वक्रियाविरोधे दृष्टांतः॥ अहेत्विति॥ कारणं विनापि कार्यं स्यादिति शंकावत् धूमार्थं वह्निमुपादत्ते तृप्त्यर्थंच भोजनं तत्कारणंच तन्नेति ब्रूते इत्येवं वचनक्रियाया उपादानक्रियया विरोध इत्यर्थः। प्रकृतेचोक्तरीत्या स्वक्रियाविरोध आयातीति न भाविबाधकशंका कार्येत्यर्थः॥ उक्तंचेति॥ भाविबाधकशंकाराहित्यमित्यर्थः। इह जन्मनि केषांचित् केषामपि बाधो नोपलभ्यते। योगिनां भविष्यतीतिचेत्तत्राह॥ योगीति॥ योग्यवस्थायां बाधो भविष्यति वा नवेति वयं न विद्म इत्युपहासः। परःकेवलं स्वपक्षनिष्ठदृष्टिरित्यपहासमुखेनातिप्रसंगं सूचयन् जगत्प्रत्यक्षस्य परीक्षितत्वादबाधनिश्चयो युक्तइत्याह॥ नहीत्यादिना॥ शब्दानुमानाभासयोर्बाधं पश्यन्नपि परीक्षितत्वाद्वेदांततदनुकूलानुमानयोरबाधं निश्चिनोति। रूप्यादिधीप्रामाण्यग्राहिप्रत्यक्षस्य बाधं पश्यन्नपि परीक्षितत्वाद्वेदांतजन्यधीप्रामाण्यग्राहिप्रत्यक्षस्याबाधं निश्चिनोति। पदार्थत्वरूपहेतोर्ब्रह्मणि मिथ्यात्वव्यभिचारं पश्यन्नपि परीक्षितत्वाद्दृश्यत्वहेतोर्मिथ्यात्वाव्यभिचारं निश्चिनोति। स्वैरिण्यास्संभोगकर्तृपुरुषानियमं पश्यन्नपि परीक्षितत्वात् स्वमातुःसंभोगे कर्तृपुरुषनियमं निश्चिनोति। जगत्प्रत्यक्षस्य तु परीक्षितस्याप्य परीक्षितरूप्यादिप्रत्यक्षदृष्टांतमात्रेणाबाधं न निश्चिनोतीति संभवति। परीक्षितप्रत्यक्षेप्यऽनाश्वासेऽपरीक्षित शब्दानुमानाभासादिदृष्टांतमात्रेण परीक्षितवेदांततदनुकूलागमादेरप्यबाधादिनिश्चयो न स्यादिति न काप्युक्तव्यवस्था सिध्येदित्यतिप्रसंगइत्यर्थः। कुतो न सिद्ध्यतीत्यतआह॥ तदवसानत्वादिति॥ परीक्षावसानत्वादित्यर्थः। प्रत्यक्षसिद्धेऽनाश्वासो नास्तीत्येतदनुभवसिद्धमित्याह॥ नहीति॥ भाविबाधकशंकांगीकारे बाधकांतरमाह॥ किंचेति॥ व्यभिचारेति॥ अग्नीषोमीयपशुहिंसायाःकर्तव्यत्वस्य श्रुतत्वाद्भूतत्वस्याहिंस्यत्वेन व्यभिचारदर्शनेनेत्यर्थः। अन्यत्रापि ब्राह्मणहिंसायामपि॥ तदाशंक्येतेति॥ कर्तव्यत्वशंका स्यादित्यर्थः॥ न्यायइति॥

अबाधशंका स्यादित्यर्थः। तथाच वस्तुगत्या अबाधितेपि जगत्प्रत्यक्षे बाधितरूप्यादि प्रत्यक्षदृष्टांतेन यदि बाधशंका क्रियते तर्हि भ्रमबाधितत्वेनाभिमतायां प्रमायां वस्तुगत्याऽबाध्यत्वसत्वेन तद्दृष्टांतेन वस्तुतोऽबाधितेऽबाधितेप्यक्षे लिंगेच बाधशंकास्यादिति प्रातिबंदीग्रहणमिति भावः। अद्वैतलिंगशब्दयोरपि बाधशंका स्यादित्युक्तं। लोके दोषजन्यज्ञानएव बाधदर्शनात् श्रुतेश्चनित्यत्वेन दोषजन्यत्वाभावादित्याशंकते॥ श्रुतिरिति॥ नित्यत्वं स्वरूपासिद्धमित्याह॥ त्वन्मतइति॥

ननु नाद्वैतश्रुतौ दोषबाधयोः शंका तस्याःप्रमाकरणत्वरूपविशेषदर्शनसद्भावादित्यत आह॥ तस्याइति॥ श्रुतेः प्रमाकरणत्वेपि मम तत्ववादिनो जायमानाद्वैते तात्पर्यधीर्भ्रमइति तव शंकया तज्जन्यद्वैतधियः प्रमात्वं न सिध्यति। यथावा ब्रह्ममीमांसायां प्रत्यधिकरणं पूर्वपक्ष्यभिमत श्रुत्यर्थतात्पर्यधीर्भ्रम इति शंकया तज्जन्यधियः प्रमात्वं न सिद्धचति एवमेव श्रुतेःप्रमाकरणत्वेपि पूर्वपक्ष्यभिमतार्थइवतवाद्वैततात्पर्यधीर्भ्रमइति मम शंकया तज्जन्यायास्त्वदीयाद्वैतधियः प्रमात्वासिद्धेरित्यर्थः॥ उपक्रमेति॥ अद्वैतइति शेषः॥ उक्तन्यायेनेति॥ अनेकरूप्ये एवैकरूप्यशंकयेत्यर्थः। दोषजन्यत्वज्ञानरूपकारणाभावाच्च न भाविबाधकशंकेत्याह॥ किंचेति॥ कृत्नदोषाणामतिदूरत्वादीनां। अत्र जगत्सत्यताग्राहिप्रत्यक्षे। विनिश्चितः परीक्षयेति शेषः। अन्यस्य अकृत्नस्य। प्रत्यक्षे दूरादिदोषाभावस्य योग्यानुपलब्ध्या निश्चयेपि सन्घटइति प्रत्यक्षे यदि दोषशंका तदा श्रुतावपि सा स्यादित्यर्थः।

ननु दूरादिदोषाभावनिश्चयमात्रेण न प्रत्यक्षेणार्थसिद्धिः स्वप्नेप्येतादृशनिश्चयसद्भावेन स्वाप्नप्रत्यक्षतुल्यत्वादित्याशंकते॥ स्वाप्नेति॥ तर्हि ब्रह्मैव तत्वमिति वेदेपि भ्रांत्याद्यभावनिश्चयो यो जायते सोपि शून्यमेव तत्वमिति स्वप्ने कश्चन वेदो दृष्टस्तत्र भ्रांत्याद्यभावनिश्चयो यो जातस्तत्तुल्यइत्याह॥ स्वाप्नइति॥ नन्वद्वैतश्रुतौ स्वाप्नशून्यप्रतिपादकवेदवैषम्यानुभवान्न स्वाप्नवेदतुल्यत्वमित्यत आह॥ स्वप्नेति॥ समइति॥ सन्घटइति प्रत्यक्षेपि स्वाप्नप्रत्यक्षवैषम्यानुभवात् न तत्तुल्यत्वमित्यर्थः। एतावत्पर्यंतं भाविनो बाधकत्वमेवाऽयुक्तं तस्य बाधकत्वेपि नास्य जगतस्तद्बाध्यत्वं अतो न भाविबाधकशंकायुक्तेत्युक्तं। इदानीमस्तु वा सा शंका सा किं साक्षिप्रत्यक्षे क्रियते बाह्यप्रत्यक्षे वा नाद्यइत्याह॥ किंचेति॥ ननु दोषजन्यत्वज्ञानाभावेपि प्रमाणाजन्यत्वमात्रेण साक्षिण्यप्रामाण्यहेतुभूतबाधकशंकास्यादितिचेत्समानमेतद्वेदेपीत्याह॥ प्रमाणेति॥ तदप्रामाण्ये तस्याप्रामाण्यहेतुभूतबाधकशंकायां॥ गुणेति॥ अपौरुषेयतया आप्तोक्तत्वरूपगुणस्यैवा भावादितिभावः॥ अप्रामाण्येति॥ अप्रामाण्यहेतुबाधकशंकापातादित्यर्थः॥ निश्शंकमिति॥ निश्शंकं यथा स्यात्तथा। साक्षिग्राह्यं यत्सुखादिकमित्यन्वयः। अस्त्यत्र पुरतः पानीयमिति वाक्यं श्रुतवतः पानीयसमीपप्राप्तिः प्राप्तस्य पानं तेनोदन्यानि मित्तदुःखनाशः सुखप्राप्तिरित्येवंरूपया सुखादिपर्यंतपरीक्षयेत्यर्थः॥ तन्निरासादिति॥ दोषजन्यत्वज्ञाननिरासेन शंकानिरासादित्यर्थः। प्रत्यक्षे सुखपर्यंता परीक्षापि स्वाप्नप्रत्यक्षपरीक्षातुल्येत्याशंकते॥ नन्विति॥ यदि स्वाप्नजलप्रत्यक्षसंबंधिपरीक्षासाम्येन जाग्रदवस्थाकालीनजलप्रत्यक्षसंबंधिपरीक्षाया अप्यप्रामाण्येनानाश्वासः शंक्यते तर्ह्यद्वैतश्रुतावप्यनाश्वासःस्यात्। ननु तत्र नानाश्वासः ब्रह्मैव तत्त्वमिति वेदस्यापौरुषेयत्वज्ञानषङ्विधतात्पर्यलिंगज्ञान तदनुग्राहकतर्कानुसंधानशून्याद्वैत प्रतिपादकश्रुतिप्रतियोगिकप्राबल्य निर्णयब्रह्मसाक्षात्कार तज्जन्यब्रह्मभावापत्तिरूपमोक्षपर्यंता परीक्षास्तीति चेन्न। शून्यमेव तत्त्वमिति

आत्माद्वैतश्रुतिप्रामाण्यसिद्धिरित्यन्योन्याश्रयादितिभावः। यदुक्तमद्वैतश्रुतिस्वरूपग्राहिप्रत्यक्षेपि शंकापत्त्या मिथ्यात्वश्रुत्यादेरेवासिद्ध्यापत्तेश्चेति तदयुक्तं। वस्तुतो मन्मते मिथ्यात्वश्रुतिरपि नास्त्येव। सर्वस्यापि ब्रह्मातिरिक्तस्य मिथ्यात्वांगीकारात्। नच तर्हि मिथ्यात्वसिद्धिःकथमितिवाच्यं। व्यवहारदशायां भवदीयद्वैतश्रुतिरेवास्ति तत्वतः साऽद्वैतश्रुतित्वेनास्माभिर्ज्ञाताऽस्ति तादृशैवच श्रुत्याऽद्वैतं सिद्ध्यति। असतएव मन्मते साधकत्वेनांगीकारादित्याशंक्यातिप्रसंगानाह॥ नचेत्यादिना॥ भेदश्रुतित्वेनेति॥ यथाऽसतएव साधकत्वेनाद्वैतश्रुतित्वेन ज्ञातयाऽद्वैतश्रुत्यैव मिथ्यात्वं सिद्ध्यतीति त्वयोच्यते तथेत्यर्थः। असतः साधकत्वमप्युत्तरत्र निराकरिष्यत इत्यवधेयं। ननु मया प्रत्यक्षादीनां तत्वावेदकेनाद्वैतागमेन बाधःशंकितुं शक्यते। तत्वावेदकेन बाधस्य तात्विकसत्त्वविरोधित्वेन व्यावहारिकसत्त्वाविरोधित्वात्। अद्वैतागमस्य तु बाधो न शंकितुं शक्यः। सहि तत्वावेदकेनैव शंक्यो नातत्वावेदकेन तत्वावेदकंचाऽद्वैतागमादन्यन्नास्तीति कथमद्वैतागमे बाधशंकेत्यतआह॥ नचेति॥ अद्वैतश्रुत्यादेस्तात्विकसत्त्वविरोधी यस्तत्वावेदकेन बाधःसएव शंक्यो नतु व्यावहारिकसत्त्वविरोधी अतत्वावेदकेन बाधःशंकनीय इति राजाज्ञाया अभावेनाद्वैतश्रुत्यादेरतत्वावेदकेनैव बाधोऽस्माभिःशंक्यतएव प्रत्युत त्वयोच्यमानःतत्वावेदकेन बाधोन्यत्र स्वप्नादौ कुत्राप्यदृष्टः। अस्माभिरुच्यमानोऽतत्वावेदकेन नायं गज इत्यादिजाग्रज्ज्ञानादिना बाधो व्यावहारिकसत्त्वविरोधी स्वाप्ने शुक्तिरजतादौच दृष्टोऽतोतत्वावेदकेनैव बाधोऽद्वैतश्रुत्यादेः शंक्यते तथाच व्यावहारिकसत्त्वं यदंगीकृतं श्रुत्यादेस्तत्र स्यात् तावतैव ममेष्टसिद्धेरित्यर्थः।

नन्विदमयुक्तं। अन्यत्र स्वप्नादावदृष्टेपि तत्वावेदकेनैव बाधे जगति शंकिते तस्य च तात्विकसत्त्वविरोधित्वात्तदेव गच्छति न व्यावहारिकसत्त्वं। अद्वैतश्रुत्यादेरन्यत्र स्वप्नादौ दृष्टेन अतत्वावेदकेन बाधे शंकिते तस्य व्यावहारिकसत्त्वविरोधित्वात्तस्मिन्नपगते प्रातिभासिकत्वमेव स्यात्। नचेष्टापत्तिरितिवाच्यं। अप्रातिभासिकत्वधीविरोधादित्यत आह। अप्रातिभासिकत्वधीस्त्विति॥ यथा ब्रह्मव्यतिरिक्तस्य मिथ्यात्ववादिनस्तवाद्वैतश्रुतितत्प्रामाण्यादौ तात्विकत्वधीस्तवास्ति सा कथमिति वाच्यं। बाधविलंबाभावाच्छुक्तिरजतादावतात्विकत्वधीः श्रुत्यादौ बाधविलंबात्तात्विकत्वधीरिति यदि ब्रूयास्तर्हि व्यावहारिकसत्त्वविरोध्यतत्वावेदकागमेन बाधशंकया श्रुत्यादेः प्रातिभासिकत्वलाभेपि तत्राप्रातिभासिकत्वधीरपि तात्विकत्वधीवत् बाधविलंबप्रयुक्तेति वयमपि वदाम इत्यर्थः। ननु श्रुत्यादेः प्रातिभासिकत्वेपि अप्रातिभासिकत्वधीस्तात्विकत्वधीरिव युक्तेत्युक्तं तथात्वे "तरति शोकमात्मविदि"ति ब्रह्मतत्वज्ञानात् श्रुत्यादिसर्वप्रपंचनिवृत्तिप्रतिपादकश्रुतिविरोधः। प्रातिभासिकस्य ब्रह्मतत्वज्ञानान्निवृत्त्यनुपपत्तेरित्याशंक्य निषेधति॥ नचैवमिति॥ वस्तुतस्तु तन्निवृत्तिश्रुतिरेव नास्ति तत्रापि भाविबाधकशंकाप्रसरादित्याह॥ अत्रापीति॥ अनिवृत्तीति॥ वस्तुगत्याब्रह्मतत्वज्ञानान्निवृत्तिश्रुतिस्सा न भवत्येव। साच तन्निवृत्तिश्रुतित्वेन गृहीतेति शंकोदयादित्यर्थः। तद्दर्शनेन दोषबाधदर्शनेन। अद्वैतलिंगं मिथ्यात्वसाधकं दृश्यत्वादि। तत्वमसीत्यद्वैतशब्दः। तच्छंका दोषबाधशंका। सदोषानुमाया निर्दोषत्वमित्युक्तातिप्रसंगांतरमाह॥ बाधितइति॥ बाधिते कथमबाधितत्वं शंकितुमर्हमित्यत उक्तं भ्रमबाधितेति। भ्रमबाधितत्वे नाभिमतेत्यर्थः। भ्रमनिवृत्तेत्यर्थ इत्यन्ये। इदं रजतमिति बाधितेऽक्षेऽनुष्णत्वादिसाधके पदार्थत्वादि लिंगाभासेचाबाधशंकापि स्यात् कुतः इयं शुक्तिरिति प्रमानंतरं जातेन इदं रजतमिति भ्रमेण सा प्रमाबाध्यते तस्याःप्रमाया वस्तुगत्याऽबाध्यत्वमप्यस्ति कुतः भ्रमस्य अन्यथाविज्ञातस्य सम्यग्विज्ञानत्वाभावेन तदबाधकत्वात् तथाच भ्रमबाधितेप्यबाधितत्वदर्शनेन बाधितेऽक्षादावपि

द्वैतादिसाक्षात्कारएव बाधकशंका युक्तात्यर्थः। भाविबाधकस्यासाक्षात्काररूपत्वनैयत्येनापसिद्धांताभीरुणा परेणोक्तमंगीकृत्य दूषणमाह॥ विशेषेति॥ वस्तुतस्तु भाविबाधकज्ञानस्यापि वेदांतजन्यचरमवृत्तित्वेन साक्षात्काररूपतया तत्रापि शंका स्यादेवेत्याह॥ वृत्तिरूपेति॥ शब्दाजन्येति॥ द्वैतादिसाक्षात्कारःशब्दाजन्यइति तत्र शंका युक्ता। अद्वैतसाक्षात्कारस्तुशब्दजन्यइति न तत्रशंकेत्यर्थः॥ मुक्तस्वरूपेति॥ तस्य नित्यत्वेन सर्वथाऽजन्यत्वेन शब्दाजन्यत्वादितिभावः। अतत्वावेदकमेव वेदांतजन्यधीस्वरूपमितिशेषः॥ स्वक्रियाविरोधाच्चेति॥ सर्वत्र प्रत्यक्षे शंकास्तीति वदतस्तव बह्वायाससाध्या वेदांतश्रवणादिक्रिया वेदांतजन्यधीप्रामाण्यग्राहिसाक्षिगोचरा प्रामाण्यशंकाभावसाध्या विरुद्धचेतेत्यर्थः॥ शंकेति॥ भाविबाधकशंकेत्यर्थः॥ अशंकामिति॥ वस्तुगत्या शंका न भवतीत्यर्थः॥ स्वव्याघाताच्चेति॥ घटादिसत्त्वग्राहिप्रत्यक्षं वस्तुतोऽप्रमाणमेव प्रमाणत्वेन साक्षी गृह्णातीति यथोच्यते तथा शंकाग्राहिप्रत्यक्षमप्यशंकामेव शंकात्वेन गृह्णातीति शंकापातेन स्वन्यायेन व्याघातादित्यर्थः॥ शब्दान्येति॥ द्वैतसाक्षात्कारःशब्दान्यजन्यइति तत्रशंका युक्ता। वेदांतजन्यसाक्षात्कारस्तु शब्दजन्यएवेति न तत्र शंकेत्यर्थः। अनेन मुक्तानंदव्यावृत्तिःकृता द्रष्टव्या। शब्दान्यजन्यसाक्षात्कारे तच्छंकेत्युक्त्या शब्दजन्यसाक्षात्कारे तच्छंका नास्तीत्युक्तंस्यात् ॐमितिचेत्तत्राह॥ दशमइति॥ शब्दाभासेति॥ वस्तुतो नवमे दशमस्त्वमसीति प्रयुज्यमानं वाक्यं शब्दाभासएवेत्यर्थः॥ साक्षात्कारेपीति॥ दशमोऽस्मीति भ्रमरूपसाक्षात्कार इत्यर्थः। दशमस्त्वमसीति वाक्यं साक्षात्कारजनकमिति तन्मतरहस्यं॥ विशेषेति॥ शब्दान्यजन्यसाक्षात्कार एव तच्छंका नतु शब्दजन्यसाक्षात्कार इत्यत्र विशेषहेत्वभावादित्यर्थः॥ विश्वान्येति॥ शब्दान्यजन्यसाक्षात्कार एव तच्छंका नतु शब्दजन्यसाक्षात्कार इति यथोच्यते एवंवयमपि वदामो विश्वविषयकप्रत्यक्षभिन्नप्रत्यक्ष एव भाविबाधकशंका। ततश्चवेदांतजन्यसाक्षात्कारेपि तच्छंकास्यान्न विश्वप्रत्यक्षइत्यपि वक्तुंशक्यत्वादित्यर्थः। यदि भाविबाधकशंकयाऽप्रमाणमेव प्रमाणत्वेन प्रत्यक्षं गृह्णातीत्युच्यते तर्हि मिथ्यात्वश्रुतिरेव त्वन्मतेन सिद्धचेदित्याह॥ अद्वैतेति॥ अद्वैतश्रुतिस्वरूपग्राहिश्रोत्रप्रत्यक्षं लिंगकरणतापक्षेऽनुमानस्वरूपग्राहिचक्षुरादिकं। तथाच वस्तुगत्या एकमेवाद्वितीयमितिश्रुतिर्नास्त्येव किंनामानेकमेव सद्वितीयमित्येवास्ति श्रुतिः। एवंचानेकमेव सद्वितीयमिति तात्विकीमेव श्रुतिं व्यावहारिकैकमेवाद्वितीयमितिश्रुतित्वेन अथवाव्यावहारिकीमेवानेकमेवसद्वितीयमितिश्रुतिं प्रातिभासिकैकमेवाद्वितीयमितिश्रुतित्वेन श्रोत्रप्रत्यक्षं गृह्णातीति शंकया मिथ्यात्वश्रुतिरेव न सिद्धचेदित्यर्थः। तथाऽधूममेव धूमत्वेन चक्षुर्गृह्णातीति शंकया तेन वह्निसिद्धिरपि न स्यादित्यपि द्रष्टव्यं॥

शून्येत्यादि॥ अयमर्थः। त्वन्मते ब्रह्माद्वैतमेव तत्त्व द्वितीयस्यात्यंताभावएव तत्त्वं नतु शून्याद्वैतं सद्वैतं वा तत्वं तथाश्रुतेरश्रवणादिति त्वयोच्यते। तत्र वदामः। शून्याद्वैतं तत्वमित्यादिश्रुत्यभावग्राहिश्रोत्रप्रत्यक्षं तात्विक्यां शून्याद्वैतं तत्वमित्यादिश्रुतौ सत्यामेव व्यावहारिकं तदभावं गृह्णाति अथवा व्यावहारिक्यां शून्याद्वैतं तत्वमित्यादिश्रुतौ सत्यामेव प्रातिभासिकं तदभावं गृह्णाति। प्रतियोगितद भावयोर्भिन्नसत्ताकत्वनियमादित्याशंकया शून्याद्वैतसद्वितीयरूपतत्त्वसिद्धेरप्यापातादिति। आदिपदेन सद्वैतग्रहणं॥ उक्तशंकेति॥ शून्याद्वैतादिसिद्धचापादकोक्तशंकेत्यर्थः॥ तस्याएवेति॥ आत्माद्वैतश्रुतेरेव भाविबाधक शंकयाऽप्रमाणत्वेन संदिह्यमानत्वादित्यर्थः। तथाच शंकाया अभावेनात्माद्वैतश्रुतिप्रामाण्यसिद्धौ तद्विरुद्धतया तात्विक्यां व्यावहारिक्यां वेत्यादिनोक्तशंकाया अभावेन शून्याद्वैताद्यसिद्धिः। तस्यांच सत्यां तद्विरोधाभावेन

विषयस्य बाध्यत्वेपि ज्ञानस्वरूपस्याबाध्यत्वंच दुःखादिविषयकसाक्षिणःपरमते प्रसिद्धमितिभावः॥ नेति॥ त्वयातु बाधकत्वाभिमतचरमवृत्त्या भ्रमस्वरूपाज्ञानदोषाध्यस्तद्रष्टृभूत जीवादिसर्वप्रपंचबाधांगीकारेण दृष्टवैरूप्यापातइत्यर्थः। एतावत्पर्यंतं भाविबाधकतया शंक्यमानं ज्ञानं न बाधकमित्युपपाद्य तद्बाध्यत्वं सन्घटइत्यादिप्रत्यक्षे नास्ति बाध्यत्वव्यापकाभावादित्याह॥ किंचेति॥ दोषजन्यं ज्ञानं। प्रकृते तदभावादित्याह॥ नचेति॥ साक्षीति॥ वियदादिजगत्सत्यत्वग्राहीत्यर्थः॥ तज्जन्यमिति॥ अजन्यत्वात्तस्येतिभावः।

ननु यथाऽपौरुषेयतया वेदस्य दोषाजन्याप्यद्वैतश्रुतिर्भेदश्रुतिबाध्येति भवद्भिरुच्यते। एवं दोषाजन्यमपि साक्षिज्ञानं बाध्यतामित्यतआह॥ अद्वैतज्ञानेत्विति॥ नास्माभिर्भेदश्रुत्याऽद्वैतश्रुतिर्बाध्यत इत्युच्यते। किंनामाद्वैतश्रुतिजन्यं ज्ञानमेव। तच्चाभेदविषयकश्रुतितात्पर्यभ्रमजन्यमेवेत्यर्थः। सन्घट इत्यादिज्ञानेऽ बाध्यत्वव्याप्यस्य सत्त्वादबाध्यत्वमंगीकार्यमित्याह॥ किंचेति॥ रूप्यज्ञानबाधकं यत् नेदं रजतमिति ज्ञानं तत्तुल्यं यन्मानं इयंशुक्तिरिति आप्तवाक्यजन्यज्ञानांतरं तत्संवादि इयंशुक्तिरिति ज्ञानं तन्न बाध्यमित्यर्थः। प्रकृते तत्सद्भावमाह॥ द्वैतेति॥ अबाध्यत्वव्याप्यांतरमाह॥ किंचेति॥ बाधकधीबोध्यं अनिषेध्यत्वेनेतिशेषः। तेन रजतस्यापि निषेध्यतया बाधकधीबाध्यत्वादबाध्यत्वापत्तिरिति शंकानवकाशः॥ न बाध्यमिति॥ अधिष्ठानभूतशुक्तिवदित्यर्थः। प्रकृते तत्सद्भावमाह॥ भेदश्चेति॥ कथं बाधकधीबोध्यत्वं भेदस्येत्यत आह तयेति॥ बाधकधियेत्यर्थः॥ स्वेति॥ चरमवृत्तिरूपबाधकधीविषयस्य ब्रह्मणोऽभेदस्यवेत्यर्थः॥ भेदेति॥ स्वबाध्यो यो भेदस्तदभिन्नतयेत्यर्थः। अयंभावः। द्वैतस्य बाधकं वेदांतजन्यचरमवृत्तिरूपं ज्ञानं स्वविषयं ब्रह्म अभेदंवा निषेध्याद्भेदादभिन्नतया गृह्णाति। औदासीन्येनवा भिन्नतयावा। नाद्यः। तथात्वे भ्रमत्वस्यैवापत्त्या बाधकत्वायोगात्। यथानेदंरजतमितिज्ञानंस्वविषयं शुक्तिकाशकलं निषेध्यरजताभिन्नतया गृह्णातिचेत्तस्य भ्रमत्वमेव दृष्टं। तथा इहापि ब्रह्म अद्वैतंवा स्वविषयं निषेध्यभेदाभिन्नतया गृह्णातिचेद्भ्रमत्वमेव स्यान्न बाधकत्वं भेदौदासीन्येन ग्रहणेपि तथैव। भेदादिप्रपंचसाधारण्येनैवैक्यग्रहणात्। तस्माद्यदा नेदंरजतमिति ज्ञानं स्वविषयभूतं शुक्तिशकलं रजताद्भिन्नमिति यदि गृह्णाति तर्ह्येव बाधकतया दृष्टं अतोऽत्रापि बाधकत्वोपपत्तये चरमवृत्तिर्ब्रह्म अद्वैतं वा स्वविषयं स्वनिषेध्यभेदाद्भिन्नमिति गृह्णातीत्यवश्यमभ्युपेयं। ततश्चभेदस्य बाधकधीबोध्यत्वं सिद्धमिति। उपसंहरति॥ तस्मादिति॥

बाधकशंका भाविबाधकशंका सन्घटइति प्रत्यक्षे भाविबाधकशंकाकिमबाधितबाधो भविष्यतीत्येवंरूपा आहोस्विद्बाधितबाधो भविष्यतीत्येवंरूपा। नाद्यः। अबाधितबाधरूपकोट्यप्रसिद्धेः। नच रूप्यादिज्ञान बाधकेनेदंरूप्यमिति ज्ञानेऽबाधितत्वं प्रसिद्धमितिवाच्यं। रूप्यादिबाधेपि बाधकशंकायाःसत्त्वात्। न द्वितीयः। तादृशशंकाया द्वैतादेरबाध्यत्वाविरोधित्वात्। बाधो भविष्यतीत्येवं सामान्यतःशंकायाश्चयावद्विशेषा भावेनायोगादित्याह॥ कथंचेयं शंकेत्यादिना॥ स्वव्याघाताच्चेति॥ स्वेनोक्ता भाविबाधकशंका स्वात्मानमेव घातितवतीत्यर्थः। दुष्टज्ञानं इदं रजतमितिज्ञानं। युज्यते नेदं रजतमितिबाधकरूपादुष्टज्ञानेनेत्यर्थः॥ गृहीतमात्रेति॥ त्वन्मतेऽप्रामाण्यस्य स्वतस्त्वात् यःप्रत्ययःसमृषा दृष्टइतिव्याप्तिमाश्रित्य गृहीतमात्रस्य भाविबाधकशंकया बाधांगीकारे स्वपक्षोपि गृहीतमात्रस्य बाधरूपःस्वकीयःपक्षोपि न सिद्ध्यति तत्रापि बाधकशंकाप्रसरेण स्वव्याघातादितिभावः॥ धीमात्रइति। तथाच न भाविबाधकज्ञाने बाधशंकेतिभावः। किंत्विति॥ तथाच

प्रत्यक्षविरोधेन त्वदभिप्रेतेऽर्थे प्रामाण्याभावस्योपपादितत्वात्। किंच श्रुतिस्मृतिभ्यां श्रुत्यादितुल्यत्वेन प्रत्यक्षप्रामाण्यस्योक्तत्वाच्च तत्प्रामाण्यं स्वीकार्यमित्याह - किं चेति। न च तत्र प्रत्यक्षे व्यावहारिकं प्रामाण्यं श्रुतेरर्थ इति वाच्यम्। बाधकाभावेन सकृत् श्रुतस्यार्थद्वैविध्यकल्पनायोगात्। तस्माद् भाविबाधकाभावस्य निर्णीतत्वान्न प्रत्यक्षाप्रामाण्यमिति॥ इति प्रत्यक्षस्य भाविबाधकशङ्काभङ्गः॥

न्यायामृतप्रकाशः

प्रत्यक्षमप्रमाणमेवेति प्रथमःकल्पः स्वतःप्राप्ततत्वावेदनलक्षणप्रामाण्यस्य त्यागः किमनुमानविरोधात् आगमविरोधाद्वा भाविबाधकशंकया वेति त्रेधा विकल्पितः। तत्र प्रथमद्वितीयौ निराकृतौ। इदानीं तृतीयमनूद्यदूषयति॥ नापीति। सत्त्वग्राहिप्रत्यक्षस्य शंक्यमानं भाविबाधकं किमनुमानमागमोवा प्रत्यक्षं वा। नाद्यद्वितीयौ। कुत इत्यत आह॥ उक्तरीत्येति॥ जात्या उपक्रमादिन्यायैश्च प्रबलेन प्रत्यक्षेण विरोधान्नलिंगशब्दयोर्बाधकत्वमित्यर्थः। न तृतीय इत्याह॥ अक्षस्येति॥ जगत्प्रत्यक्षवदेव तद्बाधकेपि प्रत्यक्षेऽप्रामाण्यशंकया तेन बाध्यत्वायोगादित्यर्थः। ननु सामान्यतःकेनचित्प्रमाणेन बाधःशंक्यत इतिचेत्तत्राह॥ सर्वेति॥ सत्त्वग्राहिप्रत्यक्षं बाध्यं त्रैकालिकानिषेधरूपबाधोपे तत्वात्स्वाप्नप्रत्यक्षवदिति अनुमातव्यं स्वाप्नगजादिज्ञानस्यहि जाग्रत्कालीनं स्वाप्नगजाद्यभावज्ञानमेव बाधकंवाच्यं। तथाचजाग्रत्कालीन स्वाप्नगजाद्यभावप्रत्यक्षस्यापिभाविबाधकशंकयाऽप्रामाण्ये स्वाप्नप्रत्यक्षस्य बाधकाभावेन निषेधप्रतियोगित्व रूपबाधासिद्धौ दृष्टांताभावेनान्यत्र सत्त्वग्राहिप्रत्यक्षेपि बाधकशंका नयुक्तेत्याह॥ किंचेति॥ जाग्रच्छब्देन स्वप्नदृष्टस्य गजादेरभावो ग्राह्यः। शुक्तिरूप्यादेरभाव आदिशब्दार्थः। तयोर्ज्ञानस्येत्यर्थः। स्वप्नादेरित्यादिपदेन शुक्तिरूप्यादि। बांधो निषेधप्रतियोगित्वं। वार्तिके भट्टवार्तिके। भट्टाचार्येणेतिशेषः॥ प्रतियोगिनीति॥ विरोधिनीत्यर्थः। स्वाप्नगजादिज्ञानविरोधिनि जाग्रज्ज्ञाने जाग्रत्कालीनगजाद्यभावज्ञाने दृष्टे प्रामाणिके सति। अस्माकं सत्यमिथ्याविवेकवतां स्वप्नादिबुद्धिर्मृषा मिथ्यार्थाविभासिका भवेत्। तव सर्वमिथ्यात्ववादिनः स्वाप्नजाग्रज्ज्ञानयोर्भेदःकिंकृतः बाधकत्वेनाभिमतस्य जाग्रद्गजाद्यभावज्ञानस्यापि मिथ्यार्थाविभासत्वात्स्वप्नगजादेर्मि थ्यात्वं न सिद्ध्यतीति वार्तिकार्थः। विश्वबाधकत्वेनाभिमतज्ञाने बाधकत्वव्यापकाभावात्तदभावइत्याह॥ अपिचेति॥ भ्रमकालीनापरोक्षबुद्धिर्भ्रमएव स्वस्य स्वकालीनत्वात् तदविषयो यो विशेषःशुक्तित्वादिस्तद्विषया इयं शुक्तिरितिधीर्बाधिका दृष्टेत्यर्थः। प्रकृतेतदभावमाह॥ नचेति॥ धीः वेदांतजन्यब्रह्मविषयकचरमवृत्तिः। भ्रमाविषयविशेषविषया न भवति ब्रह्मणो निर्विशेषत्वादितिभावः। बाधकत्वव्यापकांतराभावमाह॥ किंचेति॥ सप्रकारैवेति॥ भ्रमविरोधिप्रकारप्रकारिकेत्यर्थः। कुत इत्यतआह॥ निर्विकल्पिकायाइति॥ धर्मिमात्रविषयकत्वेनाबाधकत्वादितिभावः। प्रकृते तदभावमाह॥ किंच विश्वबाधिकाधीःकिंशब्दजन्या शब्दाजन्यावा आद्येपि किं सा सप्रकारा निष्प्रकारा वा त्वदनभिप्रेतत्वान्नाद्यइत्याह। नतावत्सेति॥ शब्दजन्या विश्वबाधिका धीः न द्वितीयः। शब्दस्य संसर्गप्रतियोगितावच्छेदकप्रकारकज्ञानजनकतया निष्प्रकारकज्ञानजनकत्वासिद्धेरित्याह। नापीति॥ नांत्य इत्याह॥ नच त्वन्मत इति॥ बाधिकाधीरिति॥ नेदंरजतमित्यादिका॥ भ्रमस्येत्यादि॥ एतावत्कालं शुक्त्यज्ञानमासीद्रजतज्ञानमासीदित्यनुभवेनाज्ञानं भ्रमस्वरूपंच न बाध्यते किंतु भ्रमविषयएव।

स्वाप्नजाग्रत्परीक्षयोर्वैषम्यानुभवानङ्गीकार इत्यर्थः। उक्तमर्थं संगृह्णाति – एवं चेति। प्रपञ्चस्य स्वाप्नप्रपञ्चात् विशेषस्यासिद्धौ प्रोच्यमानायाम् अद्वैतश्रुतेरपि प्रपञ्चान्तःपातित्वेन स्वाप्नाद्विशेषानापत्त्या प्रत्यक्षतुल्यतया पारमार्थिकाद्वैतसिद्धिर्न स्यात्। सिद्धौ। विशेषस्येति शेषः। ततश्च बाधाबाधरूपविशेषसिद्धौ अक्षजबाधशंका कुतः स्यादित्यर्थः। ननु न बाधरूपविशेषमङ्गीकुर्मः। किन्तु प्रत्यक्षत्व शब्दत्वकृतम्। अतः शङ्का स्यादेवेत्यत आह – न हीति। शब्दत्वप्रत्यक्षत्वकृतमेव वैषम्यं चेत् स्वाप्नश्रुतावपि शब्दत्वसत्त्वात् तज्जन्ये शून्यमेव तत्त्वमिति ज्ञाने प्रामाण्यनिश्चयः स्यात्। तस्माद् बाधाबाधकृत एव विशेषो वाच्य इत्याह – बाधाबाधेति। विशेषः। तात्विकत्वातात्विकत्वलक्षणः। उपसंहरति – तस्मादिति। बाधशङ्का नेत्यत्रैव भट्टसंमतिमप्याह – इह जन्मनीति। उपलभ्यते। बाध इति शेषः। एवमप्यङ्गीकारयितुरशास्त्रित्वमेव स्यादित्याह – परीक्षितेति। आत्मस्थायित्वप्रत्यभिज्ञाप्रत्यक्षादावप्यनाश्वासे त्वदीयसिद्धान्ते काऽपि व्यवस्था न सिद्धचेदिति भावः। ननु श्रुत्यनुमानाभ्यां व्यवस्था सेत्स्यतीत्यत आह – न हि श्रुत इति। तत्रापि दृष्टान्तमात्रेण शङ्काप्रसङ्गादिति भावः। किं चैवमिति। यदि दर्शनमात्रेण बाधकाभावेऽपि प्रत्यक्षे शङ्का स्यात्, तदा न हिंस्यादित्यस्याग्नीषोमीये व्यभिचारदर्शनेन सर्वत्रापि तच्छङ्कायामेतस्योत्सर्गत्वेन मानत्वं न स्यादित्यर्थः। उत्सर्गत्वेन मानत्वे सिद्धान्तसम्मतिमाह – उक्तं हीति। यत् यस्मिन् विषये उत्सर्गतः प्राप्तं सामान्यतः प्रवृत्तं तस्मिन् विषयेऽपवादविवर्जितं अन्यत्रापवादेन बाधकेन व्यभिचारि तत् अपवादरहिते मानमेव भविष्यतीत्यर्थः।

भाविबाधाभावोपपादनमुपसंहरति – तस्मादिति। निर्मूलशङ्कायाश्चेति। न चागमादिमूलशङ्काया एव करणान्न निर्मूलत्वमिति वाच्यम्। आगमादेः प्रत्यक्षबाधकत्वा भावस्योपपादितत्वेन तन्मूलशङ्काया असंभवात्। प्रबलस्यान्यस्याभावात्। सुस्थमिति। तात्विकमिति शेषः। सर्वथा बाधाभावस्य तात्विकत्वेनैव व्याप्तत्वात्। अन्यथाऽद्वैतज्ञानस्यापि तत्र स्यादिति। मूलहान्यापत्तेरिति। इदं रूप्यमित्यस्याप्रामाण्यं विमतं मिथ्येत्यनुमाने रूप्यस्य दृष्टान्तीकरणादावश्यकम्। तच्च विना नेदं रजतमिति प्रत्यक्षप्रामाण्यमसंभवि। अन्यथा मिथ्यात्वानुमितिरूपमूलहान्यापत्तिरित्यर्थः। ननु नेदं रजतमिति ज्ञानस्याद्वैतश्रुत्यनुगुणत्वेनाप्रामाण्य शङ्कानास्कन्दितत्वेन प्रामाण्यात् तद्विरोधेनेदं रजतमिति ज्ञानं भ्रम इति कथं मूलहानिः? अत एव नेदं रजतमित्यस्य सन् घट इत्यनेन समानयोगक्षेमताऽपि न। अद्वैतश्रुत्यानुगण्यानानुगुण्याभ्यां विशेषोपपत्तेरिति चेन्मैवम्। नेदं रजतमिति ज्ञानस्य प्रामाण्ये भेदस्य तद्बोध्यत्वेन पारमार्थिकत्वापत्तेः। त्वया च शुक्तिरित्यस्यैव बाधकत्वाभ्युपगमेन तत्प्रामाण्याभ्युपगमेऽद्वैतश्रुतिविरोधस्यावश्यकत्वात्। पूर्वोत्तरव्याहतभाषित्वाच्च। किंच नेदं रजतमिति ज्ञानस्य कथमद्वैतश्रुत्यनुगुणत्वम्? तेन रजताभावस्य द्वितीयस्यावगाहनात्। भावाद्वैतमेव मयाङ्गीक्रियत इति तु न। तस्य निरस्तत्वात्। अत एव सन् घट इत्यादिप्रत्यक्षसमानयोगक्षेमताऽपि। न चानन्दस्य ब्रह्मस्वरूपत्वेनाद्वैतश्रुत्यनुगुणत्वेन तदनुभवस्य प्रामाण्यमिति वाच्यम्। एवं हि सर्वेषां सर्वज्ञत्वादिगुणानां ब्रह्मस्वरूपत्वापत्त्या सगुणब्रह्मप्रतिपादकानां वेदान्तानां तत्वावेदकत्वलक्षणं प्रामाण्यं स्यात्। तथात्वे त्वपसिद्धान्तापातात्। यदि च सार्वज्ञादीनां सोपाधिकत्वान्न ब्रह्मस्वरुपत्वं तदा कथंचिदानन्दस्यापि सोपाधिकत्वस्य वक्तुं शक्यत्वात्। तत्रोपाधिः तटस्थ इति चेत् समं सर्वज्ञत्वादावपि इति। किं चाद्वैतश्रुत्यनुगुणत्वे कथं प्रामाण्यम्? अद्वैतश्रुतेरेव

बाधदर्शनात्। तथा च शब्दाभासेऽपि तद्दर्शनेनाद्वैतसाक्षात्कारे शब्दजन्येऽपि सा स्यादेवेत्याशयेनाह – दशमस्त्वमसीति। एवमपि यदि जन्यसाक्षात्कारे एव शङ्केत्याग्रहः तदाऽऽह – विश्वेति। जन्यसाक्षात्कारे सर्वत्र शङ्केत्येवं वदन्तं प्रत्यतिप्रसङ्गमाह – अद्वैतश्रुत्यनुमानादीति। तात्विकीं व्यावहारिकेण, व्यावहारिकीं प्रातिभासिकेन वेत्यन्वयः। न च तत्त्वतो द्वैतेति। अत्र वास्तवद्वैतश्रुतित्वमप्रयोजकम्। किन्तु व्यवहारदशायामद्वैतश्रुतित्वेन गृहीतत्वम्। अन्यथाऽसंभवापत्तेरिति ध्येयम्। तथैव दूषयति – वह्नित्वेन ज्ञातादिति। भेदश्रुतित्वेनेति। नन्वद्वैतवाक्ये भेदश्रुतित्वं प्रातिभासिकम्। गुञ्जापुञ्जेऽपि वह्नित्वं प्रातिभासिकमिति न तेन द्वैतादिसिद्धिः। अद्वैतश्रुतित्वं द्वैतवाक्ये व्यावहारिकमिति तेनाद्वैतसिद्धिरिति चेन्न। उभयोरपि प्रतिभासमात्रस्य त्वन्मते बाधस्य चाविशेषे द्वैविध्यकल्पानायोगात्। मिथ्यात्वसिध्युत्तरकालीनत्वाच्च। नन्वद्वैतश्रुतितत्प्रामाण्यादेर्न बाधशङ्का युक्ता। अन्यस्य तत्त्ववेदकस्य बाधकस्याभावादित्यत आह – न चाद्वैतेति। ननु व्यावहारिक सत्त्वविरोधिना तत्त्ववेदकेन बाधेऽप्रातिभासिकत्वं न स्यात्। तथा च तद्ग्राहकप्रमाणविरोध इत्यत आह – अप्रातिभासिकत्वधीस्त्विति। तात्त्विकत्ववदप्रातिभासिकत्वमपि प्रातिभासिकमिति भावः।

उक्तमेवार्थमधिकविवक्षयाऽऽह – किं चापरीक्षित इति। अत एवाह – प्रमाणेति। उक्तमर्थमाचार्यवचसा द्रढयति – तदुक्तमिति। ननु श्रुतेरपौरुषेयत्वेन निर्दोषत्वनिश्चयात् तत्र न शङ्केति शङ्कते – श्रुतिरिति। त्वन्मत इति। तथा चापौरुषेयत्वेन तत्प्रयुक्तदोषाभावनिश्चय इति अनुपपन्नमिति भावः। नन्वेवमपि श्रुतेः प्रमाकरणत्वाङ्गीकारेण दोषाभावनिश्चयः स्यादित्यत आह – तस्या इति। तथाच प्रमाकरणत्वेऽपि नाभिप्रेतसिद्धिरिति भावः। ननूपक्रमोपसंहाराद्यैकरूप्यनिश्चयेन प्रमात्वसिद्धिरद्वैतज्ञानस्येत्यत आह – उपक्रमोपसंहारादीति। किं च प्रत्यक्षे दोषाभावनिश्चयान्न तत्र बाधशङ्केत्याह – किञ्चेति। ननु क्वचिदोषाभावे निर्णीतेऽपि अन्यः कल्प्यत इत्यत आह – अन्यस्येति। तात्पर्यभ्रमादिरूपदोषस्य तत्रापि संभवादिति भावः। ननु दोषाभावनिश्चयो न प्रमात्वप्रयोजकः। स्वप्ने दूरादिदोषाभावनिश्चयेऽपि प्रमात्वाभावादित्याशङ्कते – स्वाप्नपप्रत्यक्षेऽपीति। तर्ह्यद्वैतज्ञानेऽपि भ्रान्त्याद्यभावनिश्चयस्य प्रमात्वप्रयोजकत्वं न स्यात्। स्वाप्ने शून्यमेव तत्वमिति वेदे भ्रान्त्याद्यभावनिश्चयेऽपि प्रमाणत्वादर्शनादित्याह – स्वाप्न इति। तथाच नैतदृष्टान्तेन प्रत्यक्षे दोषाभावनिश्चयस्य प्रमात्वप्रयोजकत्वं शङ्क्यमिति भावः। स्वाप्नजाग्द्वेदयोर्वैषम्यानुभवो यदि तर्हि स्वाप्नजाग्रत्प्रत्यक्षयोरपि स तुल्य इत्याह – स्वाप्नवैषम्येति। प्रत्यक्षे बाधं शङ्कमानः प्रष्टव्यः। किं साक्षिणि शङ्का, उत बाधप्रत्यक्षे? नाद्य इत्याह – किं च न तावदिति। न द्वितीय इत्याह – नापीति। उभयत्रापि न शङ्केत्यत्राचार्यसम्मतिमाह – उक्तं हीति। आद्यं वचनं द्वितीये, द्वितीयमाद्य इति बोध्यम्।

ननु परीक्षया न शङ्काविरहसाधनं युक्तम्। स्वाप्नप्रत्यक्षे परीक्षायामप्यप्रामाण्यदर्शनादिति शङ्कते – नन्विति। तर्हि तवापि परीक्षयाऽद्वैतश्रुतौ प्रामाण्यनिश्चयो न स्यात्। स्वप्नदृष्टे शून्यमेव तत्त्वमिति वेदेऽपि फलपर्यन्तपरीक्षासत्त्वेऽपि प्रामाण्यनिश्चयादर्शनादित्याह – स्वाप्नस्येति। यदि स्वाप्नजाग्रत्परीक्षयोर्वैषम्यानुभवात् तथा निश्चयः तदत्रापि तुल्यमित्याह – स्वाप्नवैषम्येति। अन्यथेति।

बाधस्यान्यथाज्ञानोल्लोठनपूर्वकसम्यग्ज्ञानरूपत्वेनैतादृशाकारत्वस्यावश्यकत्वात्। अपि च बाधस्य विशेषदर्शन जन्यत्वेनावधारणात्मकत्वात् अवधारणस्य चेतरव्यवच्छेदविषयत्वेन भेदविषयत्वमावश्यकम्। अन्यथा पूर्वज्ञाने जागरूके उत्तरज्ञानोत्पत्तिरेव न स्यात्। न च व्यावृत्ताकारत्वेनैव बाधकत्वसंभवात् न भेदस्य बाधकधीबोध्यत्वमिति वाच्यम्। भेदविषयत्वाभावे व्यावृत्ताकारत्वस्यैवानुपपत्तेः। न च कारणविशेषजन्यत्वेनैव व्यावृत्ताकारत्वमिति वाच्यम्। अयं प्रमेयवानिति ज्ञानयोः शब्दानुमानजन्ययोर्व्यावृत्ताकारत्वाननुभवात्। तस्मात् भेदविषयत्वेनैव व्यावृत्ताकारताऽपि। न चासाधारणधर्मविषयत्वेन तदिति वाच्यम्। तस्यापि भेदविषयत्वं विनाऽयोगात्। ब्रह्मज्ञाने तदभावाच्च। तस्माद् ब्रह्मज्ञानस्य बाधकत्वासंभवात् अन्यस्य चानङ्गीकारात् प्रत्यक्षे बाध्यत्वव्यापकनिवृत्त्या व्याप्यस्य बाध्यत्वस्यापि निवृत्त्या भाविबाधशङ्का न युक्तेत्युपसंहरति – तस्मादिति।

किंच कथमियं शङ्का? जगत्प्रत्यक्षमबाधितबाधकबाध्यं भविष्यति न वेति वा, बाधितबाधकबाध्यं न वेति वा? नाद्य इत्याह – कथं चेति। अबाधितबाधकबाध्यत्वरूपकोटेरप्रसिद्धत्वेन तादृशसंशयायोगादित्यर्थः। न च रूप्यादिबाधे तादृशकोटिप्रसिद्धिरस्ति। तत्र शङ्काभावादिति वाच्यम्। अद्वैतप्रमाणविरोधाविशेषे जगत्प्रत्यक्षे तच्छङ्का, न रूप्यादिबाधे तच्छङ्केत्यर्धजरतीयायोगात्। न च रूप्यादिबाधस्याद्वैतश्रुतिविरोध एव नास्तीति वाच्यम्। इयं शुक्तिरित्यस्यैव त्वया बाधत्वाभ्युपगमात् तस्य च जगत्प्रत्यक्षतुल्यत्वात् अद्वैतश्रुतिविरुद्धत्वम्। न द्वितीय इत्याह – बाधितबाधेति। किंच यथा जगत्प्रत्यक्षस्य शङ्काकलङ्कितत्वेन तेन न स्वार्थनिश्चयः तथा भाविबाधेऽपि शङ्कापातेन तेनापि स्वार्थनिश्चयानुपपत्तिरित्याह – भाविबाधेऽपीति। ननु न मया सर्वत्र शङ्कोच्यते। येन स्वव्याघातः। किन्तु समबलप्रमाणान्तरे उपस्थिते एव। तथा च कथं स्वव्याघात इति चेन्न। एवं हि जगत्प्रत्यक्षेऽपि शङ्का न स्यात्। समबलप्रमाणान्तरोपस्थितेरभावात्। श्रुतेश्च समबलत्वस्य त्वयानभ्युपगमात्। अभ्युपगमे वा प्रत्यक्षरूपसमबल प्रमाणान्तरोपस्थितिसद्भावेन श्रुतावपि सा स्यात्। एवमपि शङ्कायां भाविबाधेऽपि शङ्कासंभवात्। जगत्प्रत्यक्षरूप समबलप्रमाणान्तरोपस्थितिसत्त्वात्त्। न च तस्य समबलत्वमेव नेति वाच्यम्। उक्तरीत्या प्रत्यक्षस्यैव प्राबल्यात्। प्राबल्यानिश्चये शङ्कानवकाशाच्च।

किं चैवं वदता सर्वत्र शङ्केत्येवाङ्गीकृतम्। यथाकथंचित् समबलप्रमाणान्तरोपस्थितेः सर्वत्र संभवात्। एवं च भट्टवार्तिकविरोध इत्याह – तदुक्तमिति। धीमात्र एव शङ्का त्वयाङ्गीकर्तव्येत्युपपादयितुमाशङ्क्य निषेधति – न चेत्यादिना। मुक्तस्वरूपानन्देति। न च स्वरूपानन्दसाक्षात्कारस्याद्वैतश्रुत्यविरुद्धत्वात् न तत्र शङ्केति वाच्यम्। मुक्तस्वरूपानन्दस्य ब्रह्मभिन्नताया उपपादयिष्यमाणत्वेन तस्याद्वैतश्रुतिविरुद्धत्वात्। वेदान्तजन्येति। न च वेदान्तजन्यज्ञानमात्रस्यैवापेक्षितत्वात् न तत्प्रामाण्यनिश्चयापेक्षा। अपेक्षणे वा प्रमाणान्तरेण तन्निश्चयो, न साक्षिणेति वाच्यम्। वेदान्तजन्यज्ञानस्य प्रामाण्यनिश्चयाभावे तत्त्वज्ञानत्वाभावेन तदर्थं श्रवणादौ प्रवृत्तिर्न स्यात्। तस्य तत्त्वज्ञानत्वाभावे मोक्षासंभवाच्च। प्रमाणान्तरेण प्रामाण्यनिश्चयस्यानवस्थाभयेन दूषितत्वात्। स्वव्याघाताच्चेति। अशङ्कात्वशङ्कात्वे एकत्र व्याहते इत्यर्थः। नापि शब्दान्यजन्येति। साक्षिप्रत्यक्षं च जन्यमेव नेत्याशयः। जन्यसाक्षात्कारे हि शङ्का क्वचिद्

चेन्न। तथात्वे साक्षिज्ञानेऽपि बाधापत्तेः, यथा रजतज्ञाने। तदभावे च दोषाजन्यत्वनिश्चयात्। किंच तत्प्रतिफीलतस्य साक्षिपदार्थत्वे सुषुप्त्यवस्थायां दोषजन्यवृत्त्यभावेन तत्प्रतिबिम्बितसाक्ष्यभावेऽज्ञानभावाभावेन एतावन्तं कालं न किञ्चिदवेदिषमिति परामर्शानुपपत्तेः। न च तत्र केवलचैतन्यस्यैव साक्षित्वमिति वाच्यम्। सर्वत्र तथैव साक्षित्वोपपत्तौ तत्प्रतिबिम्बितत्वांशवैयर्थ्यात्। अन्यथा साक्षिणोऽप्रमात्वनियमेन तेनाद्वैतज्ञानप्रामाण्यासिद्ध्या अन्यस्य तत्प्रामाण्यग्राहकस्याभावेनाद्वैतमप्रामाणिकमेव स्यादिति साधु समर्थितमद्वैतमतम्। तस्मात् साक्षिणश्चैतन्यमात्ररूपत्वेन दोषजन्यत्वाभावात् न बाध्यत्वमिति स्थितम्।

अद्वैतज्ञाने त्विति। नन्वद्वैततात्पर्यग्रहस्य प्रत्यक्षाद्यविरोधेन प्रमारूपत्वात् दोषाजन्यत्वात् न तज्जन्यमद्वैतज्ञानं बाध्यमिति चेन्न। अद्वैततात्पर्यग्राहकाभावादेव तद्ग्रहाभावेन प्रमात्वादेर्दूरोत्सारितत्वात्। तात्पर्यग्राहकसत्वे वा प्रत्यक्षादिविरोधेन तत्प्रमात्वासिद्धेश्च। तात्पर्यस्य ब्रह्मातिरिक्तस्य मिथ्यात्वेन च तद्ग्रहस्य प्रमात्वासिद्धेः। किंच तात्पर्यग्रहः किं श्रुत्या, लिङ्गादिना वा? नाद्यः। अनवस्थापातात्। न द्वितीयः। वेदान्तातिरिक्तस्य तत्त्वावेदकत्वाभावात्। व्यावहारिकप्रमाणजन्यज्ञानस्य च दोषजन्यत्वनियमात्। अन्यथा प्रपञ्चज्ञानस्यापि व्यावहारिकप्रमाणजन्यत्वेन दोषजन्यत्वाभावेन प्रमात्वापत्त्या तेनापि पारमार्थिकसिद्ध्यापत्तिरिति प्रतिकूलमेवाचरितं देवानां प्रियेण। न च तात्पर्यभ्रमस्य न विषयबाधप्रयोजकत्वम्। तात्पर्यभ्रमे विद्यमानेऽपि सैन्धवमानयेत्यादौ विषयबाधाभावादिति वाच्यम्। अभिप्रेतार्थविषयबाधस्य तत्रापि सत्त्वात्। सैन्धवोऽस्तीत्यादौ तात्पर्यभ्रमस्य विषयबाधप्रयोजकत्वदर्शनाच्च। क्वचिदबाधस्य यादृच्छिकवत् समाधेयत्वात्।

किंच बाधकेति। ननु द्वैतश्रुतेरद्वैतश्रुतिसाम्यमेव नास्ति। तथाहि – अद्वैतश्रुतिः फलवती, द्वैतश्रुतिर्निष्फलेत्येकं वैषम्यम्। अद्वेतश्रुतिरपूर्वार्थत्वादननुवादिनी। द्वैतश्रुतिस्तु प्रत्यक्षादिसिद्धद्वैतानुवादि नीत्यपरम्। तथाच द्वैतश्रुतेः कथमद्वैतश्रुतिसाम्यमिति चेन्मैवम्। तत्र न तावदाद्यं वैषम्यम्। विद्याऽत्मनि भिदाबोधः, भेददृष्ट्याभिमानेनेति स्मृत्या द्वैतश्रुतेरपि सफलत्वात्। न द्वितीयम्। अद्वैतश्रुतेरपि मिथ्यात्वानुमितिसिद्धद्वितीयाभावानुवादकत्वात्। न चानुमित्यनवतारदशायां श्रुतिप्रवृत्तिसंभवेन नानुवादवात्व मद्वैतश्रुतेरिति वाच्यम् प्रत्यक्षानवतारदशायां द्वैतश्रुतेरपि प्रवृत्तिसंभवेन नानुवादकत्वमिति तुल्यम्। अनुवादकत्वाभावस्य द्वैतश्रुतेरग्रे विस्तरशो मूल एव प्रतिपादनाच्च। श्रुतिसिद्धसर्वस्य प्रत्यक्षागोचरत्वाच्च। श्रुतिप्रतिपादितैकदेशस्य प्रत्यक्षसिद्धत्वेनानुवादकत्वे अद्वैतश्रुतिप्रतिपाद्यजीवब्रह्मैक्यैकदेशजीवस्य प्रत्यक्षसिद्धत्वा दनुवादकत्वापत्तिरित्यलमतिपल्लवेनेति।

किंच बाधकधीबोध्यमिति। ननु शुक्तिरित्येव बाधबुद्धिः। नेदं रजतमिति तु तस्याः फलम्। तथा च कथं भेदस्य बाधकधीबोध्यत्वमिति चेत्, शृणु। न हि नेदं रजतमिति ज्ञानमनुमितिरूपम्। येन तत् फलं स्यात्। किन्तु प्रत्यक्षेण रजतस्मृतिमतो 'नेदं रजतं, किन्तु शुक्तिः' इत्येकस्यैव ज्ञानस्योदयात्। अन्यथा भूतले घटो नास्तीत्यपि फलं स्यात्। ततश्च तत्पूर्वमपि किंचिज्ज्ञानं कारणत्वेन स्वीकर्तव्यं स्यात्। किंच त्वन्मते नेदं रजतमित्यस्यैव बाधकत्वं वक्तव्यम्। तस्याद्वैतश्रुत्यविरुद्धत्वेन प्रमात्वनिश्चयात्। न तु शुक्तिरिति ज्ञानस्य। तस्याद्वैतश्रुतिविरुद्धत्वेनाप्रमात्वेन निश्चितत्वात्। किंच

एतदुभयविलक्षणबोधजनकत्वस्य शब्दे कुत्राप्यदृष्टत्वेन निष्प्रकारकबोधजनकत्वं शब्दस्य न संभवतीति वक्ष्यत इति भावः। न द्वितीय इत्याह – न च त्वन्मत इति। ब्रह्मण औपनिषदत्वेन शब्दान्यप्रमाणाविषयत्वात्। विषयत्वे वा सप्रकारकत्वनिष्प्रकारकत्वविकल्पासहत्वादिति भावः। न च शब्दस्य निष्प्रकारकबोधजनकत्वमग्रे उपपदयिष्यत इति वाच्यम्। तस्य तत्रैव निराकरिष्यमाणत्वात्। किं च बाधिकेति। तथाच भ्रमादिबाधेऽदृष्टकल्पनापत्त्या विश्वबाधिकाया ब्रह्मधियो बाधकत्वं न संभवतीति भावः। ननु नेयमदृष्टचरी कल्पना। स्वप्नजाग्रद्दशयोः भ्रमादिबाधस्य दृष्टत्वात्। तथाहि – स्वप्ने द्रष्टारं दुष्टकरणवन्तं कल्पयित्वा तस्य भ्रमं च कल्पयति। तत्र जाग्रज्ज्ञानेन सर्वेषां निवृत्तिदर्शनात्। तथा जाग्रद्दशायामपि मनुष्यप्रतिकृतौ चैतन्यं कल्पयित्वा तत्समीपवर्तिन्यनादर्शे एवादर्शत्वं कल्पयित्वा स्वप्रतिबिम्बमयं पश्यतीति कल्पयति। तदा नायं चेतनो न वायमादर्श इति प्रमया सर्वनिवृत्तेर्दर्शनाच्चेति चेन्मैवं मंस्थाः। न हि यथा दृष्टान्ते द्रष्टा स्वरूपेण कल्पितः तथा प्रपञ्चद्रष्टा स्वरूपेण कल्पितस्त्वन्मते। येन तदृष्टान्तेनात्र द्रष्टा बाध्येत। किं च दृष्टान्ते न कल्पितद्रष्टृधीबाध्यत्वं द्रष्टुः। किन्तु कल्पकधीबाध्यत्वम्। प्रकृते च प्रपञ्चद्रष्टृजीवधीबाध्यत्वमेव द्रष्टुः स्वीक्रियते। न हि द्रष्टृधीबाध्यत्वं द्रष्टुर्दृष्टचरम्। तथाच कथं नादृष्टकल्पनेति। न च प्रकृते द्रष्टृकल्पकयोरभेद इति वाच्यम्। किं द्रष्टा स्वात्मानमेव द्रष्टृत्वेन कल्पयति, स्वातिरिक्तं वा? नाद्यः। अदृष्टकल्पनापातात्। न ह्युदाहृतस्थले द्रष्ट्रैव द्रष्टा कल्पितः। न द्वितीयः। कल्पकदृष्ट्या कल्पितबाधे दृष्टेऽपि नाकल्पितकल्पकबाधो दृष्ट इत्यदृष्टकल्पनैवेति युक्तमुक्तं न भ्रमादिबाधो युक्त इति।

ननु दृष्टान्ते बाधकधियो द्रष्ट्राद्यबाधकत्वे न बाधधीत्वं प्रयोजकम्। किन्तु द्रष्ट्रादि भ्रमाधिष्ठानतत्वसाक्षात्कारत्वाभावः। एवं च नेदं रजतं किन्तु शुक्तिरेवेति बाधकस्य द्रष्ट्रादिभ्रमाधिष्ठानतत्व साक्षात्कारत्वात् द्रष्ट्राद्यनिवर्तकत्वेऽपि ब्रह्मज्ञानस्य द्रष्ट्रादिभ्रमाधिष्ठानतत्वसाक्षात्कारत्वात् द्रष्ट्रादिबाधकत्वं भविष्यतीति चेन्मैवम्। बाधधीत्वेन द्रष्ट्रादिभ्रमाधिष्ठानतत्वसाक्षात्कारत्वाभावस्यापि साधनात्। न चाप्रयोजकत्वम्। यत्र बाधधीत्वं तत्र द्रष्ट्रादिभ्रमाधिष्ठानतत्वसाक्षात्कारत्वाभाव इति निरुपाधिकसहचारभङ्गरूपविपक्षबाधक संभवेनाप्रयोजकत्वायोगात्। न चाब्रह्मधीत्वमुपाधिः। तस्य पक्षेतरत्वे नानुपाधित्वात्। सर्वेषामपि ज्ञानानां सद्रूपब्रह्मानुविद्धत्वेन ब्रह्मधीत्वव्यतिरेकासिद्धेश्च। किंच सर्वेषामपि भ्रमाणां साक्षात् परम्परया वा ब्रह्माधिष्ठानकत्वात् सद्रूप ब्रह्मणश्चैकत्वात् नेदं रजतमिति ज्ञान रजतभावयो रुभयोरपि ब्रह्मणि कल्पितत्वेन सद्रूपब्रह्मानुवेधस्यावश्यकत्वात् कथं द्रष्ट्रादिभ्रमाधिष्ठानतत्वसाक्षात्कारत्वाभावः? न हि द्रष्ट्रादीनां सद्रूपादन्यदधिष्ठानम्। न च निष्प्रकारकाधिष्ठानसाक्षात्कारत्वं द्रष्ट्रादिबाधकत्वे तन्त्रम्। नेदं रजतमिति तु न तथेति न तेन द्रष्ट्रादिनिवृत्तिरिति वाच्यम्। तादृशज्ञानस्यालीकसमस्य रूपि बाधत्वादर्शनेनादृष्टकल्पनापातात्। अन्यथा शून्यविषयकज्ञानत्वं द्रष्ट्रादिबाधकत्वे तन्त्रमिति ब्रह्मज्ञानस्य तादृशस्यापि बाधकत्वं न स्यादित्यलं मृतमारणेनेति। तस्मात् बाधत्वव्यापकाभावात् ब्रह्मज्ञान स्याबाधकत्वेन नाक्षजे तदादाय बाधशङ्का युक्तेत्यलम्।

इदानीं बाध्यत्वव्यापकाभावात् प्रत्यक्षमबाध्यमेवेत्याह – किंच दोषजन्यमिति। अतो न बाधशङ्का युक्तेति भावः। ननु दोषजन्यज्ञानप्रतिफलितस्यैव साक्षिपदार्थत्वात् कथं साक्षिज्ञानस्य दोषाजन्यत्वमिति

न तावज्जातिः। संशयधर्म्यंशे तदभावापत्तेः। जातेरव्याप्यवृत्तित्वाभावात्। नाप्युपाधिः। तदनिर्वचनात्। न च संशयभिन्नज्ञानत्वं तदिति वाच्यम्। संशयधर्म्यंशे निश्चयत्वानापत्तेः। अन्योन्याभावस्य व्याप्यवृत्तित्वात्। न च यज्ज्ञानं यद्भ्रमादिनिवृत्त्यनुकूलरूपविशेषविषयं तत् तन्निवर्तकम्। भ्रमश्च न तथेति वाच्यम्। भ्रमनिवर्तकता केन रूपेणेति प्रश्ने भ्रमनिवर्तकरूपविशेषविषयत्वेनेत्यस्यानुत्तरत्वात्। आत्माश्रयाच्च। तस्माद् भ्रमाविषयासाधारणधर्मविषयत्वेनैव बाधकत्वम्। ब्रह्मज्ञानं चातादृशमिति कथं तस्य बाधकत्वम्? किं च नेदं निवर्तकतावच्छेदकमुक्तम्। किंतु बाधकत्वव्यापकम्। न च नेदं व्यापकं, बाधकत्वस्याप्रयोजकत्वादिति वाच्यम्। एतदभावबाधकत्वव्यतिरेकयोर्निरूपाधिक सहचाररूपतर्कस्य विपक्षे बाधकत्वात्। तथा च ब्रह्मज्ञाने व्यापकाभावाद् व्याप्यस्य बाधकत्वस्यापि निवृत्तिः। न चैवं नेदं रजतमित्यादिज्ञानेऽपि भ्रमाविषयासाधारणधर्मविषयत्वाभावेन व्यापकाभावात् बाधकत्वाभावः स्यादिति वाच्यम्। तस्य नेदं रजतं किन्तु शुक्तिरित्येवंरूपत्वात्। रजताभावस्य भ्रमाविषयविशेषत्वाच्चेति अलमतिपल्लवेन।

किंचेति। अत्रापि सप्रकारकत्वं निवर्तकधीत्वव्यापकम्। व्यापकनिवृत्तौ व्याप्यनिवृत्तिरावश्यकीति वेदान्त जन्यब्रह्मज्ञानस्य सप्रकारकत्वाभावात् निवर्तकत्वं न स्यादित्यत्र तात्पर्यम्। तेन सप्रकारत्वं न निवर्तकतावच्छेदकम्। प्रमेयमित्यादि ज्ञानस्यापि निवर्तकतापत्तेरित्यादिदूषणमलग्रकं वेदितव्यम्। अस्तु वा सप्रकारकत्वेन निवर्तकता। न चातिप्रसङ्गः। निवर्त्यभ्रमादिविषयीकृतासाधारणप्रकारविरुद्धप्रकारकनिश्चयत्वेन निवर्तकत्वात्। निश्चयत्वं च संशयभिन्नज्ञानत्वम्। संशयेऽपि धर्म्यंशे तद्भिन्नत्वसंभवात्। अन्योन्याभावस्याव्याप्यवृत्तित्वाभ्युपगमात्। न च निवर्तकतायां सप्रकारत्वप्रवेशे गौरवम्। तदभावेऽपि व्यावृत्ताकारत्वेन निवर्तकत्वसंभवात् इति वाच्यम्। सप्रकारत्वाभावे व्यावृत्ताकारत्वस्यैवासंभवात्। तथाहि व्यावृत्ताकारता द्वेधा भवति, विशेषणाद् उपलक्षणाद्वा। तत्राद्ये दण्डीत्यादौ सप्रकारत्वेनैव व्यावृत्ताकारता दृष्टेति सप्रकारत्वप्रवेश आवश्यकः। द्वितीयेऽपि काकवद् देवदत्तगृहमित्यादौ धर्मान्तरोपलक्षणेन व्यावृत्ताकारता दृष्टेति उपलक्षणत्वपक्षे तत्प्रवेशस्यावश्यकत्वात्। स्वरूपमात्रोपलक्षणस्य च व्यर्थत्वात्। स्वरूपस्य नित्यसिद्धत्वात्। व्यावृत्त्यर्थं तदिति चेत्, विशेषासमर्पणे उपलक्ष्ये व्यावृत्त्यसिद्धेः। स्वरूपमात्रोपलक्षणत्वेनाभिमतेऽप्याकाशत्वादौ आकाशपदादिना तत्प्रकारकबुध्यनुभवाच्च। न चाकाशपदादिना निर्विकल्पकधीः संभवति। शब्दस्य निर्विकल्पकधीजनकत्वाभावस्योपपादयिष्यमाणत्वात्। तस्याप्युपलक्षणस्य विशेषणस्य वा व्यावृत्ताकारत्वप्रयोजकत्वे तयोः सप्रकारकधीजनकत्वस्यैव सर्वत्र दृष्टत्वात् सप्रकारकत्वस्य निवर्तकबुद्धौ अवश्यंभावाद् युक्तमुक्तं सप्रकारिकैव धीर्निवर्तिकेति।

किंच बाधिका धीः किं शब्दजन्या, उत शब्दान्यजन्या? आद्येऽपि सप्रकारिका निष्प्रकारिका वा? नाद्य इत्याह – किंच न तावदिति। वेदान्तानां प्रकारविशिष्टज्ञानजनकत्वे विशिष्टस्य मिथ्यात्वात् तत्त्वावेदकत्वलक्षणं प्रामाण्यं न स्यात्। बाध्यसमानयोगक्षेमत्वेन बाधकत्वं च न स्यात्। आरोप्यसत्ताधिकत्ताकविषयत्वस्यैव बाधकत्वे तन्त्रत्वादिति त्वयैवोक्तत्वादिति भावः। द्वितीयं प्रत्याह – नापीति। शब्दो हि शक्त्या लक्षणया वाऽर्थं बोधयेत्। तत्र शक्त्या बोधकत्वस्य शक्यतावच्छेदकप्रकारकत्वनियमात्। लक्षणया तत्त्वस्य लक्ष्यतावच्छेदकप्रकारकत्वनियमात्।

नन्वारोप्यसत्ताधिकसत्ताविषयत्वेनापेक्षिकप्रमाणत्वेन जाग्रदादिज्ञानस्य स्वप्नादिबाधकत्वं भविष्यतीति चेन्न। त्वन्मते प्रपञ्चस्याप्यारोप्यत्वेन तज्ज्ञानस्यारोप्याधिकसत्ताकविषयत्वाभावात्। सत्त्वेन व्यवहारमात्रं व्यावहारिकसत्त्वं, न तु वस्तुनिष्ठं सत्त्वमिति मतेऽस्यायोगाच्च। एतेन व्यावहारिकसद्विषयत्वं बाधकत्वे प्रयोजकम्। प्रपञ्चस्यारोप्यत्वेऽपि सप्रकाराबाध्यत्वेन व्यावहारिकसत्त्वाभ्युपगमात् तज्ज्ञानस्य बाधकत्वे उक्तप्रयोजकस्य सत्वादिति निरस्तम्। आरोप्यत्वाविशेषे रूप्यसत्ता प्रातिभासिकी, जगत्सत्ता व्यावहारिकीत्यस्य वक्तुमशक्यत्वात्। अस्य कल्पनस्याद्यप्यसिद्धेश्च। किं चोभयपक्षेऽपि भ्रमोत्तरविशेषदर्शनजन्यं भ्रमरूपं ज्ञानं बाधकं न स्यात्। उक्तप्रयोजकद्वयस्य तत्राभावात्। न चोत्तरस्य बाधकत्वमेव नेति वाच्यम्। पूर्वज्ञाने स्वकार्याक्षमत्वरूप भ्रमत्वज्ञापकस्याबाधकत्वायोगात्। अपि च ब्रह्मज्ञानं ब्रह्मज्ञानस्य बाधकं न स्यात्। उक्तप्रयोजकद्वयाभावात्। अथैवमन्यूनसत्ताकविषयत्वेन जगज्ज्ञानस्य बाधकत्वम्। भ्रमज्ञानं च न्यूनसत्ताकविषयकमेवेत्यवेहीति चेन्न। अत्राप्यन्योन्याश्रयतादवस्थ्यात्। भ्रमज्ञानस्यापि स्वापेक्षया न्यूनसत्ताकविषयत्वेन स्वबाधकत्वापत्तेश्च। अन्यथा ब्रह्मज्ञानं स्वबाधकं न स्यादिति। तस्मान्मानत्वेन निश्चितत्वमेव बाधकत्वे तन्त्रम्। न च जगत्प्रत्यक्षे ते तदस्ति। प्रत्युताप्रामाण्यनिश्चय एवास्ति इति त्वया स्वीकारात्। तथाच कथं दृष्टान्तसिद्धिरिति साधूक्तं कथं तद्दृष्टान्तेनान्यत्र तच्छङ्केति।

प्रमाणत्वेन निश्चितत्वं बाधकत्वे प्रयोजकं, न त्वन्यदित्यत्र भट्टवार्तिकसम्मतिमाह – प्रतियोगिनीति। जाग्रज्ज्ञाने प्रतियोगिनि विरोधिनि दृष्टे सति प्रमाणत्वेन निश्चिते सति स्वप्नादिबुद्धिरस्माकं मृषा भवेत्। तव तु जाग्रज्ज्ञानप्रामाण्याभावात् जाग्रत्स्वप्नादिभेदः किंकृत इति कारिकार्थः।

बाधकज्ञानं न ब्रह्मज्ञानातिरिक्तं त्वयाङ्गीकर्तुं शक्यते। अपसिद्धान्तात्। नापि ब्रह्मज्ञानं बाधकसत्वादित्याह – अपि चेति। विशेषविषयैव॥ अधिष्ठानगतासाधारणधर्मविषयैवेति यावत्। भ्रमकालीनेत्यपरोक्षबुद्धिविशेषणम् अपरोक्षबुद्धेर्भ्रमरूपत्वदर्शनाय। नन्वधिष्ठानतत्त्वज्ञानत्वेनैव भ्रमनिवर्तकत्वात् विश्वनिवर्तकब्रह्मज्ञानस्य तथात्वात् भ्रमाविषयविशेषविषयत्वस्याभावेऽपि निवर्तकत्वं स्यादिति चेन्न। अधिष्ठानत्वज्ञानं किम् अधिष्ठानस्वरूपज्ञानं वा विवक्षितम्, अथाधिष्ठानस्वरूपमात्रज्ञानम्, उताधिष्ठानगतसाधारणधर्मज्ञानं, तद्गतासाधारणधर्मज्ञानं वा, पराभिप्रेताधिष्ठाननिष्प्रकारकज्ञानं वा? नाद्यः। भ्रमस्यापि अधिष्ठानस्वरूपज्ञानत्वेन स्वनिवर्तकतापत्तेः। अन्यथा ब्रह्मज्ञानस्यापि तत्र स्यात्। स्वरूपविषयत्वाविशेषात्। न द्वितीयः। तद्धि अधिष्ठानेतराविषयकत्वे सति अधिष्ठान स्वरूपविषयत्वम्। एवं च शुक्तिरियमिति ज्ञानस्य नेदं रजतमिति ज्ञानस्य च निवर्तकत्वं न स्यात्। आद्यस्याधिष्ठानेतर शुक्तित्वविषयत्वस्य, द्वितीयस्य रजताभावविषयत्वस्य सत्त्वेन स्वरूपमात्रविषयत्वाभावात्। शब्देन तादृशज्ञानासिद्धेर्वक्ष्यमाणत्वाच्च। न तृतीयः। इदं प्रमेयमिति ज्ञानस्यापि निवर्तकत्वापत्तेः। न चतुर्थः। स असाधारणधर्मः किं भ्रमे भासते, न वा? आद्ये तस्यापि निवर्तकतापत्तेः। द्वितीये घट्टकुटीप्रभातवृत्तान्तः। यतो भ्रमाविषयासाधारणधर्मविषयस्यैव ज्ञानस्य बाधकत्वाभ्युपगमः। ब्रह्मज्ञानस्यातादृशत्वात्। न पञ्चमः। नेदं रजतमिति ज्ञानस्य निवर्तकत्वानापत्तेः। तस्य निष्प्रकारकत्वाभावात्। एतेनाधिष्ठाननिश्चयत्वेन निवर्तकत्वम्। भ्रमश्च न तथेति न तस्य स्वनिवर्तकत्वम्। ब्रह्मज्ञानं च तथेति भवति तत् स्वनिवर्तकमिति निरस्तम्। उक्तविकल्पासहत्वात्। किं च निश्चयत्वं

स्मृतिःप्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्।
प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यत इति ।

भारते। श्रुत्यादिप्रमाणसिद्धेश्वरस्वातंत्र्यवित् यः सः श्रुत्यादिप्रमाणाविषयाज्जीवस्वातंत्र्य रूपाद्विकल्पाद्विरज्यते। मिथ्याभिमानं त्यजतीत्यर्थः॥ युक्तम्॥ युगपद्वृत्तिद्वयापत्तेरिति शेषः॥

व्यासाद्रिसृततर्काब्धिपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यां भाविभाच्छंकितं नखम्॥

भात् बाधनमित्यर्थः॥ प्रत्यक्षस्य भाविबाधकशंकाभंगः॥

न्यायामृतकण्टकोद्धारः

नापीति। ननु प्रकारान्तरेणाबाधितस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य यथाऽऽगमेन बाधः, तथा प्रकारान्तरेणाबाधितस्य सन् घट इत्यादिप्रत्यक्षस्य मिथ्यात्वबोधकागमेन बाध इति निर्णयाद् भाविबाधकशङ्कामादाय दूषणाभिधानेऽनुक्तोपालम्भापत्तिः। वस्तुतस्तु बाधकशङ्कामादायापि प्रत्यक्षस्य बाधकतोद्धारः समीचीन एव। प्रत्यक्षशब्दयोर्बलाबलविचारात् प्राक् किमयं शब्द उपचरितार्थ आहोस्वित् प्रत्यक्षमप्रमाणमिति शङ्कायामुभयोरपि अबाधकत्वप्राप्तौ तात्पर्यलिङ्गैः श्रूयमाणार्थपरतया निश्चितस्यागमस्योपचरितार्थत्वशङ्काव्युदासेन लब्धावकाशत्व संभवादिति चेन्मैवम्। चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्यागमबाध्यत्वाभावस्य प्रतिपादितत्वात्। सन् घट इत्यादिप्रत्यक्षस्य प्रबलस्यागमबाध्यत्वनिर्णयासंभवस्योक्तत्वाच्च। भाविबाधकशङ्कामादायैव दूषणाभिधानस्य युक्तत्वान्नानुक्तो पालम्भापत्तिः। यच्च वस्तुतस्त्वित्यादि तदपि न। अद्वैतागमस्याद्वैते तात्पर्याभावस्य वक्ष्यमाणत्वेन तात्पर्यलिङ्गैः श्रूयमाणार्थपरतया निश्चितत्वकथनस्य शिष्यधन्दनत्वादिति। उक्तरीत्येति। कालात्ययापदिष्टोच्छेदादि स्यादित्याद्युक्तरीत्येत्यर्थः। सर्वविशेषाभावे चेति। ननु विशेषाभावनिश्चयेऽपि विशेषाणामियत्तानवधारणदशायां संशयसंभवात् प्रत्यक्षस्याप्रमाणतया शङ्क्यमानत्वेन शङ्काविरहोपपादनस्यासंभवदुक्तिकत्वाच्चेति चेन्मैवम्। विशेषानवधारयितुर्देवानां प्रियस्येयत्तानवधारणेन संशयसंभवेऽपि प्रमाणत्रित्वं जानतः शास्त्राभिनिविष्टचित्तस्य संशयासंभवेन प्रत्यक्षप्रामाण्योपपत्तेः। यच्च प्रत्यक्षेत्यादि तच्च। एतादृशशङ्काया निर्बीज पिशाचीत्वेनाप्रतिबन्धकतया जगत्प्रत्यक्षस्य बाधकत्वेन शङ्क्यमानेऽपि सुलभत्वादित्याशयः। ननु स्वप्नदृष्टस्य शुक्तिरजतादेश्च भाविबाधेन जाग्रदादिज्ञानेन बाध्यत्वस्य दृष्टत्वात् तदृष्टान्तेन प्रकृतेऽपि बाधशङ्काऽस्त्वित्यत आह – किंचेति। विपरीतप्रमात्वस्यैव बाधकत्वप्रयोजकत्वमभिप्रेत्येदमुक्तमिति भावः।

किमत्र तत्वमिति जिज्ञासां प्रतिबध्नाति। विरुद्धविशेषादर्शनकालीनस्यैव विशेषदर्शनस्य शंकाप्रतिबंधकत्वात्। अवच्छेदकवृत्त्यनित्यत्वेन च साक्षिप्रत्यक्षस्य दोषजन्यत्वस्योक्तेः। अत एव तार्किकोक्तं तदेव ह्याशंक्यत इत्यादि, भट्टवार्तिकोक्तं च इह जन्मनीत्यादि, यच्चोक्तं प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वादित्यादि तत्सर्वं निरस्तम्। आगमादिप्रमाणमूलकशंकाया एव स्वीकारात्। रूप्यादिनिषेधकस्य तु नेदं रजतमित्यादेरद्वैतश्रुत्यनुगुणत्वेन नाप्रामाण्यशंकास्कंदनम्। न वृद्धिमिच्छतो मूलहान्यापत्तिः। नापि सन् घट इत्यादेर्नेदंरजतमित्यनेन समानयोगक्षेमता। अद्वैतश्रुतिविरोधाविरोधाभ्यां विशेषात्। अत एव सौषुप्तिकानंदानुभवस्येत्याद्युक्तमपास्तम्। आनंदस्य ब्रह्मरूपत्वेनाद्वैतश्रुतिविरोधाभावेन तदप्रामाण्यप्रयोजकाभावात्। अत एव नानंदश्रुतेरप्रामाण्यम्। सुरेश्वरवार्तिकवचने अतोऽबबोधकत्वेनेत्यत्राक्षवदिति निदर्शनं व्यावहारिकप्रामाण्यमात्रेण। एवं च तात्विकप्रामाण्याभावेऽपि प्रत्यक्षज्ञानादीनां व्यावहारिकप्रामाण्याभ्युपगमान्न स्वक्रियाव्याघातः'' इति। अत्र ब्रूमः। सत्त्वप्रत्यक्षे कृप्तदोषाभावनिश्चयेऽपि निर्दोषाद्वैतागमस्योत्तेजकतया न शंकाप्रतिबंधो यथा तथा निर्दोषाद्वैतागमेऽपि निर्दोषप्रतिद्वंद्वप्रत्यक्षनिबंधना शंका स्यादेव। सत्प्रतिपक्षन्यायस्योभयत्र तुल्यत्वात्। अत एव सत्प्रतिपक्षे प्रकृतहेत्वोः किं तत्वमितिजिज्ञासां तार्किका मन्यंते। तस्मात्प्रत्यक्षे शंकांगीकारे श्रुतावपि सा दुर्वारा। प्रत्यक्षस्य श्रुत्यवैषम्यस्यैवात्रापाद्यमानत्वात्। यच्चोक्तं विरुद्धविशेषादर्शनकालीनस्येत्यादि तदपि न। प्रत्यक्ष इव श्रुतावपि विरुद्धविशेषदर्शनकालीनस्य विशेषदर्शनस्य बाधशंकां प्रत्यप्रतिबंधकत्वेन शंका स्यादेव। यदपि चोक्तमागमादिप्रमाणमूलकेत्यादि। तदपि न। श्रुतावपि प्रत्यक्षमूलकशंकाया एव स्वीकारादित्यस्यापि सुवचत्वात्। यदपि मूलहान्यापत्तिसमाधानमुक्तं तदपि न। श्रुतेः प्रत्यक्षवद्बाधशंकादुरवस्थाया आनुगुण्यस्य नेदं रजतमिति ज्ञानेऽकिंचित्करत्वात्। यदपि चोक्तं सन् घट इत्यादेर्नेदं रजतमित्यनेन न समानतेति तदपि न। अप्रामाण्यशंकादुष्टश्रुतेर्विरोधस्य नेदं रजतमिति ज्ञाने तद्विरोधस्य च सन् घट इति ज्ञाने चाप्रयोजकत्वात्। अत एव सुषुप्तावानंदानुभवस्येत्याद्यपि निरवद्यम्। तस्मात्प्रत्यक्षे बाधशंकायां सर्वविप्लवापत्तिरिति साधूक्तम्।

श्रुतिस्मृतिभ्यामपि प्रत्यक्षप्रामाण्यसिद्धिरित्याह – स्मृतिरिति। यद्यपि ''स्मृति प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्। प्रमाणमिति विज्ञेयम्'' इति प्रमाणलक्षणोदाहृतश्रुतौ ज्ञानरूपायाः स्मृतेः प्रामाण्यमुक्तम्। न श्रुतेः। तथाप्यैतिह्यशब्दस्याशेषागमोपलक्षणत्वात् श्रुतेरपि प्रामाण्यमुक्तम्। अर्थकथनमिदं न श्रुतिपाठः।

प्रमाणतोपयोगिनी। इंद्रियस्याज्ञातकारणत्वात्। शब्दे तु ज्ञातस्य कारणत्वमिति वैषम्यम्। यदि शब्दप्रत्यक्षयोः साम्यं तर्हि प्रस्तरायजमानत्वादिग्राहिप्रत्यक्षस्य यजमानः प्रस्तर इति श्रुतेश्च साम्येन संशय एव स्यान्न तु गौण्याऽर्थनिर्णय इति। तस्माद्बाधविबाधशंकायां सर्वविप्लवापत्तिः सूक्ता। दोषजन्यत्वज्ञानरूपकारणाभावादपि न भाविबाधशंकेत्याह – किं च प्रत्यक्षे कृत्स्नेति। योग्यानुपलब्ध्या दूरादिदोषाभावनिश्चयेपि सन् घट इति प्रत्यक्षे यदि दोषशंका तदा श्रुतावपि सा स्यादित्यर्थः। ननु दूरादिदोषाभावनिश्चयेऽपि न दोषसामान्याभावनिश्चयः। स्वाप्नप्रत्यक्षवदन्यस्यापि दोषस्य संभावितत्वादिति शंकते – स्वाप्नप्रत्यक्षेति। तदा स्वप्नावस्थायां। सममित्याह – स्वाप्न इति। सत्त्वादित्यतः परं न दोषसामान्याभावनिश्चयः। स्वाप्नवेदवदन्यस्यापि संभावितत्वादिति पूरणीयम्। नन्वद्वैतश्रुतौ स्वाप्नवेदवैषम्यानुभवान्न स्वाप्नवेदवद्दोषांतरशंकेत्यत आह – स्वाप्नवैषम्येति। सन् घट इति प्रत्यक्षेऽपि स्वाप्नप्रत्यक्षवैषम्यानुभवान्न दोषांतरशंकेत्यर्थः। प्रत्यक्षसामान्ये दोषजन्यत्वरूपकारणाभावात्कार्यविरहमुक्त्वा प्रत्यक्षविशेषे साक्षिणि बाह्ये च तमाह। न तावत्साक्षिणीतिदोषजन्यमेव बाध्यमित्यादिना बाध्यत्वे तद्व्यापकदोषजन्यत्वानुपलब्धिरूपबाध उक्तः साक्षिणि। इह तु तस्मिन् बाधशंकाकारणाभावाद्बाधशंकाभाव उच्यत इति नाभेदः। ननु दोषजन्यत्वज्ञानाभावेऽपि प्रमाणाजन्यत्वेन साक्षिणि शंका स्यादत आह – प्रमाणेति॥ तदप्रामाण्ये तस्याप्रामाण्यहेतुबाधशंकायां॥ वेदस्यापीति॥ अप्रामाण्यहेतुबाधशंकापातादित्यर्थः। तन्निरासात् दोषजन्यत्वज्ञाननिरासेन शंकानिरासात्॥ अन्यथेति॥ परीक्षायामप्यनाश्वास इत्यर्थः। संगृह्णाति॥ एवं चेति॥ अपवाद्यत्वेनेति॥ वदः सुपि क्यप् चेत्यत्र सुपग्रहणात् चोपसर्गग्रहणाभावस्य सत्सूद्विषेत्यत्रोपसर्गहणेन ज्ञापितत्वादपवाद्यमित्यत्र क्यव्यतौ न भवतः। किं तु हलंताण्यदेव॥ इह जन्मनीति॥ इह जन्मनि बाधो नोपलभ्यते। योग्यवस्थायां बाधो भविष्यति वा न वेति न विद्म इत्यपहासः॥ वृद्धिमिच्छत इति॥ जगन्मिथ्यात्वरूपां वृद्धिमिच्छता घटादिप्रत्ययस्य बाध्यत्वमुक्तम्। तत्समानयोगक्षेमत्वान्नेदं रजतमिति बाधस्यापि प्राप्नोति। तथा च बाधसिद्धं रूप्यादेर्मिथ्यात्वरूपं मूलं हीयेतेत्यर्थः। मूलरक्षार्थं रूप्यादिबाधस्य सत्यवे घटादिसत्ताग्राहकस्यापि सत्यत्वं स्यादित्याहतथा चेति॥ ननु सौषुप्तिकानंदानुभवस्याप्रामाण्येऽप्यात्मन आनंदरूपता "विज्ञानमानंदं ब्रह्म" इतिश्रुत्या सेत्स्यतीत्यत आह – आनंदश्रुतेरिति॥ तथा च फलवदज्ञातस्वार्थतात्पर्यकत्वरूपं प्रामाण्यमसिद्धमित्यर्थः।

अत्र वदंति – "सत्त्वप्रत्यक्षाद्वैतागमयोः कृत्स्नदोषाभावनिश्चयस्य समानत्वेन तस्य प्रत्यक्षे अप्रामाण्यशंकायामप्रतिबंधकत्वात्। न हि सत्प्रतिपक्षे उभयत्र दोषाभावनिश्चयः

शंकामुपपाद्य प्रत्यक्षमप्रमाणीकर्तुमुद्युक्तेन शंकागोचरसाक्षिप्रत्यक्षेऽपि शंकोपपादनाद्घटादिप्रत्यक्षे शंकाविरहोपपादनमुखेन घटादिप्रत्यक्षस्य प्रामाण्यमेव साधितं स्यादित्यर्थः। भाविबाधेऽपि बाधशंकापातेनेत्यादिना ज्ञानमात्रे शंकायां स्वव्याघात उक्तः। अत्र तु साक्षात्कारमात्रे शंकायां स उच्यत इति विशेषः। नापि शब्दान्यजन्येति। मुक्तस्वरूपानंदसाक्षात्कारादिस्तु स्वरूपरूपो न जन्य इत्यर्थः। साक्षिणो नित्यत्वपक्षे उक्तदोषे सत्येव दोषांतरमाह – दशम इति। शंकाहेतोः साधारणधर्मदर्शनादेः शब्दतदन्यजन्यसाक्षात्कारयोः सत्त्वेनेत्यर्थः। अद्वैतश्रुतीति। द्वैतश्रुतिमेवानेकमेव सद्द्वितीयमित्यादिकामद्वैतश्रुतित्वेन गृह्णातीति शंकाऽपि स्यादित्यर्थः। शून्याद्वैतमिति। यद्यप्येतादृशशंकया शून्याद्वैतं तत्वमिति श्रुतेरभावासिद्धिरेव। न तु शून्याद्वैतसिद्धिः। तथापि तादृशश्रुतेरभावासिद्धौ तादृशश्रुतिसत्त्वापत्त्या तन्मूलैव शून्याद्वैतसिद्धिः स्यादित्यर्थः।

ननु प्रत्यक्षस्य तत्वावेदकेनाद्वैतागमेन बाधः शंक्यते। अद्वैतागमस्य न तत्वावेदकेन बाधः शंकास्पदः। अन्यस्य तत्वावेदकस्याभावादित्यत आह – न चात्माद्वैतेति। प्रत्युत तात्विकबाधस्य क्वाप्यदृष्टत्वात्स एव न शंकास्पदः। अतात्त्विकबाधस्तु स्वप्नादौ दृष्ट इति स एव व्यावहारिकसत्त्वविरोधी अद्वैतागमे शंक्यते। व्यावहारिकसत्त्वविरोधित्वमात्रेण ममेष्टसिद्धिरित्यर्थः। नन्वप्रातिभासिकत्वरूपविशेषदर्शनान्नाद्वैतागमे व्यावहारिकबाधशंका भविष्यतीत्यत आह – अप्रातिभासिकत्वधीरिति। तथा च तात्विकत्ववदप्रातिभासिकत्वविशेषः पक्षे नास्तीति न तत्र तद्दर्शनं शंकाविरोधीत्यर्थः। श्रुतिरिति। श्रुतिर्नित्यत्वाद्भ्रमादिजन्यत्वादिदोषशंकारहितेत्यर्थः। तथापि तात्पर्यभ्रमरूपदोषशंका स्यादेवेति दोषे सत्येव दोषांतरमाह – त्वन्मत इति। ननु नाद्वैतश्रुतौ दोषबाधशंका। तस्यां प्रमाकरणत्वरूपविशेषदर्शनादित्यत आह – तस्या इति। तवेति। शंकयेति योजना। द्वैतवक्तुर्द्वैते यथा भ्रमो, यथा च ब्रह्ममीमांसायां प्रत्यधिकरणं पूर्वपक्ष्यभिमतार्थे पूर्वपक्षिणो भ्रमस्तथा ममाद्वैतवादिनोऽप्यद्वैप्यद्वैतेतात्पर्यधीर्भ्रम इति तव शंकयाऽद्वैतश्रुतिजन्याद्वैतधियः प्रमात्वासिद्धेरित्यर्थः।

अत्र वदंति – "न वयं निश्चितमात्रे शंकां ब्रूमः। येनोक्तसर्वविप्लवापत्तिः। अपि तु समत्वेन प्रमाणांतर उपस्थित एव निश्चितेऽपि सत्त्वादौ शंका भवतीति ब्रूमः। तथा च यदुक्तं भट्टवार्तिके दुष्टज्ञानगृहीतेत्यादि तदपि न विरुध्यते। गृहीतमात्रबाधस्य तच्छंकायाश्चानुक्तेरिति। अत्र ब्रूमः। शब्दप्रत्यक्षयोः समत्वमसिद्धम्। प्रमाणत्वोपयोगिशब्दसिद्धेः प्रत्यक्षाधीनत्वेन तस्योपजीव्यत्वात्। यद्यप्यतींद्रियसिद्धिरपि शब्दाद्भवति। तथापि सा नेंद्रियस्य

इत्यनवस्थानात्। तस्माच्चैतन्यमेव साक्षीत्यंगीकार्यम्। तच्च निर्दोषमेव। यच्चोक्तं मद्वैततात्पर्यग्रहस्येत्यादि तदपि न। प्रत्यक्षाद्यविरोधासिद्धेरुक्तत्वात्। यच्चोक्तं भ्रमजन्यत्वस्येत्यादि। अत्र ब्रूमः। कारणीभूतज्ञानविषयककार्यज्ञानसंबंधिविषयबाधं प्रति भ्रमजन्यत्वस्य प्रयोजकत्वमस्त्येव। यथा शाब्दज्ञानविषयबाधं प्रति संसर्गाबाधरूपयोग्यताभ्रमत्वम्। तदिहाद्वैततात्पर्यभ्रमस्यापि येन केनापि रूपेणाद्वैतविषयतया तद्भ्रमत्वनिबंधनः शाब्दाद्वैतज्ञानविषयापहारः स्यादेव। तस्मात्साधूक्तं दोषजन्यमेवेत्यादि।

सन्घट इति ज्ञाने अबाध्यत्वव्याप्यमाह – बाधकतुल्यमानेति। ननु द्वैतस्य प्रत्यक्षादिलौकिकमानसिद्धत्वेन तद्बोधकश्रुतेरनुवादकृतया फलवज्ज्ञानस्वार्थतात्पर्य काद्वैतश्रुतिसाम्याभाव इति चेन्मैवम्। वर्तमानमात्रग्राहिप्रत्यक्षगृहीतव्यावहारिकसत्यद्वैतातिरिक्त कालत्रयाबाध्यतात्विकद्वैग्राहिकत्वोपपत्त्याद्वैत श्रुतेरननुवादकत्वात्। फलवज्ज्ञातस्वार्थतात्पर्यकत्वाच्च बाधकमानतुल्यमानत्वम्। बाधकधीबोध्यमिति। अधिष्ठानवदित्यर्थः। तयेति। स्वविषयस्य ब्रह्मणोऽभेदस्य वा बाध्यमानाद्भेदादभिन्नतया औदासीन्येन भेदाभेदानवगाहित्वेन वेत्यर्थः। ननु बाधकधियो भेदविषयत्वं नाभ्युपगच्छामः। इयं शुक्तिरित्येव बाधकबुद्ध्युदयात्। तस्यास्तु नेदं रजतमितिवत्तद्बुद्धिः फलम्। व्यावृत्ताकारतैव बाधधिय आवश्यकी। सा च स्वरूपोपलक्षणबलान्निष्प्रकारज्ञानेऽप्यस्तीति न बाधकधीबोध्यत्वं भेदस्येति चेत्। मैवम्। इयं शुक्तिरित्येवं ज्ञानस्य बाधकत्वाभावात्। इदंरजतयोरिव इदंरजतशुक्तीनाप्यभेदग्रहसंभवात्। इयं शुक्तिरिति ज्ञानेन स्वविषयस्य शुक्तेः रजतस्य च भेदे गृहीते रजतभ्रमनिवृत्तेरनुभवसिद्धत्वात्। अत एव पीतः शंख इति भ्रमः शंखत्वप्रत्यक्षेऽप्यनुभूयते। पीतभेदप्रत्यक्षे तु नेति युक्तं भेदानवगाहिज्ञानस्य न बाधकत्वमिति बाधकधीबोध्यस्य भेदस्य न बाध्यतेति साधूक्तम्।

कथं चेयमिति। सन् घट इति प्रत्यक्षे भाविबाधकशंका किमबाधितबाधो भविष्यतीत्येवंरूपा आहोस्विद्बाधितबाधो भविष्यतीत्येवंरूपा। नाद्यः, कोट्यप्रसिद्धेः। त्वन्मते रूप्यादिबाधेऽपि बाधशंकायाः सत्त्वात्। न द्वितीयः। अबाध्यत्वाविरोधित्वात्। बाधो भविष्यतीत्येवं शंकायाः सामान्यविषयिकायाश्च यावद्विशेषबाधेनायोगादित्यर्थः। पूर्वं जाग्रदादिज्ञानस्याप्रमात्वेनेत्यादिना बाधस्यापि बाध्यत्वाद्रूप्यादेर्मिथ्यात्वासिद्धौ दृष्टांतासिद्धिरित्युक्तम्। अत्र तु बाधस्यापि बाध्यत्वादबाधितबाधरूपकोटेरप्रसिद्धौ तत्कोटिकसंशयानुपपत्तिरुच्यत इति भेदः। नापि शब्देति। अद्वैतसाक्षात्कारस्तु शब्दजन्य इत्यर्थः। स्वक्रियाविरोधाच्चेति। सर्वत्र प्रत्यक्षे शंकाऽस्तीति वदतस्तव मते ब्रह्मायाससाध्या वेदांतश्रवणादिक्रिया वेदांतवाक्यजन्यधीप्रमाण्य ग्राहिसाक्षिगोचरप्रामाण्यशंकाभावसाध्या विरुध्येतेत्यर्थः। स्वव्याघाताच्चेति। सर्वप्रत्यक्षे

विश्वबाधिका धीः किं शब्दजन्या शब्दाजन्या वा। आद्येऽपि किं सप्रकारा निष्प्रकारा वा। त्वदनभिप्रेतत्वान्नाद्य इत्याह – न तावत्सेति। शब्दस्य निष्प्रकारकज्ञानजनकत्वासिद्धेर्न द्वितीय इत्याह – नापीति। नांत्य इत्याह – न च त्वन्मत इति। लिंगशब्दयोरबाधकत्वादित्यत्र प्रमाणस्याबाधकत्वमुक्तम्। इह तु ज्ञानस्येति भेदः। किं च बाधकधीरिति। अत्राध्यस्तस्येति परमते इष्टत्वोपपादनाय। तथाच भ्रमादेरबाध्यतया सत्यत्वेन तत्रैव दृश्यत्वादेर्व्यभिचार इति भावः।

अत्र वदंति – "यदा हि स्वप्ने द्रष्टारं दुष्टकरणवंतं कल्पयित्वा तस्य भ्रमं कल्पयति तत्र जागरज्ञानेन सर्वेषां निवृत्तिदर्शनात् जाग्रद्दशायामपि मनुष्यप्रतिकृतौ चैतन्यं कल्पयित्वा तत्समीपवर्तिन्यनादर्शे एवादर्शत्वं कल्पयित्वा स्वप्रतिबिंबं पश्यतीति कल्पयति तदा नायमादर्शो नायं चेतन इति प्रमया सर्वनिवृत्तिदर्शनाच्च। नेयमदृष्टचरी कल्पना। तथाचेयं शुक्तिरित्याद्यधिष्ठानज्ञानं रज्वां सर्पभ्रममिव दृष्टाद्यध्यासं मा निवीवृतत्। तत्कस्य हेतोः? तदधिष्ठानसाक्षात्कारत्वाभावात्। ब्रह्मज्ञानं त्वाकाशादिभ्रममिव द्रष्टृदोषादिभ्रममपि निवर्तयेदेव। तत्कस्य हेतोः? अशेषभ्रमाधिष्ठानतत्वसाक्षात्कारत्वात्। एवं च बाधबुद्धित्वं न दोषाद्यबाधकत्वे तंत्रम्। किंतु तद्भ्रमाधिष्ठानतत्वसाक्षात्कारभिन्नत्वमेव। ननु कल्पितत्वादुक्तदृष्टांते तद्बाध्यताम्। इह तु कथमिति चेत् हंत! ब्रह्मव्यतिरिक्तस्य सर्वस्य कल्पितत्वमंगीकुर्वतामस्माकमिदमनिष्टं महदापादितमिति। अत्रोच्यते। यदुक्तं स्वप्ने द्रष्टारमित्यादि तन्न युक्तम्। दुष्टकरणवतो द्रष्टुर्गजादि वत्कल्पितत्वेन स्वप्नद्रष्टृत्वाभावात्। यच्च मनुष्येत्यादि तन्न। तेषामपि दृश्यत्वेन द्रष्टृत्वासंभवात्। तद्द्रष्टुरन्यत्वात्। यो यद्भ्रमे द्रष्टा स तद्भ्रमबाधेन न बाध्यत इति व्याप्तेरविकलत्वात्। एवं च जगद्भ्रमद्रष्टृदोषादीनां जगद्भ्रमबाधकेन बाधो न युक्त इति।

सन् घट इति बाध्यत्वेनाभिमते ज्ञाने बाध्यत्वव्यापकाभावमाहदोषजन्यमेवेति। नन्वपौरुषेयत्वेन निर्दोषश्रुतिजन्यमद्वैतज्ञानं तव मत इव मम मते दोषाजन्यमपि साक्षिज्ञानं बाध्यतामित्यत आह – अद्वैतज्ञाने त्विति। अत्राहुः – "चैतन्यस्य स्वरूपतो दोषाजन्यत्वेऽपि तदवच्छेदिकाया अविद्यावृत्तेर्दोषजन्यत्वात्तत्प्रतिफलित चैतन्यस्यैव साक्षिपदार्थत्वादद्वैततात्पर्यग्रहस्य प्रत्यक्षाविरोधेन प्रमारूपतया दोषत्वाभावान्न तज्जन्यमद्वैतज्ञानं बाध्यम्। भ्रमजन्यत्वस्य विषयबाधाप्रयोजकत्वाच्चेति। अत्रोच्यते। अविद्यावृत्तिप्रतिबिंबितचैतन्यस्य साक्षिपदार्थत्वे प्रतिबिंबनोपाधेरविद्यावृत्तेस्साक्षिविषयत्वार्थं तस्या एवोपादानं न युक्तम्। प्रतिबिंबनोपाधिभूताया वृत्तेर्विषयिकोटिप्रवेशेन विषयत्वानुपपत्तेः। नाप्यन्यस्याः। तस्या अपि विषयत्वार्थमन्यस्या

भ्रमकालीनापरोक्षबुद्धिर्भ्रम एव। स्वस्य स्वकालीनत्वात्। तदविषयो विशेषः शुक्तित्वादिः। तद्विषया इयं शुक्तिरित्यादिधीर्बाधिकेत्यर्थः। यद्वा, परमते भ्रमोऽविद्यावृत्तिः। तत्कालीनापरोक्षधीरिदमित्याकारांतःकरणवृत्तिः। तदविषयः शुक्तित्वादिकमित्यर्थः। नन्वधिष्ठान तत्वज्ञानत्वेनैव भ्रमनिवर्तकत्वम्। ब्रह्मज्ञानं च तथेति विश्वभ्रमनिवर्तकमिति। मैवम्। अधिष्ठानगतकिंचित्प्रकारानवगाहिनो ज्ञानस्य स्वाश्रयप्रतियोगिकान्योन्या भावासमानाधिकरण धर्मज्ञानत्वरूपतत्वज्ञानत्वासिद्धेः। अधिष्ठानतत्वस्य ज्ञानमधिष्ठानतत्वज्ञानम्। न ह्यधिष्ठानस्वरूपमेवाधिष्ठानस्य तत्वम्। तथासति प्रमेयत्वे प्रमेयत्वप्रकारकज्ञानवत्स्वप्रकारकत्वापत्तौ ब्रह्मज्ञानस्य निष्प्रकारत्वासिद्धिः स्यात्। बाधकत्वव्यापकांतराभावमाह – किंचेति। निर्विकल्पिकाया इति। जागाराद्यकालीनरजतभ्रमहेतुशुक्तिरूपधर्मिज्ञानोपपादकत्वेन शुक्ति निर्विकल्पकस्यावश्यकतया तस्य च रजतभ्रमाविरोधित्वादित्यर्थः। तस्मात्सप्रकारकमेव ज्ञानं भ्रमविरोधि।

अत्रवदंति – निवर्तकतायां सप्रकारकत्वं न प्रवेश्यम्। गौरवात्। नन्वावश्यकः सप्रकारकत्वनियमः। व्यावृत्ताकारज्ञानत्वेनैव भ्रमनिवर्तकत्वात्। अन्यथा अनुवृत्ताकारज्ञानादपि तन्निवृत्त्यापत्तेरिति चेत्सत्यम्। व्यावृत्ताकारत्वेन ज्ञानस्य भ्रमनिवर्तकता। न तु तत्र विशेषप्रकारकत्वनियमः। तथाहि – व्यावृत्ताकारता हि द्वेधा भवति। विशेषणादुपलक्षणाच्च। तत्राऽद्ये सप्रकारत्वनियमः। द्वितीयेऽपि धर्मांतरं चेदुपलक्षणं तस्माद्व्यावृत्ताकारत्वे सप्रकारकतैव। यदि तु स्वरूपोपलक्षणाद्व्यावृत्ताकारता तदा निष्प्रकारकतैव। उपलक्षणस्य तत्राप्रवेशात्। स्वस्य च स्वस्मिन्नप्रकारत्वात्। न च प्रमेयत्वादिवत्स्वस्यैव स्वस्मिन्प्रकारत्वमिति वाच्यम्। त्वयापि केवलान्वयिन्ये- वागत्या तथांगीकारान्न सर्वत्र। अथाऽकारप्रकारयोरभेदाद्ब्रह्माकारतैव ब्रह्मबुद्धेस्तत्प्रकारत्वमिति चेन्न। विशिष्टबुद्धेर्विशेष्याकारत्वेऽपि तदप्रकारत्वादाकारप्रकारयोर्भेदात्। आकारश्च वृत्तिनिष्ठः कश्चिद्धर्मोऽसाधारणव्यवहारहेतुः। तस्माद्यथाऽकाशपदाच्छब्दाश्रयत्वोपलक्षितधर्मिस्वरूपमात्रं ज्ञायते तद्वदत्रापि द्वितीयाभावाद्युपलक्षितब्रह्मस्वरूपज्ञानं व्यावृत्ताकारं द्वैतनिवर्तकमपरोक्षं वेदांतवाक्यादिति। अत्रोच्यते। उपलक्ष्ये किंचिद्धर्मादधत एवोपलक्षणत्वम्। अत एवेत्थंभूतलक्षणे तृतीया। कंचित्प्रकारं प्राप्त इत्थंभूतः। तस्य लक्षणे ज्ञापने तृतीयेति पाणिनिसूत्रव्याख्याने। तथाचोपलक्ष्ये ब्रह्मण्युपलक्षणस्य द्वितीयाभावस्य स्वसंसृष्टप्रमाजनकत्वमेवाद्वितीयादिशब्दानाम्। न निष्प्रकारकज्ञानजनकत्वम्। अस्त्वेतद्यथा तथा। तथापि पराभिप्रेतस्य निष्प्रकारकज्ञानस्य न बाधकत्वम्। निष्प्रकारकज्ञानस्य स्वरूपमात्रविषयकस्य भ्रमविषयीभूतस्वरूपानपहारकत्वात्। अर्थापहाराद्बाध इति परैरप्यभ्युपगतमिति।

न वा,

'प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥'

इत्यादि स्मृतिविरोधः। तस्मात्सिद्धं बाधनिश्चयेन तच्छङ्कया वा प्रत्यक्षादेरद्वैता गमानुमानाद्यविरोधित्वम्। इति भाविबाधोपपत्त्या प्रत्यक्षबाधोद्धारः॥

न्यायामृततरङ्गिणी

प्रत्यक्षमप्रमाणमेवेति प्रथमः पक्षः स्वतः प्राप्ततत्वावेदनलक्षणप्रामाण्यस्य त्यागः किमनुमानविरोधादागमविरोधाद्वा भाविबाधकशंकामात्रेण वेति त्रेधा विकल्पितः। तत्राऽद्यौ निराकृतौ। तृतीयं निराकरोति – उक्तरीत्येति। जात्या उपक्रमादिन्यायैश्च प्रबलेन प्रत्यक्षेण विरोधाल्लिंगशब्दयोर्बाधाक्षमत्वादित्यर्थः। प्रत्यक्षस्येति। प्रत्यक्षांतरस्याप्रमाणतया शंक्यमानत्वे नाबाधकत्वादित्यर्थः। सर्वविशेषेति। न च सर्वविशेषाणामियत्तानवधारणदशायां संशयसंभव इति वाच्यम्। बाधकत्वेन संभावितानामागमानुमानादिप्रमाणविशेषाणामियत्तावधारणकाले तैर्बाधाभावस्य निश्चयसंभवात्। ननु प्रत्यक्षशब्दयोर्बलावलविचारात्प्राक् किमयं शब्द उपचरितार्थः आहोस्वित्प्रत्यक्षमप्रमाणमिति शंकायामुभयोरप्यबाधकत्वप्राप्तौ तात्पर्यलिंगैः श्रूयमाणार्थपरतया निश्चितस्यागमस्योपचरितार्थत्वशंकाव्युदासेन न लब्धावकाशत्वसंभव इति चेन्मैवम्। शब्दे प्रतीयमानार्थपरतायां हेतुभूतेभ्यस्तात्पर्यलिंगेभ्यः सकाशात्प्रत्यक्षविषयार्थसत्यत्वे फलपर्यंतपरीक्षाया बलवत्त्वेन प्रत्यक्षस्यैव लब्धावकाशत्वसंभवात्। प्रत्यक्षविरुद्धे तात्पर्यलिंगानां तात्पर्यासाधकत्वात्। किंचेति। जाग्रच्छब्देन स्वप्नदृष्टस्य गजादेरभावः। आदिपदेन शुक्तिरूप्यादेरभावः। तयोर्ज्ञानमित्यर्थः। स्वप्नादेरित्यादिशब्देन शुक्तिरूप्यादि। प्रतियोगिनीति। जाग्रज्ज्ञाने स्वप्नगजादिविरोधिनि गजाद्यभावे ज्ञाते अस्माकं सत्यमिथ्यात्वविवेकवतां स्वप्नादिबुद्धिर्मृषा मिथ्यार्थावभासिका भवेत्। तव सर्वमिथ्यात्ववादिनः बाधकत्वेनाभिमतस्य जाग्रद्गजाद्यभावज्ञानस्य मिथ्यार्थावभासत्वात्स्वप्नगजादेर्मिथ्यात्वं न सिध्यति। तथाच दृष्टांतासिद्धिरिति भावः। न चारोप्यसत्ताधिकसत्ताकविषयत्वेनाऽपेक्षिकप्रमात्वेनान्यून सत्ताकविषयत्वेन वा जाग्रज्ज्ञानस्य नेदं रूप्यमिति ज्ञानस्य वा बाधकत्वमिति वाच्यम्। आरोप्यसत्ताधिकसत्ताकविषयकमिदं जाग्रदादिज्ञानमिति ज्ञानस्यापि बाधितत्वेन जाग्रज्ज्ञाने आरोप्यसत्ताधिकसत्ताक विषयकत्वस्यासिद्धेः। विश्वबाधकाभिमतज्ञाने बाधकत्वव्यापकाभावमाह – भ्रमकालीनेति।

कृत्स्नदोषाभावनिश्चयस्य समानत्वेन प्रामाण्यशङ्कायामप्रतिबन्धकत्वात्। न हि सत्प्रतिपक्षे उभयत्र दोषाभावनिश्चयः किमत्र तत्त्वमिति जिज्ञासां प्रतिबध्नाति। विरुद्धविशेषादर्शनकालिकस्यैव विशेषदर्शनस्य शङ्काप्रतिबन्धकत्वात्। अवच्छेदकवृत्त्य नित्यत्वेनच साक्षिप्रत्यक्षस्य दोषजन्यत्वोक्तेः। अत एव यदुक्तं तार्किकैः – 'तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा न भवन्तीति। उक्तं च भट्टवार्तिके बौद्धं प्रति–

'इह जन्मनि केषांचिन्न तावदुपपद्यते।
योग्यवस्थागतानां तु न विद्मः किं भविष्यति॥'

इति। तथा च प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वादिह चोत्पत्तिस्वतस्त्वापवादस्य दोषस्य ज्ञप्तिस्वतस्त्वापवादस्य बाधस्य चादर्शनात्, निर्मूलशङ्कायाश्च स्वक्रियाविरोधेनानुत्थानाभ्युपगमात् सुस्थं प्रत्यक्षस्य प्रामाण्यमिति – तदपि निरस्तम्। आगमादिप्रमाणमूलकशङ्काया एव स्वीकारात्। रूप्यादिनिषेधस्य तु 'नेदं रजत'मित्यादेरद्वैत श्रुत्यनुगुणत्वेन नाप्रामाण्यशङ्कास्कन्दनम्। अतो न वृद्धिमिच्छतो मूलहान्यापत्तिः। नापि 'सन् घटः' इत्यादेः 'नेदं रजतं' इत्यनेन समानयोगक्षेमता; अद्वैतश्रुतिविरोधाविरोधाभ्यां विशेषात्। अत एव – सौषुप्तिकानन्दानुभवस्याप्यप्रामाण्ये कथमात्मन आनन्दरूपता तात्त्विकी? आनन्दश्रुतेरनुभूतातात्त्विकानन्दानुवादकत्वोपपत्तेरिति अपास्तम्। आनन्दस्य ब्रह्मरूपत्वेनाद्वैतश्रुतिविरोधाभावेन तदप्रामाण्यप्रयोजकाभावात्। अत एव नानन्द श्रुतेरप्रामाण्यम्। तदुक्तं खण्डने–

'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम्॥' इति।

उक्तं च सुरेश्वरवार्तिके–

'अतोऽवबोधकत्वेन दुष्टकारणवर्जनात्।
अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवत् श्रुतेः॥' इति।

अत्र चाक्षादिवदिति निदर्शनं व्यावहारिकप्रामाण्यमात्रेणेति द्रष्टव्यम्। एवं च तात्त्विकप्रामाण्याभावेऽपि प्रत्यक्षादीनां व्यावहारिकप्रामाण्याभ्युपगमात् न स्वक्रियाव्याघातः।

तदवच्छेदिकाया अविद्यावृत्तेर्दोषजन्यत्वात्। तत्प्रतिफलितचैतन्यस्यैव साक्षिपदार्थत्वात्। अद्वैततात्पर्यग्रहस्य च प्रत्यक्षाद्यविरोधेन प्रमारूपतया दोषत्वाभावात् न तज्जन्यमद्वैतज्ञानं बाध्यम्। भ्रमजन्यत्वस्य विषयबाधाप्रयोजकत्वाच्च। न च बाधकतुल्यमानताकद्वैत श्रुतिसंवादिद्वैतप्रत्यक्षं कथं बाध्यमिति वाच्यम्। द्वैतस्य प्रत्यक्षादिलौकिकमानसिद्धत्वेन तद्बोधकश्रुतेरनुवादकतया फलवदज्ञातस्वार्थतात्पर्यकाद्वैतश्रुतिसाम्याभावात्। ननु बाधकधीबोध्यं न बाध्यम्। भेदश्च बाधकधीबोध्यः। तया स्वविषयस्य भिन्नत्वेनैव ग्रहात्। नेदं रजतमितिवद् अभिन्नतयोदासीनतया वा ग्रहणे बाधकत्वायोगादिति चेत्, न। बाधकधियो भेदविषयत्वानभ्युपगमात्। इयं शुक्तिरित्येव बाधबुद्ध्युदयात्। तस्यास्तु नेदं रजतमिति भेदबुद्धिः फलम्। व्यावृत्ताकारतैव बाधधिय आवश्यकी। सा च स्वरूपोपलक्षणबलान्निष्प्रकारकब्रह्मज्ञानेऽपि अस्तीति न बाधकधीबोध्यत्वं भेदस्य। ननु स्वप्नविलक्षणफलपर्यन्तपरीक्षायामपि चेच्छङ्का स्यात् तदा अद्वैतश्रुतितत्प्रत्यक्षतत्प्रामाण्य शङ्कायामद्वैतश्रुतिरपि न सिद्ध्येत्। बाधेऽपि बाधशङ्कायामबाधितबाधप्रसिद्धिरपि न स्याद्, बाधितबाधशङ्कायाश्चाबाध्यत्वाविरोधित्वात्। भाविबाधेऽपि बाधशङ्कापातेन स्वक्रियाव्याघातश्च स्यात्। शङ्काप्रत्यक्षेऽपि शङ्कायां शङ्कापि न सिद्ध्येत्। एवं सर्वत्र शङ्काप्रसरात् सर्वविप्लवापत्तिरिति चेत्, मैवं मंस्थाः। यतः समत्वेन प्रमाणान्तरे उपस्थित एव निश्चितेऽपि सत्त्वादौ शङ्का भवतीति ब्रूमः, न तु निश्चितमात्रे शङ्का भवतीति। तथा च यदुक्तं बौद्धं प्रति भट्टवार्तिके-

'दुष्टज्ञानगृहीतार्थप्रतिषेधोऽपि युज्यते।
गृहीतमात्रबाधे तु स्वपक्षोऽपि न सिद्ध्यति॥'

इति, तदपि न विरुध्यते। गृहीतमात्रबाधस्य तच्छङ्कायाश्चानुक्तेः।

ननु सत्त्वादिप्रत्यक्षे कृत्स्नदूरादिदोषाभावनिश्चये कथं शङ्कोदयः? न च कृत्स्नानामभावनिश्चयेऽप्यकृत्स्नस्य शङ्का स्यात्। शब्दे कृत्स्नवक्तृनिबन्धनदोषस्य नित्यत्वेन वेदे अभावेऽपि दोषान्तरशङ्कायाः सुवचत्वात्। नच स्वाप्नप्रत्यक्षे तदा दूराद्यभावनिश्चयेऽप्यप्रामाण्यदर्शनेन तद्वदत्रापि शङ्केति वाच्यम्। शून्यमेव तत्त्वमिति स्वाप्नवेदेऽपि तदा भ्रान्त्यादिदोषाभावनिश्चियेऽप्यप्रामाण्यदर्शनस्य वेदेऽपि समानत्वात्। स्वप्नवैषम्यानुभवस्तूभयत्रापि समान इति चेत्न। सत्त्वप्रत्यक्षाद्वैतागमयोः

विश्वनिवर्तकब्रह्मज्ञानस्य तथात्वात्। न च सप्रकारिकैव धीर्भ्रमनिवर्तिका, इयं तु निष्प्रकारिका कथं तथेति वाच्यम्। निवर्तकतायां सप्रकारकत्वस्य गौरवादप्रवेशात्। ननु आवश्यकः सप्रकारकत्वनियमः। व्यावृत्ताकारज्ञानत्वेनैव भ्रमनिवर्तकत्वात्। अन्यथा अनुवृत्ताकारज्ञानादपि तन्निवृत्त्यापत्तेरिति चेत्। सत्यम्। व्यावृत्ताकारत्वेन ज्ञानस्य भ्रमनिवर्तकता, न तु तत्र विशेषप्रकारकत्वनियमः। तथा हि -व्यावृत्ताकारता हि द्वेधा भवति। विशेषणाद् उपलक्षणाच्च। तत्राऽद्ये सप्रकारकत्वनियमः। द्वितीयेऽपि धर्मान्तरस्य यदुपलक्षणं तस्माद् व्यावृत्ताकारत्वे सप्रकारकतैव। यदि तु स्वरूपोपलक्षणाद् व्यावृत्ताकाराता तदा निष्प्रकारकतैव। उपलक्षणस्य तत्राप्रवेशात्। स्वस्य च स्वस्मिन्नप्रकारत्वात्। न च प्रमेयत्वादिवत् स्वस्यैव स्वस्मिन् प्रकारत्वमिति वाच्यम्। त्वयापि केवलान्वयिन्येवागत्या तथाङ्गीकारात्। न तु सर्वत्र। अथ आकारप्रकारयोरभेदाद् ब्रह्माकारतैव ब्रह्मबुद्धेस्तत्प्रकारतेति चेत्। न विशिष्टबुद्धेर्विशेष्याकारत्वेऽपि तदप्रकारकत्वात्, आकारप्रकारयोर्भेदात्। आकारश्च वृत्तिनिष्ठः कश्चिद्धर्मोऽसाधारणव्यवहारहेतुरिति वक्ष्यते। तस्माद्यथाऽऽकाशपदाच्छब्दाश्रयत्वोपलक्षितधर्मिस्वरूपमात्रं ज्ञायते तद्वदत्रापि द्वितीयाभावाद्युपलक्षितब्रह्मस्वरूपज्ञानं व्यावृत्ताकारं द्वैतनिवर्तकमपरोक्षम्। यथा च शब्दात्तादृग्ज्ञानसंभवस्तथा वक्ष्यते। न च बाधकधियां भ्रमतद्धेत्वज्ञानदोषाध्यस्तद्रष्ट्रादीनामबाधकत्वं दृष्टमिति कथं ब्रह्मज्ञानस्य तद्बाधकत्वं घटतामिति वाच्यम्। यत्र हि स्वप्ने द्रष्टारं दुष्टकरणवन्तं कल्पयित्वा तस्य भ्रमं कल्पयति तत्र जागरज्ञानेन सर्वेषां निवृत्तिदर्शनात्। जाग्रद्दशायामपि यदा मनुष्यप्रतिकृतौ चैतन्यं कल्पयित्वा तत्समीपवर्तिन्यनादर्शे एवादर्शत्वं कल्पयित्वा स्वप्रतिबिम्बमयं पश्यतीति कल्पयति तदा नायं चेतनो न चायमादर्श इति प्रमया सर्वनिवृत्तिदर्शनाच्च नेयमदृष्टचरी कल्पना। तथा चेयं शुक्तिरित्याद्यधिष्ठानज्ञानं रज्ज्वां सर्पभ्रममिव द्रष्ट्राद्यध्यासं मा निवीवृतत् तत्कस्य हेतोः? तदधिष्ठानसाक्षात्करत्वाभावात्। ब्रह्मज्ञानं त्वाकाशादिप्रपञ्चभ्रममिव द्रष्टुर्दोषादिभ्रममपि निवर्तयेदेव तत्कस्य हेतोः? अशेषभ्रमाधिष्ठानतत्त्वसाक्षात्कारत्वात्। एवं च बाधबुद्धित्वं न दोषाद्यबाधकत्वे प्रयोजकम्, अपि तु तद्भ्रमाधिष्ठानतत्त्वसाक्षात्कारभिन्नत्वमिति द्रष्टव्यम्। ननु कल्पितत्वादुक्तदृष्टान्ते तद् बाध्यताम्। इह तु कथमिति चेत्? हन्त! ब्रह्मव्यतिरिक्तस्य सर्वस्य कल्पितत्वमङ्गीकुर्वतामस्माकमिदमनिष्टं महदापादितं देवानाम्प्रियेण।

ननु साक्षिप्रत्यक्षं न बाध्यम्, दोषाजन्यत्वात्। प्रत्युत श्रुतिजनिताद्वैतज्ञानमेव बाध्यम्, तात्पर्यभ्रमरूपदोषजन्यत्वादिति चेत्, न। चैतन्यस्य स्वरूपतो दोषाजन्यत्वेऽपि

आनन्दश्रुतेरनुभूतातात्त्विकानन्दानुवादित्वोपपत्तेः। किं च "स्मृतिः प्रत्यक्षं" इत्यादिश्रुत्या, "प्रत्यक्षमनुमानं च शास्त्रं च विविधागमाः" इति मनुस्मृत्या च सिद्धं तत्प्रामाण्यम्। न च सकृत्प्रयुक्तस्य प्रमाणशब्दस्य श्रुतौ तत्त्वावेदकत्वमर्थः, प्रत्यक्षेऽतत्त्वावेदकत्वमिति युक्तम्। इति प्रत्यक्षस्य भाविबाधकशङ्काभङ्गः।

अद्वैतसिद्धिः

एवं च 'भाविबाधनिश्चयाच्च' इति यदुक्तं तदप्युपपन्नतरमेव। प्रकारान्तरेणाबाधितस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य यथा आगमेन बाधः तथा प्रकारान्तरेणाबाधितस्य 'सन् घटः' इत्यादिप्रत्यक्षस्य मिथ्यात्वबोधकागमेन बाध इति निर्णयात्। एवं च भाविबाधशङ्कामादाय यत्परैर्दूषणमुक्तं तदनुक्तोपालम्भतया अपास्तम्। वस्तुतस्तु बाधशङ्कामादायापि प्रत्यक्षस्य बाधकतोद्धारः समीचीन एव। प्रत्यक्षशब्दयोर्बलाबलविचारात् प्राक् किमयं शब्द उपचरितार्थः, आहोस्वित् प्रत्यक्षमप्रमाणमिति शङ्कायामुभयोरबाधकत्वप्राप्तौ तात्पर्यलिङ्गैः श्रूयमाणार्थपरतया निश्चितस्यागमस्योपचरितार्थत्वशङ्काव्युदासेन लब्धावकाशत्व संभवात्। न च शब्दलिङ्गयोः प्रत्यक्षाबाधकतया प्रत्यक्षान्तरस्याप्रमाणतया शङ्क्यमानत्वेनाबाधकतया च बाधकसामान्याभावे निश्चिते बाधशङ्का न युक्तेति वाच्यम्। शब्दलिङ्गयोः प्रत्यक्षबाधकत्वस्य व्यवस्थापितत्वात् प्रत्येकं विशेषाभावनिश्चयेऽपि विशेषाणामियत्तानवधारणदशायां संशयसंभवात्। प्रत्यक्षस्याप्रमाणतया शङ्क्यमानत्वेन शङ्काविरहोपपादनस्यासंभवदुक्तिकत्वाच्च।

अथैवं जाग्रदादिज्ञानस्याप्रमात्वे स्वप्नदृष्टस्य शुक्तिरूप्यादेश्च बाधासिद्धौ कथं दृष्टान्तसिद्धिः स्यादिति चेन्न, आरोप्यसत्ताधिकसत्ताकविषयत्वेनाऽपेक्षिकप्रमाणत्वेनान्यून सत्ताकविषयत्वेन वा बाधकत्वात्। अत एव यदुक्तं बौद्धं प्रति भट्टवार्तिके–

'प्रतियोगिनि दृष्टे च जाग्रद्बोधे मृषा भवेत्।
स्वप्नादिदृष्टिरस्माकं तव भेदोऽपि किंकृतः॥'

इति तत्सङ्गच्छते। ननु भ्रमकालीनापरोक्षबुद्ध्यविषयविशेषविषयैव धीर्बाधिका दृष्टा। न च विश्वबाधिका धीस्तथेति चेन्न। अधिष्ठानतत्त्वज्ञानत्वेनैव भ्रमनिवर्तकत्वात्।

उक्तं ह्युदयनेन – "तदेव ह्याशंक्येत यस्मिन्नाशंक्यमाने स्वक्रियाव्याघातो न भवति" इति उक्तं च वार्तिके बौद्धं प्रति–

इह जन्मनि केषांचिन्न तावदुपलभ्यते।
योग्यवस्थागतानां तु न विद्मः किं भविष्यति।

इति। न हि सम्भवति शब्दानुमानाभासयोः रूप्यादिधीप्रामाण्यग्राह्यप्रत्यक्षस्य च बाधं पदार्थत्वस्य च मिथ्यात्वव्यभिचारं स्वैरिण्याश्चानियमं पश्यन्नपि परीक्षितत्वाद्वैदांततदनुकूलानुमानयोः वेदान्तधीप्रामाण्यग्राह्यप्रत्यक्षस्य चाबाधं दृश्यत्वस्य च मिथ्यात्वाव्यभिचारं स्वमातुश्च नियमं निश्चिनोति, जगत्प्रत्यक्षस्य तु परीक्षितस्याप्यपरीक्षित रूप्यादिप्रत्यक्षदृष्टान्तमात्रेणाबाधं न निश्चिनोतीति । परीक्षितप्रत्यक्षेऽप्यनाश्वासे हि नैकापि व्यवस्था सिध्येत्, तदवसानत्वात् सर्वस्य। न हि श्रुतेऽनुमिते वा दृष्ट इवाश्वासः। किं चैवं न हिंस्यादित्यस्याग्नीषोमीये व्यभिचारदर्शनेनान्यत्रापि तदाशंक्येतेत्युत्सर्गापवादन्यायो भज्येत । उक्तं हि–

उत्सर्गतोऽपि यत्प्राप्तमपवादविवर्जितम् ।
व्यभिचार्यपवादेन मानमेव भविष्यति ॥ इति ।

एवं च– बाधाभावोऽत्र निर्णीतः शशशृंगाद्यभाववत् ।

अन्यथा शशशृंगादिरपि शंक्येत बाधवत्।

तस्मात्प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वादिह चोत्पत्तिस्वतस्त्वापवादस्य दोषस्य, ज्ञप्तिस्वतस्त्वापवादस्य बाधकस्य चादर्शनात् निर्मूलशङ्कायाश्च स्वक्रियाविरोधादि नानुत्थानात् सुस्थं प्रत्यक्षप्रामाण्यम्।

किं च नेदं रूप्यमिति प्रत्यक्षप्रामाण्यमावश्यकम्। अन्यथा इदं रूप्यमित्यस्याप्रामाण्यं न स्यादिति वृद्धिमिच्छतो मूलहान्यापत्तेः। तथा च तत्तुल्ययोगक्षेमं सन् घट इत्यादिप्रत्यक्षं कथं न प्रमाणम्? किं च सौषुप्तिकानन्दानुभवस्याप्रामाण्ये कथमात्मन आनन्दरूपता तात्त्विकी?

तात्पर्यभ्रांतेरप्ययोगेन वेदादप्यनाशंकितदोषत्वात्। प्रमाणाजन्यत्वमात्रेण तदप्रामाण्ये गुणाजन्यत्वमात्रेण वेदस्याप्यप्रामाण्यापातात्। नापि बाह्यप्रत्यक्षे। तत्रापि निःशंकं साक्षिग्राह्यसुखादिपर्यन्तपरीक्षया तन्निरासात्। उक्तं हि– "न परीक्षानवस्था स्यात्साक्षिसिद्धे त्वसंशयादि" ति। "न हि बाधः क्वचिद् दृष्टो दुःखाद्यनुभवस्य तु" इति च। ननु स्वाप्नजलप्रत्यक्षेऽपि स्वाप्नावगाहनपानतज्जन्यसुखपर्यन्ता परीक्षास्तीति चेन्न। स्वाप्नस्य शून्यमेव तत्त्वमिति वेदस्याप्यपौरूषेय (त्वादिज्ञा) त्वज्ञानषड्विधतात्पर्यलिंगज्ञानानुग्राहकतर्कानुसंधानब्रह्माद्वैत श्रुतिप्रतियोगिकप्राबल्य निर्णयस्वाप्नशून्यसाक्षात्कारतज्जन्यशून्यभावापत्तिरूपमोक्ष पर्यन्ता परीक्षास्तीति फलपर्यन्ताद्वैतश्रुतावप्यनाश्वासापातात्। स्वाप्नवैषम्यानु भवेनाश्वासस्तूभयत्र सम इत्युक्तम्। अन्यथा परस्यापि प्रातिभासिकवैलक्षण्यं न सिध्येत्। एवं च–

स्वाप्नाद्विशेषस्यासिद्धौ प्रपंचस्याद्वयश्रुतिः।
स्यात् फलेन सह स्वाप्नी सिद्धौ शंकाक्षजे कुतः॥
न हि प्रत्यक्षशब्दत्वकृतं वैषम्यमीक्षते।
बाधाबाधकृतस्त्वेव विशेषः सम्प्रदृश्यते॥

तस्मात् त्वयाऽप्यौत्सर्गिकस्य प्रामाण्यस्य बलवद्बाधकदर्शनैकापोद्यत्वेन सप्तमरसशंकातुल्येन शङ्कामात्रेणानपवादात् स्वव्याघातादिना शङ्कानुदयाच्च श्रुतेः प्रामाण्यनिश्चय इति बाच्यम्। उक्तं हि खण्डने–

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम्॥ इति।

(ए) तत्प्रत्यक्षेऽपि तुल्यम्। उक्तं हि सुरेश्वरेणापि–

अतोऽवबोधकत्वेन दुष्टकारणवर्जनात्।
अबाधाच्च प्रमाणत्वं वस्तुन्यक्षादिवत् श्रुतेः।" इति।

तस्मादहेतुकार्यशंकेव स्वक्रियादिविरोधतः।
भाविबाधकशंका न युक्ताऽध्यक्षे श्रुताविव॥

तत्त्वमिति सद्वैतं तत्त्वमिति च श्रुतेरभावग्राहिप्रत्यक्षमपि तात्त्विक्यां व्यावहारिक्यां वा तस्यां श्रुतौ सत्यामेव व्यावहारिकं प्रातिभासिकं वा तदभावं गृह्णातीति शंकया शून्याद्वैतादिसिद्ध्यापत्तेश्च। न चात्माद्वैतश्रुतिविरोधादुक्तशंकानुदयः। तस्या एव संदिह्यमानत्वात्। न च तत्त्वतो द्वैतश्रुत्या व्यवहारदशायामद्वैतश्रुतित्वेन गृहीतया मिथ्यात्वसिद्धिः। वह्नित्वेन ज्ञाताद् गुंजापुंजाद् दाहापत्तेः। भेदश्रुतित्वेन पूर्वपक्षिणा ज्ञातेनाद्वैतवाक्येन द्वैतसिद्ध्यापत्तेश्च। न चाद्वैतश्रुतितत्प्रामाण्या देरप्यन्यत्रादृष्टस्तात्त्विकसत्त्वविरोधी तत्त्वावेदकेनैव बाधः शंक्यः, न तु स्वप्नादौ दृष्टः व्यावहारिकसत्त्वविरोधी अतत्त्वावेदकेन बाध इति राजाज्ञाऽस्ति। अप्रातिभासिकत्वधीस्तु तात्त्विकत्वधीरिव युक्ता।

न चैवं ब्रह्मतत्त्वज्ञानात्तन्निवृत्तिश्रुतिविरोधः। अत्राप्यनिवृत्तिश्रुतिरेव निवृत्तिश्रुतितया गृहीतेति शंकोदयात्। किं चापरीक्षिते रूप्यादिप्रत्यक्षे दोषबाधयोर्दर्शनेन परीक्षिते जगत्प्रत्यक्षेऽपि तदाशंकायां लिंगशब्दाभासयो स्तद्दर्शनेनाद्वैतलिंगशब्दयोरपि तच्छंका। बाधिते अक्षलिंगाद्याभासेऽषि भ्रमबाधित प्रमादृष्टांतेनाबाधशंकापि स्यादिति प्रमाणतदाभासव्यवस्था न स्यात्। तदुक्तम्– निर्दोषानुमायास्सदोषत्वं सदोषानुमाया निर्दोषत्वमित्यव्यवस्था'' इति। श्रुतिर्नित्यत्वान्निर्दोषेति चेन्न। त्वन्मते श्रुतिनित्यताया आकल्पं स्थितिमात्ररूपत्वेन आकाशादिवत् प्रतिकल्पं तस्या उत्पत्तेः। तस्याः प्रमाकरणत्वेऽपि मम द्वैत इव, ब्रह्ममीमांसायां प्रत्यधिकरणं पूर्वपक्ष्यभिमतार्थ इव च तवाद्वैते तात्पर्यधीः भ्रम इति शंकया तज्जन्याद्वैतधियः प्रमात्वासिद्धेश्च। उपक्रमोपसंहारतदैक रूप्यग्राहिप्रत्यक्षेऽप्युक्तन्यायेन शंकोदयेन तदैकरूप्यासिद्धेश्च। किं च–

प्रत्यक्षे कृत्स्नदोषाणामभावोऽत्र विनिश्चितः।
अन्वस्य कल्पना नित्ये वेदेऽपि न निवार्यते।

स्वाप्नप्रत्यक्षेऽपि तदा दूराद्यभावनिश्चयोऽस्तीति चेन्न। स्वाप्ने शून्यमेव तत्त्वमिति, वेदेऽपि तदा भ्रान्त्याद्यभावनिश्चयस्य सत्त्वात्। स्वप्नवैषम्यानुभवस्तूभयत्र समः। किं च न तावत्साक्षिणि बाधशंका, तस्य नित्यानुभवरूपतया वेद इव

सप्रकारकभ्रमाविरोधित्वात्। न च ते (तव) विश्वबाधिका धीः सप्रकारिका। किं च न तावत्सा सप्रकारा, नापि निष्प्रकारा शब्दजन्येति वक्ष्यते। न च त्वन्मते सा शब्दान्यजन्या। किं च बाधिका धीर्भ्रमस्य तद्धेतोरज्ञानस्य तद्दोषस्याध्यस्तस्य द्रष्टुश्च न बाधिकेति न भ्रमादिबाधो युक्तः। किं च दोषजन्यमेव बाध्यम्। न च साक्षिप्रत्यक्षं तज्जन्यम्। अद्वैतज्ञाने तु श्रुतितात्पर्यभ्रमो दोषः। किं च बाधकतुल्यमानसंवादि न बाध्यम्। द्वैतप्रत्यक्षं चाद्वैतश्रुतितुल्यद्वैतश्रुतिसंवादि। किं च बाधकधीबोध्यं न बाध्यम्। भेदश्च बाधकधीबोध्यः। तया च स्वविषयस्य भेदाभिन्नतयौदासीन्येन वा ग्रहे बाधकत्वायोगेन भिन्नतयैव ग्राह्यत्वात्। तस्मान्न बाधशंका युक्ता।

कथं चेयं शंका? रूप्यादिबाधेऽपि बाधकशंकापातेनाबाधितबाध रूपकोट्यप्रसिद्धेः। बाधितबाधशंकायाश्चाबाध्यत्वाविरोधित्वात्। भाविबाधेऽपि बाधशंकापातेन स्वव्याघाताच्च। तदुक्तं वार्तिके बौद्धं प्रति–

दुष्टज्ञानगृहीतार्थप्रतिषेधोऽपि युज्यते।
गृहीतमात्रबाधे तु स्वपक्षोऽपि न सिध्यति॥ इति।

न च धीमात्रे न बाधशंका, किं तु साक्षात्कार इति युक्तम्। विशेषहेत्वभावात्। वृत्तिरूपाद्वैतसाक्षात्कारे तत्प्रसंगाच्च। नापि शब्दाजन्यसाक्षात्कारे तच्छंका, मुक्तस्वरूपानन्दसाक्षात्कारे तत्प्रसंगात्। वेदान्तजन्यधीप्रामाण्यग्राहिसाक्षिप्रत्यक्षमप्य तत्त्वावेदकमेव तत्त्वावेदकत्वेन गृह्णातीति शंकया तत्त्वज्ञानाय वेदान्तश्रवणादि स्वक्रियाविरोधाच्च। शंकाग्राहि साक्षिप्रत्यक्षमपि अशंकामेव शंकात्वेन गृह्णातीति शंकया स्वव्याघाताच्च।

नापि शब्दान्यजन्यसाक्षात्कारे तच्छंका। दशमस्त्वमसीति शब्दाभासजन्य साक्षात्कारेऽपि बाधदर्शनेन विशेषहेत्वभावात्। विश्वान्यप्रत्यक्ष एव तच्छंकेति सुवचत्वाच्च। अद्वैतश्रुत्यनुमानादिग्राहिप्रत्यक्षमपि तात्त्विकीं व्यावहारिकीं वा अनेकमेव सद्द्वितीयमिति श्रुतिमेव व्यावहारिकेण प्रातिभासिकेन वा एकमेवाद्वितीयं ब्रह्मेति श्रुतित्वेन गृह्णातीत्यादिशंकया मिथ्यात्वादिश्रुत्यादेरेवासिद्ध्यापत्तेश्च। शून्याद्वैतं

स्पार्शनप्रत्यक्षस्य बाधाभावेपि यत्र पदार्थत्वं तत्रानुष्णत्वमितिव्याप्तिग्राहकं प्रत्यक्षमस्ति तेनैव वा तन्मूलानुमित्या वा बाधोस्त्वित्यतआह॥ अनौष्ण्येति॥ स्यादिदं यदि पदार्थत्वानुष्णत्वयोर्व्याप्तिःस्यात्तर्ह्येव तद्ग्राहकप्रत्यक्षेण बाधदानावकाशः। नचैवं तत्राप्रयोजकत्वेन व्याप्तेरेवाभावादितिभावः। नन्वथापि यद्दृश्यं तन्मिथ्येति व्याप्तिग्राहकं यत्प्रत्यक्षं तेन वा तन्मूलकानुमित्या वा सत्त्वग्राहिप्रत्यक्षस्य बाधोस्त्विति साम्यमित्याशंक्याह॥ मिथ्यात्वेति॥ घटधीवदिति॥ यथा घटधियो घटसत्त्वग्राहित्वं तथेत्यर्थः। व्याप्तिधीः व्याप्तिग्राहिप्रत्यक्षं। नैवं त्वया वक्तुं शक्यं। तथाहि। यद्दृश्यं तन्मिथ्योति व्याप्तिग्राहिप्रत्यक्षेण स्वविषयस्य हेतुसाध्यव्याप्त्यादेःसत्त्वं विषयीक्रियते नवा। नेतिपक्षे व्याप्त्याद्यसत्त्वप्राप्त्यानुमानाप्रामाण्यं। आद्ये न दृश्यत्वहेतुमति मिथ्यात्वसिद्धिः। प्रत्यक्षविषयतया दृश्यत्ववति व्याप्त्यादौ मिथ्यात्वाभावेन व्यभिचारापत्तेरतोनुमित्या यत्सिषाधयिषितं प्रपंचांतर्गतव्याप्त्यादेरपि मिथ्यात्वं तत्प्रतिकूलतया व्याप्तिप्रत्यक्षस्यानुमितिमूलत्वासंभवान्नतेन वा तन्मूलानुमित्या वा सत्त्वग्राहिप्रत्यक्षस्य बाधइति सांप्रदायिकोर्थः। प्रकारांतरेणापि नास्मन्न्यायेन त्वयापि मिथ्यात्वानुमित्या सत्त्वग्राहिप्रत्यक्षस्य बाधो वक्तुं शक्यत इत्याह॥ अथवेति॥ व्याप्तिप्रत्यक्षं साक्षिप्रत्यक्षं॥ धर्मीति॥ आकाशरूपधर्मिग्राहकोपि साक्ष्येव। अतस्तादृशानुमित्या नैल्यप्रत्यक्षबाध इतिभावः॥ व्याप्तीति॥ उक्तरीत्येत्यर्थः। अतएतादृशानुमित्या न सत्त्वप्रत्यक्षबाध इत्याशयः। निश्चला अप्रामाण्यशंकयाऽकलंकितेत्यर्थः॥ विजातीयेति॥ सजातीयप्रबलप्रत्यक्षेण विना विजातीयानुमानादिना न बाध्येत्यर्थः। ननु तर्हि यद्बाव्याप्तिप्रत्यक्षेणेत्यादिना नीरूपत्वानुमित्या कथं नैल्यप्रत्यक्षबाधोऽभिहित इत्यत उक्तं॥ केवलेनेति॥ अतएव तत्र व्याप्तिप्रत्यक्षमूलानुमित्यैव बाध उक्तो न केवलयेति द्रष्टव्यं। परीक्षितं प्रत्यक्षं नानुमानादिबाध्यमित्येतत्त्वापि संमतमित्याह॥ उक्तंचेति॥ व्यवहारः प्रवृत्तिः॥ तत्र तथेति॥ तत्र प्रत्यक्षस्यापरीक्षितत्वादनुमानादिना बाधितं भवतीत्यर्थः॥ चिंतयेति॥ परीक्षयेत्यर्थः॥ प्रत्यक्षस्य लिंगाद्यबाध्यत्वे परोक्तबाधकानामुद्धारविवरणं॥

२७. अथ प्रत्यक्षस्य भाविबाधकशङ्का भङ्गः।

नापि भाविबाधकशंकामात्रेणेति तृतीयः। उक्तरीत्या लिंग शब्दयोरबाधकत्वाद्, अक्षस्याप्रमाणतया शंक्यमानत्वात्, सर्वविशेषाभावे च सामान्यस्याप्यभावेन बाधकशंकाया अनुदयात्। किंच त्वन्मते जाग्रदादिज्ञानस्याप्रमाणत्वेन स्वप्नादेर्बाधासिद्धौ कथं तदृष्टान्तेनान्यत्र तच्छङ्का? तदुक्तं बार्तिके बौद्धं प्रति

"प्रतियोगिनि दृष्टे च जाग्रज्ज्ञाने मृषा भवेत्।
स्वप्नादिबुद्धिरस्माकं तव भेदोऽपि किंकृतः॥" इति।

अपि च भ्रमकालीनापरोक्षबुद्ध्यविषयविशेषविषयैव धीर्बाधिका। न च तव विश्वबाधिकाधीस्तद्विषया। किं च सप्रकारैव धीर्बाधिका, निर्विकल्पिकायाः

एवंप्रतियोगिभूतनीलरूपस्य साक्ष्ययोग्यत्वेपि तदभावःसाक्षिप्रत्यक्षएवेत्यस्मद्रीत्योक्तं। परमतेतु नेदं दुर्घटं तन्मते नीलरूपस्यापि साक्षिवेद्यत्वांगीकारात्। नचैतदनानुभाविकं। नीलं नभ इति साक्षिणानुभूयमानत्वात्। नचेयं प्रतितिश्चक्षुषै वनसाक्षिणेतिवाच्यं। निमीलितनेत्रस्यापि नीलं नभ इतिप्रतीतेर्दर्शनात्। तथाच प्रतियोगिनो नीलरूपस्याधिकरणीभूताकाशस्यच साक्षिवेद्यत्वांगीकारेणं प्रतियोगितदभावयोरेकेंद्रियग्राह्यत्वप्राप्या नैल्याभावज्ञानं साक्षिणैव भविष्यतीत्याह॥ परमतेपीति॥ अत्र चाक्षुषपिशाचान्योन्याभावदृष्टांतेन साक्ष्ययोग्यरूपाभावस्यापि साक्षिणा ग्रहणादित्युक्तं। अन्योन्याभावप्रत्यक्षे अधिकरणप्रत्यक्षस्यैव प्रयोजकत्वेन प्रतियोगिनो चाक्षुषत्वेपि अन्योन्याभावस्य चाक्षुषत्वोपपत्तावपि प्रकृते न तथा संभवति। नभोनीलं नेत्यत्यंताभावस्यैव प्रतीतेः। तत्रच प्रतियोगिनोऽभावग्राहकेंद्रियत्वस्यैव तंत्रत्वेन प्रकृते तदभावात्। नच नभो नीलं नेति प्रतीतिरपिअन्योन्याभावप्रतितिरेवेति वाच्यं। तथात्वे नभोनीलं नेति प्रतीत्या नीलरूपान्योन्याभावस्यैवावकाशे सिध्या नीलरूपाभावासिद्धेः। घटादौरूपान्योन्याभावसत्वेपि तद्धत्वस्यैव दर्शनादित्यस्वरसमाहुरित्यनेन सूचयति। नीलरूपवदन्योन्याभावकत्वेतु स्वारस्यं द्रष्टव्यं। अतएवास्वरसादाह॥ यद्वेति॥ आकाशे नीलरूपं नास्तीति प्रतीतिःचक्षुषैव भवति न साक्षिणा। नचाधिकरणस्याकाशस्यायोग्यत्वात्तत्र कथं रूपाभावज्ञानं चक्षुषा स्यादिति वाच्यं। आकाशस्य श्रावणत्वाभावेपि आकाशे शब्दो नास्तीति शब्दाभावप्रतीतेःश्रावणत्वदर्शनात्। तथाऽचाक्षुषेपि वायौ रूपाभावज्ञानस्य चाक्षुषत्वदर्शनात्। अतोऽधिकरंणस्यायोग्यत्वेपि प्रतियोगियोग्यत्वमात्रेण तदत्यंताभावस्य प्रत्यक्षतायास्तार्किकैरंगीकारात्प्रकृतेप्याकाशस्याचाक्षुषत्वेपि नीलरूपात्यंताभावज्ञानं चाक्षुषमेव भविष्यतीत्यर्थः। आकाशे रूपाभावज्ञानं चक्षुषैव भवतीत्येतदनुभवसिद्धमित्याह॥ दूरस्यस्येति॥ अन्यथेति॥ आकाशे नीरूपत्वप्रतीतेश्चाक्षुषत्वानंगीकारइत्यर्थः। नन्वाकाशस्य नीरूपत्वे कथं लिंगाभावः। नभो नीरूपं परममहत्परिमाणवत्त्वात् द्रव्यानारंभकत्वात् निस्पर्शत्वात् कालादिवत् पृथिव्यादित्रयेतरत्वाद्वायुवदित्यनुमानैस्तत्सिंद्धिसंभवादित्यत आह॥ महत्त्वेति॥ परममहत्परिमाणवत्त्वेत्यर्थः। अन्यथा महत्त्वमात्रस्य घटादौ व्यभिचारापत्तेरितिध्येयं। ननु परममहत्त्वस्य कथमसिद्धिरुच्यते। भवद्भिरव्याकृताकाशे परममहत्परिमाणांगीकारादित्यतउक्तं॥ तत्पक्षइति॥ अव्याकृताकाशस्य परेणानंगीकाराद्भूताकाशस्यच ''अबग्नीरनभोऽहंकृन्महत्तत्त्वगुणत्रयैः। क्रमाद्दशोत्तरै''रिति स्मृत्या परिच्छिन्नत्वावगमेन परममहत्त्वस्यासिद्धिरेव। तथा द्रव्यानारंभकत्वमप्यसिद्धमेव ''आकाशाद्वायु''रित्याकाशस्य वायुरूपद्रव्यारंभकत्वांगीकारादित्यर्थः। अंत्यावयविनि घटादौ व्यभिचारोपि द्रष्टव्यः॥ तमसीति॥ ननु नीरूपत्वस्यापि तत्र सत्त्वान्नव्यभिचार इतिचेन्न। ''नीलंविदारयामास तमश्चक्रेण माधव'' इतिहरिवंशादौ तमसो विदारणोक्त्या तमसो नीलरूपवद्द्रव्यत्वस्यास्माकं सम्मतत्वात्। ''नीलरूपं तमो द्रव्य''मितिवाचस्पत्युक्त्या परस्यापि संमतत्वादितिभावः॥ एतैरेवेति॥ परममहत्त्वादिहेतुभिरित्यर्थः॥ अशब्दत्वस्यापीति॥ शब्दरूपगुणराहित्य स्यापीत्यर्थः। त्रिवृत्करणपक्षे आकाशे रूपासिद्ध्या पंचीकरणेनेत्युक्तं। एवंच पंचानां भूतानां मिश्रीकरणपक्षे आकाशस्य रूपवत्तेजोजलपृथिव्यात्मकतया रूपवत्त्वसद्भावेन रूपाभावानुमाने बाधःस्याद्धिर्थः॥ यद्वेति॥ नभोनीरूपं विभुत्वात् यद्विभु तन्नीरूपमिति व्याप्तिग्राहकं यत्साक्षिप्रत्यक्षं तेनैव नीरूपत्वग्राहिणा नीलं नभइतिप्रत्यक्षस्य बाधो नानुमानेनेत्यर्थः॥ तन्मूलेति॥ साक्षिप्रत्यक्षगृहीतव्याप्तिकविभुत्वानुमानेनैव बाधः॥ राजगौरवेण राजभृत्येनामात्यस्येवेत्यर्थः। नन्वेवं चेद्भवद्रीत्यैव वह्निरनुष्णःपदार्थत्वादित्यादित्यनुमानेन

नभोनैल्यप्रत्यक्षग्रहः॥ ज्ञातेनेति॥ साक्षिणेति शेषः॥ परिच्छेदो निश्चयः॥ न तु तेनेति॥ शब्दादिना न बाधः किंतु प्रबलप्रत्यक्षेणैवेतिभावः॥ न बाध इति॥ तत्र प्रवर्तमानं शब्दादिबाधकमिवोच्यत इत्यर्थः॥ आगमादिनेति॥ येन तस्य बाधकत्वं स्यादित्यर्थः। किंनाम प्रबलप्रत्यक्षेणैवातस्तस्यैव बाधकत्वमिति वाक्यशेषः। द्वितीये द्वितीयमुदाहरति॥ अकलंकितमिति॥ स्वार्थपरिच्छेदे स्वार्थनिश्चये॥ न ह्यत्रेति॥ घटस्सन्नेवेत्यादिजगत्प्रत्यक्ष इत्यर्थः। तथा च सर्वापटुप्रत्यक्षवैलक्षण्यमितिभावः॥ प्रत्यक्षे कृप्तेति॥ चंद्रप्रादेशत्वादिप्रत्यक्षे कृप्तेत्यर्थः। कल्प्येत जगत्प्रत्यक्षेपीत्यर्थः॥ विप्रलंभेति॥ विप्रलंभादिदोषेत्यर्थः। अपौरुषेयत्वेन पुरुषदोषनिबंधनदोषाभावादितिभावः। जगत्प्रत्यक्षेऽन्यत्रकृप्तदोषव्यतिरिक्तं दोषांतरमाशंक्य निषेधति॥ नचेत्यादिना॥ जगत्प्रत्यक्षे दोषत्वेनोच्यमानमाविद्यकत्वं किं मेयस्य उत मानस्य नोभयमपीत्याह॥ मेयेत्यादिना॥ श्रौतेति॥ तथाच तस्याप्यप्रामाण्यं स्यादितिभावः॥ भेदवासनेति॥ तथाच भेदभ्रमवासनाया दोषत्वकथनमयुक्तमितिभावः॥ इदंचेति॥ अनुमानादिबाधकतयोच्यमानं सत्त्वग्राहिप्रत्यक्षमित्यर्थः॥ अवकाशदमिति॥ स्वबाधानायेतिशेषः। बाह्यं साक्षिभूतस्वरूपेंद्रियव्यतिरिक्तं चक्षुरादि। अन्येन। अनुमानेनागमेनवेत्यर्थः॥ अवकाशदमिति॥ स्वबाधनायेतिशेषः। एवं चंद्रप्रादेशत्वादिप्रत्यक्षस्या गमाबाध्यत्वमुपपाद्य नभोनैल्यप्रत्यक्षस्याप्यनुमानाबाध्यत्वमुपपादयति॥ एवंचेति॥ दूरतः क्रोशादिपरिमितप्रदेशे नैल्यबुद्धौ सत्यां समीपे तावदाकाशे ममरूपं न प्रतियत एव दूरे तज्ज्ञानं दोषजन्यमिति समीपगमनात्प्रागेव निश्चिततया पश्चात्पुनर्धावनेन यत्प्रदेशे रूपं प्रतीतं तत्र गमने सति रूपं न प्रतीयत एव। तथाच नभोनैल्यप्रत्यक्षेण प्रागेव ज्ञातदूरादिदोषेणाप्रमात्वेन साक्षिणा ज्ञातेन संदेहवत्स्वार्थपरिच्छेदपराङ्मुखेन निश्शंकप्रवृत्त्यजनकेनावकाशे दत्ते पश्चात् नभोनीरूपं विभुत्वादिति प्रवर्तमानमनुमानं बाधकमिवोच्यते नतु तेन बाधः किंतु समबलप्रत्यक्षेणैवेतिभावः। अन्यापदेशेन स्वयमेव पक्षांतरमुत्प्रेक्षयति॥ केचित्त्वित्यादिना॥ नीलमेवेति॥ तथाच दूरे नभोनैल्यप्रत्यक्षं प्रमारूपमेव न भ्रमरूपमित्यर्थः। तर्हि समीपे कस्मान्नोपलक्ष्यत इत्यतआह॥ समीपेत्विति॥ केचिदाहुरित्यस्वरसोद्भावनं। तद्वीजंतु गुरुचरणा इत्थमुपदिशंति। तथाहि। सिद्धांतेऽव्याकृतमेवाकाशनीरूपं साक्षिवेद्यं नतु भूताकाशं साक्षिवेद्यं ''आकाशे नीलिमोदेती'' तिश्रुतिर्भूताकाशविषयैव। नीलरूपोपेतमपि तद्भूताकाशमतींद्रियमेव। न सर्वजनप्रत्यक्षविषयः। ''भूतमप्यसितं दिव्यदृष्टिगोचर''मिति दिव्यदृष्टिगोचरत्वोक्तेः। नीलं नभ इति प्रत्यक्षंच सर्वजनसाधारणं। अतो नायं पक्षःसाधीयानिति। ननु कथं नैल्यधियःसाक्षिप्रत्यक्षबाधितत्वं। तथात्वे साक्षिणा नभसि नीलरूपं नास्तीति प्रतीत्या भाव्यं। नचेयं प्रतीतिर्युक्ता। येनेंद्रियेण प्रतियोगी गृह्यते तेनैव तदभावोपि गृह्यत इति नियमदर्शनादत्राप्यभावप्रतियोगिभूतनीलरूपस्य बाह्यपदार्थस्य साक्षिप्रत्यक्षाविषयत्वात्कथं साक्षिणा तदभावग्रह इतिचेन्न। अन्योन्याभावप्रत्यक्षेऽधिकरणप्रत्यक्षस्यैव तंत्रतायाः सर्वतार्किकसंमतत्वेन प्रतियोगियोग्यत्वस्यातंत्रत्वात्। यथा प्रतियोगिभूतपिशाचस्याचाक्षुषत्वेपि अधिकरणीभूतस्तंभस्य प्रत्यक्षत्वमात्रेण स्तंभःपिशाचो नेति अन्योन्यभावस्य ज्ञानं चक्षुषा भवतीत्यंगीकृतं। एवमिहापि अधिकरणभूताव्याकृताकाशस्य साक्षिसिद्धत्वात्प्रतियोगिनो नीलरूपस्यायोग्यत्वेपि तदभावज्ञानं साक्षिणा युक्तमेवेत्याह॥ अचाक्षुषेति॥ साक्ष्ययोग्येति रूपविशेषणं॥ रूपाभावस्यापीति॥ रूपात्यंताभावस्यापीत्यर्थः। नीलरूपाभावोपपादनाया व्याकृताकाशेऽवकाशत्वं निर्वक्ति॥ नीरूपत्वेति॥ नीरूपत्वोपेतपदार्थविशेषत्वमेवाकाशत्वमित्यर्थः।

आद्ये आह॥ निर्वापितेति॥ नाशितेत्यर्थः। भेदग्राहीति॥ पूर्वोत्तरज्वालयोरितिशेषः। द्वितीयेत्वाह॥ अन्यत्रापीति॥ निर्वापितारोपितदीपेन भवतिचेदित्यर्थः। प्रत्यक्षेण परिणामभेदग्राहिप्रत्यक्षेण। दीर्घोयमित्यादिपरिणामभेदग्राहिप्रत्यक्षाभावे कथमित्यत आह॥ तादृशेति॥ नेति॥ एकप्रकारेणैव दीपस्य सत्त्वात्तत्र भेदग्राहिलिंगस्यैवाभावात्। तथाच तत्रैक्यग्राहिप्रत्यक्षं प्रमाणमेवेति भावः। नन्वयं सर्प इति प्रत्यक्षं नायं सर्प इत्याप्तवाक्येन बाध्यं दृष्टमित्यतआह॥ अयं सर्प इति॥ अयं सर्प इति प्रत्यक्षं पुनरुत्तरक्षणे नायं सर्प इति स्वप्रत्यक्षेणैव बाध्यं भविष्यतीत्यत उक्तं॥ दूरस्थस्येति॥ स्वस्य दूरस्थत्वेन विशेषदर्शनावकाशाभावेन भ्रम एव भविष्यति न बाधकप्रत्यक्षावकाश इतिभावः। दृष्टांतांतरमाह॥ श्रुतीति॥ श्रुतिलिंगवाक्यप्रकाणस्थानसमाख्यानां समवाये परदौर्बल्यस्य निर्णीतत्वात्। दुर्बलेनापि श्रुत्यनुसारिणा प्रकरणेन श्रुतिगौरवात् प्रबलमपि लिंगादिकं बाध्यं दृष्टं। तथापि ''य एषोंतरक्षणी''त्यत्रोक्तं चक्षुरंतस्थत्वरूपलिंगं प्रबलमपि ''प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे''त्यादिब्रह्मश्रुत्युपेतप्रकरणेन दुर्बलेनापि श्रुतिगौरवाद्बाध्यं दृष्टमित्यवधेयं॥

शिष्टाकोपे यथोदितमिति॥ प्रमाणलक्षणे स्मृतिपादे चिंतितं। ''शिष्टाकोपे विरुद्धमितिचेत् न शास्त्रपरिमाणत्वादि''त्यत्र ''वेदं कृत्वा वेदिंकरोती''ति श्रूयते। वेदो नाम संमार्जनसाधनभूतदर्भमुष्टिः। तस्य करणं नाम दृढबंधनादिरूपःसंस्कारः। वेदिर्नाम गार्हपत्याहवनीययोर्मध्ये चतुरंगुलखाता भूमिः। तत्करणं नाम वेदेन संमार्जनादिसंस्कारः। तथाचादौ वेदःकार्यःपश्चाद्वेदिःकार्येति श्रुतौ क्रमःप्रतिपाद्यते। अत्रैव ''क्षुत आचामेदि''ति स्मरणमस्ति। तत्र यदि वेदकरणानंतरं यदि क्षुतःस्यात्तर्ह्याचामेत् अनंतरं वेदिःकार्येति स्मृत्यर्थः। तत्र तत् स्मरणं प्रमाणमप्रमाणंवेति संशये वेदवेदिक्रमवचनस्यैव प्रबलत्वात्तद्विरुद्धं स्मरणमेवाप्रमाणमितिपूर्वःपक्षः। सिद्धांतस्तु क्षुत आचामेदिति स्मरणं प्रधानभूताचमनादिपदार्थप्रतिपादकतया प्रबलं। श्रुतिस्तु वेदवेदिरूपपदार्थयोर्धर्मभूतक्रमप्रतिपादकतया दुर्बला अतो निरंतरानंतर्यप्रतिपादिका श्रुतिरेव स्मृत्या बाध्यतइति। प्रबलाश्रयसद्भावदशायामेव नीचं प्रबलबाधकं नान्यदेत्येतदुपपादयति॥ न हीति॥ प्रधानभूतेति॥ पदार्थनिष्ठधर्मापेक्षया पदार्थानां प्रधानत्वादित्यर्थः। तथाच प्रधानभूताचमनादि विषयकत्वरूपबलवदाश्रयवती स्मृतिःश्रुतिबाधिकेतिभावः॥ अन्यत्रापीति॥ औदुंबरीं स्पृष्ट्वोद्गायेदित्यादावपीत्यर्थः॥ अत एवेति॥ अयं सर्प इति प्रत्यक्षं नायं सर्पइत्याप्तवाक्यं प्रति मूलभूतपरीक्षितप्रत्यक्षगौरवादेव शब्दबाध्यं यतोऽतएवेत्यर्थः। शब्देनैवेति॥

''अष्टाशीतिसहस्राणि विस्तीर्णं योजनानितु।
प्रमाणं तत्रविज्ञेयं कलाःपंचदशैवत्वि''ति

शब्देनैवेत्यर्थः। 'ननु तत्रापि तन्मूलभूतप्रत्यक्षेणैव बाध' इति शंकावारणाय अप्रत्यक्षमूलेत्युक्तं। चंद्रप्रादेशत्वादिसर्वापटुप्रत्यक्षवैलक्षण्यं जगत्प्रत्यक्षस्योपपादयितुं चंद्रप्रादेशत्वादिप्रत्यक्षस्यापटुत्वेऽनुमानागमाबाध्यत्वं कथं। प्रत्युतापटुत्वादेवानुमानागमबाध्यत्वमेव स्यादित्याशंकां परिहरन् ज्ञानप्रभेदं तावदाह॥ द्विविधं हीत्यादिना॥ एकाकारनियतं एककोटयवगाहीत्यर्थः॥ निश्चयादिति॥ यद्दूरस्थत्वादिदोषयुक्तं तत्परिमाणादावयथार्थमिति साक्षिणा निश्चितत्वादित्यर्थः। एवं ज्ञानप्रभेदमुक्त्वा इदानीं चंद्रप्रादेशत्वादिप्रत्यक्षस्य एकाकारविषयत्वात् स्तंभप्रत्यक्षवत्पटुत्वमेव। अपटुत्वेपि आगमादिबाध्यत्वमेवेति शंकाया उत्तरमाह॥ एवंचेत्यादिना॥ आदिपदेन

चैवमनुमितेः प्रत्यक्षबाधकत्वे जितं परेणेति वाच्यम्। अस्याः प्रत्यक्षमूलत्वेन नायं सर्प इत्याप्तवाक्यतुल्यत्वात्। नन्वेवमौष्ण्यप्रत्यक्षस्य अनौष्ण्यानुमित्या वा तन्मूलभूतव्याप्तिप्रत्यक्षेण वा बाधापत्त्या कालात्ययापदिष्टोच्छेदः स्यादित्यत आह – अनौष्ण्यहेतोरिति। तथाच व्याप्तेरेवाभावात् न तत्प्रत्यक्षेण वा? तन्मूलकानुमित्या वा औष्ण्यप्रत्यक्षबाधसंभवः। किंतु औष्ण्यप्रत्यक्षेण परीक्षितेनानौष्ण्यानुमितेरेव बाधः इति न कालात्ययापदिष्टोच्छेद इति भावः। ननु मिथ्यात्वहेतौ व्याप्तिसत्त्वात् तन्मूलकानुमित्या व्याप्तिप्रत्यक्षेण वा बाधो जगत्प्रत्यक्षस्य स्यादेवेत्यत आह – मिथ्यात्वहेताविति। तथाच दृश्यत्वमिथ्यात्वसामानाधिकरण्यरूपायाः व्याप्तेः स्वार्थस्य दृश्यत्वमिथ्यात्वतदुभयसामानाधिकरण्यरूपसंबंधस्य च सत्त्वस्य विषयीकृतत्वेन मिथ्यात्वानुमितिप्रतिकूलाया नानुमितिमूलत्वमिति तया वा व्याप्तिप्रत्यक्षेण वा न प्रत्यक्षबाध इति भावः। मिथ्यात्वानुमितेः नीरूपत्वानुमितेश्च प्रकारान्तरेण वैषम्यमाह – अथवेति। उक्तमर्थं कारिकयोपसंहरति – तस्मादिति। स्वोक्तेऽर्थे आचार्यसंमतिमाह – तदुक्तमिति। एवमनंगीकारे विवरणविरोध इत्याह – उक्तं च विवरणेऽपीति। न च तद्गृहीतप्रामाण्यागमतदुपजीव्यनुमानातिरिक्तविषयमिति वाच्यम्। प्रकृतेऽप्यागमप्रामाण्यनिश्चयाभावस्योक्तत्वात्। तस्मान्न कुत्रापि प्रत्यक्षमनुमानागमबाध्यमिति स्थितम्। इति प्रत्यक्षस्य लिंगाद्यबाध्यत्वे बाधकोद्धारः।

न्यायामृतप्रकाशः

नन्विदं रूप्यमिति प्रत्यक्षं इदं रूप्यं न भवति दाहच्छेदादिमत्त्वादिति युक्तिबाध्यं दृष्टमिति चेत्तत्राह॥ इदं रूप्यमिति॥ ननु गौरोहमिति अहंत्वगौरत्वयोः सामानाधिकरण्यप्रतीतेरात्मनः शरीराभेदावगाहिप्रत्यक्षं आत्मा न शरीरं चेतनत्वादित्यादिभेदानुमानबाध्यं दृष्टमित्यतआह। गौरोहमिति॥ किंच मम शरीरमिति सर्वसिद्धभेदप्रत्ययाच्च गौरोहमिति नैक्याध्यासः किंतूपचार इत्याह॥ कर्दमेति॥ गौणं उपचारः। तथाच व्यवहारमात्रमेवेदं न ज्ञानमित्यर्थः। "उपचारश्च कृष्णोहमपि कर्दमलेपने। वस्त्रस्ये"त्यनुव्याख्यानोक्तेः। ननूष्णं जलमिति प्रत्यक्षं नोष्णं जलं शीतत्वादित्याद्यनुमानबाध्यमिति चेत्तत्राह॥ उष्णमिति॥ गौणं उपचारः। तथाच प्रत्यक्षस्यानुमानबाध्यत्वे गौरोहमुष्णं जलमिति उदाहरणद्वयमप्यऽयुक्तमित्याशयः। प्रौढिवादोयं। संयुक्तसमवायेन उष्णं जलं कृष्णं वस्त्रमित्यनयोः प्रत्यक्षयोः प्रमाणत्वादिति ध्येयं। अत एवास्वरसादूषणांतरमाह॥ यद्वेति॥ जले औष्ण्याभावस्य स्पार्शनेन पूर्वमेवनिश्चितत्वात्। निश्चितं यद्द्रव्यांतरं अनुद्भूतरूपोद्भूतस्पर्शवत्तेजोरूपं तत्समभिव्याहाररूपदोषेणोष्णं जलमिति ज्ञानं शंकिताप्रामाण्योपेतमेव जायते। ततःपरं प्रवर्तमानं लिंगं बाधकमिवोच्यत इत्यर्थः। नन्वथापि अहमिहैवास्मि सदने जानान इत्यात्माणुत्वग्राहिप्रत्यक्षं आत्मा विभुः सर्वत्र कार्योपलंभादित्यनुमानबाध्यं दृष्टमित्यत आह॥ अहमिहैवेति॥ अणुत्वादिति॥ उत्क्रांतिगत्यागतीनां हेतूनां सकाशादणुरेवेत्युक्तेरित्यर्थः। ननु दीपज्वालैक्यग्राहिप्रत्यक्षं ह्रस्वत्वदीर्घत्वादिविरुद्धधर्माधिकरणत्वान्नैका पूर्वोत्तरदीपज्वालेत्यनुमानबाध्यं दृष्टमिति चेत् तत्र विकल्पयामः। यत्रादौ दीपो निर्वापितः पश्चात्पुनरारोपितस्तत्रज्वालैक्यग्राहिप्रत्यक्षमित्युच्यते। अथवा यत्र निर्वापितारोपितो न भवति किंतु तथास्थित एवास्ति तत्र ज्वालैक्यग्राहिप्रत्यक्षमित्युच्यते।

रजतप्रत्यक्षे जाग्रति कथं तदभावप्रत्यक्षम्? तत्रापि युक्तिरेव बाधिकेति चेत्, रजतप्रत्यक्षे जाग्रति युक्तेरपि प्रवृत्तेरयोगात्। युक्तेः प्राबल्यस्याद्याप्यसिद्धेः। प्रकृते साक्षिप्रत्यक्षस्य याथार्थ्यनियमेन परीक्षितत्वेन प्राबल्याच्च। तस्मान्नभोनैल्यप्रत्यक्षं प्रत्यक्षेणैव बाध्यत इति भावः। नन्वाकाशस्य साक्ष्ययोग्यत्वात् कथं तत्र नीरूपत्वनिश्चयः साक्षिणा इत्यत आह – परमतेऽपीति। निमीलितनेत्रस्येति। तथाच परेणैव नीलं तम इति प्रतीतेः साक्षिरूपत्वांगीकारेण रूपस्य साक्षियोग्यत्वात् तदभावनिश्चयः साक्षिणा उपपद्यत इति भावः। माऽस्तु रूपस्य साक्ष्ययोग्यत्वेन तत्संसर्गाभावनिश्चयः साक्षिणा। संसर्गाभावग्रहे प्रतियोगियोग्यत्वस्य तंत्रत्वात्। चक्षुषा तु भविष्यतीत्याह – यद्वेति। ननु चक्षुषापि कथं रूपाभावनिश्चयः? रूपित्वग्राहिप्रत्यक्षस्य जागरूकत्वादित्यत आह – दूरस्थलस्येति॥ तथा च रूपाभावप्रत्यक्षस्य संवादवत्त्वेन प्रबलत्वात् प्रबलस्य दुर्बलप्रतिबन्धाभावेन तस्मिन् सत्यप्युत्पत्तिसम्भवादिति भावः। लिंगाभावादिति। ननु नभो नीरूपम्। चक्षुरन्वयव्यतिरेकानुविधायिरूपाविशेषितप्रतीतिविषयत्वात् रूपवदिति लिंगसम्भवात्। न चाप्रयोजकत्वम्। नभो यदि सरूपं स्यात् चक्षुरन्वयव्यतिरेकानुविधायिप्रतीतौ रूपासंबंधितया विषयो न स्यादिति तर्कोपपत्तेः। न चेष्टापत्तिः। सविधे रूपासंबंधितया नभसः सिद्धेः सर्वजनसिद्धत्वादिति चेन्मैवम्। अनुमाने असिद्धेः। तर्के चेष्टापत्तेः। तथाहि चक्षुरन्वयव्यतिरेकानुविधायिनी प्रतीतिश्च नीलं नभ इत्येवंरूपा। तस्यां च रूपसम्बन्धितयैव विषयता आकाशस्य। न च सविधे रूपासम्बन्धितया प्रतीतिविषयत्वमस्तीति वाच्यम्। तस्याः साक्षिरूपत्वेन चक्षुरन्वयव्यतिरेकानुविधायित्वाभावात्। न च साक्षिरूपत्वेऽपि चक्षुरन्वयव्यतिरेकानुविधानमावश्यकम्। अन्यथा अंधस्यापि तद्ग्रहणप्रसंग इति वाच्यम्। सविधे निमीलितनेत्रस्याप्याकाशप्रतीतिसत्त्वेन सविधेऽपि तस्याः चक्षुरन्वयव्यतिरेकानुविधायित्वाभावात्। अंधस्यापि तथा प्रतीतेरिष्टत्वाच्च। अन्यथा मूर्तावष्टब्धप्रदेशमपहाय तदनवष्टब्धप्रदेशान्तरे करप्रसारणादिचेष्टानुपपत्तेः। तथा च लिंगाभावादिति साधूक्तम्।

एतैरेवेति। ननु शब्दगुणवत्त्वेनैवाकाशस्य सिद्धत्वेनाशब्दत्वे साध्ये धर्मिग्राहकानुमानबाध इति चेन्न। आकाशस्य साक्षिसिद्धत्वेनानुमानसिद्धत्वानंगीकारात्। किंच नीरूपत्वे साध्ये बाधश्चेत्याह – पञ्चीकरणेनेति। त्रिवृत्करणपक्षेऽपि आकाशो नीलिमोदेति इति श्रुतेः नभो नीलमेव। सविधे तदनुपलब्धिश्च भूतसंनिकर्षादिति केषांचिन्मतेन बाधसंभवात् पञ्चीकरणेनेति तु मूलमतेनेति बोध्यम्। ननु पञ्चीकरणपक्षे पञ्चीकरणदशायां यस्मिन् भूते यो गुणः स पञ्चीकरणव्यवहारयोग्यो भवतीत्येतावन्मात्राभ्युपगमात् नाकाशे रूपारंभ इति चेन्न। एवं तर्हि पृथिव्यादावपि गंधादिमात्रोपलंभप्रसंगः। न रसाद्युपलंभः। पञ्चीकरणेन पूर्वगुणस्यैव व्यवहारयोग्यत्वात्। न हि पृथिव्यादौ गंधादिमात्रमुपलभ्यते। न चैवमाकाशे रसस्याप्युपलब्धिप्रसंग इति वाच्यम्। तस्यानुद्भूतत्वेनाप्युपपत्तेः। उद्भवानुद्भवयोश्च फलबलेन कल्पना। अतः पञ्चीकरणेन रूपाद्यारंभ इत्येव वक्तव्यमिति युक्तम्। बाधाच्चेति। नीरूपत्वानुमितिमभ्युपेत्याप्याह – यद्वेति। ननु व्याप्तिप्रत्यक्षस्य सामान्यविषयकस्य कथं विशेषविषयकप्रत्यक्षबाधकत्वमिति चेन्न। सामान्यस्यापि विशेषालिंगितस्य विशेषे पर्यवसानात्। न चैवं यदाहवनीयादिबाध इति वाच्यम्। तत्र द्वयोरपि श्रौतत्वेन विशेषविषयस्य प्रबलत्वात्। प्रकृते च नीलं नभ इति प्रत्यक्षात् व्याप्तिप्रत्यक्षस्यैव यत्र महत्त्वादिकं तत्र नीरूपत्वमित्येवंरूपस्य परीक्षितत्वेन प्रबलत्वादिति वैषम्यात्। ।तन्मूलानुमित्येति। न

उत दोषाभावदशायां यत् शैत्यप्रत्यक्षं तद्वा? नाद्यः। दोषाभावदशायामव्यवहितपूर्ववर्तिनस्तस्याभावात्। न द्वितीयः। तदानीन्तनस्येदानीमसत्त्वेन बाधकत्वानुपपत्तेरिति चेन्मैवम्। इदानीं तत्प्रत्यक्षाभावेऽपि तज्जन्यस्मृत्या बाधोपपत्तेः। न चानुभवात् स्मृतिर्दुर्बलेति वाच्यम्। परीक्षितप्रत्यक्षमूलत्वेन प्रबलत्वात्। अस्तु वा दोषाभावदशायां जातस्य शैत्यप्रत्यक्षस्य बाधकता। न च तस्य तदानीमसतो न बाधकत्वमिति वाच्यम्। बाधकत्वं हि नोत्पत्तिप्रतिबन्धः। नेदं रजतमित्यस्य बाधकत्वानुपपत्तेः। किन्तु भ्रमत्वज्ञानजनकत्वम्। तच्च तेन तदानीमसतापि प्रत्यक्षेण सुसम्भवमिति न काचिदनुपपत्तिरिति।

नन्वेतावता कथं चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्य नागमादिबाध्यत्वम्। तदबाध्यत्वे कथं चागमादेर्बाधकत्वव्यवहारोऽपीत्यत आह – एवञ्चेति। तदुत्पत्यनन्तरं स्वार्थनिश्चायकत्वरूपबाधकगुणयोगात् प्रवर्तमानस्यागमादेः बाधकत्वमुपचर्यते न तु वस्तुत इति भावः। ननु वस्तुत एव बाधकत्वं किं न स्यादित्यत आह– येन यस्येति। एवञ्च चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्य प्राक्तनदोषजन्यत्वग्राहिप्रत्यक्षेणैव भ्रमत्वज्ञानमिति तस्यैव बाधकत्वं न त्वागमादेरिति भावः। अकलङ्कितमिति। अप्रामाण्यशंकाकलंकरहितमित्यर्थः। तस्य स्वरूपमाह – स्वार्थपरिच्छेद इति। तदपि कुत इत्यत आह – निःशंकेति। ननु दूरादिदोषाभावेऽपि अतिरिक्त एव दोषः किं न स्यात्। न हि दूरादय एव दोषाः सन्ति इत्यत आह – यदि चेति। एवञ्च क्लृप्तदोषाभावनिश्चयेन अक्लृप्तदोषाभावसाधनात् तत्कल्पनाऽसम्भव इति भावः। एवमपि परपक्षदूषणैकार्थेन दोषः कल्प्येत तदा स्वपक्ष एवोच्छिद्येतेत्याह – तर्हीति॥ ननु क्लृप्तदोषाभावनिश्चयोऽसिद्धः। आविद्यकतारूपदोषाभावस्यानिश्चयात् इत्याशङ्क्य निषेधति – न चेति। प्रमातृप्रमेयप्रमाणदोषेभ्यो हि ज्ञानस्य दुष्टता भवति। आविद्यकतारूपदोषः किं प्रमेयनिष्ठः उत प्रमाणनिष्ठः उत प्रमातृनिष्ठो वा? नाद्यः इत्याह – मयाऽऽविद्यकत्वस्येति। अद्यापीति। मिथ्यात्वसिद्धेः प्रागित्यर्थः। न द्वितीय इत्याह – मानेति। श्रुतेरपौरुषेयत्वेऽपि आकाशादेरिव आविद्यकत्वस्य आवश्यकत्वादिति भावः। तृतीयस्तु, तथासति अद्वैतज्ञानेऽपि प्रमात्वं न स्यात् तत्प्रमातुराविद्यकत्वदोषदुष्टत्वादित्युपर्येव परिहर्तव्यः। दोषान्तरमाशंक्य निषेधति – नापीति। नन्वकलंकितं सर्वथा अबाध्यं किमित्यतो व्यवस्था अस्तीत्याह – इदं चेति। नीलं नभ इति प्रत्यक्षमपि नानुमाबाध्यम्। किन्तु चन्द्रप्रादेशिकत्वप्रत्यक्षतुल्यमित्याह – एवञ्चेति। चन्द्रप्रादेशिकत्वप्रत्यक्षं साक्षिरूपप्राग्दोषजन्यत्व ज्ञानप्रयुक्ताप्रामाण्यनिश्चयेन बाधितप्रायमप्रामाण्य शंकाकलंकितमुत्पद्यत इति यथा नागमेन बाध्यते एवमेव नभोनैल्यप्रत्यक्षमपि साक्षिरूपप्राग्दोषजन्यत्वनिश्चयेनैव बाधितप्रायमप्रामाण्यशंकाकलंकितमुत्पद्यते। न नीरूपत्वानुमितिबाध्यमित्यर्थः। ननु नभोनैल्यप्रत्यक्षस्य दूरादिदोषजन्यत्वनिश्चयः कुत इत्यत उक्तम् – आकाशे समीपे नीरूपत्वनिश्चयादिति। एवंञ्च यत् समीपे नीरूपत्वेन निश्चितं तत्र रूपित्वेन ज्ञानं दोषजन्यमेवेत्यप्रमाणमिति साक्षिणा निश्चितत्वादिति। समीपे नीरूपत्वनिश्चयश्च वक्ष्यमाणप्रकारेण साक्षिणा चक्षुषा वेत्यवधेयम्। न च दूरे रूपित्वनिश्चयात् समीपे नीरूपित्वनिश्चयो दोषजन्य इति किं न स्यादिति वाच्यम्। यत्र हि दूरप्रदेशे रूपित्वनिश्चयः तत्रैव तत्रत्यस्याबाधितनीरूपत्वनिश्चयात् न वैपरीत्यावकाशः।

केचित्त्विति। तथाच प्रत्यक्षस्यानुमानबाध्यत्वे नेदमुदाहरणमिति भावः। अन्ये त्विति। न च नीलं नभ इति प्रत्यक्षे जाग्रति कथं चक्षुषा साक्षिणा वा रूपाभावग्रहणमिति वाच्यम्। शुक्तिरजतस्थलेऽपि

येन केनचित् प्रमितो धर्मः फलं साधयति। स्वाध्यायोऽध्येतव्यः, वेदो धर्ममूलम्, तद्विदां स्मृतिशीले, धर्मज्ञसमयः प्रमाणम्, वेदाश्च पुराणन्यायमीमांसा, धर्मशास्त्राङ्गमिश्रिताः वेदाः स्थानानि विद्यानां, धर्मस्य च चतुर्दश इत्येवमादिभिरेव धर्मप्रमितेर्नियमात् अन्यशास्त्रतः प्रमितस्य फलसाधनत्वाभावात् धर्मत्वाभावः। तथाच स्वरूपेण धर्मस्यापि गोक्षीरन्यायेन शाक्यसम्बन्धे सति न धर्मत्वं भवतीति न शाक्यशास्त्रं धर्मे प्रमाणमिति। अनेन हीदमुक्तं भवति। स्वतः प्रामाणिकस्याप्रमाणसंबन्धे अप्रामाणिकत्वम्। स्वतः प्रबलस्य दुर्बलसम्बन्धे दुर्बलत्वम्। स्वतो दुर्बलस्य प्रबलसम्बन्धे प्रबलत्वमिति। एवमेव प्रकृते नायं सर्प इत्याप्तवाक्यस्य प्रत्यक्षमूलत्वेन प्रबलत्वात् युक्तं तेन प्रत्यक्षबाधनमित्याशयः।

अत एवेति। ननु प्रतिवचनस्थले भ्रमप्रमादादिशङ्काक्रान्तत्वेन नायं सर्प इत्यादेर्दुर्बलतया न भ्रमनिवर्तकत्वम्। यत्र तु तादृशशङ्कानाक्रान्तत्वं तत्र भ्रमनिवर्तकतैव। यथा पित्रादिवचसि नेदृक् प्रतिवचनम्। किन्तु सिद्धवत्प्रवृत्यादिकमेवेति चेन्न। वेदेऽपि भ्रमप्रमादादिशङ्कासम्भवेन तस्यापि प्रत्यक्षबाधकत्वासम्भवात्। न चापौरुषेयत्वेन तच्छङ्कानिरासः। मिथ्यात्ववादिना अपौरुषेयत्वस्य कल्पितत्वेन तेन शङ्कानिरासासम्भवात्। किञ्चापौरुषेयत्वनिश्चयोऽपि अनुमानादिनैव। तत्रापि बौद्धाद्यागमविरोधादिना प्रामाण्यनिश्चयासम्भवात्। अस्तु वा अपौरुषेयत्वनिश्चयः। तथापि तस्यार्थान्तरे प्रामाण्यसंम्भवात् प्रतीतेऽर्थे तात्पर्यभ्रममूलकत्वसंदेहेन अद्वैतागमस्यापि त्वदभिमतेऽर्थे प्रामाण्यसंशयेन दुर्बलत्वात् न प्रत्यक्षबाधकत्वम्। यत्र लौकिके नायं सर्प इत्यादिवचसि शंकानाक्रान्तत्वं तत्रापि प्रत्यक्षमूलकत्वनिश्चयादेवेत्यवैहि। अत एव यत्र पित्रादिवचसि न तन्मूलकत्वनिश्चयः तत्रापि प्रतिवचनं भवत्येव। यत्र न प्रतिवचनं तत्र पिता दृष्टवैव वदतीति निश्चयात्। तस्मात् प्रत्यक्षमूलत्वेनैव नायं सर्प इत्यादेः शब्दबाध्यत्वं न स्वत इति स्थितम्।

ननूक्तस्थले मा भवत्वनुमानादेर्बाधकत्वम्। तथापि पीतः शङ्खः इत्यादि तु अनुमैकबाध्यमिति तदृष्टान्तेन प्रकृतप्रत्यक्षस्यानुमानादिबाध्यत्वं स्यादेवेति शङ्कते – नन्विति। इदमपि सर्वं प्रत्यक्षं नानुमानादिबाध्यमिति वक्तुं भूमिकामारचयति – उच्यते द्विविधं ज्ञानमिति॥ तत्राद्यं यथेति॥ नन्वेषा युक्तिरेव कथम्। यद्यत् दूरस्थाल्पपरिमाणज्ञानं तत्तद्दूरदोषनिबन्धनमप्रमा। शैलाग्रस्थविटपपरिमाणज्ञानवत्। इदमपि तथा इति। तथाच युक्तिबाध्यतैवोक्ता इति चेन्मैवम्। अस्य साक्षिरूपत्वेन युक्तिरूपत्वाभावात्। साक्षी खलु उत्पन्नोत्पत्स्यमानवर्तमानसकलज्ञानेषु दूरस्थाल्पपरिमाणविषयेषु दूरदोषनिबन्धनमप्रामाण्यं निश्चाययतीति। न हि यो यो धूमवान् सोऽग्निमान् यथा महानस इति न प्रत्यक्षम्। तथाच पूर्वमेव साक्षिरूपस्य ज्ञानस्य सत्त्वेन प्रत्यक्षबाध्यतैव। न च प्रत्यक्षस्य वर्तमानमात्रग्राहकस्य कथं भाविज्ञानेऽप्रामाण्यनिश्चायकत्वमिति वाच्यम्। तस्य भविष्यद्ग्रहणसामर्थ्यस्य त्वयाऽप्यङ्गीकार्यत्वात्। अन्यथा प्रामाण्यस्य स्वतस्त्वं न स्यादिति। अस्तु वा युक्तिरेव। तथाप्यस्याः प्रत्यक्षमूलत्वेन नायं सर्प इत्येतत्समानयोगक्षेमत्वम्। न च प्रकृतेऽपि युक्तिः प्रत्यक्षमूलेति वाच्यम्। त्वन्मते प्रत्यक्षस्याप्रमाणत्वेन तन्मूलत्वेन प्राबल्योक्त्योगात्। त्वदुक्तयुक्तेश्चाप्रयोजकत्वेन व्याप्तिप्रत्यक्षमूलत्वाभावाच्च॥ द्वितीयं यथा सवितृशंखादाविति॥ ननु पीतः शंख इति ज्ञानस्य बाधकं प्रत्यक्षं किं अव्यवहितपूर्ववर्ति स्वीक्रियते?

प्रधानेन अङ्गानामविप्रकर्षः प्रयोगे प्राशुभावश्च प्रयोगवचनावगतः यश्च पूर्वाह्णादिः, परिमाणं वा विस्मृतसमस्तपदार्थानुष्ठानसिध्यर्थं प्रयोगविधिनैवाकांक्षितं पदार्थविधिप्रचयावगतं वा एतत्क्रमकालपरिमाणात्मकं मध्ये क्षुदादिनिमित्ताचमनादौ क्रियमाणे नैरन्तर्यादिबाधेन विरुध्यते। विरोधे च श्रुतिबलीयस्त्वात् स्मृत्यर्थस्य बाधः। न च क्रमादीनां श्रुत्यर्थत्वेऽपि पदार्थगुणत्वात् दौर्बल्यम्। आचमनादेः स्मृत्यर्थस्यापि पदार्थत्वात् बलीयस्त्वमिति वाच्यम्। प्रमाणपूर्वको हि प्रमेयावगमः। तेन पूर्वभाविप्रमाणस्थं बलाबलं पूर्वमेव गम्यते। तेन प्रमाणबलाबलेन आचमनादिभ्यः क्रमादीनां पूर्वमुपस्थितत्वात् बलीयस्त्वे निर्णीते निराकांक्षत्वात् न पश्चादवगतं प्रमेयबलाबलमादर्तव्यम्। तस्मादाचमनादिस्मृतिरप्रमाणमिति।

सिद्धान्तस्तु – आचमनादिस्मृतिः प्रमाणमेवेति। न च श्रुतिविरोधे कथं स्मृतेः प्रामाण्यमिति वाच्यम्। न हि स्मृतिश्रुत्योः स्वरूपेण विरोधः। किन्तु अर्थद्वारा। तत्र क्रमः श्रुत्यर्थः सर्वेषु पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया। आश्रियते तेन पदार्थप्राप्त्यपेक्षत्वात् क्रमस्य अत्यन्तजघन्यप्रमाणकोऽपि पदार्थः पूर्वं प्राप्नोति। पश्चात् तदाश्रितः क्रमः पूर्वपदार्थप्रयोगांगतया अवतरन्नपि न पदार्थैर्विरुध्यते। कालोऽप्येवमेव प्रयोगाङ्गत्वात् यावन्तः पदार्था अवधारितास्तेषां सर्वेषामेव पूर्वाह्णादिकालत्वं प्रधानसन्निकर्षः प्रयोगप्राशुभावः। परिमाणं तु न कस्यचित् शास्त्रस्यार्थः। प्रयोगविधिरपि न तदाक्षिपति। अन्यथाप्यविस्मरणसिद्धेः। अथापि शास्त्रार्थः तथापि प्रयोगौपयिकत्वात् प्रयोगस्य च प्रयोज्यपदार्थप्राप्त्यपेक्षत्वात् अविरोधित्वम्। तस्मान्न विरोधः। विरोधाभावाच्च न स्मृतिरप्रमाणम्। यद्यपि क्रमादीनामाचमनादिभिर्विरोधः स्यात्। तथापि सर्वपदार्थगुणत्वात् दौर्बल्यमेव। आचमनादयस्तु पदार्थत्वात् बलवन्तः। न च प्रमाणबलाबलस्य पूर्वभावित्वेन प्राबल्यम्। न हि प्रमाणयोः स्वरूपतोपि विरोधः। अपि तु प्रमेयविरोधनिमित्तकः। कथं? प्रमेयगतं हि विरोधमालोच्य प्रमाणविरोधे बुद्धिर्भवति। एवं सति यदैव प्रमेययोर्विरोधोऽवगम्यते तदैव तयोर्बलाबलमपीति तत एव निर्णये कृते नैराकांक्ष्यात् प्रमाणबलाबलमनादर्तव्यमिति न स्मृतेर्बाधः। एवं हि न्यायः। यद्धि स्वभावत एव अप्रमाणं तत् सर्वदैव अनादर्तव्यम्। यत्तु बलवद्विरोधापेक्षमप्रमाणं तत्तदभावापेक्षया प्रमाणमेवेति। तथाच अत्र बाधकाभावात् प्रमाणबलाबलस्याबाधकत्वात् आचमनादेर्बलीयस्त्वात् तदनुरोधेनैव श्रुत्युक्ताः क्रमादयो बाध्यन्त इति नाचमनादिस्मृतीनामप्रामाण्यमिति भाष्यकाराभिप्रायेण शिष्टाकोपाधिकरणन्यायः।

वार्तिककारस्तु इदमधिकरणं निराचक्रे। नन्विदमधिकरणमयुक्तम्। पूर्वपक्षस्य अतिमन्दत्वात्। कुतः? यदि यज्ञोपवीतादिकं स्मार्तमेव स्यात् तदा उक्तन्यायेन संदेहः स्यात्। न चैवम्। प्रत्यक्षश्रुत्या यज्ञोपवीतादेर्विहितत्वात् तस्मादिद मनुदाहरणम्। तस्मादित्थमधिकरणम्। ब्रह्मचर्यमहिंसा चापरिग्रहः सत्यं च यत्नेन रक्षेदिति श्रुतौ अहिंसादिकं विहितम्। तत् अहिंसादिकं शाक्यशास्त्रेण विहितम्। शाक्यशास्त्राभासानां च पूर्वमप्रामाण्यमुक्तम्। तथाच शाक्यशास्त्रस्याप्रामाण्येपि अहिंसादिविषये प्रमाणमप्रमाणं वेति संदेहः। पूर्वपक्षस्तु – शाक्यशास्त्रमहिंसादिरूपे धर्मे प्रमाणम्। शिष्टाकोपे विरुद्धमिति चेदिति सूत्रखण्डेन यत् तेष्वहिंसादिवचनं श्रुतिस्मृतिशिष्टं न कोपयति तत् प्रमाणमेवेति। राद्धान्तस्तु – न शास्त्रप्रमाणत्वादिति। अयमर्थः – शास्त्रेणैव प्रमितो धर्मः। नाशास्त्रेण। कुतः? न खलु

सजातीयनिर्वापितारोपितस्थले तद्व्यपदेशस्य क्लृप्तत्वात्। दीर्घेयमित्यस्य परिमाणादिभेदादियुक्तिसाहित्येन परीक्षितत्वाच्च। परीक्षितमपरीक्षितस्य बाधकमिति सर्वसिद्धम्। तादृशप्रत्यक्षाभावे तत्र भेदस्यैवासिद्धेः। अत एवाह – तादृशेति।

षष्ठेऽपि केवलाप्तवचोमात्रबाध्यत्वं प्रत्याह – दूरस्थस्यायं सर्प इत्याद्यपीति। ननु नायं सर्प इति वाक्यजन्यं ज्ञानं वा बाधकम्? उत तन्मूलं प्रत्यक्षं वा? नाद्यः प्रत्यक्षस्य शब्दबाध्यत्वानङ्गीकारात्। न द्वितीयः, व्यधिकरणत्वेन तस्याबाधकत्वादिति चेन्न। आद्यं तावदङ्गीकुर्मः। न चापसिद्धान्तः। केवलस्य बाधकत्वाभावेऽपि प्रत्यक्षमूलत्वेन बाधकत्वाभ्युपगमात्। यथा केवलस्य भृत्यस्य प्रकरणस्य वा अमात्यलिङ्गबाधकत्वाभावेऽपि राजगौरवभृत्यनुसारित्वाभ्यां भृत्यादेरमात्यादिबाधकत्वम्। अत एवाह – राजगौरवादिव श्रुतिगौरवादिव वेति॥ अस्तु वा द्वितीयः। न चोक्तदोषः। बाधकत्वं हि नोत्पत्तिप्रतिबन्धः। नेदं रजतमित्यस्याबाधकत्वापत्तेः। किन्तु भ्रमत्वज्ञापनं तत्समानाधिकरणेनेव व्यधिकरणेनापि। अत एवेदानीन्तनज्ञानानां महत्प्रत्यक्षविरोधस्य बहुषु मूलकोशस्थलेषूक्तिरिति न कश्चिद्दोषः। दुर्बलेनापि प्रबलमूलेन स्वापेक्षया प्रबलस्य बाधो भवतीत्यत्र मीमांसकसंमतिमाह – उक्तं हीति॥ दुर्बलस्य प्रमाणस्य बलवानाश्रयः बलवत्प्रमाणं मूलं सहकारि वा तदापि विपरीतत्वं दुर्बलेन प्रबलस्य बाधरूपं भवति। यथा शिष्टाकोपाधिकरणे इत्यर्थः।

ननु एकत्र शिष्टाकोपाधिकरणे आचान्तेन कर्तव्यमिति स्मृत्या बलवद्विषयया वेदं कृत्वेत्यादि दुर्बलविषयश्रुतिबाधेऽपि अन्यत्र केवलयापि स्मृत्या श्रुतिबाधोऽस्तु। ततश्च प्रकृतेऽपि राजगौरवेण राजभृत्यस्यामात्यबाधकत्वेऽपि अयं सर्प इति प्रत्यक्षस्य शब्दमात्रेण बाधोऽस्तु इत्याशङ्कायामाह – न हीति। तथाच स्मृतिमात्रेण श्रुतिबाधस्य काप्यदर्शनात् तदृष्टान्तेन प्रकृते बाधशङ्का नेत्याशयः। शिष्टाकोपाधिकरणं चेत्थम्–प्रमाणलक्षणे स्मृतिपादे चतुर्थाधिकरणे चिन्तितम्। शिष्टाकोपे विरुद्धमिति चेन्न शास्त्र प्रमाणत्वात् इति सूत्रम्। क्षुत आचामेत् इति विहितं पुरुषार्थमाचमनम्। यदा क्रतुमध्ये क्षुदादिकं प्राप्नोति तदा नैमित्तिकमाचमनं क्रत्वङ्गत्वेन स्मृत्या विधीयते। आचान्तेन कर्तव्यम्। एवं दक्षिणाचारेणोत्पादितानि क्रत्वर्थाङ्गस्मरणानि उदाहरणम्। किं प्रमाणमप्रमाणं वेति विचारः। तदर्थं च तानि प्रत्यक्षश्रुत्या विरुद्धयन्ते उत नेति। तदर्थमपि एभिः क्रतुमध्येऽनुष्ठीयमानैः कस्यचित् श्रुत्यर्थक्रमादेः बाधो भवति उत नेति। अथवा अभ्युपेत्यैव विरोधं प्रमाणमप्रमाणं वेति विचारः। तदर्थं च प्रमाणप्रमेयबलाबलविसंवादे किं ज्याय इति चिन्त्यते। ननु कथमत्र सन्देहः। विरोधे स्मृतेरप्रामाण्यस्य श्रुतेः प्रामाण्यस्य च निर्णीतत्वादिति चेदित्थम्। श्रौतत्वात् क्रमादयः पदार्थाः स्मार्ताचमनादिभ्यो बलीयांसो विज्ञायन्ते। प्रमेयस्वरूपालोचने पदार्थगुणत्वात् क्रमादेराचमनादयः पदार्था बलीयांसो गम्यन्त इति बलाबलद्वयविसंवादात् कतरेण निर्णय इति सन्देहः।

पूर्वपक्षस्तु – स्मृतिरप्रमाणमिति कुतः? क्रमकालपरिमाणप्रतिपादकश्रुतिविरुद्धत्वात्। तथाहि वेदं कृत्वा वेदिं करोतीति श्रुतौ पूर्वकालवाचिना क्त्वाप्रत्ययेन क्रमः प्रतीयते। वेदो नाम दर्भमयं सम्मार्जनसाधनम्। वेदिः आहवनीयगार्हपत्यमध्यवर्तिनी चतुरङ्गुलपरिखाता भूमिः। तथा यः कालः

किञ्च साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीति वक्तव्यम्। अन्यथा परोक्षप्रमाया अपि अपरोक्षभ्रमनिवर्तकत्वोपपत्तौ वेदान्तवाक्यानामपरोक्ष ज्ञानजनकत्वप्रदर्शनप्रयासो व्यर्थः स्यात्। साक्षात्कारहेतुश्रवणादेश्च वैयर्थ्यं स्यात्। न च नायं सर्पः इत्याप्तवाक्यादिना सविलासाज्ञाननिवृत्त्यभावेऽपि भ्रमगताप्रमाणत्वज्ञापनेन भ्रमप्रमाणत्वबुद्धेः तद्विषयसत्यताबुद्धेश्च निवर्तनात् तावता भ्रमनिवर्तकत्वव्यपदेश इति सविलासाविद्यानिवृत्यर्थं ब्रह्मसाक्षात्कारानुसरणामिति वाच्यम्। भ्रमगतप्रमाणत्वबुद्धेः तद्विषयसत्यताबुद्धेश्च प्रत्यक्षतया युक्त्या तन्निवर्तनासम्भवात्। न चाबाधिताविषयकत्वरूपं प्रामाण्यमबाध्यत्वरूपं सत्यत्वं च न प्रत्यक्षमिति वाच्यम्। तयोः साक्षिवेद्यत्वेन प्रत्यक्षत्वात्। इतरथा प्रामाण्यस्य स्वतस्त्वं न स्यात्। सत्यत्वस्य प्रत्यक्षप्रत्यक्षत्वात्। न चाबाधितार्थकत्वरूपप्रामाण्यस्य साक्षिवेद्यत्वाभावेऽपि यथार्थत्व रूपप्रामाण्यस्य स्वतस्त्वमिति वाच्यम्। यथार्थत्वस्याबाधितार्थकत्वाभिन्नत्वात्। अबाध्यत्वरूपसत्यत्वाबाधितार्थ कत्वरूपप्रामाण्ययोः प्रत्यक्षविषयत्वस्योपपादितत्वाच्च।

द्वितीयं प्रत्याह – गौरोहमिति॥ यद्यपि ज्ञाने न गौणी वृत्तिः। तस्याः शब्दधर्मत्वात्। तथापि ' ज्ञानं परंपरासंबंधविषयकम्। तज्जन्याभिलापः गौण इत्यर्थः। गौरोहमित्याद्यपि गौणं गौणव्यवहारमात्रम्। न तु ज्ञानमिति वा अर्थः। कर्दमलिप्ते वस्त्रे इति। न च कर्दमवस्त्रयोरिव शरीरात्मनोर्भेदानध्यवसायात् वैषम्यमिमिति वाच्यम्। शरीरात्मनोरपि मम शरीरमिति भेदप्रत्यक्षसत्त्वात्। शरीरात्मभेदप्रत्यक्षस्य पश्वादिसर्वसाधारण्यस्योप पादयिष्यमाणत्वाच्च।

तृतीयं प्रत्याह – उष्णं जलमिति॥ नन्वत्र लिंगादिप्रवृत्तिदर्शनात् तत् लिङ्गबाध्यमेवेत्यत आह – यद्वेति। येन हि यस्य भ्रमत्वनिश्चयः तत् तस्य बाधकम्। नच लिङ्गादिना भ्रमत्वनिश्चयः। पूर्वमेव निश्चितद्रव्यान्तरसमभिव्यावहाररूपदोषजन्यत्वसन्देहेन भ्रमत्वसन्देहात्।

चतुर्थं प्रत्याह – अहमिहैवेति। ननु आत्मनः आकाशवत् सर्वगतत्वेन इहैवेति व्यवच्छेदस्याप्रामाणिकत्वमिति चेन्न। तस्य परमात्मविषयत्वेन जीवविषयत्वाभावात्। त्वन्मते आकाशस्यापि परिच्छेदवत्त्वेन तद्दृष्टान्तेन व्यापकत्वासिद्धेश्च। न च जीवो नाणुः, युगपदेव पादशिरोऽवच्छेदेन सुखदुःखानुभवात्। न हि एकोऽणुरेकदा व्यवहितदेशद्वयावच्छिन्नो भवति। न च युगपत्प्रतीतिर्भ्रमः। उत्सर्गसिद्धप्रामाण्यपरित्यागे बीजाभावादिति वाच्यम्। अणोरपि जीवस्य प्रकाशगुणेन युगपदुभयावच्छेदसम्भवेन युगपत् सुखदुःखानुभवोपपत्तेः। अत एव गुणाद्वाऽऽलोकवत् इत्यत्र जीवस्य प्रकाशव्याप्तिरुक्ता। विस्तरेण च जीवाणुत्वं वक्ष्यामः।

पञ्चमेऽप्यनुमानागमबाध्यत्वं निराह – ज्वालैक्यप्रत्यक्षमपीति। ननु निर्वापितारोपितातिरिक्तस्थले तावदयं विचारः। तत्र च दीर्घेयं न ह्रस्वा इति भेदप्रत्यक्षं वक्तुमशक्यम्। या एव ह्रस्वा सैव इदानीं दीर्घा इति ह्रस्वत्वदीर्घत्वाभ्यां पुरःस्थितयोरभेदस्य साक्षात्क्रियमाणत्वात्। तथा च ज्वालाप्रत्यभिज्ञापि युक्तिबाध्यैवेति चेन्न। दीर्घेयं न ह्रस्वेति प्रत्यक्षस्यानुभवसिद्धत्वेन यैव ह्रस्वेत्यस्य पूर्वेद्युर्ये शालयो भुक्ताः त एवाद्य भुज्यन्ते इत्यादिवत् व्यपदेशमात्रत्वात्। न च विपरीतं किं न स्यादिति वाच्यम्।

पराङ्मुखतरुचंद्रादिपरिमाणगोचरप्रत्यक्षविलक्षणा परोक्षधीः प्रपंचसत्यत्वविषया केवलेनानुमानादिना न बाध्यते। यत्रेति। यत्र विशेषे दर्शनाद्यभावे अर्थसन्निकर्षमात्रेण जायमानं प्रत्यक्षज्ञानमप्यनुमानादिना बाधितं प्रवृत्त्यादिस्वयोग्यव्यवहाराक्षमं भवति तत्र प्रत्यक्षस्य मिथ्यात्वं भवतु। यत्र पुनः परीक्षया विशेषदर्शनादिना च प्रत्यक्षे प्रामाण्याबधारणं तत्र नानुमानेन प्रत्यक्षस्य विषयापहाररूपमिथ्यात्वसिद्धिरित्यर्थः। न चैतदपि गृहीत- प्रामाण्ययुक्त्यादीतरयुक्त्यादि विषयम्। एकत्र प्रामाण्यनिश्चये बलाबलचिंताया एवानवकाशादिति वाच्यम्। विश्वमिथ्यात्व युक्तेरपि प्रत्यक्षविरोधेन गृहीतप्रामाण्येतरत्वादिति।

व्यासाद्रिसूततर्काब्धुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यां नाक्षाबाध्यत्वबाधकम्॥

प्रत्यक्षस्य लिंगाद्यबाध्यत्वे बाधकोद्धारः।

न्यायामृतकण्टकोद्धारः

ननु तथापि जगत्प्रत्यक्षं नानुमानागमाबाध्यम्। भूयसां प्रत्यक्षाणामनुमानागमबाध्यानामुपलम्भात्। तथाहि इदं रूप्यमिति प्रत्यक्षं नेदं रूप्यं काळपृष्ठत्वात् इत्यनुमानेन, गौरोऽहमित्यादि आत्मा नीरूपः विभुत्वादाकाशवत् इत्यनुमानेन, उष्णं जलमित्यादि जलमनुष्णं शीतस्पर्शाधिकरणत्वात् व्यतिरेकेण वह्निवत् इत्यनुमानेन, अहमिहैवास्मि सदने जानान इत्यादि आत्मा विभुः सदा सर्वत्र कार्यजनकत्वात् इत्यनुमानेन, सेयं ज्वाला इत्यादि उत्तरज्वाला पूर्वस्या भिन्ना दीर्घह्रस्वत्वादिविरुद्धधर्माधिकरणत्वात् इत्यनुमानेन, अयं सर्प इत्यादि नायं सर्प इत्याद्याप्तवचोमात्रेणैव बाध्यं दृष्टमिति चोद्यं निराचष्टे – इदं रूप्यमित्यारभ्य ननु नीलं नभ इत्यन्तेन ग्रन्थेन। तत्र तावत् आद्ये आह – इदं रूप्यमिति। एवं प्रकृतप्रत्यक्षमपि ततोऽपि बलवत्प्रत्यक्षेणैव बाध्यं कथञ्चिद्भवेत्। न च तदस्ति। न त्वनुमानागमाभ्यामिति भावः। ननु परीक्षासहकृतप्रत्यक्षस्य बाधकत्वे सविशेषणे हीति न्यायेन परीक्षाया एव बाधकत्वमिति चेन्न। प्रत्यक्षबाधने केवलयुक्तेरप्रसरात् प्रत्यक्षसहकृतयुक्तेर्बाधकत्वे सविशेषणे हीति न्यायस्य वैपरीत्यापातात्। तथापि किं विनिगमकमिति चेत् वह्निशैत्यानुमाने प्रत्यक्षस्य बाधकतायाः कृप्तत्वात् प्रत्यक्षस्यैव बाधकत्वम्। युक्तेस्तूपसर्जनत्वमात्रमिति विदाङ्कुर्वन्तु।

ननु तत्रापि इदं रजतमिति प्रत्यक्षे जाग्रति तस्य युक्त्या प्रतिबन्धाक्षमत्वेऽङ्गीकृते तद्विषयप्रत्यक्षोत्पत्तेरनवकाश इति चेन्न। विरोधप्रत्यक्षे जाग्रति युक्तेरप्यप्रवर्तनात्। न च विशेषदर्शनजन्यत्वेन युक्तेः प्रबलत्वात् प्रवृत्तिरिति वाच्यम्। प्रत्यक्षेऽपि संशयोत्तरप्रत्यक्ष इव विशेषदर्शनजन्यत्वस्य वक्तुं शक्यत्वेन प्रबलत्वेन प्रत्यक्षप्रवृत्तेरपि सम्भवात्। अन्यथा कालात्ययापदिष्टदोषता न स्यादित्युक्तत्वात्।

ननु प्रत्यक्षे योग्यविशेष्यसन्निकर्षः कारणम्। अत एव रूपाभाववान् वायुरिति धीर्न प्रत्यक्षरूपा। तथाच साक्ष्यविषयाकाशे नीलाभावः कथं साक्षिविषय इत्याशंक्य न केवलं मम मते साक्षिविषय आकाशोऽपि तु परमतेपीत्याह – परमतेऽपीति। रूपमपि परमते साक्षिविषय इत्याह – निमीलितनेत्रस्येति। तथाचाकाशस्याधिकरणस्य प्रतियोगिनो नीलिम्नश्च साक्षिग्राह्यत्वादाकाशे नीलरूपाभावः साक्षिवेद्य इति साक्षिबाधितैव नभोनैल्यधीरित्यर्थः। यद्वेति। आकाशे रूपाभाव इत्येवं रूपाभावविशेष्यकेत्यर्थः। तदिदमाह। आकाशे रूपाभावधीरिति। तत्रैव चक्षुषैवानैल्यबुद्धेरिति। ननु नीलं नभ इति प्रत्यक्षे जाग्रति रूपाभावग्रहस्य चक्षुषा साक्षिणा वा न संभवः। तथाच वलवती युक्तिरेव तद्बाधिकेति। तन्न। तद्वदेव युक्तेरप्यनुदयप्रसंगात्। स्वभावबलवत्त्वं च चक्षुःसाक्षिणोरेव युक्तेरप्यतिशेते। लिंगाभावादिति। ननु न लिंगाभावः। चक्षुरन्वयव्यतिरेकानुविधायि रूपाविशेषितप्रतीतिविषयत्वान्न रूपवदिति लिंगसंभवात्। न चाप्रयोजकत्वम्। नभो यदि रूपवत् स्यात् चक्षुरन्वयव्यतिरेकानुविधायिप्रतीतौ रूपासंबंधितया विषयो न स्यादिति तर्कोपपत्तेः। न चेष्टापत्तिः। सविधे रूपासंबंधितया नभस्सिद्धेस्सर्वजनसिद्धत्वात् नभसस्साक्षिवेद्यतायामपि चक्षुरन्वयव्यतिरेकानुविधानमवर्जनीयमेव। अन्यथा अंधस्यपि तद्ग्रहणं स्यादिति। तन्न। मंडूकवसांजनाक्तनेत्रस्य वंशे वंशत्वाप्रतीतावपि वंशत्वसत्त्ववत्सविधे सामीप्यदोषेण नभःप्रतीतौ रूपाविषयकत्वेपि नभसि रूपाभावासिद्धेः। अत एव यस्यैव यत्रैव सविधे नभसि न रूपधीस्तस्यैव तत्रैव नभोभागे नीलिमधीः। तस्मान्नोक्तानुमानान्नभसि नीरूपत्वसिद्धिरिति साधूक्तं लिंगाभावादिति।

द्रव्यानारंभकत्वादेरिति। अंत्यावयविनि व्यभिचारोऽपि बोध्यः। पंचीकरणेनेति। पंचीकरणं त्वित्थम्। अपंचीकृताकाशस्यार्धभागे पृथिव्यादिचतुष्टयस्याष्टमेऽष्टमे भागे मिलिते सति पंचीकृताकाशस्योत्पत्तिः। अवशिष्टस्याकाशार्धभागस्य चतुर्भागकल्पनया एकैकभागेनापंचीकृतपृथिव्यादिचतुष्टयस्य प्रत्येकार्ध भागेन पंचीकृतपृथिव्यादिचतुष्टयस्योत्पत्तिः। एवं भूतांतरेऽपि योजनीयम्। एवं च पंचीकरणपक्षे रूपवत्तेजोजलपृथिव्यारब्धत्वादाकाशे रूपवत्तया रूपाभावानुमाने बाधः स्यादित्यर्थः। न चापंचीकरणदशायां यस्मिन् भूते यो गुणः स पंचीकरणेन व्यवहारयोग्यो भवति। आकाशे चापंचीकरणदशायां रूपं नास्तीति कथं पंचीकरणेनाकाशे रूपारंभः स्यादिति वाच्यम्। तथापि रूपवदवयवारब्धद्रव्यत्वात् रूपोत्पत्तिः पृथिव्यादाविव दुर्वारा। अत एव पंचीकरणपक्षस्य दुष्टत्वात् त्रिवृत्करणपक्ष एव सिद्धांततः समन्वयसूत्रे। तस्मात्पंचीकरणपक्षे युक्तो बाधः। तस्मादिति। स्वार्थनिश्चयरूपत्वात्तन्निश्चय

अपि वा कारणेत्येतद्भिन्नाधिकरणं मतम्।
शिष्टाचारः प्रमाणं किं न वेत्यत्रे विचार्यते॥

स्मृतिन्यायेन सिद्धाऽपि शिष्टाचारप्रमाणता।
विरुद्धाचारसंसर्गात्पुनराक्षिप्य साध्यते॥ इति।

न हीति। आचमनादेः प्राधान्यमनुष्ठीयमानत्वं स्मृत्या श्रुत आचामेदित्येवं रूपया।

अत एवेति। न चैतत्पित्रादिवचसि नास्तीति तत्र शब्दस्यैवाक्षबाधकत्वमिति वाच्यम्। पितृवाक्यत्वेनैव दृष्टमूलत्वात्तेनैव बाधः। न च चंद्रेति। चंद्रप्रादेशिकत्वादिप्रत्ययस्याऽगमादिना भ्रमत्वं न ज्ञायते। किंतु प्रागेव ज्ञातदूरादिदोषेणेत्यर्थः। ननु युक्तिरेवैषा। यद्यद्दूरस्थाल्पपरिमाणज्ञानं तद्दूरदोषनिबंधनमप्रमा। शैलाग्रस्थविटपिदूर्वांकुरपरिमाणज्ञानवत्। इदमपि तथेति। तथा चैवं रूपया युक्त्यैव चंद्रप्रादेशिकत्वादिप्रत्यक्षस्य बाधं वदन्युक्त्या न प्रत्यक्षस्य बाध इति वक्तुं कथमुत्सहेत। किंच येन यस्य भ्रमत्वं ज्ञायते तत्तस्य बाधकमिति यदि तद्रा भ्रमत्वस्यानुमेयत्वादनुमानमेव बाधकमित्यायाति। न हि प्रमात्ववत् भ्रमत्वस्यापि स्वतस्त्वं भवदभिमतमिति चेन्न। दूरस्थतरुचंद्रपरिमाणादौ नोक्तप्रकारेण युक्त्या वा बाध इष्यते। अपि तु दूरादिदोषेण स्वरूपसता जायमानं ज्ञानमर्थनिश्चयपराङ्मुखं जायते। तस्मिंस्तु जाते दूरादिदोषजन्यत्वज्ञानसहकृतेन साक्षिणैव तत्र भ्रमत्वनिश्चय इति न प्रथमं युक्त्या दूरस्थचंद्रपरिमाणादिप्रत्यक्षबाधः। विरोधिनिश्चयप्रत्यक्षे जाग्रति तद्विपरीतयुक्तेरनुत्थानादित्युक्तत्वात्। अत एव पीतः शंखः, तिक्तो गुड इत्यादौ नापीतानुमित्यादिना प्रत्यक्षबाधः। किं त्वपीतप्रत्यक्षेणेति सर्वतांत्रिकसिद्धांत इति। परैरपि साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीति स्वीकर्तव्यम्। अन्यथा परोक्षज्ञानस्यापरोक्षभ्रमनिवर्तकत्वोपपत्तौ वेदांतानामपरोक्षज्ञानजनकत्वसाधनप्रयासो व्यर्थः स्यात्। किं च नायं सर्प इत्याप्तवाक्यादिना सविलासाज्ञाननिवृत्त्यभावेपि भ्रमगता प्रमाणत्वज्ञापनेन भ्रमप्रमाणत्वबुद्धेस्तद्विषयसत्यताबुद्धेश्च निवर्तनात्। तावता भ्रमनिवर्तकत्वव्यपदेशाद्भ्रमे प्रामाण्यविभ्रमस्य तद्विषयसत्यताविभ्रमस्य च परोक्षत्वेनापरोक्षबाधानपेक्षत्वात्। न हि दुष्टकारणाजन्यत्वमबाधितविषयत्वं वा प्रामाण्यं कस्य चित्प्रत्यक्षम्। न वा सर्वदेशसर्वकालसर्वपुरुषाबाध्यत्वरूपं विषयसत्यत्वम्। अतस्तयोः परोक्षप्रमाबाध्यत्वमुचितमेव। तयोश्च बाधितयोः रजतादिभ्रमः स्वरूपेण सन्नपि स्वकार्याक्षमत्वादसन्निवेति बाधित इत्युच्यत इति तत्र तत्र परैरुक्तत्वात्परोक्षज्ञानस्यापरोक्षज्ञानबाधकत्वमभिप्रेत्य युक्त्या प्रत्यक्षं बाध्यत इति वदतां वाङ्नसविसंवाद एव।

धर्मित्वाच्च बलीयस्त्वं स्वधर्मान् प्रति संभवेत्।
न चैषामप्रमेयत्वे तद्धर्मत्वं क्रमादिना ॥

किंच वैदिकपदार्थमात्रोपसंहारिक्रमादिर्बाध्यते स्मृत्याचारपर्यंतसकलप्रमाणप्रापितपदार्थोपसंहारी वा। आद्ये कल्पे स्मार्तपदार्थानपेक्षत्वात्कथं तद्बाध्यत्वम्। द्वितीये त्वविरोधान्न बाधः। वैदिकपदार्थमात्रपर्यालोचनयोत्पन्नमपि तावन्मात्रोपसंहारिक्रमज्ञानं स्मार्तपदार्थज्ञानेन बलीयसा बाध्यत इति चेत् न। बलवत्प्रमाणावष्टंभमंतरेण तद्बलीयस्त्वासिद्धेः।

अतः प्रमाणदौर्बल्ये प्रमेयबलवागियम्।
व्योमचित्रायते तेन विचारोऽयं न युज्यते ॥

अतः शाक्यादिशास्त्रस्थं वेदवाक्याविरोधि यत्।
सत्योक्त्यादिवचस्तत्किं प्रमाणं नेति चिंत्यते॥

विरोधेनाप्रमाणत्वं पूर्वमेषां निरूपितम्।
तदभावादतः पूर्वपक्षी प्रत्यवतिष्ठते॥

विरोधे प्रामाण्यमनपेक्ष्यमिति वदताऽर्थादविरोधे प्रामाण्यमुक्तम्। तथासति वेदाविरोधिनामहिंसासत्योक्त्याद्यर्थानां शाक्यादिवचसां प्रामाण्यं प्राप्नोति।

एवमाद्येन सूत्रेण पूर्वपक्षः कृतोऽधुना।
न शास्त्रपरिमाणत्वादित्यनेन निराकृतः।
चतुर्दशैव शास्त्राणि वेदाश्चत्वार एव च।
धर्मशास्त्रपुराणांगमीमांसान्यायमिश्रिताः॥

शाक्यादिसंहितास्तंत्र बाह्याः शिष्टाप्रयोगतः।
न शास्त्रपदवाच्याः स्युरतो धर्माप्रमाणता॥

वेदप्रमित एवार्थः श्रेयः साधनमाश्रितः।
स्वाध्यायविधिनाऽन्येषां तदधीना प्रमाणता॥

अतो वेदाननुज्ञातशाक्यादिवचसामिह।
अविरोधेऽपि नैवास्ति प्रामाण्यं मत्तवाक्यवत्॥

प्रधानप्रत्यासन्ना इति प्रयोगवचनेन। तत्र यदि वेदवेदिकरणयोरंतः क्षुन्निमित्तमाचमनमनुष्ठीयेत तर्हि इयत्तादित्रयमपि बाध्येत। तस्मात् श्रुत्युक्तार्थविरुद्धान्येवंजातीयकानि स्मरणान्यप्रमाणान्येवेति द्वितीयसूत्रस्यार्थः। अपि वेति पूर्वपक्षव्यावृत्तिः। क्रतुमध्ये प्रयुक्तान्याचमनादीन्यविरुद्धत्वेन प्रमाणत्वेन प्रतीयेरन्। कारणाग्रहणे लोभादिरूपमूलांतराग्रहणे सतीति तृतीयसूत्रार्थः। वेदो नाम संमार्जनसाधनं दर्भमुष्टिः। तस्य करणं सम्यग्बंधनाग्रपरिवासनादिसंस्कारः। वेदिर्नाम गार्हपत्याहवनीययोर्मध्ये चतुरंगुलखाता भूमिः। तत्करणं नाम वेदेन संमार्जनमुद्धननादिसंस्कारः।

वार्तिककारस्तु भाष्यकारोक्तपूर्वपक्षस्यातिमंदत्वाच्छिष्टाकोपेत्यादिना पूर्वपक्षयित्वा न शास्त्रेत्यादिना सिद्धांतितवान्। अपि वेत्यादि त्वधिकरणांतरमित्याह। तथाहि – न तावदाचमनस्मृत्यादय उदाहरणम्। हस्तावनिज्य त्रिराचामेत् द्विःपरिमृज्य, सकृदुपस्पृश्येति प्रत्यक्षवेदविहितत्वादाचमनं न स्मार्तम्। यत्किंच ब्राह्मणो यज्ञोपवीत्येबाधीयेत याजयेद्यजेत वा यज्ञस्य प्रसृत्या इत्ययज्ञोपवीते प्रत्यक्षो वैदिको विधिः। यथा वै दक्षिणः पाणिरेवं देवयजनमिति दक्षिणाचारस्य प्रत्यक्षो वेदपरामर्शः। अत आचमनादीनां प्रत्यक्षश्रुतिविहितत्वेन स्मार्ततया नोदाहरणं युक्तम्। नापि विरोधाशंका।

अप्राप्तेषु पदार्थेषु न भवंति क्रमादयः।
प्राप्तेषु तदधीनत्वान्न पदार्थविरोधिता ॥

नित्यं चाचमनं सर्वं पूर्वत्वान्न विरुध्यते।
नैमित्तिकं तु नित्यस्य क्रमादेर्बाधकं भवेत्॥

अथ प्रमाणप्रमेयबलाबलयोः किं ग्राह्यमिति चिंत्यते। किं प्रमाणबलाबलवशात् श्रौतेन स्मार्तबाधो धर्मित्वेन वा पदार्थानां बलीयस्त्वाद्धर्मभूतक्रमादिबाध इति। तदप्ययुक्तम्। सिद्धांतासंभवात्। तथाहि।

इष्टे स्मृतिप्रमाणत्वे दौर्बल्यं किं निबंधनम्।
अनिष्टे तु प्रमेयत्वं पदार्थानां कुतो भवेत्॥

विषयालोचनेनाथ स्मृतेरत्र प्रमाणता।
नान्योन्याश्रयतापत्तेरेतदप्यवकल्प्यते॥

प्रमेयत्वे हि धर्मत्वात्पदार्था बलवत्तराः।
बलवद्विषयत्वेन स्मृतेः स्यात्तत्प्रमेयता॥

माचमनादिना बाधितं न भवति। न च श्रुत्यर्थत्वेऽपि पदार्थगुणत्वात्क्रमादेर्दौर्बल्यम्, आचमनादेः स्मृत्यर्थस्यापि पदार्थत्वाद्बलीयस्त्वमिति वाच्यम्। प्रमाणपूर्वको हि प्रमेयावगमः। तेन पूर्वभाविप्रमाणस्थं बलाबलं पूर्वमवगम्यते। तेनाचमनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकांक्षत्वान्न पश्चादवगतं प्रमेयबलाबलमादर्तव्यम्। तस्मादाचमनादि स्मृतीनामप्रामाण्यमिति। सिद्धांतस्तु।

पदार्थप्राप्त्यपेक्षत्वात्क्रमादेरविरोधिता।
विरोधेऽपि च दौर्बल्यं पदार्थेभ्यो गुणत्वतः॥

सर्वेषु च हि पदार्थेषु प्राप्तेषु प्रयोगवेलायां तद्विशेषणतया क्रम आपतति। तेन पदार्थप्राप्त्यपेक्षत्वात्क्रमस्यात्यंतजघन्यप्रमाणकोऽपि पदार्थः पूर्वं प्राप्नोति। पश्चात्क्रमः पूर्वपदार्थप्रयोगांगतया चेतरत्रापि पदार्थैर्विरुध्यते। कालोऽप्येवमेव प्रयोगांगत्वाद् यावंतः पदार्था अवधारितास्तेषामेव पूर्वाह्णादिकालत्वं प्रधानसंनिकर्षः प्रयोगप्राशुभावश्च। परिमाणं तु न कस्यचिदपि शास्त्रस्यार्थः। प्रयोगविधिरपि न तदाक्षिपति। अन्यथाऽप्यविस्मरणसिद्धेः। अथापि शास्त्रार्थतयापि प्रयोगौपयिकत्वात्प्रयोगस्य च प्रयोज्यपदार्थसापेक्षत्वादविरोधित्वम्। यद्यपि क्रमादीनामाचमनादिभिर्विरोधस्तथापि पदार्थगुणत्वाद्दौर्बल्यम्। आचमनादयस्तु पदार्थत्वाद्बलवंतः। न च प्रमाणबलाबलस्य पूर्वभावित्वम्। न हि प्रमाणयोः स्वरूपतो विरोधः। अपि तु प्रमेयविशेषनिमित्तः। प्रमेयगतं हि विरोधमालोच्य प्रमाणविरोधबुद्धिर्भवति। तद्यदैव प्रमेययोर्विरोधोऽवगम्यते तदैव तयोर्बलाबलमपीति तत एव निर्णये कृते नैराकांक्ष्यात्प्रमाणबलमनादर्तव्यमिति न स्मृतेर्बाधः। यद्धि स्वभावत एवाप्रमाणं तत्सर्वदैवानादर्तव्यम्। यत्तु बलवद्विरोधापेक्षमप्रमाणं तत्तदभावापेक्षया प्रमाणमेवेत्यवगंतव्यम्। न चात्र बाधकमस्ति। प्रमाणबलाबलस्य बाधकत्वात्। तस्मादाचमनादेर्बलीयस्त्वात्तदनुरोधेनैव श्रुत्युक्तक्रमादयो बाध्यंत इत्याचमनादिस्मृतीनामबाधात्प्रामाण्यमिति।

एतच्च भाष्यकारमते नाधिकरणशरीरम्। भाष्यकारो हि शिष्टाकोपे अविरुद्धमिति चेन्न। शास्त्रपरिमाणत्वादित्यनेन पूर्वपक्षयित्वा अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्निति सूत्रेण सिद्धांतितवान्। शिष्टस्य श्रुत्युपदिष्टस्य वेदं कृत्वा वेदिं करोतीत्यादेः स्मार्ताचमनाद्यनुष्ठानात् अकोपे हान्यभावे सत्यविरुद्धमेवंजातीयकं स्मार्तमिति चेत् पश्य सिद्धांतिन्नित्याद्यसूत्रार्थः। एवमाशंक्याह पूर्वपक्षी – नशास्त्रपरिमाणत्वादिति। नैतदेवं अविरुद्धमेवंजातीयकमिति। कुतः? शास्त्रपरिमाणत्वात्पदार्थानामिति। शास्त्रेण परिमाणं पदार्थानां त्रिधाऽवगतम्। इयंत इति श्रुतिलिंगादिषड्केन, एतत्क्रमका इति श्रुत्यर्थादिषड्केन,

विरोधिनिश्चयमात्रप्रतिबध्यत्वात्। तस्माद्रजतादिप्रत्यक्षे विद्यमानेऽपि स्वभावत एव बलवद्विपरीतप्रत्यक्षमुपपद्यत इति स्वीकार्यम्। अन्यथा क्वचिदपि ज्ञाने अर्थासत्त्वपर्यवसाय्यप्रामाण्यशंकाद्यनुदयः स्यात्। तद्विरोधिनः प्रथमोत्पन्नस्य जागरूकत्वादिति। मम शरीरमिति सर्वसिद्धभेदप्रत्ययाच्च गौरोहमिति नैक्याध्यासः, किंतु गौण उपचार इत्याह – कर्दमलिप्त इति। उष्णमिति। तोयतेजसोर्भेदानुभवादित्यर्थः। जीवस्येति। न चाकाशवत्सर्वगतश्च नित्य इत्याद्यागमेन उत्सर्गसिद्धप्रामाण्येन युगपत्पादशिरोवच्छिन्न सुखदुःखानुभवेन जीवस्याणुत्वमसिद्धमिति वाच्यम्। उत्क्रांत्यादिना तदणुत्वस्य वक्ष्यमाणत्वात्। अन्यत्रापीति। न च य एव दीर्घः स एवेदानीं ह्रस्व इति दीर्घत्वह्रस्वत्वाभ्यामुपस्थितयोरभेदस्य साक्षात्क्रियमाणत्वाद्दीर्घोयं दीपो ह्रस्वो नेति प्रत्यक्षमसिद्धमिति वाच्यम्। तथा प्रत्यभिज्ञाया असिद्धेः।

शिष्टाकोपे यथोदितमिति। प्रथमस्य तृतीये स्थितं "शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्"। क्षुत आचामेदिति स्मरणानि, वेदं कृत्वा वेदिं करोतीति च श्रौतान्युदाहरणम्। किमप्रमाणं प्रमाणं वेति विचारः। तदर्थं च प्रत्यश्रुत्यादिभिर्विरुध्यते न वेति। तदर्थमप्येभिः क्रतुमध्येऽनुष्ठीयमानैः क्वचित् श्रुत्यर्थस्य क्रमादेर्भवति बाधो न वेति। अथवाऽभ्युपेत्यैव विरोधं स्मृतिरप्रमाणं प्रमाणं वेति विचार्यते। तदर्थं च प्रमाणप्रमेयबलाबलविसंवादे किं ज्याय इति चिंत्यते। श्रुतिस्मृत्योः प्रमाणयोः श्रुतिर्बलीयसीति स्थितम्। अतः श्रौतत्वात्क्रमादयः स्मार्तेभ्य आचमनादिभ्यो बलीयांसो विज्ञायंते। प्रमेयस्वरूपालोचने पदार्थगुणत्वात्क्रमादेराचमनादयः पदार्था बलीयांसो विज्ञायंते। बलाबलद्वयविसंवादात्कतरेण निर्णय इति संदेहः। तत्र पूर्वः पक्षः–

श्रुत्युक्तानां क्रमादीनां स्मार्तैराचमनादिभिः।
व्याकोपः स्यादतस्तावद्विस्पष्टैव विरुद्धता॥
ततः श्रुतेर्बलीयस्त्वात्स्मृतेः स्याद्प्रमाणता।
पूर्वभाविप्रमाणस्थं प्रमेयस्याद्बलाबलात्॥
ज्यायस्तेनैव निर्णीति न पश्चादितरादरः।
नैराकांक्ष्यात्प्रमाणानामतः स्मृत्यर्थबाधनम्॥

वेदं कृत्वा वेदिं करोतीति क्रमः, कालश्च यः प्रधानेनांगानामविप्रकर्षः, प्रयोगप्राशुभावश्च प्रयोगवचनावगतो यश्च पूर्वाह्णादिः, परिमाणं चाविस्मृतसमस्तपदार्थानुष्ठानसिध्यर्थं प्रयोगविधिनैवाकांक्षितम् पदार्थविधिप्रचयावगतम्। तत्त्रयमपि क्रमकालपरिमाणात्मक

यतो युक्तिरेवैषा। यद् यद्दूरस्थाल्पपरिमाणज्ञानं, तत् तद्दूरदोषनिबन्धनमप्रमा, शैलाग्रस्थविटप्यल्पपरिमाणज्ञानवत् इदमपि तथेति। तथा चैवंरूपया युक्त्यैव चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्य बाधं वदन् युक्त्या न प्रत्यक्षस्य बाध इति वचनेनाजैषीः परं मन्दबुद्धे! मन्दाक्षम्, न तु परम्। एवं 'पीतः शङ्खः' इति प्रत्यक्षेऽपि प्राचीनार्थाभावप्रत्यक्षं न बाधकम्, तस्येदानीमभावात्। न च तत्स्मृतिर्बाधिका, तस्या अनुभवाद् दुर्बलत्वात्। केवलं युक्त्युत्पादन एव सोपयुज्यते। तेन युक्त्यागमाभ्यामेवोदाहृतस्थलेषु बाधः।

यत्तु क्वचिद्युक्त्यादेर्बाधकत्वदर्शनमात्रेण सर्वत्र न बाधकत्वं वक्तुं शक्यम्, युक्त्यादिबाधकताया अनुस्रियमाणप्रत्यक्षगौरवनिबन्धनत्वात् इत्युक्तम्। तदनुक्तोपालम्भनम्। न हि मया क्वचिद् दर्शनमात्रेण युक्तेर्बाधकता सर्वत्रोच्यते, अपि तु चन्द्रप्रादेशिकत्वशङ्खपीतत्वप्रत्यक्षादौ यावदागमादेर्बाधकताप्रयोजकं दृष्टं तावत्सत्त्वेन। न च तत्रानुस्रियमाणं प्रत्यक्षमस्ति, यद्गौरवेण बाधकतायामन्यथासिद्धिं ब्रूयाः। तस्माच्चन्द्रप्रादेशिकत्वप्रत्यक्षस्य प्रपञ्चसत्त्वप्रत्यक्षस्य च तुल्यवदेव बाध्यता। युक्त्यागमयोश्च तुल्यवदेव बाधकतेति। न हि चन्द्रप्रादेशिकत्वप्रत्यक्षेऽपि प्रागेव दुष्टकरणकत्वनिश्चयः। नैकट्यस्यापि क्वचिद् दोषत्वेन सर्वत्र परिमाणज्ञानाविश्वासप्रसङ्गात्। किंत्वागमादिना बाधानन्तरमेव। तद्वत् प्रकृतेऽपि मिथ्यात्वसिद्ध्यनन्तरमेवाविद्यारूपदोषनिश्चयः। तथा च सर्वात्मना साम्यम्। यत्तु दृष्टस्य वस्तुनो बलवद्दृष्टिं विना अन्यद्बाधकं नास्तीत्युक्तं तद् दुर्बलशब्दलिङ्गादिविषयम्। यदप्युक्तं विवरणे, 'यत्राविचारपुरस्सरमेव प्रत्यक्षावभासमप्यनुमानादिना बाधितमुच्छिन्नव्यवहारं भवति। तत्र तथा भवतु। यत्र पुनर्विचार पदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया बाधनिश्चयस्तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिः' इति तदपि गृहीतप्रामाण्यकशब्दतदुपजीव्यनुमानातिरिक्तयुक्तिविषयम्। एकत्र प्रामाण्यनिश्चये बलाबलचिन्ताया एवानवकाशात्॥ ॥ इति प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकम्॥

न्यायामृततरङ्गिणी

सयुक्तिकेत्यादि। ननु रजताभेदशरीराभेदप्रत्ययोर्जाग्रतोरंगीकृते युक्त्या प्रतिबंधाक्षमत्वे तद्विषयप्रत्यक्षोत्पत्तेरेवानवकाश इति चेन्मैवम्। तर्हि सुतरां युक्तेरनवकाशः। तस्याः

भेदप्रत्यक्षमेव तद्बाधकमिति वाच्यम्। निर्वापितारोपितातिरिक्तस्थले तावदयं विचारः। तत्र च दीर्घेयं न ह्रस्वेति भेदप्रत्यक्षं वक्तुमशक्यम्। यैव ह्रस्वा सैवेदानीं दीर्घेति ह्रस्वत्वदीर्घत्वाभ्यामुपस्थितयोरभेदस्य साक्षात्क्रियमाणत्वात्। तथा च ज्वालाप्रत्यभिज्ञा युक्तिबाध्यैव। सर्वदा पित्तदूषितनेत्रस्य 'पीतः शंखः' इति प्रत्यक्षे चन्द्रप्रादेशत्वप्रत्यक्षे च परोक्षातिरिक्तस्य बाधकस्य शङ्कितुमप्यशक्यत्वाद् युक्त्यादिबाध्यतैव वक्तव्या।

ननु सर्वत्रैवात्र प्रकारान्तरेणासत्कल्पे प्रत्यक्षे मानान्तरप्रवृत्तिः। तथा हि – द्विविधं ज्ञानम्। द्विकोटिकमेककोटिकं च। अन्त्यमपि द्विविधं अप्रामाण्यशङ्काकलङ्कितं तदकलङ्कितं च। तत्राद्यौ सर्वप्रमाणावकाशदौ। अर्थापरिच्छेदकत्वादप्रामाण्य शङ्काकलङ्कितत्वाच्च। अप्रामाण्यधीकलङ्कितत्वं च द्वेधा भवति। दुष्टकरणकत्व निश्चयादर्थाभावनिश्चयाच्च। तथा च शैलाग्रस्थितविटपिनां प्रादेशिकत्वप्रतीतिर्दूरदोषनिबन्धना दृष्टेति दूरतरस्थस्य चन्द्रमसः प्रादेशिकत्वप्रत्ययो दोषनिबन्धन एवेति निर्णीयते। एवमाकाशे समीपे नीरुपत्वनिश्चयाद् दूरे रूपवत्त्वधीर्दूरदोषजन्येति प्रागेव निश्चीयते। 'पीतः शङ्खः' इत्यादि प्रत्यक्षं तु प्राथमिकपरीक्षितप्रत्यक्षेण 'शङ्खो न पीतः' इत्यर्थाभाव निश्चयादप्रामाण्यज्ञानास्कन्दितमेवोत्पद्यते। एवं सवितृसुषिरादिप्रत्यक्षमपि। तथा च चन्द्रादिप्रादेशिकत्वप्रत्यक्षं दूरादिदोषनिश्चयात्, 'पीतः शङ्खः' इत्यदिप्रत्यक्षं प्राथमिकार्थाभावनिश्चयादेव बाधितमिति पश्चादनुमानागमादिप्रसर इति न ताभ्यां तद्बाधः। येन हि यस्य भ्रमत्वं ज्ञायतेः, तत्तस्य बाधकमित्युच्यते। न च चन्द्रप्रादेशिकत्वादिप्रत्यक्षस्यागमादिना भ्रमत्वं ज्ञायते। भ्रमत्वज्ञानोत्तरकालमेव तत्प्रवृत्तेः। अप्रमाण्यज्ञानाकलङ्कितं तु स्वार्थपरिच्छेदकं निःशङ्कप्रवृत्तिजननयोग्यम्। यथा 'वह्निरुष्ण एव', 'प्रस्तरो यजमानभिन्न एव', 'घटः सन्नेव इत्यादि तन्नान्यस्यावकाशदं नान्येन बाध्यम्। न ह्यत्र प्रागेव दूरादिदोषधीर्वा अर्थाभावनिश्चयो वा कोट्यन्तरालम्बित्वं वाऽस्ति। किं च क्वचित् प्रत्यक्षं प्रत्यक्षान्तरगौरवाद्युक्तिबाध्यं भवतु, क्वचिच्च लिङ्गादिकं श्रुतिगौरवात् श्रुत्यनुसारिप्रकरणादिबाध्यं भवतु, राजामात्य इव राजगौरवेण राजभृत्यबाध्यः, तथापि न युक्तिमात्रस्य प्रकरणमात्रस्य वा प्रत्यक्षलिङ्गादिबाधकत्वम्। प्रत्यक्षाद्यनुसारित्वस्य सर्वत्राभावात्। न हि प्रधानभूताचमनादिपदार्थविषयया 'आचामेदुपवीती दक्षिणाचारः' इत्यादिस्मृत्या पदार्थधर्मभूतक्रमादिविषया 'वेदं कृत्वा वेदिं करोति'इति श्रुतिर्वेदकरणानन्तरं क्षुतनिमित्तकाचमनोपनिपाते बाध्यत इत्यन्यत्रापि तथा भवितव्यामिति चेत्, मैवम्।

भेदानध्यवसायस्तदाऽध्यास एव। तथा च युक्तिबाध्यमेवेति तदप्युदाहरणम्। यत्त्वहमिहैवेति प्रमाणमित्युक्तम्, तन्न। आत्मनः 'आकाशवत् सर्वगतश्च' इति सर्वगतत्वेन इहैवेति व्यवच्छेदस्याप्रमाणिकत्वात्। न च जीवोऽणुः, युगपदेव पादशिरोऽवच्छेदेन सुखदुःखानुभवात्। न ह्येकोऽणुरेकदा व्यवहितदेशद्वयावच्छिन्नो भवति। नच युगपत्प्रतीतिर्भ्रमः, उत्सर्गसिद्धप्रामाण्यपरित्यागे बीजाभावात्। विस्तरेण चैतदग्रे वक्ष्यामः।

ननु – नभोनैल्यप्रत्यक्षस्य नीरूपत्वग्राहकानुमानेन न बाधः, लिङ्गाभावात्। न च परममहत्त्वद्रव्यानारम्भकत्वादेर्लिङ्गत्वम्, त्वन्मते असिद्धेः। निःस्पर्शत्वं तु तमसि व्यभिचारि। पृथिव्यादित्रयेतरभूतत्वादि चाप्रयोजकम्। तथा च नीरूपत्वग्राहकसाक्षिप्रत्यक्षमेव तद्बाधकं वाच्यम्, न च रूपग्रहणासमर्थस्य साक्षिणः कथं नीरूपत्वग्राहकत्वमिति वाच्यम्। पिशाचाग्राहकस्यापि चक्षुषस्तदभावग्राहकत्ववदुपपत्तेः, परेणापि साक्षिणोऽपि रूपवत्तमोग्राहकत्वाभ्युपगमाच्च अचाक्षुषेऽपि नभसि वायाविव चक्षुषैव रूपाभावग्रहणसंभवेन चाक्षुषप्रत्यक्षबाधाद् इति चेन्न। 'नीलं नभः' इति प्रत्यक्षे जाग्रति रूपाभावग्रहणस्य चक्षुषा साक्षिणा चासम्भवात्। तथा च बलवती युक्तिरेव तद्बाधिका। न च लिङ्गाभावः, चक्षुरन्वयव्यतिरेकानुविधायिरूपाविशेषितप्रतीतिविषयत्वाद् रूपवदिति लिङ्गसम्भवात्। न चाप्रयोजकत्वम्, नभो यदि सरूपं स्यात्तदा चक्षुरन्वयव्यतिरेकानु विधायिप्रतीतौ रूपासम्बन्धितया विषयो न स्यादिति तर्कोपपत्तेः। न चेष्टापत्तिः, सविधे रूपासम्बन्धितया नभसः सिद्धेः सर्वजनसम्मतत्वात्। नभसः साक्षिवेद्यतायामपि चक्षुरन्वयव्यतिरेकानुविधानमवर्जनीयमेव। अन्यथाऽन्धस्यापि तद्ग्रहणं स्यात्। न च पञ्चीकरणाद्रूपवदारब्धत्वेन नभसो नीरूपत्वं बाधितमिति वाच्यम्। त्रिवृत्करणपक्षेऽस्य दूषणस्यानवकाशात्। पञ्चीकरणपक्षेऽपि अपञ्चीकरणदशायां यस्मिन् भूते यो गुणः स पञ्चीकरणाद्व्यवहारयोग्यो भवतीत्येतावन्मात्राभ्युपगमान्नाकाशे रूपारम्भप्रसङ्गः। न च 'नायं सर्पः' इत्युक्तेऽपि, 'किमेवं वदसि परम्? अपि पुनः परामृश्य पश्यसि?' इति प्रतिवचनदर्शनान्न शब्दमात्रं रज्जुसर्पादिभ्रमनिवर्त्तकम्, किं तु प्रत्यक्षमेवेति वाच्यम्। प्रतिवचनस्थले भ्रमप्रमादादिशङ्काक्रान्तत्वेन 'नायं सर्पः' इत्यादेर्दुर्बलतया न भ्रमनिवर्तकत्वम्। यत्र तु तादृक्शङ्कानाक्रान्तत्वं तत्र भ्रमनिवर्तकतैव। अत एव तादृक्शङ्कानाक्रान्तपित्रादिवचसि नेदृक्प्रतिवचनं, किन्तु सिद्धवत्प्रवृत्त्यादिकमेव। ज्वालैक्यप्रत्यक्षमप्येवमेव युक्तिबाध्यम्। न च निर्वापितारोपितस्थले स्पष्टतरभेदप्रत्यक्षबाधितं तदित्यन्यत्रापि दीर्घेयं न ह्रस्वेति

बाधितमुच्छिन्नव्यवहारं भवति, तत्र तथा भवतु। यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया बाधनिश्चयस्तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिः'' इति। इति प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकोद्धारः।

अद्वैतसिद्धिः

किं च परीक्षितत्वेनैव प्राबल्यं, नोपजीव्यत्वादिना। अनुमानशब्दबाध्यत्वस्य प्रत्यक्षेऽपि दर्शनात्। तथा हि – इदं रजतमिति प्रत्यक्षस्यानुमानाप्तवचनाभ्यां, नभोनैल्यप्रत्यक्षस्य नीरूपत्वग्राहकानुमानेन, 'गौरोऽहं' इत्यस्य 'अहमिहैवास्मि सदने जानानः' इत्यस्य चन्द्रप्रादेशिकत्वप्रत्यक्षस्य चानुमानागमाभ्यां 'पीतः शङ्खस्तिक्तो गुडः' इत्यादेश्चानुमानाप्तवचनाभ्यां बाधो दृश्यते। ननु साक्षात्कारिभ्रमे साक्षात्कारिविशेषदर्शनमेव विरोधीत्यभ्युपेयम्; अन्यथा परोक्षप्रमाया अपरोक्षभ्रमनिवर्तकत्वोपपत्तौ वेदान्तवाक्यानामपरोक्षज्ञानजनकत्वव्युत्पादनप्रयासो व्यर्थः स्याद् इति चेन्न। 'नायं सर्पः' इत्यादिवाक्यादिना सविलासाज्ञाननिवृत्त्यभावेऽपि भ्रमगताप्रमाणत्वज्ञापनेन भ्रमप्रमाणत्वबुद्धेस्तद्विषयसत्यताबुद्धेश्च निवर्तनात्। तावता च भ्रमनिवर्तकत्वव्यपदेशात्। भ्रमे प्रामाण्यविभ्रमस्य तद्विषये सत्यताविभ्रमस्य च परोक्षत्वेनापरोक्षबाधानपेक्षत्वात्। न हि दुष्टकरणाजन्यत्वमबाधितविषयत्वं वा प्रामाण्यं कस्यचित् प्रत्यक्षम्। न वा सर्वदेशसर्वकालसर्वपुरुषाबाध्यत्वरूपं विषयसत्यत्वम्। अतस्तयोः परोक्षप्रमाबाध्यत्वमुचितमेव। तयोश्च बाधितयोः रजतादिभ्रमः स्वरूपेण सन्नपि स्वकार्याक्षमत्वादसन्निवेति बाधित इत्युच्यत इत्यनवद्यम्।

ननु – 'इदं रजतम्' इत्यत्र सयुक्तिकं प्रत्यक्षं बाधकं, न युक्तिमात्रम्। 'गौरोऽहम्' इत्यत्रापि 'मम शरीरम्' इति बलवत् प्रत्यक्षमेव बाधकम्। 'अहमिहैवास्मि सदने जानान' इति तु प्रमाणमेव, जीवस्याणुत्वाद् इति चेन्न। रजताभेदशरीराभेदप्रत्यक्षयोर्जाग्रतोः युक्त्या प्रतिबन्धाक्षमत्वे तद्विषयप्रत्यक्षोत्पत्तेरवोनवकाशात्। न च तत्र परम्परासम्बन्धेन कर्दमलिप्ते वस्त्रे 'नीलं वस्त्रम्' इतिवद् 'गौरोऽहम्' इति गौणम्; कर्दमवस्त्रयोरिव शरीरात्मनोर्भेदानध्यवसायेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। तथा चात्रैक्याध्यास एवोचितः। एवं च 'उष्णं जलम्' इत्यत्रापि यदि कर्दमवस्त्रयोरिव तोयतेजसोर्भेदग्रहः, तदा गौणतैव। यदिच शरीरात्मवद्

दोषः, मेयाविद्यकत्वस्याद्याप्यसिद्धेः। मानाविद्यकत्वस्य तु श्रुतावपि सत्त्वात्। नाप्यनादिभेदभ्रमवासना दोषः, श्रौतज्ञानस्यापि प्रकृतिप्रत्ययादिभेदवासनाजन्यत्वात्। भेदधियोऽद्यापि भ्रांतित्वासिद्धेश्च। इदं चाकलंकितं प्रत्यक्षं साक्षिरूपं चेन्न केनापि बाध्यं न कस्याप्यवकाशदम्। बाह्यं तु प्रबलप्रत्यक्षेण बाध्यम्। न त्वन्येन बाध्यमन्यस्यावकाशदं वा। एवं चाकाशे समीपे नीरूपत्वनिश्चयाद् दूरे तद्धीर्दूरदोषजन्येति प्रागेव निश्चिता, न तु नीरूपत्वानुमितिबाध्या।

केचित्त्वाकाशो नीलिमोदेतीतिश्रुतेर्नभो नीलमेव। समीपे तु भूसंनिकर्षस्य प्रतिबंधकत्वान्नैल्यानुपलम्भ इत्याहुः। अन्ये तु नैल्यधीः साक्षिप्रत्यक्षबाधिता। अचाक्षुषपिशाचान्योन्याभावस्य स्तम्भः पिशाचो न भवतीति चक्षुषेव साक्ष्ययोग्यरूपाभावस्यापि नीरूपत्वविशेषावकाशत्वग्राहिणा साक्षिणा ग्रहणात्। परमतेऽपि ह्याकाशं साक्षिवेद्यं, निमीलितनेत्रस्य नीलं नभ इति धीश्च साक्षिरूपेत्याहुः। यद्वा, अश्रावणे आकाशे श्रावणी शब्दाभावधीरिवाचाक्षुषेऽप्याकाशे रूपाभावधीर्वायाविव चाक्षुष्येव। दूरस्थस्य पुंसो यत्र नभःप्रदेशे नैल्यधीस्समीपस्थस्य तस्यैव तत्रैव चक्षुषैवानैल्यबुद्धेः। अन्यथाऽऽकाशस्य नीरूपत्वं न सिध्येत्, लिंगाभावात्। तत्पक्षे महत्त्वद्रव्यानारम्भकत्वादेरसिद्धेः। निस्स्पर्शत्वस्य तमसि व्यभिचारात्। पृथिव्यादित्रयेतरत्वादेश्चाप्रयोजकत्वात्। एतैरेवाशब्दत्वास्याप्यापाताच्च। पञ्चीकरणेन रूपस्यापि सत्त्वेन बाधाच्च। यद्वा व्याप्तिप्रत्यक्षेण तन्मूलानुमित्या वा तद्बाधः। अनौष्ण्यहेतोस्तु न व्याप्तिः, अप्रयोजकत्वात्। मिथ्यात्वहेतौ तु घटधीवद् व्याप्तिधीरपि स्वार्थसत्त्वग्राहितयाऽनुमितिप्रतिकूलैव, न तु तस्या मूलम्। अथवा, नीरूपत्वानुमितिरुपजीव्यव्याप्तिप्रत्यक्षाद्यविरुद्धा धर्मिग्राहकाबाधिता च। मिथ्यात्वाद्यनुमितिस्तूपजीव्यव्याप्तिप्रत्यक्षादिविरुद्धा धर्मिग्राहकबाधिता चेति वैषम्यम्। तस्मात्–

स्वार्थनिश्चयरूपेण निश्चला ह्यपरोक्षधीः।
विजातीयप्रमाणेन केवलेन न बाध्यते॥

तदुक्तम्– "न हि दृष्टस्य वस्तुनो बलवद्दृष्टिं विनाऽन्यद्बाधकम्" इति। उक्तं च विवरणेऽपि– "यत्राविचारपुरस्सरमेव प्रत्यक्षावभासमप्यनुमानादिना

तादृशप्रत्यक्षाभावे तु न दीपभे (दमनुपश्यामः) दः। दूरस्थस्यायं सर्प इत्याद्यपि प्रत्यक्षं न शब्दमात्रेण बाध्यम्, किं तु नायं सर्प इत्याप्तवाक्यमूल परीक्षितप्रत्यक्षगौरवादेव। राजगौरवादिव राजभृत्येनामात्यः, श्रुतिगौरवादिव वा श्रुत्यनुसारिप्रकरणादिना लिंगादिकम्। उक्तं हि–

दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम्॥ इति।

न हि प्रधानभूताचमनादिपदार्थविषयस्मृत्या पदार्थधर्मभूतक्रमविषया "वेदं कृत्वा वेदिं करोति" इति श्रुतिर्बाधितेत्यन्यत्रापि तया सा बाध्यते। अत एव 'नायं सर्पः' इत्युक्ते प्रतिवदन्ति– "किमेवं वदसि केवलमपि पुनः परामृश्य पश्यसि" इति। ननु तथापि पीतः शंखः नीलं नभ इत्यादिप्रत्यक्षम् श्वैत्यनीरूपत्वाद्यनुमित्यैव चन्द्रप्रादेशत्वप्रत्यक्षं चाप्रत्यक्षमूलशब्देनैव बाध्यं दृष्टमिति चेद् उच्यते। द्विविधं हि ज्ञानम्– संदेहरूपमेकाका (रनियतं) रं चेति। द्वितीयमप्यप्रामाण्यधीकलंकितं तदकलंकितं चेति द्वेधा। (अप्रामाण्यधी) कलंकितत्वमपि द्वेधा – बाधकाभिमतज्ञानोदयात् प्रागेव दोषज्ञानेन वा। अर्थाभावनिश्चयेन वा। तत्राद्यं यथा चंद्रप्रादेशत्वग्राहि, शैलाग्रस्थतरुपरिमाणादिज्ञाने दूरादेर्दोषत्वनिश्चयात्। द्वितीयं यथा सवितृशंखादौ सुषिरपीतत्वादिग्राहि। प्रागेव तत्र परीक्षितप्रत्यक्षेण सुषिराद्यभावनिश्चयात्। एवं च चंद्रप्रादेशत्वादिप्रत्यक्षेण प्रागेव ज्ञातदूरादिदोषेण अप्रमाणत्वेन ज्ञातेन संदेहवत्स्वार्थपरिच्छेदपराङ्मुखेन निःशंकप्रवृत्यजनकेनावकाशे दत्ते पश्चाच्छब्दादिः प्रवर्तते, न तु तेन प्रत्यक्षबाधः। यथा प्रबलप्रत्यक्षबाधितस्याक्षस्यानन्तरं प्रवृत्तेन शब्दादिना न बाधस्तद्वत्। येन यस्य भ्रमत्वं ज्ञायते तत्तस्य बाधकम्। न च चन्द्रप्रादेशत्वादिप्रत्यक्षस्यागमादिना भ्रमत्वं ज्ञायते। अकलंकितं स्वार्थपरिच्छेदेऽभिनिविष्टं निःशंकप्रवृत्तिजननयोग्यम्। यथा अग्निरुष्ण एव, प्रस्तरो यजमानो नैव, घटस्सन्नेवेत्यादि। न ह्यत्र प्रागेव दूरादिदोषधीर्वाऽर्थाभावनिश्चयो वाऽस्ति। यदि च प्रत्यक्षे कृत्स्नदूरादिदोषाभावेऽप्यन्यः कल्प्येत तर्हि श्रुतावपि शब्दे कृत्स्नविप्रलंभाद्यभावेऽप्यन्यः कल्प्येत। न चाविद्यकतैव

प्रतियोगिग्राहकतयोपजीव्येन प्रत्यक्षेण बाधितेत्यर्थः॥ मिथ्यात्वं त्विति॥ येन पक्ष एव सत्यत्वरूपप्रतियोगिग्राहकतयोपजीव्येन प्रत्यक्षेण बाधः स्यादित्यर्थः। अभावत्वेपि सत्यत्वाभावत्वेपि। प्रतियोगिसत्त्वं तत्प्रतियोगिभूतसत्त्वं॥ ब्रह्मणीति॥ तथाचौष्ण्यस्य पक्ष एव ग्रहणवत् न सत्यत्वरूपप्रतियोगिज्ञानं पक्ष एवापेक्षितं येन पक्ष एव प्रतियोगिग्राहकतयोपजीव्यप्रत्यक्षेण बाधः स्यादित्यर्थः। औष्ण्यप्रत्यक्षानौष्ण्यानुमित्योर्भिन्नविषयत्वाद्बाध्यबाधकभाव एव नास्तीत्याह॥ औष्ण्येति॥ इहेति॥ पक्ष एव प्रतियोगिग्राहकत्वेनोपजीव्यत्वाभावेपीत्यर्थः। किंच मिथ्यात्वं न सत्यत्वाभावः, किंतु भावांतरमभावत्वेपि प्रतियोगिसत्त्वं ब्रह्मणि प्रसिद्धमित्यत्र न्यायसाम्येन दोषमाह॥ उष्णमात्र इति॥ अयमर्थः। अग्न्यनौष्ण्यानुमितेर्न प्रत्यक्षबाधो युक्तः। न च प्रत्यक्षे प्रतियोग्युष्णत्वग्राहकत्वेनोपजीव्यत्वाद्युक्त इति वाच्यं। यदा प्रत्यक्षसिद्धं तेजः पक्षीकृत्यानुष्णत्वं साध्यते तदा बाधो न स्यादेव। प्रतियोगिभूतौष्ण्यस्य च तेजोंतरे ग्रहणसंभवेन पक्ष एवाग्रहणात्। अथवा सर्वं तेजःपक्षीक्रियते। ननु तर्ह्युष्णत्वं प्रतियोगिभूतं पक्ष एव प्रत्यक्षेण ज्ञातव्यमिति तद्बाधः स्यादेवेति चेत् स्यादेतदेवं यद्यनौष्ण्यं साध्येत। न चैवं किंतु शैत्यं साध्यते। तथाच तस्य भावरूपत्वेन न तत्र प्रतियोगिग्रहापेक्षा। अतः प्रतियोगिग्राहकतयोपजीव्येन प्रत्यक्षेण तत्राबाधापातादिति। योगे वा नौष्ण्यमपि तात्विकं स्यादिति पूर्वमापादितं। तदुपरि केनचिदिष्टापत्तिः स्वग्रंथे प्रतिपादितास्ति तामाशंक्य दूषयति॥ एतेनेति॥ एतेनेत्युक्तं विवृणोति॥ शैत्यस्येति॥ स्यादिदं यद्यनौष्ण्यं साध्येत। नह्येवं किंनाम शैत्यं साध्यते। तदा नैवं वक्तुं शक्यं। शैत्यस्य भावरूपत्वेन औष्ण्यात्यंताभावात्मकत्वाभावात्। अस्माभिरपि योगे वा शैत्यमपि तात्विकं स्यादित्येवापाद्यमानत्वान्नेष्टापत्तेरवकाश इति भावः। संगृह्णाति॥ तस्मादिति॥ प्रत्यक्षोपजीविभिर्लिंगाद्यैः। स्वविरोधात् प्रत्यक्षविरोधात् मृत्यवस्थामापन्नैः प्रत्यक्षे विद्यमानं यत् स्वतः प्रामाण्यं तत्रैव बाध्यत इति कारिकार्थः॥ मिथ्यात्वानुमितेरग्निशैत्यानुमितिसाम्यविवरणं॥

२६. प्रत्यक्षस्य लिङ्गाद्यबाध्यत्वे बाधकोद्धारः

इदं रूप्यमिति प्रत्यक्षमपि नेदंरूप्यमिति सयुक्तिकबलवत्प्रत्यक्षेण बाध्यम्। न तु युक्त्यैव। गौरोऽहमित्याद्यपि मम शरीरमिति बलवत्प्रत्यक्षबाध्यं कर्दमलिप्ते वस्त्रे कृष्णंवस्त्रमितिवद् गौणं वा, उष्णं जलमित्यपि गौणमेव न तु लिंगादिबाध्यम् यद्वा निश्चितद्रव्यांतरसमभिव्याहाररूपदोषेण शंकिताप्रामाण्येन उष्णं जलमित्यनेनावकाशे दत्ते लिंगादिकं प्रवर्तते न तु तल्लिंगादिबाध्यम्। अहमिहैवास्मि सदने जानान इत्यादि तु प्रमाणमेव, जीवस्याणुत्वात्, न तु लिंगादिबाध्यम्। ज्वालैक्यप्रत्यक्षमपि निर्वापितारोपितदीपे चेद्भेदग्राहिप्रत्यक्षेण वाधितमेव जायते। अन्यत्रापि दीर्घोऽयं दीपो ह्रस्वो नेति प्रत्यक्षेण बाध्यते, न त्वनुमित्या।

रूप्यमिथ्यात्वात्। तत् प्रपंचनिष्ठं मिथ्यात्वं॥ मिथ्यात्वेति॥ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपमिथ्यात्वलक्षणसत्त्वमात्रेण तत्र मिथ्यात्वमिति व्यपदिश्यत इत्यर्थः। इदमपि वह्नौ साध्यमानानौष्ण्यमपि॥ तन्मात्रेणेति॥ तात्विकत्वमात्रेण विश्वांतर्गतव्यावहारिकजलाद्यनौष्ण्यविलक्षणमपि अनौष्ण्यलक्षणयुक्तत्वादेवानौष्ण्यमिति व्यपदिश्यत इत्यर्थः। अनौष्ण्यं लक्षयति॥ स्पर्शत्वेति॥ स्पर्शत्वव्याप्यो यो जातिविशेषः शीतत्वं तद्वान् शीतस्पर्शः तदाश्रयो जलादिरनुष्ण इत्युच्यते तन्निष्ठधर्मत्वमेवानौष्ण्यमित्यर्थः। पुनर्व्यवस्थापकांतरं शंकते॥ नन्विति॥ प्रातिभासिकस्य मिथ्यात्वं प्रातिभासिकप्रतियोगिकप्रतिपन्नोपाधिनिषेधः॥ व्यावहारिकस्येति॥ व्यावहारिकप्रपंचप्रतियोगिको निषेधस्तात्विकः। अतस्तात्विकनिषेधग्राह्यनुमानमेव व्यावहारिकसत्त्वावगाहिप्रत्यक्षस्य बाधकमिति भावः।

प्रातिभासिकप्रतियोगिको निषेध एव व्यावहारिक इत्यस्य प्रतिबंदीमाह॥ जलादीति॥ मिथ्यात्वं निषेध इत्यव्याख्याने औष्ण्यस्याभाव इति प्रतिबंध्ययोग इति मंतव्यं। व्यावहारिकप्रतियोगिकनिषेधस्तात्विक इत्यस्यापि प्रतिबंदीमाह॥ अग्न्यादिस्थस्येति॥ औष्ण्यस्य त्वित्यनंतरं अभाव इति वर्तते।

खंडनकारोक्तां व्यवस्थां दूषयित्वोपसंहरति – तस्मादिति। मिथ्यात्वं लिङ्गशब्दग्राह्यम्। व्यावहारिकं स्पर्शनश्रुत्युष्णत्वायजमानत्वादिवदित्यर्थः। सा व्यवस्था। सत्यत्वस्य अक्षसिद्धस्य॥ व्यावहारिकेति॥ तात्विकमिथ्यात्वविषयकानुमितिबाधेनाक्षसिद्धस्य व्यावहारिकत्वे व्यावहारिकानुष्णत्वानुमितिबाधेनाक्षसिद्धमौष्ण्यं नभोनैल्यवत्प्रातिभासिकं स्यात् न्यायसाम्यादिति शेषः। न चौष्ण्यस्य प्रातिभासिकत्वे करतलानलसंयोगाद्दाहाद्यर्थक्रिया न स्यादिति वाच्यं। अर्थक्रियया सह स्वप्नस्य यथा प्रातिभासिकत्वं तद्वत् दाहाद्यर्थक्रियया सहैवौष्ण्यं प्रातिभासिकमित्यर्थः। न च वह्नावनुमितिविषयभूतमनौष्ण्यं प्रातिभासिकमेव न व्यावहारिकमिति वाच्यं। तर्हि मिथ्यात्वानुमितिविषयभूतमिथ्यात्वमपि प्रातिभासिकमेव न तात्विकमिति समं। पुनर्व्यवस्थापकमाशंक्य निषेधति॥ तत्वेति॥ उभयेति॥ वादिप्रतिवादीत्यर्थः। तथाच प्रत्यक्षेणैवानुमानबाधः। सत्वबुद्धिप्रामाण्येनोभयसंमतिः। भवतां संमतत्वेपि ममासंमतेः। अतोत्रानुमानमेव प्रत्यक्षबाधकमित्यर्थः॥ इहेति॥ सत्वबुद्धिप्रामाण्य इत्यर्थः। पुनर्व्यवस्थापकांतरमाशंक्य निषेधति॥ तत्त्वशुद्धाविति॥ इतरा अनुष्णत्वानुमितिः श्रुत्यनुगृहीता नेत्यक्षबाध्येत्यर्थः॥ मिथ्यात्वेति॥ मिथ्यात्वानुमित्यनुग्राहिका श्रुतिरनुवादकत्वेनाप्रमाणं। न च मिथ्यात्वस्याप्राप्तत्वात् श्रुतेः तदनुवादकत्वायोगः। दृश्यत्वेनानुमितासत्यमिथ्यात्वानुवादित्वसम्भवात्। न चानुमानप्राप्तानुवादकत्वं श्रुतेः कथमिति वाच्यं। यथा वह्नौ हिमनिवारणशक्तेरतींद्रियत्वेन प्रत्यक्षसिद्धत्वाभावात् अयं वह्निर्हिमनिवारणशक्तिमान् उद्भूतोष्णस्पर्श विशेषवत्त्वादित्याद्यनुमानसिद्धहिमनिवारणशक्त्यनुवादित्वं ''अग्निर्हिमस्य भेषज''मितिश्रुतेर्दृष्टं तद्वदित्यर्थः।

पुनर्व्यवस्थापकांतरमाशंक्य निराचष्टे॥ मिथ्यात्वेति॥ अतो नाक्षबाध्येत्यर्थः। इतरा अग्न्यनौष्ण्यानुमितिर्न तर्कानुगृहीतातो बाध्येत्यर्थः॥ उक्तं चेति॥ अक्षबाधेनात्मक्षणिकत्वतर्काणामाभासत्वमित्यर्थः। ध्रुवे सति॥ लिंगं क्षणिकत्वसाधकं सत्त्वं॥ प्रत्यक्षेति॥ यत इति शेषः। योऽहं पाकादिकर्ताऽभवं सोहमधुना व्याख्याताभवमिति स्थैर्यग्राहिप्रत्यभिज्ञाप्रत्यक्षसिद्धार्थविरुद्धार्थज्ञानजनकमित्यर्थः। मिथ्यात्वानुमितेरग्न्यनौष्ण्यानु मितिवैषम्यमाशंकते॥ नन्विति॥ तस्य चेति॥ प्रतियोगिभूतौष्ण्यस्य। तत्र वह्नौ तदभावानुमा अनौष्ण्यानुमा।

न्यायामृतप्रकाशः

॥ व्यवस्थापकं वेति॥ एतादृशस्थले अक्षस्य लिंगबाध्यत्वं एतादृशस्थले नेति व्यवस्थापकं वक्तव्यमित्यर्थः। उक्तं व्यवस्थापकमुक्तमित्यर्थः॥ लिंगेति॥ सर्वेष्टनस्मृत्या श्रुतिरनुमीयते यतोऽतो लिंगग्राह्या सर्वेष्टनश्रुतिः। पदार्थत्वादिलिंगग्राह्यमनुष्णत्वं। ''यजमानःप्रस्तर'' इति शब्दग्राह्यं यजमानत्वमिति विवेकः। तथाचोष्णत्वप्रत्यक्षेणानौष्ण्यानुमानं बाध्यते। उभयोरपि व्यावहारिकत्वेनाक्षसिद्धव्यावहारिकौष्ण्य निषेधरूपत्वादनुमानस्य। अतोऽनुमानमेवाक्षबाध्यं। समानविषयकत्वात्। समानविषयकत्वं नाम तत्सिद्धसाध्यसमानसत्ताकवस्तुविषयकत्वं विवक्षितं। प्रकृते चाक्षग्राह्यसत्त्वस्य व्यावहारिकतयाऽनुमानविषयस्य सत्त्वनिषेधरूपमिथ्यात्वस्य तात्विकतया भिन्नविषयकत्वादनुमाननैवात्र प्रत्यक्षं बाध्यं अतः समानविषयकत्वे बाध्यबाधकभावः। भिन्नविषयत्वे तु नेत्येवंव्यवस्थापकमस्तीत्यर्थः। अद्वैतं द्वितीयनिषेधरूपं मिथ्यात्वं॥ शरणमिति॥ तत्प्रतिपादकत्वादिति यावत्। श्रुतिः नेहनानेत्यादिका। अनुमानं च ग्राह्यं। व्यावहारिकसत्त्वग्राहिणोपजीव्यप्रत्यक्षेण विरोधान्न बिभेतीत्यर्थः॥ किंवेति॥ बाध्यबाधकभावमंगीकृत्य मिथ्यात्वग्राहिप्रमाणं तात्विकविषयकत्वाद्बाधकमेव न तु बाध्यं। बाध्यं तु प्रत्यक्षमेवेति भाव इत्यर्थः। अनुमित्यादिकं मिथ्यात्वावगाह्यनुमित्यादिकमित्यर्थः। तदसिद्धस्य अक्षासिद्धस्य। तत्सिद्धस्यैव प्रत्यक्षसिद्धतात्विकसत्त्वस्यैव। मिथ्यात्वश्रुतेः तात्विकसत्त्वनिषेधपरायाः॥ अप्रसक्तेति॥ तात्विकसत्त्वस्य प्रत्यक्षासिद्धत्वेनाप्रसक्तत्वादित्यर्थः॥ अक्षसिद्धस्येति॥ अक्षसिद्धसत्त्वाभावमगृहीत्वैव तदसिद्धसत्त्वस्याभाव ग्रहणेऽक्षसिद्धसत्त्वाभावग्राहकत्वाभावेन तस्याबाधितत्वप्राप्त्याऽक्षसिद्धसत्त्वस्य तात्विकत्वं स्यादित्यर्थः॥ तात्विकतदभावेति॥ तात्विको यः सत्त्वाभावः तद्ग्राहिण एवेत्यर्थः। तद्बाधकत्वेन अक्षसिद्धसत्त्वबाधकत्वेन॥ अबाधोक्तीति॥ समानविषयकत्वप्राप्त्याऽबाधोक्त्ययोगादित्यर्थः॥ उपजीव्येति॥ तथाच ''मिथ्यात्वग्राहितात्विक विषयकत्वाद्बाधकमेवे''त्ययुक्तमिति भावः॥ योगे वेति॥ उपजीव्यप्रत्यक्षबाधितस्यापि तात्विकत्वयोगत्यर्थः। तात्विकादित्यतां तात्विकादित्याभेदं॥ श्रुतिरिति॥ ''आदित्योयूप'' इति श्रुतिरित्यर्थः॥ उपजीव्येनेति॥ व्यावहारिकभेदग्राह्युपजीव्यप्रत्यक्षविरोधान्न विभेतीत्यर्थः।

योगे वाऽनौष्ण्यमपि तात्विकं स्यादित्युक्तं तदयुक्तमित्याशंकते॥ नन्विदमिति॥ वह्नौ साध्यमानं तात्विकतया भवद्भिरापाद्यमानं अनौष्ण्यमित्यर्थः। तुल्यस्वभावं व्यावहारिकं॥ न चेदिति॥ अतात्विकजलाद्यनौष्ण्येन व्यावहारिकेण समस्वभावं न चेत्तर्ह्यौष्ण्याभावस्तात्विकः प्राप्तः। तथाचास्मदभिमततात्विकद्वितीयाभाव एव पर्यवसन्न इति तस्यैवेदं नामांतरमित्यर्थः। तथाचेष्टापत्तिरिति भावः। विश्वमिथ्यात्वं अनुमानेन त्वया साध्यमानं। अतात्विकेन व्यावहारिकेण। न तात्विकं। तथाच मिथ्यात्वस्य तात्विकत्वाभावे जगतः पारमार्थिकत्वसिद्धिरिति भावः॥ न चेदिति॥ प्रपंचनिष्ठं मिथ्यात्वं अर्थक्रियानर्हरूप्यादिनिष्ठमिथ्यात्वसमस्वभावं न भवति, किंत्वर्थक्रियाकारित्वाद्यविरोधि किंचिदस्तीत्यंगीक्रियमाणे ब्रह्मभिन्नसत्यप्रपंचप्राप्त्या द्वैतस्यैव नामांतरं स्यात्। अद्वैतस्यैव नामांतरं स्यादित्येतत्प्रतिबंदीत्वेनोक्तं। वस्तुतस्तु – प्रपंचे मिथ्याभूतरूप्यादिवैलक्षण्यप्राप्त्या तत्स्वरूपोपमर्दकं न स्यात्। तथाच तत्स्वरूपसहिष्णोस्तत्प्रतिषेधत्वस्य पारिभाषिकत्वापातादित्यत्र तात्पर्यमिति ज्ञेयं। साम्याभावमाशंकते॥ नन्विति॥ विलक्षणं व्यावहारिकात्

तुल्यतयेति। अक्षसिद्धस्यापि रूप्यमिथ्यात्वस्य तात्विकत्वे घटादेरपि तात्त्विकत्वापत्तिरिति भावः। न चेदिति। रूप्यमिथ्यात्वेनासमस्वभावं चेत् तस्य प्रतियोगिप्रतिक्षेपकत्वाभावापत्त्या घटादेरमिथ्यात्वं स्यादिति भावः। द्वैतस्यैवेति। भिन्ने वस्तुनि मिथ्यापदस्य सङ्केतसम्भवात्। अश्वकर्णादिशब्दानां वृक्षादाविवेति भावः। तात्त्विकत्वेन विलक्षणमपीदं मिथ्यात्वं प्रतियोगिप्रतिक्षेपकत्वरूपरूप्यमिथ्यात्वस्वभावयुक्तमिति न द्वैतस्य नामान्तरतापत्तिरित्याशयेन शङ्कते – नन्विति। इदमपीति। न च नञ्शिरस्कशब्दवाच्यत्वादनौष्ण्यमभाव शब्दवाच्यवदभावरूपमेवेति वाच्यम्। भावस्यापि तादृशशब्दवाच्यत्वसम्भवात्। पापस्याधर्मशब्दवाच्यत्ववत्। अन्यथा अज्ञानस्य भावरूपत्वं न स्यात् इति। स्पर्शत्वव्याप्येति। अत्र जातिविशेषवदाश्रयत्वपर्यन्तोक्तिः औष्ण्याभावशैत्योभयसङ्ग्रहायैव। न चात्र वह्नावेव औष्ण्याभावो शैत्यं वा साध्यम्। न ह्युक्तो धर्मस्तथा, स्पर्शनिष्ठत्वादिति वाच्यम्। परम्परासम्बन्धेन तत्रापि साध्यसम्भवात् इत्याहुः। अनुमितिविषयेऽनौष्ण्ये तात्त्विकत्वप्रयोजकरूपाभावान्न तात्त्विकमित्यतो न साम्यमित्याशङ्कते – ननु प्रातिभासिकस्यैवेति। अग्र्यादिस्थस्येति। उष्णत्वाभावः अनौष्ण्यमित्यङ्गीकृत्य इदमुदितम्। वस्तुतः एवं बोद्धव्यम्। प्रातिभासिकौष्ण्यविरुद्धं व्यावहारिकम्। व्यावहारिकौष्ण्यविरुद्धन्तु तात्विकम्। तेन भावरूपमभावरूपमनौष्ण्यं सङ्गृहीतमिति न पूर्वविरोधः। एतेन शैत्यानुमानमपि सङ्गृहीतम्। तात्विकशैत्यस्य व्यावहारिकौष्ण्यवति सम्भवादिति भावः।

मिथ्यात्वश्रुतेरिति। ननु वैषम्यम्। दार्ष्टान्तिके स्वस्वचमत्कारानुसारिणोऽनुमानस्य सर्वसाधारण्याभावात् श्रुत्यनुवादकत्वाप्रयोजकत्वम्। दृष्टान्तीकृते च श्रुतिवाक्ये वह्नौ हिमनिवृत्तिकारणतायाः सर्वसाधारणप्रत्यक्षार्थापत्तिभ्यामवसेयत्वादनुवादकत्वमिति चेन्न। मीमांसिता हि श्रुतिरद्वैतबोधिका। मीमांसा च युक्त्यनुसन्धानम्। तथाच श्रुत्यर्थज्ञप्तिवेलायां मिथ्यात्वानुमितेरावश्यकत्वात् श्रुतेरनुवादकत्वं स्यादेव। अन्यथा दृष्टान्तेऽपि प्रत्यक्षेण यदा हिमनिवारकत्वनिश्चयो न जातः तदा अग्निर्हिमस्य भेषजमिति प्रवृत्तिसम्भवेन प्रत्यक्षस्यापि तदनुवादकत्वप्रयोजकत्वासम्भवात्। तस्मात् सा प्रतिपादितार्थ प्रतिपादकत्वेनानुवादिका यथा तथाऽद्वैतश्रुतिरपीति भावः। औष्ण्यतदभावयोरिति। इदमुपलक्षणम्। मिथ्यात्वं तु सत्यत्वाभाव एवेति पूर्वमुपपादितम्। तथाच सत्यत्वनिराकरणं सत्त्वप्रसक्तिमन्तरा न भवति। प्रसक्तिश्च न यत्र कुत्रापि। किंतु अभावाधिकरणे। अन्यथा प्रतिषेधवैयर्थ्यम्। तथाच सत्त्वप्रसक्तिः पक्षे प्रत्यक्षादिनेति उष्णत्वग्राहिप्रत्यक्षतुल्यं जगत्सत्त्वग्राहि प्रत्यक्षमित्यपि द्रष्टव्यम्। किञ्च प्रतियोगिग्राहित्वेनोपजीव्यत्वं न प्राबल्यप्रयोजकम्। शुक्तिरूप्यज्ञानदौ व्यभिचारात्। धर्म्यादि ग्राहित्वेनैवोपजीव्यत्वं तथा। तस्य क्वचिदप्यव्यभिचारात्। तच्च प्रत्यक्षादावस्तीत्याह – इह धर्म्यादीति। सुतरामिति। प्रतियोगिज्ञानं हि परम्परयोपयोगि। धर्मिणः पक्षत्वात् तज्ज्ञानं तु साक्षादेवोपयोगीति भावः। उष्णमात्रे शैत्यस्येति। शैत्यस्य उष्णानिरूप्यत्वात् औष्ण्यज्ञानस्य न प्रतियोगि ग्राहकत्वेनोपजीव्यत्वमिति भावः। उष्णविशेषे वेति। ब्रह्मणि मिथ्यात्वप्रतियोगिनः सत्त्वस्येव पक्षादन्यत्रैव उष्णविशेषे अनौष्ण्यप्रतियोग्यौष्ण्यग्रहसम्भवेन यथा मिथ्यात्वप्रतियोगिसत्त्वस्य पक्ष एव ग्राह्यत्वान्न बाधः, तथा प्रकृतेऽप्यापद्येतेति भावः। शैत्यस्येति। उपलक्षणं चैतत्। अनौष्ण्यस्यापि भावरूपत्वस्योक्तत्वादिति। उक्तमर्थं सङ्गृह्णाति - तस्मादिति। स्वविरोधात् प्रत्यक्षविरोधात्। । इति मिथ्यात्वानुमितेरग्निशैत्यानुमितिसाम्यम्।

परप्रसक्तस्यैव निषेद्धव्यत्वात्। प्रत्यक्षस्य च कथञ्चिदप्रसक्तप्रतिषेधसम्भवादित्यबोधविजृम्भितमेतत्। न च प्रयोजनसद्भावेन प्रतिषेध इति वाच्यम्। द्वितीयनिषेधस्य अनर्थनिवृत्तिरूपं प्रयोजनमित्यस्याद्याप्यसिद्धेः।

अक्षसिद्धस्येति। ननु तद्विषयाधिकरणस्यैव पारमार्थिकत्वव्यतिरेकबोधनान्न तस्य तात्त्विकत्वापत्तिरिति चेन्न। तत्सिद्धसत्त्वाभावबोधनं विना पारमार्थिकत्व व्यतिरेकस्य बोधयितुमशक्यत्वात्। तदभावाग्रहणे तस्यैव प्रतिपन्नोपाधावभावाप्रतियोगित्वेन पारमार्थिकत्वात्। उपजीव्येति। परीक्षितत्वमप्यत्र विशेषणं बोध्यम्। तेनोपजीव्येदंरजतमिति ज्ञानबाधितत्वेऽपि रजताभावस्य नातात्त्विकत्वमिति ध्येयम्। न च परीक्षया व्यावहारिकप्रामाण्यस्यैव सिद्धत्वेन परीक्षितोपजीव्यप्रत्यक्षं व्यावहारिकसत्त्वाभावग्राहिणं बाधते, न श्रुत्यनुमानादिकमिति वाच्यम्। अबाधितपरीक्षया बाध्यरूपव्यावहारिकप्रामाण्यासिद्धेः। किंतु अबाधितप्रामाण्यमेव सिध्यति। अन्यथा प्रत्यभिज्ञारूपप्रत्यक्षस्य क्षणिकत्वानुमानं बाधकं स्यादित्युक्तत्वात्। अनौष्ण्यमपीति। न चेष्टापत्तिरद्वैतिनामिति वाच्यम्। मिथ्यात्वानुमानस्येव अनौष्ण्यानुमानस्यापि बाधकत्वापत्त्या कालात्ययापदिष्टोच्छेदापत्तेरिति भावः। ननु अनौष्ण्यं तात्त्विकं स्यादिति कोऽर्थः? यदि तत्त्वतः औष्ण्यं नास्तीत्यर्थः तदा अद्वैते पर्यवसानादिष्टापत्तिः। यदि व्यवहारतोऽपि नास्तीति तदा व्यावहारिकौष्ण्यग्राहकं बाधकमिति चेन्मैवम्। उष्णत्वविरोध्यनुष्णत्वं तात्त्विकं स्यादित्यापादनात्। न च अद्वैते पर्यवसानादिष्टापत्तिरिति वाच्यम्। अनौष्ण्यस्य स्पर्शत्वव्याप्यजातिविशेषत्वेन भावद्वैतपर्यवसानेन इष्टापत्त्यभावात्। यद्वा, उष्णत्वाभावः तात्त्विकः स्यादित्यापाद्यते। न च इष्टापत्तिः। सर्वाद्वैतमतेऽनिष्टत्वात्। अभावद्वैतस्य च पूर्वमेव निरस्तत्वात्। न च अभावः ब्रह्मस्वरूपम्। सोपाधिकनिरुपाधिकयोरैक्यासम्भवात्। अन्यथा परोपाधिकसार्वज्ञादीनां ब्रह्मस्वरूपत्वं स्यादित्युक्तत्वाच्च। यद्वा, व्यवहारतोऽपि उष्णत्वं न स्यादित्यापाद्यते। न च प्रत्यक्षविरोधः। यथा तात्त्विकमिथ्यात्वग्राहकानुमानविरोधात् जगत्सत्यत्वग्राहिप्रत्यक्षं व्यावहारिकसत्त्वपरं तथा व्यावहारिकानौष्ण्यग्राहकानुमानविरोधात् औष्ण्यग्राहिप्रत्यक्षं प्रातिभासिकपरं स्यादित्यत्र पर्यवसानात्। अत एवाग्रे तथैव विभावयिष्यति।

एतेन शैत्यानुमाने शैत्यमपि व्यावहारिकसत्यं स्यात्, तद्विरोधात् उष्णत्वग्राहिप्रत्यक्षं प्रातिभासिकपरं स्यादित्युपपादितम्। एतेनैव यजमानः प्रस्तरः इत्यादीनां तात्विकयजमानपरत्वापादनमुपपादितम्। न च यजमानः प्रस्तरः इत्यादीनामन्यशेषतया स्वार्थपरत्वाभावेन परीक्षितप्रत्यक्षविरोधेन गौणार्थतया स्तावकत्वमिति कथं तात्विकयजमानपरत्वमिति वाच्यम्। अपूर्वतालक्षणतात्पर्यलिंगसद्भावे अन्यशेषत्वमात्रेण स्वार्थपरत्वाभावस्य वक्तुमशक्यत्वात्। अन्यथा प्रयाजादिवाक्यानामपि अन्यशेषत्वात् स्वार्थपरत्वं न स्यात्। न च परीक्षितप्रत्यक्षविरोधेन स्वार्थपरत्वाभाव इति वाच्यम्। परीक्षया हि त्वन्मते व्यावहारिकप्रामाण्यं भवति। तथाच तात्विक यजमानत्वग्राहिश्रुत्यादेः कथं तद्विरोधेन स्वार्थपरत्वाभावः। अन्यथा परीक्षितजगत्प्रत्यक्षविरोधेन अद्वैतागमादेरपि स्वार्थपरत्वं न स्यात्। अत एव 'तात्विकादित्यतां यूपस्य' इत्याद्युक्तं युक्ततरम्। कथमनौष्ण्यानुमितेरौष्ण्य प्रत्यक्षबाधकत्वम्? जलाद्यनौष्ण्यसमस्वभावानौष्ण्यविषयकत्वे तात्त्विकविषयकत्वस्यैवायोगात्। तद्विलक्षणानौष्ण्य विषयकत्वे च सा मिथ्यात्वानुमितिरेवेति तस्या बाधकत्वमिष्टमेवेति वैषम्यं शङ्कते – नन्विति। न्यायसाम्येन परिहरति विश्वमिथ्यात्वमपीति। घटादि

यूपेनेवांगद्वारकः सोम आज्यभागयोः संबंधोऽवगम्यते। तत्र वाजपेयस्येति हि षष्ठ्या सामान्येन संबंध्युपात्तः। तस्य सप्तदशारत्निता विधीयते। संबंधमात्रं चांगांगस्याप्यस्त्येवेति युक्तो यूपे निवेशः। इह त्वाधारत्वेनांगितया सोमः श्रूयते न संबंधिमात्रतया। न च परंपरासंबंधेऽस्त्याधारत्वमिति साक्षादेवायं सोमसंबंधः प्रतीयते। स चाप्राप्त इति प्रतिषेधासंभवः। तस्मान्न पशावित्यस्यायमर्थवादः। यथा सोमस्य नाज्यभागावेवं पशावपीति। इत्थं महाभागावाज्यभागौ यौ सोमेऽक्रियमाणौ तावत्र पशौ न क्रियेते इति स्तुतिः। तौ न पशाविति तु प्रतिषेध इति वक्ष्यते। तदेतद्विरुद्धं स्यात्। न च तत्र प्रयोजनाभावादप्राप्तनिषेधासंभवेपि प्रकृतेऽनर्थनिवृत्तिरूपप्रयोजनसत्त्वादप्राप्तनिषेधो युज्यत इति वाच्यम्। जगन्मिथ्यात्वज्ञानादेरनर्थनिवर्तकत्वस्यासिद्धेः। तमेवं विद्वानमृत इत्यादिना सगुणब्रह्मज्ञान स्यैव मोक्षसाधनत्वोक्तेः। किं च तौ न पशौ करोतीत्यत्र वाक्ये नञः प्रतिषेधार्थत्वमाश्रित्य विकल्प उक्तः। तदप्यप्रसक्तप्रतिषेधपक्षे न संगतं स्यात्। तथाहि। न तावदयं पर्युदासः। यदि पशुप्रकरणे इदं श्रूयेत तथासति चोदकेन प्राप्तावाज्यभागौ पर्युदस्येयातां – आज्यभागवर्जं प्रकृतिवत्कुर्यादिति। इह तु दर्शपूर्णमासप्रकरणे इदं विपरिवर्तते। तत्र यदीयं वचनव्यक्तिराज्यभागवर्जं दर्शपूर्णमासौ कुर्यादिति दर्शपूर्णमासविधिशेषः स्यात्ततो विधानमाज्यभागयोरनर्थकं स्यात्। पशावित्ययं च प्रमादपाठः स्यात्। तस्मान्न पशावित्ययं प्रतिषेधः। न चाप्रसक्तस्य प्रतिषेधः संभवतीति प्रसक्तिरपि निषेधादेवोन्नीयते। तथा च पशावाज्यभागयोर्विकल्प इति व्यवस्थापितम्। तदेतद्विरुद्धं स्यात्। यत्तु नाप्रसक्तप्रतिषेधः परोक्षप्रसक्तेः संभवादिति। तदपि न। परोक्षप्रसक्तिः किमनुमानेन वाऽऽगमेन वा। नाद्यः। श्रुत्या प्रत्यक्षेण वाऽननुगृहीतस्यानुमानस्यार्थासाधकत्वान्निषेधवैयर्थ्यम्। तदुक्तं – वाचस्पत्ये तर्काप्रतिष्ठानादित्यत्र– ''यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोप पाद्यते॥'' इति। न द्वितीयः। श्रुत्या प्रसक्तस्य श्रुत्या निषेधायोगात्। विकल्पापत्तेश्च। तस्मात्साधूक्तं मिथ्यात्वश्रुतेरप्रसक्तप्रतिषेधत्वापातादिति।

अक्षसिद्धस्येति। अत्र केचित्। न प्रत्यक्षविषयस्य तात्विकत्वापत्तिः। तद्विषयाधिकरणस्यैव पारमार्थिकत्वव्यतिरेकस्य बोधनादित्याहुः। तन्न। व्यधिकरणत्वात्। तथाहि – श्रुत्यप्रतिपादितप्रतिपन्नोपाध्यधिकरणाभावकस्य प्रपंचगतव्यावहारिकसत्त्वस्य तात्विकताया आपादनीयत्वात्। प्रातिभासिके रूप्ये व्यावहारिकत्वनिषेधे प्रातिभासिकत्वस्य व्यावहारिकत्ववद्व्यावहारिके प्रपंचे पारमार्थिकत्वनिषेधे व्यावहारिकत्वस्य पारमार्थिकत्वांपातात्। न च व्यावहारिकत्वेऽपि प्रत्यक्षसिद्धव्यावहारिकत्वाबाधेन पारमार्थिकत्वनिषेधात् न

सकलसाधारण्याभावेन तस्य श्रुत्यनुवादकत्वाप्रयोजकत्वात्। तदुक्तं – 'तर्काप्रतिष्ठानात्' इत्यत्र वाचस्पतिमिश्रैः–

'यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥' इति।

दृष्टान्तीकृतश्रुतौ तु हिमनिवृत्तिकारणताया वह्नौ सर्वसाधारणप्रत्यक्षार्थापत्तिभ्या मवसेयत्वाद्वैषम्यम्। तस्मान्मिथ्यात्वानुमानस्य न वह्निशैत्यानुमितिसाम्यम्। इति मिथ्यात्वानुमानस्य शैत्यानुमितिसाम्यभङ्गः॥

न्यायामृततरङ्गिणी

मिथ्यात्वश्रुतेरिति। अत्र केचिदात्मनि तात्विकसत्त्वप्रसिद्ध्या प्रसक्तिमुपपादयंति। तन्न। न हि प्रतियोगिज्ञानमात्रं प्रसक्तिः। किंतु निषेधाधिकरणकप्रतियोगिज्ञानम्। न चात्मा निषेधाधिकरणम्। अन्ये त्वेवं वदंति। मा भूत्प्रसक्तिः। अभावप्रत्यक्षे हि संसर्गारोपत्वेन सोपयुज्यते। शब्दानुमानयोस्तु तस्याः क्वोपयोगः। न चाप्रसक्तौ निषेधवैयर्थ्यम्। अनर्थनिवृत्तिरूपस्य प्रयोजनस्य विद्यमानत्वादिति। अत्र ब्रूमः। दशमाध्याये अष्टमपादे ''अपूर्वे चार्थवादः स्यात्'' इत्यधिकरणे न सोमे अध्वरे इत्यस्य नञः प्राप्त्यभावेन निषेधार्थत्वासंभवादर्थवादत्वमभिहितम्। तद्विरुध्येत। तथाहि। दर्शपूर्णमासयोराज्य भागावग्नीषोमाभ्यां यजतीत्याज्यभागौ विधाय तौ न पशोः करोतीति निषिध्य पश्चान्न सोमेऽध्वर इति श्रूयते। तत्र किमयं प्रतिषेधः पर्युदासो वाऽर्थवादो वेति संशयः। तत्रासमस्तत्वात्प्रतिषेधः। प्रतिषेधोन्नीतप्रसक्त्या च विकल्पभयात्पर्युदासः। ननु सोमस्योपदेशातिदेशाभ्यां आज्यभागप्राप्त्यभावादुभयमप्ययुक्तम्। सत्यम्। साक्षात् सोमे नाज्य भागौ स्तः। दीक्षणीयादिद्वारेण त्वाज्यभागाभ्यां सोमस्यास्ति संबंधः। सप्तदशारत्निर्वाजपेयस्य यूप इति यूपवाजपेयवत्स प्रतिषिध्यते। तदनेन प्रकारेण सोमांगेषु दीक्षणीयादिष्वाज्यभागप्रतिषेधः पर्युदासो वेति प्राप्ते ब्रूमः। यद्युपदेशेनातिदेशेन वाऽऽज्यभागौ सोमे प्राप्नुयातां नातो निषेधः स्यात्। यदि च सोमासोमसाधारणमाज्यभागविधानमभविष्यत्ततोऽसोम इति पर्युदासो वा कल्प्यः स्यात्। न त्वेवमस्ति। न चादीक्षणीयादिषु प्रतिषेधः। तथासति न सोम इत्यनेनैवाग्नीषोमीयेऽपि पशौ प्रतिषेधसिद्धेः। तत एव तद्विकारेषु निरूढादिपशुष्वपि प्राप्त्यभावान्न पशाविति प्रतिषेधोऽनर्थकः स्यात्। सोमशब्दस्यैवं लक्षणा स्यात्। न च वाजपेयस्य

च पक्षे अनुपपत्त्यभावात्। तथा हि – प्रथमे पक्षे न तात्त्विकत्वासिद्धिः, यस्मात् 'इदं रजतं' इत्यनेन 'नेदं रजतं' इत्यस्य बाधादर्शनात् परीक्षितमेव बाधकमभ्युपेयम्। परीक्षा च प्रवृत्तिसंवादादिरूपा व्यवहारदशायामबाध्यत्वं विनाऽनुपपन्ना तद्दशा बाधग्राहिणं बाधते, नाद्वैतश्रुत्यनुमानादिकमित्युक्तमेव। द्वितीयेऽपि पक्षे नाप्रसक्तप्रतिषेधः, परोक्षप्रसक्तेः संभवात्। यत्तु, केचिदात्मनि तात्त्विकसत्त्वप्रसिद्ध्या प्रसक्तिमुपपादयन्ति, तन्न। न हि प्रतियोगिज्ञानमात्रं प्रसक्तिः, किं तर्हि निषेधाधिकरणकप्रतियोगिज्ञानम्। न चात्मा निषेधाधिकरणम्। तस्मात्परोक्षप्रसक्तिरेव दर्शनीया। अथवा, मा भूत् प्रसक्तिः। अभावप्रत्यक्षे हि संसर्गारोपत्वेन सोपयुज्यते। शब्दानुमानयोस्तु तस्याः क्वोपयोगः। न चाप्रसक्तौ निषेधवैयर्थ्यम्। अनर्थनिवृत्तिरूपस्य प्रयोजनस्य विद्यमानत्वात्। न च प्रत्यक्षविषयतात्त्विकत्वापत्तिः, तद्विषयाधिकरणस्यैव पारमार्थिकत्वव्यतिरेकस्य बोधनात्। तथा च न काऽप्यनुपपत्तिः। तदुक्तं खण्डनकृद्भिः–

'पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः।
विरोधादुपजीव्येन न बिभेति कदाचन॥' इति।

ननु एवमप्यनौष्ण्यं तात्त्विकमिति तदनुमितिरपि न बाध्येत व्यावहारिकौष्ण्यग्राहिणाध्यक्षेण। एवं 'च आदित्यो यूप' इत्यादावपि

'तात्त्विकादित्यतां यूपस्याश्रित्य शरणं श्रुतिः।
विरोधादुवजीव्येन न बिभेति कदाचन॥'

इत्याद्यपि स्यात् इति चेन्न। अनौष्ण्यं तात्त्विकं स्यादिति कोऽर्थः? यदि तत्त्वत औष्ण्यं नास्तीत्यर्थः, तदा अद्वैते पर्यवसानादिष्टापत्तिः। यदि व्यवहारतोऽपि नास्तीति, तदा व्यवहाराविसंवादादिरूपपरीक्षितत्वविशिष्टमौष्ण्यप्रत्यक्षं बाधकमिति नानौष्ण्यस्य तात्त्विकत्वसिद्धिः। एतेन शैत्यानुमानं व्याख्यातम्। एवमादित्ययूपभेदस्य तत्त्वतो व्यवहारतो वा निषेधे योज्यम्। श्रुतेरन्यशेषतया आदित्ययूपाभेदपरत्वाभावेन परीक्षितप्रत्यक्षविरोधेन गौणार्थतया स्तावकत्वोपपत्तेश्च। अत एव 'तात्त्विकादित्यतां यूपस्य' इत्यादिना अद्वैतश्रुतेः 'आदित्यो यूपः' इत्यादिश्रुतिसाम्यापादनम् अपास्तम्। न च अनुमितिसिद्धमिथ्यात्वग्राहकत्वे सत्यद्वैतश्रुतिरनुवादिका स्यात्, यथाऽग्निर्हिमस्य भेषजम्' इत्यादिश्रुतिः प्रमाणान्तरगृहीतहिमनिवारणशक्त्यनुवादिकेति वाच्यम्, स्वस्वचमत्कारानुसारिणोऽनुमानस्य

अद्वैतसिद्धिः

ननु यदि प्रत्यक्षबाधितमप्यनुमानं साधयेत्तदा वह्न्यनौष्ण्यमपि साधयेत्। तथा च कालात्ययापदिष्टकथा सर्वत्रोच्छिद्येत। न च औष्ण्यप्रतियोगिकाभावे साध्ये पक्ष एव प्रतियोगिप्रसिद्धिरिति तत्र बाधः सावकाशः। प्रकृते तु सत्त्वं व्यावहारिकं प्रत्यक्षसिद्धम्। तदविरुद्धं च मिथ्यात्वम्, तस्य पारमार्थिकसत्त्वविरोधित्वात्। अतो न व्यावहारिकसत्त्वग्राहकेणाध्यक्षेण बाध्यत इति वाच्यम्। वह्निविशेषे औष्ण्याभावानुमाने शैत्यानुमाने वा तदभावात्। पक्षातिरिक्तस्य प्रतियोगिप्रसिद्धिस्थलस्य तत्र सत्त्वात्। न च यत्र प्रत्यक्षं प्रबलं तत्र बाधव्यवस्था, न चात्र तथेति न बाध इति वाच्यम्। प्रकृतेऽप्यौष्ण्यप्रत्यक्षसमकक्षस्य प्राबल्यप्रयोजकस्य विद्यमानत्वात्। अनौष्ण्यानुमितेर्मिथ्यात्वानुमितेश्च समानयोगक्षेमत्वात्। नच मिथ्यात्ववादिनां प्रतिपन्नोपाधावौष्ण्यनिषेध ग्राह्यनुमानेन मिथ्यात्वानुमितेः समत्वमिष्टमेवेति वाच्यम्। औष्ण्यानौष्ण्ययोर्भावाभावरूपतया तदनुमितिसाम्येऽपि शैत्यानुमितिसाम्यस्यानभ्युपगमात्। शैत्यस्यौष्ण्याभावरूपत्वाभावात्। तस्माद् बाधस्य दोषता वा त्याज्या, औष्ण्यप्रत्यक्षा- यजमानत्वप्रत्यक्षादेः सत्त्वप्रत्यक्षापेक्षया विशेषो वा वक्तव्यः। न च औष्ण्यप्रत्यक्षं परीक्षितोभयवादिसिद्धप्रमाण्यम्। सत्त्वप्रत्यक्षं तु न तथेति विशेष इति वाच्यम्। सत्त्वप्रत्यक्षेऽपि प्रामाण्यासम्मतौ हेत्वभावात्। परीक्षायास्तुल्यत्वाद् इति चेन्मैवम्। विरुद्धार्थग्राहित्वेन विशेषात्। प्रत्यक्षसिद्धाय जमानत्वौष्ण्यादिवच्छब्दलिङ्गग्राह्ययजमानत्वानौष्ण्याद्यपि व्यावहारिकमिति समत्वात् प्रत्यक्षेण बाध्यते। प्रकृते तु सत्त्वं व्यावहारिकं प्रत्यक्षसिद्धम्। तद्विरुद्धं च न मिथ्यात्वम्। तस्य पारमार्थिकसत्वविरोधित्वात्। अतो न तद् व्यावहारिकसत्त्वग्राहकेणाध्यक्षेण बाध्यते।

ननु एवं वदतस्तव कोऽभिप्रायः ? किं तात्त्विकविषयत्वाद् बाधकतैव मिथ्यात्वानुमानादेर्न बाध्यता ? उत सत्त्वमिथ्यात्वग्राहिणोर्व्यावहारिकत्त्विकविषययोः परस्परविरुद्धविषयत्वाभावात् न बाध्यबाधकभावः ? अन्त्येऽपि किमध्यक्षसिद्धव्यावहारिकसत्त्वमगृहीत्वैव तदसिद्धस्य तात्त्विकसत्त्वस्यैवाभावं गृह्णात्यनुमानादि ? उत प्रत्यक्षविषयीकृतस्यैव तात्त्विकमभावम् ? नान्त्यः। प्रत्यक्षविषयाभावग्राहिणि तदबाधकत्वोक्त्ययोगात्। न द्वितीयः। प्रत्यक्षागृहीतप्रतिषेधकत्वेनाप्रसक्तप्रतिषेधापत्तेः, प्रत्यक्षविषयस्य तात्त्विकत्वापत्तेश्च। न प्रथमः। उपजीव्यप्रत्यक्षविरोधेनानुमित्यादिविषयस्य तात्विकत्वासिद्धेः इति चेन्न। प्रथमे द्वितीये

मिथ्यात्वं व्यावहारिकं व्यावहारिकस्य तु तात्त्विकमिति चेन्न, जलादिस्थस्य प्रातिभासिकौष्ण्यस्याभाव एव व्यावहारिकः, अग्न्यादिस्थस्य व्यावहारिकौष्ण्यस्य तु तात्त्विक इत्यापातात्। तस्मान्मिथ्यात्वं तात्त्विकं अनौष्ण्यं तु व्यावहारिकमिति व्यवस्था न युक्ता। अस्तु वा सा, तथापि तात्त्विकमिथ्यात्वानुमितिबाधेन सत्यत्वस्य व्यावहारिकत्ववत् व्यावहारिकानुष्णत्वानुमितिबाधेनौष्ण्यं नभोनैल्यवत् स्वार्थक्रियया सह स्वप्नवत् प्रातिभासिकं स्यात्। तत्त्वप्रदीपिकायां तु औष्ण्यधीप्रामाण्ये उभयसंमतिः, सत्त्वबुद्धौ तु नेत्युक्तम्, तन्न, इहाऽसंमतौ हेत्वभावात्। तत्त्वशुद्धौ तु मिथ्यात्वानुमितिः श्रुत्यनुगृहीतेति नाक्षबाध्या इतरा तु नेति तद्वाध्येत्युक्तम्। तन्न, मिथ्यात्वश्रुतेः (अग्निर्हिमस्य भेषजमिति श्रुतेः) अनुमितहिमनिवारणशक्त्यनुवादित्ववत् अनुमितासत्यमिथ्यात्वानुवादित्वोपपत्तेः। मिथ्यात्वानुमितिस्तर्कानुगृहीता इतरा तु नेति चेन्न, तर्काणां मिथ्यात्वानुमिति वदक्षबाधेनात्मक्षणिकत्वादितर्काणामिवाभासत्वात्। उक्तं च सुरेश्वरवार्तिके बौद्धम् प्रति–

प्रत्यभिज्ञायमानेऽर्थे तदेवेदमिति ध्रुवे।
लिंगमाभासतामेति प्रत्यक्षार्थविरुद्धदृग्॥ इति।

नन्वनौष्ण्यस्यौष्ण्यनिरूप्यत्वात्तस्य चाग्न्यादावेव ग्राह्यत्वात्तत्र तदभावानुमा बाधिता, मिथ्यात्वं तु न सत्यत्वाभावः, किं तु भावान्तरम्। अभावत्वेऽपि तत्प्रतियोगि सत्त्वं ब्रह्मणि प्रसिद्धमिति चेन्न, औष्ण्यतदभावयोर्व्यवहारिकत्वतात्त्विकत्वाभ्यां प्रातिभासिकत्वव्यावहारिकत्वाभ्यां वा व्यवस्थोक्तेः। तत्र प्रतियोगिग्राहिण उपजीव्यत्वे इह च धर्म्यादिग्राहिणस्सुतरामुपजीव्यत्वाच्च। उष्णमात्रे शैत्यस्य उष्णविशेष वानुष्णत्वस्य साधनेऽबाधापाताच्च। एतेनौष्ण्यात्यन्ताभावात्मकमनौष्ण्यं औष्ण्य मिथ्यात्वरूपमेवेति तस्य तात्त्विकतेष्टेति निरस्तम्, शैत्यस्यातद्रूपत्वात्। तस्मात्–

स्वतः प्रमात्वं प्रत्यक्षे लिंगाद्यैः स्वोपजीविभिः।
स्वविरोधान्मृत्यवस्थामापन्नैर्नैव बाध्यते॥
मिथ्यात्वानुमितेरग्निशैत्यानमितिसाम्यम्।

२५. मिथ्यात्वानुमितेः अग्निशैत्यानुमितिसाम्यम्

एवं चाक्षस्य लिंगादिबाध्यत्वे कालात्ययापदिष्टादेर्दोषता वा त्याज्या व्यवस्थापकं वा वक्तव्यम्। अत्रोक्तं खण्डने तत्राक्षसिद्धस्पर्शनश्रुत्युष्णत्वायजमानत्वादि वल्लिंगशब्दग्राह्यसर्व वेष्टनश्रुत्यनुष्णत्वयजमानत्वादिकमपि व्यावहारिकम्। इह त्वक्षसिद्धं सत्यत्वं व्यावहारिकम्। लिंगशब्दग्राह्यं मिथ्यात्वं तु तात्त्विकम्। एवं च–

पारमार्थिकमद्वैतं प्रविश्य शरणं श्रुतिः।
विरोधादुपजीव्येन न बिभेति कदाचन॥ (खं.खा.) इति।

तत्र किं सत्यत्वमिथ्यात्वग्राहिणोर्व्यावहारिकतात्त्विकविषयकत्वाद्बाध्यबाधकतैव नेति भावः, किं वा मिथ्यात्वग्राहितात्त्विकविषयकत्वाद्बाधकमेव न तु बाध्यमिति? आद्येऽप्यनुमित्यादिकं किमक्षसिद्धव्यावहारिकसत्त्वस्याभावमगृहीत्वैव तदसिद्धस्य तात्त्विकसत्यत्वस्यैवाभावं गृह्णाति, किं वा तत्सिद्धस्यैव प्रतिपन्नोपाधौ तात्त्विकमभावम्? नाद्यः, मिथ्यात्वश्रुत्यादेरप्रसक्तप्रतिषेधत्वापातात्। अक्षसिद्धस्य सत्त्वस्य प्रतिपन्नोपाधावक्षावाग्रहणे तस्य तात्त्विकत्वापाताच्च। न द्वितीयः। प्रतिपन्नोपाधौ तात्त्विकतदभावग्राहिण एव तद्बाधकत्वेनाबाधोक्त्ययोगात्। नान्त्यः, उपजीव्यप्रत्यक्षबाधितस्य मिथ्यात्वस्य तात्त्विकत्वायोगात्। योगे वाऽनौष्ण्यमपि तात्त्विकं स्यात्। एवं च "आदित्यो यूप" इत्यादावपि–

तात्त्विकादित्यतां यूपस्याश्रित्य शरणं श्रुतिः।
विरोधादुपजीव्येन न बिभेति कदाचन॥ इति स्यात्।

नन्विदमनौष्ण्यमतात्त्विकविश्वांतर्गतेन जलाद्यनौष्ण्येन तुल्यस्वभावं चेन्न तात्त्विकम्। न चेदद्वैतस्यैव नामान्तरं स्यादिति चेत्, न, विश्वमिथ्यात्वमपि घटादितुल्यतयाऽक्षसिद्धेनाऽतात्त्विकेन रूप्यादिमिथ्यात्वेन समस्वभावं चेन्न तात्त्विकम्। न चेत् द्वैतस्यैव नामान्तरं स्यादिति साम्यात्। ननु तात्त्विकत्वमात्रेण विलक्षणमपि तन्मिथ्यात्वलक्षणयुक्तमिति चेदिदमपि तन्मात्रेण विलक्षणमपि स्पर्शत्वव्याप्य जातिविशेषवदाश्रयत्वरूपानौष्ण्यलक्षणयुक्तमिति समम्। ननु प्रातिभासिकस्यैव

किंतूपजीव्यत्वेन। न चापच्छेदे पूर्वमुपजीव्यमित्युक्तन्यायेनेत्यर्थः। यद्वा, सर्वस्वदानशास्त्रवत्स प्रपंचादिश्रुतेरर्थांतरेऽवकाशाभावेनेत्यर्थः॥ तत्परत्वादिति॥ वैदिकं अद्वैतादिवाक्यं पूर्वस्य प्रत्यक्षस्य बाधकं। कुतः अद्वैतवाक्यस्य तत्परत्वात्। तस्मिन्नद्वैते तात्पर्ययुक्तत्वात्। परत्वात् अपच्छेदन्यायेन परत्वादित्यर्थः॥ निर्दोषत्वाच्चेति॥ अपौरुषेयत्वेनानाशंकितदोषत्वादित्यर्थः। आप्तवाक्यवत् यथाऽयं सर्प इति प्रत्यक्षस्य बाधकमित्यर्थः। अद्वैते तात्पर्याभावे च निर्दोषत्वं न संभवतीति भावः। तत्परत्वं अद्वैततात्पर्ययुक्तत्वादित्ययं हेतुः प्राबल्यं नैव साधयेत्। कुतः असिद्धत्वात्। अद्वैते तात्पर्ययुक्तत्वस्यासिद्धत्वादित्यर्थः। असिद्धिमेवाह॥ असिद्धं हीति॥ द्वितीयस्य परत्वहेतोर्व्यभिचारस्थलमाह॥ परत्वं त्विति॥ पुनः परत्वस्य व्याकरणशास्त्रीयं व्यभिचारस्थलांतरमाह॥ दृश्यते चेति॥ ''मृडमृदगुधकुषक्लिशवदवसः क्त्वा''। एभ्यो धातुभ्यः परः क्त्वा कित्स्यादिति क्त्वाप्रत्ययस्य कित्त्वं ककारेत्संज्ञकत्वं विहितं। इदं च सूत्रं पूर्वं 'न क्त्वा सेडिति' परं पश्चात्तनं सूत्रं। सेड्धातव अनिड्धातव इति द्विविधा धातवः संति। तत्र सेट् क्त्वा सेड्धातोः पुरतः प्राप्तः क्त्वाप्रत्ययः कित् न इडागमोपेतः क्त्वा ककारेत्संज्ञको न स्यात् इत्येवं सेटः क्त्वाप्रत्ययस्य कित्त्वनिषेधः कृत इति स्थितिः। तत्र मृडमृदेत्यादिना यत् क्त्वाप्रत्ययस्य कित्त्वं विहितं तदनुपपन्नं। क्त्वाप्रत्ययस्य कित्त्वं स्वभावत एव सिद्धमिति तद्विधानवैयर्थ्यात्। असिद्धस्यैव विधेयत्वात्। अतो ''व्यर्थं सत् किंचिदिष्टं ज्ञापयती''ति न्यायेन ''न क्त्वासेडि''ति सेटः क्त्वाप्रत्ययस्य यःकित्त्वनिषेधः कृतस्तन्निषेधार्थत्वं गृहेत्यादिविधानस्यांगीकृतं। तथाच शास्त्रेपि पूर्वमेव परस्य बाधकं दृष्टमिति परत्वहेतोर्व्यभिचारित्वात् न प्राबल्यसाधकत्वमितिभावः। यथोक्तं वैयाकरणैः –

''स्वत एव कितः क्त्वायाः किद्वाचोऽनर्थकत्वतः।
सेटः क्त्वायाः कित्त्वनिषेधनिषेधार्थत्वमास्थितम्॥'' इति।

स्वत एव स्वभावत एव कितः ककारेत्संज्ञकस्य क्त्वायाः क्त्वाप्रत्ययस्य किद्वाचः मृडेत्यादिसूत्रेण कित्त्वविधानस्य अनर्थकत्वतः व्यर्थत्वात् सेटः क्त्वायाः यः कित्त्वनिषेधः कित्त्वनिषेधः न क्त्वा सेडिति सूत्रेण कृतस्तन्निषेधार्थत्वमास्थितमंगीकृतं पाणिनिनेत्यर्थः। अयमेवाऽर्थः पुनः कारिकांतरेण संगृहीतः।

''कित्त्वं हि क्त्वो निजं यन्न क्त्वा सेडिति निराकृतं।
मृडेत्यादिविधानं तु पुनरुज्जीवयत्यदः॥'' इति।

क्त्वः क्त्वाप्रत्ययस्य कित्त्वं निजं स्वाभाविकं अतो न विधेयमिति मृडेत्यादिसूत्रेण तद्विधानं तु कर्तृ न क्त्वा सेडिति सूत्रेण यत् सेटः क्त्वायाः कित्त्वं निराकृतं अदः कित्त्वं पुनरुज्जीवयति सेटः क्त्वायाः कित्त्वनिषेधनिषेधेन कित्त्वमेव पुनर्विधत्त इत्यर्थः।

निर्दोषत्वाच्चेति हेतोः निर्दोषतान्यथासिद्धेरित्यन्यथासिद्धिरुक्ता। तामुपपादयति॥ निर्दोषत्वं त्विति॥ अद्वैतादिवाक्यस्य स्वार्थे तात्पर्याभावेपि अर्थांतरे प्रामाण्येन निर्दोषत्वमन्यथासिद्धमिति न तस्य प्राबल्यहेतुत्वमित्यर्थः॥ इत्यपच्छेदन्यायवैषम्यविवरणं॥

द्वादशशतदक्षिणाधिकरणक्रतुः प्रतिहर्त्रपच्छेदेन निमित्तेन सर्वस्वदानविशिष्टतया कर्तव्योऽभूत्स एवेदानीमुद्गात्रपच्छेदेन निमित्तेनादक्षिण्यविशिष्टतया कर्तव्यो जात इत्येवं तयोः सर्वस्वदानादक्षिण्यप्रतिपादकशास्त्रजन्यज्ञानयोः प्रामाण्यात्तज्जनकशास्त्रयोरपि प्रामाण्यमित्याह॥ अपि चेत्यादिना॥ क्रमिकाभ्यां प्रतिहर्त्रुद्गात्रपच्छेदरूपाभ्यां॥ तत्तन्निमित्तिकेति॥ प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्व दानवत्तया कर्तव्यतायाः उद्गात्रपच्छेदनिमित्तकादक्षिण्यवत्तया कर्तव्यतायाश्च क्रमेणोत्पत्तेरित्यर्थः ॥ अन्यथेति॥ द्वादशशतदक्षिणावत्त्वेनेत्यर्थः॥ निमित्ते सतीति॥ प्रतिहर्त्राद्यपच्छेदरूपे निमित्ते प्राप्ते सतीत्यर्थः॥ एवमिति॥ सर्वस्वदक्षिणावत्त्वादिना कर्तव्य इत्यर्थः। तथाच न सर्वथाऽप्रामाण्यमिति भावः॥ अप्रामाण्यमिति॥ तथाच पूर्वस्मिन्नेकस्मिन्नेव क्रतौ प्रकारद्वयेन करणयोग्यतयोरुत्पन्नत्वेन तदुभयज्ञानस्य प्रामाण्यात्तज्जनकं तस्मिन् क्रतौ सर्वस्वदानादक्षिण्याभ्यां करणयोग्यताप्रतिपादकतज्ज्ञानजनकमिति यावत्, शास्त्रद्वयं प्रमाणमेवेत्यर्थः। प्राक्तथाभूतस्य श्यामतया भूतस्य। पश्चादन्यथाभावात् रक्ततया भावात्। यथा श्यामरक्तरूपेण बदरफलरूपार्थस्यैव तादृशत्वात् श्यामरक्तरूपत्वात् तज्ज्ञानयोर्नाप्रामाण्यं यथास्थितार्थावगाहित्वात् एवं प्राक् तथाभूतस्य प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्व दक्षिणावत्त्वेन करणयोग्यत्ववतः क्रतुरूपार्थस्यैव पश्चादन्यथाभावात् उद्गात्रपच्छेदनिमित्तकादक्षिण्येन करणयोग्यतावत्तया भावात् क्रतुरूपार्थस्यैव तादृशत्वात् सर्वस्वदक्षिणादक्षिण्यां करणयोग्यतावत्स्वरूपत्वात् नैकस्मिन् क्रतौ तदुभयज्ञानयोरप्रामाण्यं यथास्थितार्थावगाहित्वात्। ततश्च न तज्जनकशास्त्रयोरप्यप्रामाण्यमिति भावः। ननु एकस्मिन्नेव क्रतौ प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणावत्त्वेन कर्तव्यत्वज्ञानं अनंतरभाविन्योद्गात्रपच्छेदनिमित्तकादक्षिण्यवत्तया कर्तव्यतावगत्या मिथ्या किं न स्यादित्यत आह॥ न हीति॥ विज्ञानं प्रागासीदिति विज्ञानं।

अपच्छेदन्यायवैषम्यं प्रकृते उपपाद्य तद्विषयं संकृल्लाति॥ पौर्वापर्यमिति॥ केवलमिति शेषः॥ यत्रेति श्रवणात्तत्रेति ग्राह्यं। तथाच केवलमुपजीव्योपजीवकभावरहितं पौर्वापर्यं यत्रास्ति तत्रापच्छेदनयोऽपच्छेदन्यायो भवेत्। न हि प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे पूर्वमुपजीव्यमित्यर्थः। प्रकृते च प्रत्यक्षागमयोः पौर्वापर्ये सत्यपि उपजीव्योपजीवकभावांगीकारात्ताभ्यां तन्न्यायवैषम्यमिति भावः। तथा विरोधश्च यत्रास्ति तत्प्रयुक्तं नियमात् अत्यंतं विषयांतरेऽनवकाशरूपं पूर्वाप्रामाण्यं च यत्र नास्ति तत्रापच्छेदनयो भवेत्। प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे तन्निमित्तकसर्वस्वदानादक्षिण्ययोर्विरोधोस्ति तत्प्रयुक्तं पूर्वाप्रामाण्यं नियमान्नास्ति। सर्ववेदसं दद्यादिति शास्त्रस्य प्रतिहर्तृमात्रापच्छेदादौ सति सावकाशत्वात्। प्रकृते च प्रत्यक्षागमयोर्विरोधोऽस्ति। तन्निमित्तकं पूर्वस्य प्रत्यक्षस्याप्रामाण्यं नियमान्नास्ति। विषयांतरे सावकाशत्वसंभवादिति वक्तव्यं। न ह्येवं वक्तुं शक्यते। अनुमानविरोधेन सत्त्वग्राहिणः प्रत्यक्षस्य सत्त्वरूपार्थं विना विषयान्तरे प्रामाण्यस्यावकाशाभावान्नापच्छेदन्यायावकाशः। न च प्रकृतेऽपि सत्त्वग्राहिणः प्रत्यक्षस्यापि व्यावहारिकसत्त्वावगाहित्वेन सावकाशत्वमस्तीति वाच्यं। सत्तात्रैविध्यस्योत्तरत्र दूष्यत्वादिति हृदयं॥

एवमिति॥ सर्ववेदसशास्त्रवदित्यर्थः॥ एतेनेति॥ अपच्छेदन्यायवैषम्योपपादनेनेत्यर्थः॥ सगुणेति॥ सगुणश्रुतेर्निर्गुणश्रुत्याऽपच्छेदन्यायेन बाधः। निषेधरूपत्वेन निर्गुणश्रुतेः परत्वात्। तथा सप्रपंचश्रुतेर्निष्प्रपंचश्रुत्या परयाऽपच्छेदन्यायेन बाध इति परोक्तमप्येतेनैव निरस्तं। न ह्यस्माभिः पूर्वत्वमात्रेण बाधकत्वमुच्यते

विषयांतरेप्यनवकाशेन सर्वथाऽप्रामाण्यरूप इत्यर्थः। कुतो नात्यंतबाध इत्यत आह॥ प्रतिहर्त्रिति॥ प्रतिहर्तृमात्रापच्छेदे यदि प्रतिहर्ताऽपच्छिद्येत तदा सर्ववेदसं दद्यादिति शास्त्रप्रामाण्यसंभवादित्यन्वयः॥ क्रमेणेति॥ प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदेपि यदा प्रतिहर्त्रपच्छेदः पश्चात्तनो भवति तदा परेण पूर्वबाधांगीकारात्सर्ववेदसं दद्यादिति शास्त्रस्य प्रामाण्यसंभवादित्यर्थः। ननु प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदे कथं सर्ववेदसं दद्यादिति शास्त्रप्रामाण्यसंभव इत्यत आह॥ अत एव षष्ठ इति॥ यतो युगपदपच्छेदेपि सर्ववेदसं दद्यादिति शास्त्रप्रामाण्यसंभवोऽत एवेत्यर्थः॥

विकल्प उक्त इति॥ नात्यंतबाधेनाप्रामाण्यमित्यर्थः। षष्ठेऽध्याये चिंतितं – तत्र विप्रतिषेधाद्विकल्पः स्यात्। प्रतिहर्त्रुद्गात्रोर्युगपदपच्छेदे तन्निमित्तकं सर्वस्वदानादक्षिण्यरूपं नैमित्तिकद्वयं समुच्चीयते उत विकल्पइति संशये पुनर्यजेतेति प्रयोगद्वयसद्भावेन पूर्वस्मिन्प्रयोगेऽदक्षिणत्वमुत्तरस्मिन्सर्वस्वदानमित्युभयस्यापि संभवात्समुच्चय इति पूर्वपक्षः। यस्मिन्प्रयोगे निमित्तं तस्यैवांगं नैमित्तिकं न प्रयोगांतरे तस्यावकाशसंभव इति एकस्मिन्नेव प्रयोगे द्वयमापतितं। तच्च विरुद्धमतो विकल्प्यत इति सिद्धांतः। एवं प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे प्रतिहर्त्रपच्छेदनिमित्तस्य सर्वस्वदानस्य परेणोद्गात्रपच्छेदेन बाधेपि नात्यन्तबाधः। प्रकारत्रयेणापि तच्छास्त्रप्रामाण्योपपत्तेरित्युपपाद्य इतोपि नात्यंतबाधः, प्रयोगांतरे निक्षेपोपपत्त्या तच्छास्त्रप्रामाण्योपपत्तेरित्याह – किंचेति॥ षष्ठे स्थितं ''यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्यात्''। प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे यदोद्गात्रपच्छेदो जघन्यः परः पश्चात्तनो भवति तदा ''यद्युद्गाताऽपच्छिद्यादददक्षिणं यज्ञमिड्वा तेन पुनर्यजेत तत्र तद्द्याद्यत्पूर्वस्मिन्दास्यन्स्यादि''ति श्रूयते। तत्रोद्गात्रपच्छेदनिमित्तके प्रथमप्रयोगं दक्षिणाहीनं समाप्य कर्तव्ये ज्योतिष्टोमस्य पुनः प्रयोगे तद्द्यादिति श्रुता दक्षिणा किं प्रस्तोत्रादिप्रसर्पणाधिकरणीभूतपूर्वक्रतुसंकल्पकाले या दित्सिता द्वादशशतरूपा सैवा। उत प्रतिहर्त्रपच्छेदे दित्सितासर्वस्वरूपा वेति संशये पूर्वस्मिन्दास्यन् स्यादित्युक्तत्वेन या क्रतुस्वभावतः प्राप्ता द्वादशशतरूपा सैवेति प्राप्ते प्रथमं द्वादशशतं धनं दास्यन्नासीत् तत् परेण प्रतिहर्त्रपच्छेदनिमित्तेन सर्ववेदसेन बाधितमेवेति पुनर्यज्ञे सर्वस्वदक्षिणैव देया। न च सर्वस्वदक्षिणापि प्रतिहर्त्रपच्छेदात्परेणोद्गात्रपच्छेदनिमित्तकाऽऽदक्षिण्येन बाधितेति वाच्यं। प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणायाः प्रयोगांतरे निक्षेपोपपत्तेरदक्षिण्येन न सर्वथा बाध इति सिद्धांतितं। प्रथमप्रयोगं बहिष्पवमानप्रसर्पणाधिकरणीभूतं॥ न त्विति॥ येन सर्ववेदसं दद्यादिति शास्त्रस्य प्रयोगांतरे निक्षेपाभावेनाप्रामाण्यं स्यादिति भावः। इति उद्गात्रपच्छेदनिमित्तकप्रयोगांतरे सर्वस्वदाने द्वादशशतदक्षिणाया अपि प्राप्तत्वेन तदंतर्भावादि ज्ञातव्यं। यत्पूर्वस्मिन्नित्युक्तदक्षिणाया द्वादशशतरूपत्वे प्रतिहर्त्रपच्छेदनिमित्तकप्रायश्चित्ताकरणेन प्रत्यवायप्राप्तेः। अयं च विचार उद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात्पाश्चात्यत्व एव सति नान्यथा। यदि च प्रतिहर्त्रपच्छेदाभावेपि उद्गातृमात्रापच्छेद एव जातस्तदा पुनर्यजेत तत्र तद्द्याद्यत्पूर्वस्मिन्दास्यन्स्यादित्युक्ता दक्षिणा द्वादशशतरूपैव न सर्वस्वरूपा। तस्याः प्रतिहर्त्रपच्छेदमात्रनिमित्तकत्वेन तदभावेऽयोगादिति॥ प्रयोगांतरइति॥ उद्गात्रपच्छेदनिमित्तकप्रथमप्रयोगं दक्षिणाहीनं परिसमाप्य प्रतिहर्त्रपच्छेदनिमित्तेन कर्तव्ये ज्योतिष्टोमस्य द्वितीयप्रयोग इत्यर्थः।

इतोपि न सर्वस्वदानशास्त्रस्य बाधः। तथाहि। यथा बदरफले श्यामरक्तरूपयोःक्रमेणोत्पत्त्यनंतरं यः पूर्वं श्यामः स एवेदानीं पाकेन रक्त इति ज्ञानयोर्यथाऽविरोधेन प्रामाण्यमेवास्ति एवमेव यो

नन्वेवं प्रत्यक्षप्रामाण्यस्याप्यर्थान्तरेऽवकाशवत्त्वात् अपच्छेदनयो भविष्यतीत्यत आह – न चैवमिति। नन्वपच्छेदनये पूर्वप्रामाण्यस्य युगपदपच्छेदादाववकाशो यथा तथा प्रत्यक्षप्रामाण्यस्यापि व्यावहारिकप्रामाण्येऽव काश इति कृत्वाऽपच्छेदनयो भविष्यतीति चेन्न। व्यावहारिकपारमार्थिकविभागस्य मिथ्यात्वसिद्ध्यधीनत्वादन्योन्याश्रयात्। किञ्च व्यावहारिकशब्देन यद्यबाध्यं विवक्षितं कथं तर्हि प्रत्यक्षस्य बाधः। यदि बाध्यं कथं तर्हि सावकाशम्। तत्त्वं हि अबाधितार्थान्तरवत्त्वम्। बाध्यप्रामाण्यत्वे च तदसम्भवादिति। एतेनेति॥ सगुणप्रपञ्चश्रुत्योः तात्विकार्थान्तरवत्त्वरूपसावकाशत्वाभावात् अपच्छेदन्यायासंभवादिति भावः। तत्परत्वादिति। अद्वैतपरत्वादिति यावत्। असिद्धं हीति। ननु प्रत्यक्षादेः व्यावहारिकं प्रामाण्यं, श्रुतेस्तु तात्विकमिति विरोधाभावे न तत्परत्वासिद्धिः स्यादिति चेन्न। अन्योन्याश्रयादेरुक्तत्वात्। विरोधाभावे बाधासिद्धेश्च। न च तात्विकांशे विरोधः। तदंशे मानान्तरविरोधे तत्परत्वासिद्धेः। परं त्विति। न च मानान्ताराबाधितपरत्वं विवक्षितम्, प्रमानन्तरभ्रमे च मानान्तरबाधोऽस्तीति वाच्यम्। प्रकृतेऽपि मानान्तरबाधस्य सत्त्वात्। अन्यथा बौद्धोक्तक्षणिकत्वाद्यनुमानादेरपि मानान्तराबाधितपरत्वस्य वक्तुं शक्यत्वात् तेन श्रुत्यादिबाधापत्तेः। दृश्यते चेति। ननु 'न क्त्वा सेट्' इत्यस्य आपाततः परत्वेऽपि स्वभावसिद्धकित्त्वस्य अनेन अपाकरणं विना पुनस्तत्प्रतिप्रसवार्थं मृडमृदेत्यादेः अप्रवृत्तेः तदपेक्षया अर्थतः पूर्वत्वमेव। अपवादाभावे पुनः उत्सर्गस्यैवावस्थितत्वादिति चेन्मैवम्। यथाकथञ्चित् पूर्वत्वस्य त्वदीयानुमानादेरपि वक्तुं शक्यत्वात्। प्रत्यक्षादिना हि भेदप्रतिपादनं न अभेदप्रसक्तिं विना इति त्वदभिमताभेदप्रतिपादकस्य पूर्वत्वसंभवादिति। निर्दोषत्वं त्विति। ननु तात्पर्यविषये एव प्रामाण्यस्याभ्युपेयत्वात् निर्दोषत्वं न अर्थान्तरे सावकाशमिति चेन्न। तात्पर्यस्य अद्याप्यसिद्ध्या अन्योन्याश्रयादेरुक्तत्वादिति सर्वं हृद्यम्। ॥ इत्यपच्छेदन्यायवैषम्यम्॥

न्यायामृतप्रकाशः

परेणेति॥ प्रत्यक्षसिद्धजीवादिधर्मिकत्वादित्यर्थः॥ अपच्छेदन्यायेनेति॥ षष्ठे चिंतितं। ''पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्''। ''अध्वर्युं प्रस्तोतान्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गाता उद्गातारं ब्रह्मा तं यजमान'' इत्यादिश्रुत्या विहितस्य बहिष्पवमानं प्रसर्पतां प्रस्तोत्रादीनां अध्वर्व्याद्यन्वारंभस्य विच्छेदे सति प्रायश्चित्तविशेषाः श्रूयंते। बहिष्पवमानं प्रसर्पतां मध्ये ''यदि प्रस्तोतापच्छिद्याद्ब्रह्मणे वरं दद्याद्यजमानः यदि प्रतिहर्ताऽपच्छिद्यात्तर्हि सर्ववेदसं दद्यात् यद्युद्गाताऽपच्छिद्याददक्षिणं यज्ञमिड्वा तेन पुनर्यजेत तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यात्'' इति। तत्र क्रमेण प्रतिहर्त्रुद्गात्रोरपच्छेदे किं पूर्वनिमित्तकं सर्वस्वदक्षिणारूपं प्रायश्चित्तं कार्यं उतोत्तरनिमित्तकोऽदक्षिणाको यागः कार्य इति संशयेऽसंजातविरोधित्वेन पूर्वस्य प्रबलत्वात् प्रतिहर्त्रपच्छेदनिमित्तकं सर्वस्वदक्षिणारूपं प्रायश्चित्तं कार्यमिति पूर्वपक्षे ''नानुपमृद्य पूर्वं तद्विरोध्युत्तरमुत्पत्तुमर्हती''ति न्यायेन पूर्वोपमर्देन परप्राबल्यस्यैव न्याय्यत्वादुद्गात्रपच्छेदनिमित्तकोऽदक्षिणाको याग एव कार्य इति परेण पूर्वस्य बाध इति सिद्धांतः॥ न चापच्छेदइति॥ प्रतिहर्त्रपच्छेद उद्गात्रपच्छेदस्योपजीव्यो नैव भवति। येन परेणोपजीवकेन पूर्वस्योपजीव्यस्यापच्छेदनये बाधदर्शनात्प्रकृतेपि तथा स्यादित्युच्येतेत्यर्थः॥ अत्यंतबाध इति॥

अतः उभयोरपि पूर्वकालावच्छिन्नत्वात् पुनः प्रयोगे उभयमपि देयमित्यपि वक्तुं शक्यते। तस्माद्विकल्प इति पूर्व पक्षः। सिद्धान्तस्तु – भवति ज्योतिष्टोमरूपप्रथमप्रयोगे द्वादशशतं दास्यन्। ततश्च प्रतिहर्तुः प्रथममपच्छेदे सति तन्निमित्तकं सर्वस्वदानरूपं प्रायश्चित्तं प्रथमप्रयोगे प्राप्तम्। तेन च क्रतुस्वभावप्रयुक्तस्य द्वादशशतस्य बाधात् सर्वस्वं दित्सितम्। तस्मात् तदेव पुनः प्रयोगे स्यात्। न च तदपि अदाक्षिण्येन बाधितमिति वाच्यम्। बाधकस्य दक्षिणान्तरस्यानुक्तत्वात्। न ह्युद्गात्रपच्छेदेन पूर्वदक्षिणा बाध्यते। किं तर्हि पूर्वस्मिन् प्रयोगे दातव्या सती दक्षिणा तत उत्कृष्य उत्तरस्मिन् प्रयोगे निक्षिप्यते। अतः उत्तरकालीनोद्गात्रपच्छेदनिमित्तेऽपि पुनः पूर्वकालीनप्रतिहर्त्रपच्छेदप्रयुक्तं सर्वस्वमेव दातव्यम्।

ननु स्यादेतन्न्यायवैषम्यं यदा पूर्वेण प्रतिहर्त्रपच्छेदनिमित्तेन सर्ववेदसदानेन परस्य उद्गात्रपच्छेदनिमित्तस्य अदाक्षिण्यस्य अत्यन्तं न बाधः, किन्तु पाक्षिकाप्रामाण्यादिकमेवेति तदा। यदा च प्रतिहर्त्रपच्छेदनिमित्तं सर्ववेदसदानं तु पूर्वमुद्गात्रपच्छेदनिमित्तमदक्षिणमत्यन्तं बाधते एव, न हि तत्र पाक्षिकमप्रामाण्यं वा, विकल्पो वा, प्रयोगान्तरनिक्षेपो वाऽस्ति, तदा परेणागमेन पूर्वस्य प्रत्यक्षस्यात्यन्तबाधेऽपच्छेदन्यायोदाहरणं युक्तमिति चेन्मैवम्। अस्य न हीत्यादिना मूले एव खण्डितत्वात्। अपि चेति। तथाच पश्चादुत्पन्नस्य रक्तत्वज्ञानस्य पूर्वोत्पन्नश्यामत्वज्ञानं बाधकं न भवति यथा तथाऽपच्छेदनयेऽपि पूर्वोत्पन्नज्ञानस्य पश्चादुत्पन्नज्ञानं न बाधकम्। न हि पूर्वनिमित्तप्रायश्चित्तज्ञानजनकं पश्चात्तननिमित्तवेलायां तत्कर्तव्यतां बोधयति। येन विरोधेन बाध्यबाधकभावः स्यादिति भावः। संगृह्णाति – तस्मादिति॥ यत्र पौर्वापर्यं, विरोधः, पूर्वाप्रामाण्यं च नियमान्नास्ति तत्रैवासावपच्छेदनयो भवेदित्यर्थः। अत्र यत्र पौर्वापर्यं तत्रापच्छेदनय इत्युक्ते प्रयाजादीनां प्रधानस्य पौर्वापर्यसत्त्वात् अपच्छेदनयः स्यात्। अतो विरोध इति। तावत्युक्ते यत्रोद्गातृप्रतिहर्त्र पच्छेदौ युगपत् तत्रापि स स्यादत उक्तं पौर्वापर्यमिति। पौर्वापर्यं विरोधश्च यत्र तत्र स इत्युक्ते उपक्रमाधिकरणे अर्थवादविध्युद्देशयोस्तदुभयसत्त्वात्तदापत्तिर्मा भूदतो नियमात् पूर्वाप्रामाण्यं नास्तीति। नियमादिति च प्रकृतेऽसम्भववारणाय। कथंचित्पूर्वाप्रामाण्यस्य तत्र सत्त्वात्। न च नञ्द्वयेन पूर्वप्रामाण्ये सतीति विवक्षितमिति नासम्भव इति वाच्यम्। तथाप्युपक्रमाधिकरणे पूर्वप्रामाण्यस्य सत्त्वेनातिप्रसङ्गस्तत्र स्यात्। न च नियमादित्युक्तेऽपि अव्यावृत्तिः। तत्र नियमेनापि पूर्वप्रामाण्यस्य सत्त्वादिति वाच्यम्। नियमपदेन पूर्वप्रामाण्यस्य अर्थान्तरे सावकाशत्वे सतीत्यस्य विवक्षितत्वात्। उपक्रमाधिकरणे च पूर्वप्रामाण्यस्यार्थान्तरेऽवकाशाभावान्न तत्रापच्छेदनयप्रसङ्गः। नन्वेवं पूर्वप्रामाण्यस्यार्थान्तरे सावकाशत्वे सति यत्र विरोधः तत्रैव स इत्येवास्तु। युगपदपच्छेदस्थले पूर्वोत्तरभावाभावेन पूर्वविशेषणाभावादेव तद्व्यावृत्तेः सम्भवात्। न च पूर्वपदमेकार्थपरमिति वाच्यम्। तथासति उपक्रमाधिकरणेऽतिप्रसङ्गपरिहारानापत्तेः। तत्रैकप्रामाण्यस्यार्थान्तरे सावकाशत्वविरोधयोः सत्त्वादिति चेन्न। प्रकृते पूर्वप्रामाण्यस्यार्थान्तरे सावकाशत्वे सतीत्यस्यासंभवशङ्कापरिहारार्थत्वेन एतद्विवरणार्थत्वेन तस्य वैयर्थ्याभावात्। वस्तुतस्तु उभयोर्यथाकथञ्चिन्मुख्यार्थे एव प्रामाण्यस्यावश्यकत्वे सतीत्यर्थः। तेन नोपक्रमाधिकरणेऽतिप्रसङ्गः। नापि पौर्वापर्यविशेषणवैयर्थ्यमिति द्रष्टव्यम्। यद्वा परस्परनिरपेक्षप्रामाण्यकत्वे सतीति तदर्थः। एवञ्च न कोऽपि दोषः, न वा विशेषणवैयर्थ्यमिति सर्वमवदातम्।

पूर्वोत्पत्तिदशायामविद्यमानस्य उत्तरज्ञानस्य बाध्यत्वायोगात्। उत्तरकालेतु स्वयं बाधितं पूर्वं ज्ञानं कथमुत्तरस्य बाधकं भवेत्। न चान्यत् किञ्चित् बाधकं पश्यामः। तस्मात् पौर्वापर्ये पूर्वदौर्बल्यम्। ततश्च यथा नित्यद्वादशशतज्ञानं पूर्वमुत्पन्नं पाश्चात्येन नैमित्तिकेन सर्ववेदसदानादिज्ञानेनबाध्यते तथा नैमित्तिकमपि पूर्वनिविष्टमुत्तरेण बाध्यते। न हीति। ननु उपजीव्यत्वविशिष्टमपि पूर्वमुत्तरेण नेदं रजतमिति ज्ञानेन बाध्यं दृष्टमिति चेन्न। तत्र उपजीव्यत्वाभावस्योक्तत्वात्। किञ्च नोपजीव्यत्वमात्रेण प्रत्यक्षस्य बाधकता उक्ता। किन्तु परीक्षायुक्तत्वेनेत्युक्तत्वात्। न च अपच्छेदनये पूर्वं परीक्षितं नोत्तरमित्यस्ति। जगत्प्रत्यक्षे तु परीक्षायुक्तत्वमस्ति। अतो वैषम्यात् नापच्छेदनयः। अपच्छेदनये पूर्वप्रामाण्यस्य अस्त्यवकाशः। जगत्प्रत्यक्षप्रामाण्यस्य तु स नेत्याह – किञ्चेति।

अत एवेति। तत्रैव पञ्चमपादे अष्टादशाधिकरणे चिन्तितम्। तत्र विप्रतिषेधाद्विकल्पः स्यात् इति सूत्रम्। अदक्षिणत्वं सर्वस्वदक्षिणत्वमिति यत् प्रायश्चित्तद्वयं निमित्तभेदेन यद्युद्गातेत्यादिना श्रुतं तन्निमित्तयोर्यौगपद्ये किं समुच्चीयते अथ विकल्प्यते इति विचारः। पूर्वपक्षस्तु – समुच्चय एव युक्तः। निमित्तद्वये प्रायश्चित्तद्वयसमवायस्य न्याय्यत्वात्। न विकल्पः। तस्य अष्टदोषदुष्टत्वात्। न च अदक्षिणत्वसर्वस्वदक्षिणत्वयोर्विरोधात् न समुच्चय इति वाच्यम्। प्रयोगभेदेन व्यवस्थाश्रयणात्। प्रथमप्रयोगे दक्षिणा न दातव्या। उत्तरप्रयोगे सर्वस्वं दातव्यम्। न च प्रयोगभेदेन अनुष्ठीयमानत्वात् कथं समुच्चय इति वाच्यम्। प्रयोगभेदेऽपि कर्मण एकत्वात् समुच्चय इति। सिद्धान्तस्तु – यत्र हि प्रयोगे निमित्तं तस्यैव नैमित्तिकं प्रायश्चित्तमङ्गम्। न ह्युत्तरप्रयोगेऽपच्छेदो विद्यते। न चासति निमित्ते प्रायश्चित्तं युक्तम्। न च निमित्तरहितप्रयोगे क्रियमाणेन प्रायश्चित्तेन निमित्तवतः प्रयोगस्य साद्गुण्यं भवति। तस्मात् प्रथमप्रयोगे एव निमित्तद्वयवशात् प्रायश्चित्तद्वयं प्राप्तम्। तच्च अन्योन्यविरुद्धत्वाद्विकल्प्यते। न च विकल्पो न्याय्योऽष्टदोषदुष्टत्वादिति वाच्यम्। गत्यन्तराभावे व्रीहियववदगत्या तदाश्रयणादिति विकल्पोऽप्युक्तः। अत एव सर्वथा पूर्वशास्त्राप्रामाण्यं नास्ति। अन्यथा विकल्पोक्तयोगात्। यत्र हि पाक्षिकं प्रामाण्यं तत्रैव विकल्पाश्रयणादिति भावः।

किञ्चेति। षष्ठे पञ्चमपादे विंशाधिकरणे चिन्तितम् – यद्युद्गाता जघन्यः स्यात् पुनर्यज्ञे सर्ववेदसं दद्यात् यथेतरस्मिन् इति सूत्रम्। पौर्वापर्ये जघन्यनिमित्तं प्रायश्चित्तमिति स्थितम्। तद्यदा उद्गाता पश्चादपच्छिद्यते तदा तस्यापच्छेदस्य प्रबलत्वात्तन्निमित्तं प्रायश्चित्तमनुष्ठेयम्। तच्च ईदृशम्। प्रथमप्रयोगं दक्षिणारहितमनुष्ठाय द्वितीयप्रयोगे पूर्वं दित्सिता दातव्या इति। पूर्वं च गवां द्वादशाधिकं शतं दित्सितम्। तस्य द्वादशशतं दक्षिणा इति ज्योतिष्टोमदक्षिणारूपेण विहितत्वात्। प्रतिहर्त्रपच्छेदेन च सर्वस्वं दित्सितम्। एवं सति संशयः – किं पुनर्यज्ञे द्वादशशतं देयमुत सर्ववेदसमिति। तत्र द्वादशशतमेव देयमित्येकः पूर्वपक्षः। कुतः? तत्र तद् दद्यात् यत् पूर्वस्मिन् दास्यन्स्यात् इति यदेव क्रतुस्वभावतो देयं तदेव प्रतीयते। तच्च द्वादशशतम्। तस्मात् पुनर्यज्ञे तदेव देयमिति। अथवा यत् पूर्वस्मिन् दास्यन्स्यादिति सामान्याकारेणोक्तत्वात् पूर्वकालत्वावच्छिन्नं दित्सितं देयं प्रतीयते। तथाच ज्योतिष्टोमरूपपूर्वप्रयोगे प्रथमं द्वादशशतं दास्यन्नासीत्। प्रतिहर्त्रा त्वपच्छिन्ने सर्ववेदसं दास्यन्नासीत्।

निर्दोषत्वमपि नान्यथासिद्धम्। तात्पर्यविषय एव प्रामाण्यस्याभ्युपेयत्वात् इति। मैवम्। व्यावहारिकतात्विकप्रमाणविभागाभावेऽनासिद्ध्युद्धारासिद्धेः। द्वितीयहेतोर्व्यभिचाराभावेप्य सिद्धिप्राप्तेः। प्रत्यक्षबाधितत्वेन मानांतराबाधाभावात्। न क्त्वा सेडित्यस्य तु पुरस्तादपबादन्यायेन पूर्वेण मृडमृदेत्यादिना बाध्यमानत्वात्। निर्दोषत्वेन तात्पर्यविषये प्रामाण्येऽपि मानांतरविरुद्धे तात्पर्यस्यैवासिद्धेरिति।

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यामपच्छेदवितुल्यता॥
अपच्छेदन्यायवैषम्यम्।

न्यायामृतकण्टकोद्धारः

॥ अपच्छेदन्यायेनेति॥ षष्ठे पञ्चमपादे एकोनविंशाधिकरणे चिन्तितम् – पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्। अध्वर्युं प्रस्तोताऽन्वारभते। प्रस्तोतारमुद्गाता उद्गातारं प्रतिहर्ता इत्यादिश्रुत्या विहितस्य बहिष्पवमानं प्रसर्पतां प्रस्तोत्रादीनामध्वर्व्वाद्यन्वारंभणस्य विच्छेदे प्रायश्चित्तविशेषाः श्रूयन्ते। यदि बहिष्पवमानं प्रसर्पतां प्रस्तोता अपच्छिन्द्यात् ब्रह्मणे वरं दद्यात्। यद्युद्गाता अपच्छिन्द्यात् अदक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात्। यदि प्रतिहर्ता अपच्छिन्द्यात् सर्ववेदसं दद्यात् इति। अथमर्थः – प्रातःसवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालाया बहिः प्रसर्पन्ति। तदानीमेकस्य पृष्ठतोऽन्य इत्येवं पिपीलिकापङ्क्त्याकारेण गन्तव्यम्। तत्र पुरतो गंतुः कच्छं गृहीत्वैव पृष्ठतोऽन्यो गच्छेत्। एवं सति यदि प्रमादात् उद्गाता गृहीतं कच्छं मुञ्चेत् तदा दक्षिणामदत्त्वा प्रक्रान्तो यज्ञः समापनीयः। तं समाप्य पुनरपि स यज्ञः प्रयोक्तव्यः। तस्मिन् प्रयोगे पूर्वं यत् दित्सितं द्रव्यं तद् दद्यात्। यदि प्रतिहर्ता मुञ्चेत् तदा तस्मिन्नेव प्रयोगे सर्वस्वं दद्यादिति। तत्र संशयः – किमुद्गातृप्रतिहर्त्रोः क्रमेण अपच्छेदे पूर्वनिमित्तमदक्षिणं प्रायश्चित्तं कर्तव्यम् उत उत्तरनिमित्तं सर्वस्वदक्षिणप्रायश्चितम् इति। पूर्वपक्षस्तु – पूर्वनिमित्तमेव कर्तव्यम्। तस्य उपक्रमाधिकरणन्यायेन श्रुतिलिङ्गाधिकरणन्यायेन च अनुपसञ्जातविरोधित्वेन शीघ्रोपस्थितत्वेन च प्रबलत्वात्। उत्तरस्य दुर्बलत्वादिति। सिद्धान्तस्तु – उत्तरनिमित्तमेव प्रायश्चित्तं कर्तव्यम्। तस्य पूर्वोपमर्देन उत्पन्नत्वेन प्रबलत्वात्। न च उपक्रमाधिकरणश्रुतिलिङ्गाधिकरणविरोध इति वाच्यम्। वैषम्यात्। उपक्रमाधिकरणे उपसंहारस्य प्रथमप्रवृत्तोपक्रमैकवाक्यतया आपाततस्तदाकांक्षितार्थसमर्पणनियमेन तद्विरुद्धार्थविषयतया लब्धात्मतैव नास्तीति युक्तं पूर्वप्राबल्यम्। तथा श्रुतिलिङ्गादौ उत्तरस्य पूर्वसापेक्षत्वात् पूर्वेण विरोधे सति उत्तरस्य उत्पत्तिरेव नास्तीति तत्रापि पूर्वप्राबल्यं युक्तम्। किञ्च श्रुतिलिङ्गादौ शीघ्रमन्थरगामित्वाभ्यां प्राबल्यदौर्बल्येऽपि भवत इति भवत्युत्पत्तिप्रतिबन्धः। इह तु ज्ञानद्वयमन्योन्यनिरपेक्षवाक्यद्वयादुत्पद्यते। वाक्यद्वयस्य च निरपेक्षत्वात्, प्रत्यक्षत्वाच्चेति नास्ति उत्पत्तिप्रतिबन्धः। उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते। ननु निरपेक्षत्वस्य समानत्वात् पूर्वमेव उत्तरस्य बाधकमस्तु इति चेन्न।

युक्तांतम्। तच्च विरुद्धविशेषणं। क्रमिकानुष्ठानेष्वाग्नेयादिषु तत्प्रसंगवारणाय विरोध इत्युक्तम्। एको देव इत्यादिसगुणनिर्गुणवाक्ये तत्प्रसंगवारणाय तृतीयविशेषणम्। न च नियमोऽधिकः। तदनुक्तावुपक्रांतप्रयोगे प्रतिहर्त्रपच्छेदयुक्ते प्राप्तस्य सर्वस्वदाक्षिण्यविज्ञानस्य प्रतिहर्त्रपच्छेदोत्तरभाव्युद्गात्रपच्छेदेनैव बाधिततयाऽप्रमाणत्वेनापच्छेदन्यायोऽसंभवदुक्तिक एव स्यात्। नियमादित्युक्तौ तु नासंभवः। सर्वस्वदाक्षिण्यस्य प्रयोगांतरेऽनुग्रहेण नियताप्रामाण्यस्याभावात्। यदा तु बदरफलश्यामरक्तरूपविज्ञानवत्सर्वस्वदाक्षिण्यादाक्षिण्य विज्ञानस्य क्रतुविशेष्यकस्य कालभेदावगाहिनो नायथार्थत्वमिति पक्षस्तदो नियमादिति न वक्तव्यमेवेति सर्वमनवद्यम्।

न चैवं प्रकृत इति। ननूद्गात्रपच्छेदाभावे युगपदुभयापच्छेदे प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे च ज्योतिष्टोमद्वितीयप्रयोगे प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणयागप्रतिपादकवाक्यस्य सावकाशत्ववद्व्यावहारिकप्रामाण्ये प्रत्यक्षस्यापि सावकाशत्वात् तत्रैकप्रयोगे विरोधवदत्रापि तात्विकांशे विरोध इति नापच्छेद न्यायवैषम्यमिति तद्वैषम्याभिधानमबोधमात्रविजृंभितम्। अत एव सगुणसप्रपंचश्रुत्योर्निर्गुणनिष्प्रपंच श्रुतिभ्यामपच्छेदन्यायेन बाध इति सुष्ठूक्तमिति चेन्मैवम्। व्यावहारिकतात्विकरूपप्रमाणविभागस्यासंमतत्वेन तात्विकस्यैव प्रमाणतया तात्विकत्वबाधे प्रामाण्यस्यैव बाधापत्तेः। प्रमाणतात्विकत्वयोर्विरोधश्च। अत एव सगुणसप्रपंचवाक्येऽपि नापच्छेदन्याय इति शिवम्। तत्परत्वादिति। तत्तात्पर्यकत्वादित्यर्थः। तत्परत्वमसिद्धत्वादिति। आद्ये हेतावसिद्धिः। द्वितीये व्यभिचारः। तृतीयेऽप्रयोजकत्वमित्यर्थः। असिद्धिमेवाऽह – असिद्धं हीति। द्वितीयहेतोर्व्यभिचारस्थलमाह – परत्वं त्विति। व्यभिचारस्थलांतरमाह – दृश्यते चेति।

स्वत एव कितः क्त्वायाः किद्वाचोऽनर्थकत्वतः।
सेटः क्त्वायाः कित्त्रिपेधनिपेधार्थत्वमास्थितम्॥

अप्रयोजकत्वमाह। निर्दोपत्वमिति। अर्थांतरे प्रत्यक्षाविरुद्धे। उपलक्षणमेतत्। यजमानप्रस्तरभेदग्राहकप्रत्यक्षाबाधके यजमानः प्रस्तर इत्यादिवाक्ये व्यभिचारोऽपि बोध्यः। प्रस्तरवाक्यस्य प्रतीतार्थे न निर्दोषत्वमिति तु त्वदीयागमेऽपि तुल्यम्। अत्र वदंति – "नासिद्धिर्व्यभिचाराप्रयोजकत्वैस्तत्परत्वपरत्वनिर्दोषत्वानि न हेतवः। तथाहि प्रत्यक्षादेर्व्यावहारिकप्रामाण्यं, श्रुतेस्तु तात्विकमिति विरोधाभावेन तत्परत्वसिद्धेः। परशब्देन च मानांतराबाधित परत्वं विवक्षितम्। तेन प्रमानंतरभ्रमे न व्यभिचारः। तस्य तदुत्तरभाविमानबाध्यत्वात्। नक्त्वासेडित्यस्य तु पाठतः परत्वेप्यर्थतः पूर्वत्वमेव। अतो

उत सर्ववेदसमेवेति संशयः। तत्र पूर्वःपक्षः। यत्पूर्वस्मिन्दास्यन् स्यादिति यदेव क्रतौ स्वभावतो देयं तदेव पुनर्देयं प्रतीयत इत्येकः। प्रथमं द्वादशशतं दास्यन्नासीत्। प्रतिहर्तरि त्वपच्छिन्ने सर्ववेदसम्। अत उभयमपि पुनः प्रयोगे यत्पूर्वस्मिन्दास्यन् स्यादिति शक्यं वक्तुम्। तस्माद्विकल्प इति द्वितीयः। सिद्धांतस्तु द्वादशशतस्य सर्ववेदसेन बाधितत्वात् न तद्दास्यन् भवति। यच्च पूर्वं दास्यन् भवति तत्पुनः क्रतौ देयम्। तस्मात्सर्ववेदसमेव देयम्। ननु तदप्यदाक्षिण्येन बाधितम्। मैवम्। बाधो हि परिमाणांतरम्। यथा प्रतिहर्त्रपच्छेदे सर्ववेदसं दद्यादिति द्वादशशतविरुद्धपरिमाणांतरविधानाद्बाधः। न त्वेवमिह परिमाणांतरमस्ति। यतोऽर्थात्सर्ववेदसं निवर्तेत। न चाहत्य सर्ववेदसं प्रतिषिध्यते। नन्वदक्षिणः संस्थाप्य इति दक्षिणाप्रतिषेधः श्रुत एव। मैवम्। नायं प्रतिषेधो यथा न गृह्णाति षोडशिनमिति। किं तर्ह्यदक्षिणस्य निवृत्तिः कथ्यमानादक्षिणा दाने सति न संभवतीत्यर्थाद्दक्षिणाया निवृत्तिः कल्प्यते। न तु शब्दात्। न दद्याद्दक्षिणामित्येवं शब्दाभावात्। नन्वर्थादपि सर्वस्वदक्षिणा निवर्तत एवेति चेन्नार्थात्सर्ववेदसनिवृत्तिः। साभ्यासे क्रतावुभयसमावेशे संभवात्। ननु यस्मिन्नेव पूर्वप्रयोगे प्रतिहर्त्रपच्छेदः तस्मिन्नेव सर्वस्वं दातव्यम्। न प्रयोगांतरे तस्यानुग्रहस्संभवति। तस्मिंश्च प्रयोगेऽदक्षिणसंस्थापनविधानात् बाधितमेव सर्वस्वदानं तुल्यं द्वादशशतेनेति चेत्सत्यम्। न प्रयोगांतरे तस्यानुग्रहस्संभवति। तस्मिंश्च प्रयोगेऽदक्षिणसंस्थापनविधानात् बाधितमेव सर्वस्वदानं तुल्यं द्वादशशतेनेति चेत्सत्यम्। पूर्वस्मिन्नेव प्रयोगे सर्वस्वं दातव्यम्। प्रयोगांतरे च न तस्यानुग्रहः संभवति। वचनात्तु प्रयोगांतरे निक्षिप्यते। इदं हि वचनं यत्पूर्वस्मिन्प्रयोगे दातव्यं प्राप्तं तत्तत आच्छिद्य प्रयोगांतरे निक्षिपति न तु स्वरूपमेव बाधते। तस्मात्सर्वस्वदानेनैव पुनः क्रतावधिकार इति द्विविधोऽपि पूर्वपक्षो निरस्तो भवति। यद्युद्गाता जघन्यः स्यात्। जघनं पश्चाद्देशमर्हतीति जघन्यः अपच्छिद्येतेति यावत्। तदाऽऽरब्धं प्रयोगमदक्षिणं समाप्य पुनर्यज्ञे पुनः प्रयोगे सर्ववेदसं दद्यात्। यथेतरस्मिन्प्रतिहर्तृमात्रापच्छेदे यथा सर्वस्वं देयं तथा प्रतिहर्त्रपच्छेदोत्तरभाव्युद्गात्रपच्छेदनिमित्तकद्वितीयप्रयोगेऽपि सर्वस्वं देयमिति सूत्रार्थः। तस्य प्रयोगांतरे निक्षेप इति। तस्य सर्वस्वदानस्य पूर्वस्मिन्प्रयोगे कर्तव्यत्वेन प्राप्तस्य वचनेन प्रयोगांतरे निक्षेप एव क्रियते न तु स्वरूपमेव बाध्यत इत्यर्थः। पौर्वापर्यमिति। नियमादित्यप्रामाण्येन संबध्यते। नास्ति नापादयितुं शक्यत इत्यर्थः। तदयमर्थः। क्रमिकैकविषयकप्रवृत्तियुक्तविरुद्ध पूर्वकालीनानापादनीयनियताप्रामाण्यकमानजन्यविज्ञानं तदबधिकोत्तरकालप्रवृत्तमानजन्यविज्ञानेन बाध्यत इति। यथाश्रुते स्वमते प्रत्यक्षागमयोरपच्छेदन्यायापत्तेः। क्रमिकपाठावगतविकल्पस्थले अपच्छेदन्यायो मा भूदिति

शक्त्यनुबंधादाख्यातो विदधदेव स्वार्थं विरुद्धं धर्मांतरमबाधित्वा स्वार्थं बोधयितुमशक्नुवन् पूर्वविज्ञानं बाधते। आगंतुकनिमित्तसंबंधेन क्रतोर्विकारे विधीयमानेऽयमर्थोऽवगम्यते। प्रागन्यादृशोऽपि क्रतुः फलसाधनः सन्नस्मिन्निमित्ते संजाते सत्यन्यादृशः फलं साधयतीति। ततश्च यथा द्वादशशतदक्षिणः, फलसाधकः स चोद्वात्रपच्छेदे संजाते सत्यदक्षिणः पुनरावृत्तिधर्मकश्च फलसाधनं भवति। प्रतिहर्त्रपच्छेदे च सर्ववेदसदक्षिणः तथा द्वयोर्निमित्तयोरन्यतरेण पूर्वोत्पन्नस्यादाक्षिण्यस्य सर्ववेदसदाक्षिण्यस्य वा सतः पश्चात्तनेन निमित्तांतरेण सामर्थ्यांतरमेव क्रतोर्जातमिति पूर्वस्य परेण बाधः। स चायं शास्त्रार्थाबाधारणवेलायामेव प्रायोगिकेण पौर्यापर्येण शास्त्रयोर्मिथो बाधोऽवगम्यत इति न प्रयोगोत्तरकालं शास्त्रार्थाबाधारणापत्तिः। न च शास्त्रस्याप्रामाण्यप्रसंगः। यत्र पाश्चात्यं निमित्तांतरं बाधकं नास्ति तद्विषयत्वेन शास्त्रव्याख्यानात्। प्रकृतिवच्छब्दस्यैव लुप्तार्थप्रत्याम्नातप्रतिपिद्धातिरिक्तविषयतया श्रुतिलिंगादिषु तु पूर्वपूर्वविरोधे परस्यानुत्पत्तिरेवेति पूर्वस्य प्राबल्यम्। इह तु पूर्वविज्ञानसमये परस्यानुत्पन्नत्वेनाविरुद्धत्वात् अबाध्यत्वम्। न ह्यसतो बाधः संभवति। उत्तरस्य पूर्वबाधनमंतरेणावस्थितिर्न संभवतीति पूर्वं प्रति बाधकत्वम्। तदुक्तं वाचस्पत्ये–

पूर्वं परमजातत्वादबाधित्वैव जायते।
परस्य त्वन्यथोत्पादात्तदबाधे न संभवः॥

इति। तस्मात्पूर्वस्य परेण बाध इति। तत्र विप्रतिषेधाद्विकल्पः स्यादिति। यौगपद्ये प्रायश्चित्तद्वयमापतति। तत्किं समुच्चीयते उत विकल्प्यत इति विचारः। तत्र पूर्वःपक्षः – उद्गात्रपच्छेदे पुनर्यज्ञादिविधानाददाक्षिण्यसर्ववेदसदानयोः प्रयोगद्वयेनानुग्रहसंभवात्सत्यां गतावष्टदोषनिदानविकल्पासंभवात्समुच्चय इति। सिद्धांतस्तु यस्मिन्नेवं प्रयोगे प्रतिहर्त्रपच्छेदस्तस्मिन्नेव तन्निमित्तं प्रायश्चित्तं सर्वस्वदानं कर्तव्यमित्यवगमान्न प्रयोगांतरेण तदनुग्रहसंभवः। किं च यत्पूर्वस्मिन् दातव्यं तदेव पुनः क्रतौ दास्यन् स्यात्। यदि पूर्वस्मिन्न सर्वस्वं ततस्तस्य पुनः क्रतावपि न दानसंभवः। अथ दातव्यं ततस्तुल्यत्वान्नादाक्षिण्येन बाधसंभवः। तस्माद्युगपदुभयनिपातात्परस्परविरुद्धं नैमित्तिकं विकल्पितुमर्हतीति।

यद्युद्गाता जघन्यः स्यात्सर्ववेदसं दद्यादित्यधिकरण इति। एतच्च सूत्रमर्थतः पठितम्। न तु यथापाठं। सूत्रपाठस्तु "यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्यात् यथेतरस्मिन्" इत्येवंरूपः। पौर्वापर्ये परेण पूर्वबाध इति स्थितम्। तत्र प्रतिहर्त्रपच्छेदानंतरमुद्गात्रपच्छेदे सति कर्तव्ये पुनः प्रयोगे सति किं द्वादशशतं देयमुत सर्ववेदसद्वादशशतयोर्विकल्प

इति चेन्न। प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं, श्रुतेस्तु तात्त्विकमिति विरोधाभावेन तत्परत्वसिद्धेः। परशब्देन च मानान्तराबाधितपरत्वं विवक्षितम्। तेन प्रमानन्तरभ्रमे न व्यभिचारः। तस्य तदुत्तरभाविमानबाध्यत्वात्। 'न क्त्वा सेट्' इत्यस्य तु पाठतः परत्वेऽपि स्वभावसिद्धकित्त्वस्यानेनापाकरणं विना पुनस्तत्प्रतिप्रसवार्थं 'मृडमृद' इत्यादेरप्रवृत्तेस्तदपेक्षया अर्थतः पूर्वत्वमेव। अपवादापवादे उत्सर्गस्यैव स्थिरत्वात्। निर्दोषत्वमपि नान्यथासिद्धम्। तात्पर्यविषय एव प्रामाण्यस्याभ्युपेयत्वाद् इत्यबोधमात्रविजृम्भितमपच्छेद न्यायवैषम्याभिधानमिति। ॥ इत्यपच्छेदन्यायवैषम्यभङ्गः॥

न्यायामृततरङ्गिणी

अपच्छेदन्यायेनेति। षष्ठस्य पंचमे स्थितम्। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्। बहिष्पवमानस्तुत्यर्थं प्रस्तोतृप्रतिहर्तारौ प्रतिहर्त्रुद्गातारौ च समन्वारब्धाः प्रसर्पंति। अध्वर्युं विनिष्क्रामंतं प्रस्तोता संतनुयात्। तं प्रतिहर्ता तमुद्गाता तं ब्रह्मा तं यजमान इति वचनात्। तत्र विभागे प्रायश्चित्तं श्रुतं – यदि प्रस्तोताऽपच्छिद्येत ब्रह्मणे वरं दद्यात्। यदि प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्यात्। यद्युद्गाताऽपच्छिद्येतादक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्याद्यत्पूर्वस्मिन् दास्यन् स्यादिति। पूर्वाधिकरणे स्थितमपच्छेदस्य यौगपद्ये विकल्प इति। इदानीं पौर्वापर्ये किं विकल्प उत बाध इति चिंत्यते। तत्र पूर्वःपक्षः। न तावदत्र सामान्यविशेषनित्यनैमित्तिकनित्यकाम्यक्रत्वर्थपुरुषार्थाल्पभूयस्त्वसावकाश निरवकाशत्वां गप्रधानतद्धर्मत्वलक्षणः कश्चिदपि शास्त्रद्वयस्य मिथो बाधे हेतुरस्ति। नापि प्रमाणतदाभासवत्पौर्वापर्येण बाधः। शास्त्रावधारणवेलायां पौर्वापर्याभावात्। प्रयोगस्थं तु पौर्वापर्यं न शास्त्रार्थावधारणायालम्। न हि प्रयोगाधीनं शास्त्रार्थावधारणं। तदवधारणोत्तरकालत्वात्तत्प्रयोगस्य। किंच यः पूर्वस्य परेण बाधमिच्छति तेन तावदुत्पन्नस्योत्पत्तिविरोधलक्षणबाधासंभवान्मिथ्यात्वलक्षणबादो वक्तव्यः। न च नाम शास्त्रस्य मिथ्यात्वसंभवः। सामान्यशास्त्रादेर्हि विशेषशास्त्रादिवशात्तद्व्यतिरिक्तविषयपरिकल्पनान्न मिथ्यात्वप्रसक्तिः। इह त्वस्मिन्नेव प्रयोगे शास्त्रेणोत्पन्ननैमित्तिकं विज्ञानमित्यविवादम्। न तद्विषयांतरे व्याख्यातुं शक्यम्। तत्र तद्बाधे शास्त्रस्य प्रामाण्यबाधप्रसंगः। किं च मिथ्यात्वं विद्यमानमेव बाधकेन बोध्यते। न तु तद्बशेन मिथ्यात्वं जन्यते। न चात्र पूर्वविज्ञानस्य मिथ्यात्वमस्ति। अदुष्टकरणजन्यत्वात्। न चामिथ्याभूतस्य बाधसंभवः। तस्मात्पौर्वापर्योत्पत्तावपि येन केनचित्कल्पेनैव क्रतावधिक्रियेतैवैति। सिद्धांतस्तु। यथा

सर्वस्वदक्षिणयागस्य पूर्वसिद्धनिमित्तस्य बाध इति स्थितं, तथेहापि उदीच्यागमेन पूर्वस्य प्रत्यक्षस्य बाधः। ननु प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणयागस्य प्रतिहर्तृमात्रापच्छेदे, युगपदपच्छेदे, क्रमेणापच्छेदेऽपि प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे चावकाश इति युक्तः उद्गात्रपच्छेदनिमित्तकादक्षिणयागेन बाधः। अन्यथा 'यदि प्रतिहर्ता अपच्छिद्येत सर्ववेदसं दद्यात्' इति शास्त्रमप्रामाणं स्यात्। अत एव 'विप्रतिषेधाद्विकल्पः स्यात्' इत्यधिकरणे द्वयोर्युगपदपच्छेदे विकल्प उक्तः। किं च 'यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्याद्यथेतरस्मिन्' इत्यधिकरणे उद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात्परत्वे उद्गात्रपच्छेदनिमित्तं पूर्वं प्रयोगं दक्षिणाहीनं सम्पाद्य कर्तव्यज्योतिष्टोमस्य द्वितीयप्रयोगे 'तद्द्याद्यत्पूर्वस्मिन् दास्यन् स्यात्' इति श्रुत्युक्ता या दक्षिणा सा पूर्वभाविप्रतिहर्त्रपच्छेद निमित्तकपूर्वप्रयोगस्थसर्वस्वदित्साया अबाधेन सर्वस्वरूपैव, न तु या ज्योतिष्टोमे नित्या द्वादशशतरूपा। तस्मान्न प्रतिहर्त्रपच्छेदस्य सर्वथा बाधः। किं तु प्रयोगान्तरे निक्षेप इत्युक्तम्। उक्तं हि टुप्टीकायाम् – 'तस्य प्रयोगान्तरे निक्षेपः' इति। अपि च क्रमिकनिमित्तद्वयेन क्रमेणादक्षिणसर्वस्वदक्षिणयोः प्रयोगयोः संभवेन विरोध एव नास्ति, यथा बदरफले क्रमिकनिमित्तवतोः श्यामरक्तरूपयोः। उक्तं ह्यपच्छेदाधिकरणे – 'नैमित्तकशास्त्रस्य ह्ययमर्थः– निमित्तोपजननात् प्रागन्यथाकर्तव्योऽपि क्रतुर्निमित्ते सत्येवं कर्तव्यः' इति। तस्मादपच्छेदन्यायः सावकाशविषयः। अद्वैतागमेन प्रत्यक्षबाधे तु न प्रत्यक्षप्रामाण्यस्यावकाशोऽस्ति इति चेन्न। उद्गात्रपच्छेदाभावे युगपदुभयापच्छेदे प्रतिहर्त्रपच्छेदस्य उद्गात्रपच्छेदे पश्चात्त्वे च ज्योतिष्टोमद्वितीयप्रयोगे प्रतिहर्त्रपच्छेदनिमित्तक सर्वस्वदक्षिणयागप्रतिपादकशास्त्रस्य सावकाशत्ववद्व्यावहारिकप्रामाण्ये प्रत्यक्षस्यापि सावकाशत्वात्। तत्रैकप्रयोगे विरोधवदत्रापि तात्त्विकत्वांशे विरोधात्। अत एव सगुणसप्रपञ्चश्रुत्योर्निर्गुणनिष्प्रपञ्चश्रुतिभ्यामपच्छेदन्यायेन बाध इति सुष्ठूक्तम्। तदुक्तमानन्दबोधाचार्यैः – 'तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम्। पूर्वस्य बाधकं नायं सर्प इत्यादिवाक्यवत्॥' इति।

ननु मानान्तरविरोधे श्रुतेस्तत्परत्वमसिद्धम्। परत्वं तु प्रमानन्तरभ्रमे व्यभिचारि। दृश्यते च 'न क्त्वा सेट्' इति परं प्रति 'मृडमृदगुधकुशक्लिशवदवसः क्त्वा' इति पूर्वमपि बाधकम्। निर्दोषत्वं त्वर्थान्तरप्रामाण्येनान्यथासिद्धम्। तदुक्तम् – 'तत्परत्वमसिद्धत्वात्परत्वं व्यभिचारतः। निर्दोषताऽन्यथासिद्धेः प्राबल्यं नैव साधयेत्॥

प्रयोगान्तरे निक्षेपः क्रियत'' इति। अपि चैकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां क्रतौ तत्तन्नैमित्तिककर्तव्यतयोर्बदरफले श्यामरक्तरूपयोरिव क्रमेणोत्पत्ते रूपज्ञानद्वयवच्छास्त्रद्वयमपि प्रमाणमेव। उक्तं ह्यपच्छेदाधिकरणे – ''नैमित्तिकशास्त्रस्य ह्ययमर्थः निमित्तोपजननात्प्रागन्यथाकर्तव्योऽपि क्रतुनिमित्ते सत्येवं कर्तव्यं'' इति। ततश्चार्थस्यैव बदरफलस्येव श्यामरक्तरूपेण प्राक्तथाभूतस्य पश्चादन्यथाभावात् पूर्वशास्त्रस्य प्रामाण्यमेव न पूर्वशास्त्रस्याप्रामाण्यम्। न हि बदरफले श्यामत्वविज्ञानं अनन्तरस्य रक्तत्वस्यावगत्या मिथ्या भवतीति। तस्मात्–

पौवापर्यं विरोधश्च पूर्वाप्रामाण्यमेव च।
नियमान्नास्ति यत्रासावपच्छेदनयो भवेत्॥

न चैवं प्रकृते प्रत्यक्षप्रामाण्यस्यावकाशोऽस्तीति नापच्छेदन्यायः। एतेन सगुणसप्रपञ्चश्रुत्योर्निर्गुणनिष्प्रपञ्चश्रुतिभ्यामपच्छेदन्यायेन बाध इति निरस्तम्। एतेनैव

तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकम्।
पूर्वस्य बाधकं नायं सर्प इत्याप्तवाक्यवद्''

इत्यानन्दबोधोक्तं निरस्तम्, यतः–

तत्परत्वमसिद्धत्वात्परत्वं व्यभिचारतः।
निर्दोषताऽन्यथासिद्धेः प्राबल्यं नैव साधयेत्॥

असिद्धं हि मानान्तरविरोधे श्रुतेः तत्परत्वम्। परत्वं तु प्रमानन्तरभ्रमे व्यभिचारि। दृश्यते च ''न क्त्वा सेडि'' ति परं प्रति ''मृडमृदे'' त्यादिपूर्वं बाधकम्। निर्दोषत्वं तु अर्थान्तरे प्रामाण्येनान्यथासिद्धमिति। अपच्छेदन्यायवैषम्यम्।

अद्वैतसिद्धिः

किं चापच्छेदन्यायेनाप्यागमस्य प्राबल्यम्। यथा हि 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इत्यधिकरणे उद्गात्रपच्छेदनिमित्तकादक्षिणयागेन परेण प्रतिहर्त्रपच्छेदनिमित्तक

तद्विरुद्धकरणत्वानुबंधित्विकवत्त्वप्राप्तेः। अतो वैयधिकरण्येनान्वययोगात्सामानाधिकरण्येनान्वयः। तत्र च प्रत्यक्षविरोधः समायाति। यजेः सोमलतारूपत्वाभावात्। अतः प्रत्यक्षाविरोधाय मत्वर्थलक्षणया सोमद्रव्यवता यागेनेष्टं भावयेदित्यर्थांगीकारेण लक्षणयाऽमुख्यार्थांगीकारादित्यर्थः॥ श्रुतौ च प्रत्यक्षाविरोधायेति॥ इच्छाया विधेयत्वस्यानुभवरूपप्रत्यक्षविरुद्धत्वात् तदविरोधायेत्यर्थः॥ श्रुतौचप्रत्यक्षाविरोधायेति॥ सर्वमिति॥ घटादेर्ब्रह्माभेदस्य बाधितत्वादित्यर्थः। अनन्यशेषत्वादमुख्यार्थं ब्रह्माद्वैतवाक्यं नेति निषेधो न युक्त इत्याह॥ सर्वस्यापीति॥ मुख्यार्थत्वे वाच्यत्वापत्त्या लक्षणाया अंगीकारेणामुख्यार्थतैवांगीकृतेत्यर्थः। अद्वैतवाक्यस्य विधिवाक्यरूपत्वान्न तत्र लक्षणा युक्तेति चेन्न। लक्षणाबीजसद्भावे विधिवाक्येपि लक्षणा आवश्यकीत्याह॥ अन्वयेति॥ गंगायां घोष इत्यत्रान्वयानुपपत्तिः। भोजनसमये यष्टीः प्रवेशयेत्यादौ तात्पर्यानुपपत्तिः। तर्हि "न विधौ परः शब्दार्थः" इति शाबरवचनविरोधइत्यताह॥ शाबरेति॥ कयोश्चिदनुवादकविधायकयोर्वाक्ययोर्मध्ये अनुवादकस्य मुख्यार्थत्वाय विधायकवाक्ये लक्षणा न न्याय्या। किंनाम विधायकानुसारेणानुवाद एवामुख्यार्थ इत्येवंपरं। न तु सर्वत्रापि विधिवाक्ये लक्षणैव नास्तीत्येवंपरमित्यर्थः॥ ॥प्रत्यक्षस्य शब्दबाध्यत्वे बाधकविवरणं॥

२४. अपच्छेदन्यायवैषम्यम्

यत्तूक्तं वाचस्पतिना पूर्वस्य प्रत्यक्षस्य परेणागमेनापच्छेदन्यायेन बाध इति तन्न, न ह्यस्माभिः पूर्वत्वमात्रेण प्रत्यक्षबाधकतोक्ता, किंतूपजीव्यत्वेन। न चापच्छेदे पूर्वमुपजीव्यम्। किं च प्रतिहर्त्रुद्गात्रोः क्रमेणापच्छेदे प्रतिहर्त्र पच्छेदनिमित्तसर्ववेदसदानस्य परेणोद्गात्रपच्छेदनिमित्तादाक्षिण्येन बाधेऽपि नात्यन्तबाधः प्रतिहर्तृ मात्रापच्छेदे द्वयोरपि युगपदपच्छेदे क्रमेणापच्छेदेऽपि प्रतिहर्त्रपच्छेदस्य पश्चात्त्वे च "यदि प्रतिहर्तापच्छिद्यात्तर्हि सर्ववेदसं दद्यादि" ति शास्त्रप्रामाण्यसम्भवात्। अत एव षष्ठे "तत्र विप्रतिषेधाद्विकल्पः स्यादि' त्यधिकरणे द्वयोर्युगपदपच्छेदे विकल्प उक्तः। किं च "यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्यादित्यधिकरणे उद्गात्रपच्छेदस्य प्रतिहर्त्रपच्छेदात्परत्वे उद्गात्रपच्छेदनिमित्तके प्रथमप्रयोगं दक्षिणाहीनं समाप्य कर्तव्ये ज्योतिष्टोमस्य द्वितीयप्रयोगे "तद्दद्याद्यत्पूर्वस्मिन् दास्यन्स्यादि" ति या श्रुत्युक्ता दक्षिणा सा पूर्वभाविप्रतिहर्त्रपच्छेदनिमित्तकपूर्वप्रयोगस्थसर्वस्वदित्साया अबाधेन सर्वस्वरूपैव न तु या ज्योतिष्टोमे नित्या द्वादशशतरूपा सा। तस्मान्न प्रतिहर्त्रपच्छेदस्य सर्वथा बाधः किं तु प्रयोगान्तरे निक्षेप इत्युक्तम्। उक्तं हि टुप्टीकायाम्– "तस्य

तत्कार्यकारित्वादावित्यर्थः। वाक्यस्यैकत्र तात्पर्यतदभावयोर्मानांतराविरोधतदभावयोरेव प्रयोजकत्वं न तात्पर्यलिंगसत्त्वासत्त्वयोःव्यभिचारादित्याह॥ सत्यपीति॥ मानांतरविरोधे प्रत्यक्षरूपमानांतरविरोधे॥ सोमेनेति॥ सोमेन यागेनेष्टं भावयेदिति तदर्थः। एवंच सोमलताया यागाभेदःप्रत्यक्षेण विरुद्धइत्यर्थः। अनन्यपरत्वस्य प्रतीतार्थव्यतिरिक्तार्थांतरे तात्पर्याभावस्यायोगादित्यर्थः। सत्यपि तात्पर्यलिंगे मानांतरविरोधे स्वार्थे तात्पर्यं नास्तीत्येतदृष्टांतांतरेणोपपादयति॥ नहीति॥ दर्शति॥ दर्शनीया सुरूपा। शतकृत्वःशतवारं। शतकृत्व इत्यभ्यासरूपतात्पर्यलिंगसद्भावोक्तिः॥ प्रयुक्तमपीति॥ आप्तवाक्यमपीत्यर्थः। प्रत्यक्षविरोधस्तु स्पष्टः॥ वाच्यार्थेति॥ विशिष्टैक्यरूपेत्यर्थः॥ त्वन्मतइतिशेषः। ननु प्रस्तरादिवाक्यवदिति पूर्वोक्तो दृष्टांतो न युक्तः। तत्र तात्पर्यलिंगस्यैवाभावादित्यतआह॥ अस्तिचेति॥ उपक्रमादीनां षण्णामपि संभूयैव तात्पर्यलिंगत्वान्नापूर्वतामात्रं तात्पर्यलिंगमित्यत उक्तं उपक्रमेत्यादि। किंचोपक्रमादीनां प्रत्येकमेव तात्पर्यलिंगत्वं वक्तव्यं न तद्बाहुल्यस्यातिप्रसंगादित्याह॥ त्वत्पक्षेचेति॥ बहुप्रमाणसंवादस्यास्मन्मतेदाढर्च्यहेतुत्वात्त्वत्पक्षेत्युक्तं॥ एकलिंगेति॥ उपक्रमरूपेत्यर्थः। लिंगांतरं तत्रैव प्रवर्तमानमुपसंहारादिकं। तत्र दृष्टांतःप्रत्यक्षसिद्धइति। प्रत्यक्षसिद्धे भेदे प्रवर्तमानायाः भेदश्रुतेर्यथानुवादकत्वमुच्यते तथेत्यर्थः। तथाचैकलिंगसिद्धे तात्पर्ये लिंगांतरस्यानुवादकत्वाभावे भेदश्रुतेरप्यनुवादकत्वं न स्यादित्याशयः॥ अन्यशेषत्वादिति॥ यज्ञोपयुक्तार्थप्रतिपादकत्वादित्यर्थः॥ नतथेति॥ स्वप्राधान्येनस्वातंत्र्येणाद्वैतप्रतिपादकत्वादनन्यशेषमित्यर्थः। विधिवाक्यरूपमितियावत्॥ नविधाविति॥ विधौ विधायके प्रधानवाक्ये। परः प्रतियमानवाक्यार्थातिरिक्तोऽन्योवाक्यार्थोनास्तीत्यर्थः। अमुख्यार्थत्वेऽन्यशेषत्वं न प्रयोजकं किंनाम प्रत्यक्षविरोधएव। अन्यशेषत्वेपि प्रत्यक्षविरोधाभावे लोके वेदेच मुख्यार्थत्वस्यैव दर्शनादित्याह॥ अन्यशेषेपीति॥ कुतःक्रय्या यतो बहुक्षीरित्यर्थः। इयं गौःक्रय्येत्यस्य शेषभूते बहुक्षीरा स्त्र्यपत्याऽनवद्यप्रजेत्यादिवाक्ये प्रत्यक्षविरोधाभावेन प्रतीयमानबहुक्षीरादिसंसर्गपरत्वेन मुख्यार्थत्वात्। कामधेनुरिति व्यतिरेकदृष्टांतः। यथा इयं गौःक्रय्या यतःकामधेनुरित्यत्रकामधेन्वभेदस्य प्रत्यक्षसिद्धायां गवि बाधितत्वेन यथाऽमुख्यार्थत्वं कल्प्यते तथानेत्यर्थः॥ वेदेपीति॥ ''तस्य हिरण्यं दक्षिणे''तिहिरण्यदक्षिणाविधिशेषे ''सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु अश्रीयत तद्रजतमभवत्तस्माद्रजतमदक्षिण्यमश्रुज''मित्यादिष्वपि प्रतीयमानसंसर्गे दक्षिणाभावरूपवाक्यार्थे तात्पर्यं विना रजतनिंदाया असिद्धेःप्रत्यक्षविरोधाभावात् प्रतीयमानसंसर्गपरत्वरूपमुख्यवृत्तिरेवाश्रीयतइत्यर्थः॥ प्रस्तरादीति॥ व्यतिरेकदृष्टांतः। यथा प्रत्यक्षविरोधात्प्रस्तरादिवाक्येऽमुख्यवृत्तिराश्रीयते तथानेत्यर्थः। एवमेव मुख्यार्थत्वेऽनन्यशेषत्वं न प्रयोजकं किंनाम प्रत्यक्षाविरोधएव। अनन्यशेषत्वेपि प्रत्यक्षविरोधेऽमुख्यार्थत्वस्य स्वीकारादित्याह॥ अनन्यशेषेपीति॥ सोमेन यजेतेति॥ प्रमाणलक्षणे नामधेयपादे चिंतितं ''सोमेन यजेते''तिश्रूयते तत्र लतारूपेण सोमेन यागं भावयेत् यागेन चेष्टं भावयेदिति वैयधिकरण्येनान्वयो वा सोमेन यागेनेष्टंभावयेदिति सामानाधिकरण्येनान्वयोवेति संदेहे सोमलतायागयोरैक्याभावेन सामानाधिकरण्यायोगाद्वैयधिकरण्येनान्वय इति पूर्वपक्षः। सिद्धांतस्तुवैयधिकरण्येनान्वयेऽपि सोमेन यागंभावयेद्यागेनेष्टंभावयेदितिवाक्यभेदापत्तेः। तथाविरुद्धत्रिकद्वयमापद्यते। तथाहि। सोमेन यागं भावयेदित्यत्रयागं भावयेदिति यत्तत्सोमेनेति सोमरूपगुणविधाने यागे कर्मत्वानुबंधि प्रधानत्वं अनुवाद्यत्वं उद्देश्यत्वमिति त्रिकं तथा सोमे करणत्वानुबंधि गुणत्वं विधेयत्वं उपादेयत्वं चेतित्रिकमस्ति। यागेन चेष्टंभावयेदित्यत्रतु यागस्य करणत्वेन पूर्वं कर्मत्वानुबंधित्रिकवत एव

न्यायामृतप्रकाशः

तस्माद्धूमएवाग्नेरिति॥ प्रमाणलक्षणेऽर्थवादाधिकरणे ''तस्माद्धमएवाग्नेर्दिवा दृष्टे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं दृष्टे न धूम'' इत्यर्थवादयोर्दिवाप्यर्चिर्दर्शनान्नक्तमपि धूमदर्शनात् दृष्टविरोधेनाप्रामाण्यं ''शास्त्रदृष्टविरोधाच्चे''तिसूत्रेण पूर्वपक्षयित्वा दिवा नक्तं चार्चिर्धूमयोर्दर्शनशब्दो गौणइति ''गुणवादस्त्वि''तिसिद्धांतसूत्रेण दृष्टविरोधःसमाहितः। गौणतानिमित्तंच ''दूरभूयस्त्वादि''ति सूत्रेणोक्तं यथा दिवा धूमो दूरस्थैर्भूम्ना दृश्यते न तथार्चिःरात्रौ च यथा अर्चिर्दूरस्थैर्भूम्ना दृश्यते न तथा धूमः। अतो न दृष्टविरोधादप्रामाण्यमिति॥ अदितिर्द्यौरिति॥ प्रमाणलक्षणे मंत्राधिकरणे ''अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्र'' इति मंत्रस्य एकस्या अदितेः परस्परभिन्नद्युगगनाद्यनेकात्मकत्वस्य दृष्टविरोधेनार्थविवक्षाया अयोगादप्रामाण्यमिति ''विप्रतिषेधादि''तिसूत्रेण पूर्वपक्षयित्वा ''गुणादविप्रतिषेधःस्यादि''ति सिद्धांतसूत्रेण व्योमांतरिक्षादिवत् सुखकरत्वादिना द्युशब्दादीनां गौणार्थत्वमंगीकृत्य दृष्टविरोधःसमाहितः। तदेतत्सर्वं शब्दस्य प्रत्यक्षबाधकत्वे विरुध्येत मुख्यार्थपरत्वमेव स्यादित्यर्थः॥ तत्सिद्धिरित्यादितत्सिद्धिपेटिकयेति॥ एकार्थप्रतिपादकानेकाधिकरणसंग्रहःपेटिकेत्युच्यते। मीमांसाशास्त्रप्रसिद्धोयंशब्दः। प्रमाणलक्षणे नामधेयपादे ''तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिंगसमवाया'' दितिसूत्रेण ''यजमानःप्रस्तरः अग्निर्वैब्राह्मणः आदित्यो यूपः अपशवो वा अन्ये गोअश्वेभ्य'' इतिश्रुतिषु प्रस्तरस्य यज्ञसाधनभूतदर्भमुष्टिविशेषस्य यजमानत्वं ब्राह्मणस्याग्नित्वं यूपस्यादित्यत्वं गवाश्वव्यतिरिक्तानां अजादीनामपशुत्वं प्रत्यक्षविरुद्धमिति तत्परिहाराय प्रस्तरादिषु यजमानादिशब्दा गौणा इति तेषां प्रवृत्तिनिमित्तभूता गुणाःप्रदर्शिताः। तत्र यजमानशब्दस्य प्रस्तरे प्रवृत्तौतत्कार्यकरत्वं गुणः। उभयोरपि यज्ञसाधनत्वेन एककार्यकरत्वात्। ब्राह्मणेऽग्निशब्दप्रवृत्तौ जन्म एकप्रभवत्वं गुणः। ''ब्राह्मणोस्य मुखमासीत् मुखादिंद्रश्चाग्निश्चे''ति ब्राह्मणाग्न्योर्मुखजत्वश्रवणात्। यूपे आदित्यशब्दस्य प्रवृत्तौ आज्यांजननिमित्तमौज्वल्यं गुणः। तदेव सारूप्यमित्युक्तं सूत्रे। यद्यपि तत्सिद्ध्यादिकमपि सारूप्यमेव। तथापि इदं चक्षुर्ग्राह्यंसारूप्यमिति विशेषात्तथोक्तं। अपशुशब्दस्याजादिषु प्रवृत्तौ गवादीनां प्रशंसानिमित्तं। पशुशब्देन गवाश्वगतेनोपकारातिशयेन प्रशस्तत्वे लक्षिते नञा तदभावःपश्वंतरेषु बोध्यते। यथोक्तं।

''गवाश्वादिगतां पूर्वमुपादाय प्रशस्ततां।
तदभावोन्यपश्वादौ नञ्समासेन बोध्यत''

इति भूमलिंगसमवायोदाहरणानि तु ग्रंथगौरवभयान्नप्रदर्श्यंते। एतावतै वचारितार्थात्। यथोक्तं

''तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमभिः।
षड्भिःसर्वत्र शब्दानांगौणीवृत्तिःप्रकल्पिते''ति

प्रत्यक्षाविरोधायेति॥ सार्वज्ञादिविशिष्टदुःखादिविशिष्टयोरैक्यस्य प्रत्यक्षविरुद्धत्वात् तदविरोधायेत्यर्थः। लक्षणा सार्वज्ञादिभागत्यागेनेतिशेषः॥ अनन्यपरत्वादिति॥ अद्वैते तात्पर्यालिंगानां सत्त्वेनाद्वैतव्यतिरिक्तेऽर्थे तात्पर्याभावात्तत्रैव तात्पर्यं। प्रस्तरादिवाक्ये तु तात्पर्यलिंगाभावेन यजमानाभेदे न तात्पर्यं। किंनामान्यत्रैव

प्राकरणिकार्थशेषार्थप्रतिपादकत्वेन अमुख्यार्थत्वापत्त्या तथा व्यवहारापत्तिः। गङ्गायां घोष इत्यादौ मुख्यार्थत्वव्यवहारश्च स्यात्। किञ्च अद्वैतागमप्रतिपादितार्थस्यापि मोक्षशेषतया येनाश्रुतं श्रुतं भवतीत्यर्थवादानुमितात्मा श्रोतव्य इति विधिशेषतयः च आत्मस्वरूपप्रतिपादकस्य एकमेवेत्यादेः सुतरां मुख्यार्थत्वं न स्यात्। तस्मात् श्रुत्या तात्पर्यविषयार्थप्रतिपादकत्वमेव मुख्यार्थत्वमिति सोमेन यजेत इत्यादावपि अमुख्यार्थत्वमेव। लक्षणया तात्पर्यविषयार्थप्रतिपादकत्वात्। न च पदतात्पर्यवाक्यतात्पर्ययोः भेदात् पदस्यामुख्यत्वेऽपि वाक्यस्य मुख्यार्थत्वं भविष्यतीति वाच्यम्। पदवाक्ययोरभेदेन तदीयतात्पर्ययोरप्यभेदात्। न हि पदसमूहातिरिक्तं वाक्यमस्ति। न च विषं भुङ्क्ष्व इत्यादौ पदवाक्यतात्पर्ययोः भेदो दृष्ट इति वाच्यम्। पदानामेव अन्वितस्वार्थाभिधानद्वारा तदर्थपरत्वेन तात्पर्यभेदस्य असिद्धेः। तस्मात् लाक्षणिकत्वेऽमुख्यार्थत्वं दुर्वारम्। न च एकदेशपरित्यागेऽपि एकदेशान्तरात्यागान्मुख्यार्थत्वमिति वाच्यम्। पदानां विशिष्टार्थवाचकत्वेन तत्त्यागे अमुख्यार्थत्वापरिहारादिति दिक्।

॥ जिज्ञासासूत्र इति॥ न च वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदलक्षणायामपि प्रतिपादितार्थस्य अनन्यशेषत्वात् मुख्यार्थत्वं स्यादिति वाच्यम्। अत्र हि विचारकर्तव्यता प्रतिपाद्यते। तस्याः मोक्षसाधनत्वेन अन्यशेषत्वात्। अनन्यशेषत्वस्य मुख्यत्वाप्रयोजकत्वस्य पूर्वमुक्तत्वाच्च। सर्वत्र यथाकथञ्चिदन्यशेषत्वस्य वक्तुं शक्यत्वेन मुख्यार्थत्वस्य सर्वत्राभावप्रसङ्गाच्च। अत एव बहुक्षीरा, सोऽरोदीदित्यादौ प्रमाणविरोधाभावेऽपि अन्यशेषत्वमात्रेण लक्षणा दृष्टा, अन्यशेषत्वमेव लक्षणायां प्रयोजकं न प्रमाणविरोध इत्यपास्तम्। तथासति प्रयाजादिवाक्येष्वपि लक्षणापत्त्या वाक्यैकवाक्यता न स्यात्। न स्याच्च अद्वैतवाक्यस्य लक्षणा। त्वन्मते तस्य अनन्यशेषार्थप्रतिपादकत्वात्। न च प्रमाणविरोधस्य लक्षणाप्रयोजकत्वे बहुक्षीरा इत्यादौ लक्षणानापत्तिः। तत्र प्रमाणविरोधाभावादिति वाच्यम्। तत्र वाक्यार्थस्यैव विधिवाक्यप्रतिपादितगोक्रयादिहेतुत्वे सम्भवति लक्षणाया अन्याय्यत्वात्। न च अर्थवादानां सर्वत्र प्राशस्त्यलक्षकत्वमिति वाच्यम्। अस्य अस्माकमसम्मतेः। यत्र प्रतीतार्थपरत्वे विधिवाक्यान्वयो न, तत्रैव लक्षणेत्यङ्गीकारे दोषाभावात्। सर्वं खल्विदमिति। ननु शान्त उपासीत इति शमविधिशेषत्वेन तस्य अमुख्यार्थत्वमिष्टमेवेति चेन्न। अद्वैतवाक्यस्यापि विधिशेषत्वस्य वक्तुं शक्यत्वादिति अधस्तादेव उक्तत्वात्। नन्वेवं विधौ लक्षणास्वीकारे शाबरवचनविरोधः स्यादित्यत आह – शबरवचनं त्विति। अर्थवादमुख्यत्वायेति क्वचित् पाठः। तत्राप्ययमेवार्थोऽवगन्तव्यः। ननु अश्वप्रतिग्रहेष्टौ प्रतिगृह्णीयादिति विधौ प्रतिग्राह्येदिति अर्थवादानुसारेण प्रयोजकव्यापारलक्षणाङ्गीकारात् अर्थवादमुख्यत्वाय न विधौ लक्षणेत्येवं कथं व्याख्यानमिति चेन्न। तन्त्रसारे 'मैत्रायणीयशाख्यायां दातुरुपक्रमतोऽप्यृते। कर्माङ्गत्ववशादेव दातुरिष्टिः प्रतीयते॥' इत्युपक्रमं विनैव दातुरिष्टिरित्युक्तत्वात् न अर्थवादानुसारेण विधौ लक्षणा। शास्त्रदीपिकायामपि 'लिङ्गादार्त्विजे स्यात्' इति सूत्रानुसारात् भाष्यकारान्तरैः तत्रापि उपसंहारानुसारात् प्रतिग्रहीतुरेव इष्टिरित्युक्तमिति उक्तत्वात्। याज्ञिकैरपि तथैव स्वीकृतत्वात्। प्राभाकरैरपि पौण्डरीके श्रूयते इति कृत्वाचिन्तायां अन्यथा दातुरिष्टिरिति सिद्धान्तासिद्धेः इति वदद्भिः वस्तुतः प्रतिग्रहीतुरेवेष्टिरित्यङ्गीकारेण न अर्थवादानुसारेण विधौ लक्षणोति यत्किञ्चिदेतत्। तस्मादर्थवादमुख्यत्वाय न विधौ लक्षणा प्रमाणविरोधे तु स्यादेव इति। उक्तमर्थमाचार्यवचनसम्मत्या द्रढयति-तदुक्तमिति । इति प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्।

उद्देश्यत्वादिकं यागस्य उपदेयत्वादिकं व्यवतिष्ठते तथा यागस्य वाजपेयद्रव्यस्य च साध्यसाधनभावपर्यालोचनायां यागस्योद्देश्यत्वादिकं त्रिकं, द्रव्यस्योपादेयत्वादिकं पर्यवस्यति। ततो यागस्य फलद्रव्याभ्यां उभाभ्यां युगपत् संबन्धे वाक्यं भिद्येत इति।

ननु यथा खलु भावना कर्मत्वकरणत्वोद्देश्यत्वोपादेयत्वादिरूपभेदमन्तरेणैव आख्यातामिधेयेनैव आत्मना साध्यादिभिः संबध्यते इदमनेन इत्थं कुर्यात् इति तथा यागोऽपि करणत्वादिरूपमनादृत्य धात्वभिहितेनैव यागरूपेण गुणफलाभ्यां संबध्यत इति न वैरूप्यमिति चेन्न। अक्रियात्वात्। भावना हि अक्रियारूपा सर्वसाधारणरूपैवेति युक्तं पदवैरूप्येण अनेकसंबन्धं लभत इति। यागस्तु क्रियारूपः कथमिव कारकरूपैर्गुणादिभिः संबध्यते? न चासौ भावनाद्वारेणैव अरुणैकहायनीवत् गुणफलाभ्यां संबन्धं लभत इति युक्तम्। भावनासंबन्धोऽपि नास्य स्वरूपेण संभवति। कारकं हि क्रियया संबन्ध्यते। न वस्तुस्वरूपम्। अतः अवश्यं कर्मात्मना करणात्मना वा धातुना यागः प्रतिपादनीयः। तत्र अन्यतररूपप्रतिपादने अन्यतरेणैव गुणेन फलेन वा संबन्धात् नोभयसंबन्धसिद्धिः। उभयरूपप्रतिपादने च वाक्यभेदः। तस्मान्न तन्त्रसंबन्धः। तेन गुणविधिपक्षे मत्वर्थलक्षणा आश्रयितव्या। ततो वरं वाजपेयं सुराद्रव्यमस्मिन् इति सुराग्रहविधानात् तत्प्रख्यतया नामधेयत्वम्। तर्हि सोमेन यजेत इत्यत्रापि उक्तरीत्या नामधेयत्वं स्यादिति चेन्न। नामधेयत्वे हि सोमेन यागेन इति सामानाधिकरण्येन अन्वयो वाच्यः। तथाच लतारूपार्थान्तरे निरूढस्य यागे शक्तच्यन्तरकल्पनापत्तेः। तत्र तस्याप्रसिद्धार्थत्वात्। न चास्य गुणविधित्वमयुक्तम्। तदा हि सोमेन यागं कुर्यात्, यागेन स्वर्गमिति वैयधिकरण्येनान्वये विरुद्धत्रिकद्वयापत्तिः। सामानाधिकरण्येनान्वये च प्रत्यक्षबाधः इति वाच्यम्। सोमवता यागेन इति मत्वर्थलक्षणया सामानाधिकरण्येन अन्वयस्वीकारेण गुणविधित्वे बाधकाभावात्। अप्रसिद्धार्थान्तरकल्पनापेक्षया हि वरं लक्षणाश्रयणम्। अन्यथा प्रतीतसामानाधिकरण्यभङ्गप्रसङ्गात्। वाजपेयेन इत्यत्र तु वाजपेयशब्दस्य न अर्थान्तरे रूढिरिति वैषम्यम्।

नन्वस्तु सोमेन यजेत इत्यादिवत् अद्वैतवाक्ये लक्षणा। ततः को दोषः? न च वाच्यममुख्यार्थत्वं तथा सति स्यादिति। भावानवबोधात्। मुख्यार्थत्वं हि तात्पर्यविषयीभूतार्थबोधकत्वम्। न शक्यार्थमात्रबोधकत्वम्। अमुख्यार्थत्वं वा अन्यार्थतात्पर्यकत्वं, न लाक्षणिकत्वम्। तथाच अद्वैतागमस्य लक्षणाश्रयणेऽपि तात्पर्यविषयीभूतार्थबोधकत्वात् मुख्यार्थत्वमुपपन्नम्। सोमेन यजेत इत्यत्र मत्वर्थलक्षणायामपि तात्पर्यविषयीभूतार्थबोधकत्वात् मुख्यत्वमेवेति चेन्मैवम्। वचनवृत्त्या तात्पर्यविषयीभूतार्थबोधकत्वं मुख्यत्वम्। लक्षणया तात्पर्यविषयीभूतार्थबोधकत्वं तु अमुख्यार्थत्वम्। गामानय, गङ्गायां घोषः प्रतिवसतीत्यादौ शक्यार्थपरत्वलाक्षणिकार्थपरत्वाभ्यां अभियुक्तानां मुख्यार्थत्वामुख्यार्थत्वव्यवहारात्। अन्यथा गामानय इत्यादिवत् गङ्गायां घोष इत्यादीनामपि मुख्यार्थत्वं स्यात्। न च तथा व्यवहारः। व्यवहारानुरोधेन हि मुख्यार्थत्वामुख्यार्थत्वयोः लक्षणे कल्प्ये। न तु स्वसमयानुसारेण। न च प्रस्तरादिवाक्यस्य अन्यशेषत्वादमुख्यार्थत्वम्। अद्वैतवाक्यार्थस्य अन्यशेषत्वाभावात् मुख्यार्थत्वमेवेति वाच्यम्। प्रतिपादितार्थस्य अन्यशेषत्वमात्रेणामुख्यार्थत्वे प्रयाजादिवाक्यानां दर्शपूर्णमासाभ्याम् इति विधि-वाक्यशेषत्वेन, महावाक्यानाञ्च

अन्वयो वाच्यः। तथा च प्रत्यक्षविरोधः स्यात्। न च वाजपेयद्रव्यवता यागेन इति सामानाधिकरण्येन अन्वयात् न प्रत्यक्षविरोध इति वाच्यम्। तथात्वे मत्वर्थलक्षणाप्रसंगात् इति चेन्न। सकृदुच्चरितस्य यजेत इत्याख्यातस्य वाजपेये गुणे, स्वाराज्ये फले, तंत्रेण संबंधांगीकारात्। तथाच एवं वचनव्यक्तिः – वाचपेयेन द्रव्येण स्वाराज्याय यजेत इति। एवं सति मत्वर्थलक्षणा नेति। ननु गुणसंबन्धे सति वाजपेयगुणेन यागं कुर्यात् इति यजेः कर्मकारकत्वं संभवति। फलसंबन्धे तु यागेन स्वाराज्यं संपादयेत् इति करणकारकत्वम्। कर्मत्वकरणत्वे च एकत्र विरुद्धे। ततः कथमुभयसंबन्धः इति चेन्नायं दोषः। यजेः साधारणत्वेन द्विरूपत्वसंभवात्। यजेत इत्यत्र प्रकृत्या याग उक्तः। प्रत्ययेन भावना उक्ता। तयोस्तु समभिव्याहारात् संबन्धमात्रं गम्यते। यदि यजेत इति यागस्य कर्मत्वमुच्येत तदा साध्यद्वयासमवायात् न फलं संबध्येत। गुण एव तु साधनतया संबध्येत। यदि वा यागस्य करणत्वमेवोच्येत ततोऽपि करणद्वयासमवायात् न गुणः संबध्येत। किंतु फलमेवेति न स्यात् तंत्रत्वम्। न त्वेतदन्यतरदपि अख्यातेनोच्यते। तद्वाचकशब्दाभावात्। किंतु प्रकृतिप्रत्ययाभ्यां यागभावनयोरुक्तयोः समभिव्याहारात् संबंधमात्रं सिध्यति। तच्च कर्मत्वकरणत्वयोः साधारणम्। अतश्च उभयरूपसाधारणत्वात् यागस्यं तद्विषयापि भावना यागकर्मिका यागकरणिका चेति द्विरूपा भवति। तत्र यागकर्मिकांशेन गुणसंबंधं लभते तत्करणिकांशेन फलसंबन्धं लभते, भावना तंत्रेण, इति विनैव मत्वर्थलक्षणया गुणविधानं यागे उपपन्नं, वाजपेयेन यागं कुर्यात् यागेन स्वाराज्यम् इति पूर्वपक्षसंक्षेपः।

सिद्धान्तस्तु – श्रुत्या लक्षणया वा यत्परः शब्दः स एव शब्दान्तरार्थेन संबध्यते। तथा च यदि आख्यातेन संबन्धमात्रं धात्वर्थभावनयोरवगतं तर्हि नैकस्यापि फलगुणयोः तदन्वयः स्यात्। फलस्य साधनापेक्षत्वात् यागकरणिकयैव भावनया संबन्धः। गुणस्य साध्यापेक्षत्वात् यागकर्मिकयैव भावनया संबन्धः। अनिर्धारितोभयरूपा एकेनापि नान्वीयते अयोग्यत्वात्। तत्र अवश्यं विशेषपरता अभ्युपगन्तव्या। ननु कर्मकरणविभक्तयोरसत्योः कथं तत्परता शब्दस्य इति चेत्, तर्हि संबन्धसामान्यप्रतीतिरपि न स्यात्। तद्वाचकषष्ठ्यभावात्। न च समभिव्याहारात् लक्षणया वा संबन्धावगतिरिति वाच्यम्। तर्हि तत एव समभिव्याहारात् पदान्वयपर्यालोचनया संबन्धविशेषस्यैव सिद्धिः स्यात्। न हि विशेषपरत्वाभावे पदान्तरान्वयो घटते। तस्माद्विशेषपरता। तत्र कर्मपरत्वे गुणस्यैव संबन्धः न फलस्य। करणत्वे तु फलस्यैव न गुणस्य इति न तंत्रेण उभयसंबन्धः। उभयपरत्वे हि आवृत्तिः स्यात्। तथाच वाक्यभेदः। न खलु यस्मिन्नेव क्षणे यागं करणात्मनाऽवबुध्यामहे तस्मिन्नेव कर्मात्मना अवबोद्धुमीष्महे इति स्वानुभवविरुद्धमेतत्। किञ्च यजेः तन्त्रेण उभयसंबन्धे सति विरुद्धत्रिकद्वयापत्तिः स्यात्। उपादेयत्वं गुणत्वं विधेयत्वं च इति एकं त्रिकम्। उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वं चेत्यपरं त्रिकम्। तत्र उद्देश्यत्वादयस्त्रयः स्वाराज्यफलनिष्ठा धर्माः। उपादेयत्वादयस्त्रयः साधनभूतयजिनिष्ठा धर्माः। कथं? फलमुद्दिश्य यजिरुपादीयते। फलमनूद्य यजिर्विधीयते। फलं प्रधानम्। यजिः उपसर्जनम्। फलस्य उद्देश्यत्वं नाम मानसापेक्षाविषयत्वाकारः। यजेरुपादेयत्वं नाम अनुष्ठीयमानत्वाकारः। तावुभौ मनश्शरीरोपाधिकौ धर्मौ। अनुवाद्यत्वविधेयत्वधर्मौ तु शब्दोपाधिकौ। ज्ञातस्य कथनमनुवादः। अज्ञातस्यानुष्ठेयत्वकथनं विधिः। फलयागयोः साध्यसाधनत्वे मुख्यत्वोपसर्जनत्वे। एवं च सति फलतत्साधनयोः स्वाराज्ययागयोः स्वभावपर्यालोचनायां यथा फलस्य

एतेनेति। अत्र अनन्यपरत्वं नाम प्रतीतार्थादर्थांतरपरत्वाभावः, तदभावोऽन्यपरत्वम् इति, वक्ष्यमाणान्यशेषत्वानन्यशेषत्वाभ्यां नाभेदः। तत्र अनन्यपरत्वं च अद्वैतवाक्यस्य तात्पर्यलिंगोपेतत्वात्। तदभावात्तदभावः प्रस्तरवाक्य इति भावः। अनन्यपरत्वे मानांतराविरोधस्यैव प्रयोजकत्वं न तु तात्पर्यलिंगस्य। प्रकृते च मानांतरविरोधस्य सत्त्वादनन्यपरत्वमसिद्धमित्याह – सत्यपीति। न च प्रमाणविरोधाभावेऽपि सोऽरोदीत्, क्रय्या बहुक्षीरा इत्यादौ अन्यपरत्वं दृष्टमस्तीति तत्र न स प्रयोजक इति वाच्यम्। अत्र हि अन्यपरत्वं प्रतीतार्थपरित्यागेन अन्यपरत्वं विवक्षितम्। न च प्रमाणविरुद्धे तदस्ति। बहुक्षीरा इत्यादौ प्रतीतार्थस्य हेतुकृतत्वेन तत्त्यागाभावात्। तादृशस्यैव अन्यपरत्वस्य अमुख्यार्थत्वप्रयोजकत्वात्। अन्यथा स्वार्थात्यागेऽपि अन्यपरत्वमात्रेण अमुख्यार्थत्वे महावाक्यानामवांतरवाक्यानां च प्राकरणिकार्थपरत्वेन अमुख्यार्थत्वं स्यात्। न च तथा केऽपि व्यवहरन्ति। स्वसमयमात्रस्य अतिप्रसञ्जकत्वादिति।

तात्पर्यलिंगस्य मुख्यार्थत्वप्रयोजकत्वे व्यभिचारं दर्शयति – न हि कुरूणामिति। शतकृत्व इति अभ्याससरूपतात्पर्यलिंगसद्भावकथनम्। ननु न लोके तात्पर्यलिंगस्य मुख्यार्थत्वप्रयोजकत्वम्। येन व्यभिचारः। किन्तु वेदे इत्यतो वेदेऽपि व्यभिचारमाह – न वेति। न च एतस्यापि अद्वैतवाक्यत्वेन पक्षत्वात् वाच्यार्थत्वं साध्यत इति न व्यभिचारः इति वक्तुं शक्यम्। अपसिद्धान्तात्। तात्पर्यानुपपत्त्यादित एव अवाच्यार्थपरत्वं न तु मानांतरविरोधात् इत्यस्य च प्रत्युक्तत्वात्। ननु वाच्यार्थपरत्वाभावेऽपि परमतात्पर्यार्थपरत्वेन मुख्यार्थत्वं भविष्यतीति चेन्न। वाच्यार्थत्वाभावे मुख्यार्थत्वाभावस्य वक्ष्यमाणत्वात्। किञ्च वेदेऽपि यत्किञ्चित्तात्पर्यलिंगमात्रं मुख्यार्थत्वे हेतुः किं वा लिंगबाहुल्यम्। नांत्यः। एकेन तात्पर्यसिद्धौ लिंगांतरमनुवादकत्वेन अप्रमाणम्। आद्ये मानांतराप्राप्तार्थप्रतिपादकत्वरूपापूर्वतायाः प्रस्तरवाक्ये विपक्षेऽपि सत्त्वात् व्यभिचार इत्याह – किञ्चेति। ननु प्रस्तरादिवाक्ये अपूर्वतालक्षणतात्पर्यलिंगे विद्यमानेऽपि न तद्बाहुल्यम्। तत्त्वमसिवाक्ये च तात्पर्यलिंगबाहुल्यस्य सद्भावात् मुख्यार्थत्वं भविष्यतीत्यत आह – त्वत्पक्षे चेति। तात्पर्यलिंगबाहुल्यस्यानुपयुक्तत्वात् न तद्बाहुल्यगवेषणा इति भावः। प्रस्तरादिवाक्यमिति। अत्र अन्यशेषत्वं नाम प्रतिपादितार्थस्य फलसाधनीभूतार्थांगत्वमिति न अन्यपरत्वेन अभेदः।

ननु अनन्यशेषेऽपि अमुख्यार्थत्वं किं न स्यादित्यत आह – उक्तं हीति। तथांऽगीकारे अभियुक्तवचनविरोध इति भावः। प्रमाणाविरोधतदभावावेव मुख्यत्वामुख्यत्वप्रयोजकौ। न तु अनन्यशेषत्वान्यशेषत्वे। तयोः लोके वेदे च व्यभिचारदर्शनादित्याह – अनन्यशेषेऽपीति। सोमेन यजेतेत्यादाविति। प्रथमस्य चतुर्थे नामधेयचरणे षष्ठाधिकरणे चिन्तितम्- 'नामधेये गुणश्रुतेः स्याद्विधानमिति चेत्'। 'वाजपेयेन स्वाराज्यकामो यजेत' इति श्रूयते। अत्र वाजपेयशब्दः किं गुणविधिः उत कर्मनामधेयमिति चिन्ता। तदर्थमिदं विचार्यते – किं यजेत इति आरव्यातं गुणफलाभ्यां तंत्रेण संबद्धुं क्षमते न वा इति। अत्र उद्भिदादिवाक्यान्यप्युदाहरणम्। पूर्वपक्षस्तु – वाजपेयशब्देन गुणो विधीयते। कथं? अन्नवाची वाजपेयशब्दः। तच्च अन्नं सुराद्रव्यम्। तच्च अत्र गुणः। सुराग्रहाणामनुष्ठेयत्वात्। ननु गुणविधानं न संभवति। तथात्वे वाजपेयेन यागेनेति सामानाधिकरण्येन

परीक्षया व्यावहारिकमेव प्रामाण्यं सिद्धम्। धूम एवेत्यादिना तात्विकमदृश्यत्व प्रस्तरत्वादिकमुच्यते। न हि धूम एवेत्यादौ व्यावहारिकपदमस्ति। येन तात्विकत्वं वक्तुमशक्यम् इत्यपि वक्तुमशक्यत्वेन वैषम्याभावात्। दार्ष्टान्तिके बाधाभावप्रमाणान्तरसंवादार्थक्रियारूपपरीक्षया तात्विकप्रामाण्यस्यैव सिद्धत्वाच्च। अद्वैतागमस्यैव प्रातिभासिकाद्वितीयत्वपरत्वसंभवेन तात्विकप्रमाणविरोधाभावेन प्रत्यक्षादेस्तात्विक परत्वाविरोधाच्च। अन्यथा जगत्प्रत्यक्षस्य परीक्षया व्यावहारिकप्रमाण्यसिद्धिश्चेत् आत्मस्थायित्वप्रत्यक्षस्यापि प्रत्यक्षत्वाविशेषात् परीक्षया व्यावहारिकप्रामाण्यस्यैव सिद्धत्वेन तत्क्षणिकत्वग्राहकानुमानागमयोः ब्रह्मशून्यत्वसाधकमानस्य च तात्लिक प्रमाणविरोधाभावेन तात्विकपरत्वापत्तौ शून्यवादसिद्धिः स्यादिति जितं सौगतेन। तस्मात् यथा धूम एवेत्यादेः प्रत्यक्षविरोधेनामुख्यार्थत्वं तथा अद्वैतागमस्यापि प्रत्यक्षविरोधेनामुख्यार्थत्वमेव साधु मन्तव्यमिति।

ननु च न प्रत्यक्षविरोधेन लक्षणा स्वीक्रियते। षड्विधतात्पर्यलिंगैः गतिसामान्येन च अखण्डे एव तात्पर्यस्यावधारि तत्वात् तदन्यथानुपपत्तेः जीवेशगतसर्वज्ञत्व किञ्चिज्ज्ञत्वादीनां वाक्यान्वयानुपपत्तेश्च तात्पर्य विषयीभूताखण्ड प्रतीति निर्वाहाय लक्षणा अंगीक्रियते। तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणांगीकारस्य सर्वत्र दर्शनादिति चेन्मैवम्। एतावता हि अखण्डतात्पर्यानुपपत्या लक्षणेत्युक्तं भवति। न च तद्युज्यते। अखण्डे तात्पर्यग्राहकप्रमाणाभावात्। न च उपक्रमादिभिस्तद्ग्रहः। उपक्रमादीनामन्यथा व्याख्यास्यमानत्वेन तैस्तदसिद्धेः। गतिसामान्यस्य च सर्वे वेदा युक्तयः सुप्रमाणा इत्यादि श्रुत्यनुरोधेन सर्ववेदेतिहासादीनामेकब्रह्मरूपार्थप्रतिपादनपरत्वेन अन्यत्र व्याख्यातत्वात् न तेनाप्यखण्डार्थतात्पर्यसिद्धिः। तथा च सर्वज्ञत्वकिञ्चिज्ज्ञत्वादीनामैक्यान्वयानुपपत्या लक्षणा स्वीक्रियते इति वाच्यम्। अन्वयानुपपत्तेश्च प्रत्यक्षविरोधे एव पर्यवसानादिति प्रत्यक्षविरोधेनैव लक्षणांगीकार इति। अन्वयो हि एकपदार्थस्य अपरपदार्थेन वाच्यः। प्रकृते सर्वेषां पदानां ब्रह्मस्वरूपमात्रपरत्वेन अन्वयाभावेन अन्वयानुपपत्तेरभावात्। अस्तु वा लक्षणास्वीकारः को दोष इति चेत् अमुख्यार्थत्वमेवेति ब्रूमः। न च अमुख्यार्थत्वं किं प्रतीयमानार्थपरित्यागेन अर्थांतरपरत्वं वा अशक्यार्थत्वं वा। नाद्यः। सामानाधिकरण्येन प्रतीयमानस्यैक्यस्यात्यागात्। नांत्यः। जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि सोऽयं देवदत्त इत्यादिवाक्ये इव शक्यैकदेशस्यैव अन्वयाभ्युपगमादिति वाच्यम्। उभयथाप्यमुख्यार्थत्वं दुष्परिहरम्। तत्र आद्यं तावदमुख्यार्थत्वमस्तु। न च प्रतीतसामानाधिकरण्यात्यागात्। कथं तदिति वाच्यम्। सामानाधिकरण्येन विशेष्यैक्यमात्रं न प्रतीतम्। किन्तु विशिष्टैक्यम्। तस्य च त्याग एव त्वया क्रियते इति कथं नामुख्यार्थत्वम्। द्वितीयं वा अस्तु। न च एकदेशपरित्यागेऽपि एकदेशांतरस्य अपरित्यागात् कथं तदिति वाच्यम्। विशिष्टवाचकानां विशेषणविशेष्यान्यतरमात्रपरत्वे अमुख्यार्थत्वनियमात्। अत एव लोहितोष्णीषा इत्यादौ विशेषणमात्रपरत्वेन अमुख्यार्थत्वम्। न चैतावता विशेषणमात्रपरत्वे अमुख्यार्थत्वेऽपि विशेष्यमात्रपरत्वे न तदिति वाच्यम्। बीजाभावात्। विशिष्टस्य विशेषणान्यत्ववत् विशेष्यान्यत्वात्। न हि विशेष्यादिरूपमेव विशिष्टमित्यावयोर्मतम्। सोऽयं देवदत्त इत्यादावपि विशिष्टार्थपरत्वस्यैव अखण्डार्थवादे वाक्ष्यमाणत्वेन अमुख्यार्थत्वाभावात्।

न्यायामृतकण्टकोद्धारः

॥ तस्माद्धूम एवेति॥ प्रमाणलक्षणे अर्थवादाधिकरणे शास्त्रदृष्टविरोधादिति पूर्वपक्षसूत्रम्। तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूम इत्यर्थवादः श्रूयते। अस्य वचनस्य स्वार्थे धर्मे वा प्रामाण्यमस्ति न वेति सन्देहः। पूर्वपक्षस्तु नास्य वचसः स्वार्थेऽपि प्रामाण्यमक्रियार्थत्वात्। धर्मे नास्तीति किमु वक्तव्यम्। किञ्च दृष्टविरोधात्। कथं दृष्टिविरोधः ? नक्तंदिवं धूमार्चिषोरुभयोरप्येकैकत्र प्रत्यक्षतो दर्शनादिति। प्रत्यक्षविरुद्धस्यांगुल्यग्रे करिशतमिति वाक्यस्याप्रामाण्यं दृष्टमिति। अत्र सिद्धान्तसूत्रं – गुणवादस्विति। अयं वादो गुणात् उपचारत्। दिवानक्तं चार्चिर्धूमयोरदर्शनशब्दो गौण इति दृष्टविरोधः समाहितः। गौणतायां निमित्तमुक्तं – दूरभूयस्त्वादिति। नन्वेतावता कथं धर्मे प्रामाण्यमिति चेदित्थम् – स्तावकत्वात्। तथाहि – सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति। अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति मिश्रलिंगकाग्निहोत्रमन्त्रविधेः शेषो धूम एवेत्यादिरर्थवादः दिवाऽग्निरादित्यमनुप्रविशति रात्रावादित्यास्तमित्येतमर्थमुपपादयन् विधेयमर्थं स्तुवन् नानर्थको भवितुमर्हति। न च धूम एवेत्यवधारणं दृष्टविरुद्धति वाच्यम्। दूरभूयस्त्वेन तस्य समाधेयत्वात्। यथा दूरस्थैर्हि दिवा धूम एव भूयान् दृश्यते तथा नार्चिः, यथा वा रात्रावर्चिर्भूयो दृश्यते न तथा धूम इति। तथा च 'न ददृशे' इत्यत्र दर्शनमात्रवाचकेन दृशिना दूरभूयस्त्वविशिष्टे दर्शने लक्षिते तदभावो नञा बोध्यत इति न दृष्टविरोध इति।

॥ अदितिर्द्यौरित्यादिमन्त्रस्य चेति॥ प्रमाणलक्षणे मन्त्राधिकरणे चिन्तितम् अदितिर्द्यौरदिति रन्तरिक्षमित्यादि। तथा एको रुद्रो न द्वितीयोऽवतस्थे, सहस्राणि सहस्रशो ये रुद्रा अधिभूम्यामिति च श्रूयते। अत्र सन्देहः – एते मन्त्रा विवक्षितार्था न वेति। अत्र पूर्वपक्षसूत्रम् – अर्थविप्रतिषेधादिति। एते मन्त्रा अविवक्षितार्थाः। कुतः ? एकस्यामदितिदेवतायां परस्परविरुद्धद्युत्वान्तरिक्षत्वाद्यभिधायकत्वात्। विरुद्धार्थविधायकस्य च माता वन्ध्येत्यादेरप्रामाण्यं दृष्टमिति। तथाच प्रत्यक्षविरुद्धाभिधायकत्वात् मन्त्रा अविवक्षितार्था इति पूर्वपक्षः। अत्र सिद्धान्तसूत्रम् – गुणादतिप्रतिषेधः स्यादिति। अदितिर्द्यौरित्यादि मन्त्रा नाविवक्षितार्थाः।

तथाच प्रत्यक्षं यदि शब्दबाध्यं तर्हि प्रत्यक्षाविरोधाय तस्माद्धूम एवेत्यादेः यजमानः प्रस्तर इत्यादेश्च गौणार्थता नोच्येतेति भावः।

ननु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम्। दृष्टान्ते आदितिर्द्यौर्धूम एव इत्यादेः यजमानः प्रस्तर इत्यादेर्वाक्यशेषस्य प्रमाणान्तरसंवादार्थक्रियारूपपरीक्षापरीक्षितत्वेन प्रत्यक्षस्य प्राबल्यात् तद्विरोधे न मुख्यार्थत्वं युक्तम्। अद्वैतागमस्य परीक्षितप्रमाणविरोधाभावादिति वैषम्यात् कथं तद्विरोधेनामुख्यार्थत्वम्। न चात्रापि प्रत्यक्षस्य परीक्षा अस्त्येवेति वाच्यम्। परीक्षया हि व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च नाद्वैतागमेन बाध्यते। बाध्यते तु तात्विकं प्रामाण्यम्। तत्तु परीक्षया न सिद्धम्। अतो न विरोधः। धूम एवाग्नेरित्यादेस्तु मुख्यार्थत्वे प्रत्यक्षादेर्व्यावहारिकप्रामाण्यं व्याहन्येत। अतो विरोधात् तत्रामुख्यार्थत्वमिति चेन्नैवम्। दृष्टान्तेऽपि

हेतुहेतुमद्भावो नोपपद्यते। यच्चोक्तं – तात्पर्यविषयीभूतार्थबोधकत्वं मुख्यार्थत्वे, न तु शक्यमात्रबोधकत्वमिति। तदपि न। मानांतर विरुद्धे वाक्यतात्पर्यस्यैवानुपपत्तेः। मानांतरविरुद्धे वाक्यतात्पर्यवत्पदतात्पर्यस्याप्यापातेन तत्त्वंसोमसन्पदादिलक्षणाया अप्यसिद्धेः। अन्यशेषीभूत वाक्यार्थप्रतिपादके समिधो यजतीत्यादौ वेदे, तंडुलान् पचेतेत्यादौ लोके चामुख्यार्थत्व व्यवहाराच्च। सर्वस्यापि वाक्यस्येति। मिथ्यात्ववादिना प्रत्यक्षबाधकत्वेन आगमे उद्भाविते सत्यत्ववादिना आगमस्य मुख्यार्थत्वे प्रत्युक्ते पुनः मिथ्यात्ववादिना आगमस्यामुख्यार्थत्वं न निपेद्धव्यम्। स्वाभ्युपगमविरोधापत्तेरिति भावः। अनुवादमुख्यार्थत्वायेति। अर्थवादमुख्यार्थत्वायेत्यर्थः।

नन्वश्वप्रतिग्रहेष्टौ प्रतिगृह्णीयादिति विधौ प्रतिग्राह्येदिति व्यवधारणकल्पनयाऽर्थवादानुसारेण प्रयोजकव्यापारे लक्षणाया अंगीकरणादिति चेन्मैवम्। न हि तत्रार्थवादानुसारेण विधौ लक्षणा। किंतु "प्रजापतिर्वरुणायाश्वमनयत्। स स्वां देवतामार्छत्। स पर्यदीर्यत। स एतं वारुणं चतुष्कपालमपश्यत्। तं निरवपत्। ततो वै स वरुणपाशादमुच्यत। वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति। यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेत्। वरुणमेव स्वेन भागधेयेनोपधावति। स एवैनं वरुणपाशान्मुंचति" इत्यत्रोपक्रमस्वारस्यायैवोपसंहारे लक्षणा। प्रजापतिर्वरुणायाश्वमनयदिति प्रजापतिर्दाता संकीर्तितो वरुणः प्रतिग्रहीता। स स्वां देवतामार्च्छदिति। स इति समानविभक्तिनिर्दिष्टः प्रजापतिः स्वां देवतां पूर्ववाक्ये संप्रदाननिर्देशाद्वरुणमार्छत् अपरराध। स पर्यदीर्यत भीतो विदीर्णो वा। स एतं वारुणं चतुष्कपालमपश्यत्। ततो वै स वरुणपाशादमुंचत इति सर्वत्र प्रजापतिरेव दाताऽनुषज्यते। तथाचान्योऽप्यश्वस्य दाता एतामिष्टिं कुर्यादित्युपक्रमे दातुरिष्टिः प्रतीयते। वरुणो वा एतमित्याद्युपसंहारे प्रतिग्रहीतुः। उपक्रमप्राबल्याच्च दातुरिष्टिर्नार्थवादबलवत्त्वात्। अपि च तंत्रसारे "मैत्रायणीयशाखायां दात्रुपक्रमतोऽप्यृते। कर्मांगत्ववशादेव दातुरिष्टिः प्रतीयते" इत्युक्तत्वेन वचनादेव दातुरिष्टिर्न त्वर्थवादानुसारेण। विधिवाक्ये व्यवधारणकल्पनादिना दातुरिष्टिरिति।

व्यासाद्रिसृततर्काब्धिपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यामक्षं नो शब्दबाधितम्॥

प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्।

वाक्यतात्पर्यम्। सैंधवमानय, गंगायां वसतीत्यादौ वाक्यतात्पर्यैक्येऽपि पदतात्पर्यभेदात्। विषं भुङ्क्ष्वेत्यादौ पदतात्पर्याभेदेऽपि वाक्यतात्पर्यभेदात्। अत एव गौः क्रय्या बहुक्षीरेत्यादिवाक्यस्यावश्यं क्रेतव्येति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वादमुख्यार्थत्वम्। सोऽरोदीदीत्यादिवाक्यार्थस्य च हिरण्यं दक्षिणेति विधिशेषत्वेन रजतनिंदाद्वारा तत्प्राशस्त्य लक्षकत्वात्। सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति शमविधिशेषत्वेनात्यनायाससिद्धत्वरूपतत्प्राशस्त्यलक्षकत्वादमुख्यमेव। अत एव मानांतरविरोध एव लक्षणेत्यपास्तं। इयं गौर्बहुक्षीरेत्यादिना प्राशस्त्यलक्षणायां व्यभिचारात्। किं तु परमतात्पर्यविषयीभूतार्थप्रतीतिनिर्वाहायैव सर्वार्थवादेषु लक्षणा। एतावांस्तु विशेषः। विधिप्राशस्त्यलक्षणातः प्राग्यदर्थवादवाक्यार्थज्ञानं तस्य प्रमाणांतरविरोधे बाध एव। यथा प्रजापतिरात्मनो वपामुदखिददित्यादौ। अत एवात्र गुणवादमात्रम्। प्रमाणांतरप्राप्तौ त्वनुवादमात्रमग्निर्हिमस्य भेषजमित्यादौ। अत एव तदुभयत्राबाधिताज्ञातज्ञापकत्वरूप प्रामाण्यशरीरानिर्वाहादप्रामाण्यम्। यत्र पुनः प्रमाणांतरप्राप्तिविरोधौ न स्तस्तत्र प्रामाण्यशरीरनिर्वाहाद्भूतार्थवादत्वम्। यथेंद्रो वृत्राय वज्रमुदयच्छदित्यादौ। अयमेव देवताधिकरणन्यायः। ननु तर्ह्यादित्यो यूप इत्यादौ वाक्यार्थप्रतीत्यर्थमेव लक्षणांगीकारादमुख्यार्थत्वं न स्यात्। न स्यात् यद्यादित्यसदृशो यूप इति वाक्यार्थपर्यवसानं स्यात्। किंतु गुणवृत्त्या प्रतीतस्यापि वाक्यार्थस्य यूपे पशुं बध्नातीति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वमस्त्येव। तेनैवामुख्यत्वं नतु पदगौणतयेति। तत्सिद्धिपेटिकायां सर्वोदाहरणेष्ववांतरवाक्यार्थप्रतीतये गुणवृत्तिप्रकाराः प्रदर्शिताः। कर्मप्राशस्त्यलक्षणा तु सर्वार्थवादसाधारणी तत्रास्त्येवेति नामुख्यार्थत्वानुपपत्तिः। अत उपपन्नं प्रस्तरादि वाक्यवैषम्यमद्वैतवाक्यस्य। तस्मादद्वैतागमस्य लाक्षणिकत्वेपि मुख्यार्थत्वात्प्रत्यक्षबाधकत्वमिति''। अत्र ब्रूमः – तत्त्वमसि, सोमेन यजेतेत्यादौ वाक्यार्थस्यानन्यशेषत्वरूपामुख्यार्थत्वेऽपि, बहुक्षीरा सोऽरोदीदित्यादौ वाक्यार्थस्यान्यशेषत्वरूपामुख्यार्थत्वेऽपि, स्वरसप्रतीतसमानाधि करणपदार्थाभेदरूपवाक्यार्थनिर्वाहाय तत्त्वंपदयोर्जहदजहल्लक्षणाश्रयणं सोमपदे मत्वर्थलक्षणाश्रयणं च न स्यात् यदि प्रत्यक्षमागमबाधकं न स्यात्। न हि तत्त्वंपदार्थयोः सर्वज्ञत्वादिभोक्तृत्वादिविशिष्टयोरभेदबोधने सोमद्रव्यस्य च यागाभेदबोधने प्रत्यक्षविरोधादन्यो दोषोऽस्ति। एवं जिज्ञासाशब्दगतसन्पदेपि विचारे जहल्लक्षणा न स्यात्। सन्पदार्थस्येच्छायाः विधिपरतंत्रत्वाभावबोधकमानस्यैव तद्विजिज्ञासस्वेतीच्छा विधायकागमबाधितत्वेन सन्पदस्य मुख्यार्थताया एव प्राप्तेः। किं चान्यशेषस्यामुख्यत्वे प्रस्तरवाक्यमन्यशेषत्वादमुख्यार्थमिति

तात्पर्यस्यानुपपत्तेर्जविशगतसर्वज्ञत्वकिंचिज्ज्ञत्वादीनामनुपपत्तेरैक्यस्य तात्पर्यविषयीभूताखंडप्रतीति निर्वाहाय लक्षणांगीकरणस्यैवोचितत्वात्। तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणाश्रयणस्य सर्वत्र दर्शनात्। न चैवं सत्यमुख्यार्थत्वं स्यादिति वाच्यम्। तद्धि प्रतीयमानार्थपरित्यागेनार्थांतरपरत्वं वा अशक्यार्थपरत्वम्? नाद्यः। सामानाधिकरण्येन प्रतीयमानस्यैक्यस्यात्यागात्। नांत्यः। जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि सोऽयं देवदत्त इत्यादिवाक्य इव शक्यैकदेशस्यैवान्वयाभ्युपगमात्। विशेषणबाधेन विशेष्यमात्रान्वयस्यैवात्र लक्षणाशब्देन व्यपदेशादिति। मैवम्। परीक्षया प्रत्यक्षादीनामद्वैतागमसमानयोगक्षेमप्रामाण्यस्यैव प्राप्तेर्विरोधस्य वज्रलेपत्वात्। यत्तु षड्भिर्लिंगैरित्यादि। तदपि न। अन्योन्याश्रयात्। सिद्धेऽखंडे तात्पर्ये तन्निर्वाहाय सार्वज्ञादित्यागेन लक्षणया विशेष्यपरतया मानांतराविरोधः। तदविरोधे च तात्पर्यलिंगैरखंडगोचरतात्पर्यसिद्धिरिति। लौकिकवाक्यस्य मानांतरविरुद्धार्थगोचरतात्पर्यकत्वेऽपि वैदिकवाक्यस्य न्यायगम्यतात्पर्यकस्य मानांतराविरुद्ध एव तात्पर्यकल्पनात्। न हीति। मानांतराविरोध एवोपक्रमादीनां तात्पर्यप्रमापकत्वं नतु तद्विरोधेऽपीत्याखंडलार्थः। वाक्यमिति। आगमवाक्यमित्यर्थः। न विधाविति। विधौ विधायके वाक्ये परः प्रतीयमानवाक्यार्थातिरिक्तोऽन्यो वाक्यार्थो नास्तीत्यर्थः। अन्यशेषेपीति। इयं गौः क्रय्येत्यस्य शेषभूते बहुक्षीरा स्त्र्यपत्या अनघप्रजेत्यादिवाक्ये प्रतीयमानबहुक्षीरादिसंसर्गपरत्वेन मुख्यार्थत्वात्। कामधेनुरिति। व्यतिरेकदृष्टांतः। हिरण्यदक्षिणाविधिशेषे सोरोदीद्यदरोधीत्तद्रुद्रस्य रुद्रत्वं यदश्रवसीयत तद्रजतꣳहिरण्यमभवत्। तस्माद्रजतꣳहिरण्यमदक्षिण्यं अश्रुजमित्यादिष्वपि प्रतीयमानसंसर्गपरत्वं विना रजतनिंदासिद्धेः प्रतीयमानसंसर्गपरत्वरूपमुख्यवृत्तिरेवाश्रितेत्यर्थः। प्रस्तरादीति। व्यतिरेकदृष्टांतः।

अत्र वदंति – "तात्पर्यविषयीभूतार्थबोधकत्वं हि मुख्यार्थत्वं, न शक्यार्थमात्रबोधकत्वम्। अन्यार्थतात्पर्यकत्वं चामुख्यार्थत्वं, न लाक्षणिकत्वमात्रम्। तथाचाद्वैतागमस्य तात्पर्यविषयीभूतार्थबोधनिर्वाहाय लक्षणाश्रयणेऽपि मुख्यार्थत्वमुपपन्नम्। एवं च सोमेन यजेतेत्यादिविशिष्टविधेर्विशेषणतात्पर्याभावान्मत्वर्थलक्षणायामपि स्वार्थापरित्यागाच्च नामुख्यार्थत्वम् जिज्ञासापदे तु ज्ञाधातुना इष्यमाणज्ञानलक्षणांगीकारानंगीकारमतभेदेऽपि सन्यदस्य विचारे जहल्लक्षणाभ्युपगमस्योभयत्र तुल्यत्वाच्छक्यार्थपरित्यागेऽपि विधितात्पर्यनिर्वाहान्ना मुख्यार्थत्वम्। न हि वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदमात्रेण लक्षणायामपि वाक्यस्यामुख्यार्थत्वम्। प्रतीत स्यार्थस्यानन्यशेषत्वेन मुख्यत्वात्। यत्र पुनः प्रतीत एव वाक्यार्थोऽन्यशेषत्वेन कल्प्यते तत्र वाक्यस्यामुख्यार्थत्वमेव। अन्यद्धि पदतात्पर्यम्। अन्यच्च

तथाप्युपधानरूपसृष्टिपदार्थविधानार्थं विधिप्रत्ययस्तावदवश्यं प्रयोक्तव्यः। स च धातुं विना न केवलं साधुप्रयोग इति यस्य कस्यचिद्धातोः प्रयोक्तव्यत्वे बुद्धिसन्निहित उपदधातिरेव प्रयुज्यते। सृष्टिशब्दोपता मंत्रा यासामिष्टकानामुपधाने वर्तते इत्येव सृष्टिपदार्थे इष्टकाविशेषणत्वेनोपस्थितस्योपधानविशेषस्य विधिसंबंधे क्लिष्टत्वाच्चेति वयं पश्यामः। केचित्त्वयं मंत्रविधिरिति समर्थयंते। न ह्येकया स्तुवत इत्यादीनामुपधानमेकांतिकं लिंगमस्ति येन प्राप्तिः स्यात्। इष्टकालिंगस्य स्त्रीलिंगशब्दप्रयोगादेः साधारणत्वेन ग्रहणासादनादिष्वपीष्टकानां प्राप्नुयुः। तथासत्यस्ति विधेरवकाशः। सत्यामप्युपधाने प्राप्तौ मध्यमचिति संबंधार्थमपि प्रत्यक्षविधानमर्थवद्भविष्यति। यां काचिद्ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चिति निदध्यादिति वचनात्। लिंगसमवायात्। चयने श्रूयते – प्राणभृत उपदधातीति। अत्रापि सृष्टिन्यायेन मंत्रविधिरिति पूर्वःपक्षः। लिंगप्रकरणप्राप्तमंत्रानुवादेनेष्टकोपाधानविधिरिति सिद्धांतः। एतस्यैव प्राणान् दधातीत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मंत्रानुवादः। पूर्वत्र द्वितीयादिमंत्रेषु सृष्टिलिंगानां बाहुल्यं । इह तु प्रथममंत्र एव प्राणभृल्लिंगमाम्नायते। अयं पुरोभौवनस्तस्य प्राणो वां यत इति एकस्यैव मंत्रस्य प्राणभृत्त्वेपि तत्सहचरिताः सर्व एव मंत्राः छत्रिन्यायेन प्राणभृच्छब्देन लक्ष्यंते। प्राण भृदप्राणभृद्गणेपि प्राणभृच्छब्दसमवायोऽस्तीति सर्वेषु तदनुवाकगतमंत्रेषु प्राणभृच्छब्दो गौणः। तत्सिद्ध्यादिभिर्हेतुंभिर्यजमानादिशब्दा गौणाश्रयाः गुणवृत्तय इति समग्रः सूत्रार्थः। तदुक्तं

"तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमभिः।
षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिते" ति।

विशेषस्तु टुप्टीकादौ द्रष्टव्यः। अनेकप्रमेयसंग्रहरूपत्वात्पेटिकाशब्दः।

अनन्यपरत्वादिति। अद्वैते तात्पर्यलिंगानां सत्त्वेनाद्वैततात्पर्यकत्वादन्यत्र तात्पर्यलिंगाभावेनान्यत्र तात्पर्याभाव इत्यर्थः। अत्रवदंति "प्रमाणांतरसंवादार्थ क्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेव तद्विरुद्धग्राहिणो "धूम एवाग्नेर्दिवा ददृशे", "अदितिर्द्यौः", "यजमानः प्रस्तर" इत्यादेः तद्विरोधेना मुख्यार्थत्वेऽप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन मुख्यार्थत्वोपपत्तेः। प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च नाद्वैतागमेन बाध्यते। बाध्यते तु तात्विकं प्रामाण्यम्। तत्तु परीक्षया न सिद्धमेवातो न विरोधः। धूम एवाग्नेरित्यादेस्तु मुख्यार्थत्वेन प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत। अतो विरोधात्तत्रामुख्यार्थत्वमिति विवेकः। यत्तु प्रत्यक्षाविरोधाय तत्त्वंपदलक्षणा नाऽश्रीयेतेति। तन्न। षड्विधलिंगैर्गतिसामान्येन वाऽखंएवावधार्यमाणस्य

तु प्रशंसेति चेदत्र ब्रूमः। अजादिषु प्रवृत्तावपशुशब्दस्य तदवयवभूतेन पशुशब्देन निषेध्यमर्पयता सन्निहितगवाश्वगतप्रशंसाया उपादानादपशुशब्दः प्रशंसानिमित्त इत्युच्यते। एतेनापशुशब्दोऽजादिषु प्रवर्तते। गवाश्वौ च स्तौतीति व्यधिकरणमिति परास्तम्। तत्सिद्धयादिषु शब्दप्रवृत्तिस्तुत्योः प्रस्तरादिनिष्ठत्वेपि प्रकृते भिन्नरूपत्वात्। अजादिष्वप्रशंसया प्रवर्तमानस्यापशुशब्दस्यार्थविशेष करणत्वाभावाच्च। न च रजतनिंदया हिरण्यस्तुतिवदजादिनिंदया गवाश्वयोः स्तुतिः स्यादिति वाच्यम्। अपशुशब्दात्स्पष्टं निंदाया अप्रतीतेः। तस्मात्प्रशंसैव सूत्रणीयेति प्रशंसानिमित्तोऽयमर्थवादः।

अयज्ञो वा एष यदसामा अयज्ञो वा एतद्यदछंदोममित्यादिष्वयमेव न्यायः। छंदोमशब्देन चतुर्विंशः चतुश्चत्वारिंशाष्टचत्वारिंश इत्येते त्रयः स्तोमा उच्यंते। अक्षरसंख्यासाम्येन गायत्री-त्रिष्टुब्जगतीछंदोभिर्गीयमानत्वात्। भूमा अग्निचयने श्रूयते। सृष्टीरुपदधातीति सृष्टिशब्दोपेता मंत्रा यासामिष्टकानामुपधाने विद्यंते ता इष्टकाः सृष्टय इत्युच्यंते। सृष्टिमानासामुपधानो मंत्र इति विगृह्य "तद्वा नासामुपधानो मंत्र इतीष्टकासु लुक्क मतोः" इति व्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात् सृष्टिशब्दोपेताश्चोपधानमंत्रा "एकया सूक्त" इत्यस्मिन्ननुवाक समाम्नाताः ब्रह्मासृज्यत भूतान्यसृज्यंतेत्यादिना सृजति धातोस्तेषु प्रयुक्तत्वात्। ते मंत्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयंते उत सृष्टिशब्दोऽनुवादरूपोऽर्थवादो वेति संशये मंत्ररूपगुणविधिरिति पूर्वः पक्षः। कुतः? उपदधातीत्यनेनाख्यातेनाभिसंबंधात्। न चार्थवादत्वमस्य संभवति। विध्यंतरेण सहैकवाक्यत्वाभावादिति प्राप्तेऽभिधीयते। लिंगप्रकरणाभ्यामेव मंत्राणां प्राप्तत्वान्न विधिः संभवति। तथा सति परिसंख्या स्यात्। बहुषु मंत्रेषु प्रकरणप्राप्तेषु सृष्टिविधानादन्ये परिसंख्यायेरन्। सा च त्रिदोषा। परिसंख्यातानां च मंत्रांतराणामानर्थक्यं स्यात्। तस्मान्न ते मंत्रा अत्र विधीयंते। किंतु तान् मंत्राननूद्येष्टकोपधानं विधीयते। सृष्टिशब्देनानुवादस्तु वक्ष्यमाणार्थवादोपपत्त्यर्थः। यथा सृष्टमेवावरुंध इति वक्ष्यमाणोऽर्थवादः। यदि विधिवाक्ये मंत्राणामनुवादकः सृष्टिशब्दो न स्यात्तदानीमर्थवादे सृष्टिशब्दप्रयोगाद्विध्यर्थवादयोर्वैयधिकरण्यभ्रमः स्यात्। तस्मान्मंत्रानुवादी सृष्टिशब्दो न गुणविधायकः। किं त्वर्थवादः। ननु प्रथममंत्रे सृजतिशब्दो न प्रयुक्तः, किंतु दधातिधातुः। एकया स्तुवते, प्रजा अधीयंतेति तत्पाठात् बाढम्। तथापि द्वितीयादिषु बहुषु मंत्रेषु सृजतिधातुप्रयोगाद्भूम्ना गुणेन सृष्ट्यसृष्टिसमुदाये सृष्टिशब्दो गौणः प्रवर्तत इति भाष्याभिप्रेतः पक्षः। एवं च "तद्वानासामुपधानो" इत्यादिव्याकरणसूत्रमप्यनुसृतं भवति। यद्यपि व्याकरणसूत्रानुसारेण सृष्टिशब्दार्थांतर्गतत्वादुपधानमपि न पृथग्विधेयम्।

जातिः।। अग्निर्वै ब्राह्मण इति वार्तिककारस्योदाहरणम्। आग्नेयो वै ब्राह्मणः ऐंद्रो राजन्यो वैश्यो वैश्वदेव इत्युदाहरणम्। अत्रापि पूर्ववन्नामधेयत्वगुणविधित्वार्थवादत्वसंदेहे अर्थवादत्वसिद्धांतः। निमित्तांतरकथानाय पृथगुक्तिः। अग्निसंबंधो मुखजन्यत्वगुणो ब्राह्मणे वर्तते। श्रूयते चाग्निब्राह्मणयोर्मुखजन्यत्वं कस्मिंश्चिदर्थबादे। प्रजापतिरकामयत। प्रजाः सृजेयेति। स मुखतः त्रिवृतं निरमिमीतअग्निर्देवता अन्वसृज्यत गायत्रीछंदो रथंतरं साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्याः मुखतो ह्यसृजंतेति। तस्मादाग्नेयशब्दः स्तावकः। एवमैंद्रो राजन्यो वैश्यो वैश्वदेव इत्यादिषु द्रष्टव्यम्। सारूप्यात्। आदित्यो यूपो यजमानो यूपः। अत्रापि त एव पक्षाः। सारूप्यं त्वत्र प्रवृत्तिनिमित्तम्। तच्च तेजस्वित्वादि। ननु सर्वत्र सारूप्यं गौणत्वनिमित्तम्। कोऽत्र विशेषः? इह चक्षुर्ग्राह्यसारूप्यं विवक्षितम्। प्रशंसा– प्रशंसाऽप्यपरं शब्दस्य गौणत्वे निमित्तम्। तथा हि। अपशवो वा अन्ये गो अश्वेभ्यः पशवो गोअश्वा इत्यत्र अजादिषु श्रूयमाणं यदपशुत्वं तस्यार्थवादत्वं न संभवति। पशुत्वनिषेधमात्रेण स्तुतेरसंभवात्। नामधेयत्वं त्वनाशंक्यमिति गुणविधित्वेन पूर्वःपक्षः। पशुकार्ये गवाश्वव्यतिरिक्तानामजादीनां प्रतिषेधप्रतीतेरिति। सिद्धांतस्तु – तत्र तत्राजादीनां विहितत्वादशक्यः पशुकार्येऽजादीनां प्रतिषेधः। पशुव्यतिरिक्तघटादिवचनस्य परशब्दस्यापशुशब्दस्य परत्राजादिषु गवाश्वगतप्रशंसानिमित्तः प्रयोगः। तस्मादर्थवादः। ननु सर्व एव प्रशंसानिमित्तोऽर्थवादः। किमत्र विशेषेणोपन्यस्यते? सत्यम्। तत्सिद्ध्यादिना गुणेन प्रस्तरादिषु प्रवृत्तो यजमानादिशब्दः प्रस्तरादेः प्रशंसाफलो भवति। इह तु शब्दप्रवृत्तिनिमित्तमपि गुणः प्रशंसैव। तथाहि। अयमत्रार्थः। अपशवो वा अन्ये गोअश्वेभ्यः इत्यत्र नञ्समासगेन पशुशब्देन प्रथमं गवाश्वगतं प्राशस्त्यमुपादाय पश्चात्तदभावो नञा पश्वंतरेषु कथ्यते। न हि पशुत्वं शक्यं प्रतिषेद्धुम्। अवश्यं च पशुशब्दोपात्तोऽर्थो नञा पश्वंतरेषु प्रतिषेद्धव्यः। शक्नोति चायं पशुशब्दो गवाश्वाभ्यामेकवाक्यतया संबद्धस्तद्गतं प्राशस्त्यं लक्षयितुम् तच्च नञा पर्युदसिष्यते। एतदुक्तं भवति। गवाश्वेषु यत्प्राशस्त्यं न तदन्येष्वस्ति। तस्मादप्रशस्तास्ते। गवाश्वमेव प्रशस्तम्। सोयं गवाश्वगतप्राशस्त्याभावः पश्वंतराणामपशूनां तुल्य इत्यनेनाभिप्रायेण पश्वंतराण्यपशव इत्युच्यंते। द्विप्रकारा हि प्रशंसा। वस्तुनि विद्यमानगुणोत्कर्ष एकः प्रकारः। स्तावकेन शब्देन संपादितो गुणोत्कर्षोऽपरः प्रकारः। गवाश्वयोरजादिभ्य उत्कर्षो लोकसिद्धो यः सोऽत्र निमित्तम्? अजादयः स्वभावतः पशवोऽपि संतो गवाश्वौ प्रत्यपशवः संपन्नाः, ईदृशो गवाश्वयोर्महिमेति स्तुतिः फलम्। नन्वपशुशब्दस्याजादिषु प्रवृत्तौ कथं गवाश्वगतं प्राशस्त्यं निमित्तम्? व्यधिकरणत्वात्। अजादिगतप्रशंसाभावस्तु निमित्तं स्यात्समानाधिकरणत्वात्। अतोऽप्रशंसैव सूत्रणीया न

अतो वैदिकशब्देषु न गौणीवृत्तिरिष्यते॥
अत्रोच्यते न सिंहत्वबुद्धिर्नरि कदाचन।
विलक्षणाकृतित्वेन विशेषस्यैव दर्शनात्॥
सादृश्येऽप्यत्र नारोपः स्पष्टभेदप्रतीतितः॥
किं तु स्वार्थाविनाभूतशौर्यादिगुणयोगतः।
पुंभिः प्रयुज्यमानस्य सिंहशब्दस्य गौणता।
अतो वेदेपि गौणत्वं संभवेद्गुणयोगतः॥

कथं तर्हि खपुष्पशशविषाणादिशब्दानां गौणत्वं "खपुष्पं भवत्सिद्धांतः" इत्यादौ। न हि तेषां मुख्यमभिधेयमस्ति, येन तत्सादृश्याद्गौणत्वं स्यात्। उच्यते।

"मुख्यमर्थं वदंत्येव शशशृंगादिका गिरः।
असद्विशेषं तत्रापि विशेषोऽस्तीति वक्ष्यते॥"

असत्यप्यसत्वाविरोधी विशेषोऽस्तीत्यनिर्वाच्यसाधकख्याति बाधान्यथानुपपत्तिभंगे ग्रंथकार एव वक्ष्यति। तस्माद्वेदेपि गौण्याः संभवाद्यजमानः प्रस्तरः, यजमान एक कपाल इत्यादिषु विचार्यते। नामधेयं वा गुणविधिर्वाऽर्थवादो वेति संदेहे सामानाधिकरण्यादेकमितरस्य नामधेयं प्रस्तरशब्दो वा यजमानस्य यजमानशब्दो वा प्रस्तरस्येति पक्षो भिन्नार्थत्वेन प्रसिद्धात्वान्नैकमितरस्य नामधेयं भवितुमर्हतीति निरस्तः। नापि तृतीयः। अर्थांतरवचनेनार्थांतरवचनस्य स्तुत्यसंभवात्। अष्टाकपालादिभिस्त्ववयवद्वारेण स्तुतिरुक्ता द्वादशकपालस्य। न च प्रस्तरावयववचनो यजमानशब्दः। येन स्तुतिः स्यात्। तस्मादन्यतरकार्येन्यतरविधानं गुणविधिः। तत्रापि यजमानस्य मुख्यत्वात् श्रुतिवृत्तो यजमानः प्रस्तरशब्दलक्षिते स्रुग्धाराणादौ प्रस्तरकार्ये विधीयते। तस्माद्गुणविधिरिति प्राप्तेऽभिधीयते। यजमानस्य स्रुग्धारणे विनियुक्तस्य स्वपदार्थकरणविरोधात्प्रस्तरवच्च सूक्तवाकेन प्रस्तरं प्रहरतीति प्रहरणापत्तेरेककपालवच्च सर्वहुतकरणात्सर्वतंत्रपरिलोपः स्यात्। तस्मादर्थबादः। कथं परशब्देन परस्य स्तवनं सामानाधिकरण्यं वा? गुणादिति ब्रूमः। कथमगुणवचनो गुणमभिदध्यात्? नाभिदधाति, किंत्वर्थसंबंधेन बोधयति। यजमानशब्दो हि स्वार्थमभिधत्ते। स चाभिहितः स्वसमवेतं स्वकार्यपरत्वं संबंधाद्बोधयति। तच्च प्रस्तरेऽप्यस्तीति प्रस्तरविबोधः। एवं स्वार्थसदृशे तद्गुणशालिनि तात्पर्यं भजमानः शब्दो गौणः संपद्यते। यथा लोके सिंहो देवदत्त इति। तस्य यजमानस्य कार्यसिद्धिः यजमानकार्यकरत्वं स्रुग्धारणादि यजमानशब्दस्य प्रस्तरे प्रवृत्तौ निमित्तं गुणः।

सारेण प्रयोजकव्यापारलक्षणाया अङ्गीकरणात्। तस्माद्विधौ तात्पर्यवति वाक्ये प्रतीयमानवाक्यार्थातिरिक्तोऽन्यः शेषी नास्तीत्येवंपरमेव तद्वचनम्। अतः सिद्धमद्वैतागमस्य लाक्षणिकत्वेऽपि मुख्यार्थत्वात् प्रत्यक्षबाधकत्वमिति शिवम्। ॥ इति प्रत्यक्षस्यागमबाध्यत्वम्॥

न्यायामृततरङ्गिणी

तस्माद्धूम एवेति। अर्थवादाधिकरणे "शास्त्रदृष्टविरोधाच्च" इति पूर्वपक्षसूत्रेण 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इत्यादीनां दृष्टविरोधादप्रामाण्यमाशंक्य "गुणवादस्तु" इति सिद्धांतसूत्रेण गुणवादमभ्युपेत्य प्रामाण्यमुक्तम्। तथा हि "सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः" इति मिश्रलिंगमंत्रविधिशेषो धूम एवाग्नेर्ददृशे इत्यादिरर्थवादः। दिवा अग्निरादित्यमनुप्रविशति रात्रावादित्येऽस्तमित्येतमर्थमुपपादयन्विधेयमर्थं स्तौति। धूम एवेत्यवधारणं तु दूरभूयस्त्वात्। दूरस्थैर्हि दिवा च धूम एव भूयान्दृश्यते नार्चिः। रात्रौ चार्चिर्भूयो दृश्यते न धूमः। अतो न दृष्टविरोधादप्रामाण्यमिति। अदितिर्द्यौरित्यादिमंत्रस्य चेति। मंत्राधिकरणे "अर्थविप्रतिषेधात्" इत्यादि सूत्रेणार्थविरोधाद्विरुद्धार्थकत्वात् "अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः", "एक एव रुद्रो न द्वितीयाय तस्थे", "सहस्रशो ये रुद्रा अधिभूम्याम्" इत्यादेरप्रामाण्यमाशंक्य "गुणादविप्रतिषेधः स्यात्" इति सिद्धांतसूत्रेण मातृत्वादिगुणैरदितिः स्यूयते तस्मादविरुद्धमित्यादिना गौणार्थत्वमेवांगीकृतम्। तदेतत्सर्वं शब्दस्य प्रत्यक्षबाधकत्वे विरुध्येत। मुख्यार्थपरत्वमेव स्यादित्यर्थः।

तत्सिद्धिरित्यादीति। प्रथमस्य चतुर्थेपादे विचारितं – तत्सिद्धिजातिसारूप्य प्रशंसाभूमलिंगसमवायाः। वैदिकशब्देषु क्वचिद्गौणीवृत्तिरस्तीति प्रतिपादयितुं गौण्या लक्षणं तावद्विचार्यते। "गौणत्वमेकदेशे किं वृत्तिः संघातवाचिनः। किमध्यारोपितार्थत्वं वृत्तिर्वा गुणयोगतः॥ नाद्यः शौर्यादिरहिते सिंहे नो सिंहगीरियम्। मुख्यवृत्तिं प्रपद्येताशतार्थे शतशब्दवत्॥ अतः सिंहत्वमारोप्य देवदत्ते प्रयुज्यते। सिंहशब्दोऽन्यथा न स्यात्तद्बोधः सिंहशब्दतः॥ शौर्यादिगुणयोगस्य सिंहत्वारोपकारणम्।

न चैवं मुख्यतापत्तिर्वाच्यस्यावास्तवत्वतः॥
वेदेऽध्यारोपकाभावान्नाध्यारोपस्तु संभवी।

जहल्लक्षणाभ्युपगमस्योभयत्र तुल्यत्वात्, शक्यार्थपरित्यागेऽपि विधितात्पर्यनिर्वाहात् नामुख्यार्थत्वम्। नहि वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदमात्रे लक्षणायामपि वाक्यस्यामुख्यार्थत्वम्। प्रतीतस्यार्थस्यानन्यशेषत्वेन मुख्यत्वात्। यत्र पुनः प्रतीत एव वाक्यार्थोऽन्यशेषत्वेन कल्प्यते, तत्र वाक्यस्यामुख्यार्थत्वमेव। अन्यद्धि पदतात्पर्यमन्यच्च वाक्यतात्पर्यम्। 'सैन्धवमानय' 'गङ्गायां वसन्ति' इत्यादौ वाक्यतात्पर्यैक्येऽपि पदतात्पर्यभेदात्। 'विषं भुङ्क्ष्व' इत्यादौ पदतात्पर्याभेदेऽपि वाक्यतात्पर्यभेदात्। अत एव 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिवाक्यार्थस्यावश्यं क्रेतव्येति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वात्, 'सोऽरोदीत्' इत्यादि वाक्यार्थस्य च 'बर्हिषि रजतं न देयं हिरण्यं दक्षिणा' इति विधिशेषत्वेन रजतनिन्दाद्वारा तत्प्राशस्त्यलक्षकत्वात्। 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति वाक्यार्थस्य 'शान्तउपासीत' इति शमविधिशेषत्वेनात्यनायाससिद्धत्वरूपतत्प्राशस्त्यलक्षकत्वादमुख्यत्वमेव। अतएव मानान्तर विरोध एव लक्षणेत्यपास्तम्। 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिना प्राशस्त्यलक्षणायां व्यभिचारात्। किं तु परमतात्पर्यविषयीभूतार्थप्रतीतिनिर्वाहायैव सर्वार्थवादेषु लक्षणा। एतावांस्तु विशेषः– विधिप्राशस्त्ये लक्षणातः प्रागर्थवादवाक्यार्थज्ञानम्। तस्य प्रमाणान्तरविरोधे बाध एव, यथा 'प्रजापतिरात्मनो वपामुदखिदत्' इत्यादौ। अतएव तत्र गुणवादमात्रम्। प्रमाणान्तरप्राप्तौ त्वनुवादमात्रम् 'अग्निर्हिमस्य भेषजं' इत्यादौ। अतएव तदुभयत्राबाधिताज्ञातज्ञापकत्वरूपप्रामाण्यशरीरानिर्वाहादप्रामाण्यम्। यत्र पुनः प्रमाणान्तरप्राप्तिविरोधौ न स्तस्तत्र प्रामाण्यशरीरनिर्वाहाद् भूतार्थवादत्वम् – यथा 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादौ अयमेव देवताधिकरणन्यायः। ननु तर्हि 'आदित्यो यूपः' इत्यादौ वाक्यार्थप्रतीत्यर्थमेव लक्षणाङ्गीकारादमुख्यार्थत्वं न स्यात्। न स्याद्यद्यादित्यसदृशो यूप इति वाक्यार्थपर्यवसानं स्यात्। किं तु गुणवृत्त्या प्रतीतस्यापि वाक्यार्थस्य यूपे पशुं बध्नातीति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वमस्त्येव, तेनैवामुख्यत्वम्, न त्वादित्यपदगौणतयेति तत्सिद्धिपेटिकायां सर्वोदाहरणेष्वप्यवान्तरवाक्यार्थप्रतीतये गुणवृत्तिप्रकाराः प्रदर्शिता इति द्रष्टव्यम्। कर्मप्राशस्त्यलक्षणा तु सर्वार्थवादसाधारणी तत्रास्त्येवेति नामुख्यार्थत्वानुपपत्तिः। अत उपपन्नं प्रस्तरादिवाक्यवैषम्यम् अद्वैतवाक्यस्य। यच्चोक्तम् अर्थवादमुख्यार्थत्वाय विधौ न लक्षणेत्येवंपरं शबरस्वामिवचनमिति, तन्न। अश्वप्रतिग्रहेष्टौ 'प्रतिगृह्णीयात्' इति विधौ प्रतिग्राहयेदिति व्यवधारणकल्पनया अर्थवादानु

यत्तु – प्रत्यक्षाविरोधाय तत्त्वम्पदयोर्लक्षणा नाश्रीयेतेति तन्न। षड्विधलिङ्गैर्गतिसामान्येन चाखण्ड एवावधार्यमाणस्य तात्पर्यस्यानुपपत्तेर्जीविशगतसर्वज्ञत्वकिञ्चिज्ज्ञत्वादीना मैक्यान्वयानुपपत्तेश्च। तात्पर्यविषयीभूताखण्डप्रतीतिनिर्वाहाय लक्षणाङ्गीकरणस्यैवोचितत्वात्। तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणाश्रयणस्य सर्वत्र दर्शनात्। न च एवं सति अमुख्यार्थत्वं स्यादिति वाच्यम्। तद्धि प्रतीयमानार्थपरित्यागेनार्थान्तरपरत्वं वा? अशक्यार्थत्वं वा? नाद्यः। सामानाधिकरण्येन प्रतीयमानस्यैक्यस्यात्यागात्। नान्त्यः, जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि 'सोऽयं देवदत्तः' इत्यादिवाक्य इव शक्यैकदेशस्यान्वयाभ्युपगमात्। विशेषणबाधेन विशेष्यमात्रान्वयस्यैवात्र लक्षणाशब्देन व्यपदेशात्। तथा चोक्तं वाचस्पतिमिश्रैः– 'प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैत वाक्यं त्वनन्यशेषत्वान्मुख्यार्थमेव। उक्तं हि शाबरभाष्ये – 'न विधौ परः शब्दार्थ' इति। यथा चापूर्वत्वाद्येकैकतात्पर्यलिङ्गेन 'यजमानः प्रस्तरः' इत्याद्यर्थवादवाक्यानां न स्वार्थपरत्वं तथा वक्ष्यामः। ननु अन्यशेषत्वानन्यशेषत्वे नामुख्यार्थत्वमुख्यार्थत्वयोः प्रयोजके। किं तु मानान्तरविरोधाविरोधौ। अन्यशेषेऽपि मानान्ताविरोधे 'इयं गौः क्रय्या बहुक्षीरा' इत्यादौ लोके, 'सोऽरोदीत्' इत्यादौ च वेदे प्रस्तरादिवाक्यवदमुख्यवृत्तेरनाश्रयणाद्। अनन्यशेषेऽपि 'सोमेन यजेत' इत्यादौ वैयधिकरण्येनान्वये विरुद्धत्रिकद्वयापत्त्या सामानाधिकरण्येनान्वये प्रत्यक्षाविरोधाय च सोमवता यागेनेति मत्वर्थलक्षणाया आश्रयणात्। एवं विचारविधायके 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे 'तद्विजिज्ञासस्व' इति श्रुतौ च मानान्तरविरोधेन विध्यन्वयाय जिज्ञासाशब्देन विचारलक्षणायाः 'सर्वं खल्विदं ब्रह्म' इत्यादौ चामुख्यार्थतायाः स्वीकृतत्वात्। सर्वस्यापि वाक्यस्यावाच्ये ब्रह्मणि लक्षणाया एवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च। अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारणत्वाच्च। शाबरं तु वचनमर्थवादमुख्यत्वाय विधौ न लक्षणेत्येवम्परम्। तस्मान्न प्रत्यक्षं शब्दबाध्यम् इति चेन्न। भावानवबोधात्। तात्पर्यविषयीभूतार्थबोधकत्वं हि मुख्यार्थत्वम्। न शक्यार्थमात्रबोधकत्वम्। अन्यार्थतात्पर्यकत्वाच्चमुख्यार्थत्वम्। न लाक्षणिकत्वमात्रम्। तथा चाद्वैतागमस्य स्वतात्पर्यविषयीभूतार्थबोधकत्वनिर्वाहाय लक्षणाश्रयणेऽपि मुख्यार्थत्वमुपपन्नमित्यवोचाम। एवं च 'सोमेन यजेत' इत्यादि विशिष्टविधेर्विशेषणे तात्पर्याभावान्मत्वर्थलक्षणायामपि स्वार्थापरित्यागाच्च नामुख्यार्थत्वम्। जिज्ञासापदे तु ज्ञाधातुनेष्यमाणज्ञानलक्षणाङ्गीकारानङ्गीकारमतभेदेऽपि सन्प्रत्ययस्य विचारे

अमुख्यार्थतायाश्च स्वीकृतत्वाच्च। सर्वस्यापि वाक्यस्या वाच्ये ब्रह्मणि लक्षणाया एवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च। अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारण्याच्च। शाबरवचनं तु अनुवादमुख्यार्थत्वाय विधौ लक्षणा न युक्तैवम्परम् तस्मान्न प्रत्यक्षं शब्दबाध्यम्। तदुक्तम्–

यजमानप्रस्तरत्वं यथानार्थः श्रुतेर्भवेत्।
ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः॥
इति प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्।

अद्वैतसिद्धिः

किं च परीक्षितप्रमाणभावशब्दबाध्यमपि प्रत्यक्षम्। ननु – प्रत्यक्षं यदि शब्दबाध्यं स्यात्तदा जैमिनिना 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्याद्यर्थवादस्य 'अदितिर्द्यौः' इत्यादिमन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते 'गुणवादस्तु', 'गुणादविप्रतिषेधः स्यात्' इत्यादिना गौणार्थता नोच्येत। 'तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवायाद्' – इति तत्सिद्धिपेटिकायां 'यजमानः प्रस्तर' इत्यादेगौणार्थता च नोच्येत। त्वयाऽपि प्रत्यक्षाविरोधाय तत्त्वम्पदयोर्लक्षणा नोच्येत। श्रुतिविरोधे प्रत्यक्षस्यैवाप्रामाण्यसंभवात्। न च – तात्पर्यलिङ्गानामुपक्रमादीनामत्र सत्त्वान्नाद्वैतश्रुतीनाममुख्यार्थत्वमिति वाच्यम्। 'यजमानः प्रस्तरः' इत्यादावप्यपूर्वत्वाद्येकैकलिङ्गस्य तात्पर्यग्राहकस्य विद्यमानत्वात्। एकैकलिङ्गस्य तात्पर्यनिर्णायकत्वे लिङ्गान्तरमनुवादकमेव। त्वन्मते प्रत्यक्षसिद्धे भेदे श्रुतिरिव। किं बाहुल्येन इति चेन्न। वाक्यशेषप्रमाणान्तरसंवादार्थक्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेव एतद्विरुद्धार्थग्राहिणो 'धूम एवाग्नेर्दिवा ददृशे', 'अदितिर्द्यौः' 'यजमानः प्रस्तर' इत्यादेस्तद्विरोधेनामुख्यार्थत्वेऽप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन मुख्यार्थत्वोपपत्तेः। प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च नाद्वैतागमेन बाध्यते। बाध्यते तु तात्विकं प्रामाण्यम्। तत्तु परीक्षया न सिद्धमेव। अतो न विरोधः। 'धूम एवाग्नेः' इत्यादेस्तु मुख्यार्थत्वे प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत। अतो विरोधात्तत्रामुख्यार्थत्वमिति विवेकः।

अयंच हेतुर्वक्ष्यमाणातिप्रसंगद्वयेपि बोध्यः। मृत्कलत्रकंटका दृष्टांताः॥ अदृश्यत्वमिति॥ ब्रह्मवदितिशेषः॥ घटवृत्तित्वादिनेति॥ दृश्यत्वं प्रातिभासिकत्वाख्यमिथ्यात्वव्याप्यं न। घटवृत्तित्वाद्घटत्ववत्। घटादीनां व्यावहारिकतयाप्रातिभासिकत्वापरपर्यायमिथ्यात्वव्याप्यत्वं घटवृत्तित्वादेर्नास्तीतिदृश्यत्वादिहेतोरपि शुक्तिरजतादौ तन्नस्यादित्यर्थः॥ इतिप्रत्यक्षस्याऽनुमानबाध्यत्वे बाधकविवरणं॥

२३. प्रत्यक्षस्य शद्धबाध्यत्वे बाधकम्

यदि चाक्षं शब्दबाध्यं तर्हि जैमिनिना तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिरित्याद्यर्थवादस्यादितिर्द्यौरित्यादि मन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते तदविरोधाय "गुणवादस्तु गुणादविप्रतिषेधः स्याद्" इत्यादिना गौणार्थता नोच्येत। तत्सिद्धिरित्यादितत्सिद्धिपेटिकयां च "यजमानः प्रस्तर" इत्यादेर्गौणार्थता नोच्येत। त्वया च प्रत्यक्षाविरोधाय 'तत् त्वम्' पदयोर्लक्षणा नोच्येत, श्रुतिविरोधात्प्रत्यक्षस्यैवाप्रामाण्य सम्भवात्। एतेनाद्वैतवाक्यमनन्यपरत्वान्नामुख्यार्थं प्रस्तरवाक्यादिकं तु अन्यपरमिति वाचस्पत्युक्तं निरस्तम्। सत्यपि तात्पर्यलिंगे मानान्तरविरोधे प्रस्तरादिवाक्यवत् सोमेन यजेतेत्यादिवच्चानन्यपरत्वस्यैवायोगात्। न हि कुरूपाम्, अशूरम् चोद्दिश्य अहो दर्शनीयेति सिंह इति च शतकृत्वः प्रयुक्तमपि वाक्यं वाच्यार्थपरम् भवति। न वा तत्त्वमसि वाक्यम् षड्विधातात्पर्यलिङ्गोपेतमपि मानांतरविरुद्धं वाच्यार्थपरम्। किं चोपक्रमोपसंहारादिकं हि प्रत्येकम् तात्पर्यलिङ्गम्। अस्ति च प्रस्तरादिवाक्येऽपूर्वता। त्वत्पक्षे च प्रत्यक्षसिद्धे भेदे श्रुतिरिवैकलिंगसिद्धे तात्पर्ये लिङ्गान्तरमनुवादकमेवेति किं तद्बाहुल्येन? यच्चोक्तं वाचस्पतिना– "प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैतवाक्यं तु न तथा। उक्तम् हि शाबरभाष्ये "न विधौ परः शब्दार्थ" इति। तन्न, अन्यशेषेऽपि प्रत्यक्षाविरुद्धे लोके "इयं गौः क्रय्या बहुक्षीरे" त्यादौ "कामधेनु" रित्यादाविवाऽमुख्यवृत्तेर्वेदेपि "सोऽरोदीदि" त्यादि प्रस्तरादिवाक्य इवामुख्यवृत्तेरनाश्रयणात्। अनन्यशेषेऽपि "सोमेन यजेते" त्यादौ वैयधिकरण्येनाऽन्वये विरुद्धत्रिकद्वयापातात्। समानाधिकरण्येनान्वये प्रत्यक्षाविरोधाय सोमवता यागेनेति मत्वर्थलक्षणायाः 'विचारविधायके च जिज्ञासासूत्रे तद्विजिज्ञासस्वेत्यादिश्रुतौ च प्रत्यक्षाविरोधाय जिज्ञासाशब्देन विचारलक्षणायाः' सर्वं खल्विदम् ब्रह्मेत्यादौ

न्यायामृतप्रकाशः

॥ औदुंबरीमिति॥ प्रमाणलक्षणे स्मृतिपादे चिंतितं। ''विरोधेत्वनपेक्षं स्यादसतिह्यनुमान''मित्यत्र ज्योतिष्टोमे ''औदुंबरीं स्पृष्ट्वोद्गाये''दिति श्रुत्या उदुंबरमयीं यज्ञसदस्स्थूणां स्पृष्ट्वा उद्गानं कर्तव्यमिति विहितं। स्मृतिकारास्तु तत्स्पर्शनविरुद्धं तस्याः कात्स्न्येंन वाससा वेष्टनं स्मरंति। ''औदुंबरीवा सर्ववेष्टयितव्ये''ति। तत्स्मरणं प्रमाणं नवेति संशये स्मृत्यधिकरणे स्मृतीनां मूलश्रुत्यनुमापकतया श्रुतिमूलकत्वेन प्रामाण्यसमर्थनादियमपि स्मृतिर्मूलश्रुतिमनुमापयंती प्रमाणमिति पूर्वपक्षः। स्पर्शनवेष्टनयोर्विरुद्धत्वेन तत्कर्तव्यताबोधकयोरपि औष्ण्यशैत्यवद्विरुद्धत्वाद्ब्रह्म वौष्ण्यप्रत्यक्षेण शैत्यानुमानस्येव प्रत्यक्षसिद्धस्पर्शनश्रुत्या सर्ववेष्टनश्रुत्यनुमानस्य बाधान्मूलश्रुत्याभावेनाप्रमाणं स्मरणमितिसिद्धांतः॥ ऐंद्र्येति॥ गार्हपत्यमिति प्रत्यक्षश्रुत्या बाधादिंद्रप्रकाशकत्वेनेंद्रशेषत्वानुमानं अप्रमाणमितिसिद्धांतितं। एतदधिकरणंचपूर्वमुपन्यस्तं॥ शरमयमिति॥ दशमाध्याये चतुर्थपादे चिंतितं। ''चोदनालिंगसंयोगे तद्विकारःप्रतीयेत प्रकृतिसंनिधानात्'' इत्यत्र सोमारौद्रचरौ श्रूयते ''शरमयं बर्हिर्भवती''ति। तत्र किंदर्शपौर्णमासिकाःकुशा न निवर्तंते निवर्तंतेवेति संशये उपदेशेन शराणां ''प्रकृतिवद्विकृतिःकर्तव्ये'' त्यतिदेशेन कुशानांचावगतत्वेन द्वयोरपि प्रमाणत्वात्समुच्चयइति पूर्वपक्षः। सिद्धांतस्तु बर्हिशब्दलक्षिते बर्हिःकार्ये शराणां विधायकस्य वचनस्य प्रत्यक्षत्वात्तैरेव कृतस्वकार्याणां कुशानां प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कल्पनं न प्रवर्तते। किंतु कुशव्यतिरिक्तांगप्रापकएव साधारणोऽतिदेश इत्यनुमीयते। अतःप्रापकाभावात्कुशा निवर्तंत इति सिद्धांतितं॥ स्मृतिरूपेणेति॥ स्मृत्याख्यलिंगेनेत्यर्थः॥ चोदनालिंगसारूप्येणेति॥ चोदनाविधिवाक्यं तत्सारूप्यरूपलिंगेनेत्यर्थ इति व्याख्येयं। यथा प्रकृतिवद्विकृतिःकर्तव्येति चोदनया इतरांगानां प्राप्तिः तथा तत्सारूप्येण कुशरूपांगस्यापि प्राप्त्यनुमानमित्यर्थः। अत्र सर्वत्राप्यनुमानप्रकारस्त्वित्थं। औदुंबरी श्रुत्युक्तसर्ववेष्टनयुक्ता बाधकाभावे सति सर्ववेष्टनप्रतिपादकस्मृतियुक्तत्वात्। यत् यदर्थप्रतिपादकस्मृतियुक्तं तत्तच्छ्रुत्युक्ततदर्थयुक्तं यथा संमतमिति सामान्यव्याप्तिः। कदाचनस्तरीरसि नेंद्रसश्चसिदाशुष इति मंत्रःइद्रशेषत्वप्रतिपादकश्रुतियुक्तः बाधकाभावे सतींद्रप्रकाशनसामर्थ्योपेतत्वात् यद्यत्प्रकाशनसमर्थं तत्तस्य शेषत्वप्रतिपादकश्रुतियुक्तं यथा संमतं। सोमारौद्रश्चरुःकुशबर्हिःप्रतिपादकश्रुतियुक्तः कुशश्रुतियुक्तदर्शपौर्णमासचोदनासदृशनिर्वापशब्दाष्टाकपालादिसंख्याद्धि देवतादियुक्तचोदनायुक्तत्वात् यद्यत्सदृशचोदनोपेतं तत्तदीयधर्मप्रतिपादकश्रुतियुक्तं यथासंमतमिति। नन्विदमापादनं मीमांसकमतविरुद्धं। औदुंबर्याद्युदाहरणेषु प्रत्यक्षेण श्रुतिरेव बाध्यतइत्येव प्रतिपादितमस्ति। नतु श्रुत्याऽनुमानं बाध्यतइति। अतःप्रत्यक्षस्य शब्दबाध्यत्वांगीकार एवेदमापादनीयं नतु प्रत्यक्षस्य लिंगबाध्यत्वांगीकारे। अतइदमापादनमयुक्तमित्यस्वरसादूषणांतरमाह॥ अग्र्यौष्ण्येति॥ आत्मस्थायित्वप्रत्यभिज्ञानमस्माभिर्नोक्त मित्यनुक्तोपालंभ इति शंकापरिहारायोक्तं॥ विवरणोक्तमिति॥ तत्क्षणिकत्वेति॥ आत्मक्षणिकत्वेत्यर्थः। प्रत्यक्षस्यानुमानबाध्यत्वेऽतिप्रसंगांतराण्याह॥ तथाचेत्यादिना॥ शशःशृंगी पशुत्वादित्यत्र शृंगित्वे पशुत्वं न तंत्रं किंतु गोत्वादिरूपःपशुत्वविशेषएवेत्यप्रयोजकतापरिहारायातिप्रसंगं तर्कानुसारेणोपपादयति॥ शृंगित्वइति॥ पशुत्वादिनेत्यत्रादिपदेन वस्तुत्वसंग्रहः। शशादेरित्यत्रादिपदेन तुरगसंग्रहः। तथाच भगवत्पादोक्तो ''वस्तुत्वात्तुरगःशृंगी''त्यतिप्रसंगःसंगृहीत इति ज्ञातव्यं। भूतचतुष्टयस्य पृथिवीत्वादृष्टेःपृथिव्या अपि पृथिवीत्वं न स्यादिति भगवत्पादोक्तातिप्रसंगमाह॥ गंधवदिति॥ तत्वोद्योतोक्तातिप्रसंगं हृदि निधायाह॥ पदार्थत्वादिनेति॥

ननु वैषम्यम्। तथाहि – किमिदमापाद्यते? श्रुतित्रयग्राह्मप्रत्यक्षमनुमानैर्बाध्येतेति वा? प्रत्यक्षविषयीभूतं श्रुतित्रयमिति वा? नाद्यः। विरोधाभावेन तद्बाध्यबाधकभावस्याशास्त्रार्थत्वात् अस्माभिरनभ्युपगमाच्च अनुक्तोपालम्भत्वेन निरनुयोज्यानुयोगापत्तेः। न द्वितीयः। प्रत्यक्षविषयीभूतश्रुतित्रयस्य लिङ्गबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिङ्गबाध्यत्वे विरोधाभावात्। न हि शब्दप्रत्यक्षयोरैक्यमस्ति। शब्दस्य सर्वप्रमाणापेक्षया बलवत्त्वमवोचाम। तस्मान्मौढ्यमात्रमेतन्मीमांसाविरोधोद्भावनमिति चेन्मैवम्। आद्यं तावदङ्गीकुर्मः। नच श्रुतित्रयग्राह्मप्रत्यक्षस्यानुमानैर्विरोधाभावेन कथं तद्बाध्यत्वापादनमिति वाच्यम्। साक्षाद्विरोधाभावेऽपि सत्प्रतिपक्षस्थले विरुद्धसाध्यद्वयव्याप्ययोरिव विरोधिसामाग्रीत्वेन श्रुतित्रयग्राह्मप्रत्यक्षस्य स्मृत्यादिरूपानुमानानां च स्वग्राह्यश्रुत्यर्थस्यानुमानग्राह्यश्रुत्यर्थस्य च विरोधित्वेन तद्द्वारा विरोधस्यावश्यकत्वात्। अन्यथा श्रुतेर्लिंगस्य च साक्षाद्विरोधाभावेन बाध्यबाधकभावो न स्यात्। न स्याच्च विरुद्धार्थप्रतिपादकयोर्वाक्ययोः साक्षाद्विरोधाभावेन बाध्यबाधकभावः। न चास्माभिरनभ्युपगमेन निरनुयोज्यानुयोग इति वाच्यम्। एवं ह्यनुकूलतर्कप्रतिपादनं क्वापि न स्यात्। शक्यते हि तत्रापि वक्तुं धूमाभावस्यास्माभिरनभ्युपगमेन निरनुयोज्यानुयोग इति। यदि च तत्र व्याप्यवन्ह्यभावस्वीकारेण धूमाभावरूपव्यापकापादनमिति तर्हि मिथ्यात्वानुमानेन प्रत्यक्षबाधस्यांगीकारेणाविशेषात् स्मृत्याद्यनुमानैः श्रुतित्रयग्राह्मप्रत्यक्षस्य बाधः स्यादित्यापादनादिति न कश्चिद्विशेषः। अत एव द्वितीयः पक्षोऽपि समीचीनः। श्रुतित्रयस्य हि अनुमानबाधकत्वं प्रत्यक्षत्वादेव। तथा च प्रत्यक्षस्यापि बाधककोटौ प्रवेशस्यावश्यकत्वे प्रकृते प्रत्यक्षस्यानुमानबाध्यत्वे तत्रापि स्मृत्याद्यनुमानैः प्रत्यक्षश्रुतिबाधः स्यादित्यापादने न कोऽपि दोषः। न च सर्वप्रमाणापेक्षया शब्दस्य प्राबल्यमवोचामेति वाच्यम्। तथात्वे प्रस्तरादिवाक्यजातस्य प्रत्यक्षविरोधेन लाक्षणिकत्ववर्णनं न स्यादित्यलं मीमांसानभिज्ञोपद्रवेणेति ।

अग्न्यौष्ण्यप्रत्यक्षं चेति॥ न चार्थक्रियासंवादेन श्रुत्यनुग्रहेण च तत्र प्रत्यक्षयोः प्राबल्येनानुमानबाधकत्वमिति वाच्यम्। एवं हि जगत्प्रत्यक्षस्यापि परीक्षितत्वेन श्रुत्यनुगृहीतत्वेन च प्राबल्यादनुमानबाधकत्वं स्यात्। न च परीक्षया व्यावहारिकमेव प्रामाण्यं व्यवस्थाप्यत इति परमार्थतः सत्ताभावविषययोरनुमानागमयोः कथं बाध इति वाच्यम्। तर्ह्यौष्ण्यादिप्रत्यक्षयोरपि परीक्षादिना व्यावहारिकमेव प्रामाण्यं व्यवस्थाप्यत इति परमार्थत औष्ण्याद्यभावग्राहकयोरनुमानयोः कथं बाध इति साधु समर्थितं बौद्धमतम्। व्यावहारिक्यपि व्यवस्था न स्यादिति॥ न चायोग्यशृंगादिसाधने प्रत्यक्षबाधस्यासम्भवेन तत्र व्याप्ति ग्राहक तर्केष्वाभासत्वस्य त्वयाऽपि वक्तव्यत्वेन व्यवस्थाया उभयसमाधेयत्वात्। न हि तर्काभाससग्रीचीनमनुमानं प्रमाणम्। येन प्रत्यक्षबाधकं स्यात्। प्रकृतं तु सत्तर्कसचिवं प्रबलं प्रत्यक्षस्य बाधकमेवेति वाच्यम्। अयोग्यशृङ्गादिसाधनं हि अयोग्यशृंगत्वपुरस्कारेण वा शृंगत्वपुरस्कारेण वा? नाद्यः। तेन रूपेण व्याप्यभावेन तया साधनस्यासंभवात्। न द्वितीयः। शृंगस्य स्थूलावयवविशेषस्य योग्यत्वनियमेन तत्र प्रत्यक्षबाधस्यैवासंभवात्। किञ्च यथा योग्यशृंगसाधकमनुमानं तर्काभाससहकृतं प्रत्यक्षबाधनाक्षमं तथा प्रकृतमनुमानमपि तर्काभाससयुक्तत्वात् प्रत्यक्षबाधनक्षमं न स्यात्। तथा च शशस्य शृंगसाधकानुमानतुल्ययोगक्षेमत्वात् प्रकृतमनुमानं न प्रत्यक्षबाधनक्षममिति स्थितम्। इति प्रत्यक्षस्यानुमानबाध्यत्वे बाधकम्।

तद्विरोधस्यावश्यकत्वात्। तथाहि – वेष्टनस्मृतिर्हि सर्ववेष्टनं विदधाति श्रुतिस्तु स्पर्शनम्। न चैकदा वेष्टनस्पर्शने सम्भवतः। तेन वह्निशैत्यानुमानवत् स्मृतेः प्रत्यक्षश्रुत्या बाधो युक्तः। न च व्रीहियवश्रुतिवत् स्पर्शनश्रुतिः पाक्षिकत्वेन योजनीयेति वाच्यम्। भवेदेवं यदि तद्वत् श्रुतिद्वयं प्रत्यक्षं स्यात्। तत्र हि अनन्यगत्या विकल्प आश्रीयते, द्वयोः प्रत्यक्षत्वेनान्यतरेणान्यतरबाधायोगात्। विनिगमकाभावाच्च। न च प्रकृते विनिगमकाभावः। प्रत्यक्षानुमानयोरेव विनिगमकत्वात्। न च शक्तेरेव प्रमेयत्वात् तस्याश्चाबाधात् अविरोध इति वाच्यम्। शक्तेः प्रमेयत्वे आहवनीयस्य पदेन बाधो न स्यात्। उत्पन्नशिष्टस्य च उत्पत्तिशिष्टेन बाधो न स्यात्। नित्यस्य नैमित्तिकेन बाधो न स्यात्। द्वयोरपि शक्तिसम्भवात्। तस्माच्छक्तिमात्रं न प्रमेयम्। किन्तु अनुष्ठानमेव। तथा च सर्ववेष्टनापाक्षिकस्पर्शनयोर्विरोधात् तद्बोधकयोरन्यतरबाधस्यावश्यकत्वे प्रत्यक्षश्रुतिविरोधेन स्मृतेरेव बाधो न्याय्यः। न च विकल्पाश्रयणम्। तस्याष्टदोषदुष्टत्वेनाश्रयितुमयोग्यत्वात्। तुल्यबलत्वाभावाच्च। तथा च प्रत्यक्षश्रुत्या स्मृतिरूपानुमानस्य बाध इति सिद्धान्तसङ्क्षेपः।

॥ ऐन्द्र्येति॥ इदमधिकरणं तु प्रत्यक्षस्य शीघ्रगामित्वेन प्राबल्यव्युत्पदाने विवृतमवगन्तव्यम्॥ शरमयमिति॥ दशमे चतुर्थपादस्य द्वितीयेऽधिकरणे चिन्तितम्। चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानादिति सूत्रम्। इदमाम्नायते – सोमारौद्रं चरुं निर्वपेत्। कृष्णानां व्रीहीणामभिचरन्तीति। तत्रेदं श्रूयते – शरमयं बर्हिर्भवति। तत्र संशयः – किं दार्शपौर्णमासिकाः कुशाः न निवर्तन्ते उत निवर्तन्त इति। पूर्वपक्षस्तु – दार्शपौर्णमासिकाः कुशा न निवर्तन्त इति। कुतः? प्रकृतिवद् विकृतिः कर्तव्येति चोदकप्रमाणेन प्राप्तत्वात्। न च शरमयं बर्हिर्भवतीति शरा अपि प्राप्नुवन्तीति वाच्यम्। तर्ह्युभयोः प्रमाणप्राप्तत्वात् समुच्चयोऽस्तु। न च शराणां प्रत्यक्षप्राप्तत्वेन चोदकानुमानप्राप्तकुशबाधकत्वमिति वाच्यम्। शरमयं बर्हिर्भवतीत्यत्र प्राचुर्यार्थत्वेन मयट्प्रत्ययोपपत्तेः विरोधाभावेन बाधकत्वासम्भवात् समुच्चयोपपत्तेरिति।

अत्र सिद्धान्तसूत्रं – चोदनेति। अत्र शराः तद्विकारः कुशविकारः कुशबाधका इत्यर्थः। कुतः? चोदनालिङ्गसंयोगात्। कथं चोदनालिङ्गसंयोग इति चेत् प्रकृतिलिङ्गेन बर्हिःशब्देन योगात्। तेन च प्रकृतिसन्निधानादिति। अयमभिप्रायः – शरमयं बर्हिर्भवतीति बर्हिःशब्दलक्षिते बर्हिःकार्ये विधायकस्य वचनस्य प्रत्यक्षत्वात् तैरेव कुशानां कृतकार्यत्वात् तत्प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कुशप्राप्तिविषये शरैर्बाध इति कुशव्यतिरिक्तांगप्रापकस्यैव तस्यानुमानमिति प्रापकाभावात् कुशा निवर्तन्त इति। न च मयटः प्राचुर्यार्थत्वोपपत्तेर्विरोधाभावात् शरकुशयोः समुच्चय इति वाच्यम्। नित्यं वृद्धशरादिभ्य इति सूत्रेण शरशब्दात् विकारे मयटो विधानात्। न च शरणां कुशविकारत्वम्। तथाच शरैः कुशानां बाध एव।

॥ सर्ववेष्टनश्रुत्यनुमानेनेति॥ विमता स्मृतिः सर्ववेष्टनश्रुतिमूलिका, स्मृतित्वात् अष्टकादिस्मृतिवदित्येवं रूपेणेत्यर्थः॥ इन्द्रशेषत्वश्रुत्यनुमानेनेति॥ विमतः 'कदाचन स्तरीरसी'ति मन्त्रः इन्द्रशेषत्वप्रतिपादकश्रुत्युपेतः तदर्थप्रकाशकत्वात् आग्नेयमन्त्रवदित्येवं रूपेणेत्यर्थः। कुशश्रुत्यनुमानेनेति॥ विमतो विकृतियाग कुशमयबर्हि बोधकश्रुत्युपेतः चोदनास्वरूपत्वात् आग्रयणयागवदित्येवं रूपेणेत्यर्थः। सर्वैव मीमांसा उन्मीलिता स्यादिति।

न्यायामृतकण्टकोद्धारः

॥ औदुम्बरीमिति॥ प्रमाणलक्षणस्मृतिपादे द्वितीयाधिकरणे चिन्तितं – विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति सूत्रम्। अत्र श्रुतिविरुद्धस्मृतिरुदाहरणम्। औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिः औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुतिः। क्रीतराजके भोज्यान्न इति स्मृतिः। अग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यमिति श्रुतिः। अत्र स्मृतौ राजशब्देन सोमो ग्राह्यः। श्रुतौ च संस्थितशब्देन समाप्तिः। अत्राद्यस्मृतिश्रुत्योरौदुंबरीशब्देन ज्योतिष्टोमे सदोनामकस्य मण्टपस्य मध्ये काचिदौदुम्बरी शाखा खन्यते। साऽत्र गृह्यते। सा च सर्वा वेष्टयितव्येति स्मृत्यर्थः। तां स्पृष्ट्वा उद्गाता उद्गानं कुर्यादिति श्रुत्यर्थः। किमिमे स्मृती धर्मे प्रमाणमुताप्रमाणमिति सन्देहः। किं तावत् प्राप्तम्? एते स्मृती धर्मे प्रमाणम्। कुतः? कर्तृसामान्यादेव। न च श्रुतिविरुद्धत्वादेतयोरप्रामाण्यमिति वाच्यम्। यदि श्रुतिविरोधेन स्मृत्यप्रामाण्यं स्यात्ततो अनेकशाखाखिलाश्रुतानधीतवेदवाक्यविरोधसम्भावनया अष्टकादिस्मृतीनामप्रामाण्यं स्यात्। ततश्चातीताधिकरणार्थो बाधितः स्यात्। क्वचित् प्रामाण्यं क्वचिदप्रामाण्यमित्यर्धजरतीयं च स्यात्। न च प्रत्यक्षश्रुतिविरोधात् स्मार्तश्रुतिकल्पनानवकाश इति वाच्यम्। व्रीहियवश्रुतिवत् द्वयसम्भवात्। यत्र हि द्वयोरसम्भवस्तत्रैकविषयेण प्रत्यक्षेणेतरविषयानुमानं प्रमेयापहारद्वारा निराक्रियते। यथा प्रत्यक्षेण शैत्यानुमानम्। यत्र तु द्वयसंभवस्तत्र शीघ्रं प्रवृत्तमप्येकमितरस्य विषयं नापहरतीति तद्विषयमनुमानं न बाधते। न च प्रकृतेऽपि द्वयं न सम्भवति। यगुगपदुपसंहर्तुमशक्यत्वादिति वाच्यम्। व्रीहियवबृहद्रथन्तरग्रहणाग्रहणादिविषयश्रुतिवद् युगपदुपसंहर्तुमशक्यत्वेऽपि श्रुतिद्वयसम्भवात्। तस्मात् प्रत्यक्षेणापि स्पर्शनविधिना सर्ववेष्टनविषयश्रुत्यनुमानं न शक्यं निराकर्तुम्। कथं तर्हि श्रुतिलिङ्गादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधः? तत्रापि श्रुतिद्वयसम्भवादिति चेदुच्यते। न हि तत्र प्रमेयापहारनिबन्धनो बाधः। किन्तु कल्पनामूलोच्छेदात्। श्रुतिकल्पनं हि तावत् यावत् मन्त्राम्नानमनवगतप्रयोजनं प्रकरणी चाकृतर्थः, यदा च प्रत्यक्षया श्रुत्या द्वयोरपि नौराकांक्ष्यं तदाऽऽकांक्षाधीना कल्पना तदपगमे गच्छति। प्रकृते तु प्रत्यक्षया श्रुत्या न स्मृतेर्मूलाकांक्षा निवर्तते, येन मूलोच्छेदादनुमानविरोधः स्यात्। न च प्रमेयापहारद्वारा प्रत्यक्षेण शैत्यानुमानवत् प्रत्यक्षश्रुतिविरोधः किं न स्यादिति वाच्यम्। वैषम्यात्। दृष्टान्ते हि वह्नेरौष्ण्यशैत्ये न संभवतः। प्रकृते तु व्रीहियवादिवत् श्रुतिद्वयसम्भवात्। किञ्च श्रुतिस्मृतिप्रमेये न विरुद्धे। शक्तिर्हि प्रमेयम्। न हि स्पर्शनशक्त्या वेष्टनशक्तिः वेष्टनशक्त्या स्पर्शनशक्तिर्बाध्यते। व्रीहियवशक्तिवत्। तस्मात् विरोध एव नास्ति। विरोधे वा व्रीहियववत् विकल्प एवाश्रयणीय इति न कुत्राप्यप्रामाण्यमाशङ्कनीयम्। तस्मात् श्रुतिविरोधेऽपि स्मृतिद्वयं प्रमाणमित्युत्सूत्रः पूर्वपक्षः।

अत्र सिद्धान्तसूत्रं – विरोधे त्विति। अस्यार्थः- तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। श्रुतिविरोधे स्मृतेः प्रामाण्यमनपेक्षम् अनादरणीयं स्यात्। हि यस्मात् असति श्रुतिविरोधे मूलश्रुत्यनुमानमुक्तं न तु सतीति। यदि स्मृतिः स्वातन्त्र्येण प्रमाणं स्यात् ततोऽविरोधवत् विरोधेऽपि प्रामाण्यं प्राप्नुयात्। न चैवं मूलश्रुतिद्वारकत्वात् तत्प्रामाण्यस्य तद्विरोधे प्रामाण्यमेव कुतो भवेत्? विरोधवदविरोधेऽपि अप्रामाण्यप्रसञ्जने सर्वत्रोत्सर्गापवादन्यायः समुच्छिद्येत। अत एव नार्थवैशसम्। न च श्रुतिद्वयार्थसम्भवात् श्रुतिस्मृत्योर्विरोध एव नास्ति, व्रीहियवश्रुतिवदिति वाच्यम्। परस्परविरुद्धार्थाभिधायकत्वेन

अनुक्तोपलंभमात्रत्वेन निरनुयोज्यानुयोगापत्तेः। अत एव न द्वितीयः। प्रत्यक्षविषयभूतस्य श्रुतित्रयस्य लिंगबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिंगबाध्यत्वेपि विरोधाभावात्। न हि शब्दप्रत्यक्षयोरैक्यमस्ति। शब्दस्य सर्वप्रमाणापेक्षया बलवत्त्वांगीकारादिति। अत्रोच्यते। आद्यस्तावद्युक्तः। न च श्रुतित्रयग्राह्मिप्रत्यक्षस्यानुमानैर्विरोधाभाव इति वाच्यम्। प्रत्यक्षविषयश्रुत्या स्पर्शानुकूलसर्ववेष्टनं गार्हपत्यशेषत्वं शरबर्हिष्कत्वं च प्रतिपाद्यते। अनुमानैस्तु सर्ववेष्टनं इंद्रशेषत्वं कुशबर्हिष्कत्वं च प्रतिपाद्यत इति अर्थविरोधकृतश्रुतिविरोधपूर्वकः प्रत्यक्षानुमानानामस्ति विरोधः। अत एव तार्तीयोऽप्राप्तबाध इत्युच्यते। यथाहुः–

"कल्प्यस्य शास्त्रस्य तु कल्पनं यन्निरुद्ध्यते मूलनिकृंतनेन।
क्लृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरंति॥" इति।

तस्मादस्त्येव प्रत्यक्षस्यानुमानैर्विरोधः। द्वितीयोऽपि युक्तः। प्रत्यक्षविषयस्य श्रुतित्रयस्य श्रुत्यनुगुणानुमानबाधकत्वं हि प्रत्यक्षविषयत्वेन, न तु श्रुतित्वमात्रेण। अनुमिताया अपि श्रुतेः प्रत्यक्षश्रुतिबाधकत्वप्रसंगात्। तस्मात्साधूक्तं सर्वैव मीमांसोन्मूलिता स्यादिति।

अग्न्यौष्ण्यप्रत्यक्षं चेति। अत्र वदंति अग्न्यौष्ण्यप्रत्यक्षात्मस्थायित्व-प्रत्यभिज्ञाप्रत्यक्षयोरर्थक्रियासंवादश्रुत्यनुग्रहाभ्यां प्राबल्येनानुमानबाधकत्वम्। अपरीक्षितप्रत्यक्षं हि परीक्षितानुमानापेक्षया दुर्बलं, नीलं नभ इति प्रत्यक्षमिव नभोनीरूपत्वानुमानापेक्षया। अतो न सामान्यतोदृष्टमात्रेण सर्वसंकरापत्तिरिति। अत्रोच्यते। सुखपर्यंतपरीक्षायाः जगत्सत्यत्वप्रतिपादकश्रुत्यनुग्रहस्य सन् घट इति प्रत्यक्षेऽपि सत्त्वेन तस्याप्यनुमानापेक्षया बलवत्त्वात्। त्वन्मते अस्तीत्येवोपलब्धव्य इत्यादीनामप्यखंडार्थत्वेनात्मनि स्थायित्वे संसर्गाप्रतिपादकत्वाच्चेति साधूक्तं कालात्ययापदिष्टोच्छेदः स्यादिति। तथा च शृंगित्व इति। अत्र वदंति – अयोग्यशृंगादिसाधने प्रत्यक्षबाधस्यासंभवेन तत्रव्याप्तिग्राहकतर्केष्वाभासत्वस्य त्वयापि वक्तव्यत्वेन व्यवस्थाया उभयसमाधेयत्वात्। न हि तर्काभाससप्रीचीनमनुमानं प्रमाणमिति केनाप्यभ्युपेयत इति। अत्रोच्यते। शृंगस्य योग्यत्वनियमात् शृंगानुमानस्य योग्यशृंगविषयत्वेन तत्र प्रत्यक्षबाधस्य संभवात्। अन्यथाऽनौष्ण्यस्यातींद्रियत्वोक्तिसंभवेन तत्रापि बाधोद्भावनमसंभवि स्यात्। तस्मात्प्रत्यक्षस्यानुमानाबाधकत्वे पशुत्वादिना शृंगादिसाधनमपि स्यादेवेति साधूक्तम्। घटवृत्तित्वादिनेति। घटमात्रवृत्तित्वादिनेत्यर्थः। तेन चित्त्वादीनां दृष्टांतत्वसंभवो न वाऽसिद्धिरिति।

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यामक्षं नो लिंगबाधितम्॥
प्रत्यक्षस्यानुमानबाध्यत्वे बाधकम्।

अतः स्मर्तृपुरुषांतराणामिह प्रत्यक्षसंभवात्, तस्य चात्मप्रत्यक्षतुल्यत्वान्न स्मार्तश्रुतिनिराकरणम्। तदुक्तं–

"आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन।
प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्षसमं हि तत्॥" इति।

ततश्चात्मीयपरकीयप्रत्यक्षविषयश्रुतिविहितयोः स्पर्शनवेष्टनयोस्तुल्यकक्ष्यतया विकल्प एव। स चांशे बाध एवेति सर्ववेष्टनश्रुत्यनुमानमपि स्पर्शनश्रुतिप्रत्यक्षस्य बाधकमेवेति चेन्नैवम्। परकीयप्रत्यक्षादप्यात्मीयप्रत्यक्षस्य विस्रंभणीयतया परप्रत्ययमनादृत्यात्मीयप्रत्ययेनैव व्यवहारः क्रियते। अतोऽत्र स्पर्श एवानुष्ठीयते। न तु सर्ववेष्टनमिति फलतोऽप्रामाण्यं श्रुतिविरुद्धानां स्मृतीनाम्। यथाहुः–

"यावदेकं श्रुतौ कर्म स्मृतौ चान्यत्प्रतीयते।
तावत्तयोर्विरुद्धत्वे श्रुत्यनुष्ठानमिष्यते॥" इति।

विरोधे त्वनपेक्षं स्यादिति श्रुतिस्मृत्योर्विरोधे यत्प्रमाणांतरानपेक्षं श्रुतिवाक्यं तदेव ग्राह्यम्। असति ह्यात्मप्रत्यये परप्रत्ययानुमानक्लेशाश्रयणमिति सूत्रार्थः। नन्वौदुःम्बर्याः सर्ववेष्टनमशक्यम्। यो हि तस्याः प्रदेशोऽधोभागस्थस्तस्य वेष्टयितुमशक्यत्वादिति चेन्न। वेष्टयित्वाऽपि गर्ते निक्षेपसंभवात्। तस्मात्प्रत्यक्षश्रुतिविरुद्धस्मृतिमूलश्रुतिर्यावन्न स्वस्य प्रत्यक्षविषयस्तावदनुष्ठानमात्रम्। ततः परं तु विकल्प इति स्मृत्यनुमानं न प्रत्यक्षबाधस्येष्टे। तस्मायुक्तो दृष्टांत इति।

मंत्रसामर्थ्यरूपेणेति। एतच्च श्रुतिलिंगाधिकरणे निरूपितप्रायमिति पृथक् नोच्यते। चोदनालिंगसारूप्येणेति। दशमाध्याये चतुर्थपादे चिंतितम्। चोदनालिंगं संयोगेन तद्विकारः प्रतीयते। सोमारौद्रवरौ श्रूयेते-शरमयं बर्हिर्भवतीति। तत्र किं दार्शपौर्णमासिकाः कुशाः न निवर्तंते निवर्तंते वेति संदेहे शराणां कुशानां चोपदेशातिदेशरूपप्रमाणवत्तया अवगतत्वात्समुच्चय इति पूर्वः पक्षः। बर्हिःशब्दलक्षिते बर्हिःकार्ये शराणां विधायकस्य वचनस्य प्रत्यक्षत्वात् तैरेव कृतस्वकार्याणां कुशानां प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कल्पनं न प्रवर्तते, किं तु कुशव्यतिरिक्तांगप्रापकस्यैव तस्यानुमानमिति प्रापकाभावात्कुशा निवर्तंत इति सिद्धांतः। चोदनायाः यल्लिंगं निर्वपति यजेतेत्यादिशब्दः अष्टाकपालादिसंख्या एकद्विदेवत्वादि तत्संयोगेन तत्सारूप्येण तद्विकारः प्रतीयते इति सूत्रार्थः।

सर्वैव मीमांसोन्मूलिता स्यादिति। अत्र वदंति किमिदमापाद्यते? श्रुतित्रयग्राहिप्रत्यक्षमनुमानैर्बाध्येतेति वा प्रत्यक्षविषयीभूतं श्रुतित्रयमिति वा। नाद्यः। विरोधाभावेन तद्बाध्यबाधकभावस्य शास्त्रार्थत्वाभावात्। अस्माभिरनभ्युपगमाच्च।

इति। अतो वेष्टयेत्स्पृशेदित्यशक्यार्थविधानात् न तावदुभयोरपि प्रामाण्यं संभवतीत्यवश्य मन्यतरद्बाधितव्यं। तत्र प्रत्यक्षेणानुमानस्य बाधोऽग्नाविव शैत्यानुमानस्येति सिद्धमप्रामाण्यं स्मृतीनां श्रुतिविरुद्धानाम्। व्रीह्यादौ तु द्वयोरपि प्रत्यक्षत्वेनागृह्यमाणविशेषत्वान्नैकेनेतरस्य बाधः संभवति। विरुद्धार्थत्वाच्च न द्वयोरांजस्येन प्रामाण्यम्। न चाप्रामाण्यमविद्यमानदोषयोः संभवतीति गत्यंतराभावादुभयोऽपि पाक्षिको बाधः कल्प्यते। न चैवं शास्त्रस्याप्रामाण्यम्। यथा सामान्यशास्त्रस्य विशेषशास्त्रबाधितस्यापि नाप्रामाण्यं तद्वदिहापि। ननु बाधितं च भवत्यप्रामाण्यं न भवतीति व्याहतमेतत्। सत्यमेव। न त्वत्र परमार्थतः शास्त्रार्थो बाध्यते। किं तु प्रतिपक्षमनालोचयतो यः शास्त्रस्य स्वरसतः सार्वत्रिकः प्रत्ययः सोऽत्र बाध्यते। तद्बाधाच्च पाक्षिकानुमानपरत्वं शास्त्रस्याध्यवसीयते। न चैवं स्मृतिवशेन श्रुतिस्वरूपभंगेन स्पर्शनस्य पाक्षिकत्वं कल्पयितुं शक्यते। स्मृतेः स्वरसतोऽप्रमाणत्वेन श्रुतिबाधासामर्थ्यात्। श्रुतिकल्प्यनस्य प्रत्यक्षश्रुतिविहितस्य स्पर्शनविरोधेन विरुद्धत्वात्। ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतिरुपपद्यते। यस्मिन् पक्षे सा नास्ति तत्र स्पर्शाभावेन वेष्टनस्यापि शक्यानुष्ठानत्वात्तद्विषयश्रुतिकल्पनमनुपपन्नमिति चेत् न। इतरेतराश्रयात्। स्वरसतो हि श्रुतिवाक्यादपाक्षिकं स्पर्शनं गम्यते। तस्मिंश्चापाक्षिके न स्माश्रुतिकल्पनमशक्यत्वात्। न हि स्पृशता वेष्टयितुं शक्यते। तत्र स्पर्शनस्य पाक्षिकत्वे सति शक्यार्थस्मृतिकल्पिता श्रुतिरात्मानं लभते। तस्यां च लब्धात्मिकायां तद्विरोधात्स्पर्शनस्य पाक्षिकत्वमितीतरेतराश्रयत्वं स्यात्। तस्मात्प्रत्यक्षश्रुतिविरुद्धास्मृतिरप्रमाणम्। तस्मात्सर्ववेष्टनस्मृतिरूपमनुमानं प्रत्यक्षविषयस्पर्शनश्रुतिविहितस्पर्शविरुद्धसर्ववेष्टनश्रुतिसाधकं न भवति। किं तु स्वयमेवाप्रमाणं भवति यथा, तथा दृश्यत्वादिलिंगरूपमनुमानमपि सन्घट इत्यादि प्रत्यक्षविरुद्धमिथ्यात्वसाधकं न भवति। स्वयमेवाप्रमाणं भवतीत्यर्थः। नन्वनुपपन्नो भाष्यकारोक्ताप वादाधिकरणसिद्धसर्ववेष्टनस्मृतिरूपो दृष्टांतः। वार्तिककारदर्शिताधिकरणभंगप्रकारेण सर्ववेष्टनस्मृतिमूलस्य सर्ववेष्टनश्रुतेः सत्त्वेन सर्ववेष्टनस्मृतेरपि प्रमाणत्वात्। तथा हि। मन्वादिग्रंथजातस्य शिष्टग्रहणहेतुकं कल्पितं वेदमूलत्वं कथं पुनरपोद्यते। किंच बाधकसद्भावात्साधकाभावतोऽथवा। श्रुत्या भावोऽवसीयेत न द्वेधाप्युपपद्यते। न तावदृश्यादर्शनं बाधकम्। सर्वशाखानुपलंभात्। न च श्रुत्यभावनियतं किंचिल्लिंगं दृश्यते। विरुद्धश्रुतिदर्शनं तु षोडशिग्रहणादि श्रुतिभिरनैकांतिकम्। नापि साधकाभावः। न हि स्वप्रमाणप्रवृत्त्यभावमात्रेण वस्त्वभावनिश्चयः। सर्वपुरुषप्रमाणाभावस्त्वसिद्धः। स्मर्तृप्रत्यक्षस्य तद्ग्रंथानुमितस्य सत्त्वात्। नित्यानुमेयत्वे हि सर्वेषामिहानुमानमेव प्रमाणं स्यात्। तच्च प्रत्यक्षश्रुतिविरोधे नोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादीषत्करमभावावधारणं स्यात्। न च तदस्ति। अंधपरंपरादोषात्।

श्रुत्युक्ततदर्थयुक्तं, यथा संमतमिति सामान्यव्याप्तिः। नेंद्र सश्चसीति। कदाचन स्तरीरसीति मंत्रः श्रुत्युक्तेंद्रशेषकः। बाधकाभावे सतींद्रप्रकाशनसामर्थ्योपेतत्वात्। यद्यत्प्रकाशनसमर्थं तत्तथा यथा संमतम्। चोदनालिंगसारूप्येणेति। सोमारौद्रः श्रुत्युक्तकुशबर्हिषः कुशश्रुतियुक्ता। पौर्णमासचोदनासदृशनिर्वापशब्दद्विदेवतादियुक्तचोदनायुक्तत्वात्। यद्यत्सदृशचोदनालिंगं तत्तथा यथा संमतमिति। अधिकरणविचारस्त्वेवं प्रथमस्य तृतीये विचारितम् – विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्। ज्योतिष्टोमे सदोनामकस्य मंटपस्य मध्ये किंचिदौदुंबरीसंज्ञमुदुंबरवृक्षस्य द्विशिखं काष्ठं निखन्य स्थाप्यते। तस्या औदुंबर्याः सर्वा औदुंबरी वेष्टयितव्येति स्मृत्या सर्ववेष्टनं विहितम्। प्रत्यक्षेणा वेदेन औदुंबरीं स्पृष्ट्वोद्गायेदित्यनेन स्पर्शो विहितः। तदेवंजातीयां प्रत्यक्षश्रुतिविरुद्धां स्मृतिमुदाहृत्य किं प्रमाणमप्रमाणं वेति। पूर्वपक्षस्तु – श्रुतिवदेव तद्विरुद्धाऽपि स्मृतिरपि प्रमाणम्। ननु श्रुतिमूला स्मृतिः प्रमाणम्। न च श्रुतिविरुद्धायाः स्मृतेर्मूलं श्रुतिरस्ति। अतो न स्मृतिः प्रमाणमिति चेत् मैवम् श्रुतिविरुद्धस्मृतिमूलश्रुतेरपि संभवात्। तस्माद्यत्र द्वयोः श्रुत्योरसंभवस्तत्रैकविषयेण प्रत्यक्षेणेतरविषयानुमानं प्रमेयापहारादनायासेन निराक्रियते वह्नाविव शैत्यानुमानम्। यत्र तु द्वयसंभवस्तत्र तु शीघ्रं प्रवृत्तमपीतरत्रेतरस्य विषयमपहरतीति तद्विषयमनुमानं न शक्नोति प्रतिषेद्धुम्। संभवति च युगपदनुपसंहरणीयार्थमपि श्रुतिद्वयं व्रीहियवबृहद्रथंतरग्रहणाग्रहणविषयश्रुतिवदिति प्रत्यक्षेणापि स्पर्शनविधिना सर्ववेष्टनश्रुत्यनुमानं न शक्यं निराकर्तुम्। कथं तर्हि श्रुतिलिंगादिषु पूर्वपूर्वेणोत्तरस्य बाधस्तत्रापि श्रुतिद्वयसंभवात्। न क्लृप्तया कल्प्या निराकर्तुं शक्या। उच्यते। नैवात्र प्रमेयापहारनिबंधनो बाधः। किं तु कल्पनामूलोच्छेदनात्। यावद्धि मंत्राम्नानमनवगतप्रयोजनं प्रकरणी चाकृतार्था तावदेव तत्सिद्ध्यर्थं श्रुतिकल्पनं प्रमाणवत्। यदा तु क्लृप्तया श्रुत्या द्वयोरपि नैराकांक्ष्यं तदा मूलोच्छेदादाकांक्षाधीना श्रुतिकल्पना नोन्मज्जति। अत्र तु प्रत्यक्षया श्रुत्या न स्मृतेर्मूलाकांक्षा निवर्तते। यतो मूलोच्छेदादनुमानविरोधः स्यात्। अतोऽत्रानुमानस्य प्रत्यक्षेणाविरोधात् विरुद्धानामपि प्रामाण्यमिति प्राप्तेभिऽधीयते। अशक्यार्थविषयता हि मूर्धाभिषिक्तं श्रुतीनामप्रामाण्यनिदानं सागरं तरेदित्यादिवत् अशक्यं संस्पृशता वेष्टयितुं वेष्टयित्रा स्प्रष्टुं वा। तदुक्तं।

"अप्रामाण्यं विरुद्धानामशक्यार्थविधानतः।
औदुंबरीं न शक्नोति सर्वां वेष्टयितुं स्पृशन्।
वेष्टितां चापि संस्प्रष्टुमतोऽन्योन्यविरोधतः।
प्रमेयापहृतेरेव बाधः स्याद्वह्निशैत्यवत्॥"

योगापत्तेः। अतएव न द्वितीयः। प्रत्यक्षविषयीभूतश्रुतित्रयस्य लिङ्गबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिङ्गबाध्यत्वे विरोधाभावात्। नहि शब्दप्रत्यक्षयोरैक्यमस्ति। शब्दस्यच सर्वप्रमाणापेक्षया बलवत्त्वमवोचाम। तस्मान्मौढ्यमात्रमेतन्मीमांसाविरोधोद्भावनम्।

ननु प्रत्यक्षस्य लिङ्गबाध्यत्वे वह्नयौष्ण्यप्रत्यक्षं शैत्यानुमानस्य आत्मस्थायित्वप्रत्यभिज्ञानं च क्षणिकत्वानुमानस्य बाधकं न स्यात्, प्रत्युतानुमानमेव तयोर्बाधकं स्यात् इति चेन्न। अर्थक्रियासंवादेन श्रुत्यनुग्रहेण च तत्र प्रत्यक्षयोः प्राबल्येनानुमानबाधकत्वात्। अपरीक्षितप्रत्यक्षं हि परीक्षितानुमानापेक्षया दुर्बलं, 'नीलं नभः' इति प्रत्यक्षमिव नभो नीरूपत्वानुमानापेक्षया। अतो न सामान्यतो दृष्टमात्रेण सर्वसङ्करापत्तिः। नन्वेवं पशुत्वेन शृङ्गानुमानमपि स्यात्। लाघवात् पशुत्वमेव शृङ्गित्वे तंत्रं, न तु तद्विशेषगोत्वादिकम्; अननुगतत्वेन गौरवादित्येतत्तर्कसध्रीचीनत्वेन प्रत्यक्षापेक्षया प्राबल्यात्। अनुकूलतर्कसाचिव्यमेव हि अनुमाने बलम्। एवं च येन केनचित् सामान्यधर्मेण सर्वत्र यत्किञ्चिदनुमेयम्, लाघवतर्कसाचिव्यस्य सत्त्वात्। तावतैव च प्रत्यक्षबाधकत्वादिति व्यावहारिक्यपि व्यवस्था न स्यात्। न ह्यत्र प्रत्यक्षबाधादन्यो दोषोऽस्ति इति चेन्न। अयोग्यशृङ्गादिसाधने प्रत्यक्षबाधस्यासंभवेन तत्र व्याप्तिग्राहकतर्केष्वाभासत्वस्य त्वयाऽपि वक्तव्यत्वेन व्यवस्थाया उभयसमाधेयत्वात्। न हि तर्काभाससध्रीचीनमनुमानं प्रमाणमिति केनाप्युपेयते। अत उपपन्नं सत्तर्कसचिवमनुमानं प्रत्यक्षस्य बाधकमिति। इति प्रत्यक्षस्यानुमानबाध्यत्वसिद्धिः।

न्यायामृततरङ्गिणी

औदुंबरीमिति। औदुंबरी नाम ज्योतिष्टोमे क्रतौ सदो मंटपे विद्यमाना उदुंबरमयी स्थूणा। तां स्पृष्ट्वा उद्गाता नाम ऋत्विक् गानं कुर्यादिति श्रुत्यर्थः। ऐंद्येति। कदाचन स्तरीरसि नेंद्र सश्चसि दाशुषे इत्येतया इंद्रप्रकाशिकया ऋचा गार्हपत्यमग्निमुपतिष्ठते। शरमयमिति। शराः कुशसदृशतृणविशेषाः। तेषां शराणां वेदिस्तरणार्थं बर्हिर्भवति।

औदुंबरीति। तामूर्ध्वदेशेन वाससा वेष्टयतीति विहितं यदौदुंबर्याः स्थूणायाः वेष्टनं तत्सर्वप्रदेशेऽप्यौदुंबर्याः कर्तव्यमित्येतमर्थं औदुंबरी सर्वा वेष्टयितव्येति स्मृतिः प्रतिपादयति। सा च स्वमूलभूतां श्रुतिमनुमापयति। अनुमानं चैवम् – औदुंबरी श्रुत्युक्तसर्ववेष्टनयुक्ता। बाधकाभावे सति सर्ववेष्टनप्रतिपादकस्मृतियुक्तत्वात्। यद्यदर्थप्रतिपादकस्मृतियुक्तं तत्

२२. प्रत्यक्षस्य अनुमानबाध्यत्वे बाधकम्

यदि तु प्रत्यक्षं लिंगबाध्यम्, तर्हि ''औदुम्बरीं स्पृष्ट्वोद्गायेत्'' ऐद्रचा गार्हपत्यमुपतिष्ठते,'' ''शरमयं बर्हिर्भवति'' इति श्रुतित्रयग्राह्मप्रत्यक्षं च यथाक्रम मौदुम्बरी वा सर्वा वेष्टयितव्येतिस्मृतिरूपेण सर्ववेष्टनश्रुत्यनुमानेन ''नेन्द्र! सश्चसिदाशुष'' इति मन्त्रसामर्थ्यरूपेण इन्द्रशेषत्वश्रुत्यनुमानेन चोदनालिङ्गसारूप्येण कुशश्रुत्यनुमानेन बाध्येतेति सर्वैव मीमांसोन्मूलिता स्यात्।

अग्न्यौष्ण्यप्रत्यक्षं च तच्छैत्यानुमित्या विवरणोक्तं आत्मस्थायित्वप्रत्यभिज्ञानं च बौद्धोक्ततत्क्षणिकत्वानुमित्या बाध्येतेति कालात्ययापदिष्टोच्छेदःस्यात्। तथा च शृङ्गित्वे पशुत्वं तन्त्रम्, न तु तद्विशेषोगोत्वादीत्यादितर्कानुगृहीतेन पशुत्वादिना शशादेस्तात्त्विकं व्यावहारिकं वा शृङ्गम्। गन्धवद्द्रव्यस्य भूतत्वेनाऽपृथिवीत्वं पदार्थत्वादिनान्नाभिमतस्यानन्नत्वं सुखस्य निरुपाधिकेष्टत्वाभावः दुःखस्य निरुपाधिकानिष्टत्वाभावः, असद्वैलक्षण्येन शुक्तिरूप्यस्यापि सत्यत्वम्, अप्रातिभासिकत्वादिना प्रपञ्चस्यादृश्यत्वम्, घटवृत्तित्वादिना दृश्यत्वस्य मिथ्यात्वाव्याप्यत्वं च स्यादिति व्यावहारिक्यपि व्यवस्था न स्यात्। न ह्यत्र प्रत्यक्षबाधादन्यो दोषोऽस्ति प्रत्यक्षस्यानुमानबाध्यत्वे बाधकम्।

अद्वैतसिद्धिः

किंच विपक्षबाधकसचिवमनुमानमपि प्रत्यक्षबाधकम्। ननु – एवमपि 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्', 'ऐन्द्रचा गार्हपत्यमुपतिष्ठते', 'शरमयं बर्हिर्भवति' इति श्रुतित्रयग्राहि प्रत्यक्षं यथाक्रमं 'औदुम्बरी सर्वा वेष्टयितव्या'इति स्मृतिरूपेण सर्ववेष्टनश्रुत्यनुमानेन, 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इति मन्त्रसामर्थ्यलक्षणेनेन्द्रशेषत्वश्रुत्यनुमानेन, चोदनालिङ्गरूपेण कुशश्रुत्यनुमानेन च बाध्येतेति सर्वमीमांसोन्मूलिता स्यादिति – चेन्न। वैषम्यात्। तथा हि – किमिदमापाद्यते, श्रुतित्रयग्राहिप्रत्यक्षमनुमानैर्बाध्येतेति वा, प्रत्यक्षविषयीभूतश्रुतित्रयमिति वा? नाद्यः, विरोधाभावेन तद्बाध्यबाधकभावस्य शास्त्रार्थत्वाभावात्, अस्माभिगरनभ्युपगमाच्च। अनुक्तोपालम्भमात्रत्वे निरनुयोज्यानु

ज्ञानमुपजीव्यंस्यादित्यर्थः॥ परीक्षितत्वेति॥ इदंरूप्यमितिज्ञानं चापरीक्षितमितिभावः। येन विनेत्यादिरूपं पूर्वमुक्तमुपजीव्यत्वं परीक्षितत्वविशेषितमेव प्राबल्ये तंत्रमित्येवं नास्माकमेव परीक्षितत्वविशेषणमावश्यकं किंनाम भट्टोक्तं पश्चात्तनत्वापरपर्यायं परत्वं प्राबल्ये प्रयोजकमित्यंगीकुर्वतस्तवाप्यावश्यकमित्याह॥ नहीति॥ इति भट्टेनांगीकृतत्वाद्धेतोः। त्वन्मतेपि व्यवहारे भट्टनय इत्यंगीकुर्वतस्तवमतेपि। परत्वमात्रमेव कुतो न प्राबल्ये तंत्रमित्यतआह॥ अन्यथेति॥ बाह्येति॥ वेदस्यापौरुषेयत्वेन पूर्वत्वात् बाह्यागमस्य बौद्धागमस्य पौरुषेयत्वेन पश्चात्तनत्वादितिभावः। तत्त्वं स्यात् प्राबल्यं स्यात्। ततश्चभ्रमबाह्यागमाभ्यां प्रमावेदयोरेव बाधापत्तिरितिभावः। एवंसति परीक्षितत्वस्य तवाप्यावश्यकत्वात्परीक्षितत्वविशिष्टमेवोपजीव्यत्वं प्राबल्ये तंत्रं। इदंच इदंरजतमिति ज्ञाने नास्तीत्याह॥ परीक्षितत्वंचेति॥ अभेदज्ञानांशइति॥ तादात्म्यारोपांशइत्यर्थः। इदमंशेत्वस्त्येव परीक्षितत्वं। तदंशे उपजीव्यत्वमप्यस्त्येवेतिभावः। कुतोनोपजीव्यत्वं तादात्म्यरूपांश इत्यतआह॥ सजातीयेति॥ इदं रजतं इदंरजतमिति ज्ञानद्वयं जातं तत्रापि स्वसमानविषयकभ्रमरूपज्ञानांतरसंवादसत्त्वेन तस्यापि सजातीयसंवादत्वापत्तिरत उक्तं। विशेषदर्शनजन्येति ज्ञानांतरविशेषणं। तादृशं च ज्ञानं प्रमारूपमेव भवति। अतएव साक्षात्स्वविषयविषयकमानांतरसं वादोहि सजातीयसंवाद इति प्रवादः॥ रूप्यार्थक्रियेति॥ ज्ञाननिष्ठप्रामाण्यव्यवस्थापनद्वारा ज्ञानविषयविषयकरूप्योचितार्थक्रियाकारित्वरूपो विजातीयसंवाद इत्यर्थः। नन्वेतादृशसंवादादिकं पूर्वज्ञानस्य चेत्स्यात्तदा तस्यापि परीक्षितत्वमेव स्यादितिचेत्तत्राह॥ दृश्यतेचेति॥ प्रकृतेच जगत्सत्यत्वग्राहिप्रत्यक्षं तु परीक्षितमित्याह॥ जगत्सत्यत्वेति॥ नन्वेवं प्रतिषेध्यसमर्पकस्योपजीव्यस्योपजीवकेन बाधांगीकारेऽभेदश्रुतिं प्रति प्रतिषेध्यार्पकभेदश्रुतिरेव बाध्या स्यादितिचेत्तत्राह॥ जीवेशाभेदश्रुतौचेति॥ तथाच निषेध्यार्पकतयोपजीव्यमपि यदि परीक्षितं तर्ह्युपजीवकस्यैव बाधकमितिभावः। ननु परीक्षितत्वमप्यप्रयोजकमेव परीक्षाया अपि दोषाभावादिज्ञानरूपत्वेन तत्राप्यनाश्वास एवेत्यतआह॥ इत्थमेवेति॥ अपौरुषेयत्वेन हेतुना तज्ज्ञाने दोषाभावज्ञाने तद्रूपपरीक्षायामित्यर्थः॥ त्वदुक्तेत्यादि॥ दृश्यत्वाद्यनुमानं हेत्वाभासाददिदोषरहितं अनुमानयोग्यानां दोषाणामनुपलंभात् इत्येवं हेत्वाभासादिराहित्यरूपपरीक्षायामित्यर्थः। आनुगुण्यज्ञानरूपपरीक्षायां। नन्विदं रूप्यमिति ज्ञानोपि परीक्षितत्वविशिष्टमुपजीव्यत्वमस्तीत्याशंक्य निषेधति॥ नेदंरजतमिति ज्ञाने धर्मिभूतो य इदमंशःतदर्पकइत्यर्थः॥ तथापीति॥ नेदं रजतमित्यत्र इदमंशमात्रं धर्मि नतु रजतत्वविशिष्टं इदमंशमात्रे रूप्यनिषेधेनैवेष्टसिद्धेः। एवंच यदुपजीव्यं तन्न बाध्यं इदमंशमात्रस्याबाधात्। यद्बाध्यं रजतत्ववैशिष्टयं न तदुपजीव्यं रजतत्वविशिष्टस्याधर्मित्वादित्यर्थः। नन्वेवमैक्यबोधनेपि ब्रह्मस्वरूपमात्रमेव धर्मि नतु सार्वज्ञादिविशिष्टं ब्रह्मस्वरूपं। एवंच यदुपजीव्यं तन्न बाध्यं यद्बाध्यं न तदुपजीव्यमिति नैक्यश्रुतेरुपजीव्यविरोधइत्यतआह॥ शिष्टमिति॥ ऐक्यवाक्ये सार्वज्ञादिना भावरूपेण निर्दुःखत्वादिनाऽभावरूपेण वाऽसाधारणधर्मेणैव ब्रह्मोद्देष्टव्यं उत चित्त्वादिना साधारणधर्मेण। द्वितीये चितएव जीवैक्यं सिद्धचेन्न ब्रह्मणः जीवचितो जीवैक्यस्य ममापि सिद्धत्वात्। तस्मादाद्य एवांगीकार्यः। तथाचोपजीव्यविरोधःसुस्थ इत्याद्यैक्यभंगे वक्ष्यतइत्यर्थः॥ प्रत्यक्षस्योपजीव्यत्वेन प्राबल्यविवरणं॥

विश्वस्य तात्विकत्वं व्यावहारिकेण विरुद्धधर्माधिकरणत्वेन जीवेशभेदस्य चतात्विकत्वं सिध्येदित्यन्वयः। शब्दार्थस्य योग्यतादिना समसत्ताकत्वाभावेऽतिप्रसंगमाह॥ प्रातिभासिकेति॥ नन्वयं प्रदेशो बिंबवान् प्रतिबिंबवत्त्वादिति प्रतिबिंबेन बिम्बानुमानं क्रियते तत्र बिंबस्य सत्यत्वात् प्रतिबिंबस्य प्रातिभासिकतया मिथ्यात्वेन तत्र सामानाधिकरण्यगर्भव्याप्तेरेवाभावात्कथं सत्यभूतबिंबरूपाऽनुमेयस्य व्याप्त्यादिसम सत्ताकत्वमित्यतआह॥ प्रतिबिंबस्येति॥ प्रतिबिंबस्य मिथ्यात्वेन साध्यसामानाधिकरण्यरूपव्याप्त्यभावेपि बिंबरहितस्थलेऽवृत्तित्वं वा बिंबराहित्येनावृत्तित्वं वा व्याप्तिरस्त्येव। तथाच प्रातिबिंबस्य सत्यत्ववादिमतेपि बिंबरहितावृत्तित्वमस्त्येव। प्रतिबिंबस्य मिथ्यात्ववादिमतेपि प्रतिबिंबस्य सत्यत्वाभावादेव प्रतिबिंबरहितावृत्तित्वमस्त्येव। अविनाभावरूपव्याप्तिरस्त्येवेत्यर्थः। ननु धूमाद्यनुमानस्यातत्वावेदकत्वेन तन्निष्ठव्याप्त्यादेरपि व्यावहारिकत्वेनाग्नेरपि व्यावहारिकतया तात्विकत्वाभावेनानुमेयस्य व्याप्त्यादिसमसत्ताकत्वमस्ति। दृश्यत्वानुमानस्य तु तत्वावेदकतया व्याप्त्यादिसमसत्ताकत्वाभावेपि न दोष इत्यप्रयोजकतायामाह॥ नचेति॥ कुतो न चेत्यतआह॥ नहीति॥ कारणं विनापि कृप्तनियमत्यागे बाधकमाह॥ अकस्मादिति॥ एवमनुमेयस्य व्याप्त्यादिसमसत्ताकत्वमुपपाद्यानुमितिप्रामाण्यादिनापि समसत्ताकत्वमुपपादयितुमुत्तरोग्रंथः। तत्रेदमाशंकते॥ नन्विति॥ तथापीति॥ अनुमेयस्य व्याप्त्यादिसमसत्ताकत्वे सत्यपीत्यर्थः॥ कथमिति॥ येनानुमितिप्रामाण्यस्य सत्यत्वेऽनुमेयस्य सत्यत्वं स्यादितिभावः। अप्रमाणत्वेन अतत्वावेदकप्रमाणत्वेन। तद्विषयस्य अतत्वावेदकप्रमाणविषयस्य। तथाचानुमित्यादिप्रामाण्यग्राहकस्य प्रत्यक्षस्याप्रामाण्येऽनुमितिप्रामाण्यस्यापि मिथ्यात्वापत्त्या विषयस्यानुमेयस्यापि मिथ्यात्वमेव। प्रमाणांतरेण तत्सिध्यसंभवात् प्रत्यक्षस्य चाप्रमाणत्वात्। अद्वैतश्रुतिजन्यज्ञानप्रामाण्यग्राहकस्य प्रत्यक्षस्याप्रमाणत्वेन तद्विषयस्य श्रौतधीप्रामाण्यस्य मिथ्यात्वेपि श्रुतिबोध्याद्वैतस्य सत्यत्वमुपपद्यते। श्रुतेःप्रमाणत्वेन तयैव तत्सिद्धिसंभवादित्यर्थः॥ अर्थाबाधेति॥ अर्थाबाधरूपप्रामाण्यस्यार्थसत्त्वपर्यवसन्नतया प्रामाण्यबाधेऽर्थबाध एवेतिभावः। ननु श्रुतेः प्रमाणत्वात्तद्बोध्याद्वैतस्य सत्त्वमुपपद्यत इतिचेन्न। श्रुतेरन्यार्थत्वेन स्वार्थे तात्पर्याभावादित्याशयात्॥ उक्तमिति॥ किंचोपजीव्यत्वात्प्राबल्यमक्षस्येत्येतदुपरि समाधानमुक्तंमित्यर्थः। पूर्वधीत्युक्त्या उपजीव्यत्वमुक्तं भवति। नेदं रूप्यमितिधीरेव। यत्प्रामाण्यमिति॥ अनुमित्यादिप्रामाण्यं स्वस्वरूपसिद्धचर्थं साक्षिप्रामाण्यायत्तं व्याप्त्यादिज्ञानप्रामाण्यायत्तंच भवतीति तत्तस्योपजीव्यं। नन्वेवमनुमितिप्रामाण्यस्य स्वरूपसिद्धचर्थं स्वोत्पत्त्यर्थं व्याप्त्यादिज्ञानप्रामाण्यायत्तत्वे प्रामाण्यस्य गुणजन्यत्वापत्त्या परतस्त्वापत्तिरित्यत उक्तं॥ अपवादनिरासार्थमिति॥ तथाचानुमित्यादिप्रामाण्यं तार्किकमते उत्पत्तौ व्याप्त्यादिज्ञानप्रामाण्यायत्तं। अस्मन्मतेत्वपवादनिरासार्थं बुद्धिदोषनिरासार्थं यत्प्रामाण्यायत्तं तत्तस्योपजीव्यमित्यर्थः। यत्प्रामाण्याधीनसिद्धिकं यत्प्रामाण्यं तत्तस्योपजीव्यमित्यर्थो द्रष्टव्यः। एवंसति पूर्वस्येदंरूप्यमिति ज्ञानस्योपजीव्यत्वमेव नास्तीत्याह॥ नचेति॥ सर्वज्ञत्वादीति॥ ब्रह्मात्मैक्यबोधने स्वरूपमात्रस्य नोपजीव्यत्वं। तथात्वे चैतन्यं चैतन्याभिन्नमिति बोधनापत्त्या सिद्धार्धबोधनापत्तेः। तथाच सर्वज्ञत्वादिविशिष्टं चैतन्यं आत्माभिन्नमिति बोधनीयं। तथाच सर्वज्ञत्वादिविशिष्टबुद्धेरुपजीव्यत्वात्तदप्रामाण्ये तदुपजीविब्रह्मात्मैक्यबुद्धेरप्यप्रामाण्यमेवेत्यर्थः। प्रतिषेध्यज्ञानं इदंरूप्यमिति ज्ञानं॥ नदोषइति॥ उपजीव्यत्वे कथंबाध्यत्वमितिदोषोनेत्यर्थः। तंत्रमिति॥ येन इदं रूप्यमिति

दित्याद्यागमस्तज्जातीयत्वमात्रेण प्राबल्यमिति संप्रदायः॥ ज्ञानासमवायीति॥ ज्ञानासमवायि कारणात्ममनस्संयोगाधारत्वादात्मवदित्यर्थः॥ हेतुमात्रेति॥ ''युगपज्ज्ञानानुत्पत्तिर्मनसो लिंग'' मित्युक्तत्वेन यत्संयोगवशाज्ज्ञाने क्रमः प्रक्रमते तदेकं क्रमिकज्ञानासमवायिकारण संयोगाधारभूतं किंचिद्द्रव्यमणुभूतमंगीकार्यं। तथाच मनोविभुत्वानुमानस्य बाधकीभूतं यत् ''सुखादिप्रतीतिःक्रमिकसंयोगवत्करण साध्याक्रियात्वाच्छिदिक्रियावदि'' त्येवमाद्यनुमानं तत् हेतुमात्रग्राहकत्वेनोपजीव्यमित्यर्थः। यद्यपीदं पक्षीभूतमनोग्राहकमपीति न हेतुमात्रग्राहकं तथापि ज्ञानासमवाय्याधारत्वेनैव मनोग्राहकं। न मनस्त्वेन केवलं मनःस्वरूपमात्रग्राहकमिति संप्रदायः॥ सर्वेति॥ व्याप्याद्यशेषेत्यर्थः। ननु युष्माभिःसन्घट इत्यादिचाक्षुषप्रत्यक्षविरोधोऽभिहितस्तस्य दृश्यत्वादिलिंगापेक्षितग्राहित्वेनोप जीव्यत्वेपि ''नेह नाने'' त्यादिशब्दस्वरूपादिग्राहकत्वाभावाच्छब्दापेक्षितसर्वग्राहित्वेन कथमुपजीव्यत्वं येन प्राबल्यं स्यादित्यतआह॥ चक्षुरादेरिति॥ सन्घटइत्यादिसत्त्वग्राहिणइत्यर्थः॥ तद्ग्राहीति॥ शब्दस्वरूपग्राहिश्रोत्रं तज्जन्यज्ञानप्रामाण्यादिग्राही साक्षीति ध्येयं॥ रूपादीनामपि पक्षत्वात् रूपादिरूपधर्म्यंशइति वा रूपादिमद्घटादिप्रपंचरूपधर्म्यंशइतिवार्थः। ननु साक्षादनुपजीव्यस्य उपजीव्यसजातीयत्वमात्रेण प्राबल्यमदृष्टचरमित्यत आह॥ दृष्टंचेति॥ अशुचित्वागमस्य ''नारं स्पृष्ट्वे'' त्यादेरित्यर्थः॥ तदिति॥ नरशिरःकपालेत्यर्थः॥ उपजीव्यशुचित्वेति॥ दृष्टांतीभूते शंखे शुचित्वग्राहितयोपजीव्यभूत ''त्रैलोक्ये यानी'' त्यादिशब्देत्यर्थः। नन्वथापि अनुमानं प्रति प्रत्यक्षं यथोपजीव्यं तथा प्रत्यक्षं प्रत्यनुमानमप्यपजीव्यं ज्ञातेनहि चक्षुरादिना घटासत्त्वं गृह्यत इति वक्तव्यं। तत्स्वरूपज्ञानंच रूपादिज्ञानजन्यं। तथाचानुमानस्य यथा व्याप्याद्यंशे प्रत्यक्षापेक्षा तथा प्रत्यक्षस्यापि स्वस्वरूपसिद्धिं प्रत्यनुमानापेक्षा तुल्येत्याशंक्य निराकरोति॥ यद्यपीति॥ तथापीति॥ इंद्रियस्याऽज्ञातकरणत्वाज्ज्ञानजननार्थं न स्वस्वरूपज्ञानापेक्षा। अनुमानादीनां तु ज्ञानजननार्थमेव प्रत्यक्षापेक्षेति विशेषसद्भावान्नानुमा प्रत्यक्षं प्रत्युपजीव्येत्यर्थः। नन्वनुमानविरुद्धत्वात्प्रत्यक्षस्यैवाप्रामाण्यं किं न स्यादित्यतआह॥ अक्षेति॥ तदिति॥ चक्षुस्साक्ष्यादीत्यर्थः। अनुमाननिष्ठव्याप्यादेः शब्दनिष्ठयोग्यतादेरितिविवेकः। व्याप्यादेर्बाधेऽनुमेयस्य योग्यतादेर्बाधे शब्दार्थस्यच कुतो बाधइत्यतस्तदुपपादयति॥ अनुमेयस्येत्यादिना॥ तुल्येति॥ समसत्ताकत्वादित्यर्थः। नन्विदमयुक्तं अनुमेयस्य व्याप्यादिसमसत्ताकत्वनियमाभावात् धूलीपटले धूमभ्रमादिनानुमितिर्जायते। तत्र दैवाद्ह्रिरप्यस्ति तथाच तत्रानुमेयस्य व्यावहारिकत्वेन व्याप्यादेः प्रातिभासिकतयाऽनुमेयस्य व्याप्यादिना समसत्ताकत्वाभावाद्व्यभिचार इतिचेत्। अत्रवदंति। अत्र व्याप्यादीत्यादिपदेन चित्रगुमानयेत्यादि वदतद्गुणसंविज्ञानबहुव्रीहिणा पंचरूपमध्येऽबाधितत्वाख्यं रूपं ग्राह्यं। तथाचानुमेयस्याबाधितत्वरूपेण समसत्ताकत्वनियमोऽभिप्रेतः। एवंचाक्षाप्रामाण्ये तद्गृहीतस्य साध्याभावाप्रमारूपाबाधितत्वस्यापि बाधेनानुमेयस्यापि बाधो नियत एवेति। गुरुचरणास्तु यादृच्छिकस्थलेऽनुमेयस्य स्वतःसिद्धत्वेन व्याप्यादिबलसिद्धसिद्धिकत्वाभावात्। तथात्वे वह्निरहितस्थलेपि कदाचिद्धूलीपटले धूमभ्रमेणापि वह्निसिद्ध्यापत्तेः ततो व्याप्यादिबलसिद्धसिद्धिकं यदनुमेयं तद्व्याप्यादिसमसत्ताकं यथाधूमानुमाने व ह्रिरितिव्याप्तेरत्राभिप्रेतत्वात्। अस्याश्चव्यभिचाराभावाद्व्याप्यादीत्येतद्यथास्थि तभेवेत्युपदिशंति। अतएवोक्तं सुधायां ''यादृच्छिकस्थले व्याप्यादिबलसिद्धसिद्धिकत्वाभावादनुमेयस्ये''ति॥ अन्यथेति॥ अनुमेयस्य व्याप्यादिसमसत्ताकत्वाभाव इत्यर्थः। वह्निः ह्रदे व्यावहारिकव्याप्यादिमतेत्ये तत् व्यावहारिकाबाधितत्ववतेतिव्याख्येयमित्याहुः। व्यावहारिकेणाबाधेन

तात्कालिकमेवाबाध्यत्वं व्यवस्थापयतीति कथमत्यन्ताबाध्यत्वाभावग्राहकयोर्बह्वागमक्षणिकत्वानुमानयोः प्रवृत्तिर्न स्यादिति वास्तवं प्रह्मणः शून्यत्वं, व्यावहारिकं सत्यत्वम्, आत्मनश्च व्यावहारिकं स्थायित्वं, वास्तवं क्षणिकत्वमित्याद्यपि स्यात्। तत्र दोषाभावादिरूपया परीक्षया आत्यन्तिकाबाध्यत्वं व्यवस्थाप्यते बाधकाभावात्तर्हि जगत्प्रत्यक्षेऽपि बाधकाभावादेवात्यन्ताबाध्यत्वं परीक्षया व्यवस्थाप्यत इति तुल्यम्। एवं जीवेशग्राहिप्रत्यक्षागमावपि परीक्षायुक्तत्वात् आत्यन्तिकाबाध्यत्वग्राहकाविति जीवेशाभेदग्राहकस्य ताभ्यां बाध इति सर्वं जगत् तात्त्विकमेवेति सिद्धम्।

ननु परीक्षायामनाश्वासान्न तया आत्यन्तिकाबाध्यत्वसिद्धिरित्यत आह – इत्थमेवेति॥ अपौरुषेयत्वेन तज्ज्ञान इति॥ अपौरुषेयत्वहेतुकप्रामाण्यज्ञान इत्यर्थः। तथा च तदीयपरीक्षायामपि विश्वासो न स्यादिति अतिप्रसंगादिति भावः। नन्विदमंशे परीक्षितत्वमप्यस्तीत्यत आह – यद्यपीति॥ तत्र बाध्यत्वमपि नास्तीति भावः। ननु जीवेशाभेदश्रुतिर्निषेध्यभेदधर्मिभूतब्रह्मजीवग्राहकश्रुतिसाक्षिप्रत्यक्षाभ्यां उपजीव्याभ्यां बाध्यत इत्युक्तमयुक्तम्। अत्रापि यदंशे श्रुतिसाक्षिणोरुपजीव्यत्वं न तदंशे बाधः। ब्रह्मजीवस्वरूपमात्रांशे चोपजीव्यत्वम्। न चास्ति तदंशे बाधः। अस्ति च बाधः सार्वज्ञाद्यंशे। न च तदंशेऽनुपजीव्यत्वमित्यत आह – शिष्टमिति॥ एवं च न केवलं धर्मिभूतब्रह्मजीवस्वरूपमात्रांशे श्रुतिसाक्षिणावुपजीव्यौ, किन्तु सर्वज्ञत्वादिविशिष्टब्रह्मजीवस्वरूप एवोपजीव्याविति तद्बाधः स्यादेवेत्यादि वक्ष्यत इत्यर्थः। इति प्रत्यक्षस्योपजीव्यत्वेन प्राबल्यम्।

न्यायामृतप्रकाशः

श्रुतेःस्मृतितइति॥ स्मृतीनां श्रुतिमूलकत्वेनोपजीव्यत्वाद्यथा श्रुतेःस्मृतितः प्राबल्यं तथा द्वैतग्राहिप्रत्यक्षस्याप्यद्वैत श्रुत्यपेक्षया प्राबल्यमित्यर्थः। तदुपपादयति॥ तच्चेति॥ तच्चोपजीव्यत्वेन प्राबल्यं अक्षेणचाश्रुषप्रत्यक्षेण ग्राह्यत्वाद्धेतोरित्यन्वयः॥ अनुमितिकारणस्येति॥ स्वरूपसतः पक्षादेरनुमिति कारणत्वाभावात्कथमेतत्। नच पक्षशब्देन तज्ज्ञानग्रहणं तथात्वेऽक्षेण पक्षस्य ग्राह्यत्वादित्युक्त्ययोगात्। उच्यते। अनुमितिकारणस्येत्येतत् अनुमिति प्रयोजकस्येति व्याख्येयं। पक्षादीनां च ज्ञानद्वाराप्रयोजकत्वं त्वस्तीतिध्येयं॥ शब्दस्वरूपस्येति॥ तस्य ज्ञानकरणत्वादितिभावः। उपक्रमोपसंहारयोर्यदैकरूप्यं तदादेः॥ धर्मिमात्रग्राहित्वेनेति॥ एतदनुमानबाधकं यदक्षं तस्यव्यापकत्वविरोधिपरिच्छिन्नपरिमाणग्राहकस्य पक्षीभूतघटग्राहकत्वेनैवोपजीव्यत्वं। यदिच सत्त्वरूपहेतुग्राहकत्वेनाप्युपजीव्यत्वं ब्रूयास्तर्हि सिद्धांतेऽतिरिक्तसत्ताया अभावात्तस्या अपि पक्षकोटावेव निवेश इत्यवधेयं। प्राण्यंगत्वादित्यनंतरं शंखवदितिशेषः॥ साध्यमात्रग्राहित्वेनेति॥ दृष्टांते साध्यग्राहकागमजातीयत्वमात्रेणेति व्याख्येयं। अयमभिप्रायः। नरशिरःकपालं शुचि प्राण्यंगत्वाच्छंखवदिति नरशिरःकपालशुचित्वानुमानस्य बाधकतयाऽभिप्रेतो यो ''नारं स्पृष्ट्वा स्थिरस्नायु सवासा जलमाविशे''दित्यशुचित्वागमस्तस्य दृष्टांते शंखे शुचित्वग्राहको यः

''त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया।
शंखे तिष्ठंति विप्रेंद्र तस्माच्छंखंप्रपूजये''

किमुपजीव्योपजीवकभावेनेति चेदुच्यते। यदि ह्यत्रात्यंतिकपरीक्षाविशिष्टमुपजीव्यमित्यभिप्रेतं स्यात्तदोप जीव्योपजीवकभावाश्रयणमनर्थकं स्यात्। न चैवम्। किन्तु यावच्छक्तिपरीक्षासहकृतमेव। यावच्छक्तिपरीक्षामात्रस्य बाधदर्शनाद्विशिष्टोपादानम्। ननु यावच्छक्तिपरीक्षाविशिष्टोपजीव्यत्वस्येदं रूप्यमित्यत्र सत्त्वेऽपि बाधदर्शनात् न विशिष्टस्याप्युपजीव्यत्वस्य बाधकत्वोपयोगित्वम्। न च तत्र यावच्छक्तिपरीक्षैव नास्तीति वाच्यम्। शुक्लरूपादिदर्शनेनात्रापि यावच्छक्तिपरीक्षासम्भवे बाधकाभावात्। तस्मादात्यन्तिक परीक्षासहकृतमेवोपजीव्यं बाधकमिति वक्तव्यम्। तथाच सैव बाधकत्वोपयोगिन्यस्तु। किमधिकेनोपजीव्योपजीवकभावेनेति चेन्मैवम्। अस्त्वात्यन्तिकपरीक्षाया एव बाधकत्वोपयोगित्वम्। तथापि उपजीव्यत्वस्यापि बाधकतोपयोग आवश्यक एव। उपजीव्यत्वेनापि बाधस्य संव्यवहारसिद्धत्वात्। तथाहि – वैयाकरणाः पठन्ति संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। न च संव्यवहारसिद्धत्वेऽपि व्यभिचरितस्य केवलस्योपजीव्यत्वस्य कथं बाधकत्वोपयोग इति वाच्यम्। प्रतिषेध्यमात्रप्रसञ्जकातिरिक्तधर्म्यार्थकोपजीव्येन केवलेनोपजीवकबाधे व्यभिचाराभावात्। इदं रूप्यमित्यस्य च तादृशोपजीव्यत्वस्यैवाभावात् न बाधकत्वमिति रहस्यम्।

उक्तेऽर्थे आचार्यसम्मतिमाह – उक्तं हीति॥ यावच्छक्तीति॥ परीक्षायां सत्याम्। प्रमाणतया प्रतीतस्येति शेषः। बाधने उपजीवकेन कृत इति शेषः। दोषोऽस्मदभिमतनियमभङ्गः स्यात्। उपजीव्येऽशोधिते परीक्षया अप्रामाण्यादविविक्ते। उपजीवकेन बाधिते न दोषः। उपजीव्यत्वमस्त्वलमित्यनेन इदं रूप्यमिति ज्ञानस्योत्तरज्ञानं प्रति उपजीव्यत्वमभ्युपैति। उपजीव्यत्वमित्युपलक्षणम्। उपजीवकत्वं चेत्यपि द्रष्टव्यम्। पूर्वोत्तरज्ञानयोरिति शेषः। अलंशब्दस्त्ववधारणे। परीक्षितत्वविशिष्टस्यैव बाधकत्वमिति त्वयाऽपि स्वीकर्तव्यमित्याह – न हि परत्वमिति॥ प्रमानन्तरभ्रमस्येति॥ वृक्ष ऊर्ध्वाग्र इति प्रमायां जलोपाधिना अधोऽग्रत्व भ्रमस्येत्यर्थः। ननु शुक्तिरजतज्ञानादावपि परीक्षितत्वमस्तीति कथं निषेध्यार्पकस्य बाध्यत्वमित्यत आह – परीक्षितत्वं चेति॥ ननु बाधकत्वेनाभिमतस्य नेदं रजतमिति ज्ञानस्यापि परीक्षासहकृतत्वं नेति कथं तस्य बाधकत्वमित्यत आह – दृश्यते चेति॥ ननु जगत्प्रत्यक्षस्यापि परीक्षितत्वविशिष्टत्वाभावात् उपजीव्यत्वेऽपि निषेध्यार्पकबुद्धिवत् स्यादित्यत आह – जगत्सत्यत्वप्रत्यक्ष इति।

ननु परीक्षाऽपि प्रवृत्तिसंवादविसंवादाभावदोषाभावादिरूपा। तया च स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते। धूमेन स्वसमानदेशकालीनवह्निरिव। तथा च व्यवहारदशामात्राबाध्यत्वं देहात्मैक्यसाधारणं परीक्षितप्रमाणे व्यवस्थितमिति कथमत्यन्ताबाध्यताभावग्राहकानुमानागमयोः प्रवृत्तिर्न स्यादिति चेन्मैवम्। यदि च परीक्षा स्वकालावच्छेदेनाबाध्यत्वं व्यवस्थापयतीति नात्यन्ताबाध्यत्वव्यवस्थापिका तर्ह्यद्वैतज्ञानं स्वकालावच्छेदेनैव प्रपञ्चस्य बाध्यत्वं व्यवस्थापयतीति अत्यन्तबाध्यत्वं न स्यात्। उपक्रमादिज्ञानमपि स्वकालावच्छेदेनैव तात्पर्यं व्यवस्थापयतीति आत्यन्तिकमद्वैते तात्पर्यं न स्यात्। किञ्च त्वयाऽपि बौद्धागमाद्वेदस्य, आत्मक्षणिकत्वानुमानात् स्थायित्वप्रत्यक्षाभिज्ञानस्य च परीक्षितत्वेनैव प्राबल्यं वक्तव्यम्। अन्यथा परत्वेन तयोरेव प्राबल्यं स्यात्। तत्र च परीक्षा दोषाभावादिरूपा

जीव्यत्वं न स्यात्। एतादृशोपजीव्यत्वं रजतज्ञानस्य नास्तीति न बाधकत्वम्। यद्वा, यादृच्छिकसंवादातिरिक्तस्थले पक्षतावच्छेदकाविरोध्यनुमेयार्थाबाधे व्याप्त्याद्यबाधस्य प्रयोजकत्वमिति न कश्चित् क्षुद्रोपद्रवः।

नन्वत्र यत्प्रामाण्यस्वरूपसिद्ध्यर्थं यत्प्रामाण्यमपेक्ष्यते तत्तस्योपजीव्यमित्युक्तमयुक्तम्। स्वरूपसिद्ध्यर्थमिति कोऽर्थः? किं प्रामाण्याधारव्यत्तच्युत्पत्यर्थमिति वा, तज्ज्ञास्यर्थमिति वा, प्रामाण्योत्पत्त्यर्थमिति वा, तज्ज्ञास्यर्थमिति वा? नाद्यः। ज्ञानस्वरूपस्य व्याप्तिज्ञानमात्रजन्यत्वेन तत्प्रामाण्यानपेक्षणात्। न द्वितीयः। साक्षिणैव तज्ज्ञाप्तिसम्भवात्। न तृतीयः। प्रामाण्यस्योत्पत्तौ स्वतस्त्वेन ज्ञानजनकमात्रजन्यतया प्रामाण्यानपेक्षणात्। नापि चतुर्थः। तज्ज्ञानस्य साक्षिणैव सम्भवात्। न चैतदस्वरसादेव अपवादनिरासार्थमित्युक्तमिति वाच्यम्। व्याप्तिज्ञानप्रामाण्यस्यापवादनिरासकत्वाभावात्। तज्ज्ञानप्रामाण्येऽपि गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यादावपवाददर्शनात्। न च यत्प्रामाण्यं यत्प्रामाण्यव्याप्यं तत्तस्योपजीव्यमिति विवक्षिते दोषाभाव इति वाच्यम्। अस्याप्युक्तस्थले व्यभिचारापरिहारात्। समानविषयकप्रमारूपानुमितिद्वयप्रामाण्ययोः परस्परव्याप्यत्वादेकानुमितिप्रामाण्यस्यापरत्रोपजीव्यतापत्तेश्च। न च तत्र प्रामाण्यमेकमिति न व्याप्यव्यापकभाव इति वाच्यम्। ज्ञानभेदेन तत्प्रामाण्यस्यापि भेदात्। न च यदप्रामाण्यं यदप्रामाण्याधीनमिति विवक्षितमिति वाच्यम्। एवं ह्यनुमितौ व्याप्तिज्ञानादेरुपजीव्यत्वं न स्यात्। गन्धप्रागभावावच्छिन्नो घटो गन्धवानित्यादावनुमित्यप्रामाण्येऽपि व्याप्तिज्ञानाप्रामाण्याभावेन तस्य तदप्रयोजकत्वात्। न च यदप्रामाण्येन यदप्रामाण्यमापादयितुं शक्यते तत्तस्योपजीव्यमिति वाच्यम्। एवमपि व्याप्तिप्रमाजन्यानुमितौ व्याप्तिज्ञानस्योपजीव्यत्वं न स्यात्। व्याप्तिज्ञानस्याप्रमात्वाभावेन तेन तदापादनासंभवात्। न च प्रसञ्जितेन यदप्रामाण्येनेति विवक्षितमिति वाच्यम्। अप्रमानुमितिं प्रति भ्रमरूपव्याप्तिज्ञानस्योपजीव्यत्वं न स्यात्। तत्राप्रामाण्यस्य सत्त्वेन प्रसञ्जितत्वाभावात्। तस्मान्नेदमुपजीव्यत्वलक्षणमिति चेदुच्यते। यत्प्रामाण्यमपवादनिरासार्थं यत्प्रामाण्यायत्तमित्येव विवक्षितम्। न चोक्तदोष इति वाच्यम्। यादृच्छिकसंवादातिरिक्तस्थले पक्षतावच्छेदकाविरोध्यनुमेयविषयकानुमितिप्रामाण्ये व्याप्तिज्ञानप्रामाण्यस्य प्रयोजकत्वेन व्याप्तिज्ञानप्रामाण्यस्य तादृशानुमेयप्रामाण्यापवादनिरासार्थत्वेन दोषाभावादिति।

॥ सर्वज्ञत्वनिर्दुःखत्वादिरूपब्रह्मबुद्धीति॥ क्षणिकत्वसर्वज्ञत्वादिरूपब्रह्मबुद्ध्यप्रामाण्ये ब्रह्मात्मैक्य बुद्ध्यप्रामाण्याभावेन व्यभिचारः। तदर्थं सर्वज्ञत्व निर्दुःखत्वादिरूपेति। न चायं दृष्टान्तः परासम्मतः। परेण सर्वज्ञत्वादेः ब्रह्मस्वरूपत्वानभ्युपगमेन तद्रूपब्रह्मबुद्ध्यप्रामाण्येऽपि ब्रह्मात्मैक्यबुद्ध्यप्रामाण्याभावादिति वाच्यम्। निर्दुःखत्वानन्दत्वारेरिव सर्वज्ञत्वादेरपि ब्रह्मस्वरूपत्वस्यावश्यकत्वेन तद्विशिष्टबुद्ध्यप्रामाण्ये ऐक्यबुद्ध्यप्रामाण्यस्य परेणावश्यमंगीकार्यत्वात्। अन्यथाऽऽनन्दादेरपि तत्स्वरूपत्वं न स्यात्। युक्तविशेषात्। तस्मात् प्रसाध्यांगकोऽयं दृष्टान्त इति भावः। पक्षान्तरमाह॥ यद्वेति॥

ननु यद्युपजीव्यत्वमात्रस्य व्यभिचारात् न बाधकत्वप्रयोजकत्वमिति परीक्षितत्वमावश्यकं तर्हि परीक्षितेनापरीक्षितं बाध्यत इत्यस्य क्वापि व्यभिचाराभावात् परीक्षैव बाधकत्वोपयोगिन्यस्तु,

रूपवाक्यार्थाबाधरूपयोग्यताया बाधितत्वात्। न च वेदान्ततज्ज्ञानप्रामाण्यमिथ्यात्वेऽपि तात्त्विकाद्वैत सिद्धिर्युक्ता। शब्दतज्ज्ञानतात्विकत्वस्य विषयतात्त्विकत्वे प्रयोजकत्वाभावात्। इदं रजतमिति अनाप्तवाक्यस्य तज्जन्यभ्रमस्य च त्वन्मते तात्त्विकत्वेऽपि तद्विषयस्यातात्त्विकत्वादिति वाच्यम्। न हि शब्दतज्ज्ञानातात्त्विकत्वे विषयातात्त्विकत्वमापादितम्। किन्तु शब्दतज्ज्ञानप्रामाण्याबाधस्य विषयाबाधप्रयोजकत्वात्, प्रकृते तद्बाधे विषयबाधः स्यादिति। तथा चानाप्तवाक्यभ्रमयोः स्वरूपसत्यत्वेऽपि अबाधितार्थकत्वरूपाबाधाभावाद्युज्यते विषयबाध इति प्रकृते वेदान्त तज्ज्ञानप्रामाण्यस्य मिथ्यात्वे विषयमिथ्यात्वापादनं युक्तमिति।

॥ अन्यथेति॥ यदि प्रातिभासिकादिव्याप्त्यादिमता हेतुना अबाधितानुमेयासिद्धिस्तथा प्रातिभासिकयोग्यतादिमता शब्देन तात्त्विकार्थसिद्धिस्तदेत्यर्थः। उक्तनियमस्य कथंचित् व्यभिचारमाशंक्य निषेधति – बिम्बस्येति॥ मिथ्यात्वेऽपीति प्रौढिवादः। प्रतिबिम्बसत्यताया अन्यत्रोपपादितत्वात्। अत्र व्याप्त्युपपादनमपि वस्तुगतिमनुरुध्य। तदभावेऽपि बाधाभावेन अनुमेयार्थाबाधसिद्धेरित्यर्थः। नन्वेवं सत्यवृत्तिगगनादेरपि व्याप्यतापत्तिः। न च तत्र बिम्ब पूर्वकत्वमेवानुमीयते, बिम्बव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्व रूपेणाप्रातिभासिक हेतुनेति वाच्यम्। प्रयुक्तत्वं हि न तज्जन्यत्वादिरूपम्। व्यतिरेकयोः परस्परं तदभावात्। किन्तु व्याप्यव्यापकभावः। तथा च बिम्बव्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वं हेतुः स चाकाशादौ व्यभिचार्येव। तथाच प्रतिबिम्बेनैव बिम्बानुमानम्। अनुमेयस्य लिङ्गव्याप्त्यादिसमसत्ताकत्वनियमस्यापास्तत्वादिति चेन्मैवम्। अविनाभाव इत्यस्य यद्देशकालसम्बद्धस्य यस्य यद्देशकालसंबंधेन येन विना अनुपपत्तिस्तत्तद्व्याप्यमिति विवक्षितार्थस्य गगनादावभावेन तद्व्याप्यतापादनस्यायुक्तताात्। अत्रेदानीमाकाशमिति प्रतीत्या गगनादेरवृत्तित्वाभावाच्च। अनुमेयस्य लिङ्गव्याप्त्यादिना समसत्ताकत्वनियमस्योपपादिततेन उक्तानुमानासम्भवाच्चेति।

शाब्दधीप्रामाण्यस्य शब्दार्थस्य च तुल्ययोगक्षेमत्वमुक्तं न सम्भवतीति शङ्कते॥ नन्विति॥ रूप्यादिज्ञानेष्विति॥ न च प्रामाण्यमिथ्यात्वं न विषयमिथ्यात्वप्रयोजकं, प्रमाप्रमाबहिर्भूतनिर्विकल्पके प्रामाण्यमिथ्यात्वेऽपि विषयसत्यत्वादिति वाच्यम्। मया निर्विकल्पकानभ्युपगमात्। अभ्युपगमे च भ्रमभिन्नज्ञानत्वा बाधितार्थकत्वादिरूपस्य प्रामाण्यस्याबाधात्॥ अर्थाबाधेति॥ न चाबाधितार्थकत्वरूपं यत्प्रामाण्यं तस्य प्रकृते बाधो नार्थबाधात्। अर्थस्य सर्वथाऽबाधितत्वात्। किन्तु तद्विषयत्वरूपसंबन्धबाधात्। यथा दण्डबाधनिबन्धनदण्डिबाधेऽपि पुरुषोऽबाधित एवेति वाच्यम्। इदं हि तदा कल्पनीयं यदि ब्रह्मैव सत्यमन्यन्मिथ्येति निर्णीतम्। तदनिर्णये तु अन्योन्याश्रयादिना दुष्टैवेयं कल्पना। किञ्च तद्विषयत्वरूपसम्बन्धबाधे शब्दार्थयोः शब्दज्ञानयोर्वा संबन्धाभावेन तेन शब्दार्थसिद्धिर्न स्यात्। असंबद्धेन सिद्धावतिप्रसङ्गात्। न हि घटमानयेति वाक्येन पटानयनसंसर्गसिद्धिर्भवति।

यत्प्रामाण्यमिति॥ न चैवं व्याप्तिधियोऽप्युपजीव्यत्वं न स्यात्। लिङ्गाभासादपि वह्निमति वह्निप्रमादर्शनादिति वाच्यम्। अत्रापि व्याप्त्यादीत्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा बोध्यवत्पक्ष ज्ञानबाधाभावज्ञानप्रामाण्य स्यानुमितिप्रामाण्येनापेक्षणात्। पक्षज्ञानादीनामुपजीव्यत्वस्योक्तत्वात्। नहि व्याप्तिज्ञानाप्रामाण्ये अनुमितिप्रामाण्यवत् पक्षादिज्ञानाप्रामाण्ये अनुमितिप्रामाण्यं दृष्टं येन व्यभिचारेणोप

अस्त्वेवमुपजीव्यत्वं ततः किमित्यत आह – अक्षाप्रामाण्येति।। न चैतावता व्याप्त्यादिसमसत्ताकमनुमेयं सिद्धयत्वित्यापादितम्। तच्च नास्माकमनिष्टम्। अस्माभिर्ब्रह्माभिन्नं किञ्चिदत्यन्ताबाध्यमस्तीत्यनङ्गीकारादिति वाच्यम्। अत्र ह्यनुमेयोऽर्थो मिथ्यात्वम्। तस्य बाध्यत्वे मिथ्याभूतबाध्यत्वेन जगत्सत्यं स्यात्। बाध्यमिथ्यात्वस्य प्रतिवाद्यङ्गीकृतत्वेन सिद्धसाधनाच्च। यदत्र परवल्गनं तत्सामान्यतो मिथ्यात्वभङ्ग एव परिकृतम्। तस्मादनुमेयबाध्यत्वं परस्यानिष्टमेवेति ।

नन्वयमनुमेयादेर्व्याप्त्यादिसमसत्ताकत्वनियमो नास्ति। व्यभिचारिणाऽपि लिङ्गेन साध्यवति पक्षे अनुमितिप्रमादर्शनात्। ध्वनिधर्महस्वदीर्घत्वादिविशिष्टत्वेन मिथ्याभूतैरपि नित्यैर्विभुभिर्वर्णैः सत्या शाब्दप्रमितिः क्रियत इति मीमांसकैरभ्युपगतत्वात्। प्रतिबिंबेन वाऽसत्येन व्याप्त्यादिरहितेन बिंबानुमितिदर्शनाच्च। गन्धप्रागभावावच्छिन्ने घटे तत्त्विकव्याप्त्यादिमता पृथिवीत्वेनातात्त्विकगन्धानुमितिदर्शनाच्च। तथाच व्याप्त्यादितात्त्विकत्वस्यानुमेयादितात्त्विकत्वं प्रति अन्वयव्यतिरेकाभ्यां व्यभिचारादनुमेयादेः व्याप्त्यादिसमानयोगक्षेमतानियमोऽसिद्ध एवेति चेन्नैवम्। एवं वदताऽनुमितिप्रामाण्यप्रयोजकत्वेन किञ्चित् स्वीकृतं न वा ? नेति पक्षे किञ्चिज्ज्ञानं प्रमारूपमुत्पद्यते किञ्चिदप्रमारूपमिति प्रामाण्याप्रामण्ये आकस्मिके स्यातामिति सर्वत्र तत्प्रसङ्गे प्रमाप्रमारूपज्ञानद्वयव्यवस्था न स्यात्। अथ दोषजन्यत्वं बाधितत्वमप्रामाण्यप्रयोजकम्। तदभावे प्रामाण्यमिति नोक्तातिप्रसङ्ग इत्याद्योऽस्त्विति चेत् तर्हि बाधकाभावसमानयोगक्षेमता अनुमेयार्थस्य स्वीकृतेति बाधाभावग्राहकाक्षाप्रामाण्ये बाधाभावबाधनियमेनानुमेयार्थबाधप्रसङ्गः इत्यापादनान्न दोषः। न चैवं व्याप्त्यादिसमसत्ताकत्वमनुमेयार्थस्येति गतमिति वाच्यम्। व्याप्त्यादीत्यत्र अतद्गुणसंविज्ञानबहुव्रीहिणा बोध्यवत्पक्षबाधाभावयोर्ग्रहणात्। अक्षाप्रामाण्ये तयोरप्यक्षेणैव सिद्ध्या तद्बाधेनानुमेयार्थबाधनियमात्। न हि बोध्यवत्पक्षबाधे बाधाभावबाधे अनुमेयार्थाबाधो दृष्टः। वस्तुतस्तु अनुमेयार्थमात्राबाधे व्याप्त्याद्यबोधो न प्रयोजकः। किन्तु यादृच्छिकसंवादातिरिक्तस्थले पक्षतावच्छेदकाविरोध्यनुमेयार्थाबाधे। न चैवं सति व्यभिचारशङ्काऽस्ति। प्रकृतमिथ्यात्वानुमितिः यादृच्छिकसंवादिव्यतिरिक्ता, प्रकृतमनुमेयं मिथ्यात्वं च पक्षतावच्छेदकाविरोधीति परेणाभ्युपगतत्वात्। तथा चात्र व्याप्त्यादिबाधे अनुमेयार्थबाधः स्यादेवेति।

यदुक्तं मिथ्याभूतैरेव वर्णैः शाब्दप्रमा क्रियत इति तन्न। तत्र वर्णानां मिथ्यात्वाभावात्। न च ह्रस्वत्वादिविशिष्टत्वेन वर्णानां मिथ्यात्वमिति वाच्यम्। बाधकाभावेन ह्रस्वत्वादीनां वर्णधर्मत्वोपपत्तेः। तेन रूपेण मिथ्यात्वेऽपि न तेषां शाब्दप्रमाहेतुत्वम्। शब्दज्ञानस्यैव अन्वयव्यतिरेकाभ्यां शाब्दप्रमाहेतुत्वात्। यदप्युक्तम् असत्येनैव प्रतिबिम्बेन बिम्बानुमानमिति तन्न। प्रतिबिम्बसत्यतायास्तत्र व्याप्तिसत्त्वस्य चोपपादयिष्यमाणत्वात्। बिम्बप्रतिबिम्बैक्यं वदता प्रतिबिम्बासत्यत्त्वस्यावक्तव्यत्वाच्च। एतेनैव शाब्दार्थाबाधे योग्यताद्यबाधस्य तन्त्रत्वात् अक्षाप्रामाण्ये तत्सिद्धयोग्यतादेश्च बाधनियमेन शाब्दार्थस्य बाधः स्यादित्यतिप्रसङ्गः समाहितो वेदितव्यः। न हि योग्यताबाधे शब्दार्थाबाधः क्वचिद् दृष्टः। न वा प्रत्यक्षाप्रामाण्ये तत्सिद्धयोग्यताद्यबाधः सम्भवति। न च प्रत्यक्षाप्रामाण्येऽपि वेदान्तवाक्ये अखण्डार्थरूपवाक्यार्था बाधरूपयोग्यताबाधो नास्त्येवेति वाच्यम्। अखण्डार्थत्वस्याग्रे निराकरिष्यमाणत्वेनाखण्डार्थ

पूर्वसंबन्धनियमो हेतुत्वे तुल्य एव नौ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥ इति।

तथाच कथमुपजीव्यविरोध इति चेदुच्यते। स्वरूपस्या–बाध्यत्वे स्वरूपस्यैव तात्विकत्वप्रसङ्गात्। अबाध्यत्वातिरिक्तस्य तात्विकत्वस्याभावात्। किञ्च तात्त्विकाकारस्य बाध्यत्वे स्वरूपस्यापि बाध एव। तात्त्विकाकारातिरिक्तस्वरूपाकाराभावात्। न च व्यावहारिकः तात्त्विकाकारव्यतिरिक्ताकारोऽस्तीति वाच्यम्। अस्य मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयस्योक्तत्वात्। किञ्चोदाहृतेषु उपजीव्यविरुद्धेषु घटादिस्वरूपमेवोपजीव्यं, न तु अव्यापकत्वादीति तत्राप्युपजीव्याविरोधेनाप्रामाण्यं न स्यात्। तथाच घटादेर्व्यापकत्वादि तात्त्विकं स्यात्। किञ्चैवं दहनशैत्यानुमानस्यापि उष्णस्वरूपमेवोपजीव्यं, न तु तस्य तात्त्विकाकार इति तत्राप्युपजीव्याविरोधेनाप्रामाण्याभावे कालातीतकथैव लुप्येत। यच्चोक्तं सत्त्वस्य कारणत्वेऽप्रवेशादिति तन्न। पूर्ववृत्तित्वस्य कारणत्वे प्रवेशेन सत्त्वप्रवेशस्यावश्यकत्वात्।

नन्वपेक्षितग्राहकत्वेन उपजीव्यतया बाधकत्वे इदं रजतमिति भ्रमस्यापि प्रतियोगिग्राहकतया नेदं रजतमिति ज्ञानं प्रत्युपजीव्यत्वात् तद्विरुद्धं नेदं रजतमिति बाधकज्ञानं कथमुत्पद्येत। न च निषेध्यार्पकतया प्रतियोगिज्ञानत्वेन तस्योपजीव्यत्वेऽपि तत्प्रामाण्यं नोपजीव्यम्। न हि प्रतियोगिप्रमात्वेनाभावज्ञानजनकता। गौरवात्। प्रतियोगिभ्रमादप्यभावज्ञानदर्शनाच्च। किन्तु प्रतियोगिज्ञानत्वेनैव लाघवात्। ततस्तद्विरुद्धं ज्ञानमुदियादेवेति वाच्यम्। प्रकृतेऽपि पक्षज्ञानत्वादिना कारणता न तु तत्प्रमात्वादिनाऽपीति तत्प्रामाण्यस्यानुपजीव्यत्वात् प्रत्यक्षबाध इति चेन्मैवम्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। तथा हि – दृष्टान्ते प्रतियोगिज्ञानाप्रामाण्येन बाधकज्ञानस्या प्रामाण्यादर्शनात् नेदं रजतमिति ज्ञानं प्रति प्रतियोगिज्ञानत्वेनैव कारणता। दार्ष्टान्तिके च पक्षज्ञानाप्रामाण्ये पक्षस्यासत्त्वापत्त्या पक्षसाध्यसंसर्गस्य बाधनियमेन प्रमारूपानुमितौ पक्षप्रमात्वेन कारणत्वस्यावश्यकत्वात् तत्प्रामाण्यस्याप्युपजीव्यतया तद्विरुद्धानुमितिः न स्यादेव। न च पक्षासत्त्वेऽपि पक्षसाध्यसंसर्गस्य सत्त्वमस्त्विति वाच्यम्। संबन्धिनोऽसत्त्वे संबन्धस्यासत्त्वनियमात्। न हि पर्वतो नास्ति, पर्वते वन्हिरस्तीति संभवति। तथाच पक्षसत्त्वस्यापि अनुमेयार्थाबाधार्थं अपेक्षया नियमेन पक्षसत्त्वग्राहि प्रत्यक्षविरुद्धमनुमानं प्रत्यक्षस्योपजीव्यत्वेन प्रबलत्वादुपजीव्यबाधितमेव। अन्यथा आश्रयासिद्धेरदोषत्वापत्तेः। न च वन्ध्यासुतो न वक्ताऽसत्त्वादित्यादौ धर्म्यसत्त्वेऽप्यनुमेयाबाधवत् प्रकृते किं न स्यादिति वाच्यम्। आश्रयासिद्धेर्दूषणत्ववादिभिरेवं वक्तुमशक्यत्वात्। न च तददूषणत्ववादिमते प्रकृतानुमानं स्यादिति वाच्यम्। तन्मतेऽपि प्रमारूपानुमितौ पक्षप्रमैव कारणम्। तत्रासत्पक्षकप्रमानुमितौ असत्त्वप्रकारकपक्षप्रमा कारणम्। तदितरपक्षकप्रमानुमितौ सत्त्वप्रकारकप्रमा कारणम्। प्रकृते तदुभयाभावात् तन्मतेऽपि न प्रमानुमितिरित्यत्र तात्पर्यादित्यलं विस्तरेणेति।

शब्दस्वरूपप्रामाण्यादिग्राहिश्रोत्रसाक्षिणोरुपजीव्यत्वेऽपि अतथाविधचक्षुरादेः घटादिसत्त्वग्राहिणो नोपजीव्यत्वप्राप्तिरित्याशङ्कानिरासाय चक्षुरादेः शब्दं प्रत्युपजीव्यत्वमुपपादयति-चक्षुरादेरिति॥ उपजीव्य जातीयत्वेन प्राबल्यं क्व दृष्टमित्यत आह – दृष्टं चेति॥ ननु चक्षुरादिग्राहित्वेनानुमानस्याप्युपजीव्यत्वेन प्रबलत्वात् प्रत्यक्षबाधकत्वं स्यादित्यत आह यद्यपीति॥ अज्ञातचक्षुरादेरपि प्रत्यक्षज्ञानोदयादिति भावः।

घटस्वरूपं सार्वज्ञादिविशिष्टं ब्रह्मस्वरूपं वा धर्मि। एवं च यदुपजीव्यं तन्न बाध्यं यच्च बाध्यं न तदुपजीव्यमिति न मिथ्यात्वानुमानैक्यश्रुत्योरुजीव्यविरोध इत्यत आह। शिष्टमिति। मिथ्यात्वानुमानेन घटस्वरूपस्यापि बाध्यमानत्वेन धर्मिग्राहकविरोधो मिथ्यात्वानुमानस्यास्त्येव। ऐक्यवाक्येपि किं सार्वज्ञादिना भावरूपेण निर्दुःखादिना अभावरूपेण वाऽसाधारणधर्मेण ब्रह्मोद्देश्यं चित्त्वादिना साधारणधर्मेण वा स्वरूपेणैव वा। आद्ये सुस्थ उपजीव्यविरोधः। द्वितीये चित एव जीवैक्यं सिद्ध्येत्। न तु ब्रह्मणः। तच्च ममापि संमतम्। न तृतीयः। शब्देनासाधारणब्रह्मस्वरूपोद्देशस्यासाधारणधर्मिणं विना सिद्ध्यभावेनोपजीव्यविरोधस्य तादवस्थ्यात्। साधारणस्वरूपोद्देशे च ब्रह्मैक्यासिद्धेरित्यादि वक्ष्यत इत्यर्थः।

व्यासाद्रिसृततर्कांबुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यां प्रत्यक्षस्योपजीव्यता।
प्रत्यक्षस्योपजीव्यत्वेन प्राबल्यम्।

न्यायामृतकण्टकोद्धारः

॥ प्राबल्यमिति॥ अनुमानागमादित इति शेषः॥ श्रुतेरिति॥ यथा श्रुतेः स्मृत्युपजीव्यत्वात् स्मृतितः प्राबल्यं तथेत्यर्थः॥ तच्चेति॥ उपजीव्यत्वमित्यर्थः। व्यास्यादेरनुमितिस्वरूपतत्प्रामाण्यादेश्च ग्राह्यत्वात् उपजीव्यत्वमनुमानं प्रति; ऐकरूप्यादेः शब्दस्वरूपतत्प्रामाण्यादेश्च ग्राह्यत्वादुपजीव्यत्वं शब्दं प्रतीति विवेकः। ग्राह्यत्वं च साक्षात्परम्परासाधारण्येनेति भावः। कारणस्य॥ प्रयोजकस्येत्यर्थः। हेतोः॥ प्रयोजकस्येत्यर्थः। प्रयोजकत्वं च जनकज्ञानविषयत्वं न तु जनकजनकत्वम्। ज्ञानमात्रे विषयस्य जनकत्वाभावादिति। ननु येन विना यस्योत्पत्तिर्न तत्तस्योपजीव्यम्। न हि प्रामाण्यग्रहं विना अनुमित्यनुत्पत्तिः। तथा च कथं प्रामाण्यग्राहकत्वेनोपजीवकत्वम्। इति चेन्न। येन विना यस्योत्पत्तिकार्ये न भवतस्तदुपजीव्यमिति विवक्षितत्वात्। प्रकृते प्रामाण्यग्रहं विना निष्कम्पप्रवृत्तिरूपकार्याभावादिति भावः। पक्षाद्यन्यतममात्रग्राहकत्वेनोपजीव्यत्वं यदा तदाऽनुमानोपयोगि सर्वग्राहकत्वादुपजीव्यत्वमिति किमु वक्तव्यमिति कैमुत्येनाह यदेति॥ अक्षमिति॥ परिच्छिन्नो घट इत्येवं रूपमित्यर्थः। ॥ शब्द इति॥ अग्निः शुचिव्रततम इत्यादिरूप इत्यर्थः। अनुमानमिति॥ मनः अणुत्वे सति नानासमवाय्यधिकरणं सुखाद्युपलब्धिकरणत्वाद् व्यतिरेकेण चक्षुरादिवदित्यर्थः। कथं नोपजीव्यमिति॥

ननु यत्स्वरूपमुपजीव्यते तन्न बाध्यते। बाध्यते च तात्त्विकाकारः। स च नोपजीव्यते। कारणत्वे तस्याप्रवेशात्। तदुक्तं–

अत्र वदंति नोपजीव्यविरोधः। यत्स्वरूपमुपजीव्यते तन्न बाध्यते। बाध्यते च तात्विकत्वाकारः। स च नोपजीव्यते। कारणत्वे तस्याप्रवेशात्। तदुक्तं–

"पूर्व संबंधनियमो हेतुत्वे तुल्य एव नौ।
हेतुतत्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥"

इति। किंचापेक्षितत्वमात्रेण चेदुपजीव्यता, तया च बाधकत्वं तदाऽपेक्षित प्रतियोगिग्राहकत्वेनेदंरजतमिति भ्रमस्य बाधोपजीव्यत्वात्कथं नेदं रजतमिति बाधबुद्धि स्तद्विरुद्धोदियात्। अथ निषेध्यार्पकतया प्रतियोगिज्ञानत्वेन तस्योपजीव्यत्वेपि तत्प्रामाण्यं नोपजीव्यम्। न हि प्रतियोगिप्रमात्वेनाभावज्ञानकारणता। गौरवात्। प्रतियोगिभ्रमाद प्यभावज्ञानदर्शनाच्च। किं तु तज्ज्ञानत्वेनैव। लाघवात्। अतस्तद्विरुद्धविषयकं ज्ञानमुदियादेवेति ब्रूषे, तुल्यमिदं प्रकृतेपि। पक्षज्ञानत्वेन कारणता। न तु तत्प्रमात्वेनापीति। यच्चोक्तं परीक्षितत्वविशिष्टमुपजीव्यत्वं प्राबल्ये तंत्रमिति। तन्न। परीक्षा हि संवादविसंवादाभावदोषाभावादिरूपा। तथा च स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते। धूमेन स्वसमानदेशकालीनवह्निरिव। तथा च व्यवहारदशामात्राबाध्यत्वं देहात्मैक्यसाधारणं परीक्षितप्रामाण्ये व्यवस्थापितम्। कथमत्यंताबाध्यत्वाभावग्राह कानुमानागमयोः प्रवृत्तिर्न स्यात्। तस्माद्विश्वासप्रमाणतदाभासव्यवस्था जीवेशभेदादिकं च व्यावहारिकमित्युपपन्नमेव सर्वं जगन्मिथ्या इति।

अत्रोच्यते। यत्तावदुक्तं यत्स्वरूपमुपजीव्यते तन्न बाध्यत इत्यादि। तन्न। अबाधितत्वादेस्तात्विकत्वस्य बाधेऽनुमित्यादेः प्रामाण्यस्य दुर्लभत्वापत्तेरित्युक्तत्वेन सत्वांतर्भावेणैव हेतुत्वस्य वक्तव्यत्वात्। यच्चोक्तमपेक्षितत्वमात्रेण चोपजीव्यतेत्यादि। तदपि न। यत्प्रामाण्यप्रयोजकप्रामाण्याश्रयो यत्तत्स्योपजीव्यमित्युक्तत्वात्। रूप्यज्ञानं न तथेति न तदुपजीव्यम्। यच्चोक्तं परीक्षया स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यत इत्यादि। तदपि न। मिथ्यात्वानुमितेः स्वदेशकालयोरपि घटादिनिषेधविषयत्वेनोपजीव्यविरोधस्य दुष्परिहरत्वात्। पारमार्थिकत्वाकारेण निषेधस्य निर्धर्मिकात्मनोपि संभवाच्चेति। यद्यपि इदं रूप्यमिति धीर्धर्म्यर्पकत्वेन नोपजीव्या धर्मिण इदमंशस्य नेदं रूप्यमित्यनेनैव सिद्धेः। तथाप्यभ्युपेत्याह। यद्यपीति। नेदमित्यत्रेदमंशमात्रं धर्मि। नतु रजतत्वविशिष्टम्। इदमंशमात्रे रूप्यनिषेधमात्रेणैवेष्टसिद्धेः। एवं च यदुपजीव्यं तन्न बाध्यम्। इदमंशमात्रस्याबाधात्। यच्च बाध्यं रजतत्ववैशिष्ट्यं न तदुपजीव्यम्। रजतत्वविशिष्टस्याधर्मित्वादित्यर्थः। नन्वेवं मिथ्यात्वानुमानैक्य वाक्येऽपि घटस्वरूपमात्रं ब्रह्मस्वरूपमात्रं च धर्मि। न तु सत्त्वविशिष्टं

जीवमनूद्य तस्य ब्रह्मत्वं वा, श्रुतिसिद्धं ब्रह्म वाऽनूद्य तस्य जीवत्वं वोभयानुवादेनाऽभेदो वा विधेयः। सर्वथाप्युपजीव्यविरोधान्न श्रुतिरैक्ये प्रमाणम्। प्रत्यक्षेण जीवस्य ब्रह्मतो भिन्नत्वेन श्रुत्या च सर्वज्ञत्वनिर्दुःखत्वादिना ब्रह्मग्राहिण्या ब्रह्मणस्तद्भिन्नत्वेनानुभूयमाना ज्जीवाद्भिन्नत्वेन ग्रहणात्। सर्वज्ञत्वनिर्दुःखत्वादिप्रकारकब्रह्मरूपधर्मिज्ञानाप्रामाण्ये जीवरूप धर्मिज्ञानाप्रामाण्ये च ब्रह्मजीवरूपधर्मिणोरसिद्ध्यापत्त्या ब्रह्मात्मैक्यबुद्धेः प्रामाण्यं न संभवतीत्यैक्यश्रुतेरुपजीव्यविरोध इत्यर्थः। तदुक्तं "शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते। अनुभूतिविरोधेन कथमेकत्वमुच्यत" इति। "सार्वज्ञादिगुणं जीवाद्भिन्नं ज्ञापयति श्रुतिः। ईशं तामुपजीव्यैव वर्तते ह्यैक्यवादिनी॥" इति च। न चैवं निषेध्यार्पके इदं रजतमिति ज्ञाने उपजीव्यत्वं नेदं रजतमिति निषेधज्ञानं प्रत्यस्तीत्याह। प्रतिषेध्यज्ञानाप्रामाण्य इति। उक्तप्रकारद्वयमपि इदं रजतमिति ज्ञानप्रामाण्यस्य नेदं रूप्यमिति ज्ञानप्रामाण्यं प्रति नास्तीति न तत्तस्योपजीव्यमित्यर्थः। उपजीव्यतायां प्रकारांतरमाह। यद्वेति। इदं रूप्यमिति धीश्चेति। इदं रूप्यमिति धीश्च न धर्म्यर्पकत्वेनोपजीव्या। धर्मिण इदमंशस्य नेदं रूप्यमित्यनेनैव सिद्धेरित्यत उक्तं प्रतिषेध्यार्थकतया वेति। तर्हि इदं रूप्यमिति ज्ञानं प्रत्युपजीव्यत्वेन प्राबल्यं स्यादित्यत आह। न हीति। यावच्छक्तीति। उपजीव्यस्य यथोचितपरीक्षायां सत्यामप्युपजीवकेन बाधने दोषः अशोधिते अपरीक्षिते उपजीवकेन बाधने सत्यपि न दोष इत्यर्थः। न हीति। परेण वेदांतवाक्येन पूर्वस्य प्रत्यक्षस्यापच्छेदन्यायेन बाध इति वदतस्तवमतेपीत्यर्थः। परीक्षितत्वे चेति। इदं रजतमिति ज्ञानस्योपजीव्यत्वेऽपि परीक्षाविरहान्नोत्तरज्ञानं प्रति बाधकत्वमित्यर्थः। ननु शुक्तिरूप्याभेदज्ञानेऽपि शुक्त्यंशे परीक्षाऽस्तीत्यत उक्तम् अंश इति। अभेदांश इत्यर्थः। नन्वनुव्यवसायादिविषयत्वरूपपरीक्षा रूप्येऽप्यस्तीत्यत आह। सजातीयेति। सजातीयविजातीयाभ्यां संवादस्ताभ्यां विसंवादस्याभावश्च परीक्षा, न त्वनुव्यवसायादिरूपप्रमाविषयत्वरूपा परीक्षेत्यर्थः। रूप्यज्ञानवज्जगत्सत्यत्वज्ञानेऽपि परीक्षा नास्तीति न तदुपजीव्यमप्यद्वैतागमस्य बाधकमित्यत आह। जगत्सत्यत्वप्रत्यक्ष इति। जगत्सत्यत्वप्रत्यक्षे सजातीयसंवादमाह। सन् घट इति ज्ञानांतरमिति। विजातीयसंवादमाह। घटार्थक्रियेति। सजातीयविजातीयविसंवादाभावमाह। प्रत्यक्ष इति। निषेध्यार्पकेति। तथा चोपजीव्येत्यर्थः। भेदश्रुतेः सजातीयसंवादमाह। साक्षिप्रत्यक्षमिति। उपलक्षणमेतत्। सुरनरादिषु विचित्रशक्तितदभावादिरूपविजातीयसंवादोऽप्यस्तीति बोध्यं। विसंवादाभावमाह। अदोषत्वादिति। परीक्षितमितीति। परीक्षिता च परीक्षितं च परीक्षितम् नपुंसकमनुपुंसकेनेत्यादिनैकशेषैकवद्भावौ। एवं तदपीत्यत्रापि। ननु सजातीय संवादादिरूपायाः परीक्षाया अपि ज्ञानरूपत्वात्तत्राप्यनाश्वासे तत्रापि परीक्षांतरानुसरणेऽनवस्था स्यादित्यत आह। इत्थमेवेति। यद्वा परीक्षायां सत्यामपि परीक्षणीये ज्ञानेऽनाश्वासे दोषमाह। इत्थमेवेति। तज्ज्ञान इति। निर्दोषज्ञान इत्यर्थः।

पक्षधर्मताविरहादाकाशादेः परं नानुमितिहेतुत्वम्। यच्चोक्तमखंडवाक्यार्थाबाधरूपा योग्यता वेदान्तवाक्येष्वप्यस्तीति तन्न। वाक्यार्थस्य क्रियाकारकभावसंसर्गरूपस्याभेदसंसर्गरूपस्य वाऽखण्डत्वविरोधात्। तस्मात्साधूक्तमनुमेयस्य व्याप्त्यादिना तुल्ययोगक्षेमत्वमिति।

अनुमेयस्यानुमितिप्रामाण्येन तुल्ययोगक्षेमत्वमुक्तमुपपादयितुमाशंकते। ननु तथापीति। प्रत्यक्षस्याप्रमाणत्वेनेति। अतत्वावेदकत्वेनेत्यर्थः। रूप्यादिज्ञानेष्विति। तथाच प्रत्यक्षस्याप्रमाणत्वेनेत्यसिद्धिरिति भावः। निर्विकल्पके प्रकारघटितप्रामाण्यस्य मिथ्यात्वेपि न तदर्थस्यातात्विकत्वमित्यत आह। अर्थाबाधेति। अर्थाबाधरूपप्रामाण्यस्यार्थसत्त्वे पर्यवसन्नतया प्रामाण्यबाधोऽर्थबाध एवेति भावः। नन्वर्थाबाधरूपप्रामाण्यमिथ्यात्वादर्थस्यापि मिथ्यात्वमिति न वाच्यम्। अबाधितार्थविषयत्वं हि यत्प्रामाण्यं तस्य मिथ्यात्वं प्रकृते नार्थबाधात्। तद्बाधकप्रमाणासंभवात्। तस्यापि बाधावधित्वात्। किंतु तद्विषयत्वरूपसंबंधबाधात्। तथाचाबाधितार्थविषयत्वरूपप्रामाण्यस्य मिथ्यात्वेपि नार्थो मिथ्या। विशिष्टस्यै कांशमिथ्यात्वेऽप्यपरांशस्य सत्यत्वात्। यथा दंडबाधनिबंधनदंडिपुरुषबाधेपि पुरुषो न बाधित एवेति। अत्र ब्रूमः। एवं सति वस्तुतो यो बाधितोऽर्थो मिथ्यात्वं तद्विषयाया मिथ्यात्वानुमितेः प्रामाण्यं मिथ्येत्यंगीकुर्वतां मिथ्यात्वतदनुमित्योर्विषयविषयिभावसंबंधो नेत्युक्तं स्यात्। तथा सति मिथ्यात्वानुमितेर्मिथ्यात्वसिद्ध्यर्थं परं प्रति प्रयोगो विरुद्धः स्यात्। मिथ्यात्वानुमितेस्तत्वावेदकत्वं च न स्यात्। नहि विषयत्वातिरिक्तं तदावेदकत्वं नामास्ति। अथ मिथ्यानुमितेर्मिथ्यात्वविषयकत्वमस्ति। परं तु मिथ्याभूतं तदिति चेन्न। वन्ध्यानुमितिर्जरद्ववावाक्यं च मिथ्यात्वविषयकमिति कस्यचिद्भ्रममादाय तयोरपि मिथ्यात्वे प्रमाणत्वं स्यादिति। यत्प्रामाण्यमिति। साक्षात्परंपरया हेतुरुपजीव्यशब्देन विवक्षितः। येन नेदं रूप्यमिति ज्ञानं प्रति इदं रूप्यमित्यस्यप्युपजीव्यत्वं स्यात्। किं तु यत्प्रामाण्यप्रयोजकप्रामाण्याश्रयो यत् तत्तस्योपजीव्यम्। इदं रूप्यमिति ज्ञानं तु नेदं रूप्यमिति ज्ञानप्रामाण्यप्रयोजक प्रामाण्याश्रयो नेति न तस्योपजीव्यत्वमिति भावः। प्रामाण्यप्रयोजकत्वं च योगक्षेमसाधारणं विवक्षितम्। तत्र स्वरूपसिद्ध्यर्थमित्याद्यप्रकारं योगरूपमुदाहरति। इह चेति। अत्रापि व्याप्त्यादीत्यनेनानुमिति प्रामाण्यप्रयोजकमबाधितत्वं विवक्षितं। अबाधितत्वज्ञानाप्रामाण्येऽनुमित्यप्रामाण्यस्यावश्यकत्वम्। न तु व्याप्तिज्ञाना प्रामाण्येऽप्यनुमित्यप्रामाण्यम्। कूटलिंगादपि जायमानस्य साध्यवति साध्यज्ञानस्य यथार्थत्वादित्यर्थः। अपवादनिरासार्थमिति द्वितीयप्रकारं क्षेमरूपमुदाहरति। सर्वज्ञत्वेति। ब्रह्मबुद्ध्यप्रामाण्य इत्युपलक्षणम्। जीवबुद्ध्यप्रामाण्य इत्यपि द्रष्टव्यम्। ऐक्यश्रुत्या प्रत्यक्षसिद्धं

अनुमेयस्याबाधितविषयत्वादिना समानयोगक्षेमत्वादिति नियमस्य त्याग इत्यर्थः। कारणं विनापि कृप्तनियमत्यागे बाधकमाह। अकस्मादिति। तथा दृश्यत्वहेतुना मिथ्यात्वसिद्धिरपि न स्यादिति भावः।

अत्र वदंति – 'एतावता हि व्याप्त्यादिसमानसत्ताकमनुमेयं सिध्यत्वित्यापत्तेः फलितोर्थः। स चास्माकमिष्ट एव। न हि ब्रह्मभिन्नं किंचिदप्यत्यंताबाध्यमस्ति। न चानुमेयादेर्व्याप्त्यादिना समसत्ताकत्वनियमोऽप्यस्ति। व्यभिचारिणापि लिंगेन साध्यवति पक्षेऽनुमितिप्रमादर्शनात्। ध्वनिधर्महस्वत्वदीर्घत्वादिविशिष्टत्वेन मिथ्याभूतैरपि नित्यैर्विभुभिर्वर्णैः सत्या शाब्दप्रमितिः क्रियत इति मीमांसकैरपि स्वीकारात्। गंधप्रागभावावच्छिन्ने घटे तात्विकव्याप्त्यादिमतापि पृथिवीत्वेनातात्विकगंधानुमितिदर्शनात्। प्रतिबिंबेन बिंबानुमितिदर्शनात्। न च तत्रापि बिंबरहितावृत्तित्वरूपा व्याप्तिस्तात्विक्येवेति वाच्यम्। एवं सत्यवृत्तिगगनादेरपि व्याप्यतापत्तेः। न च तत्र बिंबपूर्वकत्वमेवानुमीयते, बिंबव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपेण प्रतिभासिकेन हेतुनेति वाच्यम्। प्रयुक्तत्वं न तज्जन्यजनकत्वादिरूपम्। व्यतिरेकयोः परस्परं तदभावात्। किंतु व्याप्यव्यापकभावः। तथाच बिंबव्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वं हेतुः। स चाकाशादौ व्यभिचार्येव। तस्मात्तत्र प्रतिबिंबेनैव बिंबानुमानम्। अनुमेयस्य लिंगव्याप्त्यादि समानसत्ताकत्वनियमस्यापास्तत्वात्। एतेन शब्देऽपि योग्यतासमानसत्ताकेन शब्दार्थेन भवितव्यम्। योग्यतावाक्यार्थयोः समानसत्ताकत्वनियमादिति कथं वेदांतवाक्यार्थो योग्यताबाधेऽप्यबाधितः स्यादिति परास्तम्। वेदांतवाक्ये अखंडार्थरूपवाक्यार्थाबाधरूपायाः योग्यताया अप्यबाधाच्चेति।

अत्रोच्यते। यत्तावदुक्तमनुमेयस्य व्याप्त्यादिना समानसत्ताकत्वमिष्टमिति तन्न। दृश्यत्वेन मिथ्यात्वानुमितेरेवातात्विकविषयत्वापातेनानिष्टत्वात्। यच्चोक्तमनुमेयस्य व्याप्त्यादिना समानसत्ताकत्वनियमोऽसिद्ध इत्यादि। तदयुक्तम्। व्याप्तिशब्देनाबाधितविषयत्वस्योक्तत्वात्। तस्य चानुमेयसमसत्ताकत्वनियमात्। साध्यवति साध्यज्ञानजनके व्यभिचारिणि लिंगेऽप्यबाधितविषयत्वस्य सत्त्वात्। रूपप्रागभावकाले रूपज्ञानजनके पृथिवीत्वे व्याप्तिपक्षधर्मतयोः सत्त्वेऽप्यबाधितत्वस्याभावेन साध्यज्ञानस्य भ्रमत्वात्। अत एवाबाधितत्वं प्रमानुमितौ गुण इति नैयायिकाः। यच्चोक्तं वर्णेष्वविद्यमानेन दैर्घ्यादिना सत्या शाब्दप्रमितिः क्रियते इति। तन्न। दैर्घ्यस्याहेतुत्वात्। तज्ज्ञानस्यैव हेतुत्वात्। तस्य च वाक्यार्थसमसत्ताकत्वात्। तार्किकमते दैर्घ्यस्यापि सत्त्वाच्च। यच्चोक्तं प्रतिबिंबे यदि बिंबरहितावृत्तित्वरूपा व्याप्तिस्तर्ह्याकाशस्यापि बिंबरहितावृत्तित्वेन बिंबव्याप्त्यापत्तिरिति। तन्न। इष्टापत्तेः।

ज्ञानासमवाय्याधारत्वहेतुग्राहकेणानुमानेन। किमु वक्तव्यमपेक्षिताशेषग्राहिणा स्वविरुद्धग्राहकस्य बाध इत्यर्थः॥

ननु यथाऽनुमानस्य व्याप्त्याद्यंशे प्रत्यक्षापेक्षा तथा प्रत्यक्षस्यापि स्वरूपसिद्धिं प्रत्यनुमानापेक्षा तुल्येत्याशंक्य निराकरोति। यद्यपीति। इंद्रियस्याज्ञातकरणतया ज्ञानजनना्यनपेक्षा। अनुमानादीनां तु ज्ञानजननार्थमेव तदपेक्षणादिति विशेष इत्यर्थः। अक्षाप्रामाण्ये हीति। व्याप्त्यादेरित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणाऽबाधितत्वमुक्तम्। साध्याभाव प्रमाविरहरूपाबाधितत्वस्य बाधे अनुमेयस्य बाधनियमात्। योग्यतायाश्चेतरपदार्थ संसर्गेऽपरपदार्थनिष्ठात्यंताभाव प्रतियोगित्वाभावरूपायाः बाधे शब्दार्थबाधस्यावश्यकत्वमित्यर्थः। तत्र हेतुमाह। अनुमेयस्येति। व्याप्त्यादिनेत्यत्राप्यबाधितार्थकत्वमेवोक्तम्। अन्यथेति। अनुमेयस्याबाधितार्थकत्वादिना तुल्ययोगक्षेमत्वाभावे। प्रातिभासिकव्याप्त्यादिमतेति। प्रातिभासिकबाधितत्ववतेत्यर्थः। व्यावहारिकव्याप्त्यादिमतेति॥ व्यावहारिकबाधितत्ववतेत्यर्थः। व्यावहारिकव्याप्त्यादि मतेत्यत्रातद्गुणसंविज्ञानबहुव्रीहिणाऽबाधितार्थकत्वमनुमानेऽभिहितम्। संप्रति घटादिगोचरप्रत्यक्षे व्यावहारिकेणाबाधेन विश्वस्य तात्विकत्वं सिद्ध्येदित्युच्यत इति भेदः। ननु प्रतिबिंबस्य मिथ्यात्वपक्षे प्रतिबिंबेऽबाधितार्थकत्वस्यासिद्ध्या कथमबाधितार्थ कत्वस्यानुमेयतुल्ययोगक्षेमत्वमित्यत आह। प्रतिबिंबस्य मिथ्यात्वेऽपीति। तन्मिथ्यात्व पक्षेऽपीत्यर्थः। तथाच प्रतिबिंबेपि व्यतिरेकव्याप्तिसत्त्वादबाधितार्थकत्वमस्त्येवेत्यबाधितत्वतुल्य योगक्षेमत्वमनुमेयस्यास्त्येवेति भावः। ननु यादृशं साध्यस्य सत्त्वमादाय हेतोरबाधितत्वं संभवति तादृशमेव साध्यस्य सत्त्वं हेतुना सिध्यति। धूमादेस्तु व्यावहारिकसाध्यसत्त्वमादायाबाधितत्वमुपपन्नमिति धूमादिगतेनाबाधितविषयत्वेन व्यावहारिक एव वह्निः सिध्यति। दृश्यत्वस्याबाधितविषयत्वं तु तात्विकसाध्यसत्त्वगर्भम्। अतो व्यावहारिकेणापि दृश्यत्वगतेनाबाधितविषयत्वेन तात्विकमिथ्यात्वसिद्धिः। धूमादिना तु व्यावहारिकवह्निसिद्धिरित्यत आह। न च धूमस्येति। व्याप्तिशब्देनाबाधितविषयत्वम्। धूमे विद्यमानमबाधितत्वं व्यावहारिकसाध्यसत्त्वेनाप्युपपन्नम्। दृश्यत्वे विद्यमानमबाधितविषयत्वं तु तात्विकमिथ्यात्वं विनाऽनुपपन्नम्। अतस्तात्विकं मिथ्यात्वं साधयति। तथाचानुमेयस्याबाधितविषयत्वेन तुल्ययोगक्षेमत्वानंगीकारेऽपि धूमादेर्व्यावहारिकवन्ह्यनुमितिरेव, दृश्यत्वादेस्तु तात्विक मिथ्यात्वानुमितिरेवेति व्यवस्थासिध्यभाव इत्यर्थः। ननु दृश्यत्वादेस्तात्विकार्थसाधनस्वभावादेव तथाविधार्थसिद्धिः। धूमादेस्तु तात्विकार्थसाधनस्वभावो नास्तीति यवबीजात्कलमांकुरस्येव न धूमादेस्तात्विकार्थसिद्धिरित्यत आह। न चाद्यापीति। क्लृप्तनियमत्याग इति।

मूलं च स्मृतिकारस्य स्मृत्यंतरमेव। तदपि चार्थज्ञानद्वारेण श्रुतिज्ञानस्यैव लिंगं न श्रुतिसद्भावस्येति न कचित्कस्यचिदपि श्रुतिसद्भावनिश्चयो लैंगिको लभ्यते। तेन यदि परकीयज्ञानेन प्रागेवार्थनिश्चयस्ततोऽर्थस्मरणं परंपरयार्थस्यैवानुमानान्न श्रुतिसिद्धिः। अथ स्मृत्यंतरमेव मूलं स्यादंधपरंपरया न स्वरूपनिश्चयः स्यात्। एवमुभयथापि न श्रुतिर्नित्यानुमेया सिध्यतीति न तन्मूलत्वेनाम् प्रामाण्यं स्मृतीनां। तदाहुः–

"नैतासां श्रुतिमूलत्वे प्रत्यक्षादि प्रवर्तते।
अर्थापत्तिस्तु नास्त्यत्र भ्रांत्यादेरपि संभवात्॥
नोच्छिन्नश्रुतिमूलत्वं नित्यतोक्तिविरोधतः।
पठितश्रुतिमूलत्वे स्मृतिप्रणयनं वृथा॥
नित्यानुमेयतायां तु मूलत्वं नैव संभवेत्।
स्मर्तृणामपि नास्मद्वत्कल्पनं ह्युपपद्यते॥" इति।

सिद्धांतस्तु।

"वैदिकार्थप्रयोक्तृणामादरेण परिग्रहः।
स्मार्तेषु वेदमूलत्वं विना नैवोपपद्यते॥
मन्वादयश्च वेदेपि प्रवक्तृत्वेन कीर्तिताः।
तेन तद्वाक्यसत्यत्वं वेदेनैवावधारितम्॥"

यद्वै किंचिन्मनुरवदत्तद्भेषजमिति वेदेनैव मानवस्य ग्रंथस्य प्रमाणत्वाभिधानादेवं विधशिष्टपरिग्रहदार्ढ्यात्प्रामाण्यमेव वेदमूलत्वेन स्मृतीनाम्। कथमनुच्चारितानां मूलत्वोपपत्तिरिति चेन्न। उच्चार्यंत एव हि स्मृतिमूलभूताः श्रुतयः। संप्रत्यभिप्रकीर्णाः। काश्चित्कचित्कस्यां चिच्छाखायां विप्रकीर्णत्वाच्छाखांतराध्यायिभिः शाखांतरगतानामनुपलंभात्तादर्थ्येनार्थवत्तन्नि बंधनम्। उपलंभेऽपि वा मंदधीभिरनुपसंहरणीयानामुपसंहारफलं स्मृतिप्रणयनमिति न वैयर्थ्यम्। धर्मस्य शब्दमूलत्वात् वेदमूलत्वात्। अशब्दमवेदमूलं। अनपेक्षं धर्मप्रमायामनपेक्षणीयं स्यादिति सूत्रार्थः। एवं स्मृतेः सकाशादुपजीव्यत्वेन यथा श्रुतेः प्राबल्यं तथा द्वैतश्रुति ग्राहिप्रत्यक्षस्याप्यद्वैतश्रुत्यपेक्षया प्राबल्यमित्यर्थः।

प्रत्यक्षस्योपजीव्यत्वमुपपादयति। तच्चेति। अक्षेण ग्राह्यत्वादित्यन्वयः। यदा हीति। दृष्टं चापेक्षितैकदेशग्राहिणामप्युपजीव्यत्वम्। तद्विरुद्धग्रहणे तेन बाधश्च। यथा घटविभुत्वानुमाने पक्षग्राहिणाऽक्षेण। नरशिरःकपालशुचित्वानुमाने साध्यग्राहकेणाऽगमेन। मनोवैभवानुमाने

किंतु तद्विषयत्वरूपसंबन्धबाधात्तथा। तथा चाबाधितार्थविषयत्वरूपप्रामाण्यमिथ्यात्वेऽपि नार्थो मिथ्या। विशिष्टस्यैकांशमिथ्यात्वेऽप्यपरांशसत्यत्वात्, यथा दण्डबाध निबन्धनदण्डिपुरुषबाधेऽपि पुरुषो न बाधित एवेति। ॥ इति अद्वैतसिद्धौ प्रत्यक्षस्योपजीव्यत्वभङ्गः ॥

न्यायामृततरङ्गिणी

श्रुतेः स्मृतित इति। प्रथमस्य तृतीयेऽभिहितम्। धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्। मन्वादिस्मृतीनां प्रामाण्यसिध्यर्थं श्रुतिमूलत्वसदसद्भावविचारणायां पूर्वपक्षः – न तावदमीषां प्रत्यक्षादिमूलत्वेन प्रामाण्यम्। तेषां धर्माधर्मयोरप्रवृत्तेः। नापि स्वातंत्र्येण वेदवत्। पौरुषेयत्वात्। न चोदनामूलत्वेन। तदनुपलंभात्। न हि तासां प्रत्यक्षेणोपलंभसंभवः। अनुच्चार्यमाणत्वात्। उच्चार्यमाणत्वे वा स्मृतिप्रणयनवैयर्थ्यम्। प्राक् पठिता अपि संप्रति पुरुषाशक्त्या उत्सन्ना इति चेत् किमेका काचिच्छाखा स्मार्तश्रुतिसंघातात्मिका पूर्वमासीत् सेदानीमुत्सन्नेति कल्प्यते, किं वा बहुशाखास्वितस्ततः श्रुतयः स्मृतिमूलभूताः पठिताः संप्रत्युत्सन्ना इति। तत्र सहस्रं सामशाखाः एकशतमध्वर्युशाखा एकविंशतिशाखा वह्वृचः इत्यादिशाखापरिमाणस्य परंपरया सर्वलोकस्मरणान्नातोऽधिका शाखा संभावयितुं शक्यते। नापि पठ्यमानानामत्यंतावहिताध्येतृकाणां मध्ये कासांचिच्चोदनानामुत्सादसंभवः। नापि नित्यानुमेयाः। अंधपरंपरापातात्। ननु स्मृतिलिंगवशेन निश्चेप्यंते चोदनाः लिंगादिनेव श्रुतय इति चेत्, विषम उपन्यासः। लिंगादयो हि सर्वपुरुषप्रत्यक्षविषयाः श्रुतिमंतरेणानुपपद्यमानाः युक्तं यत्तस्यानिश्चयमादधति। स्मृतिवाक्यरचनात् पौरुषेयी यदर्थविषयोपलभ्यते तद्विषयमेव रचयितुर्ज्ञानं कल्पयति। अष्टकाकर्तव्यताविषयं च स्मृतिवाक्यमिति। नूनमयमष्टकाकर्तव्यतां वेदेत्येतावत् प्रथमं कल्प्यते। न श्रुतिस्वरूपं नापि तज्ज्ञानम्। एवमर्थज्ञाने स्मृतिकारस्य कल्पिते पश्चाद् ज्ञानलिंगाज्ज्ञेयभूतार्थानुमानम्। न श्रुतिकल्पनं। अथोच्येत। न खलु परकीयेन ज्ञानेन झटित्येवार्थनिर्णयः। मूलानुसंधानसापेक्षत्वात्। तत्र स्मृतिकारस्यार्थविषयज्ञानमनुसंदधानः स्मृत्यंतरमेव संभावयेत्। तदपि च ज्ञानस्यैव लिंगं नार्थस्य। एवं च ततः पूर्वतरमपि स्मरणं ज्ञानस्यैव लिंगं नार्थस्येति न क्वचिदर्थनिश्चयो लैंगिको लभ्यत इति श्रुतिरेव कल्पयितव्या। यद्येवं श्रुतावपि तुल्यमेवैतत् स्मृतिकारस्य मूलतया श्रुतिज्ञानमेव प्रथमं कल्प्यते न श्रुतिसद्भावः। श्रुतिविषयेण तु ज्ञानेन ज्ञेयभूतश्रुतिनिर्णयः। परज्ञानेन च तद्विषय श्रुतिनिश्चयो मूलानुसंधानसापेक्षः।

प्रातिभासिकव्याप्त्यादिमता बाष्पाध्यस्तधूमेन तात्विको व्यावहारिको वाग्निर्व्याव हारिकव्याप्त्यादिमता धूमेन तात्विकोऽग्निर्व्यावहारिकेणाबाधेन विरुद्धधर्माधिकरणत्वेन च विश्वस्य जीवेशभेदस्य च तात्विकं सत्त्वं सिध्येत् – इति चेन्न। एतावता हि व्याप्त्यादिसमानसत्ताकमनुमेयं सिद्ध्यत्वित्यापत्तेः फलितोऽर्थः। स चास्माकमिष्ट एव। न हि ब्रह्मभिन्नं किंचिदप्यत्यन्ताबाध्यमस्ति। न चायमनुमेयादेर्व्याप्त्यादिना समसत्ताकत्वनियमोऽप्यस्ति। व्यभिचारिणापि लिङ्गेन साध्यवति पक्षे अनुमितिप्रमादर्शनात्। ध्वनिधर्महस्वत्वदीर्घत्वादिविशिष्टत्वेन मिथ्याभूतैरपि नित्यैर्विभुभिर्वर्णैः सत्या शाब्दप्रमितिः क्रियत इति मीमांसकैरभ्युपगमात्। गन्धप्रागभावावच्छिन्ने घटे तात्विकव्याप्त्यादिमतापि पृथिवीत्वेनातात्विकगन्धानुमितिदर्शनात्। प्रतिबिम्बेन च बिम्बानुमितिदर्शनात्। न च तत्रापि बिम्बरहितावृत्तित्वरूपा व्याप्तिस्तात्विक्येवेति वाच्यम्। एवं सत्यवृत्तिगगनादेरपि व्याप्यतापत्तेः। न च तत्र बिम्बपूर्वकत्वमेवानुमीयते, बिम्बव्यतिरेकप्रयुक्त व्यतिरेकप्रतियोगित्वरूपेणाप्रातिभासिकेन हेतुनेति वाच्यम्। प्रयुक्तत्वं हि न तज्जनकत्वजन्यत्वादिरूपम्। व्यतिरेकयोः परस्परं तदभावात्। किंतु व्याप्यव्यापकभावः। तथा च बिम्बव्यतिरेकव्यापकव्यतिरेकप्रतियोगित्वं हेतुः। स चाकाशादौ व्यभिचार्येव। तस्मात्तत्र प्रतिबिम्बेनैव बिम्बानुमानम्। अनुमेयस्य लिङ्गव्याप्त्यादिसमान सत्ताकत्वनियमस्यापास्तत्वात्। एतेन शब्देऽपि योग्यतासमानसत्ताकेन शब्दार्थेन भवितव्यम्, योग्यतावाक्यार्थयोः समानसत्ताकत्वनियमादिति कथं वेदान्तवाक्यार्थो योग्यताबाधेऽप्यबाधितः स्यादिति परास्तम्। वेदान्तवाक्ये अखण्डार्थरूपवाक्यार्थाबाधरूपाया योग्यताया अप्यबाधाच्च। न च तथापि वेदान्ततज्ज्ञानतत्प्रामण्यमिथ्यात्वे कथं तात्विकाद्वैतसिद्धिरिति वाच्यम्। शब्दतज्ज्ञानतात्विकत्वं हि न विषयतात्विकत्वे तन्त्रम्। इदं रजतमित्यनाप्तवाक्यस्य तज्जन्यभ्रमस्य च त्वन्मते तात्विकत्वेऽपि तद्विषयस्यातात्विकत्वात्। न च ज्ञानप्रामाण्यस्य मिथ्यात्वे विषयस्यापि मिथ्यात्वं शुक्तिरूप्यज्ञाने दृष्टमिति प्रकृतेऽपि ज्ञानप्रामाण्यमिथ्यात्वे विषयस्यापि मिथ्यात्वं स्यादिति वाच्यम्। प्रामाण्यमिथ्यात्वं हि न विषयमिथ्यात्वे प्रयोजकम्। भ्रमप्रमाबहिर्भूते निर्विकल्पके विषयबाधाभावात्। किंतु तदभाववति तत्प्रकारकत्वादिरूपमप्रामाण्यमेव तथा। तच्च प्रकृते नास्त्येव। न च अर्थाबाधरूपप्रामाण्यस्य मिथ्यात्वादर्थस्यापि मिथ्यात्वं स्यादिति वाच्यम्; अबाधितार्थविषयत्वं हि यत् प्रामाण्यं तस्य मिथ्यात्वम् प्रकृते नार्थबाधात्। तद्बाधकप्रमाणासंभवात्। तस्य सर्वबाधावधित्वात्।

'पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ।
हेतुतत्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥' इति

किंचापेक्षितग्राहित्वमात्रेण चेदुपजीव्यता, तया च बाधकत्वम्, तदाऽपेक्षितप्रतियोगिग्राहकत्वेन 'इदं रजतम्' इति भ्रमस्य बाधोपजीव्यत्वात् कथं 'नेदं रजतम्' इति बाधबुद्धिस्तद्विरुद्धोदियात्? अथ निषेध्यार्थसमर्पकतया प्रतियोगिज्ञानत्वेन तस्योपजीव्यत्वेऽपि तत्प्रामाण्यं नोपजीव्यम्। न हि प्रतियोगिप्रमात्वेनाभावज्ञानजनकता, गौरवात्। प्रतियोगिभ्रमादप्यभावज्ञानदर्शनाच्च। किंतु तज्ज्ञानत्वेनैव, लाघवात्। अतस्तद्विरुद्धविषयकं ज्ञानमुदियादेवेति ब्रूषे, तुल्यमिदं प्रकृतेऽपि, पक्षज्ञानत्वादिना कारणता, न तु तत्प्रमात्वादिनापीति। अथ यत्प्रामाण्यं स्वरूपसिद्ध्यर्थमपवादनिरासार्थं च यत्प्रामाण्यमुपजीवति तत्तस्योपजीव्यम्, यथा स्मृतेरनुभवः। न च रजतभ्रमस्तथा इति चेत्, तर्हि व्याप्तिधियोऽपि नानुमित्युपजीव्यत्वं स्यात्। लिङ्गाभासादपि वह्निमति वह्निप्रमादर्शनात्। ननु येन विना यस्योत्थानं नास्ति तत्तस्योपजीव्यमित्येव वक्तव्यम्। तथा च रजतभ्रमस्योपजीव्यत्वमस्त्येव, न तु प्राबल्यम्। न ह्युपजीव्यत्वमात्रेण प्राबल्यम्। किंतु परीक्षिततया। परीक्षा च सजातीयविजातीयसंवादविसंवादाभावौ। न च तौ रजतभ्रमे स्तः। प्रकृते चाक्षस्य परीक्षितत्वेन प्राबल्यम्। अस्ति हि 'सन् घटः' इति विशेषदर्शनजन्यज्ञानान्तरं घटार्थक्रियाप्रत्यक्षे कृत्स्नदूरादिदोषाभावश्च। एवमेव जीवेशाभेदश्रुतौ निषेध्यार्थकभेदश्रुतिः साक्षिप्रत्यक्षं चादोषत्वात् परीक्षितमिति। तदपि न बाध्यम्। एवमेव च दोषाभावादिज्ञानरूपपरीक्षायामपि अनाश्वासे वेदे पौरुषेयत्वाभावज्ञाने, त्वदुक्तानुमाने च योग्यानुपलब्ध्यादिना हेत्वाभासादिराहित्यज्ञाने, ब्रह्ममीमांसायां प्रत्यधिकरणं सिद्धान्त्यभिप्रेतार्थे, उपक्रमाद्यानुगुण्यज्ञाने चानाश्वासः स्यादिति प्रमाणतदाभासव्यवस्था न स्यात् इति चेन्न। परीक्षा हि प्रवृत्तिसंवादविसंवादाभावदोषाभावादिरूपा। तया च स्वसमानदेशकालीनविषयाबाध्यत्वं प्रामाण्यस्य व्यवस्थाप्यते, धूमेन स्वसमानदेश कालीनवह्निरिव। तथा च व्यवहारदशामात्राबाध्यत्वं देहात्मैक्यसाधारणं परीक्षितप्रमाणे व्यवस्थितमिति कथमत्यन्ताबाध्यत्वाभावग्राहकागमानुमानयोः प्रवृत्तिर्न स्यात्? तस्माद्विश्वास- प्रमाणतदाभासव्यवस्था जीवेशभेदादिकं च व्यावहारिकमित्युपपन्नमेव सर्वं जगन्मिथ्येति।

ननु – प्रत्यक्षाप्रामाण्ये तत्सिद्धस्य व्याप्त्यादेर्बाधेनानुमेयादेरनुमित्यादिप्रामाण्यस्य च बाधः। अनुमेयादेर्व्याप्त्यादिना अनुमितिप्रामाण्यादिना च समानयोगक्षेमत्वात्। अन्यथा

संवादविसंवादभावाभावौ हि परीक्षा। न चात्र विशेषदर्शनजन्यं स्वसमानविषयकज्ञानान्तररूपः सजातीयसंवादो वा रूप्यार्थक्रियादिरूपो विजातीयसंवादो वास्ति, प्रत्युत तद्विसंवाद एव। दृश्यते चोत्तरस्यैव संवादादिकमिति पूर्वधीर्बाध्या। जगत्सत्यत्वप्रत्यक्षे तु विशेषदर्शनजन्यं सन्घट इति ज्ञानान्तरं घटार्थक्रिया प्रत्यक्षे कृत्नदूरादिदोषाभावश्चास्तीति न तद्बाध्यम्। जीवेशाभेदश्रुतौ च निषेध्यार्पिका भेदश्रुतिः। साक्षिप्रत्यक्षं च दोषत्वात् परी न क्षितमिति न तदपि बाध्यम्। इत्थमेव च दोषाभावादिज्ञानरूपपरीक्षायामनाश्वासे वेदस्यापौरुषेयत्वेन तज्ज्ञाने त्वदुक्तानुमाने च योग्यानुपलंभादिना हेत्वाभासादिराहि त्यज्ञाने ब्रह्ममीमांसायां च न प्रत्यधिकरणं सिद्धान्त्यभिप्रेतार्थे उपक्रमाधानुगुण्यज्ञाने च अनाश्वासः स्यादिति प्रमाणतदाभासादिव्यवस्था न स्यात्। यद्यपि धर्म्यपके इदं ज्ञानांशे परीक्षितत्वविशिष्टमुपजीव्यत्वमस्ति, तथापि तन्न बाध्यते। शिष्टमैक्यभंगे वक्ष्यते। प्रत्यक्षस्योपजीव्यत्वेन प्राबल्यविवरणम्।

अद्वैतसिद्धिः

ननु – उक्तन्यायैः प्रत्यक्षस्य जात्या प्राबल्याभावेऽपि उपजीव्यत्वेन प्राबल्यम्। उपजीव्यत्वं चानुमानागमापेक्षिताशेषार्थग्राहकतया। सा च क्वचित् साक्षात् क्वचित्परम्परया। दृष्टं चापेक्षितैकदेशग्राहिणामप्युपजीव्यत्वम्, तद्विरुद्धग्रहणे तेन बाधश्च। यथा घटविभुत्वानुमाने पक्षग्राहिणा अक्ष्णा, नरशिरश्शुचित्वानुमाने साध्यग्राहकेणागमेन, मनोवैभवानुमाने ज्ञानासमवाय्याधारत्वहेतुग्राहकेणानुमानेन। किमु वक्तव्यमपेक्षिताशेषग्राहिणा स्वविरुद्धग्राहकस्य बाधः? चक्षुरादेश्च शब्दतज्जन्यज्ञानप्रामाण्याद्यग्राहित्वेऽपि तद्ग्राहिश्रोत्रसाक्ष्यादिसजातीयत्वादुपजीव्यत्वम्। दृष्टं च नरशिरःकपालाशुचित्वबोधकागमस्य तच्छुचित्वानुमानोपजीव्यशुचित्वागमसजातीयत्वेन तदनुमानात् प्राबल्यम्। न चेन्द्रियमपि स्वज्ञानार्थमनुमानमुपजीवतीति सम एवोपजीव्योपजीवकभावः। अज्ञातकरणतया ज्ञानजननार्थमनुमानानपेक्षणात्। अनुमानागमादिना तु ज्ञानजननार्थमेव तदपेक्षणादिति विशेषाद् इति चेन्न। उपजीव्याविरोधात्। तथा हि – यत्स्वरूपमुपजीव्यते तन्न बाध्यते। बाध्यते च तात्त्विकत्वाकारः। स च नोपजीव्यते। कारणत्वे तस्याप्रवेशात्। तदुक्तम्–

व्यावहारिको वाग्निः व्यावहारिकव्याप्त्यादिमता च धूमेन तात्त्विकोऽग्निः व्यावहारिकेणाबाधेन विरुद्धधर्माधिकरणत्वेन च विश्वस्य जीवेशभेदस्य च तात्त्विकत्वं सिध्येत्। प्रातिभासिकयोग्यतादिमताऽनाप्तवाक्येन च तात्त्विको व्यावहारिको वाऽर्थः व्यावहारिकयोग्यतादिमता च लौकिकवाक्येनाग्निहोत्रादिवाक्येन च तात्त्विकोऽर्थः, सिध्येत्। प्रतिबिम्बस्य मिथ्यात्वेऽपि बिम्बरहितावृत्तिरूपा व्याप्तिरस्त्येव। न च धूमस्य तात्त्विकाग्निना न व्याप्तिः दृश्यत्वस्य तु तात्त्विकमिथ्यात्वेन व्याप्तिरित्यस्ति न ह्यद्यापि मिथ्यात्वप्रमाणं तत्त्वावेदकमन्यदतत्वावेदकमिति व्यवस्था सिद्धा, येन कृप्तनियमत्यागः। अकस्मात् यागे च दृश्यत्वस्य मिथ्यात्वनियमोऽपि त्याज्यः।

ननु तथापि कथं प्रामाण्यमिथ्यात्वे विषयमिथ्यात्वम्? प्रत्यक्षस्याप्रमाणत्वेन तद्विषयस्य श्रौतधीप्रामाण्यस्य मिथ्यात्वेऽपि श्रुतेः प्रमाणत्वात्तद्बोध्याद्वैतस्य सत्यत्वोपपत्तेरिति चेन्न, रूप्यादिज्ञानेषु प्रामाण्यमिथ्यात्वे विषयमिथ्यात्वदर्शनात्। अर्थाबाधरूपप्रामाण्यस्यातात्त्विकत्वेऽर्थस्य तात्त्विकत्वायोगाच्च।

यत्तूक्तं वाचस्पतिना – "उपजीव्यविरोधेन श्रुत्यप्रामाण्ये इदं रूप्यमिति पूर्वधी विरोधान्नेदं रूप्यमितिधीरप्रमा स्याद्"– इति। तन्न, यत्प्रामाण्यं स्वरूपसिद्ध्यर्थं अपवादनिरासार्थं वा यत्प्रामाण्यायत्तं तत्तस्योपजीव्यम्। इह न च व्याप्त्यादिज्ञाताप्रामाण्येऽनुमित्याद्यप्रामाण्यवत्सर्वज्ञ त्वादिरूपब्रह्मबुध्यप्रामाण्ये ब्रह्मात् ऐक्य बुध्यप्रामाण्यवच्च प्रतिषेध्यज्ञानाप्रामाण्ये प्रतिषेधकज्ञानाप्रामाण्यम्, येन तदुपजीव्यं स्यात्। यद्वा येन विना यस्थानुत्थानं तत्तस्योपजीव्यम्। इदं रूप्यमितिधीश्च प्रतिषेध्यार्पकतया धर्म्यर्पकतया चोपजीव्यैव। तथापि न दोषः, न ह्युपजीव्यत्वमेव प्राबल्ये तन्त्रम्, किं तु परीक्षितत्वविशिष्टम्। उक्तं हि–

"यावच्छक्तिपरीक्षायामुपजीव्यस्य बाधने।
दोषो नाशोधिते दोष उपजीव्यत्वमस्त्वलम्॥" इति।

न हि परत्वं प्राबल्ये तंत्रमिति त्वन्मतेपि परत्वमात्रं तन्त्रम्। किं तु परीक्षितत्वविशिष्टम्। अन्यथा प्रमानन्तरभ्रमस्य वेदात्परस्य बाह्यागमस्य च तत्त्वं स्यात्। परीक्षितत्वं च न तावत्प्रतिषेध्यार्पके शुक्तिरूप्याभेदज्ञानांशेऽस्ति। सजातीयविजातीय

उपसन्मात्रस्य इंद्रदेवताकत्वावगमेन ऐंद्याःसुब्रह्मण्याया अग्निष्टुन्नामकप्रथमाहःसंबंध्युपसत्कालेपि प्राप्त्या संशयसंभवात्। तत्रैकाहाग्निष्टुदुपसदःआग्नेयी सुब्रह्मण्यांगत्वेन तन्नामसाम्येन प्रथमोपस्थितत्वेन मुख्यत्वात्। असंजातविरोधित्वेनचाग्नेय्येवाह्वातव्या। न त्वैन्द्री चरमोपस्थितत्वेन संजातविरोधित्वेन च अमुख्यत्वात्। तथाचैतदनुसारेण चतुर्दशाहस्स्वापि आग्नेय्येवाहूतव्येति पूर्वपक्षः। सिद्धांस्तुऐंद्येवाह्वातव्येति। चतुर्दशस्स्वहस्सु उपसत्काले ऐंद्या आहूयमानत्वात्। भूयसां साधर्म्यायात्रापि ऐंद्येवाह्वातव्या। बहुबाधस्यान्याय्यत्वात्। ''त्यजेदेकं कुलस्यार्थं'' इतिन्यायादिति॥ प्रथमेह्नीत्यनंतरं उपसत्काल इतिशेषः॥ अल्पविषयायाइति॥ अग्निष्टुन्नामकप्रथमाहस्संबंध्युपसन्मात्रविषयत्वादित्यर्थः। ननु चतुर्दशाहस्सुचोदक प्राप्तयेत्यनुपपन्नं। उक्तरीत्या एकादशस्वेवाहस्सु चोदकेन प्राप्तेः त्रिष्वहस्सुचनामधेयेनैव प्राप्तेर्निर्णीतत्वादिति चेत्सत्यं। चोदकेनेत्यनंतरं नामधेयसहितेनेतिशेषः। तथाच नामधेयसहितेन चोदकेन प्राप्तया ऐंद्येत्यर्थो द्रष्टव्यः। तत्र त्रिषु नामधेयेन एकादशसु चोदकेनेति विवेकः। ननु कथमत्रद्वैतग्राहिप्रमाणानां बहुत्वमित्यत आह॥ तथा द्वैतग्राहीति॥ द्वैतग्राहिबहुप्रमाणविरोधादेवाद्वैतवाक्यस्य प्रतीतार्थेऽप्रामाण्यमित्यत्र भगवत्पादवाक्यं संवादयति॥ तदुक्तमिति॥ प्रत्यक्षस्य जात्योपक्रमादिन्यायैश्चप्राबल्यविवरणं॥

२१. प्रत्यक्षस्य उपजीव्यत्वेन प्राबल्यम्

किं चोपजीव्यत्वात्प्राबल्यमक्षस्य श्रुतेः स्मृतित इव। तच्चाक्षेणानुमितिकारणस्य पक्षसाध्यहेतुव्याप्त्यादेः शाब्दधीहेतोः शब्दस्वरूपस्य, तद्धर्मस्य योग्यतादेः, उपक्रमोपसंहारैकरूप्यादेः, अनुमितिशाब्दधीस्वरूपतत्प्रामाण्यादेश्च ग्राह्यत्वात्। यदा हि घटो व्यापकः सत्त्वादित्यत्राक्षं धर्मिमात्रग्राहित्वेन, शुचि नरशिरःकपालं प्राण्यङ्गत्वादित्यत्र शब्दः साध्यमात्रग्राहित्वेन, मनो विभु ज्ञानासमवाय्या धारत्वादित्यत्रानुमानं हेतुमात्रग्राहित्वेनाऽनुमानस्योपजीव्यम्। तदेह प्रत्यक्षं लिंगशब्दापेक्षितसर्वग्राहीति कथं नोपजीव्यम्? चक्षुरादेः शब्दतज्जन्यज्ञान प्रामाण्याद्यग्राहित्वेऽपि तद्ग्राहिश्रोत्रसाक्ष्यादिसजातीयत्वात्। रूपादिधर्म्यंशे साक्षादुप जीव्यत्वाच्च प्राबल्यम्। दृष्टं च नरशिरःकपालाशुचित्वागमस्य तच्छुचित्वानुमानात् उपजीव्यशुचित्वग्राहिशब्दसाजात्यमात्रेण प्राबल्यम्। यद्यपीन्द्रियमनुमेयम्, तथापि तस्याज्ञातकरणत्वान्नानुमोपजीव्या। अक्षाप्रामाण्ये हि तत्सिद्धस्य व्याप्त्यादेर्योग्यतादेश्च बाधेनानुमेयस्य शब्दार्थस्य च बाधः स्यात्। अनुमेयस्य व्याप्त्यादिनानुमिति प्रामाण्यादिना शब्दार्थस्य च योग्यतादिना शाब्दधीप्रामाण्यादिना च तुल्ययोगक्षेमत्वाद्, अन्यथा प्रातिभासिकव्याप्त्यादिमता बाष्पाध्यस्तधूमेन तात्त्विको

समस्तव्यक्तिवाचियावदर्थकयत्किंचिच्छब्दश्रवणात्। अन्यथा यत्किंचिच्छब्दो व्यर्थः स्यात् इति पूर्वपक्षेप्राप्ते सिद्धांतितं। नाग्नीषोमीयात्प्राचीनं समस्तमुपांशुकर्तव्यं तत्साधकाभावात्। नच यत्किंचिच्छब्दोस्तीति वाक्यं। तस्य प्रकृताग्नीषोमीयपूर्वकालीनदीक्षणीयादिसमस्तविशेषवाचित्वेन सामान्याविषयत्वेपि दीक्षणीयाव्यतिरिक्ते तस्य सावकाशत्वेन संकोचकरणात्। कुतइतिचेत् ''यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादि''ति निरवकाशवाक्यसद्भावात्। अतोऽग्नीषोमीयात्प्राक्दीक्षणीयेष्टिव्यति रिक्तमेवोपांशुकर्तव्यमिति॥ प्रकृतेति॥ प्रकृताग्नीषोमीयपश्वालंभपूर्वकालीनदीक्षणीयेष्टिक्रत्विग्वरणयूपावटादिसमस्तविशेषवाचित्वेनेत्यर्थः॥ दीक्षणीयेति॥ प्रकृतविशेषेष्वपीतिशेषः। ननु तर्हि प्रकृते श्रुतिप्रत्यक्षयोः कथं सावकाशत्वनिरवकाशत्वे इत्यतस्तदुपपादयति॥ तथावृत्त्यंतरेणेत्यादिना॥ ''तत्त्वमसीत्यादौ'' वृत्त्यंतरेण लक्षणया ''ब्रह्मैवसन्ब्रह्माप्येती'' त्यादौ ब्रह्मशब्दस्यानेकार्थत्वेन ''सर्व एकीभवंती'' त्यादौ स्थानैक्यादिरूपविषयांतरपरत्वेन वाऽद्वैतश्रुतेःसावकाशत्वमित्यर्थः॥ निरवकाशेनेति॥ वृत्त्यंतरादिनावकाशानर्हेणेत्यर्थः। पूर्वं सामान्यविशेषभावेन बाधे तात्पर्यं अत्र तु सावकाशत्वादिना संकोचे इति भेदः। यद्यपि सामान्यविशेषभावस्थलेपि सावकाशत्वादिना संकोच एवक्रियते तथाप्युदाहरणभेदेन शब्दभेदेन चोपपादनमात्रमिति द्रष्टव्यं।

किंच ''बहुबाधस्यान्याय्यत्वादि'' तिन्यायेन द्वैतग्राहिप्रत्यक्षादिबहुप्रमाणाऽबाधायाऽद्वैतवाक्यस्य प्रतीतार्थबाध एव कार्य इत्याशयेनाह॥ किंच पंचदशरात्र इत्यादिना॥ द्वादशाध्याये द्वितीयपादे चिंतितं। विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्व''_मित्यत्र। अयमत्राधिकरणनिष्कर्षः। अस्ति पंचदशरात्राख्यं सत्रं पंचदशसुत्यात्मकं तस्य प्रथमं सौत्यं अहरग्निष्टुन्नामकं ततःपराणि त्रीण्यहानि ज्योतिर्गौरायुरित्येतन्नामकानि अग्निष्टुत्ज्योतिर्गौरायुरित्येतन्नामकाऐकाहिकाःप्रसिद्धाः। अपरेपि क्रतवो वर्तंते तेषांनामान्यग्निष्टुदादीनि तदीयेतिकर्तव्यताप्राप्त्यर्थं पंचदशरात्रस्य प्रथमदिवसचतुष्टये स्थाप्यंते। ततःपराण्येकादशाहानि द्वादशाहक्रतुप्रकृतिकानि। तत्र पंचदशस्वप्यहस्सु उपसदःसंति। आज्यहविष्का इष्टयोह्युपसदइत्युच्यंते। तत्र सुब्रह्मण्यानामका यजुर्वेदीय निगदविशेषाःसंति। तत्र ''यदस्य कर्मणोत्यरीरिचं यद्वान्यूनमिहाकरं। अग्निष्टुत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोत्वि''त्याग्नेयी सुब्रह्मण्या। ''गौरावस्कंदिन्मेधातिथे मेषवृषाणअहल्यायै जारे'' त्यैंद्री सुब्रह्मण्या। इत्येवंसुब्रह्मण्याद्वयमस्ति। तेनाग्नींद्रयोराह्वानं तत्रोपसत्काले कार्यं। तत्र पंचदशरात्रस्य यत्प्रथममहरग्निष्टुन्नामकं तत्रोपसत्काले एकाहाग्निष्टुन्नामधेयसाम्येन आग्नेयी सुब्रह्मण्या प्राप्ता। एकाहाग्निष्टुति उपसत्काले आग्नेय्याःसुब्रह्मण्यायाःसत्त्वात्। ज्योतिर्गौरायुरित्येतत्संज्ञकेषु त्रिष्वहस्सु क्रियमाणोपसत्काले ज्योतिर्गौरायुरित्येतत्संज्ञकैकाहनामधेयसाम्येनैंदी सुब्रह्मण्या प्राप्ता। ऐकाहिकज्योतिरादिदिवसे उपसत्काले ऐंद्र्याःसुब्रह्मण्यायाःसत्त्वात्। परिशिष्टेष्वेकादशाहस्सु क्रियमाणोपसत्काले ऐन्द्रयैव सुब्रह्मण्या चोदकेन प्राप्ता। एतत्प्रकृतिभूते द्वादशाहकृतौ क्रियमाणोपसत्काले ऐन्द्रयाः सुब्रह्मण्यायाः सत्त्वात्। एवंच पंचदशरात्रे आद्याहीयोपसदःआग्नेयी सुब्रह्मण्या अंगं। परिशिष्टानां चतुर्दशानामह्नांऐंद्री अंगं। तत्रचैंद्री त्रिषूपसत्काले नामधेयेन प्राप्नोति। एकादशाहस्सुचचोदकेनेति विवेकइतिवस्तुगतिः। तत्राग्निष्टुन्नामके प्रथमे ह्हि उपसत्कालीनसुब्रह्मण्यायां संदेहः किमाग्नेयी आह्वातव्या ऐंद्रीति। ननु प्रथमेह्हि उपसत्काले ऐंद्र्याःप्राप्तेरेवाभावात्संदेहएवानुपपन्नइतिचेत् संप्रदायानभिज्ञोसि। या उपसदस्ता ऐंद्र्य इति सामान्यश्रुत्या

शक्यएवविनियोक्तव्या। तस्याश्चशक्तिरिंद्रप्रकाशनएवेति तस्यैवोपस्थानं कर्तव्यं। गार्हपत्यशब्दस्तु यज्ञसाधनत्वसाधर्म्यादिना इंद्रे प्रवर्तयितव्यइति पूर्वपक्षः। सिद्धांतस्तु यत्र वस्तुनः सर्वथाऽसामर्थ्यं तत्रैव विनियोगो न संभवति अस्तित्विंद्रशब्दस्य गार्हपत्ये गौणं तत् यथोक्तं ''गार्हपत्ये तु सामर्थ्यं गौणं मंत्रस्य विद्यत'' इति। अवश्यंच मंत्रस्थैंद्रशब्दस्य वा विनियोजकवाक्यपरब्राह्मणस्थगार्हपत्यशब्दस्य वा कस्य चिदमुख्यार्थत्वं कल्पनीयं। तच्च मंत्रस्थेंद्रशब्दएव युक्तं विधौ लक्षणाया अन्याय्यत्वात्। नच विध्यनुसारेण ऐंद्र्या ऋचो लक्षणया गार्हपत्योपस्थाने विनियोगेपि इन्द्रप्रकाशनशक्तिरूपया मुख्यवृत्त्या लिंगात्मिक्या इंद्रोपस्थाने विनियोगोस्त्विति वाच्यं। गार्हपत्यमुपतिष्ठतइति प्रत्यक्षश्रुत्या शीघ्रं मंत्रे विनियुक्ते सति तावतैव मंत्राम्नानस्य चरितार्थतया मंथरगामिलैंगिकविनियोगकल्पनाऽयोगात्। तस्माद्गार्हपत्यस्यैवोपस्थानं कर्तव्यमिति। एवंच प्रकृते व्याप्त्यादिसापेक्षतया मंथरगाम्यनुमानाद्यपेक्षया प्रत्यक्षस्य झडित्यर्थावगाहित्वात्प्राबल्यमित्यर्थः॥ प्रत्यक्षइति॥ यथालोके प्रत्यक्षे चानुमानेच शीघ्रमंथरगामित्वात् बलाबलं दृष्टं तथेहश्रुतिलिंगयोरित्यर्थः। एवंच श्रुतिलिंगयोः शीघ्रमंथरगामित्वेन बलाबलचिंतायां उदाहरणंतया प्रत्यक्षानुमानयोर्गृहीतत्वात्प्रत्यक्षस्यानुमानापेक्षया प्राबल्यं निश्चितमस्तीत्याशयः।

विशेषविषयत्वाच्च प्रत्यक्षस्य प्राबल्यमुपपादयति॥ यदाहवनीय इत्यादिना॥ दशमेऽध्यायेऽष्टमपादे चिंतितं ''अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्संदिग्धमाराद्विशेषशिष्टं स्या'' दित्यत्रज्योतिष्टोमे ''अरुणयैकहायिन्या पिंगाक्ष्या गवा सोमक्रीणशती'' त्यत्र सोमक्रयणकाले ''पदे जुहोति वर्त्मनि जुहोती'' तिश्रूयते। गवांपदसंबंधो यत्र तत्र होमादिकं कार्यमित्युक्तेऽतिप्रसंगप्राप्तौ गौर्येन वर्त्मनासोमक्रयणार्थं नीयते तद्वर्त्मनि विद्यमाने पदे होमः कर्तव्यइति तदर्थः। ''गार्हपत्ये पत्नीसंयाजान्यजती'' त्यादिच श्रूयते तथा ''यदाहवनीये जुहोती'' तिच। तत्र होमसामान्येऽधिकरणतया श्रुतस्याहवनीयस्य होमविशेषेऽधिकरणत्वेन विहितवर्त्मपदगार्हपत्यादिना विकल्पो बाधो वेति संशये सामान्यविशेषशास्त्रयोर्द्वयोरपि प्रत्यक्षत्वेन कृप्ततया बलाबलानवधारणात् विकल्पइति पूर्वपक्षः। सिद्धांतस्तु सामान्यविशेषशास्त्रयोः कृप्तत्वेपि विशेषशास्त्रतः सोमक्रयणार्थं नीयमानावस्थाविशेषकालीनहोमविशेषे पत्नीसंयाजादिहोमविशेषे चाधिकरणतया वर्त्मपदगार्हपत्यादेः स्पष्टश्रुत्यैव प्राप्तिः। ''यदाहवनीय'' इति सामान्यशास्त्रतस्तु आहवनीयादेः होमसामान्याधिकरणताविधानात् श्रुतहोमसामान्यमुखेन तद्विशेषे लक्षणया प्राप्तिरित्येवं सन्निकर्षविप्रकर्षसद्भावाद्विशेषविषयैर्वर्त्मपदगार्हपत्यादिभिः सामान्यतोविहिताहवनीयस्य बाधएवेति। एवं च प्रकृतेपि प्रत्यक्षस्य विशेषविषयत्वात्तेन सामान्यविषयिण्याः श्रुतेरेव बाधइत्यर्थः। कथं प्रत्यक्षश्रुत्योः सामान्यविशेषविषयकत्वमित्यत आह॥ प्रत्यक्षंहीति॥

किंच प्रत्यक्षस्य निरवकाशत्वात्सावकाशश्रुतेः प्राबल्यमित्याह॥ किंच यथा यत्किंचित्प्राचीनमिति॥ नवमेऽध्याये प्रथमपादे चिंतितं ''देशबद्धमुपांशुत्वं तेषां स्यात् श्रुतिनिर्देशात्तस्यच तत्राभावादि''त्यत्र ज्योतिष्टोमे श्रूयते ''यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरतीति।'' तत्राग्नीषोमीयपश्वालंभनात्पूर्वं यत्किंचित्कर्तव्यं दीक्षाकालमारभ्य क्रियमाणदीक्षणीयेष्टियूपावटबर्हिरास्तरण ऋत्विग्वरणादितत्समस्तमपि कर्म किमुपांशुमंत्रोच्चारणपूर्वकं कर्तव्यमुत नेति संशयेऽग्नीषोमीयात्पूर्वतनं समस्तमप्युपांश्वेव कर्तव्यं

शैत्यस्य साध्यत्वात्। तदिदमुक्तं वह्निशैत्येति। तथाच एतादृशस्थले धर्मिप्रतियोगिग्रहकत्वादिना प्रत्यक्षस्योपजीव्यत्वाद्यभावेपि केवलं जात्यैव प्राबल्यं दृष्टमित्यर्थः। नन्वेवं प्रत्यक्षस्यैवानुमानागमाभ्यां जात्या प्राबल्ये'' प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृत'' मिति ब्रह्मतर्कवचनविरोधइत्यत आह॥ प्राबल्यमिति। वैदिकपरब्रह्मादिरूपार्थनिर्णयविषये आगमस्यैव जात्या प्राबल्यं। अत्र तु घटादिप्रपंचरूपलौकिकार्यस्य प्रस्तुतत्वात्तद्विषये जात्या प्रत्यक्षस्य प्राबल्याभिधाने न तद्विरोध इत्यर्थः। अतएवेति॥ एवं लौकिकार्यविषये प्रत्यक्षस्यैव जात्या प्राबल्यदर्शनादेवेत्यर्थः। उक्तं भगवत्पादैः।

एवंजात्या प्राबल्यमुपपाद्याऽनुपसंजातविरोधित्वाच्च प्रत्यक्षस्य प्राबल्यमित्याह॥ उपक्रमाधिकरणन्यायेनेति॥ तृतीयाध्याये तृतीयपादे चिंतितं। ''श्रुतेर्जाताधिकारः स्या'' दित्यत्र ज्योतिष्टोमे श्रूयते ''प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत तस्मात्तेपानान्त्रयो देवा असृज्यंत अग्निर्वायुरादित्यस्ते तपोतप्यंत तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यंत अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद'' इत्युपक्रम्य श्रूयते ''उच्चैर्ऋचा क्रियते उपांशुयजुषा उच्चैः साम्ने'' ति। तत्र संदेहः किमुच्चैष्ट्वादयो ऋगादिधर्माः ऋचा मंत्रेण यत्क्रियते तदुच्चैः कर्तव्यमिति। किंवा ऋग्वेदादिधर्माः ऋग्वेदेनोच्चैरिति। तत्र क्रियत इति लकारव्यत्ययेन कुर्यादिति विधेरभिप्रेततयोपसंहारगतेषु विध्युद्देशेषु ऋगादिशब्दश्रवणादुपक्रमगतार्थवादे ऋग्वेदादिशब्दसत्त्वेपि अर्थवादस्य विधिबोधितार्थप्राशस्त्यमात्रप्रतिपादकस्य विधिशेषत्वेन गुणप्रधानयोर्विरोधे प्रधानस्य विध्युद्देशस्यैवानुसरणीयत्वादृगादिधर्मा उच्चैष्ट्वादयः। तथाचार्थवादगतऋग्वेदादिपदं लक्षणया स्वार्थत्यागेन विध्युद्देशानुसारेण ऋगादिमात्रपरमेव। एवंच यजुर्वेदेपि ऋग्वेदस्थर्चां सत्त्वाद्यजुर्वेदादिगतेष्वप्यृगादिषु उच्चैष्ट्वादयः कर्तव्याइति पूर्वपक्षः। सिद्धांतस्तुलब्धात्मनएवप्रधानस्य गुणाद्वलीयस्त्वं वाच्यं। नचेह विध्युद्देशानां ऋगादिविषयतया लब्धात्मता। उपक्रमेवेदशब्दसंकीर्तनेन वेदानामतः परं किंचित्विधास्यत इत्याकांक्षायां अनंतरं विधास्यमानस्योच्चैष्ट्वादेर्वेदधर्मत्वावगमात्तदेकवाक्यत या पश्चादापतत उपसंहारस्य तद्विरुद्धार्थबोधकत्वासंभवात् असंजातविरोध्युपक्रमगतार्थवादानुसारेण पश्चादापततस्तद्विरुद्धस्योपसंहारस्थ विध्युद्देशस्य लक्षणैव कार्या। तथाच ऋक्शब्दस्य ऋग्वेदलक्षकत्वेनोच्चैष्ट्वादय ऋग्वेदधर्माएवेति। एवंच ऋग्वेदेन यत्क्रियते तदेवोच्चैः कर्तव्यं अतोयजुर्वेदादिगतेष्वप्यृगादिषु उच्चैष्ट्वादिकं न कर्तव्यं किंतूपांशुत्वादिकमेवेति। एवंच यथाऽसंजातविरोधित्वादुपक्रमस्योपसंहारापेक्षया प्राबल्यं तथा प्रत्यक्षसिद्धान्पदार्थान्पक्षीकृत्यानुमानं प्रयोक्तव्यं। एवंच सन्घट इत्यादिप्रत्यक्षस्याप्यसंजातविरोधित्वेन प्रबलत्वाद्वैतागमाद्यपेक्षया प्राबल्यमित्यर्थः। विध्युद्देशस्य विधिर्विधानमेवोद्देशो यस्येति विध्युद्देशो विधिप्रतिपादकं वाक्यं तस्येत्यर्थः।

लिंगाद्यपेक्षया शीघ्रगामित्वाच्च प्रत्यक्षस्य प्राबल्यमित्याह॥ लिंगात् श्रुतेरिवेति॥ तृतीयाध्याये तृतीयपादे ''श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात्'' इतिबलाबलाधिकरणसूत्रं। तत्र श्रुतिलिंगयोर्विरोधे इदमुदाहरणं। अग्निचयने श्रूयते ''ऐंद्रचा गार्हपत्यमुपतिष्ठत'' इति। अत्र लकारव्यत्ययेन गार्हपत्योपस्थानं कुर्यादित्यर्थः। तत्र ''प्रवक्षणा अभिनत्पर्वतानां वज्रं जघन्वान् नेंद्रसश्चिदि'' त्यार्चैंद्र्या इंद्रप्रकाशिकया ऋचा इंद्रस्योपस्थानं कर्तव्यं उतगार्हपत्यस्याग्नेरितिसंशये ''वस्तुशक्त्यनुसारी हि शब्दः सर्वः प्रवर्तत'' इतिन्यायेन अशक्यार्थे वस्तुनः केनापि विनियोक्तुमशक्यत्वादैंद्र्येति तृतीयाश्रुत्या ऐंद्री

न्यायामृतप्रकाशः

सन्घटइत्यादिप्रत्यक्षस्य घटादौसत्त्वग्राहकत्वेन न तद्विरोधोऽनुमानस्येत्याशंकते॥ नन्विति॥ यथा इदं रूप्यमित्यत्र रूप्ये इदंताविरहात् अधिष्ठानभूतशुक्तिकायां इदंत्वेन गृह्यमाणायां तत्रारोपितं रजतमपीदमिति भ्रमे निर्दिश्यते तथा सद्रूपे ब्रह्मणि घटादेरध्यस्तत्वेन तद्गतमेव सत्त्वं घटादौ व्यवह्रियते। तथाच न घटादौ सत्त्वं प्रत्यक्षविषय इत्यर्थः॥ उक्तत्वादिति॥ परिच्छिन्नत्वहेतुभंगइति शेषः॥ अन्योन्याश्रयादिति॥ घटादेरारोपितत्वसिद्धौ सत्त्वाभावसिद्धिः तत्सिद्धौचाधिष्ठानगतमेव सत्त्वं प्रतीयते न वस्तुत इत्येतत्प्रमेयसिद्धया आरोपितत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः। प्रतिबंदींगृह्णाति॥ अन्यथेति॥ सदित्यधिष्ठानगतमेव सत्त्वं प्रतीयत इत्यंगीकार इत्यर्थः। ननु सत्यंज्ञानमित्यत्र सदित्यधिष्ठानानुवेधो न भवति। ब्रह्मणः सद्रूपत्वात् घटादौत्वधिष्ठानानुवेध एव तस्य मिथ्यात्वादित्यत आह॥ नहीति॥ तथाच ब्रह्मैव सद्रूपमन्यन्मिथ्येति विभागसिद्धौ सत्यं ज्ञानमित्यत्र सत्यमिति नाधिष्ठानानुवेधः। सन्घटइत्यत्रतु तदनुवेधइति प्रमेयद्वयसिद्धिस्तत्सिद्धौ चोक्तविभागसिद्धिरित्यन्योन्याश्रय इत्यर्थः। एवंच यथा सत्यं ब्रह्मेत्यत्र ब्रह्मगतमेव सत्त्वं प्रतीयते नत्वधिष्ठानगतं एवं सन्घट इत्यत्रापि घटगतमेव सत्त्वं प्रतीयत इत्यंगीकार्यमितिभावः।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वसाधकानुमानस्य प्रत्यक्षविरोधो नास्तीत्याशंकते॥ नन्विति॥ आत्यंतिकाबाध्यत्वं कालत्रयेपि सत्त्वं। तथाच ग्राह्याभावानवगाहित्वान्नविरोधइति भावः। ननु वर्तमानकालीनबाधाभावग्राहकत्वमात्रेणैव विरोधोस्त्वित्यत आह॥ तात्कालिकेति॥ तात्कालिकबाधाभावश्चन वस्तुसत्त्वसाधकः। तथात्वे रूप्यादेरपि तदापातादितिभावः। आद्यपक्षस्य त्रैधा विकल्पितत्वान्नाद्यावित्युक्तं। तयोः अनुमानागमयोः॥ मानेति॥ प्रत्यक्षरूपप्रमाणाविरोधेनेत्यर्थः। ननु भवत्पक्षेप्यन्योन्याश्रयः। प्रत्यक्षस्य प्रामाण्ये तद्विरोधादनुमानादेरप्रामाण्यं तयोरप्रामाण्ये तद्विरोधाभावात्प्रत्यक्षस्य प्रामाण्यमितीति चेन्न। प्रत्यक्षप्रामाण्यसिद्धेरनुमानादिविरोधाभावानपेक्षत्वान्नान्योन्याश्रयइत्याह॥ अक्षस्यत्विति॥ प्रबलस्य दुर्बलविरोधाभावापेक्षा नास्तीत्यत्र दृष्टांतमाह॥ नहीति॥ "पोतस्तोकोर्भकोडिंभःपृथुकःशाबकःशिशु" रित्यभिधानं।

स्यादयमन्योन्याश्रयपरिहारः यदि प्रत्यक्षस्यानुमानादितः प्राबल्यं स्यात्तदेव कुत इत्यतः तस्यानुमानादितो जात्या प्राबल्यं समर्थयते॥ प्रत्यक्षस्येति॥ प्रत्यक्षस्यानुमानादितः प्राबल्यंच तदसाध्यकार्यकारित्वेन। तच्चकार्यं द्विविधं। तदगृहीतार्थविषयकत्वं तदनिवर्त्यनिवर्तकत्वं चेत्यभिप्रेत्योक्तं॥ तदगृहीतेत्यादि॥ अनुमित्याद्यगृहीतवस्तुगतरेखोपरेखादिग्राहकत्वादित्यर्थः। दिङ्मोहादीति॥ प्रतीच्यां प्राचीत्वारोपेनेयं प्राचीत्याद्याप्तवाक्यजन्यज्ञाने नेयं प्राची सूर्योदयशून्यत्वादित्याद्यानुमानिकज्ञाने च सत्यपि यावत्प्रत्यक्षेण सूर्योदयादिकं न पश्यति तावत्स भ्रमो न निवर्तत इत्यर्थः। ननु धर्मिप्रतियोग्यादिग्राहकत्वेनोपजीव्यतयैव प्राबल्यं लोके दृष्टं तदतिरिक्तं जात्या प्राबल्यं नाम कीदृशमित्यतस्तद्दर्शयति॥ दृष्टंहीति॥ वह्निःशीत इत्यनुमाने स्पार्शनप्रत्यक्षस्य प्राबल्येन बाधकत्वं तावदस्ति। तत्र प्राबल्यं कथमिति प्रष्टव्यं। धर्मिग्राहकत्वेनोपजीव्यत्वादिति चेन्न। चक्षुरादिना धर्मिभूतवह्नेःसिद्धत्वात् नाप्यनौष्ण्यप्रति योग्यौष्ण्यग्राहकत्वेनोपजीव्यत्वं संभवति। स्यादेतदेवं यद्यनौष्ण्यं साध्यं स्यात्। न चैवं भावरूपस्य

सप्त हवींषि – आग्नेयमैन्द्रं प्राजापत्यानि पञ्चेति। एतेषां सप्तयागानां प्रयोगैक्यादाज्यभागौ तन्त्रेणानुष्ठेयौ। तत्राग्नेयं प्राजापत्याश्च धाना आग्नेयविकारत्वादुभयथाप्यविरुद्धाः। यस्त्वैन्द्रः पुरोडाशः यच्च प्राजापत्यं दधि तयोरैन्द्राग्नसान्नाय्य विकारत्वादभावस्या धर्मापेक्षा। मधुघृतापां तूपांशुयाजविकारत्वात् पौर्णमासिकधर्मापेक्षा। मधूदकयोराज्यविकारत्वमष्टमे सिद्धम्। घृतस्य त्वसन्दिग्धमेव। तथाचैतेषु सप्तसु यागेषु सह प्रक्रान्तेषु पौर्णमासविकाराणां वार्त्रघ्नावाज्यभागमन्त्रौ प्राप्तौ। दर्शविकारयोर्द्वयोस्तु वृधन्वत्यौ। न चान्यतराभ्यां कृतावाज्यभागौ पुनर्मन्त्रार्थमनुवर्तनीयौ। गुणार्थं प्रधानानुवृत्तेर भावात्। मन्त्रयोराज्यभागं प्रति गुणत्वात्। न चोभयविकृतित्वादुभयविधाज्यभागानुष्ठानमिति वाच्यम्। अन्यतराभ्यामन्योप कारसिद्धेराज्यभागयोस्तन्त्रत्वात्। तदिह किममावास्यामन्त्राभ्यामाज्यभागौ कर्तव्यौ, ताभ्यामेव च प्रसङ्गकार्यस्य सिद्धत्वात् पौर्णमासिकौ मन्त्रौ निवर्तेते अथवा पौर्णमासिकमन्त्राभ्यामाज्यभागौ कर्तव्यौ, ताभ्यामेव प्रसङ्गकार्यसिद्धत्वात् अमावास्यामन्त्रौ निवर्तेते इति सन्देहः।

तत्र पूर्वपक्षः – ऐन्द्रयागः प्राजापत्ययागात् पूर्वं पठितः। दधिद्रव्यं च मधुघृतोदकद्रव्येभ्यः पूर्वं पठितम्। अतो मुख्यत्वादसञ्जातविरोधित्वादमावास्याधर्मानुग्रह इति। अत्र सिद्धान्त सूत्रम् – विप्रतिषिद्धधर्माणामिति। विप्रतिषिद्धधर्माणां ऐन्द्रदधिमधुघृतोदकानां समवाये अस्मिन् सत्रयागे सहप्रयुक्ते भूयसां सधर्मत्वं स्यात्। भूयसामनुग्रहाय पौर्णमासिकमन्त्राभ्यामाज्यभागौ कर्तव्यौ। न च मुख्यत्वादैन्द्रदधियागधर्मः प्रथममवगत इति स एवानुष्ठेय इति वाच्यम्। यद्यपि प्रथममवगम्यते तथापि पञ्चाद्भूयोऽनुग्रहमालोच्य स बाध्यते। तस्मादयं प्राप्तबाधः। तस्मात् पौर्णमासिकौ धर्मावनुग्रहीतव्यौ। एवं च प्रकृतेऽपि भेदादिप्रपञ्चसत्त्वादिविषयाणां प्रत्यक्षानुमानबहुविधागमानाम् अनुग्रहाय अद्वैतश्रुतेरर्थान्तरपरत्वरूपो बाधो युक्ततरः।

ननु दृष्टान्ते बहुविषयया ऐन्द्रया अल्पविषयाया आग्नेय्या बाधः। प्रकृते च बहुभिरेकस्य बाधवैषम्यमिति चेदुच्यते। तत्रापि चतुर्दशाहस्सु ऐन्द्र्या ज्योतिर्गौरायुरिति त्रयाणामन्हां द्वादशादिकानामेकादशानाम् अन्हां नामातिदेशैः स्वस्वप्रकृतिवद्विकृतिः कर्तव्येति प्रातस्विकचोदकैश्च प्राप्ततया तत्रापि बहुभिरेव एकस्य बाध इति न दृष्टान्तवैषम्यम्। न चैवं बहुविषयेति मूले कथमिति वाच्यम्। बहभिः प्रमाणैः बहवो विषया यस्या इत्यर्थोपपत्तेः। न च देहात्म्येक्ये प्रत्यक्षानुमानशब्दाभासादिसत्वेऽपि देहात्मभेदबोधकस्यानन्यपरत्वेन प्राबल्यवत् अत्राप्यनन्यपरत्वेनाद्वैतश्रुतेः प्राबल्यात् प्रबलेनैकेन बहुबाधो भविष्यतीति वाच्यम्। प्रकृते प्रत्यक्षादीनामनाभासत्वस्य बाधकाभावेन मूल एवोक्तत्वात्। अद्वैतश्रुतेश्चानन्यपरत्वासिद्धेश्च तत्रैवोपपादितत्वात्। न चोपक्रमादिभिरद्वैतश्रुतेरनन्यपरत्वमिति वाच्यम्। उपक्रमाद्यभावस्याद्वैतश्रुतेरुपपादयिष्यमाणत्वात्। न चाविद्याविद्याभेदेन विद्वदविद्वत्पुरुषभेदेन च विरोधाभाव इति वाच्यम्। भेदादिप्रतिपादकानामागमानाम् अपौरुषेयतया निर्दोषत्वेनाविद्यात्वासिद्धेः। अन्यथा अद्वैतश्रुतेरप्यविद्यात्वापत्तेः। निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमिति मोक्षसाधनत्वेन कर्मणः श्रुतत्वात्। कर्मण्येवाधिकारस्त इति ज्ञानिनं प्रत्यपि कर्मणो विधानाच्च कर्मप्रतिपादकानामविद्वन्मात्राधिकारिकत्वायोगाच्च। तस्माद् बहुभिः प्रत्यक्षादिभिरद्वैतश्रुतेर्बाध इति युक्तम्। तथाच प्रत्यक्षस्य जात्योपक्रमादिन्यायैश्च प्राबल्यमिति सिद्धम्। इति प्रत्यक्षस्य जात्योपक्रमादिन्यायेश्च प्राबल्यम्।

प्रत्यक्षविरोधेन श्रुतेरेव व्यावहारिकद्वैतनिषेधपरत्वोपपत्तेश्च। न चापौरुषेयत्वेन निर्दोषत्वेन न व्यावहारिकविषयत्वमिति वाच्यम्। तादृश्या अपि द्वैतश्रुतेर्व्यावहारिकविषयत्वोरीकरणात्। प्रत्यक्षस्यापि बाधकाभावेन निर्दोषत्वस्य वक्ष्यमाणत्वाच्च। तस्मात् प्रत्यक्षस्य निरवकाशत्वात् तद्विरोधेन श्रुतेरर्थान्तरपरत्वरूपसङ्कोच एव न्याय्यः।

॥ पञ्चदशरात्र इति॥ द्वादशस्य द्वितीयेऽष्टमाधिकरणे चिन्तितं – विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वमिति सूत्रम्। पञ्चदशरात्रे अग्निष्टुत् प्रथममहः। तस्यैकाहरूपोऽग्निष्टुत् प्रकृतिः। तत्रोपसत्काले सुब्रह्मण्याह्वानार्थं आग्नेयी विहिता। तथाच तद्विकृतिरूपे प्रथमेऽहनि चोदकत आग्नेयी सुब्रह्मण्या प्राप्नोति। अनन्तराणि त्रीण्यहानि ज्योतिरादीनि ज्योतिर्गौरायुरिति। तेषामप्यैकाहिका ज्योतिरादयः प्रकृतिभूताः। तेष्वप्यैन्द्री सुब्रह्मण्या। तथा च नामातिदेशेन तद्विकृतिभूतेषु ज्योतिरादिषु ऐन्द्री सुब्रह्मण्या। शिष्टान्येकादशाहानि द्वादशाहविकृतिभूतानि। ततस्तेष्वप्यैंद्रयेव। इह चोदकप्राप्तैन्द्रीधर्मकाणामेकादशानामह्नां नामप्राप्ताग्नेयीधर्मकस्य चाग्निष्टुतो विरोधश्चिन्त्यते। ननु चोदकनामधेययोर्नामधेयस्य बलवत्त्वात् तुल्यबलत्वाभावे कथं विचार इति चेदुच्यते। अधिकबलवत्त्वमनङ्गीकृत्यायं विचारः। अथवा नाम्नामेव ज्योतिरादीनां चाग्निष्टुतश्च विचारः। नन्वत्र विरोध एव नास्ति। उभयविधसुब्रह्मण्याऽऽह्वानोप पत्तेरिति चेन्न। उपसत्कालं सुब्रह्मण्यायास्तन्त्रत्वात्। एकसुब्रह्मण्याह्वानेन सर्वेषामुपकारसिद्धिः।

तदेवमुपसत्कालं तन्त्रभूतायां सुब्रह्मण्यायां संशयः। किमाग्नेयी अथवैन्द्रीति। तत्र पूर्वपक्षः – आग्नेयी सुब्रह्मण्या कर्तव्या। आग्नेय्या मुख्यत्वेनानुपसञ्जातविरोधित्वात्। असञ्जातविरोधिनः प्राबल्यस्योपक्रमाधिकरणे निर्णीतत्वात्। तस्मादाग्नेयी कर्तव्येति। अत्र सिद्धान्तसूत्रं – विप्रतिषिद्धधर्माणामिति। अस्यार्थः – एतस्मिन् पञ्चदशरात्रे विप्रतिषिद्धधर्माणामेतेषां अग्निष्टुतश्चैकादशानां चाह्नां ज्योतिरादीनां च समवाये एकादशानामह्नां सधर्मत्वं स्यात्। तदीयो धर्मः कर्तव्यः। को हेतुः? भूयस्त्वमेव। बहुषु गुणसम्पन्नेषु महत्फलं भवति एकस्मिन्नल्पफलम्। एषो हि लोकदृष्टान्तः – बहुषु प्रदीपेषु तैलवर्तिकासम्पन्नेषु एकस्मिन् गृहे महान् प्रकाशोऽन्यथाऽल्पः। अयमभिप्रायः – बहूनामनुग्रहायैन्द्री विधेया। त्यजेदेकं कुलस्यार्थ इति न्यायेन बहुत्वस्यापि प्राबल्यकारणत्वादिति।

नन्विदं सुब्रह्मण्योदाहरणम् अयुक्तम्। सुब्रह्मण्यायां प्रसङ्गतन्त्रयोरभावेन उभयोराह्लातव्यत्वात्। न तावत् प्रसङ्गः। यत्रान्यार्थेनान्यस्योपकारसिद्धिस्तत्र प्रसङ्गः। न चात्र प्रसङ्गः सम्भवति। अन्येनान्यस्योपकाराभावात्। न चाग्नेया सुब्रह्मण्यया इन्द्रः संस्कृतो भवति। न चैन्द्र्या अग्निः अत एव न तन्त्रता। यद्युभयार्थं कृतं उभयोपकारसम्पादकं तत्र तन्त्रता यथा प्रयाजादयः। आग्नेय्या अग्नीन्द्रोभयोपकारकत्वाभावात्। ऐन्द्र्या वोभयोपकारकत्वाभावात्। तस्मादिन्द्राग्नी भेदेनाह्लातव्यौ। तथा च कथमनेन दृष्टान्तेन प्रत्यक्षादिना श्रुतिबाधः। दृष्टान्ते एकविषयत्वाभावे विरोधाभावेन बाध्यबाधकभावाभावात्। तस्मादिदमनुदाहरणम्।

अथोदाहरणान्तरम्। काम्यास्विष्टिषु श्रूयते – अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्। इन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं दधिमधुघृतमापो धानास्तत्संसृष्टं प्राजापत्यं पशुकाम इति। तानीमानि

चेदुच्यते येयमुपांशुत्वानुष्ठितिः एषा त्सरा छद्मगतिः। त्सर छद्मगताविति धातोः। यथा शकुनिं जिघृक्षतः प्रच्छन्ना गतिर्भवति शनैः पदन्यासो दृष्टिप्रणिधानम् अशब्दकरणं चेति तत्सर्वं शकुनिग्रहणाय न तु तद्देशार्थम्। तथैवानुष्ठातुरुपांशुत्वानुष्ठानं छद्मगतिरूपं अनुष्ठानसाध्याय यज्ञशब्दनिर्दिष्टाय परमापूर्वाय। न च यज्ञस्येति त्सराविशेषणं किं न स्यादिति वाच्यम्। तथात्वे ह्यर्थवादः स्यात्। प्राचीनशब्दविशेषणत्वे विधिशेषत्वेन प्रवृत्तिविशेषकरत्वं स्यात्। प्राचीनशब्दो देशवाची। तद्धर्मत्वे प्राचीनशब्दो मुख्यार्थः स्यात्। पदार्थधर्मत्वे प्राचीनशब्दस्य लक्षणा स्यात्। लक्षणा हि जघन्या वृत्तिः। तस्मादुपांशुत्वं यज्ञस्य प्राग्भागरूपदेशधर्म इति पूर्वपक्षः।

अत्र सिद्धान्तसूत्रम् – देशबद्धमुपांशुत्वमिति। अवान्तरापूर्वप्रयुक्तमुपांशुत्वं देशसम्बद्धं देशलक्षितानां पदार्थानां स्यात्। कुतः? देशसंबंधेन श्रुतत्वात्। कथम्? अग्नीषोमीयात् पशोर्यत्प्राचीनं यत्किञ्चिदिति मर्यादया देशलक्षिता ये पदार्थास्ते श्रूयमाणेन वाक्येनोपांशुत्वसंबद्धाः प्रतीयन्ते। न च यज्ञस्य प्राचीनमित्यन्वयाद् यज्ञसंबंधोऽपि श्रूयत इति वाच्यम्। यज्ञसंबंधस्य वाक्येनाश्रूयमाणत्वात्। कुतः? यज्ञस्य यत्प्राचीनमित्यनन्वयात्। न हि यज्ञस्य यत्प्राचीनमित्यन्वयः संभवति। तस्मादिति पदेन व्यवधानात्। तर्हि यज्ञस्य इत्यनान्वितमेव स्यादिति चेन्न। यज्ञस्य त्सरेत्यन्वयप्रतीतेः। यथा यज्ञं तनिष्यन्तौ अध्वर्युयजमानौ वाचं यच्छत इत्यत्र श्रुतस्य वाग्यमस्य न परमापूर्वप्रयुक्तत्वं किन्तु प्रणीताप्रणयनात् हविष्कृदाह्वानात् प्राग् ये पदार्थाः प्रोक्षणादयः तदवान्तरापूर्वप्रयुक्तत्वं तत्रापि यज्ञस्य वाग्यमेन नान्वयः किन्तु यज्ञं तनिष्यन्ताविति विस्तारेणान्वयस्तथाऽत्रापि इति। ननु भवत्वङ्गापूर्वाणामुपांशुत्वं धर्मः न तु प्रधानद्रव्यसंस्कारकं यदपूर्वं तस्यापि। कतमन्तत् यत्प्राधानद्रव्यसंस्कारकं पूर्वस्मिन् देशेऽस्तीति चेदुच्यते – तस्य च तत्र भावात्। तस्य चैवंजातीयकस्यापूर्वस्य तस्मिन् देशे भावात्। अस्ति हि सोमपरिवहणीयं नाम सूक्तमिति। किञ्च देशधर्मत्वे यत्किञ्चिच्छब्दो न युज्यते। देशस्यैकत्वात्। यत्किंचिच्छब्दो हि अनेकापेक्षः। न च देशलक्षितपदार्थधर्मत्वे देशशब्दो लाक्षणिकः स्यादिति वाच्यम्। यत्किञ्चिच्छब्दान्वयानुपपत्त्या लक्षणाया आवश्यकत्वात्। तस्मादुपांशुत्वं न परमापूर्वप्रयुक्तं, किन्तु अग्नीषोमीयप्राग्देशलक्षित पदार्थधर्मभूतं तदवान्तरापूर्वप्रयुक्तम्। ननु दीक्षणीयादिष्वन्यो धर्मः श्रूयते – यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादिति। तत्कथमुपांशुत्वं तद्विरुद्धदीक्षणीयादिषु कर्तव्यमिति। उच्यते। यावत्या वाचा इत्यस्य दीक्षणीयासंयोगेन निरवकाशत्वात्। तस्माद्यज्ञस्येत्यस्य दीक्षणीयाव्यतिरिक्तेऽपि सावकाशत्वात् दीक्षणीयारूपप्रधानं हित्वा तदङ्गविषये उपांशुत्वं निविशते, दीक्षणीयांशे तु निरवकाशेन तेन बाध इति सावकाशनिरवकाशन्यायः। एवं प्रकृतेऽपि सन् घट इति प्रत्यक्षस्य निरवकाशत्वादर्थान्तरे सावकाश श्रुतिबाधकत्वम् उपपन्नम्।

न च तात्पर्यलिङ्गैरुपक्रमादिभिः द्वैतनिषेधपरत्वेऽवधृते अद्वैतश्रुतेरपि निरवकाशत्वमिति वाच्यम्। तात्पर्यलिङ्गानां भेद एव निरूपयिष्यमाणत्वेन अद्वैतपरत्वे श्रुतेर्निरवकाशत्वाभावात्। न च प्रत्यक्षस्यापि व्यावहारिकसत्त्वविषयत्वेन सावकाशत्वमिति वाच्यम्। व्यावहारिकसत्त्वविषयत्वे तस्य बाध्यत्वे बाधितार्थकत्वेनाप्रामाण्यापत्तेः। न चेष्टापत्तिः। आगमविरोधेन प्रत्यक्षप्रामाण्ये बहुतरविरोधस्य वक्ष्यमाणत्वात्।

मन्थरगामित्वात् शीघ्रगामिन्या श्रुत्या बाध्यते। चोदकोऽप्यनुमेयतया दुर्बलत्वात् प्रत्यक्षश्रुत्या बाध्यते। प्रकृते च नैवं दुर्बलत्वम्। सामान्यशास्त्रस्य प्रत्यक्षत्वेन विलम्बितत्वाभावात्। नाप्यनुमेयत्वम्। प्रत्यक्षत्वादेव। अतो दौर्बल्याभावात् समबलत्वादेकार्थास्तु विकल्पेरन्निति न्यायेन विकल्प इति।

अत्र सिद्धान्तसूत्रम् – अविशेषेण यच्छास्त्रमिति। तदर्थस्त्वविशेषेण यच्छास्त्रं तस्याराद्विशेषशिष्टं स्यात्। यद्विशेषेण शिष्यते तदस्य सामान्यशास्त्रस्य दूरं स्यादसम्बद्धमित्यर्थः। कुतः? सन्दिग्धं हि तत्। कथमिव सन्दिग्धम्? यदि सामान्यं विशेषलक्षणार्थं ततो विशेषेऽपि प्राप्तम्। अथ लक्षणार्थं ततो न प्राप्तमेवं सन्दिग्धम्। अथवा, सामान्यं विशेषेण विरुद्ध्यते, न विरुद्ध्यत इति सन्दिग्धम्। सन्दिग्धत्वात् सामान्यविधानं विशेषविधौ न स्यात्। विकल्पस्यान्याय्यत्वाच्च। कथमन्याय्यो विकल्पः? यदि च वर्त्माद्यधिकरणता एषु होमेषु श्रूयते तर्हि सा पक्षे न भवतीति प्रमाणापेता कल्पना कर्तव्या। अथ नैतेषु वर्त्माद्यधिकरणता श्रूयते तथापि सा पक्षे न भवतीति प्रमाणापेता कल्पना विकल्पमाश्रयता कर्तव्या। वर्त्मादिग्रहणं च श्रूयमाणमविवक्षितं स्यादिति। अयमाशयः। होमसामान्यानुवादेनाहवनीयविधायकं शास्त्रं सामान्ये मुख्यत्वात् विशेषानुवादे लाक्षणिकतया दुर्बलम्। विशेषशास्त्रं तु व्यावृत्त्या विधायकत्वात् प्रबलम्। न च पदादिशास्त्रमपि होमसामान्यमेवानूद्य पदादिविधायकत्वेन समबलं स्यादिति वाच्यम्। प्रकरणनियमितत्वेन विशिष्टविधायकस्य सामान्यानुवादतायोगात्। तस्माद्विशेषशास्त्रस्य शीघ्रगामित्वात् सामान्यशास्त्रस्य विशेषे लाक्षणिकत्वेन विलम्बितत्वात् विशेषशास्त्रेण सामान्यशास्त्रं बाध्यत इतीदं सामान्यविशेषन्यायाधिकरणम्। न च सामान्यविशेषन्यायस्य निश्चितोभयप्रमाण विषयत्वात् प्रकृते च श्रुतेः प्रामाण्येऽपि घटादिसत्त्वग्राहिणः प्रत्यक्षस्य प्रामाण्याभावात् कथमेतन्न्यायविषयत्वम्? अन्यथा अयं गौरश्च इत्यादेरपि गौरश्वो नेत्यादितः प्राबल्यं भवेदिति वाच्यम्। प्रत्यक्षप्रामाण्यस्य बाधकाभावेन साधयिष्यमाणत्वात्। तथा चोभयप्रामाण्यादेतन्न्यायविषयत्वं युक्तम्।

निरवकाशत्वेन प्रत्यक्षस्य प्राबल्यमाह – किञ्च यथा यत्किञ्चिदिति॥ नवमस्य प्रथमे षष्ठाधिकरणे चिन्तितम्। 'देशबद्धमुपांशुत्वं तेषां स्यात्, श्रुतिनिर्देशात्तस्य च तत्र भावात्' इति सूत्रम्। ज्योतिष्टोमे श्रूयते – त्सरा वा एषा यज्ञस्य। तस्माद्यत्किञ्चित् प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीति। अत्र संशयः। किमिदमुपांशुत्वं सोमयागस्य यः प्राग्भागस्तद्धर्मभूतं सत् परमापूर्वप्रयुक्तमुत अग्नीषोमीयात् पशोर्ये प्राचीनाः पदार्था दीक्षणीयादयस्तेषां धर्मभूतं सत् तदवान्तरापूर्वप्रयुक्तम्? परमापूर्वप्रयुक्तत्वे किं फलमिति चेत् परमापूर्वप्रयुक्तत्वे प्राग्भागधर्मत्वे विकृतिषु तद्भागारम्भकेऽप्राकृतेऽपि पदार्थे उपांशुत्वमूहितव्यं भवति। यद्यवान्तरापूर्वप्रयुक्तत्वं ततश्च विकृतिष्वप्राकृते पदार्थे यूपावटास्तरणबर्हिर्धर्मवन्नोहितव्यमिति। तत्र पूर्वपक्ष सूत्रं – यज्ञस्य वा तत्संयोगात्। इदमुपांशुत्वं प्राग्भागधर्मभूतं सत् परमापूर्वप्रयुक्तम्। कुतः? शकुनिग्राहकगतिन्यायेन यज्ञसम्बन्धावगमात्। तथाहि – यज्ञस्य संबंधि यत्किञ्चिदग्नीषोमीयात् प्राचीनमारादुपकारकं प्रधानहविःसंस्कारकं च तस्य सर्वस्योपांशुत्वं विधीयते। कथम्? यज्ञो नाम परमापूर्वं, तस्य यज्ञसाध्यत्वात्। यदि यज्ञस्येति प्राचीनविशेषणं तर्हि त्सराशब्दस्य कुत्रान्वय इति

न्यायेनोपस्थानावृत्त्या श्रुतिलिङ्गयोः समुच्चय इति द्वितीयः पूर्वपक्षः। अथवा श्रुतिर्विनियुञ्जाना वस्तुसामर्थ्यमनुसृत्य विनियुङ्क्ते। अन्यथा वह्निना सिञ्चेद्वारिणा दहेदित्यपि विनियुज्येत। अतो वस्तुसामर्थ्यानुसारेण श्रुतेर्विनियोजकत्वाद्वस्तुसामर्थ्यरूपं लिङ्गं श्रुतिविनियोगे उपजीव्यम्। अतः प्रबलत्वाल्लिङ्गेनेन्द्रोपस्थान एव विनियोगः। गार्हपत्यशब्दस्तु लक्षणया इन्द्रपर इति तृतीयः। सिद्धान्तस्तु - यद्यैन्द्रीमन्त्रस्य गार्हपत्यप्रतिपादनेऽत्यन्तमशक्तता स्यात्तदा श्रुतिविनियोगप्रतिबन्धः स्यात्। न चैवम्। ऐन्द्रीमन्त्रस्य गार्हपत्ये मुख्यशक्त्यभावेऽपि गुणवृत्त्या शक्तिरस्तीति गुणाद्वाभिधानं स्यादित्यत्रैव साधितम्। तथाच सामर्थ्याभावरूपप्रतिबन्धाभावात् निर्विघ्ना श्रुतिः शीघ्रं मन्त्रं विनियुङ्क्ते। लिङ्गं विलम्बते। यावदेव हि मन्त्रेण स्वाभिधेयं प्रतिपाद्यते तावदेव श्रुतिः मन्त्रं गार्हपत्यार्थतां नयेत्, लिङ्गस्य कथं विलम्ब इति चेन्न। मन्त्रपदान्यादौ स्वाभिधेयमर्थं प्रतिपादयन्ति। तत ऊर्ध्वं मन्त्रस्य सामर्थ्यं निरूप्यते। पश्चात् सामर्थ्यवशात् प्राधान्यवाचिनी श्रुतिः कल्प्यते। सा च श्रुतिर्मन्त्रेणेन्द्रमुपतिष्ठेतेति विनियुङ्क्ते। तथाच प्रत्यक्षश्रुतौ स्वाभिधेयप्रतिपादनविनियोगयोर्मध्यवर्तिनौ सामर्थ्यनिरूपणश्रुतिकल्पनव्यापारौ न स्त इति प्राबल्यात्तया लिङ्गं बाध्यते। न च प्रत्यक्षश्रुतिर्विनियोगवेलायामलब्धात्मकत्वादप्राप्तलिङ्गं कथं बाधेतेति शङ्कनीयम्। भविष्यत्प्राप्तिप्रतिबन्धस्यैवात्र बाधकत्वात्। न च श्रुतिविनियोगानन्तरं लिङ्गविनियोगोऽस्त्विति वाच्यम्। मन्त्राकाङ्क्षनिबन्धनो हि विनियोगः। श्रुत्या विनियुक्तस्य मन्त्रस्य पुनर्विनियोगाकाङ्क्षानुदयात्। तथा च लिङ्गस्य प्रमाणत्वं मन्त्राकाङ्क्षानिमित्तम्। सा चाकाङ्क्षा श्रुत्या निराकृतेति श्रुत्या लिङ्गस्य विरोधः। विरोधे च बलीयस्त्वात् श्रुत्या लिङ्गबाधो, न समुच्चयो न वा विकल्पो न वा लिङ्गस्यैव प्राबल्यमिति।

उक्तेऽर्थे भट्टवार्तिकसम्मतिमाह॥ उक्तं चेति॥ अत्र प्रत्यक्षस्य शीघ्रगामित्वेन प्राबल्यस्य श्रुतिप्राबल्ये दृष्टान्तत्वेनोपादानात् निर्णीतं हि दृष्टान्तत्वेनोपादीयत इति न्यायात् प्रत्यक्षस्य प्राबल्यं सुदृढतरमिति भावः॥ यदाहवनीय इति॥ यथा यदाहवनीये जुहोतीति शास्त्रस्य सामान्यमुखप्रवृत्तत्वात् पदे जुहोतीत्यनेन विशेषमुखप्रवृत्तेन बाधस्तथाऽद्वैतश्रुतेः सामान्यमुखप्रवृत्तत्वात् घटः सन्नित्यादिप्रत्यक्षेण विशेषमुखप्रवृत्तेन बाध इत्याह॥ प्रत्यक्षं हीति॥ यदाहवनीयन्यायस्त्वित्थम् – दशमाध्यायेऽष्टमपादेऽष्टमाधिकरणे चिन्तितम्। 'अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यात्।' अनारभ्य श्रूयते-यदाहवनीये जुहोति तेन सोऽस्याभीष्टः प्रतीतो भवतीति। ज्योतिष्टोमे श्रूयते – पदे जुहोति। वर्त्मनि जुहोतीति। तथाऽन्यत्र श्रूयते – गार्हपत्ये पत्नीसंयाजान् जुहोतीति। तत्रानारभ्यवादे होमसामान्यमनूद्याहवनीयो विहितः। प्रकरणनियमितैः पदादिवाक्यैस्तदनुबद्धा विशिष्टा होमा विहिताः। गार्हपत्यवाक्येन होमविशेषमनूद्य गार्हपत्यो विहितः। अत्र सन्देहः। सामान्यविहितस्याहवनीयस्य विशेषविहितैः पदादिभिर्विकल्पोऽथवा बाध इति। यदि सामान्यविशेषयोस्तुल्यबलत्वं ततो विकल्पः। विशेषवचनबलीयस्त्वे तु बाधः। तत्र पूर्वपक्षः – पदादिर्होमेषु सामान्यशास्त्रेण प्राप्त आहवनीयो विशेषप्राप्तैः पदादिभिः सह विकल्पते। कुतः? उभयोः प्रत्यक्षवचनयोः क्रत्वर्थत्वेन समबलत्वात्। नन्वैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यथा श्रुत्या लिङ्गं बाध्यते, यथा वा प्रकृतिवद्विकृतिः कर्तव्येति चोदकप्राप्तानां कुशानां शरमयं बर्हिर्भवतीति प्रत्यक्षश्रुतैः शरैर्बाधस्तथा सामान्यस्य विशेषेण बाधः किं न स्यादिति चेन्न। वैषम्यात्। लिङ्गं

– कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुष इति। अनयेन्द्रः प्रकाश्यते – भो इन्द्र! कदाचन कदाचिदपि न स्तरीरसि घातको न भवसि। किन्तु दाशुषे आहुतिं दत्तवते यजमानाय सश्चसि प्रीयस इति। अत्रेन्द्रस्वरूपमात्रं प्रतीयते, न तु मन्त्रस्य साधनत्वं न वेन्द्रस्य प्राधान्यम्। केवलमर्थप्रकाशनसामर्थ्यरूपालिङ्गादनेन मन्त्रेणेन्द्र उपस्थेय इति साधनत्वं कल्प्यते। यद्ययं मन्त्र इन्द्रोपस्थाने साधनं न स्यात्तर्हीन्द्रप्रकाशको न स्यात्। तस्मादिन्द्रोपस्थाने साधनम्। सोऽयं लिङ्गविनियोगः। श्रुतिविनियोगस्तु यः शब्दस्य श्रवणादेव प्रतीयते स श्रौत इत्युच्यते। श्रवणं श्रुतिः। गार्हपत्यमिति ब्राह्मणवाक्यगतद्वितीयान्तपदश्रवणादेव गार्हपत्यस्य प्राधान्यं गम्यते। ऐन्द्र्येति तृतीयया ऐन्द्र्याश्च करणत्वम्। तथा चैन्द्र्या गार्हपत्य उपस्थेय इति श्रौतो विनियोगः। तत्रेन्द्रोपस्थानार्थत्वं लिङ्गादिति।

ननु मन्त्रस्य गार्हपत्यार्थत्वं कथं श्रौतम्? गार्हपत्यमिति द्वितीयया गार्हपत्यस्य शेषित्वमात्रं श्रुतम्। तच्चैन्द्र्येति पदसमभिव्याहारबलात् ऐन्द्रीविषयं भवति। यच्च श्रुत्या प्रतीतं गार्हपत्यप्राधान्यं तन्न लिङ्गेन विरुद्ध्यते। गार्हपत्यस्य काश्चिदाग्नेयीं प्रति प्राधान्यसम्भवात्। ऐन्द्र्येति तृतीयया यन्मन्त्रस्य साधनत्वं प्रतीतं तदिन्द्रं प्रति भविष्यतीति न श्रुतिलिङ्गविरोधः। किञ्च यश्चैन्द्रीगार्हपत्ययोः साध्यसाधनभावः प्रतीयते स वाक्यं बलात्। तथा च वाक्यावगतेनैन्द्रीगार्हपत्ययोः साध्यसाधनभावेन लिङ्गं विरुद्ध्यते। यदुक्तं श्रुतिमात्रमविरुद्धमिति तत्सत्यम्। यथैव श्रुतिमात्रमविरुद्धं तथा वाक्यमप्यविरुद्धम्। कथम्? यदि गार्हपत्यपदमिन्द्रं लक्षयेत्, यदि वा द्वितीया सप्तम्यर्थे ततो लिङ्गाविरोधेन गार्हपत्यपदमैन्द्र्योपतिष्ठत इत्यनेनैकवाक्यतां गच्छति। तथा च न वाक्यविरोधः। तर्हि केन विरोधः? यस्तु द्वितीयान्तगार्हपत्यपदश्रवणादर्थः प्रतीयते गार्हपत्यप्राधान्यं स लिङ्गेन विरुद्ध्यते। न च श्रुतिरपि न विरुद्ध्यत इत्युक्तमिति वाच्यम्। केवलाया अविरोधेऽपि वाक्यसहिताया अस्ति विरोधः। नन्वेवं तर्हि श्रुतिवाक्यविरोधोऽयं कथं श्रुतिलिङ्गविरोध इत्युच्यते न वाक्यविरोध इति। उच्यते। प्राधान्याद्विनियोगो हि प्रमेयः। स च साध्यसाधनभावः। स च श्रुत्यैवोक्तः। प्रतियोगिविशेषसमर्पकं हि वाक्यम्। तथाच प्रधानीभूतसाध्यसाधनभावप्रतिपादकत्वात् श्रुतिः प्रधानम्। वाक्यं तु श्रुतिमनुगृण्हद् गुणभूतम्। प्रधानेन च विरोधो लक्ष्यते, न गुणेन।

अयं चापरो विशेषः, येन श्रुतेरेवात्र लिङ्गेन विरोधो न वाक्यस्य। यस्य हि लिङ्गेन बलीयसा बाधस्तल्लिङ्गेन विरुद्ध्यते। न ह्यत्र लिङ्गे बलीयसि वाक्यं शक्यते बाधितुम्। तद्बाधे हि पृथक्कृते गार्हपत्यैन्द्रीपदे न कञ्चिदर्थं प्रतिपादयतः। पदमात्रस्याप्रामाण्यात्। तत्र श्रुतेरप्यबाधो वाक्यस्य च। यत्र तु पृथग्भूतस्याप्यर्थप्रतिपादकत्वं न विहन्यते यथा स्योनादिषु, तत्रैव वाक्यबाधः। ततश्चासम्भविनि वाक्यस्य बाधे श्रुतिरेव बाध्यत इति श्रुतिलिङ्गयोरेव विरोध इति युक्तो विचारः। तथा च लिङ्गेनेन्द्रार्थत्वं श्रुत्या गार्हपत्यार्थत्वं वेति संशयो युक्तः।

किं बलीय इति। तदर्थं किं श्रुतिवल्लिङ्गाद्यपि स्वतः प्रमाणमुत श्रुतिकल्पनेनेति।' तत्रैकः पूर्वः पक्षः – श्रुतिवल्लिङ्गस्यापि प्रमाणत्वाविशेषात् लिङ्गेनेन्द्रार्थत्वं श्रुत्या गार्हपत्यार्थत्वमिति व्रीहियववद्विकल्प इति। यद्वा इन्द्रगार्हपत्ययोः प्रधानत्वाविशेषादुपस्थानस्य च गुणत्वात् प्रतिप्रधानं गुणावृत्तिरिति

अत्र सिद्धान्तसूत्रं - 'वेदो वा प्रायदर्शनादि'ति। वेदमधिकृत्य ऋगादिशब्दाः प्रवृत्ताः। कुतः? प्रायदर्शनात्। वेदोपक्रमवाक्ये एषामृगादिशब्दानां दर्शनादित्यर्थः। अयमाशयः। प्रधानानुसारेणाप्रधानं योजनीयमित्युक्तं सत्यम्। तत्रैव प्रधानानुसारेणाप्रधानं योजनीयं यत्र प्रधानस्य लब्धात्मकता भवति। एकादिदीक्षापक्षेऽपि प्रधानस्य सोमयागकालस्य यदिष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायामिति लब्धात्मकत्वात्। यदिष्टयेत्यङ्गकालस्यापि प्राप्तत्वात् प्रधानकालेनाप्रधानकालबाधनं युक्तम्। प्रकृते च विध्युद्देशो मन्त्रविषयत्वेनालब्धात्मा कथमर्थवादं बाधेत। तथाहि वेदशब्दः प्रक्रमगतो यथाश्रुतार्थपर एवावधार्यते। कुतः? असञ्जातप्रतिपक्षत्वात्। तस्मिंश्च यथाश्रुतार्थेऽवधारिते उपसंहारगतं ऋगादिपदं सञ्जातप्रतिपक्षत्वात् यथाश्रुतार्थं सत्तदेकवाक्यतामप्रतिपद्यमानं तदनुगुणवेदपरतयैवात्मानं लभते। नान्यथा। येन बाधकं भवेत्। न च विध्युद्देशस्याप्राप्तविषयत्वात् कथं लाक्षणिकत्वमिति वाच्यम्। उपक्रम एव वेदानां किञ्चिद्विधास्यत इत्यवगतम्। किन्तु तद्विधेयमित्येतावदनवगतमपेक्षितमतो विध्युद्देशगतोऽपि ऋगादिशब्दोऽवगतविषयत्वादनुवाद इति लक्षणां सहते। न चैवं सति विकल्पः। एकैव कदाचिदुपांशु पठनीया कदाचिदुच्चैरिति वाच्यम्। यजुर्वेदगतत्वऋग्वेदगतत्वपुरस्कारेणोभयोरुपपत्तेरिति। तस्मादुच्चैष्ट्वादयो वेदधर्मा एवेति वेदेन यत्क्रियते तदुच्चैरिति वचनव्यक्तिर्भवति। उक्तेऽर्थे भट्टसंमतिमाह॥ उक्तं हीति॥ नन्वेकवाक्यस्य परस्परसापेक्षपदत्वेनोभयोः साम्ये सत्युपक्रमस्थ वेदपदानुरोधेनोपसंहारस्थर्गादिपदानां मन्त्रमात्रवाचिनां कृत्स्नवेदपरत्वे निर्णीतेऽपि न प्रकृते तन्न्यायः सम्भवति। उभयोः साम्याभावात्। गृहीतप्रमाणभावश्रुत्यपेक्षया भ्रमविलक्षणत्वेनानिश्चितप्रत्यक्षस्य दुर्बलत्वात्। अन्यथेदं रजतमिति भ्रमोऽपि इयं शुक्तिरित्याप्तवाक्यापेक्षया प्रबलः स्यादिति। मैवम्। अत्र श्रुतिप्रत्यक्षयोरुपक्रमोपसंहारसाम्यं किं परस्परसापेक्षत्वरूपं नास्ति, उत निश्चितप्रामाण्यरूपं वा? नाद्यः। श्रुतिप्रत्यक्षयोरुपजीव्योपजीवकभावेन परस्परसापेक्षत्वात्। न द्वितीयः। जगत्प्रत्यक्षस्य बाधकाभावेन दोषजन्यत्वाभावनिश्चयेन प्रामाण्यनिश्चयस्यापि समानत्वात्। यत्र परस्परसापेक्षत्वे सति निश्चितप्रामाण्यं तत्रैवोपक्रमाधिकरणन्यायावतारः। प्रकृते च तथात्वमस्तीति युक्तं न्यायोदाहरणम्। न च प्रत्यक्षे बाधशङ्कया न प्रामाण्यनिश्चय इति वाच्यम्। सर्वशङ्कासमुद्धारस्याग्रे मूल एव करिष्यमाणत्वात्। रजतप्रत्यक्षे च दोषबाधकनिश्चयेनाप्रमाणण्य निश्चयेनैव तन्न्यायाविषयत्वम्।

॥ लिङ्गात् श्रुतेरिवेति॥ यथा श्रुतेर्लिङ्गापेक्षया शीघ्रं स्वार्थप्रतीतिजनकत्वेन प्राबल्यं तथा प्रत्यक्षस्यानुमानाद्यपेक्षया शीघ्रगामित्वेन प्राबल्यमित्यर्थः। श्रुतिलिङ्गाधिकरणन्यायस्त्वित्थम् - तृतीयस्य सप्तमाधिकरणे चिन्तितम्। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रम्। अत्र श्रुत्यादीनां प्रमाणानां समवाये एकविषये तन्निपाते विरोधे च सति पारदौर्बल्यं परदुर्बलत्वम्। अर्थविप्रकर्षात् परेषां पूर्वापेक्षया विलम्बेन पूर्वपूर्वप्रमाणपरिकल्पनयाऽर्थप्रतीतिजनकत्वादित्यर्थः। तत्रादौ श्रुतिलिङ्गविरोधश्चिन्त्यते। एवं श्रूयते - ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति। अत्र सन्देहः। किमिन्द्रस्यैवोपस्थानं कर्तव्यमथवा विकल्पः उत समुच्चयोऽथ गार्हपत्यस्यैवेति। यदि लिङ्गं बलीयस्तदेन्द्रोपस्थानम्। अथ तुल्यबलत्वं ततो विकल्पः। अथ तुल्यत्वेऽप्यविरोधस्ततः समुच्चयः। श्रुतिबलीयस्त्वे तु गार्हपत्यस्यैवोपस्थानम्। तत्र ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति ब्राह्मणवाक्यम्। तत्रैन्द्री इन्द्रप्रतिपादको मन्त्रः। स चेत्थमाम्नायते

॥ प्राबल्यमागमस्येति॥ नन्वेवमद्वैतस्यापि वेदार्थत्वादीदृशे आगमस्यैव प्राबल्यमिति चेन्न। अत्र हि स एव वैदिकार्थो विवक्षितः यद्भावाभावविषये प्रत्यक्षं न प्रवर्तते। प्रकृते चाद्वैताभावो द्वैतं मिथ्यात्वाभावः सत्त्वं च प्रत्यक्षसिद्धमिति नाद्वैतस्य वेदार्थत्वम्। स्वोक्तेऽर्थे उपोद्बलकमाह॥ अत एवोक्तमिति॥ उपक्रमाधिकरणन्यायेनेति॥ श्रुतेर्जाताधिकारः स्यात्। तृतीयाध्याये तृतीयपादे प्रथमाधिकरणे चिन्तितम् – ज्योतिष्टोमे श्रूयते। प्रजापतिरकामयत। प्रजाः सृजेयेति। स तपोऽतप्यत। तस्मात्तेपानात्रयो देवा असृज्यन्त। अग्निर्वायुरादित्यः। ते तपोऽतप्यन्त। तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्त। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्युपक्रम्योपसंहारे श्रूयते उच्चैर्ऋचा क्रियते। उपांशु यजुषा। उच्चैः साम्नेति। अत्र संशयः – किमुच्चैष्ट्वादयो ऋगादिजातीनां धर्माः किं वा वेदानाम्? ऋगादिजातिमन्त्रधर्मत्वपक्षे ऋगादिमन्त्रैर्यत् क्रियते तदुच्चैरिति वचनव्यक्तिर्भवति। वेदधर्मत्वे ऋग्वेदादिभिर्यत् क्रियते तदुच्चैरिति। किमत्र संशयबीजम्? उपक्रमे वेदशब्दश्रवणमुपसंहारे ऋगादिशब्दश्रवणमेव। न च ऋगादिऋग्वेदादि-शब्दानामेकार्थत्वेनाविरुद्धत्वात् कथं संशयकारणत्वमिति वाच्यम्। वेदशब्दो हि मन्त्रब्रह्मणसमुदायवाचकः। ऋगादिशब्दाः मन्त्रमात्रवाचकाः। न च वेदशब्दोऽपि एकस्य मन्त्रस्य ब्राह्मणवाक्यस्य वा वाचकः किं न स्यादिति वाच्यम्। एकस्मिन् मन्त्रे ब्राह्मणवाक्ये वा प्रयोगाभावात्। यद्येकस्य मन्त्रस्य ब्राह्मणवाक्यस्य वा वाचकः स्यात्तर्हि एकं मन्त्रं मन्त्रौ वा मन्त्रान् वा अधीत्य 'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रममि'त्येतच्छास्त्रार्थं कृतं मन्येत। तस्मात् समुदायवाचको वेदशब्दः मन्त्रमात्रवाचका ऋगादिशब्दाः। अतः सन्देहो युक्तः। न चोपक्रमोपसंहारयोर्भिन्नविषयत्वमेवास्तिति तदेकविषयत्वसमर्थनार्थमिदमधिकरणं नारम्भणीयमिति वाच्यम्। एकवाक्यत्वस्यावश्यकत्वात्। तस्मादुपक्रमोपसंहारयोर्विप्रतिपत्तेरेकवाक्यत्वेऽवश्यं भाविनि किमुपसंहारस्थविध्युद्देशवशादुपक्रमार्थ वादगतवेदशब्दो वैदिकऋगादि मात्रपरो भवतु किं वोपक्रमगतार्थवादवशात् उपसंहारस्थं ऋगादिपदं ऋगादिप्रायवेदपरं भवत्विति संशयः।

तत्र पूर्वपक्षसूत्रं - 'श्रुतेर्जाताधिकारः स्यात्'। अस्यार्थः उपक्रमगता ऋग्वेदादिशब्दाः ऋगादिजातमन्त्रपराः। कुतः? श्रुतेः श्रवणादेव जातप्रतिपत्तिहेतुत्वात्। न च वेदप्रत्यायकः शब्दोऽस्ति। किञ्च जातिपरत्वे तस्या ऋचः यजुर्वेदे उच्चैः प्रयोगो भविष्यति। अन्यथा एकस्या एवर्चः उभौ धर्मौ वैकल्पिकौ स्याताम्। तथा च पक्षे बाधः स्यात्। तस्माज्जातपरा इति। न चोपक्रमगतार्थविरोधः। तत्तात्पर्यालोचनयोच्चैष्ट्वादीनां वेदधर्मत्वप्रतीतेरिति वाच्यम्। अर्थवादस्य गुणत्वेन विध्युद्देशानुसारेण योजनीयत्वात्। न चार्थवादस्य विधिं प्रति गुणत्वमेव कथमिति वाच्यम्। विधिप्रतिपादितशाब्दभावनापेक्षितांशत्रयमध्यगतेतिकर्तव्यतासमर्पकत्वात्। प्राशस्त्यलक्षणया तथान्वयात्। न चार्थवादस्य मुख्यत्वादसङ्गातविरोधित्वेन प्राबल्यमिति वाच्यम्। मुख्यस्याप्यर्थवादस्यानुवादरूपत्वेन दुर्बलत्वात्। जघन्यस्यापि विध्युद्देशस्याप्राप्तविषयत्वेन प्रधानत्वात्। प्रधानानुसारेणाप्रधानस्य नेष्यत्वात्। यथैकादिदीक्षापक्षे मुख्याया अपि दीक्षणीयायाः प्रधानसोमयागाकालानुरोधेन पर्वरूपकालबाध इत्यङ्गमुख्यविरोधे च तादर्थ्यादित्यत्र वर्णितम्। सर्वं ह्यङ्गजातं प्रधानसाद्गुण्याय क्रियते। तस्यैव साक्षाद्गुण्येऽङ्गस्य साद्गुण्यं कुत्रोपयोगीति प्रधान साद्गुण्याय दीक्षणीयायाः पर्वरूपकालबाधः। एवं प्रकृतेऽपि विध्युद्देशानु सारेणार्थवादगतवेदशब्दलक्षणया ऋग्जातपरा इति पूर्वपक्षः।

प्रबलप्रत्यक्षस्याभावाच्च। तथाच प्रत्यक्षं स्वप्रामाण्यसिद्ध्यर्थं प्रत्यक्षेतरविरोधपरिहारं नापेक्षते। तद्विरोधेनाप्रामाण्यादर्शनादिति युक्तमुक्तम्।

यच्चोक्तमनाप्तप्रणीतत्वादिना वेदे प्रामाण्यनिश्चय इति तन्न। क्रियाकारकफलभेदादिप्रतिपादकागमे व्यभिचारात्। न च तस्यापि प्रामाण्यं तत्त्वावेदनलक्षणमङ्गीक्रियते। व्यावहारिकपराः कर्मादिप्रतिपादका इति स्वोक्तिविरोधात्। अपि च वेदेऽपि तात्पर्यभ्रमरूपो दोषोऽस्ति। तथा च कथं प्रत्यक्षरूपे विरोधिनि जाग्रति तदभिप्रेतेऽर्थे प्रामाण्यनिश्चयः। तथाचागमेन प्रत्यक्षस्य बाध इति शिष्यव्यामोहनमात्रम्। यच्चोक्तं प्रत्यक्षेणानुमानागमबाधे देहाद्भिन्नत्वमात्मनो न सिद्ध्येत्। देहात्मैक्यप्रत्यक्षबुद्ध्या बाधादिति तन्न। आविपालगोपालं देहात्मभेदस्यैव प्रत्यक्षसिद्धत्वेन देहात्मैक्यभ्रमाभावात्। अन्यथेष्टसाधनताज्ञानानुमित्यभावेन बालस्य स्तनपानादौ प्रवृत्त्यभावेन जीवनमेव न सिद्ध्येत्। न च देहात्मभेदज्ञाने संसारानुपपत्तिरिति वाच्यम्। स्वातन्त्र्यज्ञानेनैव तदुपपत्तेरिति दिक्।

॥ प्रत्यक्षस्यानुमित्यादीति॥ प्राबल्यं च जात्यैवेत्यन्वयः। प्रत्यक्षस्यानुमानादितः प्राबल्ये हेतुस्तदगृहीतेति। अनुमानाद्यगृहीतरेखोपरेखादिविशेषग्राहत्विदित्यर्थः। ननु तदगृहीतग्राहकत्वं न प्राबल्ये प्रयोजकम्। अन्यथा प्रत्यक्षागृहीतधर्मादिग्राहकत्वेनानुमानस्यैव प्राबल्यापत्तेरिति चेन्न। समानविषययोः प्रत्यक्षानुमानयोरनुमानागृहीतरेखोपरेखादिग्राहकत्वेन प्रत्यक्षस्य प्राबल्यमनुमानादुच्यते। दृष्टं च तथा कन्यासौन्दर्यासौन्दर्यविषययोः प्रत्यक्षानुमानयोरनुमानापेक्षया विशेषग्राहकत्वेन प्रत्यक्षस्य प्राबल्यम्॥ अनुमानाद्यनिवर्तितेति॥ नन्वनुमानाद्यनिवर्तितदिङ्मोहादिनिवर्तकत्वमपि प्राबल्ये न तन्त्रम्। एतावता हि वैधर्म्यमात्रमुक्तम्। न च तावतेतरमानापेक्षया प्राबल्यं भवति। अन्यथा त्वाचप्रत्यक्षानिवर्तितवंशोरगभ्रमनिवर्तकत्वात् चक्षुषोऽपि त्वगपेक्षया प्राबल्यं स्यात्। तथासति चित्रनिम्नोन्नतादिज्ञानस्य चाक्षुषस्य तद्विरोधित्वाच ज्ञानाद्बाधो न स्यादिति चेन्मैवम्। अनुमानाद्यनिवर्तितदिङ्मोहादिनिवर्तकत्वं प्राबल्ये तन्त्रम्। लोके सम्यक् प्रतिपादकयोः पुरुषयोर्यद्वाक्यादज्ञान निवृत्तिर्भवति तद्वाक्यस्य प्राबल्यव्यवहारात्। अन्यथा तु तन्न स्यात्। यच्चोक्तमन्यथेत्यादि तत्रोभयोः समबलत्वेऽपि सोपाधिकभ्रमे उपाधिनिवृत्तिसहितस्यैव भ्रमनिवर्तकत्वम्। वंशोरगभ्रमस्थले च त्वाचप्रत्यक्षस्य तत्समवहितत्वाभावादनिर्वतकत्वम्। एतावता त्वचो दुर्बलत्वापादकं न भवति। तेनान्यत्र त्वचोऽपि चाक्षुषभ्रमनिवर्तकत्वं सम्भवति। प्रकृते च प्रत्यक्षस्योपाधिनिवृत्तिरूपसहकार्यनपेक्षत्वात् युक्तं प्राबल्यम्। तथाच प्रत्यक्षमनुमानादितः प्रबलं, तदनिवर्तितनिवर्तकत्वादिति हेतौ उपाधिनिवृत्त्यसहकृतत्वेन विशेषणान्न त्वगनिवर्तितभ्रमनिवर्तके चक्षुषि व्यभिचार इति दिक्।

॥ दृष्टं हीति॥ ननु तत्र त्वाचप्रत्यक्षस्योपजीव्यत्वेनैव प्राबल्यम्। धर्म्यादेश्चक्षुरादिना सिद्धावपि साध्यप्रतियोगिन औष्ण्यस्य त्वचं विनाऽसिद्धेरिति चेन्न। शब्दादिना तत्सिद्ध्युपपत्तेः। अनुमाने हि साध्यज्ञानं कारणम्। तस्य चाभावरूपस्य ज्ञानं प्रतियोगिज्ञानाधीनम्। प्रतियोगिज्ञानं च शब्दादिनाऽपि धर्मादिज्ञानद्भविष्यति। अनौष्ण्यस्य भावरूपताया वक्ष्यमाणत्वाच्च। शैत्यानुमाने तथाप्यगतेश्च। तथाचोदाहृतस्थले जात्यैव प्रत्यक्षस्य प्राबल्यमिति।

मिथ्यात्वासत्त्वयोरधिष्ठानत्वशङ्कैव न सम्भवति। शून्यवादापत्तेरिति चेन्मैवम्। स्वरूपसत्त्वनिबन्धनमेवास्तु सामानाधिकरण्यम्। सद्ब्रह्मेत्यादौ दृष्टत्वात्। न चाननुगतसत्त्वानामनुगतव्यवहारप्रयोजकत्वं कथमिति वाच्यम्। सत्तात्रैविध्यं वदता त्वया सद्ब्रह्म, सन् घटः, सद्रूप्यमिति अनुगतव्यवहारस्याननुगतैरेव सत्त्वैः समाधेयत्वात्। न चैवं जात्युच्छेद इति वाच्यम्। इष्टापत्तेः।

अथवा त्रिकालाबाध्यत्वनिबन्धनमस्तु सामानाधिकरण्यम्। न च तस्य चक्षुराद्यगोचरत्वमुक्तमिति वाच्यम्। तद्योग्यत्वस्याधस्तादेवोपपादितत्वात्। न च सदिदं रजतमिति भ्रमे तदभाव इति वाच्यम्। न हि सत्सामानाधिकरण्यमात्रे त्रिकालाबाध्यत्वं प्रयोजकमिति विद्मुर्मः। किन्तु प्रमिते सामानाधिकरण्ये। एवं च सदिदं रजतमिति सामानाधिकरण्यं भ्रान्तमिति नात्र तत्प्रयोजकमित्यवैहि। तथा च सन्नित्यस्य घट इत्यनेन सामानाधिकरण्ये बाधकाभावेऽपि यद्यधिष्ठानानुवेधः कल्प्यते तर्हि नीलो घट अनित्यो घट इत्यादावपि अधिष्ठानानुवेधः कल्पनीयः। न च नीलादेरधिष्ठानत्वं न सम्भवति, प्रागसत्त्वादिति वाच्यम्। घटादौ नैल्यारोपात् नीलरूपवतोऽप्यधिष्ठानत्वकल्पनसम्भवेन तदनुरोधेन प्रागवस्थानसम्भवात्। आत्मारोपेणात्मनोऽधिष्ठानत्वानापाताच्च। स्वीकृतश्चायम्। अन्यथाऽपसिद्धान्तात्। यच्च नीलपीताद्यनेकाधिष्ठानकल्पने गौरवमिति तदपि न। कल्प्यानेकत्वगौरववदधिष्ठानानेकत्वकल्पनागौरवस्यापि समाधेयत्वात्। कल्पनामात्रशरणस्य नीलपीतादिरूपमधिकरणमेकमित्यपि कल्पनसम्भवे गौरवाभावात्। यच्चाधिष्ठेयविषयसत्ताकत्वाभावान्नाधिष्ठानत्वं नीलादेरिति तन्न। लाघवेनाधिष्ठेयविलक्षणत्वस्यैव प्रयोजकत्वेन विषमसत्ताकत्वस्य तत्त्वे गौरवात्। यदपि मिथ्यात्वासत्त्वयोरधिष्ठानत्वशङ्कैव नोदेति शून्यवादापत्तेरिति। तदपि तुच्छम्। त्वयाऽपि आत्मानात्मनोरन्योन्य तादात्म्यारोपमन्योन्यधर्मारोपं च वदता मिथ्याभूतस्याधिष्ठानत्वाभ्युपगमात्। नृशृङ्गमस्तीति शब्दाभासजन्यज्ञाने सत्त्वारोपं प्रति नृशृङ्गस्याधिष्ठानत्वाच्च। सर्वशून्यत्वाङ्गीकार एव शून्यवादापत्तिः। तस्मान्नीलो घट इत्यादौ नील इत्याद्यधिष्ठानानुवेध इत्यापादनं साधु। ॥ अन्यथेति॥ मिथ्यात्वसिद्धिदशायामेवं कल्पन इत्यर्थः। यदि सत्यं ज्ञानमित्यत्र ब्रह्मणि सत्तासंबन्धेन न सत्त्वं किन्तु स्वरूपेणैवेति तर्हि घटादावपि तथे त्युक्तमिति समम्॥ कथमिति॥ न कथमपीत्यर्थः। तस्याप्रमाणत्वात् प्रमाणत्वेऽपि त्रिकालाबाध्यत्वग्राहाक्षमत्वात् प्रत्यक्षं न बाधकमिति भावः। तथैव विकल्पयति॥ किं प्रत्यक्षमिति॥ अक्षस्य त्विति॥ ननु चन्द्रतारकादिपरिमाणप्रत्यक्षेऽनुमानागमविरोधेन तस्याप्रामाण्यदर्शनात् तेनापि स्वप्रामाण्यसिद्ध्यर्थमितराविरोध स्यावश्यमपेक्षणीयत्वात् कथमन्योन्याश्रायपरिहारः। किञ्च प्रत्यक्षागमयोः परस्परविरोधेनाप्रामाण्यसन्देहे अनाप्तप्रणीतत्वादिना भ्रमाजनकत्वव्याप्तेर्वेदे प्रामाण्यनिश्चये जाते तेन सम्भावितदोषस्य प्रत्यक्षस्य बाध इति कान्योन्याश्रयः। अन्यथाऽऽत्मनो देहभिन्नत्वमपि न सिद्ध्येत्। देहात्मैक्यप्रत्यक्षबुद्ध्याऽनु मानागमयोर्बाधादिति चेन्मैवम्। प्रत्यक्षं न स्वप्रामाण्यसिद्ध्यर्थमनुमानागमविरोधपरिहारमपेक्षते। चन्द्रतारकादिपरिमाणप्रत्यक्षमपि नानुमानागमविरोधेनाप्रमाणम्। तत्र हि यद्दूरस्थत्वादिदोषयुक्तं तत् परिमाणादावयथार्थमिति पूर्वमेव विपरीतनिश्चयसत्त्वेन पश्चाज्जायमानं प्रत्यक्षं पूर्वतनप्रबलप्रत्यक्षविरोधादप्रमाणं बाधितमेवोत्पद्यते, न पुनरनुमानागमविरोधेनाप्रामाण्यम्। न चैवमेव जगत्प्रत्यक्षमस्त्विति वाच्यम्। प्रकृते विपरीते निश्चायकाभावात्। मिथ्यात्वानुमानागमयोश्चाद्याप्यप्रामाण्यसन्देहकान्तारनिविष्टत्वात्। मिथ्यात्वे

सुब्रह्मण्ययेत्यध्याहार्यं। ततः बहुविषयेत्यादि पठनीयम्। एवमध्याहारेण योजने न काचिदनुपपत्तिः। यथा सुत्याकालीनसुब्रह्मण्यायाः बाधाभावस्योक्तत्वात्। तदेतत् सहृदयैराकलनीयम्। अयं चार्थो भाष्यकारमतेन। यथा तु वार्तिके तथा नैतदिब्यत इति प्रागवोचाम।

ननु दृष्टांते बहुविषयबाधोऽत्र तु बहुभिरिति वैषम्यम् देहात्म्यैक्ये प्रत्यक्षानुमानशब्दाभासादिसत्त्वेपि देहात्मभेदबोधकस्यानन्यपरत्वेन प्राबल्यवदत्राप्यनन्यपरत्वेनाद्वैत श्रुतेः प्राबल्यात्। विद्याविद्याभेदेन विद्वदविद्वत्पुरुषभेदेन च विरोधाभावादिति चेत्, मैवं। बहुबाधप्रसंगस्य बाधबीजस्य सत्त्वेन यथा बहुविषययाऽल्पविषयाया बाधस्तथा तेनैव बाधबीजेन बहुभिरप्यल्पबाधस्य संभवात्। यद्वा भेदग्राहकमानत्वं बाधकत्वसमानाधिकरणं बहुविषयकत्वसमानाधिकरणत्वात् क्रतुविशेषातिदिष्टेंद्रप्रकाशकसुब्रह्मण्यात्ववदित्यत्र तात्पर्यात्। अत एव तादृशमेवोदाहरति। तदुक्तमिति। बहूनां प्रामाणानां विरोधे सतीत्यर्थः।

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यां जात्याक्षं बलवन्नयैः॥
। प्रत्यक्षस्य जात्योपक्रमादिन्यायैश्च प्राबल्यम्।

न्यायामृतकण्टकोद्धारः

॥ चाक्षुषादिज्ञान इति॥ न च रूपादिहीनस्यापि ब्रह्मणः कालादिवच्चाक्षुषादिज्ञाने प्रतिभासोऽस्त्विति वाच्यम्। कालादेर्नियमतः साक्ष्युपनीतत्वेन तज्ज्ञानसम्भवेऽपि सद्रूपब्रह्मणस्तथात्वाभावेन नियमतश्चाक्षुषादिज्ञानविषयत्वानुपपत्तेरित्याद्युक्तत्वात्।

॥ नीलो घट इति॥ ननु सन्नित्यस्य घटसामानाधिकरण्यानुपपत्त्या अधिष्ठानब्रह्मानुवेधोऽङ्गीक्रियते। तथाहि। तद्धि किं सत्ताजातिनिबन्धनं वा स्वरूपसत्त्वनिबन्धनं वा कालत्रयाबाध्यत्वनिबन्धनं वा सामानाधिकरण्यं स्यात्। न तावदाद्यः। अभावादिसाधारणसत्प्रतीतौ जातिनिबन्धनत्वायोगात्। अभावादौ सत्ताजात्यनङ्गीकारात्। न द्वितीयः। स्वरूपसत्त्वस्याननुगतत्वात्। अनुगतप्रतीतेस्तन्निबन्धनत्वायोगात्। अननुगतेनाप्यनुगतप्रतीतौ जात्युच्छेदापत्तेः। एकेनैव सर्वानुगतेन सत्प्रतीत्युपपत्तौ बहूनां तद्धेतुत्वकल्पने मानाभावाच्च। नापि तृतीयः। तस्य चक्षुराद्यगोचरत्वात्। सदिदं रजतमिति भ्रमे तदभावाच्च। तस्मादेकं सर्वाधिष्ठानमेव सदिति सर्वत्रानुभूयत इति युक्तमुत्पश्यामः। नीलादेस्तु घटादिसामानाधिकरण्ये नास्ति बाधकम्। किञ्च नीलादेरधिष्ठानत्वमसम्भवि। प्रागसत्त्वात्। नीलपीताद्यनेकाधिष्ठानकल्पने गौरवाच्च। अधिष्ठेयतुल्ययोगक्षेमत्वाच्च। अधिष्ठेयविषमसत्ताकमेव ह्यधिष्ठानं भवति। मिथ्या रूप्यमसन्नृशृङ्गमित्यादौ

शास्त्रदीपिकायां – न ह्यल्पवैगुण्ये संभवति भूयोवैगुण्यं प्रयोगवचनः क्षमते। अवगतमपि हि कारणांतरवशाद्बाध्यत इति। तस्माद्भूयोऽनुग्रहो न्याय्यः। अत्र च भाष्यकारमतेनाधिकरणन्यायोक्तिरिति सर्वमनवद्यम्। उदाहृतसूत्रार्थस्तु स्पष्टः। आग्नेयी प्राप्ता आतिथ्यांते उपसत्सु चेति शेषः।

चोदकेन प्राप्तयेति। ननु चोदकादपि नामधेयप्राबल्यं नवमे साधितम्। तत्कथं चोदकप्राप्तया ऐंद्र्या नामातिदेशेन प्राप्ताया आग्नेय्या बाधो वर्ण्यते। सत्यम्। नामधेयप्राबल्यमेव नामांतरेणाक्षिप्यते। न हि नामधेयेन चोदकप्राप्तिरेकादशस्वहस्सु निराकर्तुं शक्यते। तस्याग्निष्टुद्विषयत्वात्। भिन्नविषययोश्च बाध्यबाधकभावाभावात्। तेन चोदकतस्तेषु नामधेयतश्चाग्निष्टुति यथायथं विध्यंते प्राप्ते यत्र विरोधो भवति तत्र भूयस्त्वेन कारणेन नामप्राप्ताऽपि बाध्यते। वस्तुतस्तु पंचदशरात्रस्य प्राथमिकेषु चतुर्ष्वहस्स्वग्निष्टुज्ज्योति गौरायुरित्येतन्नामतिदेशेनैकाहिकाः धर्माः प्राप्नुवंति। तत्र प्रथमेऽह्नि आग्नेयी। त्रिष्वैंद्यः। एवं च आतिथ्यांते उपसत्काले च सुब्रह्मण्याग्निष्टुन्नामाग्नेयी प्राप्ता। ज्योतिर्गौरायुरिति त्रिभिर्नामभिरैंद्री प्राप्ता। तथा विरोधे बहूनामनुग्रहेणातिथ्यांते उपसत्सु चैंद्येव सुब्रह्मण्येति बह्वनुग्रहो द्रष्टव्यः। ननु चतुर्दशाहस्सु चोदकेन प्राप्तयेत्यनुपपन्नम्। एकादशस्वेवाहःसु चोदकप्राप्तेर्निर्णीतत्वादिति चेत् सत्यम्। चतुर्दशाहस्स्वित्यस्य चतुर्भ्यः पराणि दश चतुर्दश। तानि च योग्यत्वादहान्येव। चतुर्दश चाहश्च चतुर्दशाहानि तेषु चतुर्दशाहस्स्वित्यर्थः। एवं च अग्निष्टुज्ज्योतिर्गौरायुरित्येतेभ्यः पराणि पंचमप्रभृतीनि अचतुराणि चतुर्दशांतानि मन्यंते। अहः शब्देनोत्तममहः। एवं चैकादशानि चतुर्दशाहःशब्देनोपस्थाप्यंते। अतो न वार्तिकादिविरोध इति प्रतिभाति। यद्वा चतुर्दशाहस्सु प्राप्तया ऐंद्र्येति संबंधः। चोदकेनेत्यतः परं नामधेयेनेति शेषः। तथा च नामधेयसमुचितेन चोदकेन चतुर्दशाहस्सु ऐंद्र्येव प्राप्ता तयाऽऽग्नेय्या निवृत्तिरित्यर्थः। ऐंद्र्या बहुविषयया बाध इति। यद्यपि नायं बाधस्य विषयः। किं तु प्रसंगस्य। तथापि फलतो बाधस्य विषयो भवतीति तदुक्तिरित्यर्थः। अत्रैवं वाक्यार्थः। प्रथमेऽहनि प्रथमसुत्यायां सुब्रह्मण्याग्नेयीत्यतः परं अग्निष्टुत्सुत्यादेवतासंस्कारानुगुणाय यथा क्रियते वसतीवरीग्रहणोत्तरकालं तथा पंचदशसुत्यासाधारणांग दिवसे आतिथ्यांते उपसत्सु च प्रथमोपस्थिताग्निष्टुत्सुत्यादेवतासंस्कारानुसारेणाग्नेय्येव सुब्रह्मण्येत्यध्याहरणीयं प्राप्ता तस्याः आतिथ्याते उपसत्सु च प्राप्ताया आग्नेय्याः सुब्रह्मण्यायाः चतुर्दशसु सुत्यासु नामातिदेशेन चोदकेन च प्राप्त ऐंद्र्या सुब्रह्मण्यया। अत्र ऐंद्र्या सुब्रह्मण्येत्यतः परं चतुर्दशसुत्यादेवतासंस्कारत्वे सादृश्यात्तदंगदिवसे आतिथ्यांते उपसत्सु च प्राप्तया ऐंद्र्या

बृहस्पतिरुपवक्ता इत्ययं चतुर्होतृमंत्रः। अग्निर्होता अश्विनाध्वर्यू त्वष्टाग्नीत् मित्र उपवक्ता इत्ययं पंचहोतृमंत्रः। एताभ्यां चतुर्होतृपंचहोतृमंत्राभ्यां हविषां पुरोडाशादीनामभिमर्शनं पूर्णमास्यमावास्ययोर्भेदेन विहितम्। तत्र संसृष्टत्वाद्धविषां सकृदेवाभिमर्शनं सर्वेषां पूर्णमासीहविषामेवममावास्यायामपि सर्वेषां हविषामभिमर्शनं सकृदेव। न ह्यभिमर्शनद्वयमस्ति। येनैकस्य हविषस्तत्कृत्वाऽपरस्यापि क्रियेत। वाक्यांतरविहिते ह्यभिमर्शने मंत्रद्वयमिदं व्यवस्थया विधीयत इत्यष्टमे वर्णितम्। न च कृतस्याप्यभिमर्शनस्य मंत्रांतरेणाभिमर्शनं न कृतमिति मंत्रार्थमावृत्तिर्युक्ता। अंगानुरोधेन प्रधानावृत्तेरभावात्। तथा च प्रकृतेष्टौ पूर्णमास्यमावास्याविकाराणां हविषां सहाभिमर्शने कर्तव्ये तत्स्मरणार्थयोर्मंत्रयोरस्ति विरोधः। वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायामित्यनेनाज्यभागयोर्व्यवस्थया मंत्रौ विधीयते। तौ च पौर्णमासीविकाराणां वार्त्रघ्नावाज्यभागमंत्रौ प्राप्तौ। दर्शविकारयोस्तु वृधन्वंतौ। न चान्यताभ्यां मंत्राभ्यां कृतावाज्यभागौ पुनर्मंत्रार्थमावर्तनीयौ। अंगानुरोधेन प्रधानावृत्तेरभावात्। तदिह किममावास्याधर्माभ्यां वृधन्वतीभ्यां ऋग्भामाज्यभागौ कर्तव्यौ। ताभ्यामेव च प्रसंगकार्यस्य सिद्धत्वात्पौर्णमासीकौ मंत्रौ निवर्तेते। अथवा पौर्णमासीधर्माभ्यां वार्त्रघ्नीभ्यां ऋग्भ्यामाज्यभागौ कर्तव्यौ। ताभ्यामेव च प्रसंगकार्यसिद्धेरमावास्यामंत्रौ निवर्तेते इति संदेहे आग्नेयस्योभयथाऽप्यविरुद्धत्वादैंद्रदध्नोः प्राथमिकत्वादसंजातविरोधित्वाच्च तद्धर्मानुग्रहाय वृधन्वत्यावेवाग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वावयमित्येते ऋचौ कर्तव्ये इति प्राप्ते सिद्धांतः। भूयसां मधुघृतापानामनुग्रहाय वार्त्रघ्नावेवाग्निर्वृत्राणि जंघनत्, त्वं सोमासि सत्पतिरित्येते कर्तव्ये इति। न चात्र पूर्ववदन्यतरमंत्रेणान्यतरस्यानुपकारः शंकनीयः। अग्नीषोमयोराज्यभागादेव तयोरुभाभ्यां मंत्राभ्यामविशेषेणैव संस्कार्यत्वात्। न च वृत्रहवृधन्वद्रूपेणान्यतरस्यैव संस्कारकत्वमिति वाच्यम्। विष्णुशिपिविष्टादि वद्वृत्रहादिरूपेणाग्नीषोमयोर्देवतात्वाभावात्। किंत्वुभयत्राग्नीषोमावविशिष्टावेव देवते। मंत्रस्यैव परं तत्तच्छब्दभेदेन भेदः। अन्यथा वृत्रघ्नेऽग्नयेऽनुब्रूहीति प्रैषाद्यापातात्। यदाहाऽश्वलायनो "लिंगविशेषान्नामधेयान्यत्वम्" इति। तदिह मधुघृतापापेक्षितमंत्रेणैवोपकारः संपादनीयः। न त्वैंद्रपुरोडाशदध्यपेक्षितमंत्रेण। बहूनामनुग्रहस्य न्याय्यत्वात्। यद्यपि मुख्यस्य धर्मः प्रथममवगम्यते तथापि पश्चाद्भूयोऽनुग्रहमालोच्य बाध्यते। न चात्राऽग्नावैष्णवं द्वादशकपालं निर्वपेत्, अपराह्णे सरस्वतीमाज्यस्य यजेतेति मध्वरकल्पाहविषोरिव समयोर्विप्रतिषेधः। येन प्रथमोपस्थितस्यानुग्रहः कल्प्येतेति। न च मुख्यानेकानुग्रहयोः कतरोऽनुसरणीयो नियामकाभावादिति वाच्यम्। बहुसाद्गुण्यस्यैव नियामकत्वात्। यथांगगुणविरोधाधिकरणे मुख्यमपि दीक्षणीयाधर्मत्वं बाधित्वा प्रधानधर्मत्वबलेन सुत्याकाल एवानुग्रहीष्यते। तदुक्तं

कुंडपायिनामयने अग्निहोत्रनामवत् सुब्रह्मण्याह्वानं चातिथ्यांते उपसत्काले च सुत्याकालीनं च। तत्र सुत्याकालीनं सुब्रह्मण्याह्वानं भिन्नकालत्वान्न तंत्रमर्हतीति ततः सुत्याकाल एव क्रियते। आतिथ्यांते उपसत्काले सुब्रह्मण्याह्वानं तु समानदेशकालकर्तृत्वादहर्गणेषु तंत्रमित्येकादशे वर्णितम्। पंचदशरात्रस्य चाग्निष्टुन्नामकं प्रथममहरग्निष्टुन्नामकैका हविकृतित्वात्तद्धर्मभूताग्नेयीसुब्रह्मण्यांगवत्। ततः पराणि त्रीणि ज्योतिर्गौरायुरित्येतत् संज्ञकान्यहानि ज्योतिर्गौरायुरित्येतत्संज्ञकैकाहवि कृतित्वात् तदंगभूतैंद्रीसुब्रह्मण्याधर्मकाणि। परिशिष्टान्येकादश द्वादशाहविकृतित्वादैंद्र्या सुब्रह्मण्ययोपेतानि। एवं चायस्याह आग्नेयीसुब्रह्मण्यांगम्। परिशिष्टानां चतुर्दशानामैंद्र्यंगं। अत एव वसतीवरीग्रहणोत्तरकालं सुत्याकालो यथायथं आग्नेयी ऐंद्र्यश्च सुब्रह्मण्या आहूयंते। प्रधानभूतैरेभिश्च पंचदशसुत्याभिरातिथ्यांते उपसत्काले च सुब्रह्मण्याह्वानं तंत्रेण क्रियमाणमाकांक्षितम्। तत्राऽग्नेय्या प्रथमया सुत्ययानुरूपत्वेनाग्नेयी सुब्रह्मण्याऽऽकांक्षिता। परिशिष्टाभिरैंद्रीसुत्यादिभिः स्वानुरूप्येणैंद्री सुब्रह्मण्याऽऽकांक्षिता। तदिहातिथ्यांते उपसत्काले च सुब्रह्मण्यायां संदेहः किमाग्नेयीसुत्यानुसारेणाऽग्नेय्याऽऽह्वातव्या आहोस्विदैंद्रीसुत्यानुसारेणैंद्री आह्वातव्येति। तत्राऽग्नेय्याः सुत्यायाः प्राथमिकत्वेन मुख्यत्वादसंजातविरोधित्वाच्चाग्नेय्येवाह्वातव्या न त्वैंद्री। चरमोपस्थितत्वेनामुख्यत्वात्संजातविरोधि त्वाच्चेति पूर्वपक्षे प्राप्ते सिद्धांतितम्। बहूनामनुग्रहस्य न्याय्यत्वादैंद्येवाह्वातव्येति भाष्यकारो वर्णयांबभूव। तदेतद्वार्तिककारो नानुमन्यते। तथाहि – यत्रान्यार्थेनान्यस्योपकारसिद्धिस्तत्र प्रसंगः। न चोपसत्कालीनाग्नेय्या सुब्रह्मण्य ऐंद्रः संस्कृतो भवति। ऐंद्र्या वा तयाऽग्निः। यथाग्नये जुष्टं निर्वपामीति निर्वापमंत्रः संस्कारकत्वात्तनिनिर्वापं भिद्यते एवमियमपि। अत एव न तंत्रता। तेनोभे अपि भेदेनाह्वातव्ये इत्यनुदाहरणम्।

सुब्रह्मण्येति। इदमुदाहरणं काम्येष्टिकांडे श्रूयते। अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् इंद्राय प्रदात्रे पुरोडाशमेकादशकपालं दधि मधु घृतं पयो धानास्तत्संसृष्टं प्राजापत्यं पशुकाम इति। तदिमानि सप्तहवींषि। आग्नेयमैंद्रं प्राजापत्यानि पंचेति। तत्राग्नेयं प्राजापत्याश्च धाना आग्नेयविकारत्वादुभयथाऽप्यविरुद्धाः। यस्त्वैंद्रः पुरोडाशो यच्च प्राजापत्यं दधि तयोः क्रमेणैंद्राग्नसान्नाय्यविकारत्वादमावास्याधर्मापेक्षा। मधुघृतापानां तूपांशुयाजविकारत्वात् पौर्णमासिकधर्मापेक्षा। मधूदकयोराज्यविकारत्वमष्टमे सिद्धम्। घृतस्य त्वसंदिग्धमेव। तदेतेषु सप्तसु यागेषु सहप्रकांतेष्वभिमर्शनमंत्राज्यभागमंत्रयोर्विरोधः। चतुर्होत्रा पौर्णमासीमभिमृशेत् पंचहोत्रा अमावास्यायामभिमृशेदित्यभिमर्शनमंत्रौ विहितौ। पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्नीत्

न मन्यते। तथाहि – कौण्डपायिनामयनाग्निहोत्रादीनां नैय्यमिकाग्निहोत्रादिभ्यो नाग्नाऽन्यस्वरः प्राप्नोति। चोदके न चेदमुपांशुत्वम्। चोदकाच्च नामधेयं बलवत्। तस्मादन्यत्प्रयोजनं वाच्यम्। तदुच्यते। राजसूये पुरस्तादुपसदां सौम्येन प्रचरंति अंतरा त्वाष्ट्रेणोपरिष्टाद्वैष्णवेनेति। पूर्वपक्षे सौम्यादिषूपांशुत्वम्। सिद्धांते तु नेति। ननु यत्किंचिच्छब्देनापि प्रकृता विशेषा उच्यंते। दीक्षणीयादिभिरपि शब्दैर्विशेषा एव। तत्र द्वयोर्विशेषप्रवृत्तेर्नास्ति बाध्यबाधकभावः। तस्माद्दीक्षणीयादिषु प्रधानेषु विकल्पः प्राप्नोति। मैवं। दीक्षणीयादिभिः शब्दैर्वर्णोपात्तमेव प्रधानं। तस्माद्धि वर्णश्रवणादेवान्यनैरपेक्ष्येण दीक्षणीयादिप्रधानं प्रतीयते। यत्किंचिच्छब्देन तु न कश्चिद्वर्णोपात्तः पदार्थः प्रतीयते। किंतु प्रकरणालोचनसंव्यपेक्षः। वर्णोपात्तेन निरपेक्षेणावर्णोपात्तः सापेक्षो विरोधे सत्यवश्यं बाधनीयः। एवं च योग्यताज्ञानापेक्ष आगमस्तन्निरपेक्षप्रत्यक्षेण संकोचनीय इत्यभिप्रायः। किंच दीक्षणीयातिरिक्ते दीक्षणीयांगे सावकाशमुपांशुत्वं। यावत्या वाचेति विहितस्वरस्तु दीक्षणीयेतरत्र निरवकाश इति दीक्षणीयस्वरस्तस्य संकोचको भवति। तदिदमुक्तं – दीक्षणीयातिरेके सावकाशत्वादिति। संस्कारे दीक्षणीयादौ युज्यमानानां विधीयमानानां तत्परमापूर्वमेव प्रयोजकं स्यात्। कुतः। दीक्षणीयादेस्तादर्थ्यात् परमापूर्वार्थत्वादिति सूत्रार्थः।

ननु तात्पर्यलिंगैरुपक्रमादिभिर्द्वैतनिषेधपरत्वेऽवधृते अद्वैतश्रुतेरपि निरवकाशत्वात्प्रत्यक्षस्यापि व्यावहारिकद्वैतविषयतया सावकाशत्वाद्विरुद्धयोर्द्वयोरहं मनुष्य इत्यादिप्रत्यक्षाकाशवत्सर्वगतश्च नित्य इत्यादि श्रुत्योरिव तात्विकप्रामाण्यानुपपत्त्या कस्यचिद्व्यावहारिकं कस्यचित्तात्विकं प्रामाण्यमभ्युपेयम्। अत्यंताप्रामाण्यस्यान्याय्यत्वात्। तत्राद्वैतश्रुतेर्व्यावहारिकप्रामाण्यसंभवे द्वैतग्राहिप्रत्यक्षादेस्तात्विकं प्रामाण्यं भवेत्। तदसंभवे तु बलादेवाद्वैतश्रुतेस्तात्विकं प्रामाण्यमिति प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं पर्यवस्यतीति कृतबुद्धयो विदांकुर्वंत्विति। अत्रोच्यते। तदुपक्रमादिलिंगैः श्रुतेर्द्वैतनिषेधपरत्वेपि प्रत्यक्षगृहीतघटादीतरविषयत्वेन सावकाशत्व निरवकाशत्वाभ्यामुभयोरपि तात्विकप्रामाण्योपपत्तौ नाप्रामाण्यापरनामधेयव्यावहारिकप्रामाण्यं प्रत्यक्षस्येति साधु कृतबुद्धयोबिदांकुर्वंत्विति।

पंचदशरात्र इति। द्वादशस्य द्वितीये विचारितम्। विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम्। अस्ति पंचदशरात्राख्यं सत्रं पंचदशसुत्यात्मकम्। तस्य प्रथमं सौत्यमहरग्निष्टुन्नामकम्। ततः पराणि त्रीणि ज्योतिर्गौरायुरित्येतन्नामकानि। परिशिष्टान्येकादश द्वादशाहिकानि। अग्निष्टुज्ज्योतिर्गौरायुरित्येतन्नामका ऐकाहिकाः क्रतवः प्रसिद्धा अपरे वर्तंते। तेषां नामान्यग्निष्टुदादीनि पंचदशरात्रस्य प्रथमदिवसचतुष्टये धार्यंते। तदीयेतिकर्तव्यताप्राप्त्यर्थं

परमापूर्वप्रयुक्त एव वाङ्नियमः। तदुक्तं–

"फलवत्परमापूर्वं तच्छेषत्वं ततो भवेत्।
स्वापूर्वं क्रतुशेषत्वान्न स्वयं फलवद्यतः॥

फलवच्छेषता युक्ता न तु निष्फलशेषता।
तस्मान्न साधने रूपे स्वरे भेदोऽभिधीयते॥" इति।

सिद्धांतस्तु। दीक्षणीया आत्मीयमपूर्वं लक्षयति। प्रथमं तेन च धर्माणां संबंधः। तस्यापि फलवत्त्वेन तदतिक्रमकारणाभावात्। परमापूर्वं तु लक्षितलक्षणया। अतः प्रथमोपस्थितफलवत्स्वापूर्वप्रयुक्त एव वाङ्नियमः। तदुक्तं–

"एवमाश्रीयमाणे हि भवेल्लक्षितलक्षणा।
स्वापूर्वे लक्षणामात्रं तस्माल्लक्षितलक्षणा॥

तच्छेषत्वेपि धर्मस्य नानर्थक्यं प्रसज्यते।
तस्याप्यदृष्टरूपत्वात् फलापूर्वोपयोगतः॥" इति।

तत्र स्वरांतराणामस्य च समावेशो निरूप्यते। दीक्षणीयाया याजुर्वेदिकत्वादुपांशु यजुषेति नानावेदस्वरूपोपांशुत्वं प्राप्नोति। तच्चोदकेन बाध्यते। कथं प्राक् स्विष्टकृतः प्रथमस्थानेन मध्यमेनेडायाः शेषे तृतीयस्थानेनेत्येतत्स्थलवैचित्र्यं चोदकप्राप्तम्। तच्चोदकाश्रयत्वात्प्रयोगवचनाश्रय नानावेदस्वरापेक्षया बलवत्। तदपि यत्किंचित् प्राचीनमग्नीषोमीयादित्यनेन वाचनिकेनोपांशुत्वेन बाध्यते। ततश्च पुनरपि दीक्षणीयादीनां सांगानामुपांशुत्वमेव प्राप्तं। तदपि यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादित्यनेन वाङ्नियमेन बाध्यते। नन्वग्नीषोमीयात्प्राचीनेषु प्रायणीयातिथ्योपसत्सु वाचनिक एव तत्तत्स्वरनियम इति यत्किंचित्प्राचीनमित्यनेनोक्तमुपांशुत्वं क विधीयेत? उपसत्सु पुनरनुवाद एव स्यादिति चेदुच्यते। दीक्षणीयादिशब्दवाच्ये वाङ्नियमो विधीयते। दीक्षणीयादिशब्दश्च प्रधानमात्रे वर्तते नांगेषु। तेन प्रधानेषु यावत्या वाचेति विहितः स्वरः। तदंगेषु तूपांशुत्वमिति। नन्वेवमग्नीषोमीयात्प्राचीने प्रवर्ग्येपि उच्चैः प्रवर्ग्येणेति विहितमुच्चैस्त्वं प्रधानमात्रे स्यात्। अंगेपूपांशुत्वमेव स्यादिति चेन्न। उच्चैः प्रवर्ग्येणेति करणविभक्तिनिर्देशात्सांगस्यैव करणत्वेन सांगस्यैवोच्चैस्त्वम्। दीक्षणीयादिषु तु करणविभक्तिनिर्देशाभावात्प्रधानमात्रधर्मतेति विशेषः। यच्च पूर्वपक्षे भाष्यकारमते प्रयोजनमुक्तं मासाग्निहोत्रादिषूपांशुत्वस्य प्राप्तिरिति तद्वार्तिककारो

प्राचीनशब्देन प्रमितसंबंधः किंचिच्छब्दोऽनन्वितः स्यात्। तथा हि। किंचिच्छब्दोऽयमज्ञाते ज्ञातुमिष्टे वर्तते। देशश्च ज्ञात एव। प्राचीनशब्दस्य तद्वाचिनः श्रुतत्वात्। नाप्ययमनुवादः। यच्छब्दोत्तरकिंचिच्छब्दो हि वीप्सार्थे वर्तते। न चैकस्मिन्नेव प्राचीनशब्दार्थे वीप्सा संभवति। तस्मान्नानुवादो नाप्युत्सर्ष्टव्यार्थः। पदे वाक्ये च गम्यमानार्थत्वात्। तस्माद्गृहैकत्वादिवदविवक्षाकारणाभावाद्वीप्सावाची सन्नयमवश्यं विवक्षितार्थः। पदार्थपरत्वे च प्राचीनशब्दस्य तेषां बहुत्वात्किंचिदिति शब्दार्थोऽनुगृहीतो भवति। भागधर्मत्वे तु तस्यैकत्वात्किंचिच्छब्दार्थो वीप्सा बाध्येत। अतः किंचिच्छब्दस्य मुख्यत्वात्तदबाधाय तदनुसारेण जघन्यस्य प्राचीनशब्दस्य वर्णनात्प्राचीनशब्दः प्राग्देशावच्छिन्नपदार्थानेवामुख्यवृत्त्याऽभिदधाति। एतेनाकृतिन्यायोऽपि परास्तः। तस्माद्यत्किंचिच्छब्दस्य प्रकृतविशेषवाचित्वम्। तदिदमुक्तं यत्किंचिच्छब्दस्य प्रकृतविशेषवाचित्वेनेति। देशसंबद्धमुपांशुत्वं तेषां पदार्थानामेव धर्मः स्यात्। न तु यज्ञावयवस्य। कुतः? प्राचीनाग्नीषोमीयशब्दयोः सेबन्धस्य श्रुतिनिर्देशात्। शब्दश्रवणादेव प्रतीयमानत्वात्। प्राचीनमग्नीषोमीयादिति हि श्रूयते। न हि यज्ञस्य यत्प्राचीनमित्येवंविधं वाक्यं श्रूयते। अथवा अग्नीषोमीयादिति पदार्थः श्रुतः। स चोदितः प्राग्भाविनः पदार्थान् स्वसंबद्धानुपस्थापयति। न यज्ञभागमित्यभिप्रेत्य श्रुतिनिर्देशादित्युक्तम्। श्रुतिनिर्देशादग्नीषोमीयस्येत्यर्थः। पदार्थानामुपांशुत्वं प्रति प्रयोजकत्वे निष्प्रयोजनपदार्थप्रयुक्तमुपांशुत्वं व्यर्थं स्यादत आह॥ तस्य च तत्र भावादिति॥ तस्यावांतरापूर्वस्य प्रयोजनस्य तत्र सन्निपातिषु सोमप्रवहणीयसूक्तादिद्वारारादुपकारेषु च प्रायणीयाप्रयाजादिषु भावात्। न ह्यात्मसमवेतादृष्टमेवापूर्वशब्दः। अपि तु व्रीह्यादिसमवेतः संस्कारोऽप्यपूर्वशब्दः। तस्मात्सन्निपात्यारादुपकारकं चोपांशुताप्रयोजकम्। तदुक्तं–

"संस्कारोऽपि ह्यदृष्टत्वादपूर्वमिति गीयते।
प्रयाजापूर्ववत्तस्मादुभयं स्यात्प्रयोजकम्॥" इति।

यावत्या वाचा कामयीतेति। नवमस्य द्वितीयाधिकरणद्वितीयवर्णके विचारितम्। संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात्। ज्योतिष्टोमे श्रूयते-यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात् मंद्रं प्रायणीयायां मंद्रतरमातिथ्यायां उपांशूपसत्सु उच्चैरग्नीषोमीय इति श्रुतेर्वाङ्नियमाख्यः संस्कारो ज्योतिष्टामापूर्वप्रयुक्तो वा दीक्षणीयाजन्यफलभोक्तृत्वयोग्यता रूपयजमानसंस्काररूपदीक्षणीयापूर्वप्रयुक्तो वेति संशये पूर्वः पक्षः – अवश्यं ह्यत्र दीक्षणीयाशब्देनापूर्वसाधनत्वं लक्षयितव्यम्। श्रुत्यर्थे आनर्थक्यापत्तेः। तत्र किमिति फलवत्परमापूर्वलक्षणया तादर्थ्ये संभवति निष्फलावांतरापूर्वार्थत्वमाश्रीयते। तस्माद्दीक्षणीया

प्राकृते पदार्थेऽप्यूहितव्यमुताग्नीषोमीयात् पशोर्ये प्राचीनाः पदार्था दीक्षणीयादयस्तेषां धर्मस्तदवांतरापूर्वप्रयुक्तं ततश्चाप्राकृते पदार्थे यूपावटस्तरणबर्हिर्धर्मवन्नोहितव्यम्। पूर्वपक्षस्तु – यज्ञशब्दो व्यवहितेनापि प्राचीनशब्देन संबध्यते। प्रवृत्तिविशेषकरत्वात्। न तु संनिहितेनापि शरशब्देन। तथात्वेऽर्थवादत्वेन प्रवृत्तिविशेषकरो न स्यात्। तस्माद्यज्ञस्य ज्योतिष्टोमस्य यत्प्राचीनं प्राग्भागस्तदुपांश्विति संबंधः। यज्ञस्येत्यवयवव्यतिरेकजनिता षष्ठी। तेन प्राचीनशब्देन यज्ञावयवोऽभिधीयते न पदार्थः। यद्यपि प्राचीनशब्दः पदार्थान् शक्नोति विविक्षितुम्। तथापि न। श्रुत्या हि भागवचन एव प्रतीयते। तथाहि – अक्षरोच्चारणमात्रेणैव प्राग्भागमाह। पदार्थांस्तु लक्षणया। न हि प्राचीनशब्दः पदार्थान् स्वरूपेण वक्ति। किंतु प्राग्देशविशेषितान्। अतश्चाकृतिन्यायेन देशे श्रुतिः पदार्थेषु लक्षणा। अस्तु वा शराशब्दस्यार्थवादस्य शेषो यज्ञशब्दः। तथापि नोपांशुतायाः पदार्थधर्मतासिद्धिः। ननु कथं नासिद्धिः? प्राचीनशब्दोऽग्नीषोमीयेण विशेष्यते। अतस्तस्यानवयवित्वा दवधिमात्रत्वेनावस्थानात् प्राचीनशब्देन नावयवोऽभिधीयते। अग्निषोमीयात् प्रथमे पदार्था एव तु अभिधीयेरन्। मैवम्। प्राचीनशब्दोऽग्नीषोमीयेण न विशेष्यते। ननु यद्यग्नीषोभीयशब्देन प्राचीनशब्दो न विशेष्यते कस्य तर्हि प्राग्भागः? सर्वथा हि येन केन चिद्विशेषयितव्यः। सापेक्षत्वात्। सत्यं विशेषयितव्यः। किंतु प्रकरणलब्धविपरिवर्तिकज्योतिष्टोमेनैव। तस्माद्यज्ञशब्दस्य शरशब्दशेषत्वेपि न प्राचीनशब्दस्याग्नीषोमीयशब्देन संबंधसिद्धिः। किंच यज्ञशब्दस्य शराशब्दसंबंधादप्युपांशुतायाः परमापूर्वप्रयुक्तत्वसिद्धिः। तथा हि। येयमुपांशुत्वानुष्ठितिरेषा शराशब्दाच्छ्रुगतिर्यथा शकुनिं जिघृक्षतः प्रच्छन्ना गतिर्भवति शनैः पदन्यासो दृष्टिप्रणिधानमशब्दकरणं चेति तत्सर्वं शकुनिग्रहणाय। तथैवानुष्ठातुरुपांशुत्वानुष्ठानं च्छ्रुगतिरूपमनुष्ठानसाध्याय यज्ञसाध्यत्वाद्यज्ञशब्दप्रतिपाद्याय परमापूर्वायेति। तस्मादुपांशुतायाः परमापूर्वप्रयुक्तत्वेन विकृतौ कुंडपायिनामयनेऽप्यग्नीषोमीयपशोः प्राचीनेषूपांशुत्वस्योह इति।

सिद्धांतस्तु। पदार्थापूर्वप्रयुक्तमुपांशुत्वं यद्यनर्थकं भवति ततोऽर्थवत्त्वाय व्यवहितकल्पना स्यात्। यज्ञस्येत्यश्रुतो वा कल्प्येत। इह त्वध्याहारव्यवहितकल्पनाभ्यामृतेपि यथा श्रुत एव वाक्ये घटमाने किमर्थं व्यवहितकल्पनाऽध्याहारो वाऽश्रीयते? अपि च प्राचीनशब्दे यज्ञशब्देन विशेष्यमाणेऽपि यद्यग्नीषोमीयपदमविवक्षितं स्यात्तथा सति साकांक्षत्वाद्वाक्यमेव न घटते। कतरस्मात्पदार्थात्प्रागिति सापेक्षत्वात्प्राक्शब्दस्य। तस्मादग्नीषोमीयशब्दोऽवश्यं विवक्षणीयो भवति। तेन सुदूरमपि गत्वा प्राचीनशब्दस्याग्नीषोमीयशब्देन संबंध एषितव्यः। तद्धरमादावेव प्राचीनशब्देनाग्नीषोमीयशब्दः संबंधनीयः। किंच यज्ञस्य यत्प्राचीनमित्यन्वये

होमेष्ववतिष्ठत इति युक्तमुदाहरणम्। गार्हपत्ये पत्नीसं याजान्यजतीत्यत्र तु न कश्चित्क्षुद्रोपद्रवः। तत्र पत्नीसंयाजशब्दो यागविशेषमेव ब्रूते श्रुत्या। यदाहवनीये जुहोतीत्यत्र यागसामान्यमेव श्रुत्या न विशेषः कथं न पुनरत्र बाधो यावता द्वयोरपि शास्त्रयोः प्रत्यक्षत्वाज्जुहोतिशब्दविशेषात्तु पत्नीसंयाजेष्वपि विहित एवाहवनीयः। मैवम्। जुहोतिशब्दादाकृतिन्यायेन पत्नीसंयाजस्य लक्षणयोपस्थितिर्विलंबेन, पत्नीसंयाजशब्दात्तदुपस्थितिः शीघ्रेत्येवं वैधर्म्येण बाधसंभवात्। तस्मान्न पदाहवनीययोः समुच्चयः। अपि वाऽहवनीयः पदनिरपेक्षः सप्तम्या आधारत्वेन प्रतिपाद्यते।। पदमप्याहवनीयनिरपेक्षम्। तस्मादप्यसमुच्चयः। तद्यथा व्रीहिभिरिति व्रीहीन् करणविभक्तिर्यवनिरपेक्षानेव प्रतिपादयति यागसाधनत्वेन तथा यवैरिति। तथा च तद्वदेवासमुच्चयः। ननु तत्राशक्यत्वादसमुच्चयो न निरपेक्षश्रवणादिति चेन्न। तत्र यः समुच्चयं कुर्यान्नासौ पुरोडाशं न निवर्तयति। शक्येते हि मिश्रैरपि पुरोडाशोऽभिनिर्वर्तयितुम्। किंतु वाक्येन योऽनयोः प्रतिपाद्यते नैरपेक्ष्यरूपः संबंधस्तं बाधते। तेन शब्दादेव तत्र विकल्पो, न वस्त्वसंभवात्। अपि च वस्तुस्वभावोऽपीहैव शक्यते वक्तुम्। तत्र व्रीहियवाभ्यामपि पुरोडाशो निवर्तत एव न तु प्रत्यक्षविरोधः। पदाहवनीययोस्तु समुच्चये सत्याहवनीयः पदे वा निक्षिप्यते। आहवनीये वा पदं। तत्र यदाऽऽहवनीयः पदे निक्षिप्तो होमाधिकरणं भवति तदाऽऽहवनीयेन पदस्य व्यवधानान्न पदमधिकरणं स्यात्। एवमन्यत्रापि। तस्मान्न शब्दतो वस्तुकृतः पदाहवनीययोः समुच्चयः। किं तु बाध एवेति। तदिदमुक्तं – पदे जुहोतीत्यस्य विशेष विषयत्वादिति। अविशेषेण यच्छास्त्रं तत्संदिग्धं विशेषेविलंबितं विशेषशिष्टं त्वाराच्छीघ्रमेव विशेषे प्रवर्तते तस्मात्सामान्यस्य विशेषशास्त्रं बाधकमिति सूत्रार्थः।

ननु सामान्यविशेषन्यायस्य निश्चितप्रामाण्योभयविषयत्वम्। अन्यथाऽयं गौरश्व इत्यादेरपि गौरश्वो न भवतीत्यादितः प्राबल्यं भवेदिति चेत्। मैवम्। उत्सर्गतः प्राप्तस्वतःप्रामाण्यस्य प्रत्यक्षे निश्चयाभावे बीजाभावात्। फलपर्यंतपरीक्षायाः सत्त्वाच्च।। यत्किंचित्प्राचीनमिति।। अग्नीषोमीयपशोः पूर्वकालं यत्किंचिदनुष्ठीयते तत्रोपांशु मंदस्वरः कर्तव्य इति श्रुत्यर्थः।। तथा वृत्त्यंतरेणेति।। तत्त्वमसीत्यादौ वृत्त्यंतरेण लक्षणया, ब्रह्मैव सन् ब्रह्माप्येतीत्यादौ ब्रह्मशब्दस्यानेकार्थत्वेन, सर्व एकीभवंतीत्यादौ स्थानैक्यादिविषयांतरपरत्वेनेत्यादि बोध्यम्। न्यायस्त्वित्थम्। नवमस्य प्रथमपादे चिंतितं – देशबद्धमुपांशुत्वं तेषां स्यात् श्रुतिनिर्देशात् तस्य च तत्र भावात्। ज्योतिष्टोमे श्रूयते – 'शरा वा एष यज्ञस्य तस्माद्यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरति' इति। तत्र संशयः। किमिदमुपांशुत्वं ज्योतिष्टोमस्य यः प्राग्भागस्तद्धर्मः सत् परमापूर्वप्रयुक्तं ततश्च विकृतिषु तद्भागारंभके

तथाप्युपधानरूपसृष्टिपदार्थविधानार्थं विधिप्रत्ययस्तावदवश्यं प्रयोक्तव्यः। स च धातुं विना न केवलं साधुप्रयोग इति यस्य कस्यचिद्धातोः प्रयोक्तव्यत्वे बुद्धिसन्निहित उपदधातिरेव प्रयुज्यते। सृष्टिशब्दोपता मंत्रा यासामिष्टकानामुपधाने वर्तंते इत्येव सृष्टिपदार्थे इष्टकाविशेषणत्वेनोपस्थितस्योपधानविशेषस्य विधिसंबंधे क्लिष्टत्वाच्चेति वयं पश्यामः। केचित्त्वयं मंत्रविधिरिति समर्थयंते। न ह्येकया स्तुवत इत्यादीनामुपधानमेकांतिकं लिंगमस्ति येन प्राप्तिः स्यात्। इष्टकालिंगस्य स्त्रीलिंगशब्दप्रयोगादेः साधारणत्वेन ग्रहणासादनादिष्वपीष्टकानां प्राप्नुयुः। तथासत्यस्ति विधेरवकाशः। सत्यामप्युपधाने प्राप्तौ मध्यमचिति संबंधार्थमपि प्रत्यक्षविधानमर्थवद्भविष्यति। यां काचिद्ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चिति निदध्यादिति वचनात्। लिंगसमवायात्। चयने श्रूयते – प्राणभृत उपदधातीति। अत्रापि सृष्टिन्यायेन मंत्रविधिरिति पूर्वःपक्षः। लिंगप्रकरणप्राप्तमंत्रानुवादेनेष्टकोपाधानविधिरिति सिद्धांतः। एतस्यैव प्राणान् दधातीत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मंत्रानुवादः। पूर्वत्र द्वितीयादिमंत्रेषु सृष्टिलिंगानां बाहुल्यं । इह तु प्रथममंत्र एव प्राणभृल्लिंगमाम्नायते। अयं पुरोभौवनस्तस्य प्राणो वां यत इति एकस्यैव मंत्रस्य प्राणभृत्त्वेपि तत्सहचरिताः सर्व एव मंत्राः छत्रिन्यायेन प्राणभृच्छब्देन लक्ष्यंते। प्राण भृदप्राणभृद्गणेपि प्राणभृच्छब्दसमवायोऽस्तीति सर्वेषु तदनुवाकगतमंत्रेषु प्राणभृच्छब्दो गौणः। तत्सिद्ध्यादिभिर्हेतुंभिर्यजमानादिशब्दा गौणाश्रयाः गुणवृत्तय इति समग्रः सूत्रार्थः। तदुक्तं

"तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमभिः।
षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिते" ति।

विशेषस्तु टुपूटीकादौ द्रष्टव्यः। अनेकप्रमेयसंग्रहरूपत्वात्पेटिकाशब्दः।

अनन्यपरत्वादिति। अद्वैते तात्पर्यलिंगानां सत्त्वेनाद्वैततात्पर्यकत्वादन्यत्र तात्पर्यलिंगाभावेनान्यत्र तात्पर्याभाव इत्यर्थः। अत्रवदंति "प्रमाणांतरसंवादार्थ क्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेव तद्विरुद्धग्राहिणो "धूम एवाग्नेर्दिवा ददृशे", "अदितिर्द्यौः", "यजमानः प्रस्तर" इत्यादेः तद्विरोधेना मुख्यार्थत्वेऽप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन मुख्यार्थत्वोपपत्तेः। प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च नाद्वैतागमेन बाध्यते। बाध्यते तु तात्विकं प्रामाण्यम्। तत्तु परीक्षया न सिद्धमेवातो न विरोधः। धूम एवाग्नेरित्यादेस्तु मुख्यार्थत्वेन प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत। अतो विरोधात्तत्रामुख्यार्थत्वमिति विवेकः। यत्तु प्रत्यक्षाविरोधाय तत्त्वंपदलक्षणा नाऽश्रीयेतेति। तन्न। षड्विधलिंगैर्गतिसामान्येन वाऽखंएवावधार्यमाणस्य

तु प्रशंसेति चेदत्र ब्रूमः। अजादिषु प्रवृत्तावपशुशब्दस्य तदवयवभूतेन पशुशब्देन निषेध्यमर्पयता सन्निहितगवाश्वगतप्रशंसाया उपादानादपशुशब्दः प्रशंसानिमित्त इत्युच्यते। एतेनापशुशब्दोऽजादिषु प्रवर्तते। गवाश्वौ च स्तौतीति व्यधिकरणमिति परास्तम्। तत्सिद्ध्यादिषु शब्दप्रवृत्तिस्तुत्योः प्रस्तरादिनिष्ठत्वेपि प्रकृते भिन्नरूपत्वात्। अजादिष्वप्रशंसया प्रवर्तमानस्यापशुशब्दस्यार्थविशेष करणत्वाभावाच्च। न च रजतनिंदया हिरण्यस्तुतिवदजादिनिंदया गवाश्वयोः स्तुतिः स्यादिति वाच्यम्। अपशुशब्दात्स्पष्टं निंदाया अप्रतीतेः। तस्मात्प्रशंसैव सूत्रणीयेति प्रशंसानिमित्तोऽयमर्थवादः।

अयज्ञो वा एष यदसामा अयज्ञो वा एतद्यदछंदोममित्यादिष्वयमेव न्यायः। छंदोमशब्देन चतुर्विंशः चतुश्चत्वारिंशाष्टचत्वारिंश इत्येते त्रयः स्तोमा उच्यंते। अक्षरसंख्यासाम्येन गायत्री-त्रिष्टुब्जगतीछंदोभिर्गीयमानत्वात्। भूमा अग्निचयने श्रूयते। सृष्टीरुपदधातीति सृष्टिशब्दोपेता मंत्रा यासामिष्टकानामुपधाने विद्यंते ता इष्टकाः सृष्टय इत्युच्यंते। सृष्टिमानासामुपधानो मंत्र इति विगृह्य "तद्धा नासामुपधानो मंत्र इतीष्टकासु लुक् मतोः" इति व्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात् सृष्टिशब्दोपेताश्चोपधानमंत्रा "एकया सूवत" इत्यस्मिन्ननुवाक समाम्नाताः ब्रह्मासृज्यत भूतान्यसृज्यंतेत्यादिना सृजति धातोस्तेषु प्रयुक्तत्वात्। ते मंत्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयंते उत सृष्टिशब्दोऽनुवादरूपोऽर्थवादो वेति संशये मंत्ररूपगुणविधिरिति पूर्वः पक्षः। कुतः ? उपदधातीत्यनेनाख्यातेनाभिसंबंधात्। न चार्थवादत्वमस्य संभवति। विध्यंतरेण सहैकवाक्यत्वाभावादिति प्राप्तेऽभिधीयते। लिंगप्रकरणाभ्यामेव मंत्राणां प्राप्तत्वान्न विधिः संभवति। तथा सति परिसंख्या स्यात्। बहुषु मंत्रेषु प्रकरणप्राप्तेषु सृष्टिविधानादन्ये परिसंख्यायेरन्। सा च त्रिदोषा। परिसंख्यातानां च मंत्रांतराणामानर्थक्यं स्यात्। तस्मान्न ते मंत्रा अत्र विधीयंते। किंतु तान् मंत्राननूद्येष्टकोपधानं विधीयते। सृष्टिशब्देनानुवादस्तु वक्ष्यमाणार्थवादोपपत्त्यर्थः। यथा सृष्टमेवावरुंध इति वक्ष्यमाणोऽर्थवादः। यदि विधिवाक्ये मंत्राणामनुवादकः सृष्टिशब्दो न स्यात्तदानीमर्थवादे सृष्टिशब्दप्रयोगाद्विध्यर्थवादयोर्वैयधिकरण्यभ्रमः स्यात्। तस्मान्मंत्रानुवादी सृष्टिशब्दो न गुणविधायकः। किं त्वर्थवादः। ननु प्रथममंत्रे सृजतिशब्दो न प्रयुक्तः, किंतु दधातिधातुः। एकया स्तुवते, प्रजा अधीयंतेति तत्पाठात् बाढम्। तथापि द्वितीयादिषु बहुषु मंत्रेषु सृजतिधातुप्रयोगाद्भ्रूम्रा गुणेन सृष्ट्यसृष्टिसमुदाये सृष्टिशब्दो गौणः प्रवर्तत इति भाष्याभिप्रेतः पक्षः। एवं च "तद्धानासामुपधानो" इत्यादिव्याकरणसूत्रमप्यनुसृतं भवति। यद्यपि व्याकरणसूत्रानुसारेण सृष्टिशब्दार्थांतर्गतत्वादुपधानमपि न पृथग्विधेयम्।

जातिः।। अग्निर्वै ब्राह्मण इति वार्तिककारस्योदाहरणम्। आग्नेयो वै ब्राह्मणः ऐंद्रो राजन्यो वैश्यो वैश्वदेव इत्युदाहरणम्। अत्रापि पूर्ववन्नामधेयत्वगुणविधित्वार्थवादत्वसंदेहे अर्थवादत्वसिद्धांतः। निमित्तांतरकथानाय पृथगुक्तिः। अग्निसंबंधो मुखजन्यत्वगुणो ब्राह्मणे वर्तते। श्रूयते चाग्निब्राह्मणयोर्मुखजन्यत्वं कस्मिंश्चिदर्थबादे। प्रजापतिरकामयत। प्रजाः सृजेयेति। स मुखतः त्रिवृतं निरमिमीतअग्निर्देवता अन्वसृज्यत गायत्रीछंदो रथंतरं साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्याः मुखतो ह्यसृजंतेति। तस्मादाग्नेयशब्दः स्तावकः। एवमैंद्रो राजन्यो वैश्यो वैश्वदेव इत्यादिषु द्रष्टव्यम्। सारूप्यात्। आदित्यो यूपो यजमानो यूपः। अत्रापि त एव पक्षाः। सारूप्यं त्वत्र प्रवृत्तिनिमित्तम्। तच्च तेजस्वित्वादि। ननु सर्वत्र सारूप्यं गौणत्वनिमित्तम्। कोऽत्र विशेषः? इह चक्षुर्ग्राह्यसारूप्यं विवक्षितम्। प्रशंसा– प्रशंसाऽप्यपरं शब्दस्य गौणत्वे निमित्तम्। तथा हि। अपशवो वा अन्ये गो अश्वेभ्यः पशवो गोअश्वा इत्यत्र अजादिषु श्रूयमाणं यदपशुत्वं तस्यार्थवादत्वं न संभवति। पशुत्वनिषेधमात्रेण स्तुतेरसंभवात्। नामधेयत्वं त्वनाशंक्यमिति गुणविधित्वेन पूर्वःपक्षः। पशुकार्ये गवाश्वव्यतिरिक्तानामजादीनां प्रतिषेधप्रतीतेरिति। सिद्धांतस्तु – तत्र तत्राजादीनां विहितत्वादशक्यः पशुकार्येऽजादीनां प्रतिषेधः। पशुव्यतिरिक्तघटादिवचनस्य परशब्दस्यापशुशब्दस्य परत्राजादिषु गवाश्वगतप्रशंसानिमित्तः प्रयोगः। तस्मादर्थवादः। ननु सर्व एव प्रशंसानिमित्तोऽर्थवादः। किमत्र विशेषेणोपन्यस्यते? सत्यम्। तत्सिद्ध्यादिना गुणेन प्रस्तरादिषु प्रवृत्तो यजमानादिशब्दः प्रस्तरादेः प्रशंसाफलो भवति। इह तु शब्दप्रवृत्तिनिमित्तमपि गुणः प्रशंसैव। तथाहि। अयमत्रार्थः। अपशवो वा अन्ये गोअश्वेभ्यः इत्यत्र नञ्समासगेन पशुशब्देन प्रथमं गवाश्वगतं प्राशस्त्यमुपादाय पश्चात्तदभावो नञा पश्वंतरेषु कथ्यते। न हि पशुत्वं शक्यं प्रतिषेद्धुम्। अवश्यं च पशुशब्दोपात्तोऽर्थो नञा पश्वंतरेषु प्रतिषेद्धव्यः। शक्नोति चायं पशुशब्दो गवाश्वाभ्यामेकवाक्यतया संबद्धस्तद्गतं प्राशस्त्यं लक्षयितुम् तच्च नञा पर्युदसिष्यते। एतदुक्तं भवति। गवाश्वेषु यत्प्राशस्त्यं न तदन्येष्वस्ति। तस्मादप्रशस्तास्ते। गवाश्वमेव प्रशस्तम्। सोयं गवाश्वगतप्राशस्त्याभावः पश्वंतराणामपशूनां तुल्य इत्यनेनाभिप्रायेण पश्वंतराण्यपशव इत्युच्यंते। द्विप्रकारा हि प्रशंसा। वस्तुनि विद्यमानगुणोत्कर्ष एकः प्रकारः। स्तावकेन शब्देन संपादितो गुणोत्कर्षोऽपरः प्रकारः। गवाश्वयोरजादिभ्य उत्कर्षो लोकसिद्धो यः सोऽत्र निमित्तम्? अजादयः स्वभावतः पशवोऽपि संतो गवाश्वौ प्रत्यपशवः संपन्नाः, ईदृशो गवाश्वयोर्महिमेति स्तुतिः फलम्। नन्वपशुशब्दस्याजादिषु प्रवृत्तौ कथं गवाश्वगतं प्राशस्त्यं निमित्तम्? व्यधिकरणत्वात्। अजादिगतप्रशंसाभावस्तु निमित्तं स्यात्समानाधिकरणत्वात्। अतोऽप्रशंसैव सूत्रणीया न

अतो वैदिकशब्देषु न गौणीवृत्तिरिष्यते॥
अत्रोच्यते न सिंहत्वबुद्धिर्नरि कदाचन।
विलक्षणाकृतित्वेन विशेषस्यैव दर्शनात्॥
सादृश्येऽप्यत्र नारोपः स्पष्टभेदप्रतीतितः॥
किं तु स्वार्थाविनाभूतशौर्यादिगुणयोगतः।
पुंभिः प्रयुज्यमानस्य सिंहशब्दस्य गौणता।
अतो वेदेपि गौणत्वं संभवेद्गुणयोगतः॥

कथं तर्हि खपुष्पशशविषाणादिशब्दानां गौणत्वं "खपुष्पं भवत्सिद्धांतः" इत्यादौ। न हि तेषां मुख्यमभिधेयमस्ति, येन तत्सादृश्याद्गौणत्वं स्यात्। उच्यते।

"मुख्यमर्थं वदंत्येव शशशृंगादिका गिरः।
असद्विशेषं तत्रापि विशेषोऽस्तीति वक्ष्यते॥"

असत्यप्यसत्वाविरोधी विशेषोऽस्तीत्यनिर्वाच्यसाधकख्याति बाधान्यथानुपपत्तिभंगे ग्रंथकार एव वक्ष्यति। तस्माद्वेदेपि गौण्याः संभवाद्यजमानः प्रस्तरः, यजमान एक कपाल इत्यादिषु विचार्यते। नामधेयं वा गुणविधिर्वाऽर्थवादो वेति संदेहे सामानाधिकरण्यादेकमितरस्य नामधेयं प्रस्तरशब्दो वा यजमानस्य यजमानशब्दो वा प्रस्तरस्येति पक्षो भिन्नार्थत्वेन प्रसिद्धात्वान्नैकमितरस्य नामधेयं भवितुमर्हतीति निरस्तः। नापि तृतीयः। अर्थांतरवचनेनार्थांतरवचनस्य स्तुत्यसंभवात्। अष्टाकपालादिभिस्त्ववयवद्वारेण स्तुतिरुक्ता द्वादशकपालस्य। न च प्रस्तरावयववचनो यजमानशब्दः। येन स्तुतिः स्यात्। तस्मादन्यतरकार्येन्यतरविधानं गुणविधिः। तत्रापि यजमानस्य मुख्यत्वात् श्रुतिवृत्तो यजमानः प्रस्तरशब्दलक्षिते स्रुग्धाराणादौ प्रस्तरकार्ये विधीयते। तस्माद्गुणविधिरिति प्राप्तेऽभिधीयते। यजमानस्य स्रुग्धारणे विनियुक्तस्य स्वपदार्थकरणविरोधात्प्रस्तरवच्च सूक्तवाकेन प्रस्तरं प्रहरतीति प्रहरणापत्तेरेककपालवच्च सर्वहुतकरणात्सर्वतंत्रपरिलोपः स्यात्। तस्मादर्थबादः। कथं परशब्देन परस्य स्तवनं सामानाधिकरण्यं वा? गुणादिति ब्रूमः। कथमगुणवचनो गुणमभिदध्यात्? नाभिदधाति, किंत्वर्थसंबंधेन बोधयति। यजमानशब्दो हि स्वार्थमभिधत्ते। स चाभिहितः स्वसमवेतं स्वकार्यपरत्वं संबंधाद्बोधयति। तच्च प्रस्तरेऽप्यस्तीति प्रस्तरविबोधः। एवं स्वार्थसदृशे तद्गुणशालिनि तात्पर्यं भजमानः शब्दो गौणः संपद्यते। यथा लोके सिंहो देवदत्त इति। तस्य यजमानस्य कार्यसिद्धिः यजमानकार्यकरत्वं स्रुग्धारणादि यजमानशब्दस्य प्रस्तरे प्रवृत्तौ निमित्तं गुणः।

सारेण प्रयोजकव्यापारलक्षणाया अङ्गीकरणात्। तस्माद्विधौ तात्पर्यवति वाक्ये प्रतीयमानवाक्यार्थातिरिक्तोऽन्यः शेषी नास्तीत्येवंपरमेव तद्वचनम्। अतः सिद्धमद्वैतागमस्य लाक्षणिकत्वेऽपि मुख्यार्थत्वात् प्रत्यक्षबाधकत्वमिति शिवम्। ॥ इति प्रत्यक्षस्यागमबाध्यत्वम्॥

न्यायामृततरङ्गिणी

तस्माद्धूम एवेति। अर्थवादाधिकरणे ''शास्त्रदृष्टविरोधाच्च'' इति पूर्वपक्षसूत्रेण 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इत्यादीनां दृष्टविरोधादप्रामाण्यमाशंक्य ''गुणवादस्तु'' इति सिद्धांतसूत्रेण गुणवादमभ्युपेत्य प्रामाण्यमुक्तम्। तथा हि ''सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः'' इति मिश्रलिंगमंत्रविधिशेषो धूम एवाग्नेर्ददृशे इत्यादिरर्थवादः। दिवा अग्निरादित्यमनुप्रविशति रात्रावादित्येऽस्तमित्येतमर्थमुपपादयन्विधेयमर्थं स्तौति। धूम एवेत्यवधारणं तु दूरभूयस्त्वात्। दूरस्थैर्हि दिवा च धूम एव भूयान्दृश्यते नार्चिः। रात्रौ चार्चिर्भूयो दृश्यते न धूमः। अतो न दृष्टविरोधादप्रामाण्यमिति। अदितिर्द्यौरित्यादिमंत्रस्य चेति। मंत्राधिकरणे ''अर्थविप्रतिषेधात्'' इत्यादि सूत्रेणार्थविरोधाद्विरुद्धार्थकत्वात् ''अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः'', ''एक एव रुद्रो न द्वितीयाय तस्थे'', ''सहस्रशो ये रुद्रा अधिभूम्याम्'' इत्यादेरप्रामाण्यमाशंक्य ''गुणादविप्रतिषेधः स्यात्'' इति सिद्धांतसूत्रेण मातृत्वादिगुणैरदितिः स्यूयते तस्मादविरुद्धमित्यादिना गौणार्थत्वमेवांगीकृतम्। तदेतत्सर्वं शब्दस्य प्रत्यक्षबाधकत्वे विरुध्येत। मुख्यार्थपरत्वमेव स्यादित्यर्थः।

तत्सिद्धिरित्यादीति। प्रथमस्य चतुर्थेपादे विचारितं – तत्सिद्धिजातिसारूप्य प्रशंसाभूमलिंगसमवायाः। वैदिकशब्देषु क्वचिद्गौणीवृत्तिरस्तीति प्रतिपादयितुं गौण्या लक्षणं तावद्विचार्यते। ''गौणत्वमेकदेशे किं वृत्तिः संघातवाचिनः। किमध्यारोपितार्थत्वं वृत्तिर्वा गुणयोगतः॥ नाद्यः शौर्यादिरहिते सिंहे नो सिंहगीरियम्। मुख्यवृत्तिं प्रपद्येताशतार्थे शतशब्दवत्॥ अतः सिंहत्वमारोप्य देवदत्ते प्रयुज्यते। सिंहशब्दोऽन्यथा न स्यात्तद्बोधः सिंहशब्दतः॥ शौर्यादिगुणयोगस्य सिंहत्वारोपकारणम्।

न चैवं मुख्यतापत्तिर्वाच्यस्यावास्तवत्वतः॥
वेदेऽध्यारोपकाभावान्नाध्यारोपस्तु संभवी।

जहल्लक्षणाभ्युपगमस्योभयत्र तुल्यत्वात्, शक्यार्थपरित्यागेऽपि विधितात्पर्यनिर्वाहात् नामुख्यार्थत्वम्। नहि वाक्यार्थप्रतीत्यन्यथानुपपत्त्या पदमात्रे लक्षणायामपि वाक्यस्यामुख्यार्थत्वम्। प्रतीतस्यार्थस्यानन्यशेषत्वेन मुख्यत्वात्। यत्र पुनः प्रतीत एव वाक्यार्थोऽन्यशेषत्वेन कल्प्यते, तत्र वाक्यस्यामुख्यार्थत्वमेव। अन्यद्धि पदतात्पर्यमन्यच्च वाक्यतात्पर्यम्। 'सैन्धवमानय' 'गङ्गायां वसन्ति' इत्यादौ वाक्यतात्पर्यैक्येऽपि पदतात्पर्यभेदात्। 'विषं भुङ्क्ष्व' इत्यादौ पदतात्पर्याभेदेऽपि वाक्यतात्पर्यभेदात्। अत एव 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिवाक्यार्थस्यावश्यं क्रेतव्येति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वात्, 'सोऽरोदीत्' इत्यादि वाक्यार्थस्य च 'बर्हिषि रजतं न देयं हिरण्यं दक्षिणा' इति विधिशेषत्वेन रजतनिन्दाद्वारा तत्प्राशस्त्यलक्षकत्वात्। 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति वाक्यार्थस्य 'शान्तउपासीत' इति शमविधिशेषत्वेनात्यनायाससिद्धत्वरूपतत्प्राशस्त्यलक्षकत्वादमुख्यत्वमेव। अतएव मानान्तर विरोध एव लक्षणेत्यपास्तम्। 'इयं गौः क्रय्या बहुक्षीरा' इत्यादिना प्राशस्त्यलक्षणायां व्यभिचारात्। किं तु परमतात्पर्यविषयीभूतार्थप्रतीतिनिर्वाहायैव सर्वार्थवादेषु लक्षणा। एतावांस्तु विशेषः– विधिप्राशस्त्ये लक्षणातः प्रागर्थवादवाक्यार्थज्ञानम्। तस्य प्रमाणान्तरविरोधे बाध एव, यथा 'प्रजापतिरात्मनो वपामुदखिदत्' इत्यादौ। अतएव तत्र गुणवादमात्रम्। प्रमाणान्तरप्राप्तौ त्वनुवादमात्रम् 'अग्निर्हिमस्य भेषजं' इत्यादौ। अतएव तदुभयत्राबाधिताज्ञातज्ञापकत्वरूपप्रामाण्यशरीरानिर्वाहादप्रामाण्यम्। यत्र पुनः प्रमाणान्तरप्राप्तिविरोधौ न स्तस्तत्र प्रामाण्यशरीरनिर्वाहाद् भूतार्थवादत्वम् – यथा 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादौ अयमेव देवताधिकरणन्यायः। ननु तर्हि 'आदित्यो यूपः' इत्यादौ वाक्यार्थप्रतीत्यर्थमेव लक्षणाङ्गीकारादमुख्यार्थत्वं न स्यात्। न स्याद्यद्यादित्यसदृशो यूप इति वाक्यार्थपर्यवसानं स्यात्। किं तु गुणवृत्त्या प्रतीतस्यापि वाक्यार्थस्य यूपे पशुं बध्नातीति विधिशेषत्वेन तत्प्राशस्त्यलक्षकत्वमस्त्येव, तेनैवामुख्यत्वम्, न त्वादित्यपदगौणतयेति तत्सिद्धिपेटिकायां सर्वोदाहरणेष्वप्यवान्तरवाक्यार्थप्रतीतये गुणवृत्तिप्रकाराः प्रदर्शिता इति द्रष्टव्यम्। कर्मप्राशस्त्यलक्षणा तु सर्वार्थवादसाधारणी तत्रास्त्येवेति नामुख्यार्थत्वानुपपत्तिः। अत उपपन्नं प्रस्तरादिवाक्यवैषम्यम् अद्वैतवाक्यस्य। यच्चोक्तम् अर्थवादमुख्यार्थत्वाय विधौ न लक्षणेत्येवंपरं शबरस्वामिवचनमिति, तन्न। अश्वप्रतिग्रहेष्टौ 'प्रतिगृह्णीयात्' इति विधौ प्रतिग्राहयेदिति व्यवधारणकल्पनया अर्थवादानु

यत्तु – प्रत्यक्षाविरोधाय तत्त्वम्पदयोर्लक्षणा नाश्रीयेतेति तन्न। षड्विधलिङ्गैर्गतिसामान्येन चाखण्ड एवावधार्यमाणस्य तात्पर्यस्यानुपपत्तेर्जीविशगतसर्वज्ञत्वकिञ्चिज्ज्ञत्वादीना मैक्यान्वयानुपपत्तेश्च। तात्पर्यविषयीभूताखण्डप्रतीतिनिर्वाहाय लक्षणाङ्गीकरणस्यैवोचितत्वात्। तात्पर्यविषयीभूतान्वयनिर्वाहाय लक्षणाश्रयणस्य सर्वत्र दर्शनात्। न च एवं सति अमुख्यार्थत्वं स्यादिति वाच्यम्। तद्धि प्रतीयमानार्थपरित्यागेनार्थान्तरपरत्वं वा? अशक्यार्थत्वं वा? नाद्यः। सामानाधिकरण्येन प्रतीयमानस्यैक्यस्यात्यागात्। नान्त्यः, जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि 'सोऽयं देवदत्तः' इत्यादिवाक्य इव शक्यैकदेशस्यान्वयाभ्युपगमात्। विशेषणबाधेन विशेष्यमात्रान्वयस्यैवात्र लक्षणाशब्देन व्यपदेशात्। तथा चोक्तं वाचस्पतिमिश्रैः– 'प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैत वाक्यं त्वनन्यशेषत्वान्मुख्यार्थमेव। उक्तं हि शाबरभाष्ये – 'न विधौ परः शब्दार्थ' इति। यथा चापूर्वत्वाद्येकैकतात्पर्यलिङ्गेन 'यजमानः प्रस्तरः' इत्याद्यर्थवादवाक्यानां न स्वार्थपरत्वं तथा वक्ष्यामः। ननु अन्यशेषत्वानन्यशेषत्वे नामुख्यार्थत्वमुख्यार्थत्वयोः प्रयोजके। किं तु मानान्तरविरोधाविरोधौ। अन्यशेषेऽपि मानान्तराविरोधे 'इयं गौः क्रय्या बहुक्षीरा' इत्यादौ लोके, 'सोऽरोदीत्' इत्यादौ च वेदे प्रस्तरादिवाक्यवदमुख्यवृत्तेरनाश्रयणाद्। अनन्यशेषेऽपि 'सोमेन यजेत' इत्यादौ वैयधिकरण्येनान्वये विरुद्धत्रिकद्वयापत्त्या सामानाधिकरण्येनान्वये प्रत्यक्षाविरोधाय च सोमवता यागेनेति मत्वर्थलक्षणाया आश्रयणात्। एवं विचारविधायके 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे 'तद्विजिज्ञासस्व' इति श्रुतौ च मानान्तरविरोधेन विध्यन्वयाय जिज्ञासाशब्देन विचारलक्षणायाः 'सर्वं खल्विदं ब्रह्म' इत्यादौ चामुख्यार्थतायाः स्वीकृतत्वात्। सर्वस्यापि वाक्यस्यावाच्ये ब्रह्मणि लक्षणाया एवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च। अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारणत्वाच्च। शाबरं तु वचनमर्थवादमुख्यत्वाय विधौ न लक्षणेत्येवम्परम्। तस्मान्न प्रत्यक्षं शब्दबाध्यम् इति चेन्न। भावानवबोधात्। तात्पर्यविषयीभूतार्थबोधकत्वं हि मुख्यार्थत्वम्। न शक्यार्थमात्रबोधकत्वम्। अन्यार्थतात्पर्यकत्वाच्चमुख्यार्थत्वम्। न लाक्षणिकत्वमात्रम्। तथा चाद्वैतागमस्य स्वतात्पर्यविषयीभूतार्थबोधकत्वनिर्वाहाय लक्षणाश्रयणेऽपि मुख्यार्थत्वमुपपन्नमित्यवोचाम। एवं च 'सोमेन यजेत' इत्यादि विशिष्टविधेर्विशेषणे तात्पर्याभावान्मत्वर्थलक्षणायामपि स्वार्थापरित्यागाच्च नामुख्यार्थत्वम्। जिज्ञासापदे तु ज्ञाधातुनेष्यमाणज्ञानलक्षणाङ्गीकारानङ्गीकारमतभेदेऽपि सन्प्रत्ययस्य विचारे

अमुख्यार्थतायाश्च स्वीकृतत्वाच्च। सर्वस्यापि वाक्यस्या वाच्ये ब्रह्मणि लक्षणाया एवेष्टत्वेनामुख्यार्थत्वनिषेधायोगाच्च। अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारण्याच्च। शाबरवचनं तु अनुवादमुख्यार्थत्वाय विधौ लक्षणा न युक्तैवम्परम् तस्मान्न प्रत्यक्षं शब्दबाध्यम्। तदुक्तम्–

यजमानप्रस्तरत्वं यथानार्थः श्रुतेर्भवेत्।
ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषतः॥
इति प्रत्यक्षस्य शब्दबाध्यत्वे बाधकम्।

अद्वैतसिद्धिः

किं च परीक्षितप्रमाणभावशब्दबाध्यमपि प्रत्यक्षम्। ननु – प्रत्यक्षं यदि शब्दबाध्यं स्यात्तदा जैमिनिना 'तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्याद्यर्थवादस्य 'अदितिर्द्यौः' इत्यादिमन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते 'गुणवादस्तु', 'गुणादविप्रतिषेधः स्यात्' इत्यादिना गौणार्थता नोच्येत। 'तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवायाद्' – इति तत्सिद्धिपेटिकायां 'यजमानः प्रस्तर' इत्यादेर्गौणार्थता च नोच्येत। त्वयाऽपि प्रत्यक्षाविरोधाय तत्त्वम्पदयोर्लक्षणा नोच्येत। श्रुतिविरोधे प्रत्यक्षस्यैवाप्रामाण्यसंभवात्। न च – तात्पर्यलिङ्गानामुपक्रमादीनामत्र सत्त्वान्नाद्वैतश्रुतीनाममुख्यार्थत्वमिति वाच्यम्। 'यजमानः प्रस्तरः' इत्यादावप्यपूर्वत्वाद्येकैकलिङ्गस्य तात्पर्यग्राहकस्य विद्यमानत्वात्। एकैकलिङ्गस्य तात्पर्यनिर्णायकत्वे लिङ्गान्तरमनुवादकमेव। त्वन्मते प्रत्यक्षसिद्धे भेदे श्रुतिरिव। किं बाहुल्येन इति चेन्न। वाक्यशेषप्रमाणान्तरसंवादार्थक्रियादिरूपपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्राबल्येन व्यवहारदशायामेव एतद्विरुद्धार्थग्राहिणो 'धूम एवाग्नेर्दिवा ददृशे', 'अदितिर्द्यौः' 'यजमानः प्रस्तर' इत्यादेस्तद्विरोधेनामुख्यार्थत्वेऽप्यद्वैतागमस्य परीक्षितप्रमाणविरोधाभावेन मुख्यार्थत्वोपपत्तेः। प्रत्यक्षादेर्हि परीक्षया व्यावहारिकप्रामाण्यमात्रं सिद्धम्। तच्च नाद्वैतागमेन बाध्यते। बाध्यते तु तात्विकं प्रामाण्यम्। तत्तु परीक्षया न सिद्धमेव। अतो न विरोधः। 'धूम एवाग्नेः' इत्यादेस्तु मुख्यार्थत्वे प्रत्यक्षादेर्व्यावहारिकं प्रामाण्यं व्याहन्येत। अतो विरोधात्तत्रामुख्यार्थत्वमिति विवेकः।

अयंच हेतुर्वक्ष्यमाणातिप्रसंगद्वयेपि बोध्यः। मृत्कलत्रकंटका दृष्टांताः॥ अदृश्यत्वमिति॥ ब्रह्मवदितिशेषः॥ घटवृत्तित्वादिनेति॥ दृश्यत्वं प्रातिभासिकत्वाख्यमिथ्यात्वव्याप्यं न। घटवृत्तित्वाद्घटत्ववत्। घटादीनां व्यावहारिकतयाप्रातिभासिकत्वापरपर्यायमिथ्यात्वव्याप्यत्वं घटवृत्तित्वादेर्नास्तीतिदृश्यत्वादिहेतोरपि शुक्तिरजतादौ तन्नस्यादित्यर्थः॥ इतिप्रत्यक्षस्याऽनुमानबाध्यत्वे बाधकविवरणं॥

२३. प्रत्यक्षस्य शद्धबाध्यत्वे बाधकम्

यदि चाक्षं शब्दबाध्यं तर्हि जैमिनिना तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिरित्याद्यर्थवादस्यादितिर्द्यौरित्यादि मन्त्रस्य च दृष्टविरोधेनाप्रामाण्ये प्राप्ते तदविरोधाय ''गुणवादस्तु गुणादविप्रतिषेधः स्याद्'' इत्यादिना गौणार्थता नोच्येत। तत्सिद्धिरित्यादितत्सिद्धिपेटिकयां च ''यजमानः प्रस्तर'' इत्यादेर्गौणार्थता नोच्येत। त्वया च प्रत्यक्षाविरोधाय 'तत् त्वम्' पदयोर्लक्षणा नोच्येत, श्रुतिविरोधात्प्रत्यक्षस्यैवाप्रामाण्य सम्भवात्। एतेनाद्वैतवाक्यमनन्यपरत्वान्नामुख्यार्थं प्रस्तरवाक्यादिकं तु अन्यपरमिति वाचस्पत्युक्तं निरस्तम्। सत्यपि तात्पर्यलिंगे मानान्तरविरोधे प्रस्तरादिवाक्यवत् सोमेन यजेतेत्यादिवच्चानन्यपरत्वस्यैवायोगात्। न हि कुरूपाम्, अशूरम् चोद्दिश्य अहो दर्शनीयेति सिंह इति च शतकृत्वः प्रयुक्तमपि वाक्यं वाच्यार्थपरम् भवति। न वा तत्त्वमसि वाक्यम् षड्विधातात्पर्यलिङ्गोपेतमपि मानांतरविरुद्धं वाच्यार्थपरम्। किं चोपक्रमोपसंहारादिकं हि प्रत्येकम् तात्पर्यलिङ्गम्। अस्ति च प्रस्तरादिवाक्येऽपूर्वता। त्वत्पक्षे च प्रत्यक्षसिद्धे भेदे श्रुतिरिवैकलिंगसिद्धे तात्पर्ये लिङ्गान्तरमनुवादकमेवेति किं तद्बाहुल्येन? यच्चोक्तं वाचस्पतिना– ''प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैतवाक्यं तु न तथा। उक्तम् हि शाबरभाष्ये ''न विधौ परः शब्दार्थ'' इति। तन्न, अन्यशेषेऽपि प्रत्यक्षाविरुद्धे लोके ''इयं गौः क्रय्या बहुक्षीरे'' त्यादौ ''कामधेनु'' रित्यादाविवाऽमुख्यवृत्तेर्वेदेपि ''सोऽरोदीदि'' त्यादि प्रस्तरादिवाक्य इवामुख्यवृत्तेरना श्रयणात्। अनन्यशेषेऽपि ''सोमेन यजेते'' त्यादौ वैयधिकरण्येनाऽन्वये विरुद्धत्रिकद्वयापातात्। समानाधिकरण्येनान्वये प्रत्यक्षाविरोधाय सोमवता यागेनेति मत्वर्थलक्षणायाः 'विचारविधायके च जिज्ञासासूत्रे तद्विजिज्ञासस्वेत्यादिश्रुतौ च प्रत्यक्षाविरोधाय जिज्ञासाशब्देन विचारलक्षणायाः' सर्वं खल्विदम् ब्रह्मेत्यादौ

न्यायामृतप्रकाशः

॥ औदुंबरीमिति॥ प्रमाणलक्षणे स्मृतिपादे चिंतितं। ''विरोधेत्वनपेक्षं स्यादसतिह्यनुमान''मित्यत्र ज्योतिष्टोमे ''औदुंबरीं स्पृष्ट्वोद्गाये''दिति श्रुत्या उदुंबरमयीं यज्ञसदस्स्थूणां स्पृष्ट्वा उद्गानं कर्तव्यमिति विहितं। स्मृतिकारास्तु तत्स्पर्शनविरुद्धं तस्याः कात्स्न्र्येन वाससा वेष्टनं स्मरंति। ''औदुंबरीवा सर्ववेष्टयितव्ये''ति। तत्स्मरणं प्रमाणं नवेति संशये स्मृत्यधिकरणे स्मृतीनां मूलश्रुत्यनुमापकतया श्रुतिमूलकत्वेन प्रामाण्यसमर्थनादियमपि स्मृतिर्मूलश्रुतिमनुमापयंती प्रमाणमिति पूर्वपक्षः। स्पर्शनवेष्टनयोर्विरुद्धत्वेन तत्कर्तव्यताबोधकयोरपि औष्ण्यशैत्यवद्विरुद्धत्वाद्धह्वा वौष्ण्यप्रत्यक्षेण शैत्यानुमानस्येव प्रत्यक्षसिद्धस्पर्शनश्रुत्या सर्ववेष्टनश्रुत्यनुमानस्य बाधान्मूलश्रुत्याभावेनाप्रमाणं स्मरणमितिसिद्धांतः॥ ऐंद्येति॥ गार्हपत्यमिति प्रत्यक्षश्रुत्या बाधादिंद्रप्रकाशकत्वेनेंद्रशेषत्वानुमानं अप्रमाणमितिसिद्धांतितं। एतदधिकरणंचपूर्वमुपन्यस्तं॥ शरमयमिति॥ दशमाध्याये चतुर्थपादे चिंतितं। ''चोदनालिंगसंयोगे तद्विकारःप्रतीयेत प्रकृतिसंनिधानात्'' इत्यत्र सोमारौद्रचरौ श्रूयते ''शरमयं बर्हिर्भवती''ति। तत्र किंदर्शपौर्णमासिकाःकुशा न निवर्तंते निवर्तंतेवेति संशये उपदेशेन शराणां ''प्रकृतिवद्विकृतिःकर्तव्ये'' त्यतिदेशेन कुशानांचावगतत्वेन द्वयोरपि प्रमाणत्वात्समुच्चयइति पूर्वपक्षः। सिद्धांतस्तु बर्हिश्शब्दलक्षिते बर्हिःकार्ये शराणां विधायकस्य वचनस्य प्रत्यक्षत्वात्तैरेव कृतस्वकार्याणां कुशानां प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कल्पनं न प्रवर्तते। किंतु कुशव्यतिरिक्तांगप्रापकएव साधारणोऽतिदेश इत्यनुमीयते। अतःप्रापकाभावात्कुशा निवर्तंत इति सिद्धांतितं॥ स्मृतिरूपेणेति॥ स्मृत्याख्यलिंगेनेत्यर्थः॥ चोदनालिंगसारूप्येणेति॥ चोदनाविधिवाक्यं तत्सारूप्यरूपलिंगेनेत्यर्थ इति व्याख्येयं। यथा प्रकृतिवद्विकृतिःकर्तव्येति चोदनया इतरांगानां प्राप्तिः तथा तत्सारूप्येण कुशरूपांगस्यापि प्राप्त्यनुमानमित्यर्थः। अत्र सर्वत्राप्यनुमानप्रकारस्त्वित्थं। औदुंबरी श्रुत्युक्तसर्ववेष्टनयुक्ता बाधकाभावे सति सर्ववेष्टनप्रतिपादकस्मृतियुक्तत्वात्। यत् यदर्थप्रतिपादकस्मृतियुक्तं तत्तच्छ्रुत्युक्ततदर्थयुक्तं यथा संमतमिति सामान्यव्याप्तिः। कदाचनस्तरीरसि नेंद्रसश्चसिदाशुष इति मंत्रःइद्रशेषत्वप्रतिपादकश्रुतियुक्तः बाधकाभावे सतींद्रप्रकाशनसामर्थ्योपेतत्वात् यद्यत्प्रकाशनसमर्थं तत्तस्य शेषत्वप्रतिपादकश्रुतियुक्तं यथा संमतं। सोमारौद्रश्चरुःकुशबर्हिःप्रतिपादकश्रुतियुक्तः कुशश्रुतियुक्तदर्शपौर्णमासचोदनासदृशनिर्वापशब्दाष्टाकपालादिसंख्याद्धि देवतादियुक्तचोदनायुक्तत्वात् यद्यत्सदृशचोदनोपेतं तत्तदीयधर्मप्रतिपादकश्रुतियुक्तं यथासंमतमिति। नन्विदमापादनं मीमांसकमतविरुद्धं। औदुंबर्याद्युदाहरणेषु प्रत्यक्षेण श्रुतिरेव बाध्यतइत्येव प्रतिपादितमस्ति। नतु श्रुत्याऽनुमानं बाध्यतइति। अतःप्रत्यक्षस्य शब्दबाध्यत्वांगीकार एवेदमापादनीयं नतु प्रत्यक्षस्य लिंगबाध्यत्वांगीकारे। अतइदमापादनमयुक्तमित्यस्वरसाद्दूषणांतरमाह॥ अग्र्यौष्ण्येति॥ आत्मस्थायित्वप्रत्यभिज्ञानमस्माभिर्नोक्त मित्यनुक्तोपालंभ इति शंकापरिहारायोक्तं॥ विवरणोक्तमिति॥ तत्क्षणिकत्वेति॥ आत्मक्षणिकत्वेत्यर्थः। प्रत्यक्षस्यानुमानबाध्यत्वेऽतिप्रसंगांतराण्याह॥ तथाचेत्यादिना॥ शशःशृंगी पशुत्वादित्यत्र शृंगित्वे पशुत्वं न तंत्रं किंतु गोत्वादिरूपःपशुत्वविशेषएवेत्यप्रयोजकतापरिहारायातिप्रसंगं तर्कानुसारेणोपपादयति॥ शृंगित्वइति॥ पशुत्वादिनेत्यत्रादिपदेन वस्तुत्वसंग्रहः। शशादेरित्यत्रादिपदेन तुरगसंग्रहः। तथाच भगवत्पादोक्तो ''वस्तुत्वात्तुरगःशृंगी''त्यतिप्रसंगःसंगृहीत इति ज्ञातव्यं। भूतचतुष्टयस्य पृथिवीत्वादृष्टेःपृथिव्या अपि पृथिवीत्वं न स्यादिति भगवत्पादोक्तातिप्रसंगमाह॥ गंधवदिति॥ तत्वोद्योतोक्तातिप्रसंगं हृदि निधायाह॥ पदार्थत्वादिनेति॥

ननु वैषम्यम्। तथाहि – किमिदमापाद्यते? श्रुतित्रयग्राह्यप्रत्यक्षमनुमानैर्बाध्येतेति वा? प्रत्यक्षविषयीभूतं श्रुतित्रयमिति वा? नाद्यः। विरोधाभावेन तद्बाध्यबाधकभावस्याशास्त्रार्थत्वात् अस्माभिरनभ्युपगमाच्च अनुक्तोपालम्भत्वेन निरनुयोज्यानुयोगापत्तेः। न द्वितीयः। प्रत्यक्षविषयीभूतश्रुतित्रयस्य लिङ्गबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिङ्गबाध्यत्वे विरोधाभावात्। न हि शब्दप्रत्यक्षयोरैक्यमस्ति। शब्दस्य सर्वप्रमाणापेक्षया बलवत्त्वमवोचाम। तस्मान्मौढ्यमात्रमेतन्मीमांसाविरोधोद्भावनमिति चेन्मैवम्। आद्यं तावदङ्गीकुर्मः। नच श्रुतित्रयग्राह्यप्रत्यक्षस्यानुमानैर्विरोधाभावेन कथं तद्बाध्यत्वापादनमिति वाच्यम्। साक्षाद्विरोधाभावेऽपि सत्प्रतिपक्षस्थले विरुद्धसाध्यद्वयव्याप्ययोरिव विरोधिसामाग्रीत्वेन श्रुतित्रयग्राह्यप्रत्यक्षस्य स्मृत्यादिरूपानुमानानां च स्वग्राह्यश्रुत्यर्थस्यानुमानग्राह्यश्रुत्यर्थस्य च विरोधित्वेन तद्द्वारा विरोधस्यावश्यकत्वात्। अन्यथा श्रुतेर्लिंगस्य च साक्षाद्विरोधाभावेन बाध्यबाधकभावो न स्यात्। न स्याच्च विरुद्धार्थप्रतिपादकयोर्वाक्ययोः साक्षाद्विरोधाभावेन बाध्यबाधकभावः। न चास्माभिरनभ्युपगमेन निरनुयोज्यानुयोग इति वाच्यम्। एवं ह्यनुकूलतर्कप्रतिपादनं कापि न स्यात्। शक्यते हि तत्रापि वक्तुं धूमाभावस्यास्माभिरनभ्युपगमेन निरनुयोज्यानुयोग इति। यदि च तत्र व्याप्यवन्ह्यभावस्वीकारेण धूमाभावरूपव्यापकापादनमिति तर्हि मिथ्यात्वानुमानेन प्रत्यक्षबाधस्यांगीकारेणाविशेषात् स्मृत्याद्यनुमानैः श्रुतित्रयग्राह्यप्रत्यक्षस्य बाधः स्यादित्यापादनादिति न कश्चिद्विशेषः। अत एव द्वितीयः पक्षोऽपि समीचीनः। श्रुतित्रयस्य हि अनुमानबाधकत्वं प्रत्यक्षत्वादेव। तथा च प्रत्यक्षस्यापि बाधककोटौ प्रवेशस्यावश्यकत्वे प्रकृते प्रत्यक्षस्यानुमानबाध्यत्वे तत्रापि स्मृत्याद्यनुमानैः प्रत्यक्षश्रुतिबाधः स्यादित्यापादने न कोऽपि दोषः। न च सर्वप्रमाणापेक्षया शब्दस्य प्राबल्यमवोचामेति वाच्यम्। तथात्वे प्रस्तरादिवाक्यजातस्य प्रत्यक्षविरोधेन लाक्षणिकत्ववर्णनं न स्यादित्यलं मीमांसानभिज्ञोपद्रवेणेति ।

अग्न्यौष्ण्यप्रत्यक्षं चेति॥ न चार्थक्रियासंवादेन श्रुत्यनुग्रहेण च तत्र प्रत्यक्षयोः प्राबल्येनानुमानबाधकत्वमिति वाच्यम्। एवं हि जगत्प्रत्यक्षस्यापि परीक्षितत्वेन श्रुत्यनुगृहीतत्वेन च प्राबल्यादनुमानबाधकत्वं स्यात्। न च परीक्षया व्यावहारिकमेव प्रामाण्यं व्यवस्थाप्यत इति परमार्थतः सत्ताभावविषययोरनुमानागमयोः कथं बाध इति वाच्यम्। तर्ह्यौष्ण्यादिप्रत्यक्षयोरपि परीक्षादिना व्यावहारिकमेव प्रामाण्यं व्यवस्थाप्यत इति परमार्थत औष्ण्याद्यभावग्राहकयोरनुमानयोः कथं बाध इति साधु समर्थितं बौद्धमतम्। व्यावहारिक्यपि व्यवस्था न स्यादिति॥ न चायोग्यशृंगादिसाधने प्रत्यक्षबाधस्यासम्भवेन तत्र व्याप्ति ग्राहक तर्केष्वाभासत्वस्य त्वयाऽपि वक्तव्यत्वेन व्यवस्थाया उभयसमाधेयत्वात्। न हि तर्काभाससप्रीचीनमनुमानं प्रमाणम्। येन प्रत्यक्षबाधकं स्यात्। प्रकृतं तु सत्तर्कसचिवं प्रबलं प्रत्यक्षस्य बाधकमेवेति वाच्यम्। अयोग्यशृङ्गादिसाधनं हि अयोग्यशृंगत्वपुरस्कारेण वा शृंगत्वपुरस्कारेण वा? नाद्यः। तेन रूपेण व्याप्यभावेन तया साधनस्यासंभवात्। न द्वितीयः। शृंगस्य स्थूलावयवविशेषस्य योग्यत्वनियमेन तत्र प्रत्यक्षबाधस्यैवासंभवात्। किञ्च यथा योग्यशृंगसाधकमनुमानं तर्काभाससहकृतं प्रत्यक्षबाधनाक्षमं तथा प्रकृतमनुमानमपि तर्काभासयुक्तत्वात् प्रत्यक्षबाधनक्षमं न स्यात्। तथा च शशस्य शृंगसाधकानुमानतुल्ययोगक्षेमत्वात् प्रकृतमनुमानं न प्रत्यक्षबाधनक्षममिति स्थितम्। इति प्रत्यक्षस्यानुमानबाध्यत्वे बाधकम्।

तद्विरोधस्यावश्यकत्वात्। तथाहि – वेष्टनस्मृतिर्हि सर्ववेष्टनं विदधाति श्रुतिस्तु स्पर्शनम्। न चैकदा वेष्टनस्पर्शने सम्भवतः। तेन वह्निशैत्यानुमानवत् स्मृतेः प्रत्यक्षश्रुत्या बाधो युक्तः। न च व्रीहियवश्रुतिवत् स्पर्शनश्रुतिः पाक्षिकत्वेन योजनीयेति वाच्यम्। भवेदेवं यदि तद्वत् श्रुतिद्वयं प्रत्यक्षं स्यात्। तत्र हि अनन्यगत्या विकल्प आश्रीयते, द्वयोः प्रत्यक्षत्वेनान्यतरेणान्यतरबाधायोगात्। विनिगमकाभावाच्च। न च प्रकृते विनिगमकाभावः। प्रत्यक्षानुमानयोरेव विनिगमकत्वात्। न च शक्तेरेव प्रमेयत्वात् तस्याश्चाबाधात् अविरोध इति वाच्यम्। शक्तेः प्रमेयत्वे आहवनीयस्य पदेन बाधो न स्यात्। उत्पन्नशिष्टस्य च उत्पत्तिशिष्टेन बाधो न स्यात्। नित्यस्य नैमित्तिकेन बाधो न स्यात्। द्वयोरपि शक्तिसम्भवात्। तस्माच्छक्तिमात्रं न प्रमेयम्। किन्तु अनुष्ठानमेव। तथा च सर्ववेष्टनापाक्षिकस्पर्शनयोर्विरोधात् तद्बोधकयोरन्यतरबाधस्यावश्यकत्वे प्रत्यक्षश्रुतिविरोधेन स्मृतेरेव बाधो न्याय्यः। न च विकल्पाश्रयणम्। तस्याष्टदोषदुष्टत्वेनाश्रयितुमयोग्यत्वात्। तुल्यबलत्वाभावाच्च। तथा च प्रत्यक्षश्रुत्या स्मृतिरूपानुमानस्य बाध इति सिद्धान्तसङ्क्षेपः।

॥ ऐन्द्र्येति॥ इदमधिकरणं तु प्रत्यक्षस्य शीघ्रगामित्वेन प्राबल्यव्युत्पादने विवृतमवगन्तव्यम्॥ शरमयमिति॥ दशमे चतुर्थपादस्य द्वितीयेऽधिकरणे चिन्तितम्। चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानादिति सूत्रम्। इदमाम्नायते – सोमारौद्रं चरुं निर्वपेत्। कृष्णानां व्रीहीणामभिचरन्तीति। तत्रेदं श्रूयते – शरमयं बर्हिर्भवति। तत्र संशयः – किं दार्शपौर्णमासिकाः कुशाः न निवर्तन्ते उत निवर्तन्त इति। पूर्वपक्षस्तु – दार्शपौर्णमासिकाः कुशा न निवर्तन्त इति। कुतः? प्रकृतिवद् विकृतिः कर्तव्येति चोदकप्रमाणेन प्राप्तत्वात्। न च शरमयं बर्हिर्भवतीति शरा अपि प्राप्नुवन्तीति वाच्यम्। तर्ह्युभयोः प्रमाणप्राप्तत्वात् समुच्चयोऽस्तु। न च शराणां प्रत्यक्षप्राप्तत्वेन चोदकानुमानप्राप्तकुशबाधकत्वमिति वाच्यम्। शरमयं बर्हिर्भवतीत्यत्र प्राचुर्यार्थत्वेन मयट्प्रत्ययोपपत्तेः विरोधाभावेन बाधकत्वासम्भवात् समुच्चयोपपत्तेरिति।

अत्र सिद्धान्तसूत्रं – चोदनेति। अत्र शराः तद्विकारः कुशविकारः कुशबाधका इत्यर्थः। कुतः? चोदनालिङ्गसंयोगात्। कथं चोदनालिङ्गसंयोग इति चेत् प्रकृतिलिङ्गेन बर्हिःशब्देन योगात्। तेन च प्रकृतिसन्निधानादिति। अयमभिप्रायः – शरमयं बर्हिर्भवतीति बर्हिःशब्दलक्षिते बर्हिःकार्ये विधायकस्य वचनस्य प्रत्यक्षत्वात् तैरेव कुशानां कृतकार्यत्वात् तत्प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कुशप्राप्तिविषये शरैर्बाध इति कुशव्यतिरिक्तांगप्रापकस्यैव तस्यानुमानमिति प्रापकाभावात् कुशा निवर्तन्त इति। न च मयटः प्राचुर्यार्थत्वोपपत्तेर्विरोधाभावात् शरकुशयोः समुच्चय इति वाच्यम्। नित्यं वृद्धशरादिभ्य इति सूत्रेण शरशब्दात् विकारे मयटो विधानात्। न च शरणां कुशविकारत्वम्। तथाच शरैः कुशानां बाध एव।

॥ सर्ववेष्टनश्रुत्यनुमानेनेति॥ विमता स्मृतिः सर्ववेष्टनश्रुतिमूलिका, स्मृतित्वात् अष्टकादिस्मृतिवदित्येवं रूपेणेत्यर्थः॥ इन्द्रशेषत्वश्रुत्यनुमानेनेति॥ विमतः 'कदाचन स्तरीरसी'ति मन्त्रः इन्द्रशेषत्वप्रतिपादकश्रुत्युपेतः तदर्थप्रकाशकत्वात् आग्नेयमन्त्रवदित्येवं रूपेणेत्यर्थः। कुशश्रुत्यनुमानेनेति॥ विमतो विकृतियाग कुशमयबर्हि बोधकश्रुत्युपेतः चोदनास्वरूपत्वात् आग्रयणयागवदित्येवं रूपेणेत्यर्थः। सर्वैव मीमांसा उन्मीलिता स्यादिति।

न्यायामृतकण्टकोद्धारः

॥ औदुम्बरीमिति॥ प्रमाणलक्षणस्मृतिपादे द्वितीयाधिकरणे चिन्तितं – विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति सूत्रम्। अत्र श्रुतिविरुद्धस्मृतिरुदाहरणम्। औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिः औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुतिः। क्रीतराजके भोज्यान्न इति स्मृतिः। अग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यमिति श्रुतिः। अत्र स्मृतौ राजशब्देन सोमो ग्राह्यः। श्रुतौ च संस्थितशब्देन समाप्तिः। अत्राद्यस्मृतिश्रुत्योरौदुंबरीशब्देन ज्योतिष्टोमे सदोनामकस्य मण्टपस्य मध्ये काचिदौदुम्बरी शाखा खन्यते। साऽत्र गृह्यते। सा च सर्वा वेष्टयितव्येति स्मृत्यर्थः। तां स्पृष्ट्वा उद्गाता उद्गानं कुर्यादिति श्रुत्यर्थः। किमिमे स्मृती धर्मे प्रमाणमुताप्रमाणमिति सन्देहः। किं तावत् प्राप्तम्? एते स्मृती धर्मे प्रमाणम्। कुतः? कर्तृसामान्यादेव। न च श्रुतिविरुद्धत्वादेतयोरप्रामाण्यमिति वाच्यम्। यदि श्रुतिविरोधेन स्मृत्यप्रामाण्यं स्यात्ततो अनेकशाखाखिलाश्रुतानधीतवेदवाक्यविरोधसम्भावनया अष्टकादिस्मृतीनामप्रामाण्यं स्यात्। ततश्चातीताधिकरणार्थो बाधितः स्यात्। क्वचित् प्रामाण्यं क्वचिदप्रामाण्यमित्यर्धजरतीयं च स्यात्। न च प्रत्यक्षश्रुतिविरोधात् स्मार्तश्रुतिकल्पनानवकाश इति वाच्यम्। व्रीहियवश्रुतिवत् द्वयसम्भवात्। यत्र हि द्वयोरसम्भवस्तत्रैकविषयेण प्रत्यक्षेणेतरविषयानुमानं प्रमेयापहारद्वारा निराक्रियते। यथा प्रत्यक्षेण शैत्यानुमानम्। यत्र तु द्वयसंभवस्तत्र शीघ्रं प्रवृत्तमप्येकमितरस्य विषयं नापहरतीति तद्विषयमनुमानं न बाधते। न च प्रकृतेऽपि द्वयं न सम्भवति। यगुगपदुपसंहर्तुमशक्यत्वादिति वाच्यम्। व्रीहियवबृहद्रथन्तरग्रहणाग्रहणादिविषयश्रुतिवद् युगपदुपसंहर्तुमशक्यत्वेऽपि श्रुतिद्वयसम्भवात्। तस्मात् प्रत्यक्षेणापि स्पर्शनविधिना सर्ववेष्टनविषयश्रुत्यनुमानं न शक्यं निराकर्तुम्। कथं तर्हि श्रुतिलिङ्गादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधः? तत्रापि श्रुतिद्वयसम्भवादिति चेदुच्यते। न हि तत्र प्रमेयापहारनिबन्धनो बाधः। किन्तु कल्पनामूलोच्छेदात्। श्रुतिकल्पनं हि तावत् यावत् मन्त्राम्नानमनवगतप्रयोजनं प्रकरणी चाकृतर्थः, यदा च प्रत्यक्षया श्रुत्या द्वयोरपि नैराकांक्ष्यं तदाऽऽकांक्षाधीना कल्पना तदपगमे गच्छति। प्रकृते तु प्रत्यक्षया श्रुत्या न स्मृतेर्मूलाकांक्षा निवर्तते, येन मूलोच्छेदादनुमानविरोधः स्यात्। न च प्रमेयापहारद्वारा प्रत्यक्षेण शैत्यानुमानवत् प्रत्यक्षश्रुतिविरोधः किं न स्यादिति वाच्यम्। वैषम्यात्। दृष्टान्ते हि वह्नेरौष्ण्यशैत्ये न संभवतः। प्रकृते तु व्रीहियवादिवत् श्रुतिद्वयसम्भवात्। किञ्च श्रुतिस्मृतिप्रमेये न विरुद्धे। शक्तिर्हि प्रमेयम्। न हि स्पर्शनशक्त्या वेष्टनशक्तिः वेष्टनशक्त्या स्पर्शनशक्तिर्बाध्यते। व्रीहियवशक्तिवत्। तस्मात् विरोध एव नास्ति। विरोधे वा व्रीहियववत् विकल्प एवाश्रयणीय इति न कुत्राप्यप्रामाण्यमाशङ्कनीयम्। तस्मात् श्रुतिविरोधेऽपि स्मृतिद्वयं प्रमाणमित्युत्सूत्रः पूर्वपक्षः।

अत्र सिद्धान्तसूत्रं – विरोधे त्विति। अस्यार्थः- तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। श्रुतिविरोधे स्मृतेः प्रामाण्यमनपेक्षम् अनादरणीयं स्यात्। हि यस्मात् असति श्रुतिविरोधे मूलश्रुत्यनुमानमुक्तं न तु सतीति। यदि स्मृतिः स्वातन्त्र्येण प्रमाणं स्यात् ततोऽविरोधवत् विरोधेऽपि प्रामाण्यं प्राप्नुयात्। न चैवं मूलश्रुतिद्वारकत्वात् तत्प्रामाण्यस्य तद्विरोधे प्रामाण्यमेव कुतो भवेत्? विरोधवदविरोधेऽपि अप्रामाण्यप्रसङ्गे सर्वत्रोत्सर्गापवादन्यायः समुच्छिद्येत। अत एव नार्धवैशसम्। न च श्रुतिद्वयार्थसम्भवात् श्रुतिस्मृत्योर्विरोध एव नास्ति, व्रीहियवश्रुतिवदिति वाच्यम्। परस्परविरुद्धार्थाभिधायकत्वेन

अनुक्तोपलंभमात्रत्वेन निरनुयोज्यानुयोगापत्तेः। अत एव न द्वितीयः। प्रत्यक्षविषयभूतस्य श्रुतित्रयस्य लिंगबाधकत्वपरेऽपि शास्त्रे प्रत्यक्षस्य लिंगबाध्यत्वेपि विरोधाभावात्। न हि शब्दप्रत्यक्षयोरैक्यमस्ति। शब्दस्य सर्वप्रमाणापेक्षया बलवत्त्वांगीकारादिति। अत्रोच्यते। आद्यस्तावद्युक्तः। न च श्रुतित्रयग्राह्मिप्रत्यक्षस्यानुमानैर्विरोधाभाव इति वाच्यम्। प्रत्यक्षविषयश्रुत्या स्पर्शानुकूलसर्ववेष्टनं गार्हपत्यशेषत्वं शरबर्हिष्कत्वं च प्रतिपाद्यते। अनुमानैस्तु सर्ववेष्टनं इंद्रशेषत्वं कुशबर्हिष्कत्वं च प्रतिपाद्यत इति अर्थविरोधकृतश्रुतिविरोधपूर्वकः प्रत्यक्षानुमानानामस्ति विरोधः। अत एव तार्तीयोऽप्राप्तबाध इत्युच्यते। यथाहुः–

"कल्प्यस्य शास्त्रस्य तु कल्पनं यन्निरुद्ध्यते मूलनिकृंतनेन।
कृप्तेन शीघ्रेण फलापहारादप्राप्तबाधं तमुदाहरंति॥" इति।

तस्मादस्त्येव प्रत्यक्षस्यानुमानैर्विरोधः। द्वितीयोऽपि युक्तः। प्रत्यक्षविषयस्य श्रुतित्रयस्य श्रुत्यनुगुणानुमानबाधकत्वं हि प्रत्यक्षविषयत्वेन, न तु श्रुतित्वमात्रेण। अनुमिताया अपि श्रुतेः प्रत्यक्षश्रुतिबाधकत्वप्रसंगात्। तस्मात्साधूक्तं सर्वैव मीमांसोन्मूलिता स्यादिति।

अग्र्यौष्ण्यप्रत्यक्षं चेति। अत्र वदंति अग्र्यौष्ण्यप्रत्यक्षात्मस्थायित्व-प्रत्यभिज्ञाप्रत्यक्षयोरर्थक्रियासंवादश्रुत्यनुग्रहाभ्यां प्राबल्येनानुमानबाधकत्वम्। अपरीक्षितप्रत्यक्षं हि परीक्षितानुमानापेक्षया दुर्बलं, नीलं नभ इति प्रत्यक्षमिव नभोनीरूपत्वानुमानापेक्षया। अतो न सामान्यतोदृष्टमात्रेण सर्वसंकरापत्तिरिति। अत्रोच्यते। सुखपर्यंतपरीक्षायाः जगत्सत्यत्वप्रतिपादकश्रुत्यनुग्रहस्य सन् घट इति प्रत्यक्षेऽपि सत्त्वेन तस्याप्यनुमानापेक्षया बलवत्त्वात्। त्वन्मते अस्तीत्येवोपलब्धव्य इत्यादीनामप्यखंडार्थत्वेनात्मनि स्थायित्वे संसर्गाप्रतिपादकत्वाच्चेति साधूक्तं कालात्ययापदिष्टोच्छेदः स्यादिति। तथा च शृंगित्व इति। अत्र वदंति – अयोग्यशृंगादिसाधने प्रत्यक्षबाधस्यासंभवेन तत्रव्याप्तिग्राहकतर्केष्वाभासत्वस्य त्वयापि वक्तव्यत्वेन व्यवस्थाया उभयसमाधेयत्वात्। न हि तर्काभाससप्रीचीनमनुमानं प्रमाणमिति केनाप्यभ्युपेयत इति। अत्रोच्यते। शृंगस्य योग्यत्वनियमात् शृंगानुमानस्य योग्यशृंगविषयत्वेन तत्र प्रत्यक्षबाधस्य संभवात्। अन्यथाऽनौष्ण्यस्यातींद्रियत्वोक्तिसंभवेन तत्रापि बाधोद्भावनमसंभवि स्यात्। तस्मात्प्रत्यक्षस्यानुमानाबाधकत्वे पशुत्वादिना शृंगादिसाधनमपि स्यादेवेति साधूक्तम्। घटवृत्तित्वादिनेति। घटमात्रवृत्तित्वादिनेत्यर्थः। तेन चित्त्वादीनां दृष्टांतत्वसंभवो न वाऽसिद्धिरिति।

व्यासाद्रिसृततर्काब्धुपूरैः पक्षयुगंयुजि।
न्यायामृततरंगिण्यामक्षं नो लिंगबाधितम्॥
प्रत्यक्षस्यानुमानबाध्यत्वे बाधकम्।

अतः स्मर्तृपुरुषांतराणामिह प्रत्यक्षसंभवात्, तस्य चात्मप्रत्यक्षतुल्यत्वान्न स्मार्तश्रुतिनिराकरणम्। तदुक्तं–

"आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन।
प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्षसमं हि तत्॥" इति।

ततश्चात्मीयपरकीयप्रत्यक्षविषयश्रुतिविहितयोः स्पर्शनवेष्टनयोस्तुल्यकक्ष्यतया विकल्प एव। स चांशे बाध एवेति सर्ववेष्टनश्रुत्यनुमानमपि स्पर्शनश्रुतिप्रत्यक्षस्य बाधकमेवेति चेन्मैवम्। परकीयप्रत्यक्षादप्यात्मीयप्रत्यक्षस्य विस्रंभणीयतया परप्रत्ययमनादृत्यात्मीयप्रत्ययेनैव व्यवहारः क्रियते। अतोऽत्र स्पर्श एवानुष्ठीयते। न तु सर्ववेष्टनमिति फलतोऽप्रामाण्यं श्रुतिविरुद्धानां स्मृतीनाम्। यथाहुः–

"यावदेकं श्रुतौ कर्म स्मृतौ चान्यत्प्रतीयते।
तावत्तयोर्विरुद्धत्वे श्रुत्यनुष्ठानमिष्यते॥" इति।

विरोधे त्वनपेक्षं स्यादिति श्रुतिस्मृत्योर्विरोधे यत्प्रमाणांतरानपेक्षं श्रुतिवाक्यं तदेव ग्राह्यम्। असति ह्यात्मप्रत्यये परप्रत्ययानुमानक्लेशाश्रयणमिति सूत्रार्थः। नन्वौदुःम्बर्याः सर्ववेष्टनमशक्यम्। यो हि तस्याः प्रदेशोऽधोभागस्थस्तस्य वेष्टयितुमशक्यत्वादिति चेन्न। वेष्टयित्वाऽपि गर्ते निक्षेपसंभवात्। तस्मात्प्रत्यक्षश्रुतिविरुद्धस्मृतिमूलश्रुतिर्यावन्न स्वस्य प्रत्यक्षविषयस्तावदनुष्ठानमात्रम्। ततः परं तु विकल्प इति स्मृत्यनुमानं न प्रत्यक्षबाधस्येष्टे। तस्मादयुक्तो दृष्टांत इति।

मंत्रसामर्थ्यरूपेणेति। एतच्च श्रुतिलिंगाधिकरणे निरूपितप्रायमिति पृथक् नोच्यते। चोदनालिंगसारूप्येणेति। दशमाध्याये चतुर्थपादे चिंतितम्। चोदनालिंगं संयोगेन तद्विकारः प्रतीयते। सोमारौद्रवरौ श्रूयेते-शरमयं बर्हिर्भवतीति। तत्र किं दार्शपौर्णमासिकाः कुशाः न निवर्तंते निवर्तंते वेति संदेहे शराणां कुशानां चोपदेशातिदेशरूपप्रमाणवत्तया अवगतत्वात्समुच्चय इति पूर्वः पक्षः। बर्हिःशब्दलक्षिते बर्हिःकार्ये शराणां विधायकस्य वचनस्य प्रत्यक्षत्वात् तैरेव कृतस्वकार्याणां कुशानां प्रापकस्य कुशसाधारणस्यातिदेशवाक्यस्य कल्पनं न प्रवर्तते, किं तु कुशव्यतिरिक्तांगप्रापकस्यैव तस्यानुमानमिति प्रापकाभावात्कुशा निवर्तंत इति सिद्धांतः। चोदनायाः यल्लिंगं निर्वपति यजेतेत्यादिशब्दः अष्टाकपालादिसंख्या एकद्विदेवत्वादि तत्संयोगेन तत्सारूप्येण तद्विकारः प्रतीयते इति सूत्रार्थः।

सर्वैव मीमांसोन्मूलिता स्यादिति। अत्र वदंति किमिदमापाद्यते? श्रुतित्रयग्राह्यप्रत्यक्षमनुमानैर्बाध्येतेति वा प्रत्यक्षविषयीभूतं श्रुतित्रयमिति वा। नाद्यः। विरोधाभावेन तद्बाध्यबाधकभावस्य शास्त्रार्थत्वाभावात्। अस्माभिरनभ्युपगमाच्च।

इति। अतो वेष्टयेत्स्पृशेदित्यशक्यार्थविधानात् न तावदुभयोरपि प्रामाण्यं संभवतीत्यवश्य मन्यतरद्बाधितव्यं। तत्र प्रत्यक्षेणानुमानस्य बाधोऽग्नाविव शैत्यानुमानस्येति सिद्धमप्रामाण्यं स्मृतीनां श्रुतिविरुद्धानाम्। व्रीह्यादौ तु द्वयोरपि प्रत्यक्षत्वेनागृह्यमाणविशेषत्वान्नैकेनेतरस्य बाधः संभवति। विरुद्धार्थत्वाच्च न द्वयोरांजस्येन प्रामाण्यम्। न चाप्रामाण्यमविद्यमानदोषयोः संभवतीति गत्यंतराभावादुभयोऽपि पाक्षिको बाधः कल्प्यते। न चैवं शास्त्रस्याप्रामाण्यम्। यथा सामान्यशास्त्रस्य विशेषशास्त्रबाधितस्यापि नाप्रामाण्यं तद्वदिहापि। ननु बाधितं च भवत्यप्रामाण्यं न भवतीति व्याहतमेतत्। सत्यमेव। न त्वत्र परमार्थतः शास्त्रार्थो बाध्यते। किं तु प्रतिपक्षमनालोचयतो यः शास्त्रस्य स्वरसतः सार्वत्रिकः प्रत्ययः सोऽत्र बाध्यते। तद्बाधाच्च पाक्षिकानुमानपरत्वं शास्त्रस्याध्यवसीयते। न चैवं स्मृतिवशेन श्रुतिस्वरूपभंगेन स्पर्शनस्य पाक्षिकत्वं कल्पयितुं शक्यते। स्मृतेः स्वरसतोऽप्रमाणत्वेन श्रुतिबाधासामर्थ्यात्। श्रुतिकल्प्यनस्य प्रत्यक्षश्रुतिविहितस्य स्पर्शनविरोधेन विरुद्धत्वात्। ननु पाक्षिकत्वेनापि प्रत्यक्षश्रुतिरुपपद्यते। यस्मिन् पक्षे सा नास्ति तत्र स्पर्शाभावेन वेष्टनस्यापि शक्यानुष्ठानत्वात्तद्विषयश्रुतिकल्पनमनुपपन्नमिति चेत् न। इतरेतराश्रयात्। स्वरसतो हि श्रुतिवाक्यादपाक्षिकं स्पर्शनं गम्यते। तस्मिंश्चापाक्षिके न स्माश्रुतिकल्पनमशक्यत्वात्। न हि स्पृशता वेष्टयितुं शक्यते। तत्र स्पर्शनस्य पाक्षिकत्वे सति शक्यार्थस्मृतिकल्पिता श्रुतिरात्मानं लभते। तस्यां च लब्धात्मिकायां तद्विरोधात्स्पर्शनस्य पाक्षिकत्वमितीतरेतराश्रयत्वं स्यात्। तस्मात्प्रत्यक्षश्रुतिविरुद्धास्मृतिरप्रमाणम्। तस्मात्सर्ववेष्टनस्मृतिरूपमनुमानं प्रत्यक्षविषयस्पर्शनश्रुतिविहितस्पर्शविरुद्धसर्ववेष्टनश्रुतिसाधकं न भवति। किं तु स्वयमेवाप्रमाणं भवति यथा, तथा दृश्यत्वादिलिंगरूपमनुमानमपि सन्घट इत्यादि प्रत्यक्षविरुद्धमिथ्यात्वसाधकं न भवति। स्वयमेवाप्रमाणं भवतीत्यर्थः। नन्वनुपपन्नो भाष्यकारोक्ताप वादाधिकरणसिद्धसर्ववेष्टनस्मृतिरूपो दृष्टांतः। वार्तिककारदर्शिताधिकरणभंगप्रकारेण सर्ववेष्टनस्मृतिमूलस्य सर्ववेष्टनश्रुतेः सत्त्वेन सर्ववेष्टनस्मृतेरपि प्रमाणत्वात्। तथा हि। मन्वादिग्रंथजातस्य शिष्टग्रहणहेतुकं कल्पितं वेदमूलत्वं कथं पुनरपोद्यते। किंच बाधकसद्भावात्साधकाभावतोऽथवा। श्रुत्या भावोऽवसीयेत न द्वेधाप्युपपद्यते। न तावद्दृश्यादर्शनं बाधकम्। सर्वशाखानुपलंभात्। न च श्रुत्यभावनियतं किंचिल्लिंगं दृश्यते। विरुद्धश्रुतिदर्शनं तु षोडशिग्रहणादि श्रुतिभिरनैकांतिकम्। नापि साधकाभावः। न हि स्वप्रमाणप्रवृत्त्यभावमात्रेण वस्त्वभावनिश्चयः। सर्वपुरुषप्रमाणाभावस्त्वसिद्धः। स्मर्तृप्रत्यक्षस्य तद्ग्रंथानुमितस्य सत्त्वात्। नित्यानुमेयत्वे हि सर्वेषामिहानुमानमेव प्रमाणं स्यात्। तच्च प्रत्यक्षश्रुतिविरोधे नोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादीषत्करमभावावधारणं स्यात्। न च तदस्ति। अंधपरंपरादोषात्।

जगतोऽध्यस्तत्वस्याद्याप्यसिद्धेः। न चाध्यासघटितत्वादचाक्षुषत्वम्; सहकारिवशेन चाक्षुषत्वोपपत्तेः। न च – अनध्यस्तत्वमेव सत्यत्वमिति – वाच्यम्; तुच्छेऽतिव्याप्तेः। अस्तित्वेति॥ न च – प्रमात्वस्य सत्त्वघटितत्वेन चक्षुराद्ययोग्यत्वेन चैतादृशसत्त्वनिर्वचनमयुक्तमिति – वाच्यम्; प्रमात्वस्य तद्वति तत्प्रकारकत्वेनोक्तविधसत्त्वाघटितत्वात्; सहकारिवशेन चक्षुरादिविषयत्वोपपत्तेश्च। कालसम्बन्धित्वं वेति॥ न च – शुक्तिरूप्येऽतिव्याप्तिः; तस्यापि प्रतिभासकालसम्बन्धित्वादिति – वाच्यम्; तथासति त्रिकालासम्बन्धित्वरूपमिथ्यात्वानुपपत्तेः। सत्त्वेन प्रतिभासमात्रं प्रातिभासिकत्वम्, न वस्तुसत्त्वमित्यङ्गीकारविरोधाच्च॥

इति सत्त्वनिरुक्तिः ।

न्यायामृतप्रकाशः

प्रतिज्ञाश्रयं प्रबलप्रमाणविरोधाख्यं दोषं विवक्षुः प्रमाणज्येष्ठप्रत्यक्षविरोधं तावदाह॥ सन्घटइतीति॥ प्रत्यक्षगृहीतसत्त्वविरोधिमिथ्यात्वसाधकमनुमानं प्रत्यक्षबाधितमग्र्यनौष्ण्यानुमानवदित्यर्थः। ननु नमिथ्यात्वानुमानस्य प्रत्यक्षबाधः प्रत्यक्षगृहीतव्यावहारिकसत्त्वस्यानुमानगृहीतपारमार्थिकसत्त्वनिषेधरूप मिथ्यात्वाविरोधित्वात्। अनुमानगृहीतमिथ्यात्वविरोधिसत्त्वस्यच प्रत्यक्षेणाग्रहणादित्यभिप्रायेण सत्त्वं पृच्छति॥ नन्विति॥ असंगतिपरिहारायाह॥ यदिति॥ घटादौ यत्प्रत्यक्षसिद्धमनुमानगृहीतमिथ्यात्वविरोधीतिशेषः॥ परजातिरिति॥ द्रव्यत्वगुणत्वकर्मत्वव्यापिका सत्ताजातिरित्यर्थः। तद्योग्यत्वमिति॥ प्रमाविषयत्वयोग्यत्वमित्यर्थः॥ स्वेति॥ स्वाधिकरणाधिकरणको यःस्वसमानकालीनो निषेधस्तदप्रतियोगित्वमित्यर्थः। निषेधाप्रतियोगित्वमित्युक्ते घटादेःकालांतरीयनिषेधप्रतियोगित्वादसंभवोऽतः स्वसमानकालीनेति। तस्य घटादिसमानकालीनत्वाभावेन तादृशनिषेधाप्रतियोगित्वसत्त्वेन नासंभवः। तावत्युक्ते स्वसमानकालीनदेशांतरीयनिषेधप्रतियोगित्वात्पुनरसंभवः स्यादतः स्वसमानाधिकरणेत्युक्तं। देशांतरीयनिषेधस्य स्वाधिकरणाधिकरणकत्वाभावान्ना संभवः॥ नाद्या इति॥ चतुर्थपिक्षया आद्याः। प्रथमद्वितीयतृतीयाइत्यर्थः॥ सिद्धसाधनादिति॥ ननु इदमयुक्तं सिद्धसाधनताया अनुमान एव वक्तव्यत्वात्प्रत्यक्षेणैतादृशसत्त्वं विषयीक्रियत इत्युक्ते सिद्धसाधनोद्भावनस्याकौशलव्यं जकत्वमिति चेत्सत्यं। सिद्धसाधनात् सिद्धार्थाविगाहित्वादित्यर्थः। परजात्यादिरूपस्य सत्त्वस्य मिथ्यात्ववादिना मयापि प्रत्यक्षविषयत्वांगीकारादनुमाननिषेध्यपारमार्थिकसत्त्वावगाहित्वाभावान्न तेन बाधइतिभावइत्याहुः। वस्तुतस्तु परजात्यादिरूपसत्त्वस्य मिथ्यात्ववादिना मयापि प्रत्यक्षविषयत्वांगीकारादेतादृशसत्त्वं प्रत्यक्षविषय इति भवदीयवचनं मां प्रति सिद्धसाधनं सिद्धार्थसाधकं सिद्धार्थबोधकं असंगतमित्यर्थः। तथाचानुमाननिषेध्यपारमार्थिकसत्त्वावगाहित्वाभावेन भिन्नविषयत्वान्नानुमानस्य तेन बाधइति भावः॥ असतीति॥ सत्येव प्रमाणं प्रवर्तते नासतीति तावत्सिद्धं तत्कुतइति पृष्टे प्रमाणप्रवृत्तिप्रयोजकीभूतं सत्त्वं सति वर्ततेऽसतिच नास्तीति वक्तव्यं। एवंच प्रमाणप्रवृत्तिप्रयोजकतया प्रमितिविषयत्वात्प्राक्सत्त्वस्यावश्यं वक्तव्यत्वेन प्रमितिविषयत्वस्य सत्त्वादन्यत्वेन तदेव सत्त्वंनेत्यर्थः। किंच प्रमाविषयत्वं परंपरयावा साक्षाद्वा। नाद्यः। शुक्तिरजतमहं जानामीति व्यवसायद्वाराऽसतोप्यनुव्यवसायविषयत्वात् असत्यतिव्याप्तिः। नद्वितीयः। इदं

तदवच्छेदकत्वात्, तस्य च भाविकालविरोधित्वाभावात्। भाविकालबाधाभावश्च न साक्षिणा ग्रहीतुं शक्यते; तस्य विद्यमानमात्रग्राहकत्वादिति चेत्, मैवम्। व्यवहारकालाबाध्यत्वं ह्यबाध्यत्वेन व्यवहारमात्रमिति वा? अर्थक्रियारूपव्यवहारनिर्वाहहेतुभूतमबाध्यत्वं वा? नाद्यः; तथा सत्येतादृशस्यापि संवादिप्रवृत्त्युपयुक्तत्वाभावेन तदग्राहिणः साक्षिणः प्रामाण्यं न स्यात्। न द्वितीयः; इतोऽतिरिक्तत्रिकालाबाध्यत्वाभावेन साक्षिणाऽस्य ग्रहणे तद्बाधस्यापरिहारात्। न च – तस्य विद्यमानमात्रग्राहित्वमिति – वाच्यम्; अस्या व्यवस्थाया मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्।

अपि च कालान्तरस्थमपि यद् बाधकम् तदपि किं यत्कालावच्छेदेनानेन स्वार्थो गृहीतः, तत्कालावच्छेदेनैव? उतान्यकालावच्छेदेन? आद्ये कथमस्य प्रामाण्यम्? अन्त्ये त्वनित्यत्वादिकमेव स्यात्। न च – अबाध्यत्वरूपप्रामाण्यस्य मया प्रपञ्चज्ञानेऽनङ्गीकारेण यत्कालावच्छेदेनानेन स्वार्थो गृहीतः तत्कालावच्छेदेन तन्निषेधोऽभ्युपगम्यत इति – वाच्यम्; अबाध्यत्वरूपं प्रामाण्यं प्रपञ्चज्ञाने साक्षिणा सुग्रहमित्युपपादितत्वेन त्वदङ्गीकारस्य निर्मूलत्वेन प्रातिभासिकवैलक्षण्येन घटादेः पारमार्थिकसत्त्वस्य साधयितुं शक्यत्वाच्च। न च – सप्रकारकज्ञानाबाध्यत्वादिरूपस्य प्रातिभासिकवैलक्षण्यस्य न पारमार्थिकसत्त्वसाधकत्वम्; देहात्मैक्ये ब्रह्मज्ञानाव्यवहितभ्रमविषये च व्यभिचारादिति – वाच्यम्; देहात्मैक्यादेः सप्रकारकज्ञानबाध्यत्वस्योक्तत्वेन व्यभिचाराभावात्।

किञ्च 'घटः सन्' 'रूप्यं मिथ्ये'ति प्रतीत्योरविशेषे कथं घटसत्त्वं मिथ्या? रूप्यमिथ्यात्वमिथ्येति विशेषः? न च तदपि मिथ्यैव; रूप्यतात्त्विकतापत्तेः। यदत्र वक्तव्यम्, तत् सामान्यतो मिथ्यात्वभङ्ग एवोक्तमिति तत्रैवावगन्तव्यम्। किञ्च पारमार्थिकसत्त्वस्य प्रत्यक्षागोचरत्वे कथं तन्निषेधः? अप्रसक्तत्वात्। न च – अपरोक्षप्रसक्त्यभावेऽपि परोक्षप्रसक्तेः सम्भवाद् निषेधोपपत्तिः; "नान्तरिक्षे न दिवी"त्वादिवदप्रसक्तस्यापि निषेधसम्भवाच्चेति – वाच्यम्; पक्षीकृतातीन्द्रियप्रपञ्चविषये वेदस्य तदुपजीव्यानुमानस्य वाऽपेक्षितत्वात् तस्य चोपजीव्यत्वेन धर्मिग्राहकतया प्रबलेन बाधे निषेधकस्याप्रामाण्यापत्तेः। अप्रसक्तप्रतिषेधोऽप्यनुपपन्नः; "नान्तरिक्षे" इत्याद्यप्रसक्तनिषेधस्तु "हिरण्यं निधाय चेतव्यमि" ति विधिस्तुत्यर्थः। न च प्रकृते पारमार्थिकत्वनिषेधस्य विधिस्तुतिरूपं प्रयोजनमस्ति; वेदान्तानां लक्षणया ब्रह्मपरत्वाङ्गीकारेण स्तुत्यर्थत्वासम्भवात्। किञ्च प्रपञ्चतात्त्विकत्वागोचरत्वे कथं प्रत्यक्षस्यातत्त्वावेदकत्वम्? न च – न प्रत्यक्षस्य तत्त्वावेदकत्वम्, तद्व्यबाधितविषयकत्वम्, न च तदस्ति प्रत्यक्षे, किन्तु श्रौतज्ञान एवेति – वाच्यम्; अस्य मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनेतरेतराश्रयत्वात्॥

तस्मादध्यक्षयोग्यस्य सत्त्वस्येह निरुक्तितः।
प्रत्यक्षबाधो मिथ्यात्वलिङ्गस्यात्रोपपद्यते॥
लौकिकं चैव सामान्यजन्यं साक्ष्यात्मकं त्वपि।
प्रत्यक्षं बाधते लिङ्गं मिथ्यात्वस्यानुमापकम्॥

केचित्त्विति॥ न च – जगतोऽपि क्षणिकत्वादिनारोपविषयत्वादनारोपितत्वमसम्भवीति – वाच्यम्; अत्र ह्यनारोपितत्वं नारोपाविषयत्वम्; अप्रसिद्धेः। किन्त्वनध्यस्तत्वम्, तच्च नासम्भवि,

सति 'घटो रूपवानि'त्यादावपि घटत्वेन रूपवत्त्वानुमानोपपत्तेर्विशिष्टप्रत्यक्षता न स्यात्। विशिष्टप्रत्यक्षानुभवस्योभयत्रापि तुल्यत्वात्। न च – एवं पर्वतो वह्निमानित्यादौ प्रत्यक्षमेव स्यादिति – वाच्यम्; अत्र हि वह्निप्रत्यक्षमापाद्यमानं किमलौकिकम्? लौकिकं वा? नाद्यः; अलौकिकप्रत्यक्षसामग्र्याः समाने विषये मानान्तरसामग्रीतो दुर्बलत्वात्। अन्यथा शब्दादिस्थलेऽपि पदादिस्मारितपदानां मनसैव संसर्गप्रत्यक्षसम्भवेन मानान्तरविलयापत्तेः। ननु यदि मानान्तरसामग्रीतोऽलौकिकप्रत्यक्षसामग्री दुर्बला, तर्हि वस्तुतः स्थाणौ शाखादौ करादिभ्रमात् संशयोत्तरप्रत्यक्षे पुरुषभ्रमो न स्यात्, तस्यालौकिकत्वात्, किन्त्वनुमितिरेव स्यात्। न च – भ्रमानुमितिसामग्र्यपेक्षयाऽलौकिकप्रत्यक्षसामग्री प्रबलेति तत्रालौकिकप्रत्यक्षमेव भवति, नानुमितिरिति – वाच्यम्। तथा सति धूलीपटले धूमभ्रमाद् वह्न्यनुमितिर्न स्यादिति चेत्, मैवम्; फलबलेन दोषघटितसामग्र्या बलवत्त्वकल्पनात्। पुरुषप्रत्यक्षस्थले चालौकिकसामग्र्यां दोषानुप्रवेशेन प्रत्यक्षमेव भवति। धूमभ्रमाद् वह्न्यनुमितिस्थले चानुमितिसामग्र्यां दोषानुप्रवेशादनुमितिरेव, न तु प्रत्यक्षम्, इति न क्वाप्यनुपपत्तिः। न द्वितीयः; लौकिकविशेषणसन्निकर्षाभावेन लौकिकप्रत्यक्षासम्भवात्। न च – तस्य कारणत्वे मानाभाव इति – वाच्यम्; तदितरसकलतद्धेतुसत्त्वे पर्वते वह्न्यनुमितिसमये तद्विशिष्टप्रत्यक्षानुत्पादस्यैव तत्र मानत्वात्। न च – अत्र प्रत्यक्षमेवोत्पद्यत इति – वाच्यम्; 'वह्निमनुमिनोमी'त्यबाधितानुभवविरोधात्। किञ्चाभावसाध्यके केवलव्यतिरेकिणि साध्यप्रसिद्धेरनङ्गत्वात् तत्र क्लृप्ताया अनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो दुर्बलत्वमावश्यकमिति नानुमानमात्रोच्छेदः। न च – अर्थापत्तिवादिभिरस्माभिस्तदनभ्युपगमात् स्यादेवोक्तदोष इति – वाच्यम्; व्याप्तिप्रतीतिमपेक्ष्यार्थ प्रतीतिजनकत्वरूपानुमानत्वस्यार्थापत्तौ सत्त्वेन तस्या अनुमानताया आवश्यकत्वात्। अन्यथा धूमस्याप्यनुमानत्वं न स्यात्। तस्मात् सामान्यप्रत्यासत्तिस्वीकारे बाधकाभावात्, साधकसद्भावाच्च तया निषेधमात्रप्रतियोग्युपस्थितौ तदभावस्य सुग्रहत्वाद् बाध इत्युपपन्नम्। इदं च सामान्यप्रत्यासत्तिमादाय बाधवर्णनम्, तत्र च परोक्तयुक्तिखण्डनं च न्यायमतानुसारेण। अन्यथाऽस्मदीयसामान्यप्रत्यासत्त्यनभ्युपगमस्य परेणावगतत्वादनुक्तोपालम्भापत्तेः। न च – सामान्यप्रत्यासत्तिदूषणखण्डनाद् भवतामपि सामान्यलक्षणास्वीकारापत्तिरिति – वाच्यम्; मन्मतेऽनुगतसामान्यस्यैवाभावेन तत्प्रत्यासत्तित्वस्य दूरनिरस्तत्वात्।

किंच ज्ञानप्रामाण्यं गृह्णन् साक्षी घटादिगतमबाध्यत्वं गृह्णात्येव। प्रामाण्यस्य विषयाबाधरूपत्वेन ततोऽतिरिक्तस्याभावात्। न च – साक्षी भ्रमसाधारण इति – वाच्यम्; तर्हि तेन निश्चितस्यैक्यागमस्य प्रामाण्यमविश्वसनीयं स्यात्। ततश्चैक्यज्ञानप्रामाण्यस्याप्यनिश्चयः स्यात्। न च – अन्यप्रमाणेन तत्प्रामाण्यनिश्चय इति – वाच्यम्; प्रमाणान्तरप्रामाण्येऽप्यनिश्चयेनानाश्वासात्। साक्षी च स्वयमप्रकाशः स्वप्रामाण्यं परप्रामाण्यं चावधारयतीत्यकामेनापि स्वीकरणीयम्; अन्यथा क्वापि प्रामाण्यसिद्धिर्न स्यादिति।

ननु व्यवहारकालाबाध्यत्वमात्रेण प्रवृत्तावविसंवादोपपत्तेः तद्रूपप्रामाण्यस्य साक्षिणा ग्रहणेऽपि न विरोधः। न च – घटादिज्ञानस्य संवादिप्रवृत्तिजनकतावच्छेदकं प्रामाण्यं त्रिकालाबाध्यविषयकत्वमिति तद्ग्रहणे कथं न विरोधः? इति – वाच्यम्; शुक्तिरूप्यादिज्ञानव्यावृत्तस्य व्यवहारकालाबाध्यविषयत्वस्यैव

वह्निसम्बन्धावगमात्, अप्रसिद्धस्य ज्ञानाभावात्। नच – प्रसिद्धधूम एव तद्धूमत्वादिना व्याप्तिनिश्चयेऽपि धूमत्वेन तत्संशयोपपत्तिः, अत एव घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वादिना तत्र संशय-सिषाधयिषे भवत एव, निश्चितेऽप्यर्थे प्रामाण्यसंशयाहितसंशयवद् 'धूमत्वं वह्निव्यभिचारिवृत्ति नवे'ति संशयादपि तादृशसंशयोपपत्तेश्चेति – वाच्यम्। धूमत्वेन संशयासम्भवात्, विशेषप्रकारकनिश्चयस्य सामान्यप्रकारकसंशयविरोधित्वात्। अन्यथा इदंपर्वतीयत्वेन वह्निनिश्चये तत्रैव पर्वतीयत्वेन वह्निसंशयापत्तेः। घटत्वादिनेतरभेदनिश्चयेऽपि पृथिवीत्वादिना संशयादिकं तूपपन्नमेव, निश्चयप्रकारीभूतघटत्वस्य पृथिवीत्वाप्रवेशात्। इह तु धूमत्वस्य तत्तद्धूमत्वप्रविष्टत्वेन विषयत्वात्। 'धूमत्वं वह्निव्यभिचारिवृत्ति न वे'ति संशयाहितोपि संशयो न भवति, धूमत्वस्य वह्निसम्बन्धितावच्छेदकत्वस्य ग्रहणे विरोधिनिश्चयसत्त्वात्, अन्यथा घटत्वप्रकारेण घटनिश्चयेऽपि 'घटत्वं घटवृत्ति न वे'त्यपि संशयापत्तेः। किञ्च शक्तिग्रहान्यथानुपपत्त्या च तत्स्वीकार आवश्यक एव। तथा हि – सामान्यप्रत्यासत्तिस्वीकारे गोत्वरूपसामान्यप्रत्यासत्या सकलगोव्यक्त्युपस्थितौ सत्यां तत्र गोपदशक्तिग्रहे देशान्तरे 'गामानये'त्युक्तेऽपूर्वव्यक्तिलाभोपपत्तिः; अन्यथैकस्यामेव शक्तेर्गृहीतत्वादपूर्वव्यक्तिलाभो न स्यात्। नच – शक्त्यनुभव-तत्स्मरण-वाक्यार्थज्ञानानां समानप्रकारकत्वेन जन्य-जनकभावात् न सकलगोव्यक्त्युपस्थितिरावश्यिकेति – वाच्यम्; तथा सति 'सास्नादिमन्तं पिण्डमानये'त्युक्ते गवानयनं न स्यात्; प्रकारीभूतगोत्वस्यानुपस्थितत्वात्। तथाच न समानप्रकारकत्वेन जन्य-जनकभावः। नच – सास्नादिमत्त्वमेव तत्र शक्यतावच्छेदकमिति – वाच्यम्; लाघवेन गोत्वस्यैव शक्यतावच्छेदकत्वस्वीकारात्॥

यदपि चोक्तम् – सामान्यलक्षणाप्रत्यासत्तिस्वीकारे यत् प्रमेयम् तदभिधेयम् इत्यादिव्याप्तिपरिच्छेदे सार्वज्ञ्यापत्तिरिति, इष्टापत्तेः। न च – एवं सति परज्ञानविषये 'घटो न वे'ति संशयानुपपत्तिरिति – वाच्यम्; समानप्रकारकसमानविषयकनिश्चयस्यैव संशयविरोधित्वेन घटत्वप्रकारकघटविषयकनिश्चयस्य संशयविरोधित्वात् तदभावादेव तदुपपत्तेः। प्रमेयत्वप्रकारकनिश्चयस्य घटविषयकत्वेऽपि घटत्वप्रकारकत्वाभावात्। न च – भासमानवैशिष्ट्यप्रतियोगिन एव प्रकारत्वाद् घटत्वस्यापि 'प्रमेयमि'ति ज्ञाने भासमानवैशिष्ट्यप्रतियोगित्वात् प्रकारत्वमिति – वाच्यम्; उक्तप्रकारत्वस्यासम्भवित्वात्। किमत्र भासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वमित्यर्थः? उत भासमानं यद्वैशिष्ट्यप्रतियोगित्वं तत्त्वमिति वा? नाद्यः; गवि गोत्वमित्यत्रापि गोत्वस्य प्रकारतापत्तेः। नान्त्यः; 'प्रमेय'मिति ज्ञानस्य सर्वप्रकारतापत्तेः। तस्मात् स्वरूपसम्बन्धविशेष एव प्रकारत्वम्। एवं च प्रमेयमिति ज्ञाने घटत्वस्य प्रकारत्वाभावाद् विरोधिनिश्चयाभावेन संशयाद्युपपत्तेर्न सार्वज्ञ्यापत्तिः। न च – स्वरूपसम्बन्धविशेषाभ्युपगमेऽनिर्वचनीयवादापत्तिरिति – वाच्यम्; विद्यमानस्वरूपस्यैव सम्बन्धत्वाभ्युपगमेन स्वरूपहान्यभावादनिर्वचनीयवादानापत्तेः। न हि स्वरूपसम्बन्धविशेषो नाम स्वरूपस्यानिर्वचनीयत्वम्; येनानिर्वचनीयवादापत्तिः स्यात्, इति यत्किञ्चिदेतत्।

यदप्युदितम् – मानाभावाद् ज्ञानलक्षणप्रत्यासत्तिरपि – निरस्तेति, तत्तुच्छम्; 'सुरभिचन्दनमि'त्यादिविशिष्टप्रत्यक्षस्यैव प्रमाणत्वात्। ननु अत्र चन्दनत्वेन सुरभित्वानुमानोपपत्तेर्नेदं विशिष्टप्रत्यक्षम्; अन्यथा साध्यविशिष्टपक्षप्रत्यक्षोपपत्तेरनुमानमात्रोच्छेदप्रसङ्गादिति – चेत्, न; तथा

निराकरिष्यमाणत्वेन तत्रेच्छेत्यस्यासम्भवदुक्तिकत्वात्। तथाच समानप्रकारकत्वे सति समानविषयकत्वस्यावश्यकत्वेनानागततज्ज्ञानार्थं सामान्यप्रत्यासत्तिस्वीकार आवश्यक एव॥ यदपि चोक्तं - अनागतज्ञानस्यापेक्षितत्वे अनुमानादेव तद् भविष्यति। अनुमानं च, वर्तमानः पाकः पाक-पूर्वकालीनः पाकत्वादतीत पाकवत् इति। विमतः प्रदेशो धूमवान् प्रदेशत्वात् संप्रतिपन्नदेशवत् इत्यादि। शब्दादपि सकलधूमपाकादिगोचरज्ञानो पपत्तेश्चेति। तदपि न। अनुमानस्याभासत्वेन तेनानागतपाकादिज्ञानानुपपत्तेः। कथमनुमानस्याभासत्वमिति चेत् चरमपाके पाकत्वसत्त्वेऽपि पाकपूर्वकालीनत्वाभावेन व्यभिचारात्। न च साध्यसिद्ध्युपजीवकव्यभिचार- ज्ञानस्यादोषत्वमन्यथासिध्यसिद्धिव्याघातादिति वाच्यम्। तर्कितचरमपाकज्ञानमादाय तत्र व्यभिचारज्ञानसंभवात्। तर्कितस्थले च सिद्ध्यसिद्धिव्याघाताभावात्। अत एव तर्कितानेककर्तृज्ञानमादाय कल्पनागौरवादिदानम्। अन्यथा अनेककर्तृसिद्धौ कल्पनागौरवं न बाधकम्, तदसिद्धौ च कल्पनागौरवेण सुतरां तन्निषेधस्य कर्तुमशक्यत्वमिति सिद्ध्यसिद्धिव्याघातस्य वक्तुं सुकरत्वेन कल्पनागौरवश्रुतहानादिकं किमपि नोद्भाव्यमेव। वस्तुतस्तु आभासलिंगजन्यत्वेनानुमितेर्भ्रमत्वात् नानागतपाकादिसिद्धिः। द्वितीयप्रयोगस्य च प्रदेशत्वेन धूमाभावस्यापि साधयितुं सुकरत्वेन प्रतिपक्षग्रस्तत्वात् न विप्रकृष्टादिधूमसिद्धिः। शब्दादपि न सकलधूमादिगोचरज्ञानसंभवः। सकलधूमाद्युपस्थितिं विना तत्र शक्तग्रहासंभवेन सकलधूमवाचिपदादपि तद्ज्ञानमशक्यमेव। यदपि चाभावज्ञानस्य प्रतियोगिज्ञानजन्यत्वात् प्रौढप्रकाशकतेजोविरहस्य तमसः प्रत्यक्षता न स्यात्; सामान्यप्रत्यासत्तिं विना प्रतियोग्यनुपस्थितेः, इत्याशङ्क्य तमसः स्वमते भावत्वेन समाहितम्, तत्तुच्छम्; तमसो भावान्तरत्वेऽपि तद्व्यञ्जकत्वेन प्रौढप्रकाशकयावत्तेजोविरहस्यावश्यापेक्षितत्वेन तस्य च यावत्तेजोरूपप्रतियोगिज्ञानं विना ज्ञातुमशक्यत्वात्, तस्य च सामान्यप्रत्यासत्तिं विनाऽसम्भवात्। नच – स्वरूपसत एव यावत्तेजोविरहस्य तद्व्यञ्जकत्वम्, नतु ज्ञातस्य; मानाभावादिति – वाच्यम्; ज्ञातस्यैव व्यञ्जकताया आवश्यकत्वात्, अन्यथा ध्वनेरज्ञातस्यैव वर्णव्यञ्जकतापत्तौ ध्वन्यश्रवणेऽपि देशान्तरे ध्वन्युत्पत्तावि वर्णव्यक्त्यापत्तेः, अत एवालोकोऽपि ज्ञात एव व्यञ्जकः। नच – यावत्तेजोविरहज्ञानस्यापेक्षितत्वेऽपि प्रतियोगितावच्छेदकप्रकारक यत्किञ्चित्प्रतियोगिज्ञानादेव तत्सम्भवे सकलप्रतियोगिज्ञानजनकसामान्यप्रत्यासत्तिस्वीकारो न युक्त इति – वाच्यम्; यावत्तेजोविरहज्ञाने यावत्प्रतियोगिज्ञानस्याप्यावश्यकत्वात्। न हि प्रतियोगितावच्छेदकप्रकारकयत्किञ्चित्प्रतियोगिज्ञाने यावदभावज्ञानं सम्भवति। तस्माद् यावत्प्रतियोगिज्ञानार्थं सामान्यलक्षणाऽऽवश्यिका॥

अपि च गोत्वाभावज्ञानं गोत्वत्वप्रकारकज्ञानजन्यम्, तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपम्, तच्च सामान्यप्रत्यासत्तिमन्तरेण न शक्यमवगन्तुमिति सामान्यप्रत्यासत्त्यङ्गीकार आवश्यक एव। न च – यत्किञ्चिद्गोव्यक्तेरेव गोत्वत्वरूपत्वात् न तदङ्गीकार इति – वाच्यम्; गोत्वत्वस्य गोत्ववृत्तित्वाद् गोव्यक्तेश्च तद्वृत्तित्वाभावेन गोव्यक्तिरूपताया वक्तुमशक्यत्वात्॥

अपि च व्यभिचारसंशयविषयत्वान्यथानुपपत्त्या सामान्यलक्षणाप्रत्यासत्तिरवश्यमङ्गीकर्तव्या; सामान्यप्रत्यासत्तिं विना धूमो वह्निव्यभिचारी न वेत्यनुभूयमानः संशयो न स्यात्। प्रसिद्धधूमे

दोषाभावात्। नच – यत्र कुत्रचित् स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं वा? यावदधिकरणेषु स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं वा? आद्ये मिथ्यात्वाविरोधित्वम्, द्वितीये प्रत्यक्षायोग्यत्वमुक्तमिति – वाच्यम्; स्वप्रतियोगिकात्यन्ताभावसामानाधिकरण्यसामान्याभावस्य विवक्षितत्वात्। तस्य च ज्ञानान्तरसहकारेण प्रत्यक्षयोग्यत्वसम्भवात्। अन्यथोक्तसामानाधिकरण्यरूपं रजतमिथ्यात्वं प्रत्यक्षं न स्यादित्युक्तत्वात्। किञ्च यस्मिन् कस्मिंश्चित् स्वदेश-कालवृत्तिनिषेध एतद्देशैतत्कालवृत्तिनिषेधत्वं ज्ञात्वा तेन प्रत्यासत्तिभूतेनोपस्थितानां स्वदेश-कालवृत्तिसकलनिषेधानां प्रतियोगित्वस्याभावो घटे सुग्राह्यः। नच – सामान्यलक्षणया प्रत्यासत्त्या सर्वनिषेधेषूपस्थितेष्वपि तत्प्रतियोगित्वाभावश्चक्षुरादिना ग्रहीतुं न शक्यते; योग्यप्रतियोगिकस्यैव संसर्गाभावस्य योग्यत्वात्, अशेषनिषेधानां प्रतियोगित्वं चातीन्द्रियसाधारणमिति न चक्षुरादियोग्यमिति – वाच्यम्; अतीन्द्रियसाधारणत्वेऽप्युपनीतस्य प्रतियोगित्वस्य योग्यत्वेन तदभावस्य चक्षुरादिना ग्रहीतुं शक्यत्वात्, अतीन्द्रियस्याप्युपनीतस्य परमाणोर्मानसज्ञानविषयत्ववत्। ननु सामान्यं नेन्द्रियप्रत्यासत्तिः; मानाभावादिति चेत्, व्याप्तिग्रहान्यथानुपपत्त्या सामान्यप्रत्यासत्तेरावश्यकत्वात्; अन्यथा महानसीयधूमेन्द्रियसन्निकर्षे तत्रैव व्याप्तिग्रहे पर्वतीयधूमेन वह्न्यनुमानं न स्यात्। सामान्यप्रत्यासत्तिस्वीकारे हि धूमत्वसामान्यप्रत्यासत्त्याऽतीतानागतसकलधूमोपस्थितौ जातायां पर्वतीयधूमे व्याप्तेर्गृहीतत्वेन तदनुमानसम्भवात्। यदत्रोक्तं परेण पर्वतीयधूमेन्द्रियसन्निकर्षदशायां धूमत्वेन प्रकारेण गृहीत-स्मृतव्याप्तेस्तत्र वैशिष्ट्यग्रहसम्भवात् 'सुरभि चन्दनमि'तिवद् विशिष्टेन्द्रियसन्निकर्ष-विशेषणज्ञानतदुभयासंसर्गाग्रहरूपाया विशिष्टज्ञानसामग्र्याः पूर्णत्वात्। व्याप्तिस्मृतिप्रकारेण वा पक्षधर्मताज्ञानस्यानुमितिहेतुता। महानसीय एव धूमो धूमत्वेन व्याप्तिस्मृतिविषयः, धूमत्वेन पर्वतीयधूमज्ञानं चापि जातम्; यद्धर्मावच्छेदेन यद्धर्मज्ञानम्, तद्धर्मज्ञानं तदुपनयसामग्रीति नियमात्। तच्च सामान्यलक्षणां विनैव, तावतैवानुमितिसिद्धेरिति, तन्न। तथा सत्यवच्छेदकानुमितौ व्याप्तिग्रहो न स्यात्। नच – एतादृशं स्थलमेव नास्तीति – वाच्यम्; अयमालोकः धूमो वा? उभयथाऽपि वह्निव्याप्यो भावः? अभावो वा? उभयथापि प्रमेयम्। यो वह्निव्याप्यवान् स वह्निमानि'त्यादाववच्छेदकानुपस्थितावपि व्याप्तिग्रहदर्शनात्। नच – यो वह्निव्याप्यवानिति प्रत्येकवृत्तिव्याप्त्यवच्छिन्ना महाव्याप्तिर्भासत इति व्याप्यतावच्छेदकोपस्थितिरावश्यकेति – वाच्यम्; सकलधूमादिनिष्ठप्रत्येकवृत्तिव्याप्त्यैवोपपत्तौ प्रत्येकवृत्तिव्याप्त्यतिरिक्तधूमालोकसाधारणमहाव्याप्तिकल्पने मानाभावात्। तथाचैतादृशस्थलेष्ववच्छेदकाज्ञानेन व्याप्तिग्रहासम्भवेन तदुपनयासम्भवाद् अनुमानानुदयप्रसङ्गात् सकलधूमोपस्थित्यर्थं सामान्यप्रत्यासत्तिरावश्यिका। किञ्चानागतया पाकज्ञानान्यथानुपपत्त्याऽपि सामान्यप्रत्यासत्तिरावश्यिकेति। तथाहि – पाकं कृत्या साधयामीति तावदिच्छा जायते, सा च सिद्धे न सम्भवति; असिद्धविषयत्वनियमादिच्छायाः, किन्त्वसिद्धे। सा च स्वसमानविषयकज्ञानजन्येत्यसिद्धपाकादिज्ञानमावश्यकम्, तच्च न सामान्यप्रत्यासत्तिं विना सम्भवति। नच – सिद्धगोचरपाकत्वादिप्रकारकज्ञानादेवाज्ञाते पाके भवतीच्छा, समानप्रकारकत्वमात्रस्य नियामकत्वादिति – वाच्यम्। रजतत्वेन रजतेऽनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्गात्। नच – प्रकाराश्रयत्वमपि नियामकम्; रजतभ्रमात् शुक्तावपीच्छानुदयप्रसङ्गात्। नच – रजतभ्रमात् शुक्ताविच्छा नास्त्येव, किंत्वनिर्वचनीयरजत इत्यनिर्वचनीयख्यातौ वक्ष्यत इति – वाच्यम्; 'अनिर्वचनीयख्यातेरग्रे

स्वदेश-कालवृत्तिनिषेधप्रतियोगित्वाभावे गृह्यमाणे कालत्रयमध्ये वर्तमानकालस्य, सर्वदेशमध्ये प्रकृतदेशस्यापि प्रवेशेन तत्र निषेधप्रतियोगित्वाभावस्य गृहीतत्वात् संवलितकालत्रयवर्तिसर्वदेशीयनिषेधप्रतियोगित्वरूपं मिथ्यात्वं नानुमानेन ग्रहीतुं शक्यत इति – वाच्यम्; स्वदेश-कालवृत्तिसकलनिषेधप्रतियोगित्वंस्य चक्षुराद्ययोग्यत्वात्, तदभावस्य सुत्तरामयोग्यत्वात् स्वदेशकालवृत्तियत्किञ्चिन्निषेधप्रतियोगित्वस्य मिथ्यात्वाविरोधित्वात्॥ नच – स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं विवक्षितमिति – वाच्यम्; केवलान्वयिनि स्वप्रतियोगिकात्यन्ताभावाभावेन, घटादौ च सम्बन्धभेदेन स्वप्रतियोगिकात्यन्ताभावसमानाधिकरणतयाऽव्याप्तेः। स्वात्यन्ताभावयावदधिकरणावृत्तित्वं वा यत्किञ्चिदधिकरणावृत्तित्वं वेति विकल्पेन पूर्वोक्तदोषाच्च। तस्मात् प्रकारान्तरस्य निरूपयितुमशक्यत्वात् मिथ्यात्वाविरोधित्वाच्च स्वसमानाधिकरणयावदत्यन्ताभावप्रतियोगित्वाभावरू पमेव सत्त्वमुपेयम्। तच्च न चक्षुरादियोग्यमित्युक्तमिति चेत्, न। यदि प्रत्यक्षं वर्तमानमात्रग्राहितया त्रैकालिकबाधाभावग्रहणाक्षमम्, तर्हि रजतमिथ्यात्वमपि प्रत्यक्षं न स्यात्; तस्यापि त्रिकालबाध्यरूपत्वेन कालत्रयघटितत्वात्। ननु च तत्र रजतत्वविरोधिशुक्तित्वे निश्चिते तेन च रजतत्वाभावे निश्चिते पश्चात् सहकारिवशात् प्रत्यक्षेण मिथ्यात्वनिश्चयः, केवलस्य वर्तमानमात्रग्राहित्वेऽपि सहकारिसमवहितस्यातीतादिग्राहित्वम्। प्रत्यभिज्ञादौ तथा दर्शनादिति – चेत्, न। तर्हि प्रकृतेऽपि प्रत्यक्षप्रामाण्यान्यथानुपपत्त्या मिथ्यात्वविरोधिन्येककालसत्त्वे निश्चिते, अथवा तेन त्रिकालासत्त्वाभावे निश्चिते तादृशसहकारिवशात् चक्षुरादिनैव त्रिकालाबाध्यत्वलक्षणसत्त्वनिश्चयोपपत्तेः। नच – मूलप्रत्यक्षप्रामाण्यमनिश्चितमिति – वाच्यम्; अग्रे तस्योपपादयिष्यमाणत्वात्। अथवा – अस्तु स्वदेश-कालवृत्तिनिषेधप्रतियोगित्वरूपसत्त्वग्राहकत्वं प्रत्यक्षस्य, तावताऽपि त्रिकालासत्त्वग्राहकानुमानागमबाधकत्वं कथम्? नच – एककालसत्त्वस्य व्यावहारिकत्वेन मिथ्यात्वाविरोधित्वमिति – वाच्यम्; व्यावहारिकमित्यस्य कोऽर्थः? व्यवहारमात्रम्, वस्तुसत्त्वं नास्तीति वा? अर्थक्रियाक्षमं वा? नाद्यः; तादृशसत्त्वविषयस्य प्रामाण्यानुपपत्तेः। न द्वितीयः; ततोऽतिरिक्तपारमार्थिकसत्त्वाभावेन सत्त्वेऽपि वा तस्यार्थक्रियाकारित्वव्याप्यत्वेन तस्य मिथ्यात्वविरोधित्वात्। नच – स्वदेश-कालवृत्तियत्किञ्चिन्निषेधाप्रतियोगित्वं मिथ्यात्वाविरोधि, स्वदेश-कालवृत्तिसर्वनिषेधप्रतियोगित्वं तु प्रत्यक्षायोग्यमिति – वाच्यम्; ज्ञानान्तरसहकारेण स्वदेशकालनिष्ठसकलनिषेधप्रतियोगित्वस्य सुग्रहत्वात्। नच – ज्ञानरूपप्रत्यासत्त्या प्रत्यासत्त्यनङ्गीकारादयुक्तमिति – वाच्यम्; प्रत्यासत्तित्वाभावेऽपि नियामकत्वस्याङ्गीकृतत्वात्। अत एव ज्ञानावच्छेदकत्वेन सर्वं साक्षिगम्यमित्यङ्गीक्रियते; अन्यथा त्रिकाल-सर्वदेशीयनिषेधप्रतियोगित्वरूपमिथ्यात्वस्यापि प्रत्यक्षसिद्धत्वं न स्यात्; तस्याप्ययोग्यदेश-कालघटितत्वात्। अथवा – स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं सत्त्वम्, तस्य प्रत्यक्षेण गृहीतत्वात् कथं तत्सामानाधिकरण्यरूपं मिथ्यात्वमनुमानेन ग्राह्यम्? नच – केवलान्वयिन्यव्याप्तिः; तस्य स्वप्रतियोगिकात्यन्ताभावाप्रसिद्धेरिति – वाच्यम्। मन्मते प्रमेयत्वादिधर्माणामपि प्रत्येकं पर्यवसितत्वेन मया केवलान्वयिधर्मानङ्गीकारात्। नच – घटादावव्याप्तिः। तस्य सम्बन्धान्तरेण स्वप्रतियोगिकात्यन्ताभावसमानाधिकरणत्वादिति – वाच्यम्; मया विद्यमानपदार्थस्य सम्बन्धान्तरेणाभावानङ्गीकारात्, लाघवात् प्रतियोगित्वस्यैवाभावविरोधित्वात्, प्रतीतेश्च सम्बन्धाभावविषयत्वेनाप्युपपत्तेः, अङ्गीकारे वा स्ववृत्तिताघटकसम्बन्धावच्छिन्नत्वेनाभावस्य विशेषितत्वेन

जगत्यभावात् न तस्य सत्त्वमिति भावः। एवं तर्हि परिच्छिन्नत्वं सत्त्वमित्यपि केनचिद् वक्तुं शक्यत्वेन ब्रह्मणि तादृशसत्त्वाभावात् तस्यापि सत्त्वं न स्यात्। नच शुक्ति-रूप्ययोरुभयोरपि परिच्छिन्नत्वाविशेषेऽपि सत्त्वासत्त्वयोर्व्यवस्थितत्वेन तादृशसत्त्वस्य पारिभाषिकत्वात् तदभावो जगतीष्ट एवेति न जगतोऽप्यसत्त्वापत्तिरित्याह – शुक्ति-रूप्ययोरिति॥ नच – एवं सति ब्रह्मसाम्यप्रतिबन्धुररीकारो व्याकुप्येतेति – वाच्यम्; स हि तदा स्यात्, पद्यपरिच्छिन्नत्वस्य सत्त्वशब्दार्थता स्यात्, सैव न सम्भवति ; अन्यथा सत्यानन्दादिपदानां पौनरुक्त्यापत्तेः॥ तस्मात् सत्त्वशब्दार्थस्यान्यस्यैव वक्तव्यतया तस्य च जगति ममेष्टत्वाद् युक्तं प्रतिबन्दिग्रहणमिति भावः। देशकालेति॥ सर्वदेशकालसम्बन्धी यो निषेधः, तदप्रतियोगित्वमित्यर्थः। अत्र हि निषेधाप्रतियोगित्वं सत्त्वमित्युक्ते घटादावव्याप्तिः; तस्य प्रागभावरूपनिषेधप्रतियोगित्वात्, अत उक्तम् – सर्वदेशसम्बन्धीति॥ प्रागभावरूपनिषेधस्य चोपादानदेशमात्रसम्बन्धित्वेन सर्वदेशसम्बन्धित्वाभावात् नाव्याप्तिः। एवमपि प्रागभावदशायां घट एवाव्याप्तिः; तदा तस्य सर्वदेशसम्बन्धिनिषेधप्रतियोगित्वात्। नच – उपादानदेशातिरिक्तदेशे घटप्रागभाव-प्रध्वंसाभावयोरभावात्, अत्यन्ताभावस्य च प्रामाणिकप्रतियोगिकस्य सिद्धान्तेऽनङ्गीकारात् न सर्वदेशसम्बन्धिनिषेधप्रतियोगित्वं तस्य, इति कथमव्याप्तिः ? इति वाच्यम्; तथापि देशान्तरे घटसंसर्गाभावस्य सद्भावात् तदभावप्रतियोगिकोटौ घटस्यापि प्रवेशेन घटप्रतियोगिकत्वस्य च घटसंसर्गाभाव-घटप्रागभावादौ सत्त्वेन सर्वदेशसम्बन्धितादृशनिषेधप्रतियोगित्वस्य घटे सत्त्वेनाव्याप्तेर्दुष्परिहरत्वात्। अतः 'सर्वकालसम्बन्धी'त्युक्तम्। एवं च तादृशनिषेधस्य प्रागभावोत्तरकालेऽभावेन सर्वकालसम्बन्धित्वाभावात् नाव्याप्तिः। नच – एवं देशपदमनर्थकमिति – वाच्यम्; सर्वकालसम्बन्ध्यन्योन्याभावरूपनिषेधमादाय घट एवाव्याप्तेः। नच – एवं सति घटप्रतियोगिकान्योन्याभावस्याकाशरूपत्वात् सर्वदेश-कालसम्बन्ध्याकाशरूपान्योन्याभावमादाय घटेऽव्याप्तिः स्यादेवेति – वाच्यम्; अभावैकस्वभावत्वेन निषेधस्य विशेषितत्वात्। नच – एवमभावैकस्वभावः सर्वकालसम्बन्धी यो निषेधः, तदप्रतियोगित्वमित्येवास्त्विति – वाच्यम्; अश्वनिष्ठसर्वकालसम्बन्धिनिषेधप्रतियोगित्वस्य गोत्वे सत्त्वेन तत्राव्याप्तिपरिहारार्थं तदुपादानात्। गोत्वसंसर्गनिषेधप्रतियोगित्वस्य निषेधप्रतियोगिकोटिप्रवेशेन सर्वकालसम्बन्धिनिषेधप्रतियोगित्वात् तत्राव्याप्तिनिरासाय तदुपादानमावश्यकमेव। नच – एवमपि व्यधिकरणधर्मावच्छिन्नाभावमादाय संबंधान्तरवच्छिन्नाभावमादाय च घटे एवाव्याप्तिरिति वाच्यम्। समानाधिकरणधर्मावच्छिन्नत्व-स्ववृत्तितावटकसम्बन्धावच्छिन्नत्वाभ्यामभावस्य विशेषितत्वात्। नच – एतादृशसत्त्वस्य प्रत्यक्षायोग्यत्वादग्रिमप्रत्यक्षवाधोपवर्णनमयुक्तमिति – वाच्यम्; यथा प्रत्यक्षयोग्यत्वं तथाऽनुपदमेवोपपादयिष्यते। वस्तुतस्तु – सर्वदेशकालसम्बन्धनिषेधपदेनात्यन्ताभावस्योक्तत्वादत्यन्ताभावप्रतियोगित्वमेव सत्त्वमभिमतमिति न कश्चित् क्षुद्रोपद्रवः। नच – संयोगेऽव्याप्तिः; तस्य सार्वदैशिक-त्रैकालिकनिषेधप्रतियोगित्वादिति – वाच्यम्; संयोगस्याव्याप्यवृत्तितानभ्युपगमात्। नच – आकाशादावव्याप्तिः; तदत्यन्ताभावस्य केवलान्वयित्वादिति – वाच्यम्। 'अत्रेदानीमाकाशः' इति प्रतीत्याऽऽकाशस्य देश-कालयोः सत्त्वेन तदत्यन्ताभावस्य केवलान्वयित्वानभ्युपगमात्। ननु – अक्षयोग्यं सत्त्वं पृष्टम्, न चैतदक्षयोग्यम्; सार्वदैशिकत्व-त्रैकालिकत्वयोरयोग्यत्वात्। नच –

न्यायामृतकण्टकोद्धारः

स्वसमानाधिकरणेति॥ अत्र च स्वसमानकालीननिषेधाप्रतियोगित्वोक्तौ गोत्वादेरर्थनिष्ठात्यन्ताभावप्रतियोगित्वेनाव्याप्तिर्मा भूत्, इत्यतः – स्वसमानाधिकरणेति॥ तावन्मात्रोक्तौ घटादेरपि स्वसमानाधिकरणध्वंसप्रतियोगित्वेनाव्याप्तिः स्यात्, इत्यतः – स्वसमानकालीनेति॥ सिद्धसाधनादिति॥ सिद्धस्यमिथ्यात्वविरोधिनः सत्त्वस्य, साधनात् विषयीकरणात्, इति यावत्। तेन प्रत्यक्षे कथं सिद्धसाधनत्वं दोषः? इति निरस्तम्। असतीति॥ प्रमाविषयत्वातिरिक्तमेव सत्त्वं वक्तव्यम्, अन्यथा प्रमाविषयत्वरूपं सत्त्वं कदा स्यादित्युक्ते प्रमाणप्रवृत्तौ सत्यामिति वक्तव्यम्। प्रमाणप्रवृत्तिश्च कदा स्यात्, सत्त्वे सति, इत्यन्योन्याश्रयः। ननु सत्त्वे सति प्रमाणप्रवृत्तिरित्येतत् कुत इत्यत उक्तम् – असति प्रमाणाप्रवृत्त्येति॥ असत्त्वस्येति॥ सत्त्वाभावस्यैवासत्त्वादिति भावः। प्रमाघटितत्वेन प्रत्यक्षाविषयत्वाच्चेत्यपि बोध्यम्॥ तवात्मनीति॥

अत्र कश्चित् – नूनं विवाहसमये कन्यायाः पित्रा निजगोत्रं पृष्टस्य यदेव भवतां गोत्रं तदेव ममापीति वदतो वरस्य भ्राता भवान् ; यतो जामातृ-श्वशुरयोरेकगोत्रत्वे विवाहानुपपत्तिवद् जगद्ब्रह्मणोरेकसत्त्वे सत्त्वमेव न स्यात्। तथाहि – स्वप्रकाशाद्वितीयचैतन्यरूपत्वमेव ब्रह्मणः सत्त्वम्, तदेव चेद् जडस्यापि जगतः, तदा रजतत्वविरोधिशुक्तिसत्तया रजतस्येव जडत्वविरोधिस्वप्रकाशसत्तया जगतः स्वरूपतो मिथ्यात्वोपपत्तेः – इत्याह। तदेतदज्ञाताशयस्य वल्गनम्, स्वव्याहतं च। तथाहि – न वयं ब्रह्मसत्त्वमेव जगत्सत्त्वमिति ब्रूमः, येन श्वशुरं प्रति त्वद्गोत्रमेव मद्गोत्रमिति वक्तृवरभ्रातृत्वं स्यात्, किन्तु यादृशं ब्रह्मणः सत्त्वं निरूप्यते, तादृशमेवास्माभिः प्रपञ्चे निरुच्यत इति। न ह्येतावता ब्रह्मसत्त्वमेव जगत्सत्त्वं भवति। नहि त्वत्पुत्रसदृशो मत्पुत्र इत्युक्ते पुत्रैक्यम्, किन्तु गुणसाम्यमेव। एवं प्रकृते सत्त्वनिर्वचनप्रकारसाम्यमेवायाति। अत एवाह – 'यादृशं ब्रह्मणः सत्त्वं तादृशं स्याद् जगत्यपि'। किञ्चास्त्वेकत्वम्, न ह्येतावताऽपरासत्त्वं भवति, नह्येकगोत्रत्वेऽपराभावो वा परस्य गोत्राभावो वा परस्यापारमार्थिकगोत्रत्वं वा भवति, किन्तूभयोरपि वास्तवगोत्रत्वम्। यथोभयोर्ब्राह्मणयोरेकब्राह्मण्याश्रयत्वेऽन्यतरस्याब्राह्मणत्वं न भवति, तथा ब्रह्म-प्रपञ्चयोरेकसत्त्वेऽपरासत्त्वं कुतः? अपि चोभयोरेकसत्त्वे ब्रह्मण एव सत्त्वम्, न प्रपञ्चस्येति कुतः? विपरीतमेव किं न स्यात्? नच – बहूनां सत्त्वे गौरवम्, एकसत्त्वे लाघवमिति – वाच्यम् ; प्रामाणिकस्य गौरवस्य न्याय्यत्वात्, प्रमाणानां वक्ष्यमाणत्वात्। यच्चोक्तम् ब्रह्मणि स्वप्रकाशज्ञानानन्दात्मकत्वं सत्त्वमिति, तदतिस्थवीयः ; तथात्वे ''सत्यं ज्ञानमनन्तं ब्रह्मे''त्यत्र ज्ञानानन्दादिपदैरेव ज्ञानत्वादेर्लब्धत्वात् सत्यपदवैयर्थ्यम्। सत्यपदेन हि सत्त्वं प्रतिपाद्यम्। सत्त्वं ज्ञानत्वं चेकमेवेति भवतैवोक्तम्। किञ्च सत्यमित्यनेनैव ज्ञानानन्दादिरूपमिति प्रतीतावान्दादिपदवैयर्थ्यम् ; सत्यमित्युक्ते तथा प्रतीतेरभावाच्च। तस्माद् ब्रह्मणि ज्ञानत्वाद्यतिरिक्तं सत्त्वं त्वया निर्वाच्यम्, तादृशमेव जगत्स्वरूपाविरोधि, इति न ब्रह्मसत्त्वेऽपि जगदसत्त्वमित्याशयः॥ ननु ब्रह्मणि सत्त्वानिर्वचनेऽपि प्रमाणवलात् तत् सत्यमित्यत आह॥ सत्त्वेति॥ जगत्यपि प्रमाणबलात् सत्त्वमास्थेयमित्याशयः। अपरिच्छिन्नत्वमिति॥ तथाचैतादृशसत्त्वस्य

तुच्छसाधारणं मिथ्यात्वमत्यन्ताभावप्रतियोगित्वादिकमेव, न तु बाध्यत्वादिकम्। तथाच पौनरुक्त्यमिति चेत्, मैवम्। स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वे तात्पर्यात्। अतो न कश्चिद्दोषः॥ असद्वैलक्षण्ये सतीति॥ असति शुक्तिरूप्ये चातिव्याप्तिवारणाय विशेषणविशेष्ये। ननु – अनारोपितत्वमारोपाविषयत्वम्। तच्चाप्रसिद्धम्। सर्वस्यापि क्षणिकत्वादिनाऽऽरोपविषयत्वादिति – चेत्, न। अनारोपितत्वमारोपितभिन्नत्वम्। तच्च मतद्वयेऽप्यस्ति घटादेः। मम मतेऽसत एवारोपितत्वात्। तव मतेऽनिर्वचनीयस्यारोपितत्वात्। घटादेर्ब्रह्मणश्च तद्भिन्नत्वात्। न चैवम् – मम मतेऽसद्वैलक्षण्ये सतीति व्यर्थमिति – वाच्यम्। मम मते तदुपरक्तबुद्धेस्तत्प्रयोजनत्वात्। परं प्रत्यतिव्याप्तिवारकत्वात्। उभयसिद्धप्रयोजनवत्त्वं विशेषणस्य, न तु प्रयोजनस्योभयसिद्धत्वमिति भावः। एतच्च लक्षणं न तार्किकादिसाधारणम्। अतो न तन्मतेऽप्रसिद्धिदोषः॥ अस्तित्वप्रकारकेति॥ अस्तित्वेनेत्यर्थः। एतच्च विषयत्वविशेषणम्। नच प्रमात्वस्य अर्थसत्त्वघटितत्वेनात्मश्रय इति वाच्यम्। प्रमात्वस्य जातिरूपत्वेनाभिमतत्वात्। न च आरोपघटितं प्रमाघटितं च सत्त्वं कथं चक्षुरादियोग्यम्? इति वाच्यम्; उपनीतस्यापि तद्योग्यत्वसम्भवात्। आत्माश्रयशङ्कां निराकरोति – अस्तित्वं चेति॥ अव्याप्तिशङ्कां निराकरोति – अतीतादिरपीति॥ ननु वर्तमानत्वप्रकारकप्रमाविषयत्वं न मिथ्यात्वविरोधि, प्रतिभासकालेऽर्थसत्त्वस्य मिथ्यात्ववादेऽपि सत्त्वादिति चेत्, न। तत्काले स्वरूपेण विद्यमानस्य कालत्रयनिषेधप्रतियोगित्व रूपमिथ्यात्वानुपपत्तेः॥ आरोपितं त्विति॥

ननु – कालसम्बन्धित्वं न मिथ्यात्वविरोधि। शुक्तिरूप्यस्यापि प्रतिभासकालसम्बन्धित्वात्। बाधेन तात्त्विककालत्रयसम्बन्धनिषेधेऽप्यतात्त्विककालसम्बन्धस्यानिषेधात्। नापि तात्त्विक कालसम्बन्धित्वं तत्। तात्त्विकत्वस्याद्याप्यनिरूपणात्। निरूपणे वा शेषवैयर्थ्यादिति – चेत्, मैवम्। तात्त्विकातात्त्विकपदार्थविभागस्याद्याप्यसत्त्वेन किंचित्कालसम्बन्धिनः सार्वकालिकनिषेधायोगात्। अत एव स्वरूपेण निषेधमनङ्गीकृत्य पारमार्थिकत्वेन निषेधः कैश्चिदुक्त, इति तस्माद् युक्तः सत्त्वग्राहकप्रत्यक्षबाधः।

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां सत्त्वलक्षणमीक्ष्यताम्॥

इति प्रत्यक्षयोग्यसत्त्वविचारः।

धूलीपटले धूमभ्रमानन्तरं धूमत्वेन सकलधूमनिष्ठवह्निव्याप्तिग्रहानुदयप्रसङ्गात्। तत्र स्वरूपतो धूमत्वाभावात्। न चेष्टापत्तिः। तदुत्तरकालमनुमित्यनुदयापत्तेः। तथाच धूमत्वज्ञानं प्रत्यासत्तिरिति वाच्यम्। तच्च धूमेन्द्रियसन्निकर्षदशायां धूमज्ञानात् प्राङ् नास्त्येव। निर्विकल्पके मानाभावात्। विशिष्टज्ञानत्वेन विशेषणज्ञानत्वेन च कार्य-कारणभावानभ्युपगमात्। अवश्यक्लृकार्यकारण भावविशेषेणैव सर्वव्यवहारोपपत्तेः। न च धूमत्वेन संनिकृष्टधूमव्यक्तिज्ञानानन्तरं तत्समानाकारमसन्निकृष्टधूमगोचरं ज्ञानान्तरमुत्पद्यत इत्यत्र मानमस्ति। 'धूमत्वेन पुरोवर्तिनं धूमं साक्षात्करोमि, न व्यवहितमि'त्यनुभवाच्च। अन्यथा 'जगतीगतसकलधूमव्यक्तीरहं साक्षात्करोमि' इत्यनुव्यवसीयेत। न चैवमनुभवमात्रशरणैरभ्युपेयते।

किञ्च सामान्यप्रत्यासत्त्यङ्गीकारे यत् प्रमेयम् तदभिधेयम्, यत् प्रमेयवत् तदभिधेयवद्' इत्यादिव्याप्तिपरिच्छेदे सार्वज्यापत्तिः। न चेष्टैव सा। 'परज्ञानविषयो घटो न वा' इत्यादिसंशयानुपपत्तेः। न च – घटत्वप्रकारकघटविषयकनिश्चयो घटसंशयविरोधी, प्रमेयमिति निश्चयस्तु घटविषयकोऽपि न घटत्वप्रकारक इति – वाच्यम्; भासमानवैशिष्ट्यप्रतियोगिन एव प्रकारत्वात्। घटत्वस्यापि प्रमेयवदिति ज्ञाने भासमानवैशिष्ट्यप्रतियोगित्वात्। स्वरूपसम्बन्धविशेषाभ्युपगमे चानिर्वचनीयवादापत्तेः, इत्यादिदूषणानि बहुतरमूहनीयानि। तस्मात् सामान्यप्रत्यासत्त्या निषेधमात्रप्रतियोगित्वोपस्थितौ तदभावग्रहाद् बाध इत्यनुपपन्नमेव – इति।

अत्र ब्रूमः। माऽस्तु सामान्यलक्षणा, तथाऽप्यनागतपाकादेरिव स्वसमानाधिकरण यावदत्यन्ताभावज्ञानमनुमानादिना भविष्यति। तथाहि घटः अत्यन्ताभावसमानाधिकरणः, धर्मत्वादित्यनेन वा, कपालम् अत्यन्ताभाववत्, वस्तुत्वादित्यनेन वा घटसमानाधिकरण यावदत्यन्ताभावसिद्धिः। न च – यत्किञ्चिदत्यन्ताभावेनैवानुमितेर्विषयलाभेन न तस्या यावदत्यन्ताभावविषयकत्वमिति – वाच्यम्। साध्यतावच्छेदकाक्रान्तस्य पक्षेऽबाधितस्य सर्वस्यैव भानसम्भवात्। अन्यथा विनिगमनाविरहेण नैकस्यापि भानं स्यात्। अत एवानेकवह्निमति पर्वते जायमानाया वह्न्यनुमितेर्विनिगमनाविरहेण तत्र सर्ववह्निविषयत्वम्। नच – घटसमानाधिकरणयावदत्यन्ताभावज्ञानेऽपि तत्प्रतियोगित्वाभावो योग्यप्रतियोगिकः कथं प्रत्यक्षविषयः? इति वाच्यम्। उत्तोपलम्भापादनसम्भवेनैवाभावस्य योग्यत्वात्। स्वसमानाधिकरणयावदत्यन्ताभावप्रतियोगिभिन्नत्वरूपसत्त्वप्रत्यक्षे प्रतियोगिप्रत्यक्षत्वस्यानपेक्षणीय त्वाच्च। तस्माद् युक्तं प्रत्यक्षस्य सत्त्वग्राहकत्वमिति।

॥ केचित्त्विति॥ परमते तुच्छेऽतिव्याप्तिवारणाय पराभिप्रेतेति। परैरभिप्रेतस्य तुच्छसाधारणमिथ्यात्वस्याभावः सत्त्वमित्यर्थः। अतस्तुच्छे नातिव्याप्तिः। ननु पराङ्गीकृतं

ननु – अभावज्ञानस्य प्रतियोगिज्ञानजन्यत्वात् प्रौढप्रकाशयावत्तेजोविरहरूपस्य तमसः प्रत्यक्षता न स्यात्, सामान्यप्रत्यासत्तिं विना प्रतियोग्यनुपस्थितेरिति – चेत् न। अस्मन्मते तमसो भावान्तरत्वात्। न च – तथापि तद्व्यञ्जकत्वात् तदपेक्षेति – वाच्यम्; स्वरूपत एव तादृक्तेजोविरहस्य तमोव्यञ्जकत्वम्, नतु ज्ञातस्य। मानाभावात्, इत्यभ्युपगमात्। अन्येषां तादृक्तेजोविरहज्ञानस्यापेक्षितत्वेऽपि प्रतियोगितावच्छेदकप्रकारकज्ञानादेव तत्संभवेन तदर्थं सकलप्रतियोगिज्ञानजनिकायाः सामान्यप्रत्यासत्तेरनुपयोगात्।

न च – गोत्वाभावज्ञानं गोत्वत्वप्रकारकज्ञानजन्यम्। तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपं सामान्यप्रत्यासत्तिमन्तरेण न शक्यमवगन्तुमिति साम्प्रतम्। यत्किञ्चिद्गोव्यक्तेरेव गोत्वत्वनिरूपकत्वात्। एतेन प्रागभावप्रतीतिरपि व्याख्याता।

किंचानागतज्ञानस्यापेक्षितत्वेऽप्यनुमानादेव तद् भविष्यति। तथाच न्यायकुसुमाञ्जलौ–

शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः॥

इत्यत्र शङ्कोपपादकमनागतज्ञानमनुमानादेवेत्युक्तम्। अनुमानं च वर्तमानपाकः, पाकपूर्वकालीनः, पाकत्वादतीतपाकवदित्यादि। न च चरमपाके व्यभिचारः। साध्यसिद्ध्युपजीवकस्य व्यभिचारज्ञानस्यादोषत्वात्। अन्यथा सिद्ध्यसिद्धिव्याघातात्। किञ्च शब्दादपि सकलधूम-पाकादिगोचरज्ञानसम्भवः। न च – शङ्कादिपूर्वं शब्दस्योपस्थितिनियमाभाव इति – वाच्यम्। कदाचिदेव शब्दादनुभूतस्य तदानीं प्रमुष्टतत्ताकस्मृतिसम्भवात्। ननु – अनुमितेर्विशेषणज्ञानजन्यत्वेन सामान्यप्रत्यासत्तिसिद्धिः। न चानुमानात् तद्विशेषणज्ञानम्। अनवस्थानादिति चेत्, न। विशेषणतावच्छेदकप्रकारकज्ञानादेव साध्यविशेषणकपक्षविशेष्यकानुमितिसम्भवात्।

एतेन – 'सुरभि चन्दनम्' इत्यादिविशिष्टज्ञानाय कल्पिता ज्ञानलक्षणा प्रत्यासत्तिरपि – निरस्ता। चन्दनत्वेन सुरभित्वानुमानोपपत्तेः। अन्यथा साध्यविशिष्टपक्षप्रत्यक्षोपपत्तेरनुमानमात्रोच्छेदप्रसङ्गात्। न च – अभावसाध्यककेवलव्यतिरेकिणि साध्यप्रसिद्धेरनङ्गत्वात् तत्र क्लृप्तायाः अनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो बलवत्त्वमिति – वाच्यम्। अर्थापत्तिवादिभिरस्माभिस्तदनभ्युपगमात् 'पर्वतवर्तिधूमो वह्निव्याप्यः' इति परामर्शात् साध्यविशेष्यकपक्षविशेषणकानुमित्यभ्युपगमे तु नैव काऽप्यनुपपत्तिः। अनुमितेः पक्षविशेष्यकत्वनियमे मानाभावात्। किञ्च धूमत्वसामान्यं न स्वरूपतया प्रत्यासत्तिः।

योग्यतारूपत्वाभावात्। उक्तोपलम्भापादनेनैवाभावस्य योग्यत्वात्। तस्य च प्रकृतेऽपि सम्भवादित्युक्तत्वात्। असद्भेदरूपसत्त्वप्रत्यक्षत्वस्य च प्रतियोगिप्रत्यक्षं विनाऽप्युपपत्तेश्चेति।

अत्र केचित् स्वसमानाधिकरणयावदभावप्रतियोगित्वाभावरूपसत्त्वज्ञानाभावाशया प्रतियोगिज्ञानाभावं वक्तुं सामान्यस्य प्रत्यासत्तित्वं निराकुर्वन्। तथाहि – सामान्यं नेन्द्रियप्रत्यासत्तिः मानाभावात्। न च – महानसीयधूमेन्द्रियसंयोगेन तत्रैव व्याप्तिग्रहे पर्वतीयधूमादनुमितिर्न स्यादिति सामान्यस्य धूमत्वादेः प्रत्यासत्तित्वे तस्यापि प्रत्यासन्नत्वात् तत्र व्याप्तिग्रहे ततोऽनुमितिरिति वाच्यम्। पर्वतीयधूमेन्द्रियसन्निकर्षदशायां धूमत्वेन प्रकारेण गृहीत-स्मृतव्याप्तेस्तत्र वैशिष्ट्यग्रहसम्भवात्। 'सुरभि चन्दनम्' इतिवद् विशेष्येन्द्रियसन्निकर्ष विशेषणज्ञानतदुभयासंसर्गाग्रहरूपाया विशिष्टज्ञानसामग्र्याः सत्त्वाद्। व्याप्तिस्मृतिप्रकारेण पक्षधर्मताज्ञानस्य हेतुता। महानसीय एव धूमो धूमत्वेन व्याप्तिस्मृतिविषयो भवति। धूमत्वेन पर्वतीयधूमज्ञानं चापि जातम्। तच्च सामान्यलक्षणां विनैव। तावतैवानुमितिसिद्धिः। न च – सामान्यप्रत्यासत्तिं विना 'धूमो वह्निव्यभिचारी न वा' इत्यनुभूयमानः संशयो न स्यात्। प्रसिद्धधूमे वह्निसम्बन्धावगमात्, अप्रसिद्धस्य चाज्ञानादिति – वाच्यम्। प्रसिद्धधूम एव तत्तद्धूमत्वादिना व्याप्तिनिश्चयेऽपि धूमत्वेन तत्संशयोपपत्तेः। तथाचोक्तं मणिकृता – ''घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वादिना तत्र संशयसिषाधयिषे भवतः'' इति। निश्चितेऽप्यर्थे प्रामाण्यसंशयाहितसंशयवद् धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशयादपि तादृशसंशयोपपत्तेश्च । एतेन – वायू रूपवान् न वेति संशयोऽपि– व्याख्यातः।

ननु सिद्धे नेच्छा, किं त्वसिद्धे। सा च स्वसमानविषयकज्ञानसाध्या। तच्च ज्ञानं न सामान्यप्रत्यासत्तिं विना। न च – सिद्धगोचरसुखत्वप्रकारकज्ञानादेवाज्ञाते सुखे भवतीच्छा, समानप्रकारकत्वमात्रस्य नियामकत्वादिति – वाच्यम्। रजतत्वेन रजतेऽनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्गात्। न च प्रकाराश्रयत्वमपि नियामकम्। रजतभ्रमात् शुक्ताविच्छानुदयप्रसङ्गात्। तथा च समानप्रकारकत्वे सति समानविषयकत्वं तन्त्रम्। अत एवाख्यातिपक्षे रजतस्मरणस्यैव शुक्तौ प्रवर्तकत्वमित्यपास्तमिति – चेत्, न। यतो रजतभ्रमात् शुक्ताविच्छा नास्त्येव, किंत्वनिर्वचनीये रजते। प्रकाराश्रयत्वं नियामकं वदन्नख्यातिवादी परमेवं विभीषणीयः। तथाच प्रकाराश्रयत्वम्य नियामकत्वादन्यथाख्यातिपक्षोऽपि निरस्त एव। न च तर्हि भ्रमत्वं न स्यात्। 'इदं रजतम्' इति भ्रमत्वाभिमतज्ञानस्य व्यधिकरणप्रकारकत्वानभ्युपगमादिति – वाच्यम्। बाधितविषयत्वेन हि भ्रमत्वम्, नतु व्यधिकरणप्रकारकत्वेन। तस्यापि विषयबाधप्रयोज्यत्वाच्च ।

स्वदेश-कालवृत्तिनिषेधप्रतियोत्वाभावे गृह्यमाणे कालत्रयमध्ये वर्तमानकालस्य, सर्वदेशमध्ये प्रकृतदेशस्यापि प्रवेशेन तत्र निषेधप्रतियोगित्वाभावस्य गृहीतत्वात् तत्संवलित कालत्रयवर्तिसर्वदेशीयनिषेधप्रतियोगित्वरूपं मिथ्यात्वं नानुमानेन ग्रहीतुं शक्यत इति चेत्, न। स्वदेश-कालवर्तिसकलनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेन तदभावस्य सुतरां तदयोग्यत्वात्। स्वदेश-कालवृत्तियत्किंचिन्निषेधाप्रतियोगित्वस्य च मिथ्यात्वाविरोधित्वात्। स्वप्रतियोगिकात्यन्ताभावासामानाधिकरण्यस्य च स्वप्रतियोगि कात्यन्ताभावाप्रसिद्ध्या केवलान्वयिनि सम्बन्धभेदेन घटादौ चासिद्धेः। स्वात्यन्ताभाववद्यावदधिकरणावृत्तित्वं वा स्वात्यन्ताभाववद्यत्किंचिदधिकरणावृत्तित्वं वेति विकल्पेन पूर्वोक्तदोषाच्च। तस्मात् प्रकारान्तरस्य निरूपयितुमशक्यत्वात् मिथ्यात्वाविरोधित्वाच्च स्वसमानाधिकरणयावदत्यन्ताभावप्रति योगित्वाभावरूपमेव सत्त्वमुपेयम्। तच्च न चक्षुरादियोग्यमित्युक्तम् – इति।

अत्र ब्रूमः। सर्वदेश-कालवृत्तिनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेऽपि तदभावरूपसत्त्वस्य तद्योग्यत्वं सम्भवति, घट आकाशत्वाभाववत्। पट आकाशत्वसत्त्वे तस्यानेकव्यक्तिगतत्वेन जातित्वापत्त्या घटत्ववत् तदुपलम्भापादनवद् घटे तादृशाभावप्रतियोगित्वोपलम्भस्याप्या पादनसंभवात्। घटवृत्तिसंसर्गाभावप्रतियोगित्वस्य प्रागभावप्रतियोगित्वादिवद् योग्यत्वात्। घटादिज्ञानानन्तरमयमिहैव नान्यत्रेत्यन्यनिष्ठाभावं प्रति प्रतियोगित्वस्यानुभूयमानत्वात्। न चैवम् – अन्यनिष्ठाभावप्रतियोगित्ववदन्यनिष्ठाभावस्यापि चक्षुरादिना ग्रहः स्यादिति – वाच्यम्। विशेष्यसन्निकर्षाद्यभावेन न तस्य ग्रहणम्। प्रतियोगित्वस्य स्वरूपविशेषात्मनो योग्यत्वेन तदुपलम्भापादनसंभवात्। न च दृष्टान्तासम्भवः। मम मते शुक्तिरूप्यस्यैव तादृशनिषेधप्रतियोगित्वेन साक्षिगोचरस्य दृष्टान्तत्वसम्भवात्। तार्किकादिमते व्यतिरेकव्याप्ति सम्भवाच्च। यद्वा – तादृशनिषेधप्रतियोगिभिन्नत्वं सत्त्वम्। तदन्योन्याभावस्तु प्रतियोग्य प्रत्यक्षत्वेऽपि स्तम्भे पिशाचान्योन्याभाववत् प्रत्यक्ष एवेत्यसद्भेदरूपसत्त्वप्रत्यक्षोपपत्तिरिति। स्वसमानाधिकरणयावदत्यन्ताभावप्रतियोगित्वाभावरूपमपि सत्त्वं चक्षुरादियोग्यमेव। तथाहि – यस्मिन् कस्मिंश्चिद् देश-कालवृत्तिनिषेध एतद्देशैतत्कालवृत्तिनिषेधत्वं ज्ञात्वा तेन प्रत्यासत्तिभूतेनोपस्थापितानां स्वदेश-कालवृत्तिसकलनिषेधानां प्रतियोगित्वस्याभावो घटे ग्राह्य इति।

ननु– उक्तविधया सामान्यलक्षणप्रत्यासत्त्या सर्वनिषेधेपूपस्थितेष्वपि तत्प्रतियोगित्वा भावश्चक्षुराद्ययोग्य एव। योग्यप्रतियोगिक एव हि संसर्गाभावो योग्यः। न चाशेषनिषेधानां प्रतियोगित्वमतीन्द्रियसाधारणं चक्षुरादियोग्यम् – इति मैवम्। घटे मनस्त्वाभावस्य, जलपरमाणौ पृथिवीत्वाभावस्य प्रत्यक्षत्वाप्रत्यक्षत्वानुपपत्त्या प्रतियोगिप्रत्यक्षत्वस्य संसर्गाभावप्रत्यक्षे

'सर्वसंसर्गकप्रतियोगिताके'त्यपि विशेषणम्। तेन सर्वस्मिन् काले सर्वस्मिन् देशे सर्वावच्छेदेन विद्यमानो योऽत्यन्ताभावः तत्प्रतियोगित्वेऽप्याकाशादौ नाव्याप्तिः; आकाशादेः समवायेनारोप्यसम्बन्धेनोक्तरूपात्यन्ताभावं प्रति प्रतियोगित्वेऽप्याकाशाद्यत्यन्ताभावस्य सर्वसंसर्गकप्रतियोगित्वाभावात्। संयोगादिना सम्बन्धेनाकाशस्य विद्यमानत्वेन तेन सम्बन्धेन तदत्यन्ताभावासम्भवात्। तदेवाह – गगनादेरपीति॥ केवलान्वयी नेति॥ सर्वसंसर्गकप्रतियोगिताको नेत्यर्थः। उक्तत्वेनेति॥ उक्तप्रायत्वेनेत्यर्थः। देश-कालावपि 'सदा सर्वत्र देश-कालौ' इत्यबाधितप्रतीत्या प्रमेयत्वाभिधेयत्ववत् स्ववृत्ती, अन्योन्यवृत्ती च। अन्यथा त्वन्मतेऽपि तयोः प्रातिभासिकत्वं स्यात् इत्यत्रेत्यर्थः॥

ननु संयोग-तदत्यन्ताभावयोरैकाधिकरण्याङ्गीकारे संयोग-तदत्यन्ताभावयोरवच्छेदकभेदेन भिन्नाश्रितत्वस्यैवानुभवेन सत्त्वपक्षे सामानाधिकरण्यायोगादित्यनेन विरोध इति – चेत्, न। तार्किकादिसाधारणसत्त्वलक्षणपरैतद्ग्रन्थे संयोग-तदत्यन्ताभावयोः सामानाधिकरण्याङ्गीकारस्य मतान्तरे तदनङ्गीकारप्रतिपादकोदाहृतग्रन्थेन विरोधाभावात्। अत्र संयोग-तदत्यन्ताभावयोः सामानाधिकरण्यानङ्गीकाराभिप्रायत्वे यत्र संयोगः तत्र तदत्यन्ताभावो नेत्येवावक्ष्यत्, न पुनर्यदवच्छिन्ने संयोगः तदवच्छिन्ने तदत्यन्ताभावो नेतीति। सर्वकाले सर्वदेशे सर्वावच्छेदेन संसृष्टसर्वसंसर्गकप्रतियोगिताकाभावं प्रति प्रतियोगित्वमसत्त्वं, तदभावः सत्त्वमिति तार्किकादिसाधारणं सत्त्वलक्षणमभिधाय विशिष्यापि सत्त्वलक्षणमाह – अश्वे गोत्वमिति॥

सार्वकालिकनिषेधप्रतियोगित्वं तुच्छस्यैव, न पुनर्घटादेः; अश्वे गोत्वं नास्तीत्यत्रापि गोत्वाश्वसंसर्ग एव निषिध्यते, स चासन्नेव, न तु गोत्वमिति ये मन्यन्ते तेषां मते सार्वकालिकनिषेधप्रतियोगित्वमसत्त्वम्, तदभावः सत्त्वमित्येव लक्षणम्। देशपदं तु न देयम्। अतस्तद्विशेषणीभूतसर्वावच्छेदेनेत्यपि न देयम्। आकाशादेरत्यन्ताभावप्रतियोगित्वाभावात् सत्त्वलक्षणे तत्राव्याप्त्यभावात् सर्वसंसर्गकप्रतियोगिताकेत्यपि न देयमेव। अन्योन्याभावस्य भावाभावस्वरूपत्वेन न तमादायाव्याप्तिः। न चैवम् – अत्यन्ताभावभिन्ने पटादावव्याप्तिरिति वाच्यम्। तादृशात्यन्ताभावं प्रति घटादेर्निरूपकत्वमात्राङ्गीकारेण तद्विरहत्वरूपतत्प्रतियोगित्वाभावात्।

अत्र वदन्ति नैतादृशं सत्त्वं चक्षुरादियोग्यम्। चक्षुराद्ययोग्यानेकपदार्थघटितत्वेनैतादृशसत्त्वग्रहणे चक्षुरादेरसामर्थ्यात्। न हि सर्वदेशीय त्रैकालिक निरुक्तनिषेधप्रतियोगित्वं कस्यचित् प्रत्यक्षम्, येन तदभावः प्रत्यक्षो भवेत्। ननु

विनैव भविष्यतीति न सत्त्व-प्रमयोरन्योन्यापेक्षा, इति यथाकथंचित् प्रमाविषयत्वमेव सत्त्वमस्त्विति द्वितीयं पक्षं दूषयति – असतोऽपीति॥ तृतीयं दूषयति – साक्षाच्चेति॥ चतुर्थं दूषयति – सत्त्वप्रकारकेति॥ पञ्चमं दूषयति – असत्त्वेति॥ अत एवेति॥ चतुर्थपक्षवद् विकल्प्य तद्दूषणेभ्य एवेत्यर्थः॥ सतोऽपीति॥ तथाचासम्भव इत्यर्थः। चतुर्थ-पञ्चमषष्ठानां सत्त्वप्रकाराणां प्रमा-भ्रमघटितत्वेन प्रत्यक्षायोग्यत्वमपि बोध्यम्॥ शुक्तिरूप्ययोरिति॥ शुक्तेः परिच्छिन्नत्वेऽप्यसत्त्वाभावात्, शून्यस्यापरिच्छिन्नत्वेऽपि सत्त्वाभावादव्याप्त्यतिव्याप्तिभ्यां नापरिच्छिन्नत्वं सत्त्वमित्यर्थः। शुक्ति-रूप्ययोः परिच्छिन्नयोर्मध्ये रूप्य एवासत्त्वं न तु शुक्तौ; तस्या अधिष्ठानत्वेनासत्त्वाभावात्। ब्रह्म-शून्ययोरपरिच्छिन्नयोर्मध्ये ब्रह्मण्येव सत्त्वं न तु शून्यस्येत्येवं व्यवस्थितत्वेन नियतत्वेनापरिच्छिन्नत्वातिरिक्तं सत्त्वमन्यदेव वाच्यम्। तच्च भ्रमाधिष्ठानत्वेन शुक्तिकादिजगतोऽपि भविष्यतीति भावः।

ननु जगद्ब्रह्मणोरेकसत्त्वे जगतोऽसत्त्वमेव स्यात्। तथाहि – स्वप्रकाशाद्वितीयचैतन्यरूपत्वमेव ब्रह्मणः सत्त्वम्। तदेव चेद् जडस्यापि जगतः तदा रजतत्वविरोधिशुक्तिसत्तया रजतस्येव जडत्वविरोधिस्वप्रकाशसत्तया जगतः स्वरूपतो मिथ्यात्वोपपत्तेः। चैतन्यस्यैव चावच्छिन्नाज्ञानविषयत्वेन सर्वभ्रमाधिष्ठानत्वाभ्युपगमात् न भ्रमाधिष्ठानत्वेन शुक्त्यादेः सत्त्वसिद्धिरिति – चेत्, मैवम्; भावानवबोधात्। तवाऽत्मनि यत् सत्त्वं, तदेवेह ममेत्यस्य यः स्वभावो ब्रह्मणः स एव जगत इति नार्थः। किन्तु यादृशेन सत्त्वेन मिथ्यात्वप्रतिपक्षेण सत्यशब्दावगतेन ब्रह्मणि मिथ्यात्वाभावसंप्रतिपत्तिः, तादृशेन 'सन् घटः' इति प्रत्यक्षसमधिगम्येन घटादिगतेन घटादेरपि मिथ्यात्वाभावसम्प्रत्यय इति। न हि स्वप्रकाशत्वादि मिथ्यात्वप्रतिपक्षभूतम्। 'सर्वं प्रमेयम्' इति ज्ञानस्य स्वप्रकाशस्यापि तव मते मिथ्यात्वात्। अवेद्यत्वादिरूपस्वप्रकाशत्वयुक्तस्याद्वितीयस्य शून्यस्यापि सद्विविक्तत्वादिरूपमिथ्यात्वयुक्तत्वाच्च। ब्रह्मविषयकश्रौतसत्यत्वव्यवहारप्रयोजकराहित्यस्यैव प्रपञ्चे मां प्रति त्वया सिषाधयिषिततया ब्रह्मणि सत्यत्वव्यवहारं प्रति स्वप्रकाशत्वाद्वितीयत्वादेः प्रयोजकत्वे प्रपञ्चे मिथ्यात्वानुमानेन स्वप्रकाशत्वाद्वितीयत्वादिविरहस्यैव साध्यतापत्तौ सिद्धसाधनापत्तेरिति। तस्माद् युक्तम् – यदेवात्मनि सत्त्वम्, तदेवेह ममेति॥ तं प्रतीति॥ त्रिकालसर्वदेशीयनिषेधं प्रतीत्यर्थः। तथाच तत्र नातिव्याप्तिरिति भावः। श्लोकं व्याचष्टे – सर्वदेशेति॥ सम्बन्धीति॥ संसृष्टेत्यर्थः। सर्वावच्छेदेनेत्यपि बोध्यम्। अत एव संयोगे नाव्याप्तिरित्याह – यदवच्छिन्न इति॥ वृक्षभिन्ने सर्वत्र देशे विद्यमानस्य संयोगविशेषात्यन्ताभावस्य वृक्षे संयोगो नेति प्रतीत्या वृक्षेऽपि सत्त्वेन सर्वदेशीयस्यापि संयोगात्यन्ताभावस्य सर्वावच्छेदेन वृत्त्यभावाद् यदवच्छिन्ने संयोगः तदवच्छिन्ने तदत्यन्ताभावो नेति न तत्राव्याप्तिः।

तु श्रौते ब्रह्मज्ञान एव, न तद्भिन्नज्ञाने। तात्पर्यवद्भेदत्वेनैव तत्त्वावबोधकत्वात्। तथा च प्रपञ्चप्रत्यक्षस्य तात्त्विकत्वागोचरत्वेऽप्यतत्त्वावेदकत्वं सङ्गच्छते। सार्वलौकिकी पारमार्थिकत्वप्रसिद्धिस्तु जलगतपिपासोपशमनसामर्थ्यप्रसिद्धिवत् परोक्षतयाऽप्युपपन्ना नापरोक्षत्वपर्यवसायिनी।

तस्मादध्यक्षयोग्यस्य सत्त्वस्येहानिरुक्तितः।
नाध्यक्षबाधो मिथ्यात्वलिङ्गस्यात्रोपपद्यते॥

न लौकिकं न सामान्यजन्यं साक्ष्यात्मकं न च॥१॥
प्रत्यक्षं बाधते लिङ्गं मिथ्यात्वस्यानुमापकम्॥

इति प्रत्यक्षयोग्यसत्त्वानिरुक्त्या प्रत्यक्षबाधोद्धारः॥२॥

न्यायामृततरङ्गिणी

प्रतिज्ञाश्रयं प्रबलप्रमाणविरोधाख्यं दोषं बाधं विवक्षुः प्रमाणज्येष्ठप्रत्यक्षविरोधं तावदाह – सन् घट इतीति॥ प्रत्यक्षगृहीतसत्त्वविरोधिमिथ्यात्वानुमानं प्रत्यक्षबाधितम्, अग्न्यनौष्ण्यानुमानवदित्यर्थः। ननु न मिथ्यात्वानुमानस्य प्रत्यक्षविरोधः; प्रत्यक्षगृहीतसत्त्वस्यानुमानगृहीताविरोधित्वात्, अनुमानगृहीताविरोधिसत्त्वस्य च प्रत्यक्षेणाग्रहादित्यभिप्रायेण सत्त्वं पृच्छति – ननु किमिदमिति॥ प्रत्यक्षसिद्धमनुमानविरोधीति शेषः॥ परजातिरिति॥ द्रव्यत्व-गुणत्व-कर्मत्वव्यापिका सत्ताजातिर्वेत्यर्थः। आद्य-द्वितीय-तृतीयान् निराकरोति नाद्य इति॥ सिद्धसाधनादिति॥ अनुमीयमानमिथ्यात्वेनाविरुद्धतया परजात्यादिरूपस्य सत्त्वस्य मिथ्यात्ववादिना मयाऽपि प्रत्यक्षविषयत्वस्वीकारादेतादृशसत्त्वं प्रत्यक्षविषय इति वचनं मां प्रति सिद्धसाधनमित्यर्थः। चतुर्थेऽपि स्वातन्त्र्येण स्वाभावाविषयकप्रमाविषयत्वं वा? यथाकथंचित् प्रमाविषयत्वं वा? साक्षात् प्रमाविषयत्वं वा। सत्त्वप्रकारकप्रमाविषयत्वं वा? असत्त्वाप्रकारकप्रमाविषयत्वं वा? इति विकल्पानभिसन्धायाद्यं दूषयति – असतीति॥ असता सह संयोगादीन्द्रियमन्निकर्षव्याप्त्याद्यभावेनासति स्वातन्त्र्येण प्रमाणाप्रवृत्तेः प्रमाणप्रवृत्त्यर्थं प्रमाणप्रवृत्तेः पूर्वं स्वरूपसत्यत्वं वक्तव्यम्। तच्च प्रमाणप्रवृत्त्यधीनप्रमायां निर्वक्ष्यति इति सत्त्व-प्रमयोरन्योन्यापेक्षा स्यादित्यर्थः। ननु स्वातन्त्र्येण प्रमाणप्रवृत्त्यर्थमेव संयोगादीन्द्रियसन्निकर्षापेक्षा। अन्यार्थप्रवृत्तप्रमाणजन्यप्रमाविषयत्वं तु संयोगादिसन्निकर्षादिकं

त्रिकालाबाध्यविषयकत्वम्। किंतु शुक्तिरूप्यादिज्ञानव्यावृत्तं व्यवहारकालाबाध्यविषयक सकलज्ञानवृत्तिव्यवहारकालाबाध्यविषयकत्वमेव। तच्च न भाविकालबाधविरोधीत्युक्तम्। भाविकालबाधतदभावौ च न मानं विना साक्षिणा ग्रहीतुं शक्यौ। तस्य विद्यमानमात्रग्राहित्वादिति चोक्तम्। ननु तर्हि देहात्मैक्यज्ञानमुष्णं जलमित्यादि ज्ञानं च प्रमा स्यात्। व्यवहारदशायां विषयाबाधाद् इति चेन्न। आब्रह्मज्ञानमबाधितत्वेन तेषामपि घटादिज्ञानसमानयोगक्षेमत्वात्।

ननु कालान्तरस्थमपि यद् बाधकं तदपि किं यत्कालावच्छेदेन अनेन स्वार्थो गृहीतस्तत्कालावच्छेदेनैव तन्निषेधति, उतान्यकालावच्छेदेन? आद्ये कथमस्य प्रामाण्यम्? अन्त्ये तु अनित्यत्वादिकमेव इति चेन्न। अबाध्यत्वरूपप्रामाण्यस्य प्रपञ्चज्ञाने मयाऽनङ्गीकारात्। यत्कालावच्छेदेनैवानेन स्वार्थो गृहीतस्तत्कालावच्छेदेनैव तन्निषेधाभ्युपगमात्। तच्च प्रामाण्यं मयाऽभ्युपेयते यद् व्यवहारदशायां विपरीतप्रमारूपबाधकस्यानुत्पन्नत्वादस्त्येव। न च यद् भवतां घटादिबुद्धेः प्रातिभासिकबुद्धितो वैलक्षण्यं विषयस्य व्यावहारिकसत्त्वसाधकं तदेवेह मम विषयस्य पारमार्थिकसत्त्वसाधकमस्त्विति वाच्यम्। प्रातिभासिकबुद्धिवैलक्षण्यं हि घटादिबुद्धेः सप्रकारकज्ञानाबाध्यविषयत्वादिरूपम्। तन्न पारमार्थिकसत्त्वं घटादेः साधयितुं शक्तम्। देहात्मैक्यज्ञाने ब्रह्मज्ञानाव्यवहितभ्रमे च व्यभिचारात्। ननु – 'घटस्सन्', 'रूप्यं मिथ्या' इति प्रतीत्योरविशेषे कथं 'घटो मिथ्या', रूप्यमिथ्यात्वं न मिथ्या' इति विशेषः? न च तदपि मिथ्यैव, रूप्यतात्त्विकत्वापत्तेः इति चेन्न। मिथ्यात्वमिथ्यात्वेऽपि यथा न रूप्यस्य तात्त्विकत्वं तत्रोपपत्तेरुक्तत्वात्। न च पारमार्थिकसत्त्वस्य प्रत्यक्षागोचरत्वे तन्निषेधश्रुतीनां अप्रसक्तप्रतिषेधकता स्यादिति वाच्यम्। तासां चक्षुरादिप्रसक्ततनिषेधपरत्वात्। पारमार्थिकत्वेन द्वैतनिषेधपरत्वेऽपि नाप्रसक्तनिषेधकत्वम्। परोक्षप्रसक्तेः संभवात्। 'नान्तरिक्षेऽग्निश्चेतव्यः' इत्यादिवदप्रसक्तप्रतिषेधस्याप्युपपत्तेश्च। न च अतात्त्विकप्रपञ्चे यदि तात्विकत्वमप्यध्यक्षेण न गृह्यते कथं तर्हि तस्यातत्त्वावेदकत्वम्? न हि तदेव तत्त्वेनावेदयदतात्त्विकं नाम, दृश्यते च सार्वलौकिकः प्रपञ्चे पारमार्थिकत्वानुभव इति वाच्यम्। न ह्यस्माकं तत्त्वावेदकत्वं तद्वति तत्प्रकारकत्वम्, तद्भिन्नत्वमतत्त्वावेदकत्वम्। किंत्वबाधितविषयकत्वं तत्त्वावेदकत्वम्, बाधितविषयत्वं चातत्त्वावेदकत्वम्। अबाधितविषयत्वं

तच्च धूमेन्द्रियसन्निकर्षदशायां धूमज्ञानात् प्राङ्नास्त्येव। निर्विकल्पके मानाभावात्। विशिष्टज्ञानत्वेन विशेषणज्ञानत्वेन च कार्यकारणभावानभ्युपगमात्। अवश्यकृप्तकार्यकारण भावविशेषेणैव सर्वव्यवहारोपपत्तेः। न च धूमत्वेन सन्निकृष्टधूमव्यक्तिज्ञानान्तरं तत्समानाकारमसन्निकृष्टधूमगोचरं ज्ञानान्तरमुत्पद्यत इत्यत्र मानमस्ति। धूमत्वेन पुरोवर्तिनं धूमं साक्षात्करोमि न व्यवहितमित्यनुभवाच्च। अन्यथा जगतीगतसकलधूमव्यक्तीरहं साक्षात्करोमीत्यनुव्यवसीयेत। न चैवमनुभवमात्रशरणैरभ्युपेयते। किं च सामान्यप्रत्या सत्त्यङ्गीकारे यत् प्रमेयम्। तदभिधेयम्, यत्प्रमेयवत् तदभिधेयवदित्यादिव्याप्तिपरिच्छेदे सार्वज्ञ्यापत्तिः। न चेष्टैव सा। परज्ञानविषयो घटो न वेत्यादिसंशयानुपपत्तेः। न च घटत्वप्रकारकघटविषयकनिश्चयो घटसंशयविरोधी। प्रमेयमिति निश्चयस्तु घटविषयोऽपि न घटत्वप्रकारक इति वाच्यम्। भासमानवैशिष्ट्यप्रतियोगिन एव प्रकारत्वात्। घटत्वस्यापि प्रमेयमिति ज्ञाने भासमानवैशिष्ट्यप्रतियोगित्वात्। घटत्वप्रकारकनिश्चयस्य घटत्वज्ञानजन्यत्व विशेषणाददोष इति चेत्, न। विशेषणज्ञानत्वेनैव तस्य जनकता वाच्या। तस्याः प्रागेव निरासात्। स्वरूपसंबन्धविशेषाभ्युपगमे चानिर्वचनीयवादापत्तेः इत्यादिदूषणानि बहुतरमूहनीयानि। तस्मात् सामान्यप्रत्यासत्त्या निषेधमात्रप्रतियोगित्वोपस्थितौ तदभावग्रहाद् बाध इत्यनुपपन्नमेव। इति सामान्यप्रत्यासत्तिभंगेन लौकिकालौकिकप्रत्यक्षबाधोद्धारः।

अथ साक्षिबाधोद्धारः। ननु प्रत्यक्षस्य वर्तमानमात्रग्राहित्वे शुक्तिरूप्यादेः प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं कथं प्रत्यक्षं स्यात्? अथ तत्र रजतत्वविरोधिशुक्तित्वे साक्षात्कृते तदन्यथानुपपत्त्या च रजतत्वाभावे निश्चिते मिथ्यैव रजतमभादिति तादृङ्निषेधप्रत्ययः स्वसंबन्धसर्वावभासकेन साक्षिणैवोपपन्नः, तर्हि साक्षात् स्वविषयस्य गगनादेर्भाविकालनिषेधाप्रतियोगित्वं सकलकालग्राहिणा साक्षिणा गृह्यतामिति चेन्न। साक्षिणो विद्यमानसर्वावभासकत्वेनाविद्यमानभाविबाधाभावभासकत्वानुपपत्तेः। साक्षिज्ञानस्य भ्रमप्रमासाधारणत्वेन प्रमाणाबाधकत्वाच्च। ननु ज्ञानप्रामाण्यं गृह्णन् साक्षी घटादिगतमबाध्यत्वं गृह्णात्येव। न हि विषयाबाधमनन्तर्भाव्य प्रामाण्यग्रहणं नाम इति चेन्न। व्यवहारकालाबाध्यत्वमात्रेण प्रवृत्तावपि संवादोपपत्तेः। तद्रूपगतप्रामाण्यस्य साक्षिणा ग्रहणेऽपि विरोधाभावात्। न हि घटादिज्ञानस्य संवादिप्रवृत्तिजनकतावच्छेदकं प्रामाण्यं

– वाच्यम्। स्वरूपसत एव तादृक्तेजोविरहस्य तमोव्यञ्जकत्वम्, न तु ज्ञातस्य मानाभावादित्यभ्युपगमात्। अन्येषां मते तादृक्तेजोविरहज्ञानस्यापेक्षितत्वेऽपि प्रतियोगितावच्छेदकप्रकारकज्ञानादेव तत्संभवेन तदर्थं सकलप्रतियोगिज्ञानजनिकायाः सामान्यप्रत्यासत्तेरनुपयोगात्। न च गोत्वाभावज्ञानं गोत्वत्वप्रकारकज्ञानजन्यम्। तच्च गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपं सामान्यप्रत्यासत्तिमन्तरेण न शक्यमवगन्तुमिति साम्प्रतम्। यत्किञ्चिद्गोव्यक्तेरेव गोत्वत्वरूपत्वात्। एतेन प्रागभावप्रतीतिरपि व्याख्याता। किञ्च अनागतज्ञानस्यापेक्षितत्वे अनुमानादेव तद्भविष्यति। तथाच न्यायकुसुमाञ्जलौ-

"शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का कुतस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः॥"

इत्यन्त शङ्कोपपादकमनागतज्ञान मनुमानादेवेत्युक्तम्। अनुमानं च - वर्तमानपाकः पाकपूर्वकालीनः पाकत्वादतीत पाकवदित्यादि। न च चरमपाके व्यभिचारः। साध्यसिद्ध्युपजीवकस्य व्यभिचारज्ञानस्यादोषत्वात्। अन्यथा सिद्ध्यसिद्धिव्याघातात्। किस शब्दादपि सकलधूमपाकादिगोचरज्ञानसेभवः। न च शंकादिपूर्वं शब्दस्योपस्थितिनियमाभाव इति वाच्यम्। कदाचिदेव शब्दादनुभूतस्य तदानीं प्रमृष्टतत्ताकस्मृतिसंभवात्। ननु अनुमितेर्विशेषणज्ञानजन्यत्वेन सामान्यप्रत्यासत्तिसिद्धिः। न चानुमानान्तराद्विशेषण ज्ञानमनवस्थानादिति चेन्न। विशेषणतावच्छेदकप्रकारकज्ञानादेव साध्यविशेषणकपक्ष विशेष्यकानुमितिसंभवात्। एतेन –. 'सुरभि चन्दनम्' इत्यादिविशिष्टज्ञानाय कल्पिता ज्ञानलक्षणा प्रत्यासत्तिरपि निरस्ता। चन्दनत्वेन सुरभित्वानुमानोपपत्तेः। अन्यथा साध्यविशिष्टपक्षप्रत्यक्षोपपत्तेरनुमानमात्रोच्छेदप्रसङ्गात्। न च– अभावसाध्यककेवल व्यतिरेकिणि साध्यप्रसिद्धेरनङ्गत्वात्तत्र कृत्स्नाया अनुमितिसामग्र्याः प्रत्यक्षसामग्रीतो बलवत्त्वमिति वाच्यम्। अर्थापत्तिवादिभिरस्माभिस्तदनभ्युपगमात्। पर्वतवृत्तिधूमो वह्निव्याप्य इति परामर्शात् साध्यविशेष्यकपक्षविशेषणकानुमित्यभ्युगमे तु नैव काप्यनुपपत्तिः। अनुमितेः पक्षविशेष्यत्वनियमे मानाभावात्।

किं च धूमत्वादिसामान्यं न स्वरूपतः प्रत्यासत्तिः। धूलीपटले धूमभ्रमानन्तरं धूमत्वेन सकलधूमनिष्ठवह्निव्याप्तिग्रहानुदयप्रसङ्गात्। तत्र स्वरूपतो धूमत्वाभावात्। न चेष्टापत्तिः। तदुत्तरकालमनुमित्यनुदयापत्तेः। तथा च धूमत्वज्ञानं प्रत्यासत्तिरिति वाच्यम्।

धूमत्वादेः प्रत्यासत्तित्वे तस्यापि प्रत्यासन्नत्वात्तत्र व्याप्तिग्रहे ततोऽनुमितिरिति – वाच्यम्। पर्वतीयधूमेन्द्रियसन्निकर्षदशायां धूमत्वेन प्रकारेण गृहीतस्मृतव्याप्तेस्तत्र वैशिष्ट्यग्रहसंभवात्। 'सुरभि चन्दनम्' इतिवद् विशेष्येन्द्रियसन्निकर्षविशेषणज्ञानासंसर्गाग्रहरूपाया विशिष्टज्ञानसामग्र्याः पूर्णत्वात्। व्याप्तिस्मृतिप्रकारेण वा पक्षधर्मताज्ञानस्य हेतुता। महानसीय एव धूमो धूमत्वेन व्याप्तिस्मृतिविषयो भवति। धूमत्वेन पर्वतीयधूमज्ञानं चापि जातम्, तच्च सामान्यलक्षणां विनैव। तावतैवानुमितिसिद्धेः। न च – सामान्यप्रत्यासत्तिं विना धूमो वह्निव्यभिचारी न वेति अनुभूयमानः संशयो न स्यात्, प्रसिद्धे धूमे वह्निसंबन्धावगमाद् अप्रसिद्धस्य चाज्ञानादिति – वाच्यम्। प्रसिद्धधूम एव तत्तद्धूमत्वादिना व्याप्तिनिश्चयेऽपि धूमत्वेन तत्संशयोपपत्तेः। तथा चोक्तं मणिकृता – 'घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वादिना तत्र संशयसिषाधयिषे भवत एवेति। निश्चितेऽप्यर्थे प्रामाण्यसंशयाहितसंशयवद् धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशयादपि तादृशसंशयोपपत्तेश्च। एतेन वायू रूपवान्नवेति संशयोऽपि व्याख्यातः।

ननु – सिद्धे नेच्छा, किंतु असिद्धे। सा च स्वसमानविषयकज्ञानजन्या। तच्च ज्ञानं न सामान्यप्रत्यासत्तिं विना। न च – सिद्धगोचरसुखत्वप्रकारकज्ञानादेवाज्ञाते सुखे भवतीच्छा। समानप्रकारकत्वमात्रस्य नियामकत्वादिति वाच्यम्। रजतत्वेन प्रकारेण रजते अनुभूयमाने घटादौ रजतत्वप्रकारकेच्छाप्रसङ्गात्। न च प्रकाराश्रयत्वमपि नियामकम्। रजतभ्रमाच्छुक्ताविच्छानुदयप्रसङ्गात्। तथा च समानप्रकारकत्वे सति समानविषयकत्वं तन्त्रम्। अत एवाख्यातिपक्षे रजतस्मरणस्यैव शुक्तौ प्रवर्तकत्वमित्यपास्तमिति चेन्न। यतो रजतभ्रमाच्छुक्ताविच्छा नास्त्येव किंत्वनिर्वचनीये रजत इत्यनिर्वचनीयख्यातौ वक्ष्यते। प्रकाराश्रयत्वं नियामकं वदन्नख्यातिवादी परमेवं विभीषणीयः। तथा च प्रकाराश्रयत्वस्य नियामकत्वादन्यथाख्यातिपक्षोऽपि निरस्त एव। न च तर्हि भ्रमत्वं न स्याद्, इदं रजतमिति भ्रमत्वाभिमतज्ञानस्य व्यधिकरणप्रकारत्वानभ्युपगमादिति वाच्यम्। बाधित विषयत्वेन हि भ्रमत्वं न तु व्यधिकरणप्रकारत्वेन, तस्यापि विषयबाधप्रयोज्यत्वादिति हि वक्ष्यते। ननु – अभावज्ञानस्य प्रतियोगिज्ञानजन्यत्वात्, प्रौढप्रकाशयावत्तेजोविरहरूपस्य समसः प्रत्यक्षता न स्यात्। सामान्यप्रत्यासत्तिं विना प्रतियोग्यनुपस्थितेरिति – चेन्न। अस्मन्मते तमसो भावान्तरत्वात्। न च– तथापि तद्व्यञ्जकत्वात्तदपेक्षेति

ब्रूमः। न च संयोगेऽव्याप्तिः, तस्याव्याप्यवृत्तित्वानभ्युपगमात्। तदभ्युपगमे च व्याप्यवृत्तित्वेनाभावो विशेषणीयः। नापि वियत्यव्याप्तिः, तदत्यन्ताभावस्य केवलान्वयित्वानङ्गीकारेण लक्षणस्य विद्यमानत्वादेव। न हि कस्मिंश्चिद् देशे काले वा तस्याभावः, नित्यविभुत्वभङ्गप्रसङ्गात्। आकाशात्यन्ताभावस्य केवलान्वयित्वाभ्युपगमे च वृत्तिमत्प्रतियोगिकत्वेनाभावो विशेषणीयः – इति चेन्न। चक्षुराद्ययोग्यानेकपदार्थघटितत्वेनैतादृशसत्त्वस्य ग्रहणे चक्षुरादेरसामर्थ्यात्। न हि सर्वदेशीयत्रैकालिकवृत्तिमत्प्रतियोगिकव्याप्यवृत्तिनिषेधप्रतियोगित्वं कस्यापि प्रत्यक्षम्। येन तदभावः प्रत्यक्षो भवेत्। वृत्तिमत्प्रतियोगिकत्वव्याप्यवृत्तित्वपरित्यागेऽपि सर्वदेशीयत्वत्रैकालिकत्वयोरयोग्यत्वात्।

ननु – स्वदेशकालवृत्तिनिषेधप्रतियोगित्वाभावे गृह्यमाणे कालत्रयमध्ये वर्तमानकालस्य सर्वदेशमध्ये प्रकृतदेशस्यापि प्रवेशेन तत्र निषेधप्रतियोगित्वाभावस्य गृहीतत्वात्तत्संवलितं कालत्रयवृत्तिसर्वदेशीयनिषेधप्रतियोगित्वरूपं मिथ्यात्वं नानुमानेन ग्रहीतुं शक्यते – इति चेन्न। स्वदेशकालवृत्तिसकलनिषेधप्रतियोगित्वस्य चक्षुराद्ययोग्यत्वेन तदभावस्य सुतरां तदयोग्यत्वात्। स्वदेशकालवृत्तियत्किंचिन्निषेधाप्रतियोगित्वस्य मिथ्यात्वाविरोधित्वात्। स्वप्रतियोगिकात्यन्ताभावासामानधिकरण्यस्य च स्वप्रतियोगिकात्यन्ताभावाप्रसिद्ध्या केवलान्वयिनि, संबन्धभेदेन घटादौ चासिद्धेः। स्वात्यन्ताभावयावदधिकरणावृत्तित्वं वा, स्वात्यन्ताभावयत्किंचिदधिकरणावृत्तित्वं वेति विकल्पेन पूर्वोक्तदोषाच्च। तस्मात्तत्प्रकारान्तरस्य निरूपयितुमशक्यत्वान्मिथ्यात्वाविरोधित्वाच्च स्वसमानाधिकरणयावदत्यन्ताभावप्रतियोगित्वाभावरूपमेव सत्त्वमुपेयम्। तच्च न चक्षुरादियोग्यमित्युक्तम्। ननु यस्मिन्कस्मिंश्चित् स्वदेशकालवृत्तिनिषेधे एतद्देशैतत्कालवृत्तिनिषेधत्वं ज्ञात्वा तेन प्रत्यासत्तिभूतेनोपस्थापितानां स्वदेशकालवृत्तिसकलनिषेधानां प्रतियोगित्वस्याभावो घटे ग्राह्यः। ततः सार्वदिकसर्वदेशीयनिषेधप्रतियोगित्वस्य ग्रहणं घटे दुर्घटमिति – चेन्न। एवं सामान्यलक्षणया सर्वनिषेधेषूपस्थितेष्वपि तत्प्रतियोगित्वाभावस्य चक्षुरादिना ग्रहीतुमशक्यत्वात्। योग्यप्रतियोगिक एव हि संसर्गाभावो योग्यः। न चाशेषनिषेधानां प्रतियोगित्व मतीन्द्रियसाधारणं चक्षुरादियोग्यम्।

वस्तुतस्तु– सामान्यं नेन्द्रियप्रत्यासत्तिः, मानाभावात्। न च– महानसीयधूमेन्द्रियसंयोगेन तत्रैव व्याप्तिग्रहे पर्वतीयधूमादनुमितिर्नस्यात्, सामान्यस्य च

न तृतीयः, असिद्धेः, सर्वस्यैव क्षणिकत्वादिना भ्रमविषयत्वाभ्युपगमात्। अत एव नासत्त्वाप्रकारकप्रमाविषयत्वमपि, अन्योन्याश्रयाच्च। नापि सत्त्वप्रकारकप्रमाविषयत्वम्, आत्माश्रयात्। नाप्यसत्त्वप्रकारकभ्रमाविषयत्वं सत्त्वम्, अन्योन्याश्रयात्। नापि प्रतिपन्नोपाधौ त्रैकालिकसत्त्वनिषेधविरहः, आत्माश्रयात्। नापि सत्ता जातिरर्थक्रियाकारित्वमसद्वैलक्षण्यं वा, एतेषां मिथ्यात्वाविरोधित्वेन तत्प्रत्यक्षेण मिथ्यात्वानुमाने बाधाभावात्। नापि वेदान्त्यभिमतमिथ्यात्वाभावः सत्त्वम्, तुच्छेऽतिव्याप्तेः। नाप्यसद्विलक्षणत्वे सत्यनारोपितत्वम्, अनारोपितत्वं हि आरोपाविषयत्वम्, तच्चासंभवि। सर्वस्यापि क्षणिकत्वादिना आरोपविषयत्वात्। नापिअस्तित्वप्रकारकप्रमां प्रति कदाचित् साक्षाद्विषयत्वं कालसंबन्धित्वं वा सत्त्वम्। अस्तित्वं च वर्तमानत्वम्। न तु सत्त्वमतो नात्माश्रयः। अतीतादिरपि कदाचिद् वर्तत एवेति नाव्याप्तिः। आरोपितं च कालत्रयासंबन्धित्वेन बाधेन बोधितमिति न द्वितीयलक्षणेऽतिव्याप्तिरिति। वाच्यम्- प्रमात्वस्य सत्त्वघटितत्वेन चक्षुराद्ययोग्यत्वेन च पूर्वोक्तदोषाद्, वर्तमानत्वप्रकारकप्रमाविषयत्वेऽपि मिथ्यात्वाविरोधाच्च। द्वितीयमपि न मिथ्यात्वविरोधि। शुक्तिरूप्यस्यापि प्रतिभासकालसंबन्धित्वात्। बाधेन तात्त्विककालत्रय संबन्धनिषेधेऽप्यतात्त्विककाल संबन्धस्यानिषेधात्। नापि तात्त्विककालसंबन्धित्वं तत्। तात्त्विकत्वस्याद्याप्यनिरूपणात्। निरूपणे वा शैषवैयर्थ्यात्। ननु- भवन्मते यत् सत्त्वं ब्रह्मणि, तदेवेह मम। उक्तं हि – 'यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपि। तत्र स्यात्तदनिर्वाच्यं चेदिहापि तथास्तु नः।' इति। न च- तत्रापरिच्छिन्नत्वं सत्त्वम्, तच्च न जगतीति- वाच्यम्। तुच्छस्यापरिच्छिन्नत्वेऽपि सत्त्वानभ्युपगमान्नापरिच्छिन्नत्वं सत्त्वम्। किं त्वन्यदेव। तच्च ब्रह्मणीव भ्रमाधिष्ठानत्वाच्छुक्तिकादेरपि भविष्यतीति – चेत्, नूनं विवाहसमये कन्यायाः पित्रा निजगोत्रं पृष्टस्य यदेव भवतां गोत्रं तदेव ममापि गोत्रमिति वदतो वरस्य भ्राता भवान्, यद्वा जामातृश्वशुर्योरेकगोत्रत्वे विवाहानुपपत्तिवज्जगद्ब्रह्मणोरेकसत्त्वे जगतोऽसत्त्वमेव स्यात्। तथा हि – स्वप्रकाशाद्वितीयचैतन्यरूपत्वमेव ब्रह्मणः सत्त्वम्। तदेव चेज्जडस्यापि जगतस्तदा रजतत्व विरोधिशुक्तिसत्तया रजतस्येव जडत्वविरोधिस्वप्रकाशसत्तया जगतः स्वरूपतो मिथ्यात्वोपपत्तेः। चैतन्यस्यैवावच्छिन्नानवच्छिन्नाज्ञानविषयत्वेन सर्वभ्रमाधिष्ठानत्वाभ्युपगमान्न भ्रमाधिष्ठानत्वेन शुक्त्यादेः सत्त्वसिद्धिः। नन्वेवमपि सर्वदेशीयत्रैकालिकनिषेधप्रति योगित्वमसत्त्वं तुच्छानिर्वचनीयसाधारणम्। तदभावः सत्त्वम्। तच्च ब्रह्मणीव जगत्यपीति

सत्त्वानिर्वचनेऽपि तद्वदेव स्वरूपपारमार्थ्योपपत्तेः। यदि च तत्रानृतव्यावृत्तिमात्रम् अबाधितस्वरूपं वा सत्त्वम्। बाधश्च प्रतिपन्नोपाधौ त्रैकालिकनिषेधः, ज्ञानेननिवृत्तिर्वेति नान्योन्याश्रयः, तर्हीहापि तथाऽस्तु ब्रह्मसाम्यस्यैवापेक्षितत्वात्। अपरिच्छिन्नत्वं तत्र सत्त्वमिति चेन्न, शुक्तिरूप्ययोः परिच्छिन्नत्वे ब्रह्मशून्ययोश्चापरिच्छिन्नत्वे तुल्येऽपि सत्त्वासत्त्वयोर्व्यवस्थितत्वेन जगत्युक्तपारिभाषिकसत्त्वाभावस्य ब्रह्मणि परिच्छिन्नत्वरूप सत्त्वाभावस्येवेष्टत्वात्। सौहार्दे तु–

त्रिकालसर्वदेशीयनिषेधाप्रतियोगिता।
सत्तोच्यतेऽध्यस्ततुच्छे तं प्रति प्रतियोगिनी॥

सर्वदेशकालसम्बन्धनिषेधाप्रतियोगित्वं सत्त्वम्। यदवच्छिन्ने संयोगस्तदवच्छिन्ने तदत्यन्ताभावो नेति न तत्राव्याप्तिः। गगनादेरप्यत्यन्ताभावः केवलान्वयी नेत्युक्तत्वान्न गगनादावव्याप्तिः। तुच्छमध्यस्तं च उक्तप्रतिषेधप्रतियोगीत्युक्तत्वान्नातिव्याप्तिरपि। अश्वे गोत्वं कदाचिदपि नास्तीत्यादौ तत्संसर्ग एव निषिध्यत इति मते देशपदमनपेक्षितम्। केचित्तु पराभिप्रेतमिथ्यात्वाभावो वाऽसद्विलक्षणत्वे सत्यनारोपितत्वं वा अस्तित्वप्रकारकप्रमां प्रति कदाचित्साक्षाद्विषयत्वं वा कालसम्बन्धित्वं वा सत्त्वम्। अस्तित्वं च वर्तमानत्वम्। अतीतादिरपि कदाचिद्वर्तत एव। आरोपितं तु कालत्रयासम्बन्धित्वेन बाधबोधितमिति न दोष इत्याहुः। इति सत्त्वनिरुक्तिः।

अद्वैतसिद्धिः

ननु 'सन् घट' इत्याद्यध्यक्षबाधितविषया दृश्यत्वादय इति चेन्न; चक्षुराद्यध्यक्षयोग्यमिथ्यात्वविरोधिसत्त्वानिरुक्तेः। तथा हि – न तावत् प्रमाविषयत्वं, तद्योग्यत्वं, भ्रमाविषयत्वं वा तादृक्सत्त्वम्। चक्षुराद्यगम्यभ्रमप्रमाघटितत्वेन चक्षुराद्ययोग्यत्वाद्, वक्ष्यमाणदूषणगणग्रासाच्च। तथा हि – नाद्यः, असति प्रमाणाप्रवृत्तेः प्रमाविषयत्वात्प्राक् सत्त्वस्य वक्तव्यत्वेन तस्य तदन्यत्वात्। सत्त्वनिरूपणं विना सदर्थविषयकत्वरूपप्रमात्वस्य निरूपणे चान्योन्याश्रयात्। मिथ्याभूतस्यापि शुक्तिरजतसंसर्गस्य व्यवसायद्वारा साक्षाच्च निषेध्यत्वादिना प्रमाविषयत्वाभ्युपगमाच्च। नापि द्वितीयः, योग्यताया अनिरूपणात्।

न्यायामृतप्रकाशः

ननु जगतः प्रातिभासिकत्वे तदप्रातिभासिकत्वग्राहिसन्घटइत्यादिप्रत्यक्षविरोधः। ब्रह्मणश्चमिथ्यात्वे तत्सत्यत्वग्राहिश्रुतिविरोधइत्यत आह॥ जगतइति॥ अत्राप्रयोजकतापरिहारायानुकूलतर्कमाह॥ विपक्षेचेति॥ जगतो दृश्यत्वमंगीकृत्य प्रातिभासिकत्वानंगीकारे जगतः पारमार्थिकत्वप्राप्त्या जगद्ब्रह्मरूपसत्यद्वयांगीकारापत्त्या गौरवं स्यात्। व्यावहारिकत्वांगीकारेपि ब्रह्मजगद्रूप्यादीनां त्रिविधसत्त्वांगीकारे त्रैरूप्यापत्त्या गौरवं। ब्रह्मण एकस्यैव सत्यत्वं तदितरस्य सर्वस्य प्रातिभासिकत्वांगीकारे लाघवं। तथा ब्रह्मणोपि व्यवहारविषयत्वमंगीकृत्य मिथ्यात्वानंगीकारे सत्यत्वप्राप्त्या ब्रह्मसत्यं जगन्मिथ्याति द्वैरूप्यांगीकारापत्त्या गौरवं विपक्षे बाधकं सर्वं मिथ्येत्यंगीकारेचलाघवमित्यर्थः। द्वितीयानुमानाप्रयोजकतापरिहाराय हेतूच्छित्तिरूपं बाधकांतरमाह। व्यवहृतीति॥ बाधकं अप्रयोजकताशंकायां बाधकं। ब्रह्मणो व्यवहारविषयत्वमंगीकृत्य मिथ्यात्वानंगीकारे सत्यत्वप्राप्त्या सत्यभूतब्रह्मव्यवहारयोः संबंधांतरायोगात्सर्वं व्यवहार्यं ब्रह्मादिव्यवहृतावध्यस्तमित्याध्यासिकसंबंधएव वक्तव्यः। तथाच ब्रह्मणो व्यवहृतावध्यस्तत्वप्राप्त्यामिथ्यात्व सिद्धिरित्यर्थः। एवमेव दृश्यत्वमंगीकृत्य प्रातिभासिकत्वानंगीकारे दृग्दृश्ययोः संबंधो न स्यादित्याध्यासिकएवसंबंधो वाच्यस्तथाच जगतो ज्ञानेऽध्यस्ततयाप्रातिभासिकत्वसिद्धिरिति हेतूच्छित्तिरूपं बाधकंच द्रष्टव्यं॥ दृश्यत्वादेराभाससाम्यविवरणं॥

१९. सत्त्वनिरुक्तिः

सन् घट इत्यादिप्रत्यक्षबाधिताश्च दृश्यत्वादयः। ननु किमिदं सत्त्वं यत्प्रत्यक्षसिद्धं परजातिर्वा? असद्वैलक्षण्यं वा? अर्थक्रियाकारित्वं वा? प्रमाविषयत्वं वा? तद्योग्यत्वं वा? भ्रमाऽविषयत्वं वा? स्वसमानाधिकरणस्वसमानकालीन निषेधाप्रतियोगित्वं वा? अबाध्यत्वं वा? नाद्यः, सिद्धसाधनात्। न चतुर्थः, असति प्रमाणाप्रवृत्त्या तद्विषयत्वात्प्राक् सत्त्वस्य वक्तव्यतया, तस्य सत्त्वादन्यत्वात्। असतोऽपि व्यवसायद्वारा साक्षाच्चासत्त्वप्रकारकप्रमाविषयत्वाच्च। सत्त्वप्रकारक प्रमाविषयत्वे चात्माश्रयात्। असत्त्वाप्रकारकप्रमाविषयत्वे चासत्त्वस्य सत्त्वनिरूप्यत्वेना न्योन्याश्रयात्। अत एव न पञ्चमः। न षष्ठः, सतोऽप्यसत्त्वप्रकारकभ्रमविषयत्वात्। सत्त्वप्रकारकभ्रमाविषयत्वे चात्माश्रयात्। असत्त्वाप्रकारकभ्रमाविषयत्वे चान्योन्याश्रयात्। न सप्तमः, संयोगादावव्याप्तेः। शुक्तिरूप्यादेरधिकरणाद्य भावेनातिव्याप्तेश्च। नाप्यष्टमः, बाधस्य प्रतिपन्नोपाधौ त्रैकालिकसत्त्वनिषेधत्वेना न्योन्याश्रयात्। उच्यते– तवात्मनि यत्सत्त्वं तदेवेह मम। उक्तं हि – "यादृशं ब्रह्मणः सत्त्वं तादृशं स्याज्जगत्यपी" ति। तत्र तदनिर्वाच्यं चेदिहापि तथाऽस्तु।

ननु आभाससाम्यं कथं दोषः? इति चेत्, यथायथं सर्वदोषज्ञापकतया। तथाहि– यस्मिन्नाभासे वादि-प्रतिवादिभ्यां यो दोषो ज्ञातः, तद्दोषेतरसकलतदाभासगतसाधक-बाधकवत्तया ज्ञायमानायां स्थापनायां तत्र तस्यापि दोषस्योपस्थितिर्भवति, इति तादृशसकलदोषोत्थापकतया तस्य दोषत्वमिति प्रोचुः॥

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां मृषायुक्तीतरे समे॥

इति दृश्यत्वादीनामाभाससाम्यम्॥

न्यायामृतकण्टकोद्धारः

विमतमिति। नच – जगतो व्यावहारिकसत्त्वबाधे व्यवहारानुपपत्तिः, ब्रह्मणो मिथ्यात्वे शून्यवादा पत्तिः, इति प्रतिकूलतर्कपराहतत्वादितरसाम्यं कथं मिथ्यात्वानुमानस्य? इति – वाच्यम्; मिथ्यात्वानुमानस्यापि यदि जगत् मिथ्या स्यात्, अर्थक्रियाकारि न स्यात्, ब्रह्मव्यतिरिक्तस्य सर्वस्यापि मिथ्यात्वे ब्रह्मणो निर्विशेषत्वापत्त्या शून्यवादापत्तिश्च स्यात्, इति तर्कपराहतत्वसाम्यात्। ननु च – प्रातिभासिकत्वं किं ब्रह्मज्ञानेतरबाध्यत्वम्? प्रतिभासमात्रशरीरत्वं वा? आद्ये देहात्मैक्ये व्यभिचारः, अप्रयोजकत्वं च। द्वितीये दृष्टिसृष्टिपक्षे सिद्धसाधनम्। एवं सोपाधिकस्य ब्रह्मणो मिथ्यात्वे साध्ये सिद्धसाधनम्, निरुपाधिकस्य मिथ्यात्वे साध्ये हेतोरसिद्धिः। नच – वृत्तिविषयत्वं विवक्षितमिति – वाच्यम् ; अप्रयोजकत्वादिति – चेत्, न। उभयथाऽप्यदोषात्, देहात्मैक्यभ्रमाभावस्य प्रागुक्तत्वेन न तत्र व्यभिचारः। तदङ्गीकारे वा देहात्मैक्यविवेकबाध्यत्वात्। अप्रयोजकत्वं च मिथ्यात्वानुमानेऽप्यविशिष्टम्। नच – प्रतिभासमात्रशरीरत्वपक्षे सिद्धसाधनम्, तस्य प्रतिकर्मव्यवस्थाद्यनुपपत्त्याऽनिष्टत्वेन सिद्धसाधनानवकाशात्। निरुपाधिकस्यैव मिथ्यात्वसाधनात् न सिद्धसाधनम्। न च हेत्वसिद्धिः; वृत्तिविषयत्वस्य निरुपाधिके व्यवस्थापितत्वेन व्यवहारविषयत्वसिद्ध्यविरोधात्। नाप्यप्रयोजकत्वम्। मूलानुमानेऽपि साम्यात्, अनुकूलतर्काणां च निरुसिष्यमाणत्वात् असदिति॥ ननु असत्त्वं क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वम् बाध्यत्वं वा? नाद्यः। क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हविलक्षणत्वं हि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वम्। नच तद् ब्रह्मण्यस्ति, इत्यसिद्धिः। न द्वितीयः। बाध्यविलक्षणत्वं चाबाध्यत्वम्। नच तेन बाध्यत्वरूपमिथ्यात्वसाधनं सम्भवति; विरोधात्, दृष्टान्तस्य साधनवैकल्याच्चेति – चेत्, न; असद्विलक्षणपदेन सत्त्वेन प्रतीतिविषयत्वस्य विवक्षितत्वात्। न चैवं पूर्वाभेदः; पूर्वं व्यवहारशब्देनाभिलापस्य विवक्षितत्वात्। अथवा असद्विलक्षणत्वमभावविलक्षणत्वं विवक्षितम्। नच – एवं ब्रह्मण्यसिद्धिः। ब्रह्मणोऽभावात्मकत्वादिति – वाच्यम्; तस्य "सत्यं ज्ञानमि"त्यादिश्रुत्या भावरूपत्वावगमात्। नच तुच्छे व्यभिचारः; तत्रापि बाध्यत्वरूपमिथ्यात्वसत्त्वादिति। नच विपक्षे बाधकाभावादप्रयोजकत्वमित्यत आह – विपक्षे चेति॥ इति आभाससाम्यम्॥

विषयत्वाभ्युपगमेऽप्यप्रयोजकः। एवमसद्विलक्षणत्वमपि ब्रह्मण्यसिद्धमेव। क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वं ह्यसत्त्वम्, सद्विलक्षणत्वं च क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यर्हत्वरूपम्, तच्च शुद्धे ब्रह्मणि नास्त्येव। नच – बाध्यत्वमसत्त्वम्, तद्विलक्षणत्वं चाबाध्यत्वम्, तच्च ब्रह्मण्यस्त्येवेति – वाच्यम्, अबाध्यत्वेन बाध्यत्वलक्षणामिथ्यात्वसाधने विरोधात्, शुक्तिरूप्यदृष्टान्तस्य साधनविकलत्वाच्च, शून्यवादस्याग्रे निराकरिष्यमाणत्वाच्च। तस्मान्न दृश्यत्वादीनामाभाससाम्यमिति सिद्धम्। इति आभाससाम्यभङ्गः।

न्यायामृततरङ्गिणी

इत्याभाससाम्यं चेति॥ ननु – जगतोऽव्यावहारिकत्वे साध्ये व्यवहारानुपपत्तिः, ब्रह्मणो मिथ्यात्वे शून्यवादापत्तिश्चेति प्रतिकूलतर्कपराघातेन तयोरसाधकत्वम्। प्रकृते च प्रतिकूलतर्काभावः। किंच प्रातिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वम्, प्रतिभासमात्रशरीरत्वं वा? आद्ये साध्ये देहात्मैक्ये व्यभिचारः, अप्रयोजकत्वं च। द्वितीये दृष्टिसृष्टिमतेन सिद्धसाधनम्। एवं ब्रह्मणि मिथ्यात्वे साध्ये सोपाधिके सिद्धसाधनम्। अनुपाधिके व्यवहारविषयत्वरूपो हेतुरसिद्धः। वेदान्तजन्यवृत्तिविषयत्वाभ्युपगमेऽप्यप्रयोजकः। एवमसद्विलक्षणत्वमपि ब्रह्मण्य सिद्धमेव। क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वं ह्यसत्त्वम्। तद्विलक्षणत्वमबाध्यत्वम्, तच्च ब्रह्मण्यस्त्येति – वाच्यम्। अबाध्यत्वेन बाध्यत्वलक्षणमिथ्यात्वे साध्ये विरोधात्। शुक्तिरूप्यदृष्टान्तस्य साधनविकलत्वाच्च। शून्यवादस्याग्रे निराकरिष्यमाणत्वात्। तस्मात् न दृश्यत्वादीनामाभाससाम्यम्, इति। अत्रोच्यते। यत्तावदुक्तं जगतोऽव्यावहारिकत्वानुमाने व्यवहारानुपपत्तिरूपप्रतिकूलतर्कपराहतिरिति, तन्न। सुखानुभवपर्यन्तव्यवहारस्याप्यव्यावहारिक त्वेनाप्रतिकूलत्वात्। स्वप्नोत्थापिततर्कवत्। इहापि प्रतिकूलतर्कस्य वक्ष्यमाणत्वाच्च। यच्चोक्तम् – किंचेत्यादि तदपि न। देहात्मैक्ये हेतोरेवाभावात् न व्यभिचारः। दृष्टिसृष्टिपक्षस्य चाप्रामाणिकत्वेन सर्वैरङ्गीकारात् न तस्मिन् साध्ये सिद्धसाधनम् । यच्चोक्तमनुपाधिकस्य न व्यवहार इति, तथा सति तस्यासिद्ध्यापत्त्या तद्व्यवहारस्यावश्यं वाच्यत्वात्। यच्चोक्तम् – ब्रह्म क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हमिति, तदपि न। शुद्धस्य ब्रह्मणो भूम्नः "स भगवः कस्मिन् प्रतिष्ठितः? स्वे महिम्नी"ति प्रश्न-प्रतिवचनाभ्यां स्वोपाधावेव प्रतीत्यर्हत्वात् नासिद्धिः। एतस्य शुक्तिरूप्यादावपि सत्त्वात् नासिद्धिः। निराकरिष्यमाण शून्यवादस्यानिष्टत्वेन परं प्रत्यापाद्यमानत्वात्। जगन्मिथ्यात्वे शून्यवादापाताच्च। मिथ्यात्वाति रिक्तस्य तुच्छत्वस्याभावादित्युक्तत्वात्। तस्माद् युक्तमाभाससाम्यम्॥

हि ब्रह्मरूपे ज्ञाने घटादीनामध्यासाद्युगपत्सर्वेषां प्रकाशप्रसक्तौ यदिंद्रियसन्निकर्षजन्यांतःकरणवृत्त्या यदवच्छिन्नचैतन्यावरणाज्ञान शक्त्यपगमस्तं प्रत्येव तच्चैतन्यरूपज्ञानेन प्रकाशत इत्येवं व्यवस्थांगीक्रियते सा दृष्टिसृष्टिपक्षे न युज्यते अन्योन्याश्रयात्। सति चैतन्यरूपे ज्ञाने तन्मात्रशरीरघटादिस्वरूपसिद्धिः तत्स्वरूपे चसति तेनेंद्रियसन्निकर्षे जाते तदवच्छिन्नचैतन्यावरकाज्ञानशक्त्यपगमानंतरं चैतन्यरूपज्ञान सिद्धिरिति। घटादेः प्रतिभासमात्रशरीरत्वेन सन्निकर्षात्पूर्वं सत्त्वाभावादितिच द्रष्टव्यं। तस्मात्प्रतिकर्मव्यवस्थानुपपत्त्या दृष्टिसृष्टिपक्षस्याप्रामाणिकत्वेन न जगत्प्रतिभासमात्रशरीरमिति साधनवतः पक्षाद्व्यावृत्तत्वेनोपाधित्वं युक्तमितिभावः। संप्रदायस्तु शुक्तिरूप्यस्य दृष्टांतत्वमुपलक्षणत्वेन वस्तुतस्तु प्रातिभासिकत्वेन तत्समानानां सुखादीनामपि दृष्टांतत्वेन व्यावहारिकपक्षमात्राद्व्यावृत्तत्वेन समग्रपक्षव्यावृत्तत्वमेवेत्याशयात्। ननु प्रातिभासिकत्वस्यापि सुखदुःखादौ पक्षैकदेशे सत्त्वेन वियदादावसत्त्वेनास्यापि पक्षैकदेशव्यावृत्तत्वमेव न पक्षमात्रव्यावृत्तत्वमिति चेत् पक्षमात्रव्यावृत्तत्वमापातत एव वस्तुतस्तुपक्षैकदेशव्यावृत्तत्वमेवेत्याहुः॥ दृश्यत्वादेरुपाधिविवरणं॥

१८. दृश्यत्वादेः आभाससाम्यम्

विमतं प्रातिभासिकम्, दृश्यत्वाच्छुक्तिरूप्यवत्। ब्रह्म मिथ्या, व्यवहार विषयत्वादसद्विलक्षणत्वाद्वा शुक्तिरूप्यवदित्याभाससाम्यं च। जगतोऽप्रातिभासि कत्वग्राहि प्रत्यक्षम्, ब्रह्मणस्सत्यत्वश्रुतिश्चानुमानविरोधादप्रमाणम्। विपक्षे च गौरवम्। व्यवहृतिव्यवहार्ययोः सम्बन्धान्तराभावात्, सर्वव्यवहार्यं व्यवहृतावध्यस्तमित्यादि च बाधकमिति सुवचत्वात्। इति दृश्यत्वादेराभाससाम्यविवरणम्।

अद्वैतसिद्धिः

ननु– विमतं प्रातिभासिकम् दृश्यत्वात्, ब्रह्म मिथ्या व्यवहारविषयत्वाद् असद्विलक्षणत्वाद्वा शुक्तिरूप्यवदित्याद्याभाससाम्यम्– इति चेन्न। जगतो व्यावहारिकसत्त्व बाधे व्यवहारानुपपत्तिः, ब्रह्मणो मिथ्यात्वे शून्यवादापत्तिश्चेति प्रतिकूलतर्कपराघातेन तयोरसाधकत्वात्। प्रकृते च प्रतिकूलतर्कस्य निरसिष्यमाणत्वात्। किंच प्रतिभासिकत्वं ब्रह्मज्ञानेतरबाध्यत्वम्? प्रतिभासमात्रशरीरत्वं वा? आद्ये साध्ये देहात्मैक्ये व्यभिचारः, अप्रयोजकत्वं च। द्वितीये दृष्टिसृष्टिमतेन सिद्धसाधनम्। एवं ब्रह्मणि मिथ्यात्वे साध्ये सोपाधिके सिद्धसाधनम्। अनुपाधिके व्यवहारविषयत्वरूपो हेतुरसिद्धः। वेदान्तजन्यवृत्ति

पक्षमात्रव्यावर्तकविशेषणवत्त्वरूपपक्षेतरत्वशंकाया अविषयमुपाधिमाह॥ यद्धेति॥ ननु विपरीतप्रमा विषयत्वरूपोपाधेरपि दृश्यत्वहेतुना पक्षे साध्यमानत्वेन साधनव्यापकत्वान्नोपाधित्वमित्यत उक्तं तस्मिन्साध्यइति। नचैतदद्दष्टचरमित्यतो यथेत्युक्तं। हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावादित्यर्थः। मित्रातनयत्वेनैव हेतुना गर्भस्थस्य शाकपाकजत्वमपि साध्यतेऽतःसाधनव्यापकत्वमित्यत उक्तं तस्मिन्निति॥ इहापीति॥ दृश्यत्वमिथ्यात्वयोरपि व्याप्तिग्राहकानुकूलतर्काभावादित्यर्थः। ननु विपरीतप्रमा विषयत्वदोषप्रयुक्तभानत्वयोरेव मिथ्यात्वेन कथमुपाधित्वमित्यत उक्तं बाध्यत्वादीति। यदानयोरुपाधित्वं तदा मिथ्यात्वं बाध्यत्वादिरूपमन्यदेवोच्यत इत्यर्थः। ननु तत्र मित्रातनयत्वेनैव हेतुना युगपदेव गर्भस्थः शामः शाकपाकजश्चेत्येवंशामत्वशाकपाकजत्वयोरुभयोरपि साधनं क्रियते। ततश्च न परस्परोपाधित्वं युक्तं। एवं दृश्यत्वेन हेतुना पक्षे मिथ्यात्वविपरीतप्रमाविषयत्वयोर्मिथ्यात्वदोषप्रयुक्तभानत्वयोर्वायुगपदेव साधनं क्रियतेऽतो न परस्परोपाधिग्रस्तत्वमित्यत आह॥ युगपदिति॥ कथमित्यत आह॥ मिथ्यात्वएवेति॥ ननु बाध्यत्वरूपे मिथ्यात्वेपि कथं विपरीतप्रमाविषयत्वस्योपाधित्वं विपरीतप्रमाविषयत्वस्यैव बाध्यरूपत्वेन तयोरैकत्वादित्यत आह॥ बाधइति॥ यत्रेदं रजतमिति भ्रांतिपूर्वकं नेदं रजतमितिज्ञानं जायते तद्बाध इत्युच्यते। अतएव ''पूर्वप्रसंजितान्यथाकारविलोडकं ज्ञानं बाध'' इतिबाधलक्षणमाहुः। विपरीतप्रमातु न भ्रांतिपूर्विका यथा मार्गे गच्छतः पुरुषस्य इदं रजतमिति भ्रमप्रसक्त्यभावेपि शुक्तिं दृष्ट्वा झडिति इदं रूप्यं न भवतीति ज्ञानं जायते सा विपरीतप्रमेति तयोर्भेदइत्यर्थः। प्रमाया विपरीतत्वंच निषेधविषयकत्वादित्यवगंतव्यं॥ अधिष्ठानेत्यादि॥ मिथ्यात्ववति रूप्येऽधिष्ठानाभिमतशुक्तिसमसत्ताकाचादिदोष वदिंद्रियादि जन्यज्ञानविषयत्वमस्तीति साध्यव्यापकः दृश्यत्ववतिपक्षे उपाधिर्नास्ति प्रपंचविषयकज्ञानजनके मायाविद्यारूपदोषे प्रपंचारोपाधिष्ठानभूतब्रह्मसमसत्ताकत्वाभावेन विशेषणाभावप्रयुक्तविशिष्टाभावस्य सत्त्वात्साधनाव्यापकत्वमित्यर्थः। अस्योपाधेः पक्षमात्रव्यावर्तकविशेषणवत्त्वेन पक्षेतरत्वमिति शंकावारणाय उपाधौ विशेषणकृत्यं दर्शयति॥ ब्रह्मणइति॥ बौद्धकल्पिता ये दोषाः यदनृतं तदप्रमाणं दृष्टं यथोन्मत्तवाक्यं। अनृतंच पुत्रकामः पुत्रकामेष्ट्या यजेतेत्यादिवेदवाक्यं कृतायामपीष्टौ पुत्रजन्मानुपलंभादित्येवमनृतव्याघाताद्यास्तद्वान् यो हेतुर्वेदरूपकरणं तज्जन्यज्ञानविषयत्वेपि मिथ्यात्वाभावेन व्यभिचारात्समव्याप्य भावादित्यर्थः। विशेषणं दोषाणां विशेषणमित्यर्थः। तथाच वेदे दोषाणां बौद्धेन कल्पितानां प्रातिभासिकत्वेनाधिष्ठानाभिमतब्रह्मसमसत्ताकत्वाभावेन तादृशदोषवद्धेतु जन्यज्ञानविषयत्वरूपोपाधेरेवा भावेनोपाधिपुरस्सरव्याप्तौ न व्यभिचार इतिभावः। पक्षव्यावृत्त्यर्थं पक्षमात्रव्यावृत्त्यर्थं।

समग्रपक्षव्यावृत्तोपाधिमुक्त्वा पक्षैकदेशव्यावृत्तोपाधिद्वयमाह॥ यद्धेति॥ श्रुतितात्पर्याविषयत्वस्य घटादिप्रपंचे सत्त्वेपि धर्माधर्मादिरूपपक्षैकदेशव्यावृत्त्युपपादनाय वेदतात्पर्यविषयादित्युक्तं। धर्मादेःश्रुतितात्पर्याविषयत्वा भावादितिभावः। दोषजन्यधीविषयत्वस्य परमते घटादौ सत्त्वेपि सुखदुःखादिरूपपक्षैकदेशव्यावृत्त्युपपादनाय साक्षीत्युक्तं। साक्षिरूपज्ञानस्य दोषजन्यत्वाभावादितिभावः। ननु दृष्टिसृष्टिपक्षे सर्वस्यापि जगतः प्रतिभासमात्रशरीरत्वेन प्रातिभासिकत्वात् साधनव्यापक उपाधिरित्यत आह॥ नचेति॥ तवापीति॥ तवमतेपीत्यर्थः। कुतोनेत्यत आह॥ प्रतिकर्मेति। देवदत्तज्ञानस्यैवायं विषयइत्येवमादिरूपव्यवस्थेत्यर्थः। परेण

स्वेनैव स्वस्याबाध्यत्वात् तत्प्रतिनिषेध्यत्वेन विषयत्वमस्ति। साधनवति च पक्षे नास्ति। स्वबाधकाभिमतं यद्बाधकज्ञानं चरमवृत्तिरूपं तद्बाध्यबाधकं प्रत्येव निषेध्यत्वेन विषयत्वमस्ति नतु तदबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वं। जगद्बाधकस्य वेदांतजन्यचरमवृत्तिरूपज्ञानस्य कतकरजोवद्वेणुसंघर्षजाग्निवच्च स्वेनैव बाध्यत्वात्। यथोक्तं।

''वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं।
एवंगुणव्यत्ययजो वेदःशाम्यति तद्यथे''ति।

वेदोवृत्तिज्ञानमित्यर्थः। एवंचपक्षे स्वबाधकाभिमताबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वं नास्तीति विशेषणाभावप्रयुक्तविशिष्टाभावस्य सत्त्वात्साधनाव्यापकत्व मित्यर्थः। पक्षे साधनाव्यापकतालाभाय स्वबाधकाभिमताबाध्येति बाधकज्ञानविशेषणोपादानं॥ व्यतिरेकेति॥ साध्याभावाविनाभाव्यभाव प्रतियोगित्वस्योपाधित्वेन उपाध्यभाववति ब्रह्मणि साध्याभावसत्त्वादित्यर्थः॥ पर्वतेति॥ अन्यत्वस्य केवलान्वयित्वेन साधनव्यापकत्वात्साधनाव्यापकत्वार्थं पर्वतावय ववृत्तीत्युक्तं। नन्वथापि साधनव्यापकत्वमेव पर्वते पर्वतावयववृत्तिरूपाद्यन्यत्वसद्भावादितिचेन्न। अन्योन्याभावस्य प्रतियोगितावच्छेदकव्यधिकरणत्वेन पर्वतावयववृत्तित्वरूपप्रतियोगितावच्छेदकवति पर्वते तदन्यत्वप्रतीतेर्विरुद्धत्वेन साधनाव्यापकत्वमेवेत्यवधेयं। वह्निसामग्रीयुक्तत्वस्यापि साधनव्यापकत्वात्साधनाव्यापकत्वलाभायापर्वतीयेत्युक्तं। ननु पर्वतावयववृत्तीत्यस्य न पक्षमात्रव्यावर्तकत्वं पर्वतावयवगतरूपादिव्यावर्तकत्वात्। तथाच कथं पर्वतावयववृत्त्यन्यत्वस्य पर्वतेतरत्वमितिचेत् सत्यं। पक्षमात्रव्यावर्तकविशेषणवत्त्वादित्यापाततः वस्तुतस्तु हेतुसाध्ययोर्व्याप्तिग्राहकानुकूल तर्कसद्भावेन साध्यस्य पक्षे निश्चितत्वादुपाधेः साध्यव्यापकताग्राहकानुकूलतर्काभावे पक्षएव साध्यव्यापकताभंगात्पर्वतावयव वृत्त्यन्यत्वादेर्नोपाधित्वं यथा तथा प्रकृतयोरप्युपाध्योर्मिथ्यात्वव्यापकताग्रहकानुकूलतर्काभावान्नोपाधित्वमिति शंकितुरभिप्रायः। अतएव वक्ष्यमाणानुकूलतर्कैःसाध्यव्यापकतानिश्चयादि त्यनुकूलतर्केण साध्यव्यापकतानिश्चयं वक्ष्यतीति द्रष्टव्यं।

प्रकृतोपाध्योः पक्षेतरत्वतुल्यत्वं परिहर्तुं अनुकूलतर्कैरुपाधेः साध्यव्यापकतानिश्चयोस्तीत्याह॥ वह्निनेति॥ आर्द्रेंधनप्रभववह्निमत्त्वोपाधेः साध्येन धूमेन व्यापकत्वग्राहकार्द्रेंधनोत्कर्षेण धूमोत्कर्षरूपानुकूलतर्कोस्ति। एवं प्रकृतोपाध्योरपि साध्यभूतभ्रमविषयत्वरूपमिथ्यात्वव्यापकताग्राहको दोषोत्कर्षेण भ्रमोत्कर्षरूपानुकूलतर्कोस्ति। अतः साध्यव्यापकत्वनिश्चयादुपाधित्वं युक्तमित्यर्थः। साध्यव्यापकताग्राहकानुकूलतर्काभावात्पक्षेतरत्वस्योपाधित्वं नास्तीत्यंगीकृत्यानुकूलतर्कोपपादनं कृतं। वस्तुतस्तु कचित्पक्षेतरत्वमप्युपाधिरेवेत्याह॥ बाधितइति॥ तर्हि प्रकृतानुमाने कथं बाधितत्वमित्यत आह॥ इहचेति॥ यथा वह्निरनुष्णः पदार्थत्वादित्यत्र बाधेन हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावेन पक्षे साध्यव्यापकताभंगाभावेन तत्र वह्नीतरत्वमुपाधिरेव तद्वदत्रापि सन्घट इत्यादिप्रत्यक्षबाधेन हेतुसाध्ययोर्व्याप्तिग्राहकानुकूलतर्काभावात् पक्षे साध्यव्यापकत्वभंगाभावेनोक्तोपाध्योः पक्षमात्रव्यावर्तकविशेषणवत्त्वेन पक्षेतरत्वेप्युपाधित्वं युक्तमित्यर्थः।

किञ्चानुकूलतर्केण विशिष्टस्य साध्यव्यापकत्वे गृहीते व्यापकनिवृत्त्या व्याप्यनिवृत्तिसाधनं सुशकम्, अत एव शरीरजन्यत्वमुपाधिरित्यन्यत्रोक्तम्। एवं द्वितीयोपाधावपि समाधानं द्रष्टव्यम्। उक्तसमाधानपर्यालोचनप्रयासात् कल्पान्तरमाह – यद्वेति॥ ननु बाध्यत्व-विपरीतप्रमाविषत्वयोरैक्यात् कथमुपाधित्वमिति? अत आह – बाध इति॥ यथाच न पक्षमात्रव्यावर्तकविशेषणता, परमतानुसारेण च साधनाव्यापकत्वम्, तथा प्रकारान्तरमाह – यद्वेति॥ नच – ब्रह्मणीव ब्रह्मणि कल्पिते क्षणिकत्वादावपि मिथ्याभूते धर्मेऽव्यापकत्वमिति – वाच्यम्; अनात्मवृत्तित्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वसम्भवात्, तादृशस्य च वायुप्रत्यक्षतासाधन उद्भूतरूपवत्त्वादेरुपाधित्वस्वीकारात्, आत्मनि चारोपितक्षणिकत्वा दावनात्मवृत्तित्वावच्छिन्नमिथ्यात्वाभावात् न साध्यव्यापकत्वम्। नच – व्यतिरेके व्यर्थविशेषणत्वात् नोपाधित्वमिति – वाच्यम्; उपाधिव्यतिरेकस्य विशिष्टाभावत्वेन वैयर्थ्याभावादित्युक्तत्वात्॥

यद्वेति॥ न च पक्षैकदेशाद् व्यावृत्तस्योपाधित्वमदृष्टचरमिति – वाच्यम्; तादृशस्याप्यनणुत्वादेः क्षित्यादिकं सकर्तृकमित्यादावुपाधित्वदर्शनात्। नच – धर्मादौ वेदतात्पर्यविषयत्वमेव नेति – वाच्यम्; तथा सति धर्माद्यसिद्धेरन्यत्रोपपादितत्वेन तदसिद्धिप्रसङ्गात्। नच धर्मादौ तात्पर्याङ्गीकारे महातात्पर्यविरोधः; अवान्तरतात्पर्याङ्गीकारात्॥ दोषजन्यधीविषयत्वमिति॥ नच – दोषप्रयुक्तभानत्वेन साङ्कर्यमिति – वाच्यम्; कुरु पाण्डवन्यायेन सामान्य-विशेषभावात्। पूर्वं तु सर्वस्मिन् पक्षे दोषप्रयुक्तभानत्वाभावमुपपाद्य साधनाव्यापकत्वेनोपाधित्वमुक्तम्, इदानीं पक्षैकदेशे सुखादौ परसिद्धसाधनाव्यापकत्वेनोपाधित्वमुच्यते, इति वाऽसाङ्कर्यात्॥ नचेति॥ नच – दृष्टिसृष्टिपक्ष इष्टापत्तिरिति – वाच्यम्; जगतः प्रातिभासिकत्वे प्रतिकर्मव्यवस्थाऽयोगात्। अर्थक्रियाकारित्वं च न स्यात्। ततश्च दृष्टिसृष्टिपक्षस्यायुक्तत्वेन जगतः प्रातिभासिकत्वाभावाद् युक्तोऽयमुपाधिः। नच – देहात्मैक्ये साध्याव्यापकत्वमिति – वाच्यम्; तदसम्भवस्य प्रागेवोक्तत्वात्॥

॥ इति दृश्यत्वादेरुपाधिविवरणम् ॥

न्यायामृतप्रकाशः

स्वबाधकेति॥ दिदर्शयिषितोपाध्यधिकरणं स्वशब्दार्थः। शुक्तिरूप्ये दृष्टांते मिथ्यात्वमस्ति उपाधिश्चास्ति। तथाहि। स्वशब्देन शुक्तिरूप्यं तद्बाधकत्वेनाभिमतं यन्नेदं रजतमिति ज्ञानं तदबाध्यो यो दोषःकाचादिस्त ज्जन्यभ्रम रूपज्ञानविषयत्वेन तत्प्रयुक्तभानत्वस्य सत्त्वात्। दृश्यत्ववति पक्षे चोपाधिर्नास्ति। तथाहि। स्वशब्देन प्रपंचः तद्बाधकत्वेनाभिमतं यद्वेदांतजन्यचरमवृत्तिरूपं ज्ञानं तदबाध्यदोषप्रयुक्तभानत्वं नास्ति जगद्भ्रमनिमित्ते मायाऽविद्या(दि)रूपे दोषे स्वबाधकाभिमतबाध्यत्वस्यैव सत्त्वेन विशेषणाभावप्रयुक्त विशिष्टाभावस्यैव सत्त्वात्साधनाव्यापकइतिभवत्युपाधिः। दोषप्रयुक्तभानत्वमात्रोक्तौ साधनव्यापकतास्यादतः स्वबाधकाभिमताबाध्येति दोषविशेषणं॥ तदबाध्येति॥ स्वबाधकाभिमताबाध्येत्यर्थः। तथाच मिथ्यात्ववति रूप्ये उपाधिरस्ति। तथाहि। स्वबाधकाभिमतं यन्नेदंरूप्यमिति ज्ञानं तदबाध्यं यद्बाधकज्ञानं स्वयमेव

प्रकाश्यत इत्येव व्यवस्था परैरङ्गीक्रियते। सा दृष्टिसृष्टिपक्षे न युज्यते। अन्योन्याश्रयात्। सति चैतन्यरूपे ज्ञाने घटादिस्वरूपम्, तत्स्वरूपे च सति तेनेन्द्रियसन्निकर्षे जाते तदवच्छिन्नचैतन्यावरकाज्ञानशक्त्यपगमात् चैतन्यरूपं तज्ज्ञानमिति। तस्मात् प्रतिकर्मव्यवस्थानुपपत्त्या न जगत् प्रतिभासमात्रशरीरम्, इति नोपाधेः साधनवतः पक्षाद् व्यावृत्तिरिति। पररीत्या चायमनुपाधिर्द्रष्टव्यः॥

व्यासाद्रिसृततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां दृश्यत्वादेरुपाधयः॥
इति दृश्यत्वाद्यनुमानस्य सोपाधिकत्वम्॥

न्यायामृतकण्टकोद्धारः

स्वबाधकाभिमतेति॥ स्वस्यारोप्यस्य यद् बाधकत्वेनाभिमतम्, तदबाध्यो यो दोषः, तत्प्रयुक्तं भानं यस्य, तस्य भावस्तत्त्वम्, तस्येत्यर्थः। तदबाध्यस्येत्यत्र तच्छब्देन स्वबाधकाभिमतपरामर्शः। भवति चेदमुपाधिद्वयं शुक्तिरजतादौ; तत्र मिथ्यात्वसाध्यस्य सत्त्वात्। स्वम् रूप्यम्, तद्बाधकत्वेनाभिमतम् 'नेदं रजतमि'ति ज्ञानम्, तेनाबाध्यो यः सादृश्यादिदोषः, तत्प्रयुक्तभानत्वस्य, स्वबाधकाभिमतेन 'नेदं रजतमि'ति ज्ञानेनाबाध्यं 'नेदं रजतमि'ति ज्ञानमेव, तत् प्रति निषेध्यत्वेन विषयत्वस्य च सत्त्वात्। न भवति च साधनव्यापकम्; साधनवतिपक्षे स्वम्घटादिकम्, तद्बाधकत्वेनाभिमता ब्रह्मप्रमा, तदबाध्यदोषप्रयुक्तभानत्वस्य, तदबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वस्य चाभावात्, किन्तु तज्ज्ञानस्य तद्बाध्याविद्यारूपदोषप्रयुक्तत्वात्, तद्बाधकीभूतप्रमाया अपि ब्रह्मप्रमयैव बाध्यत्वेनाबाध्यबाधकाभावाच्च। न च दोषप्रयुक्तभानत्वं बाधकज्ञानं प्रति निषेध्यत्वेन विषयत्वं वोपाधिरस्तु, इतरद् व्यर्थमिति – वाच्यम्; परमतानुसारेण साधनाव्यापकत्वार्थत्वात्, अविशेषितयोस्तयोः पक्षे सत्त्वेन साधनव्यापकत्वात्। नच – देहात्म्यैक्ये साध्याव्यापकत्वम्; अस्ति च तत्र मिथ्यात्वम्, नास्ति चोपाधिः; तस्य ब्रह्मज्ञानमात्रबाध्यत्वेन स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वाभावात्, सर्वस्य ब्रह्मज्ञानबाध्यत्वादिति – वाच्यम्। देहात्मैक्यभ्रमस्यैवाभावात्। 'मम देहः' इति हि सर्वेषां प्रमैव, नतु 'देहोऽहमि'ति भ्रमः कस्यापि। गौरोऽहमित्यादि तु 'सिंहो देवदत्तः' इतिवदुपचारमात्रम्। उपचारे बीजं त्वेकदेशास्थत्वं स्फुटतरविवेकाभावश्चेत्यादि। अस्तु वा देहात्म्यैक्यभ्रमः, देहात्मविवेकेनैव स निवर्त्यते, इति तत्राप्युपाधिद्वयसत्त्वात्। नच – यद्व्यतिरेकस्य साध्यव्यतिरेक साधकत्वम्, स उपाधिः; इतरांशेनुकूलतर्काप्रसरात्। प्रकृते चोपाधिव्यतिरेकेण साध्यव्यतिरेकसाधने व्यर्थविशेषणत्वम्। यथा क्षित्यादिकम्, कर्तृजन्यं न, शरीराजन्यत्वादित्यत्र शरीरविशेषणवैयर्थ्यम्। नच – शरीरजन्यत्वं कर्तृजन्यत्वव्यापकम्, तस्मात् कथमुपाधित्वम्? इति वाच्यम्; अत्र हि विशिष्टव्यतिरेको हेतुः। वियदादिकम्, न मिथ्या, स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानरहितत्वात्, इति विशिष्टाभावेन वैयर्थ्यम्।

तथापि दोषप्रयुक्तभानत्वस्योपाधेर्न साध्यव्याप्यत्वम्। सर्वप्रत्ययवेद्यत्वेनाविद्यारूप दोषप्रयुक्तघटादिभानविषये तादृशचरमवृत्तिविषये वा ब्रह्मणि साध्यस्याभावेन व्यभिचारादिति चेत् न। स्वयंप्रकाशत्वेन ब्रह्मणो दोषप्रयुक्तभानत्वाभावादित्यभिप्रायत्वात्। पक्षमात्रव्यावर्तक विशेषणवत्त्वशङ्काऽविषयं संप्रतिपन्नसाधनाव्यापकताकमुपाधिमाह अधिष्ठानेति॥ जगदध्यासाधिष्ठानेन ब्रह्मणा समानसत्ताऽविद्यारूपदोषस्य नास्ति, इति विशिष्टोपाधिः पक्षे नास्तीत्यर्थः॥ ब्रह्मणोऽपीति॥ बौद्धकल्पितदोषस्य प्रातिभासिकत्वेन वेदरूपाधिष्ठानेन समानसत्ता नास्ति, इति ब्रह्मण्युपाध्यभावाद् नोपाधेः साध्येन व्यभिचार इत्यर्थः। ननु ब्रह्मणीव ब्रह्मणि कल्पिते क्षणिकत्वादावपि मिथ्याभूते धर्मेऽधिष्ठानसमसत्ताकदोषवद्धेतु जन्यज्ञानाविषयत्वादुपाधेः साध्याव्यापकत्वमिति – चेत्, मैवम्। 'अधिष्ठानसमसत्ताके'त्यनेन व्यावहारिकबाधबाध्यत्वस्य दोषविशेषणत्वेन विवक्षितत्वात्। ब्रह्मणि क्षणिकत्वादि कल्पनाहेतोर्दोषस्य वाऽविद्यारूपस्य वा शून्यवाद्युत्थापिततर्कादेर्व्यावहारिकबाधाबाध्यत्वेन विशिष्टोपाधिविरहस्य तत्रापि सत्त्वात्। यथाच व्यतिरेकसाधने न वैयर्थ्यम्, तथोक्तम्॥

पक्षैकदेशादिति॥ क्वचित् साधनवति साध्यव्यतिरेकसाधनमात्रेणापि व्यभिचारज्ञानद्वारोपा धेर्दोषत्वमित्यर्थः॥ श्रुतितात्पर्याविषयत्वमिति॥ श्रुतिजन्यप्रमां प्रत्यविषयत्वमित्यर्थः। एतेन – ब्रह्मण एव श्रुतितात्पर्यविषयतया तदभावस्य साधनव्यापकत्वमिति – निरस्तम्। तथा सति धर्माद्यसिद्ध्यापत्त्या यथाकथंचित् श्रुतिजन्यज्ञानविषयत्वस्य ब्रह्माभिन्नेऽप्यङ्गीकार्यत्वात्। उक्ता च परैरपि देवताधिकरणे देवताविग्रहादिप्रमा श्रुतिभ्यः। सुखादेः पक्षैकदेशाद् व्यावृत्तमुपाधिमाह – दोषजन्येति॥ सुखादिधियोऽप्यविद्यावृत्त्युपहितसाक्षिरूपाया अविद्यारूप दोषप्रयुक्तत्वेन नोपाधेः पक्षाद् व्यावृत्तिरस्तीति जन्यत्वपर्यन्तमुक्तम्। सर्वस्मात् पक्षाद् व्यावृत्तमुपाधिं संजानीते – पक्षमात्रादिति॥ मात्रशब्दः कात्स्न्यर्थः॥ प्रतिभासमात्र शरीरत्वमिति॥ ननु प्रतिभासमात्रशरीरत्वं नाम ब्रह्मज्ञानेतरबाध्यत्वमेव। तस्य च देहात्मैक्ये मिथ्याभूतेऽप्यसत्त्वेनोपाधेः साध्याव्यापकतेति – चेत्, मैवम्। देहात्मनोर्भेदस्य 'मम देहः' इति सर्वानुभवसिद्धत्वेन विशेषदर्शनाद् ऐक्यभ्रमस्यासिद्धतया मिथ्याभूते देहात्मैक्ये मानाभावेन तत्र साध्याव्यापकत्वाभावात्। यथाचैतत्, तथा देहात्म्यैक्याध्यासभङ्गे वक्ष्यते। दृष्टिसृष्टिपक्षेणोपाधेः पक्षाद् व्यावृत्तिरस्तीत्यत आह नचेति॥ प्रतिकर्मव्यवस्थेति॥ तथाच दृष्टिसृष्टिपक्षस्याप्रामाणिकतयाऽस्त्येवोपाधेः पक्षाद् व्यावृत्तिरिति भावः। कर्म कर्म प्रति प्रतिकर्म। व्यवस्था=नियमः। ब्रह्मरूपे ज्ञाने घटादीनामध्यासाद् युगपत् सर्वेषां प्रकाशप्रसक्तौ यदिन्द्रियसन्निकर्षजन्यान्तःकरणवृत्त्या यदवच्छिन्नचैतन्यावरणाज्ञानशक्त्याद्यपगमः, तत् चैतन्येन

धर्मिणि व्याप्यतावच्छेदकत्वेन प्रसक्तयोर्द्वयोर्धर्मयोर्लघुनैव तत्र व्याप्तिर्गृह्यते, नतु गुरुणा; यथा नीलधूमे धूमत्व-नीलधूमत्वयोर्मध्ये धूमत्वेन। नचेह विशिष्टाभावनिष्ठां व्याप्तिं परिच्छेत्तुं विशेष्याभावत्वं प्रसक्तम्, विशिष्टाभावे विशेष्याभावत्वस्यासत्त्वात्, किन्तु विशिष्टाभावत्वमेव। एवं च विशिष्टोपाधेरस्त्येव साध्यव्यापकता। नच – ईश्वरानुमानेऽप्युक्तविधया शरीरजन्यत्वमुपाधिः स्यादिति – वाच्यम्। श्रुतिबलेन क्षित्यादिकर्तुरीश्वरस्य सिद्धौ पक्ष एव तस्य साध्याव्यापकत्वादनुपाधित्वम्। तस्माद् युक्तावुपाधी॥

ननु – प्रथमोपाधौ 'स्वबाधकाभिमताबाध्ये'ति विशेषणं साध्येन समव्याप्त्यर्थम्, नतु पक्षमात्रव्यावृत्त्यर्थम्। अतस्तत्र शङ्का-परिहारावसंगतौ। तथाहि सर्वप्रत्ययवेद्यत्वेनाविद्यारूपदोषजन्ये घटादिगोचरे चरमवृत्तिरूपे वा ज्ञाने ब्रह्मणो विषयत्वेनोपाधिमति तस्मिन् साध्यस्याभावेन व्यभिचारात्। तद्विशेषणे तु विशिष्टस्योपाधेर्ब्रह्मण्यप्यसत्त्वाद् न तत्र साध्याव्याप्तिरिति – चेत्, स्वयंप्रकाशे तस्मिन् दोषप्रयुक्तभानाभावात्, इति पररीत्या चोपाधेस्साध्यव्याप्यत्वमस्त्येव इति न तदर्थं विशेषणम्, किंतु पक्षमात्रव्यावृत्त्यर्थम्; अतस्तत्रापि शङ्का-परिहारौ युक्तौ। पक्षमात्रव्यावर्तकविशेषण वत्त्वशङ्काया अप्यविषयमुपाधिमाह – यद्वेति॥ ननु विपरीतप्रमाविषयत्वादेरुपाधेर्न साधनवतः पक्षाद् व्यावृत्तिः, साध्यवति पक्ष उपाधेरपि साध्यमानत्वादित्याशङ्कां परिहर्तुं 'यथे'त्याद्युक्तम्॥ युगपदिति॥ तथाचान्योन्यस्यासाध्यमानत्वाद् नान्योन्यसाधनेऽन्योन्यस्योपाधित्वमिति भावः॥ अर्थान्तरमिति॥ यद्यप्युभयसाधनेऽप्येकस्योपाधित्वमवर्जनीयमेव; मित्रातनयत्वेन शाकपाकजत्वे साध्ये श्यामत्वस्येव सन्दिग्धसाधनाव्यापकत्वसम्भवात्, तथापि दूषणान्तरे तात्पर्यम्॥

ननु अत्र बाधकप्रमां प्रति निषेध्यत्वेन विषयत्वमेवोपाधिर्वक्तव्यः। तस्यैव पूर्वोक्तविशिष्टोपाधौ विशेष्यभूतत्वात्। यथा 'स्वबाधकाभिमते'त्यादिविशिष्टोपाधिनिविष्टं विशेष्यं दोषप्रयुक्तभानत्व मुपाधित्वेनोक्तम्, विपरीतप्रमाविषयत्वं त्वप्रकृतं किमर्थमुपाधित्वेनोक्तम्? नच – बाध्यत्वरूपसाध्येन सह बाधकं प्रति निषेध्यत्वेन विषयत्वस्योपाधेरवैशिष्ट्यं स्यात्, अत उपाध्यन्तरमुक्तमिति वाच्यम्। विपरीतप्रमाविषयत्वस्यापि बाध्यत्वरूपसाध्येना भेदादित्याशङ्कायामाह – बाध इति॥ आरोपपूर्वकस्वात्यन्ताभावप्रमां प्रति निषेध्यत्वेन विषयत्वं बाध्यत्वम्, स्वात्यन्ताभावप्रमां प्रति निषेध्यत्वेन विषयतामात्रं विपरीतप्रमाविषयत्वमिति तयोर्भेदाद् बाध्यत्वे साध्ये विपरीतप्रमाविषयत्वं भवत्युपाधिरित्यर्थः। ननु एतयोरुपाध्योः कथं साध्यव्यापकत्वम्? उपाधिमति तुच्छे साध्यस्याभावादिति – चेत्, न। मम मत उपाधिमति तुच्छे साध्यस्यापि सत्त्वात्। परमते तत्र साध्योपाध्योर्द्वयोरप्यभावात्। ननु

पक्षमात्रवृत्तिव्यतिरेकप्रतियोगित्वम्, विशिष्टोपाधेर्व्यतिरेकस्य साध्याभाववति ब्रह्मण्यपि सत्त्वेनोपाधिव्यतिरेकेण मिथ्यात्वरूपसाध्याभावे साध्यमाने ब्रह्मण एव सपक्षत्वसंभवादिति यदि कश्चिद् ब्रूयात्, तदा स्वव्यतिरेकेण साध्यव्यतिरेकसाधने पर्वतावयववृत्ति रूपादिनिष्ठव्यतिरेकप्रतियोगित्वेन लब्धोदाहरणस्यापि पर्वतावयववृत्त्यन्यत्वादेर्यथा नोपाधित्वम्, तथा प्रकृतयोरपीत्यभिसन्धाय पूर्वपक्षिणा पर्वतावयववृत्त्यन्यत्वादिकं निदर्शितमित्यवधातव्यम्॥ पक्षेतरत्वमिति॥ पक्षेतरत्वतुल्यत्वमित्यर्थः। तत्तुल्यत्वं चानुकूलतर्करहितत्वेन॥ प्रकृतोपाध्योः पक्षेतरत्वतुल्यत्वं परिहर्तुमनुकूलतर्कैः साध्यव्यापकताऽस्तीत्याह – वह्निनेति॥

अयमर्थः – यथेश्वरानुमाने जन्यत्वरूपसाधनविशेषितं शरीरजन्यत्वं नोपाधिः, वह्निना धूमे साध्य आर्द्रेन्धनप्रभववह्निमत्त्वं साधनविशेषितमप्युपाधिः। एवं च साधनविशेषितस्योपाधित्वानुपाधित्वयोः साध्यव्यापकताग्राहकानुकूलतर्कसदसद्भावौ बीजम्, तथा पर्वतेतरत्वस्य पक्षमात्रव्यावर्तकविशेषणवतो नोपाधित्वम्। प्रकृतयोः 'स्वबाधकाभिमताबाध्ये'त्युपाध्योः पक्षमात्रव्यावर्तकविशेषणवतोरप्युपाधित्वम्, इत्यत्र साध्यव्यापकताग्राहकानुकूलतर्कविरहाविरहौ हेतू इति॥ यद्वा साधनशून्यं सर्वं पक्षीकृत्य बाधाप्रतिसन्धानदशायां वह्निना धूमे साध्य आर्द्रेन्धनप्रभववह्निमत्त्वं पक्षमात्रव्यावर्तकविशेषणवदपि साध्यव्यापकताग्राहकानुकूलतर्कसद्भावाद् यथोपाधिः, तथा प्रकृतयोरप्युपाधित्वमित्यर्थः। यथाश्रुताभिप्रायेणाह – बाधित इति॥ बाधेन पक्षस्यैव विपक्षतया पक्षमात्रव्यावर्तकविशेषणवत्त्वमसिद्धमिति भावः। नच ब्रह्मज्ञानमात्रबाध्ये देहात्मैक्ये मिथ्याभूते साध्याव्याप्तिः। तस्य ब्रह्मज्ञानमात्रबाध्यत्वासिद्धेः। 'मम देहः' इति देहाद् भेदस्य सर्वैरनुभूयमानत्वेन देहात्मैक्याध्यासासम्भवस्य वक्ष्यमाणत्वेन मिथ्याभूतदेहात्मैक्यासिद्धेः॥

ननु यद्व्यतिरेकस्य साध्यव्यतिरेकसाधनत्वम्, तस्यैव साध्यव्यापकत्वम्। इतरांशेऽनुकूलतर्काप्रसरात्। तथाच क्षित्यादिकम्, कर्तृजन्यं न भवति, शरीराजन्यत्वात्, इत्यत्र यथा शरीरविशेषणवैयर्थ्यात् न शरीरजन्यत्वं कर्तृजन्यत्वव्यापकम्, एवं वियदादिकम्, न मिथ्या, स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वव्यतिरेकात्, इत्यत्र स्वबाधकाभिमताबाध्य भागस्य वैयर्थ्यात् स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं न मिथ्यात्वव्यापकम्। दोषप्रयुक्तभानत्वं तु भवति साध्यव्यापकम्। तच्च साधनव्यापकमपि, इति नोपाधिः। दृश्यत्वादिनैव मिथ्यात्ववत् तस्यापि साधनात्। एवं द्वितीयोपाधावपि 'स्वबाधकाभिमताबाध्यबाधकं प्रती'ति विशेषणं व्यतिरेकसाधने व्यर्थम्। विशेष्यभागस्तु साध्य-साधनयोर्व्यापकः, इति नोपाधिः। मैवम्। विशेष्यव्यतिरेकाद् विशिष्टव्यतिरेकस्य भिन्नत्वेन तत्र वैयर्थ्यासंभवात्। तथाहि – एकस्मिन्

प्रथमोपाधौ दोषविशेषणम्। द्वितीयोपाधौ बाधकज्ञानविशेषणम्। एवं चाविद्यारूपो दोषो वियदादिबाधकाभिमतया चरमवृत्त्या बाध्य एव, इति स्वबाधकाभिमताबाध्यत्वरूपविशेषणाभावाद् विशिष्टरूपोपाधिर्नास्त्येव। मम मते तु विशेष्याभावाद् विशिष्टरूपोपाधिर्नास्ति इति भवति पक्षे साधनव्यापकः। एवं द्वितीयोपाधावपि योजनीयम्। साधनाव्यापकत्वमाह – पक्षादिति॥ 'विपक्षाद् व्यावृत्तस्ये'ति पाठेऽनेन साध्याभाववदवृत्तित्वरूपसाध्यव्याप्यत्वोक्तिः॥ व्यतिरेकव्याप्तिमत इति॥ साध्यव्यतिरेकनिरूपितव्याप्तिमद्व्यतिरेकप्रतियोगिन इत्यर्थः। अनेन साध्याभावव्याप्याभावप्रतियोगित्वरूपसाध्यव्यापकत्वोक्तिः॥ एवञ्च समव्याप्तिर्लभ्यत इत्यभिसन्धायोक्तम् – समव्याप्तिमत इति॥ यद्वा – समव्याप्तिमत्त्वाद् व्यतिरेकव्याप्तिमत इत्यर्थः॥ वस्तुतस्तु – पक्षाद् व्यावृत्तस्येत्येव युक्तः पाठः। अत एव पक्षेतरत्वशङ्कायां तां निराकरोति – नचेति॥ पक्षमात्रव्यावर्तकविशेषणवत्त्वम्=तादृशविशेषणघटितत्वम्। नतु तादृशविशेषणं प्रति विशेष्यत्वम्॥

तथाहि – उपाधित्वेन प्रेक्ष्यमाणे विशिष्टे प्रविष्टस्यान्यत्वरूपस्य पर्वत-तदितरसाधारणस्य विशेष्यस्य यद् विशेषणं पर्वतावयववृत्तीति तेनान्यत्वरूपं विशेष्यं पक्षमात्राद् व्यावर्त्यते। पर्वतावयववृत्त्यन्यत्वस्य पर्वतेऽसत्त्वात्। अतः पर्वतावयववृत्तीति विशेषणं पक्षमात्रव्यावर्तकम्। तथाविधविशेषणवानन्यत्वरूपो धर्मः। एवं वह्निसामग्रीयुक्तत्वस्य विशेष्यस्य पर्वततदितरसाधारणस्य यद्विशेषणम् – 'अपर्वतीये'ति, तेन वह्निसामग्रीयुक्तत्वं विशेष्यं पक्षमात्राद् व्यावर्त्यते, इति पर्वतावयववृत्त्यन्यत्वमपर्वतीयवह्निसामग्रीयुक्तत्वं च पक्षमात्र व्यावर्तकविशेषणवदित्यर्थः। यथाश्रुतेत्वविशिष्टोपाधिं प्रति पक्षमात्रव्यावर्तकविशेषणाभावेना संगतिः स्यात्। यद्यप्यत्र पर्वतावयववृत्त्यन्यत्वस्य पर्वतावयववृत्तिरूपादिव्यावर्तकत्वाद् न पक्षमात्रव्यावर्तकत्वम्। एवम्– 'अपर्वतीये'त्यस्यापि पर्वतीयवह्निसामग्रीयुक्तपर्वतीयवृक्षादि व्यावर्तकतया न पक्षमात्रव्यावर्तकत्वम्, तथापि साध्यव्यापकताग्राहकानुकूलतर्कादिराहित्याद् यथा पर्वतावयववृत्त्यन्यत्वादेर्नोपाधित्वम्, तथा प्रकृतयोरपि नोपाधित्वम्; साध्यव्यापकता ग्राहकतर्कादेरभावादिति शङ्कितुरभिप्रायः। अत एव 'वक्ष्यमाणानुकूलतर्कैः साध्यव्यापकत्व निश्चयादि'त्यनुकूलतर्केण साध्यव्यापकत्वनिश्चयो वक्ष्यत इत्याशयः। यद्यपि प्रकृतयोः 'स्वबाधकाभिमताबाध्ये'त्याद्युपाध्योरनुपाधितायां पर्वतेतरत्वादिकमेव निदर्शनीयम् ; तथापि पर्वतेतरत्वादेरनुपाधितायां न पक्षमात्रव्यावर्तकविशेषणवत्त्वं प्रयोजकम्, किन्तु पर्वतेतरत्वस्य पक्षमात्रवृत्तिव्यतिरेकप्रतियोगितया पर्वतेतरत्वव्यतिरेकेण साध्याभावसाधनेऽसाधारण्यात् पर्वतेतरत्वस्य नोपाधित्वम्। प्रकृतयोः 'स्वबाधकाभिमताबाध्ये'त्याद्युपाध्योस्तु न

पक्षेतरत्वतुल्यत्वाच्च। न च बाधोन्नीतत्वात् सोऽप्युपाधिः। बाधस्याग्रे निरसिष्यमाणत्वाद्। अपि च यद्व्यतिरेकस्य साध्यव्यतिरेकसाधकत्वं तस्यैव साध्यव्यापकत्वम्, इतरांशे अनुकूलतर्काप्रसरात्। तथा च 'क्षित्यादिकं न कर्तृजन्यम् शरीराजन्यत्वा' दित्यत्र यथा शरीरविशेषणवैयर्थ्यान्न शरीरजन्यत्वं कर्तृजन्यत्वव्यापकम्, एवं 'वियदादिकं न मिथ्या स्वबाधकाभिमताबाध्यदोष प्रयुक्तभानत्वरहितत्वा' दिति साध्यव्यतिरेकसाधने स्वबाधकाभिमताबाध्यभागस्य वैयर्थ्यात् स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं न मिथ्यात्वव्यापकम्। दोषप्रयुक्तभानत्वं तु भवति साध्यव्यापकम्। तच्च साधनव्यापकमपीति नोपाधिः। दृश्यत्वादिनैव मिथ्यात्ववत्तस्यापि साधनात्। एवं द्वितीयोपाधावपि 'स्वबाधकाबाध्यबाधकं प्रती'ति विशेषणं व्यतिरेकसाधने व्यर्थम्। विशेष्यभागस्तु साध्यसाधनयोर्व्यापक इति नोपाधिः। अत एवाधिष्ठानत्वाभिमत समसत्ताकदोषवद्धेतु जन्यज्ञानविषयत्वमुपाधिः। अत्र च ब्रह्मणोऽपि बौद्धकल्पितदोषवद्धेतुजन्यक्षणिकत्वादि ज्ञानविषयत्वात् समव्याप्तिसिद्ध्यर्थमधिष्ठान समसत्ताकेति विशेषणम्, नतु पक्षमात्र व्यावृत्त्यर्थम्, अतो न पक्षेतरतुल्यतेत्यपास्तम्। ब्रह्मणीव ब्रह्मणि कल्पिते क्षणिकत्वादावपि मिथ्याभूते धर्मे अधिष्ठानसमसत्ताकदोषवद्धेतुजन्यज्ञानाविषयत्वादुपाधेः साध्याव्याप्तेः। व्यतिरेकसाधने व्यर्थविशेषणत्वस्योक्तत्वाच्च। नापि श्रुतितात्पर्याविषयत्वमुपाधिः। श्रुतितात्पर्यविषयत्वस्य ब्रह्ममात्रनिष्ठतया तदभावस्य साधनव्यापकत्वात्। नापि प्रातिभासिकत्वमुपाधिः। तद्धि ब्रह्मज्ञानेतरबाध्यत्वम्। तस्य च देहात्मैक्ये मिथ्याभूतेऽप्य सत्त्वेन साध्याव्याप्तेः। व्यतिरेके व्यर्थविशेषणत्वाच्च। नापि प्रतिभासमात्रशरीरत्वमुपाधिः। दृष्टिसृष्टिपक्षे साधनव्यापकत्वात्, परेषामसिद्धेश्चेति। इति दृश्यत्वादीनां सोपाधित्वभङ्गः॥

न्यायामृततरङ्गिणी

स्वबाधकाभिमतेति॥ दिदर्शयिषितोपाधिकमधिकरणं स्वशब्दार्थः। शुक्तिरूप्यादौ साध्यवति शुक्तिरूप्यादिबाधकत्वेनाभिमतेन 'नेदं रजतमि'ति ज्ञानेनाबाध्यो यो दोषः=सादृश्यादिः, तत्प्रयुक्तभानत्वस्य, तथोक्तविधया स्वबाधकाभिमताबाध्यबाधकं 'नेदं रजतमि'ति ज्ञानं प्रति निषेध्यत्वेन विषयत्वस्य सत्त्वात् सपक्षे रूप्यादावुपाध्योः साध्यव्यापकता। हेतुमति पक्षे पररीत्याऽविद्यारूपदोषप्रयुक्तभानत्वस्य, तथा ''नेति नेती''ति वेदान्तवाक्यजन्यं बाधकज्ञानं प्रति निषेध्यत्वेन विषयत्वस्य च सत्त्वात् साधनव्याप्तिर्मा भूत्, इति 'स्वबाधकाभिमताबाध्ये'ति

१७. दृश्यत्वादेः सोपाधिकत्वम्

सोपाधिकाश्च दृश्यत्वादयः। स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वस्य तदबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वस्य वा पक्षाद्व्यावृत्तस्य समव्याप्तिमतो व्यतिरेकव्याप्तिमतश्चोपाधित्वात्। न च पर्वतावयववृत्त्यन्यत्वापर्वतीयवह्निसामग्री युक्तत्वादेरिव पक्षमात्रव्यावर्तक विशेषणवत्वात्पक्षेतरत्वम्। वह्निना धूमे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वादेरिव वक्ष्यमाणानुकूलतर्कैस्साध्यव्यापकत्वनिश्चयात्; बाधिते पक्षेतरत्वस्याप्युपाधित्वाच्च। इह च वक्ष्यमाणप्रत्यक्षादिबाधात्। यद्वा यथानुकूलतर्का भावान्मित्रातनयत्वेन श्यामत्वे साध्ये शाकपाकजत्वम्, तस्मिन्साध्ये श्यामत्वमुपाधिः, तथेहापि बाध्यत्वादिरूपे मिथ्यात्वे साध्ये विपरीतप्रमाविषयत्वदोषप्रयुक्तभानत्वादिकम्, तस्मिन्साध्येमिथ्यात्वमुपाधिरस्तु। युगपदुभयसाधने त्वर्थान्तरम्, मिथ्यात्व एव विप्रतिपत्तेः। बाधो भ्रान्तिपूर्वकः विपरीतप्रमा तु नेति तयोर्भेदः।

यद्वा अधिष्ठानाभिमतसमसत्ताकदोषवद्धेतुजन्यज्ञानविषयत्वमुपाधिः। ब्रह्मणोऽपि बौद्धकल्पितदोषवद्धेदजन्यज्ञानविषयत्वात् समव्याप्त्यर्थमधिष्ठानसमसत्ताकेति विशेषणम्। न तु पक्षव्यावृत्त्यर्थम्। येन पक्षेतरत्वं स्यात्। यद्वा वेदतात्पर्यविषयाद्धर्माधर्मादिरूपात्साक्षिवेद्यात्सुखदुःखादिरूपाद्वा पक्षैकदेशाद्व्यावृत्तं श्रुतितात्पर्याविषयत्वम्, दोषजन्यधीविषयत्वं वा पक्षमात्राद्व्यावृत्तं प्रतिभासमात्रशरीरत्वं वोपाधिः। न च तवापि जगत्प्रतिभासमात्रशरीरं प्रतिकर्मव्यवस्थाद्ययोगादिति दिक्।

इति दृश्यत्वादेः सोपाधिकत्वम्।

अद्वैतसिद्धिः

ननु – दृश्यत्वादिहेतवः सोपाधिकाः। तथाहि स्वबाधकाभिमताबाध्यदोषप्रयुक्तभानत्वं स्वबाधकाबाध्यबाधकं प्रति निषेध्यत्वेन विषयत्वं वा विपक्षाद् व्यावृत्तं समव्याप्तम्। अत एव व्यतिरेकव्याप्तिमदुपाधिः इति चेन्न। ब्रह्मज्ञानमात्रबाध्ये देहात्मैक्ये मिथ्याभूते साध्याव्यापकत्वात्। पर्वतावयववृत्त्यन्यत्वादिवत् साधनवत्पक्षमात्रव्यावर्तकविशेषणवत्त्वेन

एतत्पटोचितार्थक्रियाकारी न। अंशित्वात्पटांतरवदित्याभासानुमानेन साम्यं। अत्र बाधादिकस्य त्वदुक्तानुमानेपि साम्यादितिभावः॥

ज्ञानेति॥ ज्ञानंच ब्रह्मैवेतिज्ञेयं॥ सहोपलंभेति॥ सहोपलंभनियमेत्यर्थः। यथोक्तं बौद्धेन ''सहोपलंभनियमादभेदोनीलतद्धियो'' रिति। तद्विरहस्य उपलब्धिविरहस्य॥ तद्विरहेति॥ ज्ञानविरहेत्यर्थः। तथाचासिद्धिरित्यर्थः। तर्ह्युपलब्धिविरहः किंविरहप्रयुक्तइति प्रसंगात्पृष्टवंतं प्रत्याह॥ उपलब्धिसामग्रीति॥ चित्रेति॥ सभायामपि चित्रभित्तौ लिखितं यन्निम्नोन्नतादिकं तत् अविद्यमानमेव लिखितमस्तीति धीकालएव द्रष्टुरन्यथाप्रतीयत इत्यर्थः॥ असिद्धिरिति॥ हेतुद्वयस्यापीत्यर्थः। पक्षे हेतुद्वयस्यापि सत्त्वं क्रमेणोपपादयति॥ इदानीमेवेति॥ धीकालएवेत्यर्थः॥ सदात्मेति॥ सन् योयमात्मा तदात्मत्वेनेत्यर्थः॥ असिद्धिरिति॥ अस्माकं पक्षेऽसिद्धत्वादित्यर्थः॥ व्यर्थेति॥ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वेन प्रतीयमानत्वादित्येतावता पूर्तौ धीकालएवेति विशेषणं व्यर्थमित्यर्थः। तत्त्यागेच साध्याविशिष्टत्वादितिभावः। सवित्रादेरपि मिथ्यात्वान्न तत्र व्यभिचार इत्यस्वरसादुक्तमात्मनिचेति। तत्र भारूपवस्तुसंलग्नत्वरूपहेतोरेवाभावान्नव्यभिचार इत्यत आह॥ तस्यापीति॥ सवितुरात्मनश्चेत्यर्थः॥ आद्यइति॥ एतत्पटात्यंताभाव एतत्तंतुनिष्ठः एतत्पटानाद्यभावत्वात् एतत्पटान्योन्याभाववदित्याद्यनुमानइत्यर्थः॥ सिद्धेति॥ कार्यकारणयोरभेदेन तंतोरेव पटत्वेन स्वस्मिन्स्वस्याभावेन पटात्यंताभावस्य तंतुनिष्ठत्वं सिद्धमेवेत्यर्थः॥ द्वितीयइति॥ ब्रह्मप्रमान्येनेत्यादिविप्रति पत्तिवाक्योक्तविशेषणत्रयवत्त्वे सति अव्याप्यवृत्तित्वानधिकरणं स्वसमानाधिकरणात्यंताभावप्रतियोगि अनात्मत्वात्संयोगवदिति द्वितीयानुमानइत्यर्थः॥ अवयवावृत्तित्वोक्ताविति॥ कथमिदं लभ्यतइति चेदुच्यते। संयोगादिकं अव्याप्यवृत्तीत्युक्ते आश्रयं व्याप्य न वर्तते किं नामाश्रयैकदेशे तदवयवेऽस्तीति लभ्यते। तथाचाव्याप्यवृत्तित्वं नामाऽवयववृत्तित्वं। अव्याप्यवृत्तित्वानधिकरणत्वं नाम अवयवावृत्तित्वं लभ्यत इतिद्रष्टव्यं॥ अवयव्यादेरिति॥ अवयवरहितत्वेन तदवृत्तिनो गगनादेरेव पक्षत्वापत्त्यावयव्यादेरवयववृत्तिनः पक्षत्वं नस्यात्। तथाचावयव्यादेर्मिथ्यात्वं न सिद्धचेदित्यर्थः। नन्वव्याप्यवृत्तित्वं नाम स्वसमानाधिकरणात्यंताभावप्रतियोगित्वं अव्याप्यवृत्तित्वानधिकरणत्वंच स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वमिति विवक्षितं नावयवावृत्तित्वं अतोऽवयव्यादेः पक्षत्वोपपत्तिरित्यत आह॥ स्वेति॥ बाधितत्वादिति॥ तथाच स्वसमानाधिकरणात्यंताभावाप्रतियोगिनि विमते स्वसमानाधिकरणात्यंताभावप्रतियोगित्वसाधने बाधः॥ निरस्तत्वादिति॥ जडत्वभंगे ''नतावदात्मत्वं जाति'' रित्यादिना निरस्तत्वादिति भावः॥ तृतीयइति॥ ''विमतं नित्यद्रव्यान्यत् केवलान्वय्यत्यंताभावप्रतियोगि। पदार्थत्वात् नित्यद्रव्यव''दिति तृतीयानुमान इत्यर्थः॥ धर्माविच्छेदेनेति॥ पारमार्थिकत्वाकारेणेत्यर्थः॥ अर्थांतरत्वादिति॥ ब्रह्मवत्सत्त्वेप्युपपत्त्यार्थांतरत्वादित्यर्थः॥ नित्यद्रव्याणामपीति॥ इदानीमाकाशइत्यबाधितप्रतीतेः सत्त्वादित्यर्थः॥ चतुर्थइति॥ ''आत्मत्वावच्छिन्नधर्मिताको भेदः आत्मा अनात्मानेत्येवंरूपः न परमार्थसत्प्रतियोगिकः। अनात्ममात्रप्रतियोगिकत्वात् शुक्तिरूप्यप्रतियोगिकभेदवदि''तिचतुर्थानुमान इत्यर्थः॥ इत्यपीति॥ यथा न परमार्थसत्प्रतियोगिक इति आत्मधर्मिकभेदप्रतियोगिनोऽनात्मनः पारमार्थिकत्वाभावः साध्यते। एवं न व्यावहारिकसप्रतियोगिक इत्यपि सुसाधत्वेन आत्मधर्मिकभेदप्रतियोगिनोव्यावहारिकसत्वमपि न स्यादित्यर्थः॥ वक्ष्यमाणेति॥ सन्घटइत्यादिप्रत्यक्षबाधादिरूपवक्ष्यमाणदोषेत्यर्थः॥ इत्यंशित्वहेतुभंगविवरणं॥

अत्राभावप्रतियोगित्वाभावादित्युक्ते अन्योन्याभावप्रतियोगित्वदशायां घटादौ व्यभिचारः स्यात् अन्योन्याभावप्रतियोगित्वदशायां अत्यंताभावप्रतियोगित्वव्यवहाराभावेन साध्याभावात् अतः संसर्गाभावेत्युक्तं। तावत्युक्तेऽसिद्धिः दृष्टांते साधनवैकल्यंच स्यात्। पक्षीभूतमत्यंताभावप्रतियोगित्वं दृष्टांतीकृतं प्रागभावप्रतियोगित्वंच संसर्गाभावप्रतियोगित्वव्याप्यमेव नतु संसर्गाभावप्रतियोगित्वरूपमेव तदुभयं। नहि नीलघटत्वं घटत्वं चैकमेवेत्यतोऽसिद्धिसाधनवैकल्यपरिहाराय व्याप्यत्वादित्युक्तमिति द्रष्टव्यं॥ साध्येति॥ संयोगस्याव्याप्यवृत्तित्वेन स्वात्यंताभावसमानाधिकरणत्वादेतत्तंतु निष्ठात्यंताभावप्रतियोगित्वरूपं साध्यमस्तीति द्रष्टव्यं॥ स्वेति॥ यदधिकरणावच्छेदेन स्वयमस्ति तदधिकरणावच्छेदेन स्वयमस्तीति तत्र साध्यमेव नास्तीतिभावः। अव्याप्यवृत्तित्वमंगीकृत्याप्याह॥ द्रव्यत्वेति॥ तथाच पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिरयमिति भावः। ननु अयं पट एतत्तंतुनिष्ठात्यंताभावप्रतियोगी अंशित्वादित्यत्र एतत्तंत्वनारब्धत्वं नोपाधिः। हेतुसाध्ययोर्व्याप्य व्यापकभावग्राहकानुकूलतर्कसद्भावेन पक्षएव साध्यव्यापकताभंगात्। यथोक्तं।

''अनुकूलेन तर्केण सनाथे सतिसाधने।
साध्यव्यापकताभंगात्पक्षे नोपाधिसंभव'' इति।

ततश्चानुकूलतर्कसत्त्वे साध्ये हेतुरेव प्रयोजकतया प्राप्तो नोपाधिरित्यत आह॥ उपाधिरेवेति॥ साध्ये उपाधिरेव प्रयोजको नांशित्वहेतुः। कुत इत्यत आह॥ साध्यवतीति॥ ब्रह्मणः एतत्तंतुष्ववृत्तित्वेनै वत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरूपसाध्यवति ब्रह्मणि एतत्तंत्वनारब्धत्वरूपोपाधिवत् अंशित्वाख्यहेतोरभावेन तस्मिन्सत्यभवतोंशित्वहेतोस्तस्मिन्साध्येऽप्रयोजकत्वात् अत उपाधिरेव साध्ये प्रयोजकइतिभावः। ननु हेतुसाध्ययोर्व्याप्य व्यापकभावग्राहकानुकूलतर्कसद्भाव दशायां साध्यवति पक्षे उपाधेरभावेन पक्षएव व्यभिचारादुपाध्यभावसाध्या भावयोर्व्याप्यभावात्साध्याभावाविना भाव्यभावप्रतियोगित्वरूपोपाधि लक्षणाभावान्नास्योपाधित्वमित्यत आह॥ अनुकूलतर्काभावेचेति॥ व्यतिरेकहीनस्यापीति॥ उपाधिव्यतिरेकसाध्यव्यतिरेकयोर्व्याप्तिहीनस्यापीत्यर्थः। अयमाशयः। स्यादेवं यद्यत्रानुकूलतर्कः स्यात् सच नहीति वक्ष्यमाणरीत्या नास्त्येव तथाचैवमनुकूलतर्काभावेतु पक्षे साध्यानिश्चयेन व्यभिचाराभावेनोपाध्यभाववति पक्षे साध्याभावसद्भावादुपाधित्वं युक्तमेव। नन्वनुकूलतर्काभावदशायां पक्षएवोभयव्यतिरेकसद्भावात्कथं व्यतिरेकहीनस्यापीत्युक्तम् इति चेन्न। पक्षादन्यत्र व्यतिरेकहीनस्यापीति व्याख्यानात्। तंतु रूपादीनांच पक्षतुल्यत्वात्। एवंच यत्रैतत्तंत्वनारब्धत्वाभावः एतत्तंत्वारब्धत्वमिति यावत्। तत्रैतत्तंतुनिष्ठात्यंता भावप्रतियोगित्वाभावः एतत्तंतुषु सत्त्वमितियावत्। इत्येवमुपाधिसाध्यव्यतिरेकयोः पक्षे सद्भावेपि तंतुरूपादीनां पक्षतुल्यतया पक्षादन्यत्र कुत्राप्यभावेनोपाधित्वमुपपद्यतएवेति। ननु कथमत्रानुकूलतर्काभावः यद्येतत्तंतुनिष्ठात्यंता भावप्रतियोगित्वं न स्यात् तर्ह्यंशित्वं न स्यादिति हेतूच्छित्तिरूपबाधकतर्कस्य सत्त्वादित्यत आह॥ नहीति॥ साध्यं विनापि युक्तमेवेत्यर्थः। एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वाभाव रूपापादकस्यांशवत्त्वरूपं यदंशित्वं तदभावरूपं यदापाद्यं तदभावेनैव व्याप्ततया तर्कस्य विरुद्धत्वापत्त्याऽनुकूलतर्कस्य दुष्टत्वेन वक्तु मशक्यतया पक्षे व्यभिचाराभावेन युक्तमेतत्तंत्वनारब्धत्वस्योपाधित्वमिति भावः॥ उक्तहेतुनैवेति॥ अयंपटः

अन्योन्याभावरूपत्वेन। अभावस्य सत्यत्वांगीकारे भावस्यापि सत्यत्वं प्राप्तमित्याह। प्रध्वंसादेरिति॥ अभावस्य प्रतियोगिना सह तावद्विरोधोस्ति। सच तुल्यसत्ताकयोरेव न भिन्नसत्ताकयोरेव तथात्वे प्रातिभासिकघटव्यावहारिकतदभावयोर्विरोधापत्तेः। तथाच प्रकृते प्रध्वंसाद्यभावतत्प्रतियोगिनोर्विरोधाय प्रतियोगिनो भावसमसत्ताकत्वमवश्यं वाच्यमेव। अतोऽभावस्य पारमार्थिकत्वेन तत्प्रतियोगिनो भावस्यापि पारमार्थिकत्वापत्तिरित्यर्थः। अभावस्य सत्यत्वांगीकारेऽन्यदप्यनिष्टमापतितमित्याह॥ भावत्वेति॥ सर्वस्यापि भावस्य त्वया सत्त्वेन वा भावत्वेनवाऽन्येन वा केनापि प्रकारेण निर्वक्तुमशक्यत्वादेवहि अनिर्वचनीयत्वं स्वीकृतं सत्यत्वे केनापि प्रकारेण निर्वक्तव्यत्वापत्तेस्तच्चाशक्यं एवमेवाभावे अभावत्वानिर्वचने तस्यानिर्वचनीयत्वप्राप्त्या पारमार्थिकसत्यत्वासंभवेन तदर्थमभावत्वादिनिर्वचने महाप्रयासस्तव स्यात् तच्च त्वया निर्वक्तुमशक्यं अतस्तस्याप्यनिर्वचनीयत्वापातेन सत्यत्वं न स्यादिति भावः। अभावत्वप्रकारकप्रमां प्रति विशेष्यत्वमभावत्वमित्यस्यात्माश्रयदुष्टत्वात् प्रतियोगिज्ञानाधीनज्ञानविषयत्वादेस्तार्किकरीत्या समवायेऽस्मद्रीत्या साद्दश्येचातिव्याप्तत्वादित्यादि द्रष्टव्यं। अभावस्य सत्यत्वांगीकारे दृश्यत्वानुमानंच दुष्टंस्यादित्याह॥ अभावइति॥ नन्वभावव्यतिरिक्तत्वे सतीति विशेषणं दीयतइतिचेत्तत्राह॥ अभाववदिति॥ यथाऽभावे विद्यमानोपि हेतुर्न तत्र मिथ्यात्वप्रयोजको जातः किंतु तद्व्यतिरिक्तस्थलएवेत्युच्यते एवं पक्षे विद्यमानोपि हेतुः साध्ये प्रयोजको न स्यादित्यप्रयोजकइत्यर्थः। यत्र व्यभिचारे प्राप्ते तद्व्यतिरिक्तत्वे सतीति विशेषणं दीयते तत्र सर्वत्राप्यनयैव रीत्याऽप्रयोजकतैव देयेति संप्रदायः॥ प्रतियोगिघटितत्वेनेति॥ प्रतियोगिनिरूप्यत्वेनेत्यर्थः। ब्रह्मव्यतिरिक्तस्य भावस्य सत्यत्वांगीकारेऽद्वैतविरोधस्त्वया दीयते तदपेक्षयापि तवैव विशिष्याद्वैतविरोधःस्यात् ब्रह्मव्यतिरिक्तस्य द्वितीयाभावस्य सत्यत्वांगीकारे तस्य प्रतियोगिनिरूप्यत्वेन प्रतियोगिभूतभावरूपद्वितीयस्यापि सत्यत्वापत्त्या भावाभावद्वयस्य सत्यत्वांगीकारो विशिष्याद्वैतविरोधीत्याशयः॥ निरस्तत्वादिति॥ एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वं स्वरूपेण अनंगीकारात् नापि पारमार्थिकत्वेन। ब्रह्मवत्सत्यत्वेप्युप पत्त्यार्थांतरादिति निरस्तमित्यर्थः। एतच्च मिथ्यात्वनिरुक्तिदूषणप्रस्तावे उक्तमपि अनुमानदूषणायात्रोच्यत इत्यपौनरुक्त्यं। अंशित्वहेतोर्विरुद्धानैकांतिकबाधसत्प्रति पक्षोपाध्याभाससाम्यानिक्रमेण दर्शयिष्यन् विरुद्धत्वं तावदाह॥ अन्यासमवेतस्येति॥ अंशित्वं तंतुरूपांशवत्त्वं तच्चाश्रयाश्रयिभावसंबंधेनैव नान्यथा एवं चान्यासमवेतत्वेन सिद्धस्य पटादेरंशित्वं एतत्तंतुसमवेतत्वं विना न युक्तं। तथाचांशित्वरूप हेतोरेतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरूपसाध्येन विरोधइत्यर्थः। साध्याभावोपपादनाय संयोगवृत्त्येत्याद्युक्तं॥ समवायवृत्त्येति॥ यथाच साध्यस्यापि सत्त्वान्नपूर्वोक्तो व्यभिचार इतिध्येयं॥ विशेषणासत्त्वेनेति॥ समवायस्यैवाप्रामाणिकत्वादिति भावः॥ अप्रसिद्धेति॥ एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वाभावोह्येतत्तंतुषु सत्त्वं तच्च पक्षादन्यत्र कुत्राप्यप्रसिद्धमित्यर्थः। नच तंतुगतरूपादौ विशेषणं प्रसिद्धमिति वाच्यं। अत्रहि एतत्तंतुनिष्ठैतत्पटमात्रस्यैव न पक्षत्वं किंनामैतत्तंतुनिष्ठतया संप्रतिपन्ना ये पदार्थाः पटतद्गतरूपादयस्ते सर्वेपि पक्षत्वेनाभिमताएव पटसमानन्यायत्वादतो न तत्र विशेषणप्रसिद्धिर्युक्तेतिहृदयं। पटमात्रपक्षीकरणंतु लाघवायेति ज्ञेयं। तथाच पटादिरित्यर्थः। सामान्यतः प्रसिद्धिरस्तीत्याह॥ एतत्तंत्विति॥ किंचिदिति॥ यन्निष्ठात्यंताभावप्रतियोगि तत् एतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वरहितमेवायास्यतीतिभावः॥ संसर्गाभावेति॥

व्यावहारिकात्यंताभावप्रतियोगित्वं साध्यत इति चेत्तत्राह॥ अत्यंताभावइति॥ प्रतियोगितदभावयोर्वै लक्षण्यस्यावश्यकत्वेनात्यंताभावस्य व्यावहारिकत्वे तत्प्रतियोगिनो प्रातिभासिकस्य जगतः पारमार्थिकत्वं स्यादित्येवं निरस्तमित्यर्थः। ननु प्रामाणिकात्यंताभावप्रतियोगित्वमेव साध्यते तथात्वेऽद्वैतहानिः स्यादितिचेन्न। कुत इत्यत आह॥ अभावरूपाइति। नेहनानेत्यादिश्रुतीनां भावद्वैतनिषेधपरत्वमेवेति भावः। अभावस्य द्वितीयस्यांगीकारे द्वितीयभावोप्यवर्जनीय इत्याह॥ अभावइति॥ तदाश्रयइति॥ अभावस्य साधिकरणत्वादभावाश्रये ब्रह्मणि अभावाश्रयत्वं आदिपदेन अभावे तदाश्रितत्वमित्यादि भावरूपबहुधर्मांगीकारापत्तिरित्यर्थः। ब्रह्मणीवाऽभावेपि व्यावहारिका धर्मास्संत्येवेति नानिष्टमेतदित्यस्वरसादाह॥ अभावरूपेति॥ अद्वितीयादीत्यादिपदेन निर्गुणनिराकारादिशब्दग्रहणं। अत्र किंचित्प्रष्टव्यं। त्वन्मते ब्रह्मणः कस्मात्सर्वशब्दावाच्यत्वमंगीकृतमिति। शब्दप्रवृत्तिनिमित्तभूतानां द्रव्यगुणादीनां निर्धर्मके ब्रह्मण्यभावादितिचेत् तर्हि ब्रह्मणो द्वितीयादिशब्दवाच्यत्वं स्यात्। द्वितीयाभावरूपप्रवृत्तिनिमित्तस्य प्रामाणिकस्य ब्रह्मणि सद्भावादित्यर्थः। किंच तात्विके द्वितीयाभावे प्रमाणाभावेन तस्यासिद्धेश्च। ननु कथमसिद्धिः। ''एकमेवाद्वितीय''मित्यादि वेदांतेनैव तत्सिद्ध्युपपत्तेरितिचेत्तत्राह॥ अखंडार्थेनेति॥ अयमर्थः। वेदांतानां लक्षणया ब्रह्ममात्रप्रतिपादकत्वरूपाखंडार्थत्वांगीकारेणाभावाप्रतिपादकत्वात्तद सिद्धिरेव स्यात्। ननु स्वातंत्र्येणाभावाप्रतिपादकत्वेपि ब्रह्मविशेषणत्वेनतत्प्रतिपादकत्वं भविष्यतीति चेन्न। तथापि निर्विशेषार्थ निष्ठत्वरूपाखंडार्थत्वहानिरेवेति न वेदांतेन तत्सिद्धिरिति। व्यासज्यवृत्त्यभावाभिप्रायेण द्वयोरित्युक्तं। तथाप्यागमातिरिक्तप्रमाणेन तत्सिद्ध्युपपत्तिरितिचेत्तत्राह। अन्यस्यचेति॥ आगमातिरिक्तयोः प्रत्यक्षानुमानयोरतत्वावेदकत्वात् तत्वावेदकं प्रमाणमागमएवेतिवाच्यं। तेनच तत्सिद्धिर्नसंभवतीत्युक्तमित्यर्थः॥ श्रौतेति॥ अयमत्र कक्षाक्रमः। ब्रह्मव्यतिरिक्तं द्वितीयाभावं प्रामाणिकमंगीकुर्वता त्वया ब्रह्मव्यतिरिक्तस्य सर्वस्याभावबोधिकायाः ''एकमेवाद्वितीय'' मित्यादिश्रुतेरभावव्यतिरिक्तद्वितीय भावमात्रनिषेधपरत्वेन संकोचः कार्यो नत्वभावरूपद्वितीयनिषेधपरत्वेनेत्युच्यते तत्र वदामः। अद्वितीयमित्यत्र ब्रह्मव्यतिरिक्तं भावरूपं द्वितीय मस्ति अभावरूपं द्वितीयमेव नास्तीत्यपि संकोचः क्रियतां विशेषहेत्वभावात्। नन्वस्ति विशेषहेतुः। तात्विकद्वितीयाभावं बोधयताऽद्वितीयपदेन पुनरभावनिषेधे स्वविरोधः। ''यत्तदद्रेश्य'' मितिमानांतरेण चविरोधः। तत्राभावरूपधर्मप्रतिपादनात् अतो भावरूपद्वितीयनिषेधपरत्वेनैव संकोचः कर्तव्यइति चेत् तर्हि भावरूपद्वितीयमात्रनिषेधेप्यग्रआसीदित्यादि कालसत्त्वप्रतिपादकेन स्ववाक्यांतर्गतपदेन विरोधः। सन्घटइत्यादिप्रत्यक्षरूपमानांतरेणच विरोधः समान एवेति भावरूपपदार्थमंगीकृत्याभावरूपपदार्थनिषेधपरत्वेन स्वतंत्रभावनिषेधपरत्वेनवा संकोचः क्रियतामिति भावाभावरूपं पदार्थमंगीकृत्य भावरूपपदार्थएवस्वतंत्रभावनिषेधपरत्वेनैव संकोचः क्रियतामिति। अभावस्य सत्यत्वांगीकारे सत्यत्वज्ञानत्वानंतत्वादिरूपस्य भावमात्रस्यापि सत्यत्वं लब्धं सर्वस्यापि भावस्य स्वाभावाभावत्वेनाभाव रूपत्वादित्याह। भावस्यापीति॥ अभावस्यैव सत्यत्वमंगीकृत्याभावप्रतियोगित्वमात्रेण मिथ्यात्वांगीकारे बाधकमाह॥ अभेदस्येति॥ अन्योन्याभावरूपभेदप्रतियोगित्वेनेत्यर्थः। तादात्म्यप्रतियोगिकभावस्यैवान्योन्या भावत्वादितिभावः। अभावस्य सत्यत्वांगीकारे भेदस्य सत्यत्वं सिद्ध्यतीत्याह॥ भेदस्यापीति॥ अन्योन्याभावत्वेन

साध्येऽतेजस्त्वस्य तादृशस्योपाधित्वाङ्गीकारात्। नच – उपाधिव्यतिरेकेण साध्यव्यतिरेके साधनीये संयोगादौ सन्दिग्धव्यभिचार इति – वाच्यम्। अनुकूलतर्केण व्यभिचारसंशयनिरासादिति। स च प्रागेव दर्शितः। विद्यासागरीयमनुमानं निराचष्टे – यत्त्विति॥ ज्ञानस्येति॥ तथाचात्राप्यसिद्धिरिति भावः। ननु ज्ञानव्यतिरेकेणासत्त्वमुक्तमिथ्यात्वान्यतरत्वं विवक्षितम्। ज्ञानव्यतिरेकेणानुपलभ्यमानत्वं च चिदाभासे सत्येवोपलभ्यमानत्वमिति, अत उक्तदोषो नेति चेत् न। उक्तमिथ्यात्वानां प्रागेव दूषितत्वात्। चिदाभासे सत्येवोपलभ्यमानत्वं घटादावसिद्धम्; 'घटोऽयमि'त्याद्यनुभवे चिदाभासासम्भवस्योक्तत्वात्। विरुद्ध इति॥ नच – अनात्मन आत्मत्वेन प्रमितत्वं विवक्षितम्, एवं सति कथं विरुद्धत्वम्? इति वाच्यम्; दृष्टान्तस्य साधनवैकल्यापत्तेः। व्यर्थेति॥ 'धीकाले' इत्यस्य वैयर्थ्यमित्यर्थः। ॥सवित्रादाविति॥ पक्षत्वानभ्युपगमेनेदम्। तदभ्युपगमे त्वाह – आत्मनि चेति॥ उक्तदूषणातिदेशेन नवीनानुमानानि दूषयति – एतेनेति॥ आद्य इति॥ एतत्पटात्यन्ताभावः, एतत्तन्तुनिष्ठः, एतत्पटानाद्यभावत्वादित्यत्रेत्यर्थः॥ द्वितीय इति॥ अव्याप्यवृत्तित्वानधिकरणं विप्रतिपत्त्युक्तविशेषणत्रयोपेतम्, स्वसमानाधिकरणात्यन्ताभावप्रतियोगि, अनात्मत्वादित्यत्रेत्यर्थः। नच – तदप्रतियोगित्वं कल्पितम्, प्रतियोगित्वं पारमार्थिकमिति न बाध इति – वाच्यम्। अस्या व्यवस्थाया मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्, उक्तदूषणदूषितत्वाच्च। तृतीय इति॥ विमतं नित्यद्रव्यान्यत्, केवलान्वय्यत्यन्ताभावप्रतियोगि, पदार्थत्वादित्यत्रेत्यर्थः॥ चतुर्थ इति॥ आत्मत्वावच्छिन्नधर्मिताको भेदः, न पारमार्थिकप्रतियोगिकः, अनात्ममात्रप्रतियोगिकत्वादित्यत्रेत्यर्थः॥

इति अंशित्वादिहेतुभंगः

न्यायामृतप्रकाशः

मतद्वयेपीति॥ आवयोर्मतइत्यर्थः॥ कार्यस्येति॥ कार्यकारणयोरभेदेन आश्रयाश्रयिभावानंगीकारात् एतत्तंतोरेव पटत्वेनैतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वं सिद्धमिति सिद्धसाधनमितिभावः॥ अनाश्रितत्वेनेति॥ अन्यत्रानाश्रितत्वं सिद्धमेवास्ति एतत्तंतुष्वपि नास्तीत्युक्तेऽनाश्रितत्वेनाप्युपपत्तेः। अथवा विशेषनिषेधः शेषविध्यनुज्ञापकइतिन्यायेन एतत्तंतुष्वसत्त्वेऽन्याश्रितत्वमेव सिद्ध्येन्नमिथ्यात्वमित्यर्थः। अर्थांतराभावमाशंक्य निषेधति॥ यदिचेति॥ अनाश्रितत्वेऽन्याश्रितत्वेवा प्रत्यक्षबाधः। एतत्तंत्वारब्धः पटस्तावत्प्रत्यक्षः। अंशित्वं च हेतुः। तत्रांशित्वंनामांशवत्त्वं पटस्यांशाश्चतंतव एव तद्वत्त्वं चाश्रयाश्रयिभावसंबंधेनैव। एवंचांशित्वहेतुर्यदा एतत्पटे प्राप्तस्तदैतत्पटस्य नानाश्रितत्वादिकमित्यर्थः। असत्त्वमत्यंताभावप्रतियोगित्वं। एतत्तंतुष्वसत्त्वसाधनेपि प्रत्यक्षबाधात् उक्तरीत्यांशित्वहेतोः पक्षधर्मताबलाद्वा एतत्तंतुष्वप्यसत्त्वं न साधयितुं शक्यमित्यर्थः।

उक्तमप्यधिकविवक्षयाह॥ अपिचेति॥ प्रामाणिकइत्यादि॥ प्रामाणिकात्यंताभावप्रतियोगित्वंवा साध्यमप्रामाणिकात्यंताभावप्रतियोगित्वं वेत्यर्थः। एतेनेति॥ यावद्विशेषातिरिक्तसामान्याभावेनेत्यर्थः।

प्रतियोगिकाले तदत्यन्ताभावसंसर्गोऽप्यविरुद्ध एवेति व्यभिचारोद्भावनायोगादिति॥ ननु समवायेन तदत्यन्ताभावः साध्यः, पटान्तरस्य च संयोगेनैतत्तन्तुनिष्ठत्वेनैतन्निष्ठात्यन्ताभावप्रतियोगित्वाभावेऽपि समवायेन तन्निष्ठात्यन्ताभावप्रतियोगित्वसत्त्वेन साध्याभावाभावात् न व्यभिचारः, इत्यत आह – समवायवृत्त्येति॥ संयोगेन विद्यमानस्य पटान्तरस्य समवायेन विषयो हि समवायरूपविशेषणमात्रनिषेधपरत्वेनापि पर्यवस्यति। तथाच कार्य-कारणयोरभेदाङ्गीकारे समवायस्याप्यनङ्गीकारेण तादृशनिषेधस्यामिथ्यात्वेनाप्युपपत्त्याऽर्थान्तरमिति भावः। इह तन्तुष्विति॥ नच – प्रत्यक्षभ्रमसाधारणस्य चन्द्रप्रादेशिकप्रत्यक्षत्ववदप्रामाण्यशङ्कास्कन्दितत्वात् न बाधकत्वमिति – वाच्यम्। सत्यः पटो भवत्येवेत्यर्थसत्तानिश्चयत्वेनाप्रामाण्यशङ्कानास्कन्दितत्वात्, निष्कम्पप्रवृत्तिजनकत्वाच्च, स्वत एव प्रामाण्यावधारणाच्च, बाधकाभावस्याग्रे वक्ष्यमाणत्वाच्च। चन्द्रप्रादेशत्वादिकं तु दूरस्थत्वादिदोषयुक्तत्वादप्रामाण्यशङ्कास्कन्दितम्। न चाज्ञानमेवेह दोषः। तस्य मिथ्यात्वसिद्ध्युत्तर कालीनत्वेनान्योन्याश्रयात्। तस्मात् सुस्थो बाधः। सत्प्रतिपक्षश्चेति॥ ननु अत्र दृष्टान्ताभावेनान्वयव्याप्तेरभावाद् व्यतिरेकव्याप्तिर्वाच्या, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं यत्र, तत्रैतत्तन्त्वारब्धत्वाभाव इति। तत्रैतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वस्योपाधित्वम्। अस्ति च साध्यव्यापकता – यत्रैतत्तन्त्वारब्धत्वाभावः, तत्रैतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वं पटान्तरादौ। पक्षे सन्दिग्धं व्याप्यम्, उपाधिव्यतिरेकश्च निश्चितः। तथाच सन्दिग्धोपाधित्वेन हीनबलत्वात् सत्प्रतिपक्षत्वमिति – वाच्यम्। स्थापनानुमानेऽप्यस्योपाधेः सम्भवात्। यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वम्, तत्रैतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वम् ; पटान्तरे दृष्टत्वात्, यत्र पटत्वमंशित्वं वा, तत्र नोपाधिः ; पक्षे व्यभिचारात्। इयांश्च भेदः – प्रतिपक्षे सन्दिग्ध उपाधिः, स्थापनायां तु निश्चित इति। तथाच तुल्यबलत्वात् सुस्थः प्रतिपक्षः॥ नच – स्थापनायां नोपाधेः साध्यव्यापकता ; अनुकूलतर्काभावात्, इति – वाच्यम्। प्रतिपक्षेऽपि व्यतिरेकव्याप्तौ तुल्यत्वात्। निरुपाधिकसहचार एवानुकूलतर्क इति तु तुल्यम्। नच – संयोगादौ साध्याव्यापकतेति – वाच्यम्। संयोगस्याव्याप्यवृत्तित्वानभ्युपगमात्, पक्षधर्मावच्छिन्नसाध्यव्यापकत्वसम्भवाच्च। अत एव प्रतिपक्षानुमाने व्यतिरेकव्याप्तौ संयोगादौ व्यभिचारोऽप्यपास्तः। तस्मात् साधूक्ता सत्प्रतिपक्षता। संसर्गाभावप्रतियोगित्व व्याप्यत्वादिति॥ व्याप्यत्वादित्युक्ते प्रमेयत्वे व्यभिचारः, अतः – अभावप्रतियोगित्वेति। तावत्युक्तेऽप्यन्योन्याभावप्रतियोगित्वव्याप्यत्वसत्त्वेन तत्रैव व्यभिचारः, तदर्थं 'संसर्गे'ति विशेषणम्। केवलान्वयिनः संसर्गाभावाभावात् न व्यभिचारः। संसर्गाभावप्रतियोगित्वमात्रोक्तावसिद्धिः स्यात्, अतो 'व्याप्यत्वे'ति। नच – अत्र ध्वंसप्रतियोगित्वव्याप्यत्वमेव हेतुरस्तु, केवलान्वयिनि धर्मे न व्यभिचारः, नाप्यसिद्धिरिति – वाच्यम्। प्रागभावप्रतियोगिनि ध्वंसे ध्वंसप्रतियोगित्वाभावात् साधनवैकल्यं स्यात्। किञ्चासिद्धिरपि तदवस्था ; एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनि घटत्वे ध्वंसप्रतियोगित्वाभावात्। अत एव न प्रागभावप्रतियोगित्वव्याप्यत्वं हेतुः। एतत्तन्त्विति॥ ननु नायमुपाधिः स्वव्यतिरेकेण साध्यव्यतिरेकसाधने सोपाधिकत्वादिति चेत्, न ; तस्यैवोपाधेः स्थापनायामपि प्रतिपादितत्वादिति दिक्॥

ननु अस्योपाधेर्व्यतिरेकव्याप्त्यभावात् कथमुपाधित्वम्? अत आह – अनुकूलतर्काभावे चेति॥ नच – व्यतिरेकशून्यस्यानुकूलतर्काभावे चोपाधित्वमदृष्टचरमिति – वाच्यम्। तेजोमात्रं पक्षीकृत्योष्णत्वे

सत्यत्वमङ्गीकर्तव्यम्, समसत्ताकयोरेव प्रतियोगि-ध्वंसयोरेककालत्वविरोधात्। तथाच भावस्यापि सत्यत्वमापतितमित्याह – प्रध्वंसादेरिति॥ प्रतियोगिघटितत्वेनेति॥ प्रतियोगिनिरूप्यत्वेनेत्यर्थः। निरूपकासत्यत्वे निरूप्यसत्यत्वं नोपपद्यत इति हि परेणाङ्गीकृतम् ; अन्यथा मिथ्याभूतपरोपाधिघटितानां सार्वज्ञ्यादीनां मिथ्यात्वं न स्यात्, सार्वज्ञ्यादेर्मिथ्यात्वे हि परोपाधिकत्वमेव तन्त्रम्, इति त्वदभ्युपगमेनैव तव दूषणमिति भावः॥ अन्यासमवेतस्येति॥

अत्र कश्चित् – विरुद्धत्वं हि प्रकृतसाध्याभावव्याप्यत्वम्। न चांशित्वमेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावव्याप्यम्; तं विनाऽप्यंशित्वसम्भवेनाप्रयोजकत्वात्। नच – एतदंशित्व एतत्तन्तुनिष्ठात्यन्ताभावाप्रतियोगित्वं प्रयोजकमिति – वाच्यम्; केवलान्वयिधर्मस्यापि ऐतदंशित्वापत्तेः। किन्तु एतत्तन्तुनिष्ठप्रागभावप्रतियोगित्वमेवैतदंशित्वे प्रयोजकम्। तच्चैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे विद्यमानेऽपि सम्भवति, इति कथं विरुद्धत्वम्? इत्याह। तन्त्र। एवमत्राभिप्रेतम् – पट एतत्तन्तुनिष्ठाभावप्रतियोगी न स्यात् प्रागभावात्यन्ताभावयोरेकदेशस्थत्वविरोधात्। नच – संयोगात्यन्ताभावः प्रागभावसमानदेश इति – वाच्यम्, संयोगस्याव्याप्यवृत्तितानभ्युपगमात्, अत्यन्ताभाव-प्रागभावयोः समानदेशत्वे प्रागाभाव-प्रतियोगिनोरपि समानकालत्वं स्यात्; विरोधाविशेषात्। तथाचैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वैतत्तन्तुनिष्ठप्रागभावयोरेकत्र विरोधेनैतत्तन्तुनिष्ठप्रागभावप्रतियोगित्व रूपप्रयोजकनिवृत्तावेतत्तन्त्वारब्धत्वरूपमेतदंशित्वरूपं प्रयोज्यमपि निवर्तेत। तथाचान्यारब्धत्वाभाव एतदनारब्धत्वे चांशित्वं न स्यादिति प्रतिकूलतर्कसम्भवात् साध्याभावव्याप्यत्वसम्भवेन विरुद्धत्वं दुर्वारम्, – इति साधूक्तम् – 'विरुद्धश्चे'ति॥ यद्वा – यो यदंशः, स तन्निष्ठात्यन्ताभावप्रतियोगी नेति सामान्यतः साध्याभावव्याप्यत्वसम्भवः। नच – अप्रयोजकत्वमिति – वाच्यम्; यदन्वय-व्यतिरेकप्रयुक्तान्वय-व्यतिरेकौ यस्य स्तः, तस्य तत् प्रयोजकम् यथाहि वह्न्यन्वय-व्यतिरेकप्रयुक्तान्वय-व्यतिरेकवति धूमे वह्निः प्रयोजकः, तथेहाप्येतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्व एवैतदंशित्वम्। तदभावे तदभावः, इति तस्य तत्र प्रयोजकत्वात् न दोषः। वस्तुतस्तु – एतदंशित्वं हि एतत्तन्तुसमवेतत्वेन वा? अन्यसमवेतत्वेन वा? इति द्वेधा वक्तव्यम्। तत्र प्रत्यक्षाबाधादेतत्पटस्यान्यासमवेतत्वे सिद्धे, एतदंशित्वमेतत्समवेतत्वं विना न सिद्ध्यति, अत एवाह – अन्यासमवेतस्येति॥ तथाचैतत्पटस्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे साध्य एतदंशित्वं विरुद्धमिति।

कस्यचिदिति॥ नच – तत्समवायेन तन्निष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वतः संयोगेनापि तन्निष्ठाभावप्रतियोगित्वमिष्टमेवेति कथं व्यभिचारः? इति – वाच्यम्, मद्रीत्या व्यभिचारात्। नच – पक्षसमत्वात् न व्यभिचार इति – वाच्यम्। बीजाभावात्। नच – पक्षसमव्यभिचारस्य दोषत्वे पक्षीयव्यभिचारस्यापि दोषत्वापत्त्याऽनुमानमात्रोच्छेद एव बीजमिति – वाच्यम्; तावता पक्षतावच्छेदकाक्रान्ते मा भवतु दोषो व्यभिचारः, तदनाक्रान्ते तु स्यादेव दोषः॥ अस्तु वा पक्षीयव्यभिचारस्यापि दोषत्वम्। नचानुमानमात्रोच्छेदः; अनुकूलतर्कादिना तन्निरासेऽनुमानसम्भवात्। यत्तु – प्रतियोगिकाले तदत्यन्ताभावसंसर्गो विरुद्धः, इति व्यभिचारसम्भव इति, तन्त्र; समवायेन तन्निष्ठात्यन्ताभावमभ्युपगच्छतः

संयोगानङ्गीकारेण सिद्धसाधनत्वात्। न तृतीयः; सम्बन्धद्वयपुरस्कारेणैवाधेयत्वेन तदभाव आधेयत्वाभावात्। 'प्रकारान्तरेणाधेयत्वाभावादि'त्यभिधानेन सिद्धसाधनत्वाभिधानादिति। यत्तु – कथञ्चिद् भेदो नाम यदि मिथ्या भेदः, तदाऽभेद एव सत्यः। अधिष्ठानज्ञानाबाध्यात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्; अधिष्ठानज्ञानबाध्यात्यन्ताभावप्रतियोगित्वस्य सत्यत्वेऽपि सम्भवात्। भेदात्यन्ताभावश्चाभेद इति कथं नाभेदः सत्यः स्यात्? व्यवहारतोऽपि कार्य-कारणयोरभेदाच्चेति, तन्न; सिद्धसाधनता हि प्रतिवादिना देया, तथाच सिद्धसाधनतादातुः प्रतिवादिनो मते भेदस्य सत्यस्यैव विद्यमानत्वात् तमादायाश्रयाश्रयिभावसम्भवात् सिद्धसाधनोद्भावनस्याशक्यत्वात्। अनाश्रितत्वेनेति॥ नच – एतत्तन्तुमात्राश्रितत्वेनेति पक्षविशेषणात् नार्थान्तरमिति – वाच्यम्। पक्षतावच्छेदक-साध्ययोर्विरोधेनानुमित्यनुदयात्। तत एवेति॥ प्रत्यक्षबाधादेवेत्यर्थः। अपि चेति॥ अत्रत्यपरयुक्तिखण्डनं पूर्वमेव कृतमिति तत्रैवानुसन्धेयम्। ननु – अत्यन्ताभावो व्यावहारिकोऽङ्गीक्रियते। अतो नोक्तदोषः, इत्यत आह – अत्यन्ताभाव इति॥ निरस्तम्॥ बाध्यत्वलक्षण इति शेषः। ननु अत्यन्ताभावः प्रामाणिक एव, नचाद्वैतहानिः; अभावद्वैताङ्गीकारादिति शङ्कते – नन्विति॥ अभावेऽभावत्वादेरिति॥ तथाच भावरूपमपि द्वितीयं सत्यमङ्गीकर्तव्यमिति भावः। ननु – अभावत्वादेस्तदाश्रयत्वादेश्चाश्रयस्वरूपत्वेन नातिरिक्ताभावसत्यत्वापत्तिः। अस्तु वा अभावत्वादिकमभावातिरिक्तम्। नचैवमभावस्वरूपस्य मिथ्यात्वापातः। ब्रह्मणि सत्तासामान्याभावेऽपि सद्रूपत्ववदभावत्वादेर्मिथ्यात्वेऽप्यभावस्य सत्यत्वसंभवादिति – चेत्, न; अभावत्वादेर्विधिमुखवेद्यत्वेन निषेधमुखवेद्याभावरूपत्वासंभवात्। सत्तासामान्यस्यैव मयाऽनङ्गीकारेण तदभावेऽपि त्रिकालाबाध्यत्वरूपसत्त्वस्य सत्त्वेन ब्रह्मणः सद्रूपत्वसंभवेऽपि भावत्वादेर्मिथ्यात्वे भावस्य सत्यत्वासंभवात्। धर्मिसत्त्वोपपादकस्य धर्मस्य मिथ्यात्वे हि धर्मिणोऽपि मिथ्यात्वं संभवति। यथाहि घटत्वादेर्मिथ्यात्वे घटस्यापि मिथ्यात्वमिति। अभावरूपेति॥ नच – अद्वितीयादिपदानां समासपदत्वात् समस्तपदानाञ्च वाक्यरूपत्वाद् वाक्ये च शक्तिग्रहानपेक्षत्वेन शक्यतावच्छेदकापेक्षाया एवाभावेन कथं वाच्यत्वापादनम्? इति – वाच्यम्। ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वञ्च समासप्रयोजनमित्युक्तत्वेन समासपदस्यापि पदत्वात्, पदे च शक्तिग्रहापेक्षत्वेन शक्यतावच्छेदकावश्यकत्वेन तस्य च प्रकृते भावरूपस्यासंभवेऽप्यभावरूपस्य संभवेन तदापादनसंभवादिति भावः॥

किञ्चाभावद्वैतमभ्युपगच्छतस्तवाभावसिद्धिः किं वेदान्तेनाभिप्रेता? तदन्येन वा? नाद्य इत्याह – अखण्डार्थेनेति॥ सकलस्यापि वेदान्तस्य ब्रह्मैकपरतायाः परेणाङ्गीकारेणेत्यर्थः। नापर इत्याह – अन्यस्य चेति॥ अभावरूपद्वैतोररीकरणयुक्तेर्द्वैताङ्गीकारेऽपि साम्यमाह – श्रौतेति॥ किञ्चाभावद्वैताङ्गीकारे यथाकथञ्चिदभावरूपत्वं वा प्रयोजकम्? भावप्रतियोगित्वं वा? आद्ये दोषमाह – भावस्यापीति॥ द्वितीयेऽपि दोषमाह – अभेदस्यापीति॥ नच – अभावप्रतियोगित्वेऽपि सत्यत्वासिद्धिः कुतः? इति – वाच्यम्; अभावप्रतियोगित्वस्य भावत्वनियतत्वेनाभावस्य सत्यत्वाङ्गीकारेऽभेदस्य भावत्वेन सत्यत्वासिद्धेः। नच – अभावप्रतियोगित्वस्य भावत्वसमनियतत्वेऽभावे व्यभिचार इति – वाच्यम्; अभावप्रतियोगिकाभावाभावादिति मतेनाभिधानादिति भावः। दूषणान्तरमाह – भेदस्यापीति॥ किञ्चाभावसत्यत्वाङ्गीकारे ध्वंसस्याप्यभावत्वेन सत्यत्वात् तस्य च प्रतियोगिना सह विरोधार्थं प्रतियोगिनोऽपि

यत्त्विति॥ स्वाप्नो दृष्टान्तः॥ सहोपलम्भेति॥ सहोपलम्भः सहोपलम्भनियमः। एतच्च प्रपञ्चितं बौद्धाधिकारे – "ग्राह्य-ग्राहकयोरभेदे साध्ये सहोपलम्भनियमो हेतुत्वेनोपादीयते" इति। एतच्च व्याख्यातं शिरोमणिना – "सहोपलम्भनियमः नियमेनैकवित्तिवेद्यत्वम्, तदविषयकज्ञानाविषयत्वं वा, तेषां मते ज्ञानस्य स्वप्रकाशत्वात्, ज्ञान-ज्ञेययोरभेदे च ज्ञान-ज्ञेयग्राहकाभ्यां ज्ञेय-ज्ञानयोरपि ग्रहणात् नासिद्धिरि"ति॥ उपलब्धीति॥ तथाचा सिद्धिरित्यर्थः॥ यत्तु ज्ञानव्यतिरेकेणानुपलभ्यमानत्वं नाम चिदाभासे सत्येवोपलभ्यमानत्वं हेतुरिति, तन्न। घटादौ वृत्त्यतिरिक्तचिदाभासरूपज्ञानाभावस्य रूपादिरहितात्मनश्चाक्षुषादिज्ञाने प्रतिभासासम्भवस्य चोक्तत्वेन चिदाभासे सत्येवोपलब्ध्या हेतोरसिद्धेः॥ चित्रेति॥ चित्रपटविशेषोऽन्यथा प्रतीयते, निम्नमपि निम्नतरापेक्षयोन्नतत्वेन, उन्नतमप्युन्नततरापेक्षया निम्नत्वेनेत्यन्यथा प्रतीयत इत्यर्थः॥ इदानीमेवेति॥ "ब्रह्म तं परादाद् योऽन्यत्रात्मनो ब्रह्म वेदे"ति विप्र-क्षत्रप्रभृतीनामात्मव्यतिरेकविदं निन्दित्वा "इदं सर्वं यदयमात्मे"त्यादिश्रुत्याऽशेषाणामनात्मनामात्मतयोक्तत्वादित्यर्थः॥ घटादिकमिति॥ स्फुरणस्य भारूपतया ब्रह्मत्वेन तत्संलग्नतया घटादेः प्रतीतेरित्यर्थः॥ व्यर्थविशेषणतेति॥ धीकाल एवेत्यस्येत्यर्थः॥ आद्य इति॥ कार्यकारणयोरभेदेनकार्यस्य कारणानाश्रितत्वादित्यर्थः॥ अवयव्यादेरिति॥ अवयविनोऽवयववृत्तित्वानधिकरणत्वाभावादित्यर्थः॥ बाधितत्वादिति॥ पक्षतावच्छेदकावच्छिन्ने पक्षे साध्यानुमितेरसम्भवादित्यर्थः॥ अनात्मत्वस्येति॥ जडत्वभङ्ग इति शेषः॥ तृतीय इति॥ केवलान्वय्यत्यन्ताभावप्रतियोगित्वे साध्ये धर्मावच्छेदेन पारमार्थिकत्वेनार्थान्तरत्वात्, ब्रह्मवत् स्वरूपसत्तयाऽप्युपपत्तेः॥ नित्यद्रव्याणामपीति॥ 'इदानीमाकाशः' इति प्रतीतेरबाधितायाः सत्त्वादित्यर्थः॥

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यामंशादेर्भङ्ग ईक्ष्यताम्॥

इत्यंशित्वादिहेतुभङ्गः॥

न्यायामृतकण्टकोद्धारः

अंशित्वादिहेतुष्विति॥ ननु – स्वमते कार्य-कारणयोरभेदेऽपि कथञ्चिद् भेदस्यापि विद्यमानत्वात् तेन चाधाराधेयभावोपपत्तेरङ्गीकृतत्वात् कथं सिद्धसाधनम्? इति – चेत्, अयमत्राशयः – एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं समवायेन? संयोगेन वा? साधारणं वा? नाद्यः; कार्यकारणयोः समवायानङ्गीकारेण समवायेनैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वस्यासिद्धत्वात्। न द्वितीयः; कार्य-कारणयोः

प्रागभावाप्रतियोगित्वस्य पक्षावृत्तेः पक्षवृत्तितया संदिह्यमानैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाव्यापकत्वात्, दृश्यत्वाद्यनुपपत्तिरूपप्रतिकूलतर्कपराहतेर्वक्ष्यमाणत्वाच्च – इति। अत्र ब्रूमः। एवं हि पृथिवी, इतरभिन्ना, पृथिवीत्वात्, इत्यत्र पाकजरूपाभावादिकमुपाधिः स्यात्। पृथिवीत्वाभावव्यापकस्य पाकजरूपाभावस्य पक्षावृत्तेः पक्षवृत्तितया संदिह्यमान तदभेदाव्यापकत्वादिति तत्रापि शक्यं वक्तुम्। तस्मान्नैतन्निष्ठप्रागभावाप्रतियोगित्वमुपाधिः। संयोगादिना दृश्यत्वोपपत्तेर्वक्ष्यमाणत्वात् न प्रतिकूलतर्कपराहतिरिति सुस्थः सत्प्रतिपक्षः॥ उपाधिरेवेति॥ यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वम्, तत्रैतत्तन्त्वनारब्धत्वम्; यथाऽऽकाशादौ। यत्रैतन्त्वारब्धत्वम्, तत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावः; यथैतत्तन्त्वारब्धगुणादावित्यन्वयसहचारग्रहादिभिः साध्योपाध्योर्व्याप्य-व्यापकभावनिश्चयाद् उक्तसाध्यं प्रत्युक्तोपाधिरेव प्रयोजकः, नतु हेतुः। तस्य साध्यवति ब्रह्मण्यविद्यमानस्य साध्याव्यापकत्वेन साध्यं प्रत्यप्रयोजकत्वादित्यर्थः। ननु धूमादिरप्येवमेवाप्रयोजकः स्यादिति – चेत्, सत्यम्। तत्र कार्य-कारणभावतर्केण व्याप्तिग्रहात्, प्रकृते तथा तर्काभावादिति वक्ष्यते। ननु नासावुपाधिः। तथाहि – एतत्पटस्यैवैतत्तन्त्वारब्धरूपादेरप्येतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं परस्य सिषाधयिषितम्।

"अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः।
अंशित्वादितरांशीव दिगेवैषा गुणादिषु" ॥ इति

तत्त्वप्रदीपोक्तेः। तथाचोपाधिव्यतिरेकवत्येतत्तन्त्वारब्धरूपादौ साध्यव्यतिरेकानिश्चयेनोक्तोपाधेः साध्याभावाविनाभाव्यभावप्रतियोगित्वाभावादित्यत आह – अनुकूलेति॥ यद्वा – प्रयोजको धर्म उपाधिः। प्रयोजकत्वं च न न्यूनाधिकवृत्तेः। तस्मिन् सत्यभवतस्तेन विनाऽपि भवतस्तदप्रयोजकत्वात्। एतत्तन्तुनिष्ठात्यन्ताभावप्रतियो गित्वरूपसाध्यविरहिणि प्रमेयत्वादौ विद्यमानस्यैतत्तन्त्वनारब्धत्वस्योपाधेस्तेन विनाऽपि भवत उक्तसाध्यं प्रत्यप्रयोजकत्वात् नोपाधित्वम्। अत आह – अनुकूलेति॥ वाद्युपन्यस्तसाध्यनिरूपितव्याप्तिग्राहककार्य-कारणभावाद्यनुकूलतर्काभावे व्यतिरेकहीनस्यापि साध्यव्यतिरेकव्याप्यव्यतिरेकाप्रतियोगिनः साध्यव्यापकस्याप्युपाधित्वमार्द्रेन्धनादिवदक्षतमेवेत्यर्थः। वादिहेतावनुकूलतर्काभावमेवाह – नहीति॥ यत्तु एतत्तन्त्वनारब्धत्वं नोपाधिः; उपाधिव्यतिरेकेण साध्यव्यतिरेके साध्यमाने व्यतिरेकव्याप्तावेतत्तन्तुनिष्ठप्रागभावाप्रतियोगित्वस्योपाधित्वात् इति, तन्न। व्यतिरेक्युच्छेदापत्तेर्नैवं विधस्योपाधित्वमित्युक्तत्वात्॥ आभाससाम्यमिति॥ अप्रयोजकत्वमित्यर्थः। आभास साम्यस्यादोषत्वात्॥

विरुद्धत्वेनैतन्निष्ठप्रागभावप्रतियोगित्वस्याप्येतत्पटेऽसत्त्वात्। अन्यथा रूपात्यन्ताभाववति वाय्वादौ रूपप्रागभावस्यापि प्रसङ्गेन व्यावहारिक्यपि व्यवस्था न स्यात्। यच्चोक्तम् – केवलान्वयीत्यादि, तदपि न। न ह्येतत्समवेतत्वं नामैतन्नित्यसम्बन्धवत्त्वम्, किन्तु यावदेतत्स्वसत्त्वमेत त्संबन्धवत्त्वमात्रम्। तच्च केवलान्वयिनोऽप्येतत्तन्तुना सह विद्यत एव॥ कस्यचित् पटस्येति॥ अत्राहुः – (सि०) तत्समवेतस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वाणस्य तत्संयोगिनस्त न्निष्ठात्यन्ताभावप्रतियोगित्वाङ्गीकारेण पक्षसमत्वान्न व्यभिचारः – इति, तन्न। प्रतियोगिकालेऽत्यन्ताभावसंसर्गस्य विरुद्धत्वेन व्यभिचारस्य सत्त्वात्। ननु समवायसम्बन्धेनै तत्तन्तुनिष्ठात्यन्ताभावप्रतियागित्वं साध्यम्। तच्चैतत्तन्तुसंयोगिनि पटेऽप्यस्तीति न व्यभिचार इत्यत आह – समवायवृत्त्येति॥ तथा सति समवायानभ्युपगमपक्षे निरुक्तसाध्यस्यैतत्पटेऽपि सत्त्वेन सिद्धसाधनमर्थान्तरं वा स्यादित्यर्थः॥

इह तन्तुष्विति॥ अत्राहुः – 'इह तन्तुषु पटः' इति प्रत्यक्षं भ्रमसाधारणतया चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशङ्कास्कन्दितत्वेनाबाधकम् इति, तन्न। फलपर्यन्तार्थक्रिया लक्षणपरीक्षापरीक्षितप्रत्यक्षबाधस्योक्तत्वात्। चन्द्रप्रादेशिकत्वप्रत्यक्षे चाप्रामाण्यशङ्कैव, ननु परीक्षिततेति वैषम्यम्। वक्ष्यते चैतत् प्रत्यक्षबाधे॥ नचेति॥ साध्यरूपविशेषणप्रसिद्धिर्नेत्यर्थः। एतत्तन्तुगतरूपादेः पक्षत्वाभिप्रायेणेदम्॥ संसर्गाभावेति॥ अभिधेयत्वादिव्याप्ये प्रमेयत्वादौ व्यभिचारवारणाय संसर्गाभावप्रतियोगित्वेति। प्रमेयत्वादेस्तु घटादौ संसर्गाभाव प्रतियोगित्वसामानाधिकरण्येऽपि 'संसर्गाभावप्रतियोगित्वानधिकरणे केवलान्वयिधर्मेऽपि सत्त्वेन संसर्गाभावप्रतियोगित्वाव्याप्यत्वेनाव्यभिचारात्। 'संसर्गाभावप्रतियोगित्वादि'त्युक्तावसिद्धिः। पक्षीकृत एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे संसर्गाभावप्रतियोगित्वस्य हेतोराधाराधेयभावेना निश्चयात्। प्रागभाव-प्रध्वंसाभावप्रतियोगित्वमादाय पक्षे संसर्गाभावप्रतियोगित्वं न सम्भवति। अत्यन्ताभावप्रतियोगित्वस्य च साध्यत्वात्, तदादायापि पक्षे न हेतोर्निश्चयः। पक्षीकृतोपाधेर्हेतुकृतोपाधेश्चैकस्मिन्नुपधेये वृत्तावपि गन्धवत्त्व-रूपवत्त्ववत् तयोर्भेदेनाभेद सम्बन्धेनापि संसर्गाभावप्रतियोगित्वस्य पक्षावृत्तेः। व्याप्यत्वोक्तौ तु नासिद्धिः। पक्षीकृतेऽपि संसर्गाभावप्रतियोगित्वव्याप्यत्वसत्त्वात्। अन्योन्याभावप्रतियोगित्वमादायाभावप्रतियोगित्वव्याप्ये प्रमेयत्वादौ व्यभिचारवारणाय 'संसर्गे'ति। ननु साध्यप्रसिद्ध्युपपादकानुमानेनैव सत्प्रतिपक्षसिद्धेर्व्यर्थं पूर्वानुमानमित्यत आह – सामान्यत इति॥ विशिष्य सत्प्रतिपक्षार्थं तदनुमानमित्यर्थः॥ अत्र वदन्ति – (सि०) न सत्प्रतिपक्षः संभवति। यत्रैतत्तन्तु निष्ठात्यन्ताभावप्रतियोगित्वम्, तत्रैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रति योगित्वस्योपाधित्वेन प्रतिरोधस्य हीनबलत्वात्। एतत्तन्त्वारब्धत्वाभावव्यापकस्यैतत्तन्तुनिष्ठ

अधिष्ठानज्ञानबाध्यात्यन्ताभावप्रतियोगित्वस्य सत्यत्वेऽपि सम्भवात्, भेदात्यन्ताभावश्चाभेद इति भेदस्य मिथ्यात्वे कथं नाभेदः सत्यः स्यात्? व्यवहारतोऽपि कार्यकाणयोरभेदाच्च॥

तर्हि तत एवेति॥ प्रत्यक्षबाधादेवेत्यर्थः। उक्तमप्यधिकविवक्षयाऽऽह – अपि चेति॥ प्रामाणिकः पारमार्थिक इत्यर्थः। यथाश्रुते त्वन्तःकरणवृत्तिप्रतिबिम्बितचैतन्यरूपप्रमाविषयत्वेन प्रामाणिकस्यापि घटादेः परैर्बाध्यत्वाङ्गीकारादद्वैतहान्यापादनासंगतेः। अप्रामाणिकः प्रातिभासिक इत्यर्थः॥ एतेनेति॥ प्रामाणिकत्वाद्यविशेषितात्यन्ताभावमात्रं साध्यनिविष्टमित्यपि सिद्धसाधनादिदोषादेव निरस्तमित्यर्थः॥ अत्यन्ताभावो व्यवहारिक इतीति॥ जगदत्यन्ताभावस्य प्रामाणिकत्वेऽपि बाध्यतया जगत्तात्त्विकसत्ताऽविरोधित्वेनार्थान्तरतापत्तेरित्यादिना द्वितीय मिथ्यात्वलक्षणदूषणे निरस्तमित्यर्थः। अत्यन्ताभावस्य प्रामाणिकत्वपक्षमाश्रित्य शङ्कते – अभावरूपा इति॥ अभावस्य द्वितीयस्याङ्गीकारे द्वितीयो भावोऽप्यवर्जनीय इत्याह – अभावत्वादेरिति॥ अभावस्य तात्त्विकत्वाङ्गीकारः परमते विरुद्ध इत्याह – अभावरूपेति॥ साधिकरणस्य तात्त्विकस्य ब्रह्मारोपितजगदभावस्य ब्रह्मैवाधिकरणम्, इत्यद्वितीयशब्द प्रवृत्तिनिमित्तस्य द्वितीयाभावस्य ब्रह्मणि तत्त्वतः सम्भवेनाद्वितीयपदवाच्यता ब्रह्मणि स्यादित्यर्थः। तात्त्विकाभावे प्रमाणाभावश्चेत्याह – अखण्डेति॥ श्रौतेति॥ "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"त्यादौ तात्त्विकं द्वितीयाभावं बोधयताऽद्वितीयपदेन पुनरभावनिषेधे स्वविरोधो यथा, तथा द्वितीयस्य भावस्यापि निषेधे "अग्र आसीदि"त्यादिकालसत्त्वप्रतिपादकेन स्ववाक्यान्तर्गतपदेन विरोधाविशेषात् स्वतन्त्रभावनिषेधपरत्वेनापि संकोच आवश्यक इत्यर्थः॥ भावस्यापीति॥ अभावद्वैताङ्गीकारे भावो द्वितीयोऽङ्गीकृतः स्यादित्यर्थः। ननु अभावस्याभावाभावात् तस्य तात्त्विकत्वमित्यत आह– अभेदस्येति॥ भेदनिष्ठान्योन्या भावप्रतियोगित्वेनेत्यर्थः। अन्यथा तव भेददूषणानुपपत्तेरिति भावः॥ प्रतियोगिघटितत्वेनेति॥ प्रतियोगिनिरूप्यत्वेनेत्यर्थः॥ निरस्तत्वादिति॥ न स्वरूपेण; अनङ्गीकारात्। न पारमार्थिकत्वेन; ब्रह्मवत् स्वरूपसत्त्वेनाप्युपपत्त्याऽर्थान्तरादित्यर्थः। एतच्च मिथ्यात्व निरुक्तिदूषणप्रस्ताव उक्तमप्यनुमानदूषणावसरे पुनरुच्यते। अतो न पौनरुक्त्यम्॥ अन्यासमवेतस्येति॥ एतत्तन्तुनिष्ठात्यन्ताभाव प्रतियोगित्वव्यापकैतत्तन्त्वसमवेतत्वाभावरूपैतत्तन्तु समवेतत्वं विनाऽनुपपन्नमिति साध्यव्यापकविरुद्ध इत्यर्थः॥ अत्र वदन्ति एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वेऽप्येतत्तन्तुसमवेतत्वस्य सत्त्वेनांशित्वस्य साध्येनाविरोधात्। एतन्निष्ठात्यन्ताभावाप्रतियोगित्वं ह्येतत्समवेतत्वे प्रयोजकं न भवति। परमते केवलान्वयिधर्ममात्रस्यैतत्समवेतत्वापत्तेः। किंत्वेतन्निष्ठप्रागभावप्रतियोगित्वादिकम्। तच्चैतन्निष्ठा त्यन्ताभावप्रतियोगित्वेऽप्यविरुद्धम् – इति, तन्न। तदत्यन्ताभाववति तत्प्रागभावस्यापि

चैतदुपादानकत्वम्, न तु नित्यसंबन्धशालित्वम्, तस्यानभ्युमगमात्। ननु– अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धत्वाद्, व्यतिरेकेण पटान्तरवदिति प्रतिरोधः। न चाप्रसिद्धविशेषणत्वम्। एतन्निष्ठात्यन्ताभावप्रतियोगित्वं किंचिन्निष्ठात्यन्ता भावप्रतियोगि, संसर्गाभावप्रतियोगित्वव्याप्यत्वात्, प्रागभावप्रतियोगित्ववदिति सामान्यतस्त त्प्रसिद्धेः। नच – आकाशात्यन्ताभावस्य घटादौ संसर्गाभावप्रतियोगित्व व्याप्यत्वग्रहात् तस्य च केवलान्वयित्वेन किंचिन्निष्ठात्यन्ताभावप्रतियोगित्वाभावात् यत्र व्यभिचार इति वाच्यम्। संसर्गाभावप्रतियोगित्वानधिकरणे केवलान्वयिनि धर्मे सत्त्वेनाकाशात्यन्ताभावस्य संसर्गाभावप्रतियोगित्वाव्याप्यत्वेन व्यभिचाराभावाद् इति चेन्न, यत्रैतत्तन्तुनिष्ठात्यन्ता भावप्रतियोगित्वम्, तत्रैतत्तन्त्वारब्धत्वाभाव इति व्यतिरेकव्याप्तावेतन्निष्ठप्रागभावाप्रति योगित्वस्योपाधित्वेन प्रतिरोधस्य हीनबलत्वाद्, एतत्तन्त्वारब्धत्वाभावव्यापकस्यैतत्तन्तु निष्ठप्रागभावाप्रतियोगित्वस्य पक्षावृत्तेः पक्षवृत्तितया संदिह्यमानैतत्तन्तुनिष्ठात्यन्ता भावप्रतियोगित्वाव्यापकत्वात्। दृश्यत्वाद्यनुपपत्तिप्रतिकूलतर्कपराहतेर्वक्ष्यमाणत्वाच्च। अत एव एतत्तन्त्वनारब्धत्वमपि नोपाधिः। उपाधिव्यतिरेकेण साध्यव्यतिरेके साध्यमाने सोपाधिकत्वस्योक्तत्वात्। अव्याप्यवृत्तिसंयोगाभ्युपगमे तत्र व्यभिचाराच्च। अत एव यत्रैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वम्, तत्रैतत्तन्त्वनारब्धत्वमिति न साध्यव्यापकताग्रहोऽपि। तत्रैव व्यभिचारादिति सर्वमनवद्यम्॥

एवं च 'विमतं ज्ञानव्यतिरेकेणासत्, ज्ञानव्यतिरेकेणानुपलभ्यमानत्वात्, स्वप्नादिवदि' ति विद्यासागरोक्तमपि साधु। ज्ञानव्यतिरेकेणासत्त्वमुक्तमिथ्यात्वान्यतमत्वं चिदाभासे सत्त्येवोपलभ्यमानत्वं हेतुरिति न किंचिदनुपपन्नम्। एवमन्येषामपि प्रयोगा यथायोगमुपपादनीया इति शिवम्। इत्यंशित्वहेतूपपत्तिः।

न्यायामृततरङ्गिणी

कार्यस्य कारणाभेदेनेति॥ अत्र वदन्ति – अभेदे कार्य-कारणभावव्याहत्या कथञ्चिदपि भेदोऽवश्यमभ्युपेयः। नच ''तदनन्यत्वमारम्भणशब्दादिभ्यः'' इत्यधिकरणविरोधः। उपादानव्यतिरेकेणोपादेयं नास्तीत्यस्यैव तदर्थत्वा''दिति। तन्न। कथञ्चिद्भेदो नाम यदि मिथ्या भेदः, तदाऽभेद एव सत्यः। अधिष्ठानज्ञानाबाध्यात्यन्ताभावप्रतियोगित्वं हि मिथ्यात्वम्।

द्रव्याणामपि काले सत्त्वेन दृष्टान्तस्य साध्यवैकल्याच्च। चतुर्थे न व्यावहारिकप्रति योगिक इत्यपि सुसाधत्वेनाभाससाम्यात्। वक्ष्यमाणदूषणगणग्रासाच्च। इत्यंशित्वादि हेतुभंगः।

अद्वैतसिद्धिः

चित्सुखाचार्यैस्तु– 'अयं पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वाद्, इतरां शिवद् इत्युक्तम्। तत्र तन्तुपदमुपादानपरम्। तेन स्वोपाददाननिष्ठात्यन्ताभावप्रति योगित्वलक्षणमिथ्यात्वसिद्धिः। न च – कार्यस्य कारणाभेदेन तदनाश्रितत्वात् सिद्धसाधनम्, अनाश्रितत्वेनान्याश्रितत्वेन वा उपपत्त्या अर्थान्तरं च इति वाच्यम्। अभेदे कार्यकारणभावव्याहत्या कथंचिदपि भेदस्यावश्याभ्युपेयत्वात्। न च 'तदनन्यत्वमारम्भण शब्दादिभ्य' इत्यधिकरणविरोधः। उपादानव्यतिरेकेणोपादेयं नास्तीत्यस्यैव तदर्थत्वात्। बाधत्तन्मात्राश्रितत्वेन पक्षविशेषणाद्वा नार्थान्तरम्। न च प्रकृतेऽपि बाधः। तस्योद्धरिष्यमाणत्वात्। न चात्यन्ताभावस्य प्रामाणिकत्वाप्रामाणिकत्वविकल्पावकाशः। तस्य प्रागेव निरस्तत्वात्। नच – कस्यचित् पटस्य संयोगवृत्त्यैतत्तन्तुषु सत्त्वेन तत्र व्यभिचार इति वाच्यम्। तत्समवेतस्य तन्निष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वतः तत्संयोगिनस्तन्निष्ठा त्यन्ताभावप्रतियोगित्वाङ्गीकारेण पक्षसमत्वात्। न चाव्याप्यवृत्तित्वे नार्थान्तरम्। पटतदभावयोरेकाधिकरणवृत्तौ विरोधस्य जगति दत्तजलाञ्जलित्वप्रसङ्गात्, संयोगतदभावयोरप्येकाधिकरणवृत्तित्वानभ्युपगमात्। अभ्युपगमे वा एतत्तन्तुत्वावच्छिन्नवृत्ति त्वमत्यन्ताभावस्य विशेषणं देयम्, एवमेतत्कालीनत्वमपि। तेन कालान्तरीयाभावमादाय नार्थान्तरम्। न चेह तन्तुषु पट इति प्रत्यक्ष बाधः। तस्य भ्रमसाधारणतया चन्द्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशङ्कास्कन्दितत्वेनाबाधकत्वात्। बाधोद्धारे च विस्तरेणै तद्वक्ष्यामः। नच– अन्यासमवेतस्यांशित्वमेतत्तन्तु समवेतत्वं विना न युक्तमिति विरुद्धो हेतुरिति – वाच्यम्। एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वेऽप्येतत्तन्तुसमवेतस्य सत्त्वेनांशित्वस्य साध्येनाविरोधात्। एतन्निष्ठात्यन्ताभावाप्रतियोगित्वं हि एतत्समवेतत्वे प्रयोजकं न भवति, परमते केवलान्वयिधर्ममात्रस्य एतत्समवेतत्वापत्तेः। किंत्वेतन्निष्ठप्रागभावप्रतियोगित्वादिकम्। तच्चैतन्निष्ठात्यन्ताभावप्रतियोगित्वेऽपि न विरुद्धमित्युपपादितमधस्तात्। एतत्समवेतत्वं

एतत्तन्त्वारब्धत्वाद्घटतिरेकेण पटान्तरवदिति सत्प्रतिपक्षश्च। न चाप्रसिद्धविशेषणता। एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगि, संसर्गाभावप्रतियोगित्वव्याप्यत्वात्, प्रागभावप्रतियोगित्ववदिति सामान्यतस्तत्सिद्धेः।

एतत्तन्त्वनारब्धत्वं चोपाधिः। न चैतत्तन्त्वारब्धसंयोगे साध्याव्यापकत्वम्, आवयोः संयोगः स्वात्यन्ताभावासमानाधिकरण इति संमतेः। द्रव्यत्वावच्छिन्न साध्यव्यापकत्वोपपत्तेश्च। उपाधिरेव प्रयोजकः साध्यवति ब्रह्मणि उपाधिवद्धेतोरभावात्। अनुकूलतर्काभावे च व्यतिरेकहीनस्याप्युपाधित्वाच्च। न शित्वं साध्यं विना न युक्तम्। उक्तहेतुनैवैतत्पटार्थक्रियाकारित्वाद्यभावस्यापि सुसाधत्वादाभाससाम्यं च।

यत्तु विमतं ज्ञानव्यतिरेकेणासत्, ज्ञानव्यतिरेकेणानुपालभ्यमानत्वादिति विद्यासागरीयं बौद्धोक्तसहोपलम्भयुक्त्युद्गिरणम्, तत्र ज्ञानाद्भेदेनानुपलभ्यमानत्वं वा हेतुः? ज्ञानविरहप्रयुक्तोपलब्धिविरहवत्त्वं वा? आद्येऽसिद्धिः। घटस्य ज्ञानमिति हि धीः, न तु घटो ज्ञानमिति। नान्त्यः। ज्ञानस्योपलब्धित्वेन तद्विरहस्य तद्विरहाप्रयुक्तत्वात्। उपलब्धिसामग्रीविरहप्रयुक्तत्वाच्च।

यत्तु 'विमतं मिथ्या, धीकाल एवान्यथाप्रमित्वाच्चित्रनिम्नोन्नतादिवत्। भारूपवस्तुसंलग्नत्वात्सवितृच्छिद्रवत्। न चासिद्धिः। इदानीमेव ''इदं सर्वं यदयमात्मे'' तिश्रुत्या अशेषानात्मनः आत्मत्वप्रमितेः। घटादिकं स्फुरतीति भारूपवस्तु संलग्नत्वाच्चे'ति कौमुद्युक्तम्, तत्राद्येऽन्यथेत्यस्य यद्यात्मत्वेनेत्यर्थः तदा सदात्मत्वेन प्रमितत्वस्यामिथ्यात्वव्याप्तत्वाद् विरुद्धो हेतुः। यदि प्रतिपन्नोपाधिस्थनिषेध प्रतियोगित्वेनेति, तर्ह्यसिद्धिः। व्यर्थविशेषणता च। द्वितीयस्तु सवित्रादावात्मनि चानैकान्तिकः। तस्यापि सविता प्रकाशते आत्मा स्फुरतीति भारूपसंलग्नत्वादिति दिक्। एतेन नवीनानामनुमानानि निरस्तानि। आद्ये सिद्धसाध नदोषात्। द्वितीये अव्याप्यवृत्तित्वानधिकरणशब्देनावयवावृत्तित्वोक्तावयव्यादेरपक्षत्वापातात्। स्वसमाना धिकरणात्यन्ताभावाप्रतियोगित्वोक्तौ च तदप्रतियोगिनि तत्प्रतियोगित्वस्य बाधित त्वात्। अनात्मत्वस्य निरस्तत्वाच्च। तृतीये स्वरूपेणात्यन्ताभावप्रतियोगित्वे साध्ये अत्यन्तासत्त्वापातात्। धर्मावच्छेदेन तत्प्रतियोगित्वे साध्ये अर्थान्तरत्वात्। नित्य

अंशित्वादिहेतुभङ्गः

अंशित्वादिहेतुष्वपि मतद्वयेऽपि कार्यस्य कारणाभेदेन तदनाश्रितत्वात्सिद्ध साधनम्। अनाश्रितत्वेनान्याश्रितत्वेन वोपपत्त्या अर्थान्तरं च। यदि च प्रत्यक्षबाधा देतत्तन्त्वारब्धस्य पक्षत्वेन पक्षधर्मताबलाद्वा नानाश्रितत्वादिकम्, तर्हि तत एवैतत्तन्तुष्वपि नासत्त्वम्। अपि चात्यन्ताभावः प्रामाणिकः? अप्रामाणिको वा? आद्येऽद्वैतहानिः। अन्त्ये सिद्धसाधनम्। एतेनात्यन्ताभावमात्रं साध्यमिति निरस्तम्। अत्यन्ताभावो व्यावहारिक इति तु निरस्तम्।

नन्वभावरूपा धर्मा नाद्वैतं घ्नन्तीति मण्डनोक्तेरभावद्वैतं स्वीकृतमिति चेन्न। अभावे अभावत्वादेस्तदाश्रये चाभावाश्रयत्वादेः भावस्यावश्यकत्वात्। अभावरूपप्रवृत्ति निमित्तसम्भवेन ब्रह्मणोऽद्वितीयादिशब्दवाच्यत्वापातात्। अखण्डार्थेन वेदान्तेन ब्रह्माभावयोर्द्वयोरसिद्धेश्च। अन्यस्य च तत्त्वावेदकस्याभावात्। श्रौताद्वितीयपदस्या भावरूपद्वितीयनिषेधे इव भावरूपद्वितीयनिषेधेऽपि मानान्तरेणाग्र इति स्वपदेन च विरोधाविशेषे भावरूपद्वितीयनिषेधपरत्वेनैव संकोचः, नत्वभावरूपद्वितीयनिषेध परत्वेनेत्यत्र हेत्वभावाच्च। भावस्यापि स्वाभावाभावत्वाच्च। अभेदस्याप्यन्योऽन्या भावप्रतियोगित्वेन तत्सत्यत्वासिद्धेश्च। भेदस्याप्यन्योन्याभावत्वेन तत्सत्यत्वापत्तेश्च। प्रध्वंसादेः प्रतियोगिना सह विरोधाय स्वतुल्यसत्त्वप्रतियोगिसापक्षेत्वाच्च। भावत्वानिर्वचने भावस्येवाभावत्वानिर्वचनेऽभावस्यापि सत्त्वासिद्धेरभावे सत्त्वार्थं तवाप्यभावत्वादिनिर्वच(ने)नप्रयासापाताच्च। अभावे दृश्यत्वादेर्व्यभिचारस्य(वा) चाभाववद्भावस्यापि सत्यत्वेऽपि दृश्यत्वोपपत्त्या अप्रयोजकत्वस्य(वा) चापाताच्च। अभावस्य प्रतियोगिघटितत्वेन भावादपि विशिष्याद्वैतविरोधित्वाच्च।

किं चात्यन्ताभावप्रतियोगित्वं स्वरूपेण वा? पारमार्थिकत्वेन वा? नोभयमपि। निरस्तत्वात्। अन्या (न्यत्रा) समवेतस्यांशित्वमेतत्तन्तुसमवेतत्वं विना (ऽनुपपन्नमि) न युक्तमिति विरुद्धश्च। कस्यचित्पटस्य संयोगवृत्त्या एतत्तन्तुषु सत्त्वादनैकान्तिकश्च। समवायवृत्त्या एतत्तन्तुष्वसत्त्वं तु विशेषणासत्त्वेनापि युक्तम्। इह तन्तुषु पट इति प्रत्यक्षबाधितश्च। अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न,

तत्र गोत्वे। तथाचोक्तहेतोः स्वानुविद्धतया प्रतीयमाने गोत्वादौ व्यक्तीनामकल्पितत्वात् खंडमुंडादिव्यक्तौ व्यभिचारइत्यर्थः।

उक्तहेतोः स्वरूपासिद्धिमप्याह॥ किंचेति॥ सन्घटः सन् शब्दइत्यादिज्ञानविषयतया प्रतीयमाने घटादौ ब्रह्मानुविद्धत्वं नास्तीति कुत इत्यत आह॥ रूपादीति॥ रूपादीत्यादिपदेन गंधादिग्रहणं। अशब्दमस्पर्शमरूपमित्यादि श्रुतेरित्यर्थः। न तावत् ब्रह्म चाक्षुषादिज्ञानविषयः। रूपादिहीनत्वात्। धर्मादिवत् इत्यनुमानमुक्तं भवति। नन्विदमयुक्तं। गुणे गुणानंगीकारेण रूपादावेव व्यभिचारादितिचेत्सत्यं। रूपादिशब्दस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वतद्भत्समवेतत्वादिरूपचाक्षुषत्वादि प्रयोजकधर्मपरत्वेन व्यभिचाराभावादित्यवधेयं। महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वतद्भत्समवेतत्व रूपचाक्षुषत्वश्रावणत्वादिप्रयोजकधर्महीनमितिव्याख्येयं। यथाश्रुते रूपरूपत्वतदभावादिषु व्यभिचारइतिध्येयं। तथाच ब्रह्मचाक्षुषश्रावणादिज्ञानाविषयः। तत्प्रयोजकधर्मरहितत्वात् अतींद्रियवदित्यनुमानमुक्तं भवति।

हेत्वंतरमाह॥ आसंसारमिति॥ तथाच ब्रह्म न चाक्षुषादिज्ञानविषयः। आसंसारमज्ञानावृतत्वात्। व्यतिरेकेण घटादिवदित्यनुमानमुक्तं भवति। घटादौ संसारप्रसक्तेरेवाभावेन हेत्वभावोऽस्तीति ज्ञातव्यं। विमुक्तिकालीने ब्रह्मचैतन्ये स्वरूपासिद्धिवारणायाऽऽसंसारमित्युक्तं। व्यतिरेकेण घटादिर्दृष्टांतः। तत्र संसारप्रसक्तेरेवाभावेन हेत्वभावस्य सत्त्वादिति द्रष्टव्यं। हेत्वंतरमाह॥ शब्दैकेति॥ ब्रह्म न चाक्षुषादिज्ञानविषयः शब्दैकसमधिगम्यत्वाद्धर्मादिवत् व्यतिरेकेण घटादिवच्चेत्यनुमानं द्रष्टव्यं। ननु चाक्षुषादिज्ञाने तावत्सन्घटइत्यादि प्रतीयते। सच्च ब्रह्मैवेति अनुमानानां बाधइति चेन्न। सत्तु ब्रह्म न भवत्येव। तर्हि किमितिपृच्छति॥ किंत्विति॥ उत्तरयति॥ अनित्यइति॥ ननु रूपादिराहित्याद्युक्तहेतुत्रययुक्तस्यापि ब्रह्मणश्चाक्षुषे ज्ञाने भानमस्तु कथमिति चेत् व्यंजकविशेषसमवधानादितिवदामः। यथाहि रूपादिरहिततया स्वरूपेण प्रत्यक्षायोग्यस्यापि राहोः प्रत्यक्षीभूतचंद्रसंबंधो यदा तदोपरागकाले चंद्रावच्छेदरूपव्यंजकसमवधानेन प्रत्यक्षत्वं दृष्टं। एवं स्वरूपेण रूपादिरहिततया प्रत्यक्षायोग्यस्यापि ब्रह्मणः प्रत्यक्षीभूतघटाद्यवच्छेदरूपव्यंजकसमवधानेन प्रत्यक्षत्वोपपत्तेरित्यप्रयोजकतामाशंक्य निषेधति॥ नचेति॥ कुतोनचेत्यतोतिप्रसंगानाह॥ शब्दादीति॥ तथात्वे स्वरूपेणाश्रावणस्यापि गगनस्य शब्दसंबंधो यदा तदा श्रावणीभूतशब्दावच्छेदेन तस्यापि श्रावणत्वं स्यादित्यर्थः। एवं स्पर्शावच्छेदेन वायोरपि स्पार्शनत्वं स्यादित्याद्यतिप्रसंग आदिशब्दार्थः। ननु राहोरिवोपपत्तिरित्युक्तमितिचेन्न। स्यादिदं यदि राहोः स्वरूपेण रूपादिरहिततया प्रत्यक्षायोग्यत्वं स्यात्। नचैवं। नीलरूपांगीकारेण चाक्षुषतायास्सत्त्वात्। तर्हि कस्मान्नदृश्यत इति चेत् दूरस्थत्वादिदोषयुक्तत्वात्। ननु तर्हि दूरस्थत्वादिदोषयुक्तत्वादेव राहुप्रतीतिः कदापि न स्यादितिचेन्न। राहुमंडलस्य दूरस्थत्वेपि पर्वणि चंद्रं ग्रसितुं यदा तत्संबद्धं भवति तदा नीलरूपवतो राहोः शुक्लभास्वरूपोपेतचंद्रसंबंधाच्चाक्षुषत्वोपपत्तेः। लोके नीलस्य वस्तुनो दूरस्थस्यापि सौरादिप्रकाशसंबंधेन चाक्षुषताया अनुभवसिद्धत्वात्। प्रकृतेच ब्रह्मणोरूपादिरहितत्वेन प्रत्यक्षायोग्यतया चाक्षुषादिज्ञाने भानायोगात्सदनुविद्धतया प्रतीयमानत्वं विवादाध्यासिते घटादौ स्वरूपासिद्धमित्याशयेनाह॥ राहोस्त्विति॥ तथाच प्रत्यक्षायोग्यस्यापीत्युक्तमसदिति भावः॥ इति परिच्छिन्नत्वहेतुभंगविवरणं।

व्यभिचारोपि द्रष्टव्यः। नचतुर्थः। तत्रापि किमध्यस्ताद्भिन्नत्वं विवक्षितमुत सत्याद्भिन्नत्वं। नाद्यः। अध्यस्ताद्भिन्नत्वस्य अमिथ्यात्वेनैव व्याप्ततया सत्यत्वसाधकत्वाद्विरुद्धत्वं स्यादित्याह। भिन्नत्वेति॥ अध्यस्ताद्भेदेन विद्यमानेन निमित्तेन न द्वितीयइत्याह॥ सत्यादिति॥ प्रपंचस्य मया सत्यत्वांगीकारादितिभावः॥ स्वानुगतेति॥ स्वान्प्रत्यनुगतत्वेन प्रतिभासमानं यद्वस्तु तत्र कल्पिताइत्यर्थः। विभक्तत्वादननुगतत्वादित्यर्थः। अननुगतं स्वानुगते वस्तुनि कल्पितमिति तदभिप्रेतोर्थः। सर्पमालादिकमित्यत्रादिपदेन बलीवर्दमूत्रग्रहणं। यथैकस्मिन् रज्जाविदमंशेऽयंसर्पः इयंमालाअयंबलीवर्दमूत्रखंड इत्याद्यारोपदर्शनात् स्वान्सर्पादीननननुगतान्प्रत्यधिष्ठानतयानुगतेरज्जाविदमंशे सर्पादिकं कल्पितमित्यर्थः। अनुगच्छति सति विभज्यतेऽननुगतं भवति। तदेव दर्शयति॥ सन्नित्यादि॥ विभक्तत्वादिति सामान्यत एव हेतोःकरणात्तदर्थतया प्रसक्तपक्षानाशंक्य निषेधति॥ विभक्तत्वं हीति॥ निरस्तत्वादिति॥ आद्यस्य वस्तुपरिच्छिन्नत्वरूपहेतुनिरासेन द्वितीयतृतीययोः कालपरिच्छिन्नत्वदेशपरिच्छिन्नत्वरूपहेतु निरासेन निरस्तत्वादित्यर्थः॥ साध्येति॥ स्वानुगतप्रतिभासे वस्तुनि कल्पितत्वमपीदमेवेति साध्यावैशिष्ट्यमित्यर्थः॥ सुखदुःखादीति॥ सुखादेर्ज्ञातैकसत्त्वेन स्वोत्पत्त्यनंतरं यावत्स्वसत्त्वं सर्वदा प्रकाशमानत्वेन कदाचिदेव प्रकाशमानत्वं नास्तीत्यर्थः॥ अप्रयोजकत्वाच्चेति॥ कदाचिदेव प्रकाशमानत्वरूपं विभक्तत्वं कल्पितत्वं विना सत्यत्वेनाप्युपपन्नमित्यप्रयोजकत्वाच्चेत्यर्थः। ननु नाप्रयोजकता सत्त्वे सर्वदा प्रकाशप्रसंगेन कदाचिदेव प्रकाशमानत्वं न स्यादित्यनुकूलतर्कसद्भावा दित्यतोऽत्रान्यथासिद्धिमाह॥ युक्तोहीति॥ सतोपि सत्यस्यापि वस्तुनः इच्छादिवत्कदाचिदेव प्रकाशोपि युक्त इत्यन्वयः। प्रकाशसामग्र्याः इंद्रियार्थसंनिकर्षादिरूपायाः॥ इच्छेति॥ यथा कदलीफलादेः सत्त्वेपि न सर्वदा इच्छा किंनामर्थैंद्रियसन्निकर्ष जन्यज्ञानादिरूपतत्सामाग्र्यां सत्यामेव तथेत्यर्थः। एवं संभावितान्पक्षान्निषिध्य इतः परं पराभिप्रेतं विभक्तत्वमाशंक्य निराकरेति॥ नापीति॥ कुतोनेत्यतो व्यभिचारादित्याशयेनाह॥ अननुगतानामिति॥ नन्वननुगतस्यानुगतेऽध्यासोऽस्माभिःसाध्यते। तस्य च न घटादौ व्यभिचारः। तत्र घटादौ अननुगतत्वसद्भावेपि चलनादीनामनुगतत्वाभावादित्यतो घटादीनामननुगतत्वसद्भावेपि चलनादीनामनुगतत्वमुपपादयति॥ अस्ति हीत्यादिना॥ आत्मा सन्नित्यादीति॥ आत्मा सन् द्वितीयाभावः सन्नित्येवमात्मद्वितीया भावयोरननुगतत्वेपि सदर्थस्यानुगमो द्रष्टव्यः। अत एवपूर्वमप्यात्मनश्चेत्यत्र द्वितीयाभावस्यचेत्यपि ग्राह्यं। एवमव्याख्याने घटपटौ प्रतिचलनादिवत् सदर्थस्योभयानुगतत्वंनसिध्येदितिद्रष्टव्यं।

किंच यद्यनेकेषामननुगतानामेकस्मिन्ननुगतेऽध्यासदर्शनात्प्रपंचस्य सदर्थे ब्रह्मण्यध्यास उच्यते तर्हि एकस्यापि रूप्यस्यानेकेषु शुक्त्यादिष्वध्यासदर्शनादेकस्यैव सदर्थस्य ब्रह्मणोऽनेकेषु पटादिष्वेवाध्यासः किं नस्यादिति वैपरीत्यमेवस्यादित्याह॥ दृश्यतेचेति॥ वंगं सीसं॥ तदनुविद्धतयेति॥ सूत्रे स्यूतानां नानामणीनां सूत्रानुस्यूततया यथा प्रतीतिस्तथाघटः सन्पटः सन्निति सदर्थानुविद्धतया प्रतीयमानत्वादित्यर्थः। यद्यदनुविद्धतया प्रतीयते तत्तत्रकल्पितमिति सामान्यव्याप्तौ दृष्टांतमाह॥ प्रत्येकं चंद्रेति॥ जलतरंगेषु प्रतिबिंबितचंद्रस्यायं चंद्रोऽयं चंद्र इत्यादिरूपेण गगनस्थचंद्रानुवेधोऽस्तीत्यवधेयं। ब्रह्मसिद्धिर्माया वादग्रंथविशेषः। प्रत्येकं चलनाद्यनुविद्धत्वेन प्रतीयमानयोर्घटपटयोश्चलनादावनध्यासेन व्यभिचारादिति दूषणमेतेनेत्यतिदिश्य दूषणांतरमाह॥ खंडोगौरिति॥

साधनवैकल्यमितिभावः। पूर्वदूषितमपि द्वितीयपक्षं दूषणांतरदानायाशंक्य निराकरोति॥ नापीति॥ कालांतरादावसत्त्वरूपं कालादिपरिच्छिन्नत्वमितोपि नोपपद्यत इत्यर्थः। कुतोनोपपद्यत इत्यतोऽतिप्रसंगादित्याह। तेनेत्यादि॥ अयमर्थः। तेन कालांतरादावसत्त्वरूपपरिच्छिन्नत्वहेतुना यथेदानीमपि स्वोपाधावसत्त्वरूपं मिथ्यात्वं साध्यते तथा वयमपि वदामः। इदानीं स्वदेशकालयोः सत्त्वेन कालांतरादावपि सत्त्वं किंनस्यादिति। नन्विदानीं सत्त्वेन कालांतरादावपि सत्त्वसाधनेभाविबाधकशंकादिरूपबाधकसद्भावान्न तत्साधनं युक्तमितिचेत् तर्हि कालांतरेऽसत्त्वेनेदानीमप्यसत्त्वसाधने सन्घट इत्यादिप्रत्यक्षबाधस्याविशिष्टत्वादिति कालांतरेऽसत्त्वादिदानीमप्यसत्त्वमित्यस्य केनचिद्रूपेणासतः प्रतीयमानस्वरूपेणाप्यसत्त्वमितिहि फलितोर्थः। तत्रातिप्रसंगमाह॥ रूपांतरेणेति॥ निर्धर्मकतया पारमार्थिकत्वरूपेणासत इत्यर्थः। यद्वा मिथ्यात्वादिरूपेणासतइत्यर्थः। किंच कालांतरेऽसत्त्वादिदानीमप्यसत्त्वसाधने रूप्यादेर्वियदादेश्चकालांतरेऽसत्त्वादिदानीमपि स्वरूपेणासत्त्वंस्यात्। नचेष्टापत्तिः। असद्विलक्षणस्वरूपांगीकारात्। असद्विलक्षणस्वरूपानुपमर्देन पारमार्थिकत्वाकारेणैव निषेधइति त्वत्सिद्धांतविरोधादित्याशयेनाह॥ रूप्यादेरिति॥ एतेनेति॥ कालांतरादावसत्त्वेनेदानीमप्यसत्त्वसाधने रूप्यादेरित्युक्तातिप्रसंगापातेनेत्यर्थः॥ कदाचिदिति॥ भाविबाधकदशायामित्यर्थः। तथाच तदानीमसत्त्वादिदानीमप्यसत्त्वमितिभावः॥ शून्यवादीति॥ तेनेदानीं जगदसत्त्वागींकारात् मायिना चासद्विलक्षणत्वांगीकारादिदानीमप्यसत्त्वसाधनं शून्यवाद्युक्तिच्छर्दिरेवेत्यर्थः।

ननु देशपरिच्छिन्नत्वं नाम न देशांतरेऽसत्त्वमेकदेशमात्रे सत्त्वंवा विवक्षितं येनोक्तदोषः किंत्वन्यदेवेति तार्किकरीत्या शंकते॥ नन्विति॥ परिमाणाधिकरणत्वं विभुद्रव्येऽतिव्याप्तमतोमहत्त्वानधिकरणेति परिमाणविशेषणं। महत्त्वानधिकरणत्वमात्रं गुणेऽतिप्रसक्तमतः परिमाणाधिकरणत्वमित्युक्तमितिद्रष्टव्यं॥ आद्ययोरिति॥ ''असंगोह्ययंपुरुष'' इति श्रुतेःब्रह्मणोऽसंगत्वावगमात्सर्वमूर्तासंयोगित्वमस्ति। ''केवलो निर्गुणश्च'' इतिश्रुतेर्ब्रह्मणो निर्गुणत्वावगमात्परममहत्परिमाणरूपगुणाभावेन न परममहत्परिमाणाधिकरणत्वं चास्तीत्यतिव्याप्तिरितिभावः॥ गुणादाविति॥ गुणकर्मादौ गुणानंगीकारादितिभावः। तथाच भागासिद्धिरितिभावः। लक्षणत्रयस्याप्यवकाशप्रकृत्यादावसिद्धिः स्पष्टेति नोक्तेति द्रष्टव्यं। कालांतरासत्त्वाख्यानित्यत्वमेव कालतः परिच्छिन्नत्वमितिपक्षे पूर्वानुक्तदूषणांतरमाह॥ कालेति॥ अन्योन्याभावादावित्यत्रादिपदेन नित्यभूतप्रध्वंसाभावग्रहणं। अन्योन्याभावस्याऽनित्यत्वे सर्वपदार्थानां तादात्म्यापत्तिः। प्रध्वंसस्यानित्यत्वेच प्रतियोग्युन्मज्जनापत्तिरिति हृदयं॥ तद्धीति। वस्तुतः परिच्छिन्नत्वमित्यर्थः। किंतात्विकभेदवत्त्वंवा कल्पितभेदवत्त्वंवा धर्मिसमसत्ताकभेदवत्त्वं वा उभयसाधारणभिन्नत्वमात्रंवा। नाद्य इत्याह॥ तस्येति॥ तथाच प्रपंचे त्वया तात्विकभेदवत्त्वानंगीकारादसिद्धिरित्यर्थः। आत्मन्यपि अनृतव्यावृत्तिरूपतात्त्विकभेदवत्त्वसत्त्वेन ब्रह्मण्येव व्यभिचारश्चेत्याह॥ आत्मन्यपीति॥ नद्वितीयः। ब्रह्मण्येवव्यभिचारादित्याह॥ कल्पितस्येति॥ नतृतीयः। मन्मतेऽन्योन्याभावस्य धर्मिस्वरूपत्वेनासतिच धर्मिणएवाभावेनान्योन्याभावमात्रस्यैवानंगीकारेण धर्मिसमसत्ताकभेदवत्त्वं रूप्येऽसिद्धमितिसाधनवैकल्यमित्याह॥ धर्मीति॥ धर्मिसमसत्त्वस्येति बहुव्रीहिः। तस्येत्यनुवर्तते। अनृतव्यावृत्तेस्तात्विकत्वेन धर्मिसमसत्ताकभेदवत्त्वस्य ब्रह्मणि

स्वस्वरूपेऽवृत्तिर्वाच्या। प्रमेयत्वादिवदभेदेन संबंधेन स्वस्मिन्नपि वृत्तेः प्रामाणिकत्वात्। तथाच देशकालयोर्देशादावसत्त्वरूपं परिच्छिन्नत्वमप्यसिद्धमितिभावः। प्रतिज्ञातामज्ञाने हेत्वसिद्धिमुपपादयति॥ अज्ञानस्येति॥ अपरिच्छिन्नत्वोपपादनाय सर्वगतेत्युक्तं। अपरिच्छिन्नदेशकालोपादानत्वादज्ञानं सर्वगतमेव वाच्यमिति न तस्य परिच्छिन्नत्वमित्यर्थः। अज्ञानस्यापरिच्छिन्नत्वे युक्त्यंतरं सर्वगतं ब्रह्मेति। द्विविधमावरणं लोके दृष्टं। एकं ज्ञातृसंबंधि यथा नेत्रपटलादि। एकं विषयसंबंधि यथांधकारादि तत्र ज्ञातृसंबंध्यावरणं नयनपटलादि स्वयं परिच्छिन्नमपि महतः पर्वतादेर्दर्शनप्रतिबंधकं। तदिहाज्ञानस्य ज्ञातृसंबंध्यावरणत्वेऽपरिच्छिन्नत्वं न सिद्ध्यतीत्यत उक्तं विषयसंबंधीति। अत्रच ब्रह्मणो विषयत्वात्तस्य चापरिच्छिन्नत्वात्तदावरणभूतमप्यज्ञानं अपरिच्छिन्नमेव वाच्यमित्यसिद्धिरित्यर्थः। प्रतिज्ञातां वियदादे रूप्यादेश्चप्रतिपन्नोपाधिस्थनिषेधे हेत्वसिद्धिमुपपादयति॥ प्रतिपन्नोपाधाविति॥ कुत्रचिदिति॥ देशांतरादावसत्त्वरूपपरिच्छिन्नत्वे प्रोच्यमान इत्यर्थः॥ प्रतियोगिन इति॥ अभावाभावस्य प्रतियोगिसत्त्वव्याप्यत्वादिति भावः॥ संगृह्णाति॥ तथाचेति॥ इत्यादिश्रुतिभिः प्रमाणैः कालादिर्नपरिच्छिन्न इत्यन्वयः। न परिच्छिन्नः कालांतरेऽसत्त्ववान्नेत्यर्थः॥ नोचेदिति॥ कालादेःकालांतरादावसत्त्वरूपपरिच्छिन्नत्वांगीकारे इदानीं कालो नास्तीत्यादिप्रतीत्या व्याहतिर्दुर्वारित्यर्थः। एवं कालांतरादौ निषेधएवकालादिपरिच्छिन्नत्वमित्यंगीकृत्य दूषणमुक्तं।

इदानीं कालादिपरिच्छिन्नत्वं नाम किमेककालादिमात्रे सत्त्वंवा कालांतरादावसत्त्वं वेति विकल्प्याद्यं निराह॥ किंचेत्यादिना॥ एककालमात्रइति॥ एककालादौ सत्त्वमात्रं नासत्त्वमितियोज्यं। एवमुत्तरत्रापि। यथास्थिते तु एककालादिमात्रे सत्त्वोक्त्या मात्रपदव्यवच्छेद्यतया कालांतरादावसत्त्वस्य लब्धत्वान्नापि कालांतरादावसत्त्वमिति पृथग्विकल्पानुपपत्तिरितिध्येयं। नचभवत्पक्षेपि कालांतरादावसत्त्वरूपस्य कालांतरादि परिच्छिन्नत्वस्याग्रआसीदित्यादि श्रुतिविरोधेन दूषितत्वान्नापीति पुनर्निषेधः किमर्थ इतिवाच्यं। दूषणांतरदानाय पुनराशंक्य निषेधोपपत्तेरितिध्येयं। रूप्यादाविति॥ रूप्यादेरत्यंतासत्त्वांगीकारेणैककाले सत्त्वस्याभावात्साधनवैकल्यमिति भावः॥ त्रैकालिकनिषेधेति॥ तद्रूपमिथ्यात्वेत्यर्थः॥ विरोधाच्चेति॥ एककालादौ सत्त्वरूपपरिच्छिन्नत्वहेतोः त्रैकालिकसत्तानिषेदाख्यमिथ्यात्वाभावव्याप्यत्वाद्विरोधइत्यर्थः॥ धीमात्रमिति॥ एककाले सत्त्वेन ज्ञानमात्रमित्यर्थः। एककाले सत्त्वेन ज्ञानमात्रं तु रूप्यादावस्त्येव। अन्यथा प्रवृत्तिर्नस्यादितिभावः। मात्रशब्देनेति॥ सत्त्वेन ज्ञानमात्रं न तु सत्त्वरूपोऽर्थइत्यर्थसत्त्वंमात्रपदव्यवच्छेद्यमिति भावः॥ भ्रमोक्ताविति॥ सत्त्वेन ज्ञानमात्रं तज्ज्ञानं तु प्रमारूपं न भवति किंतु सत्त्वमस्ति। परंतु तज्ज्ञानं भ्रमरूपमिति मात्रशब्दाभिप्रायइत्यर्थः। पूर्वोत्तरपक्षयोरिति भेदएव नत्वर्थभेदः। ज्ञानस्य भ्रमत्वेऽर्थस्यासत्त्वनियमादितिद्रष्टव्यं॥ प्रपंचइति॥ प्रपंचे सत्त्वांगीकारेण सत्त्वरूपार्थाभावस्वरूपमात्रपदार्थस्य तथा तज्ज्ञाने भ्रमत्वस्य चानंगीकारेणासिद्धिरित्यर्थः॥ सामान्येति॥ सामान्यतः प्रयुक्तस्य विशेषविकल्पेन निराकरणेऽनुमानमात्रोच्छेदइत्यर्थः। यावद्विशेषातिरिक्तं सामान्यं नास्तीत्यभिप्रेत्य दूषणमाह॥ आत्मन्य पीति॥ तादृशेति॥ एककालमात्रे सत्त्वेन भ्रमसंभवादितिभावः॥ व्यावहारिकेति॥ एककाले सत्त्वप्रकारकव्यावहारिकप्रमाविषयत्वं मात्रशब्दार्थइत्यर्थः॥ रूप्यादाविति॥ व्यावहारिकप्रमाविषयत्वाभावेन

रूपेत्यर्थः॥ अपरिच्छिन्नत्वेनैवेति॥ देशस्य देशांतरनिष्ठात्यंताभावाप्रतियोगित्वेनैव कालस्य च प्रध्वंसाप्रतियोगित्वेनैवेत्यर्थः॥ इदमग्रइति॥ जगत्सृष्टेः प्राक् प्रलये कालस्य सत्त्वोक्त्या नित्यत्वसिद्धिरित्यर्थः। दृष्ट्वैवेति॥ दृष्टेत्यस्य दर्शनानंतरमित्यर्थः॥ तथाचापरोक्षज्ञानेन सर्वस्यापि जगतो निवृत्तत्वात् कतकरजोवद्वेणुसंघर्षजाग्निवच्च स्वस्यापि नष्टत्वात्तदनंतरमित्युक्त्या साक्षात्कारानंतरमपि कालःप्रतीयते। तथाच तस्य निवर्तकाभावेन नित्यत्वावगमान्न कालतःपरिच्छिन्नत्वमित्यर्थः॥ अथेति॥ ''यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिता'' इति ज्ञानेन सर्वकामप्रहाणानंतरममृतो भवतीत्युच्यते। तथाच ज्ञानेन सर्वकामप्रहाणानंतरमपि कालसत्त्वस्याथेत्यनेनावगमात् नित्यत्वसिद्धिरित्यर्थः॥ यत्रत्विति॥ यत्रत्वस्येत्यस्य यस्यामवस्थायामित्यर्थकत्वेनाविद्यानिवृत्तिरूपमोक्षावस्थायामपि कालसत्त्वप्रतीत्या तस्य नित्यत्वसिद्धेर्न तस्य कालतः परिच्छेद इतिभावः। नन्वाकाशेनानित्यत्वरूपकालपरिच्छेदराहित्यं ''तस्माद्वा एतस्मादात्मन आकाशः संभूत'' इति श्रुतेःसिद्धजन्यत्वेन हेतुना ध्वंसप्रतियोगित्वरूपकालपरिच्छिन्नत्वस्या काशेऽनुमातुं शक्यत्वादित्यत आह॥ आकाशइति॥ नाव्याकृताकाशविषया श्रुतिः किंतु भूताकाशविषया। भागासिद्धिश्चाव्याकृताकाश एवास्माभिरभिहितेत्याशयः। आकाशद्वयमप्रामाणिकमितिचेत्तत्राह॥ उक्तंचेति॥ भूताकाशोऽव्याकृताकाशश्चेत्या काशद्वयं वियत्पादे सुधायां टीकाकृद्भिरस्माभिश्च चंद्रिकायां प्रतिपादितमित्यर्थः। देशकालयोर्देशांतरेऽसत्त्वरूपं देशतः परिच्छिन्नत्वं कालांतरेऽसत्त्वरूपं कालतः परिच्छिन्नत्वं च वदता अत्र देशो नास्ति इदानीं कालोनास्तीति प्रतीतिरंगीकार्या अस्तीति चेत्तत्राह॥ अत्रेति॥ अत्रेदानींशब्दाभ्यामधिकरणतया देशकालौ निर्दिश्य पुनस्तयोर्निषेधे व्याहतिरित्यर्थः। नन्वत्रदेशो नास्ति इदानींकालो नास्तीति प्रतीत्या देशकालयोर्देशांतरादावसत्त्वरूपं परिच्छिन्नत्वं नोच्यते येन व्याहतिः स्यात् किंतु ब्रह्म कुत्रचित्कदाचिद्देशकालौ विनास्तीति। तथाच यत्र यदा ब्रह्मास्ति तत्र तदा देशकालयोरभावप्राप्त्या र्देशांतरादवसत्त्वरूपपरिच्छेदसिद्धिरित्यत आह॥ ब्रह्मेति॥ कुत्रचित्कदाचिच्छब्दाभ्यां देशकालौ निर्दिश्य पुनस्तौ विना ब्रह्मास्तीत्यभिधाने व्याघात इत्यर्थः। किंच देशकालयोर्देशांतरादावसत्त्वरूप परिच्छेदनिरूपणार्थमपि देशकालयोरपरिच्छेदसिद्धिरित्याह॥ देशकालयोरिति॥ देशादेर्देशांतरादावसत्त्वरूपं परिच्छिन्नत्वं वदता यदुपाधौ देशकालौ वर्तेते तदुपाधौ तयोर्निषेधे विरोधापत्त्या देशकालयोर्निषेधोपाधिभूतावन्यौ सत्यभूतौ देशकालौ देशांतरादावसत्त्वरूपपरिच्छेद शून्यावपरिच्छिन्नावेव वक्तव्यौ। तयोरपि पुनर्देशांतरादावसत्त्वरूपपरिच्छेदवत्त्वे पुनस्तयोर्यदुपाधौ तौ देशकालौ वर्तेते तदुपाधावेव तयोर्निषेधे विरोधापत्त्या पुनस्तयोर्देशकालयोर्निषेधाधिष्ठानभूतावन्यौ देशकालौ सत्यभूतौ अपरिच्छिन्नावेव वाच्यावित्येवमनवस्था स्यादतस्तद्भीत्या कयोश्चिद्देशकालयोर्देशांतरादावसत्त्वरूप परिच्छेदाभावरूपमपरिच्छिन्नत्वमंगीकार्यमतो सिद्धिरितिभावः। ननु देशांतरादावसत्त्वरूपं परिच्छिन्नत्वं नोच्यते। येनैतन्निषेधाधिष्ठानतया देशकालांतरयोस्सत्यभूतयोरपरिच्छिन्नयोः स्वीकारापत्तिः। किं नाम देशादावसत्त्वमेव देशादिपरिच्छिन्नत्वमित्युच्यते। इदंच देशे कालेचास्ति देशस्वरूपे देशस्यावृत्तित्वात् कालस्वरूपेच कालस्यावृत्तेः। अन्यथाऽऽत्माश्रयात्। अतो देशादौ निषेधरूपपरिच्छिन्नत्वसद्भावेन नासिद्धिरित्यत आह॥ देशइति॥ स्वनिर्वाहकतयेति॥ स्वस्मिन्स्वस्याधाराधेयभाव घटकतयेत्यर्थः। नात्माश्रयदोषेण देशकालयोः

नच – प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षा, ब्रह्म तु सर्वेन्द्रियग्राह्यमिति – वाच्यम्; ब्रह्मणोऽव्यक्तत्वेन चक्षुरादिविदूरत्वस्य "न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनः" "यच्चक्षुषा न पश्यति" "यतो वाचो निवर्तन्ते" इत्यादिश्रुतिसिद्धत्वेन सर्वेन्द्रियग्राह्यत्वस्याप्रामाणिकत्वात्। नच – कालवदुपपत्तिरिति – वाच्यम्; कालस्य साक्षिवेद्यत्वेनोपनीतभानाभ्युपगमात्, ज्ञानानुपनीतग्रहण एव रूपाद्यपेक्षणात्। नच – सत्तावदुपपत्तिरिति – वाच्यम्; स्वरूपसत्तातिरिक्तसत्ताजात्या अनभ्युपगमेन दृष्टान्तानुपपत्तेः। स्वरूपयोग्यत्वेनैव सत्तायोग्यत्वात्॥ यच्च – सद्रूपब्रह्मण इत्यादि, तदपि न; तथा सति सद्यो मोक्षापत्तेः। नच – मूलाज्ञानस्यानिवृत्तत्वात् न मोक्ष इति – वाच्यम्; तस्याव्रियमाणाभावेनाङ्गीकारवैयर्थ्यात्। नच – सद्रूपमेव तदाव्रियमाणमिति – वाच्यम्; तथा सति सद्रूपभानानुपपत्तेः। नाप्यानन्दरूपं ब्रह्मणोऽखण्डत्वेन रूपद्वयाभावात्। तथाच सद्रूपस्यैव मूलाज्ञानाव्रियमाणत्वात् न चाक्षुषज्ञानविषयता। अत एव सद्रूपस्य चाक्षुषादिज्ञानविषयत्वेऽप्यानन्दरूपस्य तदविषयत्वात् नौपनिषदत्वविरोध इत्यपि न; सद्रूपानन्दयोर्भेदासिद्धेः, आनन्दवत् सत्त्वस्याप्य साधारणरूपत्वाच्च; अन्यथा स्वासाधारणरूपेण चाक्षुषादिज्ञानविषयत्वस्याप्यौपनिषदत्वे घटादेरपि तदापत्तेः। केनचिद्रूपेण तस्यापि प्रत्यक्षाद्यवेद्यत्वस्य वक्तुं शक्यत्वाच्च। नच – सत्त्वं नासाधारणस्वरूपमिति – वाच्यम्; "सत्यं ज्ञानमि"त्यनेनानन्दवत् तस्यापि लक्षणत्वेन श्रुतत्वात्॥ यच्च – यद्वा द्रव्यग्रह इत्यादि, तदपि न; "नित्यं विभुं सर्वगतम्" "स एवाधस्तात्" "सर्वव्यापी" "यावद् ब्रह्म विष्ठितम्" "पुरुषेणेदं व्याप्तम्" "आतृणादाकरीषात्" "यस्मात् परं नापरमस्ति किञ्चिद् यस्माद् नाणीयो न ज्यायोऽस्ति कश्चित्" "अन्तर्वहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" "येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च" "यत् तत् सूक्ष्मं परमं वेदितव्यं नित्यम्" "अणोरणीयान् महतो महीयान्" "पृथिव्या ज्यायानन्तरिक्षाद् ज्यायान्" "महतो भूतस्य निश्वसितमेतद्यद्ग्वेदः" "दिव्येतं वायावेतं" "आकाशवत् सर्वगतश्च नित्यः" "अहमात्मा गुडाकेश सर्वभूताशयस्थितः" "व्याप्तं त्वयैकेन दिशश्च सर्वाः" "व्याप्तो मेरोरसि पार्थ" इत्यादिश्रुति-स्मृतिभिः परिमाणस्यावगतत्वेन ब्रह्मणो द्रव्यत्वात्, "आनन्दं ब्रह्मणो विद्वानि"त्यादिश्रुत्या गुणवत्त्वाच्च। नच – "सत्यं ज्ञानमि"ति गुणरूपत्वं श्रुतमिति – वाच्यम्; गुण-गुणिनोरभेदेन गुणरूपत्वाविरोधात्। नच – अभेदे कथं गुण-गुणिभाव इति – वाच्यम्; प्रमाणबलेन सम्भवात्॥ यदपि च – अस्तु वेत्यादि, तदपि न; अस्या व्यावस्थाया मिथ्यात्वसिद्धयुत्तरकालीनत्वादन्योन्याश्रयात्। यच्चोक्तम् – शब्दावच्छिन्नस्य गगनस्य न श्रोत्रत्वम्; अयोग्यत्वादिति, तन्न; आत्मनोऽयोग्यत्वस्यासम्प्रतिपत्तेः, सत्त्वादेश्च घटगतानित्यत्ववत् तद्गतस्यैव भानोपपत्तेः। तस्मात् सदनुविद्धतया भासमानत्वमसिद्धम्॥ इति परिच्छिन्नत्वहेतु भङ्गः

न्यायामृतप्रकाशः

देशतइति॥ देशांतरेऽसत्त्वमित्यर्थः। कालतइति। कालांतरेऽसत्त्वमित्यर्थः। वस्तुतइति॥ अन्योन्याभाववत्त्वमित्यर्थः। देशकालयोर्हेत्वभावं प्रत्यक्षानुमानागमैरुपपादयति॥ अवकाशरूपेति॥ अव्याकृताकाश

गौरवस्य प्रामाणिकत्वात्। नच – स्वसमानसत्ताकभेदप्रतियोगित्वं विभक्तत्वम्, नच व्यभिचारः; तुच्छ-ब्रह्मप्रतियोगिकभेदस्य स्वसमानसत्ताकत्वाभावादिति – वाच्यम्; मन्मते व्यभिचारस्यापरिहारात्, दृष्टान्तस्य साधनविकलत्वाच्च। सद्रूपे कल्पितमिति॥ अत्र कल्पितत्वं स्वाभाववति प्रतीयमानत्वम्, स्वरूपज्ञाननिवर्त्यत्वं वा। प्रत्येकं तदनुविद्धत्वेनेति॥ अत्र 'प्रत्येकमि'ति विशेषणं सदनुविद्धत्वेन प्रतीयमाने ब्रह्मणि व्यभिचारपरिहाराय। तदर्थश्च – अनेकेषां सदनुविद्धत्वेन प्रतीयमानत्वम्। सदर्थब्रह्मणश्चानेकत्वाभावात् न तत्र व्यभिचारः। यद् यदनुविद्धत्वेन प्रतीयते, तत् तत्र कल्पितमिति सामान्यव्याप्तेर्व्यभिचारमाह – खण्डो गौरिति॥ रूपादिहीनमिति॥ अत्र रूपादिहीनत्वम्, आसंसारमज्ञानावृतत्वम्, शब्दैकसमधिगम्यत्वं चेति चाक्षुषज्ञानाद्यविषयत्वे हेतुत्रयमुक्तम्॥

अत्र कश्चित् – गोत्वाद्यनुविद्धतया प्रतीयमाने खण्डादौ न व्यभिचारः; सत्सामान्यातिरिक्तगोत्वादिसामान्यानभ्युपगमात्, गोत्वाद्यभ्युपगमेऽपि गोत्वादिव्यञ्जकतावच्छेदक सामान्यानभ्युपगमाद् व्यक्तिविशेषाणामेवाननुगतानां साक्षादिमत्त्वाद्युपाध्यनुगतानां वा तद्व्यञ्जकत्ववद् व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव तद्व्यवहारजनकत्वोपपत्तेः।

यदपि – रूपादिहीनेत्यादि, तदप्ययुक्तम्; 'सन् घटः' इत्यादिचाक्षुषज्ञाने ब्रह्मस्फुरणे बाधकाभावात्। नच – रूपादिहीनतया चाक्षुषत्वाद्यनुपपत्तिरिति – वाच्यम्; प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षानियमात्, ब्रह्मणश्च, मीमांसकमते कालस्य सर्वेन्द्रियग्राह्यत्ववत्, परमते सत्तायाः सर्वेन्द्रियग्राह्यत्ववच्च सर्वेन्द्रियग्राह्यत्वात् न रूपादिहीनत्वे चाक्षुषत्वाद्यनुपपत्तिः। नच – आसंसारमज्ञानावृतत्वात् कथं चाक्षुषादिज्ञानविषयत्वम्? इति – वाच्यम्; सद्रूपब्रह्मणो मूलाज्ञानावृतत्वानङ्गीकारात्, घटाद्यवच्छिन्नाज्ञानावृतत्वाङ्गीकारात्। तथाच चाक्षुषादिज्ञानेनाज्ञाननिवृत्तौ सत्यां सद्रूपप्रकाशोपपत्तिः। नच – शब्दैकगम्यताविरोधः, आनन्दरूपस्यैव तथात्वेन सद्रूपस्य तदभावात्। नचैवम् – आकाशस्य शब्दावच्छिन्नस्य प्रत्यक्षत्वापात इति वाच्यम्; तस्यायोग्यत्वेन तदभावोपपत्तेः।

यद्वा – द्रव्यग्रहे चक्षुषो रूपापेक्षा, न त्वन्यग्रहे, ब्रह्म तु न द्रव्यम्; "अस्थूलमनण्वह्रस्वमदीर्घमि"ति श्रुत्या चतुर्विधपरिमाणनिषेधेन द्रव्यत्वप्रतिषेधात्। अतो नानुपपत्तिः। अस्तु वा द्रव्यम्, तथाप्यध्यस्तद्रव्यत्ववति गुणादौ रूपानपेक्षचाक्षुषत्वदर्शनेन धर्म्यन्यूनसत्ताकद्रव्यत्ववत्येव चक्षू रूपमपेक्षते, ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षया न्यूनसत्ताकमेव, इति न तद्ग्रहे रूपाद्यपेक्षा – इत्याह। तच्च।

यदुक्तम् – सत्सामान्येत्यादि, तदयुक्तम्; तथात्वेऽनुगतसत्तासामान्यमपि नाङ्गीक्रियेत। यदि चानुगतव्यवहारानुरोधेन तत्स्वीकारः, तर्हि प्रकृतेऽपि तुल्यम्। नच – प्रकृते व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव गोत्वादिव्यवहारजनकत्वमिति – वाच्यम्; तर्हि तत्रापि सत्ताव्यञ्जकव्यक्तिविशेषस्यैव तद्व्यवहारजनकत्वमस्तु। नच – गोत्वादिव्यञ्जक व्यक्तिविशेषस्य साक्षावत्त्वोपाध्यनुगतत्वेन व्यवहारजनकत्वेऽपि सत्ताव्यञ्जकव्यक्तिविशेषस्या ननुगतत्वेन तदजनकत्वमिति – वाच्यम्; अत्रापि तादृगुपाधेर्वक्तुं शक्यत्वात्। यदपि च 'सन् घटः' इत्यत्रेत्यादि, तदपि न; रूपादिहीनस्य चाक्षुषतानुपपत्तेः।

अत्यन्ताभावेऽन्योन्याभावे च प्रतियोगिसमसत्त्वं विशेषणं देयम्। एवं च न ब्रह्मणस्तादृशाभावप्रतियोगित्वम्, इति न व्यभिचारः। आत्मप्रतियोगिकजडनिष्ठभेदस्य प्रतियोगिभूतब्रह्मसमसत्ताकत्वाभावात्। नाप्यसिद्धिः। ''अतोऽन्यदार्तमि''ति श्रुत्या ब्रह्मातिरिक्तस्य सर्वस्य ध्वंसप्रतियोगित्वावगमात् – इत्याह। तन्न। अत्यन्ताभावप्रतियोगित्वं हि किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वं सार्वत्रिकत्रैकालिक निषेधप्रतियोगित्वं वा? नाद्यः। किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वस्यान्यत्र सत्त्वेनाप्युपपत्त्याऽ र्थान्तरत्वात्। न द्वितीयः। तस्य साध्यमानमिथ्यात्वानतिरेकेण साध्यावैशिष्ट्यात्। नच – अनिर्वचनीयत्वादिसाध्यान्तरस्य हेतुत्वात् न साध्यावैशिष्ट्यमिति – वाच्यम्; तथाप्यसिद्ध्यनिस्तारात्। नच – दृश्यत्वादिहेतुभिरेतादृशहेतुसिद्धिरिति – वाच्यम्; दृश्यत्वादीनां निरस्तत्वात्। किञ्चात्यन्ताभावप्रतियोगित्वमात्मनोऽप्यस्ति, इति तत्र व्यभिचारः। नच – प्रतियोगिसमसत्ताकात्यन्ताभावप्रतियोगित्वाभावात् नात्मनि व्यभिचार इति – वाच्यम्; प्रतियोगिभूतब्रह्मणोऽन्या सत्ता, अत्यन्ताभावस्य चान्या सत्ता, इत्यस्यार्थस्य प्रपञ्चमिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्। तार्किकमते व्यभिचारश्च। किञ्च शुक्तिरजतादौ प्रतियोगिसमसत्ताकात्यन्ताभावप्रतियोगित्वाभावेन साधनवैकल्यम्। नहि शुक्तिरजतात्यन्ताभावः प्रातिभासिकः। नच – प्रतियोगिनः प्रातिभासिकत्वात् तदभावः प्रातिभासिक इति – वाच्यम्; प्रतियोगि-तदभावयोरेकसत्ताकत्वनियमाभावात्, अन्यथा ब्रह्मप्रतियोगिकान्योन्याभावस्यापि पारमार्थिकत्वापत्तेः। नापि ध्वंसप्रतियोगित्वं कालपरिच्छिन्नत्वमिति द्वितीयः; कालाकाशादावसिद्धेः। नच – ''अतोऽन्यदार्तति''मि श्रुत्या तत्सिद्धिरिति – वाच्यम्; तस्य ब्रह्मान्यस्यपारतन्त्र्यपरत्वेनाप्युप पत्तेरुक्तार्थासाधकत्वात्, कालाकाशाद्यभावे व्याहतेर्मूल एवोक्तत्वाच्च, परोक्तत्रैकालिकनिषेधप्रतियोगित्वस्यापि पक्षान्तःपातित्वेन तस्य ध्वंसप्रतियोगित्वे यदैव निषेधाभावः, तदैव प्रतियोगिसत्यत्वापत्तेश्च। नाप्यन्योन्याभावप्रतियोगित्वं वस्तुपरिच्छिन्नत्वमिति तृतीयः; ब्रह्मणि व्यभिचारात्। नच प्रतियोगिसमसत्त्वेति विशेषणान्न व्यभिचार इति वाच्यम्। परमते व्यभिचारापरिहारात्। अस्याश्च व्यवस्थाया मिथ्यात्वसिद्ध्युत्तरकालीनत्वाच्च, शुक्तिरूप्यादौ साधनवैकल्याच्च। तस्मात् परिच्छिन्नत्वं निर्वक्तुमशक्यमिति स्थितम्॥

उक्तदूषणमन्यत्राप्यतिदिशति – एतेनेति॥ स्वानुगतप्रतिभासे वस्तुनीति॥ स्वानुगतो यः प्रतिभासः, तद्रूपवस्तुनीत्यर्थः। कादाचित्कत्वमिति॥ ध्वंसप्रतियोगित्वमित्यर्थः। काचित्कत्वमिति॥ अत्यन्ताभाव प्रतियोगित्वमित्यर्थः। निरस्तत्वादिति॥ भागासिद्ध्यादिनेति शेषः। नापीति॥ भ्रमदशायामनिषिध्यमानत्वेनासिद्धिवारणाय 'बाधकदशायामि'ति विशेषणम्। साध्येति॥ नच – मिथ्यात्वान्तरस्य साध्यत्वात् न साध्यावैशिष्ट्यमिति – वाच्यम्; तथापि सन्दिग्धासिद्ध्यनिस्तारादिति भावः। सुख-दुःखेति॥ ''तत्प्रकाशस्य साक्षिरूपत्वेन तस्य यावत्स्वसत्त्वं प्रकाशमानत्वादिति भावः। अप्रयोजकत्वं विशदयति – युक्तो हीति॥ अननुगतं स्वानुगते कल्पितमिति व्याप्तौ व्यभिचारमाह – अननुगतानामिति॥ ननु चलनादावनुगतत्वमेव नास्तीत्यत आह – अस्ति हीति॥ अननुगतस्यानुगतेऽध्यास इति चेत्, तस्यनुगतस्याप्याननुगतेऽध्यासदर्शनात् सदर्थस्यैव पटादिष्वध्यासः स्यादित्याह – दृश्यते चेति॥ नच – एवं गौरवम्; अनेकेषामधिष्ठानत्वाभ्युपगमात्, इति – वाच्यम्; दर्शनानुरोधेन

इत्यादिप्रकरणानुगृहीतश्रुतिभिः, "तामसाच्च विकुर्वाणाद् भगवद्वीर्यचोदितात्। शब्दमात्रमभूत् तस्मात् नभः श्रोत्रं तु शब्दजमि"त्यादिस्मृतिभिश्च तामसाहङ्कारकार्यम्। किञ्च – "एतदण्डं विशेषाख्यक्रमाद्भूद्धैर्दशोत्तरैः। तोयादिभिः परिवृतमि"त्यादिस्मृतिभिरेकमविभु, अन्यस्तु विभुः – "आकाशवत् सर्वगतश्च नित्यः; "स यथाऽनन्तोऽयमाकाशः" इत्यादिश्रुतेः। अत्र देशो नास्तीति॥ 'इदानीं कालो नास्तीत्यादिवद् व्याहतम्; 'अत्रे'त्यनेनैव देशनिर्देशात्। एवं ब्रह्म वाऽन्यद्वा देशं विना कुत्रचिदस्तीत्येतद् व्याहतम्। अत एव "स एवाधस्तात् स एवोपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः" इत्यादिश्रुतिः, "व्याप्तं त्वयैकेन दिशश्च सर्वाः" इत्यादिस्मृतिश्च ब्रह्मणो विभुस्वदेशसम्बन्धेनैव विभुत्वमाहेत्यादियुक्तिश्च 'मृतिकाले जहत्येनं प्राणा भूतानि पञ्च च। भागशो भागशस्त्वेनमनुगच्छन्ति सर्वशः॥" इत्यादिस्मृतिभिर्भूताकाशं गत्यादि– योग्यभागवत्, अवकाशस्तु न गत्यादियोग्यभागवान्। नहि प्रदेशविशेष एतद्देशं त्यक्त्वा प्रदेशान्तरं गच्छति। किञ्च – "आकाशे नीलिमोदेति न प्रदेशे कथञ्चने"ति श्रुत्यैवाकाशद्वित्वं कण्ठोक्तम्। तस्मादाकाशद्वित्वं प्रामाणिकमेव, इति चन्द्रिकायामुक्तत्वाद् युक्तः श्रुत्योरविरोध इति भावः। व्याहत्याऽपि देश-कालयोर्नित्यत्वमङ्गीकर्तव्यमित्याह – अत्र देशो नास्तीति॥ ननु देश-कालयोः सर्वगतत्वे नित्यत्वे च स्वाश्रितत्वापत्त्याऽऽत्माश्रयः, इत्यत आह – देशः सर्वत्रास्तीति॥ यथा 'प्रमेयत्वे प्रमेयत्वमि'ति प्रतीत्या प्रमेयत्वे प्रमेयत्वमङ्गीक्रियते, तथा 'कालः सर्वदाऽस्ति' 'देशः सर्वत्रास्ती'ति प्रतीत्या तयोः स्वनिर्वाहकत्वादिति भावः। अज्ञानस्य देश-कालापरिच्छिन्नत्वमुपपादयति – अज्ञानस्य चेति॥ प्रतिषेधस्यापरिच्छिन्नत्वमुपपादयति प्रतिपन्नेति॥

तथेति॥ एककालादिसत्त्वं नेत्यर्थः। तादृशेति॥ एककालादिमात्रसत्त्वभ्रमसम्भवेनेत्यर्थः। स्वकालादाविति॥ मिथ्यात्वस्य स्वकालादावप्यसत्त्वरूपत्वादित्यर्थः। एककालासतः कालान्तरासत्त्वमिव रूपान्तरेणासतो रूपान्तरेणासत्त्वसाधने विशेषाभावात् तदपि स्यादित्याह – रूपान्तरेणेति॥ रूप्यादेरिति॥ कालान्तरे सद्विलक्षणत्वरूपाभावादिति भावः।

एतेनेति॥ रूपान्तरेणासत्त्वेन स्वरूपेणाप्यसत्त्वाद्यापत्त्येत्यर्थः। यथाकथञ्चिदसतः सर्वथा सत्त्वाङ्गीकारादिति भावः। आद्ययोरिति॥ असङ्गत्वात् सकलमूर्तासंयोगित्वरूपं परिच्छिन्नत्वम्, निर्गुणत्वाच्च महापरिमाणानधिकरणत्वरूपं देशपरिच्छिन्नत्वं ब्रह्मण्यस्तीत्यर्थः॥ अन्त्यस्येति॥ परिमाणस्य गुणत्वेन गुणानङ्गीकारादित्यर्थः। अन्योन्याभावादाविति॥ नित्यान्योन्या भावादावित्यर्थः। आत्मनीति॥ अखण्डार्थवाद इति शेषः। धर्मिसमसत्त्वस्येति॥ नच – घटादिप्रतियोगिकरूप्यधर्मिकभेदस्य प्रातिभासिकत्वेऽपि रूप्यप्रतियोगिकघटादिधर्मिकभेदस्य व्यावहारिकस्य घटादिप्रतियोगिकरूप्यधर्मिकभ्रमे धर्मिसमसत्ताकानिर्वचनीय भेदवत्त्वस्यरूप्येऽपि सत्त्वेन न साधनवैकल्यमिति – वाच्यम्; साक्षिवेद्ये रूप्यादौ विशेषदर्शनसत्त्वेनाज्ञान मूलकभ्रमासम्भवात्।

अत्र कश्चित् – अत्यन्ताभावप्रतियोगित्वम् देशपरिच्छिन्नत्वम्, ध्वंसप्रतियोगित्वम् कालपरिच्छिन्नत्वम्, अन्योन्याभावप्रतियोगित्वम् वस्तुपरिच्छिन्नत्वम्। नच – आत्मनोऽपि जडनिष्ठात्यन्ताभावान्योन्या भावप्रतियोगित्वेनव्यभिचारः, ध्वंसप्रतियोगित्वस्य च कालाकाशादावभावेनासिद्धिरिति – वाच्यम्।

ननु तथापि कालसिद्धिः कथम्? साक्षिणेति चेत्, न; सुषुप्तौ हीन्द्रियाणामुपरतत्वात् न बाह्यप्रत्यक्षानुमानागमानां प्रवृत्तिरस्ति, तदाऽपि कालप्रतिभासः – 'एतावन्तं कालं सुखं सुप्तोऽस्मीत्युत्थितस्य परामर्शनात्। न ह्यननुभूतस्य परामर्शो युज्यते। अतः परिशेषात् साक्षिवेद्य एवेति गम्यते। अत्रायं प्रयोगः – कालः, बाह्यप्रत्यक्षाद्यतिरिक्तप्रमाणवेद्यः, असत्स्वपि तेषु प्रतीयमानत्वात्, यद् यस्मिन् असति प्रतीयते, तत् ततोऽतिरिक्तप्रमाणवेद्यम्; यथाऽसति चक्षुषि प्रतीयमानो गन्धस्तदतिरिक्तघ्राणवेद्य इति। ननु – साक्षिवेद्यत्वेऽपि साक्षीतरप्रमाणवेद्यत्वं किं न स्यात्? इति – चेत् न तावत् प्रत्यक्षवेद्यः काल इत्युक्तम्। जातिबधिराणामपि प्रतिभासात् नागमवेद्योऽपि। अनुमानमपि कालमेव पक्षीकृत्य प्रवर्तेत? अन्यद्वा? नाद्यः; कालस्यासिद्धाद्या, सिद्धौ सिद्धसाधनत्वेन पक्षीकर्तुमशक्यत्वात्। न द्वितीयः; कालप्रतीतिमन्तरेण व्याप्तिस्मरण-पक्षधर्मताज्ञानयोरयोगात्। तथाहि – स्मृत्यनुभवरूपा हि व्याप्त्यादिप्रतीतयो न केवलमर्थमवगाहन्ते, अपितु कालकलितमेव। 'तदि'ति हि स्मृतिरुत्पद्यते। तत्ता च पूर्वकालसम्बन्धितैव। एवमनुभवोऽपि चक्षुरादिजन्यस्तावत् – 'एतदि'ति जायते। अनुमानादिजन्योऽप्य'भूदि'ति वा, 'भविष्यती'ति वा जायते। एतत्त्वादिकं च न वर्तमानादिकालसम्बन्धित्वातिरिक्तं किञ्चित्। तथाच व्याप्त्यादिविषया अपि प्रतीतयो न कालाविशेषितं स्वार्थं गोचरयितुं शक्नुवन्ति, इति कालसिद्धिः साक्षिणैवैष्टव्या। विस्तरस्तु सुधायां द्रष्टव्यः। आकाशवदिति॥ ब्रह्मणो नित्यत्वे ह्याकाशनित्यत्वस्य दृष्टान्तीकरणात् निर्णीतस्यैव दृष्टान्तीकरणाद् आकाशनित्यत्वं सिद्धमिति भावः। अग्रे प्रलये॥ तथाच प्रलयेऽपि कालावस्थित्युक्तेर्नित्यत्वं कालस्येति भावः। 'मुच्यते' 'भवती'ति लट्प्रयोगेण मोक्षेऽविद्यायां विलीनायां कालसत्त्वावगमात् नित्यत्वमिति भावः। यत्रेति॥ अभूदिति॥ मोक्षकाले कालसत्त्वोक्तेर्नित्यत्वमिति भावः। सदा सर्वत्रेति॥ देशकार्यं त्ववकाशदातृत्वादिकम्, कालकार्यं तु व्यवहारादिकमिति द्रष्टव्यम्। ननु आकाशस्य नित्यत्वे – "आत्मन आकाशः सम्भूतः" इत्यनित्यत्वप्रतिपादकश्रुतिविरोधः स्यादित्यत आह – आकाश इति॥ "आकाशवदि"ति श्रुतेरव्याकृताकाशविषयत्वात् न विरोध इति भावः। ननु आकाशद्वैविध्ये मानाभावेन श्रुत्योः कथं विरोधपरिहार इति? अत आह – उक्तं चाकाशद्वैतमन्यत्रेति॥ नचाकाशद्वित्वे मानाभावः; भूताकाशातिरिक्ताया देश-कालापरिच्छिन्नायास्तार्किकाभिमतदिश एवास्मन्मतेऽव्याकृताकाशत्वात्। प्राच्यादयो दिग्विशेषास्तु तद्भागाः। उक्तं हि टीकाकारैः – "अवकाशमात्रं हि दिगुच्यते, अवकाशभागा एव दिग्विशेषाः" – इति। किञ्च प्रदेशरूप आकाशो नीरूपः साक्षिसिद्धश्च; अन्यथाऽवकाशे सन्देहेनान्धकारे हस्तचालनादिकं न स्यात्। नच मूर्तविशेषाभाव इव तदाश्रये देशे कश्चित् सन्दिग्धः। भूताकाशं तु 'भूतमप्यसितं दिव्यदृष्टिगोचरमेव चे'त्यादिश्रुत्या रूपि अप्रत्यक्षं च। किञ्च भूताकाशं "सर्वं पञ्चभिराविष्टम्", "भूतैरीश्वरबुद्धिजैः" "पञ्चभूतात्मके देहे" इत्यादिस्मृतिभिर्देहाकारेण विकारि। अवकाशस्तु कूटस्थनित्यत्वेन साक्षिसिद्धः। नच सर्वाधारभूतौ देश-कालौ किञ्चिद् द्रव्यात्मना विकुरुतः। कथं वाऽवकाशस्य पञ्चीकरणम्? किञ्चावकाशः "अनादिर्वाऽयमाकाशः" इत्यादिश्रुतिभिरवकाशोपादान-प्रागभावयोर्बुद्ध्यनारोहादियुक्तिभिश्चानादिः। नहि पूर्वमवकाशो नासीत्, किन्तु सर्वत्र वा क्वचिद्वा घनीभाव एवासीदि'ति धीर्युक्ता; 'सर्वत्रे'त्यादिनैवावकाशनिर्देशात्। भूतं तु – "आत्मन आकाशस्सम्भूतः"

अन्यथा अस्थूलादिवाक्यशेषे "न तदश्नाति कश्चने"ति सर्वाव्यापनीयत्वोक्त्या लब्धेन महत्परिमाणवत्त्वेन विरोधात्, अद्रव्यस्याम्बरादिधारकत्वानुपपत्तेश्च। नच द्रव्यत्वे ज्ञानानन्दाद्यात्मताविरोधः। ज्ञानादेरपि द्रव्यत्वे बाधकाभावात्। यच्चोक्तम् – धर्म्यन्यूनसत्ताकद्रव्यत्ववत्येव चक्षू रूपमपेक्षते, ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षया न्यूनसत्ताकमेवेति तन्न। कल्पितत्वासिद्धौ जगतः ब्रह्मणि द्रव्यत्वस्य धर्म्यन्यूनसत्ताकत्वासिद्धेरिति। तस्मात् साधूक्तम् – "रूपादिहीनमासंसारमज्ञानावृतं ब्रह्म चाक्षुषादिज्ञाने न भाती"ति॥

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां परिच्छेदच्छिदेक्ष्यताम्॥

इति परिच्छिन्नत्वहेतुभंगः

न्यायामृतकण्टकोद्धारः

देशेति॥ वियदादे रूप्यादेश्च निषेध इत्यन्वयः। ननु देशस्य 'देशो नष्टः' इति कालस्याप्यतीतः कालः इत्यादिप्रतीत्या परिच्छिन्नत्वावगमात् कथमसिद्धिरिति? अत आह – अवकाशरूपदेशस्येति॥ देशनाशप्रतीतेस्तदुपाधिविषयकत्वात्, कालनाशप्रतीतेश्चक्षणादिविषयकत्वादवकाशरूपदेशखण्डकालविषयत्वादिति भावः। अपरिच्छिन्नत्वेनैवेति॥ देशतः कालतश्चेति शेषः। यस्तु कालावकाशासिद्धिं साक्षिणा नाङ्गीकरोति, तस्य कालावकाशासिद्धिरेव न स्यात्। केचित् 'इह विहङ्गमः पतती'ति चक्षुर्व्यापारानन्तरं प्रतिभासनादाकाशा देश्चाक्षुषतामास्थिषत, तदनुपपन्नम्; रूपरहितद्रव्यत्वेन चाक्षुषतासामग्रीवैकल्यात्। अन्यथाऽऽत्म-पवनयोरपि तत्प्रसङ्गात्, तथाप्यनुमानवेद्यमाकाशमस्त्विति चेत्, न; लिङ्गभावात्॥

ननु – शब्दस्तावत्, प्रत्यक्षः, स च गुणः, सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात्; रूपवत्, गुणश्च द्रव्याश्रित इति सामान्यतो द्रव्यसिद्धौ – शब्दः, न स्पर्शवद्विशेषगुणः; प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात्, सुखवत्। नाप्यात्मगुणः; बाह्येन्द्रियप्रत्यक्षत्वात्, रूपवत्, नापि दिक्कालमनसाम्; प्रत्यक्षत्वात्, विशेषगुणत्वाच्चेति प्रसक्तप्रतिषेधे सति परिशेषादतिरिक्तं द्रव्यं सिद्ध्यति। एवं च शब्दः, अष्टद्रव्यातिरिक्तद्रव्याश्रितः। तद्वृत्तौ बाधकोपपन्नत्वे सति गुणत्वात्, रूपवदित्यनुमानादेव आकाशसिद्धिसम्भवेन लिङ्गाभावोऽसिद्ध इति – चेत्, मैवम्। जातिबधिराणामाकाशप्रतिभासानुपपत्तिप्रसङ्गात्। ततश्चेहालोको नास्तीति प्रतीतिर्न स्यात्। परिशेषानुमानं त्वष्टद्रव्यातिरिक्तद्रव्याप्रसिद्धेरप्रसिद्धविशेषणम्। प्रसिद्धौ चानुमानवैयर्थ्यम्। अष्टद्रव्यातिरिक्ताश्रित इत्येव साधने गुणादिवृत्तिसामान्यादपि व्यावृत्तत्वेन हेतोरसाधारण्यं स्यात्। अस्तु वा शब्दगुणकाकाशसिद्धिरनुमानात्, तथाप्यव्याकृताकाशसिद्धिः साक्षिणैव; तत्साधकलिङ्गाभावात्। जातिबधिराणामप्यकाशप्रतीतेर्नागमोऽपि तत्र मानमिति॥

तद्व्यवहारजनकत्वमिति – वाच्यम्। व्यक्तिविशेषाणां गोत्वादिपरिचितानां सत्सामान्यविशेषणत्वे घट्टकुटीप्रभातवृत्तान्तः। तदपरिचितत्वेऽतिप्रसङ्गः। यच्चोक्तम् सदात्मना न ब्रह्मणो मूलाज्ञानेनावृतत्वमिति, तदपि न। तव मते सदात्मन आनन्दात्मनोऽखण्डरसत्वेन सदात्मन आवरणापगम आनन्दात्मनोऽप्यावरणापगमस्यावश्यकतयासत्प्रकाशवदानन्दप्रकाशस्याप्यावश्य कत्वात्। नच – सदाकारानन्दाकारयोः परमते विशेषोऽस्ति। अखण्डत्वभङ्गापातात्। यच्चोक्तम् – प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षानियमः, ब्रह्म तु सर्वेन्द्रियग्राह्यम् – इति, तदपि न। अत्यन्तमव्यक्तस्वभावस्य ब्रह्मणश्चक्षुरादिसर्वेन्द्रियग्राह्यत्वे मानाभावात्, प्रत्युत ''नावेदविन्मनुते तं बृहन्तम्'' ''यो वेदनिहितं गुहायाम्'' ''गुहां प्रविष्टौ परमे परार्द्धे'' ''गुहाहितं गुह्यं गूढमप्सु'' ''एको देवः सर्वभूतेषु गूढः'' इत्यादिश्रुतिभिरिन्द्रियाविषयत्वस्यैव सिद्धत्वात्। ''हृदयं ब्रह्मेति शार्कराक्ष्या उपासते'' इत्यैतरेये सूक्ष्मार्थदर्शिभिरेव ब्रह्मणो ज्ञेयत्वस्य भवदीयैर्भाषितत्वाच्च। अत एव ''वि मे कर्णा वपततो वि चक्षु''रिति कर्णादिविदूरत्वं ब्रह्मणोऽभिहितं ज्योतिःसूत्रे। सत्ताद्दृष्टान्तोऽप्ययुक्तः। तस्या इन्द्रिययोग्यव्यक्तिवृत्तिजातित्वेन व्यक्तिग्राहकसामग्रीग्राह्यत्वात्। ब्रह्म तु न द्रव्यादिवृत्तिजात्यादि। वार्तिकश्लोकोऽप्ययुक्तः। नहि ब्रह्मण्यक्षादीनां प्रामाण्यं स्वतः सम्भवति। ''तं त्वौपनिषदं पुरुषं पृच्छामी''त्युपनिषदेकगम्यत्वाद् ब्रह्मणः। ''अथ परा यया तदक्षरमधिगम्यते'' इति ब्रह्मावबोधकत्वेनोपनिषदां परविद्यात्वस्य लक्षणत्वेनोक्तेश्च। अन्यथा प्रत्यक्षादिषु परविद्यालक्षणस्यातिव्याप्त्यापत्तेः। तस्मान्न ब्रह्मणः सर्वेन्द्रियग्राह्यता। कालस्यापि विनोपनयं न सर्वेन्द्रियग्राह्यता॥

वस्तुतस्तु – कालः साक्षिग्राह्यः। यच्चोक्तम् – अयोग्य आकाशः इति न तस्य शब्दावच्छिन्नस्य प्रत्यक्षत्वम् ब्रह्म तु योग्यम् इति घटावच्छिन्नस्य ब्रह्मणः प्रत्यक्षत्वम् इति, तस्य योग्यतावच्छेदकरूपादिमत्त्वस्योभयत्रानवधारणेऽपि ब्रह्मणो योग्यत्वं यथाऽवधृतम्, नाकाशस्येति, सेयं योगसिद्धिरकारणपक्षपाता। यच्चोक्तम् – द्रव्यग्रहे चक्षुषो रूपापेक्षा, ब्रह्म तु न द्रव्यम् इति तदपि न अस्थूलश्रुत्या घटादिसाधारणस्थौल्यादिनिषेधः, न तु परिमाणमात्रनिषेधः। ''महान्तं विभुमात्मानम्'' ''स वा एष महानज आत्मा'' ''अणोरणीयान् महतो महीयान्'' ''ततो ज्योयांश्च पूरुषः'' ''एष आत्माऽन्तर्हृदये ज्यायान्'' ''एभ्यस्त्रिभ्यो लोकेभ्यः सर्वमावृत्यतिष्ठति'' ''सर्वं समाप्नोषि ततोऽसि सर्वः'' ''आकाशवत् सर्वगतश्च नित्यः'' ''सर्वत्र प्रसिद्धोपदेशात्'' इत्यादि श्रुति-स्मृति-सूत्रैः, ब्रह्म, परिमाणवत्, परिमाणवदुपादानत्वात्, इत्यादियुक्त्या च ब्रह्मणि परिमाणसिद्धेः।

योग्यता च तादृशचाक्षुषत्वरूपविशेषवत्त्वमेव, इति तद्रहितं ब्रह्म न चाक्षुषज्ञानयोग्यम्। अतो न सहकारिसमवधानेऽपि चाक्षुषज्ञाने भासत इत्यभिप्रेत्य योग्यतानादरणे दोषमाह – शब्दाद्यवच्छिन्नस्येति॥ राहोस्तु योग्यताऽस्तीत्याह – नीलस्येति॥

अत्र वदन्ति गोत्वादिसामान्यानध्यस्ते खण्डादौ न तावद् व्यभिचारः। सत्सामान्यातिरिक्तगोत्वादिसामान्यानभ्युपगमात्। गोत्वाद्यभ्युपगमेऽपि गोत्वादिव्यञ्जकतावच्छेदक सामान्यानभ्युपगमाद् व्यक्तिविशेषाणामेवाननुगतानां सास्नादिमत्त्वाद्युपाध्यनुगतानां वा तद्व्यञ्जकत्ववद् व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव तद्व्यवहारजनकत्वोपपत्तेः॥

यदपि चोक्तमासंसारमज्ञानावृतमित्यादि। तदपि न। यतः सदात्मना न ब्रह्मणो मूलाज्ञानेनावृतत्वम्। किंतु घटाद्यवच्छिन्नशक्त्यज्ञानेनैव। तथाच चक्षुरादिजन्यवृत्त्या तदज्ञाने निवृत्ते तदावरणभङ्गे सति 'सन् घटः' इत्यत्र ब्रह्मणः स्फुरणे बाधकाभावात्। नच – रूपादिहीनतया चाक्षुषत्वाद्यनुपपत्तिर्बाधिकेति – वाच्यम्। प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षानियमात्। सर्वेन्द्रियग्राह्यं तु सद्रूपं ब्रह्म? नातो रूपादिहीनत्वेऽपि चाक्षुषत्वाद्यनुपपत्तिः। सत्तायाः परैरपि सर्वेन्द्रियग्राह्यत्वाभ्युपगमात्॥तदुक्तं वार्तिककृद्भिः –

"अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः।
अक्षादीनां स्वतः सिद्धो यत्र तेषां प्रमाणते"ति।

कालस्य च रूपादिहीनस्य सर्वेन्द्रियग्राह्यत्वं मीमांसकादिभिरभ्युपगतम्। नच – शब्दावच्छिन्नाकाशस्यापि श्रावणत्वापत्तिरिति – वाच्यम्। स्वभावतो योग्यस्य हि केनचित् निमित्तेन प्रतिरुद्धयोग्यताकस्यावच्छेदकादिना योग्यता संपाद्यते। यथा दूरस्थत्वदोषेण प्रतिरुद्धयोग्यताकस्य राहोश्चन्द्रसम्बन्धेन। एवं चावरणेन प्रतिरुद्धयोग्यताकं ब्रह्म घटाद्यवच्छेदेन योग्यं भवति, नभस्तु स्वभावायोग्यमेव, न प्रतिरुद्धयोग्यताकम्, येन शब्दावच्छेदेन योग्यं भवेत्। यद्वा – द्रव्यग्रहे चक्षुषो रूपापेक्षा, न त्वन्यग्रहे, ब्रह्म तु न द्रव्यम्। "अस्थूलमनण्वहस्वमदीर्घमि"ति श्रुत्या चतुर्विधपरिमाणनिषेधेन द्रव्यत्वप्रतिषेधात्। अतो नानुपपत्तिः। अस्तु वा द्रव्यम्, तथाप्यध्यस्तद्रव्यत्ववति गुणादौ रूपानपेक्षचाक्षुषत्वदर्शनेन धर्म्यन्यूनसत्ताकद्रव्यत्ववत्येव चक्षू रूपमपेक्षते। ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षन्यूनसत्ताकमेव, इति न तद्ग्रहे रूपाद्यपेक्षा – इति।

अत्र ब्रूमः; 'खण्डो गौर्मुण्डो गौरि'त्यनुगतव्यवहारस्यैव बाधकाभावे सति गोत्वसामान्ये प्रमाणस्य सत्त्वेन तदनभ्युपगमस्य निर्बीजत्वात्। नच – व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव

तथाच कादाचित्कप्रकाशरूपकार्येण प्रकाशसामग्र्याः कादाचित्कत्वमेव सिद्ध्यति। नतु प्रकाशमानस्याप्यसत्यत्वम्। बीजाभावादित्यर्थः। अननुगतान् घटादीन् प्रति चलनादीनामनात्मत्वान्तानामनुगमम्, खपुष्प-नृभृङ्गादीन् प्रत्यसतोऽनुगमम्, आत्मानं प्रति सदर्थस्यानुगमं प्रतीत्या दर्शयति – अस्ति हीति॥ एकस्याप्यनेकेष्वारोपो दृष्टः, इत्येकस्यापि ब्रह्मणोऽनेकेषु वियदादिष्वारोपः स्यादित्याह – दृश्यत इति॥ एतेनेति॥ 'घटश्चलति' 'पटश्चलति' 'घटो रूपी' 'पटो रूपी'त्यादिचलन-रूपाद्यनुविद्धतया प्रतीयमानस्यापि घट-पटादेश्चलनादिष्वारोपादर्शनेनेत्यर्थः॥ कल्पितमिति॥ स्वाभाववति प्रतीयत इत्यर्थः॥ तदनुविद्धत्वेनेति॥ सूत्रे स्यूतानां नानामणीनां सूत्रानुविद्धतया यथा प्रतीतिः, तथा 'घटः सन्' 'पटः सन्नि'ति सदर्थानुविद्धतया प्रतीयमानत्वादित्यर्थः। दूरात् तरवोऽपि निरन्तरा वनाकारानुविद्धाः प्रतिभासन्ते। नच ते तत्र कल्पिताः, इति 'प्रत्येकमि'त्युक्तं प्रमाणमालायाम्। वयं तु 'सद् ब्रह्मे'ति सदनुविद्धत्वेन प्रतीयमाने ब्रह्मणि व्यभिचारवारणाय 'प्रत्येकमि'ति। समासवृत्त्यन्तर्गतवीप्साबलेनानेकेषां तदनुविद्धतया प्रतीयमानत्वं हेत्वर्थो लभ्यते। सद्ब्रह्मणोश्च नानेकत्वम्,। नचैवम् – अनेकत्वमात्रस्यैव कल्पितत्वव्याप्यतया शेषवैयर्थ्यमिति – वाच्यम्। प्रतीतिविशेषविषयत्वस्य हेतुत्वेन तत्र वैयर्थ्यशङ्काभावात्। अत एव – 'विज्ञानमानन्दं ब्रह्मे'ति ब्रह्मानुविद्धत्वेन प्रतीयमानानां विज्ञानादीनां न ब्रह्मणि कल्पितत्वमिति व्यभिचारः। निरस्तः। विज्ञानादीनां ब्रह्माभिन्नत्वेन निरुक्तहेतोस्तत्रासत्त्वात्। यद्वा – सद्रूपब्रह्माभिन्नत्वमेव सद्रूपे कल्पितत्वम्, इति न कोऽपि दोष इति ब्रूमः॥ प्रत्येकं चन्द्रानुविद्धेति॥ जलतरङ्गस्थचन्द्रस्य गगनस्थितचन्द्रानुवेधो नामतस्मिन् दृश्यमाने सति दृश्यमानत्वमित्यादि बोध्यम्। एतेनेत्यतिदिष्टदोषे सत्येव दोषान्तरमाह – खण्डो गौरिति॥ तथाचोक्तहेतोः स्वानुगतप्रतिभासे गोत्वादौ व्यक्तीनामकल्पितत्वात् खण्डादौ व्यभिचार इत्यर्थः। उक्तहेतोः स्वरूपासिद्धिमप्याह – किञ्चेति॥ रूपादिहीनमिति प्रत्येकं हेतुत्रयम्। चाक्षुषत्वादिप्रयोजकहीनमित्याद्यहेत्वर्थः। तेन रूप-रूपत्व-रूपाभावादिषु न व्यभिचारः। आवृतस्यापि मेघादिना सूर्यस्यावरणापगमदशायां चाक्षुषत्वेन व्यभिचारो मा भूत्, इति द्वितीयहेतावा'संसारमि'ति विशेषणम्। नचात्र दृष्टान्तासिद्धिः। तुषाद्यावृतविनष्टबीजादेरेव दृष्टान्तस्य सुलभत्वात्। व्यतिरेकव्याप्तौ वा घटादिर्दृष्टान्तः॥ किंत्विति॥ तथाच 'सन् घटः'इत्यत्र ब्रह्मभिन्नस्य घटादिनिष्ठस्य सत्त्वस्यानित्यत्व-घटत्वादिना समानस्य प्रतिभासनाद् न ब्रह्मरूपसदर्थानुवेधेन घटादिप्रतिभासः इति हेतोरसिद्धिरित्यर्थः। रूपादिराहित्याद्युक्तहेतुत्रययुक्तस्यापि ब्रह्मणश्चाक्षुषज्ञाने भानमस्तु। तथा व्यञ्जकविशेषसमवधानात् चन्द्रसंनिधौ राहोरिव, इत्याशङ्क्य निराकरोति – न चेति॥ स्वरूपयोग्यस्य सहकारिसमवधाने फलोपधानम्, नतु स्वरूपायोग्यस्य सहकारिशतेनापि।

वा? इति विकल्पानभिप्रेत्याद्यं दूषयति – तस्येति॥ भेदस्येत्यर्थः।तथाचासिद्धिरित्यर्थः॥ आत्मन्यपीति॥ तथाचात्मनि व्यभिचार इत्यर्थः। द्वितीयं दूषयति – कल्पितस्येति॥ तथाच व्यभिचार इत्यर्थः। तृतीयं दूषयति – धर्मीति॥ ननु – रूप्यस्य प्रातिभासिकत्वेऽपि तत्र घटादिभेदस्य व्यावहारिकत्वेऽपि स्वप्रतियोगिकभेदभ्रममादाय धर्मिसमसत्ताका निर्वचनीयभेदवत्त्वं रूप्येऽप्यस्ति, इति न तत्र साधनवैकल्यमिति – चेत्, न। रूप्यस्याविद्यावृत्तिरूपस्य साक्षिगोचरतया विशेषदर्शनस्य सत्त्वेन तस्मिन् स्वप्रतियोगिक भेदभ्रमस्यासंभवदुक्तिकत्वादिति भावः। धर्मिसमसत्त्वस्येति बहुव्रीहिः। तस्येत्यनुषक्तेन संबध्यते। चतुर्थं दूषयति – मिन्नत्वमात्रस्य चेति॥ भेदवत्त्वमात्रस्य हेतोः पक्षेऽध्यस्तप्रतियोगिकभेद सत्त्वेनाप्युपपन्नतया सदसद्भेदरूपसाध्यं विनाऽनुपपत्त्यभावेन सदसद्भेदरूपसाध्यं प्रत्यप्रयोजकत्वा दध्यस्तप्रतियोगिकभेदवत्त्वसिद्धौ च सत्यत्वमेव सिद्ध्यतीत्यर्थः। भेदवत्त्वमात्रं कल्पितभेदवत्यात्मन्यनैकान्तिकं चेत्यपि बोध्यम्। पञ्चमं दूषयति – सत्याद्भेदस्य चेति॥ ननु स्वसमानसत्ताकभेदप्रतियोगित्वरूपवस्तुपरिच्छेदस्य विविक्षितत्वाद् न ब्रह्मणि तुच्छे वा व्यभिचारः। न वा प्रपञ्चेऽसिद्धिरिति – चेत्, मैवम्। रूप्यप्रतियोगिकघटादिनिष्ठभेदस्य व्यावहारिकतया स्वसमानसत्ताकभेदप्रतियोगित्वं रूप्येऽसिद्धमिति साधनवैकल्यम्। नच – रूप्यस्य प्रातिभासिकरूप्यान्तरनिष्ठभेदप्रतियोगित्वमादाय तत्र हेतुः स्यादिति – वाच्यम्। तद्भेदस्यापि व्यावहारिकत्वात्। अन्यथा तुच्छान्तरनिष्ठो यस्तुच्छभेदः प्रतीयते, तत्प्रतिगित्वेन तुच्छे व्यभिचारापत्तेः। अविद्यावृत्तिरूपस्य साक्षिसिद्धस्य रूप्यस्य स्वप्रतियोगिकभेदवत्त्वेन ज्ञानमसम्भवि। येन तादृशानिर्वचनीयभेदप्रतियोगित्वमादाय रूप्ये हेतुसत्त्वं स्यादिति॥

स्वानुगतेति॥ स्वान् प्रत्यनुगतं प्रतिभासस्वरूपं यद् वस्तु, तत्र कल्पिता इत्यर्थः। अत्र 'प्रतिभासे' इत्येतद् धर्मिज्ञानरूपभ्रमकारणस्य सत्त्वाद् भ्रमोपपत्तिरित्येवमर्थम्। ननु साध्यान्तर्गतम्। अत एव तदनन्तर्भावेणैव 'यथा सर्पे'त्याद्युदाहरणवाक्यम्। 'अनुगते'त्येतदप्यननुगतस्यानुगतेऽध्यासो युक्त इति प्रतिपादयितुम्। यथा सर्पमालादिकमिति॥ विभक्तमिति शेषः। अतो नोदाहरणे साधनानुक्तिः॥ सदर्थे चेति॥ एतच्चोपनयवाक्यम्। तत्र विभक्तत्वस्य हेतोरनुगतरूपावधिसापेक्षत्वादनुगतस्य सदर्थस्य ब्रह्मणो निर्देशः, इति नाधिक्यं दोषः। उपनयान्तैश्चतुर्भिरवयवैरनुमितिहेतुज्ञाननिष्पत्तेर्निगमनमनावश्यकमिति पक्षमाश्रित्य निगमनानुक्तिः। अतो न न्यूनताऽपीत्यर्थः॥ निरस्तत्वादिति॥ आद्यस्य वस्तुपरिच्छिन्नत्वरूपहेतुनिरासेन, द्वितीय-तृतीययोः कालपरिच्छिन्नत्वदेशपरिच्छिन्नत्वहेतुनिरा सेनेत्यर्थः। सुख-दुःखादीति॥ सुखादेः सर्वदा प्रकाशमानत्वादित्यर्थः॥ युक्तो हीति॥

देशमात्रे कालमात्रे च सत्त्वेन ज्ञानविषयत्वं वा? एकस्मिन् देशमात्रे कालमात्रे च सत्त्वेन व्यावहारिकप्रमाविषयत्वं वा? स्वदेश-कालेतर देशकालयोरसत्त्वं वा? इति विकल्पानभिसन्धायाद्यमपवदति – न तावदिति॥ एककालादिमात्रे सत्त्वम्, नतु द्वयोस्त्रिषु कालादिषु सत्त्वमित्यर्थः॥ रूप्यादाविति॥ ममात्यन्तासद्रूप्यवादिनो मते रूप्यस्यैकस्मिन्नपि कालादावसत्त्वादित्यर्थः॥ तेनेति॥ एकस्मिन् देशे काले च सत्त्वेन सर्वदेशेऽपि कालत्रयेऽपि निषेधे साध्यमाने यद्देशे काले वा यस्य सत्त्वमस्ति, तद्देश-कालायोरपि तस्यासत्त्वं साधितं स्यात्। तथाच तद्देशे काले च सत्त्वेन तद्देशे कालेऽसत्त्वसाधने विरोध इत्यर्थः। द्वितीय-तृतीयौ दूषयति – प्रपञ्च इति॥ मया प्रपञ्चे सत्त्वाभावानङ्गीकारात्, सत्त्वेन भ्रमानङ्गीकाराच्चेत्यर्थः। चतुर्थमुक्त्वा दूषयति – प्रमा-भ्रमेति॥ पञ्चममुक्त्वा दूषयति – व्यावहारिकेति॥ षष्ठमपवदति नापीति॥ दूषयति – तेनेति॥ तथाचागृह्यमाणविशेष दशायामाभाससाम्यम्, विशेषग्रहे तु बाध इत्यर्थः॥ रूपान्तरेणेति॥ तथाचाभासान्तर साम्यरूपमप्रयोजकत्वमित्यर्थः। रूप्यादेरिति॥ रूप्यादेर्वियदादेश्चान्यकाले स्वरूपोपमर्दसत्त्वेन स्वकालेऽपि स्वरूपोपमर्दः स्यात्। नचेष्टापत्तिः। तथा सति कालत्रयेऽपि रूप्यादिवियदादि स्वरूपोपमर्देनासत्त्वापत्त्याऽसद्विलक्षणस्वरूपाभावापातादित्यर्थः। तथाचासद्विलक्षणस्वरूपानुप मर्देनपारमार्थिकत्वाकारेण निषेध इति त्वत्सिद्धान्तविरोधः स्यादिति भावः॥

एतेनेति॥ स्वदेश-कालेतरदेश-कालयोरसत्त्वेन स्वदेश-कालयोरप्यसत्त्वसाधने विरोधापाते नेत्यर्थः॥ निरस्तमिति॥ स्वासत्त्वग्राहकेण प्रमाणेन देश-कालयोः स्वसत्त्वग्राहकेणापि विरोधस्याविशिष्टतया यत् कदाचित् कुत्रचिदसत्, तत् सदा सर्वत्रासदेव, इति वियदादेः स्वोपाधावप्यसत्त्वसाधने यत् कदाचित् कुत्रचित् सत्, तत् सर्वत्र सदा सदेव, इति स्वोपाध्यतिरिक्तदेशादावपि वियदादेः सत्त्वं स्यादिति दोष उक्तप्रायत्वाद् नोक्तः॥ आद्ययोरिति॥ असङ्गत्वात् सर्वमूर्तासंयोगित्वम्, निर्गुणत्वाद् महापरिमाणानधिकरणत्वं च ब्रह्मणि व्यभिचारीत्यर्थः॥ अन्त्यस्येति॥ गुण-कर्मादीनां निर्गुणत्वेन तादृशपरिमाणानधिकरणत्वाद् गुणादिषु हेत्वसिद्धिरित्यर्थः॥ कालपरिच्छिन्नत्वमिति॥ प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं वा, एकैकप्रतियोगित्वं वा कालपरिच्छिन्नत्वम्। तच्च नित्येष्वन्योन्याभावादिषु जगत्सत्यत्ववादिनोऽसिद्धमित्यर्थः। परिच्छिन्नत्वहेतौ कृतेषु त्रिषु विकल्पेष्वाद्यौ विकल्पौ निरस्य, वस्तुतः परिच्छेद इति तृतीयं विकल्पं दूषयितुमुपक्रमते – न तृतीय इति॥ तद्धीति॥ भेदवत्त्वमित्यर्थः। 'भेदवत्त्वं वस्तुतः परिच्छेदः' इत्यत्र किं तात्त्विकभेदवत्त्वम्? कल्पितभेदवत्त्वं वा? धर्मिसमसत्त्वभेदवत्त्वं वा? भेदवत्त्वमात्रं वा? सत्यप्रतियोगिकभेदवत्त्वं

देश-कालयोः परिच्छेदनिरूपणायापि देशकालयोरपरिच्छेदसिद्धिरित्याह – देश-कालयोरिति॥ यदुपाधौ देश-कालौ वर्तेते, तदुपाधौ तयोर्व्यावहारिकनिषेधे विरोधापत्त्या देश-कालयोर्निषेधोपाधिभूतावन्यौ देश-कालौ वक्तव्यौ। तयोरपि देश-कालपरिच्छेदवत्त्वे पूर्ववद् देश-कालान्तराद्यपेक्षाया आवश्यकत्वेनानवस्थापत्त्या कयोश्चिद् देश-कालयोर्देश-काला परिच्छेदेऽङ्गीकर्तव्ये प्रथमयोरेव तदपरिच्छेद आवश्यक इत्यर्थः। ननु सत्यं यदुपाधौ देश-कालौ वर्तेते, तदुपाधौ न तयोर्व्यावहारिको निषेध इति। किंतु स्वस्वरूपदेश-कालयोः स्वयं देश-कालौ न वर्तेते; आत्मश्रयदोषात्। अतः स्वस्वरूपयोरेव देश-कालयोर्निषेधो भविष्यतीत्याशङ्क्याह – देशः सर्वत्रास्तीति॥ नात्माश्रयदोषेण देश-कालयोः स्वस्वरूपेऽवृत्तिः। प्रमेयत्वादिवदभेदेन सम्बन्धेन स्वस्मिन्नपि वृत्तेः प्रामाणिकत्वादित्यर्थः। तथाच देश-कालयोः परिच्छिन्नत्वमसिद्धमिति भावः। अज्ञाने हेत्वसिद्धिमुपपादयति – अज्ञानस्येति॥ यद्देश-कालयोरज्ञानं न स्यात्, तद्देश-कालस्वरूपमेव न तिष्ठेत्। तव मते देशकालयोरप्यज्ञानोपादानकतया उपादानाभावे उपादेय देश-कालयोरप्यभावापत्तिः। अतो न कस्मिंश्चिद् देशे काले वाऽज्ञानस्य परिच्छेदः सम्भवति; व्याघातापत्तेरित्यभिप्रायेणोक्तम् सर्वदेश-कालोपादानत्वेनेति॥ आवरणं हि पटादिकमाव्रियमाणपुरुषाद् अन्यूनदेशादि दृष्टम्। अतो देशाद्यपरिच्छिन्नं ब्रह्म प्रति देशाद्यपरिच्छिन्नब्रह्मविषयकावरणमज्ञानमप्याव्रियमाण ब्रह्मान्यूनदेशं वाच्यम्, इत्यज्ञानस्य देश-कालाद्यपरिच्छेदसिद्धिरित्यभिप्रायेणोक्तम् सर्वगतं ब्रह्म प्रतीत्यादि॥ सूर्यन्यूनदेशं सूर्यावरकच्छत्रादि व्यावर्तयितुं 'विषयसम्बन्धी'त्युक्तम्। पराभिप्रेतस्य प्रतिपन्नोपाधिस्थनिषेधस्यापरिच्छिन्नत्वमुपपादयति प्रतिपन्नोपाधाविति॥ यद्देशे प्रतियोगिनिषेधोऽत्यन्ताभावरूपो नास्ति, तद्देशे प्रतियोगिनः सत्त्वम्, यथा तन्तुदेशे पटस्य। यत्काले प्रतियोगिनिषेध उक्तरूपो नास्ति, तत्काले प्रतियोगिनः सत्त्वम्; यथा प्रतियोगिनो गन्धात्यन्ताभावस्य निषेधो गन्धरूपः प्रलये नास्ति। अतः प्रलये गन्धात्यन्ताभावरूपो गन्धस्य प्रतियोगी वर्तते। तस्माद् देश-कालप्रतिपन्नोपाधिस्थनिषेधेष्वपरिच्छिन्नेषु परिच्छिन्नत्वहेतोरसिद्धिरिति॥

संगृह्णाति – कालादिरिति॥ इत्यादीति॥ आदिशब्देन 'यत्र त्वस्य सर्वमात्मैवाभूत्' 'अथ सोऽभयं गतो भवती'ति मोक्षे 'यत्राथ'शब्दाभ्यां देश-कालसत्त्वप्रतिपादकश्रुतिसंग्रहः॥

किंचेति॥ कालादिपरिच्छिन्नत्वं किमेकस्मिन् देशमात्रे कालमात्रे च सत्त्वं वा? एकस्मिन् देशमात्रे कालमात्रे च सत्त्वरहितत्वे सत्येकस्मिन् देशमात्रे कालमात्रे च सत्त्वेन ज्ञानविषयत्वं वा? एकस्मिन् देशमात्रे कालमात्रे च सत्त्वेन भ्रमविषयत्वं वा? एकस्मिन्

न्यायामृततरङ्गिणी

॥ देशत इति॥ अत्यन्ताभावप्रतियोगित्वमित्यर्थः॥ कालत इति॥ प्रध्वंसप्रतियोगित्व मित्यर्थः॥ वस्तुत इति॥ अन्योन्याभाववत्त्वमित्यर्थः। अत्यन्ताभावप्रतियोगित्वरूपं देशपरि च्छिन्नत्वं समवायसम्बन्धेनात्यन्ताभावप्रतियोगित्वं चेदाम्मनि व्यभिचारि। तस्य क्वाप्यसमवेतत्वात्। सर्वसम्बन्धित्वाभाववविवक्षायां सर्वसम्बन्धशून्ये परमात्मनि व्यभिचारः। संयोगसम्बन्धेनात्यन्ताभावप्रतियोगित्वाभिप्राये त्वाकाशादावसिद्धिः। एवं कालतः परिच्छेदेऽप्यसिद्धिरित्याह – देशकालाज्ञानेष्विति॥ त्वदभिप्रेत इति निषेधेन संबध्यते। आकाशादिषु हेत्वभावमुपपादयति – अवकाशरूपेति॥ इदमग्रे॥ अस्याग्रे इत्यनेन सर्वजगत्सृष्टेः पूर्वं "यदा सर्वे प्रलीयन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतः" इत्यविद्यातत्कार्यनिवृत्तिरूपमोक्षेऽपि देशकालयोः सत्त्वेनापरिच्छेदसिद्धेरित्यर्थः। ननु आकाशे न कालपरिच्छेदराहित्यम्। "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इति श्रुतिसिद्धजन्यत्वेन ध्वंसप्रतियोगित्वरूपकालपरिच्छिन्नत्वस्याकाशेऽनुमितत्वात्, "आकाशवत् सर्वगतश्च नित्यः" इत्यत्र चात्मनिदर्शनत्वं स्वसमानकालीनसर्वगतत्वेनाभूत सम्प्लवस्थायित्वेन चोपपन्नमित्यत आह-आकाशः सम्भूत इति श्रुतेश्चेति। वियदधिकरणसिद्धोत्पत्तिकभूताकाशपरतया संभूतश्रुतेः सावकाशतया निश्चितार्थकात्मनिदर्शनश्रुत्या तत्परतयाऽऽकाशस्य कालापरिच्छेदरूपनित्यत्व सिद्धिरित्यर्थः। ननु भूताकाशातिरिक्तस्याकाशस्याभावात् कथं श्रुत्योर्विरोधपरिहार इति? अत आह – उक्तं चेति॥ भूताकाशोऽव्याकृताकाशश्चेत्याकाशद्वैतम्॥

ननु प्रतियोगिसमानसत्ताकात्यन्ताभावप्रतियोगित्वं हेतुः, अतो नात्मनि व्यभिचारः। अज्ञानाकाशादौ च स्वसमानसत्ताकात्यन्ताभावप्रतियोगित्वसत्त्वेनासिद्ध्यभावात्। अविद्याकाशा देर्व्यावहारिकस्य पारमार्थिकाभावपक्षे स्वान्यूनसत्ताकेति विशेषणं देयम्। अत एव प्रातिभासिकशुक्तिरूप्यादेर्व्यावहारिकाभावप्रतियोगित्वेऽपि न साधनवैकल्यम्। सद्विविक्तत्वादि मिथ्यात्वप्रकाराणां चैवंरूपत्वाभावाद् न साध्याविशिष्टतेत्यत आह – अत्र देश इति॥ देश-कालयोः सर्वदेश-कालसंसृष्टत्वेन प्रतियोगिसंसर्गवति तदत्यन्ताभावासंसर्गादसिद्धिरेव। अन्यथा 'अत्रेदानीं'शब्दाभ्यां देश-कालौ निर्दिश्य पुनस्तयोर्निषेधे व्याघातः स्यादित्यर्थः। किंच ब्रह्मणो देश-कालाभ्यामपरिच्छिन्नतयैव तयोस्ताभ्यामपरिच्छेदसिद्धिरित्याह – ब्रह्म कुत्रचिदिति॥ 'कुत्र चित्- कदाचि'च्छब्दाभ्यां देश-कालौ निर्दिश्य पुनस्तौ विना 'ब्रह्मास्ती'त्यभिधाने व्याघातापत्त्या 'ब्रह्म सर्वदेशे सर्वकालसंसृष्टमेव, सर्वकाले सर्वदेशसंसृष्टमेव' इति ब्रह्मणोऽपरिच्छेदे निरूप्यमाणे देश-कालयोरपि देश-कालाभ्यामपरिच्छेदसिद्धिरिति भावः।

तत्तद्व्यवहारजनकत्वोपपत्तेः। अत एव – 'घटादिकं, सद्रूपे कल्पितम्, प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात् प्रत्येकं चन्द्रानुविद्धजलतरङ्गचन्द्रवत् इति ब्रह्मसिद्धिकारोक्तमपि साधु। ननु – सदर्थस्य ब्रह्मणः रूपादिहीनस्याऽसंसारमज्ञानावृतस्य शब्दैकगम्यस्य कथं घटः सन्नित्यादिबुद्धिविषयता स्यात्? तथा च 'घटोऽनित्य' इत्यनेन घटगतानित्यतेव 'घटः स'न्नित्यनेनापि घटगतमेव सत्त्वं गृह्यते। नच – स्वरूपेणाप्रत्यक्षस्य राहोश्चन्द्रावच्छेदेनेव ब्रह्मणोऽपि घटाद्यवच्छेदेनैव प्रत्यक्षतेति – वाच्यम्। शब्दाद्यवच्छिन्नस्यापि गगनादेः श्रावणत्वाद्यापातात्। राहोस्तु दूरदोषेणाज्ञातस्य नीलस्य योग्यस्य शुक्लभास्वरचन्द्र संबन्धाच्चाक्षुषता उक्ता – इति चेन्न। यतः सदात्मना न ब्रह्मणो मूलाज्ञानेनावृतत्वम्। किंतु घटाद्यवच्छिन्नशक्त्यज्ञानेनैव। तथा च चक्षुरादिजन्यवृत्त्या तदावरणभङ्गे सति 'सन्घट' इत्यत्र ब्रह्मणः स्फुरणे बाधकाभावात्। न च – रूपादिहीनतया चाक्षुषत्वाद्यनुपपत्तिः बाधिकेति – वाच्यम्। प्रतिनियतेन्द्रियग्राह्येष्वेव रूपाद्यपेक्षानियमात्। सर्वेन्द्रियग्राह्यं तु सद्रूपं ब्रह्म। नातो रूपादिहीनत्वेऽपि चाक्षुषत्वाद्यनुपपत्तिः। सत्तायाः परैरपि सर्वेन्द्रियग्राह्यत्वाभ्युपगमाच्च। तदुक्तं वार्तिककृद्भिः–

'अतोऽनुभव एवैको विषयोऽज्ञातलक्षणः।
अक्षादीनां स्वतःसिद्धो यत्र तेषां प्रमाणता॥' इति।

कालस्य च रूपादिहीनस्य मीमांसकादिभिः सर्वेन्द्रियग्राह्यत्वाभ्युपगमात्। नच – शब्दावच्छिन्नस्याकाशस्यापि श्रावणत्वं स्यादिति – वाच्यम्; स्वभावतो योग्यस्य हि केनचिन्निमित्तेन प्रतिरुद्धयोग्यताकस्यावच्छेदकादिना योग्यता संपाद्यते, यथा दूरदोषेण प्रतिरुद्धयोग्यताकस्य राहोश्चन्द्रसंबन्धेन। एवं चावरणेन प्रतिरुद्धयोग्यताकं ब्रह्म घटाद्यवच्छेदेन योग्यं भवति, नभस्तु स्वभावायोग्यमेव, न प्रतिरुद्धयोग्यताकम्, येन शब्दावच्छेदेन योग्यं भवेत्। यद्वा – द्रव्यग्रहे चक्षुषो रूपापेक्षा, न त्वन्यग्रहे। ब्रह्म तु न द्रव्यम्, 'अस्थूलमनण्वह्रस्वमदीर्घ'मिति श्रुत्या चतुर्विधपरिमाणनिषेधेन द्रव्यत्व प्रतिषेधात्। अतो नानुपपत्तिः। अस्तु वा द्रव्यम्। तथाप्यध्यस्तद्रव्यत्ववति गुणादौ रूपानपेक्षचाक्षुषत्वदर्शनेन धर्म्यन्यूनसत्ताकद्रव्यत्ववत्येव चक्षू रूपमपेक्षते। ब्रह्मणि च द्रव्यत्वं धर्म्यपेक्षया न्यूनसत्ताकमवेति न तद्ग्रहे रूपाद्यपेक्षा। कल्पितत्वं च स्वाभाववति प्रतीयमानत्वं वा, स्वरूपज्ञाननिवर्त्यत्वं वेत्यन्यदेतत्। तस्मात् परिच्छिन्नत्वमपि भवति हेतुरिति सिद्धम्। इति परिच्छिन्नत्वहेतूपपत्तिः॥

अद्वैतसिद्धिः

परिच्छिन्नत्वमपि हेतुः। तच्च देशतः कालतो वस्तुतश्चेति त्रिविधम्। तत्र देशतः परिच्छिन्नत्वम् – अत्यन्ताभावप्रतियोगित्वम्। कालतः परिच्छिन्नत्वम् – ध्वंसप्रतियोगित्वम्। वस्तुतः परिच्छिन्नत्वम् – अन्योऽन्याभावप्रतियोगित्वम्। ननु समवायसंबन्धेनात्यन्ताभावप्रतियोगित्वम् आत्मनि व्यभिचारि। तस्याप्याकाशादिवत् क्वाप्यसमवेतत्वात्। संयोगसंबन्धेनात्यन्ताभावप्रतियोगित्वमाकाशादावसिद्धम्। तस्य यावन्मूर्तसंयोगित्वनियमात्। अमूर्तनिष्ठात्यन्ताभावप्रतियोगित्वाभिप्राये तु आत्मनि व्यभिचारस्तदवस्थः। सर्वसंबन्धित्वाभाव विवक्षायामपि सर्वसंबन्धशून्ये परमात्मनि व्यभिचारः। अज्ञाने सर्वसंबन्धिन्यसिद्धिश्च। ध्वंसप्रतियोगित्वमपि आकाशादावसिद्धम्। तेषां पौरर्नित्यत्वाभ्युपगमात्। अन्योन्याभावप्रतियोगित्वं चात्मनि व्यभिचारि। तस्य जडनिष्ठान्योन्याभावप्रतियोगित्वाद्, अन्यथा जडत्वापत्तेः इति चेन्न। अत्यन्ताभावे अन्योन्याभावे च प्रतियोगिसमसत्ताकत्वविशेषणेन आत्मनि व्यभिचारपरिहारात्। अज्ञानाकाशादौ च स्वसमानसत्ताकात्यन्ता भावान्योन्याभावप्रतियोगित्वसत्त्वेन असिद्ध्यभावात्। अविद्याकाशादेर्व्यावहारिकस्य पारमार्थिकाभावपक्षे 'स्वान्यूनसत्ताके'ति विशेषणं देयम्। अत एव प्रातिभासिकशुक्तिरूप्यादेर्व्यावहारिकाभावप्रतियोगित्वेऽपि न साधनवैकल्यम्। निरुक्तमिथ्यात्वप्रकाराणामेवंरूपत्वाभावात् न साध्याविशिष्टता। ध्वंसप्रतियोगित्वं चाकाशादौ नासिद्धम्। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुतिसिद्धजन्यत्वेनानुमितत्वात्। 'आकाशवत्सर्वगतश्च नित्य' इत्यत्र चात्मनिदर्शनत्वं स्वसमानकालीनसर्वगतत्वेन, आभूतसंप्लवावस्थायित्वेन चेति द्रष्टव्यम्। 'अतोऽन्यदार्त' मितिश्रुत्या अनात्ममात्रस्यैव विनाशित्वप्रतिपादनात्।

अत एव घटादयः स्वानुगतप्रतिभासे वस्तुनि कल्पिताः, विभक्तत्वाद्, यथा सर्पमालादिकं स्वानुगतप्रतिभासे रज्ज्वा इदमंशे विभज्यते, 'एवं ब्रह्मण्यनुगच्छति घटादिकं विभज्यते, सन् घटः, सन् पट' इति आनन्दबोधोक्तमपि साधु। विभक्तशब्देन स्वसमानसत्ताकभेदप्रतियोगित्वरूपवस्तुपरिच्छेदस्य विवक्षितत्वात् न ब्रह्मतुच्छयोर्व्यभिचारः। न च – 'खण्डो गौर्मुण्डो गौ' रित्येवमादिस्वानुगतप्रतिभासे गोत्वादौ व्यक्तीनामकल्पित त्वाद् व्यभिचार इति–वाच्यम्। सत्सामान्यातिरिक्तगोत्वादिसामान्यानभ्युपगमात्, गोत्वाद्यभ्युपगमेऽपि गोत्वादिव्यञ्जकतावच्छेदकसामान्यानभ्युपगमात्। व्यक्तिविशेषाणामेवाननुगतानां सास्नादिमत्त्वाद्युपाध्यनुगतानां वा तद्व्यञ्जकत्ववद् व्यक्तिविशेषविशिष्टत्वेन सत्सामान्यस्यैव

भावाद्, अन्त्यस्य गुणादावप्यभावात्। कालपरिच्छिन्नत्वमन्योन्याभावादौ प्रतिवाद्यसिद्धं च। न तृतीयः। तद्धि भिन्नत्वम्। तस्य च तात्त्विकस्य प्रपञ्चेऽप्यभावात्। आत्मन्यप्यनृतव्यावृत्तिस्तात्त्विकीति वक्ष्यमाणत्वाच्च। कल्पितस्य त्वात्मन्यपि भावाद्। धर्मिसमसत्त्वस्य रूप्येऽपि ममाभावाद्, भिन्नत्वमात्रस्य चाध्यस्ताद्भेदेन सत्त्वेऽप्युपपत्तेः, सत्याद्भेदस्य चासिद्धेः।

एतेन यदुक्तं प्रमाणमालायाम्– 'विवादाध्यासिताः स्वानुगतप्रतिभासे वस्तुनिकल्पिताः, विभक्तत्वात्, यथा सर्पमालादिकं स्वानुगते रज्ज्वौ इदमंशे, सदर्थे च ब्रह्मण्यनुगच्छति पटादिकं विभज्यते सन् घटः सन् पट इति प्रतीतेः' – इति निरस्तम्। नापि बाधकदशायां निषिध्यमानत्वम्, साध्यावैशिष्ट्यात्। नापि कदाचिदेव प्रकाशमानत्वम्, सुखदुःखा दिभागे असिद्धेः अप्रयोजकत्वाच्च। युक्तो हि सतोऽपि प्रकाशसामग्र्याः कादाचित्कत्वेन कदाचिदेवेच्छादि वत्प्रकाशोऽपि। नाप्यननुगतत्वम्, अननुगतानां घटपटादीनां चलनादौ रूपादौ द्रव्यत्वादौ ध्वंसादावनात्मत्वादौ च, खपुष्पनृशृङ्गादीनां चासति, आत्मनश्च सदर्थेऽनध्यासात्। अस्ति हि घटश्चलति, पटश्चलति, घटो रूपी, पटो रूपी, पटो द्रव्यम्, घटो ध्वस्तः, पटो ध्वस्तः, अनात्मा घटः, अनात्मा पटः, खपुष्पमसत्, आत्मा सन्नित्यादिधीः। दृश्यते चैकत्रानेकेषामिवैकस्यापि रूप्यस्यानेकेषु शुक्तिवज्रादिष्वध्यासः। एवं च सदर्थस्यैव घटादिष्वारोपः किं न स्यात्?

एतेन विवादाध्यासितं सद्रूपे कल्पितम्, प्रत्येकं तदनुविद्धतया प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्गचन्द्रवदिति ब्रह्मसिद्ध्युक्तंनिरस्तम्। खण्डो गौर्मुण्डो गौरिति प्रत्येकं गोत्वानुविद्धस्यापि खण्डादेस्तत्रानध्यासात्।

किं च रूपादिहीनमासंसारमज्ञानावृतं शब्दैकगम्यं ब्रह्म सन् घटः सन् शब्द इत्यादिचाक्षुषादिज्ञाने न भाति, किन्त्वनित्यो घट इत्यादौ अनित्यत्वादिकमिव सत्त्वमपि घटगतमेव। न च स्वरूपेणाप्रत्यक्षस्यापि राहोः चन्द्रावच्छेदेनेव ब्रह्मणोऽपि घटाद्यवच्छेदेन प्रत्यक्षतेति युक्तम्। शब्दाद्यवच्छिन्नस्य गगनादेः श्रावणादित्वापातात्। राहोस्तु दूरदोषेणाज्ञातस्य नीलस्य शुक्लभास्वरचन्द्रसम्बन्धाच्चाक्षुषता युक्तेति।

इति परिच्छिन्नत्वहेतुभङ्गः।

'आकाशवत्सर्वगतश्च नित्यः' 'सदेव सोम्येदमग्रे' 'दृष्ट्वैव तं मुच्यते' 'अथ मर्त्योऽमृतो भवति' 'यत्र त्वस्य सर्वमात्मैवाभूद्'–इत्यादिश्रुत्या, सदा सर्वत्र कार्यदर्शनादि युक्त्या च सिद्धेः। 'आकाशः संभूतः' इत्यादिश्रुतेश्च भूताकाशविषयत्वात्। उक्तं चाकाशद्वैतमन्यत्र। अत्र देशो नास्ति, इदानीं कालो नास्तीत्यस्य व्याहतत्वाच्च। ब्रह्म कुत्रचित्कदाचिद् देशं कालं च विनाऽस्तीत्यस्यापि व्याहतत्वाच्च। देशकालयोः स्वोपाधौ निषेधे विरोधेनाविरोधाय निषेधोपाधित यादेशकालान्तरयोरावश्यकत्वाच्च। देशस्सर्वत्रास्ति कालस्सदास्ति, पूर्वः कालः इत्याद्यबाधितप्रतीत्या तयोः स्वनिर्वाहकतया प्रमेयत्वादिवत्स्वसम्बन्धसंभवाच्च। अज्ञानस्य च सर्वदेशकालोपादानत्वेन सर्वगतं ब्रह्म प्रति विषयसम्बन्ध्यावरणत्वेन च देशादिपरिच्छेदायोगात्। प्रतिपन्नोपाधौ निषेधस्य च कुत्रचित्कदाचिदभावे तत्र तदा प्रतियोगिनः सत्त्वापातात्। प्रतिपन्नोपाधौ निषेधस्य च कुत्रचित्कदाचिदभावे तत्र तदा प्रतियोगिनः सत्त्वापातात्। तथा च–

कालादिर्न परिच्छिन्न अग्र आसीदथामृतः।
इत्यादिश्रुतिभिर्नो चेद् दुर्वारा व्याहतिर्भवेत्॥

किं च कालादिपरिच्छिन्नत्वं न तावदेककालादिमात्रे सत्त्वम्। रूप्यादौ ममासिद्धेः। तेन त्रैकालिकनिषेधसाधने विरोधाच्च। नापि तथा धीमात्रम्। मात्रशब्देनैककालादिमात्रे सत्त्वरूपार्थाभावोक्तौ भ्रमोक्तौ च प्रपञ्चे ममासिद्धेः। प्रमाभ्रमसाधारणधीत्वसामान्योक्तावात्मन्यपि तादृशभ्रमसम्भवेन व्यभिचारात्। व्यावहारिकप्रमोक्तौ रूप्यादावभावात्। नापि कालान्तरादावसत्त्वम्। तेन स्वकालादावप्यसत्त्वसाधने प्रमाणविरोधस्याविशिष्टतया स्वकालादौ सत्त्वेन कालान्तरादौ सत्त्वसाधनापातात्। रूपान्तरेणासतो ब्रह्मणः स्वरूपेणाप्यसत्त्वापाताच्च। रूप्यादेर्वियदादेश्च स्वकालेऽप्यसद्विलक्षणस्वरूपाभावापाताच्च। एतेन यत्सत्, तत् सदा सर्वत्र सदेव। न हि रूपं कदाचित् कुत्रचिद् गन्धो भवति। तथा च यत्कदाचित्कुत्र चिदसत्तत्सदासर्वत्रासदेवेति वाचस्पतीयं शून्यवाद्युक्तयुक्त्युद्गिरणं निरस्तम्। ननु देशपरिच्छिन्नत्वं सर्वमूर्तासंयोगित्वं वा, परममहत्परिमाणानधिकरणत्वं वा, महत्त्वानधिकरणपरिमाणाधिकरणत्वं वेति चेन्न। आद्ययोरसङ्गे निर्गुणे च ब्रह्मण्यपि

सुखतारतम्यानुभवात् स्वरूपानंदेच तदयोगात्तदतिरिक्ते वैषयिकानंदेंगीकार्ये तत्रानानंदत्वहेतोरसिद्धिरिति भावः। वैषयिकानंदस्य स्वरूपानंदाद्भेदेनानुभूयमानत्वादपि तदतिरिक्तो वैषयिकानंदोस्तीति वक्तव्यमित्याह॥ अंतःकरणेति॥ यथा स्वरूपज्ञानातिरिक्तमंतः करणवृत्तिरूपं ज्ञानं जानामीत्यनुभवविषयोंगीक्रियते यथाहं सुखीत्यनुभविषयभूतं स्वरूपानंदातिरिक्तं अंतःकरणवृत्तिरूपं वैषयिकं सुखमप्यवश्यमंगीकार्यं। एवंचांतःकरणवृत्तिरूपज्ञानवदंतःकरणवृत्तिरूपजडभूतवैषयिकानंदानंगीकारेऽहंसुखीति अहमर्थस्य सुखित्वाव गाह्यनुभवो न स्यात्। स्वरूपसुखस्याहमर्थनिष्ठत्वाभावात्। ननु अहमिति प्रतीयमानोप्यात्मैवेति चेन्न। तर्हि सुतरामहं सुखीत्यनुभवायोगः। अहमिति प्रतीयमानस्यात्मनस्सुखस्वरूपत्वात् स्वस्मिन्स्ववत्तायां निर्विशेषवादिना त्वया वक्तुमशक्यत्वात्। तथाच वैषयिकानंदेंगीकार्ये तत्रानानंदत्वहेतोरसिद्धिरिति भावः। अप्रयोजकतां चाह॥ अनानंदत्वस्येति॥ तद्रूपानात्मत्वस्येत्यर्थः॥ आत्मनीति॥ अहंकारनिष्ठाहंत्वस्याभाव आत्मन्यप्यस्तीति अनहंत्वहेतोर्व्यभिचारइति भावः॥ उक्तादन्यस्येति॥ अत्मत्वानंदत्वाहंत्वादेः सकाशादन्यस्य प्रत्यक्त्वस्याभावादित्यर्थः। तच्चदूषितमितिभावः॥ निरसिष्यमाणत्वादिति॥ अपरिच्छिन्नत्वमात्मत्वं चेदनात्मत्वादित्यस्य परिच्छिन्न त्वादित्यर्थः स्यात्। सच परिच्छिन्नत्वहेतुःदेशकालादावसिद्ध्यादिनानिरसिष्यत इतिभावः॥ साध्येति॥ तथाचानात्मत्वं नाम बाध्यत्वमित्युक्तं स्यात्। तदेवच मिथ्यात्वमिति साध्यावैशिष्ट्यमित्यर्थः॥ आत्मशब्दवाच्यइति॥ ''आत्मा देहे धृतौजीवे स्वभावे परमात्मनी'' त्यभिधानादितिभावः॥ तल्लक्ष्यत्वमिति॥ तथाचात्मनि आत्मशब्दालक्ष्यत्वरूपानात्मत्वाभावान्न व्यभिचारः। आत्मशब्दवाच्ये देहादौ सत्त्वान्नासिद्धिरितिभावः॥ तत्प्रतिपाद्यत्वमिति॥ वाच्यत्वलक्ष्यत्वसाधारणमित्यर्थः। हेतोः आत्मशब्दालक्ष्यत्वहेतोः। आत्मशब्दलक्ष्यत्वस्य केवलान्वयित्वादितिभावः। आत्मशब्दाप्रति पाद्यत्वरूपहेतोरपि लक्षणया तत्प्रतिपाद्येंद्रियादावसिद्धिश्चद्रष्टव्या॥ परेति॥ मायावाद्यपेक्षया परेषां तत्ववादिनामस्माकं यदभिप्रेतमात्मत्वं तदेव मयापि हेतूक्रियत इतिवक्तुं न शक्यत इत्यर्थः। मयेति॥ यथोक्तमाचार्यैः ''जडत्वंचाप्रमातृत्वमेवे''ति। तथाच तदभावरूपानात्मत्वं च नत्वया हेतूकर्तुं शक्यं। आत्मनि व्यभिचारादहमर्थेऽसिद्धेश्चेतिभावः। पराभिप्रेतमेव जडत्वमिति पंचमः कुतो न युक्त इत्यत आह। मयेति॥ तच्चात्मादौ व्यभिचारादिना त्वया वक्तुं न शक्यतइतिभावः। तत्वशुद्धिः मायावादग्रंथविशेषः। निरस्तइति॥ अचेतनत्वं जडत्वमेव तच्चदूषितमिति भावः। यद्वाऽचेतनत्वं चेतनत्वाभावः तत्र चेतनत्वं जातिविशेषो वा ज्ञातृत्वं वेत्याद्यात्मत्वनिर्वचनदूषणेन दूषितप्रायं। अतो मिथ्यात्वसाधनाय परोपन्यस्तोऽचेतनत्वहेतुरपि परास्त इत्यर्थः॥ इतिजडत्वहेतुभंगविवरणं॥

१५. परिच्छिन्नत्वहेतुभङ्गः

परिच्छिन्नत्वमपि देशतः? कालतः? वस्तुतो वा? नाद्यद्वितीयौ। देशकालाज्ञानेषु त्वदभिमते वियदादे रूप्यादेश्च प्रतिपन्नोपाधिस्थनिषेधे चासिद्धेः। अवकाशरूपदेशस्य कालस्य चाऽपरिच्छिन्न(तयैव)त्वेनैव धर्मिग्राहिणा साक्षिणा

तन्निरूप्यस्वभावत्वकल्पनमिति मंदाशंकानिरासायोक्तं॥ अतीतादीति॥ दृष्टांतोयं। ईश्वरादिज्ञानं दार्ष्टांतिकमिति बुध्या विवेकः। अतीतादिज्ञानस्य विषयाभावान्नोत्पत्त्यर्थं तदपेक्षा ईश्वरज्ञानस्य तु नित्यत्वादिति ज्ञेयं। ज्ञानस्य ज्ञेयादिनिरूप्यस्वभावत्वेऽनुभवं प्रमाणयति॥ इदमिति॥ इदमिति विषयस्य अहमिति ज्ञातुरुल्लेखइति ज्ञातव्यं। ज्ञातुरिति॥ ज्ञातुर्योर्थप्रकाशः तदेव ज्ञानमित्यर्थः। ज्ञातुरिति कर्त्रपेक्षा अर्थेति ज्ञेयापेक्षाचोक्तेति भावः।

ज्ञानविशेषाभ्यां प्रमाऽप्रमाभ्यां बहिर्भूतत्वाच्च नात्माज्ञानमित्याह॥ किंचात्मेति॥ तद्वेद्यस्य प्रमारूपसाक्षिवेद्यस्य प्रमायास्सदर्थविषयकत्वनियमादिति भावः। नन्वित्यनंतरं यदितिशेषः॥ अंतःकरणेति। अंतःकरणवृत्तिप्रतिप्रबिंबितात्मचैतन्यमिति यावत्॥ अविद्येति॥ अविद्यावृत्तिबिंबितसाक्षिचैतन्यमिति यावत्॥ स्वभावेति॥ यन्मोक्षेप्यनिवर्तमानं शुद्धात्मस्वभावभूतं ज्ञानं तत्प्रमारूपं वा भ्रमरूपं वेति प्रश्नस्यांतःकरणवृत्तिप्रतिबिंबितचैतन्यादेः प्रमात्वादिकथनस्यानुत्तरत्वात् वृत्तिप्रतिबिंबितचैतन्यादेः संसारकालीन त्वात्तत्प्रमात्वादिकथनमयुक्तमित्यर्थः। नन्वात्मरूपं ज्ञानं स्वभावतः प्रमाऽप्रमाबहिर्भूतमिति स्वभावप्रश्नस्योत्तरं वदामइति चेत्तत्राह॥ स्वभावत इति॥ रूपद्वयेति॥ प्रमात्वाप्रमात्वाख्यधर्मद्वयेत्यर्थः॥ ज्ञानमपीति॥ यावद्विशेषाभावे सामान्यायोगाद्व्यभिचारइतिभावः॥ निरस्तत्वादिति॥ अस्वप्रकाशत्वं दृश्यत्वमित्यत्रेतिशेषः॥ आत्मत्वमिति॥ अनात्मत्वप्रतियोगिभूतमित्यर्थः। एकत्वादिति॥ जातेरनेकानुगतत्वावश्यंभावादित्यर्थः। ननु विशिष्टात्मनां बहूनां सत्त्वात्तदनुगतमात्मत्वं जातिर्भविष्यतीत्यतआह॥ विशिष्टेति॥ तथाच विशिष्टात्मनां मिथ्यात्वेन पक्षनिक्षिप्तत्वेन तत्रानात्मत्वहेतोर्भागासिद्धिरित्यर्थः॥

निरस्तत्वादिति॥ तथाच ज्ञातृत्वादीनामात्मत्वे अज्ञातृत्वमज्ञानत्वमस्वप्रकाशत्वंचानात्मत्वमित्युक्तं स्यात् तथाचाद्यस्याहमर्थेऽसिद्धिःद्वितीयस्य वृत्तिज्ञाने तृतीयस्य फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपस्य घटादौ अविद्यादौचासिद्धिः शुक्तिरूप्ये साधनवैकल्यंचेति निरस्तमित्यर्थः॥ वैषयिकेति॥ तस्य मिथ्यात्वेन पक्षनिक्षिप्तत्वादितिभावः। ननु वैषयिकानंदस्यात्माभिन्नत्वेन पक्षबहिर्भावएवेति नासिद्धिरित्यत उक्तं जन्मादिमत्यनात्मनीति। अनात्मनि जडइत्यर्थः। तथाचानादिभूतेन चेतनभूतेनात्मना नाभेदइतिभावः। ननु नात्मस्वरूपानंदातिरिक्तो वैषयिकानंदोस्ति। नच विषयभोगादिजन्योऽनुभवसिद्ध इतिवाच्यं। विषयसंबंधेनापि आत्मस्वरूपानंद एवाभिव्यज्यत इति विवरणोक्तेरितितत्राह॥ तस्यापीति॥ वैषयिकानंदस्याप्यात्मस्वरूपत्व इत्यर्थः। अनुभवेन प्रत्यक्षेण॥ साधनेति॥ सुखं तारतम्यवत् उत्कृष्टापकृष्टसाधनजन्यत्वादितियुक्त्याचेत्यर्थः॥ नस्यादिति॥ तथाच वैषयिकानंदस्यानुभवादिसिद्धतारतम्यवत्त्वान्नाखंडैकरसात्माभिन्नत्वमिति भावः। नन्वानंदेन तारतम्यं किंत्वभिव्यक्तावेव तत्तारतम्यमेवचानंदे उपचर्यते उक्तानुभवादिकमपि तदभिव्यक्तितारतम्यविषयकत्वेनान्यथासिद्धमित्यत आह॥ अखंडेति॥ यत्सावयवं वस्तु तत्र केषांचिदवयवानां व्यक्तौ वस्तुनोऽपकृष्टा व्यक्तिः बह्ववयवव्यक्तौ चोत्कृष्टाव्यक्तिरित्याद्यभिव्यक्तितारतम्यं सखंडे सावयवे एव वस्तुनि दृष्टं नाखंडे आत्मस्वरूपानंदइत्यर्थः। ननु वैषयिकानंद आत्मस्वरूपमेव। नचतारतम्यानुपपत्तिः यावानानंदस्तावती दुःखनिवृत्तिर्भवतीतिद्विरोधियद्दुःखंतन्निवृत्तावेवतारतम्यांगीकारादित्यत आह॥ विरोधि न इति॥ सर्वात्मना दुःखतद्धेतुसाभ्यांरहिते कस्मिंश्चित्पुरुषे नीरपानजात्क्षीरपानजं सुखमधिकमिति

त्वया वाच्यमितिशेषः। तस्य ज्ञप्तिरूपघटाधिष्ठानचैतन्यस्य। एवं घटचैतन्ययोर्ज्ञप्तिकर्मत्वेपि आंतरालिकमेव भेदमाह॥ इयांस्त्विति॥ एवंसति कर्मत्वविषयत्वयोरैक्येन ब्रह्मणोपि कर्मत्वावश्यंभावात्स्ववृत्तिविरोधादिति भावः॥

मोक्षइति॥ तथाच मोक्षकाले साक्षिणो निर्विषयत्वं स्यादितिभावः। मोक्षकालेपि साक्षिणो मया पूर्वं सुखादिकमनुभूतमित्येवं रूपेणातीतविषयकत्वं भविष्यतीत्याशंक्य तदतीतं किं साक्षान्मोक्षे साक्षिणो विषयः। ज्ञानादिद्वारा वा। नतावद्वितीयः। उपनायकस्य वृत्तिज्ञानस्य मोक्षेऽभावादित्यभिप्रेत्य प्रथमपक्षं निराचष्टे॥ त्वन्मतेचेति॥ वर्तमानस्यैवेति॥ योग्यस्यैव सुखादेरित्यर्थः। तथाचातीतसुखादेः न साक्षात्साक्षिविषयत्वमिति भावः। साक्षिणोतीतविषयत्वे दूषणांतरमाह॥ वह्निरत्रपर्वते पूर्वमासीदित्यनुमितौ यथातीतवह्न्युल्लेखोभवत्येवं मोक्षे सुषुप्तौच अतीतविषयोल्लेखरूपसंसाराख्योपप्लवः स्यात्। तथाच मोक्षसुषुप्त्योर्निष्प्रपंचता न स्यादित्यर्थः। तथाच ज्ञानत्वव्यापकसविषयत्वरहितत्वान्न ज्ञानमात्मेति तत्राज्ञानत्वहेतोर्व्यभिचारः सुस्थ इतिभावः। आत्मरूपं ज्ञानं निर्विषयमिति द्वितीयपक्षं दूषयति॥ निर्विषयत्व इति॥ आत्मा न ज्ञानं निर्विषयत्वात् घटवदित्यत्रनिर्विषयत्वं नाम अवर्तमानविषयत्वं वा अत्यंतासद्विषयकत्वंवा। आंद्येऽतीतज्ञाने व्यभिचारः। द्वितीये तुच्छज्ञाने व्यभिचार इतिध्येयं। ननु निर्विषयत्वे ज्ञानमेव न स्यादित्युक्तमयुक्तं निर्विषयत्वेपि कदाचित्सविषयत्वमात्रेण ज्ञानत्वमस्तु। तथाच मोक्षकालीनात्मरूपज्ञानस्य संसारावस्थायां सविषयकत्वाज्ज्ञानत्वमुपपन्नमित्यप्रयोजकतामाशंक्य निराकरोति॥ नचेति॥ सप्रतियोगिकइति॥ तथाचाभावादौ सप्रतियोगिकत्वादीनां स्वभावत्वमिव ब्रह्मरूपज्ञानेपि सविषयत्वं स्वभाव एवेत्यंगीकर्तव्ये कदाचित्सविषयत्वस्याप्रयोजकत्वात्। मोक्षे चात्मरूपज्ञानस्य सविषयकत्वाभावाज्ज्ञानत्वं न स्यादेवेत्यर्थः। मोक्षे विषयानुल्लेखे ब्रह्मरूपज्ञानस्य ज्ञानस्वभावहान्यापत्त्या ज्ञानत्वाभावमुक्त्वा दोषांतर माह॥ परमेति॥ मोक्षे आत्मरूपज्ञानस्य निर्विषयत्वांगीकारे आनंदस्य आत्मरूपज्ञानाविषय त्वप्राप्त्या आनंदाप्रकाश एव स्यात्। तथाच मोक्षस्य परमपुरुषार्थत्वं न स्यादित्यर्थः। नचानंदरूपत्वाद्युक्तं परमपुरुषार्थत्वमिति वाच्यं। द्रविणवत्त्वेहि पारिवृढ्यं नतु द्रविणत्वेऽतस्तन्न्यायेनानंदप्रकाशोऽवश्यं वाच्य इति भावः। निर्विषयत्वे ज्ञानमेव न स्याद्घटवदिति भगवत्पादीयवाक्ये निर्विषयत्वाज्ज्ञानमेव न स्यादित्यंशमुपपाद्य घटवदित्यंशमुपपादयति॥ अर्थेति॥ ज्ञानस्वभावेति॥ ज्ञानस्वरूपलक्षणेत्यर्थः। "बुद्धिरर्थप्रकाशन" मितिवचनादितिभावः। नन्वर्थप्रकाशात्मकत्वरूपज्ञान स्वभावाभावेपि ज्ञानत्वमस्तु नच घटादेरपि ज्ञानत्वापत्तिः अर्थाप्रकाशकं यज्जडं तद्व्यावृत्तत्वमेव ज्ञानत्वमित्यंगीकृतत्वात् घटादेस्त्वर्थाप्रकाशात्मकजडव्यावृऽत्तेरभावादिति चेन्न। ज्ञानस्यार्थप्रकाशात्मकत्वाभावेऽर्थाप्रकाशकजडव्यावृत्तेरेव वक्तुमशक्यत्वादित्याह॥ अर्थाप्रकाशेति॥ ज्ञात्रभावादिति॥ न तावदात्मस्वरूपभूतज्ञानस्य आत्मैव ज्ञाता कर्तृत्वकर्मत्वयोरेकत्र विरोधात् नापि परः मोक्षे पराभावादित्यर्थः। एवं कर्तृकर्मणोरभावेपि ज्ञानत्वमस्त्वित्यत आह॥ नहीति॥ नन्वात्मस्वरूपज्ञानस्यानादित्वान्न ज्ञात्राद्यपेक्षा अनादिनः परानपेक्षत्वादित्यत आह॥ यदिचेति॥ तदनपेक्षा कर्त्राद्यनपेक्षा। ब्रह्मसत्तायाः ब्रह्मकर्तृकसत्तायाः अस्ति ब्रह्मेत्यादावितिशेषः। ब्रह्म सत्तायाः कर्त्रपेक्षानास्त्येवेति चेत् तत्राह॥ तथाचेति॥ कर्तरि कर्त्रर्थे लकारः अस्तीत्यत्रलड्रूपः। कर्तरि लटो विधानादिति भावः। ननु ज्ञातृज्ञेयादिनिरूप्यस्वभावत्वमप्युत्पत्त्यर्थमेवांगीकार्यं आत्मज्ञानस्य चानादित्वेन तदभावान्न

येन कर्मीभूतायां स्वस्यामेव वृत्तिप्राप्त्या स्ववृत्तिविरोधःस्यात्। ननु ब्रह्मणः स्वरूपज्ञानं प्रतिकर्मत्वाभावेपि विषयत्वमस्त्येव। नच तदेव कर्मत्वमिति वाच्यं। तयोर्भेदात् तथा च न स्ववृत्तिविरोध इत्याशंकते॥ नन्विति॥ तथा च ब्रह्मस्वरूपभूतं ज्ञानं स्वविषयमेवेति न ज्ञानत्वव्यापकसविषयत्वव्यावृत्तिर्ब्रह्मस्वरूपज्ञाने इति न व्यभिचार इति शंकते॥ नन्विति॥ कर्मत्वातिरिक्तं ज्ञानजन्यव्यवहारयोग्यत्वमेव विषयत्वं। ज्ञाने च स्वविषयविषयकव्यवहारजननयोग्यत्वं सविषयकत्वमित्यर्थः। यत्र ज्ञानानंतरं व्यासंगादिना व्यवहारो न जातस्तत्र ज्ञाने स्वविषयविषयकव्यवहारजनकत्वाभावात् तद्विषये च ज्ञानजन्यव्यवहारास्पदत्वा भावादव्याप्तिवारणाय योग्यत्वमित्युक्तं। योग्यत्वं च सहकारिविरहप्रयुक्तकार्याभावः। तदिह ज्ञानानंतरं व्यवहारे जननीये व्यासंगाभावः सहकारी तदभावाद्व्यवहारो न भवति। तत्सद्भावेतु भवत्येवेत्येवं व्यासंगदशायामपि उक्तरूपयोग्यतासद्भावान्नाव्याप्तिरितिभावः। ब्रह्मज्ञानस्य स्वकर्मकत्वाभावेपि स्वव्यवहारजननयोग्यत्वरूपं स्वविषयत्वमस्तीत्यत्र परः स्वाचार्यसंमतिमाह॥ तत्स्वभावस्यापीति॥ आत्मस्वभावस्यापीत्यर्थः स्फुरणस्य ज्ञानस्य तद्विषयत्वं तद्विषयकत्वं। एतदन्यस्य ज्ञानजन्यव्यवहारयोग्यत्वभिन्नस्य। तथाच घटादौ ज्ञप्तिविषयत्वकर्मत्वयोरेकत्वदर्शनात् ब्रह्मणो ज्ञप्तिकर्मत्वमनंगीकृत्य तद्विषयत्वांगीकारो विरुद्ध इत्यर्थः। ननु ज्ञानजन्यव्यवहारयोग्यत्वरूपविषयत्वातिरिक्तं ज्ञप्तिकर्मत्वं घटादावस्त्येवेति उक्तमसदित्याशंक्य निराकरोति॥ नहीत्यादिना॥ एकदेशिमतेनाह॥ तदाकारवृत्तिरिति॥ घटाद्याकारांतःकरणवृत्तिरित्यर्थः॥ तांच प्रतीति॥ तदाकारावृत्तिर्ज्ञप्तिरितिमते तां प्रति कर्मत्वं नाम तत्कारकविशेषत्वं। तत्प्रतिबिंबितं चैतन्यं ज्ञप्तिरितिमते तां प्रति कर्मत्वं नाम तज्जन्येत्यादिरूपमिति विवेकः। घटादेश्चैतन्यकारकत्वाभावेन तत्कारकविशेषत्वरूपकर्मत्वस्य द्वितीयमतेऽयोगादितिध्येयं। कर्त्रादिकारकव्यावृत्त्यर्थं विशेषपदं॥ तज्जन्येति॥ वृत्तिप्रतिबिंबितचैतन्यजन्येत्यर्थः। अतिशयविशेषणमेतत्। अतिशययोगित्वं अतिशयजन्यव्यवहारयोगित्वमित्यर्थो द्रष्टव्यः। अन्यथा प्राप्तप्रकाशप्रतिबंधरूपावरणस्य योऽभिभवो ध्वंसः तद्रूपातिशययोगित्वं। तदभिव्यक्ताधिष्ठानचैतन्य एव स्यात् न घटादाविति‌ध्येयं। यद्वा वृत्तिप्रतिबिंबितचैतन्यजन्यो य आवरणाभिभवरूपोतिशयः भग्नावरणचित्संबंध इतियावत्। तद्रूपातिशययोगित्वमिति व्याख्येयं। इदं च घटादावस्तीतिध्येयं। ज्ञानकर्मत्वेन संप्रतिपन्ने दुःखादौ निरुक्तकर्मत्वमव्याप्तमित्याह॥ ज्ञातैकसतीति॥ दुःखादीनामविद्यावृत्तितत्प्रतिबिंबितसाक्षिचैतन्यविषय त्वेनोक्तरूपज्ञप्तिद्वयं प्रति कारकविशेषत्वाभावादित्यर्थः। एतदुपपादनाय ज्ञातैकसतीत्युक्तं। दुःखादीनां शुक्तिरूप्यादीनांच प्रातिभासिकत्वेन प्रतीतिसमयमात्रवृत्तित्वेन ज्ञातैकसत्त्वात्तत्रचावरणाभावेन आवरणाभिभवरूपातिशययोगित्वाभावेन कर्मत्वाभावापातात्। तथा दुःखादेर्ज्ञातैकसत्त्वेन ज्ञप्त्यपेक्षया पूर्वभावित्वाभावेन वृत्तिरूपज्ञप्तिकारकत्वरूपं कर्मत्वमपि नास्ति। कारकत्वस्य जनकत्वगर्भत्वेन तस्य पूर्ववृत्तित्वघटितत्वात् अतोऽव्याप्तिरित्यर्थः। उक्तयोः कर्मत्वलक्षणयोरतिव्याप्तिंचाह॥ ब्रह्मणोपीति॥ चरमवृत्तेर्ब्रह्माकारतया तां प्रति ब्रह्मणः कारकत्वात् चरमवृत्तेश्चित्प्रतिफलनाभावे वृत्तेर्मूलाज्ञाननिवर्तकत्वायोगात् तदन्यथानुपपत्त्या घटाकारवृत्तिवत् चित्प्रतिफलनयुक्तताया अवश्यं वाच्यत्वे न ब्रह्माकारवृत्तिप्रतिफलितचैतन्यं प्रति ब्रह्मणोपि कर्मत्वात्। सकलसामर्थ्यविधुरस्य कारकत्वं नास्तीत्येतच्च निराकरिष्यत इति हृदयं। तादृशचैतन्यजन्यावरणाभिभवरूपातिशययोगित्वात् ब्रह्मण्यतिव्याप्तिरित्यर्थः। विषयत्वातिरिक्तं कर्मत्वं निरस्य ज्ञानजन्यव्यवहारयोग्यत्वरूपं विषयत्वमेव कर्मत्वं घटादावित्याह॥ किंत्विति॥ तज्ज्ञप्तिःघटज्ञप्तिः। इत्येव

गौरोहमिति॥ अहमर्थनिष्ठस्य ज्ञातृत्वस्य गौररूपवति देहे कल्पितत्वादितिभावः। नन्वत्राहमर्थ एव ज्ञातृत्वं प्रतीयते न देह इति चेन्न। गौरोहमिति गौरत्वाहंत्वयोः सामानाधिकरण्यप्रतीत्या शरीराहमर्थयोरभेदप्रतीतेरितिभावः। देहादौ पक्षीभूते तथाच भागासिद्धिरितिभावः॥ धर्मीति॥ तथाच नासिद्धिः। देहे प्रतीयमानस्य ज्ञातृत्वस्य कल्पिततया प्रातिभासिकत्वेन व्यावहारिकधर्मिभूत देहसमसत्ताकत्वाभावादितिभावः॥ तादृशज्ञातृत्ववतीति॥ व्यावहारिकधर्मिभूतांतः करणसमसत्ताकज्ञातृत्व वतीत्यर्थः। एवंच भागासिद्धिरितिभावः॥ तादृशेति॥ पारमार्थिकधर्मिभूतशुद्धब्रह्मसमसत्ताकज्ञातृत्वाभावस्य शुद्धे सत्त्वाव्यभिचार इति भावः।

ननु वृत्तिज्ञानेन भागासिद्धिः। अज्ञानत्वादित्यस्याज्ञप्तित्वादित्यर्थो विवक्षितः। वृत्तिरूपं ज्ञानं च न भावव्युत्पत्त्या ज्ञानशब्दवाच्यं किंतु ज्ञायतेऽनया चैतन्यमिति करणव्युत्पत्त्यैव। भावव्युत्पत्त्या तद्वाच्यंतु वृत्तिप्रतिबिंबितचैतन्यमेवेत्यतो न दोष इत्याशंक्य दूषयति॥ यदिचेति॥ यदिच वृत्तिरज्ञप्तिरित्यन्वयः। तत्र विवरणसंमतिमाह॥ सांख्येति॥ सांख्या वेदांतिनश्चसांख्यवेदांतिनस्तेषां। सांख्यरूपा वेदांतिन इत्यर्थ इत्यप्याहुः। मत इति शेषः। बुद्धेरंतःकरणस्य वृत्तिः करणव्युत्पत्त्या ज्ञानमित्यन्वयः। अज्ञप्तित्वमपि वृत्तिरूपे ज्ञाने नास्तीत्यसिद्धिरेवेत्याह॥ तर्हीति॥ अपरोक्षवृत्तौ चैतन्यप्रतिबिंबितत्वनियमात्तस्य चज्ञप्तित्वात्ततोऽज्ञाननिवृत्त्यादिकं भविष्यतीत्यत उक्तं परोक्षवृत्त्येति। परोक्षवृत्तौ चैतन्यप्रतिफलन नियमादेस्त्वन्मतेऽभावादज्ञाननिवृत्त्यादेर्ज्ञप्तिकार्यस्य ततोपि दर्शनात्परोक्ष वृत्तेरपिज्ञप्तित्वमवश्यमभ्युपेय मतोऽसिद्धिरित्यर्थः। कुत इत्यत आह। तासामिति॥ स्मृतेः संस्कारद्वारा ज्ञप्तिकार्यत्वं द्रष्टव्यं। तथाच ज्ञाप्तिभिन्नात् ज्ञप्तिकार्यं न दृष्टमितिभावः॥ जानामीति॥ ज्ञा अवबोधन इति धातोः धर्मादिज्ञप्तिमानित्यनुव्यवसायरूपानुभव इत्यर्थः। ज्ञाधात्वर्थभूतज्ञप्तिविषयत्वं धर्मादौ प्रतीयते। तथाच ज्ञप्तित्वरहितायां परोक्षरूपायां धर्मादिवृत्तौ ज्ञप्तित्वमवगाहमानोनुभवः प्रमा न स्यादित्यर्थः। घटादिकं जानामीत्यनुभवः प्रमा न स्यादित्यापादनं तु न शक्यं। ज्ञप्तित्वरहितायां अपरोक्षरूपायां घटादिवृत्तौ ज्ञप्तित्वमवगाहमानानुभवस्य प्रमात्वं भविष्यति अपरोक्षवृत्तेरज्ञप्तित्वेपि चैतन्यरूपज्ञप्तिप्रतिबिंबनसद्भावादतो धर्मादिकमित्युक्तं॥ किंचात्मनीति॥ त्वदभिप्रेते आत्मरूपे ज्ञाने ज्ञानत्वाभावस्यापाद्यमानत्वेन तत्राज्ञानत्वरूपहेतोः सत्त्वाद्व्यभिचार इत्यर्थः। ज्ञानत्वव्यापकानां सविषयत्वज्ञातृसाहित्यप्रमाऽप्रमान्य तरत्वादीनामभावान्नात्मनो ज्ञानत्वमिति ज्ञानत्वाभावं वक्तुं ज्ञानत्वव्यापकसविषयत्वाभावं तावदुपपादयति॥ तथाहीति॥ आत्मरूपज्ञानं चैतन्यरूपा ज्ञप्तिरित्यर्थः॥ स्ववृत्तिविरोधेनेति॥ तथाहि। लोके क्रिया द्विविधा दृष्टा सकर्मका अकर्मकाचेति। तत्राकर्मका क्रिया कर्त्राश्रितैव दृष्टा। यथाशयनासनादिक्रिया देवदत्ताश्रितैव। सकर्मका च क्रिया द्विविधा। काचन कर्त्राश्रिता यथाभोजनगमनादिक्रिया देवदत्ताश्रिता काचन कर्माश्रिता यथा छिदाछेद्यरूपकर्माश्रिता। तदिह ज्ञानरूपाच क्रिया सकर्मकेति कर्माश्रिता कर्त्राश्रितावा वाच्या तदत्र चैतन्यस्वरूपभूतज्ञानरूपक्रियां प्रति ब्रह्मण एव विषयत्वांगीकारे तस्यैव कर्तृत्वात्तस्यैवच कर्मत्वात्कर्तृकर्मक्रियाणां सर्वासामप्येकत्वात्क्रियायाःक र्मीभूतायां स्वस्यामेव वृत्तिः प्राप्ता। इदं च विरुद्धं। नहि छिदा छिदायां वर्तते। शयनं वा शयने। एवं च स्ववृत्तिविरोधेन ब्रह्मस्वरूपज्ञप्तेः स्वविषयत्वं परैर्नांगीकृतमिति संप्रदायः। ननु स्यादयं स्ववृत्तिविरोधः। यद्यात्मनः कर्मत्वं स्यात् न चैतदस्ति

न्यायमतेऽपि कार्यतानवच्छेदकत्वेन गुणजन्यत्वविरहेण प्रमात्वविरहस्य वक्तुमशक्यत्वात्। विशेष्यावृत्त्यप्रकारकत्व-भ्रमभिन्नज्ञानत्वादिरूपप्रमात्वस्येश्वर निर्विकल्पकज्ञानयोः सम्भवाच्च। अत एवोक्तमुदयनेन ''प्रमाश्रयत्वेनेश्वरः प्रमाणमि'' ति।

यच्च जन्यसविकल्पकत्वेनेत्यादि, तन्न। तादृशनियमस्यास्माभिरनङ्गीकरणात्। तथाच मूलोक्तज्ञानत्वा भावापादनं साध्विति।

ज्ञानत्वं वेति॥ ननु ज्ञानत्वमेवात्मत्वम्, तद्भिन्नत्वं हेतुः। नच – ज्ञानपदवाच्यभिन्नत्वविवक्षायामुपाधेरपि ज्ञानपदवाच्यत्वात् तत्रासिद्धिः, ज्ञानपदलक्ष्यभिन्नत्वविवक्षायान्तु घटादेरपि ज्ञानपदलक्ष्यत्वात् तत्राप्यसिद्धिरिति वाच्यम्। ज्ञानपदजन्य प्रतीति विशेष्यभिन्नत्वस्य विवक्षायामुक्तदोषाभावात्। एव – मानन्दभिन्नत्वरूपमनात्मत्वमुपाद्यमिति – चेत्, मैवं भाषिष्ठाः। लक्षणया ज्ञानपदजन्यप्रतीतिविशेष्यत्वस्य घटादावपि सत्त्वेनासिद्धयपरिहारात्। 'वचनवृत्त्ये'ति विवक्षायामात्मन्यपि तादृशप्रतीतिविशेष्यत्वाभावेन व्यभिचारापत्तेरित्येवमानन्दभिन्नत्वरूपमनात्मत्वमप्युक्तदोषदुष्टम्, इति यत्किञ्चिदिति॥ जन्मादिमतीति॥ नच आनन्दस्यानात्मत्वे जन्मादिमत्त्वं न हेतुः। आनन्दोपाधिमात्रस्यैवोत्पत्ति विनाशप्रतियोगित्वेनानन्दस्य जन्मादिमत्वाभावादसिद्धो हेतुरिति – वाच्यम्; उपाध्यनुसन्धानाभावेऽप्यानन्दस्यैवोत्पत्ति विनाशप्रतियोगित्वस्य सर्वानुभवसिद्धत्वादिति॥

यच्च – धर्मिसमसत्ताकज्ञानभिन्नत्वं हेतुः, तेन ब्रह्मणि न व्यभिचारः इत्युक्तम्, तन्न। दृष्टान्ते साधनवैकल्यापत्तेरिति। ननु आनन्दे स्वरूपतस्तारतम्याभावेऽपि क्वचिद् अल्प आनन्दः, क्वचिद् बहुः, इति तारतम्यानुभवस्त्वभिव्यक्तिमात्रेण भविष्यतीत्यत आह – अखण्ड इति॥ ननु दुःखाभावतारतम्येनैव सुखतारतम्यव्यवहार इत्यत आह – विरोधिनो दुःखस्येति। अनानन्दत्वस्येति॥ पञ्चमप्रकाराविद्यानिवृत्तौ तुच्छे च व्यभिचारश्चेत्यपि बोध्यम्। नच – अज्ञानकालवृत्तित्वे सतीति विशेषणं देयमिति वाच्यम्। पञ्चमप्रकाराविद्यानिवृत्तेरज्ञानकार्यत्वेन तत्राज्ञानकालवृत्तित्वस्यावश्यकत्वात् साध्यावैशिष्ट्यादिति। नच – ज्ञानत्वेन ज्ञाननिवर्त्यत्वरूपसाध्यपक्षे न साध्यावैशिष्ट्यमिति – वाच्यम्। साध्यावैशिष्ट्यशब्देन सन्दिग्धासिद्धत्वस्योक्तत्वात्। इति जडत्वहेतुभङ्गः

न्यायामृतप्रकाशः

परेति॥ मायावाद्यपेक्षया परेषां तत्त्ववादिनामस्माकं यदभिप्रेतं तद्धेत्यर्थः॥ अहमर्थस्यैवेति॥ तथाच भागासिद्धिरितिभावः॥ शुद्धेति॥ तथाचात्मनि व्यभिचार इतिभावः॥ शुद्धेपीति॥ तथाच हेतोरेवाभावान्नव्यभिचार इति भावः॥ अपरिहारादिति॥ अज्ञातृत्वरूपो यो हेतुस्तदभावस्य कल्पितत्वमुक्तं स्यात्। तथाच न व्यभिचारपरिहारः। अन्यथा पर्वतो धूमवान्वह्नेरित्यत्रापि अयोगोलके कल्पितस्य वह्नयभावस्य सत्त्वाद्व्यभिचारित्वं न स्यादितिभावः। ननु कल्पितत्वं नाभावविशेषणं किंनामाभावप्रतियोगिनो ज्ञातृत्वस्यैव। एवंच ब्रह्मणि कल्पितज्ञातृत्वसद्भावेन तदभावाभावान्नव्यभिचार इति शंकते॥ कल्पितस्येति॥

परमेति॥ तथाच मोक्षस्य पुरुषार्थत्वं न स्यादिति भावः। न च तदाऽऽनन्दस्य प्रकाशाभावेऽप्यानन्दस्य प्रकाशस्वरूपत्वाद् मोक्षस्य पुरुषार्थत्वमिति वाच्यम्; कामनया हि पुरुषार्थत्वम्। सा च सुखी स्यामिति, नतु सुखं स्यामिति। सुखित्वं च सुखानुभववत्त्वम्। तथाच मोक्षावस्थायामात्मरूपज्ञानस्य निर्विषयत्वे आनन्दाप्रकाशादपुरुषार्थत्वमिति। घटादेरपीति॥ औपाधिकार्थप्रकाशत्वस्य घटादावपि वक्तुं शक्यत्वादिति भावः। अर्थप्रकाशेति। स्वाभाविकार्थप्रकाशात्मकत्वं विनेत्यर्थः।

ज्ञातृ-ज्ञेयनिरूप्यत्वस्वभावत्वाच्चेति। ननु किमिदं सज्ञेयत्वम्। ज्ञेयजन्यत्वं वा? ज्ञेयव्याप्यत्वं वा? नाद्यः; परोक्षज्ञाने ईश्वरज्ञाने चाभावात्, नाप्यपरः; व्याप्तिः कालिकी? "दैशिकी वा? नाद्यः। यदा ज्ञानम्, तदाऽर्थ इति कालिकव्याप्तौ पूर्ववद् व्यभिचारात्। न द्वितीयः; असम्भवात्। नच – यदाऽपरोक्षज्ञानम्, तदाऽर्थ इति कालिकव्याप्तौ नास्ति व्यभिचार इति – वाच्यम्; ईश्वर–योगिज्ञाने व्यभिचारात्। यदैन्द्रियकं ज्ञानम्, तदाऽर्थ इति तु व्याप्तिः सर्वसम्मता। नचात्मरूपज्ञानमैन्द्रियकम्, इति कथं सज्ञेयत्वं स्वाभाविकम्? एवं सज्ञातृत्वमपि – किं ज्ञातृजन्यत्वं वा? ज्ञातृव्याप्यत्वं वा? नाद्यः; ईश्वरज्ञाने व्यभिचारात्। न द्वितीयः; अप्रयोजकत्वादिति – चेत् न; अस्तु सज्ञेयत्वं ज्ञेयव्याप्यत्वम्, तद्धि यत्किञ्चित्स्वविषयव्याप्यत्वम्। व्याप्तिश्च कालिकी विवक्षिता। नचातीततुच्छादिज्ञानादौ व्यभिचारः; तत्राप्यतीतत्वासत्त्वरूपविषयसत्त्वसम्भवात्। नच यावद्विषयव्याप्तिर्विवक्षिता। किन्तु यत्किञ्चिद्विषयव्याप्तिः। तथाच विशेषण-विशेष्यकालान्यतरसत्त्वमात्रेण व्यभिचारवारणसम्भवात् सज्ञातृत्वं स्वज्ञातृव्याप्यत्वमेव। नचोभयत्राप्रयोजकत्वम्; निरुपाधिकसहचारभङ्गरूपतर्कस्य विद्यमानत्वात्। वस्तुतस्तु – सज्ञातृत्वं सज्ञेयत्वं च ज्ञातृ-ज्ञेयनिरूप्यत्वम्। तद्धि केनचिद् ज्ञेय-ज्ञातृविशिष्टतयाऽनुभूयमानत्वम्। तद्धि ज्ञानस्य स्वभाव एव। 'अस्यात्र ज्ञानमि'ति व्यवहारात्। तथाच ज्ञातृ-ज्ञेयनिरूप्यत्वस्य ज्ञानस्वभावत्वे मोक्षावस्थायां तदभावे ज्ञानत्वाभाव इति साधूक्तम् – ज्ञातृ-ज्ञेयविहीनं ज्ञानं न सिद्ध्यतीति। एतेन – 'अस्ति ब्रह्मे' त्यादौ साधुत्वार्थो लकार इति – प्रत्युक्तम्। सत्तायाः कर्तृनिरूप्यत्वसम्भवात्। यत्तु ज्ञानस्य सज्ञेयत्वं नाम ज्ञेयानुपरक्तबुद्ध्यविषयत्वम्, सज्ञातृत्वं च ज्ञात्रनुपरक्तबुद्ध्यविषयत्वम् – इति, तन्न। ज्ञानपदजन्यबोधस्य ज्ञात्रनुपरक्तबुद्ध्यविषयत्वज्ञेयानुपरक्तबुद्ध्यविषयत्वयोरभावेन सज्ञेयत्वा नापत्तेरिति।

किञ्चात्मा ज्ञानं चेदिति॥ ननु तार्किकसिद्धेश्वरज्ञानवद् घटादिनिर्विकल्पकवच्च स्वभावत उभयवैलक्षण्येनाप्युपपत्तिः। तत्रापीश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य भ्रमत्वे दोषजन्यत्वस्य चापत्तेः। निष्प्रकारके च निर्विकल्पके तद्वति तत्प्रकारकत्वस्य तदभाववति तत्प्रकारकत्वस्य चानुपपत्तेः। जन्यसविकल्पकत्वेन भ्रम-प्रमान्यतरत्वनियमे चास्माकं क्षत्यभावात्। विलक्षणवृत्तिद्वयोपरागेण च स्वभावतो भ्रम-प्रमाविलक्षणस्याप्यात्मज्ञानस्य तदुभयरूपेण व्यवहारोपपत्तेरिति – चेत्, मैवम्। दृष्टान्तदार्ष्टान्तिक योर्महद्वैषम्यात्। तथाहि – तार्किकमते प्रामाण्यस्य परतस्त्वेन प्रमाया गुणजन्यत्वनियमात्, ईश्वरज्ञानस्य गुणाजन्यत्वेन प्रमात्वासम्भवेऽप्यावयोर्मते प्रामाण्यस्य स्वतस्त्वेनाऽत्मरूपज्ञानस्य गुणाजन्यत्वेऽपि प्रमात्वोपपत्तेः। निर्विकल्पकस्य च स्वरूपेणानङ्गीकारात्। किञ्च प्रमामात्रेऽनुगतकारणाभावेन प्रमात्वस्य

द्रव्यत्वादित्यत्रापि व्यभिचारपरिहारसम्भवादिति भावः। गौरोऽहमिति॥ तथाच भागासिद्धिरिति भावः। यदि चेति॥ सांख्यानां करणव्युत्पत्त्या बुद्धिर्ज्ञानम्, वेदान्तिनां ज्ञायतेऽनेनेति व्युत्पत्त्या वृत्तिर्ज्ञानमित्यन्वयः। ननु आत्मनि कथं व्यभिचारः? तस्य "सत्यं ज्ञानमि"ति श्रुत्या ज्ञानरूपत्वादित्यत आह – तथाहीति॥ स्ववृत्तीति॥ क्रियायाः स्वविषयत्वादर्शनेनात्मरूपज्ञानस्य स्वविषयत्वासम्भवादस्वीकार इत्यर्थः। घटादावपीति॥ घटादौ ज्ञप्तिकर्मत्वज्ञप्तिविषयत्वयोरेकत्वेन ब्रह्मणि ज्ञप्तिकर्मत्वमनभ्युपेत्य ज्ञप्तिविषयत्वाङ्गीकारो विरुद्ध इत्याशयः। कर्म-विषयत्वयोर्भेदमाशङ्क्य परिहरति – नहीत्यादि॥

॥ किन्त्विति॥ यद्यप्यत्र 'ज्ञातैकसती'त्यादिनोक्तदोषतादवस्थ्यम्; तथापि प्रतिबिम्बितचैतन्यस्य ज्ञप्तित्वे तस्याध्यासानधिष्ठानत्वेनाध्यासिकसम्बन्धस्यातन्त्रत्वापत्त्या तत्परिहारेण वृत्त्यभिव्यक्ताधिष्ठानचैतन्यमेव ज्ञप्तिरित्युक्तमिति मन्तव्यम्।

यत्तु – पूर्वं स्वकर्मत्वाभावमङ्गीकृत्य व्यवहारजननयोग्यत्वरूपतदङ्गीकारे विरोध इत्यर्थः – इति, तन्न। कारकत्वरूपकर्मत्वाभावमङ्गीकृत्य व्यवहारजननयोग्यत्वरूपकर्मत्वाङ्गीकारेण विरोधाभावात्। कारकत्वरूपमेव यदि कर्मत्वं पुनरङ्गीक्रियेत, तदा हि विरोधावकाश इति। तां च प्रतीति॥ यद्यपि चैतन्यरूपज्ञप्तिं प्रति कारणत्वं न सम्भवति। तस्या नित्यत्वात्। नापि तज्जन्यावरणाभिभवातिशययोगित्वम्। तस्य वृत्तिसाध्यत्वात्। तथापि चैतन्यप्रतिफलनोपाधौ वृत्तौ तदुभयसत्त्वेन तत्प्रतिफलितचैतन्ये तदुपचारेण तथोक्तमिति भावः॥ ब्रह्मणोऽपीति॥ नच इष्टापत्तिरिति वाच्यम्। त्वया चरमवृत्तेरकर्मत्वाङ्गीकारेणापसिद्धान्तात्। नच कारकत्वरूपकर्मत्वाभावेऽङ्गीकृत उक्तरूपकर्मत्वमङ्गीकृतमेव इति कथमपसिद्धान्तः? इति वाच्यम्। तस्य निर्विशेषत्वेनावरणाभिभवरूपातिशयवत्त्वस्याङ्गीकर्तुमनुचितत्वेनाप सिद्धान्तस्य वज्रलेपत्वात्। मोक्षे पराभावादिति॥ आत्मातिरिक्तपराभावादित्यर्थः। पराभावेऽपि परविषयत्वं किं न स्यादिति? अत आह – बहिरासीदिति॥ अन्त्यपक्षं निराकरोति – निर्विषयत्व इति॥ एवं च ब्रह्म, न ज्ञानम्, निर्विषयत्वादिति फलितानुमानेऽतीतादिज्ञाने व्यभिचारं परिहरति – तद्धीति॥ सविषयकत्वादेरिति॥ अत्र कश्चित्। ज्ञानस्य सविषयत्वं हि विषयसम्बन्धः। स च न तात्त्विकः। किन्त्वाध्यासिकः। तात्त्विकसम्बन्धस्य निरूपयितुमशक्यत्वात्। अतो न तस्य स्वाभाविकत्वम्। न हि शुक्तौ रूप्यं स्वाभाविकम्। अत एव ज्ञानौपाधिकमेव सविषयत्वमिच्छादिषु इति तत्रापि न स्वाभाविकम् इत्याह। तन्न। सविषयत्वं हि विषयोल्लेखित्वम्, न तु विषयाध्यासाधिष्ठानत्वम्। तथात्वे चरमवृत्तेः सविषयत्वं न स्यात्। चरमवृत्तौ चैतन्यारोपाधिष्ठानत्वाभावात्। दृश्यत्वादीनामसिद्धिश्च स्यात्। अध्यासरूपसविषयत्वासिद्धेः। तस्माद् अध्यासातिरिक्तं स्वभावविशेषरूपं सविषयत्वमङ्गीकर्तव्यम्, इति कथं न सविषयत्वं स्वाभाविकम्? एतेन – इच्छादिष्वपि स्वाभाविकमेव सविषयत्वम्, न ज्ञानोपाधिकम्। उपाध्यननुसन्धाने ज्ञानवदेव सविषयत्वस्य प्रतीतेः। किंचैवं वस्तुतो निर्विषयत्वेऽपीच्छायाः सविषयकज्ञानजन्यत्वेन सविषयत्वे ज्ञानस्यापि वस्तुतो निर्विषयकत्वेऽपि सविषयकेच्छांजन्यत्वेन सविषयत्वोपपत्तौ स्वाभाविकं तन्न स्यादिति।

'अहं सुखी' इत्यनुभवबलेन स्वरूपानन्दातिरिक्तं वैषयिकं सुखमप्यङ्गीकार्यम्। अन्तःकरणवृत्तिरूपसुखाभावेअन्तःकरणवृत्तिरूपसुखानङ्गीकारे॥ अहं सुखीत्यनुभवायोगादिति॥ स्वस्मिन् स्ववत्तायां बाधितत्वादित्यर्थः। तथाच वैषयिकानन्दे हेतोरसिद्धिरिति भावः॥ अनानन्दत्वस्येति॥ आनन्दभिन्नत्वस्येत्यर्थः॥ आत्मनीति॥ अहंकारवृत्त्यहंत्वस्याभाव आत्मन्यस्ति इति तत्र व्यभिचार इत्यर्थः॥ उक्तादन्यस्येति॥ आत्मत्वानन्दत्वाहंत्वादेः सकाशादन्यस्य प्रत्यक्त्वस्याभावादित्यर्थः॥ निरसिष्यमाणत्वादिति॥ देशकालादावसिद्धत्वेति शेषः॥ अवाच्य इति॥ आत्मशब्दवाच्यत्वाभावोऽनात्मत्वमात्मन्यप्यस्तीत्यर्थः। ननु देहादिविशिष्टस्यैवात्मशब्दवाच्यता, देहमात्रे तु लक्षणयाऽपि प्रयोगसम्भवः। तथाचात्मपद जन्यप्रतीतिविशेष्यभिन्नत्वस्यानात्मत्वस्य विवक्षितत्वात् तस्य च देहादावपि सत्त्वात् नासिद्धिरिति – चेत्, तथापि लाक्षणिकस्याप्यनुभावकत्वात् लक्षणयाऽऽत्मपदजन्यप्रतीतिविशेष्ये देहादावसिद्धितादवस्थ्यात्॥ इन्द्रियादाविति॥ लक्षणयेन्द्रियादिष्वात्मशब्दप्रयोगसम्भवादित्यर्थः। किंचात्मभिन्नत्वादेः काल्पनिकस्य ब्रह्मण्यपि सत्त्वाद् व्यभिचारः, तात्त्विकभेदस्य चाप्रसिद्धिः। नच धर्मिसमसत्ताकतद्भेदो हेतुरिति वाच्यम्। रूप्ये साधनवैकल्यात्। तत्रात्मभेदस्य व्यावहारिकत्वादिति॥ मयेति॥ ज्ञातृत्वाभाव आत्मनि व्यभिचारी, अहमर्थेऽसिद्धश्चेति भावः। अनात्मत्वपक्षदूषणमुपसंहरति – तस्मादिति॥ मयाऽज्ञातृत्वमिति॥ तथाचात्मनि व्यभिचारः, अहमर्थेऽसिद्धिश्चेति भावः। किं चाज्ञानत्वादीनां चतुर्णां तुच्छे पञ्चमप्रकाराविद्यानिवृत्तौ च व्यभिचारः। न च – अज्ञानकालवृत्तित्वं हेतुविशेषणं, अतो नोक्तो व्यभिचार इति वाच्यम्। प्रत्येकमुक्तिपक्षेऽस्याप्यविद्यानिवृत्तौ सत्त्वात्। युगपत् सर्वमुक्तेश्च वामदेवादिमुक्तिप्रतिपादकागमविरोधेनाप्रामाणिकत्वस्य परैरपि कैश्चिदभिहितत्वात्, मिथ्यात्वं प्रत्यप्रयोजकत्वाच्चेति सर्वं मनोहरम्॥

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां जडताभङ्ग ईक्ष्यताम्॥
। इति जडत्वहेतुभङ्गः।

न्यायामृतकण्टकोद्धारः

अथ जडत्वहेतुं खण्डयितुं विकल्पयति– जडत्वमिति॥ त्वन्मत इति॥ परेण कर्तृत्वादि धर्माणामहंकारनिष्ठानामात्मन्यध्यस्तत्वाङ्गीकारात्, यथा जपाकुसुमगतं लौहित्यं स्फटिके प्रतिभासते तद्वदिति भावः। शुद्ध इति॥ तथाच तत्र व्यभिचार इति भावः। व्यभिचारापरिहारादिति॥ पर्वतो वह्निमान्

तस्याप्युभयबहिर्भावः। तस्मादीश्वरज्ञानबत् निर्विकल्पकवद् आत्मरूपज्ञानमप्युभय बहिर्भूतमेवेत्युक्तिरेव प्रमाणबहिर्भूता इति साधूक्तम् – ''स्वभावतो रूपद्वयहीनश्चेत् स्वभावतो ज्ञानमेव न स्यात्'' इति॥

॥ निरस्तत्वादिति॥ अस्वप्रकाशत्वं दृश्यत्वमित्यत्रेति शेषः॥ आत्मन एकत्वादिति॥ तथाचात्मत्वरूपजातिशून्यत्वादित्यस्य हेतोरात्मनि व्यभिचार इत्यर्थः॥ विशिष्टात्मनामिति॥ तथाच विशिष्टात्मनि निरुक्तहेतुरसिद्ध इति भावः॥ नापि ज्ञातृत्वं चेति॥ आद्यस्याहमर्थेऽसिद्धिः, द्वितीयस्य वृत्तिज्ञाने, तृतीयस्य घटादावविद्यादावसिद्धिः, शुक्तिरूप्ये साधनवैकल्यं चेत्यादिना निरस्तत्वादित्यर्थः॥ जन्मादिमतीति॥ जन्मादिमत्त्वमनात्मत्वं च वैषयिकानन्दस्य पक्षत्वोपपादनाय। ननु नात्मस्वरूपातिरिक्तो वैषयिकानन्दोऽस्ति। ''विषयसम्बन्धेनाप्यात्म स्वरूपानन्द एवाभिव्यज्यते'' इति विवरणोक्तेः इत्यत आह – तस्यापीति॥ तथाच वैषयिकानन्दस्य विपक्षत्वात् तत्र हेत्वसिद्धिर्न दोष इति भावः॥ नीरपानजादिति॥ तथाच तारतम्यवत्त्वाद् वैषयिकानन्दस्य शब्दादिवत् नात्मरूपतेति भावः। ननु वैषयिकानन्दे तारतम्यमसिद्धमित्याशङ्क्यानुभवेन श्रुत्या युक्त्या च सिद्धमित्युक्तम्। आनन्दतारतम्यश्रुतिरपि परमते वैषयिकानन्दपरेति श्रुतिग्रहणम्। अग्निहोत्र-वाजपेयजन्यसुखम्, तारतम्यवत्, उत्कृष्टापकृष्टसाधनजन्यत्वात्; तादृशपाकजरूपवत्, अन्यथा बह्वायाससाध्ये वाजपेयादौ फलभूमानं विनाऽननुष्ठानमापद्येत। तदुक्तमर्थवादपादे वार्तिककृता–

''कर्मणामल्प-महतां फलानां च स्वगोचरे।
प्रवृत्तिस्थानसामान्यादविशेषेऽपि चोदिते॥'' इति।

ननु नानन्दे तारतम्यं किंत्वभिव्यक्तितारतम्यमेवानन्द उपचर्यते। उक्तानुभवादिकमपि तदभिव्यक्तितारतम्येनान्यथासिद्धम् इत्यत आह अखण्ड इति॥ अखण्डैकरसेऽभिव्यक्त्यनभिव्यक्त्योरयोगात्। तथात्वे सखण्डत्वापत्तिरित्यर्थः। ननु नानन्दे स्वरूपकृतं वा तदभिव्यक्तिकृतं वा तारतम्यम् किंतु विरोधिनो दुःखस्याल्पत्व उत्कृष्टानन्दः, तस्याल्पतरत्व उत्कृष्टतर आनन्दः तस्याल्पतमत्व उत्कृष्टतम आनन्दः इति स्वरूपानन्देऽपि तारतम्यं विरोधिदुःखनिबन्धनं युज्यत इत्यत आह – विरोधिन इति॥ विरोधिनो दुःखस्य सर्वात्मना निवृत्तावप्यानन्दे तारतम्यानुभवात् स्वरूपानन्दे च तदयोगात् तदतिरिक्तो वैषयिकानन्दोऽस्तीति वक्तव्यम्। तथाच तत्रानानन्दत्वहेतुरसिद्ध इत्यर्थः। वैषयिकानन्दस्य स्वरूपानन्दाद् भेदेनानुभूयमानत्वादपि तदतिरिक्तो वैषयिकानन्दोऽस्तीति वक्तव्यमित्याह – अन्तःकरणेति॥ यथा स्वरूपज्ञानातिरिक्तमन्तःकरणवृत्तिरूपं ज्ञानं 'जानामि' इत्यनुभवविषयोऽङ्गीक्रियते, तथा

ऐक्यस्य ब्रह्ममात्रत्वेन जीवाजन्यत्वात्। न द्वितीयः ; यदैक्यं तदा जीव इति कालिकव्याप्तेः सर्वमुक्तौ व्यभिचारात्। यत्रैक्यं, तत्र जीव इति दैशिकव्याप्तेर्जीव एव व्यभिचारात्। तथाच ब्रह्मणि विद्यमानमैक्यं न जीवप्रतियोगिकम् इति साधु समर्थितो जीवब्रह्माद्वैतवादः। एवं सज्ञातृत्वमपि ज्ञात्रनुपरक्तबुद्धिविषयत्वं वा, ज्ञात्रनुपरक्तापरोक्षाविषयत्वं वा इति न कश्चिद् दोषः। न च 'अस्ति ब्रह्म' इत्यत्र लकारस्य साधुत्वार्थकत्वम्। योग-क्षेमसाधारण क्रियासिद्धिं प्रति स्वातन्त्र्यरूपकर्तृत्वस्य तत्रापि सत्त्वेनार्थसाधुत्वसम्भवे शब्दसाधुत्वस्या नादरणीयत्वात्। तस्मात् साधूक्तम् – "ज्ञानस्य ज्ञातृ-ज्ञेयनिरूप्यस्वभावत्वात्" इति॥

ज्ञानविशेषाभ्यां बहिर्भूतत्वादपि नात्मा ज्ञानमित्याह – किं चात्मेति॥ तद्वेद्यस्येति॥ प्रमायाः सदर्थकत्वनियमादित्यर्थः॥ दोषाजन्यत्वादिति॥ रूपप्रागभावकाले पृथिवीत्वलिङ्गक रूपानुमितिरयथार्थपरामर्शरूपदोषाजन्यापि पक्षतावच्छेदकावच्छेदेन साध्याभाववति लिङ्गज्ञान रूपदोषजन्यैव। विसंवादिशुकवाक्यजन्यज्ञानमयथार्थवक्तृवाक्यार्थज्ञानरूपदोषाजन्यमप्ययथार्थ योग्यताज्ञानरूपदोषजन्यम् इति न भ्रमस्य दोषजन्यत्वव्यभिचार इत्यर्थः॥ स्वभावतो रूपद्वयहीनश्चेदिति॥

अत्र वदन्ति – तार्किकेश्वरज्ञानवद् घटादिनिर्विकल्पकवच्च स्वभावत उभयवैलक्षण्येनाप्युपपत्तिः। तत्रापीश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य, भ्रमत्वे दोषजन्यत्वस्य चापत्तेः। निष्प्रकारके च निर्विकल्पके तद्वति तत्प्रकारकत्वस्य, तदभाववति तत्प्रकारकत्वस्य चानुपपत्तेः। जन्यसविकल्पकत्वेन भ्रम-प्रमाऽन्यतरत्वनियमे चास्माकं क्षत्यभावात्। विलक्षणवृत्तिद्वयोपरागेण स्वभावतो भ्रम-प्रमाविलक्षणस्याप्यात्मज्ञानस्य तदुभयरूपेण व्यवहारोपपत्तेः – इति। अत्र ब्रूमः। न तावत् तार्किकमते गुणजन्यतानवच्छेदकमपि प्रमात्वं गुणजन्यत्वप्रयुक्तं, येनेश्वरज्ञाने प्रमात्वप्रयोजकस्य गुणजन्यत्वस्याभावात् प्रमात्वं न स्यात्। किन्तु तत्तत्प्रमात्वमेव। अत एव – "प्रमामात्रे नानुगतो गुणः" इति मणिकृतोक्तम्। तथाच गुणाजन्यमपीश्वरज्ञानं दोषाजन्यत्वात् प्रमैव इति न तस्योभयबहिर्भावः। अत एव संवादिशुकवाक्यजन्यज्ञाने भगवद्यथार्थवाक्यार्थज्ञानस्य गुणत्वमुक्तं नैयायिकैः। अत एव च नित्यसाक्षात्कारिप्रमाया आश्रयत्वेनेश्वरः प्रत्यक्षप्रमाणमित्युक्तमुदयनाचार्यैः। अत एवेश्वरप्रमाया अनुगतत्वात् तद्विषयत्वरूपं प्रमेयत्वमनुगतमित्याहुर्मणिकृतः। तद्वति तत्प्रकारकज्ञानत्वेऽपि "ननु नेदं प्रामाण्यम् स्मृत्यामतिव्याप्तेः, निर्विकल्पकाव्याप्तेः" इत्याशङ्क्य, निष्कम्पप्रवृत्त्यौपयिकमिदं पारिभाषिकं प्रामाण्यं न तु मुख्यमिति समाहितं तार्किकैः। अतो निर्विकल्पकमपि यथार्थानुभवत्वादिमुख्यप्रमात्वलक्षणयोगात् प्रमैव, इति न

ज्ञात्राद्यनपेक्षाया दृष्टत्वाच्च इत्याशङ्क्य परिहरति – अतीतादीति॥ नोत्पत्त्यर्थं ज्ञात्राद्यपेक्षामाचक्ष्महे, किन्तु ज्ञाननिरूपणार्थम्। तच्चातीतादिज्ञान ईश्वरज्ञाने चास्ति इति न कोऽपि दोषः। ज्ञानस्य ज्ञेयादिनिरूप्यत्वेऽनुभवं प्रमाणयति – इदमहमिति॥ इदमिति ज्ञेयस्य 'अहम्' इति ज्ञातुरुल्लेखः॥ ज्ञातुरिति॥ ज्ञातुर्योऽर्थप्रकाशः तज्ज्ञानमित्यर्थः॥ संगृह्णाति – तथाचेति॥

अत्र वदन्ति – जातेर्व्यक्तिनिरूप्यत्वेऽपि कदाचित् तदसम्बन्धवत्तदुपपत्तिः ; सम्बन्ध्यप्रयोजकोपाध्यपेक्षयाऽधिकसत्ताकत्वात्। अत एव ज्ञानस्य सज्ञेयत्वं सज्ञातृत्वं च न स्वाभाविकम्। तथाहि – सज्ञेयत्वं तावद् ज्ञेयजन्यत्वं वा? ज्ञेयव्याप्यत्वं वा? नाद्यः ; परोक्षज्ञान ईश्वरज्ञाने चाभावात्। नापि द्वितीयः ; यदा ज्ञानं, तदाऽर्थ इति पूर्ववत् कालिकव्याप्तौ व्यभिचारात्। दैशिकव्याप्तिस्तु दूरनिरस्तैव। नच यदाऽपरोक्षज्ञानं, तदाऽर्थ इति कालिकव्याप्तौ नास्ति व्यभिचारः। आत्मा च ''यत् साक्षादपरोक्षाद् ब्रह्म'' इति श्रुतेरपरोक्षज्ञानरूपः, इति सोऽप्यर्थव्याप्त इति वाच्यम् ; अतीतादिज्ञान ईश्वरज्ञाने च व्यभिचारात्। यदैन्द्रियकं ज्ञानं तदाऽर्थ इति तु व्याप्तिः सर्वसम्मता। न चात्मरूपज्ञान ऐन्द्रियकत्वमस्ति इति न तया विरोधः। ननु यदाऽपरोक्षज्ञानं तदाऽर्थ इति व्याप्त्यनभ्युपगमे 'इदं रजतम्' इत्यपरोक्षज्ञानान्यथानुपपत्त्याऽनिर्वचनीयरजतसिद्धिर्न स्यात्। अर्थं विनाऽप्यपरोक्षत्वोपपत्तेरिति चेत्, न। 'इदं रजतमहं जानामि' इत्यनुसन्धीयमानं यद् ज्ञानविषयत्वम्, तस्याश्रयान्तरानुपपत्त्याऽनिर्वचनीयरजतसिद्धेर्वक्ष्यमाणत्वात्। अत एव परोक्षभ्रमेऽप्यनिर्वचनीयार्थसिद्धिः। जन्यापरोक्षत्वेन वाऽर्थव्याप्यता। आर्षज्ञानस्यापरोक्षता नभ्युपगमात्। तथाच नानिर्वचनीयरजतसिद्ध्यनुपपत्तिः। एवं सज्ञातृकत्वमपि किं ज्ञातृजन्यत्वं वा? ज्ञातृव्याप्यत्वं वा? ज्ञातृसमवेतत्वं वा? आद्य ईश्वरज्ञाने व्यभिचारः। ज्ञाननित्यत्वस्य साधयिष्यमाणत्वाच्च। द्वितीयेऽप्यप्रयोजकता। न तृतीयः। ज्ञात्रजन्यत्ववद् ज्ञात्रसमवेतत्वस्यापि सम्भवात्। ज्ञानस्य गुणत्वक्रियात्वयोरनभ्युपगमेन द्रव्याश्रयत्वानुमानायोगात्। 'अस्ति ब्रह्म' इति च लकारो न ब्रह्मणः कर्तृत्वमाह। नित्यत्वेन तदसम्भवात्, किन्तु साधुत्वार्थः – इति। अत्र ब्रूमः। व्यक्तिं विनाऽपि जातेः प्रलये सत्त्वेऽपि व्यक्त्युपरक्तबुद्धिविषयत्वं तदाऽप्यक्षतमेव। ईश्वरादिज्ञानस्यैव तदा तादृशत्वात्। सज्ञेयत्वमपि न ज्ञेयजन्यत्वव्याप्यत्वादि। किन्तु ज्ञेयोपरक्तबुद्धिविषयत्वादिकम्। ज्ञेयानुपरक्तापरोक्षाविषयत्वं वा, इति न कोऽपि दोषः। अन्यथाऽभावसादृश्यादेरपि सप्रतियोगिकत्व-ससम्बन्धिकत्वानुपपत्तिः। किं चैवमैक्यस्यापि जीवप्रतियोगिकत्वं न स्यात्। तद्धि जीवजन्यत्वं वा? जीवव्याप्यत्वं वा? नाद्यः ;

नहि शुक्तौ रूप्यं तात्त्विकम्। एवं च ज्ञानोपाधिकस्यैव सविषयत्वस्येच्छादिष्वभ्युपगमात् नतरां तस्य स्वाभाविकत्वम्। न च ज्ञानवद् विषयसम्बन्धं विनाऽपि कदाचिदिच्छायाः सत्त्वापत्तिरिति वाच्यम्। सविषयत्वप्रयोजकोपाध्यपेक्षयाऽधिकसत्ताकत्वस्य तत्र प्रयोजकत्वात्। इच्छायाश्च तत्समानसत्ताकत्वात्। एवं च सविषयकत्वस्वभावत्वं न ज्ञानत्वव्यापकम्। अतस्तन्निवृत्त्याऽऽत्मनि ज्ञानत्वनिवृत्तिर्न। इति नाज्ञानत्वस्य हेतोरात्मनि व्यभिचारः इति। अत्र ब्रूमः; यदि ज्ञानस्य विषयेणाध्यासिक एव सम्बन्धः, तर्हि चरमवृत्तौ नात्मा विषयः स्यात्। न च वृत्तिप्रतिबिम्बितचैतन्यरूपज्ञानस्य विषयेणाध्यासिकः सम्बन्ध इति वाच्यम्। चरमवृत्तावपि शुद्धात्मगोचराज्ञाननिवृत्त्यर्थं चित्प्रतिफलनस्यावश्यकत्वात्। वृत्तिमात्रस्य तत्राज्ञाननिवर्तकत्वे घटादावपि तथात्वापातेन तत्रापि चित्प्रतिफलनाभावापत्त्या घटादेर्वृत्ति व्याप्यत्वमेव स्यात्, न फलव्याप्यत्वम्। न चैवमात्मनोऽपि फलव्याप्यत्वापत्तौ मिथ्यात्वापत्तिरिति वाच्यम्। त्यज तर्हि मिथ्यात्वे फलव्याप्यत्वस्य हेतुत्वम्। परोक्षवृत्तेरतीन्द्रियार्थविषयकत्वं च न स्यात्। परोक्षवृत्तावतीन्द्रियस्याध्यासाभावात्। तस्मात् न ज्ञानस्याध्यासरूपः सम्बन्धः इति स्वाभाविकमेव ज्ञाने सविषयत्वम्। एवमिच्छायामपि स्वाभाविकमेव सविषयत्वम्। 'घटं जानामि' इतिवत् 'घटमिच्छामि' इत्यत्रोपाधिं विना सविषयत्वानुभवात्। तस्मात् साधूक्तम् – 'ज्ञाने सविषयत्वादेः स्वभावत्वदर्शनात्' इति॥

मोक्षे विषयानुल्लेखे ब्रह्मस्वरूपज्ञानस्वभावहान्यापत्त्या ज्ञानत्वाभावमुक्त्वा दोषान्तरमाह – परमपुरुषार्थ इति॥ त्वया मोक्षावस्थायामात्मनो निर्विषयत्वाङ्गीकारादानन्दाप्रकाशे तदपुमर्थत्वं स्यादित्यर्थः। नच तदाऽप्यानन्द एव प्रकाशः, न त्वानन्दस्य प्रकाश इति वाच्यम्। सुखरूपताया अपुरुषार्थत्वात्। प्रकाशमानसुखवत्ताया एव पुरुषार्थत्वात्। ननु अर्थोपलक्षित प्रकाशत्वं मोक्षेऽप्यस्त्येव, इति न ज्ञानत्वहानिरित्यत आह – अर्थप्रकाशत्वेति॥ मोक्षे ज्ञानोपलक्षणस्याप्यर्थस्य यदि प्रकाशोऽस्ति तदा तदुल्लेखरूपोपप्लवापत्तिः। यदि न प्रकाशः तदाऽर्थप्रकाशत्वरूपज्ञानस्वभावाभावाद् घटादिवद् ज्ञानत्वं न स्यादित्यर्थः। ननु नार्थप्रकाशात्मकत्वं ज्ञानस्वभावः। किन्तु जडव्यावृत्तिरेव। सा चास्ति मोक्षेऽप्यात्मनि, नतु घटादावित्यत आह – अर्थाप्रकाशात्मकेति॥ अर्थाप्रकाशात्मकं यज्जडं तस्माद् व्यावृत्तिरपि ज्ञानस्यार्थप्रकाशात्मकत्वरूपजडवैधर्म्यादेवेत्यर्थः।ज्ञेयाभावादात्मा न ज्ञानमित्युक्त्वा ज्ञात्रभावादपि स न ज्ञानमित्याह – एवमिति॥ ननु आत्मरूपस्य ज्ञानस्यानादित्वेनाक्रियात्वात् न ज्ञेय-ज्ञात्रपेक्षाऽस्तीत्याशङ्क्य निराकरोति – यदि चेति॥ ननु सादेरप्यतीतादिज्ञानस्य न स्वोत्पत्त्यर्थं ज्ञात्राद्यपेक्षा, किं पुनरनादेरात्मरूपज्ञानस्य तदनपेक्षेति वक्तव्यम्। अनादीश्वरज्ञाने

ब्रह्मरूपं ज्ञानं परविषयमिति द्वितीयपक्षं निराकरोति – न द्वितीय इति॥ मोक्ष इति॥ तथाच मोक्षकाले साक्षिणो निर्विषयत्वं स्यादित्यर्थः। मोक्षकालेऽपि साक्षिणोऽतीतविषयत्वं भविष्यतीत्याशङ्क्य, तत् किमतीतं साक्षान्मोक्षकाले साक्षिणो विषयः ? ज्ञानोपरागेण वा ? इत्याशङ्क्य, न द्वितीयः; असम्भवात्, इत्यभिप्रेत्य प्रथमपक्षं दूषयति – त्वन्मते चेति॥ वर्तमानस्येति॥ योग्यस्येति शेषः। अतीतसुखादेर्न साक्षात् साक्षिविषयत्वमिति भावः। साक्षिणोऽतीतविषयत्वे दूषणान्तरमाह – बहिरासीदिति॥ मोक्षे सुषुप्तौ च विद्यमाने साक्षिज्ञानेऽतीतविषयोल्लेखरूपः संसारः स्यात्। तथाच मोक्षसुषुप्त्योर्निष्प्रपञ्चता न स्यात्। अतो ज्ञानत्वव्यापकसविषयत्वरहितत्वात् न ज्ञानमात्मा, इति तत्राज्ञानत्वहेतोर्व्यभिचार इत्यर्थः। ननु न ज्ञानत्वस्य व्यापकं सविषयत्वं येन तद्व्यावृत्त्या ज्ञानत्वं व्यावर्तेत। किं तर्हि ? निर्विषयमप्यात्मस्वरूपं ज्ञानमस्ति, इति द्वितीयपक्षं दूषयति – निर्विषयत्व इति॥ अयमभिप्रायः – न ज्ञानत्वस्य व्यापकं सविषयत्वं नेति। 'इदं जानामि' इतिज्ञानानुभवेन विषयाङ्कितस्यैव ज्ञानस्य सिद्धेः सविषयत्वस्य ज्ञानत्वव्यापकत्वावधारणादात्मस्वरूपस्य निर्विषयत्वे ज्ञानत्वमेव न स्यादिति। यद्यपि ज्ञानत्वव्यापकसविषयत्वाभावोपादाननैवाज्ञानत्वमात्मनः सिद्ध्यति; तथापि यदि ज्ञानत्वव्यापकं सविषयत्वं न भवतीति परो वैयात्याद् वदेत्, तदा तं प्रति सविषयत्वस्य ज्ञानत्वव्यापकत्वोपपादनाय द्वितीयविकल्पोपन्यास इत्याशयः।

ननु आत्मा न ज्ञानम्, निर्विषयत्वात्, घटवत्, इत्यनुमाने त्वदभिप्रेते निर्विषयत्वं किमवर्तमानविषयत्वं वा? अत्यन्तासद्विषयत्वं वा? आद्येऽतीतज्ञाने व्यभिचारः। द्वितीये तु तुच्छज्ञाने व्यभिचारः, इत्याशङ्कां निराकुर्वन् हेतुस्वरूपमाह – तद्धीति॥ निर्विषयत्वहेतोः स्वरूपासिद्धिं शङ्कते – न चेति॥ अर्थोपलक्षितस्यैव ज्ञानत्वेन मोक्षदशायामपि तदनपायादित्यर्थः॥ सप्रतियोगिक इति॥ उक्तानुमाने हेतूकृतं निर्विषयत्वं सविषयत्वस्वभावशून्यत्वम्। तच्चात्मनि कदाचिद् विषयसम्बन्धेऽप्यस्ति, इति नासिद्धिरित्यभिप्रेत्य। ननु उक्तसाध्यहेत्वोर्व्यतिरेकसहचारग्रहस्थलाभावात् न व्याप्तिग्रहः, इत्याशङ्क्य व्यतिरेकसहचारग्रहस्थलमुक्तम् – घटादिज्ञान इति॥ ननु – तत्स्वरूपानन्तर्गतस्य विषयस्य कथं तत्स्वभावनिरूपकत्वम्? इत्याशङ्क्योक्तम् – सप्रतियोगिकेऽभावादौ सविषयके इच्छादाविति॥ एवं च यथाऽभावादौ सप्रतियोगिकत्वं स्वाभाविकम्, इच्छादौ घटादिज्ञाने च सविषयकत्वं स्वाभाविकम्, तथा ब्रह्मरूपज्ञानेऽपि सविषयकत्वं स्वाभाविकं वाच्यम्। तच्च न सम्भवति। मोक्ष आत्मरूपज्ञानस्य सविषयकत्वाभावादित्यर्थः॥

अत्र वदन्ति – ज्ञानस्य सविषयत्वं विषयसम्बन्धः। स च न तात्त्विकः, किं त्वाध्यासिकः। तात्त्विकसम्बन्धस्य निरूपयितुमशक्यत्वात्। अतो न तस्य स्वाभाविकत्वम्।

छिदिक्रिया छेद्ये, गतिक्रियाऽपि गम्ये केनापि सम्बन्धेन वर्तत एव। अकर्मकक्रिया तु कर्तरि – यथा शयनासनादिक्रिया देवदत्ते। तदत्र स्वरूपभूतज्ञानक्रियां प्रति ब्रह्म यदि विषयः स्यात्, तदा कर्मकर्त्रोरन्यतरत् स्यात्। ततश्च स्वरूपभूतज्ञानं ब्रह्मस्वरूपभूते ज्ञाने वर्तेत, तच्च विरुद्धम्। नहि छिदा छिदायां वर्तते, शयनं वा शयने। एवं स्ववृत्तिविराधेन ब्रह्मस्वरूपज्ञप्तेः स्वविषयत्वं परैर्नाङ्गीकृतमित्यर्थः। ननु ब्रह्मस्वरूपज्ञानं प्रति ब्रह्मणो विषयत्वेऽपि न ज्ञानं प्रति ब्रह्मणः कर्तृकर्मत्वान्यतरत्वापत्तिः। कर्तृकर्मत्वातिरिक्तस्य तज्जन्यव्यवहारयोग्यत्वरूपस्य विषयत्वस्य स्वरूपभूतज्ञानं प्रति ब्रह्मणः सत्त्वात्। तथा च न स्ववृत्तिविरोध इति शङ्कते – ननु स्वकर्मत्वभावेऽपीति॥ अत्र परः स्वाचार्यसम्मतिमाह – तत्स्वभावस्यापीति॥ तत्र ब्रह्मस्वरूपज्ञानस्य ज्ञप्तिकर्मत्वाभावेऽपि ज्ञप्तिजन्यव्यवहारयोग्यत्वरूपं ज्ञप्तिविषयत्वमस्त्येव। तथाच ब्रह्मरूपं ज्ञानं स्वविषयमेव, इति न ज्ञानत्वव्यापक सविषयत्वव्यावृत्तिर्ब्रह्मस्वरूपज्ञाने, इति न तत्र व्यभिचार इति भावः॥ घटादावपीति॥ घटादौ ज्ञप्तिकर्मत्वज्ञप्तिविषयत्वयोरेकत्वाद् ब्रह्मणो ज्ञप्तिकर्मत्वमनभ्युपेत्य ज्ञप्तिविषयत्वाङ्गीकारो विरुद्ध इत्यर्थः। कर्मत्वविषयत्वयोर्भेदमाशङ्क्य निराकरोति – न हीति॥ घटाद्याकारवृत्तिं प्रति कर्त्रादिभिन्नकारकविशेषत्वं वा, घटाद्याकारवृत्तिजन्यावरणाभिभवातिशययोगित्वं वा, घटाद्याकारवृत्तिप्रतिबिम्बि तचैतन्यं प्रति कारकविशेषत्वं वा, घटाद्याकारवृत्तिप्रति बिम्बितचैतन्यजन्यावरणाभिभवरूपातिशययोगित्वं वा घटादीनां कर्मत्वम्। विषयत्वं तु तज्जन्यव्यवहारयोग्यत्वरूपं निरुक्तकर्मत्वाद् भिन्नमेवेत्यर्थः। निराकरणहेतुमाह – ज्ञातैकसतीति॥ कर्मत्वेन संप्रतिपन्ने सुखादौ निरुक्तकर्मत्वमव्याप्तमित्यर्थः। प्रत्यक्षयोग्यत्वे सति स्वाधिकरणकालवृत्तिप्रागभावप्रतियोगिप्रत्यक्षविषयभिन्नत्वं ज्ञातैकसत्त्वम्। तथाच ज्ञप्त्यपेक्षया पूर्वभावित्वाभावात् सुखादेर्न ज्ञप्तिकारकत्वरूपं तत्कर्मत्वम्। ज्ञातैकसत्त्वात् स्वत एवावरणाभावेन ज्ञप्तिजन्यावरणाभिभवरूपातिशययोगित्वरूपमपि कर्मत्वं सुखादेर्नास्तीत्य व्याप्तिरित्यर्थः। उक्तकर्मलक्षणयोरतिव्याप्तिमप्याह – ब्रह्मणोऽपीति॥ चरमवृत्तेर्ब्रह्माकारतया तां प्रति ब्रह्मणः कारकत्वात् तज्जन्यावरणाभिभवरूपातिशययोगित्वाच्च चरमवृत्तेर्घटाद्या कारवृत्तिवत् चित्प्रतिफलनयुक्तत्वेन ब्रह्माकारवृत्तिप्रतिफलितचैतन्यं प्रति ब्रह्मणोऽपि कारकत्वात् तादृशचैतन्यजन्यावरणाभिभवरूपातिशययोगित्वाच्च ब्रह्मण्यतिव्याप्तिरित्यर्थः। विषयत्वातिरिक्तं कर्मत्वं निरस्य कर्मत्वरूपमेव विषयत्वं घटादावित्याह – किंत्विति॥ एवं घट चैतन्ययोर्ज्ञप्तिकर्मत्वेऽप्यान्तरालिकं भेदमाह – इयांस्त्विति॥ तथाच चैतन्यस्य स्वकर्मत्व मनङ्गीकुर्वद्भिः स्वविषयत्वमपि नाङ्गीकृतमेवेत्यर्थः।

ब्रह्मरूपत्वात्, तदुपाधिमात्रस्यैवोत्पत्तिविनाशप्रतियोगित्वात्। न च – ज्ञानभिन्नत्वस्या नन्दभिन्नत्वस्य च काल्पनिकस्य ब्रह्मणि सत्त्वात् तत्र व्यभिचार इति – वाच्यम्; धर्मिसमानसत्ताकतद्भेदस्य हेतुत्वात्। अनौपाधिकत्वेन वा भेदो विशेषणीयः, तुच्छे पञ्चमप्रकाराविद्यानिवृत्तौ च व्यभिचारपरिहारः पूर्ववत्। एवम् – अस्वप्रकाशत्वं वा जडत्वम्, तच्च पूर्वमेवोपपादितमिति शिवम्॥ इत्यद्वैतसिद्धौ जडत्वहेतूपपत्तिः॥

न्यायामृततरङ्गिणी

त्वन्मत इति॥ तथाच तत्रासिद्धिरिति भावः॥ शुद्धात्मन इति॥ तथाच तत्र व्यभिचार इति भावः॥ शुद्धेऽपीति॥ तथाच शुद्धात्मनि हेतोरगमनाद् न व्यभिचार इत्यर्थः॥ कल्पितेनेति॥ अयोगोलकादौ कल्पितेन वन्ह्यभावेन वह्नेरपि धूमाव्यभिचारः स्यादित्यर्थः। अहमर्थे हेत्वसिद्धिर्नेति शङ्कते – कल्पितस्येति॥

गौरोऽहमिति॥ अहमर्थनिष्ठस्य ज्ञातृत्वस्य गौरे देहे कल्पितत्वादित्यर्थः। देहादौ हेतुसिद्धि शङ्कते – धर्मिसमसत्त्वस्येति॥ तादृशेति॥ व्यावहारिकेत्यर्थः॥ शुद्ध इति॥ शुद्धे तात्त्विकस्य धर्मिसमसत्ताकस्य ज्ञातृत्वस्याभावात् तत्र व्यभिचार इत्यर्थः॥ वृत्तिज्ञान इति॥ ज्ञाने ज्ञानत्वस्यावश्यकत्वादित्यर्थः। ननु हेतूकृतमज्ञानत्वमज्ञप्तित्वम्। तच्च वृत्तिरूपे ज्ञानेऽस्ति, इति नासिद्धिरिति शङ्कते – यदि चेति॥ सांख्यरूपाः वेदान्तिनः सांख्यवेदान्तिनः। बुद्धिवृत्तेर्ज्ञानभिन्नत्वमुपपाद्य तत्र ज्ञानशब्दप्रवादसमर्थनपरो विवरणग्रन्थः। अज्ञप्तित्वमपि वृत्तिरूपे ज्ञाने नास्तीत्यसिद्धिरेवेत्याह – तर्हीति॥ अपरोक्षवृत्तौ चैतन्यप्रतिबिम्बनियमात् तस्य च ज्ञप्तित्वादज्ञाननिवृत्त्यादि भविष्यति, इत्यत उक्तम् – परोक्षवृत्त्येति॥ परोक्षवृत्तौ चैतन्यप्रतिफलनादेस्तन्मतेऽप्यभावादज्ञाननिवृत्त्यादेर्ज्ञप्तिकार्यस्य ततो दर्शनात् परोक्षवृत्तेरपि ज्ञप्तित्वमवश्यमभ्युपेयम्, अतोऽसिद्धिरित्यर्थः॥ तासामिति॥ ज्ञप्तिकारणात् ज्ञप्तिकार्यं न दृष्टमिति भावः॥ धर्माधर्मादिकमिति॥ धर्मादिवृत्तौ परोक्षरूपायां ज्ञप्तित्वरहितायां ज्ञप्तित्वमवगाहमानोऽनुभवः प्रमा न स्यादिति शेषः॥ किंचात्मनीति॥ त्वदभिप्रेते आत्मरूपे ज्ञाने ज्ञानत्वाभावस्याऽपाद्यमानत्वेन तत्राज्ञानत्वरूपहेतोः सत्त्वेन व्यभिचारः।

आत्मनि ज्ञानत्वाभावं वक्तुं ज्ञानत्वव्यापकसविषयत्वाभावमाह – तथाहीत्यादिना॥ आत्मरूपं ज्ञानमिति॥ ज्ञप्तिरित्यर्थः॥ स्ववृत्तिविरोधेनेति॥ क्रिया हि स्वविषये कर्मणि कर्तरि वा केनचित् सम्बन्धविशेषेणेतरव्यावृत्तेन वर्तते। तत्र सकर्मकक्रिया कर्मणि। यथा

नापि द्वितीयः, 'यदा ज्ञानं तदा अर्थ' इति कालिकव्याप्तौ पूर्ववद् व्यभिचाराद्, दैशिकव्याप्तिस्तु दूरनिरस्तैव, ज्ञातरितदभावात्। न च यदा 'अपरोक्षज्ञानं तदार्थ' इति कालिकव्याप्तौ नास्ति व्यभिचारः, आत्मा च 'यत् साक्षाद् अपरोक्षाद् ब्रह्मे' ति श्रुतेरपरोक्षज्ञानरूप इति सोऽप्यर्थव्याप्त इति –वाच्यम्; ईश्वरज्ञाने योगिज्ञाने च व्यभिचारात्। 'यदैन्द्रियकं ज्ञानं तदार्थ' इति तुव्याप्तिः सर्वसंमता। न चात्मरूपे ज्ञाने ऐन्द्रियकत्वम् अस्तीति न तया विरोधः। ननु – 'यदा अपरोक्षं ज्ञानं तदार्थ' इति व्याप्त्यनभ्युपगमे 'इदं रजत' मित्यपरोक्षज्ञानान्यथानुपपत्त्या अनिर्वचनीय रजतसिद्धिर्नस्यात्, अर्थं विनाप्यपरोक्षत्वोपपत्तेः – इति चेन्न, 'इदं रजतमहं जानामी' त्यनुसन्धीयमानं यत् ज्ञानविषयत्वं तस्याश्रयान्तरानुपपत्त्या अनिर्वचनीयरजत सिद्धेर्वक्ष्यमाणत्वात्। अत एव परोक्षभ्रमेऽपि अनिर्वचनीयार्थसिद्धिः। जन्यापरोक्षत्वेन वा अर्थव्याप्यता, आर्षज्ञानस्यापरोक्षत्वानभ्युपगमात्। तथा च नानिर्वचनीयरजत सिद्ध्यनुपपत्तिः। एवं सज्ञातृकत्वमपि किं ज्ञातृजन्यत्वम्? ज्ञातृव्याप्यत्वम्? ज्ञातृसमवेतत्वं वा? आद्ये ईश्वरज्ञाने व्यभिचारः, ज्ञाननित्यत्वस्य साधयिष्यमाणत्वाच्च। द्वितीयेऽपि अप्रयोजकता। न तृतीयः, ज्ञानजन्यत्ववत् ज्ञानसमवेतत्वस्यापि संभवात्, ज्ञानस्य गुणत्वक्रियात्वयोरनभ्युपगमेन द्रव्याश्रयत्वानुमानायोगात्, कदाचित् ज्ञातृज्ञेयसंबन्धेनैव अनुभवस्य विवरणवाक्यस्य च उपपत्तेः। 'अस्ति ब्रह्मे'ति च लकारो न ब्रह्मसत्तां प्रति ब्रह्मणः कर्तृत्वमाह, नित्यत्वेन तदसंभवात्, किन्तु साधुत्वार्थ इति द्रष्टव्यम्। ननु – प्रमाभक्रमभिन्नं न ज्ञानम्, न चात्मस्वरूपं ज्ञानं प्रमा, तद्विषयस्याविद्या देस्तात्त्विकत्वापातात्। न च अप्रमा, दोषजन्यत्वापाद्– इति चेन्न; तार्किकसिद्धेश्वरज्ञानवद् घटादिनिर्विकल्पकवच्च स्वभावत उभयवैलक्षण्येनाप्युपपत्तेः, तत्रापि ईश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य, भ्रमत्वे दोषजन्यत्वस्य चापत्तेः, निष्प्रकारके च निर्विकल्पके तद्वति तत्प्रकारकत्वस्य तदभाववति तत्प्रकारकत्वस्य चानुपपत्तेः, जन्यसविकल्प कत्वेन भ्रमप्रमान्यतरत्वनियमे चास्माकं क्षत्यभावाद्, विलक्षणवृत्तिद्वयोपरागेण च स्वभावतो भ्रमप्रमाविलक्षणस्याप्यात्मज्ञानस्य तदुभयरूपेण व्यवहारोपपत्तेः। न च– ज्ञानपदपाच्य भिन्नत्वविवक्षायाम् उपाधेरपि ज्ञानपदवाच्यत्वात्तत्रासिद्धिः, ज्ञानपदलक्ष्यभिन्नत्वविवक्षायां तु घटादेरपि ज्ञानपदलक्ष्यत्वात्तत्राप्यसिद्धिरिति – वाच्यम्; ज्ञानपदजन्यप्रतीतिविशेष्यभिन्नत्व विवक्षायामुक्तदोषाभावात्। एवमानन्दभिन्नत्वरूपमनात्मत्व मुपपाद्यम्, वैषयिकानन्दस्यापि

केवलाया वृत्तेः केवलस्य चैतन्यस्य चाज्ञानत्वेन वृत्तावसिद्धिपरिहारेऽपि चैतन्ये व्यभिचारतादवस्थ्यात्। नापि तृतीयः, आत्मत्वस्यैव निरूपयितुमशक्यत्वात्। तद्धि न जातिविशेषः, त्वयात्मन एकात्वाभ्युपगमाद्, विशिष्टशत्मनां भेदेऽपि तेषां पक्षकुक्षिनिक्षिप्तत्वात्। नाप्यानन्दरूपत्वम्, वैषयिकानन्दे तद्व्यतिरेकस्य हेतोरसिद्धेः, तस्याप्यात्मत्वे अज्ञानपक्षोक्तदोषः प्रसञ्जनीय इति– चेत्, मैवम् द्वितीयतृतीयपक्षयोः दोषाभावात्। तथा हि 'अज्ञानत्वं जडत्वमि'ति पक्षे नात्मनि व्यभिचारः, अर्थोपलक्षितप्रकाशस्यैव ज्ञानत्वेन मोक्षदशायामपि तदनपायात्। न च अभावे सप्रतियोगित्कववदिच्छाज्ञानादिष्वपि सविषयकत्वस्य स्वाभाविकत्वादिच्छायामिव ज्ञानेऽपि तस्य समानसत्ताकत्वमिति वाच्यम्; ज्ञानस्य हि सविषयत्वं विषयसंबन्धः, स च न तात्त्विकः, किंत्वाध्यासिकः, वक्ष्यमाणरीत्या तात्त्विकसंबन्धस्य निरूपयितुमशक्यत्वात्, अतो न तस्य स्वाभाविकत्वम्; न हि शुक्तौ रूप्यं स्वाभाविकम्। एवं च ज्ञानोपाधिकस्यैव सविषयत्वस्य इच्छादिष्वभ्युपगमात् नतरां तत्र तस्य स्वाभाविकत्वम्। न चैवं ज्ञानवद् विषयसंबन्धं विनापि कदाचिदिच्छायाः सत्त्वापत्तिरिति– वाच्यम्; सविषयत्वप्रयोजकोपाध्यपेक्षया अधिकसत्ताकत्वस्य तत्र प्रयोजकत्वाद्, इच्छायाश्च तत्समानसत्ताकत्वात्। न च त्वया मोक्षावस्थायामात्मनो निर्विषयत्वाङ्गीकाराद् आनन्दाप्रकाशे तदपुमर्थत्वं स्यादिति वाच्यम्; तदा ह्यानन्द एव प्रकाशो न त्वानन्दस्य प्रकाशत्वम्, अर्थोपलक्षितप्रकाशत्वं वा तदास्त्येवेति न ज्ञानत्वहानिरित्युक्तम्। ननु – तथापि ज्ञातुरभावात् तदा तन्न ज्ञानम्; न हि भोक्तृहीना भुजिक्रिया भवति। नच – अनादित्वेन क्रियारूपत्वाभावाद् अनपेक्षत्वमिति वाच्यम्; अनादेः प्रागभावस्य प्रतियोगिनि, जातेर्व्यक्तौ, जीवब्रह्म विभागस्य धर्मिप्रतियोगिनोः, अज्ञानस्य चाश्रयविषययोः, ब्रह्मसत्तायाश्च कर्तर्यपेक्षादर्शनात्, अन्यथा 'अस्ति ब्रह्मे' त्यादौ कर्तरि लकारो न स्यात्। एवं चातीतादिज्ञानस्य ईश्वरज्ञानस्य च उत्पत्त्यर्थमर्थानपेक्षत्वेऽपि तन्निरूप्यत्वदर्शनेन ज्ञानस्य ज्ञातृज्ञेयनिरूप्यत्वं स्वभावः, अन्यथा 'इदमहं जानामी' त्यनुभवो न स्यात्, 'ज्ञातुरर्थप्रकाशस्य ज्ञानत्वा' दिति विवरणविरोधश्च स्याद् –इति चेन्नः जातेर्व्यक्तिनिरूप्य त्वेऽपि कदाचित्तदसंबन्धवदुपपत्तेः, संबन्धप्रयोजकोपाध्यपेक्षया अधिकसत्ताकत्वात्। अत एव ज्ञानस्य सज्ञेयत्वं सज्ञातृत्वं च न स्वाभाविकम्। तथा हि – सज्ञेयत्वं तावत् ज्ञेयजन्यत्वं वा? ज्ञेयव्याप्यत्वं वा? नाद्यः, परोक्षज्ञाने ईश्वरज्ञाने चाभावात्।

किं चात्मा ज्ञानं चेत्, प्रमा? भ्रमो वा? नाद्यः। तद्वेद्यस्याविद्या देस्तात्त्विकत्वापातात्। नान्त्यः। दोषाजन्यत्वात्। नन्वन्तः करणवृत्तिप्रतिबिम्बितस्स प्रमा, अविद्यावृत्तिप्रतिबिम्बितस्तु भ्रम इति चेन्न। स्वभावप्रश्नं प्रत्यस्यानुत्तरत्वात्। स्वभावतो रूपद्वयहीनश्चेत्, स्वभावतो ज्ञानमपि न स्यात्। न तृतीयः, निरस्तत्वात्।

चतुर्थेऽपि न तावदात्मत्वं जातिविशेषः, आत्मनः एकत्वात्। विशिष्टात्मनां भेदेऽपि तेषां पक्षनिक्षिप्तत्वात्। नापि ज्ञातृत्वं वा, ज्ञानत्वं वा, स्वप्रकाशत्वं वा, निरस्तत्वात्। नाप्यानन्दत्वम्। जन्मादिमत्यनात्मनि वैषयिकानन्देऽ नानन्दत्वासिद्धेः। तस्याप्यात्मत्वे नीरपानजातात्क्षीरापानजं सुखमधिकमित्यनुभवेन, "सैपानन्दस्य मीमांसा भवती" त्यादिश्रुत्या, साधनतारतम्यादियुक्त्या च सिद्धमानन्दतारतम्यं च न स्यात्। अखण्डे स्वरूपानन्दे अभिव्यक्तितार तम्यस्याप्ययोगात्। विरोधिनो दुःखस्य सर्वात्मनाऽभावेऽपि सुखे तारतम्यानुभावाच्च। अन्तः– करणवृत्तिरूपज्ञानवत्तद्वृत्तिरूपसुखाभावे अहं सुखीत्यनुभवायोगाच्च। अनानन्दत्वस्य मिथ्यात्वं प्रत्यप्रयोजकत्वाच्च। नाप्यहंत्वम्। तदभावस्याहंकारेऽसिद्धेः, आत्मनि व्यभिचाराच्च। नापि प्रत्यक्त्वम्। उक्तादन्यस्य तस्याभावात्। नाप्य परिच्छिन्नत्वम्। निरसिष्यमाणत्वात्। नाप्यबाध्यत्वम्। (हेतोः) साध्यावैशिष्ट्यात्। नाप्यात्मशब्दवाच्यत्वम्, अवाच्ये आत्मनि हेतोर्व्यभिचाराद्, आत्मशब्दवाच्ये देहादावसिद्धेश्च। नापि तल्लक्ष्यत्वम्, तत्प्रतिपाद्यत्वमात्रं वा। इन्द्रियादावात्मशब्दलक्ष्ये हेतोर्भागासिद्धेः। नापि पराभिप्रेतम्, मया ज्ञातृत्वमात्मत्वमित्यङ्गीकारात्। तस्मान्नचतुर्थः।

नापि पञ्चमः, मया अज्ञातृत्वं जडत्वमित्यङ्गीकारात्। एतेन तत्त्वशुद्धयुक्तोऽ चेतनत्वहेतुरपि निरस्त इति। इति जडत्वहेतुभंगः।

अद्वैतसिद्धिः

जडत्वमपि हेतुः। ननु– किमिदं जडत्वम्? अज्ञातृत्वं वा? अज्ञानत्वं वा? अनात्मत्वं वा? नाद्यः; त्वन्मते पक्षनिक्षिप्तस्यैवाहमर्थस्य ज्ञातृत्वात्तत्रासिद्धेः, शुद्धात्मनोऽज्ञातृत्वेन तत्र व्यभिचाराच्च। नापि द्वितीयः, वृत्त्युपरक्तचैतन्यस्यैव ज्ञानत्वेन

मस्ति। 'तत्स्वभावस्यापि स्फुरणस्य तद्व्यवहारजनकतया तद्विषयत्वमि'ति चित्सुखोक्तेरिति चेन्न। घटादावप्येतदन्यस्य ज्ञप्तिकर्मत्वस्याभावात्। न हि – घटादावपि तदाकारवृत्तिः, तत्प्रतिबिम्बितचैतन्यं वा ज्ञप्तिः, तां च प्रतिकर्मत्वं तत्कारकविशेषत्वं वा तज्जन्यावरणाभिभवरूपातिशययोगित्वं वेति – युक्तम्। ज्ञातैकसति सुखादौ शुक्तिरूप्यादौ चोक्तरूपज्ञप्ति कर्मत्वाभावापाताच्च। ब्रह्मणोऽपि चरमवृत्तिविषयस्य उक्तरूपां ज्ञप्तिं प्रति उक्तरूपकर्मत्वापाताच्च किं तु वृत्त्यभिव्यक्तं घटाद्यधिष्ठानचैतन्यं तज्ज्ञप्तिः। न च तस्य घटादावपि व्यवहारादन्यत्कृत्यमस्ति। इयांस्तु भेदः – घटादिः स्वान्यज्ञप्तिकर्म, चैतन्यं तु स्वस्वरूपज्ञप्तिकर्मेति। न द्वितीयः, मोक्षे पराभावात्। त्वन्मते च वर्तमानस्यैव साक्षात्साक्षिविषयत्वात्। वह्निरासीदित्याद्यनुमिताविव साक्षिज्ञाने मोक्षसुषुप्त्योरतीतविषयोल्लेखरूपोपप्लवापाताच्च।

निर्विषयत्वे तु ज्ञानत्वमेव न स्यात्। तद्धि विषयानुल्लेखित्वम्, न तूल्लिखितस्य विषयस्यावर्तमानत्वम्, अत्यन्तासत्त्वं वा। येनातीतादिज्ञाने तुच्छज्ञाने च व्यभिचारः स्यात्। न च कदाचित्सविषयत्वमात्रेण ज्ञानत्वम्। सप्रतियोगिके अभावादौ सप्रतियोगिकत्ववत् सविषयके इच्छादौ घटादिज्ञाने च सविषयकत्वादेः स्वभाव त्वदर्शनात्। परमपुरुषार्थे मोक्षे आनन्दाप्रकाशापाताच्च। अर्थप्रकाशत्वरूपज्ञान स्वभावाभावेऽपि ज्ञानत्वे घटादेरपि ज्ञानत्वापाताच्च। अर्थाप्रकाशात्मकजडव्यावृत्तेरपि अर्थप्रकाशात्मकत्वं विनाऽयोगाच्च।

एवं ज्ञात्रभावादपि न ज्ञानम्। न हि भोज्यभोक्तृरहिता भुक्तिरस्ति। यदि च ज्ञानस्यानादित्वात्तदनपेक्षा, तर्ह्यनादेः प्रागभावादेः प्रतियोगिनि, जातिरूपस्य धर्मस्य व्यक्तिरूपे धर्मिणि, जीवब्रह्मविभागस्य च धर्मिप्रतियोगिनोः, वेदरूपस्य शब्दस्य च वक्तृवाच्ययोः, अज्ञानस्य चाश्रयविषययोः, ब्रह्मसत्तायाश्च कर्तर्यपेक्षा न स्यात्।तथा चास्ति ब्रह्मेत्यादौ कर्तरि लकारो न स्यात्। अतीतादिज्ञानस्येश्वरज्ञानस्य चोत्पत्त्यर्थं विषयाद्यनपेक्षत्वेऽपि तन्निरूप्यत्वदर्शनेन ज्ञानस्य ज्ञातृज्ञेयनिरूप्यत्व स्वभावत्वाच्च। इदमहं जानामीति ह्यनुभवः। उक्तं हि विवरणे – "ज्ञातुरर्थप्रकाशस्य ज्ञानत्वा" दिति। तथा च–

ज्ञातृज्ञेयविहीनं ते ब्रह्म ज्ञानात्मकं यदि।
भोक्तृभोज्यविहीनापि भवेत्तर्हि भुजिक्रिया॥

घटादावसिद्धिपरिहारं दृष्टांते साधनवैकल्यपरिहारंच सूचयंस्तुच्छे व्यभिचारोपि नास्तीत्याह। तुच्छस्येति। व्याप्तेरिति॥ तथाचैतादृशदृश्यत्वं साध्याभावेनैव व्याप्तत्वाद्विरुद्धमिति भावः॥ ज्ञापकोक्ताविति॥ तथाच घटादावसिद्धिवारणाय प्रमाणाधीनवृत्तिविषयत्वमित्युक्तम्। अननुगमवारणायान्यतरेत्युक्तमिति द्रष्टव्यम्। नास्यमिथ्यात्वेनैव व्याप्तिरितिभावः॥ ज्ञापकाधीनत्वादिति॥ शशशृंगादिपदरूपज्ञापकाधीनत्वादित्यर्थः। रूप्यादौ साधनवैकल्यंचाह। धीमात्रेति॥ धीमात्रशरीरं यद्रूप्यादितदाकाराविद्यावृत्तिरित्यर्थः। वस्तुपरतंत्रत्वस्य वस्त्वधीनत्वस्य। वस्तुपरतंत्रत्वाभावोपपादनाय धीमात्रशरीरित्युक्तं। तथाच प्रातिभासिकतया धीमात्रस्य रूप्यादेर्घटादिवद्वृत्त्यपेक्षया पूर्वभावित्वाभावेन तदाकाराविद्यावृत्तेः शुक्तिरूप्यादिरूपवस्त्वधीनत्वा भावात्साधनवैकल्यमिति भावः। मद्रीत्येति॥ रूप्यस्यात्यंतासत्त्वेन नासदविषयकवृत्तिविषयत्वं नवाऽसद्विलक्षणार्थविषयत्वमित्यर्थः॥ ब्रह्मणीति॥ असदविषयकासद्विलक्षणार्थविषयकवेदांतजन्यवृत्तिविषयत्वेन वस्त्वधीनवृत्तिविषयत्वसद्भावाद्व्यभिचार इत्यर्थः॥ अन्यापेक्षेति॥ स्वव्यवहारे स्वातिरेकीत्यादिलक्षणमित्यर्थः॥ औपनिषदेति॥ हेतुगर्भमिदं विशेषणं। अद्वितीयत्वादिविशिष्टव्यवहारे विशेषणोपनायकैकमेवाद्वितीयमित्यादि मानापेक्षास्तीत्यतिव्याप्तिरित्यर्थः॥ रूप्येनास्तीति॥ तथाच साधनवैकल्यमिति भावः॥ अस्तिचात्मनीति॥ शिष्टं स्वप्रकाशवादे वक्ष्यत इत्यात्मनि अतिव्याप्तेः पूर्वमुक्तत्वात्तत्संग्रहोयमितिसंप्रदायः। तथाचातिव्याप्तिरिति भावः॥ इति दृश्यत्वहेतुभंगविवरणं॥

जडत्वहेतुभङ्गः

जडत्वमप्यज्ञातृत्वं वा? अज्ञानत्वं वा? अस्वप्रकाशत्वं वा? अनात्मत्वं वा? पराभिप्रेतं वा? नाद्यः, त्वन्मते पक्षनिक्षिप्तस्याहमर्थस्यैव ज्ञातृत्वात्, शुद्धात्मनोऽप्यज्ञातृत्वाच्च। शुद्धेऽपि कल्पितं ज्ञातृत्वमस्तीति चेन्न। कल्पितेन हेत्वभावेन व्यभिचारापरिहारात्। कल्पितस्य ज्ञातृत्वस्याभावो हेतुरिति चेन्न। गौरोऽहं जानामीति कल्पितज्ञातृत्ववति देहादौ तदभावासिद्धेः। धर्मिसमसत्त्वस्य ज्ञातृत्वस्याभावो हेतुरिति चेन्न। तादृशज्ञातृत्ववत्यन्तःकरणे तदभावासिद्धेः। शुद्धे तादृशज्ञातृत्वाभावाच्च।

न द्वितीयः, वृत्तिज्ञाने भागासिद्धेः। यदि च सांख्यवेदान्तिनां तु 'करणव्युत्पत्त्या बुद्धिवृत्तिर्ज्ञानम्' इति विवरणोक्तेर्वृत्तिरज्ञप्तिः, तर्हि परोक्षवृत्त्या स्वविषये अज्ञाननिवृत्तिव्यवहारस्मृतयो न स्युः, तासां ज्ञप्तिकार्यत्वात्। धर्माधर्मादिकं च जानामीत्यनुभवश्च न स्यात्। किं चात्मनि व्यभिचारः। तथा हि – आत्मरूपं ज्ञानं सविषयं निर्विषयं वा? अद्येऽपि स्वविषयं परविषयं वा? नाद्यः। स्ववृत्तिविरोधेन परैरस्वीकारात्। ननु स्वकर्मकत्वाभावेऽपि स्वव्यवहारजननयोग्यत्वरूपं स्वविषयत्व

यदि रूप्यस्याध्यस्तत्वात्तत्रापरोक्ष्यमधिष्ठानभूत साक्षिगतापरोक्ष्याध्यासादित्युच्यते तर्हि घटादीनामप्यापरोक्ष्यं न स्यात्। तेषामप्यध्यस्तत्वेनाधिष्ठानचैतन्यगतापरोक्ष्यमेव प्रतीयत इत्यपिवक्तुं शक्यत्वेन तत्राप्यापरोक्ष्यं प्रातिभासिकं स्यादित्याशंक्य निराकरोति॥ यद्यपीत्यादिना॥ तथाच रूप्यादेरपरोक्षव्यवहारयोग्यत्व त्वाभावसाधकस्याध्यस्तत्वहेतोर्घटादौ व्यभिचार इति भावः। अध्यस्तत्वाविशेषेपि ब्रह्मज्ञानेतरज्ञानाबाधितत्वात्तत्र सत्त्वं यथा व्यावहारिकं एवमापरोक्ष्यमपि व्यावहारिकमेव। रूप्यादेस्तु ब्रह्मज्ञानेतरज्ञान बाध्यत्वात्तत्रसत्त्वमिवापरोक्ष्यमपि प्रातिभासिकमेवातोऽधिष्ठानगतमेव भासत इत्यर्थः। तथाच घटादिनिष्ठमापरोक्ष्यं व्यावहारिकं व्यावहारिकधर्मिनिष्ठत्वात् सत्त्ववदित्यनुमानमुक्तं भवति। तथाच रूप्यादेरपरोक्षत्वा भावसाधकमध्यस्तत्वं ब्रह्मज्ञानेतरज्ञानबाध्यत्वापरपर्यायं प्रातिभासिकत्वरूपं विवक्षितमिति न घटादौ व्यभिचार इति भावः। एवं साधनवैकल्यपरिहारेपि अविद्यादौ भागासिद्धिः स्यादित्याशयेनाह॥ तत्रेत्यादिना॥ सर्वव्यावहारिकोपादानत्वमज्ञानस्यैव विशेषणं नांतःकरणादेः ब्रह्मज्ञानादित्यादिविशेषणद्वयमुभयोरिति ज्ञेयं। व्यावहारिके व्यावहारिकतयांगीकृत इत्यर्थः। तथाच प्रातिभासिकतया त्वयोच्यमानमज्ञानं व्यावहारिकं व्यावहारिकोपादानत्वात् ब्रह्मज्ञानात्प्रागबाधितत्वात् तम आसीदित्यादि सिद्धत्वाच्चेत्यनुमानत्रयमत्र द्रष्टव्यं। योग्यत्वस्याऽपरोक्षव्यवहारयोग्यत्वस्य। व्यावहारिकत्वादिति। नत्वधिष्ठानगतत्वं तस्येत्यर्थः। तथाचाज्ञाना दावुक्तरीत्या विशेषणस्य विशेष्यस्य च सत्त्वेन विशिष्टाभावरूपास्वप्रकाशत्वस्यासिद्धिरिति भावः। आपरोक्ष्यं घटादौ व्यावहारिकं रूप्यादौ प्रातिभासिकमिति वदतोऽकौशलमित्याह॥ नहीति॥ वृत्तिद्वारेति॥ ज्ञानावच्छेदकत्वेन साक्षिवेद्यइत्यर्थः। ननु अपरोक्षव्यवहारविषयत्वयोग्यत्वाभावरूपास्वप्रकाशत्वस्य ब्रह्मण्यतिव्याप्तिः। तस्य निर्धर्मकत्वेनापरोक्षव्यवहारविषयतायोग्यत्वरहितत्वात्। किं चापरोक्षव्यवहार विषयत्वयोग्यत्वाभावो नाम अपरोक्षव्यवहारविषयत्वात्यंताभावानधिकरणत्वाभावः अपरोक्षव्यवहार विषयत्वात्यंताभावाधिकरणत्वमिति यावत्। इदमपि ब्रह्मण्यतिव्याप्तं। कल्पितैतादृशधर्मसद्भावादित्यादि दूषणमभिसंधायाह॥ शिष्टमिति॥ अस्य लक्षणस्य ब्रह्मण्यतिव्याप्तिरूपं दूषणमित्यर्थः॥ वक्ष्यत इति॥ द्वितीयपरिच्छेदे स्वप्रकाशत्ववादे ''प्रमाणं चात्रानुभूतिः स्वप्रकाशे'' त्यादिग्रंथेनेत्यर्थः। एवमेतद्वाक्यव्याख्याने उत्तरत्र संग्रहश्लोके अस्वप्रकाशत्वलक्षणस्यात्मन्यतिव्याप्तिः संगृह्यते तदप्युपपन्नमिति ध्येयमिति संप्रदायागतः पंथाः। ननु फलव्याप्यत्वमेवास्वप्रकाशत्वं घटादीनां फलव्याप्यत्वं च वृत्तिप्रतिबिंबितचैतन्यजन्यातिशययोगित्वं अतिशयश्च भग्नावरणचित्संबंध एवेति लक्षणांतरमभिधीयते इत्यत आह॥ शिष्टमिति॥ भग्नावरणचित्संबंधरूपातिशयस्यैवाप्रामाणिकत्वेन नोक्तलक्षणं साध्विति स्वप्रकाशत्वभंगे वक्ष्यत इति व्याख्याने तु त्वदुक्तास्वप्रभत्वंच रूप्ये नास्त्यस्तिचात्मनीति संग्रहश्लोके आत्मन्यतिव्याप्तिः संगृह्यते तदयुक्तं स्यात्। उक्तस्यैव संग्राह्यत्वात् आत्मन्यतिव्याप्तेश्चपूर्वमनुक्तत्वादित्यस्वारस्यं द्रष्टव्यं।

अस्वप्रकाशत्वस्य तदाख्यदृश्यत्वस्य॥ पंचमेति॥ इदं च चतुर्थप्रकाररूपसदसद्वैलक्षण्याख्यमिथ्यात्व रूपसाध्याभावोपपादनाय। प्रतियोगितदभावयोर्वैलक्षण्यस्यावश्यकत्वादिति भावः॥ वस्त्विति॥ प्रातिभासिकस्यापि रूप्यादेरसद्विलक्षणत्वमात्रेण वस्तुत्वं मंतव्यं। तथाच तदधीनवृत्तिर्नाम तदाकाराविद्यावृत्तिरित्यर्थः। प्रमाणाधीनवृत्तिविषयत्वरूपं दृश्यत्वं मिथ्याभूते प्रातिभासिके रूप्यादौ नास्तीति साधनवैकल्यपरिहाराय वस्त्वधीनवृत्तिविषयत्वमित्युक्तं। तथाचनासिद्धिसाधनवैकल्ये इति भावः।

इतिभावः। ननु स्वांशावच्छेदेन स्वातिरेकिवृत्त्यन्यचैतन्यरूपसंविदपेक्षावत्त्वमिति संविदि वृत्त्यन्यत्वं विशेष्यते। शुद्धे स्वांशावच्छेदेन व्यवहारे स्वातिरेकिवृत्त्यपेक्षाया एव सत्त्वेनोक्तहेतोर्नव्यभिचारः। घटादौ तु वृत्त्यन्यचैतन्यरूपसंविदपेक्षाया एव सत्त्वेन नासिद्धिरित्याशंक्य निराकरोति॥ वृत्त्यन्येति॥ अभावादिति॥ वृत्त्यन्या या संवित् वृत्तिप्रतिबिंबितचैतन्यं तदभिव्यक्तचैतन्यंवा तदुभयंचाप्रामाणिकमित्युक्तमित्यर्थः। नन्वात्मव्यवहारे न वेदांतजन्यसंविदंतरापेक्षा किंत्वात्माज्ञाननिवृत्तिमात्रे। आत्मव्यवहारस्तु स्वतःस्फुरणादेव अतो नात्मनि व्यभिचारः। घटादौत्वस्फुरणरूपतया स्वव्यवहारे स्वातिरेकिसंविदपेक्षास्तीति नासिद्धिरित्याशंक्य निराकरोति॥ नचेति॥ नहीत्यर्थः। तथाचासिद्धिरेवेतिभावः। ननूक्तमस्फुरणरूपतया घटादौ स्वव्यवहारे स्वातिरेकिसंविदपेक्षेति। सत्यमुक्तं दुरुक्तं तत्। तथात्वे घटादिवद्ब्रह्मणोप्यस्फुरणरूपत्वमेवास्तु स्फुरणरूपत्वे तदज्ञानायोगात्। अज्ञानाविरोधिस्फुरणरूपत्वस्य चात्मनीव घटादावपि सुवचत्वादित्युक्तत्वादितिभावः॥ एतेनेति॥ उक्तप्रबंधेन ब्रह्मणो ज्ञानविषयत्वस्योपपादनेनेत्यर्थः॥ स्वावच्छिन्नेति॥ स्वशब्दःसमभिव्याहृतपरः। स्वविषयकेत्यर्थः। तथाच स्वव्यवहारे स्वविषयकसंवित्सापेक्षत्वं दृश्यत्वं। वर्तते चेदं घटादौ नास्तिच ब्रह्मणि क्रियाकर्मभावविरोधेन स्वव्यवहारहेतोःस्वाख्यसंविदो ब्रह्मविषयकत्वाभावात्। सकलसामर्थ्यविधुरस्य कर्मत्वापरपर्यायवेदांतजन्य वृत्तिविषयत्वस्याप्यभावाच्च। अतो न तत्र व्यभिचार इत्येतदपि निरस्तं। ब्रह्मणोपि वेदांतजन्य वृत्तिव्याप्यत्वस्योपपादितत्वात्। क्रियाकर्मभावाविरोधस्य चाभिधानस्याभिधेयत्ववदुपपन्नत्वेन स्वविषयकस्वाख्य संवित्सापेक्षत्वाच्चेति सांप्रदायिकोऽर्थः।

फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपास्वप्रकाशत्व .रूपदृश्यत्वस्य भागासिद्धिमुपपादयति। घटादाविति॥ विशेष्यवत् अपरोक्षव्यवहारयोग्यत्ववत्॥ उक्तन्यायेनेति॥ वृत्तिप्रतिबिंबितचैतन्यरूपस्य तदभिव्यक्ताधिष्ठानचैतन्यरूपस्य वा फलस्योक्तन्यायेनाऽप्रामाणिकतया पक्षैकदेशे घटादौ विशेषणविशेष्य योरुभयोरपि सत्त्वेन विशिष्टाभावरूपास्वप्रकाशत्वाभावाद्भागासिद्धिरित्यर्थः। प्रातिभासिकाविद्याशुक्तिरूप्यादिदृष्टांते साधनवैकल्यमुपपादयति॥ अविद्यादाविति॥ विशेषणवदिति॥ अंतःकरणवृत्तिप्रतिबिंबितचैतन्य स्यैवात्र फलशब्देनाभिप्रेततया प्रातिभासिकस्य सर्वस्याप्यविद्याशुक्तिरूप्यादेरांतर पदार्थतया बाह्यत्वा भावेनांतःकरणवृत्तेर्नबहिर्निस्सरणं ततोत्रांतःकरणवृत्तिप्रतिबिंबितचैतन्यादिरूपफलव्याप्यत्वं न तत्रास्ति किंतु अविद्यावृत्तिप्रतिबिंबितचैतन्यरूपसाक्षिविषयत्वमेव। तथाच तत्र विशेषणवदपरोक्षव्यवहारयोग्यत्वरूपं विशेष्यं चास्ति। अतो न तत्र विशिष्टाभावरूपास्वप्रकाशत्वमस्तीति दृष्टांते साधनवैकल्यमित्यर्थः। उत्तरग्रंथोपक्षेपार्थं विशेष्यस्यापि सत्त्वेनेत्युक्तं अत्रोक्तमिति। साधनवैकल्यापादनाय विशेष्यस्यापि सत्त्वेनेति यदुक्तं तदुपरि चित्सुखेनसमाधानमत्रोक्तमस्तीत्यर्थः। तदेवाह॥ शुक्तिरूप्यादाविति॥ शुक्तिरूप्यादेर्व्यवहारकाल एव बाधितत्वात्तत्रापरोक्षव्यवहारयोग्यत्वं व्यवहारदशायामपि नास्तीत्यर्थः। तथाच विशेष्याभावप्रयुक्तविशिष्टाभावस्य शुक्तिरूप्यादौ सत्त्वेनास्वप्रकाशत्वसद्भावान्नदृष्टांतःसाध्यविकल इतिभावः। ननु शुक्तिरूप्यादेरापरोक्ष्याभावे शुक्तिरूप्यं साक्षात्करोमीत्येवं शुक्तिरूप्यादौ आपरोक्ष्यावगाह्यनुव्यवसायरूपव्यवहारविरोध इत्यत आह॥ अपरोक्षव्यवहारायोग्येपीति॥ अविद्यावृत्तिप्रतिबिंबितचैतन्यरूपसाक्षि विषयत्वेनांतरत्वादितिभावः॥ साक्षीति॥ साक्षिगतं यदापरोक्ष्यं तदध्यासादित्यर्थः। तत्र दृष्टांतः इदमिति। तस्मिन् शुक्तिरूप्ये परवत्त्वाभावादिदमिति व्यवहारायोग्यत्वं तस्येतिभावः॥ अधिष्ठानगतेति॥ इदमाकारवृत्तिप्रतिबिंबितचैतन्यगतेदंतारोपइत्यर्थः। ननु

वृत्तिप्रतिबिंबितचैतन्यस्य तदभिव्यक्तचैतन्यस्य वा कल्पनाऽयोगादिति चिद्विषयत्वरूपहेतोः स्वरूपासिद्धिरिति भावः॥ तदपेक्षेति। स्वातिरेकिसंविदपेक्षेतिभावः। अतिव्याप्तिपरिहारमाशंकते॥ नन्विति॥ तथेति॥ घटत्वादिविशिष्टघटव्यवहार एव स्वातिरिक्तं यद्विशेषोपनायकं मानं तदपेक्षा नतु घटस्वरूपमात्रव्यवहार इत्यपि वक्तुं शक्यत्वादसिद्धिरितिभावः।

असिद्धिपरिहारंशंकते॥ नन्विति॥ निर्विकल्पकाभावाभिप्रायेणेदं। तथाच विशिष्टव्यवहारस्यैव सत्त्वात्स्वातिरिक्तसंविदपेक्षानियतिस्तत्रास्तीति नासिद्धिरित्यर्थः। नन्वात्मन्यपि घटादाविव स्वरूपमात्र व्यवहाराभावेन विशिष्टव्यवहारस्यैव सत्त्वात्तत्रच विशेषणोपनायकप्रमाणापेक्षानियतिसद्भावेन हेतोरात्मनि व्यभिचार इत्यतआह॥ आत्मनित्विति॥ परामर्शेन परामर्शबलेन तस्य सौषुप्तिकव्यवहारस्य विशिष्टत्वेन कालादिविशिष्टत्वेन तथाच स्वरूपमात्रव्यवहारस्यैवाभावादात्मनि व्यभिचार एवेतिभावः। ननु स्वव्यवहारे स्वांशावच्छेदेनापि स्वातिरिक्तसंविदपेक्षानियतिरिति हेतुर्विवक्षितः। सुषुप्तिकालीने आत्मगोचर कालादिविशिष्टव्यवहारे तु कालादिविशेषणांश एव तदपेक्षा नत्वात्मांशेपि। तस्य स्वप्रकाशत्वादतो नात्मनि व्यभिचार इत्याशंकते॥ नन्वात्मनीति॥ असिद्धिं परिहरति॥ घटादाविति॥ घटादेरस्वप्रकाश त्वात्स्वांशावच्छेदेनापिस्वातिरिक्त संविदपेक्षानियतिरस्तीति नासिद्धिरितिभावः॥ नियतिपदेति॥ अद्वितीयत्वादिविशिष्टब्रह्मव्यवहारे स्वातिरिक्तसंविदपेक्षासद्भावेन ब्रह्मणि दृश्यत्वप्राप्तौ तद्व्यावृत्त्यर्थं हि नियतिपदं दत्तं। तथाच स्वरूपमात्रव्यवहारे तदपेक्षाया अभावेन न स्वातिरेकिसंविदपेक्षानियतिरित्येवं ब्रह्मणि दृश्यत्वाभावो वक्तव्यः। तथाच नियतिपदनि वारणीयब्रह्मण्यतिव्याप्तिरूपातिप्रसंगनिवारणस्य स्वांशावच्छेदेनापि स्वातिरेकिसंविदपेक्षावत्त्वं दृश्यत्वमित्यस्य विवक्षयैवोपपत्तौ नियतिपदं व्यर्थमित्यर्थः। ननु तर्हि स्वांशावच्छेदेनापि स्वातिरिक्तसंविदपेक्षावत्त्वमेव दृश्यत्वमित्येव हेतुर्विवक्षित इति नियतिपदं त्यज्यत इतिचेन्न शुद्ध एव व्यभिचारादित्याह॥ आसंसारमिति॥ अज्ञानावृत्ते शुद्धे शुद्धं ब्रह्मेतिव्यवहारस्यापलापायोगेन शुद्धस्वरूपव्यवहारे शुद्धरूपस्वांशावच्छेदेनापि स्वातिरेकिवेदांतजन्याज्ञाननिवर्तकवृत्तिरूपसंविदपेक्षास्त्येवेति व्यभिचारः। नच स्वांशस्य शुद्धस्य स्वप्रकाशत्वेन स्वाख्यसंविदैव व्यवहारोपपत्तौ तत्राज्ञानाभावान्न स्वांशावच्छेदेनाज्ञाननिवर्तक स्वातिरेकिवेदांतजन्यवृत्तिरूपसंविदपेक्षानियम इति वाच्यं। शुद्धस्य स्वप्रकाशत्वेन स्वतःस्फुरणांगीकारे तस्याज्ञानावृतत्वं न स्यात्। तदिदमाह॥ अज्ञानावृतस्येति॥ नन्वात्माज्ञानावरणकाले स्वातिरिक्तसंविदैव व्यवह्रियतां तदनावरणकाले स्वातिरेकिसंविदं विनैव व्यवह्रियतामित्यत उक्तं॥ आसंसारमिति॥ आसंसारमज्ञानावृतत्वेन तदनावरणकाले एव नास्तीत्यर्थः। नन्वासंसारमज्ञानावृतोप्यात्मा कदाचित्स्वयमेवावरणमज्ञानं निवर्तयिष्यति अनंतरमुक्तसंविदं विनैव व्यवह्रियतामित्यतःशुद्धस्येत्युक्तं। शुद्धस्य केवलस्याज्ञानस्फोरकत्वे नाज्ञानानिवर्तकत्वान्न कदाचिदपि स्वाज्ञाननिवर्तकत्वं किंनाम वेदांतजन्यचरमवृत्तेरेव अन्यथा वेदांतजन्यचरमवृत्तेर्वैयर्थ्यापत्तेः। तस्य अज्ञानमिवर्तकत्वेनैव सार्थक्यादित्याशयेनोक्तं। वेदांतजन्याज्ञाननिवर्तकवृत्तीति। किंच यद्यात्मव्यवहारःस्वतःस्फुरणादेव भवति न तत्र स्वांशावच्छेदेन स्वातिरेकिसंविदपेक्षेत्युच्यते तर्हि वेदांतानां प्रकाशमानार्थप्रकाशकत्वेनानधिगतार्थावगतिसाधनताऽभावेन प्रमाणलक्षणाभावादप्रामाण्यं स्यादित्याशयेनोक्तं॥ अनधिगतार्थबोधकेति॥ तथाचाज्ञानावृते शुद्धस्वरूपे स्वांशावच्छेदेनापि स्वातिरेकिवेदांतजन्यवृत्तिरूपसंविदपेक्षासद्भावेन मिथ्यात्वाभावात् नियतिपदत्यागेपि व्यभिचार

चैतन्यस्याज्ञानस्फोरकत्वेनाज्ञानाविरोधितयाऽज्ञानानिवर्तकत्वाद्वृत्तेरेवाज्ञाननिवर्तकत्वमंगीकृत्य तयाऽज्ञाने निवृत्ते तदभिव्यक्तचैतन्यरूपज्ञानेनैव घटःप्रकाशत इत्युच्यते तर्हि वयमपि वदामो लोके यया प्रभयांधकारो निवर्तते तयैव प्रभया घटःप्रकाशत इत्यनुभवसिद्धं तदपि न स्यात्। तत्रापि प्रभयांधकारे निवृत्ते तदभिव्यक्तं पुनःकिंचित्प्रभांतरं कल्पयित्वा तेनैव घटादिकं प्रकाशत इत्यपि कल्पनीयं स्यादिति। अस्त्वितिचेत्तत्राह॥ घटादाविति॥ अन्यथेति॥ अज्ञान निवृत्तिरूपकार्यस्यान्यथोपपन्नत्वेपि अज्ञाननिवृत्तिरूपकार्यजनकं घटाद्याकारापरोक्षांतःकरण वृत्त्यतिरिक्तं तत्प्रतिफलितचैतन्यरूपं तदभिव्यक्तचैतन्यरूपं वाज्ञानमननुभूतं कल्प्यतइत्यर्थः। ज्ञानप्रतिफलितं तद्व्यंग्यं वाज्ञानांतरं कल्प्येत इतियावत्। इच्छाद्यंतःकरणवृत्तीत्येवपाठः। अंतःकरणस्येच्छादिरूपेण परिणतत्वादिच्छारूपाया अंतःकरणवृत्तिस्तत्प्रतिफलितं तद्व्यंग्यंवा किंचिदिच्छादिकमपि कल्पनीयं स्यादित्याद्यतिप्रसंगइत्यर्थः। प्रभाप्रतिफलितं प्रभायां प्रतिफलितं। तमेव भांतमिति श्रुतौ तं भांतं प्रकाशमानं वृत्तिप्रतिफलितचैतन्यरूपात्मानं अनु घटादिकं प्रकाशत इति श्रुतिबलाद्वृत्तिप्रतिफलितचिद्विषयत्वं घटादीनामंगीकार्यमिति तृतीयंनिराचष्टे॥ तमेवेति॥

विषयस्यापरोक्ष्यान्यथानुपपत्त्या चैतन्यरूपं ज्ञानमंगीकार्यमितिचतुर्थं पराचष्टे॥ चैतन्येति॥ विषयस्यापरोक्ष्यान्यथानुपपत्त्या चैतन्यविषयत्वं नांगीकार्यं चैतन्यविषयत्वाभावेपि विषये आपरोक्ष्यं तु वृत्तिगतो यः साक्षात्कारत्वरूपो विशेषस्तेनैवोपपन्नं। अयं च विशेषस्तवाप्यावश्यक इत्युक्तं चैतन्येति। वृत्त्या चैतन्यव्यक्त्यंगीकारेण चैतन्याभिव्यंजकत्वार्थं वृत्तिगतविशेषस्यावश्यकत्वादित्यर्थः। अन्यथा परोक्षवृत्त्यापि चैतन्याभिव्यंजनापत्तेरिति भावः। नन्वपरोक्षवृत्तिनिष्ठं साक्षात्कारत्वं घटादिवृत्तौ कुत इत्यत उक्तं। इंद्रियजन्यत्वेति॥ अंतः करणवृत्तेश्चक्षुरादिद्वारा बहिर्निस्सृतत्वादिति भावः। अपरोक्षवृत्तिगतापरोक्षत्वविशेषेण विषये आपरोक्ष्यं युक्तं। परोक्षवृत्तिगतेन ज्ञानत्वरूपविशेषेण विषयस्य ज्ञातत्ववदित्याह॥ परोक्षवृत्तीति॥ विषये ज्ञातत्वं परोक्षवृत्तिगतज्ञानत्वविशेषाधीनमित्युक्ते इच्छादिवृत्तावपि ज्ञानत्वरूपविशेषप्रसक्तौ सत्यां वृत्तावपि संकोचः कार्य इत्यत उक्तं॥ इच्छादीति॥ इच्छादिरूपा यांतः करणवृत्तिः तदनिष्ठेनेत्यर्थः। ज्ञातत्वेपि पुनरवांतरभेदोस्त्येवेत्याह॥ अनुभवादीति॥ अनुभवगतो विशेषो न ज्ञानमात्रनिष्ठ इति ज्ञानेपि संकोचः कार्य इत्याशयेन स्मृत्याद्यनिष्ठेनेत्युक्तं। अनुभूतत्वेपि पुनरवांतरभेदोस्तीत्युक्तं अनुमितत्वेति। साक्षात्कारप्रमाऽवृत्तेनानुमिति गतविशेषेण तद्विषयस्यानुमितत्ववदित्यर्थः॥ अन्यथेति॥

अंतःकरणवृत्तावपरोक्षत्वमनंगीकृत्य तस्याः परोक्षत्वमेवांगीकृत्य तत्प्रतिफलितचैतन्यएवापरोक्षत्वं न वृत्तावित्यंगीकारे परोक्षत्वापरोक्षत्वयोर्ज्ञानत्वव्याप्यत्वं न स्यात्। चैतन्यनिष्ठापरोक्षत्वस्य चैतन्य निष्ठज्ञानत्वव्याप्यत्वेपि वृत्तिनिष्ठापरोक्षत्वस्य ज्ञानत्वव्याप्यत्वाभावात्। वृत्तौ परोक्षत्वसद्भावेपि तत्र ज्ञानत्वाभावात्। भावव्युत्पत्त्या ज्ञप्तिरूपज्ञानत्वं चैतन्यस्यैव वृत्तेस्तज्ज्ञप्तिरूपचैतन्यव्यंजकतया ज्ञानकरणत्वमेव न ज्ञानत्वमित्यंगीकारात्। तथावृत्तिगतपरोक्षत्वस्य वृत्तिव्याप्यत्वमेव स्यात्। तथाचकरणभावव्युत्पत्तिभ्यां वृत्तिचैतन्ययोरुभयोरपि ज्ञानत्वात्तन्मध्ये यद्भावव्युत्पत्त्या ज्ञप्तिरूपमेकं ज्ञानं तन्निष्ठं यज्ज्ञानत्वं तद्व्याप्यत्वं सर्वजनसिद्धं न स्यात्। अतः सर्वजनसिद्धैकज्ञानत्वव्याप्यत्वनिर्वाहाय वृत्तावपि ज्ञानत्वेंगीकार्ये इंद्रियत्वेनेंद्रियजन्यतयाचापरोक्षत्वे चांगीकार्येऽपरोक्षज्ञानरूपवृत्तिविषयत्वमात्रेण विषये आपरोक्ष्योपपत्तौ तदर्थं

तद्विषयकव्यवहारजनकत्वे तद्विषयकत्वरूपं साध्यं न प्रयोजकं किंतु तदन्याविषयकत्वमेवेत्यत उक्तं॥ तद्व्यवहारेति॥ तदन्याविषयकत्वस्य घटव्यवहारजनके घटपटाविति समूहालंबनज्ञाने व्यभिचारेण गौरवेणच तद्विषयकव्यवहारजनकत्वेऽप्रयोजकत्वादितिभावः। ननु चितो ज्ञानरूपत्वेन क्रियात्वात्कथं तस्याः स्वविषयकत्वेन कर्मत्वं क्रियायाः कर्मत्वादर्शनादित्यतउक्तं॥ अभिधानस्येति॥ अभिधाया इत्यर्थः। अभिधेयत्वस्य केवलान्वयित्वादभिधारूपक्रियाया अपि अभिधाविषयत्वेन कर्मत्वमस्ति तद्वदित्यर्थः।

नन्वथापि चितश्चिद्विषयत्वं नोपपन्नं भेदाभावादित्याशंक्य कल्पितभेदसद्भावाद्युक्तमित्येतद्दृष्टांता भ्यामुपपादयति॥ कल्पितभेदेनेति॥ बिंबेति॥ त्वन्मते बिंबप्रतिबिंबयोरभेदेपि कल्पितभेदमादाय यथा प्रतिबिंबस्य बिंबानुमापकत्वं यथावा जीवब्रह्मणोरभेदेपि कल्पितभेदमादाय ज्ञातृज्ञेयभावः तथा चित एकत्वेपि कल्पितभेदमादाय स्वविषयकांतःकरणवृत्ति प्रतिफलितचिद्विषयत्वसंभवादित्यर्थः॥ अन्यथेति॥ आत्मनः स्वाकारवृत्तिप्रतिफलित चिद्विषयत्वाभावे। तया स्वाकारवृत्तिप्रतिफलितचिता। यथा घटादेः स्वाकारांतःकरणवृत्तिप्रतिफलितचिद्विषयत्वेन घटाज्ञाननिवृत्तिर्दृष्टा एवमात्मनोपि तदज्ञाननिवृत्त्यर्थं स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वे वाच्ये व्यभिचार एवेति भावः। ननु तदाकारवृत्त्यैव तदज्ञाननिवृत्तिरास्तां तथाच चिद्विषयत्वाभावान्नव्यभिचार इत्यतआह॥ तदाकारेति॥ तर्ह्यनयैव रीत्या घटाद्याकारवृत्त्यैव घटाज्ञाननिवृत्त्युपपत्तौ घटादेरपि चिद्विषयत्वाभावापत्त्याऽसिद्धिः स्यादितिभावः। ननु घटाकारवृत्तौ चित्प्रतिफलनं विना नाऽज्ञाननिवृत्तिः घटाद्याकारवृत्तिमात्रस्याज्ञानानिवर्तकत्वात्। यथाहुः

> ''तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृणं दहेत्।
> सूर्यकांतमुपारुह्य तन्न्यायं चितियोजये''दिति।

अतोंतःकरणवृत्तिप्रतिफलितचिद्विषयत्वं घटादेर्वक्तव्यमितिचेतर्ह्यात्मन्यपि वृत्तिमात्रस्याज्ञानानिवर्तकत्वादात्मनो प्यात्माकारवृत्तिप्रतिफलितचिद् विषयत्वं वाच्यमिति समं। नन्वात्मनोंतःकरणवृत्तिप्रतिफलितचिद् विषयत्वाभावे प्यात्मनःस्फुरणरूपत्वात्स्फुरणरूपात्माकारवृत्त्या तदज्ञाननिवृत्तिर्युक्तेतिचेत्तर्हिघटस्यापि स्फुरणरूपत्वात्स्फुरण रूपघटाकार वृत्त्यैवाज्ञाननिवृत्त्युपपत्तेरस्याप्यंतःकरणवृत्तिप्रतिफलितचिद्विषयत्वं न स्यादिति समं। ननु घटस्य स्फुरणरूपत्वे घटाज्ञानमेव न स्यादितिचेत् तर्हि ब्रह्मणोपि स्फुरणरूपत्वे तदज्ञानमपि न स्यादिति समं। नन्वज्ञानाविरोधिस्फुरणरूपं ब्रह्मेति चेत्तत्राह। अज्ञानेतीति संप्रदायः। किंच घटादौ स्वाकारेंद्रियजन्य वृत्तिविषयत्वमात्रं विहाय तत्प्रतिबिंबित चैतन्यरूपज्ञानविषयत्वं कस्मात्कल्प्यते किं घटादिव्यवहारार्थं उतानुभवबलात् अथ श्रुतिबलात् यद्वा घटादौ विषये स्वतोपरोक्षाभावादपरोक्षचित् संबंधेनैवापरोक्ष्यस्य वक्तव्यत्वात् घटादि विषयस्यापरोक्ष्यसिद्ध्यर्थं। नाद्यइत्याह॥ अस्फुरणरूपेष्वित्यादिना॥ इंद्रिय जन्यांतःकरणवृत्तावेव चित्प्रतिफलनं नत्वनुमित्यादिरूपांतःकरणवृत्ताविति हि परसिद्धांतः। एवंच यथानुमित्यादिविषयेष्वतींद्रियेषु धर्मादिषु वृत्तिप्रतिफलितचिद्विषयत्वाभावेपि व्यवहारः तथैंद्रियकेष्वपि घटादिषु वृत्तिप्रतिफलितचिद्विषयत्वाभावेपि स्वाकारेंद्रियजन्यवृत्तिविषयत्वमात्राद्व्यवहारोस्तु। एवंच व्यवहारान्यथानुपपत्त्या न वृत्तिप्रतिफलितचिद्विषयत्वंकल्प्यमित्यर्थः। नन्वतींद्रियार्थानां स्फुरणरूपत्वाद्वृत्तिप्रतिफलितचिद्विषयत्वाभावेपि व्यवहारो भविष्यतीति न दृष्टांतइत्यतउक्तं॥ अस्फुरणरूपेष्विति॥ नद्वितीयइत्याह॥ घटादाविति॥

गगनादेर्व्याप्तत्वेन हानोपादानयोरभावाद्भागासिद्धिः। तत्रोपेक्षाबुद्धिविषयत्वसद्भावेपि कदलीफलादावुपादेयेऽसिद्धिः। तत्राप्युपादानबुद्धिविषयत्वसत्त्वेपि अहिकंटकादौ हेये तदभावादसिद्धिः। तत्र हानविषयत्वसत्त्वेपि तस्योपेक्षणीयतृणादावभावादसिद्धिरित्येवं प्रत्येकं हानादिविषयत्वस्य हेतुत्वे भागासिद्धिरित्यर्थः। ननु हानाद्यन्यतमविषयत्वस्य विवक्षितत्वान्नलक्षणस्य परस्पराव्याप्तिः नाप्यनुमाने भागासिद्धिरितिचेन्न। तथाप्यानंदरूपतया सर्वोपादेये ब्रह्मणि व्यभिचारापरिहारादितिद्रष्टव्यमितिसंप्रदायः॥ आत्मन्यपीति॥ अयमात्मेत्याद्यभिलपनरूपव्यवहाराख्यफलव्याप्यत्वस्यात्मन्यपि भावाद्व्यभिचारइतिभावः॥ अतीतादाविति॥ असति धर्मिणि धर्मजननायोगादितिभावः। तथाचोभयरीत्या भागासिद्धिरितिभावः॥ अतीतादाविति॥ तत्रातीतेऽनागते च सन्निकर्षासंभवात्तत्रांतःकरणवृत्तेश्चक्षुरादिद्वारा बहिर्निस्सरणाभावेन तत्प्रतिफलित चैतन्यतदभिव्यक्ताधिष्ठानचैतन्यरूपफलाभावेन तद्व्याप्यत्वाभावादितिभावः। तदपि अतीतादिकमपि॥ नित्यातींद्रिय इति॥ धर्मादीनांनित्यातींद्रियत्वेन चक्षुराद्यसन्निकृष्टतया द्वाराभावेनांतःकरणवृत्तेर्न बहिर्निस्सरणं। किंनामांतरेव तदाकारवृत्तिर्भवतीति तन्मतं। एवंचांतःकरणवृत्तेश्चक्षुरादिद्वाराबहिर्निस्सरणाभावेन तत्प्रतिफलितचैतन्य तदभिव्यक्ताधिष्ठानचैतन्यरूपफलयोरसंभवेन तद्व्याप्यत्वाभावाद्भागासिद्धिरित्यर्थः॥ योगिनं प्रतीति॥ धर्मादियोंगिप्रत्यक्षत्वाद्योग्यंतःकरणवृत्तेर्बहिर्निस्सरणसंभवेन तत्प्रतिफलितचैतन्यादिरूपफलव्याप्यत्वं संभवतीति नासिद्धिरितिभावः॥ चोदनैकेति॥ यथोक्तं जैमिनिना ''चोदनागम्योर्थो धर्म'' इति। चोदना विधिवाक्यं। तथाच शास्त्रैकसमधिगम्यत्वेन योगिप्रत्यक्षविषयत्वमपि धर्मादीनां नास्तीत्युक्तत्वेन त्वया धर्मादीनां योगिनं प्रति फलव्याप्यत्वांगीकारे तद्विरोधादित्यर्थः। नित्यातींद्रियस्यापि योगिप्रत्यक्षविषयत्वेनापरोक्षत्वेऽतिप्रसंगमाह॥ तुच्छमपीति॥ तथाचासच्चेदपरोक्षतया न प्रतीयेतेत्यापादनानुपपत्तिरितिभावः॥ पक्षैकदेशइति॥ चक्षुरादिद्वारा बहिर्निस्सृतांतः करणवृत्तिप्रतिबिंबितचैतन्यादिरूपफलव्याप्यत्वं बाह्यपदार्थएवांगीकृतं न साक्षिवेद्याविद्याद्यांतर पदार्थे अतो भागासिद्धिः। तथाशुक्तिरूप्यादेःप्रातिभासिकत्वेन साक्षिवेद्यांतरपदार्थत्वांगी कारान्नोक्तवृत्तिप्रतिबिंबितचैतन्यादिरूपफलव्याप्यत्वं त्वयांगीकृतमिति दृष्टांते साधनवैकल्यंचेत्यर्थः॥ सामान्यस्यापीति॥ दृश्यत्वरूपसामान्यस्यापि साधारणस्यापीत्यर्थः। ननु ब्रह्मणि वृत्तिव्याप्यत्वसत्त्वेपि न साधारणं दृश्यत्वमस्तीत्यत उक्तं॥ वृत्तिव्याप्यत्वरूपविशेषस्येति॥ ऋग्वेदिनि ब्राह्मणत्वबद्विशेषसद्भावे सामान्यस्यापि सत्त्वाद्ब्रह्मणि व्यभिचारइतिभावः। कदाचिदिति विशेषणं भागासिद्धिवारणायेत्याशयेनोपपादयति॥ अतीतादेरपीत्यादिना॥ कदाचित्स्वसत्ताकाले॥ स्वाकारेति॥ स्वविषयकेत्यर्थः॥ आंतरपदार्थस्येत्यर्थः॥ साक्षीति॥ साक्षिरूपचिदित्यर्थः। नित्यातींद्रियेभागासिद्धिवारणाय कथंचिदित्युक्तमित्याशयेनोपपादयति॥ ज्ञातत्वेनेत्यादिना॥ धर्मादिकं जानामीति ज्ञानावच्छेदकत्वेनवा न जानामीत्यज्ञानावच्छेदकत्वेनवा कथंचित्साक्षिरूपचिद्विषयत्वादित्यर्थः। अस्य हेतोर्नब्रह्मणि व्यभिचारइत्याह॥ दृग्रूपस्येति॥ चिद्रूपस्येत्यर्थः॥ तदविषयत्वादिति॥ ज्ञानरूपत्वेन धात्वर्थक्रियारूपस्य ब्रह्मणः कर्मत्वासंभवेन चिदविषयत्वादित्यर्थः। नित्यातींद्रियाणां यथाज्ञानाद्यवच्छेदकतया कथं चित्साक्षिरूपचिद्विषयत्वमस्ति तथा ब्रह्मणोपि ज्ञानाद्यवच्छेदकतया कथंचिच्चिद्विषयत्वमस्तीत्याह॥ नित्यातींद्रियमिति॥ प्रकारांतरेणापि चितो ब्रह्मणश्चिद्विषयत्वमुपपादयति॥ तद्व्यवहारेति॥ चित् चिद्विषयिणी॥ तद्विषयकव्यवहारजनकत्वात्। यद्यद्विषयकव्यवहारजनकं तत्तद्विषयं यथाघटव्यवहाजनकं घटज्ञानं घटविषयकमित्यनुमानं द्रष्टव्यं। ननु ज्ञानस्य

संभवतीत्यर्थः। एतादृशवृत्तेरप्रामाणिकत्वात्कथंचिदित्युक्तं। तद्विषयत्वमेव हि तदाकारत्वमिति भगवत्पादवाक्यं मनसि निधायाह॥ तस्मादिति॥ ननु शशविषाणशब्दत्तदाकारं ज्ञानमुपजायतइति तावदनुभवसिद्धं। नतु तत्सविषयकं। सकलसामर्थ्यविधुरस्य कर्मत्वापरपर्यायविषयत्वायोगादेव। प्रकृतेपि तथास्त्वितिचेत्। अत्र ब्रूमः। शशविषाणशब्दादुपजायमानं ज्ञानं सविषयं निर्विषयंवा। निर्विषयत्वे ज्ञानमेव न स्याद्भटवत्। सविषयत्वे कथमकर्मकं स्यात् तयोरेकत्वात्। अथ कथं सकलसामर्थ्यविकलस्य शशविषाणस्य कर्मत्वमितिचेत् विषयत्वमपि कथं। ननु न विषयत्वं नाम वस्तुसामर्थ्यं किंनाम करणसामर्थ्याद्यदुल्लेखिज्ञानमुपजायते स तस्य विषय इत्युच्यतइतिचेत्। अथ ज्ञानं प्रति कर्मत्वमपि किमधिकं पश्यसि कर्तृकारकाद्यन्यत्वे सति ज्ञानजनकत्वमितिचेन्न। ज्ञानजनकत्वमित्यत्र किं ज्ञानत्वावच्छिन्नज्ञानजनकत्वं विवक्षितं अपरोक्षज्ञानजनकत्वं वा। नाद्यः। ज्ञानं प्रत्यर्थस्य व्यभिचारेण कस्मिन्नपि ज्ञाने जनकत्वासंभवात्। नद्वितीयः। यद्यप्यपरोक्षज्ञाने विषयस्य नियतपूर्ववृत्तित्वमस्ति तथापि नानन्यथासिद्धिः। विषयस्येंद्रियसन्निकर्षनिष्पादकत्वेनान्यथासिद्धत्वात्। नच वर्तमानविषयकजन्यप्रत्यक्षत्वावच्छेदेनाव्यभिचारादनन्यथासिद्धेश्चकर्मणोपिहेतुत्वं। अन्यथा विषयसन्निकर्ष निष्पादकत्वेन करणस्याप्यन्यथासिद्धतया जनकत्वं न स्यादिति वाच्यं। वर्तमानविषयकानुमितित्वावच्छेदेनापि कर्मणो हेतुत्वापत्तेः। सामान्यरूपतया लघुभूतविद्यमानविषयकज्ञानत्वावच्छेदेनापि जनकत्वापत्तेश्च। तत्र विषयस्य व्याप्या दिलक्षणसन्निकर्षनिष्पादकत्वेनान्यथासिद्धत्वेऽत्रापि तथास्तु। नचैवमिंद्रियस्यापि विषयसन्निकर्षजन कत्वेनान्यथासिद्धतयाऽजनकत्वमस्त्वित्युक्तमितिवाच्यं। या क्रिया सा करणजन्येति क्रियायाः करणजन्यत्वनियमेन व्यापारवत एवच करणत्वेन सन्निकर्षजनकस्यापि चक्षुरादेःज्ञानजनकत्वं युक्तमिति न विषयस्य करणसमानयोगक्षेमवत्ता। ननु चक्षुरादेःकरणस्य करणत्वसिद्ध्यर्थं कर्मसन्निकर्षरूपव्यापारजननद्वारा क्रियाजनकत्वं। एवमेव घटादेःकर्मत्वसिद्ध्यर्थं करणसन्निकर्षरूपव्यापारजननद्वारा क्रियाजनकत्वमस्तु अन्यथा करणत्ववत्कर्मत्वमपि न स्यादितिचेन्न। नहि करणत्वमिव कर्मत्वमपि व्यापारवत्त्वं। अतीतादिविषयकशाब्दादिज्ञानकर्मण्यव्याप्तेरिति। यथोक्तं तत्वोद्योतटीकायां। ''यत्र शाब्दादौ ज्ञाने विनापि विषयसत्त्वेन करणसन्निकर्षोत्पत्तिस्तत्रासतोपि कर्मत्वे किमनुपपन्न''मिति। ननु विनापि विषयसत्त्वं सन्निकर्षोत्पत्तिरिति कथमुच्यते कथंवा शाब्दानुमितिरूपज्ञानस्थले सन्निकर्षापेक्षेतिचेन्न। नहि सन्निकर्षो विषयसत्त्वव्याप्यः सामान्यादेरतीतादिविषयप्रत्यासत्तित्वाभ्युपगमात्। नवा शब्दादिकमसन्निकृष्टकरणं। घटशब्दादिना पटादेर्धूमेन घटादेरपि बोधप्रसंगात्। नच शक्तिव्याप्त्यादिकमेवातिप्रसंगभंजकमिति वाच्यं। तस्यैव सन्निकर्षशब्दार्थत्वोपगमात्। नन्वेवं पद्धत्यादिविरोधः। तत्र प्रमातृप्रमेयव्यवच्छेदार्थं साधनग्रहणमित्युक्त्या प्रमेयापरपर्यायस्य विषयस्यापि जनकत्वांगीकारादितिचेन्न। तस्य पररीत्यांगीकारवादत्वादित्यवसेयं॥

अन्यथेति॥ तद्विषयत्वमेव तदाकारत्वमित्यनंगीकारइत्यर्थः। घटादिज्ञाने आत्मज्ञाने इत्यनयोरनंतरं तदज्ञाननिवर्तकत्व इतिशेषः। ननु सद्विविक्तत्वरूपमिथ्यात्वाख्यसाध्यस्यापि तुच्छे सत्त्वात् न तत्र व्यभिचार इत्यतउक्तं॥ अनिर्वचनीयत्वादिकमित्यादि॥ आदिपदेन ज्ञाननिवर्त्यत्वादि। ननु तत्र दृश्यत्वाख्यहेतोरेवाभावान्न व्यभिचार इत्यतआह॥ असद्वैलक्षण्येति॥ अभावज्ञानाय प्रतियोगिनो ज्ञातव्यत्वादितिभावः॥ भट्टरीत्येति॥ व्यवहारे भट्टनय इत्यंगीकारादितिभावः। व्यवहार किंहानादिरूपो विवक्षितः अभिलपनादिरूपोवा। नाद्यइत्याह॥ हानादेरिति॥ आदिपदेनोपादानोपेक्षे ग्राह्ये। तथाच

कत्वाद्ब्रह्माज्ञाननिवर्तकत्वं युक्तमित्याशंक्य निराकरोति॥ नचेति॥ तत्र घटाद्यज्ञाननिवर्तकत्वे। कुतो नचेत्यत आह॥ गौरवादिति॥ भावरूपत्वेन लघुत्वात् समानविषयकत्वमेव तंत्रं नतु तदन्याविषयकत्वं तंत्रं। अभावरूपत्वेन गुरुत्वादितिभावः॥ दीपेति॥ यद्विषयकं तमः तद्विषयकस्यैव दीपप्रकाशस्य विरोधितमोनिवर्तकत्वं। तथा यद्विषयको द्वेषः तद्विषयिण्या अयं मे प्रियो भूयादितीच्छाया विरोधिद्वेषनिवर्तकत्वं समानविषयकत्वेनैव दृष्टमित्यर्थः। नन्वत्रापि तदन्याविषयकत्वमेव तंत्रमस्त्वित्यस्वरसादाह॥ घटपटाविति॥ घटपटाविति समूहालंबनज्ञानस्य घटाज्ञाननिवर्तकत्वमस्ति तत्र तदन्याविषयकत्वं नास्ति घटान्यपटविषयकत्वात्। तथा विशिष्टज्ञानेन विशेषणाज्ञानं निवर्तते। तत्रच न तदन्याविषयकत्वं विशेषणान्यविशेष्यविषयकत्वादिति भावः॥ ज्ञानत्वायोगस्येति॥ नतावद्ब्रह्मरूपज्ञानस्य ब्रह्मान्यो विषयः। तस्य मिथ्यात्वेन ब्रह्मज्ञानस्य भ्रमत्वापत्तेः। ब्रह्मणस्तु विषयत्वं कर्तृकर्मविरोधादयुक्तमित्येवं निर्विषयत्वाद्ब्रह्मज्ञानस्य ज्ञानत्वमेवायुक्तमिति वक्ष्यमाणत्वादित्यर्थः। यथोक्तं। ''निर्विषयत्वे ज्ञानमेव न स्याद्धटव'' दिति। ननु तदाकारत्वमपि तद्विषयकत्वाभावे कथंयुक्तमित्यतआह॥ तच्चेति॥ तदाकारत्वंचेत्यर्थः॥ तद्विषयत्वाभावेपीति॥ ज्ञानस्य तद्विषयकत्वाभावेपीत्यर्थः॥ करणसामर्थ्यादेवेति॥ आकांक्षादिमच्छब्दरूपकरणस्य तदाकारज्ञानजनकत्वरूपसामर्थ्यादेव न विषयसामर्थ्यादित्यर्थः। तथाहि शशशृंगादिशब्दाच्छशशृंगाद्याकारं तावज्जायते। तत्र तदाकारत्वेन तद्विषयकत्वं प्रयोजकं। विषयत्वं हि कर्मत्वं। तच्च कारकविशेषः। तस्य च सकलसामर्थ्यविधुरे शशशृंगेऽभावात्। तस्मादाकांक्षादिमच्छब्दरूपकरणसामर्थ्याज्जायमानं शशशृंगाविषयकमपि शशशृंगाकारमेव जायत इत्यनुभवसिद्धं। एवं ब्रह्मणःसकलसामर्थ्यविधुरस्य कारकविशेषकर्मत्वापरपर्यायविषयत्वाभावेप्याकांक्षादिमद्वेदांतवाक्यरूपकरणसामर्थ्याज्जायमानं ज्ञानं ब्रह्माविषयकमपि ब्रह्माकारमेव जायतइतिभावः।

ननु ब्रह्मज्ञानस्य ब्रह्मविषयकत्वाभावे दृश्यतेत्वग्रया बुद्ध्येति ब्रह्मणो दृश्यत्वोक्तिविरोध इत्यतआह॥ दृश्यत्वेति॥ तद्विषयमिति॥ तदाकारत्वविषयमित्यर्थः। तथाच दृश्यत इत्यस्य वेदांतजन्यब्रह्मज्ञानं तदाकारं भवतीत्येवार्थो वक्तव्य इतिभावः। वेदांतजन्या वृत्तिरात्माकारेत्यत्र विकल्पयति॥ स एवेति॥ स एव आत्मैव। तदाकार एव आत्माकारएव। तदाकारइव आत्माकारसदृशइत्यर्थः॥ वृत्त्यनाश्रितस्येति॥ आकारो ह्याकारिणमाश्रयते। नचात्माख्याकारो वृत्तिरूपमाकारिणमाश्रयते अतो नात्मावृत्तेराकारइत्यर्थः॥ साकारवादेति॥ ज्ञानस्येतिशेषः। बौद्धमत एव ज्ञानं साकारं नत्वन्मतेऽत इदं तवानिष्टमितिभावः। इदं च दूषणं पक्षत्रयेपि द्रष्टव्यं॥ जडाद्याकारेति॥ जडानानंदपरिच्छेदानृतरूपाकारयुक्ताय वृत्तेर्ब्रह्म संबंधिज्ञानानंदापरिच्छेदसत्यरूपाकारयुक्तत्वं न संभवतीत्यर्थः। नन्वसाधारणो ज्ञानानंदापरिच्छेदादिरात्माकारो वृत्तेराकार इति न ब्रूमः। किंतु सर्वसाधारणी सत्तैवेत्यतआह॥ सत्तयेति॥ सत्ताया घटात्मोभयनिष्ठत्वादितिभावः। ननु सत्तादिरूपसाधारणज्ञानादिरूपासाधारणा कारव्यतिरिक्तःसंस्थानविशेष एवात्माकारो वृत्तेराकारइत्युच्यत इत्यतआह॥ आत्मन इति॥ आत्माकारसदृशाकारत्वं वृत्तेरिति तृतीयोपि नसंभवतीत्यत्रोक्तमतएवेति हेतुं विशदयति॥ ज्ञानेति॥ अतिप्रसक्तेरिति॥ घटज्ञानस्याप्यात्माकारतापातादित्युक्तातिप्रसक्तेरित्यर्थः॥ घटतद्वृत्त्योरिति॥ यथा तटाकोदकस्य कुल्यात्मना बहिर्निस्सृतस्य केदारान्प्रविष्टस्य केदारवदेवचतुष्कोणत्वाद्याकारत्वं भवति तद्वदेव सावयवस्य तैजसस्यांतःकरणस्य चक्षुरादिद्वारा बहिर्निस्सृतस्य घटादिविषयं व्याप्य घटाकारत्वं भवति। सेयं वृत्तिरित्युच्यमानत्वेन घटतद्वृत्त्योःपृथुबुध्नोदरत्वादिसंस्थानसाम्यं

किंच चरमवृत्त्युपहितस्यात्मनःचरमवृत्तिविषयत्वं वदन्प्रष्टव्यः। वेदांतजन्यचरमवृत्तौ ब्रह्मविशेषणीभूता चरमवृत्तिःप्रतीयते नवेति। आद्ये आह॥ चरमवृत्तेरिति॥ स्वेति॥ स्वशब्देन चरमवृत्तिर्ग्राह्या। तद्विषयश्चरमवृत्त्युपहितं ब्रह्म तदंतर्भवि ब्रह्मवत्तद्विशेषणीभूतायाःस्वस्यावृत्तेरपि स्वविषयत्व इत्यर्थः॥ स्वप्रकाशत्वस्येति॥ स्वकर्मकप्रकाशत्वं चकर्तृकर्मविरोधात्त्वया नांगीकृतमितिभावः॥ अप्रमात्वस्यचेति॥ चरमवृत्त्युपहितस्य ब्रह्मणो मिथ्यात्वात्तद्विषयिण्याश्चरमवृत्तेरप्रमात्वं स्यादित्यर्थः। वृत्त्युपरागः ब्रह्मणो वृत्तिसंबंधः। अत्र चरमवृत्तौ। सत्तया स्वरूपसत्तयैव। तद्व्यावर्त्यं दर्शयति॥ नत्विति॥ प्रतिभास्यतया स्वस्यां अपि चरमवृत्तेश्चरमवृत्तिविषयतयेत्यर्थः। तथात्वे चरमवृत्तेः स्वप्रकाशत्वाप्रमात्वयो रापातादेवेतिभावः। द्वितीयेत्वाह॥ बहिर्भावेचेति॥ वेदांतजन्यचरमवृत्तेर्ब्रह्ममात्रविषयकत्वेन स्वविषयकत्वानंगीकारइत्यर्थः। विषयस्येति॥ ब्रह्मणइत्यर्थः। तथाच चरमवृत्तेर्ब्रह्ममात्रविषयकत्वेन तस्मिन्वृत्तिविषयत्वसत्त्वेपि मिथ्यात्वाभावाद्व्यभिचारइत्यर्थः॥

स्वरूपेणेति॥ विशेषणाविशिष्टकेवलस्वरूपेणैव वृत्तिविषयत्वमित्यर्थः॥ विशिष्टरूपेणैवेति॥ विशेषणावच्छिन्नस्वरूपेणेत्यर्थः। तथाच हेतोरेवाभावान्नशुद्धे ब्रह्मणि व्यभिचारइतिभावः। ननु न घटादेरपि विशिष्टरूपेणैव दृश्यत्वं। निर्विकल्पकज्ञानविषयस्य घटादेः स्वरूपेणैव दृश्यत्वादतो नासिद्धिरित्यतउक्तं॥ निर्विकल्पकेति॥ ननु नित्यातींद्रियस्यापि निर्विकल्पकविषयत्वसंभवेन स्वरूपेण दृश्यत्वोपपत्तेर्नविशिष्टरूपेणैव दृश्यत्वमित्यतो नासिद्धिरितिचेन्न। नित्यातींद्रियस्य ज्ञानं न तावत्प्रत्यक्षेण भवितुमर्हं किंतु लिंगागमाभ्यामेवेति वाच्यं। अस्तु तर्हि लिंगागमाभ्यामेव धर्माद्यतींद्रियविषयकनिर्विकल्पकज्ञानोदयः। तथाच नासिद्धिरित्यतआह॥ नहीति॥ लिगंजन्यानुमितिरूपज्ञानस्य न निष्प्रकारकनिर्विकल्पकज्ञानरूपत्वं। अनुमितेर्व्यापकतावच्छेदक प्रकारकत्वनियमात्। तथा शब्देनापि जायमानं ज्ञानं न निर्विकल्पकं। तस्य शक्यतावच्छेदकप्रकारकत्वनियमात्। किंच ब्रह्मणो न स्वरूपेण वृत्तिविषयत्वं किंतु विशिष्टरूपेणैवेति यद्युच्यते तर्हि वेदांतानां कल्पितविशिष्टपरत्वेनातत्वावेदकत्वं स्यादित्याह॥ वेदांतानामिति॥ तरति शेकमिति॥ तदुपादानाज्ञानं चेति द्रष्टव्यं। यतो ज्ञानमज्ञानस्य तत्कार्यस्य वा निवर्तकमित्यङ्गीकारात्। तथाच शोकाज्ञानतरणरूपनिवृत्तिं प्रति साधनत्वेनोक्ताया आत्मसंविदो न भ्रमत्वं युक्तम्। भ्रमस्याज्ञानानिवर्तकत्वात्। किंतु प्रमात्वमेव। प्रमात्वं च तस्याः कल्पितविशिष्टाविषयकत्वेनैव वाच्यं। एवं च वेदांतानां कल्पितविशेषविनिर्मुक्त शुद्धब्रह्मज्ञानजनकत्वमेवेति तत्र व्यभिचारइत्यर्थः मोक्षसाधनेति प्रमाविशेषणं॥ तदाच्छादकस्येति॥ शुद्धावरकस्येत्यर्थः।

ननु शुद्धज्ञानाभावेपि घटादिज्ञानेन तदज्ञाननिवृत्तिर्दृष्टा यावंति ज्ञानानि तावंति तन्निवर्त्याज्ञानानीतिमतसद्भावात्। अत उक्तं मूलेति। घटज्ञानेन तदधिष्ठानचैतन्यावरकाज्ञानविवृत्तावपि सर्वजगदारोपाधिष्ठानभूतशुद्धब्रह्माच्छादकं यन्मूलाज्ञानं न तन्निवृत्तं। तन्निवृत्तिश्च शुद्धब्रह्मज्ञानेनैव। तस्य च ज्ञानाविषयत्वे तदाच्छादकमूलाज्ञाननिवृत्तिर्न स्यादित्यर्थः। ननु शुद्धज्ञानस्य शुद्धविषयकत्वाभावेपि शुद्धाज्ञाननिवर्तकत्वं किंन स्यादित्यतआह॥ ज्ञानस्येति॥ ननु ज्ञानस्याज्ञाननिवर्तकत्वेऽज्ञानसमानविषयकत्वं न तंत्रं अप्रामाणिकत्वात्। नच घटादिज्ञाने दृष्टमिति वाच्यं। घटादिज्ञानेपि तदज्ञाननिवर्तकत्वे घटान्याविषयकत्वमेव तंत्रं न समानविषयकत्वं। एवंच ब्रह्मज्ञानस्य ब्रह्माविषयकत्वेपि ब्रह्मान्याविषय

साध्यधर्मोविधीयते'' इत्युक्तेरितिभावः॥ ज्ञेयत्वाच्चेति॥ अभावज्ञानेऽधिकरणज्ञानस्य कारणत्वादित्यर्थः। नन्वज्ञाते धर्मिणीत्येतदयुक्तं स्वप्रकाशतया स्वतस्सिद्धत्वेन तज्ज्ञानसंभवात्। तत्रच वृत्तिविषयत्वरूप दृश्यत्वनिषेधोपपत्तेरित्याशंक्य निषेधति॥ नचेति॥ वृत्त्या दृश्यत्वेति॥ वृत्तिविषयत्वरूपदृश्यत्वेत्यर्थः। तथापि ब्रह्मणि वृत्तिव्याप्यत्वनिषेधो न संभवति। शुद्धं स्वप्रकाशमिति शब्दजन्यवृत्तौ ब्रह्म प्रकाशते नवा। नेतिपक्षे तस्य स्वप्रकाशत्वासिद्धेरित्याह॥ शुद्धमिति॥ आद्ये वृत्तिविषयत्वस्यैव प्राप्त्या व्यभिचारस्तदवस्थ इतिद्रष्टव्यं॥ विशिष्टवृत्ताविति॥ स्वप्रकाशत्वविशिष्टशुद्धविषयकवृत्तावित्यर्थः। किंच मिथ्यात्वे वृत्तिव्याप्यत्वापेक्षया स्फुरणमात्रस्य लघुत्वात्तस्यैव प्रयोजकत्वमस्तु। तथाच जगद्ब्रह्मणोपि स्फुरणान्मिथ्यात्वं स्यादित्याह॥ लाघवेनेति॥ इयांस्तुविशेषः। जगत्प्रमाणेन स्फुरति ब्रह्मतु स्वतःस्फुरतीति। ननु ब्रह्मणो मिथ्यात्वे तत्सत्यमित्यादिश्रुतिविरोध इतिचेत्तर्हिजगतो मिथ्यात्वेपि विश्वं सत्यमित्यादि श्रुतिविरोधसाम्यात्। ननु जगत्सत्यताश्रुतिःविमतं मिथ्या दृश्यत्वादित्यनुमानविरोधादसद्वैलक्षण्यपरेतिचेत्तर्हि ब्रह्मसत्यताश्रुतिरपि ब्रह्म मिथ्या स्फुरणादित्यनुमानविरोधादसद्वैलक्षण्यपरैव स्यादित्याह॥ तत्सत्यत्वेत॥ अभिधया शक्त्या॥ तत्प्रयोगेति॥ शुद्धपदप्रयोगेत्यर्थः॥ वैयर्थ्यादिति॥ अर्थबोधकत्वरूपप्रयोजनाभावादिति भावः। शुद्धबोधकत्वे चदृश्यत्वप्राप्त्या व्यभिचारइति हृदयं॥ शुद्धेति॥ दृश्यत्वहेतोरन्वयव्यतिरेकित्वाद्धेतुसाध्यव्यतिरेकग्रहाधिकरणत्वेन शुद्धस्य ज्ञेयत्वादित्यर्थः। ननु व्यतिरेकग्रहोपि विशिष्टएवास्तामित्यत उक्तं॥ विशिष्टइति॥ ननु विशिष्टस्य ज्ञानविषयत्वे विशेष्यभूतशुद्धस्यापि तत्सिद्धमित्ययुक्तं। विष्णवे शिपिविष्टायेत्यादौ यथा देवतात्वं न विशेष्यभूतविष्णुमात्रे नवा शिपिविष्टे किंनाम शिपिविष्टत्वविशिष्ट एव एवंवृत्तिविषयत्वमपि विशिष्ट एव। नतु विशेष्येपि विशिष्टस्य विशेष्यातिरिक्तत्वादित्याशंक्य निषेधति॥ नचेति॥ विषयत्वमपि ज्ञानविषयत्वमपि॥ देवतात्ववदेवेति॥ तस्य शिपिविष्टमात्रेऽभावादितिभावः। विषयत्वस्य ज्ञानविषयत्वस्य॥ भागेति॥ कर्तृत्वादि रूपविशेषणभागस्यापि जगदंतःपातित्वादितिभावः॥ नतु विशेष्ये घटइति॥ ततश्चतस्य मिथ्यात्वं न स्यादितिभावः। विशिष्टएव दृश्यत्वं नतु विशेष्यइत्यंगीकारे बाधकांतरमाह॥ विशिष्टइति॥ ननु विशिष्टज्ञानानंतरं व्यवधानेन विशेष्यज्ञानं जायते तज्ज्ञानादेव विशेष्यविषयकाज्ञानस्य निवृत्तिर्नतुविशिष्टज्ञानात् अतो विशिष्टे ज्ञातेपि विशेष्येऽज्ञानादिकमुपपद्यतइत्यतआह॥ दंडी चैत्र इति ज्ञानेनैवेति॥ तथाच व्यवहितविशेष्य ज्ञानकल्पनमप्रामाणिकमितिभावः॥ अग्नीषोमयोरिति॥ यथा देवतात्वपर्याप्त्यधिकरणत्वमग्नीषोमयोरेव नैकस्य। एवं दृग्विषयत्वपर्याप्त्यधिकरणत्वं कर्तृत्वादिविशेषणब्रह्मणोरेव नैकैकस्येति केवले ब्रह्मणि न व्यभिचार इतिभावः। एतेनेत्युक्तं विशदयति॥ अनुभवेति॥ दंडी चैत्र इति ज्ञाने केवले विशेष्येपि ज्ञानविषयत्वानुभवेन तद्विरोधादित्यर्थः॥ आदिपदेन घटत्वघटयोरेव वृत्तिविषयत्वपर्याप्त्यधिकरणत्वप्राप्त्या केवले घटे तदभावापातेन भागासिद्धचापत्तेरित्यवधेयं।

ननु ब्रह्मणो दृश्यत्वेऽदृश्यत्वश्रुतिविरोध इत्यतआह॥ अत एवेति॥ ब्रह्मणो दृश्यत्वस्य युक्त्योपपादितत्वादेवेत्यर्थः। सर्वथा दृश्यत्वपरत्वे बाधकमाह॥ अन्यथेति॥ यदित्यनेन ब्रह्मोद्दिश्य तत्रादृश्यत्वादिकं विधीयते। तथाच यदित्यादिपदेनैव ब्रह्मणो ज्ञातत्वात्तस्य पुनरदृश्यत्वाभिधाने स्वक्रियाविरोध इतिभावः॥ तथाचोक्तं। ''यतइत्यादिकैर्वद''न्नित्यादि॥ एतेनेति॥ चरमवृत्त्युपहितस्यात्मन एव चरमवृत्तिविषयत्व रूपदृश्यत्वांगीकारे उपधेयस्य शुद्धस्यापि वृत्तिविषयत्वस्य प्राप्तत्वेन व्यभिचारादिति पूर्वोक्तरीत्या निरस्तमित्यर्थः।

ब्रह्मणि स्वप्रकाशत्वस्य व्यावहारिकत्वेन पारमार्थिकब्रह्मसमसत्ताकत्वाभावात्। तथा धर्मिसमसत्ताकस्यानुभूतित्वरूपहेतोः पक्षेऽभावेनासिद्धिश्चस्यात् ब्रह्मण्यऽनुभूतित्वस्यापि व्यावहारिकत्वेन पारमार्थिकब्रह्मसमसत्ताकत्वाभावादित्यपि स्यात्। एवं विपक्षे साधनाभावमात्रमव्यभिचारो न भवति। तथात्वे पर्वतो धूमवान्वह्नेरित्यत्रापि विपक्षेऽयोगोलके वह्निरूपसाधनाभावस्यारोपितस्य सत्त्वादव्यभिचारित्वापत्तेः। तस्माद्धर्मिसमसत्ताकः साधनस्याभावोऽव्यभिचारित्वं विपक्षेऽयोगोलके व्यावहारिके वह्निरूपसाधनाभावस्य प्रातिभासिकत्वेन धर्मिसमसत्ताकत्वाभावान्नाव्यभिचारइतिवाच्यं। तथाच मिथ्यात्वसाधकदृश्यत्वानुमानस्य व्यभिचारःस्यात्। ब्रह्मणि दृश्यत्वरूपं यत्साधनं तदभावस्याऽद्वैतभंगापत्त्या ब्रह्मरूपधर्मिसमसत्ताकत्वाभावेनाव्यभिचारित्वलक्षणाभावात्। तस्मात्स्वप्रकाशत्वानुमाने व्यावहारिकस्य साध्यस्य व्यावहारिकस्य हेतोश्चपक्षे सत्त्वमात्रेण बाधासिद्धी परिहरणीये। एवमेव विपक्षे ब्रह्मणि व्यावहारिकस्य दृश्यत्वस्य सत्त्वाव्यभिचारस्तदवस्थः। ननु तथापि नात्मनि व्यभिचारः। धर्मिसमसत्ताकदृश्यत्वादिति दृश्यत्वे धर्मिसमसत्ताकत्वविशेषणं दीयत इति चेत्तर्हि दृश्यत्वं नाम वृत्तिव्याप्यत्वं व्याप्यत्वंचविषयत्वं। एवंच धर्मिसमसत्ताकविषयत्वादित्येवास्तु। वृत्तीतिविशेषणं व्यर्थं। नच ब्रह्मणि धर्मिसमसत्ताकं विषयत्वमस्तीति तत्र व्यभिचारवारणाय वृत्तीति विशेषणमितिवाच्यं। ब्रह्मणि धर्मिसमसत्ताकस्य कस्यापि धर्मस्याभावेन धर्मिसमसत्ताकविषयत्वरूपधर्मस्याप्यभावेन हेतोरेवाभावेन व्यभिचाराप्रसक्त्या वृत्तीति विशेषणं व्यर्थमेवस्यादित्याह॥ पक्ष इत्यारभ्य मिथ्यात्वेहेतुः स्यादित्यंतेन ग्रंथेन॥ धर्मिसमसत्ताकं साध्यं नास्तीत्युपपादनाय तात्विकधर्महीनइत्युक्तं। दृश्यत्वादीनां वृत्तिव्याप्यत्वादीनां॥ नासिद्धिरिति॥ व्यावहारिकसाध्यस्यापिसत्त्वान्नबाध इत्यपि द्रष्टव्यं॥ विषयत्वादिरेवेति॥ वृत्तिविषयत्वमित्यत्र व्याप्यत्वापरपर्यायं विषयत्वमेव हेतुःस्यात् वृत्तीति विशेषणं व्यर्थमिति भावः। ननु न वृत्तीति विशेषणं व्यर्थं। धर्मिसमसत्ताकवृत्तिविषयत्वस्याखंडोपाधित्वात्। अखंडोपाधौ च न वैयर्थ्यं व्यर्थविशेषणताबीजाभावात्। एकस्मिन्धर्मिणि लघुगुरुधर्मद्वयसावेशे लघुना व्याप्यवच्छेदे गुरोरनावश्यकत्वं हि तद्बीजं। यथा नीलधूमवत्त्वादित्यत्र नीलधूमवतो भावो नीलधूम एव तत्र हेतुः तत्र एकस्मिन्धर्मिणि धूमे धूमत्वनीलधूमत्वरूपधर्मद्वयसमावेशे लघुना धूमत्वेन व्याप्तिज्ञानोपपत्तेर्गुरोर्नीलधूमत्वस्यानावश्यकत्वं दृष्टमित्येवंतद्बीजसद्भावेन व्यर्थविशेषणत्वं दृष्टं। नह्येवंवृत्तीत्यस्य वैयर्थ्यं वक्तुं युक्तं। अत्र विषयत्वं हेतुः। तत्र विषयत्वत्वं धर्मोस्ति वृत्तिविषयत्वे वृत्तिविषयत्वत्वधर्मोस्तीत्येवं विषयत्वत्ववृत्तिविषयत्वत्वयोर्लघुगुरुधर्मयोरेकस्मिन्धर्मिणि विषयत्वे समावेशाभावेन व्यर्थविशेषणताबीजाभावेन वृत्तीति विशेषणवैयर्थ्यस्य वक्तुमशक्यत्वादित्यस्वरसादाह॥ मम रीत्येति॥ मन्मते दृश्यत्वादिधर्माणां ब्रह्मणि तात्विकत्वेन धर्मिसमसत्ताकत्वादितिभावः॥ दृष्टांतस्येति॥ रजतं दृष्टमित्यनुभवेन व्यावहारिकदृश्यत्वाधिकरणे शुक्तिरूप्ये धर्मिसमसत्ताकदृश्यत्वस्य त्वन्मतेऽभावादित्यर्थः।

ब्रह्मणि व्यभिचाराभावं शंकते॥ नन्विति॥ ननु शुद्धब्रह्मणोऽदृश्यत्वे दृश्यते त्वग्रया बुद्ध्येत्यादिश्रुतिविरोध इत्यतआह॥ दृश्यत्वेति॥ तद्विषयाः विशिष्टविषयाः। नच विशिष्ट एव व्यभिचारः। तत्र मिथ्यात्वस्यापि सत्त्वादितिभावः। अन्यथा शुद्धस्य दृश्यत्वांगीकारे। अद्रेश्यं अदृश्यं॥ स्वतइति॥ यदि शुद्धं ब्रह्म दृश्यं नस्यात्तर्हि तत्सिद्धिरेव न स्यात्। नच स्वप्रकाशत्वात्स्वत एव तत्सिद्धिरितिवाच्यं। स्वत इति कोर्थः स्वेनेतिवा प्रमाणेनविनेतिवा। नाद्यः। कर्तृकर्मविरोधात्। न द्वितीयः। शशविषाणादीनामप्येवं सिद्धिप्रसंगादित्येवं स्वतःसिद्धेर्निरसिष्यमाणात्वादित्यर्थः। विधातुमिति दृष्टांतार्थं। ''सिद्धं धर्मिणमुद्दिश्य

आत्मनोपीति॥ वेदांतजन्यया उक्तरूपमनःपरिणामरूपचरमवृत्त्या आत्मनोपि व्याप्यमानत्वात्तत्र व्यभिचारइत्यर्थः॥ अन्यथेति॥ आत्मनोपि वृत्तिव्याप्यत्वानंगीकारइत्यर्थः। ननु न वेदांतवैयर्थ्यं जपाद्यर्थत्वेन सार्थक्यादित्यतआह॥ ब्रह्मपराणामिति॥ तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं। एवंचोपक्रमादिभिर्ब्रह्मप्रतीतीच्छया पूर्वपूर्वाध्यापकोच्चारितानामित्यर्थः॥ श्रवणादीति॥ फलाभावादितिभावः। ननु न फलाभावः विश्वजिन्न्यायेन स्वर्गार्थत्वोपपत्तेरित्यत उक्तं ब्रह्मज्ञानार्थमिति। ''आत्मा वा अरे द्रष्टव्यःश्रोतव्य'' इत्यत्रदर्शनार्थं श्रोतव्यइति श्रवणादेर्दर्शनार्थत्वस्यैव प्रतीतेर्न व्यवहितस्वर्गार्थत्वमित्यर्थः। ब्रह्मविचारयतोः ब्रह्मविचारमुपक्रांतवतोरिति व्याख्येयम्। अन्यथा विचारकरणकाले मौनाभावादिति ध्येयं। गुरोर्मौनं शिष्यस्य मौढ्यं। गुरोर्मौनि शिष्यस्य मौढ्यं स्वतएवायातं उपदेशाभावेन ब्रह्मज्ञानाभावादितिभावः॥ दृशोऽज्ञानइति॥ दृशः ब्रह्मचितः। सर्वस्यापि जगतः पक्षत्वेन चिद्विषयत्वरूपदृश्यत्वधर्मस्यापि पक्षकोटिनिविष्टत्वेन तज्ज्ञानमपि वाच्यं। तच्च न संभवति। विशेषणीभूताया दृशःब्रह्मरूपचितः अज्ञाने चिद्विषयत्वरूपविशिष्टस्याप्यज्ञानात्। तथाच तस्मिन्नाश्रयैकदेशे वृत्तिव्याप्यत्वस्य ज्ञातुमशक्यत्वात् हेतोर्भागेऽज्ञानासिद्धिरिति सांप्रदायिकोर्थः। दृग्विषयत्वेति॥ वृत्तिविषयत्वेत्यर्थः। केचित्तुदृग्विषयत्वरूपदृश्यत्वज्ञानं च न स्यादित्यस्य चिद्विषयत्वरूपदृश्यत्वज्ञानं न स्यादित्यर्थः। तथाच दृशश्चितो ब्रह्मणोऽज्ञाने कदाचित्कथंचिच्चिद्विषयत्वरूपस्य दृश्यत्वस्य ज्ञातुमशक्यत्वात् चिद्विषयत्वरूपदृश्यत्वहेतोरसिद्धिरित्यर्थइत्याहुः। तच्चिंत्यं। वृत्तिव्याप्यत्वरूपदृश्यत्वदूषणावसरे चिद्विषयत्वस्या सिद्धिवचनस्यानवसरग्रस्तत्वादिति॥ इत्यादीति॥ ''प्रपंचस्य प्रविलयः शब्देन प्रतिपाद्यते'' इत्युत्तरार्धः। नच विशिष्टमेव सर्वप्रत्ययवेद्यं न शुद्धमितिवाच्यं। उत्तरार्धे प्रपंचविलयाधिष्ठानत्वोक्त्या सर्वप्रत्ययवेद्यस्य शुद्धत्वावगमादित्यर्थः।

ननु नात्मनि व्यभिचारः तल्लक्षणाभावात्। तथाहि। विपक्षे हेतोः सत्त्वमात्रं न व्यभिचारः तथात्वे धूमवत्त्वस्यापि ह्रदे व्यभिचारः स्यात्। तत्रापि प्रातिभासिकधूमवत्त्वस्य सत्त्वात्। तस्माद्धर्मिसमसत्त्वस्य हेतोर्वृत्तिर्व्यभिचारः। धर्मिभूतह्रदस्य व्यावहारिकत्वेन तत्समसत्ताकधूमवत्त्वस्य तत्राभावान्न व्यभिचारइति वक्तव्यं। एवंच ब्रह्मण्यपि न व्यभिचारः। पारमार्थिके ब्रह्मणि दृश्यत्वस्य व्यावहारिकत्वेन धर्मिसमसत्ताक दृश्यत्वहेतोर्ब्रह्मण्यवृत्तेरित्याशंक्य निषेधति॥ नचेति॥ अद्यापीति॥ तथाच ब्रह्मजगतोः पारमार्थिकत्व व्यावहारिकत्वविभागे सिद्धे लक्षणाभावेन दृश्यत्वस्य व्यभिचाराभावादनुमानस्य सम्यक्त्वसिद्धिः तत्सिद्धौचास्यविभागस्य सिद्धिरित्यन्योन्याश्रयादितिभावः। ननु नान्योन्याश्रयः। विभागसिद्धेरनुमान सम्यक्त्वसिद्ध्यधीनत्वाभावात्। अपि तर्हि अनाशंकितदोषया तत्सत्यं अतोऽन्यदार्तमित्यादिश्रुत्यैव विभागसिद्धौ उपोद्बलकतयैवानुमानस्योच्यमानत्वादित्यस्वरसादाह॥ किंचेति॥ यदि धर्मिसमसत्त्वस्य हेतोर्वृत्तिर्व्यभिचार इति लक्षणं कल्पयित्वा व्यभिचारपरिहारःक्रियते तर्हि साध्याभावमात्रं न बाधलक्षणं। तथात्वे वह्निरनुष्ण इत्यत्रापि प्रातिभासिकानुष्णत्वस्य सद्भावेन साध्याभावाभावाद्बाधाभावापत्तेः। तथा पक्षेहेतोस्सत्त्वमात्रं न सिद्धिः। तथात्वे शब्दो नित्यश्चाक्षुषत्वादित्यत्रापि प्रातिभासिकहेतोःपक्षे सत्त्वेनासिद्ध्यभावापत्तेः। तस्मात्तत्परिहाराय धर्मिसमसत्ताकस्य साध्यस्याऽभावो बाधः पक्षे धर्मिसमसत्ताकस्य हेतोःसत्त्वं सिद्धिः तदभावोऽसिद्धिरिति लक्षणं वाच्यं। तथाच अनुभूतिःस्वप्रकाशा अनुभूतित्वादितिब्रह्मणस्स्वप्रकाशत्व साधकानुमानोपि अनुभूत्याख्यपारमार्थिकब्रह्मरूपधर्मिसमसत्ताकस्य स्वप्रकाशत्वरूपसाध्यस्याभावाद्बाधःस्यात्

संभावितान् दृश्यत्वनिर्वचनप्रकारान् दूषयितुं पृच्छति॥ किंचेदमिति॥ असंगतिपरिहारायेदमित्युक्तं। यद्धेतूकृतं तदिदमित्यर्थः॥ वृत्तीति॥ इंद्रियार्थसन्निकर्षात् बाह्येंद्रियद्वारा निस्सृतांतःकरणपरिणामो वृत्तिः। तद्व्याप्यत्वं नाम तया प्राप्यत्वं। विषयत्वमित्यनुक्त्वा व्याप्यत्वमितिवचनं यथा तटाकोदकं कुल्यात्मना बहिर्निर्गत्य केदारान्प्रविश्य तद्वदेव चतुष्कोणाद्याकारेण भवति तथा सावयवं तैजसमंतःकरणं चक्षुरादिद्वारा बहिर्निर्गत्य विषयं व्याप्य तदाकारं भवति सेयं वृत्तिरिति परेणोच्यमानत्वाद्विषयं व्याप्येति तदीयवचनानुसारेणेति ज्ञातव्यं॥ फलेति॥ उक्तरूपायां वृत्तौ प्रतिबिंबितं तदुपारूढं ज्ञातृचैतन्यमस्ति। तथाच घटादिविषयाधिष्ठानचैतन्यं चास्ति। घटाद्यावरकाज्ञानंच तत्रैवास्ति। अस्मन्मते तु पुंगतं तमः। तन्मते विषयगतमज्ञानं। तथाच चैतन्याधिष्ठानवृत्त्या अज्ञाननाशेऽनंतरं विषयाधिष्ठानं चैतन्यं व्यज्यते। अनंतरं वृत्तिप्रतिबिंबितं ज्ञातृचैतन्यं विषयाधिष्ठानचैतन्यं चैकीभवति। अत एव मया ज्ञातो घट इत्यादिव्यवहारः। यद्यपि केवलाया वृत्तेर्नाज्ञाननाशकत्वं। चैतन्यस्य चाऽज्ञानस्फोरकत्वान्नाज्ञाननाशकत्वं युक्तं। तथापि वृत्त्युपारूढस्य तद्युक्तं। यथोक्तम्–

''तृणादेर्भासिकाऽप्येषा सूर्यदीप्तिस्तृणंदहेत्।
सूर्यकांतमुपारुह्य तन्न्यायं चिति योजयेत्'' इति।

तथाच ज्ञप्तिर्ज्ञानमिति भावव्युत्पत्त्याऽधिष्ठानचैतन्यं ज्ञानमित्युच्यते वृत्तिस्तु ज्ञायतेऽनया चैतन्यमितिकरण व्युत्पत्त्या ज्ञानमित्युच्यत इति तत्प्रक्रिया। यथोक्तं–

''स्वच्छेन्तःकरणेऽशनिप्रसृमरे नेत्रादिमार्गोद्गते
तत्तद्बाह्यचयात्मना परिणते बिंबीभवंती चितिः।
एकाऽप्यर्थमनोविशेषकवशाद्वैतं प्रपन्ना
हरत्यज्ञानं प्रकटीकरोति विषयान् ज्ञातं मयेदं त्विती''ति।

प्रसृमरे समाने। बाह्यचयात्मना घटादिबाह्यपदार्थसमूहात्मना। चितिः ज्ञातृचैतन्यं। अर्थमनोलक्षणविशेषकवशात् व्यावर्तकवशात् ज्ञातृचैतन्यं विषयाधिष्ठानचैतन्यमिति द्वैविध्यं प्राप्ता विषयान् विषयाधिष्ठानचैतन्यानीतियावत्। अत उक्तरूपायां वृत्तौ प्रतिबिंबितं चैतन्यं तदभिव्यक्तमधिष्ठानचैतन्यंवा फलं तद्व्याप्यत्वं तत्संबंध इत्यर्थः। साधारणमुभयानुगतं दृश्यत्वमात्रमित्यर्थः। अतीतादौ भागासिद्धिवारणाय कदाचिदिति। साक्षिरूपचिद्विषयत्वस्य सुखादावेव सत्त्वेन बाह्ये घटादौ नित्यार्तींद्रियेच धर्मादावभावाद्भागासिद्धिरित्यतः कथंचिदित्युक्तं। तथाच साक्षाच्चिद्विषयत्वाभावेपि कथंचिद्घटादिकं ज्ञातमिति ज्ञानविषयकज्ञानस्य साक्षिरूपत्वात्तत्र साक्षिणि ज्ञानावच्छेदकतया घटादेःधर्मादिकं न जानामीति अज्ञानविषयकज्ञानस्य साक्षिरूपत्वात्तत्रसाक्षिणि अज्ञानावच्छेदकतयाधर्मादिर्भासमानत्वाददोष इतिभावः। आत्मनि स्वव्यवहारे स्वाख्यसंविदपेक्षासद्भावेनाति व्याप्तिवारणाय स्वातिरेकीति। तस्यैवाद्वितीयत्वादिव्यवहारे एकमेवेत्यादिविशेषणोपनायकमानापेक्षासद्भावेनाति व्याप्तिवारणाय नियतिग्रहणं। तथाच स्वरूपमात्रस्य स्वप्रकाशत्वेन तद्व्यवहारे स्वातिरेकिसंविदपेक्षाया अभावान्नस्वातिरेकिसंविदपेक्षानियतिरिति भावः॥

प्रपञ्चस्य व्यावहारिकत्वेन तद्गतप्रतिषेधस्यापि तत्त्वापत्तौ बाध्यत्वाभावेन जगतः सत्यत्वापत्तेश्च। किञ्च साक्षात् साक्षिविषयत्वस्य व्यावहारिकत्वे तन्त्रत्वेन तस्य चाज्ञानान्तःकरण-शुक्तिरूप्यादौ सत्त्वाद् व्यावहारिकत्वमावश्यकम्, इति भागासिद्धि-साधनवैकल्ये स्यातामित्याह – न हीति॥

ननु स्वातिरिक्तसंविदनधीनसिद्धिकस्वरूपत्वं स्वप्रकाशत्वम्। तदभावश्चास्वप्रकाशत्वं हेतुः। पटादौ नित्यातीन्द्रिये शुक्तिरूप्यादौ च स्वातिरिक्तसंविदधीनसिद्धिकत्वेन तदनधीनसिद्धिकत्वरूपस्वप्रकाशत्वाभावात् न भागासिद्धि-साधनवैकल्ये। नाप्यात्मन्यनैकान्त्यम्; तस्य स्वतः सिद्धत्वेन संविदधीनसिद्धिकत्वाभावादित्यत आह – शिष्टमिति॥ आत्मनः स्वातिरिक्तसंविदनधीनसिद्धिकत्वे सिद्धत्वभावापत्तेः। न च स्वतः सिद्धिरिति वाच्यम्। तस्यासम्भवदुक्तिकत्वादित्यादि वक्ष्यत इत्यर्थः। पञ्चमप्रकारेति॥ उपलक्षणमेतत्। पूर्वविकल्पितपक्षेष्वपि दूषणमेतदूह्यम्। नच अज्ञानकालवृत्तित्वं हेतुविशेषणम्, अतो न व्यभिचार इति वाच्यम्। पञ्चमप्रकाराविद्यानिवृत्तेर्ब्रह्मातिरिक्तवस्तुत्वेनाज्ञानकार्यत्वस्यावश्यम्भावेनाज्ञानकालवृत्तित्वस्यापि तत्र सत्त्वात्। प्रमाणाधीनेति॥ तथाच विरुद्धो हेतुरिति भावः। धीमात्रशरीरेति॥

ननु अत्र शुक्तीन्द्रियसन्निकर्षादिदमाकारान्तःकरणवृत्तिरुदेति। तस्यां च प्रतिफलितचैतन्येऽस्ति शुक्तित्वाविद्या। सा च दोषवशात् क्षुब्धा सती रजत-तद्भासाकाराभ्यां परिणमते। तत्र रजताभासाकारपरिणामो ह्यविद्यावृत्तिः। तथाच वस्तुजन्यत्वरूपवस्तुपरतन्त्रत्वस्य सत्त्वात् कथं साधनवैकल्यमिति – चेत्, अत्र वक्तव्यम्। अत्र वस्तुशब्देन विषयीभूतं वा वस्तु विवक्ष्यते? जनकीभूतं वा? नाद्यः। विषयीभूतस्य प्रातिभासिकतया नियतपूर्ववर्तित्वरूपजनकत्वाभावेन साधनवैकल्यस्य तादवस्थ्यात्। नापरः। तुच्छेऽपि शब्दादिरूपजनकीभूतवस्तुजन्यवृत्तिविषयत्वेन व्यभिचारापरिहारात्। आत्मन्यपि व्यभिचाराच्चेति। उक्तमर्थं सङ्गृह्णाति – एवञ्चेति॥

॥ इति दृश्यत्वहेतुभङ्गः ॥

न्यायामृतप्रकाशः

इदानीं हेतुं पराचष्टे॥ दृश्यत्वेति॥ दृश्यत्वहेतुं तु पश्चान्निराकुर्मः। आदौ दृश्यत्वहेतूक्तेरेव बौद्धोक्तयुक्त्युद्गिरणमात्रत्वेन तव बौद्धसाम्यात्त्वं तत्सभायामेव निवेशनीयो नास्माभिर्दूषणाय कक्षीकरणीय इत्याशयेन दृश्यत्वहेतूक्तिरपि बौद्धोक्तयुक्तिच्छर्दिमात्रमित्युक्तं। मिथ्या मिथ्यार्थविषयः। तेन प्रत्ययपक्षकमनुमानं कृतं। त्वया तु विमतं मिथ्येति विषयपक्षकं। प्रमेयं त्वेकमेव । ज्ञानस्य मिथ्यात्वे विषयस्यापि मिथ्यात्वादिति द्रष्टव्यं। मीमांसकरीत्या त्र्यवयवप्रयोगः। छर्दिरुद्गिरणं। विशेषो बौद्धमायिनोः। तदुक्तमिति। यःप्रत्ययःस मृषा दृष्टइति ज्ञानमात्रस्याप्रामाण्यकथनं युक्तं। ज्ञानं जायमानं अप्रमाणं सदेव जायतइति अप्रामाण्यस्य स्वतस्त्वांगीकारात्। त्वन्मते ज्ञानं जायमानं प्रमाणं सदेव जायत इति प्रामाण्यस्य स्वतस्त्वांगीकाराद्यत्र दृश्यत्वं तत्र सर्वत्र मिथ्यात्वमितिवचनमयुक्तं। तथाच सत्यत्व ग्राहिप्रत्यक्षादिविरोधस्तवेत्याशयः।

सुवचत्वादित्युक्तत्वाच्चेति भावः। एतेनेति॥ स्वावच्छिन्ना विषय-विषयिभावेन विषयव्यावर्त्या या संवित् तत्सापेक्षत्वमित्यर्थः। अस्ति च घटादिव्यवहारे स्वव्यावर्त्याया घटादिविषयिण्याः संविदस्तत्सापेक्षत्वम्। ब्रह्मणश्च वृत्तिं प्रत्यविषयत्वेन विषय-विषयिभावेन तत्संविदो ब्रह्मव्यावर्त्यत्वाभावात् न तद्व्यवहार उक्तसंवित्सापेक्षत्वम्। किन्तु तदाकारवृत्तेरेवापेक्षा, इति नासिद्धि-व्यभिचारावित्येतदेतेन निरस्तमित्यर्थः॥ निरस्तमित्यर्थः।

॥ न षष्ठ इति॥ फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशत्वाभावरूपास्वप्रकाशत्वमिति षष्ठो नेत्यर्थः। ॥ पक्षैकदेशे दृष्टान्ते चाभावादिति॥ अत्र कश्चित् – अनन्याधीनापरोक्षत्वं स्वप्रकाशत्वम्। तन्निरूपितभेदप्रतियोगित्वं हेतुः। तच्च नित्यपरोक्षेऽन्याधीनपरोक्षे च घटादावस्ति, इति नासिद्धिः। यद्वा – अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपं दृश्यत्वं हेतुः। न च – अविद्यान्तःकरणशुक्ति-रूप्यादावपरोक्षव्यवहारयोग्यत्वसद्भावाद् भागासिद्धि-साधनवैकल्ये स्यातामिति वाच्यम्; अपरोक्षव्यवहारयोग्यत्वशब्देनाज्ञाननिवर्तकवृत्तिविषयत्वस्य विवक्षितत्वात्। अस्य चाविद्यादावभावात् – इत्याह – तत्र। अनन्याधीनापरोक्षत्वभेदः काल्पनिको वा? अकाल्पनिको वा? नाद्यः; 'शुद्धमनन्याधीनापरोक्षं ने'ति तार्किकादिकल्पनासम्भवेन कल्पितताद्दशभेदवत्त्वस्य शुद्धेऽपि सम्भवेन व्यभिचारतादवस्थ्यात्। न द्वितीयः। पक्षेऽसिद्धेः। अकाल्पनिकभेदस्य परेण कुत्राप्यनङ्गीकारात्॥

यदप्युक्तम् – अज्ञाननिवर्तकवृत्तिविषयत्वमपरोक्षव्यवहारयोग्यत्वमिति, तत्र; धर्मादावपि तादृशवृत्तिविषयत्वेन भागासिद्धेः। न च परोक्षवृत्तिरज्ञाननिवर्तिकैव नेति वाच्यम्। परोक्षतोऽपि ज्ञाते 'न जानामी'ति व्यवहारापत्तेः, अन्यथाऽपरोक्षवृत्तेरप्यज्ञाननिवर्तकत्वं न स्यात्। 'अविद्यान्तःकरणादिकं पूर्वं न ज्ञातमिदानीं ज्ञातमि'ति व्यवहाराच्च। तस्माद् यत्किञ्चिदेतत्॥ ननु अध्यस्तत्वाविशेषेण घटादेरिव रूप्यस्याप्यपरोक्षव्यवहारयोग्यत्वमस्तु। तथाच साधनवैकल्यं तदवस्थमेव, इत्यत आह – यद्यपीति॥

॥ सर्वव्यावहारिकोपादान इति॥ अत्र सर्वव्यावहारिकोपादानत्वं ब्रह्मज्ञानात् पूर्वमबाधितत्वं श्रुत्यादिसिद्धत्वं चेति हेतुत्रयमज्ञानस्य व्यावहारिकत्वसाधकम्। अन्तःकरणादेस्तु व्यावहारिकत्वे ब्रह्मज्ञानात् प्रागबाधितत्वं श्रुत्यादिसिद्धत्वं चेति हेतुद्वयम्। तथाचैतैर्हेतुभिरज्ञानादेर्व्यावहारिकत्वस्य सिद्धत्वात् तद्गतापरोक्षत्वस्यापि व्यावहारिकत्वाद् भागासिद्धिः स्यादेवेत्यर्थः॥

एतच्चाभ्युपेत्योक्तम्। वस्तुतस्तु – अज्ञानान्तःकरण-शुक्तिरूप्यादेः प्रातिभासिकत्वेऽपि तद्गतापरोक्षत्वं व्यावहारिकमेव। नच – प्रातिभासिकाज्ञानादिगतस्य कथं व्यावहारिकत्वम्? तस्य धर्मत्वेन तुल्यसत्ताकत्वस्यावश्यकत्वादिति वाच्यम्। किमेवं वदतो यथा धर्मी तथा धर्मोऽपीति सामान्यव्याप्तिरभिप्रेता? धर्मिणो व्यावहारिकत्वे धर्मस्यापि व्यावहारिकत्वम्, धर्मिणः पारमार्थिकत्वे धर्मस्यापि पारमार्थिकत्वम्, धर्मिणः प्रातिभासिकत्वे धर्मस्यापि प्रातिभासिकत्वमिति विशेषव्याप्तिर्वा? नोभयमपि। तथा सति शुक्तिरूप्यादेः प्रातिभासिकत्वेन तद्गतस्य त्वदुक्तत्रैकालिकनिषेधप्रतियोगित्वस्यापि प्रातिभासिकत्वापत्तेः। तथा सति शुक्तिरूप्यादेः पारमार्थिकत्वं स्यात्। ब्रह्मणः पारमार्थिकत्वेन तद्गतसत्यत्वादेरपि तथात्वापत्तेः।

ज्ञानत्वमित्यङ्गीकारेणोभयत्रैकविधज्ञानत्वानङ्गीकारात्। एवं च चिद्रूपं ज्ञानमपरोक्षमेव। वृत्तिरूपं ज्ञानं परोक्षमेव, इति कथमेकज्ञानत्वव्याप्यत्वं परोक्षत्वापरोक्षत्वयोः स्यात्? अत एवाह – एकेति॥ नच परोक्षत्वापरोक्षत्वयोरेकज्ञानत्वव्याप्यत्वमसिद्धमिति वाच्यम्। ज्ञानं द्विविधम् – परोक्षमपरोक्षं चेति महर्षिभिर्विभजनेनैकविधज्ञानत्वव्याप्यत्वस्य सकलजनसिद्धत्वादिति।

॥ नियतिपदेति॥ विशेष्यांशे कदापि स्वातिरिक्तसंविदनपेक्षणादिति भावः। ननु यावत्स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्दृष्टव्यत्वम्। ब्रह्मणश्च स्वप्रकाशत्वादिव्यवहारे यद्यपि वेदान्तजनितवृत्त्यपेक्षा नियतिरस्ति, तथाप्य'हमेतावन्तं कालं सुखं सुप्तोऽस्मी'त्यादिव्यवहारे तदनपेक्षणेन यावत्स्वगोचरव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियत्यभावात्, घटादेः स्वव्यवहारमात्रे तदपेक्षानियमात्, इति न व्यभिचारासिद्धिः, इत्यत आह – आसंसारमिति॥

इदमत्राकूतम्- 'स्वातिरिक्तसंविदि'त्यत्र संविच्छब्देन चैतन्यरूपा वा संविद् विवक्षिता? वृत्तिरूपा वा? नाद्यः; अतीन्द्रियेष्वसिद्धितादवस्थ्यात्। न द्वितीयः; शुद्धस्यापि स्वव्यवहारे स्वातिरिक्त संविदपेक्षानियतिरस्त्येव। नच 'एतावन्तं कालमहं सुखं सुप्तोऽस्मी'त्यादिव्यवहारे तदपेक्षा नेति वाच्यम्; यदि हि वेदान्तजन्यवृत्तिं विनैव तद्व्यवहारः, तदा वेदान्तानामधिगतार्थबोधकत्वेनानधिगतार्थावगमकत्वरूपं प्रामाण्यं न स्यात्, अत एवाह – अनधिगतार्थबोधकेति॥ आसंसारमज्ञानावृतत्वेन शुद्धस्य वृत्तिं विना तद्व्यवहारायोगाच्च।

किञ्च शुद्धव्यवहारः किं शुद्धस्य वा भवेत्? जीवस्य वा? नाद्यः; तस्य स्वविषयव्यवहारायोगात्। सर्वव्यवहारातीतत्वात्॥ कर्तृ-कर्मविरोधाच्च। नापरः; जीवस्य वृत्त्यनपेक्षया शुद्धव्यवहार इदानीमपि शुद्धव्यवहारापत्तेः। सुषुप्तावस्तीति चेत्; तदभावस्य मूल एवोक्तत्वात्। किञ्च वृत्तिः किमन्तःकरणवृत्तिः? अविद्यावृत्तिर्वा? नाद्यः; सुखादिव्यवहारे तदपेक्षाभावाद् भागासिद्धेरपरिहारात्। नान्त्यः; घटादिव्यवहारादौ तदसिद्धेः। नच वृत्तिसामान्यं संविच्छब्देन विवक्षितमिति वाच्यम्; सुखादिव्यवहारे तदसिद्धेरपरिहारात्। नच तत्राप्यविद्यावृत्त्यपेक्षाऽस्तीति वाच्यम्। तथाप्यविद्यावृत्तौ भागासिद्धेः। तत्रापि तदपेक्षाऽस्तीति चेत्, एतदविद्यावृत्त्यपेक्षा वा? अविद्यावृत्त्यन्तरापेक्षा वा? नाद्यः; आत्माश्रयात्। न द्वितीयः। तस्यामप्यविद्यावृत्तौ वृत्त्यन्तरापेक्षा, एवं तत्र तत्रापीत्यनवस्थापत्तिः। किञ्चात्र कीदृशः शुद्धव्यवहारो विवक्षितः – स्वरूपमात्रव्यवहारो वा? विशिष्टव्यवहारो वा? नाद्यः; तदभावस्य मूल एवोक्तत्वात्। द्वितीयेऽपि स्वप्रकाश इत्यादिरूपो वा? 'अहमि'त्येवंरूपो वा? नाद्यः; स्वप्रकाश इत्यादिव्यवहारे वेदान्तजन्यवृत्त्य पेक्षानियमेनानैकान्तिकत्वापत्तेः। नापरः; 'अहमि'त्येवंरूपव्यवहारेऽप्यविद्याकाराहंवृत्त्यपेक्षानियमेनानैकान्ति कत्वस्य दुर्वारत्वादिति दिक्।

ननु घटादिविषयकाज्ञानस्य वृत्त्यैव निवृत्तावपि व्यवहारार्थं वृत्त्यन्यसंविदपेक्षाऽऽवश्यकी। ब्रह्मणस्तु स्फुरणरूपत्वाद् व्यवहारार्थमपि न तदपेक्षेत्याशङ्क्य निषेधति – नच घटादावपीति॥ अनुभवाभावेऽपि तदङ्गीकारे ब्रह्मण्यपि व्यवहारार्थं तदङ्गीकारापत्तेः। अज्ञानविरोधिस्फुरणरूपत्वस्य •घटादावपि

त्यत्र नञ्द्वयस्य पतितत्वेन गौरवमिति भावः। कृप्तत्वाच्च समानविषयत्वमेव तन्त्रमित्याह - दिपेच्छादाविति॥ अन्याविषयत्वस्य व्यभिचारमप्याह - घटपदावितीति। किञ्च ब्रह्मज्ञानस्य ब्रह्माविषयकत्वे अन्याविषयकत्वे च निर्विषयकत्वापत्त्या ज्ञानत्वमेव न स्यादित्याह – ब्रह्मज्ञानस्येति।

॥ तद्विषयम्॥ तदाकारत्वविषयमित्यर्थः। असाधारणस्यात्माकारस्य वा वृत्त्याकारत्वमुच्यते? उत साधारणस्य वा? नाद्य इत्याह – जडाद्याकारेति। न द्वितीय इत्याह – सत्तयेति। तथाच आत्माकारघटादिवृत्त्याऽपि आत्माज्ञाननिवृत्तिः स्यादिति भावः। अनिर्वचनीयेति॥ आदिपदेन ज्ञानत्वेन ज्ञाननिवर्त्यत्वपरिग्रहः। हेतोरेवागमनात् न व्यभिचार इत्यत्राह – असद्वैलक्षण्येति। व्यवहारोऽप्यादानादिरूपो वा विवक्षितः? अभिलापरूपो वा? आद्य आह – आदानादेरिति॥ तथाच भागासिद्धिः। द्वितीय आह – अभिलापरूपस्येति। तथाचानैकान्त्यमिति भावः। पक्षैकदेश इति। न च अविद्यावृत्तिप्रतिफलितफलविषयत्वस्य तत्र सत्त्वात् न भागासिद्ध्यादीति वाच्यम्; तत्रैवासिद्ध्यापत्तेः। ब्रह्मणीति॥ न च ब्रह्मणि वृत्तिव्याप्यत्वं नास्तीति वाच्यम्। उक्तरीत्या साधितत्वात्।

॥ नित्यातीन्द्रियमिति॥ अनुभवेन चिद्विषयत्वं ब्रह्मणोऽङ्गीकर्तव्यम्। एवंविधानुभवेऽपि यदि ब्रह्मणश्चिद्विषयत्वं नाङ्गीक्रियते, तर्हि धर्मादावपि न स्यात्। तथाच व्यभिचारः। ब्रह्मणश्चिद्विषयत्वे हेत्वन्तरमाह – तद्व्यवहारेति॥ ब्रह्म, चिद्विषयः, चिज्जन्यव्यवहारविषयत्वात्, घटवदित्यर्थः। स्वस्य स्वविषयत्वे दृष्टान्तः – अभिधानस्याभिधेयत्ववदिति॥ ननु अभेदे कथं विषय-विषयिभाव इति? अत आह – अन्यथेति॥ यद्यात्मनश्चिद्विषयत्वं नाङ्गीक्रियत इत्यर्थः। तया ब्रह्मवृत्त्या। ननु ब्रह्मणश्चिद्विषयत्वाभावेऽपि वृत्त्यैव तदज्ञाननिवृत्तौ बाधकाभावः, इत्यतो बाधकमस्तीत्याह – तदाकारेति॥ ननु आत्मनः स्फुरणरूपत्वात् तत्र वृत्त्याऽज्ञाननिवृत्तिः। घटादेस्तदभावात् न तया तदज्ञाननिवृत्तिः। नच ब्रह्मणः स्फुरणरूपत्वेनैवाज्ञाननिवृत्तिरस्तु, किं वृत्त्येति वाच्यम्। तस्य सर्वदा सत्त्वेनाज्ञानविरोधित्वाभावात् न तेन ब्रह्माज्ञाननिवृत्तिः, अतो वृत्त्यैव तन्निवृत्तिरित्यत आह – अज्ञानाविरोधीति॥ तथाच यदि ब्रह्मणि वृत्त्यैव तदज्ञाननिवृत्तिः, तदा घटादावपि वृत्त्यैवाज्ञाननिवृत्युपपत्तौ चैतन्यरूपज्ञानस्वीकारायोगः। किञ्च घटादिविषयकचैतन्यरूपज्ञानस्योररीकरणे व्यवहारो वा बलम्? अनुभवो वा? उत श्रुतिः? विषयापरोक्ष्यं वा? नाद्य इत्याह – अस्फुरणरूपेष्विति॥ न द्वितीय इत्याह – घटादाविति॥

अन्यथेति॥ चैतन्यरूपज्ञानानुभवाभावेऽपि तदङ्गीकार इत्यर्थः। इच्छाद्याकारान्तःकरणवृत्तिप्रतिफलितमिति॥ इच्छदिरूपा याऽन्तःकरणोपादानिका वृत्तिः, तत्प्रतिफलितमित्यर्थः। तृतीयं निराकरोति – तमेव इति॥ चतुर्थं परिहरति – चैतन्याविषयस्येति॥ ननु ज्ञानत्वस्य विषयगतज्ञातत्वप्रयोजकत्वे तस्येच्छादिसाधारणत्वादिच्छादिरूपवृत्तिविषयस्यापि ज्ञातत्वं किं न स्यादिति। अत उक्तम् – इच्छादिवृत्त्यनिष्ठेनेति॥ इच्छाया ज्ञानत्वस्यैवाभावादिति भावः। एवमुत्तरत्रापि द्रष्टव्यम्। अन्यथेति॥ यदि वृत्तावपरोक्षत्वं न स्यादित्यर्थः। ननु वृत्तौ परोक्षत्वम्। चिद्रूपे च ज्ञानेऽपरोक्षत्वम्। ज्ञानत्वं चोभयसाधारणम्। तथाच परोक्षत्वेऽपि वृत्तेः परोक्षत्वापरोक्षत्वयोरेकज्ञानत्वव्याप्यत्वं स्यादिति – चेत्, नैवं परस्याङ्गीकारः। परेण हि चिद्रूपमेव ज्ञप्तिरूपं ज्ञानम्। वृत्तौ तु ज्ञायतेऽनेनेति व्युत्पत्त्या

नच चरमवृत्तेरविषयत्वे कथं तदुपहितविषयत्वमिति वाच्यम्; भावानवबोधात्। अज्ञानोपहितचैतन्यस्य साक्षित्वेऽपि यथाऽज्ञानं साक्षिकोटौ न प्रविशति; जडत्वात्, किन्तु साक्ष्यकोटावेव, एवं वृत्त्युपहितस्य विषयत्वेऽपि न वृत्तिर्विषयकोटौ प्रविशति; स्वविषयत्वानुपपत्तेः। किन्तु स्वयमविषयोपि चैतन्यस्य विषयतां सम्पादयति इति न काऽप्यनुपपत्तिरिति चेत्, न। चरमवृत्तेरुपाध्यविषयत्वेऽप्युपहितविषयत्वोक्तिर्व्याहता। उपहितविषयत्व उपाधेरपि विषयत्वापरिहारात्। नच चरमवृत्तेरुपलक्षणत्वाद विषयत्वमिति वाच्यम्; उपलक्षितभान उपलक्षणस्यापि भाननियमेनाभास्यत्वायोगात्। चरमवृत्तेरुपलक्षणत्वे तटस्थाया एव वृत्तेर्व्यावर्तकत्वेन शुद्धस्यैव विषयत्वपर्यवसानेन व्यभिचारस्य दुरुद्धरत्वात्। नच शुद्धस्य विषयत्वे वृत्तिर्निमित्तमित्यभिप्राय इति वाच्यम्। तथा सति विषयत्वमन्यनिमित्तं विशेष्यभागमात्रेऽस्तीति भवतैव मिथ्यात्वानधिकरण उपाधिं प्रति विशेष्ये व्यभिचारस्योपपादितत्वात् सुस्थो व्यभिचारः। दृष्टान्तश्चायुक्तः, अननुकूलश्च। तत्राप्यज्ञानं चैतन्यनिष्ठसाक्षित्वे निमित्तम्। एवं च साक्षित्वमौपाधिकं चैतन्यमात्रनिष्ठमित्युक्तं स्यादिति यत्किञ्चिदेतत्।

अन्ये तु – यदि वृत्तिः स्वसन्निधिमात्रेण चैतन्यस्योपहिततां सम्पाद्य स्वयमुपाध्यविषयाऽपि सत्युपहितमिथ्याभूतार्थविषया भवति, तर्हि अज्ञानमपि स्वसन्निधिमात्रेण चैतन्यस्य स्वोपहिततां सम्पाद्याज्ञानाविषयकं सदज्ञेयविषयकं स्यात्, इति मिथ्याभूतार्थविषयकमेवाज्ञानं स्यात्, नतु शुद्धचिद् विषयकम्। तथाचापसिद्धान्त इति परोक्तदूषणपरिहारमाहुः। तदयुक्तम्। अस्मदुक्तरीत्या व्यभिचारेणैव परोक्तदूषणपरिहारसम्भवेन प्रतिबन्युत्तरस्यानन्यगतिकत्वात्। एतेन – शब्दाजन्यवृत्तिविषयत्वं सप्रकारकज्ञानविषयत्वं वा दृश्यत्वमिति निरस्तम्। आत्मनोऽपि – अनुभूतिः, स्वप्रकाशा, इत्याद्यनुमानजन्यवृत्तिविषयत्वस्य 'सत्यं ज्ञानमि'त्यादिशब्दजन्यसप्रकारकज्ञानविषयत्वस्य च सत्त्वेन व्यभिचारानुद्धारात्। नच तत्र शुद्धस्य न विषयत्वमिति वाच्यम्। तत्र शुद्धाविषयत्वे तस्य स्वप्रकाशत्वाद्यसिद्धिप्रसङ्गात्। न च पूर्वोक्तपर्यवसानेन तत्सिद्धिरिति वाच्यम्। पर्यवसानस्याप्यनुमितिरूपस्योक्तत्वादित्यलं प्रसङ्गेन।

एतेनैव – स्वाभिन्नेतरविशेषणप्रयुक्तविशिष्टाविषयकवृत्तिव्याप्यत्वं दृश्यत्वम्। स्वाभिन्नेतरद् यद्विशेषणं पटत्वादि तद्विशिष्टं यत् पटादि तदविषयकं यद् 'घटोऽयमि' ति प्रत्यक्षम्, धर्मपदजन्या धर्म इति स्मृतिः, तद्विषयत्वाद् घटादौ न हेत्वसिद्धिः इत्यपि कस्यचित् प्रलपनं निरस्तम्। ब्रह्म तु विशिष्टरूपेणैव दृश्यमित्यत्र दूषणमाह – वेदान्तानामिति॥ वेदान्तानां स्वरूपमात्रविषयकधीजनकत्वाभावे विशिष्टपरत्वे च विशिष्टस्य वाच्यत्वसम्भवेन लक्षणास्वीकारवैयर्थ्यं स्यादित्यपि बोध्यम्। तरतीति॥ मिथ्याज्ञानस्य मोक्षसाधनत्वाभावात्। अन्यथा 'घटस्सन्नि' त्यादिज्ञानानामपि मोक्षहेतुत्वापत्तौ श्रवणादिविधिवैयर्थ्यापत्तेरिति भावः। ननु ब्रह्मज्ञानस्य ब्रह्माविषयकत्वेऽपि तज्ज्ञानस्याज्ञाननिवर्तकत्वमुपपद्यत एव। ज्ञानस्याज्ञाननिवर्तकत्वे तदन्याविषयकत्वस्यैव तन्त्रत्वात्। नचैवम् घटादिज्ञाने समानविषयकत्वं तन्त्रम्। ब्रह्मज्ञानेऽप्यन्याविषयकत्वम्, इति प्रयोजकद्वैविध्यकल्पने गौरवं स्यादिति वाच्यम्। घटादिज्ञानेऽप्यन्याविषयकत्वमेव तन्त्रमस्त्वित्याशङ्क्य निराकरोति न चेति। गौरवादिति। 'तदन्याविषयकत्वे'

अत्र कश्चित् – वृत्तिकाले वृत्तिरूपेण धर्मेण शुद्धत्वासम्भवात् शुद्धस्य वृत्तिविषयत्वं न सम्भवति इत्यतः 'शुद्धं स्वप्रकाशमि'ति वाक्यस्य लक्षणया शुद्धत्वमस्वप्रकाशत्वव्यापकमित्यर्थः। तथा चाशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशता पर्यवस्यति यथा भेदनिषेधेनाभिन्नत्वम्। तथाच ब्रह्मणि न ज्ञेयत्वम् इति, तन्न। ज्ञेयत्वाभावेऽपि स्वप्रकाशता पर्यवस्यतीत्यस्याबोधविजृम्भितत्वात्। यतो व्यापकनिवृत्त्या व्याप्यनिवृत्तिपर्यवसानं नामानुमानमेव। तथाच तादृशानुमितिविषयत्वं दुर्वारम्। अन्यथा स्वप्रकाशत्वासिद्धेः। तदविषयत्वेऽपि तत्र तत्सिद्धौ तुच्छेऽपि तत्सिद्धिप्रसङ्गात्। एतेन – भेदनिषेधेनाभिन्नत्वमपि व्याख्यातम्। तथाच ज्ञानविषयत्वाभावे स्वप्रकाशत्वासिद्धिः सुस्थैवेति। लाघवेनेति॥ ननु स्फुरणमात्रस्य मिथ्यात्वप्रयोजकत्वे शुक्तिरूप्यादेः स्फुरणरूपत्वाभावात् तत्र मिथ्यात्वं न स्यात्। नच – स्फुरणविषयत्वं विवक्षितम्; शुक्तिरूप्यादेः स्फुरणविषयत्वेन मिथ्यात्वोपपत्तिरिति वाच्यम्; स्फुरणविषयत्वस्य ब्रह्मण्यभावेन तन्मिथ्यात्वापादनासम्भवादिति चेत्, न। यथाकथञ्चित् स्फुरणविषयत्वस्य विवक्षितत्वात्। तथाच ब्रह्मणः स्फुरणरूपत्वेऽपि कल्पितभेदेन ज्ञातृ-ज्ञेयभावादिवत् स्फुरणविषयत्वस्याज्ञातृत्वाद्यवच्छेदेनोपपत्तेः। अथवा – स्फुरणभेदेनाभिव्यक्तत्वं मिथ्यात्वप्रयोजकत्वेन विवक्षितम्। अस्ति चैतद् घटादाविव ब्रह्मण्यपि; 'घटः स्फुरती'तिवत् 'चैतन्यं स्फुरती'ति प्रतीतेः। एवं च मिथ्यात्वापादनं युक्तमेवेत्याशयः। ननु तर्हि ब्रह्मसत्यत्वप्रापकश्रुतेः का गतिरिति? अत आह – तत्सत्यत्वश्रुतिरिति॥

॥शुद्धं न दृश्यत इति॥ नच पर्यवसितार्थमादाय सार्थकत्वमिति वाच्यम्; पर्यवसानस्य ज्ञानातिरिक्तस्य वक्तुमशक्यत्वात्॥ विशिष्ट इति॥ नच शुद्धं न दृश्यम्, न मिथ्येत्यस्याप्यशुद्धत्वं दृश्यत्वमिथ्यात्वयोर्व्यापकमित्येतत्परत्वेन शुद्धे दृश्यत्वमिथ्यात्वयोर्व्यतिरेकः पर्यवस्यतीति वाच्यम्। यतो व्यापकनिवृत्त्या व्याप्यनिवृत्तिपर्यवसानस्यानुमानत्वेन वृत्तिविषयत्वापरिपरिहारात् अन्यथा व्यतिरेकासिद्धेः। ॥विशिष्टज्ञान इति॥ नच – विशेष्यतापन्नस्य विषयत्वेऽपि क्षत्यभावः। नच व्यभिचारः, तस्य मिथ्यात्वाभ्युपगमादिति वाच्यम्; विशेष्यताविशिष्टस्य मिथ्यात्वेऽपि तदधिकरणस्यामिथ्यात्वेन तत्र व्यभिचारानुद्धारात्। नच तत्र ज्ञानविषयत्वमेव नेति वाच्यम्; विशिष्टान्तर्गतत्वेन तत्र तस्यावश्यकत्वात्॥ शिपिविष्टायेति॥ शिपिविष्टत्वरूपविशेषणविशिष्टायेत्यर्थः॥ भागासिद्धेरिति॥ नच ज्ञानान्तरविषयत्वेन विशेषणे भागासिद्ध्यभाव इति वाच्यम्। ज्ञानान्तरे विशेषण-विशेष्यान्यतरत्वस्यावश्यकत्वेन केवलभागासिद्ध्यपरिहारात्। एतेनेत्यस्यैव विवरणम् – अनुभवविरोधादिनेति॥ ननु "यत्तदद्रेश्यमि"ति श्रुतेः का गतिरिति? अत आह – अत एवेति॥

॥अन्यथेति॥ सर्वथा दृश्यत्वाभावपरत्व इत्यर्थः। स्वविषयान्तर्भाव इति॥ उपधायकचरमवृत्तेः स्वविषयकत्वे स्वप्रकाशत्वं स्यात्। स्वविषयकत्वस्यैव स्वप्रकाशत्वादिति भावः। अप्रमात्वस्येति॥ वृत्तेर्मिथ्यात्वेन स्वविषयत्वे मिथ्याभूतार्थविषयकत्वेनाप्रमात्वं स्यादित्यर्थः। किञ्च शुद्धस्य वृत्तिविषयत्वार्थं चरमवृत्तेः स्वविषयत्वेन प्रतिभास्यतयोपयोगश्चेत्, तर्हि कल्पतरुवचनविरोध इत्याशयेन तदुक्तिमेव दर्शयति – वृत्त्युपरागोऽत्रेति॥ अत्र शुद्धस्य वृत्तिविषयत्वे स्वरूपसन्नेवोपयुज्यत इत्यर्थः। बहिर्भाव इति॥ ननु वृत्तेः शाब्दवृत्तावनवभासमानाया एवोपधायकत्वम्। एवञ्च चरमवृत्त्युपहितस्य ज्ञानविषयत्वात् न व्यभिचारः।

अत्रेदमालोचनीयम् – प्रकृतदृश्यत्वरूपहेत्वज्ञानासिद्धिपरतायाः स्फुटप्रतिभासत्वेनाप्रकृतजडत्वहेत्वज्ञाना सिद्ध्यापादनस्यागतिकत्वात्। चिद्विषयत्वं जडत्वमिति परेणानङ्गीकाराच्च। अङ्गीकारे वा दृश्यत्वेन साङ्कर्यापत्तेरिति। सर्वप्रत्ययवेद्य इति॥ नच एतस्य वचनस्योपहितपरत्वेन शुद्धे सर्वप्रत्ययवेद्यत्वाभावात् न विरोध इति वाच्यम्। उपहितस्य च मिथ्यात्वेनात्रोक्तसर्वप्रत्ययवेद्यत्व-प्रपञ्चप्रविलयाधिष्ठानत्वयोरनुपपत्तेः। आत्मनि व्यभिचारपरिहारमाशङ्क्य निषेधति – न चेति॥ आरोपितधूमस्य विपक्षे ह्रदादावपि सत्त्वेन धूमस्यापि व्यभिचारित्वं स्यादित्यतिप्रसङ्गादिति भावः। अद्यापीति॥ मिथ्यात्वसिद्धेः प्रागित्यर्थः। तथाच व्यावहारिक-पारमार्थिकविभागसिद्धौ दृश्यत्वहेतोर्व्यभिचाराभावसिद्धिः। व्यभिचाराभावसिद्धौ च व्यावहारिक-पारमार्थिकविभागसिद्धिरित्यन्योन्याश्रय इति भावः॥ अतिप्रसङ्गमप्याह – किञ्चेति॥ उक्तबाधासिद्धि लक्षणफलमाह – तथाचेति॥ अनुभूतिः, स्वप्रकाशा, अनुभूतित्वात्; व्यतिरेकेण घटवदिति त्वदुक्तानुमानेऽपि बाधासिद्धी स्यातामिति भावः। अतिप्रसङ्गान्तरं चाह – एवं विपक्ष इति॥ तथाच तात्त्विकधर्मानधिकरणब्रह्मनिष्ठदृश्यत्वाभावस्य धर्मिसमसत्ताकत्वाभावाद् व्यभिचार इति भावः। यत्तु – धर्मिसमसत्ताकत्वं साधनस्य विशेषणम्, एवं च साध्याभाववत्यात्मनि दृश्यत्वादेः साधनस्याभावे विद्यमानेऽपि धर्मिसमसत्ताकत्वरूपविशेषणविशिष्टप्रतियोगिकत्वरूपविशेषणविशिष्टसाधनाभावस्याभावोऽस्ति इति व्यभिचार एव स्यादित्यभिप्रायः इति, तन्न। विशिष्टसाधनरूपप्रतियोगिनोऽभावेऽपि तत्प्रतियोगिकत्वरूपविशेषणाभावे कारणाभावात्। अन्यथा प्रागभावदशायां घटाभावेन तत्प्रतियोगिकत्वरूपविशेषणाभावापत्तौ प्रागभावे घटप्रतियोगिकत्ववैशिष्ट्यं न स्यादिति यत्किञ्चिदेतत्। अस्त्वात्मनि दृश्यत्वम्। न च व्यभिचारः; धर्मिसमसत्त्वस्य हेतुविशेषणत्वात्। न चात्मनि धर्मिसमसत्त्वं दृश्यत्वमस्ति, येन व्यभिचारः स्यादिति शङ्कते – अथेति॥ विषयत्वादिरेवेति॥ तथाच दक्पदानर्थक्यमिति भावः। आदिपदेन वस्तुत्वादिपरिग्रहः। ननु एकधर्मिगतत्वेन लघु-गुरुभूतधर्मद्वयोपस्थितौ लघुभूतधर्मस्यैवावच्छेदकत्वम्, न तु गुरुभूतस्येति नियमः; यथा धूमगतत्वेन धूमत्व-नीलधूमत्वरूपधर्मद्वयोपस्थितेर्विद्यमानत्वेन लघुभूतधूमत्वस्यैव व्याप्यतावच्छेदकत्वम्, नतु गुरुभूतस्य नीलधूमत्वस्य। एवं प्रकृते यदि धर्मिसमसत्ताकदृश्यत्वरूपधर्मिगतत्वेन विषयत्वत्व-धर्मिसमसत्ताकदृग्विषयत्वत्वरूपधर्म द्वयस्योपस्थितिः स्यात्, तदा लाघव-गौरवचिन्ता। नचैवम्। तथाच वैयर्थ्यदानमनुचितमित्यपरितोषादाह – मम रीत्येति॥ उभयसाधारणदोषमाह – दृष्टान्तस्येति॥ मायिमते प्रातिभासिके विषयत्वं व्यावहारिकम्, इति न धर्मितुल्यसत्ताकत्वम्, मन्मते तु धर्म्यसत्त्वादेव न तदिति भावः।

ननु शुद्धे वा व्यभिचारः? विशिष्टे वा? नाद्यः; तत्र हेत्वभावात्। न हि द्वितीयः। तस्य पक्षनिक्षिप्तत्वात्, इति शङ्कते, – नन्विति॥ शुद्ध एव व्यभिचारः। नच तत्र दृश्यत्वं नेति वाच्यम्। तस्य दृश्यत्वाभावे तदसिद्ध्याद्यप्रसङ्गादित्याह – स्वतस्सिद्धेरिति॥ स्वतस्सिद्धिरिति कोऽर्थः? स्वेनैव सिद्धिरिति वा? अन्येनासिद्धिरिति वा? नाद्यः। कर्मत्व-करणत्वविरोधात्। करणव्यापारविषयत्वं कर्मत्वम्। न च करणस्यैव तद् युज्यते। न द्वितीयः; अन्यासिद्धिमात्रेण सिद्धत्वे तुच्छस्यापि सिद्धिप्रसङ्गादिति निराकरिष्यमाणत्वादित्यर्थः। ॥वृत्त्या दृश्यत्वनिषेधधीरिति॥ इत्थंभूतलक्षणे तृतीया। वृत्तिरूपा दृश्यत्वनिषेधधीरित्यर्थः। शुद्धं स्वप्रकाशामिति॥

साक्षात् सम्बन्धः किं संयोगो वा? समवायो वा? विषयविषयिभावो वा? नाद्य-द्वितीयौ। अनङ्गीकारात्। न तृतीयः, असम्बन्धत्वात्। विषयत्वस्य दुर्निरूपत्वाच्च। तस्माद् वृत्त्यभिव्यक्ताधिष्ठानचिदध्यस्तत्व रूपपरम्परासम्बन्धमादायैव वृत्तिसम्बन्धित्वरूपं वृत्तिव्याप्यत्वं वक्तव्यम्। तथाच दृशोऽज्ञाने वृत्त्यभिव्यक्ताधिष्ठानचितोऽज्ञाने दृग्विषयत्वरूपदृश्यत्वज्ञानं न स्यात्। वृत्त्यभिव्यक्ताधिष्ठानचिदध्यस्तत्व रूपदृश्यत्वज्ञानं न स्यादित्यर्थः। घटकपदार्थाज्ञाने तद्घटितविशिष्टपदार्थज्ञानस्यासम्भवादित्यज्ञानासिद्धिरिति। अन्ये तु – दृशोऽज्ञान इति। विशेषणाज्ञाने विशिष्टाज्ञानादित्यर्थः।

ननु मैव दृशं ज्ञासीत्, तथापि वृत्तिव्याप्यत्वहेतुस्तु सुज्ञान एव। नहि दृग्विषयत्वरूपं दृश्यत्वमात्रं हेतुत्वेनाभिप्रेतम् इत्यत उक्तम् – दृग्विषयत्वेति। अयमर्थः – नात्र प्रकृतहेतोरज्ञानमापाद्यते। किन्तु मिथ्यात्वे साध्ये वृत्तिव्याप्यत्वरूपं पारिभाषिकदृश्यत्वं हेतूकुर्वताऽपि प्रकृति प्रत्ययावगतदृग्विषयत्वरूपदृश्यत्वमपि दुरपह्नवम्। परन्तु तत् तेन न हेतुत्वेनाभिप्रेतम्। एवं च हेतुत्वेनानभिमतोऽपि दृग्विषयत्वरूप उपाधिर्यदि वृत्तिव्याप्यः तदा तदुपाधिविशेषणीभूतदृशोऽपि वृत्तिव्याप्यत्वमवर्जनीयमेव। यदि न वृत्तिव्याप्यः तदा तदुपाधेर्न मिथ्यात्वसिद्धिः, भागासिद्धिश्च स्यादित्याहुः।

अत्रेदमालोचनीयम् – यदुक्तं दृग्विषयत्वरूपोपाधिर्वृत्तिव्याप्यो न वेति? तत्राद्यमङ्गीकुर्मः। न चैवं विशेषणीभूतदृशोऽपि वृत्तिव्याप्यत्वमवर्जनीयमेवेत्युक्तमिति वाच्यम्। दृगज्ञानेऽपि विमतिविषयत्व रूपपक्षतावच्छेदकप्रकारेण दृग्विषयत्वरूपोपाधिज्ञानसम्भवात्। पक्षतावच्छेदकप्रकारकपक्षज्ञानस्यैवानु मित्यङ्गत्वात्। न हि पक्षीकृतपदार्थानां पक्षतावच्छेदकातिरिक्ततत्तदसाधारणधर्मप्रकारकज्ञानमनुमित्यङ्गम्। येन दृग्विषयत्वोपाधेर्वृत्तिव्याप्यत्वे विशेषणीभूतदृशोऽपि ज्ञानमवर्जननीयं स्यात्। तथा सति प्रकृते पक्षीकृतपदार्थानामानन्त्येन तत्तदसाधारणधर्मपुरस्कारेणानन्तपदार्थज्ञानस्य जन्मसहस्रेणापि दुःसम्पादत्वाद् अनुमानानवतार एव स्यात्। किञ्च एवमनुगतपक्षतावच्छेदकनिर्वचनायासोऽपि व्यर्थ एव स्यात्। नच दृग्विषयत्वस्य विमतिविषयत्वरूपपक्षतावच्छेदकप्रकारेण ज्ञाने विमत्यवच्छेदकब्रह्मान्यत्वज्ञानस्यावश्यकत्वेन ब्रह्मणोऽपि वृत्तिव्याप्यत्वमवर्जनीवमेवेत्युक्तमुपपन्नमिति वाच्यम्। पृथिवीत्वादीनामननुगतानामेव धर्माणां विमत्यवच्छेदकत्वाङ्गीकारेण गुरुभूतानेकपदार्थघटितत्वेन 'ब्रह्मप्रमान्येने'त्याद्युक्तस्यावच्छेदकत्वानभ्युपगमेन ब्रह्मणो वृत्तिव्याप्यत्वस्य दूरनिरस्तत्वात्। नचैवं पृथिवीत्वादीनामिव दृग्विषयत्वस्यापि ज्ञातव्यत्वेन दृग्ज्ञानमावश्यकमिति वाच्यम्। पृथिवीत्वादीनामनन्तत्वेन तेषां प्रातिस्विकरूपेण ज्ञानस्य जन्मसहस्रेणापि दुःसम्पादत्वेन विमतिविषयतावच्छेदकत्वेनैव तद्ज्ञानस्य स्वीकर्तव्यत्वेन दृग्विषयकत्वस्यापि तेन रूपेण ज्ञानसम्भवे दृग्ज्ञानस्यानावश्यकत्वात्। किञ्चैवं ब्रह्मणो वृत्तिव्याप्यत्वोपपादनस्योपरितनत्वेन फक्किकार्थत्वाभावेन तदर्थतया योजनस्यात्यन्तासङ्गत्तत्वादिति दिक्॥ केचित्तु – चितोऽज्ञाने चिद्विषयत्वरूपजडत्वज्ञानं न स्यात्। न च विमतं मिथ्या जडत्वादिति जडत्वं हेतूकुर्वता तज्ज्ञानाभावोऽङ्गीकर्तुं शक्यते। न च तज्ज्ञानं दृक्शब्दशब्दितचिद्ज्ञानं विना सम्भवति। तथाच दृग्रूपचिद्घटितजडत्वादिरूपहेतुज्ञानार्थमवश्यं दृशो वृत्तिव्याप्यत्वं परेणाङ्गीकार्यम्। तथाच वृत्तिव्याप्यत्वस्यैव हेतुत्वे मिथ्यात्वरहिते दृश्ये च हेतुसत्त्वेन व्यभिचार इत्यर्थ इत्याहुः॥

अत्रेदमालोचनीयम्। श्रुतफलपरित्यागेनाश्रुतफलकल्पने "पशुकामो यजेते"त्यत्रापि श्रुतपश्वादिरूपफलपरित्यागेनाश्रुतफलं स्वर्गादि कल्प्येत। यदि च तत्राद्दृश्यत्वरूपबाधकात् तथा कल्पनम्, तर्ह्यत्रापि गौणत्वादिकं बाधकमिति तुल्यम्। किञ्च नाद्दृश्यत्वं तत्र बाधकम्। नहि "यत्तदद्रेश्यमि" त्यादि श्रुतावद्दृश्यत्वं सर्वथा दृगविषयत्वमभिप्रेतम्; किं तर्हि? वचनवृत्त्या शब्दजन्यवृत्त्यविषयत्वमात्रमेव। अन्यथा सत्य-ज्ञानादिवाक्यानां लक्षणास्वीकारवैयर्थ्यापत्तेः। अपि च ब्रह्मतत्त्वबोधका वेदान्ता इत्यङ्गीकुर्वाणेन मायिना न श्रवणादिविधिः स्वर्गार्थो न ब्रह्मज्ञानार्थ इति वक्तुं शक्यते। तथासत्यपसिद्धान्तापातादिति। यदुक्तम् – अतिसन्निहितं श्रवणमेव भावनाफलत्वेन सम्बध्येतेति, तदपि न। भावनाकरणत्वेन श्रुतश्रवणस्य तत्फलतया सम्बन्धापादनस्याप्रामाणिकत्वात्। मौनं मौढ्यं चेति। ब्रह्मविषयकबोधजनकवेदान्तरूपशब्दाप्रयोगो मौनम्। मौढ्यं च तत्त्वज्ञानराहित्यम्। अन्ये त्वत्र – आपाद्यमानं मौनं शब्दवक्तृत्वाभावो वा? वेदान्तरूपशब्दवक्तृत्वाभावो वा? ब्रह्मज्ञानोद्देश्यकशब्दवक्तृत्वाभावो वा? नाद्यः। अज्ञेयत्वेऽपि ब्रह्मणस्तद्विचारे प्रवृत्तयोर्देहनिर्वाहादिहेतुभूतशब्दप्रयोगे विरोधाभावात्। न द्वितीयः; ब्रह्मावोधकस्यापि वेदान्तरूपशब्दस्य स्तुत – शस्त्राधिकरणन्यायेन तद्वक्तृत्वस्योपपत्तेः। न तृतीयः। इष्टापत्तेः। ब्रह्मणो ज्ञानाविषयत्वेन तज्ज्ञानोद्देशेन शब्दप्रयोगस्य मयाऽनङ्गीकारादिति चेत् उच्यते। उपक्रमादिलिङ्गकस्य ब्रह्मज्ञानेच्छापूर्वकोच्चारितत्वरूपवेदान्तनिष्ठब्रह्मविषयकतात्पर्यावधारणरूपस्य विचारस्यासिद्धेर्मौनशब्दार्थत्वेन विवक्षितत्वात्। ब्रह्मणोऽज्ञेयत्वे निरुक्तविचारस्यासम्भावितत्वादित्याहुः।

अत्रेदमालोचनीयम् – परेण ब्रह्मणो ज्ञानविषयत्वानङ्गीकारेणापाद्यमानतया विवक्षितस्य ब्रह्मज्ञानेच्छापूर्वकोच्चरितत्वादिरूपविचारासिद्धिरूपमौनशब्दार्थस्य परं प्रतीष्टत्वेन तृतीयपक्षदूषणापरिहारात्। ब्रह्मापि ज्ञानविषय इति यदि, तदा तृतीयपक्षेणैवोपपत्तावुक्तकुसृष्टिकल्पनस्यायुक्तत्वात्। तस्माच्छङ्कासमाधाने अयुक्ते। ननु च वृत्तिकर्मत्वं विवक्षितम्। तथाच वृत्तिविषयत्वेऽपि वृत्तिकर्मत्वाभावात् न व्यभिचार इत्यत आह – किञ्चेति। कर्मणि षष्ठीति। "कर्तृ-कर्मणोः कृती" ति कर्मणि षष्ठी। यद्यप्यत्र प्रतिपदविधाना षष्ठी न समस्यत इति समासनिषेधः। तथापि कृद्योगलक्षणा षष्ठी समस्यत इति प्रतिप्रसवात् समासोपपत्तिः। दृश्यते त्विति। अत्र लटः कर्मणि विधानात् तदादेशोऽपि तङ् कर्मणि विहित इति भावः। तव्यादिश्चेति। तव्यादीनां 'कृत्याः' 'प्राङ् ण्वुलः" इति कृत्यत्वात् कृत्यानां च "तयोरेव कृत्यक्तखलर्थाः" इति कर्मणि विधानादिति भावः। दृशोऽज्ञान इति। ननु अत्र दृक्शब्देन वृत्तेर्विवक्षितत्वेन वृत्तेर्ज्ञानाङ्गीकाराद् दृग्विषयत्वज्ञानं भविष्यति। न च दृक्शब्देन चैतन्यं विवक्षितमिति – वाच्यम्। वृत्तिव्याप्यत्वरूपहेतुपक्षे दूषणानुपपत्तेः। तथाच "दृशोऽज्ञाने" इत्यनेन कथमनैकान्तिकत्वोपपादनमिति चेत्। अयमत्राभिप्रायः; वृत्तिव्याप्यत्वमस्तु, मिथ्यात्वं माऽस्त्वित्य प्रयोजकत्वशङ्कायां मिथ्यात्वाभावे ज्ञानविषयत्वरूपं दृश्यत्वं न स्यात्। ज्ञान-ज्ञेययोः संयोग-समवायाभावेन सम्बन्धान्तरस्य च निर्वक्तुमशक्यत्वेन दृगध्यस्तत्वघटितसम्बन्धेन दृग्विषयत्वे वक्तव्ये दृगध्यस्तत्वज्ञानस्यावश्यकत्वेन दृगज्ञाने दृगध्यस्तत्वज्ञानासम्भवेन दृग्ज्ञानमेष्टव्यम्। एवं च विपक्षबाधकतर्कार्थं चैतन्यरूपदृग्ज्ञाने ज्ञानविषयत्वं ब्रह्मचैतन्येऽनैकान्तिकमिति। वस्तुतस्तु – वृत्तिव्याप्यत्वं हि वृत्तिसम्बन्धित्वम्। तत्र हि वृत्तेः प्रपञ्चस्य च सम्बन्धो वक्तव्यः। स च साक्षाद्वा? परम्परया वा? तत्राऽद्ये

प्रयुक्तविशिष्टाभावस्य घटादाविव, चित्प्रतिफलनानङ्गीकारे वृत्तेरज्ञानानिवर्तकत्वात्। अतीन्द्रियादाविव विशेष्याभावप्रयुक्तविशिष्टाभावस्यात्मन्यपि सत्त्वेन व्यभिचारस्य दुरुद्धरत्वात्। वृत्तिव्यतिरिक्तस्य चैतन्यरूपज्ञानस्य घटादिभासकस्य मयाऽनङ्गीकारेणान्यतरासिद्धेश्च। घटादौ फलव्याप्यत्वाभावस्योक्तत्व-वक्ष्यमाणत्वाभ्यां तव मतेऽप्यसिद्धेरापाद्यमानत्वाच्च। तस्मात् नैतदपि समाधानं युक्तम् इति सर्वमवदातम्।

व्यासाद्रिसृततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां दृश्यत्वं दृश्यतां बुधैः॥
॥ इति दृश्यत्वहेतुभङ्गः॥

न्यायामृतकण्टकोद्धारः

अथ हेतुखण्डनमारभते – दृश्यत्वहेतूक्तिरपीति॥ मिथ्येति॥ मिथ्याभूतार्थविषयक इत्यर्थः। प्रत्ययत्वादिति॥ विशिष्टप्रत्ययत्वादित्यर्थः। तेनाऽलयविज्ञानादौ न व्यभिचारः। छर्दिमात्रमिति॥ उद्गिरणमात्रमित्यर्थः। छर्दिमात्रता च तेन प्रत्ययमात्रपक्षीकारे तद्विषयप्रपञ्चमात्रपक्षीकरणम्। प्रत्ययत्वस्य हेतूकरणे प्रत्ययविषयत्वस्य हेतूकरणमित्येवंरूपेति भावः। अस्त्वेवं दृश्यत्वादिहेतूक्तेर्बौद्ध्युक्त्युद्गिरणत्वम्, तथापि तन्मत इव मन्मतेऽपि तस्योपपन्नत्वात् तदङ्गीकारो युक्त इत्यत आह – इयांस्तु भेद इति॥ तथाच बौद्धमतेऽप्रामाण्यस्योत्पत्तौ स्वतस्त्वादुत्पद्यमानं ज्ञानमप्रमाणमेव उत्पद्यत इति प्रत्ययत्वेनाप्रामाण्यसाधनं युक्तम्। त्वन्मते तूत्पत्तौ प्रामाण्यं स्वतः इत्युत्पद्यमानं ज्ञानं प्रमाणमेवोत्पद्यते। प्रामाण्यं चाबाधितार्थकत्वम्। एवं च तस्य मिथ्यात्वे साध्यमाने बाधितार्थकत्वमेव साधितं स्यात्। बाधितार्थकत्वमेव चाप्रामाण्यम् इति विरोधादयुक्तमिति भावः।

पराभिप्रेतदृश्यत्वनिरुक्तिं खण्डयितुं पृच्छति– किं चेति। साधारणमिति। वृत्तिव्याप्यफलव्याप्यसाधारणं ज्ञानविषयत्वमित्यर्थः। कदाचित् कथंचिदिति। कदाचित् स्वसत्ताकाले। तेनातीतघटादौ न भागासिद्धिः। नित्यातीन्द्रियादौ भागासिद्धिवारणाय – कथंचिदिति॥ ज्ञातत्वाज्ञातत्वाभ्यामित्यर्थः। आत्मनोऽपीति। तथाचानैकान्त्यमिति भावः। अन्यथेति। ब्रह्मणो वृत्तिव्याप्यत्वानङ्गीकार इत्यर्थः। नन्वेवमपि वेदान्तानां न वैयर्थ्यम्; तेषां कर्मादिपरत्वात् इत्यत आह – ब्रह्मपराणामिति। ननु श्रवणादिविधेरदृष्टार्थत्वात् न वैयर्थ्यमित्यत आह – ब्रह्मज्ञानार्थमिति। 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः' इति श्रुतौ दर्शनानुवादेन श्रवणादेर्विहितत्वात् तस्य ब्रह्मज्ञानार्थत्वं गम्यत इति भावः। बाधकान्तरं चाह – ब्रह्म विचारयतोरिति। अन्ये तु – न श्रवणविधिर्ब्रह्मज्ञानार्थः। ब्रह्मणोऽदृश्यतया सन्निहितस्यापि दर्शनशब्दस्य तदबोधकत्वात्। अन्यथा दर्शनापेक्षयाऽतिसन्निहितं श्रवणमेव भावनाफलत्वेन सम्बध्येत। एवं च सन्निहितफलालाभे व्यवहितस्यापि ग्राह्यतया स्वर्गाद्यर्थ एव श्रवणविधिः, अतो न वैयर्थ्यमित्यरुचेराह – ब्रह्म विचारयतोरिति – इत्याहुः।

स्वातिरिक्तसंविदपेक्षानियतव्यवहारयोगित्वमित्यर्थः ।। अस्वप्रभत्वम् अस्वप्रकाशत्वं रूप्ये नास्ति। अतः साधनवैकल्यम्, आत्मन्यस्तीति व्यभिचारः।

अत्र वदन्ति – अस्वप्रकाशत्वरूपं दृश्यत्वं हेतुः। स्वप्रकाशत्वं हि स्वापरोक्षत्वे स्वातिरिक्तानपेक्षत्वम्। ''यत् साक्षादपरोक्षाद् ब्रह्म'' इति श्रुतेः। तथाचान्यानधीनापरोक्षत्वं पर्यवसितम्। तन्निरूपितभेदवत्त्वं हेतुः। तच्च नित्यपरोक्षेऽन्याधीनापरोक्षे च घटादावस्ति, इति नासिद्धिः। नच ब्रह्मणोऽपि ब्रह्मप्रतियोगिककाल्पनिकभेदवत्त्वात् तत्र व्यभिचारः। अकल्पितभेदस्य क्वाप्यसिद्धत्वादिति वाच्यम्। तद्भेदस्यान्यानधीनापरोक्षत्वरूपधर्मानिरूपितत्वात्। जीवत्वेश्वरत्वादिरूपस्यान्यस्यैव धर्मस्य तन्निरूपकत्वात्। एवं चावेद्यत्वे सत्यपरोक्ष व्यवहारयोग्यत्वाभावरूपं दृश्यत्वमपि हेतुः। न च फलव्याप्यत्वाभावविशिष्टं यदपरोक्षव्यवहारयोग्यत्वं, तस्य ब्रह्मणीवाविद्यान्तःकरणादौ शुक्तिरूप्यादौ च सत्त्वेना सिद्धिसाधनवैकल्ये इति वाच्यम्। अज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वस्यापरोक्षव्यवहार योग्यत्वपदेन विवक्षितत्वात्। तस्य चाविद्यादौ शुक्तिरूप्यादौ चासत्त्वात् नासिद्धिसाधनवैकल्ये। यथाच घटादेः फलव्याप्यत्वं, तथाऽग्रे वक्ष्यते। अविद्यानिवृत्तेः पञ्चमप्रकारत्वाभ्युपगमपक्षे तत्र व्यभिचारवारणायाज्ञानकालवृत्तित्वं हेतुविशेषणं देयम्। तेनैव तुच्छेऽपि न व्यभिचारः। सद्विविक्तत्वे तु साध्ये तुच्छे पञ्चमप्रकाराविद्यानिवृत्तौ च न व्यभिचारगन्धोऽपि'' इति।

अत्र ब्रूमः – अपरोक्षत्वस्य ब्रह्मतिरिक्तत्वेऽविद्याधीनतयाऽन्यानधीनत्वस्यासम्भवदुक्ति कत्वात्। ब्रह्मस्वरूपत्वे तु तादृशभेदप्रतियोगितानवच्छेदकत्वेन घटादावसिद्धिः। अपरोक्षप्रति योगिकभेदोक्तौ तादृशजीवप्रतियोगिकभेदवत्त्वाद् ब्रह्मणि व्यभिचारः। कल्पितभेदमादाय ब्रह्मस्वरूपस्याप्यपरोक्षत्वस्यावच्छेदकत्वे पञ्चमप्रकाराविद्यानिवृत्तौ च व्यभिचारः, तदुभयव्यावृत्त्यर्थमज्ञानकालवृत्तित्वविशेषणोक्तावविद्यानिवृत्त्युत्तरकालीने जीवन्मुक्त्यवस्थोत्पन्ने भोगादावसिद्धिः। अविद्यालेशसमकालीनत्वोक्तौ घटादावसिद्धिः। अन्यतरसमकालीनत्वोक्तावप्रयोजकम्। प्रत्येकमुक्तिपक्षे पञ्चमप्रकाराविद्यानिवृत्तौ व्यभिचारः। युगपत् सर्वमुक्तेश्च वामदेवादिमुक्तिप्रतिपादकागमविरोधेनाप्रामाणिकत्वस्य त्वदीयैरपि कैश्चिदभिहितत्वादिति दिक्। वस्तुतस्तु – अपरोक्षत्वमपरोक्षत्वजातिमत्त्वं वाऽपरोक्षज्ञानविषयत्वं वा स्यात्। तृतीयप्रकाराभावात्। उभयथाऽप्यन्यानधीनापरोक्षभिन्नत्वाद् ब्रह्मणि व्यभिचारः। द्वितीयपक्षेऽन्यानधीनापरोक्षरूपचैतन्यविषयत्वाद् घटादावसिद्धिरित्यादि बोध्यम्। सद्विविक्तत्वे साध्येऽपि यथायथमेत एव दोषा बोध्याः। वृत्तिमात्रस्याज्ञानानिवर्तकतया तन्मते घटादाविव ब्रह्मण्यप्यज्ञाननिवृत्त्यर्थं वृत्तिप्रतिबिम्बितचैतन्यस्यावश्यकत्वेन फलव्याप्यत्वात्, विशेषणाभाव

प्रातिभासिकत्वेऽपि तद्वतमपरोक्षव्यवहारयोग्यत्वं सप्रकारकबाधायोग्यमेव। रूप्यापरोक्ष्यं नास्तीत्यप्रतीतेः। तथाच साधनवैकल्यमेव।

ननु फलव्याप्यत्वमेवास्वप्रकाशत्वम्। फलव्याप्यत्वं च न वृत्तिप्रतिबिम्बितचैतन्यविषयत्वं वा, वृत्त्या वा तत्प्रतिबिम्बितचैतन्येन वाऽभिव्यक्तविषयाधिष्ठानचैतन्यं प्रति विषयत्वं वा। घटादौ वृत्तिरूपज्ञानविषयत्वातिरिक्ते निरुक्तचैतन्यरूपे ज्ञानविषयत्वे प्रमाणाभावादित्युक्तत्वात्। तथापि वृत्तिजन्यातिशययोगित्वं वा, वृत्तिप्रतिबिम्बितचैतन्यजन्यातिशययोगित्वं वा फलव्याप्यत्वम्। अतिशयश्च नावरणभङ्गः। घटादावावरणाभावेन तद्भङ्गाभावात्। नापि व्यवहारः। वृत्तिजन्यव्यवहारवत्त्वस्यात्मन्यपि सम्भवेन व्यभिचारात्। घटादिषु चैतन्यरूपज्ञानानङ्गीकर्तृमते घटादिव्यवहारस्य घटादिविषयवृत्तिजन्यतया निरुक्तचैतन्याजन्यत्वेन स्वरूपासिद्ध्यापत्तेः। किन्तु भग्नावरणचित्सम्बन्धः। एतच्च चैतन्यस्य व्यापकतया सर्वमतेऽप्यस्तीति शङ्कां निराकरोति – शिष्टमिति॥ घटादौ वृत्त्या वा, तत्प्रतिबिम्बितचैतन्येन वा भग्नावरणचित्सम्बन्धे प्रमाणाभावात्। ननु आत्मनश्चिद्विषयत्वमनङ्गीकृत्य चित्कर्मत्वरूपास्वप्रकाशत्वं हेतूक्रियते। अत एवाज्ञानान्तःकरणादौ रूप्ये वाऽसिद्धिर्न भवति। साक्षिविषयत्वात्। नापि तुच्छे व्यभिचार इति चेत्, न। विषयत्वातिरिक्तस्य कर्मत्वस्याभावेन परम्परया ज्ञातत्वादिना चिद्विषयत्वस्यात्मनि व्यभिचारात्। साक्षात् चित्कर्मत्वस्य घटादावप्यसत्त्वेनासिद्धिरित्यादि स्वप्रकाशत्ववादे वक्ष्यत इत्यर्थः॥ किं चास्वप्रकाशत्वस्येति॥ यद्यपि फलव्याप्यत्वभिन्नानां पञ्चानामपि हेतूनामविद्यानिवृत्तौ व्यभिचारः, तथापि तेषां दूषितत्वेनासत्कल्पतया प्रस्तावितदूषणस्यास्वप्रकाशत्वस्यैव ग्रहणमित्यदोषः। ''पञ्चमप्रकार'' इति चतुर्थप्रकारसदसद्वैलक्षण्यरूपसाध्याभावोपपादनाय॥ प्रातिभासिकवदिति॥ अविद्यान्तःकरणादेः प्रमाणाधीनवृत्तिविषयत्वाभावेऽपि वस्त्वधीनवृत्तिविषयत्वमस्ति इति नासिद्धिरित्यर्थः॥ तज्ज्ञानस्यापीति॥ अन्यथा तुच्छज्ञानत्वेनाभिमतस्याज्ञानत्वं वा, अनित्यज्ञानत्वं वा स्यादित्यर्थः॥ धीमात्रेति॥ रूप्यस्य धीमात्ररूपत्वेन रूप्यवृत्तेः स्वाभिन्नरूप्यानधीनत्वादित्यर्थः। ननु एतदयुक्तम्। दोषसंस्कारसंप्रयोगैः द्वे अविद्यावृत्ती जन्येते – एका रजतरूपा, अपरा रजतधीरूपा। तथाच रजताधीनत्वं रजतवृत्तेः सम्भवत्येव। नच द्वयोर्वृत्त्योः समकालत्वात् न परस्परपरतन्त्रतेति वाच्यम्। वस्तुव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वस्य वस्त्वधीनशब्देन विवक्षितत्वात्। एतस्य समानकालीनवृत्त्योरपि सत्त्वादिति चेत्, न। व्यतिरेकशब्देन प्रागभावोक्तौ प्रागभावाप्रतियोगिप्रागभावाविद्यादावसम्भवः। अभावान्तरोक्तौ घटादिष्वसम्भव इत्याशयः॥ ब्रह्मणीति॥ प्रमाणाधीनवृत्तिविषयत्वस्योपपादनादित्यर्थः। संगृह्णाति – नेति॥ अन्यापेक्षेति॥

सुप्तिप्रलयादावपरोक्षव्यवहाररहित आत्मन्यव्याप्तिवारणाय योग्यत्वं विशेषणम्। एवंरूपस्व प्रकाशत्वाभावोऽस्वप्रकाशत्वम्। तच्च विशेष्यवति घटादौ विशेषणाभावाद्, विशेषणवति नित्यातीन्द्रिये विशेष्याभावादिति परेषां मतम्। तत्र घटादौ चैतन्यरूपज्ञानविषयत्वस्या प्रामाणिकत्वेनापरोक्षव्यवहारयोग्यत्वरूपविशेष्यवत् फलाव्याप्यत्वरूपविशेषणमपि तत्र वर्तत इत्येव स्यात्। एवञ्च विशेषणविशेष्ययोर्घटादौ सत्त्वाद् विशिष्टाभावस्तत्र नास्तीत्यसिद्धिः। अविद्यान्तःकरण शुक्तिरूप्यादौ फलाव्याप्यत्वरूपविशेषणवदपरोक्षव्यवहारयोग्यत्व रूपविशेष्यस्यापि सत्त्वाद् विशिष्टव्यतिरेकरूपो हेतुस्तत्रापि नास्तीत्यसिद्धिः। साधनविकलो दृष्टान्त इत्यर्थः। नित्यातीन्द्रिये विशेषणस्य सत्त्वेऽपि विशेष्याभावाद् विशिष्टाभावरूपहेतुरस्तीति 'पक्षैकदेशे'इत्युक्तम्॥ शुक्तिरूप्यादाविति॥ शुक्तिरूप्यादेर्व्यवहारकाल एव बाधितत्वात् तत्रापरोक्षव्यवहारयोग्यत्वमपि नास्तीत्यर्थः। शुक्तिरूप्यादेरापरोक्ष्याभावेऽपि 'रूप्यं साक्षात्करोमि' इत्यपरोक्षव्यवहारं समर्थयते – अपरोक्षव्यवहारायोग्येऽपीति॥ साक्षिगतेति॥ इदमाकारवृत्ति निवृत्ताज्ञानकार्यसाक्षिभेद इदमंशावच्छिन्नचैतन्यगतापरोक्ष्याध्यासादित्यर्थः। यथाश्रुते तु रूप्यस्य साक्षात् साक्षिचैतन्येऽनुत्पत्तेरसंगतिः स्यात्।

ननु एवमपरोक्षव्यवहारयोग्यत्वाभावोऽस्वप्रकाशत्वं हेतुरस्तु। न च घटादावसिद्धिरिति वाच्यम्। शुक्तिरूप्यादेरिव घटादेरप्यध्यस्तत्वेन तत्राप्यापरोक्ष्यविरहसत्त्वेनासिद्धेरभावादित्याशङ्क्य निराकरोति – यद्यपीति॥ फलाव्याप्यत्वे सति सप्रकारकबाधायोग्यापरोक्षव्यवहारयोग्यत्वाभावो हेतुः। तत्र सत्यन्तं विना घटादावसिद्धिः स्यादिति भावः। मा भूत् तर्हि शुक्तिरूप्यादौ दृष्टान्ते साधनवैकल्यं, पक्षीकृतेऽज्ञानान्तःकरणादावसिद्धिस्तु स्यादेवेत्याह सर्वेति॥ सर्वव्यावहारिकोपादानत्वमज्ञानविशेषणं, नान्तःकरणादेः व्यावहारिकत्वादिति॥ सप्रकारकबाधा बाध्यत्वादित्यर्थः। तत्र हेतुः – ब्रह्मज्ञानात् प्रागबाधित इति॥ अस्य चासंजातबाधरूपादिसाधारणतया श्रुत्यादिसिद्धे चेति द्वितीयो हेतुः। न हि परमते प्रातिभासिकापरोक्षयोग्यताधिकरणं रूप्यादि श्रुत्यादिसिद्धमित्यर्थः। व्यावहारिकेऽपि नित्यातीन्द्रिये तादृशयोग्यत्वं न व्यावहारिकं, तथापि व्यावहारिक इत्यस्य प्रत्यक्षप्रयोजकवत्तया व्यवहारविषय इत्यर्थः। पूर्वहेत्वोरप्येतदुपस्कर्तव्यम्, अतो न कश्चित् क्षुद्रोपद्रवः॥ न हीति॥ परेषां मत आपरोक्ष्यं नेन्द्रियजन्यवृत्तिविषयत्वम्। किं त्वपरोक्षैकरसानावृतसंवित्तादात्म्येन स्फुरणविषयत्वम्। तच्चाज्ञानादौ साक्षादस्ति। तत्र प्रमाणवृत्तेरविद्यावृत्तेर्वाऽनपेक्षणात्। घटादौ तु प्रमाणवृत्तिद्वाराऽनावृतसंवित्तादात्म्येन स्फुरणविषयत्वम्, इति परम्परयाऽऽपरोक्ष्यम्। एवं च घटाद्यपेक्षयाऽप्यज्ञानान्तःकरणादावापरोक्ष्यमुत्कृष्टमस्ति, इत्यपरोक्षव्यवहारयोग्यत्वाभाव स्तत्रासिद्ध इति भावः॥ तद्वेद्य इति॥ ज्ञातत्वेन साक्षिवेद्य इत्यर्थः। किंच रूप्यस्य

व्यभिचार इति शङ्कते – नन्वात्मनीति॥ नियतिपदेति॥ आत्मविषयकाद्वितीयत्वादि विशिष्टव्यवहारेऽपि विशेषणांश एव तदपेक्षा, नत्वात्मांशेऽपि। अतो नियतिपदाभावेऽपि नात्मनि हेतुरस्ति, इति नियतिपदवैयर्थ्यमित्यर्थः। ननु स्वव्यवहारे स्वांशावच्छेदेन स्वातिरिक्तसंविदपेक्षावत्त्वमेव हेतुरस्तु, अतो न वैयर्थ्यम्, अत आह – आसंसारमिति॥ अज्ञानावृतेऽज्ञाननिवृत्तिं विना व्यवहारस्यैवायोगादित्यर्थः। ननु अज्ञानावृतत्वकाले आत्मा मैव व्यवहरिष्ट, तदनावरणकाले तु स्वातिरिक्तसंविदं विनैव व्यवह्रियतामित्यत उक्तम् – आसंसारमिति॥ ननु आसंसारमज्ञानावृतोऽप्यात्मा कदाचित् स्वयमेवावरणमज्ञानं निवर्तयिष्यति। अनन्तरमुक्तसंविदं विनैव व्यवह्रियतामित्यत उक्तम् – शुद्धस्येति॥ शुद्धस्य केवलस्याज्ञानाविरोधित्वात् न कदाचिदपि स्वाज्ञाननिवर्तकत्वमित्यर्थः। किञ्च यद्यात्मव्यवहारः स्वतः स्फुरणादेव, तर्हि वेदान्तानां प्रकाशमानार्थप्रकाशकत्वेनानीदृशप्रामाण्यं न स्यात्। तदर्थं वेदान्तानामेवात्मव्यवहारहेत्वात्मज्ञानहेतुत्वं वाच्यमित्यभिप्रायेणोक्तम् – अनधिगतार्थ बोधकेति॥ ननु वृत्त्यन्यसंविदपेक्षानियतिमद्व्यवहारवत्त्वं विवक्षितम्। अस्ति च घटादौ तादृशचैतन्यरूपसंविदपेक्षा, इति न तत्रासिद्धिः। चैतन्ये तु न तदपेक्षा, इति न व्यभिचारोऽपीत्यत आह – वृत्त्यन्येति॥ तवेति॥ घटादौ वृत्त्यन्यसंविदपेक्षामङ्गीकर्तुरपीत्यर्थः। तथाचासिद्धिरिति भावः। ननु आत्मव्यवहारे न वेदान्तजन्यसंविदन्तरापेक्षा, किंत्वात्माज्ञाननिवृत्तिमात्रे। आत्मव्यवहारस्तु स्वतःस्फुरणादेव, अतो नात्मनि व्यभिचारः। घटादौ त्वस्फुरणरूपतया व्यवहारेऽपि स्वातिरिक्तसंविदपेक्षाऽस्ति, इति नासिद्धिरित्याशङ्कां निराकरोति – न च घटादावपीति॥ ननु उक्तम् – अस्फुरणतया घटादौ स्वव्यवहारेऽपि स्वातिरिक्तसंविदपेक्षेति। सत्यमुक्तं परन्तु तत्प्रत्युक्तमपि, अज्ञानाविरोधिस्फुरणरूपत्वस्यात्मनीव घटादावपि सुवचत्वादित्यनेनेति भावः॥ एतेनेति॥ स्वातिरिक्तसंवित्निष्ठस्व व्यवहारहेतुतावच्छेदकरूपत्वं स्वव्यवहारे स्वावच्छिन्नसंवित्सापेक्षत्वम्। आत्मनस्तु न स्वातिरिक्तस्वव्यवहारहेतुसंविदं प्रति विषयतयाऽवच्छेदकत्वम्। आत्मविषयकवृत्तेरात्मविषयकत्वेन व्यवहाराहेतुत्वात्। घटादेस्तु स्वव्यवहारहेतुसंविदं प्रति विषयतयाऽवच्छेदकत्वम्। घटादिविषयकत्वेन घटसंविदो घटव्यवहारहेतुत्वादित्यर्थः। एतदपि घटादिविषय संविदोऽप्यात्मविषयकवृत्तेरात्मविषयकत्वेनेव न घटविषयत्वेन घटादिव्यवहारहेतुता, अज्ञाननिवृत्तिमात्रार्थत्वादित्यादिना निरस्तमित्यन्वयः॥

॥ घटादाविति॥ अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वम्। तत्र निरुपाख्येऽतिव्याप्तिवारणायापरोक्षेत्यादिविशेष्यम्। घटादावतिव्याप्तिवारणाय सत्यन्तं विशेषणम्। ब्रह्मणोऽपि वृत्तिवेद्यतयाऽव्याप्तिर्मा भूत्, इति फलव्याप्यत्वाभावोऽवेद्यत्वं विवक्षितम्।

इन्द्रियजन्यवृत्तावपरोक्षत्वं नास्तीति यदि तदा चैतन्येऽपरोक्षत्वमेव, वृत्तौ तु परोक्षत्वमेव इति परोक्षत्वापरोक्षत्वयोर्ज्ञानत्वव्याप्यत्वं न स्यादित्यर्थः। ननु वृत्तिचैतन्ययोरुभयोर्ज्ञानत्वमस्ति इति तद्व्याप्यत्वं परोक्षत्वापरोक्षत्वयोर्भविष्यतीत्यत उक्तम् – एकेति॥ परमते न वृत्तिचैतन्ययोरेकज्ञानत्वम्। चैतन्यस्य ज्ञप्तिरूपत्वात्। वृत्तेर्ज्ञप्तिकारणत्वात्। परोक्षत्वस्यौपचारिकज्ञानत्वव्याप्यत्वम्। अपरोक्षत्वस्य मुख्यज्ञानत्वव्याप्यत्वम्। उभयोस्तु नैकज्ञानत्वव्याप्यत्वं स्यात्। इन्द्रियजन्यवृत्तौ साक्षात्कारत्वनिबन्धनस्य स्वाभाविका परोक्षत्वस्याभ्युपगमे तु परोक्षत्वापरोक्षत्वयोरेकवृत्तिनिष्ठज्ञानत्वेन व्याप्यत्वं संभवतीत्यर्थः। ननु तथापि नापरोक्षत्वस्य ज्ञानत्वव्याप्यत्वम्। वृत्तिनिष्ठज्ञानत्वाभाववति निरुक्तचैतन्यरूपज्ञानेऽप्यपरोक्षत्वस्य सत्त्वादिति चेत्, न। इन्द्रियजन्यवृत्त्यतिरिक्ते तादृशचैतन्यरूपापरोक्षज्ञाने प्रमाणाभावादित्युक्तत्वात्। स्वमते त्वैन्द्रियकवृत्तावतीन्द्रियविषयकवृत्तौ साक्षिरूपज्ञाने च मुख्यज्ञानत्वस्य सत्त्वात् परोक्षत्वापरोक्षत्वयोरेकज्ञानत्वव्याप्यत्वं सम्भवतीत्याशयः।

यथाश्रुते दोषमाह – आत्मनोऽपीति॥ यस्मिन् कस्मिंश्चिदात्मगोचरव्यवहारे स्वप्रकाशत्वाद्वितीयत्वादिविशिष्टविषयके स्वातिरिक्तसंविदो विशेषणविषयिकाया नियमेनापेक्षणादित्यर्थः। ननु स्वातिरिक्तसंविदपेक्षानिरूपितस्वव्यवहारत्वावच्छिन्नव्याप्यताकव्यवहारकत्वमुक्तलक्षणार्थः। आत्मव्यवहारे नित्यसिद्धे स्फुरणरूपे सुषुप्तिकालीने तादृशसंविदपेक्षाऽभावेन व्यभिचारात् नात्मव्यवहारे तादृशसंविदपेक्षाव्याप्यत्वमस्ति। यद्यप्यात्मव्यवहारविशेषस्य तादृशसंविदपेक्षाव्याप्यत्वमस्ति। तथापि सा व्याप्यताऽऽत्मव्यवहारत्वेन नावच्छिद्यते, किन्तु तत्तदात्मव्यवहारत्वेनैव। एवं च नातिव्याप्तिरिति शङ्कते – नन्विति॥ घटादावपीति॥ घटादिगोचरव्यवहारेऽपि निरुक्तव्याप्यता घटादिगोचरतत्तद्व्यवहारत्वेनैवावच्छिद्यते, न तु घटादिगोचरव्यवहारत्वसामान्येनेत्यर्थः। ननु घटादिव्यवहारनिष्ठा निरुक्तव्याप्यता सामान्येन घटादिव्यवहारत्वेनैवावच्छिद्यते, लाघवात्। व्यभिचाराभावाच्च। आत्मव्यवहारे तु सुषुप्तिकालीने स्फुरणरूपे व्यभिचारात् निरुक्तव्याप्यतावच्छेदकत्वं गुरोरपि व्यवहारविशेषत्वस्यैव कल्प्यते। तथाच नासिद्धिर्घटादौ, न वाऽऽत्मनि व्यभिचार इति शङ्कते – ननु घटादाविति॥ आत्मव्यवहारेऽपि सौषुप्तिके विशिष्टगोचरे विशेषणोपनायकमानापेक्षाया आवश्यकत्वेनात्मव्यवहारस्यापि निरुक्तसंविदपेक्षां प्रत्यव्यभिचारात् तत्रापि सामान्यस्यात्मव्यवहारत्वस्यैव तद्व्याप्यतावच्छेदकत्वात्। तथाचाऽऽत्मनि व्यभिचार इत्याह – एतावन्तं कालमिति॥ सुषुप्तौ कालादिविशिष्ट एवात्मा व्यवह्रियत इत्यर्थः। ननु स्वव्यवहारे स्वांशावच्छेदेनापि स्वातिरिक्तसंविदपेक्षानियतिरिति विवक्षितो हेतुः। सुषुप्तिकालीने आत्मगोचरकालादिविशिष्टव्यवहारे तु कालादिविशेषणांश एव मानान्तरापेक्षा, न त्वात्मांशेऽपि। अतो नात्मनि

इति। अत एवातीन्द्रियस्थले निरुक्तचैतन्यरूपज्ञानाभावादतीन्द्रियार्थाधिष्ठान चैतन्यावरकाज्ञाननिवृत्तिर्नास्ति इत्यपरोक्षैकरसानावृतसंवित्तादात्म्येन स्फुरणविषयकत्व रूपमापरोक्ष्यं विषयस्य नास्ति, किन्तु केवलमर्थव्यवहारमात्रमिति। अस्मिन् पक्ष आध्यासिकसम्बन्धस्यातन्त्रत्वापातेनारुच्या द्वितीयः पक्षः। स यथा – निरुक्तवृत्तिप्रतिबिम्बितेन चैतन्येन घटाधिष्ठानचैतन्यावरकाज्ञाननिवृत्तौ सत्यां घटाद्यधिष्ठानचैतन्यस्यापरोक्षैकरसप्रमातृ चैतन्येन सहैकोपाध्यवच्छेदेन तदभेदाभिव्यक्तौ तच्चैतन्यस्फुरणे सति तत्राध्यस्तस्य घटादेरप्यापरोक्ष्यमिति, तदुभयमपि न। तादृशचैतन्यरूपज्ञाने प्रमाणाभावात्, वृत्त्यैवापरोक्ष्योपपत्तेः। अन्यथा तव मतेऽप्यपरोक्षवृत्तिवत् परोक्षवृत्तौ चित्प्रतिफलनं भवतु। तादृशवृत्त्या च स्वविषयधर्माद्यधिष्ठानचैतन्यावरकाज्ञाननिवृत्तिरपि भवतु। एवं चापरोक्षैकरसानावृत संवित्तादात्म्येन स्फुरणविषयतयैव परोक्षवृत्तिविषयस्य धर्मादेरापरोक्ष्यमपि भवतु। तथा तद्विषयकपरोक्षवृत्तेरप्यपरोक्षैकरसचैतन्यविषयतयैवापरोक्ष्यमपि भवतु, इत्याद्यापादने कृत इन्द्रियजन्यत्वरूपविशेषाभावात् परोक्षवृत्तौ नैते दोषाः। अपरोक्षकृतौत्विन्द्रियजन्यत्व रूपविशेषप्रयुक्तसाक्षात्कारत्वरूपजातिविशेषसद्भावात् चित्प्रतिफलनादि भवतीति समाधातव्यम्। तदेतत् निरुक्तचैतन्यरूपज्ञानानङ्गीकारे वृत्तिमात्राङ्गीकारेऽपि समानमित्यभिप्रायेणोक्तम् – चैतन्याभिव्यञ्जकत्वार्थमावश्यकेनेति॥ ननु वृत्तिगतेन साक्षात्कारत्वरूपविशेषेण चैतन्या विषयस्यापि घटादेः साक्षात्कृतत्वरूपमापरोक्ष्यमुपपन्नमित्युक्तमयुक्तम्, कार्यगतानुगतधर्म स्यानुगतकारणप्रयोज्यत्वनियमेन तादृशकारणासंभवे तादृशधर्मस्याप्यसिद्धेः, इत्यत उक्तम् – इन्द्रियजन्यत्वप्रयुक्तेनेति॥ इन्द्रियत्वेनेन्द्रियजन्यत्वेनेत्यर्थः। अनुमितौ तु मनस्त्वेन मनइन्द्रियजन्यत्वम्। अतो न तत्र साक्षात्कारत्वप्रसङ्गः। नचैवं मनस्त्वेन मनोजन्यस्मृतेर्मानसत्ववदनुमितेरपि मानसत्वापत्तिरिति वाच्यम्। व्यापारवत्करण निरपेक्षमनोजन्यत्वेन मानसत्वमित्याहुः। साक्षात्कृतत्वरूपविषयापरोक्षे दृष्टान्तमाह – इच्छादिवृत्त्यनिष्ठेनेति॥ चैतन्याविषयस्यापि विषयस्यापरोक्ष्यं साक्षात्कृतत्वरूपं ज्ञानगतेन साक्षात्कारत्वरूपविशेषेणैवोपपन्नमिति पूर्वेणैवान्वयः।

ननु न वृत्तावपरोक्षत्वम्। प्रमाणाभावात्। किंतु चैतन्यमेव तथा। "यत्साक्षादपरोक्षाद् ब्रह्म" इति श्रुतेः। इन्द्रियजन्यवृत्तौ तु चैतन्यरूपापरोक्षज्ञानसम्बन्धेनौपचारिकमपरोक्षत्वम्। अतस्तादृशचैतन्यरूपज्ञानानङ्गीकारे विषयस्य नापरोक्ष्यसिद्धिरित्यत आह – अन्यथेति॥ इन्द्रियजन्यवृत्तौ स्वभावतोऽपरोक्षत्वानभ्युपगमेचैतन्यविषयत्वप्रयुक्तौ पचारिकापरोक्षत्वाभ्युपगमे। परोक्षत्वं ज्ञानकरणकज्ञानत्वादिकम्। अपरोक्षत्वम् परोक्षज्ञानभिन्नत्वादिकम्।

यदि घटादौ कल्प्येत, तदाऽन्यथोपपन्नद्वेषेच्छादिनिवृत्तिकार्यकं द्वेषेच्छादिनिवृत्तिरूपकार्याजनकमिच्छाद्याकारान्तःकरणवृत्तिप्रतिफलितं तद्व्यङ्ग्यं वेच्छाद्वेषादिकं कल्प्यं स्यात्। तथाऽन्यथोपपन्नवन्ह्यादिप्रवृत्तिरूपकार्यकं वन्ह्यादिप्रवृत्तिरूपकार्याजनकं वन्ह्यादिपरोक्षवृत्तिप्रतिफलितं तद्व्यङ्ग्यं वा वन्ह्यादिविषयकपरोक्षवृत्त्यन्तरमभ्युपेयं स्यात्। तथाऽन्यथोपपन्नान्धकारनिवृत्तिकार्यकमन्धकारनिवृत्तिरूपकार्याजनकं तमोनिवर्तकत्वेन प्रतीयमानप्रभाप्रतिफलितं तद्व्यङ्ग्यं वा प्रभान्तरं वा कल्प्यं स्यात्। द्वेषाविरोधीच्छा वा, इच्छाद्यविरोधिद्वेषादिकं वा, वन्ह्यादिव्यवहाराहेतुर्वन्ह्यादिपरोक्षज्ञानं वा, अन्धकाराविरोधिप्रभा वा नास्ति; अननुभवात्, इति यदि तदाऽज्ञानाविरोधिज्ञानमपि नास्ति। अननुभवात्। एवं च वृत्तिप्रतिफलितचिद्विषयत्वं न घटादीनाम् इति तत्रासिद्धिर्दुरुद्धरेत्यर्थः।

ननु "तमेव भान्तम्' इत्यादिश्रुतिबलात् तादृशचैतन्यरूपज्ञानसिद्धिरिति तृतीयं पक्षं निराकरोति – तमेव भान्तमिति॥ आपरोक्ष्यार्थं निरुक्तचैतन्यरूपज्ञानकल्पनमिति चतुर्थपक्षेऽप्यापरोक्ष्यं किं परोक्षज्ञानभिन्नज्ञानत्वादिकं ज्ञानगतं वा? आहोस्वित् साक्षात्कृतत्वादिकमर्थगतं वा? नाद्य इत्याह – चैतन्याविषयस्यापीति॥ ज्ञानस्येति शेषः। चैतन्यम् अविषयः अप्रतिबिम्बितं यस्मिन् तस्य वृत्तिप्रतिबिम्बितचैतन्यभिन्नस्य इन्द्रियजन्यवृत्तिमात्रस्येति यावत्। निरुक्तचैतन्यरूपज्ञानानङ्गीकारेऽपरोक्षज्ञानाभावापातेन परोक्षापरोक्षज्ञानविभागो न स्यात् इति निरुक्तचैतन्यरूपज्ञानकल्पनमिति यत् तदपि न। निरुक्तचैतन्यरूपज्ञानानङ्गीकारेऽपीन्द्रियजन्यवृत्तावेव साक्षात्कारत्वरूपविशेषेण परोक्षज्ञानभिन्न ज्ञानत्वादिरूपापरोक्ष्यस्योपपत्तेः। न द्वितीय इत्याह – चैतन्याविषयस्यापीति॥ घटादेरिति शेषः। चैतन्यं प्रत्यविषयःचैतन्याविषयः। तस्य चैतन्याविषयस्यापि घटादेः साक्षात्कृतत्वरूपमापरोक्ष्यं वृत्तिगतेन साक्षात्कारत्वरूपविशेषेणैवोपपन्नमित्यन्वयः। विषयस्या परोक्ष्यं परमते द्वेधा – बाह्येन्द्रियार्थसन्निकर्षाद् बाह्येन्द्रियद्वारा निःसृतान्तः करणवृत्तिप्रतिबिम्बितचैतन्येन घटाधिष्ठानचैतन्यावरकाज्ञाननिवृत्तौ सत्यां घटाकारवृत्तिप्रति प्रतिबिम्बितचैतन्येनैव घटादिकं प्रकाश्यते। यथाहुः–

"स्वच्छेऽन्तःकरणेऽशनिप्रसृमरे नेत्रादिमार्गोद्गते ।
तत्तद्ग्राह्यचयात्मना परिणते बिम्बीभवन्ती चितिः।
एकाऽप्यर्थमनोविशेषकवशाद् द्वैतं प्रपन्ना हरति ।
अज्ञानं, प्रकटीकरोति विषयान् ज्ञातं मयेदं त्विति"॥

इत्यपि तुल्यमित्यभिप्रायेणोक्तम् – अज्ञानाविरोधिस्फुरणरूपत्वस्य चेति॥ तथाचासिद्धिभयेन घटाकारवृत्ताविवात्माकारवृत्तावपि चित्प्रतिफलनमवश्यमङ्गीकरणीयम्। एवं चात्माऽपि घटादिरिव स्वाकारवृत्तिप्रतिबिम्बितविषयः, इति शुद्धात्मनि निरुक्तहेतोर्व्यभिचार इत्यर्थः।

एतावता घटादौ स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वमभ्युपेत्य तन्न्यायेनैव शुद्धात्मनोऽपि स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वमापाद्य शुद्धात्मनि व्यभिचार आपादितः। संप्रत्यात्मनीव घटादावपि स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वं नास्ति तथाचासिद्धिरिति वक्तुं घटादौ स्वाकारेन्द्रियजन्यवृत्त्यतिरिक्तम्, स्वाकारवृत्तिप्रतिबिम्बितचैतन्यरूपं वा, तादृशवृत्त्यभि व्यक्तचैतन्यरूपं वा ज्ञानान्तरं नास्ति, प्रयोजनाभावादित्याह अस्फुरणरूपेष्वित्यादिना॥ तादृशवृत्तिरूपज्ञानातिरिक्तं तादृशचैतन्यरूपं ज्ञानं किं वृत्तिविषये घटादौ व्यवहारार्थं वा कल्प्यते? अनुभवबलाद्वा? श्रुतिबलाद्वा? आपरोक्ष्यार्थं वा? नाद्य इत्याह – अफुरणरूपेष्विति॥ इन्द्रियजन्यान्तःकरणवृत्तावेव चित्प्रतिफलनम्, न त्वनुमित्यादिरूपान्तःकरणवृत्ताविति परसिद्धान्तः। तथाच यथाऽनुमित्यादिविषये वृत्तिप्रतिफलितचिद्विषयत्वाद्यभावेऽपि वन्ह्यादौ प्रवृत्तिरूपव्यवहारः, तथैन्द्रियकेष्वपीन्द्रियजन्यवृत्तिप्रतिफलितचिद्विषयत्वादिकं विनाऽपि स्वाकारेन्द्रियजन्यवृत्तिमात्राद् घटादिषु व्यवहारोऽस्तु। एवञ्च वृत्तिप्रतिफलितचिद्विषयत्वादिकं घटादावसिद्धमित्यर्थः। ननु विज्ञानादिश्रुतेः स्फुरणरूपात्मनि वृत्तिमात्रात् मया व्यवहारस्याङ्गीकारेऽप्यनेवंविधे घटादौ न तद् युक्तम्, अत उक्तम् – अस्फुरणेत्यादि॥ ऐन्द्रियवदतीन्द्रियस्याप्यस्फुरणरूपत्वाविशेषादित्यर्थः।

अनुभवबलादिन्द्रियजन्यवृत्त्यतिरिक्तं निरुक्तचैतन्यरूपं ज्ञानं कल्प्यत इति द्वितीयपक्षं निराकरोति घटादाविति॥ घटादौ निरुक्तचैतन्यरूपज्ञानस्याननुभवात्। ननु घटादावज्ञाननिवृत्तिः सहेतुका निवृत्तित्वात् घटनिवृत्तिवदित्यनुमानेनेतरपरिशेषसहितेन निरुक्तचैतन्यरूपज्ञान मज्ञाननिवर्तकत्वेन घटादौ सिद्धमनुभूयत इति – चेत्, न; विषयाकारेन्द्रियजन्य वृत्तिप्रतिबिम्बितचैतन्यरूपस्य विशिष्टस्याज्ञाननिवर्तकत्वं किं विशेष्यभूतचैतन्यस्याज्ञाननिवर्तकत्वेन वा? विशेषणीभूततादृशवृत्तेरज्ञाननिवर्तकत्वेन वा? मिलितस्योभयस्य तथात्वेन वा? नाद्यः। चैतन्यमात्रस्य त्वन्मतेऽज्ञानस्फोरकत्वेनाज्ञानाविरोधित्वात्। न द्वितीयः। परिशेषासिद्धेः। न तृतीयः। आवश्यकवृत्तेरेवाज्ञानविरोधित्वेनाज्ञाननिवर्तकत्वात्। तथाच घटादौ निरुक्तचैतन्य रूपज्ञानस्योक्तविधयाऽज्ञानविरोधित्वाभावाद् नोक्तानुमानेन तादृशचैतन्यरूपस्य ज्ञानस्यानुभव इति भावेनोक्तम् – अज्ञानाविरोधीति॥

॥अन्यथेति॥ अन्यथोपपन्ना ज्ञाननिवृत्तिरूपकार्यकम् अज्ञाननिवृत्तिरूपकार्या जनकमिन्द्रियजन्यवृत्तिव्यतिरिक्तं तत्प्रतिफलितचैतन्यरूपं वा, तव्यङ्ग्यचैतन्यरूपं वा ज्ञानं

साध्यत्वात् फलम्, इत्यविद्यादि शुक्तिरूप्याद्यपि फलव्याप्यमेवेति चेत्, न। तथाप्यविद्यावृत्त्यादावसिद्धिरेव। अन्योन्याश्रयादेः। अविद्यावृत्तौ मानाभावाच्चेत्यर्थः॥

नित्यातीन्द्रियमिति॥ नित्यातीन्द्रियवद् ब्रह्मणोऽपि ज्ञातत्वेन वाऽज्ञातत्वेन वा साक्षिविषयत्वस्य त्वयाऽप्यङ्गीकार्यत्वाद् ब्रह्मणि व्यभिचार इत्यर्थः। ननु न चिद्रूपस्य शुद्धब्रह्मणश्चिद्विषयत्वम्; भेदाभावादित्याशङ्क्य निराकरोति तद्व्यवहारजनन इति॥ तदविषयत्वे तद्विषयकव्यवहाराजनकत्वमेव प्रयोजकम्, नतु तदभिन्नत्वम्। अभिधेयत्वरूपाभिधान विषयेऽभिधाने व्यभिचारात्। तथाच भेदाभावरूपहेतौ तद्विषयकव्यवहाराजनकत्वमुपाधिरित्यर्थः। असिद्धिमप्याह – कल्पितभेदेनेति॥ कल्पितभेदस्य सत्त्वाद् भेदाभावरूपहेतुरसिद्ध इत्यर्थः। ननु कल्पितभेदो न भेदकार्यक्षमः, इत्यत उक्तम् – लिङ्ग-लिङ्गिभाववद् ज्ञातृ-ज्ञेयभाववच्चेति च॥ ननु विषय विषयिणोः कल्पितभेदस्याप्यभावे कथं विषय-विषयिभाव इत्यत उक्तम् स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसम्भवाच्चेति॥ वृत्तिप्रतिफलितचितः शुद्धात्मनः सकाशात् कल्पितभेदवत्त्वेन विषयित्वं सम्भवतीत्यर्थः। यद्वा पूर्वोदाहृतानुभवबलात् चिद्रूपस्याप्यात्म नश्चिद्विषयत्वमज्ञातत्वादिना नित्यातीन्द्रियवत् परैरङ्गीकर्तव्यमित्येव न, अपितु घटादिवदात्मनः स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वमपि स्वीकर्तव्यमेव। तथाच पूर्वोक्तस्य फलव्याप्यत्वस्य हेतोरपि शुद्धे ब्रह्मणि व्यभिचारश्चेत्यभिप्रायेण स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसम्भवाच्चेत्युक्तम्॥ अन्यथा चिद्विषयत्वेत्येवावक्ष्यत्। ननु आत्माकारवृत्तौ चितः प्रतिफलनेऽपि नात्मनः स्वाकारवृत्तिफलितचिद्विषयत्वमस्ति; प्रयोजनाभावात्, इति नोक्तहेतोर्व्यभिचार इत्यत आह अन्यथेति॥ तया स्वाकारवृत्तिप्रतिफलितचिता। घटादाविवात्मन्यप्यस्त्येव स्वाकारवृत्तिप्रति फलितचिद्विषयत्वस्य प्रयोजनं स्वविषयकाज्ञाननिवृत्तिरित्यर्थः। ननु आत्मनश्चिद्विषयत्वं विनाऽप्यात्माकारवृत्तेरेवात्माज्ञाननिवर्तकत्वमस्त्वित्यत आह – तदाकारवृत्त्यैव चेति॥ घटादेरपि स्वाज्ञाननिवर्तकस्वाकारवृत्तिविषयत्वमात्रमेव, नतु चिद्विषयत्वमित्यापातेनासिद्धिरित्यर्थः। ननु घटाकारवृत्तौ चित्प्रतिफलनं विना नाज्ञाननिवृत्तिः। वृत्तिमात्रस्याज्ञानानिवर्तकत्वात्। आत्माकारवृत्तौ तु चित्प्रतिफलनं विनाऽपि वृत्तिमात्रेणात्मस्वरूपस्फुरणसहिते नाज्ञाननिवृत्त्युपपत्तिः। अतो नात्मनि व्यभिचारः, न वा घटादावसिद्धिः, इत्यत आह – अज्ञानाविरोधीति॥ घटाकारवृत्तौ चित्प्रतिफलनं विनाऽपि वृत्तिमात्रेण घटस्वरूपस्फुरण सहितेनाज्ञाननिवृत्तिरित्यस्यापि वक्तुं सुवचत्वेनासिद्धिस्तदवस्थेत्यर्थः। घटो न स्फुरणरूपः, तस्मिन् सत्यप्यज्ञानदर्शनात्, इति यदि, तदाऽऽत्माऽपि न स्फुरणरूपः; तस्मिन् सत्यप्यज्ञानदर्शनादिति तुल्यम्। केवल आत्मा स्फुरणरूपोऽपि नाज्ञानविरोधी, किन्तु, वृत्तिसहित इति यदि, तदा स्फुरणरूपोऽपि घटः केवलो नाज्ञानविरोधी, किन्तु वृत्तिसहित

अज्ञानेन समानविषयत्वाभावेऽपि ब्रह्मज्ञानस्य तन्निवर्तकत्वमस्तु, तावता नोक्तव्यभिचार इति शङ्कते – अथेति॥ अन्यत्रज्ञानस्याज्ञानसमानविषयकत्वेन तन्निवर्तकत्वेऽपि ब्रह्मज्ञानस्य ब्रह्माकारत्वमात्रेण ब्रह्माज्ञाननिवर्तकत्वमस्त्वित्यर्थः॥ तच्चेति॥ शशशृङ्गादिज्ञानस्य शशशृङ्गादिसन्निकर्षाजन्यत्वात् न तस्य तद्विषयत्वमित्यर्थः॥ स एवेति॥ आत्मैवाकारो ज्ञानस्येति वा? आत्मातिरिक्त आत्माकार एव ज्ञानस्याकार इति वा? आत्म-तदाकाराभ्यामन्य आत्माकारसदृश आकारो ज्ञानस्येति वा? इत्यर्थः॥ वृत्त्यनाश्रितस्येति॥ आकारो ह्याकारिणमाश्रयते। नच ब्रह्म वृत्तिरूपमाकारिणमाश्रयति। अतो न ब्रह्म वृत्तेराकार इत्यर्थः॥ साकारवादापातादिति॥ ज्ञानस्येति शेषः॥ जडाद्याकारेति॥ जडानानन्द परिच्छिन्नानृतरूपाकारयुक्तायाः वृत्तेर्ब्रह्मसम्बन्धिज्ञानानन्दापरिच्छिन्नसत्य रूपाकारयुक्तत्वं न सम्भवतीत्यर्थः। ननु नासाधारणो ज्ञानानन्दादिरात्माकारो वृत्तेराकार इति ब्रूमः। अपितु साधारणसत्तादीति। तत्राह – सत्तयेति॥ ननु साधारणासाधारणाकाराभ्यामतिरिक्तोऽन्य एव संस्थानविशेषादिरात्माकारो वृत्तेराकारः, इत्यत आह – आत्मनो निराकारत्वाच्चेति॥ संस्थानाद्याकाररहितत्वाच्चेत्यर्थः। अत एवेत्युक्तमेव हेतुं विशदयति ज्ञानानन्दादिनेति॥ तस्मादिति॥ ब्रह्मज्ञानस्यापीति शेषः। अन्यस्य तदाकारत्वस्यासम्भवादित्यर्थः। अनिर्वचनीय त्वादिकमिति॥ आदिपदेन ज्ञाननिवर्त्यत्वादिकम्। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रति योगित्वादिरूपमिथ्यात्वस्य साध्यस्य तुच्छेऽपि सत्त्वात् तत्र न व्यभिचार इत्यर्थः॥ तुच्छे साध्याभाववति हेतुमुपपादयति – असद्वैलक्षण्येति॥

दृग्विषयत्वमात्रमिति॥ वृत्तिव्याप्यत्वमित्यर्थः। तदभिव्यक्तमिति॥ वृत्त्या वा वृत्तिप्रतिफलितचैतन्येन वाऽभिव्यक्तं घटादिविषयाधिष्ठानचैतन्यं फलम्। तदेव घटादेर्भासकमित्यर्थः। समुदितोऽभिज्ञाभिलपनं प्रवृत्तिरादानात्मा व्यवहारः फलं वा? यथासम्भवं वा? आद्य आह – हानादेरिति॥ एकदेशाभावात् समुदायो गगनादावसिद्ध इत्यर्थः। द्वितीय आह – अभिलापस्य चेति॥ अभिज्ञाभिलापरूपव्यवहाख्याप्यत्वरूपं फलव्याप्यत्वं हेतुरात्मनि व्यभिचारीत्यर्थः॥ नित्यातीन्द्रिय इति॥ अपरोक्षैकरसचैतन्यरूपफलव्याप्यत्वे नित्यातीन्द्रियस्याप्यपरोक्षत्वं स्यात्, इत्यतो न तत्र हेतुरस्तीति भावः। नित्यातीन्द्रियस्याप्यपरोक्षत्वमस्तीति शङ्कते – तदपीति॥ तथाच नासिद्धिरिति भावः॥ योगिप्रत्यक्षगम्यतयेति॥ 'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादि'ति न्यायेन योगिनो योगप्रभावेण दूरादपि पश्यन्ति, शृण्वन्ति चेत्येव, न पुनश्चक्षुषाऽपि शृण्वन्ति, श्रोत्रेणापि पश्यन्ति, अतीन्द्रियमपि चैन्द्रियं कुर्वन्ति; स्वभावातिक्रमापातादित्यर्थः॥ पक्षैकदेश इति॥ ननु साक्षिवेद्यान्तःकरणवृत्तेरनङ्गीकारेऽप्यविद्यावृत्तेः परैरङ्गीकारादविद्यावृत्तिप्रतिफलितचिदपि

धर्म इति स्मृतिः, तद्विषयत्वाद् घटादेर्धर्मादेश्च न तत्र हेत्वसिद्धिः। ब्रह्मणस्तु स्वाभिन्नं यदानन्दादि, तदितरद् घटादि, तत्प्रयुक्तं विशिष्टं घटादिविशिष्टभूतलादि, तद्विषयक एव ज्ञाने भानम्; सर्वस्यापि ब्रह्मविषयकप्रत्ययस्यान्यनिबन्धनविशिष्टविषयकत्वात्। एवं च ब्रह्मणि हेत्वभावादेव न व्यभिचार इति – चेत्, मैवम्। ब्रह्ममात्रविषयकवेदान्तजन्यनिरुक्तवृत्तिमादाय व्यभिचारतादवस्थ्यात्।

ननु वेदान्तजन्या वृत्तिरपि विशिष्टविषयैव, इति न व्यभिचार इति – चेत्, मैवम्। तद्विशिष्टमकल्पितम्? कल्पितं वा? नाद्यः। ब्रह्मणोऽखण्डार्थत्वहानिप्रसङ्गात्। न द्वितीय इत्याह – वेदान्तानामिति॥ कल्पितविशिष्टपरत्वादित्यर्थः॥ तरतीति॥ शोकरूपाज्ञानस्य तरणरूपनिवृत्तिं प्रति साधनत्वेनोक्ताया आत्मविदो न तावदात्मविषयकभ्रमत्वं युक्तम्। भ्रमस्याज्ञानानिवर्तकत्वात्। किन्तु सा प्रमैव। प्रमात्वं च तस्याः कल्पितविशिष्टाविषयत्वेनैव। तस्मात् वेदान्तानां कल्पितविशेषविनिर्मुक्तशुद्धब्रह्मज्ञानजनकत्वमेव, इति तत्र व्यभिचार इति भावः। मोक्षसाधनेति प्रमाविशेषणम्॥

किञ्चेति॥ मौनं मौढ्यमित्यत्रमौढ्यशब्देन ब्रह्मज्ञानप्रागभावाभाव आपादितः, इति नात्र पुनरुक्तिः॥ ज्ञानस्येति॥ नच – मूलाज्ञानमपि स्वोपहितज्ञेयब्रह्मविषयकमेवेति समानविषयता ज्ञानाज्ञानयोरिति वाच्यम्। अज्ञानस्य शुद्धचिदाश्रयविषयकत्व सिद्धान्तभङ्गस्यान्योन्याश्रयादेश्चोक्तत्वात्। किं चैतावताऽपि न ज्ञानाज्ञानयोः समानविषयत्वम्। तथाहि – अज्ञानं हि स्वरूपसदज्ञानोपहितब्रह्मविषयम्। वृत्तिस्तु स्वरूपसद्वृत्त्युपहितब्रह्मविषया। अन्यथा वृत्तेर्मिथ्याभूतार्थविषयकत्वं त्वदभिमतं न स्यादिति। ननु न ज्ञानस्याज्ञान समानविषयकत्वेनाज्ञाननिवर्तकता, किंत्वज्ञानविषयान्याविषयककज्ञानत्वेन। घटादिज्ञाने तथैव कल्पनात्। एवं च ब्रह्मज्ञानमप्यज्ञानविषयब्रह्मन्याविषयकम्, इति भवति ब्रह्माज्ञान निवर्तकमित्याशङ्क्य निराकरोति – नचेति॥ दीपेच्छादाविति॥ तथाच समानविषयकत्वेनैव ज्ञानस्याज्ञाननिवर्तकता, नतूक्तरूपेण। तस्य गुरुतया तेन रूपेणाज्ञाननिवर्तकतायाः क्काप्यदर्शनादित्यर्थः। उक्तरूपस्याव्याप्तिमप्याह – घट-पटाविति॥ ब्रह्मज्ञानस्येति॥ वेदान्तजन्यवृत्त्यव्याप्यत्वे ब्रह्मणस्तज्ज्ञानस्य ब्रह्मेतराविषयकस्य ब्रह्माविषयकतया निर्विषयत्वापत्तौ घटवद् ज्ञानत्वानुपपत्तिः। स्व-पराविषयकं ब्रह्मरूपं ज्ञानमसम्भवीति वक्ष्यमाणन्यायेन वृत्तेरपि तथात्वस्य वक्ष्यमाणप्रायत्वादित्यर्थः। केचितु वक्ष्यमाणत्वादित्येतद्ग्रन्थस्वारस्याद् ब्रह्मरूपज्ञानपरतया एतद्ग्रन्थम् व्याचक्षते। तत्तु पूर्वोत्तरासङ्गतत्वादुपेक्षणीयम्॥ वक्ष्यमाणत्वादिति॥ जडत्व हेतुभङ्गे॥

च स्यात्, नतु शुद्धचिदाश्रितम्। इष्टं चाज्ञानस्य शुद्धचिदाश्रयविषयत्वं परेषाम्। यदाहुः–

'आश्रयत्व-विषयत्वभागिनी निर्विशेषचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥' इति।

तथाचापसिद्धान्तः।

ननु अज्ञानमपि स्वोपधानदशायामेव ब्रह्म विषयीकरोति। स्वानुपधानदशायां स्वस्यैवाभावात्। तथाच ज्ञानाज्ञानयोरुभयोरप्युपाध्यविषयत्वे सत्युपहितविषयत्वात् समानविषयत्वमपि। अत एवोपाधिविषयज्ञानानि नाज्ञाननिवर्तकानि; अज्ञानस्योपाध्यविषयत्वेन समानविषयत्वाभावात्। समानविषयत्वेनैव तयोर्निवर्त्य-निवर्तकभावात्। मैवम्। शुद्धचिदाश्रयविषयमज्ञानमिति सिद्धान्तभङ्गप्रसङ्गात्। अन्योन्याश्रयाच्च। तथाहि – लब्ध उपहिते विषयेऽज्ञानस्वरूपसिद्धिः, अज्ञानस्वरूपे च सिद्धे तदुपहितरूपविषयसिद्धिरिति। एवमुपहिताश्रयत्वेऽप्यन्योन्याश्रयः। किंच वृत्तेरप्यन्योन्याश्रयादेव नोपहितविषयत्वम्। तथाहि – अनुपहितस्य शुद्धस्य वृत्त्यविषयत्वेन चैतन्यस्य चरमवृत्तिविषयत्वाय तटस्थयाऽप्युत्पन्नया वृत्त्योपहितत्वम्, उपहिते सति चैतन्ये तद्विषयकवृत्त्युत्पत्तिः। निर्विषयकवृत्तेरनुत्पादात्। एवं च चैतन्यस्य विषयत्वे तद्विषयकवृत्त्युत्पत्तिः, वृत्त्युत्पत्तौ च चैतन्यस्य वृत्त्यधीन विषयत्वमित्यन्योन्याश्रयः। तस्मात् शुद्धस्यैव चैतन्यस्य चरमवृत्तिविषयता। तस्य चामिथ्यात्वाद् व्यभिचार एवेति साधूक्तम् – 'व्यभिचारानुद्धारादि'ति॥

नच स्वरूपेणेति॥ विशिष्टाविषयकवृत्तिव्याप्यत्वमेवेत्यर्थः॥ ब्रह्म त्विति॥ विशिष्टविषय वृत्तिव्याप्यमेवेत्यर्थः॥ निर्विकल्पकेति॥ निर्विकल्पकाभावपक्षे विशिष्टाविषयवृत्तेरभावाद् घटादौ सर्वत्र हेत्वसिद्धिः। निर्विकल्पकसद्भावपक्षे नित्यातीन्द्रियस्य विशिष्टमात्रविषयकानु मित्यादिविषयत्वात् तत्र भागासिद्धिः॥ नहीति॥ लिङ्गादिविशेषदर्शनस्य विशिष्टज्ञानसामग्रीत्वात् ततो नानुमितिरूपा निर्विकल्पकधीरित्यर्थः।

ननु स्वाभिन्नेतरविशेषणप्रयुक्तविशिष्टाविषयकवृत्तिव्याप्यत्वमुक्तहेत्वर्थः। तथाच निर्विकल्पका भावपक्षेऽपि घटादौ नासिद्धिः। 'घटोऽयमि'ति वृत्तिमादाय निरुक्तहेतोस्तत्र सत्त्वात्। इदन्तादेरपि स्वाभिन्नत्वात्। नित्यातीन्द्रियस्यापि तत्तत्पदजन्यतत्तदर्थमात्रगोचरस्मृतिविषयत्वेन तत्रापि नासिद्धिः। ऐन्द्रियके घटादावतीन्द्रिये धर्मादौ च घटत्वादेर्धर्मत्वादेश्च विशेषणस्य घटादिधर्म्याद्यभिन्नत्वात्, धर्म-धर्मिणोरभेदात् स्वाभिन्नेतरद् यद्विशेषणं पटत्वादि, तत्प्रयुक्तं यद्विशिष्टं पटादि, तदविषयकं यद् विशिष्टं ज्ञानं 'घटोऽयमि'ति प्रत्यक्षम्, धर्मपदजन्या

विशेष्येऽपि सत्त्वादित्यर्थः॥ अत एवेति॥ विशिष्टस्य दृश्यत्वे विशेष्यस्य दृश्यत्वादेवेत्यर्थः॥ साकल्येनेति॥ प्रतीतार्थासम्भवादित्यर्थः। श्रुतेरान्तरानुपपत्तिं चाह – अन्यथेति॥ यत्पदादिना शुद्धस्य ब्रह्मणोऽप्रतिपादने शुद्धे ब्रह्मण्यदृश्यत्वं न सिद्ध्येदित्यर्थः॥

एतेनेति॥ उपहितस्य दृश्यत्वे शुद्धस्य तदुपधेयस्यापि दृश्यत्वमवर्जनीयमेव। तस्य च मिथ्यात्वाभावाद् व्यभिचार एवेत्यर्थः। चरमवृत्तेर्ब्रह्मेतराविषयकत्वे सति ब्रह्मविषयिकायाः परिशेषेणापि शुद्धविषयकत्वं वाच्यमित्याह – चरमवृत्तेरिति॥ यद्वा – अस्त्वेतद् यथा तथा वा। विशिष्टविषयकवृत्तौ विशेष्यस्य शुद्धात्मनो विषयत्वात् तत्र व्यभिचार इति। अविशिष्टविषयचरमवृत्तिविषयत्वात् शुद्धात्मनि स्पष्टो व्यभिचारः। ननु चरमवृत्तिरपि विशिष्टविषयैव, इति कस्यचित् समाधानमाशङ्क्य निराकरोति – एतेनेति॥ चरमवृत्तेर्विशिष्टविषयत्वेन वक्ष्यमाणेनेत्यर्थः। तदेवाह – चरमवृत्तेरिति॥ स्वम् चरमवृत्तिः॥ स्वप्रकाशत्वस्येति॥ स्वस्मिन् स्वस्य विषयत्वाङ्गीकारादित्यर्थः॥ अप्रमात्वस्य चेति॥ मिथ्याभूतचरमवृत्तिविषयत्वादित्यर्थः। उपलक्षणमेतत् – शाब्दबोधे शब्दानुपस्थिताभाननियमेन वृत्तेः शब्दानुपस्थितायास्तत्र भानानुपपत्तेः। न वा ततोऽज्ञान-तत्कार्यनिवृत्तिः स्यात्। अज्ञान-तत्कार्याविषयकवृत्तेरेव तदुभयनिवर्तकत्वात्। अन्यथा – अहमज्ञोऽयं घटः इत्यादिज्ञानानामप्युपहितविषयत्वेनाज्ञाननिवर्तकत्वप्रसङ्गः॥ बहिर्भावे चेति॥ चरमवृत्तेः स्वविषयबहिर्भावे चरमवृत्तिविषयस्य निष्प्रपञ्चस्य सत्यत्वाद् व्यभिचार इत्यर्थः।

ननु न चरमवृत्तिः स्वविषयान्तर्गता। नापि तद्विषयस्य सत्यत्वम्। वृत्तेः शाब्दवृत्तावनवभासमानाया एवोपधायकत्वाभ्युपगमात्। तदुक्तं कल्पतरौ – 'शुद्धं ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्वेतरोपाधिनिवृत्तिहेतुरुदयते; स्वस्या अप्युपाधित्वाविशेषात्। एवं च नानुपहितस्य विषयता; वृत्त्युपरागोऽत्र सत्तयोपयुज्यते, नतु भास्यतया विषयकोटौ प्रवेशेने'ति। अयमभिप्रायः– यथाऽज्ञानोपहितस्य साक्षित्वेऽपि नाज्ञानं साक्षिकोटौ प्रविशति जडत्वात् किन्तु साक्ष्यकोटावेव। एवं वृत्त्युपहितस्य विषयत्वेऽपि न वृत्तिर्विषयकोटौ प्रविशति। स्वविषयत्वानुपपत्तेः। किन्तु स्वयमविषयोऽपि चैतन्यस्य विषयतां संपादयतीति न काप्यनुपपत्तिः इति।

अत्र ब्रूमः। यदि वृत्तिः स्वसन्निधिमात्रेण चैतन्यस्य स्वोपहिततां संपाद्य स्वयमुपाध्यविषयाऽपि सत्युपहितमिथ्याभूतार्थविषया भवति, तर्ह्यज्ञानमपि स्वसन्निधिमात्रेण चैतन्यस्य स्वोपहिततां संपाद्याज्ञानाविषयकं सदज्ञेयविषयकं स्यात्, इति मिथ्याभूतार्थविषयकमेवाज्ञानं स्यात्। नतु शुद्धचिद्विषयकम्। उक्तविधया मिथ्याभूतार्थाश्रितं

मिथ्यात्वप्रयोजकत्वम्, किं तर्हि ? गुरुणोऽप्युक्तदृश्यत्वस्यैव। अन्यथा ब्रह्मणोऽपि मिथ्यात्वापत्तौ तत्सत्यतापराणां 'सत्यं ज्ञानम्' 'तत्सत्यमि'त्यादिश्रुतीनामुपरोधः स्यात्, अत उक्तम् – तत्सत्यत्वश्रुतिस्त्विति॥ तत्प्रयोगवैयर्थ्याच्चेति॥ वाक्यस्थानां पदानां संभूयैकार्थप्रति पादकत्वरूपमेकवाक्यत्वं न स्यादित्यर्थः॥ व्यतिरेकेति॥ व्यतिरेकसहचारज्ञानस्यापि व्याप्तिग्रहहेतुत्वादित्यर्थः।

अत्र वदन्ति – 'वृत्तिकाले वृत्तिरूपेण धर्मेण शुद्धत्वासम्भवात् शुद्धस्य वृत्तिविषयत्वं न सम्भवति, अतः 'शुद्धं स्वप्रकाशमि'ति वाक्यस्य लक्षणयाऽशुद्धत्वमस्वप्रकाशत्व व्यापकमित्यर्थः। तथाचाशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशता पर्यवस्यति। यथा भेदनिषेधादभिन्नत्वम्। नच – शुद्धपदेनाभिधया लक्षणया वा शुद्धाप्रकाशे तत्प्रयोगवैयर्थ्यमिति वाच्यम्। पर्यवसितार्थमादाय सार्थकत्वोपपत्तेः। एवं च 'शुद्धं न दृश्यं न मिथ्ये'त्यस्याप्यशुद्धत्वं दृश्यत्व-मिथ्यात्वयोर्व्यापकमित्येतत्परत्वेन शुद्धे दृश्यत्व-मिथ्यात्वयोर्व्यतिरेकः पर्यवस्यती''ति।

अत्र ब्रूमः। न तावदस्वप्रकाशत्वाशुद्धत्वयोर्व्याप्य-व्यापकभावग्रहमात्रेण शुद्धे स्वप्रकाशता पर्यवस्यति। किन्तु शुद्धेऽस्वप्रकाशत्वव्यापकस्याशुद्धत्वस्य व्यावृत्तौ ज्ञातायामेव। तथाच व्यापकव्यतिरेकग्रहार्थमावश्यकं शुद्धज्ञानम्। किं चास्वप्रकाशत्वाशुद्धत्वयोर्व्याप्यव्यापक भावग्रहोऽपि तदुभयव्यतिरेकयोः शुद्धत्व-स्वप्रकाशत्वयोः शुद्धे सहचारग्रहे सत्येव, इति घट्टकुटीप्रभातवृत्तान्तः।

ननु न मिथ्यात्व-दृश्यत्वव्यतिरेकयोः सहचारग्रहापेक्षा। सा हि निश्चितसाध्याभाववति साधनग्रहेण व्यभिचारज्ञाने सति स्यात्। नचात्र साध्याभावनिश्चयः शुद्धे सम्भवति। न वा तत्र हेतुग्रहः सम्भवति। शुद्धस्याज्ञेयत्वादित्यत आह – विशिष्टज्ञान इति॥ मा भूत् केवलस्य शुद्धस्य ज्ञानम्, तथापि शुद्धे व्यभिचार एव। अशुद्धस्य विशिष्टस्य ज्ञेयत्वेनैव तदनुगतस्य शुद्धस्य विशेष्यस्य ज्ञेयत्वादित्यर्थः॥ नच विष्णव इति॥ तथाच विशेष्ये शुद्धे हेत्वगमनात् न व्यभिचार इत्यर्थः॥ देवतात्ववदेवेति॥ विशेषणस्य मिथ्यात्वासिद्धिश्चेत्यपि द्रष्टव्यम्॥ घटत्वादीति॥ तथाच विशेष्यस्य घटस्य न मिथ्यात्वं स्यादित्यर्थः। दृश्यत्वम् वृत्तिव्याप्यत्वरूपम्॥ विशिष्ट इति॥ तथाच विशेष्यांशे यदज्ञानविरोधि, तदेव विशिष्टज्ञानमावश्यकमित्यर्थः॥ ननु विशिष्टज्ञानानन्तरमव्यवधानेन विशेष्यज्ञानमुत्पद्यते, तत एव विशेष्यविषयकाज्ञानादिनिवृत्तिः, नतु विशिष्टज्ञानादित्यत आह – दण्डीति॥ तथाचाव्यवहितविशेष्यज्ञानकल्पनमप्रामाणिकमिति भावः। एतेनेत्यस्य विवरणम् – अनुभवविरोधादिनैवेति॥ विशिष्टज्ञानेनैव विशेष्यमपि ज्ञातमित्यनुभवेन ज्ञातत्वरूपविषयत्वस्य

नासिद्धिः तथा मिथ्यात्वानुमाने वृत्तिव्याप्यत्वस्य हेतोर्व्यावहारिकस्यात्मनि विपक्षे सत्त्वाद् व्यभिचारो दुरुद्धर इत्यर्थः॥ अथ धर्मीति॥ धर्मिशब्दस्य सम्बन्धिशब्दतया समभिव्याहृतपरत्वेन घटादिधर्मिसमसत्त्वरूपविशेषणविशिष्टस्य हेतोः पक्षे सत्त्वात् नासिद्धिः। उक्तन्यायेनैवात्मपरतया धर्मिशब्दस्य विपक्ष आत्मनि तत्समसत्त्वस्य हेतोरभावाद् न व्यभिचारोऽपीत्यर्थः। व्यभिचारलक्षणान्तर्गतहेतौ धर्मिसमसत्त्वं विशेषणं प्रागभिहितम्। संप्रति तु न्यायवाक्यान्तर्गतहेत्ववयवार्थे प्रकृते हेतौ धर्मिसमसत्त्वं विशेषणमुच्यत इति भेदः॥ तर्हीति॥ विषयत्वापरपर्यायकर्मत्वार्थककृत्यप्रत्ययान्तेन वृत्तिव्याप्यशब्देन वृत्तिविषयत्वमभिहितम्। तथाच धर्मिसमसत्ताकत्वरूपविशेषणविशिष्टं विषयत्वमेव हेतुरस्तु, तात्त्विकधर्महीने च ब्रह्मणि धर्मिसमसत्ताकस्य कस्यचिद् धर्मस्याभावाद् व्यभिचाराभावेन वृत्तीत्यस्य विशेषणस्य वैयर्थ्यमिति भावः। ममेति। ब्रह्मणि तात्त्विकधर्मान् अङ्गीकर्तुः। दृष्टान्तेति। व्यावहारिकदृश्यत्वाधिकरणे शुक्तिरूप्ये धर्मिसमसत्त्वस्य दृश्यत्वस्याभावादित्यर्थः।

व्यभिचाराभावं शङ्कते – नन्विति॥ साध्याभाववति शुद्धे हेतोरप्यभावः, हेतुमति च विशिष्टे साध्यमप्यस्ति। अतो न व्यभिचार इत्यर्थः। उक्तं च संक्षेपशारीरके –

"बहु निगद्य किमत्र वदाम्यहं श्रुणुत संग्रहमद्वय आत्मनि।
सकलवाङ्मनसातिगता चितिः सकलवाङ्मनसव्यवहारभाक्॥" इति॥

स्वत इति॥ शुद्धे वृत्तिव्याप्यत्वरूपहेत्वभावे शुद्धासिद्धिप्रसङ्गादित्यर्थः॥ अज्ञात इति॥ अन्यथा 'शुद्धं न दृश्यमि'ति ज्ञानाविषयत्वाविशेषाच्छुद्धेतरस्मिन्नपि दृश्यत्वाभावसिद्धिः स्यादित्यर्थः॥ दृश्यत्वनिषेधायेति॥ वृत्तिव्याप्यत्वनिषेधायेत्यर्थः।

ननु अभावबुद्धावधिकरणोपस्थितिरपेक्षिता, न त्वभावग्राहकप्रमाणजन्याधिकरणोपस्थितिः? प्रमाणजन्या तदुपस्थितिर्वा? आद्ये वायौ रूपात्यन्ताभावश्चाक्षुषो न स्यात्। द्वितीये गौरवम्। अधिकरणोपस्थितिश्च स्वतः स्फुरणरूपाऽस्ति इति सुबोधः। शुद्धे वृत्तिव्याप्यत्वरूपहेतोर्व्यतिरेक इति शङ्कते – नचेति॥ दृश्यत्वेति॥ वृत्तिव्याप्यत्वरूपेत्यर्थः॥ शुद्धं स्वप्रकाशमिति॥ विधि-निषेधयोरविषयस्य विधि-निषेधाभाजनत्वात्, अन्यथाऽति प्रसङ्गादित्यर्थः॥ लाघवेनेति॥ ब्रह्मण्यमिथ्यात्वसिद्ध्यर्थं वृत्तिव्याप्यत्वरूपं दृश्यत्वं ब्रह्मण्यनभिप्रेतं मिथ्यात्वे प्रयोजकमभिहितं परेण। नचैतावताऽपि परेष्टसिद्धिः। लाघवेन स्फुरणमेव मिथ्यात्वे तन्त्रम्, नतूक्तं दृश्यत्वम्। एवं चादृश्यमपि ब्रह्म स्वतःस्फुरदपि स्फुरणरूपमिथ्यात्वप्रयोजकवत्त्वात् मिथ्यैव, ननु परतः स्फुरद्रूप्यादिमात्रमित्यपि स्यादित्यर्थः। ननु न लघुनोपि स्फुरणस्य

अभावत्वस्यापि सोपाख्यत्वादभावत्वप्रकारकज्ञानविषयीभूतेऽभावे न भागासिद्धिः। उपाख्यातु अस्तीति प्रतीतिविषयत्वादि इत्यन्यदेतत्, तस्माद् नोक्तो व्यभिचार इति चेत्, न। चाक्षुषतादृशघटादिविषयकवृत्तिविषयत्वाद् ब्रह्मणस्तत्र व्यभिचारस्य दुष्परिहरत्वात्। नच घटादिप्रत्ययेषु न ब्रह्म विषय इति वाच्यम्। तथा सति तव स्ववचनविरोधः स्यादित्याह सर्वप्रत्ययेति॥ घटादिसर्वप्रत्ययविषयो ब्रह्मेत्यङ्गीकुर्वतां स्वाचार्याणां वचनस्यापि स्ववचनत्वात् तद्विरोधः स्यादित्यर्थः। नच विशिष्टं सर्वप्रत्ययवेद्यम्, न शुद्धमिति वाच्यम्। 'प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते' इत्युत्तरार्धेन जगद्विलयाधिष्ठानत्वोक्त्या सर्वप्रत्ययवेद्यस्य शुद्धत्वात्। पूर्वार्धेऽपि व्यवस्थिते इत्यनेनानुगतत्वोक्त्या शुद्धस्यैव प्रतीतेः॥

दृश्यत्वं चेति॥ वृत्तिव्याप्यत्वरूपमिति शेषः॥ व्यावहारिकमेवेति॥ नतु पारमार्थिकसत्ताकधर्मिसमसत्ताकम्, अतो न व्यभिचार इत्यर्थः॥ ब्रह्म-जगतोरिति॥ जगतो व्यावहारिकत्वे सिद्धे तन्मध्यवर्तिनो वृत्तिव्याप्यत्वस्य हेतोः पारमार्थिकव्यावहारिक योर्ब्रह्मजगतोर्विद्यमानस्यापि व्यावहारिकत्वं सिद्ध्यति। पारमार्थिक-व्यावहारिकविभागश्चाद्यापि न सिद्ध इत्यर्थः। तथाच निश्चितसाध्याभाववति ब्रह्मणि निरुक्तहेत्वभावस्य सन्दिग्धत्वात् सन्दिग्धानैकान्तिकता स्यादिति भावः। यदि विपक्षे धर्मिसमसत्त्वस्य हेतोर्वृत्तिर्व्यभिचारः, तदा गुञ्जापुञ्जारोपितवह्नौ वह्नित्वस्य धर्मिसमसत्ताकस्य व्यावहारिकोष्णत्वा भावसमानाधिकरणस्योष्णत्वेन व्यभिचारात् वह्नित्वेनोष्णत्वानुमानं व्यावहारिकवह्नावपि न स्यादित्यपि दोषो बोध्यः॥ किञ्चेति॥ दूषकतौपयिके व्यभिचारे यदि धर्मिसमसत्ताक हेतुवृत्तिरपेक्षिता, तर्हि तादृशे बाधादिकेऽपि धर्मिसमसत्ता साध्येऽपेक्षिता स्यात्, समानन्यायत्वात्। किञ्च गमकतौपयिके रूपे च पक्षवृत्तित्वादौ हेतोर्धर्मिसमसत्ताकवृत्तिरपेक्षणीया स्यादित्यर्थः। ततः किमित्यत आह – तथाचेति॥ आत्मा स्वप्रकाशः अनुभूतित्वात् व्यतिरेकेण घटवत्, इति त्वदुक्तानुमाने पक्षीकृत आत्मनि धर्मिसमसत्ताकस्य साध्यस्याभावोऽस्तीति बाधः स्यात्। तत्रैव धर्मिसमसत्ताकस्यानुभूतित्वस्य हेतोरभावादसिद्धिश्च स्यात्। तत्र हेतुस्तात्त्विकधर्महीन इत्यनेनोक्त इत्यर्थः॥ एवमिति॥ साध्याभाववति साधनाभावमात्रं नव्यभिचारः, किन्तु साध्याभाववति धर्मिसमसत्ताकः साधनस्याभावो व्यभिचाराभाव इत्यपि स्यादित्यर्थः। तत्र दोषमाह – तथाच दृश्यत्वादीनामिति॥ वृत्तिव्याप्यत्वादीनामित्यर्थः। साध्याभाववत्यात्मनि दृश्यत्वादेः साधनस्याभावे विद्यमानेऽपि धर्मिसमसत्ताकत्वरूपविशेषणविशिष्टस्साधनाभावो नास्ति, इति व्यभिचार एव स्यादित्यभिप्रायः॥ तस्मादिति॥ त्वदुक्ते स्वप्रकाशत्वानुमानेऽनुभूतित्वहेतोर्व्यावहारिकस्यात्मनि पक्षे सत्त्वात् यथा

स्तुतशस्त्राधिकरणन्यायेन वचनोपपत्तेः। न तृतीयः; इष्टापत्तेः। ब्रह्मणो ज्ञानाविषयत्वेन तज्ज्ञानोद्देशेन शब्दप्रयोगस्य मयाऽनङ्गीकरणात्। नचैवं ब्रह्मविचारे वेदान्तवाक्यप्रयोगवैय्यर्थ्यमिति वाच्यम्। वेदान्तवाक्यैरेव ब्रह्मविचारस्य विहिततया तत्प्रयोगसम्भवात्, 'वेदान्त विज्ञानसुनिश्चितार्थाः' इति श्रुतेरिति-चेत्, उच्यते। उपक्रमादिलिङ्गकस्य ब्रह्मज्ञानेच्छापूर्व कोचरितत्वरूपवेदान्तनिष्ठब्रह्मविषयकतात्पर्यावधारणरूपस्य विचारस्यासिद्धेर्मौनशब्दार्थत्वेन विवक्षितत्वात्। ब्रह्मणोऽज्ञेयत्वे निरुक्तविचारस्यासम्भवत्स्वरूपत्वात्। मौढ्यशब्देन ब्रह्मज्ञान प्रागभावाभावोऽभिप्रेत इति न कश्चिद् दोषः॥

ब्रह्मजिज्ञासेति॥ कृदन्तजिज्ञासाशब्दयोगे जिज्ञासाकर्मभूतब्रह्मगतकर्मत्वमभिदधाना ब्रह्मशब्दात् षष्ठी 'कर्तृ-कर्मणेः कृती'ति सूत्रात्। तस्याश्च 'प्रतिपदविधाना षष्ठी न समस्यते' इति समासनिषेधेऽपि 'कृद्योगलक्षणा षष्ठी समस्यते'इति प्रतिप्रसवात् समासे जाते 'सुपो धातु-प्रातिपदिकयोः' इति सूत्रेण षष्ठीलोपे ब्रह्मजिज्ञासेति पदं निष्पद्यते एवं ब्रह्मज्ञानमित्यपि। एवं च 'ब्रह्मजिज्ञासा' 'ब्रह्मज्ञानमि'त्यादौ कर्मत्वार्थकषष्ठ्यर्थान्तर्भावेण वाक्यार्थो न स्यात्। षष्ठ्यर्थान्तर्भावश्च समासशक्त्या वा पूर्वपदलक्षणया वा लुप्तषष्ठीस्मृत्या वा षष्ठ्यर्थोपस्थितावित्यन्यदेतत्। ज्ञानापरपर्यायवृत्त्यव्याप्यत्वे ब्रह्मणो ज्ञानक्रियया ऽऽप्तुमिष्ट तमत्वरूपज्ञानकर्मत्वानुपपत्त्योक्तषष्ठ्यर्थान्तर्भावेण वाक्यार्थो न निष्पद्येतेति भावः॥ तमेवेति॥ कर्मणीति द्वितीया तङ्तव्यादिषु च सम्बध्यते॥ दृशोऽज्ञान इति॥ 'विशेषणाज्ञाने विशिष्टाज्ञानादित्यर्थः। ननु मैव दृशं ज्ञासीत्, तथापि वृत्तिव्याप्यत्वरूपोक्तहेतुः सुज्ञान एव, नहि दृग्विषयत्वरूपं दृश्यत्वमत्र हेतुत्वेनाभिप्रेतमित्यत आह – दृग्विषयत्वेति॥ अयमर्थः– नात्र प्रकृतहेतोरज्ञानमापाद्यते। किंतु मिथ्यात्वे साध्ये वृत्तिव्याप्यत्वरूपं पारिभाषिकं दृश्यत्वं हेतुकुर्वताऽपि प्रकृतिप्रत्ययावगतदृग्विषयत्वरूपदृश्यत्वमपि दुरपह्नवम्। परं तु तत् तेन हेतुत्वेन नाभिप्रेतम्। एवं च हेतुत्वेनानभिमतोऽपि दृग्विषयत्वरूप उपाधिर्यदि वृत्तिव्याप्यः तदा तदुपाधिविशेषणीभूतदृशोऽपि वृत्तिव्याप्यत्वमवर्जनीयमेव। यदि न वृत्तिव्याप्यः, तदा तदुपाधेर्न मिथ्यात्वसिद्धिः, भागासिद्धिश्च स्यादिति।

ननु शब्दाजन्यवृत्तिविषयत्वमेव दृश्यत्वम्। अन्यथा 'शशविषाणं तुच्छमि'त्यादि शब्दजन्यवृत्तिविषये तुच्छे व्यभिचारस्य दुरुद्धरत्वापातात्। एवं च सति शुद्धस्य वेदान्त जन्यवृत्तिविषयत्वेऽपि न तत्र व्यभिचारः। शुद्ध-तुच्छयोः शब्दाजन्यवृत्तिविषयत्वानभ्युपगमात्। यद्वा – सप्रकारकवृत्तिविषयत्वमेव दृश्यत्वम्। प्रकारश्च सोपाख्यः कश्चिद्धर्मः। तेन निष्प्रकारकज्ञानविषयीभूते शुद्धे निरुपाख्यधर्मप्रकारकज्ञानविषयीभूते तुच्छे च न व्यभिचारः।

पश्चात् प्रवृत्तस्य मिथ्यात्वानुमानस्य बाधिततया न स्वसाध्यसाधकत्वमित्यर्थः। सम्भावितप्रकारान् दृश्यत्वस्य दूषयितुं पृच्छति – किंचेति॥ वृत्तीति इन्द्रियार्थसन्निकर्षाद् बाह्येन्द्रियद्वारा निस्सृतान्तःकरणपरिणामो वृत्तिः। तद्व्याप्यत्वम् तया प्राप्यत्वम्, तया सह सम्बन्धविशेष इत्यर्थः। फलेति। उक्तरूपायां वृत्तौ प्रतिबिम्बितं चैतन्यं फलम्। तेन सम्बन्धः तद्व्याप्यत्वमित्यर्थः। साधारणमिति। वृत्तिव्याप्यत्वफलव्याप्यत्वयोरनुगतं व्यवहारप्रयोजकविषयत्वं वा, तदन्यतरत्वादिकं वेत्यर्थः। कदाचिदिति। स्वस्याविद्यमानतादशायां चिदविषयत्वेऽपि विद्यमानतादशायां चिद्विषयत्वं कदाचित् चिद्विषयत्वम्। 'धर्मं न जानामी'त्यज्ञानोपरागेण वा, 'घटं जानामी'ति ज्ञानोपरागेण वा चिद्विषयत्वं कथंचित् चिद्विषयत्वमित्यर्थः। स्वव्यवहार इति। अद्वितीयत्वादिविशिष्टचैतन्यव्यवहारेऽपि स्वातिरिक्तसंविदपेक्षाऽस्तीत्य व्यभिचाराय – नियतिरिति। स्वातिरिक्तसंविदपेक्षाव्याप्यस्वव्यवहारकत्वं तदर्थः। चैतन्ये तु स्वातिरिक्तसंविदन्तराभावेऽपि सुषुप्तौ नित्यसिद्धस्फुरणरूपव्यवहारदर्शनात् न तन्नियम इत्यर्थः॥ अस्वप्रकाशत्वं वेति॥ परप्रकाश्यत्वाभाव इत्यर्थः॥ आत्मन इति॥ वेदान्तजन्येनोक्तरूपमनःपरिणामेन वृत्त्याऽऽत्मनोऽपि व्याप्यमानत्वात् तत्र व्यभिचार इत्यर्थः॥ अन्यथेति। आत्मनो वृत्तिव्याप्यत्वानङ्गीकार इत्यर्थः। ननु न वेदान्तवैयर्थ्यम्; जपाद्यर्थवत्त्वोपपत्तेरित्यत्राह ब्रह्मपराणामिति॥ उपक्रमादिलिङ्गैर्ब्रह्मप्रतीतीच्छया पूर्वपूर्वाध्याप कोच्चारितानामित्यर्थः॥ श्रवणादिविधेश्चेति॥ फलाभावादित्यर्थः। ननु न फलाभावः श्रवणविधेर्विश्वजिन्न्यायेन स्वर्गफलवत्त्वस्यान्ततः सम्भवादित्यत उक्तम् – ब्रह्मज्ञानार्थमिति॥ 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यत्र श्रवणेन भावयेत् किम्? इति फलाकाङ्क्षायां वाक्येन दर्शनं विनियुज्यते, नतु व्यवहितं स्वर्गादि सम्बध्यते। सन्निहितफलाभाव एव व्यवहितस्य कल्पनात्। अतः श्रवणविधिर्ब्रह्मज्ञानार्थस्त्वन्मते व्यर्थः स्यादित्यर्थः। ननु न श्रवणविधिर्ब्रह्मज्ञानार्थः। ब्रह्मणोऽदृश्यतया सन्निहितस्यापि दर्शनशब्दस्य तदबोधकत्वात्। अन्यथा भावयेत् किम्? इत्यपेक्षायां समानपदोपात्तं श्रवणमेव वाक्योपात्तदर्शनापेक्षयाऽतिसन्निहितं फलत्वेन सम्बध्येत। एवं च सन्निहितफलाभावे व्यवहितस्यापि ग्राह्यतया स्वर्गाद्यर्थ एव श्रवणविधिः। अतो न व्यर्थ इति यो ब्रूयात् तं प्रत्याह – ब्रह्म विचारयतोरिति॥ ब्रह्म विचारयतोः ब्रह्म विचारयितुमुपक्रान्तयोः। गुरोर्मौनम्, शिष्यस्य मौढ्यम्। चकारः पूर्वदूषणसमुच्चये। यद्वोभयेषामुभयम्।

ननु आपाद्यमानं मौनं शब्दवक्तृत्वाभावो वा? वेदान्तरूपशब्दवक्तृत्वाभावो वा? ब्रह्मज्ञानेदृश्यकशब्दवक्तृत्वाभावो वा? नाद्यः; अज्ञेयत्वेऽपि ब्रह्मणस्तद्विचारे प्रवृत्तयोर्देहनिर्वाहादि हेतुभूतशब्दप्रयोगे विरोधाभावात्। न द्वितीयः; ब्रह्माबोधकस्यापि वेदान्तरूपशब्दस्य

वा शुद्धं वा चैतन्यमात्रमभिप्रेतम्, तथा च घटादौ नित्यातीन्द्रिये साक्षिभास्ये च सर्वोऽपि व्यवहारः स्वातिरिक्तसंवित्सापेक्ष इति नासिद्धिः। व्यवहारश्च स्फुरणाभिवदनादिसाधारणः। तत्र ब्रह्मणः स्फुरणरूपे व्यवहारे नित्यसिद्धे स्वातिरिक्तसंविदपेक्षा नास्तीति नियतिपदेन व्यभिचारवारणम्। स्वगोचरयावद्व्यवहारे स्वातिरिक्तसंविदपेक्षायां पर्यवसानात्। अत एवास्वप्रकाशत्वरूपं दृश्यत्वमपि हेतुः; स्वप्रकाशत्वं हि स्वापरोक्षत्वे स्वातिरिक्तानपेक्षत्वम्, 'यत्साक्षादपरोक्षाद् ब्रह्मे'ति श्रुतेः। तथा चान्यानधीनापरोक्षत्वं पर्यवसितम्; तन्निरूपितभेदवत्त्वं हेतुः। तच्च नित्यपरोक्षे अन्याधीनापरोक्षे च घटादावस्तीति नासिद्धिः। न च– ब्रह्मणोऽपि ब्रह्मप्रतियोगिककाल्पनिकभेदवत्त्वात्तत्र व्यभिचारः, अकल्पित भेदस्य क्वाप्यसिद्धत्वादिति वाच्यम्, तद्भेदस्यान्यानधीनापरोक्षत्वरूपधर्मानिरूपितत्वात्। जीवत्वेश्वरत्वादिरूपस्य अन्यस्यैव धर्मस्य तन्निरूपकत्वात्। एवं चावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपं दृश्यत्वमपि हेतुः। न च – फलव्याप्यत्वाभावविशिष्टं यदपरोक्षव्यवहारयोग्यत्वम्, तस्य ब्रह्मणीवाविद्यान्तःकरणादौ शुक्तिरूप्यादौ च सत्त्वेन असिद्धिसाधनवैकल्ये इति वाच्यम्; अज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वस्यापरोक्ष व्यवहारयोग्यत्वपदेन विवक्षितत्वात्, तस्य चाविद्यादौ शुक्तिरूप्यादौ चासत्त्वात् नासिद्धिसाधनवैकल्ये। यथा च घटादेः फलव्याप्यत्वम्, तथाग्रे वक्ष्यामः। अविद्यानिवृत्तेः पञ्चमप्रकारत्वपक्षे तत्र व्यभिचारवारणाय अज्ञानकालवृत्तित्वं हेतुविशेषणं देयम्। ते नैव तुच्छेपि न व्यभिचारः। एवमेव सर्वेषु हेतुषु व्यभिचारपरिहाराय यतनीयम्। सद्विविक्तत्वमात्रे तु साध्ये तुच्छे पञ्चमप्रकाराविद्यानिवृत्तौ च न व्यभिचारगन्धोऽपीति सर्वमवदातम्॥ इति अद्वैतसिद्धौ दृश्यत्वहेतूपपत्तिः॥

न्यायामृततरङ्गिणी

हेतुं निराचष्टे – दृश्यत्वेति॥ मिथ्या मिथ्यार्थविषयकः प्रत्ययत्वादिति। मीमांसकरीत्या त्र्यवयवप्रयोगः। नचालयविज्ञाने शून्यविज्ञाने च व्यभिचारः ; विशिष्टप्रत्ययत्वस्य विवक्षितत्वात्। छर्दिः ष्टीवनम्। बौद्धमत इति। स्तम्भादिप्रत्ययस्यासदर्थविषयकत्वरूपाप्रामाण्यं स्तम्भादि प्रत्ययग्राहकेणोत्सर्गत एव गृहीतम्, इत्यनुकूलतर्कसद्भावादुक्तानुमानेन स्तम्भादिप्रत्ययस्य मिथ्यार्थकत्वसिद्धिः। अन्यमते तु घटादिज्ञाने प्रामाण्यस्य सदर्थकत्वस्य स्वतस्त्वाद् बुभुत्सिताग्राह्यज्ञानग्राहकेण साक्षिणा प्राक् मिथ्यात्वानुमानात् प्रामाण्यमेव गृहीतम् इति

स्वविषयत्वापत्तिः। न चेष्टापत्तिः। शाब्दबोधे शब्दानुपस्थिताभाननियमेन वृत्तेः शब्दानुपस्थिताया भानानुपपत्तेः। यथाकथंचिदुपपत्तौ वा न ततोऽज्ञानतत्कार्ययोर्निवृत्तिः स्याद्। अज्ञानतत्कार्याविषयकज्ञानस्यैव तदुभयनिवर्तकत्वाद्। अन्यथा 'अहमज्ञः अयं घट' इत्यादिज्ञानानामप्युपहितविषयकत्वेन अज्ञाननिवर्तकत्वप्रसङ्ग इति चेन्न। वृत्तेः शाब्दवृत्तावनवभासमानाया एवोपधायकत्वाभ्युपगमात्। तदुक्तं कल्पतरुकृद्भिः–'शुद्धं ब्रह्मेति विषयीकुर्वाणा वृत्तिः स्वस्येतरोपाधिनिवृत्तिहेतुरुदयते, स्वस्या अपि उपाधित्वाविशेषात्। एवं च नानुपहितस्य विषयता। वृत्त्युपरागोऽत्र सत्तयोपयुज्यते; न तु भास्यतया विषयकोटिप्रवेशेने'ति। अयमभिप्रायः – यथा अज्ञानोपहितस्य साक्षित्वेऽपि नाज्ञानं साक्षिकोटौ प्रविशति, जडत्वात्। किं तु साक्ष्यकोटावेव। एवं वृत्त्युपहितस्य विषयत्वेऽपि न वृत्तिविषयकोटौ प्रविशति; स्वस्याः स्वविषयत्वानुपपत्तेः। किं तु स्वयमविषयोऽपि चैतन्यस्य विषयतां सम्पादयतीति न काप्यनुपपत्तिः। एतेन ज्ञानाज्ञानयोरेकविषयत्वं व्याख्यातम्; अज्ञानमपि हि स्वोपधानदशायामेव ब्रह्म विषयी करोति; स्वानुपधानदशायां स्वस्यैवाभावात्। तथा च ज्ञानाज्ञानयोरुभयोरप्युपाध्यविषयकत्वे सत्युपहितविषयकत्वात् समानविषयत्वमस्त्येव। एतेन उपाधिविषयज्ञानानामज्ञानानिवर्तकत्वं व्याख्यातम्; अज्ञानस्यो पाध्यविषयत्वेन समानविषयत्वाभावात्, समानविषयत्वेनैव तयोर्निवर्त्यनिवर्तकभावात्।

वस्तुतस्तु– शब्दाजन्यवृत्तिविषयत्वमेव दृश्यत्वम्; अन्यथा शशविषाणं तुच्छमित्यादिशब्दजन्यवृत्तिविषये तुच्छे व्यभिचारस्य दुरुद्धरत्वात्। एवं च सति शुद्धस्य वेदान्तजन्यवृत्तिविषयत्वेऽपि न तत्र व्यभिचारः, तुच्छशुद्धयोः शब्दाजन्यवृत्तिविषय त्वानभ्युपगमात्। यद्वा– सप्रकारकवृत्तिविषयत्वमेव दृश्यत्वम्, प्रकारश्च सोपाख्यः कश्चिद्धर्मः, तेन निष्प्रकारकज्ञानविषयीभूते शुद्धे निरुपाख्यधर्मप्रकारकज्ञानविषयीभूते तुच्छे च न व्यभिचारः। अभावत्वस्यापि सोपाख्यत्वादभावत्वप्रकारकज्ञानविषयीभूते अभावे न भागासिद्धिः। उपाख्या च अस्तीति धीविषयत्वादीत्यन्यत्। एतेन वृत्तिव्याप्यफलव्याप्ययोः साधारणं व्यवहारप्रयोजकविषयत्वरूपं दृश्यत्वमपि हेतुः, ब्रह्मणि तुच्छे च व्यभिचारपरिहारोपायस्योक्तत्वात्। यद्वा दृश्यत्वं चिद्विषयत्वम्, तच्च यथा कथंचित् चित्सम्बन्धित्वरूपं हेतुः, तच्च न चैतन्ये अभेदे भेदनान्तरीयकस्य संबन्धस्याभावाद्, अतो न व्यभिचारः। तुच्छे च व्यभिचारः परिहरणीयः। यद्वा– स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिरूपं दृश्यत्वं हेतुः; संविच्छब्देन विषयाभिव्यक्तं वा वृत्त्यभिव्यक्तं

सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपः। तथा च शुक्तिरूप्यादेरपि अपरोक्षव्यवहारयोग्यत्वेन साधनवैकल्याद्– इति चेन्मैवम्, फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्यापि पक्षस्य क्षोदक्षमत्वात्। न च वृत्तिव्याप्यत्वपक्षे ब्रह्मणि व्यभिचारः, अन्यथा ब्रह्मपराणां वेदान्तानां वैयर्थ्यप्रसङ्गादिति वाच्यम्, शुद्धं हि ब्रह्म न दृश्यम्, 'यत्तदद्रेश्यम्– इति श्रुतेः, किंतूपहितमेव, तच्च मिथ्यैव, न हि वृत्तिदशायां अनुपहितं तद्भवति। न च 'सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते' इति स्ववचनविरोध इति वाच्यम्, तस्याप्युपहितपरत्वात्।

न च–एवं सति शुद्धसिद्धिर्न स्यादिति–वाच्यम्, स्वत एव तस्य प्रकाशत्वेन सिद्धत्वात्। ननु– अज्ञाते धर्मिणि कस्यचित् धर्मस्य विधातुं निषेद्धुं वा अशक्यत्वेन शुद्धे दृश्यत्वं निषेधता शुद्धस्य ज्ञेयत्वमवश्यं स्वीकरणीयम्। न च स्वप्रकाशत्वेन स्वतःसिद्धे शुद्धे श्रुत्या दृश्यत्वनिषेध इति वाच्यम्। शुद्धं स्वप्रकाशमिति शब्दजन्यविशिष्टवृत्तौ शुद्धाप्रकाशे तस्य स्वप्रकाशत्वासिद्धेः इति– चेत्, न। वृत्तिकाले वृत्तिरूपेण धर्मेण शुद्धत्वासंभवात् शुद्धस्य वृत्तिविषयत्वं न संभवति, अतः 'शुद्धं स्वप्रकाशम्– इति वाक्यस्य लक्षणया अशुद्धत्वमस्वप्रकाशत्वव्यापकमित्यर्थः। तथा च अशुद्धत्वव्यावृत्त्या शुद्धे स्वप्रकाशता पर्यवस्यति, यथा भेदनिषेधेन अभिन्नत्वम्। न च शुद्धपदेन अभिधया लक्षणया वा शुद्धाप्रकाशे तत्प्रयोगवैयर्थ्यमिति वाच्यम्; पर्यवसितार्थमादाय सार्थकत्वोपपत्तेः। एवं च 'शुद्धं न दृश्यं न मिथ्या' इत्यस्याप्यशुद्धत्वं दृश्यत्वमिथ्यात्वयोर्व्यापकमित्येतत्परत्वेन शुद्धे दृश्यत्वमिथ्यात्वयोर्व्यतिरेकः पर्यवस्यति। एतेन स्फुरणमात्रमेव मिथ्यात्वे तन्त्रम्, लाघवाद्; अतः 'स्वतःस्फुरदपि ब्रह्म मिथ्यैवे'ति शून्यवादिमतमपास्तम् ; स्वतः स्फुरणरूपतायाः शुक्तिरूप्यादावभावात्, स्फुरणविषयत्वस्य ब्रह्मण्यसिद्धेः।

ननु – विशिष्टज्ञाने विशेष्यस्यापि भाने श्रुत्या विशिष्टस्य दृश्यत्वेनैव विशेष्यस्यापि दृश्यत्वाद् व्यभिचारः, न च 'विष्णवे शिपिविष्टाये' त्यादौ विशिष्टस्य देवतात्ववद् विशिष्टस्य विषयत्वम्, अग्नीषोमयोर्मिलितयोर्देवतात्ववद्वा मिलितस्य विषयत्वम्, अतो न विशेष्ये विषयत्वमिति वाच्यम्, तद्वदेव विशेषणस्याप्यविषयत्वे भागासिद्धिप्रसङ्गाद् इति चेन्न, विशेष्यतापन्नस्य विषयत्वेऽपि क्षत्यभावात्, तस्य मिथ्यात्वाभ्युपगमात्। अत एव उपहितविषयत्वेऽप्युपधेयविषयत्वमक्षतमेव इति अपास्तम्, उपहितात्मना तस्यापि मिथ्यात्वाभ्युपगमात्, ज्ञानान्तरविषयत्वेन विशेषणे भागासिद्ध्यभावाच्च। ननु वेदान्तजन्याखण्डवृत्तेरुपहितविषयत्वे तदानीमुपाध्यन्तराभावेन तस्या एवोपधायकत्वात्

श्रुत्यादिसिद्धे च व्यावहारिकेऽज्ञाने अन्तःकरणदौ च योग्यत्वस्यापि व्यावहारिकत्वात्। न ह्यापरोक्ष्यैकरसेन साक्षिणा साक्षाद्वेद्ये अज्ञानादावापरोक्ष्यं प्रातिभासिकम्। वृत्तिद्वारा तद्वेद्ये घटादौ तु व्यावहारिकमिति युक्तम्। शिष्टं स्वप्रकाशत्ववादे वक्ष्यते।

किं चास्वप्रकाशत्वस्य पंचमप्रकाराविद्यानिवृत्तौ व्यभिचारः। यत्तु प्रमाणवस्त्वन्यतराधीनवृत्तिविषयत्वं दृश्यत्वम्। तुच्छस्य घटादिवत् प्रमाणाधीन वृत्तिविषयत्वस्य प्रातिभासिकवद्वस्त्वधीनवृत्तिविषयत्वस्य चाभावान्न तत्र व्यभिचार इति। तत्त्वतितुच्छम्। प्रमाणाधीनवृत्तिविषयत्वस्यामिथ्यात्वेन व्याप्तेः। प्रमाणशब्देन ज्ञापकोक्तौ तु तुच्छे व्यभिचारः। तज्ज्ञानस्यापि ज्ञापकाधीनत्वात्, धीमात्रशरीररूप्यादिवृत्तौ वस्तुपरतन्त्रत्वस्याप्यभावाच्च। वस्तुपरतन्त्रशब्देनासद विषयकत्वस्या सद्विलक्षणविषयकत्वस्य चोक्तौ मद्रीत्या दृष्टान्तस्य साधनवैकल्यात्। ब्रह्मणि व्यभिचारापरिहाराच्च। एवं च–

न धर्मादौ फलव्याप्तिर्वृत्तिव्याप्यत्वमात्मनि।
अज्ञातत्वादिरूपेण चिद्वैद्यत्वं तु चित्यपि।
अन्यापेक्षाभिलापत्वमस्त्यौपनिषदात्मनि।
त्वदुक्तास्वप्रभत्वं च रूप्ये नास्त्यस्ति चात्मनि॥

इति दृश्यत्वहेतुभङ्गः।

अद्वैतसिद्धिः

ननु– मिथ्यात्वे साध्ये हेतूकृतं यद् दृश्यत्वं तदप्युपपादनीयम्। तथा हि– किमिदं दृश्यत्वम्? वृत्तिव्याप्यत्वं वा? फलव्याप्यत्वं वा? साधारणं वा? कदाचित् कथंचित् चिद्विषयत्वं वा? स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतिर्वा? अस्वप्रकाशत्वं वा? नाद्यः, आत्मनो वेदान्तजन्यवृत्तिव्याप्यत्वेन तत्र व्यभिचारात्। अत एव न तृतीयोऽपि। नापि द्वितीयः नित्यातीन्द्रिये शुक्तिरूप्यादौ च तदभावेन भागासिद्धि साधनवैकल्ययोः प्रसङ्गात्। नापि चतुर्थः, ब्रह्म पूर्वं न ज्ञातमिदानीं वेदान्तेन ज्ञातमित्यनुभवेन आत्मनि व्यभिचारात्। नापि पञ्चमः, ब्रह्मण्यप्यद्वितीयत्वादिविशिष्टव्यवहारे संविदन्तरापेक्षानियतिदर्शनेन व्यभिचारात्। नापि षष्ठः, स हि अवेद्यत्वे

तदभिव्यक्तचैन्यविषयत्वस्य वा कल्पनायोगाच्च। घटादावन्धकारानिवर्तकप्रभाया इवाज्ञानाविरोधिज्ञानस्याननुभवाच्च। अन्यथा इच्छाद्याकारान्तः करणवृत्तिप्रतिफलितं तद्वयङ्ग्यं वा इच्छादिकं परोक्षवृत्तिप्रतिफलितं तद्वयङ्ग्यं वा परोक्षज्ञानं तमोनिवर्तकप्रभाप्रतिफलितं तद्व्यङ्ग्यं वा प्रभान्तरं च कल्प्यं स्यात्। ''तमेव भान्तम्'' इत्यादि श्रुत्यर्थस्तु प्रतिकर्मव्यवस्थाभङ्गे वक्ष्यते। चैतन्याविषयस्याप्यापरोक्ष्यं च चैतन्याभिव्यञ्जकत्वार्थमावश्यकेनेन्द्रियजन्यत्वप्रयुक्तेन वृत्तिगतेन साक्षात्कारत्वरूप विशेषेणैवोपपन्नम्। इच्छादिवृत्त्यनिष्ठेन परोक्षवृत्तिगतेन ज्ञानत्वरूपविशेषेण विषयस्य ज्ञातत्ववत् स्मृत्याद्यनिष्ठेनानुभवादिगतेन विशेषेण तद्विषयस्यानुभूतत्वानुमितत्वादिवच्च। अन्यथा परोक्षत्वापरोक्षत्वे एकज्ञानत्वव्याप्ये न स्याताम्।

न पञ्चमः। अत्मनोऽपि स्वप्रकाशत्वाद्वितीयत्वादिविशिष्टव्यवहारे तदपेक्षा नियमात्। नन्वात्मनि विशिष्टव्यवहारे विशेषणोपनायकमानापेक्षानियमेऽपि स्वरूपमात्रव्यवहारे तदनपेक्षेति चेन्न। घटादावपि तथेत्यसिद्धेः। ननु घटादौ स्वरूपमात्र व्यवहार एव नास्ति, आत्मनि तु सुषुप्तावस्तीति चेन्न। एतावन्तं कालं सुखमहमस्वाप्समिति परामर्शेन तस्य विशिष्टत्वेनैव सिद्धेः। नन्वात्मनि विशिष्टव्यवहारे तदपेक्षायामपि न विशेष्यांशे तदपेक्षा, स्वप्रकाशत्वात्। घटादौ तदंशेऽपीति चेन्न। नियतिपदवैयर्थ्यात्। आसंसारमज्ञानावृतस्य शुद्धस्य स्वव्यवहारे अनधिगतार्थबोधकवेदान्त जन्याज्ञाननिवर्तकवृत्त्यपेक्षानियमाच्च। वृत्त्यन्यसंविदपेक्षायाश्च तव नित्यातीन्द्रिये, मम घटादावप्यभावादित्युक्तत्वाच्च। न च घटादावपि वृत्त्याऽज्ञाने निवृत्ते व्यवहारार्थं संविदन्तरापेक्षा अनुभूयते। एतेन स्वव्यवहारे स्वातिरिक्त स्वावच्छिन्नसंवित्सापेक्षत्वं दृश्यत्वमिति निरस्तम्।

न षष्ठः। घटादौ विशेष्यवत् फलव्याप्यत्वाभावरूपविशेषणस्याप्युक्तन्यायेन सत्त्वेनाविद्यादौ शुक्तिरूप्यादौ च विशेषणवद्विशेष्यस्यापि सत्त्वेन विशिष्टरूपस्व प्रकाशत्वव्यतिरेकरूपहेतोः पक्षैकदेशे दृष्टान्ते चाभावात्। अत्रोक्तं चित्सुखेन– ''शुक्तिरूप्यादौ विशेषणमस्ति न तु विशेष्यम्, अध्यस्तत्वात्। अपरोक्ष व्यावहारायोग्येऽपि तत्र तद्वयवहारस्तु अधिष्ठानभूतसाक्षिगतापरोक्ष्याध्यासाद्युक्तः। इदमिति व्यवहारायोग्येऽपि तस्मिन्नधिष्ठानगतेदन्त्वारोपादिदमिति व्यवहारवत्। यद्यपि घटादिरप्यध्यस्तः, तथापि तत्र सत्त्वमिवाऽपरोक्ष्यं व्यावहारिकं रूप्यादौ तु प्रातिभासिकम्'' इति। तन्न। सर्वव्यावहारिकोपादाने ब्रह्मज्ञानात्प्रागबाधिते

कथंचित्संभवेऽपि अपरिच्छिन्नपरिच्छिन्नयोर्ब्रह्मतद्वृत्त्योरयोगात्। तस्मात्तद्विषयत्वमेव तदाकारत्वमिति वाच्यम्। अन्यथा घटादिज्ञाने तद्विषयत्वं तन्त्रम्, आत्मज्ञाने तु तदाकारत्वमित्यननुगमादिति सुस्थ आत्मनि व्यभिचारः। अनिर्वचनीयत्वादिकं मिथ्यात्वमिति पक्षे तु तुच्छे व्यभिचारश्च। असद्वैलक्षण्यज्ञानार्थं तस्यापि ज्ञेयत्वात्।

अथ प्राचां रीत्या माऽस्तु दृग्विषयत्वं दृश्यत्वम्। किंत्वाधुनिकरीत्या फलव्याप्यत्वमिति द्वितीयोऽस्त्विति चेत्, फलं हि मद्रीत्या व्यवहारो वा? भट्टरीत्या ज्ञातता वा? त्वद्रीत्या वृत्तिप्रतिफलितं चैतन्यं वा? तदभिव्यक्तं विषयाधिष्ठानचैतन्यं वा? नाद्यः। हानादेर्गगनादावभावात्। अभिलापस्य चात्मन्यपि भावात्। न द्वितीयः। ज्ञाततायाः मम घटादौ परस्याप्यतीतादावभावात्। न तृतीयचतुर्थौ। अतीतादावसिद्धेः। तदपि स्वसत्ताकाले फलव्याप्यमिति चेन्न। नित्यातीन्द्रियेऽसिद्धेः। तदपि योगिनं प्रति फलव्याप्यमिति चेन्न। चित्सुखेन "न च योगिप्रत्यक्षगम्यतयाऽपरोक्षत्वम्, धर्मादीनां चोदनैकप्रमाण योग्यत्वाद्"-इत्युक्तत्वेन तद्विरोधात्। तुच्छमपि तुच्छत्वेन योगिनं प्रत्यपरोक्षमिति सुवचत्वाच्च। पक्षैकदेशे साक्षिवेद्याविद्यान्तः करणतद्धर्मसुखादौ दृष्टान्ते शुक्तिरूप्ये च फलव्याप्यत्वाभावाच्च।

नापि साधारणमिति तृतीयः। ब्रह्मणि वृत्तिव्याप्यत्वरूपविशेषस्य सत्त्वेन दृश्यत्वरूपसामान्यस्यापि सत्त्वात्।

नन्वस्तु तर्हि चतुर्थः। अतीतादेरपि कदाचित् स्वाकारवृतिप्रतिफलित चिद्विषयत्वात्। अविद्यादेरपि साक्षिविषयत्वात्। नित्यातीन्द्रियस्यापि ज्ञातत्वेनाज्ञातत्वेन वा साक्षिविषयत्वात्। दृग्रूपात्मनस्तु तदविषयत्वादिति चेन्न। नित्यातीन्द्रियं पूर्वं न ज्ञातम् इदानीं शब्देन ज्ञातमितिवत् शुद्धं ब्रह्म पूर्वं न ज्ञातमिदानीं वेदान्तेन ज्ञातमित्यनुभवेन ब्रह्मणि व्यभिचारात्। तद्व्यवहारजनने तद्विषयत्वस्य तन्त्रत्वेन स्वव्यवहारहेतोश्चितोऽप्यभिधानस्याभिधेयत्ववच्चिद्विषयत्वाच्च। कल्पितभेदेन बिम्बप्रतिबिम्बयोर्लिङ्गलिङ्गिभाववज्जीवब्रह्मणोर्ज्ञातृज्ञेयभाववच्चात्मनोऽपि स्वाकारवृत्तिप्रतिफलितचिद्विषयत्वसंभवाच्च। अन्यथा तया तदज्ञाननिवृत्त्ययोगात्। तदाकारवृत्त्यैव च तन्निवृत्तौ घटादावपि तथात्वापातेनासिद्धेः। अज्ञानाविरोधि स्फुरणरूपत्वस्य चात्मनीव घटादावपि सुवचत्वात्। अस्फुरणरूपेष्वतीन्द्रियेष्वि वैन्द्रियकेष्वपि वृत्तिविषयत्वमात्रेण व्यवहारादिसम्भवे तत्प्रतिफलितचैतन्यविषयत्वस्य

देवतात्ववद् विषयत्वमपि विशिष्ट एव, न तु विशेष्येऽपीति युक्तम्। देवतात्ववदेव विषयत्वस्यापि विशेषणेऽप्यभावेन भागासिद्धेः। घटविशिष्ट एव दृश्यत्वं न तु विशेष्ये घट इत्यापाताच्च। विशिष्टे ज्ञातेऽपि कदाचिद्विशेष्ये अज्ञानाद्यापाताच्च। दण्डी चैत्र इति ज्ञानेनैव चैत्रोऽपि ज्ञात इत्यनुभवाच्च। एतेनानुभवविरोधादि नैवाग्नीषोमयोर्देवतात्ववद्विषयत्वमपि व्यासज्यवृत्तीति न विशेष्ये तदिति निरस्तम्। अत एवादृश्यत्वश्रुतिस्साकल्येनादृश्यत्वपरा। अन्यथा यत्तदद्रेश्यमित्यादौ यच्छब्दाद्य योगात्।

एतेन चरमवृत्त्युपहितस्यैवात्मनस्तद्विषयत्वात्तस्य च मिथ्यात्वान्न व्यभिचार इति निरस्तम्, चरमवृत्तेः स्वविषयान्तर्भावे तस्याः स्वप्रकाशत्वस्याप्रमात्वस्य चापातात्। वृत्त्युपरागोऽत्र सत्तयोपयुज्यते न तु प्रतिभास्यतयेति कल्पतरुविरोधाच्च। बहिर्भावे च विषयस्य सत्यत्वेन व्यभिचारानुद्धारात्। न च स्वरूपेण दृश्यत्वं हेतुः। ब्रह्म तु विशिष्टरूपेणैव दृश्यमिति वाच्यम्। निर्विकल्पकाभावपक्षे घटादेरपि तत्सद्भावपक्षे नित्यातीन्द्रियस्यापि विशिष्टरूपेणैव दृश्यत्वेनासिद्धेः। न हि लिंगादिना निर्विकल्पकधीः। वेदान्तानां कल्पितविशिष्टपरत्वे तत्त्वावेदकत्वायोगाच्च। "तरति शोकमात्मविद्" – इत्यादौ मोक्षसाधनशुद्धरूपप्रमोक्तेश्च।

किं च शुद्धज्ञानाभावे तदाच्छादकस्य मूलाज्ञानस्य निवृत्तिर्न स्यात्। ज्ञानस्याज्ञाननिवर्तकत्वे हि समानविषयत्वं तन्त्रम्। न च घटादिविषयज्ञानेष्वप्य न्याविषयत्वमेव तन्त्रम्, गौरवात्। दीपेच्छादौ समानविषयत्वेनैव विरोधितमोद्वेषादि निवर्तकत्वदर्शनाच्च। घटपटाविति ज्ञानेन घटाज्ञानस्य विशिष्टज्ञानेन च विशेषणाज्ञानस्य च निवृत्तिदर्शनाच्च। ब्रह्मज्ञानस्य निर्विषयत्वे ज्ञानत्वायोगस्य वक्ष्यमाणत्वाच्च। अथ तदज्ञाननिवर्तकत्वे तदाकारत्वमेव तन्त्रम्। तच्च तद्विषयत्वाभावेऽपि करणसामर्थ्यादेव शशशृंगादिशब्दजन्यज्ञानस्येव युक्तम्। दृश्यत्वश्रुत्यादिकमपि तद्विषयमिति चेत्, स एवाकारो यस्येति वा, तदाकार एवाकारो यस्येति वा, तदाकार इवाकारो यस्येति वा? नाद्यः। वृत्त्यनाश्रितस्यात्मनो वृत्त्याकारत्वा योगात्। न द्वितीयः। साकारवादापातात्। जडाद्याकारवृत्तावात्मीयस्य ज्ञानानन्दाद्य परिच्छेदाकारस्याभावाच्च। सत्तयैकाकारत्वे च घटज्ञानस्याप्यात्माकारत्वापाताच्च। आत्मनो निराकारत्वाच्च। अत एव न तृतीयः, ज्ञानानन्दादिना साम्यस्यासंभवात्। सत्तया साम्यस्य चातिप्रसक्तेः। संस्थान सारूप्य साम्यस्य च घटतद्वृत्त्योः

ब्रह्मपराणां वेदान्तानां ब्रह्मज्ञानार्थं श्रवणादिविधेश्च वैयर्थ्यम्। ब्रह्म विचारयतोर्गुरुशिष्ययोर्मौनं मौढ्यं च स्यात्। किं च ब्रह्मजिज्ञासा ब्रह्मज्ञानमित्यादौ कर्मणि षष्ठी, तमेव धीरो विज्ञायेत्यादौ द्वितीया, दृश्यते त्वग्र्यया बुद्ध्येत्यादौ तिङ्, आत्मा वा अरे द्रष्टव्य इत्यादौ तव्यादिप्रत्ययश्च न स्यात्। दृशोऽज्ञाने दृग्विषयत्वरूपदृश्यत्वज्ञानं च न स्यात्। "सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते" इत्यादिस्ववचनविरोधश्च स्यात्। न च विपक्षे धर्मिसमसत्त्वस्य हेतोर्वृत्तिर्व्यभिचारः, न त्वारोपितस्य, अतिप्रसंगात्। दृश्यत्वं च व्यावहारिके जगतीव पारमार्थिकात्मन्यपि व्यावहारिकमेवेति न व्यभिचार इति वाच्यम्। ब्रह्मजगतोः पारमार्थिकत्वव्यावहारिकत्व विभागस्याद्याप्यसिद्धेः। किं च पक्षे धर्मिसमसत्त्वस्य साध्यस्याभावो बाधः। पक्षे हेतोर्धर्मिसमसत्ताकस्य सत्त्वं च सिद्धिः, तदभावोऽसिद्धिः। तथा चात्मनि तात्त्विकधर्महीने स्वप्रकाशत्वादिरूपसाध्यस्य बाधः। तत्साधकानुभूतित्वादेश्चासिद्धिः। एवं विपक्षे धर्मिसमसत्ताकः साधनस्याभावोऽव्यभिचारित्वम्। तथा च दृश्यत्वादीनां आत्मनि व्यभिचार इति च स्यात्। तस्माद्यथाऽऽत्मनः पक्षत्वे तत्र व्यावहारिकस्य हेतोस्सत्त्वान्नासिद्धिः, तथा तस्य विपक्षत्वेऽपि व्यावहारिकस्य हेतोस्सत्त्वाद्व्यभिचारः। अथ धर्मिसमसत्त्वं हेतुविशेषणम्, तर्ह्यात्मन्येवंविधधर्मस्य कस्याप्यभावाद्विषयत्वादिरेव मिथ्यात्वे हेतुः स्यात्। मम रीत्या आत्मनि व्यभिचारश्च। दृष्टान्तस्य साधनवैकल्यं च।

ननु शुद्धं ब्रह्म न दृश्यम्, किं तु विशिष्टमेव। दृश्यत्वश्रुतयोऽपि तद्विषयाः। अन्यथा यत्तदद्रेश्यमित्यादि श्रुतिविरोधादिति चेन्न। स्वतःसिद्धेर्निराकरिष्यमाणत्वेन शुद्धासिद्धिप्रसंगात्। अज्ञाते धर्मिणि कस्यचिद्धर्मस्य विधातुं निषेद्धुं वा अशक्यत्वेन शुद्धे दृश्यत्वं निषेधता शुद्धस्य ज्ञेयत्वाच्च। न च स्वप्रकाशत्वेन स्वतःसिद्धे शुद्धे वृत्त्या दृश्यत्वनिषेधधीः। शुद्धं स्वप्रकाशमिति शब्दजन्यविशिष्टवृत्तौ शुद्धाप्रकाशे तस्य स्वप्रकाशत्वासिद्धेः। लाघवेन स्फुरणमात्रमेव मिथ्यात्वे तन्त्रमिति स्वतः स्फुरदपि ब्रह्म मिथ्यैव। तत्सत्यत्वश्रुतिस्तु जगत्सत्यत्व श्रुतिवदनुमानादि विरोधेनासद्वैलक्षण्यपरेत्यापाताच्च। शुद्धं न दृश्यत इत्यत्र शुद्धशब्दस्याभिधया लक्षणया वा शुद्धाबोधकत्वे तत्प्रयोगवैयर्थ्याच्च। विशिष्टे मिथ्यात्वदृश्यत्वयोर्व्यतिरेकासंभवेन शुद्धनिष्ठव्यतिरेकज्ञानाय शुद्धस्य ज्ञेयत्वाच्च। विशिष्टज्ञाने विशेष्यस्यापि भानेन विशिष्टस्य दृश्यत्वेनैव शुद्धस्यापि दृश्यत्वसिद्धेश्च। न च विष्णवे शिपिविष्टायेत्यादौ

नित्यसमजातिलक्षणाभावादपीत्याह॥ किं चेति॥ उदाहरणं तु अनित्यः शब्द इति प्रतिज्ञायां वदति। अनित्यत्वं अनित्यं नित्यं वेति। अनित्यत्वे कदाचित्तदभावाच्छब्दो नित्यः स्यात्। तथाच शब्द अनित्य इति शब्दरूपधर्मिणः अनित्यत्व वैशिष्ट्य भंगः। नित्यं चेदनित्यत्वधर्मस्य नित्यत्वान्नित्य धर्माधिकरणत्वेन धर्मिणोपि शब्दस्य नित्यता स्यात्। अनाश्रयधर्मावस्थानायोगात्। तथाच शब्दोऽनित्य इति शब्दस्यानित्यत्ववैशिष्ट्य भंग इति तद्विशिष्टत्वभंगः तद्रूपत्वातद्रूपत्वोभयपक्षेपीत्यर्थः। लक्षणं नित्यसमजातेरिति शेषः॥ नचात्रेति॥ यद्यपि मिथ्यात्वस्य मिथ्यात्वपक्षे सत्यत्वप्राप्त्या प्रपंचो मिथ्येति प्रपंचस्य धर्मिणो मिथ्यात्व वैशिष्ट्यभंग उक्तः। तथापि मिथ्यात्वस्य सत्यत्वपक्षे स नोक्तोऽस्माभिः किं त्वद्वैतहानिरेव। अमिथ्यात्वरूपसाध्यस्य मिथ्यात्वरूपत्वातद्रूपत्वोभयपक्षेपि धर्मिणस्तद्विशिष्टत्व भंगस्यानुच्यमानत्वान्नतल्लक्षणस्यात्रावकाश इति भावः। प्रत्युत तवैव जातिवादित्वं त्वया क्रियमाणस्यास्मदीयदूषणस्य स्वव्याघात कत्वादित्याशयेनाह॥ प्रत्युतेति॥ भिन्न इत्यादि॥ यदि भिन्ने भेदनिवेशः तर्हि भेदपरंपरया अनवस्था यद्यऽभिन्ने भेदनिवेशः तर्हि विरोध इत्यादि त्वदुक्तिरित्यर्थः। कथं मदुक्तेः स्वव्याघातकत्वमित्यत उक्तं॥ अभिन्नादीति॥ अभिन्नं ब्रह्मेत्यत्रापि किमभेदः भिन्ने निवेशित उताभिन्ने। आद्ये विरोधात्। द्वितीयेऽभेदपरंपरयाऽनवस्थेत्यर्थः। यथोक्तं भगवत्पादैः– ''अतो विशिष्टादि निराकरणयुक्तीनामपि विशिष्टाद्यपेक्षत्वाज्जात्युत्तरमिति न युक्तिबाधापी'' ति। न केवलं वेदांतिनां जातिवादित्वमस्माभिरेवोच्यते। किं तूदयनाचार्यैरप्याघोषितमित्याह॥ उक्तं हीति॥ एतामेव नित्यसमामेव। अवष्टभ्य परनिराकरणसाधनत्वेनाश्रित्य। कंठकोलाहलाः किं भिन्ने भेदनिवेश उताभिन्न इत्याद्याः ऊहापोहरहिता बालास्तेषामेव बुद्धिव्यामोह हेतवो न पंडितानां स्वव्याहतेः स्पष्टत्वादित्यर्थः॥

इति सामान्यतो मिथ्यात्वभंगविवरणं॥

१३. अथ दृश्यत्वहेतुभङ्गः

दृश्यत्वहेतूक्तिरपि–

स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः।
प्रत्ययस्स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा॥

इति बोद्धोक्तयुक्तिच्छर्दिमात्रम्। इयांस्तु विशेषः – बौद्धमते ह्यप्रामाण्यस्य स्वत स्त्वात्तद्युक्तम्। त्वन्मते तु प्रामाण्यस्य स्वतस्त्वात्तदयुक्तमिति।

किं चेदं दृश्यत्वं वृत्तिव्याप्यत्वम्? फलव्याप्यत्वं वा? साधारणं वा? कदाचित् कथंचिच्चिद्विषयत्वं वा? स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतिर्वा? अस्वप्रकाशत्वं वा? नाद्यः। आत्मनोऽपि वेदान्तजनितवृत्तिव्याप्यत्वात्। अन्यथा

कुतो न निस्स्वरूपमित्यत आह॥ शून्येति॥ तुच्छवन्निस्स्वरूपत्वांगीकार इत्यर्थः। परस्परविरुद्धयोरिति नियमस्य स्वप्ने प्रतीतगजतदभावयोर्व्यभिचार इत्याशंकां परिहरति॥ स्वाप्नस्यापीति॥ गजादेरित्यर्थः। तन्मिथ्यात्वं गजप्रतियोगिकात्यंताभाव इत्यर्थः। स्वाप्नगजतदभावयोरुभयोरपि मिथ्यात्वमिति यदुक्तं तद्ध्वंसरूपाभावविषयं स्वाप्नगजस्य मिथ्यात्वे तत्प्रतियोगिको ध्वंसो न सत्यः मिथ्याभूतस्य प्रातिभासिकस्य ध्वंसायोगात्। अत्र च परस्पर विरहशब्देन परस्परात्यंताभावरूपत्वं विवक्षितं। एवं च गजस्य मिथ्यात्वेपि तदत्यंताभावस्तु सत्य एवेत्यतो न व्यभिचारः। यथोक्तं। ''न स्वप्नेपि द्वयं मिथ्या तत्रैकं सत्यमेवही''ति।

यदुक्तं मिथ्यात्वं बाध्यमबाध्यंवेति। तत्र वदामो न बाध्यं नाप्यबाध्यं किं तु प्रपंच समसत्ताकमिति। अतो न कोपि दोष इत्याशंक्य निराकरोति॥ न चेति॥ एवं चेति॥ प्रपंचसमसत्ताकत्वेन व्यावहारिकत्वादिति भावः॥ तात्विकाद्वैतेति। अद्वैतं तात्विकमिति मतस्य न हानिः। ब्रह्मसमसत्ताकत्वांऽगीकार एव सास्यादित्यर्थः॥ त्वन्मत इति॥ तत्ववादिमत इत्यर्थः॥ स्वसमेति॥ प्रपंच समसत्ताकेत्यर्थः। भवद्भिः प्रपंचे पारमार्थिकसत्त्वांगीकारात्तत्समसत्ताकमिथ्यात्वस्य भवतामसंमतत्वात्प्रपंच . समसत्ताकमिथ्यात्वस्यैवाऽस्माभिः साध्यमानत्वान्न सिद्धसाधनतेति भावः। ननु मिथ्यात्वस्य व्यावहारिकत्वे मिथ्यात्व विरोधिनो विश्वसत्यत्वस्य पारमार्थिकत्वं कुतः प्रातिभासिकत्वं किं न स्यादित्यत उक्तं॥ अप्रातिभासिकस्येति॥ न केवलं परिशेषात्पारमार्थिकत्वसिद्धिः। प्रत्यक्षसिद्धत्वाच्चेत्युक्तं॥ प्रत्यक्षादीति॥ सन्घट इत्यादि प्रत्यक्षसिद्धस्येत्यर्थः। तदप्रमाणं किं न स्यादित्यत उक्तं॥ स्वतः प्रामाण्येनेति॥ स्वतः प्रामाण्योपेतेत्यर्थः। बलवद्बाधकात्प्रामाण्यस्यापवादः किं न स्यादित्यत उक्तं॥ अनपोदितेति॥ एतच्चोत्तरत्र साधयिष्याम इति भावः॥ पारमार्थिकत्वेति॥ न हि विरुद्धयोरुभयोर्मिथ्यात्वसत्यत्वयोः समसत्ताकत्वमुक्तमिति भावः। एवं च प्रपंचसमसत्ताकमिथ्यात्वं साधयता व्यावहारिकं मिथ्यात्वं साधितं स्यात्। तस्य जगति पारमार्थिकसत्यत्वाविरोधि त्वात्सिद्धसाधनतेति भावः।

प्रपंचमिथ्यात्वस्य प्रपंचसमसत्ताकत्वे व्यावहारिकत्वप्राप्त्या नेहनानेति श्रुतेर्जगन्मिथ्यात्व रूपाद्वैतपरायास्तत्वावेदकत्वं यदंगीकृतं तदपि भग्नं स्यादित्याह॥ द्वैतेति॥ प्रातिभासिके रूप्यादौ व्यावहारिके घटादौ। प्रतिभासिकतयेति॥ अद्वैतहानिप्रसंगेन पारमार्थिकत्वस्य वक्तुमशक्यत्वादिति भावः। तयोः प्रपंच तन्मिथ्यात्वयोः। अयोगादिति॥ तथाच मिथ्यात्वं प्रपंचसमसत्ताकं साध्यत इत्युक्तमसदिति भावः॥ अन्यथेति॥ विरुद्धयोरेकत्र समसत्ताकत्वे प्रपंचे तात्विके सत्यत्वमिथ्यात्वे वा तात्विकौ तदभावौ वास्यातामित्यतिप्रसंगादित्यर्थः॥ जातिरिति॥ धर्मस्य तदतद्रूपविकल्पेन प्रवृत्तत्वात्त्वदीयं दूषणजात्युत्तरमिति भावः। जातिसामान्यलक्षणाभावान्नेदं जात्युत्तरं। ''स्वव्याघातकमुत्तरं जाति'' रिति वचनात्। प्रकृते च स्वव्याघातादेरभावादित्याह॥ स्वव्याघातादेरिति॥ आदिपदेन युक्तांगहान्ययुक्तांगाधिक त्वादि संग्रहः। ननु कथं स्वव्याघाताभावः। अनयैव रीत्या सत्यत्वं सत्यं मिथ्यावेति विकल्प्य दूषणसंभवादिति चेन्न। मिथ्यात्वस्य मिथ्यात्वे मिथ्यात्वं यथा बाधितं भवति एवं सत्यत्वस्य सत्यत्वे सत्यत्वं न बाधितं भवति। प्रत्युत स्थापितमेव भवतीति न स्वव्याघात इत्याशयेन तत्र विद्वत्संमतिमाह॥ उक्तं हीति॥ वादरत्नावल्यां विष्णुदासाचार्यैरित्यर्थः। न केवलं सामान्यलक्षणाभावान्नेदं जात्युत्तरं। किं नाम

सत्यार्थविषयकतया च बाधत्वं दृष्टं। नेदं रूप्यं इदं रूप्यं मिथ्येत्येवं सत्यभूत रूप्यमिथ्यात्वविषयकत्वेन बाधत्वदर्शनात्। एवं च त्वया रूप्यतन्मिथ्यात्वयोरुभयोरपि मिथ्यात्वं यद्यंगीक्रियते तदोभयोरपि मिथ्याभूतार्थविषयकत्वाविशेषा द्भ्रांतिबाधव्यवस्थानस्यादित्यर्थः। किंच मिथ्याभूतरूप्यधर्मिकत्वेन हेतुना यथा रूप्यमिथ्यात्वस्य मिथ्यात्वं त्वया साध्यते एवमेवास्माभिरपि साध्यभूतं यद्रूप्यमिथ्यात्वमिथ्यात्वं तस्यापि मिथ्यात्वं त्वदुक्तेनैव हेतुना साधयितुं शक्यते। तथाहि। रूप्यमिथ्यात्वमिथ्यात्वं मिथ्या प्रातिभासिकमिति यावत्। मिथ्याभूतरूप्यमिथ्यात्वधर्मिकत्वादिति प्रयोगसंभवात्। तथाच प्रातिभासिकं यद्रूप्यनिष्ठमिथ्यात्वमिथ्यात्वं तत्साधकत्वे मिथ्याभूतरूप्यधर्मिकत्वरूपहेतोरनुष्णत्वसाधककृतकत्ववद्बाधितार्थकत्वेना प्रामाण्यं स्यादित्याह॥ त्वदुक्तेनेति॥ मिथ्यात्वेत्यतः पूर्वं रूप्यनिष्ठेति शेषः। ननु सर्वस्यापि ब्रह्मज्ञानबाध्यत्वेन तदंतःपातिनोस्यानुमानस्य बाधितत्वमिष्टमेवेतिशंकापरिहारायात्यंतेत्युक्तं। व्यवहारदशायामपि प्रातिभासिकार्थसाधकत्वेनाप्रामाण्यं स्यादित्यर्थः॥ हेतुकृतस्येति॥ रूप्यमिथ्यात्वे मिथ्यात्वसाधनायेत्यर्थः। धर्मिमिथ्यात्वस्य मिथ्यात्वोपेतधर्मिकत्वस्य मिथ्यात्वे मिथ्याभूतेति विशेषणयुक्तत्वे इति व्याख्येयं। यथा श्रुते त्वसिद्धिरेव स्यान्न व्यभिचार इति ध्येयं।

सत्यत्वावश्यंभावात्। सत्यत्वाख्यविशेषण युक्तत्वावश्यं भावादित्यर्थः। यथा श्रुतेत्वसिद्धिपरिहार एव स्यात्। न विरोध इति ध्येयं। अयं भावः। रूप्यमिथ्यात्वं मिथ्या मिथ्यात्वोपेत धर्मिकत्वादित्यत्र मिथ्यात्वोपेतधर्मिकत्वादिति हेतुर्विवक्षितश्चेद्घटरूपादौ व्यभिचारः। घ(टादिरू)टरूपादिकं प्रति धर्मिभूतस्य घटादेर्यत्प्रातिभासिकत्व रूपं तन्मिथ्या घटादेर्व्यावहारिकत्वात्। अतो मिथ्याभूतमिथ्यात्वोपेतं धर्मिकत्वं घटरूपादावस्ति साध्यभूतं प्रातिभासिकत्वापरपर्यायं मिथ्यात्वं नास्तीति व्यभिचारापत्त्या सत्यभूत मिथ्यात्वोपेतधर्मिकत्वादिति हेतौ कर्तव्ये विरोधश्चस्यात्। तथाहि। पक्षीकृते रूप्यगतमिथ्यात्वे सत्यभूतमिथ्यात्वोपेत धर्मिकत्वरूपो हेतुरस्तीति तदा स्यात्। यदि पक्षीकृतं रूप्यमिथ्यात्वं प्रति धर्मिभूते रूप्ये मिथ्यात्वं सत्यं स्यात्। एवं च पक्षे हेतुसिद्ध्यर्थं सत्यत्वेनांगीकृते रूप्यमिथ्यात्वे यदि मिथ्यात्वमनेनानुमानेन साध्यते तदा हेतुसाध्ययोः पक्षे सहानवस्थानरूपो विरोधः स्यादिति। तथाच रूप्यमिथ्यात्वं मिथ्या सत्यभूतमिथ्यात्वोपेतधर्मिकत्वादिति हेतुमभिदधता रूप्यमिथ्यात्वं सत्यमित्युक्तंस्यात्। तत्र च पुनः मिथ्यात्वसाधने विरोधस्स्यात् सत्यभूतोष्णत्ववान्वह्निर्मिथ्याभूतोष्णत्ववानितिवदित्यर्थः इत्येवं सुलभेनोपपादनं द्रष्टव्यं। रूप्यधर्मो मिथ्यात्वं मिथ्यै वेति परेणोक्ते रूप्यमिथ्यात्वस्य मिथ्यात्वे तत्सत्यत्वं सत्यं स्यादित्यस्माभिरापादिते परेणोत्तरितं रूप्यरूपधर्मिण एवाभावाद्विरुद्धयोः सत्यत्वमिथ्यात्वरूपधर्मयोरपि मिथ्यात्वमिति पश्चात्परस्परविरुद्धयोरेकस्याभावेऽन्यस्य सत्त्वमिति नियमभंगेऽभिहिते परेण यत्र धर्मीसन् तत्रैवायं नियमः। न हि वंध्यासुतस्य श्यामत्वाभावे गौरत्वं सत्यमित्युक्तं तत्र दूषणमाह॥ न चेति॥ नहीत्यर्थः॥ वियदादिकं वेति॥ वाशब्द उपमायां। यथावियदादिकं न वंध्यासुतवन्निस्स्वरूपं असद्विलक्षणस्वरूपांगीकारात्। एवं रूप्यादिकमपि न बंध्यासुतवन्निस्स्वरूपं प्रातिभासिकस्वरूपांगीकारात्। एवं च दृष्टांतस्या संमतत्वात्परस्परविरुद्धयोरिति न्यायेन रूप्यमिथ्यात्वस्य मिथ्यात्वे रूप्यस्य सत्यत्वं सत्यं स्यादिति तर्कपराहतत्वेन रूप्यप्रतियोगिकात्यंताभावरूपस्य रूप्यमिथ्यात्वस्य सत्यत्वेन मिथ्याभूतमिथ्यात्वकत्वरूपहेतोः रूप्येऽभावेन व्यभिचाराभावात् मिथ्याभूतमिथ्यात्वकत्वेन हेतुना जगत्सत्यं स्यादात्मवदिति यदुक्तं तद्युक्तमेवेति भावः।

तथाच रूप्यगते मिथ्यात्वसत्यत्वेमिथ्या अविद्यमानधर्मिकत्वात् स्वाप्नगजतदभाववदित्यनुमानेनोभयोरपि मिथ्यात्वावगमेन मिथ्याभूतमिथ्यात्वकत्वस्य जगत्सत्यत्वसाधकस्य रूप्ये व्यभिचारः सुस्थ इति हृदयं।

किं च रूप्यधर्मो मिथ्या(त्वमपि)त्वं मिथ्या अविद्यमानधर्मिकत्वादित्यत्राविद्यमानधर्मिकत्वेपि मिथ्यात्वं सत्यमेवास्त्वित्यप्रयोजकता। ननु धर्मिण एवाभावे तद्गतमत्यंताभावप्रतियोगित्वरूपमिथ्यात्वं कथं सत्यं भविष्यतीत्यत आह॥ प्रतिपन्नेति॥ ततः किमित्यत आह॥ न च प्रतियोगित्वमिति॥ धर्मांतरवद्रूपादिवदिति व्यतिरेकदृष्टांतः। ननु तर्हि धर्म्यसत्त्वे धर्मासत्त्वनियमभंग इत्यत आह॥ धर्म्यसत्त्व इति॥ ननु तर्ह्यत्यंताभावप्रतियोगित्वाख्यमिथ्यात्वरूपधर्मस्यापि रूपादिवद्धर्मिसत्त्वसापेक्षत्वेन नाप्रयोजकताशंकावकाश इत्यत आह॥ मिथ्यात्वं त्विति॥ मिथ्यात्वं तु धर्मिभूतप्रपंचसत्यत्वस्य विरहरूपं अतो धर्मिसत्त्वं नापेक्षते प्रत्युत धर्मिभूतप्रपंचसत्त्वं प्रतिक्षिपतीत्यर्थः॥ अन्यथेति॥ प्रपंचे अत्यंताभाव प्रतियोगित्वरूपधर्मस्य सत्त्वाविरोधित्व इत्यर्थः॥ सिद्धेति॥ लोकेऽत्यंताभावप्रतियोगित्वरूपधर्मस्य धर्मिसत्त्वप्रतिकूलत्वस्यैव दर्शनात्। अत्र तदनंगीकारे प्रपंचेऽत्यंताभावप्रतियोगित्वं धर्मिसत्त्वसहिष्णुभूतं पारिभाषिकं स्यात्। तथाच पारिभाषिकात्यंताभावप्रतियोगित्वसाधने तस्य प्रपंचसत्त्वाविरोधित्वेन दृश्यत्वानुमाने सिद्धसाधनतास्यादितिभावः। इति सांप्रदायिकोऋजुः पंथाः। तरंगिणीकारास्तु। परोक्तरूप्यमिथ्यात्वमिथ्यात्व साधके मिथ्यात्वोपेतधर्मिकत्वे हेतावप्रयोजकतामुक्त्वा धर्म्यसत्वप्रयुक्तसत्वाभावत्वमुपाधिरित्याह॥ धर्मीति॥ वंध्यासुतश्यामत्वगौरत्वयोः साध्यव्यापकत्वात् साधनाव्यापकतामाह॥ मिथ्यात्वमिति॥ रूप्यगतमिथ्यात्वमित्यर्थः। तथाच तस्य धर्मिसत्यत्वविरहरूपत्वेन तत्प्रतिक्षेपकतया धर्म्यसत्वप्रयुक्तं सत्वमेवास्तीति साधनाव्यापकत्वमिति भावः। धर्मिसत्वप्रयुक्तसत्ववत्वमित्येव उक्तौ वंध्यासुतगतश्यामत्वगौरत्वयोः साध्याव्यापकत्वापत्तेर्नञ्द्वयगर्भत्वमिति मंतव्यं। ननु यदि अत्यंताभावप्रतियोगित्वरूपं मिथ्यात्वं विवक्षितं स्यात्। तदा तत् धर्मिसत्वप्रतिकूलं स्यात्। नचैवं। किं तु ब्रह्मभिन्नत्वादिरूपमन्यदेव। तच्च धर्मिसत्तानुकूलं। तथाच धर्म्यसत्वप्रयुक्तसत्वाभावस्यैव सत्वात्साधन व्यापकत्वमुपाधेरित्यत आह॥ अन्यथेति॥ तथाच रूप्यमिथ्यात्वं मिथ्यानाम ब्रह्मभिन्नमिति च साधितं स्यात्। तथाच सिद्धसाधनतेत्यर्थ इति धर्म्यसत्व इत्यादि ग्रंथं व्याकुर्वते।

किंच रूप्यमिथ्यात्वं मिथ्या अविद्यमानधर्मिकत्वादित्यस्य ह्ययमर्थः। प्रातिभासिकरूप्यसंबंधित्वमात्रेणैव मिथ्यात्वं प्रातिभासिकं यद्यत्संबंधितत्तत्समानमिति नियमादिति। तत्र चातिप्रसंगाः स्युरित्याह॥ किंचेत्यादिना॥ अनिषिद्धमित्यादिविशेषणद्वयं मिथ्यात्वस्याप्रातिभासिकत्वोपपादनायेति ज्ञातव्यं। रूप्यवत् अनिषिद्धं मिथ्यैव रजतं प्रत्यभादिति बाधकज्ञानेनास्तीति विहितमित्यर्थः। रूप्यसंबंधो रूप्यधर्मिकत्वरूपः। निषिद्धाः धर्माः दोषादयः। संतः स्युरिति भावः। निषेध्यतया सद्ब्रह्मसंबंधादित्यर्थः। तथाचाद्वैतहानिरिति भावः॥ रूप्येति॥ प्रातिभासिकरूप्यसंबंधादित्यर्थः॥ रूप्ये प्रपंचे चेति॥ वस्तुगत्या रूप्ये प्रपंचे च प्रातिभासिकव्यावहारिकसत्त्वेन वस्तुगत्या सद्वैलक्षण्याभावादित्यर्थः॥ सत्स्यादिति॥ सत्संबंधादित्यर्थः॥ असद्वैलक्षण्यं चेति॥ रूप्ये प्रपंचे चेति वर्तते। ब्रह्मणीत्यपि द्रष्टव्यं॥ असत्स्यादिति॥ असत्संबन्धादित्यर्थः। असति चेति। अधिकरणत्वेन असता सम्बन्धादित्यर्थः। रूप्यमिथ्यात्वमिथ्यात्वसाधनानुमानस्य तर्कपराहतिमाह॥ भ्रांतिबाधेति॥ मिथ्याभूतार्थविषयकतया भ्रांतित्वं दृष्टं। इदं रूप्यमित्यत्र मिथ्याभूतरूप्यविषयकतया ज्ञानस्य भ्रांतित्वदर्शनात्।

ननु मिथ्यात्वमबाध्यमित्यंगीक्रियते। नचाद्वैतहानिः। ब्रह्मस्वरूपत्वांगीकारात्। नचसोपाधिकनिरुपाधिक योरैक्यायोगः। निरुपाधिकब्रह्ममात्रत्वाभावेपि द्वितीयाभावोपलक्षित ब्रह्मस्वरूपत्वांगीकारात्। द्वितीयाभावोपलक्षितं च ब्रह्मस्वरूपं न निरुपाधिकं नवा भ्रमकाले निश्चितं। द्वितीयरूपप्रपंच भ्रमकाले तदभावोपलक्षित ब्रह्मस्वरूपस्यानिश्चितत्वात्। अतो नोक्तदोष इत्याशंक्य निषेधति॥ नचेति॥ उपलक्षण इति॥ उपलक्षणे द्वितीयाभावरूपमिथ्यात्व एव बाध्याबाध्यविकल्पस्येदानीमस्माभिः क्रियमाणत्वेन मिथ्यात्वं मिथ्यात्वोपलक्षितब्रह्मस्वरूपमित्युक्तं स्यात्। तथाचात्माश्रय इति सांप्रदायिकोर्थः। केचित्तु उपलक्षणस्य द्वितीया भावस्य बाध्यत्वे द्वितीयस्य प्रपंचस्याबाध्यत्वेन सत्यत्वं स्यात्। अबाध्यत्वे अद्वैतहानेरित्येवं मिथ्यात्वं यदुपलक्षितब्रह्मस्वरूपमित्युच्यते तस्मिन्नुपलक्षणे द्वितीयाभाव एव बाध्याबाध्यविकल्पप्रसरादित्यर्थ इत्याहुः। द्वितीयाभावस्योपलक्षणत्वमेवायुक्तं। उपलक्ष्यस्याभावादित्याह॥ द्वितीयेत्यादि॥ अप्रसिद्धस्योपलक्ष्यस्य प्रसिद्धमुपलक्षणं भवति। ब्रह्म तु द्वितीयाभाव रूपोपलक्षणज्ञाना(त्पूर्वमेव) त्प्रागेव ज्ञातमिति न तस्योपलक्ष्यत्वं युक्तं। कथं तत्पूर्वं ज्ञातमस्तीत्यत उक्तं। द्वितीयाभावेति॥ अभावज्ञाने अधिकरणज्ञानस्य कारणत्वाद्वितीयाभाव रूपोपलक्षणस्य ज्ञानार्थं तदधिकरणभूतशुद्धब्रह्मज्ञानमावश्यकमित्यर्थः। तथाचोपलक्षणज्ञाना(त्पूर्वमेव)त्प्रागेव ज्ञातं शुद्धं ब्रह्म प्रति न द्वितीयाभावस्योपलक्षणत्वं युक्तमिति भावः। किंचाहमज्ञ इति प्रतीयमानत्वेनांगीकृताया अविद्यायाः प्रतीतिस्तदधिष्ठान भूतशुद्धब्रह्मस्पुरणं विना नसंभवतीत्यविद्यारोपार्थमधिष्ठान भूत शुद्धब्रह्मज्ञानमावश्यकमित्यभिप्रायेणोक्तं अविद्याधिष्ठानतयेति। प्रकारांतरेणापि भासमानत्वमुपपादयति॥ तत्साक्षितयेति॥ अविद्याविषयकसाक्षिरूपज्ञानतयेत्यर्थः। तच्च ब्रह्मस्वरूपं स्वप्रकाशमिति सदा भासत इत्यर्थः। ननु काकेन गृहगतोत्तृणत्वादिसंस्थानविशेष इव प्रकाशमानब्रह्मगतं धर्मांतरमेव द्वितीयाभावेनोपलक्ष्यतामित्यत उक्तं। अन्यस्येति॥ निर्धर्मकत्वादितिभावः।

जगत्सत्यं मिथ्याभूतमिथ्यात्वकत्वादात्मवदित्युक्तानुमाने रूप्ये व्यभिचार इत्याशयेन तत्र हेतुसत्त्वं साधयति॥ नन्वित्यादिना॥ रूप्यधर्म इति हेतुगर्भं विशेषणं। धर्मिण एवाभावादिति भावः। तथाच रूप्यगतं मिथ्यात्वं मिथ्या अविद्यमानधर्मिकत्वादित्यनुमानमुक्तं भवति। एवं च रूप्ये मिथ्याभूतमिथ्यात्वकत्वे सत्यपि सत्यत्वाभावाद्व्यभिचार इति हृदयं। सिद्धांती उक्तानुमानस्य प्रतितर्कपराहतिमाशंकते॥ नचेति॥ तथात्व इति॥ रूप्यगतमिथ्यात्वं यदि मिथ्यास्यात्तदा परस्परविरुद्धयोरेकस्याभावेऽन्यतरस्य सत्त्वनियमात् तत्सत्यत्वं सत्यं स्यादिति प्रतितर्कपराहतत्वादुक्तानु मानमसत्। तथाच रूप्ये हेतोरेवाभावान्न व्यभिचार इति हृदयं। ननु यदि धर्मिण एव मिथ्यात्वेन तत्रत्ययोर्विरुद्धयोस्सत्यत्वमिथ्यात्वरूपधर्मयोर्द्वयोरपि मिथ्यात्वमुच्यते तर्हि परस्परविरुद्धयोरित्युक्तनियमभंग इत्यत आह॥ परस्परेति। ननु यत्र धर्मी असन् तत्राप्ययं नियमः किं न स्यादित्यत आह॥ नहीति॥ तयोरपि सहानवस्थानरूपविरोधसद्भावादिति भावः। ननु वंध्यासुते श्यामत्वाभावे गौरत्वं न सत्यं तयोः परस्परविरहव्याप्यत्वेन परस्परविरहरूपत्वाभावात्। तथाच परस्परविरहरूपविरोधवतोरेकस्याभावेऽन्यस्य सत्त्वमिति विवक्षितनियमस्य व्यभिचाराभावात्। प्रकृतेच रूप्यगतमिथ्यात्वसत्यत्वयोः परस्परविरहरूपत्वसद्भावेन तन्मध्ये मिथ्यात्वस्य मिथ्यात्वे सत्यत्वं सत्यं स्यादेवेत्यतोऽस्यापि नियमस्य व्यभिचारमाह॥ नवेति॥ तत्रैवेति॥ स्वप्न एवेत्यर्थः। तदभावो गजाभावः। तथाच स्वाप्नगजतदभावयोः परस्परविरहरूपविरोधवतोरेकस्याभावेऽपरस्य सत्त्वाभावाद्व्यभिचार इति भावः।

न्यायामृतप्रकाशः

ननु मिथ्यात्वस्याबाध्यत्वेपि ब्रह्मस्वरूपत्वांगीकारान्नाद्वैतहानिरित्यत आह॥ नहीति॥ प्रपंचेति॥ कालादिप्रपंच घटितत्वादिति भावः॥ भ्रमकालेति॥ रूप्यमिथ्यात्वस्य भ्रमकाले निश्चये रूप्यभ्रमाद्रूप्यार्थिनः प्रवृत्तिर्नस्यादिति भावः। ब्रह्मणो भ्रमकाले निश्चितत्वोपपादनायाधिष्ठानेत्युक्तं॥ तस्य मां प्रत्यपि सिद्धत्वादिति॥ मिथ्यात्वस्य ब्रह्मस्वरूपत्वे प्रपंचोमिथ्येत्यस्य प्रपंचो ब्रह्मस्वरूपवानित्यर्थः स्यात्। इदं च मां प्रत्यपि सिद्धं। ब्रह्मणोव्याप्तत्वेन प्रपंचेपि सत्त्वेन सिद्धसाधनतेति भावः॥ व्यभिचारश्चेति॥ दृश्यत्वसत्त्वेपि मिथ्यात्वाभावादिति भावः। हेतोरेवाऽभावान्नव्यभिचार इत्याशंक्य निराकरोति॥ मिथ्यात्वस्येति॥ कुतोनुमानवैयर्थ्यमित्यत आह॥ तस्येति॥ सिद्धसाधनमिति॥ जगन्निष्ठमिथ्यात्वस्य बाध्यताया अस्माभिरंगीकारादिति भावः॥ अतत्वेति॥ बाध्यभूतमिथ्यात्वावेदकत्वादिति भावः॥ जगच्चेति॥ जगत्सत्यं मिथ्याभूतमिथ्यात्वकत्वादात्मवदित्यनुमानमुक्तं भवति॥ उपाधिरिति॥ आत्मनि साध्यव्यापकत्वात्पक्षे जगत्यभावेन साधनाव्यापकत्वाच्चेति भावः॥ सत्यत्वं विनेत्यादि॥ अयमभिप्रायः। आत्मत्वमुपाधिमुक्त्वा तद्व्यतिरेकेण जगत्सत्यं न अनात्मत्वाद्व्यतिरेकेणाऽऽत्मवदिति सत्प्रतिपक्षोन्नयनं कार्यं। तत्र संभवति। अनात्मत्वमस्तु सत्यत्वमेवास्त्वित्यप्रयोजकत्वेन सत्यत्वे आत्मत्वोपाधेरप्रयोजकत्वात्। न चैवं भवदीये स्थापनानुमानेपि अस्तु मिथ्याभूतमिथ्यात्वकत्वं सत्यत्वं मास्त्वित्यप्रयोजकत्वमेवेति साम्यमिति वाच्यं। मिथ्याभूतमिथ्यात्वकत्वे सत्यत्वस्यैव प्राप्त्या पुनः सत्यत्वं मास्त्वित्युक्तेः स्वक्रियाविरुद्धत्वेन व्याघाताख्यानुकूलतर्कस्य हेतुसाध्यव्याप्तिग्राहकस्य सत्त्वान्नाप्रयोजकता शंक्या। शंकायाः व्याघातावधित्वात्। ''व्याघातावधिराशंके'' त्युदयनोक्तेः। ननु (तर्हि)मदीये सत्प्रतिपक्षानुमानेपि व्याघातरूपानुकूलतर्कस्यहेतुसाध्यव्याप्तिग्राहकस्य सत्त्वान्नाप्रयोजकतेति चेन्न। अनात्मत्वमस्तु सत्यत्वमेवास्त्वित्यत्रानात्मत्वसत्यत्वयोर्व्याघाताभावात्। नन्वस्ति व्याघातः। असत्यत्वमनात्मत्वं सत्यत्वमेव चात्मत्वमिति चेन्न। अनात्मत्वस्याज्ञातृत्वादिरूपत्वात्सत्यत्वस्य चा बाध्यत्वादिरूपत्वेन विरोधाभावादिति। यद्वा इत्थं व्याख्येयं। आत्मत्वं नोपाधिः कुत इत्यत उक्तं अप्रयोजकत्वादिति। साध्याभावाविनाभाव्यभावत्वाभावेन सत्यत्वे आत्मत्वस्याप्रयोजकत्वादित्यर्थः। ''साध्याभावाविनाभावी स उपाधिर्यदत्यय'' इति वचनात्। तथाचोपाधेः साध्याभावाविनाभाव्यभावत्वेन यत्रात्मत्वाभावः तत्र सत्यत्वाभाव इति व्याप्तिस्तावदवश्यंग्राह्या। सा न युक्ता। अनात्मत्वेपि सत्यत्वोपपत्तेरित्य प्रयोजकत्वात्। ननु तर्हि भवदनुमानेपि मिथ्याभूतमिथ्यात्वकत्वेपि सत्यत्वं मास्त्वित्यप्रयोजकतास्यादिति चेन्न। सत्यत्वं विना मिथ्याभूतमिथ्यात्वकत्वेंगीक्रियमाणे व्याघातेनाप्रयोजकतायाः शंकानर्हत्वात्। ननु तर्हि यत्रात्मत्वाभावः तत्र सत्यत्वाभाव इत्युपाध्यभावसाध्याभावयोर्व्याप्तावपि नाप्रयोजकता। असत्यत्वरूपानात्मत्वमंगीकृत्य सत्यत्वा भावानंगीकारे व्याघातसम्यादिति चेन्न। अज्ञातृत्वरूपानात्मत्वस्य असत्यत्वं सत्यत्वाभावं विनावस्थित्यंगीकारे व्याघाताभावादिति योजनाद्वयेपि प्रमेयं त्वेकमेव। इयांस्तु विशेषः। उपाधिमुक्त्वा क्रियमाणे सत्प्रतिपक्षोन्नयने अप्रयोजकतापरत्वेन प्राचीनव्याख्यानं उपाधेरप्रयोजकत्वादिति मूलग्रंथस्वारस्यानुसारेण साध्याभावाविना भाव्यभावत्वस्योपाधिलक्षणत्वेनो पाध्यभावसाध्याभावयोरवश्यं व्याप्तिर्ग्राह्या। तत्राप्रयोजकतापरत्वेन द्वितीयव्याख्यानमिति।

यादृशसत्यत्वम्, तादृशमाधेयस्येति नियमः ? अथवा यः सम्बन्धी यादृशसत्त्ववान्, तत्सम्बन्ध्यपरोपि तादृशसत्त्ववानिति नियमः ? उभयथाऽप्यतिप्रसङ्ग इत्याह – तर्हि सति ब्रह्मणीत्यादिना॥ भ्रान्ति-बाधेति॥ उभयोरप्यसदर्थविषयकत्वादिति भावः। न च यत्र वल्मीके स्थाणुत्वभ्रमेण पुरुषत्वभ्रमो निवर्तते, तत्रोभयोरसदर्थविषयकत्वाविशेषेऽपि भ्रम-बाधकत्वव्यवस्थोपपत्तिवत् प्रकृतेऽप्युपपत्तिरिति वाच्यम्; अत्र भ्रान्तिबाधशब्दाभ्यामन्यथाज्ञानस्य, अन्यथा ज्ञातस्य सम्यग्ज्ञानस्य च विवक्षितत्वात्। न चैवम् तत्र बाधव्यवहारो न स्यादिति वाच्यम्; एकधर्मिकपूर्वज्ञानविषयीकृताकारादन्यविरुद्धप्रकारकोत्तरज्ञानत्वेनैव तत्र बाधव्यवहारोपपत्तेः।

रूप्यमिथ्यात्वम्, मिथ्या, धर्मिमिथ्यात्वादित्यनुमाने साध्यस्य मिथ्यात्वमिथ्यात्वस्य धर्मिमिथ्यात्वहेतुमत्त्वेन मिथ्यात्वाभावे व्यभिचारापत्त्या तस्यापि मिथ्यात्वे धर्मिमिथ्यात्वहेतोः प्रातिभासिकविषयत्वेनाप्रामाण्यमित्याह – त्वदुक्तेनेति॥ अत्यन्तेति॥ व्यावहारिकविषयत्वे किञ्चिदप्रामाण्यम्, प्रातिभासिकविषयत्वे त्वत्यन्ताप्रामाण्यमित्यर्थः। किञ्च हेतूकृतं धर्मिमिथ्यात्वं मिथ्या वा ? सत्यं वा ? आद्ये घटरूपादौ मिथ्याभूतधर्मिमिथ्यात्वं वर्तते, मिथ्यात्वं च नास्ति, इति व्यभिचारः। द्वितीये पक्षीभूतधर्मिमिथ्यात्वस्य सत्यत्वमङ्गीकृत्य, तन्मिथ्यात्वे साध्यमाने विरोध इत्याह – हेतूकृतस्येति॥ किञ्च परस्परविरुद्धयोर्धर्मयोरेक मिथ्यात्वेऽपरसत्यत्वमिति नियमाद् रूप्यमिथ्यात्वमिथ्यात्वे रूप्यसत्यत्वं सत्यं स्यात्, इति तत्र व्यभिचारोद्भावनमसङ्गतम्। ननु – अस्य नियमस्य यत्र धर्मिसत्यत्वं तद्विषयकत्वमावश्यकम्। अन्यथा वन्ध्यासुतस्य श्यामत्वस्य मिथ्यात्वे गौरत्व-सत्यत्वापातात्। प्रकृते च धर्मिसत्यत्वाभावाद् रूप्यमिथ्यात्वस्य मिथ्यात्वेऽपि सत्यत्वानापत्त्या जगत्, सत्यम्, मिथ्याभूतमिथ्यात्वकत्वादित्यनुमाने व्यभिचारः सुस्थ एवेत्यत आह – न च त्वन्मत इति॥ एवं चास्य नियमस्यासद्विलक्षणविषयत्वात् प्रकृते च त्वन्मतेऽसद्वैलक्षण्यस्य सत्त्वादेकमिथ्यात्वेन अपरसत्यत्वापादनं सुशकम्, इति नोक्तव्यभिचार इति भावः। ननु अस्य नियमस्यासद्विलक्षणविषयकत्वे स्वाप्नगजस्याप्यसद्विलक्षणत्वात् तस्य मिथ्यात्वे तदभावः सत्यः स्यादिति – चेत्, अत्र हि गजाभावस्य सत्यत्वमापाद्यमानं किं तद्ध्वंसस्य ? उत तदत्यन्ताभावस्य ? नाद्य इत्याह – स्वाप्नस्यापि कल्पितत्वेन तद्ध्वंसादेर्मिथ्यात्वेऽपीति॥ परस्परविरुद्धपोरित्यस्य परस्परात्यन्ताभावरूपयोरिति विवक्षितत्वेन गज-तद्ध्वंसयोश्च परस्परात्यन्ताभावरूपत्वाभावात् न व्यभिचार इति भावः। न द्वितीयः; इष्टापत्तेः। ननु – स्वाप्नगजमिथ्यात्वमिथ्यात्वे स्वाप्नगजस्य सत्यत्वं स्यादित्यापाद्यत इत्यत आह – तन्मिथ्यात्वं स्वप्ने प्रतीतमप्यात्मवदबाधात् सत्यमेवेति॥ स्वाप्नगजमिथ्यात्वस्यात्मवद् बाधकाभावेन सत्यत्वाद् हेतोरनागमनात् न व्यभिचारचोदनमित्यर्थः। परमतावष्टम्भेन चैतदुक्तम्। स्वमते स्वाप्नस्य सत्यत्वादिति बोध्यम्। अन्यथेति॥ यदि व्यावहारिकमेव मिथ्यात्वमङ्गीक्रियत इत्यर्थः। विधीति॥ अस्तित्वेनेत्यर्थः। विरुद्धयोरुभयोरेकाकारसत्यत्वं विरुद्धमिति भावः। उक्तमर्थं सङ्गृह्णाति – तथाचेति॥ स्वव्याघातादेरभावादिति॥ मिथ्यात्वस्य मिथ्यात्वे मिथ्यात्वाभाववत् सत्यत्वस्य सत्यत्वे सत्यत्वाभावाभावादित्यर्थः। आदिशब्देन व्याप्त्यादियुक्ताङ्गहीनत्वपरिग्रहः। लक्षणाभावाच्च न जात्युत्तरत्वमित्याह – किञ्चेति॥ न केवलमस्मत्प्रयुक्तदूषणस्य जात्युत्तरत्वाभावः, अपि तु भवत्प्रयुक्ततर्कस्यैव साधारणासाधारणसामर्थ्यवत्त्वेन जात्युत्तरत्वमित्याह – प्रत्युतेति॥

तयोर्जातित्वेन भावरूपत्वात्। न च सत्यत्व-मिथ्यात्वयोरपि परस्परात्यन्ताभावरूपत्वमसिद्धमिति वाच्यम्; प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वाभावस्यैव सत्यत्वात्। न च तुच्छस्यापि सत्यत्वापातः; तत्र मिथ्यात्वव्यतिरेकासिद्धेः। तथाचोक्तनियमान्नाप्रयोजकत्वमिति॥

यच्चोक्तम् – परस्परविरहरूपत्वेऽपि विषमसत्ताकयोर्न विरोध इति, तन्न। सिद्धे प्रपञ्चमिथ्यात्वे विषमसत्ताकयोरविरोध इति कल्पना, तस्यां च सत्यां मिथ्यात्वसिद्धिः, इतीतरेतराश्रयप्रसङ्गात्। यदपि – संयोग-तदत्यन्ताभावयोरिव समुच्चयोऽभ्युपगम्यत इति, तदपि न। संयोग-तदत्यन्ताभावयोरवच्छेदकभेदेन भिन्नाश्रितत्वस्यैवानुभवेन समुच्चयासम्प्रतिपत्तेः, तद्वत् प्रकृतेऽवच्छेदकभेदाभावाच्च। न च अत्रापि स्वरूपेण सत्यत्वं पारमार्थिकत्वेन निषेधः, इति समुच्चयोपपत्तिरिति वाच्यम्। उक्तरीत्या सत्यत्व-मिथ्यात्वयोर्निर्धर्मके ब्रह्मण्यपि सम्भवेन ब्रह्मापि सत्यं मिथ्या च इत्यङ्गीकारः स्यात्। यदपि च – एकबाधकबाध्यत्वं समसत्ताकत्वे प्रयोजकमिति, तदपि न। प्रपञ्चवत् तन्मिथ्यात्वस्यापि ब्रह्मज्ञानबाध्यताङ्गीकारे 'मिथ्यात्वस्य तात्त्विकत्वाद् ब्रह्मस्वरूपत्वेन नाद्वैतहानिः' इति स्वोक्तिविरोधापत्तेरिति दिक्।

जगत् सत्यम्, मिथ्याभूतमिथ्यात्वकत्वादित्यत्रोपाधिमाशङ्क्य निषेधति – न चेति॥ उपाधेः स्वातन्त्र्येण दूषकत्वाभावात्, जगत्, सत्यम्, अनात्मत्वादिति सत्प्रतिपक्षोन्नायकतया दूषकत्वं वक्तव्यम्। तच्च न सम्भवति। प्रतिपक्षानुमानस्याप्रयोजकतापराहतत्वात्। न च अप्रयोजकत्वं पूर्वानुमानेऽप्यविशिष्टमिति वाच्यम्। तत्र विपक्षे व्याघातरूपबाधकवत् प्रकृते बाधकाभावात्। न च प्रपञ्चस्य मिथ्यात्वेन यः सत्यः, स अनात्मा नेति व्याप्त्या हेतूच्छित्तिरेव बाधिकेति वाच्यम्। अस्य मिथ्यात्वसिद्ध्युत्तरकालीनत्वेनान्योन्याश्रयात्। तस्मात् नायमुपाधिरित्याह – सत्यत्वं विनेति॥ 'न ही'त्युक्तपरिहारमाशङ्क्य निषेधति – न चेति॥ तथाच न विरुद्धधर्माधिकरणत्वमिति भावः। द्वितीयाभावस्तदोपलक्षणं स्यात्, यदि तदुपलक्ष्यं पूर्वाज्ञातं किञ्चित् स्यात्। तदेव नास्तीत्याह – द्वितीयाभावाधिकरणतयेति॥ जगत्, सत्यम्, मिथ्याभूतमिथ्यात्वादित्यत्र व्यभिचारं शङ्कते – नन्विति॥ तथाच रूप्ये व्यभिचार इति भावः। उक्तानुमाने व्यभिचारपरिहारमाशङ्क्य निषेधति – न च तथात्व इति॥ धर्मिणो मिथ्यात्व इति॥ तथाच धर्मिमिथ्यात्वम्, मिथ्या, धर्मिमिथ्यात्वादित्यनुमानं फलितम्। उक्तव्याप्तेश्च सत्यभूतधर्मिविषयकत्वादिति भावः। ननु तर्हि सामान्यनियमस्य का गतिरितित्यत आह – परस्परेति॥ तस्यापि सत्यभूतधर्मिविषयकत्वादिति भावः। धर्म्यसत्त्वेऽप्यस्य नियमस्याङ्गीकारेण बाधकमाह – न हि वन्ध्येति॥ ननु परस्परविरुद्धयोरित्यनेन परस्परविरहरूपत्वस्य विवक्षितत्वात् नोक्तबाधकावसरः, इत्यतो बाधकान्तरमाह – न वा स्वप्न इति॥ हेतोरेवानागमनात् न व्यभिचार इत्याह – प्रतिपन्नोपाधाविति॥ तच्च सत्यमेव, इति न व्यभिचार इति शेषः। रूप्यमिथ्यात्वम्, मिथ्या, धर्मिमिथ्यात्वादित्यत्राप्रयोजकत्वमाह – न च प्रतियोगित्वमिति॥ तथाच धर्मिमिथ्यात्वेऽपि धर्मस्य सत्यत्वोपपत्तेरिति भावः। नन्वेवं धर्म्यसत्त्वे धर्मासत्त्वमिति व्याप्तेः का गतिरित्यत आह – धर्म्यसत्त्व इति॥ अन्यथेति॥ यदि धर्मिसत्त्वानुगुणं मिथ्यात्वं साध्यत इत्यर्थः। ननु प्रातिभासिकरूप्यसम्बन्धात् तन्मिथ्यात्वमपि प्रातिभासिकमित्यत आह – किञ्चेति॥ अत्र किमाधारस्य

सत्यत्वपक्षे स नोच्यते। किन्तु मिथ्यात्वविशिष्टत्वमेव। अद्वैतहानिस्तूच्यत इत्यर्थः॥ परस्यैव जातिवादित्वमित्याह – प्रत्युतेति॥ सूरिभिराघोषितं च परेषां जातिवादित्वमित्याह – उक्तं हीति॥ अवष्टभ्य साधनमालम्ब्य॥

व्यासाद्रिसूततर्काम्बुपूरैः पक्षयुगं युजि।
न्यायामृततरङ्गिण्यां मार्ष्यसामान्यभङ्ग ऐत्॥

न्यायामृतकण्टकोद्धारः

विशेषतो मिथ्यात्वं खण्डयित्वा सामान्यतोऽपि खण्डयति – अस्तु वेति॥ ननु मिथ्यात्वस्य ब्रह्मस्वरूपत्वात् नाद्वैतहानिकरत्वमित्यत आह – न हीति॥ विरुद्धधर्माधिकरणयोरैक्यासम्भवादिति भावः। ननु निरुपाधिकं भ्रमकालनिश्चितं निरुक्तातिरिक्तमेव मिथ्यात्वं ब्रह्मस्वरूपं साध्यते अतो न दोषः इत्यत आह – तस्येति॥ एतादृशमिथ्यात्वरूपं ब्रह्मैव प्रपञ्चे साध्यते चेत्, तस्य ब्रह्मरूपमिथ्यात्वस्य प्रपञ्चे मयाऽप्यङ्गीकारात् सिद्धसाधनं स्यादित्यर्थः। ब्रह्मणो व्यापकत्वेनान्तर्यामित्वेन सर्वत्राङ्गीकारादिति भावः। जगच्चेति॥ तथाच जगत्, सत्यम्, मिथ्याभूतमिथ्यात्वकत्वात्, आत्मवदित्यनुमानं फलितमित्यर्थः।

अत्र कश्चित् – मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तिः। न च परस्परविरुद्धयोरेक मिथ्यात्वेऽपरसत्यत्वनियम इति वाच्यम्। यत्र मिथ्यात्वावच्छेदकस्य विरुद्धधर्मवृत्तिता नास्ति तद्विषयत्वादस्य नियमस्य, परस्परविरहरूपधर्मविषयत्वाद्वा; यथा परस्परविरहरूपयो रजतत्वतदभावयोः शुक्तौ। यथा वा परस्परविरहव्यापकयो रजतभिन्नत्व-रजतत्वयोस्तत्रैव। तत्र निषेध्यतावच्छेदकभेदनियमात्। यथा च न सत्यत्व-मिथ्यात्वयोः परस्परविरहरूपत्वम्, न वा परस्परविरहव्यापकत्वम् तथोपपादितमधस्तात्। यत्र तु निषेध्यतावच्छेदकमुभयवृत्ति, तत्रोभयोरपि विरुद्धयोर्धर्मयोर्निषेधः; यथा गजे गोत्वाश्वत्वयोरुभयोर्निषेधः। निषेध्यतावच्छेदकस्य गजत्वात्यन्ताभावव्याप्यत्वस्योभयत्र विद्यमानत्वात्। प्रकृते च निषेध्यतावच्छेदकं दृश्यत्वं सत्यत्व-मिथ्यात्वयोरुभयोरप्यस्ति इत्युभयनिषेधोपपत्तिः। अस्तु वा परस्परविरहरूपत्वम्। तथापि विषमसत्ताकयोः विरोध एव नास्ति। व्यावहारिकमिथ्यात्वेन व्यावहारिकसत्यत्वापहारेऽपि काल्पनिकसत्यत्वानपहारात्। तार्किकमतसिद्धसंयोग-तदत्यन्ताभाववत् सत्यत्व-मिथ्यात्वयोः समुच्चयाभ्युप गमाच्च। एकसाधकेनापरस्य बाध्यत्वं विषमसत्ताकत्वे प्रयोजकम्; यथा शुक्तिरूप्य-तदभावयोः। एकबाधकबाध्यत्वं हि समसत्ताकत्वे प्रयोजकम्; यथा शुक्तिरूप्य-शुक्तिभिन्नत्वयोः। अस्ति च प्रपञ्चतन्मिथ्यात्वयोरेकब्रह्मज्ञानबाध्यत्वम्। अतः समसत्ताकत्वात् मिथ्यात्वबाधकेन प्रपञ्चस्यापि बाधनात् नाद्वैतहानिः – इत्याह।

तन्न। प्रकृतेऽपि तुच्छ-ब्रह्मणोरपि दृश्यत्वस्य विद्यमानत्वेन निषेध्यतानवच्छेदकत्वात्। किञ्च परस्परात्यन्ताभावरूपयोरेकमिथ्यात्वेऽपरसत्यत्वनियमः। गोत्वाश्वत्वयोश्च न परस्परात्यन्ताभावरूपत्वम्।

निःस्वरूपेऽङ्गीकृतः, नतु सस्वरूपेऽपि सोऽङ्गीकर्तुमुचितः। तथाच न व्यभिचार इति भावः। ननु तथापि मिथ्याभूतमिथ्यात्वकत्वादित्यस्य हेतोः स्वप्ने प्रतीतस्य गजादेस्तन्मिथ्यात्वस्य च मिथ्यात्वात् तत्र व्यभिचार इत्यत आह – स्वाप्नस्यापीति॥ स्वाप्नस्य कल्पितत्वपक्षेऽपि स्वप्नप्रतीतस्य स्वाप्नगजध्वंसादेर्मिथ्यात्वेऽपि गजादेर्मिथ्यात्वं सत्यमेव इति गजादौ हेतोरगमनाद् न व्यभिचार इत्यर्थः। यद्वा – परस्परविरहरूपविरुद्धत्वगर्भायामप्युक्तव्याप्तौ परोदीरितं व्यभिचारं परिहरति – स्वाप्नस्यापीति॥ विरहशब्देनात्यन्ताभावोऽभिप्रेतः। स्वप्ने प्रतीतयोर्गज-ध्वंसयोस्तु न परस्परात्यन्ताभावरूपत्वम्। अत उभयोरपि मिथ्यात्वेऽपि स्वप्नप्रतीतगज-तन्मिथ्यात्वयोरुभयोरपि न मिथ्यात्वम्। किन्तु गजस्यैव। गजमिथ्यात्वं तु गजात्यन्ताभावगर्भतया सत्यमेवेत्यर्थः।

ननु प्रपञ्चमिथ्यात्वं न बाध्यम् नवाऽबाध्यम्, किन्तु प्रपञ्चसमसत्ताकम्, एकबाधकबाध्यत्वं हि समसत्ताकत्वे प्रयोजकम्। यथा शुक्तिरूप्य-शुक्तिभिन्नत्वयोः। अस्ति च प्रपञ्च-तन्मिथ्यात्वयोरेकब्रह्मज्ञानबाध्यत्वमिति शङ्कां निराकरोति – नचेति॥ एवञ्चेति॥ मिथ्यात्वस्य व्यावहारिकत्वादित्यर्थः। परस्परात्यन्ताभावयोरेकबाधकबाध्यत्वस्याभावादिति भावेनाऽह-मिथ्यात्वस्येति॥ पारमार्थिकत्वापातादिति॥ तथाच सिद्धसाधनमेवेति भावः॥ द्वैतेति॥ उभयोरपि व्यावहारिकपरत्वेनाव्यवस्थैव स्यादित्यर्थः॥ तयोरिति॥ प्रपञ्च-तन्मिथ्यात्वयोरित्यर्थः॥ अन्यथेति॥ विरुद्धयोरेकत्र समसत्ताकत्वे प्रपञ्चे तात्विके सत्यत्वमिथ्यात्वे वा तात्त्विकौ तदभावौ वा स्यातामित्यर्थः।

एतेन – कल्पितस्योभयस्य तात्त्विकस्योभयाभावस्य च सत्त्वादिष्टापत्तिरिति – निरस्तम्; तथा सति रूप्येपि सत्त्वासत्त्वोभयसमुच्चयापत्त्या तदुभयवैलक्षण्यस्यानङ्गीकरणीयत्वात्। ख्याति-बाधावपि सत्त्वासत्त्वाभ्यामेवोपपादनीयाविति भावः। एतेनैव – वृक्षे संयोग-तदन्त्यन्ताभावयोरिव प्रपञ्चे मिथ्यात्व-सत्यत्वयोः समुच्चय इति – निरस्तम्; तद्वदवच्छेदकभेदाभावात्, तत्सत्त्वे त्विष्टापत्तेः। उक्तं च बौद्धधिक्कारे – 'सदसत्त्वस्यैकत्र विरोधेन विधिवत् निषेधस्याप्यनुपपत्तेरि'ति।

संगृह्णाति – तथाचेति॥ ननु साध्यस्य मिथ्यात्वस्य साध्यवत्त्व-तदभावाभ्यां दूषणाभिधानं जात्युत्तरं स्यादित्याशङ्कां निराकरोति – नचेति॥ स्वेति॥ जातिबीजस्य व्याघातादेरभावादित्यर्थः। प्रत्युत स्वानुगुणमेवेत्याह – उक्तं हीति॥ नित्यसमजातिलक्षणाभावाच्च न सा प्रकृते प्रसञ्जतीत्याह – किञ्चेति॥ नचात्रेति॥ यद्यपि मिथ्यात्वस्य मिथ्यात्वे प्रपञ्चस्य मिथ्यात्वविशिष्टत्वभङ्ग एवोच्यते; तथापि मिथ्यात्वस्य

रूपत्वाभावात्। यच्चोक्तम् – प्रपञ्चगतसत्यत्व-मिथ्यात्वयोः समसत्ताकत्वमिति, तदपि न। निरसिष्यमाणत्वात्। विरुद्धयोर्द्वयोरेकाधिकरणे समुच्चयासिद्धेः। अन्यथा वह्नावपि व्यावहारिकानौष्ण्य-तदभावौ स्याताम्, इति कालात्ययापदिष्टमात्रोच्छेदः स्यात्। त्वयैव व्यावहारिकौष्ण्याभावविषयत्वेन बाधव्यवस्थोक्तेश्च। इति पूर्वापरविरोधपरिहारं भवानेव पृष्टो व्याचष्टाम्। तस्मात् साधूक्तम् – जगच्च सत्यं स्यादात्मवदिति॥

सन्तः स्युरिति॥ सद्ब्रह्मसंबन्धादित्यर्थः॥ रूप्याधिष्ठानेति॥ प्रातिभासिकरूप्य सम्बन्धादित्यर्थः॥ रूप्य इति॥ सत्सम्बन्धादित्यर्थः॥ असद्वैलक्षण्यं चेति॥ रूप्ये प्रपञ्चे चेत्यनुषङ्गः। ब्रह्मणीति शेषः॥ असत् स्यादिति॥ असत्सम्बन्धादित्यर्थः॥ असति चेति॥ अधिकरणत्वेनासता सम्बन्धादित्यर्थः॥ भ्रान्तीति॥ अनिर्वचनीयरजतवादे रजतज्ञानस्य समानाधिकरणप्रकारकतया भ्रान्तित्वासिद्ध्यापत्त्या मिथ्याभूतार्थविषयकतया भ्रान्तित्वम्, अमिथ्याविषयकतया च बाधकत्वं वक्तव्यम्। उभयोरपि मिथ्याविषयकत्वे भ्रान्तिबाधव्यवस्था न स्यादित्यर्थः॥ मिथ्यात्वेनेति॥ मिथ्यात्वोपेतधर्मिकत्वेनेत्यर्थः॥ प्रातिभासिकत्वापत्त्येति॥ प्रातिभासिकरूप्यसम्बन्धादित्यर्थः॥ अप्रामाण्यं चेति॥ प्रातिभासिकविषयतया रूप्यज्ञानवत् व्यवहारदशायामप्रामाण्यं स्यादित्यर्थः॥ हेतूकृतस्येति॥ रूप्यमिथ्यात्वे मिथ्यात्वसाधनायेति शेषः॥ धर्मिमिथ्यात्वस्येति॥ मिथ्यात्वोपेतधर्मिकत्वस्येत्यर्थः। अतो नापक्षधर्मत्वम्॥ मिथ्यात्वे॥ मिथ्याभूतेतिविशेषणयुक्तत्व इत्यर्थः। यथाश्रुते त्वसिद्धिरेव स्यात्, न व्यभिचार इति बोद्धव्यम्॥ घटरूपादाविति॥ घटरूपादेर्धर्मिणि घटादौ मिथ्यात्वस्याभावेन मिथ्याभूतमिथ्यात्वोपेतधर्मिकत्वस्य हेतोर्घटरूपादौ सत्त्वाद् मिथ्यात्वरूपसाध्यस्य चाभावाद् व्यभिचार इत्यर्थः॥ व्यभिचारापत्त्येति॥ रूप्यमिथ्यात्वसाधनदशायां घटरूपादेरमिथ्यात्व संप्रतिपत्त्या व्यभिचार इत्यर्थः॥ सत्यत्वेति॥ 'सत्यभूते'तिविशेषणस्यावश्यंभावादित्यर्थः। यथाश्रुते त्वसिद्धिरेव परिहृता स्यात्, न तु वक्ष्यमाणो विरोध इति ध्येयम्॥ विरोधश्चेति॥ रूप्यगतमिथ्यात्वे पक्षीकृते सत्यभूतमिथ्यात्वोपेतधर्मिकत्वं हेतुस्तदा वर्तेत, यदि मिथ्यात्वधर्मिणि रूप्ये मिथ्यात्वं सत्यं स्यात्। एवं च पक्षे हेतुसिद्ध्यर्थं सत्यत्वेनाङ्गीकृते रूप्यमिथ्यात्वे यदि मिथ्यात्वं साध्यते, तदा पक्षे न हेतुः स्यात्। तथाच हेतु-साध्ययोः पक्षे सहानवस्थानविरोध इत्यर्थः।

रूप्ये प्रपञ्चे च सत्यत्व-मिथ्यात्वे उभे अपि न स्त इत्यत्र दूषणान्तरमाह – नचेति॥ चकारो दूषणान्तरसमुच्चयार्थः। रूप्यस्य प्रपञ्चस्य चोभयानधिकरणत्वे वन्ध्यासुतवत् निःस्वरूपत्वापत्त्या त्वदनभिमतशून्यवादापातः स्यादित्यर्थः। उभयाभावस्त्वया

वन्ध्यासुतश्यामत्वादौ च न साध्याव्याप्तिशङ्केति ध्येयम्। उक्तोपाधेः पक्षाद् व्यावृत्तिमाह – मिथ्यात्वमिति॥ मिथ्यात्वं तु धर्मिसत्त्वस्य विरहरूपम्। अतो धर्मिसत्यत्वं नापेक्षते, प्रत्युत धर्मिसत्यत्वं प्रतिक्षिपति इति त्वत्प्रतिकूलमित्यर्थः॥ अन्यथेति॥ सत्त्वविरहरूपातिरिक्तं ब्रह्मभिन्नत्वादिकं पारिभाषिकं मिथ्यात्वं सत्यत्वपक्षेऽप्यविरुद्धमित्यर्थः।

अत्र वदन्ति – मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तिः। तत्र हि परस्परविरुद्धयोरेकमिथ्यात्वेऽपरसत्यत्वम्, यत्र मिथ्यात्वावच्छेदकमुभयवृत्ति न भवेत्; यथा परस्परविरहरूपयोः रजत-तदत्यन्ताभावयोः शुक्तौ, यथा वा परस्परविरहव्यापकयोः रजतभिन्नत्व-रजतत्वयोस्तत्रैव। तत्र निषेध्यतावच्छेदकभेदनियमात्। प्रकृते तु निषेध्यतावच्छेदकमेकमेव दृश्यत्वादि। यथा गोत्वाश्वत्वयोरेकस्मिन् गजे निषेधे गजत्वात्यन्ताभावव्याप्यत्वं निषेध्यतावच्छेदकमुभयोस्तुल्यम्, इति नैकतरनिषेधेऽन्यतरसत्त्वम्, तद्वत्। यथाच सत्यत्व-मिथ्यात्वयोर्न परस्परविरहरूपत्वम्, न वा परस्परविरहव्यापकत्वम्, तथोपपादितमधस्तात्। पररस्परविरहरूपत्वेऽपि विषमसत्ताकयोरविरोधात्, व्यावहारिकमिथ्यात्वेन व्यावहारिकसत्यत्वापहारेऽपि काल्पनिकसत्यत्वानपहारात्। तार्किकमतसिद्धसंयोग-तदभाववत् सत्यत्व-मिथ्यात्वयोः समुच्चयाभ्युपगमाच्च। एकसाधकेनापरस्य बाध्यत्वं विषमसत्ताकत्वे प्रयोजकम्; यथा शुक्तिरूप्य-तदभावयोः। अस्ति च प्रपञ्च-तन्मिथ्यात्वयोरेकब्रह्मज्ञानबाध्यत्वम्; अतस्समसत्ताकत्वाद् मिथ्यात्वबाधकेन प्रपञ्चस्यापि बाधाद् नाद्वैतहानिः– इति।

अत्रोच्यते; न तावत् परस्परविरहरूपयोरेकनिषेध्यतावच्छेदकावच्छिन्नत्वं सम्भवति। क्वाप्यदर्शनात्। गोत्वाश्वत्वादौ तु न परस्परविरहरूपत्वम्; अतो नोक्तदोषः। यथाच सत्यत्व-मिथ्यात्वयोः परस्परविरहरूपत्वम्, तथोपपादितमधस्तात्, उपपादयिष्यते च। यदपि च विषमसत्ताकयोरविरोध इत्युक्तम्, तदपि न। विषमसत्ताके सत्यत्व-मिथ्यात्वे किं रूप्येऽङ्गीक्रियेते? किं वा जगति? नाद्यः। त्वया 'रूप्यमिथ्यात्वं तात्त्विकमि'त्यग्र उक्तत्वेन तद्विरोधात्। रूप्ये मिथ्यात्वस्य व्यावहारिकत्वे बाध्यत्वापत्त्या रूप्ये सत्यत्वस्य तात्त्विकत्वापत्तेः। नान्त्यः; विषमसत्ताकयोस्तयोः प्रपञ्चे त्वयाऽनङ्गीकारात्। अत्रैव 'सत्यत्व-मिथ्यात्वे प्रपञ्चे समसत्ताके' इत्युक्तत्वाच्च। तथा सति अप्रातिभासिकत्वेनाङ्गीकृतस्य प्रपञ्चस्य व्यावहारिकमिथ्यात्वयुक्तस्य तात्त्विकत्वापत्तेर्दुर्वारत्वाच्च। सत्यत्वमिथ्यात्वयोस्समुच्चयस्त्व त्यन्तायुक्तः। त्वयाऽपि सत्यत्व-मिथ्यात्वयोः परस्परसमुच्चये विरोधाद् बिभ्यता सदसद्वै लक्षण्यस्य रूप्येऽङ्गीकाराच्च। यच्चोक्तम् – एकबाधकेनापरबाध्यत्वमित्यादि, तदपि न। परस्परविरहरूपयोरेकबाधकबाध्यत्वस्यासिद्धेः, शुक्तिरूप्य-शुक्तिभिन्नत्वयोः परस्परविरह

धर्मिणो रूप्यस्य मिथ्यात्वात्। तथाच प्रयोगः– रूप्यगतत्वेनोच्यमाने सत्यत्व-मिथ्यात्वे मिथ्या, मिथ्यात्वोपेतधर्मिकत्वात्। स्वप्नप्रतीतगजरूपवदिति। तथाच जगच्च सत्यं स्यादित्युक्तानुमानस्य रूप्ये व्यभिचारस्तदवस्थ इति भावः। ननु रूप्यमिथ्यात्वे मिथ्यात्वसाधकस्य मिथ्यात्वोपेतधर्मित्वस्य हेतोः रूप्यमिथ्यात्वे मिथ्यात्वाभावसाधकेन सामान्यव्याप्तिमूलकेनानुमानेन सत्प्रतिपक्षितस्य न रूप्यमिथ्यात्वे मिथ्यात्वरूपसाध्यज्ञानजनकत्वम्, अतो रूप्ये मिथ्याभूतमिथ्यात्वकत्वस्य हेतोरज्ञानाद् नोक्तानुमानस्य रूप्ये व्यभिचारः, इत्यतः सिद्धान्त्युक्तसामान्यव्याप्तावुपाधिमाह – परस्परेत्यादिना॥ धर्मी सन्निति॥ तथाच तत्रामिथ्यात्वमुपाधिः। अतस्तस्य हीनबलत्वात् तेन नास्य सत्प्रतिपक्षितत्वम्। अतो रूप्ये हेतुज्ञानसम्भवाद् व्यभिचारस्तदवस्थ इति भावः। उक्तसामान्यव्याप्तौ व्यभिचारमप्याह – नहीति॥ नहि – सत्यभूतस्य गौरत्वविरुद्धश्यामत्वस्यानधिकरणे वन्ध्यासुते तद्विरुद्धं गौरत्वं मिथ्याभूतं नास्ति, किन्तु सत्यभूतं गौरत्वमस्तीति युज्यते। किन्तु गौरत्वं तद्विरुद्धं श्यामत्वं चेत्युभयमपि वन्ध्यासुते मिथ्यैव; धर्मिण एव मिथ्यात्वात्। तथाचोक्तव्याप्तौ व्यभिचार इति भावः। ननु उक्तसामान्यव्याप्तौ विरुद्धत्वं न सहानवस्थितत्वादिसाधारणम्, किन्तु परस्परविरहरूपत्वम्। नच गौरत्वश्यामत्वे परस्परविरहरूपे। अतो नोक्तो व्यभिचार इत्यत आह – नवा स्वप्न इति॥ स्वप्ने स्वप्नावस्थायाम्। क्वचिदधिकरण इति शेषः॥ तत्रैवेति॥ तदधिकरण इत्यर्थः। स्वप्नावस्थायां दृष्टे क्वचिदधिकरणे सत्यभूतगजाभावविरहरूपस्य गजस्यानधिकरणत्वं वर्तते, गजविरहरूपस्य गजाभावस्य मिथ्याभूतस्य नाधिकरणत्वम्, किन्तु सत्यभूतस्यैव गजाभावस्याधिकरणत्वमिति नास्ति। किन्तु गजो गजाभावश्चेत्युभयमपि मिथ्यैव इति परस्परविरहरूपविरुद्धत्वगर्भाया अप्युक्तव्याप्तेर्व्यभिचार इति भावः।

रूप्यस्य धर्मिणो मिथ्यात्वात् तत्र सत्यत्व-मिथ्यात्वे परस्परविरहरूपे अपि मिथ्यैवेत्युक्तं दूषयति – प्रतिपन्नेति॥ धर्मिसत्त्वानपेक्षधर्मस्य सत्यत्वं धर्मिमिथ्यात्वेऽपि युक्तम्। तथाच त्वदुक्तहेतोरप्रयोजकत्वादस्मदुक्तहेतोर्न रूप्ये व्यभिचार इति भावः। ननु प्रतियोगित्वमपि धर्मो विना धर्मिणं नावतिष्ठते, वन्ध्यासुतादावपि नात्यन्ताभावप्रतियोगित्वम्, किन्त्वत्यन्ताभावे एव वन्ध्यासुतप्रतियोगिकत्वमित्यत आह – अनिर्वाच्यत्वभङ्ग इति॥ अत्यन्ताभावस्य वन्ध्यासुतप्रतियोगिकत्वे वन्ध्यासुतस्यापि तत्प्रतियोगित्वमवर्जनीयमेवेत्यादि वक्ष्यत इत्यर्थः। परोक्ते मिथ्यात्वोपतधर्मिकत्वे हेतौ धर्म्यसत्त्वप्रयुक्तसत्त्वाभाववत्त्वमुपाधिमाह – धर्म्यसत्त्व इत्यादिना॥ असत्त्वे सद्विलक्षणत्वे। असत्त्वम् सद्विलक्षणत्वम्॥

धर्मिसत्त्वेति॥ धर्म्यसत्त्वप्रयुक्तसत्त्वाभाववत्त्वमित्यर्थः। अयं च साधनावच्छिन्नसाध्यव्यापको बोध्यः। तेन ब्रह्मण्यारोपितमिथ्यात्वादौ न साध्याव्याप्तिः। नञ्द्वयान्तर्भावाच्च